5 4/.

GRIHYA—SÛTRA

BY

PÂRASKAR

With famous five Commentaries of Karak upâdhyâya, Jayrâm, Harihar, Gadâdhar and Vishwanâth

AND

further adorned with appendices known as Vâpyâdi-pratishthâ Kandikâ with Kâmdeva Bhâsya, Showcha Sûtrâ, Snân Sûtra with Harihar Bhâsya, and Shrâdha Sûtra with three Commentaries by Karak, Gadâdhar and Shrâdhar Kâshika by Krishnamisra & Bhojan Sutra

Edited & revised

BY

Several Scholars & learned Pandits of the Press

PRINTED AND PUBLISHED BY

KHEMRAJ SHRIKRISHNADAS

PROPRIETORS: SHRI VENKATESHWAR STEAM PRESS

7th KHETWADI., KHAMBATA LANE

BOMBAY.

श्रीः ।

पारस्करगृह्यसूत्रम् ।

श्रीकर्कोपाध्याय-जयरामाचार्य-हरिहरा-
चार्य-गदाधरदीक्षित-विश्वनाथप्रणीत-
भाष्यपञ्चकभूषितम् ।

कामदेवभाष्यसहितवाप्यादिप्रतिष्ठाकण्डिका-शौचसूत्र-
हरिहरभाष्योपेतस्नानसूत्र-कर्क-गदाधरकृतभाष्य-
कृष्णमिश्रकृतश्राद्धकाशिकाख्यव्याख्योपेतश्राद्ध-
सूत्र-भोजनसूत्ररूपपरिशिष्टविशिष्टं च ।

बहुभिर्विद्वद्भिर्भृशं संशोधितम् ।

क्षेमराज-श्रीकृष्णदास-श्रेष्ठिना

मुम्बय्याम्

स्वीये "श्रीवेङ्कटेश्वर" (स्टीम्)-मुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितम् ।

संवदब्दाः १९८६, शकाब्दाः १८५१.

मुद्रक और प्रकाशक–

खेमराज श्रीकृष्णदास,

मालिक–“श्रीवेङ्कटेश्वर” स्टीम्-प्रेस, बम्बई.

पुनर्मुद्रणादि सर्वाधिकार “श्रीवेङ्कटेश्वर” मुद्रणयन्त्रालयाध्यक्षाधीन है

ॐ तत्सत्त्र्यात्मने नमः ।

प्रस्तावना ।

अथ भाष्यपञ्चकभूषितपारस्करगृह्यसूत्रविषये किंचित्प्रास्ताविकं प्रस्तूयते—

संप्रति सुरगणजेगीयमानगुणास्पदस्यास्य भारतीयजनपदस्य, तदीयायाः समुदिताया जनतायास्तत्रापि विशेषतस्त्रैवर्णिकानां चानुपदं गुणैर्हीयमानता दीनता शोचनीयतैव समन्तादद्दीदृश्यते । तन्निदानं त्वविद्यासम्भूतवर्णाश्रमौपयिकविहितकर्माननुष्ठानजन्यो धर्मप्रमाद एवेति निर्विवादम् । तदित्थम्—धर्मप्रमत्तानामज्ञानोपहतात्मनामाधुनिकानां पण्डितम्मन्यानामौद्धत्यमूलकं स्वैराचारप्रचुरं महान्तं धर्मोपप्लवमसहमाना, दूयमानेन मानसेन तत्प्रतीकाराय यथाशक्ति यतमाना, धर्मप्रवृत्तिरेव तन्निरसनायालमिति मन्वाना जानाति, इच्छति, यतते इति नियमाज्ज्ञानपूर्विकाया एव प्रवृत्तेरभ्युपगमाद्धर्मस्य तत्तत्कर्मानुष्ठानगम्यत्वादनुष्ठानस्य च ज्ञानमन्तराऽसंभवात्तत्तत्कर्मानुष्ठानज्ञानसाधनभूतांस्तांस्तान्नानाविधान्धर्मग्रन्थांस्ततस्ततो नानादेशीयविद्वज्जनसकाशात्संपाद्य यथावकाशं प्रकाशयाम इत्यस्मदीयं शाश्वतिकं व्यसनं नाविदितं विदुषामनवरतानेकशास्त्राध्ययनाध्यापनपरिशीलनपराणाम् ।

एवं सातत्येन विदधद्भिः “स्मार्ताग्निकर्मपद्धतिप्रदर्शकं षोडशसंस्कारादिगृह्यकर्मणां प्रतिबोधकं मूलभूतं श्रीपारस्कराचार्यप्रणीतं **पारस्करगृह्यसूत्र**मेव, यत एतदनुरोधेनैव वाजसनेयिनां द्विजानां गर्भाधानादियावत्संस्काराः प्रवर्तन्ते, इह वर्णाश्रमानुद्दिश्य विहितोऽभ्युदयार्थः संस्कारादिरूपः प्रवृत्तिलक्षणो धर्मः स च स्वर्गादिसुखावाप्तिहेतुरपि सन्नीश्वरार्पणाधियाऽनुष्ठीयमानः फलानुसन्धानरहितो भवत्यन्तःकरणशुद्धये, शुद्धसत्त्वस्य चात्मज्ञाननिष्ठायोग्यताप्राप्तिद्वारा ज्ञानोत्पादकत्वेन च निःश्रेयसहेतुतामप्यधिगच्छति” इत्यादिकं विमृशद्भिश्चास्माभिरितः पूर्वमेवैतत्सूत्रं सूत्रोपात्तप्रतीकोक्तपूर्णमन्त्रपाठप्रदर्शक—पाठभेदाद्यवबोधकविविधावश्यकटिप्पणपरिष्कृतं मूलमात्रमेकम्, हरिहरभाष्योपेतमन्यदिति द्विविधोपाधिभिन्नं तत्तदधिकारिजनसौकर्य्याय द्वेधाऽऽविष्कृतमपि सूत्रप्रकाण्डस्यास्य मनीषिमतल्लिकाप्रणीतानि प्रभूतानि यानि भाष्याणि तानि सर्वाण्यपि यथासंभवमेकीकृत्य प्रचिकाशिषूणामस्माकं मनस्तोषायाक्षममेवाभूदतो महताऽनेहसा महताऽऽयासेन संपादितं गुरुगवेषणाफलायितं कर्कोपध्याय—जयरामाचार्य—हरिहराचार्य—गदाधरदीक्षित—विश्वनाथविरचितभाष्यपञ्चकभूषितं कामदेवभाष्यसहितवाप्यादिप्रतिष्ठाकण्डिका—शौचसूत्र—हरिहरभाष्योपेतस्नानसूत्र—कर्कगदाधरकृतभाष्य—कृष्णमिश्रकृतश्राद्धकाशिकोपस्कृतश्राद्धसूत्र—भोजनसूत्ररूपपरिशिष्टविशिष्टं संशोधनकार्याधिकृतैरनेकैर्विद्वन्महानुभावैर्भृशं संशोध्य प्रकाशितं चेदं सोपस्करं **पारस्करगृह्यसूत्र** पर्य्यालोच्य श्रौतस्मार्तकर्मानुष्ठानतत्परा दूरीकृतदुरितदूषणाः सदाचारभूषणाः सन्तः संतोषमेष्यन्तीति बाढमाशास्महे ।

अस्य प्रणेता भगवान्पारस्करो महर्षिः किं कात्ययनाद्भिन्न आहोस्वित् स एव ? अत्र प्रमाणान्तरानुपलम्भाद्वृद्धपरम्परोपदेशप्रसिद्ध्या कात्यायन एव वररुचिनाम्ना पारस्करनाम्ना च ख्यात इत्यवधार्यते—
“ वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् । पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥ ”
इत्यभियुक्तोक्तेः । विश्वामित्रगोत्रोत्पन्नोऽयमित्युक्तं **हरिवंशे** तद्यथा—“विश्वामित्रस्य च सुता देवरातादयः स्मृताः । विख्यातास्त्रिषु लोकेषु तेषां नामानि मे शृणु ॥ देवश्रवाः [illegible] कात्यायनाः स्मृताः ॥” इति ।

अत्र "गर्गादिभ्यो यञ् ४ । १ । १०५॥" इति यञ्, ततो यूनि " सर्वत्र लोहितादिकतन्तेभ्यः ४ । १ । १८ ॥" इति ष्फः, तस्यायनादेशे निष्पन्नः कतर्षिगोत्रापत्यं युवा कात्यायन इति । महर्षियाज्ञवल्क्यप्रधानशिष्येणानेनैव शुक्लयजुर्वेदकर्मणामनुष्ठानपद्धतिप्रदर्शकं षड्विंशत्यध्यायात्मकं कातीयं श्रौतसूत्रं गृह्याख्यं स्मार्तसूत्रं च प्रणीतं तथाऽष्टादशपरिशिष्टानि पाणिनिसूत्रवार्तिकानि च प्राणायिषत ।

अत्र कर्कोपाध्यायकृतभाष्यमुपजीव्यैव जयरामप्रभृतयो व्याख्यातारो व्याचख्युरिदं सूत्रं वैपुल्यविवक्षया । तत्रापि जयरामो मन्त्रान्व्याचष्ट । हरिहरः पद्धतिं तदपेक्षितं चेतरदप्यभ्यधात् । गदाधरस्तु मन्त्रान्व्यावृणोत् पद्धतिमदर्शयत्, प्रसक्तानुप्रसक्तत्वेन ज्योतिश्शास्त्रमनुसृत्य तत्तत्कर्मणि शुभाशुभविहितप्रतिषिद्धादियोगानुपपादयन्, ग्रन्थान्तरप्रतिपादितानि नैमित्तिकानि कर्माण्यपि यथाप्रसङ्गमवर्णयत्, तद्यथा—विवाहप्रसङ्गेनार्कोद्वाहम्, चतुर्थीकर्मप्रसङ्गेनार्तवदर्शनशान्त्यादिकम्, सोष्यन्तीकर्मप्रसङ्गेन यमलजननत्रिकप्रसवमूलजननशान्त्यादिकम्, प्रागूर्ध्वदन्तोत्पत्तिशान्तिप्रभृति चैत्यादि । विश्वनाथश्च परमतं प्रत्याचक्षाणः प्रायो न्यायोपन्यासेन व्याचष्ट, विशेषविवक्षया क्वचित्पद्धतिमप्यदर्शयदिति ।

एतन्मुद्रणावसरे श्री ५ महाराज--सर—कृष्णप्रतापशर्मसाहीवीरपुङ्गव (के, सी. आई. ई.) हथुआधीशानामाज्ञया तत्तदधिकारिजनेभ्यो वितरीतुमेव प्रकाशितकर्कोपाध्यायादिकृतभाष्यचतुष्टयोपेतं सपरिशिष्टं चेदं सूत्रं श्रीमद्भिर्महाराजकुमारबाबू**शिवप्रतापसाही**वर्मभिस्तत्कनिष्ठभ्रातृमहाराजकुमारबाबू**देवकीनन्दन**वर्मभिश्च पुनर्मुद्रणादिविषयकशाश्वतिकसर्वाधिकारप्रदानपुरस्सरमस्मभ्यं समर्प्यैतत्प्रकाशनाय प्रोत्साहिताः प्रकाममुपकृताश्च वयं तेभ्यः परःशतान्धन्यवादान्ददानास्तान्प्रत्यात्मनः सदाकालिकीं कृतज्ञतामे प्रकाशयामो न पारयामो विधातुमानृण्यम् ।

उपसंहृतौ समाहिततया बहुभिर्बहुशः शोधितेऽप्यस्मिन्ग्रन्थे मनुजनिष्ठनिसर्गभ्रमादुर्वरितान् प्रमादान् क्षमाविश्राणनपूर्वकं विशदीकृत्यैतत्संग्रहेणानुग्राह्य वारान्तरभाविमुद्रणे विशेषविधानायाज्ञया ज्ञापनीयाश्च वयमिति मुहुर्मुहुरावेदयामस्सप्रणिपातं गुणगृह्यान् धिषणावधीरितधिषणान्क्षमाभूषणान्सदयहृदयान्सहृदयमहोदयानित्यलमतिपल्लवितेन ।

आवेदकः—

क्षेमराज–श्रीकृष्णदासः,

"**श्रीवेङ्कटेश्वर**" मुद्रणयन्त्रालयाध्यक्षो–मुम्बईस्थः ।

॥ श्रीः ॥

अथ कर्कादिभाष्यपञ्चकभूषितपारस्करगृह्यसूत्रस्य विषयानुक्रमणिका ।

प्रथमकाण्डम् ।

विषयाः ।	पृष्ठाङ्काः	पङ्क्त्यङ्काः
प्रथमकाण्डिकामूलम्	१	१

प्रथमकण्डिकायाः कर्कभाष्यम् ।

विषयाः ।	पृष्ठाङ्काः	पङ्क्त्यङ्काः
भाष्यकर्तुर्मङ्गलाचरणम्	१	८
सूत्रकर्तृप्रातिज्ञावर्णनम्	,,	९
अथशब्दार्थः	,,	११
अतःशब्दार्थः	,,	१५
श्रौतस्मार्तयोः पौर्वापर्यविचारः	,,	१६
गृह्यस्थालीपाकशब्दार्थः	२	८
परिसमूहनादिपञ्चभूसंस्काराणां प्रयोजनम्	,,	१६
ब्रह्मासनविचारः	,,	२१
अपां प्रणयनम्	,,	२६
परिस्तरणम्	,,	२७
पात्राद्यासादनम्	,,	२८
पवित्रकरणम्	,,	,,
प्रोक्षणीसंस्कारः	,,	,,
पात्रादिप्रोक्षणम्	,,	२९
आज्यनिर्वापः	,,	३०
पर्यग्निकरणम्	,,	३०
स्रुवसंस्कारः	,,	३१
आज्योद्वासनम्	,,	३२
आज्यसंस्कारः	,,	,,
उपयमनकुशप्रयोजनम्	,,	३५
पर्युक्षणनिरूपणम्	३	१
एष एवेत्यादिसूत्रार्थः	,,	१

प्रथमकण्डिकाया जयराम भाष्यम् ।

विषयाः ।	पृष्ठाङ्काः	पङ्क्त्यङ्काः
भाष्यनिर्माणप्रयोजनस्ववंशवर्णनादि	,,	५
अथशब्दार्थः	,,	१८
अतःशब्दार्थः	,,	२२
श्रौतस्मार्तयोः पौर्वापर्यविचारः	३	२३
गृह्यस्थालीपाकशब्दार्थः	४	२
परिसमूहनादेः प्रयोजनचिन्तनम्	,,	७
ब्रह्मासनविचारः	,,	१२
अपां प्रणयनम्	,,	१६
पात्राद्यासादनम्	,,	१७
पवित्रकरणम्	,,	१८
प्रोक्षणीसंस्कारः	,,	,,
आसादितानां प्रोक्षणम्	,,	१९
आज्याधिश्रयणम्	,,	,,
पर्यग्निकरणम्	,,	२०
स्रुवसंस्कारः	,,	२१
आज्योद्वासनम्	,,	२२
प्रोक्षणीस्रुवादिसंस्कारप्रयोजनम्	,,	२४
निरुक्तहोमविधेः सार्वत्रिकत्वकथनम्	,,	२७

प्रथमकण्डिकायाहरिहरभाष्यम् ।

विषयाः ।	पृष्ठाङ्काः	पङ्क्त्यङ्काः
मङ्गलाचरणम्	,,	२९
ग्रन्थकर्तुः प्रतिज्ञा	,,	३०
अथातःशब्दार्थः	,,	३१
आधानादिसर्वकर्मसाधारणहोमविधिनिरूपणम्	,,	३३
परिसमूहनम्	५	२
उपलेपनम्	,,	,,
उल्लेखनम्	,,	३
उद्धरणम्	,,	४
अभ्युक्षणम्	,,	५
अग्निस्थापनम्	,,	,,
ब्रह्मासनम्	,,	६
प्रणयनम्	५	१०
परिस्तरणम्	,,	१३
पदार्थासादनम्	,,	,,
पवित्रकरणम्	,,	२०
प्रोक्षणीसंस्कारः	,,	२१
आसादितप्रोक्षणम्	,,	२५
आज्यनिर्वापः	,,	२७
अधिश्रयणम्	,,	२८
आज्यचर्वादीनां पर्यग्निकरणम्	,,	२९
उद्वासितानां स्थापनक्रमः	,,	३२
आज्योत्पवनादिसंस्कारनिरूपणम्	,,	३६
प्रोक्षणीश्च पूर्ववदितिसूत्रार्थः	,,	,,
उपयमनकुशादानम्	,,	३७
समिदाधानम्	,,	,,
पर्युक्षणादि	६	१
उक्तहोमविधेः सार्वत्रिकत्वकथनम्	,,	३

प्रथमकण्डिकाया गदाधरभाष्यम् ।

विषयाः ।	पृष्ठाङ्काः	पङ्क्त्यङ्काः
मङ्गलाचरणम्	,,	५
भाष्यकृतः प्रतिज्ञा प्रार्थना च	,,	६
अथशब्दार्थः	,,	८
अतःशब्दार्थः	,,	१०
श्रौतस्मार्तयोः पौर्वापर्यव्यवस्था	,,	११
गृह्यस्थालीपाकशब्दार्थः	,,	१४
परिसमूहनादीनां सार्वत्रिकत्वनिरूपणम्	,,	१९

विषयाः ।	पृ.	पं.
उल्लेखने मतविचारः	६	२०
स्मार्तेषु अध्वर्युयजमानयोः कस्य कर्तृत्वमिति विचारः	,,	२३
ब्रह्मासनविचारः	७	४
अपां प्रणयनम्	,,	१४
परिस्तरणम्	,,	१५
पात्राद्यासादनम्	,,	१६
पवित्रकरणम्	,,	२०
प्रोक्षणीसंस्कारः	,,	२१
पात्रादिप्रोक्षणम्	,,	२२
आज्यादीनामावापः	,,	२३
आज्याद्यधिश्रयणम्	,,	२४
पर्यग्निकरणम्	,,	२५
स्रुवसंस्कारः	,,	२६
तत्प्रयोजनम्	,,	२७
स्रुवसंस्कारविस्मरणे इतिकर्तव्यता	,,	२८
आज्याद्युद्वासनं तत्संस्कारश्च	,,	,,
पुनः प्रोक्षणीसंस्कारप्रयोजनम्	,,	३२
समिदाधानप्रकारः	,,	३३
समिल्लक्षणम्	,,	३५
समिदादिप्रमाणम्	,,	३९
एष एव विधिरित्यादिसूत्रार्थः	,,	४०

प्रथमकण्डिकाया विश्वनाथभाष्यम् ।

विषयाः ।	पृ.	पं.
भाष्यकर्तुर्मङ्गलाचरणम्	८	४
एतद्भाष्यकर्तव्याकर्तव्यत्वविचारः	,,	९
अथशब्दार्थः	,,	२९
अतःशब्दार्थः	,,	३९
गृह्यस्थालीपाकशब्दार्थः	९	१
परिसमूहनादीनां सार्वत्रिकत्वनिरूपणम्	,,	५
उल्लेपनम्	,,	६
उल्लेखनम्	९	६
उद्धरणम्	,,	,,
अभ्युक्षणम्	,,	७
आवसथ्याग्निहोत्राद्यग्न्याधानम्	,,	७
ब्रह्मासनास्तरणम्	,,	१२
पञ्चाशत्संख्याककुशबटुस्थापनम्	,,	१३
ब्रह्मशब्दविचारः	,,	१५
साक्षाद्ब्रह्मोपवेशने मतविचारः	,,	१६
अपां प्रणयनम्	,,	२१
परिस्तरणम्	,,	३३
पात्राद्यासादनम्	,,	३५
पवित्रकरणम्	,,	४२
प्रोक्षणीसंस्करणम्	,,	४३
पात्रादीनां प्रोक्षणम्	१०	१
आज्यनिर्वापः	,,	३८
आज्याद्यधिश्रयणम्	,,	३९
पर्यग्निकरणम्	,,	४०
स्रुवसंस्करणम्	,,	४१
तत्संमार्जनम्	,,	४२
प्रोक्षण्यभ्युक्षणम्	,,	४३
पुनःस्रुवसंस्करणम्	,,	,,
आज्योद्वासनम्	११	१
तत्संस्कारश्च	,,	२
प्रोक्षणीश्च पूर्ववदिति सूत्रार्थः	,,	३
उपयमनकुशादानम्	,,	७
समिदाधानम्	,,	,,
एष एवेत्यादिसूत्रार्थः	,,	११
द्वितीयकण्डिकामूलम्	,,	१३

द्वितीयकण्डिकायाः कर्कभाष्यम् ।

विषयाः ।	पृ.	पं.
आवसथ्याधानकालनिरूपणम्	,,	२३
दारकालशब्दार्थः	,,	२५
अधानकालविषये केचिन्मतम्	,,	२६
तत्खण्डनं स्वसिद्धान्तश्च	११	२७
दायाद्यकालनिरूपणम्	,,	३६
आधानकालविकल्पव्यवस्था	१२	१
वैश्यादिगृहादग्न्याहरणनिरूपणम्	,,	२
अरणिजन्याग्निपक्षनिरूपणम्	,,	३
चातुष्प्राश्यपचनवदितिकर्त्तव्यताविचारः	,,	६
स्थालीपाकेनाग्न्याधेयदेवताहोमनिरूपणम्	,,	१६
बर्हिर्होमः	,,	२८
ब्राह्मणभोजनम्	,,	२९

द्वितीयकण्डिकाया जयरामभाष्यम् ।

विषयाः ।	पृ.	पं.
आवसथ्याधाननिरूपणम्	,,	३१
दारकालशब्दार्थविचारः	,,	३३
पूर्वंचेत्यादिना सम्प्रदायमतप्रदर्शनम्	१३	५
दायाद्यकालविचारस्तद्व्यवस्था च	,,	६
चातुष्प्राश्यपचनवदितिकर्तव्यताविचारः	,,	११
तत्र केषाञ्चिदाचार्याणां मतम्	,,	१८
ये ते शतमिति मन्त्रार्थः	,,	२९
अयाश्चाग्ने इति मन्त्रार्थः	,,	३५
अयास्यग्नेरिति मन्त्रार्थः	१४	१२
ब्राह्मणभोजनमिति सूत्रार्थः	,,	१५

द्वितीयकण्डिकाया हरिहरभाष्यम् ।

विषयाः ।	पृ.	पं.
आवसथ्याधानम्	,,	१७
दारकालनिर्णयः	,,	१९
आधानाधिकारनिरूपणम्	,,	२०
आहरणपक्षे आधाननिरूपणम्	,,	२६

विषयाः ।	पृ.	पं.
कालातिक्रमप्रायश्चित्तकथनम्	१४	३१
आवसथ्यप्रशंसावाक्यानि	”	३५
प्रायश्चित्तसङ्कल्पवाक्यम्	१५	३
ततो ब्रह्मवरणम्	”	८
वैश्यगृहादग्न्यानयननिरूपणम्	”	११
आरणेयाग्निपक्षनिरूपणम्	”	१६
आरणेयाग्नेः प्राशस्त्यम्	”	१८
अग्न्याधेयदेवतानिरूपणम्	”	२१
आधानप्रकरणे देवतानिरूपणप्रयोजनम्	”	२५
स्विष्टकृन्निरूपणप्रयोजनकथनम्	”	३६
बर्हिर्होमानन्तरं प्राशनविचारः	”	३८
प्राशनान्ते वैश्वदेवाधिकारचिन्तनम्	१६	३
ब्राह्मणभोजनम्	१६	६
आधानपद्धतिः	”	१०
कालातिक्रमे प्राजापत्यादिप्रायश्चित्तनिरूपणम्	”	१३
प्रायश्चित्तानां सङ्कल्पवाक्यानि	”	१८
होमद्रव्यदाने सङ्कल्पवाक्यानि	”	२५
ऋष्यादिस्मरणम्	”	२८
ततो ब्रह्मवरणम्	”	३०
वैश्यादिगृहादाहरणविधिः	”	३३
अरण्यादीनां लक्षणादिनिरूपणम्	”	३६
मुख्यकालातिक्रमे विशेषः	१७	११
मन्थनविधिनिरूपणम्	”	१३
अष्टर्चहोमाद्याधानप्रयोगः	”	२८
अथ पुनराधाननिमित्तानि	१८	१८

विषयाः ।	पृ.	पं.
जन्तुभक्षणादिना अरण्योर्मन्थनायोग्यतायां नवीनारणिविधानम्	१९	८
अथ पक्षहोमविधिः	”	१३
कठश्रुतिपक्षे पक्षहोमविधानम्	”	२६
पिण्डपितृयज्ञपद्धतिः	”	३५
पिण्डोपरि यजमानवक्षःस्थलीमदानम्	२०	३
क्षुत्तृडादियुक्तस्य होमनिषेधः	”	२१

द्वितीयकण्डिकाया गदाधरभाष्यम् ।

विषयाः ।	पृ.	पं.
आवसथ्याधानशब्दार्थः	”	२५
दारकालशब्दार्थविचारः	”	२७
दायाद्यकालकथनम्	”	२८
दारकालदायकाल्योरधिकारिभेदेन व्यवस्था	”	३०
साङ्ख्यायनगृह्ये आधानकालः	”	३२
अत्र छन्दोगगृह्ये विशेषः	”	३४
तत्र कारिकायां विशेषः	”	३५
गृहपतौ मृते पुत्रादीनामाधानकालः	२१	५
कालातिक्रमे चान्द्रायणादिप्रायश्चित्तकथनम्	”	७
आधानमुहूर्त्तादिकथनम्	”	९
अथाधिकारिनिरूपणम्	”	३२
अथानधिकारिणः	२२	२
अग्न्याहरणार्थं योनिकथनम्	”	२५
अरणिप्रदानमित्यत्र प्रशब्दार्थकथनम्	”	२८
योनिपक्षे साङ्ख्यायनाऽदिमतान्तरकथनम्	”	२९
गृह्यान्तरोक्तयोनेराहरणनिषेधः	२३	५

विषयाः ।	पृ.	पं.
चातुष्प्राश्यपचनेतिकर्तव्यतायां पूर्वपक्षस्तत्खण्डनादि च	२३	८
श्रौतस्मार्त्ताधानार्थारणिलक्षणम्	”	११
मानप्रकारो यज्ञपार्श्वे	”	२५
इतरसंस्कारेष्वरणिलक्षणम्	”	३८
कुमाराग्निसिद्ध्यर्थं जाताऽरणिपक्षविधानम्	”	३९
यजमानाङ्गुलादिमानग्रहणम्	२४	५
सूत्रोक्तपक्षकथनम्	”	८
अथ पात्रलक्षणम्	”	१०
अग्न्याधेयदेवताकथनम्	”	३३
स्थालीपाकादौ व्रीहीणामेव चरुर्न यवानामित्यादिकथनम्	”	३४
अष्टाविति ग्रहणप्रयोजनकथनम्	२५	२
अग्न्याधेयदेवताभ्य इत्यस्य प्रयोजनकथनम्	”	६
बर्हिर्होमोत्तरं हुतशेषद्रव्यभक्षणादिविचारः	”	१३
बर्हिर्होमे प्रजापतेर्देवतात्वकथनम्	”	१८
ततो ब्राह्मणभोजनम्	”	२०
गर्भाधानादिकर्माङ्गभोजनीयब्राह्मणसङ्ख्यानियमः	”	२४
आवसथ्याधाने पदार्थक्रमः	”	३१
मृतपितृकस्य एकादशे द्वादशे वाऽहनि मातृपूजादिरहितमाधानम्	”	”
कालातिक्रमे प्राजापत्यादिप्रायश्चित्तानां सङ्कल्पवाक्यानि	”	३६
देयहोमद्रव्यप्रमाणकथनम्	२६	१

विषयाः ।	पृ.	पं.
तत्र संकल्पः	२६	२
होमद्रव्यविषये मतान्तरनिरूपणम्	”	४
कर्माङ्गगणपतिपूजनपुण्याहवाचनादीनां मूलवाक्यानि	”	६
पुण्याहवाचनप्रयोगः	”	१३
अथाभ्युदयिकश्राद्धविधिः	२७	३१
एककर्तृकेष्वनेकसंस्कारेषु युगपदुपस्थितेषु मातृपूजनाभ्युदयिकश्राद्धयोः सकृदनुष्ठानकथनम्	”	३५
वसोर्धारानिरूपणम्	”	४०
गौर्यादिषोडशमातृनामानि	२८	१
नवदैवत्यं पार्वणत्रयात्मकं वृद्धिश्राद्धं तत्क्रमश्च	”	३
वृद्धिश्राद्धकालनिरूपणम्	”	१३
संकल्पादौ प्रथमाविभक्तेरावश्यकत्वकथनम्	”	१३
तत्रैव नामगोत्रादिविषये आश्वलायनादिमतम्	”	१९
वृद्धिश्राद्धे पिण्डदानादिव्यवस्था	”	२३
आभ्युदयिके कर्तृनिर्णयः	”	२७
संकल्पविधिना प्रयोगः	”	३६
मातृपूजाप्रकारः	”	३८
नान्दीश्राद्धं त्रिविधम्	२९	९
निमित्तभेदात्कालभेदनिरूपणम्	”	१०
आधानाङ्गसविस्तराभ्युदयिकश्राद्धप्रयोगः	”	१४
स्मार्ताग्न्याधानसंकल्पवाक्यम्	३०	३७
वैकल्पिकावधारणम्	”	३८
हरिहरमते ब्रह्मवरणमरणिप्रदानप्रकारश्च	”	४०
हरिहरमतनिराकरणम्	३०	४१
ततः समेखलवृत्तकुण्डनिर्माणम्	३१	३
ततः परिसमूहनादिसंस्कारानिरूपणम्	”	५
अरणिपक्षे मन्थनकर्तृनिर्णयः	”	५
ऋष्यादिस्मरणविचारः	”	८
ततो ब्रह्मवरणाद्याधानप्रयोगकथनम्	”	११
मणिकावधानं तत्क्रमश्च	”	३५
आधानसिद्धेऽग्नौ नैमित्तिकहोमादिसम्भवासंभवादिचिन्तनम्	”	३९
आधानमध्ये पत्न्यां रजस्वलायां विशेषः	३२	७
तत्र पत्न्यां रजस्वलायां प्रायश्चित्तकथनम्	३२	११
अथ पुनराधाननिमित्तानि	”	१६
अथ पुनराधाने पदार्थक्रमो निमित्तभेदेन प्रायश्चित्तनिरूपणम्	३५	२५
प्रायश्चित्तसङ्कल्पवाक्यानि	”	३२
पुनराधानसंकल्पः	”	३६
सभार्यस्य प्रवासप्रसक्तोऽग्निसमारोपविधिः	”	३७

द्वितीयकण्डिकाया विश्वनाथभाष्यम्।

विषयाः ।	पृ.	पं.
आवसथ्याधानपदार्थे प्रश्नोत्तरविचारः	३६	१०
आवसथ्याधानकालनिर्णयः	”	१३
दायाद्यकालनिरूपणम्	”	१४
अधिकारिभेदेन दारकालदायकाल्योर्व्यवस्थितिः	”	१६
उपलक्षणं चैतत्	”	१७
तत्रैव शाङ्खायनगृह्यकारोक्तिः	३६	१८
आवसथ्याधानं कथं करणीयम्	”	२१
वैश्यगृहादग्न्याहरणम्	”	२५
अतिप्रसक्तत्वे आह	”	२८
तादृशवैश्यालाभे ब्राह्मणगृहादग्न्याहरणम्	”	२९
तत्रायं पदार्थक्रमः	”	३०
संकल्पानन्तरमध्वर्युवरणम्	”	३५
ततो यजमानतिलककरणम्	”	३६
यजमानपत्न्योर्वस्त्रपरिधानम्	”	३९
शान्तिपाठपुरःसरं वैश्यगृहगमनम्	३७	२
तादृशवैश्याभावे ब्राह्मणगृहादग्न्याहरणम्	”	३
ततः संवत्सरपूर्तिपर्यन्तं चतुरध्वर्युप्रभृतिभोजनम्	”	९
अत्र केचिन्मतानिरूपणम्	”	११
आरणेयपक्षकथनम्	”	१६
अरणिप्रदानमेके इत्यस्यार्थः	”	”
पदार्थक्रमः	”	२७
कालातिक्रमे प्रायश्चित्ताचरणम्	”	२९
तत आध्यानपूर्वदिने संकल्पादि, अध्वर्युवरणब्राह्मणाशीर्वादग्रहणादि	”	३०
पूर्वद्वारेण यजमानप्रवेशादि	”	३४
यजमानाय अरणीप्रदानम्	”	३५
एके अध्वर्यवे वरदानमिच्छन्ति	”	३९

विषयाः ।	पृ.	पं.
आपूर्णाहुति यजमानकृतवाग्यमनम्	३७	४२
सूर्ये उदितेऽनुदिते वा मन्थनम्	,,	४४
उत्तराग्राधरारणिनिधानम्	३८	१
देवयोनौ प्रमन्थनम्	,,	३
जातेऽग्नावध्वर्यवे वरदानम्	,,	४
ततः कार्यक्रमकथनम्	,,	६
वाग्विसर्जनादि	,,	९
अग्न्याधेयदेवतेत्यादिशब्दार्थः	,,	१३
आज्याहुतौ अष्टमन्त्रोच्चारणम्	,,	२०
स्थालीपाकहोमानन्तरमष्टर्चहोमः	,,	२६
बर्हिर्होमानन्तरं हुतशेषद्रव्यभक्षणम्	,,	३२
सर्वप्रायश्चित्तहोमः	,,	३६
ततो ब्राह्मणभोजनम्	,,	३९
कर्मसमाप्तौ ब्राह्मणभोजने शाङ्खायनगृह्यकारमतम्	,,	४१
प्रयोगश्चैवम्	३९	३
आवसथ्ये एकब्राह्मणभोजनविषयकमतखण्डनम्	,,	५
यजमानाय द्विजानामाशीर्दानम्	,,	६
वर्षमाधानाकरणे चान्द्रायणादि	,,	८
मासाद्यतिक्रमे उपोषणादि	,,	८
तदेव व्याघ्रपादेनाप्युक्तम्	,,	११
संवत्सराधिककालातिक्रमे स्कन्दपुराणोक्तप्रायश्चित्तम्	,,	१५
मौवत्कालमहोमस्तीद्वषये भारद्वाजगृह्यकारेणोक्तम्	,,	१७

विषयाः ।	पृ.	पं.
प्रसङ्गात्पुनराधाननिमित्तानां निरूपणम्	३९	१९
तृतीयकण्डिकामूलम्	,,	३७

तृतीयकण्डिकायाः कर्कभाष्यम् ।

विषयाः ।	पृ.	पं.
दाराहरणकथनम्	४०	२६
आचार्यादिषडर्घ्यकथनम्	,,	२८
आचार्यादीनां लक्षणानि	,,	२९
अर्हणकालनिरूपणम्	,,	३३
आसनाहरणार्घ्यान्वेषणे	,,	३५
विष्टराद्याहरणनिरूपणम्	४१	१
विष्टरादिशब्दार्थः	,,	२
विष्टरादिशब्दोच्चारणनिरूपणम्	,,	६
वर्ष्मोऽस्मीति मन्त्रविनियोगचिन्तनम्	,,	८
द्वितीयविष्टरदानप्रयोजननिरूपणम्	,,	१०
पादप्रक्षालने वामस्य प्राथम्यकथनम्	,,	१२
ब्राह्मणश्चेदर्घ्यस्तदा दाक्षिणप्राधान्यम्	,,	१४
अर्घग्रहणादि	,,	१६
मधुपर्कप्रतीक्षणम्	,,	१९
मधुपर्कस्य सव्यपाणिकरणम्	,,	२०
मधुपर्कस्य त्रिर्निरुक्षणम्	,,	२३
तत्प्राशनम्	,,	२४
पुत्रादीनां शेषदानम्	,,	२६
प्राणाद्याभिमर्शनम्	,,	२८
आचान्तोदकायेति सूत्रार्थविचारः	,,	३१
मातारुद्राणामित्यादिमन्त्रान्ते पदान्तरोहविचारः	४२	१
यज्ञविवाहयोः पश्वालम्भनाविचारः	,,	५
यद्यप्यसक्तादीति सूत्रार्थः	,,	८

तृतीयकण्डिकाया जयरामभाष्यम् ।

विषयाः ।	पृ.	पं.
दाराहरणाभिधानम्	४२	११
षडर्घ्यविभागस्तल्लक्षणानि च	,,	१२
संवत्सराद्यर्हणकालनिरूपणम्	,,	१५
विष्टराहरणम्	,,	१८
अर्घशब्दार्थः	,,	१९
मधुपर्कप्रपञ्चः	,,	२१
वर्ष्मोऽस्मीति मन्त्रार्थः	,,	२६
द्वितीयविष्टरप्रदानकालः	,,	३०
विराजो दोहोऽसीति मन्त्रार्थः	,,	३५
आपः स्थेति मन्त्रार्थः	४३	५
समुद्रं व इति मन्त्रार्थः	,,	८
आमागन्निति मन्त्रार्थः	,,	१२
नमः श्यावेत्यादिमन्त्रार्थः	,,	१९
त्रिः प्राश्नातीत्यत्र त्रिर्ग्रहणप्रयोजनकथनम्	,,	२५
मधुपर्कोच्छिष्टभक्षणे उच्छिष्टदोषाभावकथनम्	,,	२७
यन्मधुन इति मन्त्रार्थः	,,	,,
मधुपर्कशेषप्रातिपत्तिविधानम्	,,	३२
तत्र मतान्तरकथनम्	,,	३३
वाङ्म इत्यादिमन्त्रार्थः	४४	३
माता रुद्राणामिति मन्त्रार्थः	,,	८
उत्सर्गपक्षकथनम्	,,	१३
पश्वालम्भविषये मतान्तरप्रदर्शनम्	,,	१६
यद्यपीति सूत्रार्थप्रदर्शनम्	,,	१८

तृतीयकण्डिकाया हरिहरभाष्यम् ।

विषयाः ।	पृ.	पं.
षडर्घ्यपुरुषकथनम्	,,	२१

विषयाः ।	पृ.	पं.
आचार्यादिलक्षणम्	४४	२२
संवत्सराद्यर्हणकालविधानम्	,,	२६
अर्हणप्रकारप्रदर्शनम्	,,	२८
विष्टरादिपदार्थलक्षणानि	४५	१
विष्टरप्रतिग्रहः	,,	८
पादप्रक्षालनम्	,,	१३
ब्राह्मणे विशेषः	,,	१५
अर्घप्रतिग्रहणम्	,,	१७
मधुपर्कप्रतीक्षणम्	,,	२४
तद्ग्रहणम्	,,	२५
त्रिर्निरुक्षणम्	,,	२९
प्राशनम्	,,	३२
मधुपर्कशेषप्रतिपत्तिविधानम्	४६	१
प्राणादिसम्मर्शनम्	,,	५
पश्वालम्भकथनम्	,,	१३
उत्सर्गकथनम्	,,	१८
यद्यालभेतेत्यादिस्मृतिविरोधे व्यवस्थाप्रदर्शनम्	,,	२३
गवालम्भनिषेधनिरूपणम्	,,	२७
यद्यप्यसकृदिति सूत्रार्थः	,,	२८

तृतीयकण्डिकाया गदाधरभाष्यम् ।

विषयाः ।	पृ.	पं.
षडर्घ्येति सूत्रकथनम्	,,	३४
आचार्याद्यर्घ्यलक्षणकथनम्	,,	३६
संवत्सराद्यर्हणकालविचारः	४७	१
अर्हणप्रकारनिरूपणम्	,,	४
विष्टरलक्षणं तत्र मतान्तरप्रदर्शनम्	,,	८
पाद्यलक्षणं तत्र मतान्तरप्रदर्शनम्	,,	११
अर्घशब्दार्थस्तत्र मतान्तरं च	,,	१२
मधुपर्ककथनम्	,,	१४
विष्टरप्रतिग्रहः	४७	१७
वर्ष्मोऽस्मीति मन्त्रस्य विनियोगविचारः	,,	२०
वर्ष्मोऽस्मीति मन्त्रार्थः	,,	२१
द्वितीयविष्टरप्रयोजनकथनम्	,,	२५
विराजो दोहोऽसीति मन्त्रार्थः	,,	३०
आपः स्थेति मन्त्रार्थः	,,	३४
समुद्रं व इति मन्त्रार्थः	,,	३७
आमागॅन्निति मन्त्रार्थः	४८	३
पारिभाषिको हिंसाशब्दार्थः	,,	६
दक्षिणस्यानामिकयेत्यत्र दक्षिणपदग्रहणप्रयोजनम्	,,	११
नमःश्यावेति मन्त्रार्थः	,,	१२
उच्छिष्टस्यैव मन्त्रोच्चारणम्	,,	१९
यन्मधुन इति मन्त्रार्थः	,,	२०
अध्याहारानुषङ्गयोर्विशेषः	,,	३१
प्राणायतनस्पर्शविषये हरिहरमतप्रदर्शनं तत्खण्डनं च	,,	३७
वाङ्म इत्यादिमन्त्रार्थः	,,	३९
माता रुद्राणामिति मन्त्रार्थः	४९	८
गवालम्भनिषेधकथनम्	,,	१६
यद्यप्यसकृदिति सूत्रार्थविचारः	,,	२०
वरशाखया मधुपर्कदानम्	,,	२७
तत्र याज्ञिकादिमतकथनम्	,,	२९

तृतीयकण्डिकाया विश्वनाथभाष्यम् ।

विषयाः ।	पृ.	पं.
आचार्यत्वादिधर्मेषु जातिनियमस्तत्खण्डनं च	,,	२२
आचार्यर्त्विगादिलक्षणकथनम्	४९	३७
प्रतिसंवत्सरानर्हयेयुरित्यस्यार्थः	५०	३
अर्चकानामृत्विगर्चने विशेषः	,,	५
कथमर्हणमित्यपेक्षायामाह	,,	७
अर्चकपुरुषकर्तृकविष्टराद्याहरणम्	,,	१४
अर्च्यार्चकेतरपुरुषकर्तृकं त्रिरुच्चारणम्	,,	१५
विष्टरप्रतिग्रहः	,,	१७
पादाधोविष्टरस्थापनम्	,,	२०
आसीनायेत्यत्र चतुर्थ्याः मतान्तरत्वेनाविवक्षितत्वं विवक्षितत्वं च	,,	,,
विराजो दोह इत्यादिना मन्त्रेण पादप्रक्षालनम्	,,	२२
अर्घप्रतिग्रहणम्	,,	२३
आमागान्नित्यनेन आचमनम्	,,	२७
मधुपर्केक्षणम्	,,	२८
मधुपर्कस्य त्रिवारालोडनम्	,,	३१
त्रिर्निरुक्षणम्	,,	,,
त्रिः प्राशनम्	,,	३२
प्राणादिसम्मर्शनम्	,,	३५
आलम्भपक्षकथनम्	,,	४२
उत्सर्गपक्षे गवे तृणदानम्	,,	४३
गोयज्ञे कर्तव्यताविशेषस्य वक्ष्यमाणत्वम्	,,	४५
मांसवर्जितार्घनिषेधः	५१	१
विवाहे क्रतौ वाऽनुष्ठानावश्यकत्वम्	,,	२

विषयाः ।	पृ.	पं.
आलम्भस्तु कलावनादरणीयः	५१	३
यद्यप्यसकृदिति सूत्रार्थविचारः	,,	४
सोमे एव ऋत्विङ्मधुपर्ककथनम्	,,	६
सर्वेषामभावे कन्यायाः स्वयंवरणम्	,,	८
तत्र कन्यादानविधिः	,,	९
चतुर्थकण्डिकामूलम्	,,	२४

चतुर्थकण्डिकायाः कर्कभाष्यम् ।

विषयाः ।	पृ.	पं.
पाकयज्ञकथने संगतिप्रदर्शनम्	५२	७
हुतादिपाकयज्ञानां स्वरूपम्	,,	९
उपलेपनादिसंस्काराणां कथने मतान्तराणि	,,	१५
उदगयनादिविवाहकालकथनम्	,,	२४
कुमार्या इति सौत्रपदप्रयोजनम्	,,	२८
शूद्रास्त्रीविचारः	,,	३३
वस्त्रपरिधापनकर्तृविचारः	५३	१
आदाय गृहीत्वेति सौत्रपदयोः प्रयोजनम्	,,	१५

चतुर्थकण्डिकाया जयरामभाष्यम् ।

विषयाः ।	पृ.	पं.
पाकयज्ञकथनाभिसन्धिनिरूपणम्	,,	२१
हुतादिपाकयज्ञलक्षणानि	,,	२३
उद्धृतावोक्षितग्रहणविषये मतान्तरप्रदर्शनम्	,,	२७
तत्र सूत्रकृदभिप्रायप्रदर्शनम्	,,	३०
निर्मन्थ्याग्नेर्विकल्पप्रदर्शनम्	५३	३३
उदगयनादिविवाहकालकथनम्	,,	३५
नक्षत्रकथनम्	५४	३
शूद्रापरिणयविचारः	,,	५
वस्त्रपरिधापनकर्तृविचारः	,,	८
जरां गच्छेति मन्त्रार्थः	,,	१८
या अकृन्तान्निति मन्त्रार्थः	,,	२३
समञ्जन्त्विति मन्त्रपाठविचारः	,,	३१
समञ्जन्त्विति मन्त्रार्थः	,,	३२
यदैषीति मन्त्रार्थः	५५	२
अघोरेति मन्त्रार्थः	,,	८

चतुर्थकण्डिकाया हरिहरभाष्यम् ।

विषयाः ।	पृ.	पं.
पाकयज्ञशब्दार्थः	,,	२८
हुतादिभेदेन पाकयज्ञविभागस्तल्लक्षणं च	,,	३१
विवाहादिपञ्चकर्मसु बहिःशालाविधानम् ।	,,	३४
उदगयनादिविवाहकालकथनम्	५६	९
विवाहनक्षत्रनियमः	,,	१३
अमन्त्रकशूद्राविवाहविचारः	,,	१९
शूद्राविवाहनिषेधः	,,	२३
उत्तरीयपरिधापनकर्तृविचारः	,,	३७
गोत्रोच्चारणम्	५७	१५
कन्यादानप्रयोगः	,,	१७
कन्यादानाधिकारिनिरूपणम्	,,	३२

चतुर्थकण्डिकाया गदाधरभाष्यम् ।

विषयाः ।	पृ.	पं.
हुतादिपाकयज्ञचातुर्विध्यं तल्लक्षणं च	५८	६
प्रकारकथने भर्तृयज्ञमतप्रदर्शनम्	[illegible]	[illegible]
विवाहमण्डपलक्षणम्	५८	१४
विवाहवेदीलक्षणम्	,,	१५
उपलेपनाद्यग्निसंस्कारकथनप्रयोजनम्	,,	२१
विवाहे निर्मन्थ्याग्निविचारः	,,	२७
उदगयनादिविवाहकालकथनम्	,,	२९
आपूर्यमाणपक्षविचारः	,,	३१
नक्षत्रकथनम्	,,	३९
संवत्सरादिकन्याविवाहकालनिरूपणम्	५९	३
गौर्यादिसंज्ञाविधानम्	,,	९
विवाहोपयुक्तमासविचारः	,,	१९
ज्येष्ठमासजन्ममासयोर्ज्येष्ठापत्यविवाहनिषेधः	,,	२३
तदपवादः पराशरस्मृतौ	,,	२९
अथ गुर्वादिबलम्	,,	३५
लुप्तसंवत्सरलक्षणम्	६०	६
सिंहस्थगुरोरपवादः	,,	,,
घातचन्द्रकथनम्	,,	११
अकालवृष्ट्यादिकथनम्	,,	१५
अस्यापवादः	,,	२४
प्रतिकूलविचारः	,,	२५
तत्र सङ्कटे मेधातिथिमतम्	,,	३२
मासिकविषये शाट्यायन्यादिमतम्	६१	१
वृद्धिं विनाऽपकर्षे दोषकथनम्	,,	२
शूद्राविवाहविचारः	,,	११
अहतवस्त्रलक्षणम्	,,	१६
जरां गच्छेति मन्त्रार्थः	,,	१८
या अकृन्तन्निति मन्त्रार्थः	,,	२४
समञ्जनपदार्थविचारः	,,	३०
समञ्जन्त्विति मन्त्रार्थः	,,	३३
आदाय गृहीत्वेति सौत्रपदविचारे कर्कमतोपन्यासः	,,	३९

विषयाः । पृ. पं.
कन्याद्रव्यस्याप्रतिग्रहयोग्यत्वविचारः ६२ १
यदैषीति मन्त्रार्थः ,, ७
कन्यादातृक्रमकथनम् ,, १०
अप्रकृतिस्थपित्रादिकर्तृकविवाहसिद्ध्यासिद्धिविचारः ,, १३
अघोरेति मन्त्रार्थः ,, २४

चतुर्थकण्डिकाया विश्वनाथभाष्यम् ।

साग्नेश्चतुर्विधपाकयज्ञकथनम् ६३ २
चतुर्विधहुतादेर्लक्षणानि ,, २
पाकयज्ञशब्दार्थे मतान्तरकथनम् ,, ४
चत्वार इति पदप्रयोजननिरूपणम् ,, ६
कारिकायामपि तस्यैव कथनम् ,, ७
विवाहादिपञ्चकर्मणां मण्डपेऽनुष्ठानम् ,, ९
विवाहे मतान्तरपुरःसरं निर्मन्थ्याग्निविचारः ,, १३
विवाहकालकथनम् ,, १५
नक्षत्रविशेषकथनम् ,, १६
वैवाह्यस्त्रीकथनम् ,, २०
शूद्रापरिणयनविचारः ,, २२
अथैनामित्यत्राथशब्दप्रयोजनकथनम् ,, २३
पित्राप्रत्तामित्यादौ पितृपदं पितामहादीनामप्युपलक्षकम् ,, २८
वरकर्तृकं कन्येक्षणम् ,, ३४
पञ्चमकण्डिकामूलम् ,, ३५

पञ्चमकण्डिकायाः कर्कभाष्यम्।

आघारादिपदार्थकथनम् ६४ २५
जयामन्त्रेषु चतुर्थ्यन्तप्रयोगविचारः ६५ ४

विषयाः । पृ. पं.
जयाभ्यातानहोमयोरैच्छिकत्वकथनम् ६५ ६

पञ्चमकण्डिकाया जयरामभाष्यम् ।

आघारादिपदार्थकथनम् ,, १५
सर्वप्रायश्चित्तेति सौत्रपदप्रयोजनप्रदर्शनम् ,, २१
जयामन्त्रार्थः ,, २४
अभ्यातानमन्त्रार्थः ,, २५
अग्निरैत्वित्यादिमन्त्रार्थः ६६ १८

पञ्चमकण्डिकाया हरिहरभाष्यम् ।

सर्वकर्मसाधारणपरिभाषाकथनम् ६७ १०
स्विष्टकृद्धोमस्य कर्मविशेषे स्थलान्तरकथनम् ,, २४
आवापपदार्थप्रदर्शनम् ,, २९
राष्ट्रभृदादिमन्त्रप्रदर्शनम् ,, ३१

पञ्चमकण्डिकाया गदाधरभाष्यम् ।

उपवेशनाविचारः ६८ १६
आघारादिपदार्थकथनम् ,, २४
राष्ट्रभृदाद्यनुष्ठानकालप्रदर्शनम् ६९ १
राष्ट्रभृदादिमन्त्रप्रदर्शनम् ,, २
जयामन्त्रार्थः ,, ११
चतुर्थ्यन्तजयामन्त्रोच्चारणविचारः ,, २२
अभ्यातानमन्त्रार्थः ,, २८
अग्निरैत्वित्यादिमन्त्रार्थः ,, ३५

पञ्चमकण्डिकाया विश्वनाथभाष्यम् ।

अग्नेः पश्चाद्वरोपवेशनम् ७० २६
तद्दक्षिणतः कन्योपवेशनम् ,, २६
आघारादिपदार्थकथनम् ,, २९
सर्वस्मिन् होमे आहुतिचतुर्दशकस्य नियमेन कथनम् ,, ३२

विषयाः । पृ. पं.
राष्ट्रभृदादिमन्त्रप्रदर्शनम् ७० ३५
जयाहुतीनां देवताप्रदर्शनम् ७१ ३
प्रयोगश्चैवम् ,, ४
अभ्यातानानां देवताप्रदर्शनम् ,, ७
प्रयोगश्चैवम् ,, ११
षष्ठकण्डिकामूलम् ,, २२

षष्ठकण्डिकायाः कर्कभाष्यम् ।

लाजाहोमविधानम् ,, ३५

षष्ठकण्डिकाया जयरामभाष्यम् ।

लाजाहोमविधिः ७२ २
अर्यमणमित्यादि मन्त्रत्रयार्थः ,, ५
गृभ्णामीति मन्त्रार्थः ,, १७

षष्ठकण्डिकाया हरिहरभाष्यम् ।

लाजाहोमविधानम् ७३ २
कुमारीदक्षिणहस्तग्रहणम् ,, ८

षष्ठकण्डिकाया गदाधरभाष्यम् ।

कुमार्या भ्रातेति सूत्रार्थः ,, १७
लाजाहोमे कारिकाकारमतप्रदर्शनम् ,, २४
भ्रातृविचारः ,, २६
अर्यमणमित्यादिमन्त्रार्थः ,, २८
गृभ्णामीति मन्त्रार्थः ७४ ५

षष्ठकण्डिकाया विश्वनाथभाष्यम् ।

मिलितेनाञ्जलिना तिष्ठन्त्याः कन्यायाः लाजानामग्नौ हवनम् ,, २३
विवाहप्रधानकर्मकथनम् ,, २४
सप्तमकण्डिकामूलम् ,, २९

सप्तमकण्डिकायाः कर्कभाष्यम् ।

अश्मारोहणविधानम् ७५ १
त्रिः परिणीतामिति त्रिःपदप्रयोजनप्रदर्शनम् ,, ८

विषयाः । पृ. पं.

सप्तमकण्डिकाया जयराम-भाष्यम् ।

आरोहेममिति मन्त्रार्थः ७५ ११
सरस्वतीत्यादिगाथार्थः ,, १६
तुभ्यमग्र इत्यादिमन्त्रार्थः ,, २३

सप्तमकण्डिकाया हरिहर-भाष्यम् ।

अश्मारोहणविधानम् ,, ३३
परिक्रमणानन्तरमितरथावृत्तिनिषेधः ७६ १२

सप्तमकण्डिकाया गदाधर-भाष्यम् ।

अश्मारोहणे वधूदक्षिणपादग्रहणविचारः ,, १८
आरोहेममिति मन्त्रार्थः ,, २२
सरस्वतीत्यादिगाथामन्त्रार्थः ,, २८
तुभ्यमग्र इति मन्त्रार्थः ,, ३५
इतरथावृत्तिविषये हरिहरमतप्रदर्शनम् ७७ ४
तत्खण्डनं च ,, ७

सप्तमकण्डिकाया विश्वनाथभाष्यम् ।

गानानन्तरं वधूवरयोरग्निपरिक्रमणम् ,, २५
मन्त्रावृत्त्या कुमार्या आहुतित्रयदानम् ,, २७
अष्टमकण्डिकामूलम् ,, ३१

अष्टमकण्डिकायाः कर्कभाष्यम् ।

सप्तपदीविधानम् ७८ १६
ग्रामशब्दार्थकथनम् ,, ३४
त्रिरात्रनियमः ७९ ९

अष्टमकण्डिकाया जयरामभाष्यम् ।

एकमिष इत्यादिमन्त्रार्थः ,, १३
आपः शिवा इति मन्त्रार्थः ,, १८
मम व्रते इति मन्त्रार्थः ,, २४
सुमङ्गलीरिति मन्त्रार्थः ,, २९

विषयाः । पृ. पं.

इह गाव इति मन्त्रार्थः ८० १
ध्रुवमसीति मन्त्रार्थः ,, १०

अष्टमकण्डिकाया हरिहर-भाष्यम् ।

सप्तपदीविधानम् ,, १९
दृढपुरुषविचारः ८१ ९
वरशब्दार्थः ,, १६
अभ्रातृककन्याविवाहविचारः ,, १८
त्रिरात्रादिनियमकथनम् ,, ३१
अथ पद्धतिः ८२ ३
मधुपर्कप्रयोगः ,, ६
कन्यादानप्रयोगः ८३ ११
होमप्रयोगः ,, ३८
लाजाहोमादिर्ध्रुवदर्शनान्तः प्रयोगः ८५ १९

अष्टमकण्डिकाया गदाधर-भाष्यम् ।

एकमिष इत्यादिमन्त्रार्थः ८६ ३६
आपः शिवा इति मन्त्रार्थः ८७ ३
हृदयालम्भनमन्त्रार्थः ,, १२
सिन्दूरदानरूपमङ्गलकरणम् ,, १७
सुमङ्गलीरिति मन्त्रार्थः ,, १८
दृढपुरुषविचारः ,, २६
इह गाव इति मन्त्रार्थः ,, २८
मङ्गलसूत्रादिलौकिकाचारप्रदर्शनम् ,, ३१
वरशब्दार्थविचारः ८८ १
अभ्रातृककन्याविवाहविचारः ,, ५
ध्रुवप्रदर्शने कर्कमतोपन्यासः ,, ९
ध्रुवमसीति मन्त्रार्थः ,, १२
त्रिरात्रादिनियमः ,, १७
अथ विवाहे पदार्थक्रमः ,, २२
तत्र गृहस्थाश्रमावश्यकता ,, ,,
कन्यालक्षणविचारः ,, २९

विषयाः । पृ. पं.

कन्याया आभ्यन्तरलक्षणबोधकमाश्वलायनगृह्यसूत्रम् । ८८ २८
आश्वलायनगृह्यसूत्रार्थः ,, ३३
अत्रैवं क्रमः ,, ३८
अनन्यपूर्विकेत्यादिपदानामर्थः ८९ ३
सापिण्ड्यविचारः ,, ५
संक्षिप्तगोत्रप्रवरनिर्णयः ,, १५
समानार्षगोत्रजाविवाहे प्रायश्चित्तम् ,, २१
अथ सापत्नविषये सापिण्ड्यम् ,, २५
अथ वरगुणाः ,, ३२
वरदोषाः ,, ३६
पुरुषत्वपरीक्षोपायकथनम् ,, ३७
बृहस्पतिशान्तिविधानम् ९० ३
अपरिहार्यकन्यावैधव्ययोगे तन्निरासार्थं कुम्भविवाहविधानम् ,, १०
अत्र मूर्तिदानविधानम् ,, १८
विवाहकाले कन्या ऋतुमती चेत् ,, २६
विवाहे आशौचनिर्णयः ,, ३०
आवश्यकत्वे नान्दीश्राद्धानुष्ठानकालकथनम् ९० ३८
अथ मातू रजोदोषे निर्णयः ९१ २
मुहूर्तान्तरालाभे श्रीशान्तिविधानम् ,, १०
अथ विवाहभेदाः ,, १२
ब्राह्मादिविवाहलक्षणानि ,, १४
वाग्दानोत्तरं वरमरणे विशेषः ,, २१
देशान्तरगमने विशेषः ,, २२
धर्मार्थविवाहकरणे फलम् ,, २५
अथ वाग्दानविधिः ,, २८
अथ मृदाहरणम् ९२ १
अङ्कुरार्पणम् ,, ४

विषयाः ।	पृ.	पं.
विवाहात्पूर्वदिनकृत्यम्	९२	६
मण्डपप्रतिष्ठाप्रकारः	,,	१०
नान्दीश्राद्धकर्तृविचारः	,,	१७
वरवरणप्रयोगः	,,	२६
विवाहदिनकृत्यं तत्र घटीस्थापनादिविधिः	,,	२९
अथ मधुपर्कप्रयोगः	,,	३५
अथ कन्यादानप्रयोगः	९३	३४
होमप्रयोगः	९४	१९
सप्तपदीप्रमुखः प्रयोगः	९५	२८
देवकोत्थापनमण्डपोद्वासनविधिः	,,	४०
वध्वाः प्रथमगृहप्रवेशविधिः	९६	३
गर्गमते पदार्थक्रमे विशेषः	,,	१४
अथ पुनर्विवाहः	,,	३६
अधिवेदनीयस्त्रीकथनम्	९७	२
रत्यर्थे विवाहान्तरे विशेषः	,,	५
साग्निकस्य द्वितीयादिविवाहेऽग्निनियमकथनम्	,,	१६
द्वितीयादिविवाहे वरकर्तृकनान्दीश्राद्धकथनम्	,,	१९
द्वितीयादिविवाहे कालविशेषः	,,	२५
अर्कविवाहविधिः	,,	२७
तत्र शौनकमते विशेषः	९८	१२
संक्षेपतोऽर्कविवाहप्रयोगः	,,	२५
अथैकक्रियानिर्णयः	,,	३२
अथ कन्यागृहे भोजननिषेधः	९९	१६
नान्दीश्राद्धानन्तरं धर्माः	,,	१९

अष्टमकण्डिकाया विश्वनाथभाष्यम् ।

प्रतिपदं क्रमणमन्त्रकथनम्	,,	३५
पितृदत्तकन्याग्रहणानन्तरं वध्युर्निष्क्रमणम्	,,	३८
वध्वाः सूर्योदीक्षणम्	१००	२
मम व्रते इति मन्त्रेण वधूदक्षिणांसस्योपरि बाहुनयनम्	,,	३
ग्रामवचनशब्दार्थः	,,	७
विवाहे वरशब्दार्थकथनम्	,,	१०
नवमकण्डिकामूलम्	,,	१६

नवमकण्डिकायाकर्कभाष्यम् ।

औपासनाग्निपरिचरणविधानम्	,,	२१
गर्भकामनायां पूर्वाहुतौ स्त्रियः कर्तृत्वम्	,,	२९

नवमकण्डिकाया जयरामभाष्यम् ।

औपासनाग्निपरिचर्याकथनम्	,,	२१
उत्तराहुतौ यजमानमुख्यत्वविचारः	१०१	२
स्वयंहोमाशक्तौ	,,	४

नवमकण्डिकाया हरिहरभाष्यम् ।

औपासनाग्न्युपासनाविधानम्	,,	९
तत्र कालनियमः	,,	११
अस्तमितकाललक्षणम्	,,	१३
अनुदितकालद्वैविध्यं, तल्लक्षणं च	,,	१४
वाजसनेयिनामनुदितस्य मुख्यत्वनिरूपणम्	,,	१७
होमद्रव्यनियमकथनम्	,,	३२
अस्यैव कर्मणः काम्यत्वकथनम्	,,	२२
पूर्वां गर्भकामेत्यत्र पूर्वशब्दार्थविचारः	,,	३५
विवाहाग्नेरौपासनत्वविचारः	१०२	११
अथ प्रयोगः	,,	३०

नवमकण्डिकाया गदाधरभाष्यम् ।

औपासनाग्निपरिचरणम्	१०३	१
परिचरणशब्दप्रयोजनकथनम्	१०३	३
होमकालनियमः	,,	५
अस्तमितलक्षणम्	,,	८
अनुदितद्वैविध्यं तल्लक्षणं च	,,	९
मुख्यकालासम्भवे गौणकालविधिः	,,	१३
गौणकालपरिमाणप्रदर्शनम्	,,	१४
पत्न्यादीनां गौणकर्तृत्वविचारः	,,	१८
त्यागे विशेषः	,,	२३
शाखान्तरगृह्यपरिशिष्टोक्तानि होमद्रव्याणि	,,	२७
सर्वत्र होमे प्रतिमन्त्रं प्रणवोच्चारणनिषेधः	१०४	१
पुमाꣳसाविति मन्त्रार्थः	,,	३
अथ पदार्थक्रमः	,,	७
सायंहोमविधिः	,,	८
अथ प्रातर्होमे विशेषः	,,	१६
आपत्कालानुष्ठेयहोमद्वयसमासप्रयोगः	,,	१७
अथ गुर्वापदि पक्षहोमविधानम्	,,	२०
अनापदि पक्षहोमे प्रायश्चित्तकथनम्	,,	२६

नवमकण्डिकाया विश्वनाथभाष्यम् ।

प्रथमप्रयोगे मातृश्राद्धे द्रव्यकथनम्	,,	३०
सायंहोमकथनानन्तरं प्रातर्होमकथनम्	,,	३३
स्वयं होमाशक्तौ यजमानादिभिर्होमकरणम्	,,	३६
दशमकण्डिकामूलम्	१०५	१

विषयाः । पृ. पं.

दशमकण्डिकायाः कर्कभाष्यम् ।

राज्ञोऽक्षभेदे इत्यादिना नैमित्तिकप्रायश्चित्तनिरूपणम् १०५ ७

दशमकण्डिकाया जयरामभाष्यम् ।

राज्ञोऽक्षभेदे इत्यादिना नैमित्तिकप्रायश्चित्तनिरूपणम् „ १८

दशमकण्डिकाया हरिहरभाष्यम् ।

अथ नैमित्तिकप्रायश्चित्तनिरूपणम् „ २८
तदितिकर्त्तव्यताकथनम् „ ३४
अथ प्रयोगः १०६ १२

दशमकण्डिकाया गदाधरभाष्यम् ।

राज्ञोऽक्षभेद इत्यादिसूत्रार्थः „ २१
अक्षभेदादिनिमित्ते नैमित्तिकप्रायश्चित्तकथनम् „ २४
अन्यद्यानामित्यादिसूत्रार्थः „ २९
अथ पदार्थक्रमः „ ३९

दशमकण्डिकाया विश्वनाथभाष्यम् ।

स्त्रियाश्चोद्वहने इत्यत्र चकारप्रयोजनकथनम् १०७ ८
आत्वाऽऽहार्षमिति मन्त्रेण कल्पितयानान्तरे राज्ञः स्त्रियश्चोपवेशनम् „ १५
एकादशकण्डिकामूलम् „ १८

एकादशकण्डिकायाः कर्कभाष्यम् ।

चतुर्थीकर्माख्यविवाहशेषकथनम् १०८ ७
हुत्वाहुत्वेत्यादिसूत्रार्थः „ १२
गर्भाधानाख्यर्तुप्रवेशकर्मकथनम् „ १९

एकादशकण्डिकाया जयरामभाष्यम् ।

विवाहशेषकथनम् १०८ २८
अग्ने प्रायश्चित्ते इत्यादिमन्त्रार्थः „ ३२
या ते पतिघ्नीत्यादिमन्त्रार्थः १०९ ६
प्राणैस्त इति मन्त्रार्थः „ १०
ऋतुप्रवेशकथनम् „ १४
हृदयालम्भनविचारः „ १८
यत्ते सुसीम इति मन्त्रार्थः „ २१

कादशकण्डिकाया हरिहरभाष्यम् ।

चतुर्थ्यामित्यादिसूत्रार्थः „ २७
स्थालीपाकप्राशनविधानम् ११० ११
अथर्तुप्रवेशविधानम् „ १९
तत्र पर्वादिनिषेधपालनम् „ २१
ऋतावनभिगमने दोषः „ २५
यथाकामपक्षसमर्थनम् „ २९
हृदयालम्भनविधानम् „ ३२
अथ चतुर्थीकर्मप्रयोगः „ ३५
ऋतुकालाभिगमनविचारः १११ १८

एकादशकण्डिकाया गदाधरभाष्यम् ।

चतुर्थ्यामित्यादिसूत्रार्थः „ ३५
अग्ने प्रायश्चित्त इत्यादिमन्त्रार्थः ११२ १२
या ते पतिघ्नीत्यादिमन्त्रार्थः „ २६
चरुशेषप्राशनस्य वधूसंस्कारत्वकथनम् „ ३०
विवाहादौ स्त्रिया सह भोजनस्यादोषत्वकथनम् „ ३२
प्राणैस्त इत्यादिमन्त्रार्थः „ ३५
स्वभार्याऽभिगमनम् „ ३९
तत्र याज्ञवल्क्यवचनम् „ ४०
ऋतौ निषिद्धादिनकथनम् ११३ १
रजस्वलाशुद्धिकथनम् ११३ ४
ऋतुरात्रीणां समविषमभेदेन फलभेदकथनम् „ ८
चतुर्थ्यादितत्तद्रात्रिभेदेन फलप्रदर्शनम् „ १०
स्त्रीणां बहुत्वे ऋतुयौगपद्ये च गमनक्रमः „ १७
अगमने दोषकथनम् „ १९
अस्यापवादः „ २०
रजस्वलोपयोगी निर्णयः „ २४
रजस्वलायाः सवर्णादिरजस्वलान्तरस्पर्शे प्रायश्चित्तविधानम् „ ३७
रजस्वलास्नानविधिः ११४ ३
रजस्वलाव्रतनिरूपणम् „ ४
यथाकामपक्षकथनम् „ ७
हृदयालम्भनविधानम् „ १५
यत्ते सुसीम इति मन्त्रार्थः „ २२
अथ पदार्थक्रमः „ २९
अथ गर्गमते विशेषः „ ३७
गर्भाधाने पदार्थक्रमः ११५ २
प्रथमरजोदर्शने विशेषः „ ६
तत्र दुष्टमासादिशुभाशुभविचारः „ ६
अथ शान्तिविधानं तत्र शौनकः „ २३
तत्र नारदः „ ४०
अथ शान्तिप्रयोगः ११६ ५
ग्रहणे रजोदर्शने शान्तिविशेषकथनम् ११७ २४
अथ प्रयोगः „ ३२

एकादशकण्डिकाया विश्वनाथभाष्यम् ।

चतुर्थ्यामपररात्रे इत्यादिसूत्रार्थविचारः ११८ २१
अपरे त्वित्यादिना प्रत्यग्ब्रह्मोपवेशनविचारः „ २४

विषयाः ।	पृ.	पं.
आज्याहुतिकरणार्थस्मृतिकरणमन्त्रकथनम्	११८	२९
चतुर्थीकर्मानन्तरं भार्यात्वे सिद्धे पुरुषान्तरकर्तृकोपहासनिषेधकथनम्	,,	३५
प्रमादाद्दिवा मैथुने प्रायश्चित्तकथनम्	,,	३९
द्वादशकण्डिकामूलम्	११९	१

द्वादशकण्डिकायाः कर्कभाष्यम्।

विषयाः ।	पृ.	पं.
पक्षादिकर्मकथनम्	,,	१०
वैश्वदेवचरोः पृथक्त्वविचारः	११९	१७

द्वादशकण्डिकाया जयरामभाष्यम् ।

विषयाः ।	पृ.	पं.
पक्षादिकर्मकथनम्	,,	२९
वैश्वदेवचरोः पृथक्त्वविचारः	,,	३३
नमः स्त्रिया इति मन्त्रार्थः	१२०	१०

द्वादशकण्डिकाया हरिहरभाष्यम्।

विषयाः ।	पृ.	पं.
पक्षादिकर्मकथनम्	,,	१८
यागकालनिर्णयः	,,	२१
वैश्वदेवपाकविचारः	,,	३१
स्त्र्यादिभ्यो बलिहरणम्	१२१	८
अथ प्रयोगः	,,	१३
दर्शे विशेषकथनम्	,,	३४

द्वादशकण्डिकाया गदाधरभाष्यम्।

विषयाः ।	पृ.	पं.
पक्षादिकर्मविधानम्	१२२	२
स्मृत्यन्तरोक्तयागकालनिरूपणम्	,,	८
स्थालीपाकारम्भविचारः	,,	१४
तत्र कालविचारः	,,	२०
बलिहरणकथनम्	,,	३४
अग्नौ जुहोतीत्यादिसौत्रपदविचारः	१२३	५
स्त्र्यादिभ्यो बलिहरणम्	,,	११
नमः स्त्रिया इति मन्त्रार्थः	,,	१५
अथ पदार्थक्रमः	,,	२५
पिण्डपितृयज्ञकालनिर्णयः	१२४	२
तत्र पदार्थक्रमः	,,	१४
नीवीबन्धनविचारः	,,	,,
स्थालीपाकवैश्वदेवयोः पौर्वापर्यविचारः	१२५	१
गर्गमते स्थालीपाके विशेषः	,,	४
स्वस्वकाले स्थालीपाकपिण्डपितृयज्ञयोरकरणे विशेषः	,,	१३

द्वादशकण्डिकाया विश्वनाथभाष्यम्।

विषयाः ।	पृ.	पं.
प्रतिपन्निर्णयस्य पौर्णमास्यमावास्यानिर्णयाधीनत्वेन तयोर्निर्णयः	१२५	२३
मुहूर्तं कालपदार्थ इत्यर्थविचारः	,,	३५
दिननाशे पञ्चदशेऽपि यागः	१२७	१
दिनवृद्धौ सप्तदशेऽपि यागकालः	,,	२
केचित्तु संशयस्थले उत्तराया उपोष्यत्वम्	,,	११
पर्वप्रतिपत्सन्धौ पौर्णमास्युपोष्या	,,	१२
अथ साधारणवाक्यानि पर्वविषये	,,	१४
उत्तरोपवासपक्षाश्रयणे तु व्रत्याशनागारशयनादिविचारः	१२८	२
व्रत्याशनपदार्थः	,,	६
पर्वणि सक्तुभोजनादिविचारः	,,	,,
व्रत्याहे वर्ज्यानि	१२८	१०
वैश्वदेवानन्तरमपराह्णे पिण्डपितृयज्ञविधानम्	,,	१७
आज्यभागानन्तरं स्थालीपाकहोमः	,,	४१
तत्र विशेषः	१२९	३
आवृत्तियोग्यकर्मणां लेखनम्	,,	२७
त्रयोदशकण्डिकामूलम्	,,	३१

त्रयोदशकण्डिकायाः कर्कभाष्यम् ।

विषयाः ।	पृ.	पं.
गर्भधारणोपायकथनम्	,,	३५

त्रयोदशकण्डिकाया जयरामभाष्यम् ।

विषयाः ।	पृ.	पं.
गर्भधारणोपायकथनम्	१३०	१
इयमोषधीति मन्त्रार्थः	,,	४

त्रयोदशकण्डिकाया हरिहरभाष्यम्।

विषयाः ।	पृ.	पं.
गर्भधारणोपायकथनम्	,,	१२

त्रयोदशकण्डिकाया गदाधरभाष्यम् ।

विषयाः ।	पृ.	पं.
गर्भधारणोपायकथनम्	,,	१८
इयमोषधीति मन्त्रार्थः	,,	२६

त्रयोदशकण्डिकाया विश्वनाथभाष्यम् ।

विषयाः ।	पृ.	पं.
गर्भधारणोपायकथनम्	,,	३०
तत्र पिण्डाशनसाधने सत्यप्यस्यापि हेतुत्वविचारः	,,	३५
चतुर्दशकण्डिकामूलम्	१३१	४

चतुर्दशकण्डिकायाः कर्कभाष्यम् ।

विषयाः ।	पृ.	पं.
पुंसवनसंस्कारकथनम्	,,	११

चतुर्दशकण्डिकाया जयरामभाष्यम् ।

विषयाः ।	पृ.	पं.
पुंसवनसंस्कारकथनम्	,,	२३

विषयाः । पृ. पं.
तदुपयोगिकालादिनिरूपणम् १३१ २५

चतुर्दशकण्डिकाया हरिहरभाष्यम् ।

पुंसवनसंस्कारकथनम् १३२ १
समयादिकथनम् ,, ४
अत्र काम्यकथनम् ,, १४
अथ प्रयोगः ,, १८

चतुर्दशकण्डिकाया गदाधरभाष्यम् ।

पुंसवनसंस्कारकथनम् ,, २४
तदुपयुक्तमासादिनिरूपणम् ,, २६
तत्र दिननियमादि ,, ३१
पुंनक्षत्रनिरूपणम् ,, ३८
काम्यकथनम् १३३ ३
अथ पदार्थक्रमः ,, ११

चतुर्दशकण्डिकाया विश्वनाथभाष्यम् ।

गर्भे जाते तत्संस्कारककर्मकथनम् ,, २०
केषांचिन्मते तु गर्भिण्या एव संस्कारकं पुंसवनम् ,, २०
तत्र नियतसमयकथनम् ,, २२
गर्भाधानप्रतिबन्धकापनयोक्तविधेरतिदेशः ,, २८
आसेचनमन्त्रकथनम् ,, २९
वीर्यवत्पुत्रकामिकार्यकथनम् ,, ३१
पञ्चदशकण्डिकामूलम् ,, ३६

पञ्चदशकण्डिकायाः कर्कभाष्यम् ।

सीमन्तोन्नयनसंस्कारकथनम् । १३४ ८
तत्र मासनिरूपणम् ,, ११
तद्दितिकर्तव्यताविधानम् ,, २५

पञ्चदशकण्डिकाया जयरामभाष्यम् ।

विषयाः । पृ. पं.
सीमन्तोन्नयनसंस्कारकथनम् १३४ २९
तत्र स्थालीपाकादिविधिकथनम् ,, ३३
अयमूर्जेति मन्त्रार्थः १३५ ७
सोम एवेति गाथार्थः ,, १३

पञ्चदशकण्डिकाया हरिहरभाष्यम् ।

सीमन्तोन्नयनम् ,, १७
मासादिनिरूपणम् ,, १८
तत्र विशेषकथनम् ,, २४
विनयनादिविधिः ,, २७
अथ सीमन्तोन्नयनप्रयोगः १३६ १३

पञ्चदशकण्डिकाया गदाधरभाष्यम् ।

सीमन्तोन्नयनम् ,, ३४
तस्य गर्भसंस्कारत्वकथनम् ,, ३५
स्त्रीसंस्कारत्वकथनम् ,, ३७
प्रथमगर्भविचारः १३७ ३
द्वितीयादिगर्भे संस्कारविचारः ,, ६
स्थालीपाकादीतिकर्तव्यताविचारः ,, १०
सीमन्तशब्दव्याख्यानम् ,, २२
शङ्कुविचारः ,, २४
अयमूर्जेति मन्त्रार्थः ,, २९
सोम इत्यादिमन्त्रार्थः ,, ३८
अत्र भोजने प्रायश्चित्तम् १३८ २
सीमन्तोन्नयने पदार्थक्रमः ,, ७
तत्र मुहूर्त्तविचारः ,, ,,
सङ्कल्पवाक्यादिस्पष्टप्रयोगकथनम् ,, १२
अथ गर्गमते विशेषः ,, २७
अथ गार्भिणीधर्माः ,, ३७
गर्भिणीपतिधर्माः १३९ ६

पञ्चदशकण्डिकाया विश्वनाथभाष्यम् ।

विषयाः । पृ. पं.
सीमन्तोन्नयनसंस्कारकथनम् १३९ १३
प्रथमगर्भे इत्यत्र प्रथमपदस्य पदकृत्यम् ,, १४
आद्ये गर्भे संस्कारकर्तव्यत्वनियमः ,, ,,
स्थालीपाकादिविधानकथनम् ,, १७
तत्र विशेषः ,, १८
साधनविशेषेण सीमन्तोर्ध्वनयनम् ,, २५
सीमन्तकालिकगानविहितगाथापठनम् ,, ३१
अभिलषितगानगोचरगाथाप्रदर्शनम् ,, ३२
षोडशकण्डिकामूलम् ,, ३७

षोडशकण्डिकायाः कर्कभाष्यम् ।

प्रसवकाले अभ्युक्षणाविधानम् १४१ ६
जाते कुमारे मेधाजननायुष्यादिविधानम् ,, १०

षोडशकण्डिकाया जयरामभाष्यम् ।

प्रसवकाले अभ्युक्षणविधानम् १४२ ५
अवरावपतनमन्त्रार्थः ,, ९
भूस्त्वयीत्यादिमन्त्रार्थः ,, १६
अग्निरायुष्मानित्यादिमन्त्रार्थः ,, २०
मेधाजननस्य गौणकालनिषेधः ,, २७
जन्मभूम्यभिमन्त्रणमन्त्रार्थः १४३ ३
अश्मा भवेति मन्त्रार्थः ,, ७
इडाऽसीति मन्त्रार्थः ,, १३

विषयाः । पृ. पं.
बालकस्य स्तनदानम् १४३ १९
आपो देवेषु इति मन्त्रार्थः ,, २२
शण्डा मर्का इति मन्त्रार्थः ,, २६
बालग्रहोपद्रवे तदुपायकथनम् १४४ २
कूर्कुर इति मन्त्रार्थः ,, ३

षोडशकण्डिकाया हरिहरभाष्यम् ।

प्रसवशूलवत्यभिमन्त्रणम् ,, १३
अवरावपतनम् ,, १५
मेधाजननम् ,, २०
मन्त्रवाक्यसमुदायस्यैकमन्त्रत्वविचारः ,, २७
अथायुष्यकरणम् ,, ३४
कुमाराभिमन्त्रणम् १४५ ११
सूतिकाग्निस्थापनम् ,, ३३
नैमित्तिककथनम् १४६ १
प्रसवशूलवत्याभिमन्त्रणादिकुमारोपद्रवशमनान्तानां चतुर्दशानां प्रयोगः ,, ७

षोडशकण्डिकाया गदाधरभाष्यम् ।

प्रसवशूलवत्यभिमन्त्रणम् १४७ १३
अवरावपतनमन्त्रार्थः ,, २०
जातकर्मविधिः ,, २७
तत्राभ्युदयिकश्राद्धस्य हिरण्यमात्रादिसाध्यत्वविचारः ,, ३०
नैमित्तिकरात्रिस्नानकथनम् ,, ३३
नैमित्तिकदानकथनम् ,, ३४
द्विविधाशौचमध्ये पुत्रजनने जातकर्मविचारः १४८ २
मेधाजननकथनम् ,, १०
तत्र माध्यन्दिनश्रुतौ विशेषः ,, [illegible]
स्वकाले मेधाजननासम्भवे कालान्तरे तन्निषेधः १४८ १७
आयुष्यकरणम् ,, २१
अग्निरायुष्मानित्यादिमन्त्रार्थः ,, २९
वात्सप्रेण कुमाराभिमर्शनम् ,, ३६
प्राणेत्यादिमन्त्रार्थः १४९ ७
वेद ते इत्यादिमन्त्रार्थः ,, १७
अश्मा भवेति मन्त्रार्थः ,, २४
इडाऽसीति मन्त्रार्थः ,, ३१
आपो देवेष्विति मन्त्रार्थः १५० १
सूतिकाग्नौ सायंप्रातर्होमविधानम् ,, ४
शण्डामर्का इति मन्त्रार्थः ,, ११
कूर्कुर इति मन्त्रार्थः ,, २७
अथ पदार्थक्रमः ,, ३७
जातकर्मप्रयोगः ,, ३८
तत्र सुवर्णादिदानम् १५१ १५
अथ गर्गमते विशेषः ,, २४
षष्ठीपूजाप्रयोगः ,, ३०
तत्र मिताक्षरायां विशेषः ,, ३८
यमलयोर्ज्येष्ठकानिष्ठभावविचारः १५२ ६
अथ यमलजननशान्तिः ,, ९
स्मृत्युक्ता यमलजननशान्तिः ,, २०
अथ जन्मनि दुष्टकालाः तत्र मूलफलम् ,, ३२
अथ मूलवृक्षफलम् ,, ३७
मूलादिदुष्टनक्षत्रफलम् १५३ ३
एकनक्षत्रजननफलम् ,, १९
अथ गण्डान्तः ,, २१
गण्डान्तफलम् ,, २५
गण्डान्तानां दानानि ,, २७
अथ ग्रहेशफलम् १५३ ३०
[illegible] ,, [illegible]
मात्स्ये अकालप्रसवादिविशेषः १५४ १३
ऊर्ध्वदन्तजननशान्तिः ,, १७
अथ त्रिकशान्तिः ,, २९
अथ दत्तकपुत्रपरिग्रहविधिः ,, ३८
एकमात्रपुत्रदानप्रतिग्रहनिषेधः १५५ ४
स्त्रीशूद्रयोर्दत्तकपारिग्रहाविचारः ,, ६
दत्तके विशेषः ,, १०
सूतिकास्नानम् ,, १३

षोडशकण्डिकाया विश्वनाथभाष्यम् ।

जलेन प्रसवशूलवत्यभिमन्त्रणम् ,, १७
गर्भनिर्गमक्रियाहेत्वर्थस्मारकमन्त्रपठनम् ,, १९
जाते पुत्रे मेधाजननकरणम् ,, २०
मेधाजननानन्तरमायुष्यकरणम् ,, २९
अष्टमन्त्राणां कुमारस्य दक्षिणे कर्णे वारत्रयं जपः ,, ३७
कामनया वात्सप्रेण कुमार स्पर्शः ,, ३८
सूतिकाग्नौ सायम्प्रातर्हवनविचारः १५६ १२
मन्त्रद्वयेनाहुतिद्वयस्य अग्नौ प्रक्षेपः ,, १८
ग्रहोपद्रवे उत्पद्यमाने वक्ष्यमाणमन्त्रजपकरणम् ,, २०
न नामयतीत्यादिना कुमारस्पर्शः ,, २५
सप्तदशकण्डिकामूलम् ,, २८

सप्तदशकण्डिकायाः कर्कभाष्यम् ।

नामकरणविधानम् ,, ३४

विषयाः । पृ. पं.
द्व्यक्षरादिपुन्नामविधानम् १७६ ३६
निष्क्रमणविधानम् १५७ ४

सप्तदशकण्डिकाया जयराम-भाष्यम् ।

एकादशेऽहनि नामकर्मविधानम् ,, ६
द्व्यक्षरादिपुन्नामविधानम् ,, ७
निष्क्रमणम् ,, १३

सप्तदशकण्डिकाया हरिहर-भाष्यम् ।

सूतिकोत्थापनम् ,, १७
नामकरणम् ,, १७
तत्र द्व्यक्षरादिविशेषः ,, १९
नामान्ते शर्मादिशब्दविचारः ,, २८
नामकरणप्रयोगः ,, ३२
निष्क्रमणम् ,, ३४
निष्क्रमणप्रयोगः १५८ ३

सप्तदशकण्डिकाया गदाधर-भाष्यम् ।

नामकरणम् ,, ७
तत्कालकथनम् ,, १०
मुख्यकालातिक्रमे गौणकालः ,, १६
द्व्यक्षरादिनामस्वरूपकथनम् ,, १८
स्त्रिया नाम्नि विशेषः ,, २४
निष्क्रमणकालनिरूपणम् ,, ३०
निष्क्रमणे वृद्धिश्राद्धानुष्ठानविचारः ,, ३२
अथ पदार्थक्रमः १५९ १
सङ्कल्पवाक्यादिनामकरणप्रयोगः ,, ४
अथ खट्वारोहः ,, १५
अथ दुग्धपानम् ,, २१
अथ ताम्बूलभक्षणम् ,, २२
चन्द्रदर्शनादिदेवप्रार्थना ,, २४
अथोपवेशनाविधिः १५९ २७
कर्णवेधपरिशिष्टसूत्रम् ,, ३३
तत्र मासतिथ्यादिनिरूपणम् ,, ३६
कर्णवेधार्थं सूचीकथनम् ,, ४०

सप्तदशकण्डिकाया विश्वनाथभाष्यम् ।

नामकर्मनिष्क्रमणिकयोः क्रमेण कथनम् १६० ७
एकादशाहपदस्य सूतकान्तोपलक्षकत्वम् ,, १०
तच्च नामकरणं कीदृशं करणीयमित्यस्योपरि विशेषरूपेण कथनम् ,, १२
कुमार्याः कीदृशं नामकरणम् ,, १९
कुमारनामकीर्तनानन्तरं शर्मवर्मगुप्तेति यथाक्रमं प्रयोगः ,, २१
निष्क्रमणकालनिरूपणम् ,, २४
अष्टादशकण्डिकामूलम् ,, २८

अष्टादशकण्डिकायाः कर्क-भाष्यम् ।

प्रवासादागतस्य साग्नेर्गृहोपस्थानविधिः १६१ १
पुत्रशिरोऽवघ्राणादि ,, ४

अष्टादशकण्डिकाया जयराम-भाष्यम् ।

गृहोपस्थानविधिः ,, ८
अङ्गादङ्गादिति मन्त्रार्थः ,, १२
प्रजापतेष्ट्वेति मन्त्रार्थः ,, १४
अस्मे प्रयन्धीति मन्त्रार्थः ,, १६
इन्द्र श्रेष्ठानीति मन्त्रार्थः ,, २३

अष्टादशकण्डिकाया हरिहर-भाष्यम् ।

प्रवासादागतस्य साग्नेर्गृहोपस्थानम् ,, २८
पुत्रस्य मूर्ध्न्यवघ्राणम् १६२ २
पुत्रदक्षिणकर्णे जपः ,, ८
कन्यायां विशेषः ,, १०

अष्टादशकण्डिकाया गदाधर-भाष्यम् ।

गृहानुपातिष्ठते इति सूत्रार्थः ,, १३
साग्निकस्य प्रवासप्रयोजनप्रदर्शनम् ,, १५
अङ्गादङ्गादिति मन्त्रार्थः ,, १८
प्रजापतेष्ट्वेति मन्त्रार्थः ,, २२
अस्मे प्रयन्धीति मन्त्रार्थः ,, २९
इन्द्र श्रेष्ठानीति मन्त्रार्थः ,, ३५
कन्यायां विशेषः ,, ३८

अष्टादशकण्डिकाया विश्वनाथभाष्यम् ।

प्रवासादागतस्य जातापत्यस्य प्रवासधर्मादिविशेषं वक्तुं सूत्रकरणम् १६३ ३
कात्यायनगृह्ययोः कात्यायनस्य पूर्वकालत्वकथनम् ,, ५
पुत्रदर्शनानन्तरमङ्गादङ्गादिति मन्त्रजपः ,, ८
त्रिवारं कुमारस्य दक्षिणे कर्णे अस्मे प्रयन्धि इति मन्त्रजपः ,, १०
वामकर्णे इन्द्र श्रेष्ठानीति जपः ,, ११
कन्याया मूर्ध्न एव तूष्णीमवघ्राणम् ,, १२
एकोनविंशकण्डिकामूलम् ,, १४

एकोनविंशकण्डिकायाः कर्क-भाष्यम् ।

अन्नप्राशनम् ,, २६
कामनाविशेषेण मांसादिभक्ष्ये विशेषः ,, ३२

एकोनविंशकण्डिकाया जय-रामभाष्यम् ।

अन्नप्राशनम् १६४ ५
देवीं वाचामिति मन्त्रार्थः ,, ७

विषयाः । पृ. पं.
कामनायां विशेषः १६४ १४

एकोनविंशकण्डिकाया हरिहरभाष्यम् ।

अन्नप्राशनम् ,, २१
तदितिकर्त्तव्यताविशेषः ,, २२
कामनायां विशेषः ,, ३२
भारद्वाज्या इत्यादिसूत्रतात्पर्यकथनम् ,, ३४
अन्नप्राशनप्रयोगः १६५ १३

एकोनविंशकण्डिकाया गदाधरभाष्यम् ।

अन्नप्राशनम् ,, २९
अत्र षष्ठादिमासनिरूपणम्,, ,,
तिथिनक्षत्रादिनिरूपणम् ,, ३२
स्थालीपाकश्रपणम् ,, ३६
देवीं वाचमिति मन्त्रार्थः १६६ १
प्राणेनेत्यादिमन्त्रार्थः ,, ७
भारद्वाज्या इत्यादिसूत्रेण गुणफलकथनम् ,, १५
अथ पदार्थक्रमः ,, २७
संकल्पवाक्यम् ,, २९
अग्निस्थापनादिप्रयोगः १६६ ३१
जीविकापरीक्षा ,, ४०
गर्भाधानादीनां मलमासे कर्तव्यताविचारः १६७ ३
तत्र गर्गमतम् ,, ४
अथ वर्धापनविधिः ,, ५
वर्धापनप्रयोगः ,, ८
गणपत्यादिपूजाप्रयोगः ,, १०
मार्कण्डेयादिपूजनम् ,, ,,
तिलादिदानम् ,, ३३
तिलगुडसहितदुग्धपानम् ,, ४०
अश्वत्थामादिस्मरणम् १६८ १
ग्रन्थान्तरे वर्धापनविधिः,, ४

एकोनविंशकण्डिकाया विश्वनाथभाष्यम् ।

अन्नप्राशनम् ,, १०
स्थालीपाकेन परिभाषा-

विषयाः । पृ. पं.
शास्त्रस्याक्षेपः १६८ १०
तत्र विशेषः ,, १३
आज्याहुत्योर्मन्त्रकथनम्,, १३
प्राणेनान्नमित्यादिचतुर्मन्त्रैश्चतुराहुतिप्रक्षेपः,, १७
प्रयोगश्चैवम् ,, १७
एकपात्रोद्धृतसर्वरसानां सर्वान्नानां तूष्णीं हन्तेति वा मन्त्रेण प्राशनम्,, २२
कामनाविशेषे कामिना क्रियमाणं काम्यं प्राशनम्,, २४
कन्यायास्तूष्णीं प्राशनकरणम् ,, २९
ब्राह्मणभोजनम् ,, ३०

इति प्रथमकाण्डं समाप्तम् ।

द्वितीयकाण्डम् ।

प्रथमकण्डिकामूलम् १६९ १

प्रथमकण्डिकायाः कर्कभाष्यम् ।

चूडाकरणकालनिरूपणम् ,, २५
केशान्तकालनिरूपणम् ,, २७
चूडाकरणकेशान्तेतिकर्त्तव्यताकथनम् १७० १
गोदानशब्दपरिभाषा ,, ७
केशशेषविचारः ,, २१

प्रथमकण्डिकाया जयरामभाष्यम् ।

चूडाकरणकालः ,, २७
केशान्तसंस्कारकालविचारः ,, ३०
चूडाकरणकेशान्तेतिकर्त्तव्यता,, ३१
उष्णेनेति मन्त्रार्थः ,, ३४
प्रसूता इति मन्त्रार्थः १७१ ४
येनावपदिति मन्त्रार्थः ,, १२
येन भूरिश्चरेति मन्त्रार्थः,, १८
यत्क्षुरेणेति मन्त्रार्थः ,, २४
अक्षण्वान्नीति मन्त्रार्थः ,, २८

विषयाः । पृ. पं.

प्रथमकण्डिकाया हरिहर भाष्यम् ।

चूडाकरणकालः १७१ ३४
यथामङ्गलशब्दार्थः १७२ १
केशान्तकालः ,, ४
चूडाकेशान्तयोरितिकर्त्तव्यता ,, ८
शिखास्थापनम् १७३ ८
तत्र कुलाचाराः ,, ९
केशान्तानन्तरं ब्रह्मचर्यादिव्रतम् ,, १९
विहितवपनम् ,, २१
गर्भाधानादिसंस्कारकर्तृत्वविचारः ,, २५
शूद्रसंस्कारकथनम् ,, २९
अनुपनीतधर्माः ,, ३५
बालाद्यवस्थासङ्केतः ,, ३७
संस्कारप्रयोजनम् १७४ १
गर्भाधानादीनां फलम् ,, २
चत्वारिंशत्संस्काराः ,, ,,
ब्राह्मदैवभेदेन संस्कारद्वैविध्यम् ,, १३
तयोः फलम् ,, १४
अथ चूडाकरणप्रयोगः ,, १६
केशान्तप्रयोगे विशेषः १७५ ६

प्रथमकण्डिकाया गदाधरभाष्यम् ।

चूडाकरणकालः ,, ११
केशान्तकालः ,, १३
स्मृत्यन्तरोक्तचूडाकरणकालः ,, २०
उदगयनादिसमयनिरूपणम् ,, २४
विहितानि नक्षत्राणि ,, २५
वर्णविशेषेण वाराः ,, २७
तिथयः ,, २८
चूडाकरणेतिकर्तव्यता ,, ३[illegible]

विषयाः। पृ. पं.
मातरि रजस्वलायां विशेषः १७५ ३५
मुहूर्तान्तरालाभे शान्तिककथनम् ,, ३८
मातरि गर्भिण्यां निषेधः ,, ४०
तदपवादः १७६ २
कुमारस्य ज्वरोत्पत्तौ ,, ४
उष्णेनेति मन्त्रार्थः ,, १०
सवित्रेति मन्त्रार्थः ,, १७
शिवो नामेति मन्त्रार्थः ,, २५
निवर्तयामत्यिस्यार्थः ,, २६
येनावपदिति मन्त्रार्थः ,, ३४
त्र्यायुषमिति मन्त्रार्थः १७७ ४
येन भूरिश्चरेति मन्त्रार्थः ,, ८
यत्क्षुरेणेति मन्त्रार्थः ,, १५
अक्षण्वन्निति मन्त्रार्थः ,, २१
शिखास्थापनविचारः ,, २३
शूद्रे विशेषः ,, २७
दक्षिणात्मकवरविचारः ,, ३२
ब्रह्मचर्यादिव्रतकथनम् ,, ३४
वपने विधिर्निषेधश्च ,, ३९
तत्र दिङ्नियमः १७८ ५
यतीनां विशेषः ,, ७
अथ पदार्थक्रमः ,, ९
तत्र संकल्पवाक्यम् ,, १३
संस्कारभोजने प्रायश्चित्तम् ,, ३३
केशान्ते पदार्थक्रमः ,, ३५
तत्र विशेषः ,, ३७
कन्यासंस्कारे विशेषः ,, ४०
शूद्रस्य संस्कारः १७९ ३
षोडशसंस्काराः ,, ४
वर्णभेदेन संस्कारव्यवस्था ,, ९
ब्राह्मणः शूद्रप्रातिनिधिश्चेत् ,, १५
अथानुपनीतधर्माः ,, १९
शिशुप्रभृत्यनुपनीतानां चाण्डालादिस्पर्शे शौचादिनिरूपणम् ,, २१
अथ गर्गमते पदार्थक्रमः ,, २५

प्रथमकण्डिकाया विश्वनाथभाष्यम्।

अतीतसंवत्सरस्य चूडाकरणम् १७९ ३७
तृतीये वा वर्षे तत्करणकालः ,, ३८
यथामङ्गलमिति सूत्रार्थः ,, ४०
षोडशे एव केशान्तकर्तव्यविचारः १८० २
समयाभिधानानन्तरं तत्कर्तव्यताकथनम् ,, ५
शीतास्वप्सु इत्यादिमन्त्रार्थः ,, ११
केशान्ते मन्त्राध्याहारः ,, १३
सवित्रा प्रसूता इति मन्त्रार्थः ,, १६
मन्त्रयोरन्तरे वर्तमानस्य प्रवपतेरुभयत्रान्वयविचारः ,, २१
अन्वयपुरस्सरं मन्त्रार्थः ,, २४
येन भूरिश्चरादिवमित्यस्यान्वयपुरस्सरं मन्त्रार्थः ,, ३३
केशान्ते विशेषकथनम् ,, ३८
यत्क्षुरेण मज्जयतेत्यादीनामन्वयपुरस्सरं सूत्रार्थः ,, ३९
यथाकुलाचारं केशशेषकरणम् ,, ४४
अनुगुप्तमित्यादिवरंददातीत्यन्तसूत्रार्थः ,, ४४
केशान्ते गोदानादिकथनम् १८१ ३
द्वितीयकण्डिकामूलम् ,, ६

द्वितीयकण्डिकायाः कर्कभाष्यम्

द्विजोपनयनकालः ,, ३४
ब्राह्मणान् भोजयेदिति सूत्रार्थः १८२ ३
वासःपरिधानादि ,, १०
दीक्षावदेके इत्यादिसूत्रार्थः ,, १४

द्वितीयकण्डिकाया जयरामभाष्यम्।

विषयाः। पृ. पं.
उपनयनकालः १८२ २६
येनेन्द्रायेति मन्त्रार्थः ,, ३४
इयं दुरुक्तमिति मन्त्रार्थः १८३ ५
युवा सुवासा इति मन्त्रार्थः ,, १०
अहतवासोलक्षणम् ,, ११
यज्ञोपवीतमिति मन्त्रार्थः ,, २०
यो मे दण्ड इति मन्त्रार्थः ,, २८
दीक्षावदिति सूत्रार्थः ,, ३१

द्वितीयकण्डिकाया हरिहरभाष्यम्।

ब्राह्मणोपनयनकालः १८४ ७
क्षत्रियोपनयनकालः ,, १०
वैश्योपनयनकालः ,, ११
पक्षान्तरम् ,, १२
अथ काम्यानि ,, १५
उपनयनकर्मनिरूपणम् ,, १९
आचार्यलक्षणम् ,, २३
वासःपरिधानादि ,, २८
यज्ञोपवीताजिनधारणविचारः ,, ३५
दण्डधारणम् १८५ ८
दीक्षावदित्यादिसूत्रार्थः ,, १०
अथाञ्जलिपूरणम् ,, १३
सूर्यप्रदर्शनम् ,, १५
हृदयालम्भनादि ,, १८

द्वितीयकण्डिकाया गदाधरभाष्यम्।

ब्राह्मणोपनयनकालः ,, २९
उपनयनशब्दार्थः ,, ३१
उपनेतृक्रमः ,, ३२
क्षत्रियोपनयनकालः ,, ३६
वैश्योपनयनकालः १८६ १
पक्षान्तरप्रदर्शनम् ,, २
अथ काम्यानि ,, ५
तत्र व्रतकथनम् ,, ९
अथ मासविचारः ,, ,,

विषयाः । पृ. पं.
जन्ममासादिनिषेधस्तदपवादश्च १८६ १२
गुरुबलविचारः ,, १६
ग्राह्यनक्षत्राणि ,, २०
पुनर्वसुनिषेधः ,, २२
तिथयः ,, ,,
नान्दीश्राद्धोत्तरमकालिकानध्याये ,, २५
पुनःसंस्कारनिमित्तानि ,, २६
गलग्रहस्वरूपम् ,, ३०
सोपपदास्तिथयः ,, ३२
प्रदोषस्वरूपम् ,, ३४
शाखाधिपाः ,, ४०
ग्रहणादौ त्याज्यदिनानि १८७ २
उपनयनकर्मकथनम् ,, ४
आनयनप्रयोजनम् ,, ८
ब्रह्मचर्यमागामित्यादिमन्त्रार्थः ,, १२
येनेन्द्रायेति मन्त्रार्थः ,, १८
मेखलाबन्धनप्रकारः ,, २६
ग्रन्थिनियमः ,, २८
इयं दुरुक्तमिति मन्त्रोचारयितृविचारः ,, ३६
यज्ञोपवीताजिनधारणम् ,, ३९
यज्ञोपवीतलक्षणम् १८८ ३
धारणप्रकारः ,, ७
सव्यापसव्यलक्षणम् ,, ११
कृष्णाजिनलक्षणम् ,, १४
इयं दुरुक्तमिति मन्त्रार्थः ,, १६
युवा सुवासा इति मन्त्रार्थः ,, १९
यज्ञोपवीतमन्त्रार्थः ,, २३
दण्डप्रतिग्रहः ,, ३१
यो मे दण्ड इति मन्त्रार्थः ,, ३७
दीक्षावदिति सूत्रार्थः ,, ४०
अञ्जलिपूरणादि १८९ ४
इन्द्रस्येति मन्त्रार्थः ,, १७

विषयाः । पृ. पं.

द्वितीयकण्डिकाया विश्वनाथभाष्यम् ।

अष्टमे वर्षे ब्राह्मणोपनयनकालः १८९ २६
जन्मतः पञ्चम-षष्ठ-सप्तमेषु ब्रह्मवर्चसादिकामस्योपनयनम् ,, २७
क्षत्रियस्योपनयनकालः ,, २८
वैश्यस्योनयनकालः ,, ,,
शाखान्तरीयसमयग्रहणविचारः ,, २९
तदनन्तरं कर्तव्यकर्मनिरूपणम् ,, ३०
आचार्यकर्तृकं बटोर्वस्त्रपरिधापनम् ,, ,,
येनेन्द्रायेति मन्त्रस्य सान्वयोऽर्थः ,, ३६
इयं दुरुक्तमिति मन्त्रस्य सान्वयोऽर्थः ,, ४१
युवा सुवासा इति मन्त्रस्य सान्वयोऽर्थः १९० ३
यज्ञोपवीतमित्यादिमन्त्रार्थः ,, ८
ब्रह्मसूत्रधारणानन्तरमजिनधारणम् ,, १०
दण्डधारणम् ,, १३
सूर्यावेक्षणम् ,, १७
बटोर्हृदयालम्भनादि ,, १८
तृतीयकण्डिकामूलम् ,, २३

तृतीयकण्डिकायाः कर्कभाष्यम् ।

ब्रह्मचारिणोऽनुशासनम् ,, ३३
गायत्र्युपदेशप्रकारः १९१ ३
उपदेशकालः ,, ४
गायत्रीभेदप्रदर्शनम् ,, ७

तृतीयकण्डिकाया जयरामभाष्यम् ।

कुमारोपवेशनम् ,, ९
अनुशासनम् ,, ११

विषयाः । पृ. पं.
गायत्र्युपदेशप्रकारः १९१ १६
गायत्रीप्रदाने कालभेदाः ,, १८
गायत्रीभेदः ,, १९

तृतीयकण्डिकाया हरिहरभाष्यम् ।

कुमारोपवेशनम् ,, २४
कुमारानुशासनम् ,, २९
गायत्र्युपदेशः ,, ३८
उपवेशने पक्षान्तरम् १९२ ४
उपदेशप्रकारः ,, ५
सावित्रीप्रदानकालविकल्पः ,, ९
ब्राह्मणस्य विशेषः ,, १४
गायत्रीभेदाः ,, १७

तृतीयकण्डिकाया गदाधरभाष्यम् ।

कुमारोपवेशनम् ,, २२
अनुशासनम् ,, २५
अनुशासनप्रकारः ,, २८
सावित्र्युपदेशः ,, ३६
सावित्रीप्रदानप्रकारः १९३ ५
उपदेशकालविकल्पाः ,, ९
ब्राह्मणस्य कालः ,, १४
गायत्रीभेदाः ,, १७

तृतीयकण्डिकाया विश्वनाथभाष्यम् ।

आचार्यस्य दक्षिणतो बटोरुपवेशनम् ,, २४
कुमारानुशासनम् ,, २६
सावित्रव्रतादेशः ,, ३०
सावित्र्युपदेशो हि ब्राह्मणाय तात्कालिकोऽतस्तत्प्रयोगलेखनम् ,, ३५
ब्रह्मचारिणे सावित्रीप्रदानम् ,, ४०
अत्र मतान्तरम् १९४ १
पादशः उपदेशः ,, २
संवत्सरइत्यादिना उपदेशकालविकल्पः ,, ८
ब्राह्मणेतराणामुपदेशकालविकल्पत्वम् ,, ९

विषयाः।	पृ.	पं.
अधिकारि (राजन्यादि) भेदेन गायत्रीभेदाः	१९४	१०
पदार्थक्रमः	,,	१४
मात्रादीनामाभिवादनं भिक्षाप्रार्थनं च	,,	१७
मध्याह्नसंध्यावन्दनविधिः	,,	२६
आवाहनम्	,,	३०
प्राणायामः	१९५	६
मार्जनम्	,,	१८
सूर्यार्घः	,,	२८
सूर्योपस्थानम्	,,	३१
प्रणवन्यासः	,,	३६
वर्णन्यासः	,,	३८
पदन्यासः	,,	४२
पदन्यासे उक्तिप्रदर्शनम्	१९६	५
जपसंख्या	,,	७
संध्याप्रार्थनम्	,,	१२
संध्याविसर्जनम्	,,	१३
सायंप्रातःसन्ध्ययोर्विशेषः	,,	१४
सन्ध्यात्रयेऽप्येकमेवोपस्थानम्	,,	२३
प्रातःसन्ध्यायां विशेषः	,,	२६
संक्षेपतः सन्ध्यावन्दनविधिः	,,	३०
चतुर्थकण्डिकामूलम्	,,	३५

चतुर्थकण्डिकायाः कर्कभाष्यम्।

विषयाः।	पृ.	पं.
समिदाधानम्	१९७	११
ततः परिसमूहनम्	,,	१२
समिदाधानादिकर्मानिरूपणम्	,,	१५

चतुर्थकण्डिकाया जयरामभाष्यम्।

विषयाः।	पृ.	पं.
समिदाधानप्रकारः	,,	२३
अग्नेसुश्रव इत्यादिमन्त्रार्थः	,,	२५
अग्नये समिधमिति मन्त्रार्थः	,,	३२
मुखमार्जनम्	१९८	२
मेधामित्वस्यार्थः	,,	५
अङ्गालम्भनादिविचारः	,,	१०

चतुर्थकण्डिकाया हरिहरभाष्यम्।

विषयाः।	पृ.	पं.
समिदाधानम्		१५
परिसमूहनम्	,,	१६
अग्ने सुश्रव इत्यादीनां मन्त्राणां विभागविचारः	,,	२०
समिल्लक्षणम्	,,	२५
याज्ञिका वृक्षाः	,,	२७
निषिद्धाः समिधः	,,	२८
समिदाधानमन्त्रविकल्पः	,,	३४
मुखप्रोञ्च्छनम्	१९९	७
अङ्गालम्भनम्	,,	९
त्र्यायुषकरणम्	,,	११
अभिवादनम्	,,	१५
तत्प्रयोगः	,,	१७
अत्र गुरवः अभिवाद्याः		२१
अनभिवाद्याः	,,	२९
अनभिवाद्याभिवादने प्रायश्चित्तम्	,,	३२

चतुर्थकण्डिकाया गदाधरभाष्यम्।

विषयाः।	पृ.	पं.
समिदाधानम्	२००	१
अत्रशब्दार्थविचारः	,,	१
समिदाधानेतिकर्त्तव्यता	,,	३
परिसमूहनम्		६
तत्र विशेषः	,,	७
अग्ने सुश्रव इत्यादिमन्त्रार्थः	,,	९
उत्थायेति सौत्रपदप्रयोजनम्	,,	१८
अग्नये समिधमिति मन्त्रार्थः	,,	२१
समिदाधाने मन्त्रविकल्पः		२९
मुखमार्जनम्	,,	३७
मेधामित्यस्यार्थः	२०१	१
अङ्गालम्भनादि	,,	४
अथाभिवादने प्रकारः	,,	६
प्रथमाभिवाद्यविचारः	,,	८
अकारश्चास्य नाम्नोऽन्ते इत्यस्यार्थः	२०१	१३
नामग्रहणनिषेधः	,,	२०
अन्यथाऽभिवादने	,,	२१
एकहस्तेनाभिवादननिषेधः	,,	२२
अनभिवाद्याः	,,	२५
अभिवादनप्रशंसा	,,	३०
अभिवाद्याः	,,	३३

चतुर्थकण्डिकाया विश्वनाथभाष्यम्।

विषयाः।	पृ.	पं.
समिदाधानम्	२०२	१
अत्रशब्दस्याधिकरणार्थत्वनिषेधः	,,	,,
अपरे त्वित्यादिना दक्षिणेन पाणिना संधुक्षणप्रक्षेपः	,,	३
पञ्चभिर्मन्त्रैः प्रतिमन्त्रं संधुक्षणप्रक्षेपः	,,	४
अपरेषां मते सकृदेव	,,	५
अग्नौ संतापिताभ्यां हस्ताभ्यां मुखमार्जनम्	,,	८
तनूपा इति मन्त्रेण पाण्योः प्रतपनम्	,,	१०
शिष्टाचारप्राप्तानां केषांचित्पदार्थानां लेखनम्	,,	११
यथालिङ्गं वागादिस्पर्शनम्	,,	१२
चतुर्भिर्मेधाप्रार्थनम्	,,	१३
ततोऽभिवादनम्	,,	१४
पञ्चमकाण्डिकामूलम्	,,	१७

पञ्चमकण्डिकायाः कर्कभाष्यम्।

विषयाः।	पृ.	पं.
भिक्षाचरणम्	२०३	९
मातृभिक्षायाः प्रथमत्वम्	,,	१२
अधःशयनादिव्रतम्	,,	१६
निषेध्याः पदार्थाः	,,	१९

विषयाः ।	पृ.	पं.
ब्रह्मचर्यकालः	२०३	२२
वर्णभेदेनाजिनम्	,,	२४
मेखला	,,	२९
दण्डः	,,	३१
आचार्येणाहूतश्चेत्	,,	३२
स्नातकत्रैविध्यम्	२०४	३
गौणकालः	,,	७
व्रात्यस्योपनयनादिकर्मनिषेधः	,,	९
व्रात्यप्रायश्चित्तम्	,,	१३

पञ्चमकण्डिकाया जयरामभाष्यम् ।

विषयाः ।	पृ.	पं.
भिक्षाचरणम्	,,	१७
भिक्षानिवेदनम्	,,	२०
अधःशयनादिव्रतम्	,,	२३
मध्वादिवर्जनम्	,,	२५
ब्रह्मचर्यचरणकालः	,,	२७
वर्णक्रमेण वस्त्रादिकथनम्	,,	२९
आचार्यकृताह्वाने	२०५	४
स्नातकत्रैविध्यं तत्तल्लक्षणं च	,,	७
व्रात्यत्वसम्भवकालः	,,	१०
कालातिक्रमे प्रायश्चित्तम्	,,	११
व्रात्यप्रायश्चित्तम्	,,	१३

पञ्चमकण्डिकाया हरिहरभाष्यम् ।

विषयाः ।	पृ.	पं.
भिक्षाचर्यचरणम्	,,	१८
भिक्षावाक्यम्	,,	१८
भिक्षानिवेदनम्	,,	२९
समिदाहरणम्	,,	३२
ब्रह्मचारिणो यमनियमाः	२०६	२
ब्रह्मचर्यकालः	,,	१०
ब्रह्मचर्यकालानुकल्पः	,,	१३
वर्णक्रमेण वासःप्रभृतीनि	,,	१५
अजिनम्	,,	१८
मेखला	,,	२७
दण्डः	,,	३१
दण्डमानम्	,,	३३
आचार्येणाहूतश्चेत्	२०६	३७
स्नातकत्रैविध्यम्	२०७	९
उपनयनकालस्य परमावधिः	,,	१८
व्रात्यानामुपनयनादिनिषेधः	,,	२३
संस्कारकालातिक्रमे प्रायश्चित्तम्	,,	३०
पतितसावित्रीकविषये संस्कारप्रतिप्रसवः	२०८	२
स्मृत्यन्तरोक्तषण्ढादिसंस्कार्यनिरूपणम्	,,	१०
उपनयनशब्दार्थः	,,	१४
द्वादशविधपुत्रनिरूपणम्	,,	१५
कुण्डगोलकाद्युपनयनविचारः	,,	१८
उपनयनप्रयोगः	,,	२३
यज्ञोपवीतलक्षणम्	२०९	२
यज्ञोपवीतसङ्ख्याविचारः	,,	१२
शिष्टाचारप्राप्ताः पदार्थाः	२१०	२०
अभिवादनप्रकारः	,,	२६
भिक्षाचरणम्	,,	३२
उपनयनदिनमारभ्य आसमावर्त्तनात् ब्रह्मचारिणः कर्त्तव्यनिरूपणम्	,,	३९
कालातिक्रमोक्तप्रायश्चित्तेतिकर्तव्यता	२११	८
वेदारम्भकालस्तत्प्रयोगश्च	,,	२२

पञ्चमकण्डिकाया गदाधरभाष्यम् ।

विषयाः ।	पृ.	पं.
भिक्षाचर्यचरणम्	,,	३७
अत्र विशेषः	,,	३८
भिक्षावाक्ये भवत्पदप्रयोगविचारः	२१२	१
भिक्षणीयेषु विशेषः	,,	६
समिदाहरणादिनित्यं कर्म	,,	१७
मध्वादिनिषिद्धपदार्थनिरूपणम्	,,	२३
ब्रह्मचर्यधारणकालः	२१२	२७
वर्णक्रमेण परिधानवस्त्राणि	,,	३२
अजिनलक्षणम्	,,	३८
मेखलाविचारः	२१३	४
दण्डविचारः	,,	११
आचार्येणाहूतश्चेत्	,,	१७
स्नातकलक्षणम्	,,	२५
उपनयनकालस्य परमावधिः	,,	३४
पतितसावित्रीकनिरूपणम्	,,	३७
कालातिक्रमे प्रायश्चित्तम्	२१४	१
क्षुतादिसम्भवे कर्तव्यम्	,,	१४
पतितसावित्रीकस्य संस्कारादिनिषेधः	,,	१६
षण्ढमूकादीनां विशेषः	,,	२१
रथकारस्योपनयनम्	,,	२७
अथ पदार्थक्रमः	,,	३०
तत्राधिकारसिद्ध्यङ्गं प्रायश्चित्तम्	,,	३३
सङ्कल्पादिरुपनयनप्रयोगः	,,	३७
अभिवादनप्रयोगः	२१५	३६
अथ भिक्षाचर्यचरणम्	,,	३८
मध्याह्नसंध्याकालः	,,	४०
उपनयनाग्निधारणकालः	२१६	२
असंस्कृतस्य विशेषः	,,	४
प्रायश्चित्तहोमप्रयोगः	,,	४
गर्भाधानादिसंस्काराणां कालातिक्रमे प्रायश्चित्तम्	,,	१५
प्रायश्चित्तानन्तरमतीतसंस्कारणां पुनरनुष्ठानविचारः	,,	१७
अथ ब्रह्मचारिधर्माः	,,	२१
स्मृत्यन्तरोक्ता नियमाः	,,	२६
तत्र गुर्वाद्युच्छिष्टभोजननिषेधः	,,	२८
ताम्बूलादिनिषेधः	,,	३२

विषयाः।	पृ.	पं.
ब्रह्मचारिव्रतलोपे प्रायश्चित्तम्	२१६	३४
अथ पुनरुपनयनं तत्र मनुः	२१७	७
अगम्या देशाः	,,	९
प्रव्रजितादीनां पुनर्गृहस्थाश्रमेच्छायां प्रायश्चित्तम्	,,	११
पुनःसंस्कारेऽजिनादिनिषेधः	,,	१६
मेखलादीनां भङ्गे प्रतिपत्तिः	,,	१९
गर्गमते पदार्थक्रमः	,,	२१
अथ सावित्रव्रतादेशः	,,	२८
अथाग्नेयव्रतम्	२१८	५
अथाग्नेयव्रतोत्सर्गः	,,	२३
अथ शुक्रियव्रतादेशः	,,	२५
अथौपनिषदं व्रतम्	,,	३८
अथ शौलभव्रतादेशः	२१९	५
अथ गोदानव्रतादेशः	,,	११
वेदारम्भे पदार्थक्रमः	,,	१९
तत्र दिनविचारः	,,	२०
सङ्कल्पादिः प्रयोगः	,,	२२
उपसङ्ग्रहणविचारः	,,	३२
अध्ययनप्रकारः	,,	३५
वेदाभ्यासविभागः	,,	३६
वेदार्थज्ञानप्रशंसा	,,	३८
वेदाध्ययनप्रशंसा	,,	३२
शिष्याणां ताडनम्	२२०	२
शाखारण्डलक्षणम्	,,	६

पञ्चमकण्डिकाया विश्वनाथभाष्यम्।

विषयाः।	पृ.	पं.
भिक्षाचर्याचरणम्	,,	८
भिक्षायां ब्राह्मणादिक्रमेण भवच्छब्दप्रयोगाविचारः	,,	९
कतिसंख्याकानां कीदृशीनां स्त्रीणां भिक्षणीयत्वम्	,,	१०
अत्रापूर्त्तौ पक्षान्तरकथनम्	२२०	११
मातरं प्रथमामित्यत्र मातृशब्दोच्चारप्रयोजनम्	,,	१२
आचार्याभावे स्वजनन्यै भिक्षानिवेदनम्	,,	,,
आचार्याज्ञया कर्मणः प्रतिपत्तिः	,,	१३
ब्रह्मचारिकर्तव्यनियमकथनम्	,,	१७
व्रतादेशाग्निरक्षाकरणानन्तरं पूर्वनियमितवाग्विसर्जनम्	,,	२०
मध्याह्ने सायंकाले चाग्निपरिचरणम्	,,	२३
माध्याह्निकाग्निचरणे विरुद्धमतनिरासः	,,	२४
अष्टाचत्वारिंशद्वर्षाणि द्वादशवर्षाणि वा ब्रह्मचर्यचरणम्	,,	२६
ब्राह्मणादिक्रमेण चर्ममेखलाविचारः	,,	२८
दण्डधारणे यथाक्रममानविचारः	,,	३२
आचार्येणाहूत उत्थाय प्रतिश्रवणादि	,,	३५
उक्तकर्तव्यतारतस्य फलकथनम्	,,	३६
ततः शुक्रियव्रतादेशः	,,	४१
ततः शुक्रियविसर्गः	२२१	६
ततः शौलभव्रतादेशः	,,	१३
शौलभव्रतविसर्गः	,,	१५
सौकर्याय व्रतकर्तव्यतालेखनम्	,,	२०
स्नातकस्य प्रकारभेदाविजृम्भितभेदकथनम्	,,	२१
विद्यास्नातकस्य लक्षणम्	,,	२१
व्रतस्नातकस्य लक्षणम्	,,	२२
तत्र विविधविरुद्धाक्षेपनिराकरणम्	२२१	२३
उभयस्नातकस्य लक्षणम्	,,	३१
ब्राह्मणादिक्रमेणोपनयनस्य अनतिक्रान्तः कालः	,,	,,
पतितसावित्रीकाणां मन्त्रोपदेशाद्यनधिकारः	,,	३३
कालातिक्रमे नियतवदिति सूत्रार्थादिकथनम्	,,	,,
तत्रैव केचित्त्विति मतसंक्षेपः	,,	४२
संस्कारप्रतिप्रसवः	,,	४३
त्रिपुरुषपर्यन्तमित्यस्योपरि विचारः	,,	४४
अध्यापनांशे निषेधः	२२२	२
पुनस्तत्प्रतिप्रसवः	,,	,,
षष्ठकण्डिकामूलम्	,,	६

षष्ठकण्डिकायाः कर्कभाष्यम्।

विषयाः।	पृ.	पं.
ब्रह्मचारिणः स्नानकालः	२२३	१४
वेदशब्दार्थः	,,	१७
स्नानशब्दार्थः	,,	२२
कल्पशब्दार्थः	,,	२३
याज्ञिके विशेषः	,,	२५
गुरुपादोपसङ्ग्रहणादीतिकर्तव्यता	,,	२७

षष्ठकण्डिकाया जयरामभाष्यम्।

विषयाः।	पृ.	पं.
ब्रह्मचारिणः स्नानकालविचारः	२२४	२३
वेदशब्दार्थविचारः	,,	२५
षडङ्गानि	,,	२८
याज्ञिके विशेषः	,,	३१
समिदाधानात्पूर्वं वेदाहुतिविचारः	,,	३३
स्नानेतिकर्तव्यता	२२५	२
येऽप्स्वन्तरिति मन्त्रार्थः	,,	६
अभिषेकमन्त्रार्थः	,,	१४
अथोपस्थानमन्त्रव्याख्या	,,	२४
अन्नाद्यायेति मन्त्रार्थः	,,	३०

विषयाः ।	पृ.	पं.
प्राणापानाविति मन्त्रार्थः	२२५	३४
सुचक्षा इति मन्त्रार्थः	२२६	४
परिधास्यै इति मन्त्रार्थः	,,	८
यशसा मेति मन्त्रार्थः	,,	१३
या आहरदिति मन्त्रार्थः	,,	२०
यद्यश इति मन्त्रार्थः	,,	२४
अलंकरणमिति मन्त्रार्थः	,,	२८
वृहस्पतेरिति मन्त्रार्थः	,,	३२
प्रतिष्ठे स्थ इति मन्त्रार्थः	२२७	१
विश्वाभ्य इति मन्त्रार्थः	,,	२

षष्ठकण्डिकाया हरिहरभाष्यम् ।

ब्रह्मचारिणः स्नानकालः	,,	६
वेदपदार्थविचारः	,,	१२
तर्कशब्दार्थविचारः	,,	१५
तर्कशब्दस्यार्थवादपरत्वम्	,,	२७
कल्पशब्दार्थः	,,	३३
याज्ञिकस्य स्नानकालः	२२८	१
स्नानकालपक्षाः	,,	३
उपसङ्ग्रहणादिस्नानोतिकर्तव्यता	,,	९
समिदाधानकालविचारः	,,	११
उदकुम्भस्थापनम्	,,	१८
स्नानमन्त्राः	,,	२३
मेखलादिपरित्यागः	”	३१
दधिप्राशनादि	,,	३३
दन्तधावनकाष्ठपरिमाणं वर्णभेदेन	,,	३६
दन्तधावनकालः	२२९	२
सुगन्धिद्रव्येणोद्वर्त्तनम्	”	३
नववस्त्रपरिधानादि	”	१०
उत्तरीयधारणम्	”	१३
पुष्पपरिग्रहादि	”	१६
शिरोवेष्टनम्	”	१९
कर्णभूषणधारणादि	”	२१
स्नातकस्य दन्तधावनादि समन्त्रकम्	”	३२

विषयाः ।	पृ.	पं.

षष्ठकण्डिकाया गदाधरभाष्यम् ।

समावर्तनसंस्कारनिरूपणम्	२३०	१
अष्टाचत्वारिंशद्वर्षावसानादिः स्नानकालः	”	२
अष्टाचत्वारिंशद्वर्षावसानरूपस्नानकालानङ्गीकर्तृमीमांसकमतप्रदर्शनम्	”	४
विध्यादीनां वेदपदार्थत्वम्	”	९
तर्कशब्दार्थौ मतान्तरानुसारेण	”	१३
षडङ्गसहितस्य वेदत्वपक्षः	”	१४
याज्ञिके विशेषः	”	१७
समावर्त्तनकालपक्षाः	”	१९
स्नानप्रकारः	”	२१
वेदाहुतिकालविचारः	”	२५
उदकुम्भस्थापने दिङ्निरूपणम्	”	३०
येऽप्स्वन्तरिति जलग्रहणमन्त्रार्थः	”	३२
तेनेत्याद्यभिषेकमन्त्रार्थः	”	३७
येन श्रियमित्यादिमन्त्रार्थः	२३१	३
मेखलादीनां त्यागः	”	१०
उद्यन्निति मन्त्रार्थः	”	१२
दध्यादिप्राशनम्	”	१६
अन्नाद्यायेति मन्त्रार्थः	”	२०
अङ्गोद्वर्त्तनपुनःस्नानादि	”	२४
प्राणापानाविति मन्त्रार्थः	”	२६
सुचक्षा इति मन्त्रार्थः	”	३२
परिधास्यै इति मन्त्रार्थः	”	३६
यशसा मेति मन्त्रार्थः	२३२	५
वस्त्रैक्ये उत्तरीयविचारः	”	८
या आहरदिति मन्त्रार्थः	”	१३
यद्यश इति मन्त्रार्थः	”	१७
अलङ्करणमन्त्रार्थः	”	२२
नेत्राञ्जनम्	”	२३

विषयाः ।	पृ.	पं.
छत्रग्रहणमन्त्रार्थः	२३२	२८
प्रतिष्ठे स्थ इति मन्त्रार्थः	”	३१
दण्डग्रहणमन्त्रार्थः	”	३४
दन्तधावनादीनां समन्त्रकत्वकथनम्	”	३६
अथ पदार्थक्रमः, तत्र समावर्त्तनमुहूर्तम्	२३३	१
समावर्तनसङ्कल्पादिः प्रयोगः	”	५
समावर्तनोत्तरं पूर्वमृतानां त्रिरात्राशौचविधानम्	”	४०

षष्ठकण्डिकाया विश्वनाथभाष्यम् ।

क्रमप्राप्तसमावर्तनसंस्कारनिरूपणम्	२३४	५
पक्षान्तरकथनम्	”	”
संकुचिताध्ययनाचरणपक्षमतकथनम्	”	७
कथं स्नानम्	”	८
वेदपदवाच्यार्थकथनम्	”	१०
वेदपदलक्ष्यार्थकथनम्	”	११
अर्थसमर्पकतत्साहाय्यादप्यर्थनिर्णयः	”	१६
षडङ्गोपेतवेदाध्ययनानन्तरं स्नायादिति मतोपन्यासः	”	१८
कल्पमात्रेऽधीते स्नानाधिकारनिषेधः	”	२०
गुर्वनुज्ञादानानन्तरं स्नानम्	”	२३
समिधोऽभ्याधायेत्यस्य प्रयोजनकथनम्	”	२६
प्रागादीशानान्तासु दिक्षु प्रादक्षिण्येन कलशस्थापनम्	”	३१
ततः आदित्योपस्थानम्	”	३७
उपस्थानमन्त्राः	”	३८
दन्तधावनमन्त्रकथनम्	,,	४१

विषयाः ।	पृ.	पं.
चन्दनाद्यनुलेपनं नासिकयोर्मुखस्य च समीपे	२३५	१
निषिक्तेन भूजलेन स्वगात्रेऽनुलिप्ते जपः	,,	३
शुद्धवस्त्रेणाच्छादनम्	,,	५
उत्तरीयाभावेऽयं विधिः	,,	७
वस्त्रेण शिरोवेष्टनम्	,,	१०
नेत्राञ्जनम्	,,	१२
दर्पणे आत्मदर्शनम्	,,	१३
सप्तमकण्डिकामूलम्	,,	१७

सप्तमकण्डिकायाः कर्कभाष्यम् ।

विषयाः ।	पृ.	पं.
विवाहपर्यन्तं स्नातकव्रतकथनम्	,,	३१
तत्र शूद्रस्याप्यधिकारकथनम्	,,	३२
नृत्यादिनिषेधः	,,	३३
तत्प्रतिप्रसवः	,,	३४
क्षेमे रात्रौ ग्रामान्तरगमनादिनिषेधः	,,	३७
उदपानाविक्षणेत्यादिसूत्रार्थः	२३६	१
भिक्षाप्रतिषेधः	,,	५
अजातलोम्नीमित्यादिसूत्रार्थः	,,	८
सस्यवत्यां भूमौ मूत्रपुरीषादिनिषेधः	,,	१३
विकृतवस्त्रनिषेधः	,,	१६

सप्तमकण्डिकाया जयरामभाष्यम् ।

विषयाः ।	पृ.	पं.
यावद्विवाहं स्नातकव्रतानि	,,	२०
तेषु शूद्रस्याप्यधिकारः	,,	२१
नृत्यगीतादीनां निषेधप्रातिप्रसवौ	,,	,,
स्नानोत्तरं भिक्षानिषेधः	,,	२८
अयं मे इत्यादिमन्त्रार्थः	,,	३०
अजात लोम्नीमियादिसूत्रार्थः	२३६	३१

सप्तमकण्डिकाया हरिहरभाष्यम् ।

विषयाः ।	पृ.	पं.
यावद्विवाहं स्नातकव्रतनिरूपणम्	२३७	४
तत्र शूद्रस्याप्यधिकारकथनम्	,,	५
नृत्यगीतादिनिषेधः	,,	६
नृत्यादौ प्रतिप्रसवः	,,	९
अपरमित्यादिना प्रतिप्रसवान्तरम्	,,	१३
कालविशेषे ग्रामान्तरगमनादिनिषेधः	,,	१६
उदपानाविक्षणेत्यादिसूत्रार्थः	,,	१८
भिक्षानिषेधे श्रुतिः	,,	२७
जले मुखदर्शनादिनिषेधः	,,	३०
गर्भिणीमित्यादिसूत्रार्थः	,,	३४
विकृतवस्त्रधारणनिषेधः	२३८	७
स्नातकव्रतलोपे प्रायश्चित्तम्		१३

सप्तमकण्डिकाया गदाधरभाष्यम् ।

विषयाः ।	पृ.	पं.
स्नातकव्रतनिरूपणम्	,,	१५
नृत्यगायनादिनिषेधः	,,	१७
तदपवादः	,,	१९
उदपानावेक्षणेत्यादिसूत्रार्थः	,,	२६
भैक्षणनिषेधे श्रुतिवचनम्	,,	३२
अयं मे वज्र इति मन्त्रार्थः	,,	३५
गार्भिण्यादीनां पर्यायशब्देनोच्चारणम्	,,	३८
तिष्ठतो मूत्रपुरीषादिनिषेधः	२३९	५
विकृतवस्त्रधारणादिनिषेधः	,,	८

सप्तमकण्डिकाया विश्वनाथभाष्यम् ।

विषयाः ।	पृ.	पं.
स्नातकव्रतकथनम्	२३९	१४
वीणागाथिनोर्ब्राह्मणयोर्गानम्	,,	१५
क्षेमे सति ग्रामान्तरगमननिषेधः अक्षेमे गमनम्	,,	१६
क्षेमे सत्यधावनम्	,,	,,
उदपानाद्यवेक्षणनिषेधः	,,	,,
अस्मिन्नर्थेश्रुतेः प्रमाणत्वम्	,,	१९
अजातलोम्न्यादिभिः सहाभिगमननिषेधः	,,	२०
सस्यवत्यां भूमौ मूत्रपुरीषोत्सर्गादिनिषेधः	,,	२३
विकृतवस्त्रपरिधाननिषेधः	,,	२५
मित्रमिव सर्वेषां हितकारित्वम्	,,	२६
अष्टमकण्डिकामूलम्	,,	२८

अष्टमकण्डिकायाः कर्कभाष्यम् ।

विषयाः ।	पृ.	पं.
स्नातकस्य त्रिरात्रं व्रतचर्या	,,	३४
स्त्रीशूद्रादीनां दर्शनादिनिषेधः	,,	३५
शवशूद्राद्यन्नभक्षणनिषेधः	,,	३७
अन्धकारे भोजननिषेधः	२४०	२

अष्टमकण्डिकाया जयरामभाष्यम् ।

विषयाः ।	पृ.	पं.
स्नातकस्य त्रिरात्रव्रतानि तत्र मांसभोजनादिनिषेधः	,,	६
सत्यभाषणप्राधान्यम्	,,	१०
सोमे दीक्षितस्य नियमविशेषाः	,,	११

अष्टमकण्डिकाया हरिहरभाष्यम् ।

विषयाः ।	पृ.	पं.
स्नातकस्य त्रिरात्रव्रतम्	,,	१३
मांसभक्षणादिनिषेधः	,,	१५

विषयाः । पृ. पं.
आतपे मूत्रपुरीषादिनिषेधः २४० २३
सूर्यादात्मनोऽन्तर्धाननिषेधः „ २५
सत्यभाषणविधानम् „ २८
प्रवर्ग्यस्य नियमादि „ २९
अथ समावर्त्तनप्रयोगः „ ३३

अष्टमकण्डिकाया गदाधरभाष्यम् ।

स्नातकस्य त्रिरात्रव्रतम् २४२ १४
मांसभक्षणादिनिषेधः „ १५
उक्तनियमासम्भवे सत्यभाषणविधानम् „ २५
प्रवर्ग्यस्य नियमादि „ २६

अष्टमकण्डिकाया विश्वनाथभाष्यम् ।

प्रवर्ग्यकालिकनियमकथनम् „ ३०
स्त्रीशूद्रादीनामदर्शनम् „ „
तैः सहासंभाषा च „ ३१
शवशूद्राद्यन्नभक्षणनिषेधः „ ३२
आतपे मूत्रपुरीषादिनिषेधः „ ३३
छत्रादिना स्वान्तर्धाननिषेधः „ ३४
उष्णजलेन शौचाचमनकरणम् „ „
तेजःसंयोगं विना भोजननिषेधः „ „
अश्रोत्रियस्य प्रथमयज्ञादौ प्रसक्तिनिराकरणम् „ ३६
नवमकण्डिकामूलम् २४३ १

नवमकण्डिकायाः कर्कभाष्यम् ।

पञ्चमहायज्ञनिरूपणम् „ १४
देवपित्रादीनां देवतात्वविचारः „ १८
देवयज्ञः „ १९
भूतयज्ञः „ २३
पितृयज्ञः „ २९
विषयाः । पृ. पं.
मनुष्ययज्ञः २४३ ३३
ब्रह्मयज्ञावसरनिरूपणम् „ ३५
भिक्षुकादिभ्योऽन्नदानम् २४४ २
गृहस्थबालादीनां भोजनकालनिर्णयः „ ३
देवयज्ञादीनामावश्यकत्वम् „ ७

नवमकण्डिकाया जयरामभाष्यम् ।

देवयज्ञादिपञ्चमहायज्ञानां स्वरूपप्रदर्शनम् „ १०
स्वाहाकारैरिति सौत्रपदप्रयोजनम् „ १६
भूतगृह्याणां स्थानविभागप्रदर्शनम् „ १८
ब्रह्मयज्ञकालनिर्णयः „ २७
तस्मादु इत्यादिसौत्रवाक्यार्थः „ ३०

नवमकण्डिकाया हरिहरभाष्यम् ।

पञ्चमहायज्ञनिरूपणम् „ ३३
देवयज्ञादीनां पृथक् पृथक् स्वरूपप्रदर्शनम् २४५ १
तत्प्रकारनिरूपणम् „ ३
देवभूतादीनां देवतात्वनिरूपणम् „ ५
पर्युक्षणोपदेशप्रयोजनम् „ ८
स्वाहाकारोपदेशप्रयोजनम् „ „
भूतबल्यादीनां स्थानप्रदर्शनम् „ १४
मनुष्ययज्ञनिरूपणम् „ २७
ब्रह्मयज्ञावसरप्रदर्शनम् „ २९
तत्र कात्यायनादीनां वाक्यानि „ ३१
भिक्षुकादिभ्यो यथायोग्यमन्नादिदानम् २४६ २
गृह्याणां बालादीनां भोजनावसरनिरूपणम् „ ५
विषयाः । पृ. पं.
तस्मादु इत्यादिश्रुत्यर्थः २४६ ९
अहरहरित्यादिसूत्रार्थः „ ११
पञ्चमहायज्ञपद्धतिः „ १५
तत्र देवयज्ञप्रयोगः „ „
भूतयज्ञप्रयोगः „ १९
पितृयज्ञप्रयोगः „ ३०
काकादिबलिदानम् „ ३१
मनुष्ययज्ञप्रयोगः २४७ १
नित्यश्राद्धप्रयोगः „ ६

नवमकण्डिकाया गदाधरभाष्यम्

पञ्चमहायज्ञनिरूपणम् „ १२
देवयज्ञादीनां पृथक् पृथक् स्वरूपप्रदर्शनम् „ १३
एषामनुष्ठानप्रकारः „ १६
बलिहरणस्थाननिरूपणम् „ २२
पितृयज्ञविधिः „ ३१
मनुष्ययज्ञविधानम् „ ३६
ब्रह्मयज्ञावसरकथनम् „ ३८
भिक्षुकादिभ्योऽन्नदानम् २४८ ५
बालादीनां भोजनकालनिरूपणम् „ ७
पञ्चमहायज्ञानामावश्यकत्वकथनम् „ १२
अथ पदार्थक्रमः „ १६
स्नानाद्यनुष्ठानकालनिरूपणम् „ १७
देवयज्ञप्रयोगः „ २०
भूतयज्ञप्रयोगः „ २२
अथ पितृयज्ञप्रयोगः „ ३२
काकादिबलिदानप्रयोगः „ ३५
अथ ब्रह्मयज्ञः २४९ ३
अनध्यायेष्वपि तद्विधिः „ १०
तत्र कारिकायां विशेषः „ „
निरग्निकसाग्निकयोर्नित्यश्राद्धाधिकारनिर्णयः „ १५
अथ नित्यश्राद्धे विशेषः „ २१

विषयाः ।	पृ.	पं.
तत्र आवाहनादिनिषेधः	२४९	२५
दैनिककर्मणां दिवाऽसम्भवे गौणकालविचारः	,,	२६
अथ वैश्वदेवनिर्णयः	,,	२८
तत्र साग्नेः श्राद्धादौ वैश्वदेवनिर्णयः	,,	२९
अथ पक्वाभावे वैश्वदेवकर्तव्यताविधानम्	२५०	६
स्नातकादीनां वैश्वदेवाधिकारनिर्णयः	,,	८
अथ निरग्निकस्य विशेषः	,,	११
गर्गमते वैश्वदेवे विशेषः	,,	१५

नवमकण्डिकाया विश्वनाथभाष्यम् ।

विषयाः ।	पृ.	पं.
प्रत्यहमभ्यस्यमानपञ्चमहायज्ञनिरूपणम्	,,	१९
तत्रादौ देवयज्ञस्य प्रदर्शनम्	,,	,,
ब्रह्मयज्ञकथनम्	,,	२३
भूतयज्ञकथनम्	,,	२४
एषामनुष्ठानप्रकारः	,,	३१
बलिहरणस्थाननिर्देशः	,,	३३
पितृयज्ञविधिः	२५१	४
षोडशग्रासपरिमितान्नदानमशक्तौ, शक्तौ तु तृप्तिपर्याप्तम्	,,	७
केचित्तु इति मते पञ्चमहायज्ञसाङ्गतार्थं ब्राह्मणेभ्योऽन्नदानम्	,,	९
ततः काकादिबलिः	,,	१०
तर्पणात्प्राक् ब्रह्मयज्ञकरणविचारः	,,	१५
श्रुतिरपि तत्र प्रमाणम्	,,	१६
शास्त्रग्राह्यान्नादिना ब्रह्मचारिप्रभृतिभिक्षुकाणां तृप्तिकरणम्	,,	१७
गृहपतेः पश्चात्पत्न्यशनम्	,,	१८
आतिथ्यनुपस्थितिप्रसङ्गे पूर्वं गृहपतेर्भोजनम्	२५१	१९
अस्मिन्नर्थे श्रुतिरपि प्रमाणम्	,,	२०
केचित्स्वित्यादिना "पूर्वोऽतिथिभ्यः" इत्यत्रान्वयविचारः	,,	२१
अन्नाभावे काष्ठपर्यन्तेनापि देवेभ्यः स्वाहाकरणम्	,,	२३
अन्नाभावे नृपितृयज्ञौ उदपात्रेण प्रत्यहं कर्तव्यौ	,,	२५
दशमकण्डिकामूलम्	,,	२७

दशमकण्डिकायाः कर्कभाष्यम् ।

विषयाः ।	पृ.	पं.
अध्यायोपाकर्मनिरूपणम्	२५२	५
उपाकरणकालः	,,	८
उपाकरणानुष्ठानप्रकारः	,,	११
तत्र ब्रह्मचारिणः समिदाधाने विशेषः	,,	२२
तिलहोमः	,,	२६
कर्माङ्गनियमाः	,,	३२

दशमकण्डिकाया जयरामभाष्यम् ।

विषयाः ।	पृ.	पं.
उपाकरणनिरूपणम्	२५३	१
उपाकर्मशब्दार्थः	,,	,,
उपाकर्मकालनिरूपणम्	,,	५
उपाकरणेतिकर्तव्यतानिरूपणम्	,,	७
समिदाधाने ब्रह्मचारिणो विशेषः	,,	१३
वेदाद्यध्यापनप्रकारः	,,	२०
सह नोऽस्त्वित्यादिमन्त्रार्थः	,,	२२

दशमकण्डिकाया हरिहरभाष्यम् ।

विषयाः ।	पृ.	पं.
उपाकर्मनिरूपणम्	,,	२८
तत्र साग्नेरध्यापनप्रवृत्तस्यैवाधिकारनिरूपणम्	२५३	२९
उपाकरणकालनिरूपणम्	२५४	१
आज्यभागाविष्ट्वेत्यादिसूत्रव्याख्यानम्	,,	९
तत्र वेदभेदेन शिष्याणामध्यापनप्रकारः	,,	१२
त्रिरात्रादिनियमनिरूपणम्	२५५	६
अथोपाकर्मपद्धतिः	,,	११
अनध्यायेष्वध्ययने बुद्धिनाशादिफलनिरूपणम्	,,	३३

दशमकण्डिकाया गदाधरभाष्यम् ।

विषयाः ।	पृ.	पं.
उपाकर्मनिरूपणम्	२५६	१
साग्नेरध्यापयतोऽधिकारनिरूपणम्	,,	४
निरग्नेरधिकारविचारः	,,	,,
श्रावणपूर्णिमाया उपाकर्ममुख्यकालत्वनिरूपणम्	,,	१०
तत्र ग्रहणादिसम्भवे कालान्तरनिरूपणम्	,,	१४
कालविशेषानुरोधेन तदपवादः	,,	१७
कर्कस्थे रवौ तन्निषेधापवादौ	,,	२०
प्रथमोपाकृतौ शुक्रास्तादिनिषेधः	,,	२२
उपाकर्मणि पूर्वाह्णादिकालविचारः	,,	२६
तत्र वनस्थादीनामधिकारनिरूपणम्	,,	३५
आज्यभागाविष्ट्वेत्यादिसूत्रार्थः	,,	३९
सह नोऽस्त्वित्यादिमन्त्रार्थः	२५७	३०

CC0. In Public Domain. Kritkant Sharma Najafgarh Delhi Collection

विषयाः ।	पृ.	पं.
उपाकर्मोत्तरं त्रिरात्रादिनियमाः	२५७	३४
अथ पदार्थक्रमः	"	३८
तत्र प्रथमप्रयोगे मातृपूजादिविधानम्	"	३८
अक्षतधानाद्यासादनादिः प्रयोगः	२५८	१
श्रावणपूर्णिमायां रक्षाबन्धनकालनिर्णयः	"	१४
रक्षाकर्मणि भद्रानिषेधः	"	१५
रक्षाबन्धनमन्त्रः	"	१७

दशमकण्डिकाया विश्वनाथभाष्यम् ।

विषयाः ।	पृ.	पं.
अध्यायोपाकर्मनिरूपणम्	"	२०
निरग्नेरप्यस्याधिकारविचारः	"	२१
षण्मुहूर्तावच्छिन्नौदयिक्याः पूर्णिमायाः मुख्यकालत्वनिरूपणम्	"	२२
पक्षान्तरकथनम्	"	२३
कर्तव्यकर्मणोऽनुष्ठानम्	"	२५
सर्वत्र व्रतादेशविसर्गादौ सप्तत्रिंशदाहुतिकथनम्	"	३८
भृष्टयवहोमः	"	३९
शिष्यकर्तृकसपलाशसमिद्धोमः	"	४०
ब्रह्मचारिणो विशेषकथनम्	२५९	१
दन्तैरनवखण्डनपूर्वकं धानानां प्राशनम्	"	५
दधिभक्षणम्	"	"
संस्रवप्राशनान्ते आचार्यस्य मन्त्रब्राह्मणयोरध्यायानां शिष्येभ्योऽध्यापनम्	"	१४
बह्वृचादिशिष्येभ्यः क्रमेण सूत्रोक्तमन्त्राध्यापनम्	"	१६
सह नोऽस्त्वित्यादिमन्त्रजपः	२५९	१६
उपाकर्मोत्तरं त्रिरात्रमध्ययनादिनिषेधः	"	१८
एकादशकण्डिकामूलम्	"	२१

एकादशकण्डिकायाः कर्कभाष्यम् ।

विषयाः ।	पृ.	पं.
अनध्यायनिरूपणम्	"	३३
सर्वानध्याय इत्यत्र सर्वशब्दार्थनिर्णयः	"	३४
श्राद्धाशनाद्याकालिकानध्यायाः	"	३८
अभ्रदर्शनादावनध्यायनिरूपणम्	२६०	५
धावत इत्यादिना तात्कालिकानध्यायनिरूपणम्	"	१४
गुरुमरणादावनध्यायनिरूपणम्	"	१६

एकादशकण्डिकाया जयरामभाष्यम् ।

विषयाः ।	पृ.	पं.
अनध्यायनिरूपणम्	"	२४
सर्वशब्दार्थनिर्णयः	"	२५
आकालिकानध्यायनिरूपणम्	"	२७
ऋतुसन्धिस्वरूपनिर्णयः	"	३१
छन्दसामुत्सर्गेऽनध्यायनिरूपणम्	"	३३
अभ्रदर्शनादावनध्यायनिरूपणम्	"	३४
तात्कालिकानध्यायनिरूपणम्	२६१	६
गुर्वादिमरणेऽनध्यायनिरूपणम्	"	८
उभा कवीति मन्त्रार्थः	"	१४

एकादशकण्डिकाया हरिहरभाष्यम् ।

विषयाः ।	पृ.	पं.
अनध्यायनिरूपणम्	"	१९
प्रचण्डवातादिनिमित्तेऽनध्यायः	२६१	२०
सर्वशब्दार्थनिर्णयः	"	२१
आकालिकानध्यायनिरूपणम्	"	३१
मध्यनिशास्वरूपम्	२६२	३
तात्कालिकानध्यायनिरूपणम्	"	१०
गुर्वादिमरणेऽनध्यायनिरूपणम्	"	१७
अर्धषष्ठान्मासानित्यादिसूत्रार्थः	"	२३

एकादशकण्डिकाया गदाधरभाष्यम् ।

विषयाः ।	पृ.	पं.
अनध्यायनिरूपणम्	"	३१
सर्वशब्दार्थनिर्णयः	"	३२
आकालिकानध्यायनिरूपणम्	"	३४
निशाशब्दार्थनिर्णयः	२६३	६
अन्तर्दिवाकीर्त्ये इत्यस्यार्थनिर्णयः	"	१०
धावत इत्यादिना तात्कालिकानध्यायनिरूपणम्	"	१२
नीहारादावनध्यायनिरूपणम्	"	१५
गुर्वादिमरणेऽनध्यायनिरूपणम्	"	१९
अर्धषष्ठानित्यादिसूत्रार्थः	"	२५
उभा कवीति मन्त्रार्थः	"	३०

एकादशकण्डिकाया विश्वनाथभाष्यम् ।

विषयाः ।	पृ.	पं.
अनध्यायनिरूपणम्	२६३	३६
प्रचण्डे वातेऽनध्यायः	"	"
सर्वानध्याय इत्यत्र सर्वपदमङ्गादिपरम्	"	३७
अपरे तु इति मते गुर्वधीतपदार्थमात्रस्यानभ्यसनम्	"	"

विषयाः । पृ. पं.
केचिन्मतमप्यत्रानुकूलम् २६३ ३८
अत्र नवीनमतम् ,, ,,
श्राद्धाशनेऽनध्यायः ,, ३९
आकालिका अनध्यायाः ,, ४०
वदोत्सर्गादौ त्रिरात्राद्यनध्यायः २६४ २
अभ्रदर्शनेऽन्यमतम् ,, ३
निशाया मध्यमयोः प्रहरयोर्निषेधः ,, ४
अहोरात्रसन्धिकालयोर्निषेधः ,, ५
यावद्ग्रामे शवस्तावदध्ययननिषेधः ,, ६
दिवाकीर्त्ये इत्यस्यार्थविचारः ,, ,,
धावतोऽभिशस्तेत्यादिना तात्कालिकानध्यायनिरूपणम् ,, ९
नीहारादावनध्यायः ,, १०
गुरौ मृतेऽनध्यायादिः ,, ११
समानाचार्ये सब्रह्मचारिणि प्रेते त्रिरात्रमनध्यायः ,, १२
सार्धषष्ठमासाध्ययनानन्तरमुत्सर्गः ,, १४
उभा कवी इति मन्त्रजपः ,, १६
त्रिरात्रमाचार्येण सहैकत्र वासे कृते विविधप्रवासकरणम् ,, १७
द्वादशकण्डिकामूलम् ,, १९

द्वादशकण्डिकायाः कर्कभाष्यम् ।

अध्यायोत्सर्गनिरूपणम् ,, २४
उदकान्तामित्यादिनाऽनुष्ठानप्रकारः ,, २५

द्वादशकण्डिकाया जयरामभाष्यम् ।

अध्यायोत्सर्गनिरूपणम् ,, ३१
उत्सर्गप्रकारनिरूपणम् ,, ३२

विषयाः । पृ. पं.

द्वादशकण्डिकाया हरिहरभाष्यम् ।

उत्सर्गकालनिरूपणम् २६५ १
उत्सर्गानुष्ठानप्रकारः ,, ४
नदीस्नाने पूर्वपक्षः ,, ५
तत्समाधानम् ,, ७
सावित्रीमित्यादिसूत्रार्थः ,, १२

द्वादशकण्डिकाया गदाधरभाष्यम् ।

उत्सर्गकालः ,, १९
उत्सर्गप्रकारकथनम् ,, २१
वेदतदङ्गानामध्ययनकालदर्शनम् ,, २७
अथ पदार्थक्रमः ,, ३०
तत्र ऋषिपूजननिरूपणम् २६६ १
दवादीनां तर्पणप्रकारः ,, ४
सावित्र्यादिपाठनम् ,, ७

द्वादशकण्डिकाया विश्वनाथभाष्यम् ।

स चोत्सर्गः कथमित्यपेक्षायां ससमयतद्विधिनिरूपणम् ,, ११
उत्सर्गकालः ,, १२
उदकान्तं गत्वा स्नानविध्यनन्तरम् अरुन्धतीसहितसप्तर्षिप्रातिष्ठापूजादि ,, १३
देवऋष्यादितर्पणम् ,, १६
सावित्र्यादिपाठनम् ,, २२
ततः क्षपणादिनिषेधः ,, २३
त्रिरात्रानन्तरं शुक्लपक्षे वेदाध्ययनं कृष्णपक्षेऽङ्गाध्ययनम् ,, २६
त्रयोदशकण्डिकामूलम् ,, २८

त्रयोदशकण्डिकायाः कर्कभाष्यम् ।

लाङ्गलयोजनकर्मनिरूपणम् ,, ३५

विषयाः । पृ. पं.
पुण्याहपदप्रयोजनम् २६६ ३५
ज्येष्ठया वेत्यादिना पक्षान्तरकथनम् ,, ३६
इन्द्रमित्यादिना तदनुष्ठानप्रकारः ,, ३८

त्रयोदशकण्डिकाया जयरामभाष्यम् ।

लाङ्गलयोजनतत्कालनिरूपणम् २६७ १०
ज्येष्ठानक्षत्रस्य मुख्यत्वकथनम् ,, ११
तदनुष्ठानप्रकारः ,, १२

त्रयोदशकण्डिकाया हरिहरभाष्यम् ।

लाङ्गलयोजनकर्मनिरूपणम् ,, २३
पुण्याहपदप्रयोजनम् ,, ,,
पक्षान्तरप्रदर्शनम् ,, २५
तदनुष्ठानप्रकारः ,, २६
साग्निकस्य कृषिकर्मणि विशेषः २६८ ८
अथ प्रयोगः ,, १३

त्रयोदशकण्डिकाया गदाधरभाष्यम् ।

लाङ्गलयोजनकर्मनिरूपणम् ,, २१
कर्मकालः ,, ,,
ज्येष्ठयेत्यादिना कालान्तरनिरूपणम् २६८ २३
यागशब्दार्थः ,, २७
अनुष्ठानप्रकारः ,, २८
अथ पदार्थक्रमः २६९ ३

त्रयोदशकण्डिकाया विश्वनाथभाष्यम् ।

पुण्याहे लाङ्गलयोजनकर्मनिरूपणम् ,, १३
पक्षान्तरकथनम् ,, १४

विषयाः । पृ. पं.
तत्कर्मानुष्ठानरीतिः २६९ १६
मन्त्रेण फाल्योजनम् ,, २०
श्रेष्ठबलीवर्दाभिषेकाद्यनन्तरं भूमेर्वपनयोग्यकरणम् ,, २४
वपनकर्तव्यत्वम् ,, ,,
सीतायज्ञपदार्थः ,, २८
ब्राह्मणभोजनम् ,, ३०
चतुर्दशकण्डिकामूलम् ,, ३४

चतुर्दशकण्डिकायाः कर्कभाष्यम् ।

श्रवणाकर्मनिरूपणम् २७० २६
स्थालीपाकमित्यादिना कर्माङ्गहोमनिरूपणम् ,, २७
प्राशनान्ते इत्यादिना सर्पावनेजनम् ,, ३४
यथावनिक्तमित्यादिना बलिहरणविधानम् २७१ ३
सक्तुशेषमित्यादिना सर्पोपस्थानादिनिरूपणम् ,, ९
बलिहरणसमयेऽन्तरा गमननिषेधनिरूपणम् ,, १९
धानाप्राशनम् ,, २०

चतुर्दशकण्डिकाया जयरामभाष्यम् ।

श्रवणाकर्मनिरूपणम् ,, २२
तदनुष्ठानप्रकारनिरूपणम् ,, २३
अपश्वेतत्यादिमन्त्रद्वयार्थः ,, २६
तत्र सप्तकुलजानां निरूपणम् ,, २९
आग्नेयपाण्ड्वित्यादिमन्त्रत्रयार्थः २७२ ६
सर्वहुतमित्यादिसूत्रार्थः ,, १२

चतुर्दशकण्डिकाया हरिहरभाष्यम् ।

श्रवणाकर्मनिरूपणम् २७३ १
तत्कालनिर्देशः ,, २
स्थालीपाकादिश्रपणम् ,, ३
स्थालीपाकादिभिर्होमनिरूपणम् २७३ ११
अवनेजननिरूपणम् ,, १९
बलिहरणम् ,, २८
बलिकण्डूयनादिनिरूपणम् ,, ३५
सर्पाणामुपस्थानादिनिरूपणम् २७४ २
द्वारदेशे मार्जनादिनिरूपणम् ,, १२
धानादिप्राशनम् ,, २५
अथ श्रवणाकर्मणः प्रयोगः ,, २८
अथ प्रत्यहं बलिहरणप्रयोगः २७५ २७

चतुर्दशकण्डिकाया गदाधरभाष्यम् ।

श्रवणाकर्मनिरूपणम् ,, ३२
तत्कालनिरूपणम् ,, ३३
अस्य कर्मणो गौणकालनिषेधः ,, ,,
स्थालीपाकचरुश्रपणाद्यनुष्ठानप्रकारः ,, ३७
अपश्वेतत्यादिमन्त्रद्वयार्थः २७६ ८
तत्र सप्तकुलजानां निरूपणम् ,, १०
आग्नेयपाण्ड्वित्यादिमन्त्रत्रयार्थः ,, २१
पुरोडाशहोमादिनिरूपणम् ,, २५
शूर्पविचारः ,, ३५
उल्काविचारः ,, ३६
स यावत्कामयेतेत्यत्र तच्छब्दार्थविचारः २७७ १०
अनुगुप्तेत्यादिसूत्रार्थः ,, २०
अथ पदार्थक्रमः ,, ,,
अथ गर्गमते विशेषः ,, २९
कारिकायां विशेषः श्रवणाकर्माकरणे २७८ ३०

चतुर्दशकण्डिकाया विश्वनाथभाष्यम् ।

श्रवणाकर्मनिरूपणम् २७८ ३५
तत्कालकथनम् ,, ,,
तदनुष्ठानप्रकारः पदार्थक्रमश्च ,, ,,
अर्धश्रृते स्रुवप्रतपनादि २७९ १
मन्त्राभ्यामाज्याहुत्योर्होमः ,, ५
मन्त्रद्वयकथनम् ,, ,,
धानानामेकाहुतिः ,, ७
त्यागशब्दार्थः ,, ९
सक्तूनामित्युपलक्षणम् ,, ११
उल्कायां ध्रियमाणायामन्तरा गमननिषेधः ,, १३
सकृन्मन्त्रेण द्विस्तूष्णीं प्रदक्षिणम् ,, १९
द्वारदेशे मार्जनादिनिरूपणम् ,, २०
आग्रहायणीं पौर्णमासीं यावत् सर्पेभ्यो बलिहरणम् ,, २१
आद्यबलिदानविहितदानापवादः ,, २३
श्रवणाकर्माङ्गबलिदानानन्तरं प्रकृतकथनम् ,, २५
ब्राह्मणभोजनम् ,, २६
पञ्चदशकाण्डिकामूलम् ,, २८

पञ्चदशकण्डिकायाः कर्कभाष्यम् ।

इन्द्रयज्ञकर्मनिरूपणम् ,, ३५
तदितिकर्तव्यतानिरूपणम् ,, ३६
तत्र बलिहरणनिरूपणम् ,, ४०

पञ्चदशकण्डिकाया जयरामभाष्यम् ।

इन्द्रयज्ञकर्मनिरूपणम् २८० ५
तत्र मरुद्भ्यो बलिहरणादिनिरूपणम् ,, ९

विषयाः । पृ. पं.

पञ्चदशकण्डिकाया हरिहरभाष्यम् ।

इन्द्रयज्ञकर्मनिरूपणम् २८० १४
तदनुष्ठानप्रकारः ,, १५
तत्र मरुतां होमसम्बन्धरहितत्वबलिदानार्हत्वयोर्विचारः ,, २२
अथ प्रयोगः ,, ३४

पञ्चदशकण्डिकाया गदाधरभाष्यम् ।

इन्द्रयज्ञकर्मनिरूपणम् २८१ २२
पायसचरुश्रपणाद्यनुष्ठानविधिः ,, २३
तत्र मरुतां देवतात्वादिविचारः ,, २९
अथ पदार्थक्रमः २८२ १
मुख्यासम्भवे गौणकालविधिः ,, १७
गर्गमते विशेषः ,, १८

पञ्चदशकण्डिकाया विश्वनाथभाष्यम् ।

प्रौष्ठपद्यामिन्द्रयज्ञकर्मानिरूपणम् ,, २१
पायसचरुश्रपणाद्यनन्तरं होमः ,, २२
ततो देवताभ्यो बलिहरणम्, देवतात्वे सति कथं होमाभाव इत्यस्योपरि विचारः ,, २५
अश्वत्थेषु पत्रेषु बलिदानम् ,, २६
मनोव्यापारसहितेन बलिदानम् ,, २८
षोडशकाण्डिकामूलम् ,, ३१

षोडशकण्डिकाया कर्कभाष्यम् ।

पृषातकाकर्मनिरूपणम् ,, ३७
तदनुष्ठानप्रकारः ,, ३८

विषयाः । पृ. पं.

षोडशकण्डिकाया जयरामभाष्यम् ।

पृषातकाकर्मनिरूपणम् २८३ ६
तदनुष्ठानविधिः ,, ,,
ऊनं मे इति मन्त्रार्थः ,, ९

षोडशकण्डिकाया हरिहरभाष्यम् ।

पृषातकाकर्मनिरूपणम् ,, १६
तदनुष्ठानप्रकारः ,, १७
पृषदाज्यस्वरूपम् ,, २२
अथ प्रयोगः ,, ३१
ऊनं मे इत्यादिहोमीयदेवताविचारः २८४ ४

षोडशकण्डिकाया गदाधरभाष्यम् ।

साग्नेः पृषातकाकर्मनिरूपणम् ,, १४
तत्र पृषदाज्यहोमे देवताविचारः ,, १९
ऊनं मे इति मन्त्रार्थः ,, २५
अमात्यशब्दार्थः ,, २७
अथ पदार्थक्रमः ,, *
गर्गमते विशेषः ,, *

षोडशकण्डिकाया विश्वनाथभाष्यम् ।

आश्विनपौर्णमास्यां पृषातकाकर्मनिरूपणम् ,, ३४
तत्कर्मानुष्ठानप्रकारः ,, ३५
काभ्यो देवताभ्य आहुतिदानम् ,, ३७
संस्रवप्राशनान्ते पृषदाज्यहोमः ,, ३९
दक्षिणादानान्ते दधिपृषातकहोमः २८५ ३
आग्रहायण्यां चेत्कर्म तस्यां मातृभिर्वत्ससंसर्गः ,, ७
सप्तदशकाण्डिकामूलम् ,, ९

विषयाः । पृ. पं.

सप्तदशकण्डिकायाः कर्कभाष्यम् ।

सीतायज्ञनिरूपणम् २८६ ३
व्रीहियवयोः स्थालीपाकनिरूपणम् ,, ४
यावच्चरोर्निर्वृत्तिनिरूपणम् ,, ९
आस्तरणे विशेषः ,, १५
मन्त्रवत्प्रदानपक्षः ,, १८
बलिहरणम् ,, २५

सप्तदशकण्डिकाया जयरामभाष्यम् ।

सीतायज्ञनिरूपणम् ,, ३३
व्रीहियवयोरित्यादिसूत्रार्थः ,, ३४
पृथिवीत्यादिपञ्चमन्त्रार्थः २८७ ११
मन्त्रेषु वषट्कारस्वाहाकाराद्युच्चारणविचारः ,, ३०
पुरस्ताद्ये त इत्यादिमन्त्रार्थः २८८ २
स्त्रीणां बलिकर्मनिरूपणम् ,, १३

सप्तदशकण्डिकाया हरिहरभाष्यम् ।

सीतायज्ञकर्मनिरूपणम् ,, १५
व्रीहियवयोरन्यतरस्थालीपाकविचारः ,, १९
ग्रामे वोभयेत्यादिसूत्रार्थः ,, ३१
पुनरुपलेपनोपदेशविचारः २८९ ४
स्वाहाकारेत्यादिश्रुत्यर्थः ,, १०
स्मार्त्ते स्वाहाकारविचारः ,, १५
बलिकर्मनिरूपणम् ,, २४
अथ सीतायज्ञप्रयोगः ,, ३१

सप्तदशकण्डिकाया गदाधरभाष्यम् ।

सीतायज्ञनिरूपणम् २९० ३१
तदनुष्ठानप्रकारः ,, ३२

---

* पृथङ्मुद्रितपत्रे द्रष्टव्यम् ।

विषयाः ।	पृ.	पं.
कामादीजान इत्यादिसूत्रार्थः	२९०	३४
पृथिवीत्यादिमन्त्रार्थः	२९१	१६
स्मार्त्तेषु स्वाहाकारविचारः	,,	३४
पुरस्तादित्यादिमन्त्रार्थः	२९२	१
अनिमिषा इति मन्त्रार्थः	,,	५
आभुव इति मन्त्रार्थः	,,	८
भीमा इति मन्त्रार्थः	,,	११
अथ पदार्थक्रमः	,,	१९

सप्तदशकण्डिकाया विश्वनाथभाष्यम् ।

विषयाः ।	पृ.	पं.
सीतायज्ञकर्मनिरूपणम्	,,	३४
व्रीहियवानामित्यादिसूत्रार्थः	,,	३५
व्रीहियवयोर्मध्येऽन्यतरस्थालीपाकविचारः	,,	३७
पूर्वसूत्रादेवैतादृशार्थलाभेऽस्यारम्भे व्यर्थत्वकल्पनम्	,,	३८
तदारम्भसङ्गतिः	,,	३९
पुनरपि समयान्तरे तयोरसम्भवात्संदेहः	,,	४०
तयोरुपादानमहिम्ना संदेहनिवृत्तिः	२९३	१
केचित्तु इति मतेनार्थकथनम्	,,	,,
क्षेत्रस्य पुरस्तादित्यादिसूत्रार्थः	,,	४
ग्रामे वोभयेत्यादिसूत्रार्थः	,,	६
केषांचिन्मते ग्रामे वेत्येतत्पक्षान्तरपरम्	,,	७
तन्मते कृषिं कुर्वत एव साग्नेरत्राधिकारः	,,	८
पुनर्भूसंस्कारोक्तौ कर्कादिमतप्रदर्शनम्	,,	९
आज्यभागान्ते विशेषः	,,	११
आज्याहुतीनां प्रदर्शनम्	,,	१३
ततश्चतुराहुतयः	२९३	१४
ततः सिद्धपाकेनाष्टावाहुतयः	,,	१५
प्रधानचरुबलिदानानन्तरं बलिदानम्	,,	१९
यथामन्त्रं होमः केषांचिन्मते	,,	१९
मन्त्रवत्प्रदानमित्यस्य विनिवृत्तिः	,,	२१
पूर्ववद्बलिदानम्	,,	२४
वृद्धस्त्रीकर्तृकं बलिहरणम्	,,	२६
स्त्रीकर्तृकबल्यनन्तरं दशब्राह्मणभोजनम्	,,	२८

इति द्वितीयकाण्डं समाप्तम् ।

तृतीयकाण्डम् ।

विषयाः ।	पृ.	पं.
प्रथमकण्डिकामूलम्	२९४	१

प्रथमकण्डिकायाः कर्कभाष्यम् ।

विषयाः ।	पृ.	पं.
अनाहिताग्नेर्नवप्राशनकर्मनिरूपणम्	,,	१६
नवमित्यादिनाऽनुष्ठानप्रकारः	,,	१९
अन्नपतीययेति सूत्रार्थः	,,	२४

प्रथमकण्डिकाया जयरामभाष्यम् ।

विषयाः ।	पृ.	पं.
नवप्राशनकर्मनिरूपणम्	२९५	१
अत्र नवशब्दार्थविचारः	,,	२
शतायुधायेति मन्त्रद्वयार्थः	,,	९
स्विष्टमग्न इत्यस्यार्थः	,,	२३
अग्निः प्रथम इति मन्त्रार्थः	,,	३१
अन्नपतीयया वेति सूत्रार्थः	२९६	७
यवानां प्राशने विशेषः	,,	९
एतमुत्यंमिति मन्त्रार्थः	,,	१०

प्रथमकण्डिकाया हरिहरभाष्यम् ।

विषयाः ।	पृ.	पं.
आवसथिकस्य नवान्नप्राशनकर्मनिरूपणम्	,,	२०
नवान्ननिरूपणम्	२९६	२२
नवमित्यादिना तदनुष्ठानप्रकारः	,,	२६
यवप्राशने विशेषकथनम्	,,	३५
अथास्य प्रयोगः	२९७	४

प्रथमकण्डिकाया विश्वनाथभाष्यम् ।

विषयाः ।	पृ.	पं.
अनाहिताग्नेर्नवप्राशनमिति सूत्रार्थः	,,	२२
तच्च शरद्वसन्तयोः	,,	२३
अत्रैवं श्रीअनन्तयाज्ञिकमतम्	,,	२६
याज्ञिकमतकथनम्	,,	२७
आग्रयणकरणं विना नवान्नस्याग्नौ हवननिषेधः; ब्राह्मणदाननिषेधश्च	,,	२८
श्राद्धकल्पेऽयं निषेधो दम्पत्योः समः	,,	२९
केचित्त्विति मते व्रीहियवयोरेव यागसाधनतया भक्षणनिषेधः	,,	,,
सामान्येन मतप्रदर्शनम्	,,	३१
स्वमतप्रदर्शनम्	,,	,,
प्रथमप्रयोगे मातृपूजाऽऽभ्युदायिकादि	,,	३३
“शतायुधाय” “ये चत्वारः” इति द्वाभ्यामाज्याहुतिहोमः	,,	३८
तत्र विशेषः	,,	,
स्थालीपाकेन आग्रयणदेवताभ्यो होमः	२९८	२
नवाहुत्यनन्तरं संस्रवप्राशनम्	,,	६
अन्नपतेऽन्नस्येत्यादिमन्त्रेण	,,	७
यवानां प्राशने मन्त्रकथनम्	,,	८
[illegible] तूष्णीं प्राशनम्	,,	९

विषयाः। पृ. पं.
केचित्त्विति मते आज्यभागोत्तरमाज्याहुतिद्वयम् २९८ १०
ततो ब्राह्मणभोजनम् " ११
द्वितीयकण्डिकामूलम् " १३

द्वितीयकण्डिकायाः कर्कभाष्यम्।

मार्गशीर्षपूर्णिमायामाग्रहायणीकर्मनिरूपणम् २९९ १
स्थालीपाकमित्यादिनाऽनुष्ठानप्रकारः " २
स्रस्तरारोहणकर्मनिरूपणम्। " ७

द्वितीयकण्डिकाया जयरामभाष्यम्।

मार्गशीर्ष्यामाग्रहायणीककर्मनिरूपणम् " २०
अनुष्ठानप्रकारः " २१
यां जना इति मन्त्रद्वयार्थः " २३
संवत्सरायेति मन्त्रद्वयार्थः " ३२
स्रस्तरारोहणकर्मनिरूपणम् ३०० ९
अयमग्निरिति मन्त्रार्थः " १३
आरोहणविधानकथनम् " १८
सुहेमन्तामिति मन्त्रार्थः " २१
उदायुषेति मन्त्रार्थः " २३

द्वितीयकण्डिकाया हरिहरभाष्यम्।

मार्गशीर्ष्यामाग्रहायणीकर्मनिरूपणम् " २७
अनुष्ठानप्रकारः " २८
स्रस्तरारोहणम् ३०१ २
तत्र गृहपत्यादीनामारोहणप्रकारः " ८
स्रस्तरे स्वापप्रकारः " २२
ततो मासचतुष्टयपर्यन्तमधःशयनविधानम् " "
आग्रहायणकर्मपद्धतिः " २१
विषयाः। पृ. पं.
स्रस्तरारोहणपद्धतिः ३०२ १०
मुख्यकालाननुष्ठितानां प्रातराहुत्यादिकर्मणां गौणकालनिर्णयः " २७

द्वितीयकण्डिकाया विश्वनाथभाष्यम्।

मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्मनिरूपणम् ३०३ ३
तदनुष्ठानप्रकारः " "
तत्र विशेषः " ४
स्रस्तरारोहणकर्मनिरूपणम् " १४
तद्विधिः " १५
कीदृशानां प्रत्यवरोहणम् " १६
किं कृत्वा प्रत्यवरोहणम् " २०
स्वामिनोऽयमग्निरितिमन्त्रजपः " २१
दम्पत्योरुपनीतकुमाराणां मन्त्रपाठः " २४
तत्र शयनक्रमः " २६
पत्नीव्यतिरिक्तस्त्रीणां मन्त्राभावः " २८
अधः शयीरन्यथेष्टं वा " ३१
तृतीयकण्डिकामूलम् " ३३

तृतीयकण्डिकायाः कर्कभाष्यम्।

अष्टकानिरूपणम् " २६
तासां संज्ञानिरूपणम् " २८
साधनभूतद्रव्यानिरूपणम् " ३०
अष्टकाकालनिरूपणम् ३०४ ३१
तासामनुष्ठानप्रकारः " ३२
अष्टकाद्वितीयेऽहनि कर्मविशेषनिरूपणम् ३०५ ३
तर्पणशब्दार्थः " ७

तृतीयकण्डिकाया जयरामभाष्यम्।

अष्टकात्रयसंस्कारनिरूपणम् " १०
विषयाः। पृ. पं.
तासां संज्ञानिरूपणम् ३०५ ११
तत्साधनद्रव्यनिरूपणम् " १२
प्रथमाष्टकेतिकर्तव्यतानिरूपणम् " १४
त्रिंशत्स्वसार इत्यादिमन्त्रदशकार्थः " १५
शान्ता पृथिवीत्यादिमन्त्रचतुष्टयार्थः ३०६ ३४
पौषकृष्णाष्टम्यां मध्यमाष्टकानिरूपणम् ३०७ १५
वह वपामिति मन्त्रार्थः " १७
द्वितीयेऽहन्यन्वष्टकाकर्मनिरूपणम् " १८
तत्र विशेषः " २१

तृतीयकण्डिकाया हरिहरभाष्यम्।

मार्गशीर्ष्युत्तरमष्टकात्रयनिरूपणम् " २५
तासां संस्कारत्वसाधनम् " २७
संस्काराणां सकृदसकृदनुष्ठेयताविचारः " २८
अष्टकाद्रव्यदेवतानिरूपणम् " ३४
अष्टकाशब्दस्य कालोपलक्षकत्वनिरूपणम् ३०८ ६
प्रथमाष्टकाकालनिरूपणम् " ११
तदितिकर्तव्यतानिरूपणम् " १६
प्रधानाहुतिकालविचारः " २०
द्वितीयाद्यष्टकाविशेषनिरूपणम् " २६
तत्र गोपशुनिषेधप्रसङ्गेन कलिवर्ज्यधर्मनिरूपणम् " २७
वपाहोमविचारः " ३६
अष्टकाद्वितीयेऽहन्यन्वष्टकाकर्मनिरूपणम् ३०९ ५

विषयाः। पृ. पं.
अन्वष्टकेतिकर्तव्यतायां स्त्रीपिण्डदानादिविशेषनिरूपणम् ३०९ ९
तुरीयाष्टकानिरूपणम् ,, १८
प्रथमाष्टकापद्धतिः ,, २२
तत्राभ्युदायिकेतिकर्तव्यताविचारः ,, २२
तत्रासादनादिः प्रयोगः ,, २९
तद्यथेत्यादिना प्रथमान्वष्टकाप्रयोगः ३१० १७
उषानिर्णयः ३११ ५
अथ द्वितीयाष्टकाप्रयोगः ,, ६
तृतीयाष्टकासमयादिनिरूपणम् ३१२ २६
तुरीयाष्टकासमयादिनिरूपणम् ,, २९

तृतीयकण्डिकाया विश्वनाथभाष्यम्।

आग्रहायण्या ऊर्ध्वमष्टकात्रयानिरूपणम् ,, ३४
तिस्र इतिपदप्रयोजनकथनम् ,, ,,
यद्वा स्वतन्त्रेच्छस्य तिस्र इत्युक्तिः ,, ३५
संस्कारकर्मत्वादष्टकाकर्मण आवृत्तिः ,, ३६
प्रमाणद्वारा आवृत्तेः स्थिरीकरणम् ,, ,,
समयकथनानन्तरं तद्द्रव्यदेवतयोः कथनम् ,, ४०
चतुर्थ्यां वक्ष्यमाणत्वम् ,, ,,
यथाक्रमं द्रव्यदेवतासम्बन्धः ३१३ १
द्रव्यसमययोर्वक्ष्यमाणत्वम् ,, २
प्रथमाष्टकाकालनिरूपणम् ,, २
तत्कर्तव्यतानिरूपणम् ,, ३
दशाहुतिहोमः ,, ७
मध्यमाष्टकानिरूपणम् ,, १४

विषयाः। पृ. पं.
कलौ गोपशोर्निषिद्धत्वात्तद्द्रव्यग्रहणविचारः ३१३ १६
वपाहोमविचारः ,, १७
द्वितीयेऽहनि अन्वष्टकाकर्मनिरूपणम् ,, २०
अन्वष्टकेतिकर्तव्यतायां विशेषविधिः ,, २१
स्त्रीपिण्डदानादिविशेषः ,, २६
स्त्रीभ्यश्चेत्यत्र सूत्रसम्प्रदानसमुच्चयार्थ आद्यश्चकारः ,, २९
उपसेचनं चेत्यत्र सुरासक्त्वोः समुच्चयार्थो द्वितीयश्चकारः ,, २९
प्रयोगश्चेत्थम् ,, ३०
स्त्रीपिण्डेषु प्रतिपिण्डमञ्जनम् ,, ३१
आचार्यायान्तेवासिभ्यश्चेत्यत्र चकारः अनुकम्प्यानुक्तसमुच्चयार्थः ,, ३५
तृतीयाष्टकानिरूपणम् ,, ३६
तुरीयाऽष्टकानिरूपणम् ,, ३९
चतुर्थकण्डिकामूलम् ३१४ ४

चतुर्थकण्डिकायाः कर्कभाष्यम्।

अथ शालाकर्मनिरूपणम् ३१५ २२
तस्या अवटमित्यादिनेतिकर्तव्यतानिरूपणम् ,, २४
संस्रवप्राशनान्त विशेषकर्मकथनम् ३१६ ५

चतुर्थकण्डिकाया जयरामभाष्यम्।

शालाकर्मनिरूपणम् ,, १८
अवटहोमाद्यनुष्ठानविधिः ,, २०
अच्युतायेति मन्त्रार्थः ,, २१
इमामुच्छ्रयामीत्यादिमन्त्रार्थः ,, २२

विषयाः। पृ. पं.
ऋतामिति मन्त्रार्थः ३१७ ११
वास्तोष्पत इत्यादिमन्त्रार्थः ,, १३
अग्निमिन्द्रमित्यादिमन्त्रषट्कार्थः ,, ३१
श्रीश्च त्वेति मन्त्रार्थः ३१८ ६
धर्मस्थूणेत्यादिमन्त्रद्वयार्थः ,, ११

चतुर्थकण्डिकाया हरिहरभाष्यम्।

शालाकर्मनिरूपणम् ,, २०
गृहनिर्माणमुहूर्तकथनम् ,, २२
स्वशाखानुक्तस्यापि कर्मणः परशाखातो ग्राह्यत्वविचारः ३१८ २६
गृहभूमिनिर्णयोपयुक्तं गोभिलसूत्रं सभाष्यम् ,, २८
गृहभूमिनिरूपणम् ३१९ १
गृहद्वारानिरूपणम् ,, ५
गृहचतुर्दिक्षु वृक्षविचारः ,, ७
अवटहोमादिक्रियाकलापनिरूपणम् ३२० ५
स्तम्भोच्छ्रयणम् ,, १०
गृहाभ्यन्तरे आवसथ्याग्निस्थापनम् ,, १५
आघारादर्वागाज्याहुतिविशेषः ,, २२
सम्भारप्रोक्षणम् ,, २७
शालासन्ध्यभिमर्शनम् ,, ३२
दिगुपस्थानादि ,, ३५
अथ शालाकर्मप्रयोगः ३२१ ४

चतुर्थकण्डिकाया विश्वनाथभाष्यम्।

शालाकर्मनिरूपणम् ,, २१
पुण्याहे शालानिर्मितिः ,, ,,
आज्ये संस्कृते आग्नेय्यादिक्रमेण अवटखननानन्तरं प्रत्यवटं स्रुवेण होमः ,, २२

विषयाः । पृ. पं.

आग्नेयकोणावटे स्तम्भोच्छ्रयणम् ३२१ २४
स्तम्भाभावे शिलाविन्यासः ,, २५
प्रत्यवटं स्तम्भोच्छ्रयणे मन्त्रावृत्तिः ,, २६
दक्षिणतो ब्रह्माणमुपवेश्येति-प्रयोजनकथनम् ,, २८
अग्निस्थापनोक्तिः ,, २९
तत्र पदार्थानां क्रमः ,, ,,
देवतोद्देशेनाहुतिविशेषः ,, ३१
वास्तोष्पते इति मन्त्रेण चतस्र आहुतयः ,, ३८
स्थालीपाकस्येत्यादिभिः षड्भिर्मन्त्रैराहुतिदानम् ,, ४०
त्यागास्तु षट् ,, ,,
प्राशनान्ते प्रोक्षणम् ३२३ ४
पूर्वसन्धावभिमर्शनम् ,, ६
दक्षिणसन्धावभिमर्शनम् ,, ७
सम्पूर्णतया निर्मितायां प्रवेशः ,, १०
तत्र मन्त्रनिर्देशः ,, ,,
ततो ब्राह्मणभोजनम् ,, १२
पञ्चमकण्डिकामूलम् ३२३ १४

पञ्चमकण्डिकायाः कर्क-भाष्यम् ।

मणिकावधानकर्मनिरूपणम् ,, २०
अवटखननादितत्कर्त्तव्यतानिरूपणम् ,, २३

पञ्चमकण्डिकाया जयराम-भाष्यम् ।

मणिकावधाननिरूपणम् ,, २८
आपो रेवतीति मन्त्रार्थः ,, ३२

विषयाः । पृ. पं.

पञ्चमकण्डिकाया हरिहर-भाष्यम् ।

मणिकावधाननिरूपणम् ३२४ १
अवटनिर्माणादिनिरूपणम् ,, ४
मणिकावधानपद्धतिः ,, १२

पञ्चमकण्डिकाया विश्वनाथ-भाष्यम् ।

मणिकावधाननिरूपणम् ,, २०
एतच्चावसथ्याधानानन्तरं तद्दिने एव ,, ,,
ऋषेः स्वातन्त्र्यादिहसूत्रणम् ,, २१
आभ्युदायिकं श्राद्धम् ,, २२
तद्धोमश्चावसथ्ये ,, ,,
होमशेषस्य पितृपात्रे पिण्डे च प्रक्षेपः ,, ,,
अपरे त्विति मते निरग्नेरप्यग्नौकरणम् ,, ,,
आचार्यमते सान्निध्याभावः ,, ,,
होमवद्गृहीताग्नेरेवेत्यत्र 'एव' शब्दार्थविचारः ,, २४
मणिकावधानं कथं कर्तव्यमित्यस्योपरि कथनम् ,, २५
अवटनिर्माणरीतिः ,, २६
अवटस्योपरि मणिकस्थापनम् ,, २९
आपोहिष्ठेत्यादिभिः सिञ्चनम् ,, ३०
ततः पञ्चब्राह्मणभोजनम् ,, ३१
षष्ठकण्डिकामूलम् ,, ३३

षष्ठकण्डिकायाः कर्क-भाष्यम् ।

शीर्षरोगौषधनिरूपणम् ३२५ १

विषयाः । पृ. पं.

षष्ठकण्डिकाया जयराम-भाष्यम् ।

शीर्षरोगभेषजनिरूपणम् ३२५ ४
चक्षुर्भ्यामिति मन्त्रार्थः ३२५ ५
अवभेदकेति मन्त्रार्थः ,, ८

षष्ठकण्डिकाया हरिहर-भाष्यम् ।

शीर्षरोगौषधनिरूपणम् ,, १४
अर्धशीर्षरोगभेषजम् ,, १९

षष्ठकण्डिकाया विश्वनाथ-भाष्यम् ।

शीर्षरोगौषधनिरूपणम् ,, २४
दक्षिणोत्तरपाणिप्रक्षालनानन्तरं यथाक्रमं भ्रुवोर्मार्जनम् ,, ,,
एतत्स्वपरसाधारणम् ,, ,,
अर्धशीर्षरोगप्रतीकारः ,, २५
इत्थंकरणेन शिरोरोगनिवृत्तिः ,, २६
सप्तमकण्डिकामूलम् ,, २६

सप्तमकण्डिकायाः कर्क-भाष्यम् ।

दासवशीकरणोपायनिरूपणम् ३२६ १
कृतोपायस्य पुनर्भ्रमणे विशेषकर्मनिरूपणम् ,, ६

सप्तमकण्डिकाया जयराम-भाष्यम् ।

दासवशीकरणम् ,, ९
परित्वेति मन्त्रार्थः ,, ११
परिस्वाहलनेति मन्त्रार्थः ,, १६

सप्तमकण्डिका हरिहर-भाष्यम् ।

दासवशीकरणम् ,, २२
तदुपायनिरूपणम् ,, २३
वशीकृतस्य पुनर्विकारे कर्मान्तरनिरूपणम् ,, २८

विषयाः । पृ. पं.

सप्तमकण्डिकाया विश्वनाथभाष्यम् ।

दासवशीकरणम् ३२७ ३
वशीकरणोपायप्रदर्शनम् ,, ४
एवं परिमीढेऽपि दासे पुनर्विकारे उपायान्तरप्रदर्शनम् ,, ६
अष्टमकण्डिकामूलम् ,, १०

अष्टमकण्डिकायाः कर्कभाष्यम् ।

शूलगवाख्यकर्मनिरूपणम् ,, २८
तत्र वपाश्रपणविचारः ,, ३४
वनस्पतिहोमादितत्कर्तव्यता ३२८ ५
पायसस्य गोप्रतिनिधित्वनिरूपणम् ,, १४

अष्टमकण्डिकाया जयरामभाष्यम् ।

शूलगवकर्मनिरूपणम् ,, १६
श्रपणपदार्थविचारः ,, २०
रुद्रायेत्यादिनाऽनुष्ठानप्रकारः ,, २३
अत्र पायसस्य प्रतिनिधित्वविचारः ,, ३१

अष्टमकण्डिकायां हरिहरभाष्यम् ।

शूलगवाख्यकर्मनिरूपणम् ,, ३३
तत्र पश्वालम्भनविधानम् ३२९ ४
पशुशब्देन गोर्ग्रहणम् ,, ६
वपाश्रपणाद्यनुष्ठानविधिः ,, ८
तत्र दिग्व्याघार निरूपणम् ,, १७
ततः पत्नीसंयाजनिरूपणम् ,, २२
गोयज्ञनिर्देशः ,, ३५
पायसस्य पशुप्रतिनिधित्वम् ३३० १
अथ शूलगवप्रयोगः ,, ३

विषयाः । पृ. पं.

आहवनीयादिकुण्डरचनाप्रकारः ,, ८
ततः पञ्चभूसंस्काराद्यनुष्ठानविधिः ,, २२
अथ गोयज्ञपद्धतिः ३३३ ८

अष्टमकण्डिकाया विश्वनाथभाष्यम् ।

शूलगवाख्यकर्मनिरूपणम् ,, १४
स्वर्ग्यः पशव्य इत्यादिसूत्रार्थः ,, ,,
प्रत्यभिलाषं शूलगवावृत्तिः ,, १५
यत्तु तन्त्रोत्पत्तिर्बाध्यते इति तन्मतखण्डनम् ,, १६
पश्वालम्भनविधिः ,, १७
वपाश्रपणाद्यनुष्ठानविधानम् ,, ३६
चरुमिश्रितपश्ववदानहोमः ३३४ ७
वनस्पतिहोमान्ते दिग्व्याघारणम् ,, १२
व्याघारणान्ते पत्नीसंयाजनिरूपणम् ,, १५
प्रतिदिशं बलिहरणम् ,, १९
बलिदानमन्त्रकथनम् ,, २०
पश्ववशिष्टशरीरस्य वाताभिमुखं रुद्रमन्त्रैः स्तवनम् ,, २३
मन्त्रविषये पक्षान्तरम् ,, २४
अवशिष्टपशुमांसस्य अरण्ये एव उत्सर्गः ,, २६
एतेनैव गोयज्ञकथनम् ,, २७
तत्र द्रव्यविशेषः ,, २८
तुल्यवयसः गोदानदाक्षिणा ,, ३१
नवमकण्डिकामूलम् ,, ३८

नवमकण्डिकायाः कर्कभाष्यम् ।

वृषोत्सर्गनिरूपणम् ३३५ ९
वृषोत्सर्गकालः ,, १०

विषयाः । पृ. पं.

आज्यसंस्काराद्यनुष्ठानविधिः ३३५ १२
वृषलक्षणम् ,, १६
नभ्यस्थमित्यादिसूत्रार्थः ,, २०

नवमकण्डिकाया जयरामभाष्यम् ।

वृषोत्सर्गनिरूपणम् ,, २४
उत्सर्गकालः ,, २५
पूषा गा इति मन्त्रार्थः ,, २८
एतमिति मन्त्रार्थः ,, ३४

नवमकण्डिकाया हरिहरभाष्यम् ।

वृषोत्सर्गनिरूपणम् ३३६ ७
वृषोत्सर्गफलम् ,, ८
उत्सर्गकालनिरूपणम् ,, १३
अग्निप्रज्वालनादितत्कर्तव्यतानिरूपणम् ,, १६
रुद्रजपविधेरपूर्वविधित्वनिरूपणम् ,, २८
वृषस्य शुक्लादिवर्णविचारः ,, ३०
वृषपरिमाणादिविशेषनियमकथनम् ,, ३१
नभ्यस्थामित्यादिसूत्रार्थः ३३७ ३
पायसप्राशनाख्यकर्मनिरूपणम् ,, ६
अथ वृषोत्सर्गपद्धतिः ,, १२
संवत्सराभ्यन्तरे प्रेतनिमित्तकवृषोत्सर्गे मातृपूजनाद्यंगनिषेधः ,, २६
अस्य कालः ,, २९
फलश्रुतिः ,, ३५
अथ वृषस्वरूपम् ३३८ ६
ब्राह्मणादिवर्णानां ग्राह्या वृषाः ,, ९
नान्दीमुखादिवृषलक्षणानि ,, १५
नीलवृषलक्षणम् ,, १९
अथ वर्जनीया वृषाः ,, २२
प्रेतनिमित्तकवृषोत्सर्गपद्धतिः ,, २६

CC0. In Public Domain Kirtikant Sharma Najafgath Delhi Collection

विषयाः।	पृ.	पं.
एतं युवानमिति ऋगर्थः	३३९	४
वृषोत्सर्गाङ्गं पितृतर्पणम्	,,	११
उत्सृष्टवृषादीनामौपादानिकस्वत्वविचारः	,,	१९
पायसप्रासनाख्यकर्मनिरूपणम्	,,	२६
प्रेतनिमित्तकवृषोत्सर्गे साग्निनिरग्निभेदेन विशेषः	,,	३१
क्षत्रियादीनामेकादशेऽहनि वृषोत्सर्गकर्तव्यताविचारः		३७

नवमकण्डिकाया विश्वनाथभाष्यम्।

विषयाः।	पृ.	पं.
गोयज्ञातिदिष्टशूलगवधर्मातिशार्थं वृषोत्सर्गनिरूपणम्	३४०	६
वृषोत्सर्गकालः	,,	८
गवां गोष्ठे अग्निप्रज्वालनादितत्कर्तव्यतानिरूपणम्	,,	९
साग्निनिरग्न्योर्वृषोत्सर्गदिनानिर्णयः	,,	१०
तत्रादौ विष्णुपूजनतर्पणे तत्प्रयोगश्च	,,	११
वृषोत्सर्गविधिः	,,	१५
पर्युक्षणान्तेपुनराज्यसंस्करणम्	,,	२०
प्रत्याहृत्युदकस्पर्शः	,,	२५
पूषागा इत्यादिमन्त्रेण होमः	,,	,,
तदनन्तरं स्वाहाकारप्रयोगः	,,	२६
रुद्रकलशे रुद्रावाहनाद्यनन्तरं नमस्ते इत्यादिरुद्राध्यायजपः	,,	२७
कलशार्द्धेन वृषस्य स्नपनादि	,,	२८
कीदृशस्य वृषस्योत्सर्गः	,,	३०
एकद्विवर्णस्य रोहितस्य वा	,,	३१
वत्सतरीणां मध्येऽलङ्कृतवृषस्थापनान्तरम् अयं गाव इति पठनम्	,,	३३
चक्रत्रिशूलकरणम्	३४०	३४
काम्ये कामोल्लेखः	,,	३६
नित्ये वृषोत्सर्गे तु प्रेतत्वानिवृत्तये इत्याद्युल्लेखानन्तरं पुच्छमादाय तर्पणम्	,,	,,
एतं युवानमितिमन्त्रेणोत्सर्गप्रकारः	,,	३७
समीपस्थस्य वृषस्य मयोभूरित्यादिमन्त्रेण, पुराणमन्त्रेण च स्तवनम्	,,	३८
पाकयज्ञान्तरकथनम्	३४१	३
अस्य पाकयज्ञस्योत्तराङ्गपशुः वैकल्पिकः	,,	५
दशमकण्डिकामूलम्	३४१	८

दशमकण्डिकायाः कर्कभाष्यम्।

विषयाः।	पृ.	पं.
उदककर्मनिरूपणम्	,,	९
ऊनद्विवर्षप्रेतस्य पित्रादिसपिण्डानामेकरात्राद्याशौचविचारः	,,	१०
अदत्तकन्यामरणे आशौचविचारः	,,	२९
सूतके सूतकप्राप्तौ विचारः	,,	३४
शावाशौचे शावाशौचपाते विचारः	३४३	३
ऊनद्विवार्षिके प्रेते उदककर्मनिषेधः	,,	९
प्रेतानुगमनविचारः	,,	११
उपनीते प्रेते दाहादिक्रियाविचारः	,,	१५
उदकदानकाले शालकाशाग्रहणविचारः	,,	१८
ततो गृहप्रवेशसमये निम्बदशनादिविधिः	,,	३१
आशौचिनां त्रिरात्रधर्माः	,,	३४
क्षीरोदकदानविधिः	३४४	४
त्रिरात्राद्याशौचकालविचारः	,,	६
एकाहाद्याशौचापकर्षविचारः	३४४	११
सूतके शावाशौचधर्मातिदेशविचारः	,,	१४
आशौचमध्ये नित्यकर्मविचारः	,,	२७
प्रेतस्पर्शिनामाशौचविचारः	,,	३०
आचार्यादौ प्रेते उदकदानादिकर्मविचारः	३४५	३
प्रोषितमरणे आशौचविचारः	,,	६
कामोदकाः	,,	११
एकादशाहश्राद्धविचारः	,,	१४
तत्र साग्नेरधिकारविचारः	,,	२०
संवत्सरं पृथगेके, इति सूत्रार्थः	,,	२३
सपिण्डीकरणोत्तरं पार्वणश्राद्धविचारः	३४६	१

दशमकण्डिकाया जयरामभाष्यम्।

विषयाः।	पृ.	पं.
उदककर्मनिरूपणम्	,,	१५
ऊनद्विवर्षे प्रेते पित्रादिसपिण्डानामाशौचविचारः	,,	१६
अकृतकृतचौलत्वेन एकरात्राद्याशौचविचारः	,,	२०
असंस्कृतकन्याऽऽशौचविचारः	,,	३१
ऊनद्विवर्षे प्रेते दाहखननयोर्विचारः	३४७	१
आशौचशब्दार्थः	,,	३
आशौचे आशौचान्तरसम्पाते निर्णयः	,,	४
जननाशौचमध्ये बालमरणे आशौचविचारः	,,	९
ऊनद्विवार्षिके प्रेते उदकदानादिनिषेधः	,,	१०

विषयाः ।	पृ.	पं.
उपनीतमरणे दाहादिविचारः	३४७	१४
उपनयनोत्तरं सपिण्डानां दशाहाद्याशौचविचारः	,,	३०
तत्र वृत्तस्वाध्यायापेक्षयाऽऽशौचापकर्षविचारः	,,	३२
तत्र हीत्यादिना जननाशौचे दशाहमात्रातिदेशविचारः	३४८	१
आशौचमध्ये नित्यकर्मविचारः	,,	१२
प्रेतस्पर्शिनामाशौचविचारः	,,	१३
क्षत्रियादीनामाशौचम्	,,	१७
आचार्यादौ प्रेते उदकदानादिकर्मविचारः	,,	१९
अतिक्रान्ताशौचविचारः	,,	२२
एकादशाहश्राद्धम्	,,	२५
श्राद्धाधिकारविचारः	,,	२९
सपिण्डीकरणोत्तरं पार्वणैकोद्दिष्टश्राद्धविचारः	,,	३०

दशमकण्डिकाया हरिहरभाष्यम्।

विषयाः ।	पृ.	पं.
उदककर्मनिरूपणम्	३४९	२३
ऊनद्विवर्षे प्रेते पित्रादिसंपिण्डानामेकरात्राद्याशौचविचारः	,,	२५
जननाशौचे जननाशौचान्तरसम्पाते निर्णयः	,,	३४
मरणाशौचे मरणाशौचपाते निर्णयः	३५०	१
तत्र मातापित्रोर्विशेषः	,,	२
द्विवर्षप्रभृतिप्रेते आशौचम्	,,	१२
दाहादिमरणदिनकृत्यनिरूपणम्	,,	२३
विप्राणां दशाहादिशावाशौचनिरूपणम्	,,	३०
वृत्तस्वाध्यायाद्यपेक्षयाऽऽशौचापकर्षनिरूपणम्	,,	३[illegible]
आशौचमध्ये श्रौतस्मार्तादिनित्यकर्मानुष्ठानविचारः	३५१	६
प्रेतस्पर्शिनां ग्रामप्रवेशादिकर्मनिरूपणम्	३५२	१५
क्षत्रियादीनामाशौचकालनिर्णयः	,,	२४
अविवाहितकन्यामरणे आशौचानिर्णयः	,,	२८
विवाहितानां विशेषः	,,	३३
प्रोषितमरणे आशौचकालविचारः	,,	३७
अतिक्रान्ताशौचानिर्णयः	३५३	२
अथ कामोदकनिरूपणम्	,,	७
एकादशाहश्राद्धनिरूपणम्	,,	१३
साग्नेः पुत्रस्य द्वादशाहे सपिण्डनम्	,,	१९
साग्नेरपि संवत्सरं यावदेकोद्दिष्टनिरूपणम्	,,	२३
तत्खण्डनम्	,,	२७
संवत्सरं यावदन्नोदकुम्भदाननिरूपणम्	,,	३३
साग्निनिरग्निभेदेन पार्वणैकोद्दिष्टविचारः	,,	३६
आशौचापवादनिरूपणम्	३५४	१०
यज्ञादावारम्भपदार्थनिरूपणम्	,,	१२
अथ प्रेतकर्मपद्धतिः	,,	१५
कृष्णपक्षे साग्नेर्मरणशङ्कायामाहुतिनिरूपणम्	,,	२१
अथ साग्नेर्दाहक्रियापद्धतिः		२४
संसारानित्यत्वपराण्यपवादवाक्यानि	३५५	४
प्रेतस्य पिण्डोदकदानादिप्रयोगः	३५६	९
यतेः प्रेतक्रियानिषेधः	,,	२१
ब्रह्मचारिणः प्रेतक्रियाधिकारनिर्णयः	३५६	३४
अस्थिसंचयननिरूपणम्	,,	३७
चिताभूमौ वृक्षाद्यारोपणम्	३५७	१२
गङ्गादितीर्थेष्वस्थिनयनम्	,,	१५
तत्र फलश्रुतिवाक्यानि	,,	१९
अन्यकुलास्थिनयने प्रायश्चित्तम्	,,	२६
साग्नेः पत्नीमरणे तत्क्रियाविचारः	,,	२७
साग्नेर्देशान्तरमरणे तत्क्रियाविधानम्	,,	३२
आत्मघातिनां विशेषः	३५८	२
प्रेतदेहानां रजस्वलादिस्पर्शे तत्प्रायश्चित्तम्	,,	३

दशमकण्डिकाया विश्वनाथभाष्यम्।

विषयाः ।	पृ.	पं.
मृतसंस्कारकर्मनिरूपणम्	,,	७
द्विवर्षरहिते प्रेते मातापित्रोराशौचम्	,,	९
इतरेषां स्नानाच्छुद्धिः	,,	१०
मातापित्रोराशौचमेकरात्रमित्यादि कृतचौलाकृतचौलमूलकम्	,,	११
ऊनद्विवर्षप्रेतस्य खननम्	,,	१२
सूतके सूतकान्तरापाते निर्णयः	,,	१३
अत्रैव शङ्खमतम्	,,	१४
केचित्त्वित्यादिमतप्रदर्शनम्	,,	१५
मातापित्रोस्तु विशेषः	,,	१६
ऊनद्विवर्षे प्रेते तर्पणादिनिषेधः	,,	१९
द्विवर्षप्रभृति सपिण्डानां प्रेतेन सहानुगमनम्	,,	२०

विषयाः ।	पृ.	पं.
एकेषां मते यमगाथापठनपुरस्सरमनुगमनम्	३५८	२१
तच्च आहिताग्निविषयमिति कथनम्	”	२३
आहितस्य प्रसङ्गाद्दाहविधिनिरूपणम्	”	२४
वैतरणीधेनुदानम्	”	४१
ततो धेनुप्रार्थना	३५९	२
अथाष्ट महादानानि	”	५
तिलदानम्	”	५
ततो लोहदानम्	”	७
हिरण्यदानम्	”	८
कार्पासदानम्	”	१०
लवणंदानम्	”	११
सप्तधान्यदानम्	”	१२
भूमिदानम्	”	१५
गवां दानम्	”	१६
दुर्मरणं चेत्प्रायश्चित्तम्	”	२३
प्रायश्चित्ताचरणप्रयोगः	”	२८
धनिष्ठादिपञ्चकमरणे दाहः	”	४४
गरुडपुराणे विशेषः	३६०	१
तत्र दाहविधिः	”	२
सूतिका रजस्वला वा प्रेतस्पर्शं करोति तदा विशेषः	”	१८
स्त्रियः पत्या सहाभिगमनविधिः	”	”
सशेषदाहकथनम्	”	३३
अकृतावसथ्याधानस्य लौकिकाग्निना दाहः	”	३५
नियतसम्बाधिनः श्यालं प्रति जलयाचनम्	”	३७
कुरुध्वं मा चैवं पुनरित्यशनवर्षे इत्यस्यार्थः	”	३९
शतवर्षप्रभृति मृते कुरुध्वमित्येतावदुत्तरणम्	”	”
सपिण्डानां स्नानार्थं नदीजले प्रवेशः	”	४०
समानोदकत्वकथनम्	”	

विषयाः ।	पृ.	पं.
अप नः शोशुचदघमिति मन्त्रेण दक्षिणामुखानां स्नानम्	३६०	४२
ततस्तटागमनान्तरं भूमौ पाषाणे वा जलप्रक्षेपः	”	४४
ततो गरुडपुराणाद्दन्तधावनादि	३६१	२
उदकादुत्तीर्णानामितिहासपुराणादिभिः शोकरहितकरणम्	”	३
कनिष्ठाग्रिमाणां ग्रामं प्रत्यागमनम्	”	५
प्रतपतिकगृहस्य द्वारे आगत्य निम्बपत्राद्यवखण्डनादि	”	७
पुत्रादिकर्तृकनियमाः	”	१०
उपोषणाशक्तिपक्षकथनम्	”	
नामग्रहणपूर्वकं प्रेताय पिण्डे दत्ते दिवैवामांसान्नभक्षणम्	”	१९
तत्र पिण्डदानविधिः	”	२०
प्रेतस्य मार्गश्रमनिवृत्त्यर्थं मृन्मये पात्रे क्षीरोदकयोर्निधानम्	”	३६
शावाशौचे एकरात्रत्रिरात्रादिमतविचारः	”	३९
सूतकनिर्णायकं त्रिरात्रमित्यादिसूत्रम्	”	४०
यावदाशौचं वेदाध्ययननिषेधः	”	४१
नित्यानां कर्मणां निवृत्तिः	”	४२
शालाग्नौ चैके इत्यस्यार्थः	”	४३
दिवा मृते प्रेतस्पर्शिनो नक्षत्रदर्शनात्प्राक् ग्रामप्रवेशनिषेधः	३६२	१
रात्रौ मृते सूर्यदर्शनात्प्राक्निषेधः	”	”
प्रसङ्गाद्द्वितीयदिवसकृ[illegible]	”	

विषयाः ।	पृ.	पं.
तृतीयाहकृत्यम्	३६२	५
चतुर्थाहकृत्यम्	”	७
पञ्चमाहकृत्यम्	”	१६
षष्ठाहकृत्यम्	”	१७
सप्तमाहकृत्यम्	”	१८
अष्टमाहकृत्यम्	”	१९
नवमाहकृत्यम्	”	२०
दशमाहकृत्यम्	”	२१
अथैकादशाहकृत्यम्	”	३०
अथैकादशाहश्राद्धम्	”	३५
अथ द्वादशाहसम्बन्धिकर्तव्यम्	३६३	२८
अथ सपिण्डीकरणम्	३६४	१२
पिण्डचतुष्टयापादानम्	”	३२
प्रेतेन सपिण्डतां प्रापिते चतुर्थस्य प्रेतप्रपितामहस्य निवृत्तिः	”	३२
अपकृष्य कृतानामूनमासिकादीनां संवत्सरं यावत्पृथगनुष्ठानम्	”	३४
यत्तु निरग्नेरेकोद्दिष्टविधायकमेतत् सूत्रमिति तत्खण्डनम्	”	३७
पार्वणविधौ सपिण्डतां प्राप्तानामन्येषामपि कुतो न निक्षेप इत्याशङ्कनम्	”	”
चतुर्थः पिण्डो न भवतीति सूत्रेण समाधानम्	”	३८
प्रत्यहं प्रेतोद्देशेन ब्राह्मणायोदककुम्भदानम्	”	३९
केषांचिन्मतेन प्रत्यहं पिण्डनिर्वपणम्	”	४०
संकल्पविधिना प्रत्यहं पार्वणम्	”	४१
[illegible]कण्डिकामूलम्	३६५	१

विषयाः । पृ. पं.

एकादशकण्डिकायाः कर्कभाष्यम् ।

गोभिन्नपशुयागानिरूपणम् ३६५ ९
पलाशशाखायोजनादितिकर्तव्यतानिरूपणम् ,, १०
नवश्राद्धाङ्गपशुनिरूपणम् ,, २४

एकादशकण्डिकाया जयरामभाष्यम् ।

स्मार्त्तपशुनिरूपणम् ,, २६
गोभिन्नपश्वोः स्नापनम्,, ,,
पलाशशाखानिखननकालः ,, २८
नवश्राद्धे गोपशुनिरूपणम् ३६६ ३
नवश्राद्धशब्दार्थः ,, ४

एकादशकण्डिकाया हरिहरभाष्यम् ।

स्मार्तपशुनिरूपणम् ,, ८
तत्र गोभिन्नपश्वोः स्नापनादिनिरूपणम् ,, ९
परिव्ययणादि तदितिकर्तव्यतानिरूपणम् ,, १२
हृदयाद्यवदानम् ,, २५
अवदानहोमः ,, ३०
पशुबन्धप्रदक्षिणा ,, ३१
आचार्याद्यर्घ्यदेवतानिरूपणम् ,, ३४
प्रेतोद्देशेन गोपशुनिरूपणम् ३६७ २

एकादशकण्डिकाया विश्वनाथभाष्यम् ।

गोपश्वालम्भप्रसङ्गेनार्घ्यपशुकर्मनिरूपणम् ,, ५
गोभिन्नपश्वोः स्नापनादिनिरूपणम् ,, ६
पलाशशाखानिखननसमयः ,,
विषयाः । पृ. पं.
मन्त्रवर्जितपशुप्रकरणविहितेतिकर्तव्यतया परिव्ययणादिकरणम् ३६७ १६
अन्यदपिपशुसंस्कारकम् ,, २०
मारणात्पूर्वमाहुतिद्वयानन्तरं पञ्चाज्याहुतिहोमः ,, २१
वपोद्धरणानन्तरमभिधारणम् ,, २३
उपाकरणादिषु देवतादेशः,, ,,
स्थालीपाकेऽप्येवम् ,, २६
वपाया हवनानन्तरमेकादशहृदयादीनामवदानम् ,, २९
अथवा आदितस्त्रयाणामवदानम् ,, ३१
आदितः पञ्चानामवदानम् ,, ,,
ततोऽवदानहोमः ,, ३३
पशोरङ्गं पशुबन्धनस्य दक्षिणा ,, ३६
अर्घ्यस्य आचार्यादेर्भेदेन भिन्नार्घ्यदेवतानिरूपणम् ,, ३८
एकादशाहश्राद्धे प्रेतोद्देशेन नद्यन्तरे गोपश्वालम्भनम् ,, ४१
अथवा पशोरालम्भने विकल्पः ३६८ २
द्वादशकण्डिकामूलम् ४

द्वादशकण्डिकायाः कर्कभाष्यम् ।

अवकीर्णिप्रायश्चित्तनिरूपणम् ,, १३
अवकीर्णिशब्दार्थः ,, १४
गर्दभपश्वालम्भनादितत्कर्तव्यतानिरूपणम् ,, १५
गार्दभंछविपरिधानप्रकारः ,, १९
विषयाः । पृ. पं.
अथ प्रायश्चित्तान्तरनिरूपणम् ३६८ २२

द्वादशकण्डिकाया जयरामभाष्यम् ।

अवकीर्णिप्रायश्चित्तनिरूपणम् ,, २७
पाकयज्ञेनेतिसौत्रपदप्रयोजनम् ,, २८
अत्र प्रायश्चित्तान्तरनिरूपणम् ,, ३२
कामावकीर्णोऽस्मीत्यादिमन्त्रद्वयार्थः ,, ३३
अथोपस्थानमन्त्रार्थः ३६९ ३
प्रायश्चित्तशब्दार्थः ,, ६

द्वादशकण्डिकाया हरिहरभाष्यम् ।

अवकीर्णिप्रायश्चित्तनिरूपणम् ,, ८
प्रायश्चित्तकालनिरूपणम् ,, १०
देवतानिरूपणादितत्कर्तव्यतानिरूपणम् ,, १३
अवदानहोमे विशेषः ,, १५
पुरोडाशश्रपणे विशेषः ,, १७
गर्दभत्वक्परिधानादिनिरूपणम् ,, १९
प्रायश्चित्तान्तरनिरूपणम् ,, २४

द्वादशकण्डिकाया विश्वनाथभाष्यम् ।

अवकीर्णिप्रायश्चित्त्यै सदैव तद्विप्रकारकगर्दभपशुकरणविधिः ,, ३५
अथातोऽवकीर्णिप्रायश्चित्तमिति सूत्रार्थः ,, ३६
कस्यांचिदमावास्यायां चतुष्पथे अवकीर्णिनो गर्दभपशुकरणकं प्रायश्चित्तम् ३७० ३

विषयाः । पृ. पं.

तद्देवतानिरूपणपूर्वकं तत्कर्मविधिनिरूपणम् ३७० ४
अवदानहोमे विशेषकथनम् ,, ७
पुरोडाशश्रपणे विशेषविधानम् ,, ९
पशुसमाप्त्यनन्तरं भिक्षाटनप्रकारः ,, १२
तस्यैव गर्दभस्य त्वक्परिधानादि ,, १२
स्वकर्मकथनपूर्वकं भिक्षाचरणम् ,, १५
आहुतिद्वयरूपप्रायश्चित्तान्तरकथनम् ,, १७
बलात्स्त्रीच्छया व्यभिचरितस्य स्वल्पप्रायश्चित्तम् ,, १९
त्रयोदशकण्डिकामूलम् ,, २४

त्रयोदशकण्डिकायाः कर्कभाष्यम् ।

सभाप्रवेशानिरूपणम् ,, ३६

त्रयोदशकण्डिकाया जयरामभाष्यम् ।

सभाप्रवेशानिरूपणम् ३७१ १
सभाङ्गिरसीति मन्त्रार्थः ,, २
अथ प्रवेशनमन्त्रार्थः ,, ५
अभिभूरिति मन्त्रार्थः ,, ९
या त एषेति मन्त्रार्थः ,, १४
तान्त इति मन्त्रार्थः ,, २२

त्रयोदशकण्डिकाया हरिहरभाष्यम् ।

सभाप्रवेशनिरूपणम् ,, २८
सभागमनमन्त्रः ,, २९
सभाप्रवेशमन्त्रः ,, ३१
सभेशक्रोधापनयनमन्त्रः ३७२ ३
सभेशद्रोहापनयनमन्त्रः ,, ७

त्रयोदशकण्डिकाया विश्वनाथभाष्यम् ।

सभाप्रवेशानिरूपणम् ३७२ ११
सभागमनविधिः ,, ,,
समागमनमन्त्रः ,, ,,
सभाचमासमितिरित्यादिमन्त्रेण सभाप्रवेशः ,, १२
सभेशक्रोधनाशनमन्त्रः ,, १५
सभापतेर्द्रोहनाशनमन्त्रः ,, १८
एतदेव वशीकरणम् ,, २१
चतुर्दशकण्डिकामूलम् ,, २४

चतुर्दशकण्डिकाया जयरामभाष्यम् ।

रथारोहणकर्मनिरूपणम् ३७३ ३
चक्राभिमर्शनमन्त्रार्थः ,, ६
अङ्कौ न्यङ्कावीति मन्त्रार्थः ,, ८
नमो माणिचरायेति वाहप्रेरणमन्त्रार्थः ,, १४
इह रतिरिति मन्त्रार्थः ,, १८
अयं वोति मन्त्रार्थः ,, २१
एष वामिति मन्त्रार्थः ,, २४

चतुर्दशकण्डिकाया हरिहरभाष्यम् ।

रथारोहणकर्मनिरूपणम् ,, २६
चक्रादिरथावयवाद्यभिमर्शनप्रकारः ,, २८
प्रत्यवरोहादिनिरूपणम् ३७४ ३
रथदृढीकरणमन्त्रः ,, ९
पुना रथभ्रमणे तदुपायनिरूपणम् ,, १३
अश्वमोचनादिनिरूपणम् ,, १६

चतुर्दशकण्डिकाया विश्वनाथभाष्यम् ।

रथारोहणकर्मनिरूपणम् ,, २१
सारथिप्रतिरथपतः प्रैषः ,, २२
रथन्तरमसीति मन्त्रेण दक्षिणचक्राभिमर्शनम् ३७४ २४
एवमुत्तरचक्राद्यभिमर्शनम् ,, २५
रथे उपवेशानन्तरं नमो माणीति मन्त्रेण वाहप्रेरणम् ,, २९
देवादिदर्शनात्प्राक्रथादवतरणम् ,, ३०
ब्राह्मणे संनिकृष्टे रथादवतरणम् ,, ३१
एवं गवादिविषयेऽपि ,, ,,
स्त्रीब्रह्मचारिणोः सारथ्यनिषेधः ,, ३३
स रथो दुर्बलश्चेदयं वामिति मन्त्रजपः ,, ३६
पुना रथभ्रमणे तदुपायनिरूपणम् ,, ३८
स्थानप्राप्त्यनन्तरं बलीवर्दाश्वयोः रथात्पृथक्करणम्, तृणादिदापनादि च ३७५ ४
पञ्चदशकण्डिकामूलम् ,, ९

पञ्चदशकण्डिकाया जयरामभाष्यम् ।

हस्त्यारोहणकर्मनिरूपणम् ३७६ १२
हस्तियशसमिति हस्त्यभिमर्शनमन्त्रार्थः ,, १२
इन्द्रस्य त्वेति हस्त्यारोहणमन्त्रार्थः ,, १५
अश्वारोहणे मन्त्रोहकथनम् ,, १७
रासभारोहणमन्त्रार्थः ,, १९
चतुष्पथाद्यभिमन्त्रणम् ,, २१
वस्त्रप्रान्तैकदेशोत्थवायोरमङ्गलत्वकथनम् ,, २५
शिपान इति मन्त्रार्थः ,, २८

विषयाः ।	पृ.	पं.
हिरण्यपर्णेति मन्त्रार्थः	३७६	३२
मा त्वेति वृक्षाभिमन्त्रणमन्त्रार्थः	३७७	२
द्यौस्त्वेति दक्षिणाग्रहणमन्त्रार्थः	,,	७
प्रतिग्रहे दोषनिरूपणम्	,,	१६
प्रतीकं मे इत्यङ्गालम्भनमन्त्रार्थः	,,	१९
आलम्भनीयाङ्गनिरूपणम्	,,	२८
ग्रन्थकर्तुः प्रार्थना	,,	३३

पञ्चदशकण्डिकाया हरिहरभाष्यम् ।

विषयाः ।	पृ.	पं.
हस्त्यारोहणकर्मनिरूपणम्	३७८	७
हस्त्यभिमन्त्रणमन्त्रः	,,	८
आरोहणमन्त्रः	,,	१०
अश्वाभिमन्त्रणमन्त्रः	,,	११
उष्ट्राभिमन्त्रणमन्त्रः	,,	१४
रासभाभिमन्त्रणमन्त्रः	,,	१६
चतुष्पथाभिमन्त्रणमन्त्रः	,,	१८
नद्यभिमन्त्रणमन्त्रः	,,	२०
नौकाभिमन्त्रणमन्त्रः	,,	२२
वनाभिमन्त्रणमन्त्रः	,,	२५
पर्वताभिमन्त्रणमन्त्रः	,,	२६
श्मशानाभिमन्त्रणमन्त्रः	,,	२८
गोष्ठाभिमन्त्रणमन्त्रः	,,	१९
वस्त्रदशाभिमन्त्रणमन्त्रः	,,	३४
मेघाभिमन्त्रणमन्त्रः	३७९	३
शिवाभिमन्त्रणमन्त्रः	,,	४
शकुन्यभिमन्त्रणमन्त्रः	,,	५
वृक्षाभिमन्त्रणमन्त्रः	,,	७
लब्धप्रतिग्रहणमन्त्रः	,,	११
ओदनादिलाभे विशेषः	,,	१५
प्रतीकं मे इत्यङ्गालम्भनमन्त्रार्थः	,,	२९
सूत्रवीप्साप्रयोजनम्	३८०	१३
परिशिष्टोक्तं पृष्टोदिविविधानम्	,,	१७

पञ्चदशकण्डिकाया विश्वनाथभाष्यम् ।

विषयाः ।	पृं.	पं.
हस्त्यारोहणविधानम्	३८०	२३
हस्त्यभिमर्शनम्	,,	२५
इन्द्रस्य त्वेति मन्त्रेण हस्त्यारोहणम्	,,	२६
एतेनैवाश्वारोहणम्, तत्र मन्त्रे हस्तिपदस्थाने अश्वपदयोजंना	,,	२८
उष्ट्राभिमन्त्रणमारोहणं च	,,	३०
शूद्रोऽसीति मन्त्रेण रासभाभिमन्त्रणम्	,,	३१
नमो रुद्रायेति मन्त्रेण चतुष्पथाभिमन्त्रणम्	,,	३५
नदीपारं जिगमिषोर्नमोरुद्रायाप्सुषदे इति मन्त्रेण नद्यभिमन्त्रणम्	,,	३७
सुनावमिति मन्त्रेण नौकाभिमन्त्रणम्	३८१	२
नमो रुद्रायेति वनाभिमन्त्रणम्	,,	५
एवं सर्वत्र (तत्तन्मन्त्रेण) गिर्यभिमन्त्रणम्	,,	६
श्मशानाभिमन्त्रणम्	,,	७
गोष्ठाभिमन्त्रणम्	,,	८
वस्त्रप्रान्तभागाभिमन्त्रणम्	,,	१२
मेघाभिमन्त्रणम्	,,	१४
शिवाभिमन्त्रणम्	,,	१६
शकुन्याभिमन्त्रणम्	,,	१७
वृक्षाभिमन्त्रणम्	,,	२०
लब्धस्य वस्तुनः प्रातिग्रहणमन्त्रः	,,	२२
ओदनलाभे तत्प्रतिग्रहप्राशनयोर्मन्त्रोच्चारविशेषः	,,	२५
एवं मन्थलाभे तन्मन्त्रैः [illegible] प्राशनम्	,,	२९
प्रत्यहमध्ययनापरित्यागः	३८१	३२
तदनिराकरणं कृत्वा प्रतीकं मे विचक्षणमित्यादिमन्त्रपठनम्	,,	३८
तिष्ठतु तिष्ठत्विति वीप्सा काण्डसमाप्तिज्ञापनार्था	,,	४०

इति तृतीयकाण्डं समाप्तम्।

अथ पारस्करगृह्यसूत्रपरिशिष्टम् ।

दीक्षितकामदेवकृतं परिशिष्टकण्डिकाया भाष्यम् ।

विषयाः ।	पृ.	पं.
वापीकूपादिप्रतिष्ठाविधिः	३८३	१२
अथातःशब्दार्थः	,,	,,
प्रतिष्ठाकालः	,,	१७
कर्कादिसङ्क्रान्तिभेदेन फलभेदनिरूपणम्	,,	२१
सौत्रवारुणपदप्रयोजनम्	,,	२८
अनन्तदेवमतेन प्रयोजनान्तरनिरूपणम्	३८४	१
दशर्चं४हुत्वेति सौत्रानुवादप्रयोजननिरूपणम्	,,	६
जलाशये जलचरप्रक्षेपादिनिरूपणम्	,,	२८
मत्स्यादीनां विशेषो मदनरत्ने	,,	३६
दक्षिणाद्रव्यविचारः	३८५	१
कर्माङ्गं ब्राह्मणभोजनम्	,,	८
अथ प्रयोगः, तत्र कालविशेषः	,,	१३
ब्रह्मवरणादिः स्पष्टः प्रयोगः	,,	२४
ततो गोतारणे विशेषः	३८६	२९
गोपुच्छाग्रे तर्पणप्रयोगः	,,	३२
अथ गोप्रार्थना	३८७	१३

विषयाः । पृ. पं.
अथ गोदानप्रयोगः ३८७ १७
पौराणिकोत्सर्गप्रकारः ,, २६
जलमातृपूजा ,, ३५
पाराशरस्मृतौ गोदाने विशेषः ,, ३८
विप्रेभ्यो वस्त्रादिदाननिरूपणम् ३८८ ७
विप्रप्रार्थनामन्त्राः ,, १०
ब्राह्मणभोजनसङ्ख्याविचारः ,, १२
आरामादिप्रतिष्ठायां विशेषः ,, १५
इति परिशिष्टकण्डिका समाप्ता ।

अथ कात्यायनाचार्यप्रणीतपरिशिष्टशौचसूत्रम् ।

अथ स्नानसूत्रम् ।

प्रथमकण्डिकामूलम् ३९० १

प्रथमकण्डिकाया हरिहरभाष्यम् ।

मङ्गलाचरणम् ,, १६
अथातःशब्दार्थः ,, १९
नदीनां रजस्वलात्वनिरूपणम् ,, २१
तदपवादः ,, २३
नद्यादिस्वरूपनिरूपणम् ,, २६
स्नानेतिकर्तव्यताविधानम् ,, ३०
यज्ञोपवीतप्रक्षालनप्रकारः ३९१ ६
बद्धशिखी यज्ञोपवीतीति सौत्रपदद्वयप्रयोजननिरूपणम् ,, ११
सूर्याभिमुखमज्जनविधानम् ,, ३४
मज्जनप्रकारनिरूपणम् ३९२ ५
विषयाः । पृ. पं.
पावनमन्त्रनिरूपणम् ३९२ १५
अघमर्षणप्रकारः ,, २०
अथ स्नानप्रयोगपद्धतिः ,, २८
द्वितीयकण्डिकामूलम् ३९४ २३

द्वितीयकण्डिकाया हरिहरभाष्यम् ।

वस्त्रपरिधाननिरूपणम् ,, २८
नीलीवस्त्रनिषेधः ,, २९
प्राणायामप्रकारः ३९५ ६
अर्घ्यप्रदानप्रकारः ,, ८
अथ सूर्योपस्थाननिरूपणम् ,, १३
ब्रह्मयज्ञप्रकारः ,, २६
ब्रह्मयज्ञकालनिरूपणम् ,, ३३
अथ सन्ध्याप्रयोगः ,, ३५
अथ ब्रह्मयज्ञप्रयोगः ३७७ १५
तृतीयकण्डिकामूलम् ,, २४

तृतीयकण्डिकाया हरिहरभाष्यम् ।

ब्रह्मादिदेवतातर्पणम् ३९८ ९
मनुष्यतर्पणम् ,, १३
दिव्यपितृतर्पणम् ,, १६
यमतर्पणम् ,, २०
यमतर्पणफलश्रुतिः ,, २२
जीवत्पितृकाधिकारविचारः ,, २५
प्रसेकाख्यकर्मनिरूपणम् ,, २९
प्रसेकमन्त्राणामञ्जलिदानकरणत्वे पूर्वपक्षः ३९९ ३
तत्खण्डनम् ,, ४
मातामहादितर्पणम् ,, ९
आचार्यलक्षणम् ,, १२
तर्पणाकरणेऽनिष्टापत्तिवचनम् ,, १६
वस्त्रनिष्पीडनविचारः ,, १७
वस्त्रनिष्पीडननिषेधः ,, १८
तर्पणकालनिरूपणम् ,, २०
स्नानाङ्गतर्पणकालः ,, २२
देवतापूजानिरूपणम् ,, २२
विषयाः । पृ. पं.
सूर्योपस्थानादिनिरूपणम् ३९९ २९
एष स्नानविधिरिति सूत्रतात्पर्यवर्णनम् ४०० ३
गृहानुष्ठेयवारुणस्नानप्रकारः ,, ७
स्नातस्यैव कर्माधिकारनिरूपणम् ,, १४
वारुणस्नानासम्भवे आग्नेयादिस्नाननिरूपणम् ,, १६
साग्नेः प्रातर्वैधस्नाननिषेधः ,, ३३
साग्नेः प्रातःस्नानप्रकारः ,, ३४
जट्यादीनां स्नानप्रकारः ,, ३७
सार्ववर्णिकस्नाननिरूपणम् ४०१ २
अथ तर्पणप्रयोगः ,, ६
देवतापूजनप्रयोगः ४०२ ८
अथ प्रातराह्निकम् ,, ३०

अथ श्राद्धसूत्रम् ।

प्रथमकाण्डिकामूलम् ४०४ १

प्रथमकण्डिकायाः कर्कभाष्यम् ।

मङ्गलाचरणम् ,, १३
श्राद्धनिर्णयः ४०४ १५
श्राद्धशब्दस्य समुदायकर्मवाचकत्वपक्षः ,, १६
श्राद्धशब्दस्य पिण्डदानवाचकत्वपक्षः ,, १७
अपरपक्षशब्दार्थः ४०५ ४
श्राद्धाधिकारीविचारः ,, ७
तत्र साग्नेरेवाधिकारनिरूपणम् ,, ९
प्रेतपितृकजीवत्पितृकयोः श्राद्धाधिकारनिरूपणम् ,, १५
पितरि मृते पितामहे जीवति पिण्डदानविचारः ,, १७
चतुर्थ्यादिपक्षनिरूपणम् ,, २०
ब्राह्मणानामामन्त्रणम् ,, २१

विषयाः ।	पृ.	पं.
ब्राह्मणोपवेशनक्रमनिरूपणम्	४०५	२७
मातामहश्राद्धनिरूपणम्	,,	३३
वैश्वदेविककर्मनिरूपणम्	४०६	६
ब्राह्मणाभावे तत्पदेऽग्निनियोगनिरूपणम्	,,	८
यजमानब्राह्मणानां नियमाः	,,	१६

प्रथमकण्डिकाया गदाधरभाष्यम् ।

विषयाः ।	पृ.	पं.
मङ्गलाचरणम्	,,	२१
श्राद्धकर्मनिरूपणम्	,,	२४
श्राद्धशब्दस्य पिण्डदानमात्रवाचकत्वादिपक्षाः	,,	२५
अपरपक्षशब्दार्थः	,,	२७
आश्विनकृष्णपक्षे प्रतिपदादिदैनन्दिनश्राद्धनिरूपणम्	४०७	१
श्राद्धाधिकारविचारः	,,	७
तत्र साग्नेरेव श्राद्धाधिकारपरकर्कमतोपन्यासः	,,	८
तन्निराकरणम्	,,	१२
चतुर्थ्यादिपक्षान्तरानिरूपणम्	,,	१६
तिथिविषयकपक्षान्तरानिरूपणम्	,,	१९
मृततिथौ श्राद्धनिरूपणम्	४०७	२१
ब्राह्मणनिमन्त्रणम्	,,	२६
राजन्यवैश्ययोर्विशेषः	,,	३१
अपरपक्षे प्रतिदिनश्राद्धे तिथ्यादिदोषाभावनिरूपणम्	,,	३३
श्राद्धार्हब्राह्मणाः	,,	३५
कलौ दीर्घकालब्रह्मचर्यादिनिषेधनिरूपणम्	४०८	१
श्रोत्रियलक्षणम्	,,	६
ब्राह्मणादिसंज्ञोत्पत्तिकालनिरूपणम्	४०८	८
ब्राह्मणानुकल्पः	,,	१०
ब्रह्मचारिणो निमन्त्रणीयत्वविचारः	,,	११
वर्ज्यब्राह्मणनिरूपणम्	,,	१४
द्विर्नग्नलक्षणम्	,,	१६
विक्लिधलक्षणम्	,,	१८
वर्ज्यब्राह्मणोपदेशप्रयोजनाचिन्तनम्	,,	२३
ब्राह्मणानां श्राद्धार्थनिमन्त्रणव्यतिक्रमे दोषकथनम्	,,	२७
यजमानस्यापि ब्राह्मणातिक्रमे दोषः	,,	३१
निमन्त्रितस्यान्यप्रतिग्रहे दोषः	,,	३२
निमन्त्रितस्यान्यश्राद्धग्रहणे दोषः	,,	३३
अर्थोपवेशनम्	,,	३७
अयुग्मसङ्ख्याविचारः	४०९	१
निमन्त्रितब्राह्मणानां क्षौरादिविधिः	,,	६
आचमने विशेषः	,,	८
उपवेशने विशेषः	,,	११
पक्षान्तरम्	,,	१२
तत्र ब्राह्मणसङ्ख्याप्रमाणम्	,,	१४
ब्राह्मणबाहुल्ये दोषः	,,	१८
देशधनाद्यभावे पक्षान्तरम्	,,	१९
मातामहश्राद्धेतिकर्तव्यताविचारः	,,	२१
मातामहं विना पितृपार्वणानुष्ठाने दोषः	,,	२३
तन्त्रेण विश्वेदेवानुष्ठानविचारः	,,	२५
श्राद्धावश्यकताकथनम्	,,	३०
अथ यजमानधर्माः	,,	३४
दातृभोक्त्रोः स्मृत्यन्तरोक्तधर्मकथनम्	४०९	३७
दन्तधावने प्रायश्चित्तम्	४१०	२
अध्वादिगमने दोषकथनम्	,,	४
अष्टविधं मैथुनम्	,,	६
श्राद्धं कृत्वा परश्राद्धभोजने दोषः	,,	८
श्राद्धभेदेन नियमभेदनिरूपणम्	,,	९
श्राद्धमध्ये मौनादिभङ्गे प्रायश्चित्तम्	,,	१४
द्वितीयकण्डिकामूलम्	,,	२०

द्वितीयकण्डिकायाः कर्कभाष्यम् ।

विषयाः ।	पृ.	पं.
श्राद्धस्य दैवपूर्वकत्वकथनम्	,,	,,
श्राद्धे पिण्डपितृयज्ञक्रियातिदेशः	,,	३५
दर्भास्तरणविचारः	४११	४
दैवे यवावकिरणपक्षखण्डनम्	,,	१३
आवाहनप्रश्नवाक्यविचारः	,,	१५
दैवे यवावपनपक्षनिराकरणम्	,,	२६
वैश्वदेविके पात्रसंख्याविचारः	,,	३४
विप्रहस्तेऽर्घप्रदानकाले दीयमानपवित्रविचारः	४१२	५
अर्घप्रदाने सकृन्मन्त्रवचनपक्षनिरूपणम्	,,	८
तन्निराकरणम्	,,	११
दैवपात्रपूरणोत्तरं पितृपात्रपूरणविचारः	,,	१४

द्वितीयकण्डिकाया गदाधरभाष्यम् ।

विषयाः ।	पृ.	पं.
श्राद्धकर्मनिरूपणम्	,,	२१
श्राद्धस्य दैवपूर्वकत्वनिर्णयः	,,	२२
श्राद्धे पिण्डपितृयज्ञक्रियातिदेशकथनम्	,,	२३

विषयाः ।	पृ.	पं.
एतदपवादः	४१२	२४
द्विगुणदर्भाविचारः	,,	२८
दर्भलक्षणम्	,,	३१
दर्भाभावे काशादिविनियोगचिन्तनम्	,,	३६
वामहस्ते दर्भधारणनिषेधः	४१३	६
पङ्क्तिमूर्धन्यप्रश्नविचारः	,,	९
आसनानि	,,	१३
देवविप्रपुरतो यवावकिरणाविचारः	,,	१८
चमसानां लक्षणम्	,,	२६
पवित्रलक्षणम्	,,	२८
देवादिपात्रेषु पवित्रसङ्ख्याविचारः	,,	२९
आवाहनार्धपूरणादिक्रियासु काण्डानुसमयपदार्थानुसमयविचारः	,,	३१
एकैकस्मिन्नीति सौत्रपदविचारः	४१४	८
पात्रनिरूपणम्	,,	१०
आसुरपात्रनिषेधः	,,	१३
आसुरपात्रलक्षणम्	,,	१४
पत्रपुटनिरूपणम्	,,	१६
"असावित्यपनोदे" इति परिभाषार्थः	,,	२४
अर्घदानप्रकारः	,,	२८
पवित्रान्तरोपन्यासमतविचारः	,,	३०
दर्भादीनामनिर्माल्यत्वकथनम्	,,	३२
वैश्वदैविके पात्रसङ्ख्याविचारः	४१५	४
द्विजहस्तधृतपवित्रस्य पुनर्ग्रहणनिषेधः	,,	६
या दिव्या इति मन्त्रार्थः	,,	७
पितृपात्रे पात्रान्तरसंस्रवनिक्षेपणम्	४१५	१५
संस्रवजलैर्मुखसेचनं काम्यम्	,,	१७
न्युब्जीकरणस्थाननिरूपणम्	,,	१९
गन्धादीनां स्मृत्यन्तरोक्तो विशेषः	,,	२४
मण्डलविचारः	४१५	३५
तृतीयकण्डिकामूलम्	४१६	१

तृतीयकण्डिकायाः कर्कभाष्यम्।

विषयाः ।	पृ.	पं.
अग्नौकरणविचारः	,,	२१
तत्र पिण्डपितृयज्ञक्रियातिदेशनिरूपणम्	,,	३४
पर्युषितान्नापवादः	४१७	८
तृप्तिप्रश्नविचारः	,,	२१
पिण्डदानसमयनिरूपणम्	,,	२९
आचान्तानां ब्राह्मणानामुदकदानादिविचारः	४१८	२

तृतीयकण्डिकाया गदाधरभाष्यम्।

विषयाः ।	पृ.	पं.
अग्नौकरणादिविधिनिरूपणम्	,,	१६
साग्निकस्याग्नौकरणहोमविचारः	,,	२७
अग्न्यभावे विप्रपाणौ तद्विधिः	,,	३३
द्विजाभावे मत्स्यपुराणे विशेषः	,,	३५
हुतशेषदाने विप्रतिपत्तिप्रदर्शनम्	,,	३७
पात्रस्थान्नालम्भाविचारः	४१९	४
आलम्भे ब्रह्मपुराणे विशेषः	,,	६
पृथिवी ते पात्रमित्यस्यार्थः	,,	७
परिवेषणनिरूपणम्	,,	१५
सस्यादिलक्षणम्	,,	१९
परिवेषणे सव्यापसव्यादिविचारः	,,	२१
अन्नसङ्कल्पप्रयोगः	,,	२४
भोजनकाले गायत्र्यादिमन्त्रपाठक्रमः	,,	३३
मत्स्यपुराणे विशेषः	,,	३८
विष्णुहृदयमन्त्रपाठफलश्रुतिः	४२०	३
विष्णुहृदयमन्त्रस्वरूपम्	,,	४
चतुर्भिश्चाति मन्त्रार्थः	,,	६
अन्नविकिरदानविचारः	४२०	११
पिण्डदाननिरूपणम्	,,	२३
पिण्डदाने पदार्थक्रमः	,,	२६
आचान्तेषु विप्रेषु जलपुष्पादिदाननिरूपणम्	,,	२९
आशीःप्रार्थनाप्रपञ्चः	४२१	१
स्वधावाचनविचारः	,,	६
उदकनिषेकः	,,	१४
दक्षिणाविचारः	,,	१६
पित्रादिविसर्जनविचारः	,,	२२
अथ प्रयोगपद्धतिः, तत्र श्राद्धकालाः	,,	२९
अथ श्राद्धाधिकारिनिर्णयः	,,	३१
पुत्रिकापुत्रश्राद्धे विशेषः	४२२	१०
द्व्यामुष्यायणे पुत्रिकापुत्रे विशेषः	,,	११
क्षेत्रजे द्व्यामुष्यायणे विशेषः	,,	१२
अत्र क्रमविशेषः	,,	१४
जीवत्पितृकस्य श्राद्धाधिकारविचारः	,,	१६
आश्विनप्रातिपदि दौहित्रश्राद्धम्	,,	१९
अथ श्राद्धार्हब्राह्मणलक्षणम्	,,	२०
एकस्यापि ब्राह्मणस्यालाभे अनुकल्पान्तरप्रदर्शनम्	,,	२९
अथ कर्तृनियमाः	,,	३५
द्विजनियमाः	,,	३६
उभयनियमाः	,,	३८
श्राद्धदिनात्पूर्वदिनकृत्यम्	,,	४०
अथ श्राद्धदिनकृत्यम्	४२३	९
साग्निकानिराग्निकादीनां दर्शादिश्राद्धे निमित्ततः पिण्डदाननिषेधः	,,	३७
अथ सांवत्सरिके विशेषः	४२५	४

विषयाः । पृ. पं.
अथ महालये विशेषः ४२५ ९
अथापरपक्षे भरणीश्राद्धे विशेषः ,, १२
अपरपक्षचतुर्दश्यां शस्त्रादिहतश्राद्धम् ,, १६
अथ तीर्थश्राद्धे विशेषः ,, १८
अथ नित्यश्राद्धे विशेषः ,, २१
चतुर्थकाण्डिकामूलम् ,, २६

चतुर्थकण्डिकायाः कर्कभाष्यम् ।

एकोद्दिष्टश्राद्धविधिनिरूपणम् ,, २९
तस्यादैवत्वानिरूपणम् ,, ३५
सपिण्डीकरणोत्तरं पार्वणविधिनिरूपगम् ४२६ ३

चतुर्थकण्डिकाया गदाधरभाष्यम् ।

एकोद्दिष्टश्राद्धनिरूपणम् ,, ९
तत्राग्नौकरणनिषेधः ,, १५
एकोद्दिष्टश्राद्धप्रयोगः ,, १८
अन्त्येष्टिक्रियापद्धतिः ,, ३१
मरणोत्तरकर्मनिरूपणम् ४२७ ४
मरणस्थाने एकोद्दिष्टविधिना श्राद्धम् ,, ८
वितानसाधनादिकर्मनिरूपणम् ,, १९
आवसथ्यसम्बन्धिपात्रप्रतिपत्तिनिरूपणम् ४२८ १
सूतिकादिमरणे विशेषः ,, ८
अथ स्मार्तोदककर्मनिरूपणम् ,, १२
तत्र प्रथमदिने पिण्डदानादिविधिः ,, ३५
द्वितीयदिनमारभ्य दशमदिनपर्यन्तं पिण्डदानादिविधिनिरूपणम् ४२९ ३
दशाहमध्ये दर्शपाते प्रेतक्रियाविचारः ,, ३५
विषयाः । पृ. पं.
यतेः प्रेतक्रियानिषेधः ४२९ ३७
ब्रह्मचारिणः प्रेतनिर्हारादिक्रियानिषेधः ,, ३८
अथैकादशाहविधिः ४३० ३
तत्र वृषोत्सर्गः ,, १३
एकादशाहे आद्यमासिकश्राद्धविधिः ४३१ १७
पञ्चमकण्डिकामूलम् ,, ३२

पञ्चमकण्डिकायाः कर्कभाष्यम् ।

सपिण्डीकरणकालनिर्णयः ,, ३७
अपुत्रस्य सपिण्डीकरणनिषेधः ४३२ १४

पञ्चमकण्डिकाया गदाधरभाष्यम् ।

सपिण्डीकरणनिरूपणम् ,, २०
साग्नेः सपिण्डनसमयः ,, २३
निरग्नेः सपिण्डनसमयः ,, २४
संवत्सरादर्वाक्सपिण्डनपक्षे तदङ्गषोडशश्राद्धानुष्ठानकालविचारः ,, २५
पितृपात्रेषु प्रेतपात्रासेकप्रकारः ,, ३८
पित्रादिपिण्डत्रये प्रेतपिण्डमेलनप्रकारः ४३३ ५
विभक्तेष्वपि बहुषु भ्रातृषु एकस्यैव सपिण्डनाधिकारः ,, "
मातुः पिण्डदानादौ गोत्रे विप्रतिपत्तिः ,, १०
अपुत्रायाः सपिण्डनविचारः ,, १२
श्राद्धादिकर्मभेदेन चान्द्रादिमासव्यवस्था ,, १९
अथ सपिण्डनप्रयोगः ,, २१
षष्ठकण्डिकामूलम् ४३४ ४

षष्ठकण्डिकायाः कर्कभाष्यम् ।

आभ्युदयिकश्राद्धनिरूपणम् ,, १२
विषयाः । पृ. पं.
ऋजुदर्भादिनिरूपणम् ४३४ १६

षष्ठकण्डिकाया गदाधरभाष्यम् ।

वृद्धिश्राद्धनिरूपणम् ,, ३१
वैदिककर्माणि मातृपूजनवृद्धिश्राद्धयोरावश्यकत्वनिरूपणम् ,, ३३
मात्रादिपार्वणक्रमनिरूपणम् ४३५ ४
वैदिककर्मसु प्रतिप्रयोगं मातृपूजनवृद्धिश्राद्धावृत्तिप्रसक्तौ तन्निर्णयः ,, ५
अष्टकादिवैदिककर्मणि वृद्धिश्राद्धनिषेधः ,, ६
पूर्वाह्णादिकालनिर्णयः ,, ८
मातृपूजाप्रयोगः ,, २१
अथ वसोर्धारापूजनप्रयोगः ,, २७
सपिण्डकापिण्डकभेदेन नान्दीश्राद्धनिरूपणम् ,, २९
अपिण्डके अग्नौकरणादिनिषेधकथनम् ,, ३०
सपिण्डकाभ्युदयिकश्राद्धप्रयोगः ,, ३३
सप्तमकण्डिकामूलम् ४३६ ३६

सप्तमकण्डिकायाः कर्कभाष्यम् ।

तृप्तिनिरूपणम् ४३७ ३

सप्तमकण्डिकाया गदाधरभाष्यम् ।

ओषध्यादिभिस्तृप्तिनिरूपणम् ,, ५
वार्ध्रीणसलक्षणम् ,, ,,
अष्टमकण्डिकामूलम् ,, १८

अष्टमकण्डिकाया गदाधरभाष्यम् ।

अथाक्षय्यतृप्तिनिरूपणम् ,, २४

विषयाः ।	पृ.	पं.
मन्त्राध्याय्यादिब्राह्मणस्वरूपकथनम्	४३७	२९
नवमकण्डिकामूलम्	४३८	४

नवमकण्डिकाया गदाधरभाष्यम् ।

विषयाः ।	पृ.	पं.
काम्यश्राद्धनिरूपणम्	,,	१०
प्रतिपदादितिथिभेदेन फलविशेषनिरूपणम्	,,	१३

इति श्राद्धसूत्रं समाप्तम् ।

कातीयश्राद्धसूत्रव्याख्यायाः श्राद्धकाशिकायाः प्रथमा कण्डिका ।

विषयाः ।	पृ.	पं.
मङ्गलाचरणम्	४३९	२
ग्रन्थकर्तुर्वंशकीर्तनम्	,,	७
अपरपक्षनिर्णयः ।	,,	१०
कृत्यविशेषे शुक्लकृष्णनिर्णयः	,,	३०
पक्षश्राद्धस्य नित्यकाम्यत्वे	,,	३५
श्राद्धाधिकरणत्वेन दिनानि	४४०	११
एकपार्वणादिनिर्णयः	,,	२२
पितृपक्षस्य षोडशदिनात्मकत्वम्	४४१	११
श्राद्धं किं नामोति	,,	३५
प्रतिपदि दौहित्रश्राद्धनिर्णयः	४४२	४
चतुर्थ्युपर्यपरपक्षनिर्णयः	,,	२५
ब्राह्मणनिमन्त्रणादिनिर्णयः	,,	३६
ब्रह्मचारिनिमन्त्रणे विशेषः	४४३	२
पितृपक्षे मृताहाधिक्यम्	,,	५
पितृपक्षे पौर्णमास्यां मृतस्य श्राद्धनिर्णयः	,,	१५
निमन्त्रणे दैवपूर्वमुत पितृपूर्वम्	,,	२१
स्नातकनिमन्त्रणे विशेषः	,,	२७
यतिनो निमन्त्रणे विशेषः	,,	२९
दक्षिणायामनधिकारनिर्णयः	४४४	२४
आश्रमरहितस्य निमन्त्रणनिषेधः	४४४	२६
गृहस्थादीन्निमन्त्रयेत्	,,	३०
साधुब्राह्मणलक्षणम्	,,	३६
श्रोत्रियलक्षणम्	,,	३८
वृद्धब्राह्मणस्वरूपम्	४४५	२
स्वकर्मस्थलक्षणम्	,,	४
शिष्यमातुलादीनपि निमन्त्रयेत्	,,	८
निषिद्धब्राह्मणकथनम्	,,	१७
अनिन्द्यामन्त्रणेनापक्रमणम्	,,	२८
निमन्त्रितस्यान्यान्नग्रहणनिषेधः	,,	३१
भोजननिषेधः	,,	३३
स्नाताचान्तेन भोक्तव्यम्	४४५	३६
श्राद्धकर्तुर्वर्जनम्	४४६	२
श्राद्धे मण्डलविधिः	,,	११
ब्राह्मणोपवेशने दिङ्नियमः	,,	१६
दैवे पित्र्ये च ब्राह्मणसंख्या	,,	२४
श्राद्धे ब्राह्मणविस्तारनिषेधः	,,	२९
मातामहानामपि श्राद्धे आवश्यकता	,,	३८
सङ्कल्पवाक्ये नामगोत्रयोरावश्यकता	४४७	१२
सम्बन्धाद्युच्चारणक्रमः	,,	१८
अपरपक्षे श्राद्धं शाकेनापि अवश्यं करणीयम्	४४८	४
श्राद्धे सूतकादिनिर्णयः	,,	१०
श्राद्धकर्तुर्निर्णयः	,,	२२
गृहिण्या एव पाकेऽधिकारः	,,	३५
तिलके विचारः	४४९	१
भोक्तुर्नियमाः	,,	१६

द्वितीया कण्डिका ।

विषयाः ।	पृ.	पं.
काण्डानुसमयपदार्थानुसमययोर्विचारः	,,	२७
नीवीबन्धनविवेकः	,,	३६
कुशानां समूलनिर्मूलयोर्विवेकः	४५०	१५
ब्राह्मणप्रश्नविचारः	,,	२७
पार्वणानुक्रमणिका	,,	३५
श्राद्धारम्भे दिग्लक्षणम्	,,	३६
आसनेषु दर्भास्तरणम्	,,	४०
आसनदाने स्वधानिषे०	४५१	१३
विश्वेदेवावाहनाद्यर्घ्यदाने वि०	,,	१८
विश्वेदेवकथनम्	४५२	३
पितॄणामावाहनाद्यर्घ्यदाने विधिः०	,,	१५
तिलप्रक्षेपमन्त्रे ऊहवि०	,,	२४
अर्घपात्रनिर्णयः	,,	३४
अर्घपवित्रविचारः	४५३	३
अर्घे तिलयवयोर्वि०	,,	१७
अर्घपात्रकथनम्	,,	२३
अर्घदाने तन्त्राभावः	४५४	४
विश्वेदेवार्घविचारः	,,	९
अर्घे स्वधानिषेधः	,,	२०
विश्वेदेवे पादप्रभृति मूर्धान्तम्	,,	२१
पैतृके शिरःप्रभृति पादान्तम्	,,	२६
अर्घपात्रन्युब्जीकरणम्	,,	२८
अर्घपात्रे विशेषः	,,	३२
न्युब्जं पात्रं न चालनीयम्	४५५	२
गन्धादिदाने विचारः	,,	९
अथ गन्धाः	,,	१५
पुष्पाणि	,,	१६
अथ धूपाः	,,	३३
निषिद्धधूपाः	,,	३८
अथ दीपाः	,,	३९
वस्त्राणि	४५६	१
श्राद्धे आचमनविचारः	,,	२७

तृतीया कण्डिका ।

विषयाः ।	पृ.	पं.
अग्नौकरणविचारः	,,	२९
अग्नौकरणपाके विशे०	,,	३८

विषयाः ।	पृ.	पं.
साग्निक तु विशेषः	४५७	१२
अग्नौकरणसव्यापसव्यावि०	,,	१५
श्रौतस्मार्तविषये वि०	,,	२३
सांकल्पिके विशेषः	४५८	५
पर्यग्निकरणम्	,,	८
हुतशेषप्रदानम्	,,	३७
हुतशेषविधिः	४५९	२
पात्रालम्भनम्	,,	११
पात्रेष्वङ्गुष्ठनिवेशनम्	,,	३२
पात्रे तिलप्रक्षेपनिषेधः	,,	३७
एकहस्तेन परिवेषणनिषे०	४६०	२
नखच्युतघृतादिनिषेधः	,,	१०
परिवेषणे सव्यापसव्यविचारः	,,	१९
भक्षणीयान्नानि	,,	२४
अन्नदाने तन्त्रातन्त्रविवेकः	,,	३९
सङ्कल्पोदकस्य हस्ते दाननिषेधः	४६१	९
मांसप्रशंसा	,,	२०
श्राद्धे मांसविवेकः	,,	३०
श्राद्धातिरिक्तमांसभक्षणनिषेधः	४६२	३२
अश्नत्सु जपेदित्यादिसूत्रार्थः	४६३	२७
सूक्तपाठादि	४६४	७
जपे सव्यापसव्यविचारः	,,	१५
भोजनविधिः	,,	२०
विकिरविधिः	४६५	१०
विकीर्याचामेत्	,,	३३
चुलुकादिदानजपे०	,,	३६
तृप्तिप्रश्नः	४६६	४
वमने पुनः पाकविधिः	,,	८
शेषान्नप्रश्नः	,,	१७
उल्मुकविधिः	,,	२१
अवनेजनपिण्डदाने	,,	३४
कुशास्तरणविधिः	४६७	२९

विषयाः ।	पृ.	पं.
एकहस्ताद्विहस्तविधिः	४६७	३०
पिण्डान्नशब्दयोर्भेदः	,,	३२
पिण्डपङ्क्तिक्रमः	,,	३९
पिण्डप्रमाणम्	४६८	११
कुशैरेव पिण्डप्रदानम्	,,	१६
आचान्तेषु पिण्डदान०	,,	१८
लेपभुजां कुत्र लेपप्रदानम्	,,	२२
हस्ते उदकादिप्रदानम्	,,	२९
तच्च सव्येन कार्यम्	,,	३४
आत्तमनसा श्वासानुरो०	,,	३७
अवनेजने विशेषः	,,	६
षडञ्जलयः	,,	११
पिण्डे सूत्रप्रदानम्	४६९	१३
पिण्डे जलधारादानम्	,,	२०
स्तरणकुशानामग्नौ प्रक्षेपः	,,	२५
अक्षय्योदके तन्त्राभावः	,,	२९
आशीःप्रार्थनम्	,,	३०
स्वधावाचनम्	४७०	१
दक्षिणादानविवेकः	,,	१२
दक्षिणादाने सव्यापसव्यविवेकः	,,	२५
पात्रचालनम्	४७१	७
विसर्जनम्	,,	१७
ताम्बूलादिदानम्	,,	२१
आचमनाविधिः	,,	२४
उच्छिष्टमार्जनम्	,,	३१
पिण्डप्रतिपत्तिः	४७२	४
विकिरप्रतिपत्तिः	,,	१३
नित्यश्राद्धम्	,,	१५
शेषभोजनम्	,,	२५
श्राद्धकर्तुः नक्तं परगृहभोजननिषेधः	४७३	१
श्राद्धभोक्तुर्नियमाः	,,	५

चतुर्थी कण्डिका।

अथैकोद्दिष्टम्	,,	१७
प्रकृतिश्राद्धनियमोपदेशः	,,	१९
मघादौ पिण्डनिषेधः	,,	२४
प्रेतैकोद्दिष्टे विशेषः	,,	२६

विषयाः ।	पृ.	प.
तीर्थश्राद्धम्	४७३	३९
विवाहाद्यनन्तरं पिण्डनिषेधः	४७४	६
महालयादौ प्रतिप्रसवः	,,	९
आमश्राद्धमीमांसा	,,	११
नवश्राद्धम्	,,	३०
पवित्रलक्षणम्	,,	४०
एकोद्दिष्टे नामान्नविधिः	४७५	९
आमहेमविधिः	,,	१०
अष्टाङ्गत्वम्	,,	१५
स्वधावाचनमीमांसा	,,	२०
क्षयाहे पार्वणैकोद्दिष्टमीमांसा	,,	३१
श्राद्धे नित्यकर्मविवेकः	४७६	२७

पञ्चमी कण्डिका।

सपिण्डीकरणम्	४७७	१
कालनियमः	,,	३
आहिताऽनाहिताग्निविषये कालनियमः	,,	२३
वृद्धावपकर्षः	४७८	७
प्रेतार्घपात्रकरणम्	,,	२४
व्युत्क्रममृतानां सपिण्डनविधिः	४७९	३
अपुत्रस्य सपिण्डीकरणे विचारः	,,	१०
प्रेते सन्देहः	,,	२१
सहगमने पत्न्या सापिण्डनविधिः	४८०	३
पतिपुत्ररहितायाः सपिण्डीकरणम्	,,	३९
सहगमने पाकविधिः	४८१	८
स्त्रिया गोत्रविषये विवेकः	,,	१४
पत्नीकर्तृकसपिण्डने विरोधः	,,	१६
असंस्कृतपुत्रविषये विचा०	,,	२८
सपिण्डीकृते पुनर्मासिकावृत्तिः	,,	३३

विषयाः ।	पृ.	पं.
षोडशश्राद्धे पार्वणैकोद्दिष्टम्	४८१	३६
सपिण्डनानन्तरं प्रेतशब्द-पितृशब्दविवेकः	४८२	८
अग्नौकरणकथनम्	,,	१२
त्रिवर्षपर्यन्तं श्राद्धमशुद्धम्	,,	१९
श्राद्धान्नभोक्तुः प्रायश्चित्तम्	,,	२४
मृताहे मासिकाब्दश्राद्धम्	४८३	४
एकादशाहे विशेषः	,,	९
षोडशश्राद्धान्तं कालः	,,	१७
आशौचमध्येऽप्याद्यम्	,,	२६
दशमपिण्डे विशेषः	४८४	७

षष्ठी कण्डिका ।

विषयाः ।	पृ.	पं.
आभ्युदयिकश्राद्धम्	,,	१४
वृद्धिश्राद्धनिमित्तानि	,,	१५
वृद्धौ श्राद्धत्रितये वि०	,,	२९
मातृश्राद्धमावश्यकम्	,,	३६
मातॄणां नामानि	,,	३८
घृतमातृस्थापनम्	४८५	१३
पूर्वाह्णादिकालः	,,	१५
पित्र्यमन्त्रवर्जं जपः	,,	३१
ऋजवो दर्भाः	४८६	२
वृद्धिश्राद्धमदैवं सदैवं वा	,,	६
यवैस्तिलार्थाः	,,	१४
तृप्तिप्रश्नः	,,	२४
आमश्राद्धे पिण्डदानादि-प्रकारः	,,	२८
दधिबदराक्षतैः पिण्डदानम्	,,	३६
पिण्डहीनश्राद्धे विशेषः	४८७	५
बहुमातृकविषये विशेषः	,,	१८
एके प्रपितामहानुपूर्वीकम्	,,	२४
लेखाकरणे पिण्डपाते विशेषः	,,	३१
नान्दीमुखपित्रावाहनम्	४८८	६
नान्दीमुखत्वेन कीर्तनम्	,,	१२
जीवन्मातृपितृविषये विशेषः	,,	१९
जीवत्पितृकोद्देवृद्धिश्राद्धेऽधिकारः	,,	२२
अक्षय्योदके विभक्ति-निर्णयः	४८९	३
वृद्धौ नवदैवत्य द्वादश-दैवत्यं वा	,,	३०
स्वधावाचननिषेधः	,,	३३
युग्मभोजनम्	,,	३८
दक्षिणायां विशेषः	४९०	९
जीवत्पितृकविषये सन्देह-निरासः	,,	२४
द्वितीयविवाहे स्वकर्तृकना-न्दीश्राद्धम्	,,	३२

सप्तमी कण्डिका ।

विषयाः ।	पृ.	पं.
अथ तृप्तिविचारः	४९१	५
धान्यादिभिर्मासं तृप्तिः	,,	९
अश्राद्धार्हाणि धान्यादीनि	,,	२७
ग्राम्याभावे आरण्याभि-स्तृप्तिः	४९२	७
शाकादिभिर्वातृप्तिः	,,	१२
सर्वाभावे अद्भिस्तृप्तिः	,,	२२
निषिद्धजलानि	,,	२५
शाकानि	,,	२७
रागषाडवलक्षणम्	४९३	७
फलानि	,,	१४
निषिद्धफलानि	४९४	१३
संस्कारद्रव्याणि	,,	२७
यागार्थच्छागादिहिंसनम्	४९५	१९
मात्स्यैर्मासद्वयं तृप्तिः	४९६	३०
मत्स्यकथनम्	४९८	७
हारिणेन त्रैमासिकम्	,,	१५
आरण्यमेषमांसेन चातुर्मा-सिकम्	,,	३२
पक्षिमांसेन पञ्चममासिकम्	४९८	२
छागमांसेन षाण्मासिकम्	,,	३३
कौर्मेण सप्तममासिकम्	,,	३८
वराहमांसेन अष्टममासि-कम्	४९९	१
मेषमांसेन नवममासिकम्	,,	९
माहिषमांसेन दशममासिकम्	,,	१४
चित्रमृगमांसेनैकादशमासि-कम्	४९९	२५
गव्यपयसा पायसेन वा सांवत्सरिकम्	५००	५
वार्ध्रीणसमांसेन द्वादशा-ब्दिकम्	,,	१७

अष्टमी कण्डिका ।

विषयाः ।	पृ.	पं.
अथाक्षय्यतृप्तिः	,,	२९
खड्गादिमांसैस्तृप्तिः	,,	३२
श्राद्धे प्रशस्तवस्तूनि	५०१	४
वर्षासु मघाश्राद्धविचारः	,,	८
गजच्छायायोगे श्राद्धभो-जने च विचारः	,,	२९
पङ्क्तिपावनब्राह्मणाः	५०२	४
शाखाध्यायिनः	,,	८
षडङ्गवेदिनः	,,	१०
ज्येष्ठसामगः	,,	१५
गायत्रीसारमात्रोऽपि	,,	१८
पञ्चाग्निलक्षणम्	,,	२४
स्नातकः	,,	२८
त्रिणाचिकेतः	,,	३२
त्रिमधुः	,,	४०
त्रिसुपर्णी	५०३	२
धर्मशास्त्रपाठः	,,	७
ब्राह्मोढापुत्रः	,,	९
व्याकरणवेत्ता याज्ञिकश्च	,,	१६
पूर्वोक्ताभावे वेदविदेक-विप्रः	,,	३३
अनुकल्पः	,,	३९
वेदविदां प्रशंसा	५०४	७
वर्ज्यब्राह्मणाः	,,	१०
पापरोगिणः	५०५	२

नवमी कण्डिका ।

विषयाः ।	पृ.	पं.
अथ काम्यानि	५०६	६
व्यतीपातलक्षणम्	,,	९
प्रतिपादि स्त्रीलाभः	,,	१९
संन्यासिपितरं प्रति पुत्रस्य पिण्डदानविचारः	,,	३०

विषयाः ।	पृ.	पं.
जीवत्पितृकस्य पिण्डदानविचारः	५०६	३२
द्वितीयायां कन्यालाभः	५०७	९
तृतीयायामश्वादिलाभः	”	१८
चतुर्थ्यामजादिलाभः	”	२२
मातुः श्राद्धं पृथक्	”	२७
पञ्चम्यां पुत्रादिलाभः	”	३४
पर्वणि क्षयाहविचारः	५०७	३८
षष्ठ्यां द्यूतार्द्धिः	५०८	६
सप्तम्यां कृषिः	”	११
वाणिज्यमष्टम्याम्	”	१६
सूतकान्ते अपरपक्षे	”	२०
नवम्यामेकशफादिलाभः	”	२६
जीवत्पितृकस्य मातृश्राद्धविकल्पः	”	२८
दशम्यां द्विशफलाभः	५०९	१२
एकादिने पार्वणैकोद्दिष्टव्यवस्था	५०९	१८
एकपाकनिषेधः	”	२३
एकादश्यां दास्यादिलाभः	”	२५
अपुत्रादीनामेकोद्दिष्टम्	”	२८
द्वादश्यां धनादिलाभः	”	३९
द्वयोर्मृताहैक्ये पाकवि०	५१०	५
त्रयोदश्यां ज्ञातिश्रैष्ठ्यम्	”	१०
अनुगमनमृतानां स्वमृताहे श्राद्धं नवोति	”	१५
अनेकस्त्र्यादिभर्तृसहगमने पृथक्पिण्डदा०	”	३५
शस्त्रहतस्य चतुर्दश्याम्	५११	२
शस्त्रहतस्य पार्वणैकोद्दिष्टम्	”	१४
रणे हतानां चतुर्दश्यां प्रतिप्रसवः	५११	१९
चतुर्दशीश्राद्धस्य प्रतिप्रसवः	”	२९
अमावास्यायां श्राद्धफलानि	५१२	४
अमावास्यानिरुक्तिः	”	६
पितृपक्षे नचेद्दीपमालिकायां देयम्	”	१०
विधवायाः पार्वणेऽधिकारः	”	१३
विधवायाः धवक्षयाहे पार्वणनिषेधः	”	१९
ग्रन्थकर्तुः प्रार्थनापद्यानि	”	२३
भोजनसूत्रम्	५१३	१
योगीश्वरद्वादशनामानि	५१४	१६

(इति श्राद्धसूत्रस्य विषयानुक्रमणिका)

इति पारस्करगृह्यसूत्रस्य विषयानुक्रमणिका समाप्ता ।

श्रीः ।

पारस्करगृह्यसूत्रम् ।

कर्कोपाध्याय–जयराम–हरिहर–गदाधर–विश्वनाथरचित–
भाष्यपञ्चकभूषितम् ।

प्रथमकाण्डम्

अथातो गृह्यस्थालीपाकानां कर्म ॥ १ ॥ परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य प्रणीय परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत्प्रोक्ष्य निरुप्याज्यमधिश्रित्य पर्यग्नि कुर्यात् ॥ २ ॥ स्रुवं प्रतप्य सम्मृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यात् ॥ ३ ॥ आज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्ववदुपयमनान्कुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयात् ॥ ४ ॥ एष एव विधिर्यत्र क्वचिद्धोमः ॥ ५ ॥ * ॥ १ ॥ * ॥

कर्कः—पारस्करकृतस्मार्तसूत्रव्याख्या गुरूक्तितः।कर्कोपाध्यायकेनेयं तेने नत्वा जगद्गुरुम् १

श्रौतान्याधानादीनि कर्माण्युक्तानि तदनन्तरं स्मार्तान्यनुविधीयन्ते तत्रैतदादिमं सूत्रम् । अथातो गृह्यस्थालीपाकानां कर्मेति—व्याख्यास्यत इति सूत्रशेषः। तत्रायमथशब्द आनन्तर्ये द्रष्टव्यः । श्रौतानुविधानानन्तरं स्मार्तान्यनुविधीयन्त इति, आनन्तर्यप्रज्ञप्तिप्रयोजनं श्रौतेष्वधिकाराद्युपस्पृशेदप इत्येवमन्तं सर्वकर्मसाधारणं यत्तस्यात्रापि प्रवृत्तिर्यथा स्यादिति । पूर्वं प्रवृत्तं श्रौतानामुपनिबन्धनमित्येतत्सूत्रकारप्रवृत्त्या ज्ञायते प्रोष्यैत्य गृहानुपतिष्ठते पूर्ववदिति श्रौतेषु गृहोपस्थानं विहितं तत्पूर्ववदित्यनेनातिदिश्यते । तथाच प्रोक्षणीश्च पूर्ववदिति । अतःशब्दो हेत्वर्थः। यस्माच्छ्रौतान्यभिहितानि स्मार्तान्येवानुशिष्यन्ते अतस्तानि वक्तव्यानीति । ननु च पूर्वं स्मार्तानां गर्भाधानादीनामनुष्ठानं पश्चाच्छ्रौतानामित्यतोऽनुष्ठानक्रमेण स्मार्तान्येव पूर्वमभिधेयानीति । अत्रोच्यते, नैतदेवम्, प्रत्यक्षश्रुतित्वात् । प्रत्यक्षा हि श्रुतयः श्रौतेषु, स्मार्तेषु च पुनः कर्तृसामान्यादनुमेयाः श्रुतयः, स्मार्तानामपि हि वेदमूलत्वमुक्तम् । तस्मात्प्रत्यक्षश्रवणात्तान्येव पूर्वमभिधीयन्ते न गर्भाधानादीनि । अपरे त्वन्यथा वर्णयन्ति, स्मरणादेव स्मृतीनाम्प्रामाण्यम् । अव्यवच्छिन्नं हि स्मरणमष्टकादीनामष्टकाः कर्तव्या इति । अनादिरयं संसारः। स्मरणमप्येषामनाद्येवेति । ननु चोक्तमापस्तम्बेन तेषामुच्छिन्नाः पाठाः प्रयोगादनुमीयन्त इति यतो वेदमूलकत्वम् । नैतदेवम् । शाखानां सतीनामुत्सादो भवति नासतीनाम्, तत्रायं दोषः स्यात् य एव कश्चित्काञ्चिच्छाखां न पठति तस्यैव तद्विहितं स्मार्त्तं स्यात् यस्तु पुनः पठेतस्य श्रौतमिति । तत्र पुरुषापेक्षया तदेव श्रौतं स्मार्त्तञ्चे-

त्युक्तरूपता स्यात् । स्मरणात्स्मृतिरिति चान्वर्थिकी संज्ञा, युक्तकर्मानुष्ठानं स्मरणं स्यात् । मनुगौतमवसिष्ठापस्तम्बादिभिर्ग्रन्थेनोपनिबद्धम् । तस्मात्कर्तृसामान्यादनुष्ठेयोऽयमर्थ इत्यनुमीयते । तथाच लिङ्गम् । नैमित्तिकं व्याहृतिहोमं प्रकृत्यामनन्ति । यद्युक्तो भूरिति चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये जुहवथ । यदि यजुष्टो भुव इत्याग्नीध्रीये अन्वाहार्यपचने वा हविर्यज्ञे । यदि सामतः स्वरित्याहवनीय इति प्रकृत्याह यद्यविज्ञातं तत्सर्वाण्यनुश्रुत्याहवनीये जुहवथेति । अविज्ञातं च यन्न विज्ञायते किमार्ग्वेदिकं याजुर्वेदिकं सामवेदिकं चेति विनष्टं कर्म तत्स्मार्तमविज्ञातमित्युच्यते । वेदमूलत्वं ह्यवश्यमेवान्विष्यमाणं ज्ञायते तत्किंमूलमिति, तस्मात्स्मृतिप्रवाहादेवायमर्थोऽनुष्ठेय इति गम्यते । **गृह्यस्थालीपाकानां कर्मेति**—गृह्यः शालाग्निः आवसथ्य औपासन इत्यनर्थान्तरम्, तत्र ये स्थालीपाकाः ते गृह्यस्थालीपाकाः । स्थलीपाकग्रहणं चाज्यपुरोडाशधानासक्त्वाद्युपलक्षणार्थम् । कथं ज्ञायते । येन स्थालीपाकमुपक्रम्याज्यमुपसंहरति निरुप्याज्यमधिश्रित्येत्येवमादि । आज्यग्रहणमपि स्थालीपाकाद्युपलक्षणार्थमेव । सर्वेषामेवेदं साधारणं कर्मोच्यते । नह्यत्र प्रकृतिविकारभाव इति । विध्यादिविध्यन्तवती प्रकृतिरित्युच्यते, यत्र पुनर्विध्यादिमात्रं विध्यन्तो नास्ति सा विकृतिरिति । न चात्र विध्यादिविध्यन्तस्वरूपता, सर्वाण्येव स्थालीपाकादीनि प्रकृत्य धर्मविधानम् । **परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय**इत्येवमादि **पर्याग्नि कुर्यात्**इत्येवमन्तं सूत्रम्—परिसमूहनादयः पञ्च पदार्था भूमिशुद्ध्यर्था इति केचित् । तदयुक्तम् । नह्यशुद्धे देशेऽग्नेः स्थापनप्रवृत्तिर्युक्तेति, तस्मादग्न्यर्था एव । यत्र यत्राग्नेः स्थापनं तत्र तत्रैते कर्तव्या इति । न च गृह्यस्थालीपाकादिकर्मान्तर्भाव एषाम्, येनैष एव विधिर्यत्र क्वचिद्धोम इत्यभिहितेऽपि पुनरभिधीयते उपलिप्तउद्धतावोक्षितेऽग्निमुपसमाधायेति नूनमनेनाप्रवृत्तिस्तत्रेति । तस्मादग्न्यर्था एवैत इति । तथाच लिङ्गम् । उद्धते वा अवोक्षितेऽग्निमादधातीति । प्रयोजनं स्वस्थानस्थित एवाग्नौ क्रियमाणे स्थालीपाकादौ न क्रियन्ते । **दक्षिणतो ब्रह्मासनमास्तीर्य**—इत्यासनमात्रं स्यात् न ब्रह्मा, आस्तरणमात्रोपदेशात् । क्वचिच्चोपवेशनविधानाद्दक्षिणतो ब्रह्माणमुपवेश्येति, नैतत् अदृष्टाप्रसङ्गात् । नह्यदृष्टाय कश्चिदासनप्रकल्पनं कुर्यात् । ब्रह्मासनव्यपदेशानुपपत्तेश्च, तस्मादुपवेशनार्थमास्तरणम् । यत्तूक्तं दक्षिणतो ब्रह्माणमुपवेश्येति तदुदपात्रावसरविधित्सया प्रस्तुतब्रह्मोपवेशनज्ञापकम्, ब्रह्मासनं चास्तीर्य कर्तव्यम् । **प्रणीय**—अपः, अपां हि प्रणयनं सर्वार्थं दृष्टम्, इहापि तद्वत्सर्वार्थानामपाम्प्रणयनम् । **परिस्तीर्य**—अग्निम् । **अर्थवदासाद्येति**—प्रयोजनवत्पात्रजातमासादयतीत्यर्थः । तच्च कार्यक्रमेण मुख्यक्रमानुग्रहात् । पवित्रे कृत्वा यथा प्रदेशान्तरे कृते इति । **प्रोक्षणीः संस्कृत्य**—उत्पवनोदिङ्गनादिना । अर्थवत्प्रोक्ष्यकार्यवतः प्रोक्षणम् । **निरुप्याज्यमधिश्रित्य**—आज्यनिर्वाप औपयिकस्य पृथक्क्रिया । अधिश्रित्याग्नौ ॥ **पर्यग्नि कुर्यात्**—आज्यं स्थालीपाकं चेति । उपलक्षणार्थत्वादाज्यस्य ॥ **स्रुवम्प्रतप्य**—तापयित्वा तमेव दर्भैः । **सम्मृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यात् आज्यमुद्वास्य**—अग्नेः सकाशात् ॥ **उत्पूय**—पवित्राभ्यां तदेवाज्यम् । **अवेक्ष्य प्रोक्षणीश्च पूर्ववत्** । चशब्दादाज्यं पूर्ववदेव, अतः पवित्राभ्यामित्युक्तम् । प्रोक्षणीसंस्कारश्च पर्युक्षणार्थः । स्रुवस्यापि संस्कारो होमार्थः । तत्संस्कारस्यादृष्टार्थता माभूदिति । **उपयमनान्कुशानादाय समिधोऽभ्याधायेति** उपयमना उपग्रहार्थीया दर्भाः ।

पर्युक्ष्य जुहुयात्–पर्युक्षणम्प्रोक्षणीभिरित्युक्तम्। एष एव विधिर्यत्र क्वचिद्धोम इति–एष विधिरेव न मन्त्राः समाम्नायाभावात् । यत्र क्वचिद्धोमः शान्तिकपौष्टिकादिष्वपीति, क्वचिच्छब्दश्च गृह्याग्निव्यतिरेकेणापि यथाऽयं विधिः स्यादिति । यथा दावाग्निमुपसमाधाय घृताक्तानि कुशेण्ड्वानि जुहुयादिति ॥ १ ॥

जय०–श्रीमत्केशववागणाधिपपदद्वन्द्वप्रभाभासुरस्वान्तोत्साहविजृम्भितामलमतिग्राह्ये च गृह्ये कृतेः ।
दृष्ट्वा कर्कमुखैः कृतानि बहुशो भाष्याणि गृह्याणि तद्द्वेशार्थं स्वमतेरिदं जयपरो रामो लिखत्यादरात् ॥१॥
कतिसूनुपदाम्भोजपरागोद्धूसरालकः । जयरामश्च मेवाडो भारद्वाजसगोत्रकः ॥ २ ॥
श्रीमन्मान्त्रिकमाधवः श्रुतिसुधासिन्धोर्विगाहाप्ततद्वेद्यस्तत्कृपयाऽभवद् द्विजवरः श्रीकेशवस्तादृशः ।
तत्पादद्वयकस्पृशा कृतमिदङ्कातीयगृह्यस्य सद्भाष्यं सज्जनवल्लभं सुविदुषां प्रेष्ठं शिवप्रीतये ॥ ३ ॥
आचार्यापरनामधेय इति यो दामोदरोऽभूद्द्विजो भारद्वाजसगोत्र आत्मरतिरस्याप्यात्मजस्तादृशः ।
नाम्ना श्रीबलभद्र आत्तसुयशास्तत्सूनुनैतत्कृतं भाष्यं सज्जनवल्लभं जययुजा रामेण मत्याप्तये ॥ ४ ॥
पाठे योऽभूद्विसंवादो गृह्यसूत्रे समन्त्रके । उपेक्षितः स विदुषां मतमाज्ञाय युक्तितः ॥ ५ ॥
प्रयुक्ता अन्यथा मन्त्रा न भवन्त्यर्थसाधकाः । संसाधयन्ति सर्वार्थान्यथावत्पठिता यदि ॥ ६ ॥
नानाशाखीयमन्त्राणां पाठशुद्धौ स्वपाठकाः । व्याख्यातारः प्रमाणं स्युरित्येतच्छिष्टनिश्चयः ॥ ७ ॥
अतस्तत्तत्स्वशाखीयमन्त्राणामग्र्यपाठकात् । पृष्ट्वा सुबोधं गृह्यस्य भाष्यं वै लिख्यते स्फुटम् ॥ ८ ॥
तत्क्षन्तव्यं सुनिपुणैः स्वबालचापलं यथा । मया च स्वीयबोधाय क्रियते न तु तद्विदाम्॥ ९ ॥

आदौ तावत्सूत्रकृता श्रौतान्याधानादिकर्माण्युक्तानि स्मार्तानि चाभिधीयन्ते । तत्रैतदादिमं सूत्रम् ।

अथातो गृह्यस्थालीपाकानां कर्मेति–वक्ष्यत इति सूत्रशेषः। तत्रायमथशब्द आनन्तर्ये। श्रौतानुविधानानन्तरं स्मार्तान्यनुविधीयन्त इति । आनन्तर्यप्रज्ञप्तिप्रयोजनञ्च श्रौतेष्वधिकाराद्युपस्पृशेदप इत्येवमन्तं सर्वकर्मसाधारणं यत्तस्यात्रापि प्रवृत्तिर्यथा स्यादिति । पूर्वं श्रौतानामुपनिबन्धनं प्रवृत्तमित्येतत्सूत्रकारप्रवृत्त्या ज्ञायते । प्रोष्यैत्य गृहानुपतिष्ठते पूर्ववदिति श्रौतेषु गृहोपस्थानमुक्तन्तत्पूर्ववदित्यनेनात्रातिदिश्यते, तथा प्रोक्षणीश्च पूर्ववदिति । अतःशब्दो हेत्वर्थः । यस्माच्छ्रौतान्युक्तानि स्मार्तान्येवावशिष्यन्ते, अतस्तानि वक्तव्यानीति । ननु पूर्वं स्मार्तानां गर्भाधानादीनामनुष्ठानं पश्चाच्छ्रौतानामित्यतोऽनुष्ठानक्रमेण स्मार्तान्यादौ वक्तव्यानि । तन्न, प्रत्यक्षश्रुतित्वात् । प्रत्यक्षा हि श्रुतयोऽनुमेयाभ्यो बलीयस्य इति । श्रौतेषु च प्रत्यक्षाः श्रुतयः, स्मार्तेषु तु कर्तृसामान्यादनुमेया इति स्मार्तानामपि वेदमूलकत्वमुक्तम्भट्टैः । तस्मात्प्रत्यक्षश्रवणाच्छ्रौतान्येव पूर्वमेवानुविहितानीति । केचित्पुनरन्यथा वर्णयन्ति स्मरणादेव स्मृतीनां प्रामाण्यम्, अव्यवच्छिन्नं हि स्मरणमष्टकादीनामष्टकाः कर्तव्या इति । अनादिरयं संसारः स्मरणमप्येषामनाद्येवेति । ननु चोक्तमापस्तम्बेन तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्त इति तस्माद्वेदमूलकत्वम् । नैतदेवम् । शाखानामुत्सादस्तु सतीनामेव भवति नासतीनाम्। तत्र चायं दोषः स्यात् य एव कश्चित्काञ्चिच्छाखां न पठति तस्यैतद्विहितं स्मार्तं स्यात् यस्तु पठेत्तस्य श्रौतमिति । तत्र पुरुषापेक्षया तदेव श्रौतं स्मार्तं चेत्ययुक्तरूपता स्यात्,स्मरणात्स्मृतिरिति संज्ञा चान्वर्थिकी, युक्तकर्मानुष्ठानञ्च स्मरणम् **मनुगौतमवासिष्ठापस्तम्बादिभि**र्ग्रन्थेनोपनिबद्धम् । तस्मात्कर्तृसामान्यादनुष्ठेयोऽयमर्थ इत्यनुमीयते, तथा च लिङ्गम्, नैमित्तिकं व्याहृतिहोमं प्रकृत्यामनन्ति यद्यृक्तो भूरिति चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये जुहवथ, यदि यजुष्टो भुव इत्याग्नीध्रीये अन्वाहार्यपचने वा हविर्यज्ञे यदि सामतः स्वरित्याहवनीय इति प्रकृत्याह–यद्यविज्ञातमसत्सर्वाणि अनुद्रुत्याहवनीये जुहवथेति । अविज्ञातं च यन्न ज्ञायते किमार्ग्वेदिकम्,किंवा याजुर्वेदिकम्,सामवेदिकं वेति विनष्टञ्च यत्तत् स्मार्तमविज्ञातमित्युच्यते वेदमूलकत्वं ह्यवश्यमेवान्विष्यमाणं ज्ञायते तत्किम्मूलमिति तस्मात्स्मृतिप्रवाहादेवायमर्थोऽनुष्ठेय इति

गम्यते इति श्रौतस्मार्तत्वचिन्ताप्रयोजनन्नित्यत्वादिज्ञापनार्थम्, श्रौतन्नित्यङ्काम्यं स्मार्त्तञ्च नित्यमिति । **गृह्यस्थालीपाकानामिति**–गृह्यः शालाग्निः आवसथ्याग्निः औपासन इति नार्थान्तरम्।तत्र ये स्थालीपाकाः। स्थालीपाकग्रहणञ्चाज्यपुरोडाशधानासक्त्वाद्युपलक्षणार्थम्, यतः स्थालीपाकमुपक्रम्याज्यमुपसंहरति । **निरुप्याज्यमधिश्रित्येति**–एवमाज्यग्रहणमपि स्थालीपाकाद्युपलक्षणम्। यतः सर्वेषामेवेदं साधारणङ्कर्मोच्यते नह्यत्र प्रकृतिविकृतिभाव इति । विध्यादिविध्यन्तवती प्रकृतिः । यत्र पुनर्विध्यादिमात्रं विध्यन्तस्तु नास्ति सा विकृतिरिति । न चात्र विध्यादिविध्यन्तस्वरूपता । यतः सर्वाण्येव स्थालीपाकादीनि प्रकृत्य धर्मविधानम्। **परिसमुह्य**–इत्यादि सूत्रम् । तत्र परिसमूहनादयः पञ्च पदार्था भूमिशुद्ध्यर्था इति केचित्। तदयुक्तम् नह्यशुद्धे देशेऽग्निस्थापनप्रवृत्तिर्युक्तेति तस्मादग्न्यर्था एवेत्यपरे। अतो यत्र यत्राग्नेः स्थापनं तत्र तत्रैते कर्तव्याः । न च गृह्यस्थालीपाकादिकर्मान्तर्भाव एषाम् । यत एष एव विधिर्यत्र क्वचिद्धोम इत्यभिहिते पुनरभिधीयते । उपलिप्ते उद्धतावोक्षितेऽग्निमादधीतेति । नूनमनेनाप्रवृत्तिस्तत्रैषाम् तस्मादग्न्यर्था एवैत इति । तथा च लिङ्गम् । उद्धते वा अवोक्षितेऽग्निमुपसमादधतीति तत्प्रयोजनञ्च स्वस्थानस्थित एवाग्नौ क्रियमाणे स्थालीपाकादौ नैते क्रियन्त इति । **दक्षिणतो ब्रह्मासनमास्तीर्य**–इत्यासनमात्रं स्यात् न ब्रह्मोपवेशनम् आस्तरणमात्रोपदेशात् । कश्चिच्चोपवेशनविधानाद्दक्षिणतो ब्रह्माणमुपवेश्येति,तन्न अदृष्टप्रसङ्गात्। नह्यदृष्टार्थं कश्चिदासनप्रकल्पनं कुर्यात् ब्रह्मासनव्यपदेशानुपदेशानुपपत्तेश्च तस्माद्ब्रह्मोपवेशनार्थमास्तरणम् । यत्तूक्तम् दक्षिणतो ब्रह्माणमुपवेश्येति तदुदपात्रस्थापनावसरविधित्सया प्रस्तुतब्रह्मोपवेशनञ्चास्य ज्ञापकम् ब्रह्मासनमास्तीर्य कर्तव्यम्। **प्रणीय**–किम् अपः।अपां हि प्रणयनं सर्वार्थं दृष्टम् तद्वदिहापि सर्वार्थानामपां प्रणयनम्। **परिस्तीर्य**–किम् अग्निम्। **अर्थवदासाद्येति**–प्रयोजनवत्पात्रजातमासाद्येत्यर्थः। प्रयोजनञ्च कार्यक्रमेण मुख्यक्रमानुरोधात्। **पवित्रे कृत्वा**–यथा प्रदेशान्तरे कृते तथैवेति । **प्रोक्षणीः संस्कृत्य**–उत्पवनोद्दिङ्गनादिना । **अर्थवत्प्रोक्ष्य**–इत्यनेन कार्यवताम्प्रोक्षणम्। **निरुप्याज्यमधिश्रित्य**–इत्याज्यस्य निर्वाप औपयिकस्य पृथक्क्रिया । अधिश्रित्य अग्नौ । **पर्यग्नि कुर्यात्**–आज्यं स्थालीपाकादि च । उपलक्षणत्वादाज्यस्य । **स्रुवं प्रतप्य**–अधोमुखन्तापयित्वा पुष्करतः । तमेव दर्भैः । **संमृज्याभ्युक्ष्य**–च **पुनः प्रतप्य** तथैव **निदध्याद्** दक्षिणतः।**आज्यमुद्वास्य**–अग्नेः सकाशाच्चरोः पूर्वेण अग्नेरुत्तरतोऽवस्थाप्य तदुत्तरतः स्थालीपाकमपि। तदेवाज्य**मुत्पूय**–पवित्राभ्याम्। **अवेक्ष्य**–अपद्रव्यमपाकर्तुम्। **प्रोक्षणीश्च पूर्ववदु**त्पूय । चशब्दादाज्यं च पूर्ववत्। अतः पवित्राभ्यामित्युक्तम्। प्रोक्षणीसंस्कारश्च पर्युक्षणार्थः । स्रुवसंस्कारश्च होमार्थः । तत्संस्कारस्यादृष्टार्थता माभूदिति । उपयमना उपग्रहणार्था ये दर्भाः पर्युक्षणं च प्रोक्षणीभिरित्युक्तम्। **एष एव विधिरिति**–यत्र होमस्तत्रैष विधिरेव न तु मन्त्राः समाम्नायाभावात् । **यत्र क्वचिद्धोम इति**–शान्तिकपौष्टिकादिष्वपि । क्वाचिद्ग्रहणञ्च गृह्याग्निव्यतिरेकेणापि यथायं विधिः स्यादिति । यथा दावाग्निमुपसमाधाय घृताक्तानि कुशेण्ड्वानि जुहुयादिति ॥ १ ॥

हरि०–इष्टापूर्तक्रियासिद्धिहेतुं यज्ञभुजाम्मुखम् । अग्निं त्रयीवचःसारं वन्दे वागधिदैवतम् ॥ १ ॥
पारस्करकृते गृह्यसूत्रे व्याख्यानपूर्विकाम् । प्रयोगपद्धतिं कुर्वे वासुदेवादिसंमताम् ॥ २ ॥

अथातो गृह्यस्थालीपाकानां कर्म-अथ श्रौतकर्मविधानानन्तरम् । यतः श्रौतानि कर्माणि विहितानि स्मार्तानि तु विधेयानि अतो हेतोर्गृह्ये आवसथ्येऽग्नौ ये स्थालीपाकाः गृह्यस्थालीपाकाः तेषां गृह्यस्थालीपाकानां कर्म क्रियाऽनुष्ठानमिति यावत् । वक्ष्यत इति सूत्रशेषः । तत्रादावाधानादिसर्वकर्मणां साधारणो विधिः प्रथमकण्डिकयोच्यते । तत्र गृह्येष्वावसथ्याधानादिषु सर्वकर्मसु यजमान एव कर्ता नान्य ऋत्विक् तस्यानुक्तत्वात् । अथ यजमानः सुस्नातः सुप्रक्षालितपाणिपादः स्वाचान्तः कर्मस्थानमा-

गत्य वारणादियज्ञियवृक्षोद्भवासने प्रागग्रानुदगग्रान्वा त्रीन्कुशान्दत्त्वा प्राङ्मुख उपविश्य वाग्यतः शुद्धायां भूमौ सप्तविंशत्यङ्गुलमण्डलं परिलिख्य तत्र **परिसमुह्य**-त्रिभिर्दर्भैः पांसूनपसार्य **उपलिप्य**-गोमयोदकेन। त्रिः **उल्लिख्य**-त्रिः खादिरेण हस्तमात्रेण खड्गाकृतिना स्फ्ये उल्लिख्य प्रागग्रा उदक्संस्थाः स्थण्डिलंपरिमाणास्तिस्रो रेखाः कृत्वा **उद्धृत्य**-अनामिकाङ्गुष्ठाभ्यां यथोल्लिखिताभ्यो लेखाभ्यः पांसूनुद्धृत्य । **अभ्युक्ष्य**-मणिकाद्भिरभ्युक्ष्याभिषिच्य । **अग्निमुपसमाधाय**- कर्मसाधनभूतं लौकिकं स्मार्तं श्रौतंवाऽग्निम् आत्माभिमुखं स्थापयित्वा । **दक्षिणतो ब्रह्मासनमास्तीर्य**-तस्याग्नेर्दक्षिणस्यान्दिशि ब्रह्मणे आसनं वारणादियज्ञियदारुनिर्मितं पीठमास्तीर्य कुशैः स्तीर्त्वा तत्र वरणाभरणाभ्यां पूर्वसम्पादितं कर्मसु तत्त्वज्ञं ब्रह्माणं तदभावे पञ्चाशत्कुशनिर्मितम् अग्नेरुत्तरतः प्राङ्मुखमासीनं स्वयमुदङ्मुख आसीनेऽनुलेपनपुष्पमाल्यवस्त्रालङ्कारादिभिः सम्पूज्य अमुककर्माहं करिष्ये तत्र मे त्वममुकगोत्रामुकप्रवरामुकशर्मन् ब्राह्मण त्वं ब्रह्मा भवेति वृत्वा भवामीत्युक्तवन्तमुपवेश्य । **प्रणीय**-अप इति शेषः । तद्यथा अग्नेरुत्तरतः प्रागग्रं कुशैरासनद्वयं कल्पयित्वा वारणं द्वादशाङ्गुलदीर्घं चतुरङ्गुलविस्तारं चतुरङ्गुलखातं चमसं सव्यहस्ते कृत्वा दक्षिणहस्तोद्धृतपात्रस्थोदकेन पूरयित्वा पश्चिमासने निधायालभ्य पूर्वासने स्थापयित्वा **परिस्तीर्य**-अग्नि म्बर्हिर्मुष्टिमादाय ईशानादिप्रागग्रैर्बर्हिर्भिरुदक्संस्थमग्नेः परिस्तरणं कृत्वा।**अर्थवदासाद्य** यावद्भिः पदार्थैरर्थः प्रयोजनं तावतः पदार्थान्द्वन्द्वं प्राक्संस्थान् उदगग्रानग्नेरुत्तरतः पश्चाद्वा आसाद्य। तद्यथा पवित्रच्छेदनानि त्रीणि कुशतरुणानि पवित्रे साग्रे अनन्तर्गर्भे द्वे कुशतरुणे, प्रोक्षणीपात्रं वारणं द्वादशाङ्गुलदीर्घं करतलमितखातं पद्मपत्राकृति कमलमुकुलाकृति वा, आज्यस्थाली तैजसी मृन्मयी वा द्वादशाङ्गुलविशाला प्रादेशोच्च, तथैव चरुस्थाली, संमार्गकुशास्त्रयः, उपयमनकुशास्त्रिप्रभृतयः 'समिधस्तिस्रः पालाश्यः प्रादेशमाघ्यः', स्रुवः खादिरो हस्तमात्रः अङ्गुष्ठपर्वमात्रखातपरिणाहवर्तुलपुष्करः । आज्यम् गव्यम् । चरुश्चेद्व्रीहितण्डुलाः षट्पञ्चाशदधिकमुष्टिशतद्वयपरिमितं पराद्ध्र्यं बहुभोक्तृपुरुषाहारपरिसितमपराद्ध्र्यं तण्डुलाद्यन्नं पूर्णपात्रं दक्षिणा वरो वा यथाशक्ति हिरण्यादिद्रव्यम् । **पवित्रे कृत्वा**-प्रथमं त्रिभिः कुशतरुणैरग्रतः प्रादेशमात्रं विहाय द्वे कुशतरुणे प्रच्छिद्य ।**प्रोक्षणीः संस्कृत्य**-प्रोक्षणीपात्रं प्रणीतासन्निधौ निधाय तत्र पात्रान्तरेण हस्तेन वा प्रणीतोदकमासिच्य पवित्राभ्यामुत्पूय पवित्रे प्रोक्षणीषु निधाय दक्षिणेन हस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये कृत्वा तदुदकं दक्षिणेनोच्छाल्य वा प्रणीतोदकमासिच्य पवित्राभ्यामुत्पूय पवित्रे प्रोक्षणीषु निधाय दक्षिणेन हस्तेन प्रणीतोदकेन प्रोक्ष्य । **अर्थवत्प्रोक्ष्य**-अर्थवन्ति प्रयोजनवन्ति आज्यस्थाल्यादीनि पूर्णपात्रपर्यन्तानि प्रोक्षणीभिरद्भिरासादनक्रमेणैकैकशः प्रोक्ष्य । असञ्चरे प्रणीताग्न्योरन्तराले प्रोक्षणीपात्रं निधाय । **निरुप्याज्यम्**-आसादितमाज्यम् आज्यस्थाल्यां पश्चादग्नेर्निहितायाम्प्रक्षिप्य चरुश्चेच्चरुस्थाल्याम्प्रणीतोदकमासिच्य आसादिताँस्तण्डुलान्प्रक्षिप्य **अधिश्रित्य**-तत्राज्यं ब्रह्माधिश्रपयति तदुत्तरतः स्वयं चरुमेवं युगपदग्नावारोप्य । **पर्यग्नि कुर्यात्**-ज्वलदुल्मुकम्प्रदक्षिणमाज्यचर्वोः समन्तताद् भ्रामयेत्। अर्द्धशृते चरौ **स्रुवं प्रतप्य**-दक्षिणेन हस्तेन स्रुवमादाय प्राञ्चमधोमुखमग्नौ तापयित्वा सव्ये पाणौ कृत्वा दक्षिणेन सम्मागाग्रैर्मूलतोऽग्रपर्यन्तम्।**सम्मृज्य**-मूलैरग्रमारभ्य अधस्तान्मूलपर्यन्तम् । **अभ्युक्ष्य**-प्रणीतोदकेनाभिषिच्य । **पुनः प्रतप्य निदध्यात्**-पुनः पूर्ववत्प्रतप्य दक्षिणतो निदध्यात् । **आज्यमुद्वास्य**-आज्यमुत्थाप्य चरोः पूर्वेण नीत्वाऽग्नेरुत्तरतः स्थापयित्वा चरुमुत्थाप्य आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतः स्थापयित्वा आज्यमग्नेः पश्चादानीय चरुञ्चानीय आज्येस्योत्तरतो निधाय एवं त्रिचतुरादीन्यन्यान्यपि हवींष्युद्वासयेत्। अधिशृतानाम्पूर्वेणोद्वासितानाम्पश्चिमतो हविष उद्वास्यानयनमिति याज्ञिकसम्प्रदायात्। **उत्पूय**-ऊर्ध पूर्ववत् पवित्राभ्याम्। **अवेक्ष्य**-अवलोक्याज्यम् तस्मादपद्रव्यनिरसनम्।**प्रोक्षणीश्च पूर्ववत्**-पवित्राभ्यामुत्पूय पूर्ववत्।**उपयमनान् कुशानादाय**-दक्षिणपाणिना गृहीत्वा सव्ये निधाय।**समिधोऽभ्या**

---

१ अभिमुखमग्निं प्रणयन्तीति गोभिलसूत्रात् ।

धाय-तिष्ठन्समिधः प्रक्षिप्य । **पर्युक्ष्य जुहुयात्**-प्रोक्षण्युदकेन सर्वेण सपवित्रेण दक्षिणचुलुकेन गृहीतेन अग्निमीशानादि उदगपवर्गं परिषिच्य जुहुयात् । आघारादीन् संस्रवधारणार्थं पात्रं प्रणीताग्न्योर्मध्ये निदध्यात् । **एष एव विधिर्यत्र क्वचिद्धोमः**—एषः परिसमूहनादिपर्युक्षणपर्यन्तो विधिरेव न मन्त्राः, क्वचित् यत्र क्वचन लौकिके स्मार्ते वाऽग्नौ होममात्रं तत्र वेदितव्यः ॥ १ ॥

गदा०—आविर्भूतश्चतुर्द्धा यः कपिभिः परिवारितः । हतवान्राक्षसानीकं रामं दाशरथिंभजे ॥ १ ॥
स्वाभिप्रायेण हि मया न किञ्चिदिह लिख्यते । किन्तु वाचनिकं सर्वमतो ग्राह्यञ्च निर्भयैः ॥ २ ॥

"अथातोऽधिकारः" इत्यादिना श्रौतानि कर्माण्युक्तानि तदनन्तरं स्मार्तानि विधीयन्ते । तत्रैतत्प्रथमं सूत्रम् । **अथातो गृह्यस्थालीपाकानाङ्कर्म**-उच्यत इति सूत्रशेषः । श्रौतानन्तर्यप्रज्ञप्त्यर्थोऽयमथशब्दः । आनन्तर्यप्रज्ञप्तिप्रयोजनं तु अथातोऽधिकार इत्यादि यत्साधारणं तस्य प्रवृत्त्यर्थम् । श्रौतानामुपनिबन्धनम्पूर्वमिति प्रोष्यैत्य गृहानुपतिष्ठते पूर्ववदित्येतत्सूत्रप्रवृत्त्या ज्ञायते । अत इति हेतुः । यतः श्रौतान्युक्तानि स्मार्तान्येवावशिष्यन्तेऽतस्तान्युच्यन्ते । ननु पूर्वङ्गर्भाधानादीनामनुष्ठानात्पूर्वमनुष्ठानक्रमेण स्मार्तान्येव वक्तव्यानीति चेन्नैवम् । श्रौतेषु हि प्रत्यक्षपठिताः श्रुतयः स्मार्तेषु च पुनः कर्तृसामान्यादनुमेयाः श्रुतयः । स्मार्तानामपि हि वेदमूलत्वमुक्तं **भट्टैः** । तस्मात्प्रत्यक्षश्रुतित्वाच्छ्रौतानामेव पूर्वमभिधानम् । स्मरणादेव स्मृतीनां प्रामाण्यमिति **कर्कोपाध्यायै**रुपन्यस्तम् । गृह्यः शालाग्निः तत्र ये स्थालीपाकास्ते गृह्यस्थालीपाकाः तेषां गृह्यस्थालीपाकानां कर्म क्रियेति । स्थालीपाकशब्द आज्यपुरोडाशाद्युपलक्षणार्थः । कथं ज्ञायते येन स्थालीपाकमुपक्रम्याज्यमुपसंहरति । **निरुप्याज्यमित्यादि** । एवमाज्यग्रहणमपि चर्वाद्युपलक्षणार्थम्, यतः सर्वसाधारणमेवेदं कर्म नह्यस्य कर्मणः कुतश्चित्प्रकृतेः कस्याश्चिद्विकृतावतिदेशोऽस्ति । यत्प्रधानविधिरङ्गविध्यन्वितः पठ्यते सा प्रकृतिः ॥ यथा दर्शपूर्णमासौ । यत्प्रधानविधिरङ्गविधिरहितः पठ्यते सा विकृतिः । यथा सौर्यः । न च दर्शपूर्णमासविधौ प्रयाजविधेरिव एतत्कर्मविधेः कस्मिंश्चित्प्रधानविधौ शेषभावोऽस्ति यतः सर्वाण्येव कर्माणि प्रकृत्य धर्मविधानम् । सर्वसाधारणकर्माह । **परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय**—दर्भैः परिसमुह्य गोमयेनोपलिप्य वज्रेणोल्लिख्यानामिकाङ्गुष्ठेनोद्धृत्योदकेनाभ्युक्ष्य तस्मिन्नग्निं स्थापयेत् । त्रिरुल्लेखनम् त्रिरुद्धरणमिति **हरिहरः** । परिसमूहनादि पञ्चापि त्रिस्त्रिरित्यन्ये । **कर्कोपाध्यायै**रपि विपर्यस्य पित्र्येषु सकृद्दक्षिणा चेत्येतत्सूत्रव्याख्यानावसरे यदभ्यस्तं रूपं दैवे स्मर्यते तत्पित्र्ये सकृत्कर्तव्यम् यथा—परिसमुह्योपलिप्योल्लेखनमिति लेखनेनैतावद्दर्शितम् । " दैवे परिसमूहनादि त्रिस्त्रिः पित्र्ये सकृत्सकृत् " इति । एते पञ्च भूसंस्कारा इति **भर्तृयज्ञभाष्ये** । अग्न्यर्था इति **कर्कोपाध्यायाः** । तेन यत्र यत्राग्नेः स्थापनं तत्र तत्रैते कर्तव्याः । अतः श्रौताग्निस्थापनेऽपि कर्तव्याः । न चैतेषां स्थालीपाकविधावन्तर्भावः । येन एष एव विधिर्यत्र क्वचिद्धोम इत्यभिहितेऽपि पुनरभिधीयते । उद्धतावोक्षितेऽग्निमुपसामाधायेति । नूनमनेनाप्रवृत्तिः । अग्निसाध्यानि स्मार्तानि सर्वाण्यावसथ्याग्नौ कार्याणि । तथा च **स्मृतिः** । " कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही । दायकालाहृते वापि श्रौतं वैतानिकाग्निषु" इति । तस्मिन्गृह्याणीत्या**पस्तम्ब**स्मरणाच्च । गृहाय हितं गृह्यं गृहशब्दश्च दम्पत्योर्वर्तते । तस्मिन्नित्यावसथ्ये अतश्च यत्किञ्चिद्दम्पत्योर्हितं कर्म शान्तिकपौष्टिकव्रताङ्गहोमादिकं स्मार्तं तत्सर्वमावसथ्येऽग्नौ भवतीति । अत एवाह **कात्यायनः**—" न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम् । स्वगर्भसत्क्रियार्थाश्च यावन्नासौ प्रजायते ॥ अग्निस्तु नामधेयादौ होमे सर्वत्र लौकिकः । नाहि पित्रा समानीतः पुत्रस्य भवति क्वचित् ॥" अतश्च सीमन्तोन्नयनमपि स्मार्ताग्नावेव कार्यमिति **देवभाष्ये** परिभाषायाम् ॥ स्फ्येनोल्लेखनमिति **गर्गहरिहरौ** । काष्ठेन कुशमूलेन वेति केचित् । अत्रैतद्विचार्यते । किमावसथ्याधानादिषु वक्ष्यमाणेषु सर्वकर्मसु अध्वर्योः कर्तृत्वम् उत यजमानस्येति । अध्वर्युः कर्मसु वेदयोगादिति परिभाषणात् । पूर्णपात्रो दक्षिणा वरो वेति दक्षिणाम्नानादध्वर्योः कर्तृत्वमिति चेत् उच्यते । न स्मार्तेषु कर्मसु अध्वर्योः कर्तृत्वम् वेदयोगाभावात् । समाख्यया हि अध्वर्योः कर्मसु योगः । समाख्या हि वेदयोगात् । नच स्मार्ते वेदयोगोऽस्ति नहि ज्ञायते अमुकवेदोक्तं स्मार्तमिति । तथाच **श्रुतिः** । "सहोवाच यद्युक्तो भूरिति चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये जुहवथ । यदि यजुष्टो भुव इति चतुर्गृहीतमाज्यं गृहीत्वाऽऽग्नीध्रीये जुहवथान्वा-

हार्यपचने वा हविर्यज्ञे यादि सामतः स्वारिति चतुर्गृहीतमाज्यं गृहीत्वाऽऽहवनीये जुहवथ यद्यु अविज्ञातमसम्सर्वाण्यनुद्रुत्याहवनीये जुहवथेति ।'' अविज्ञातं स्मार्तं यन्न ज्ञायते किमार्ग्वैदिकं किं याजुर्वैदिकं किं वा सामवैदिकमिति । नापि दक्षिणान्यथानुपपत्त्यान्यस्य कर्तृत्वम् । अस्ति ह्यत्रान्योऽपि ब्रह्माख्यः कृताकृतावेक्षकत्वेन कर्ता तदर्थः परिक्रयोऽयमिति दक्षिणार्थापत्तिः। तस्मात्स्वस्यैव कर्तृत्वम् । **दक्षिणतो ब्रह्मासनमास्तीर्य**—स्थापितस्याग्नेर्दक्षिणस्यां दिशि ब्रह्मण उपवेशनार्थं दर्भान्निधाय ब्रह्मोपवेशनं कुर्यात् । ननु 'दक्षिणतो ब्रह्मयजमानयोरासने' इति परिभाषातो दाक्षिणत आसनं प्राप्तं किमर्थं पुनदार्क्षणिग्रहणम्। सत्यम्। पुनर्दक्षिणग्रहणं यजमानस्य तत्रासनं मा भूदित्येतदर्थमित्यदोषः । एवं च यजमानासनं वचनाभावे सर्वत्राग्नेरुत्तरतः स्यात् । उत्तरत उपचार इति परिभाषणात् । तत्र पुनर्वचनं यथा—पश्चादग्नेस्तेजनीं कूटं वा दक्षिणपादेन प्रवृत्त्योपविशतीति तत्र तत्रैवोपवेशनम् । यद्वा दर्शपूर्णमासविषया परिभाषेयम् वेदिस्पृगिति सूत्रे तस्माद्दक्षिणं वेद्यन्तमधिस्पृश्येवासीतेति स्मृतौ चोक्तत्वात् । तेनात्राप्राप्तिर्वेद्यभावाद्दक्षिणग्रहणमपूर्वविधानार्थम् । अतोऽपि यजमानोपवेशनमुत्तरत एव । अत्र चास्तरणमात्रोपदेशाच्चतुर्थीकर्मणि दक्षिणतो ब्रह्माणमुपवेश्येत्युपवेशनविधानाच्च न ब्रह्मोपवेशनम् । मैवम् । अदृष्टार्थप्रसङ्गात् । नह्यदृष्टार्थं कश्चिदासनप्रकल्पनं कुर्यात् ब्रह्मासनव्यपदेशानुपपत्तेश्च तस्माद्ब्रह्मोपवेशनार्थमेवास्तरणम् । यच्च चतुर्थीकर्मण्युपवेशनमुक्तम् तदुदपात्रस्थापनावसरे विधानार्थम् । तस्माद्ब्रह्मोपवेशनं भवत्येव । यदा ब्रह्मा न भवति तदा कौशः कार्य इति **हरिहरः**। तन्मूलं **छन्दोगगृह्ये**ऽस्ति । **प्रणीय**—प्रणयनञ्चापां सर्वार्थम्प्रदेशान्तरे दृष्टन्तद्वदत्रापि कार्यम् । **परिस्तीर्य**—अग्नेर्दर्भैः प्रदक्षिणम्परिस्तरणं कृत्वा । **अर्थवदासाद्य**—अर्थः प्रयोजनम् अग्नेरुत्तरतः पश्चाद्वा द्वन्द्वं प्रयोजनवताम्पात्राणामासादनं कार्यक्रमेण मुख्यक्रमानुग्रहात् । पश्चाच्चेत्प्राक्संस्थानामुदगग्राणां प्रागग्राणां वा आसादनम् । उत्तरत उदक्संस्थानां प्रागग्राणामुदगग्राणां वाऽऽसादनम् कारिकायाम् । "पश्चादुत्तरतो वा स्यात्पात्रासादनमग्नितः । उत्तरे चेदुदक्संस्थम्प्राक्संस्थम्पश्चिमे भवेत् ।" एतच्च विपुलस्थानसम्भवे। असम्भवे तु **कात्यायनेनोक्तम्** । "प्राञ्चम्प्राञ्चमुदगग्नेरुदगग्रं समीपतः" इति **देवयाज्ञिकाः** । **पवित्रे कृत्वा**—कौशे समे अप्रशीर्णाग्रे प्रादेशमात्रे अनन्तर्गर्भे कुशैश्छिन्द्यादित्यर्थः । **प्रोक्षणीः संस्कृत्य**—प्रादेशमात्रवारणे पात्रे प्रणीतोदकमासिच्य पवित्राभ्यामुत्पूय सव्यहस्ते तत्पात्रं कृत्वा दक्षिणेनोर्द्ध्वनयनं कृत्वा प्रणीतोदकेन तत्प्रोक्षणं कुर्यात्ततस्तस्मिन्पवित्रनिधानम् । **अर्थवत्प्रोक्ष्य**—तज्जलेन यथासादितानाम्पात्राणां प्रत्येकम्प्रोक्षणम् । **निरुप्याज्यम्**—औपयिकासादिताज्यस्य स्थाल्याम्प्रक्षेपः। चरुश्चेदत्र तण्डुलानां स्वस्थाल्यामावापः। **अधिश्रित्य**—तदाज्यमग्नौ स्थापयेत् चरुश्चेदत्रावसरे आज्यादुत्तरतोऽग्नावधिश्रयणम् । **पर्यग्नि कुर्यात्**—अग्नेरुल्मुकं गृहीत्वा आज्यं परितो भ्रामयेत् । चरुश्चेत्तमपि पर्यग्नि कुर्यात् उपलक्षणार्थत्वादाज्यस्य । **स्रुवं प्रतप्य संमृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यात्**—अग्नौ स्रुवन्तापयित्वा दर्भैः संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्तापयित्वा निदध्यात्। स्रुवस्यायं संस्कारो होमार्थः । एवञ्च दृष्टार्थता तत्संस्कारस्य। अतः संस्कारविस्मरणे प्रायश्चित्तपूर्वकं प्रागन्त्यहोमात्कार्यः । ऊर्द्ध्वन्तु प्रायश्चित्तमात्रम् । प्रोक्षण्युदकेनाभ्युक्षणमिति **गर्गः** । **आज्यमुद्वास्योत्पूयावेक्ष्य**—अग्नेः सकाशादाज्यमुत्तरत उद्वास्य पवित्राभ्यामुत्पूय तदाज्यमवलोक्य । चरुश्चेदाज्योद्वासनोत्तरं तस्योद्वासनम्। तत्रैवम् अग्नेः सकाशादाज्यं गृहीत्वा चरोः पूर्वेण नीत्वाऽग्नेरुत्तरतो निधानम् । ततश्चरुमादायाज्यपश्चिमतो नीत्वा आज्यादुत्तरतो निधानम् हविषाञ्च यथापूर्वमित्युक्तेः । **प्रोक्षणीश्च पूर्ववत्**—पूर्ववदिति पवित्राभ्याम्प्रोक्षणीरुत्पूय तास्वेव पवित्रनिधानम् । चशब्दादाज्यमपि पूर्ववदेव अतः पवित्राभ्यां स्यात् प्रोक्षणीसंस्कारोऽयम्पर्युक्षणार्थः । **उपयमनान्कुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयात्**—उपयमनान्कुशान्गृहीत्वा उपतिष्ठन् तिस्रः समिधोऽग्नावभ्याधाय प्रक्षिप्य प्रोक्षण्युदकेनाग्निं प्रदक्षिणम्परिषिच्य **स्रुवेण** वक्ष्यमाणं होमं कुर्यात् । 'तिष्ठन्समिधः सर्वत्र' इत्युक्तेरत्र तिष्ठता समिदाधानम् । समिल्लक्षणं च **स्मृत्यर्थसारे** "पलाशखदिराश्वत्थशम्युदुम्बरजा समित् । अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरे विदुः ॥ सत्वचः समिधः कार्या ऋजुश्लक्ष्णाः समास्तथा । शस्ता दशाङ्गुलास्तास्तु द्वादशाङ्गुलिकास्तु वा ॥ आर्द्राः पक्काः समच्छेदास्तर्जन्यङ्गुलिवर्तुलाः । अपाटिताश्चाद्विशाखाः कृमिदोषविवर्जिताः ॥ ईदृशा होमयेत्प्राज्ञः प्राप्नोति विपुलां श्रियम्" इति । यद्वा—"समित्पवित्रं वेदश्च त्रयः प्रादेशसम्मिताः । इध्मस्तु द्विगुणः कार्यस्त्रिगुणः परिधिः स्मृतः" एष **एव विधिर्यत्र क्वचिद्धोमः**—यत्र क्वचिद्धोमः शान्तिकपौष्टिकादिष्वपि एष एव विधिः स्यात् । एवकारो मन्त्र-

प्रतिषेधार्थः । गृह्याग्निव्यतिरेकेणापि यथायं विधिः स्यादित्येवमर्थः क्वचिच्छन्दः । यथा दावाग्निमुपसमाधाय घृताक्तानि कुशेण्ड्वानि जुहुयादित्यादौ ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपतिश्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे प्रथमकण्डिका ॥ १ ॥ * ॥

वि०–गर्गसिद्धान्तपद्मानां प्रकाशोदयहेतवे । मार्तण्डाय नृसिंहाय पित्रे श्रीगुरवे नमः ॥ १ ॥
गङ्गादेवीमहं वन्दे ज्ञानदां मातृरूपिणीम् । जातं यस्याः पयःपानात्सरस्वत्यवगाहनम् ॥ २ ॥
पारं शास्त्रसमुद्रस्य लब्ध्वेतल्लिख्यते यतः । स्वकल्पितत्वशङ्काऽत्र न कार्या विबुधैरितः ॥ ३ ॥
तर्कशास्त्रं च मीमांसा यद्रक्षायै प्रयोजिते । तातैस्तमपि वन्देऽत्र गर्गं वेदार्थवित्तमम् ॥ ४ ॥
अधीत्य सकलं शास्त्रं श्रीनृसिंहाज्जगद्गुरोः । तन्यते विश्वनाथेन गृह्यसूत्रप्रकाशिका ॥ ५ ॥

अथैतद्भाष्यं नारब्धव्यं विषयाभावात् । तथाहि–तत्किं सूत्रार्थप्रकाशकं वा सूत्रादनधिगतार्थबोधकं वा सूत्राविविक्तविवेचकं वा सूत्रापेक्षितपूरकं वा । न तावत्प्रथमः कल्पः । "आवसथ्याधानं दारकाले" इत्यादिसूत्राणां स्पष्टार्थत्वात् । न द्वितीयः । शाब्दो ह्यनवबोधः शब्दानुपादानमूलस्तथा च येनार्थस्य प्रकारान्तरलभ्यतामधिगत्य ग्रन्थगौरवाद्वा स्वल्पं सूत्रितं तेन भाष्यपूरितापेक्षयाऽधिकं न त्यक्तमित्येवं कः समाश्वसेत् । कथं वाऽतीतानागतद्रष्टा आचार्यः सूक्ष्मदर्शी मांसलधीसापेक्षं वदेत् । नचाऽज्ञ एव ,स इति वाच्यम्, वैपरीत्यस्यैव सुवचत्वात् । प्रत्यक्षीकृतधर्ममूलकत्वेन सूत्रस्यानादित्वेन न तदुपायस्यानादित्वं पौरुषेयत्वेन सादित्वात् । नापि तृतीयः । नहि किञ्चित्सूत्रं स्वरूपत एव गूढम् । अपि तु बुद्ध्यधीनं तत् । तथा च दोषाविच्छेदादनवस्थैव पर्यवस्येत् । नापि तुर्यः । अधिकारिणा स्मृत्यर्थानुष्ठानाय प्रवृत्तः कथं भाष्यसापेक्षं वदेत् । वदन्वा पूर्वोक्तप्रसक्तिरेव कथं न ग्रासीकुर्यादिति प्राप्ते ब्रूमः । सूचनात्सूत्रं लिङ्गोपन्यासादिति पञ्चम्यन्तार्थः । तदुक्तं—"सूचनात्सूत्रमत्रोक्तं सूचनं लिङ्गभाषणम् । तन्मात्रं साधकं न स्याद्विना साध्यप्रयोगताम्" इति । तथाच तत्सूचितार्थद्योतकेन भाष्येण भाव्यमिति । यच्चोक्तं स्पष्टार्थत्वादिति तदपि न । सर्वेषां नह्याहरणारणेयपक्षयोर्न्यायधौरेयमन्तरेण सिद्धान्तकोटिरधिगन्तुं शक्या । तथाच न्यायगर्भागर्भसकलसूत्रार्थद्योतकेनावश्यं भाष्येण भाव्यमिति । नच वक्तव्यं न्यायाधीनकर्तव्यताबोधकत्वान्न्यूनत्वमू । सूचनत्वलक्षणसूत्रत्वव्याकोपादिति । केचित्तु श्रुतिस्वभावत्वात्सूत्रेष्वपि विध्यर्थवादविवेकार्थं न्यायापेक्षेति । तन्न, अर्थवादोपरक्तत्वे श्रुत्यभेदापत्तेः । नचेष्टापत्तिः संज्ञाभेदानुपपत्तेरिति । यच्चोक्तं द्वितीयपक्षे दुष्टमूलकस्य दुष्टत्वापत्तिरिति । तन्न, आर्षेयत्वेनाकरस्यादुष्टत्वादिति । तद्गर्भन्यायनिरूपणाच्च न तदुपायोऽपि दुष्ट इति नाप्रामाणिकत्वम् । एतेन विपक्षोऽपि निरस्तः । तृतीयपक्षे नाप्यनवस्था । न्यायादर्थाधिगमनं व्युत्पन्नस्याकाङ्क्षानुदयात् । अत एव न तुर्योऽपि सूत्रस्योपायापेक्षायाः व्युत्पादितत्वादिति । नन्वस्तु तावद्भाष्यापेक्षा तथापि हरिहरादिभाष्यादिभिरेव तदर्थसिद्धेः किमर्थमिदमारभ्यत इति चेत् । तत्किमेकस्मि सत्यपरं व्यर्थमिति यदि ब्रूषे तदा साधु समर्थितं **हरिहरस्य** प्रामाण्यम् । **कर्कादिना** तस्यापि तथा वक्तुं शक्यत्वात् । अथ विशेषाप्रतिपादकत्वे तथात्वं प्रोच्यते । **हरिहरा**देस्तु विशेषप्रतिपादकत्वान्न व्यर्थतेति चेत् न, प्रकृतेऽपि विशेषाप्रतिपादकत्वस्य दुर्वचत्वादित्यलमतिविस्तरेण । तथाच प्रकृतेऽप्यारम्भसामग्र्याः विद्यमानत्वादारभ्यते भाष्यम् । **अथातो गृह्यस्थालीपाकानां कर्म**–प्रोच्यते इति सूत्रशेषः । अत्रायमथशब्दः आनन्तर्यं मङ्गलं च बोधयति । नच सकृदुच्चरितस्य सकृदर्थगमकत्वमिति विरोधः । शक्त्यानन्तर्यमात्रं बोधयति । श्रवणान्मङ्गलमिति संप्रदायः । नवीनास्तु नानार्थाध्यवसायार्थं सकृत्प्रोच्चरितमपि पदमनेकार्थप्रत्यायकं भवत्येव तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वादित्याहुः । यत्तु प्रश्नार्थोऽयमथशब्द इति । तन्न, सन्देहजिज्ञासामूलकत्वात्प्रश्नस्य । प्रकृते च सन्देहाभावात् । अनध्यवसायमूलकः प्रश्नश्चेत् न, अतः शब्दानन्वयापत्तेः । केचित्तु क्रमतात्पर्यकतामाहुः । तदपि न, प्रधानफलफलकत्वेनाऽङ्गानां फलोत्पत्तौ प्रधानमुपकर्तुं प्रवृत्तानां युगपदनुष्ठानाशक्यत्वेन क्रमाकाङ्क्षायामथैनावित्यादिनोपात्तोऽथशब्दः वस्त्रपरिधानाद्यानन्तर्यमञ्जनादेर्बोधयितुं समर्थो भवेत् । तच्च न, पूर्वोपक्रान्तपदार्थाभावात् । नन्वेवमानन्तर्यार्थतां वर्णयतः का गतिः । किंच क्रमतात्पर्यकतायां तत्कालजातकर्माद्यकरणदोषः । व्यवधानेऽपि क्रमभङ्गाभावात्क्रमार्थतैव युक्तेति चेत् न, अव्यवधानार्थमेवानन्तर्यार्थसमाश्रयणात् । विवाहानन्तरमावसथ्यमिति । अन्यथा आधाने कालबाधेऽपि दोषाभावेन प्रायश्चित्तादिकर्तव्यताबोधकविधेरप्रामाण्यपसङ्गः । अतःशब्दो हेत्वर्थः । अधिकारिणा आधानाद्यविलम्बेन कर्तव्यमिति यतः प्रतिपादितमतस्तस्याधानादिसकलकर्मानुष्ठानाय गृह्यस्थालीपाकानां कर्म मया प्रोच्यत इत्यन्वयः । मशकनिवृत्त्यर्थं धूमार्थिनो हेतुत्वेन वह्न्युपादानवत् फलार्थं स्मृत्यर्थाद्यनुष्ठानार्थिनो हेतुत्वेन ग्रन्थोपादानम् । धूमे वह्निवत्तदर्थानुष्ठाने सूत्रस्यापि हेतुत्वमतःशब्दार्थः । केचित्तु यतः श्रौतान्युक्तान्यतस्तत्रा (पशुन्यायेना ? शून्यस्य) धिकारसंपादकतया स्मार्तानि वक्तव्यानि ।

अतो हेतोर्गृह्यस्थालीत्याद्यन्यथा हेत्वर्थतामतःशब्दस्य वर्णयन्ति । गृहं गृहिण्यन्वितम् । तत्र भवो गृह्यः । स्थाल्यां ताम्रादिनिर्मितायां तण्डुलादेः पाकः स्थालीपाकः । गृह्याश्चामी स्थालीपाकाः तेषामित्यर्थः । अत्र व्याख्यास्यत इत्यध्याहारं वर्णयन्तः हरिहरादयः प्रष्टव्यास्तावदेषा कस्य प्रतिज्ञा । सूत्रकर्तुर्वा तेषां वा । न तावदाद्यः । आचार्येण कस्याप्यव्याख्यानात् । न द्वितीयः, अनभ्युपगमात्, अध्याहारानुपपत्तेश्चेति दिक् । एवं च गृह्यस्थालीपाकानां यत्कर्म तत्कथमनुष्ठेयमित्याकाङ्क्षायामावसथ्यादिसकलकर्मसाधारणीं परिभाषामाह–**परिसमुह्य**–जलैरिति शेषः । **उपलिप्य**–गोमयेनेति शेषः । **उल्लिख्य**–स्फ्येनेति शेषः । **उद्धृत्य**–अनामिकाङ्गुष्ठाभ्यामिति शेषः । **अभ्युक्ष्य**–पवित्रोदकेनेति शेषः । एते च स्थालीपाकाद्यङ्गम् । **अग्निमुपसमाधाय**–आवसथ्याग्निहोत्राद्यग्निमिति शेषः । कथमेतत् "सामान्ये प्रमाणपक्षपातः" इति न्यायादिति चेत् न, लौकिकविषये पञ्चसु बहिःशालायामित्यारभ्य उपलिप्त उद्धृतावोक्षितेऽग्निमुपसमाधायेत्यस्यापवादस्याचार्येण सूत्रणादुपलिप्त उद्धृतावोक्षितेऽग्निमुपसमाधायेत्ययमपवादः परिसमुह्येत्याद्युत्सर्गविधिं बाधते । यद्वा–मास्तु प्रकृते सामान्यविशेषभावः तथापि विवाहप्रकरणे त्रयाणामेव संस्काराणामुपादानादेते पञ्च संस्कारा अग्निहोत्रादिविषया एवेति ज्ञायते । अन्यथोपलिप्त इत्यादीनां सम्भारवदाधिक्यापत्तिरिति ध्येयम् । **दक्षिणतो ब्रह्मासनमास्तीर्य**–अग्नेर्दक्षिणतः ब्रह्मणा उपलक्षितम् आसनं तत्र आस्तरणं वस्त्रादि ब्रह्मासनास्तरणं तत्कृत्वेत्यर्थः । यद्वा–पञ्चाशद्भिः कुशैर्ब्रह्मेत्युक्तत्वात्पञ्चाशत्संख्याककुशबटुं वा स्थापयित्वेत्यर्थः । ननु साक्षाद्ब्रह्मणः उपवेशनम्, दक्षिणतो ब्रह्माणमुपवेश्येति चतुर्थीकर्मणि सूत्रणात् । **कारिकाकारो**ऽपि "अचेतने ब्रह्मशब्दः कुशमुष्टौ च वेदवत् । कुशानां संनिधौ युक्तः समास्तीर्येति लिङ्गतः॥" **कर्काचार्यास्तु** सर्वत्र साक्षादेव ब्रह्मणः उपवेशनम्, नच दक्षिणतो ब्रह्माणमुपवेश्येत्यनेन पौनरुक्त्यम्, तस्यावसरज्ञापनार्थत्वादित्याहुः । तदपरे दूषयन्ति । स्थालीपाकश्रपणपूर्वकालता ह्यवसरः, स चोत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वेत्यनेनैव लभ्यते, पूर्वकालतायाः समानकर्तृकयोः क्त्वावाच्यत्वात् । क्त्वाप्रत्ययार्थो ह्युत्तरकालता । तथाच उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वेत्यनेन स्थालीपाकश्रपणस्योदपात्रस्थापनोत्तरकालता बोध्यते । तेन स्थालीपाककरणप्राक्कालतायाः क्त्वाप्रत्ययादेव लाभाचर्थं तदर्थं दक्षिणतो ब्रह्माणमुपवेश्येत्येतत्सूत्रं स्यादत एवं ज्ञायते–चतुर्थीकर्मादौ यत्र साक्षाद्ब्रह्मोपवेशनमुक्तं तत्रैव प्रत्यक्षब्रह्मोपवेशनं नान्यत्रेति वदन्ति । **प्रणीय**–अप इति शेषः । अग्नेरुत्तरतः कौशं पूर्वापरमासनद्वयं प्रकल्प्यापरासने उदपूर्णं चतुष्कोणं चमसं निधायालभ्य ब्रह्मासनं वीक्ष्य पूर्वासने निदध्यादित्यर्थः । एतच्च प्रणीताप्रणयनं दृष्टफलं सर्वार्थं चेति **कर्काचार्याः** । "दृष्टार्थतायामपि संयवनार्थमिदम्" इति केचित् । उदककृत्यं सर्वं प्रणीताजलेन चेत्क्रियते तदा स्वकाले कर्मानुष्ठानं क्लृप्तेनैव निर्वाहश्च । उक्तं च–"लभ्यमाने तु दृष्टेऽर्थे नादृष्टस्य प्रकल्पना" इति । तस्मात्सर्वार्थाः प्रणीता इति । "प्रणीताभिः संयौति" इति श्रवणात्संयवनार्था इत्यन्ये । यदि हि सर्वार्थं प्रणीताप्रणयनं भवेत्तदा प्रणयनसंस्कृतनीरसंसर्गः प्रतीयेत । तस्य च संयवनेनैव प्रतीयमानत्वात्संयवनार्थतैवेति । तदेतत्तुच्छम् । पक्षाद्यादिषु संयवनाभावेऽपि प्रणीतादर्शनात् । अथ नियोगसाधनीभूतद्रव्ये अपःसंयवनं तदर्थः लक्षणापत्तेः । अथ प्रणयनादेः संस्कारस्य श्रुतित एव लाभाच्छ्रुतौ च संयवनार्थतैव दृष्टेति चेत् । प्रणीतायाः संयवनार्थत्वे उपसदि संयवनव्यतिरेकात्प्रणीताया अपि व्यतिरेकः प्रसज्येत । तथाच प्रसञ्जितव्यतिरेकप्रतियोग्युल्लेखं सूत्रकृन्न कुर्यात्कृतवांश्च तदुल्लेखं प्रणीताद्युपसदिति सूत्रकृत् । किंच सविधे पशौ प्रणीताव्यतिरेकेऽपि क्रतुनिर्वाहसंदर्शनात्संयवनरूपदृष्टार्थताऽदृष्टसाधारणार्थता वेत्येतदविचाररमणीयम् । किं चापः प्रणयतीत्युपक्रम्य ततो देवा एतं वज्रं ददृशुर्यदप इत्याद्यर्थवादपर्यालोचनया विघ्ननिवर्तकत्वं प्रणीतायाः प्रतिपाद्यत इति प्रतीयते । तच्च साक्षान्न संभवतीत्यदृष्टमेव व्यापार इति सिद्धं **शतपथश्रुतित** एव प्रणीतायाः अदृष्टार्थत्वम् । **परिस्तीर्य**–प्रागग्रैरुदगग्रैश्च तृणैरग्नेः परिस्तरणं कृत्वेत्यर्थः । प्राच्यां प्रथममुदगग्रैः प्रक्षेपः । दक्षिणतः प्रागग्रैः । ततः प्रतीच्यामुदगग्रैः । तत उदीच्यां प्रागग्रैः । **अर्थवदासाद्य**–अर्थः प्रयोजनं तद्वत्पात्रसमुदायमासाद्य स्थापयित्वा प्रारब्धक्रियास्तोमनिष्पादकनिःशेषसामग्रीनिष्पादनं कुर्यादित्यर्थः । तद्यथा–पवित्रच्छेदनानि त्रीणि, पवित्रे द्वे, प्रोक्षणीपात्रं, चर्वादिमिति चरुस्थाली, संमार्गकुशाः, उपयमनकुशाः, समिधः, स्रुवः, आज्यम्, तण्डुलाः, बर्हिः, पूर्णपात्रम्, वरो वा । दर्विहोमेषु पाकयज्ञेषु पक्षादिप्रभृतिषु पौर्णमासधर्माणां **कात्यायन**चरणैरातिदिष्टत्वात्प्रकृते च पाकयज्ञानां परिभाषासूत्रार्थस्य पर्यालोच्यमानत्वादतिदेशप्राप्ताः ग्रहणासादनप्रोक्षणादयः पौर्णमासधर्मा अपि लिख्यन्ते । नन्वेत एव कथं "स्थालीपाकेषु ग्रहणासादनप्रोक्षणानि मन्त्रदेवताभ्यः" इति **शाङ्खायनोक्तेः** । तेन स्फ्योपहितमोषधीकरणम् । ततः चर्वादिग्रहणम् । अमुष्यै देवतायै जुष्टं गृह्णामीत्येवं मुष्टित्रयम् । चतुर्थसंख्यापूरणीं मुष्टिं विनैव मन्त्रं गृह्णीयात् । यथादैवतमन्यत् । चर्वादेस्त्रिस्त्रिः क्षालनं ततः वाग्यमनम् । **पवित्रे कृत्वा**–कुशौ समावप्रशीर्णाग्रावनन्तर्गर्भौ कुशैः छित्त्वेत्यर्थः । न नखैः शाखान्तरे निषिद्धत्वात् । **प्रोक्षणीः संस्कृत्य**–प्रोक्षणीरिति जलवाचिपदम् । ताः संस्कृत्येत्यर्थः । प्रोक्षणीसंस्कारश्चैवम् । आदौ प्रोक्षणीपात्रे नीरप्रक्षेपः, ततः पूर्वसम्पादित-

पवित्राभ्यामुत्पवनम्, पात्रस्य ततः सव्यहस्ते निधानं, दाक्षिणेनोद्दिङ्गनं ताभिरेव तासां प्रोक्षणमिति । **अर्थवत्प्रोक्ष्य**–अर्थः प्रयोजनं तद्वत् । स्मृतिबोधितप्रारब्धक्रियासंपादकं चर्वादि घृतादिकं पात्रादिकं च सर्वं प्रोक्षणीनामधेयाभिरभिषिच्येत्यर्थः । तथाच दक्षिणहस्तोपात्तप्रोक्षणीभिः समग्रं पात्रसमुदायं सकृदेव प्रोक्षणीयमित्यर्थः । श्रुतौ शुन्धध्वमिति मन्त्रलिङ्गात् । अत्राह **कर्कः**–"प्रोक्षणस्य पात्रोद्देशेन विधानात्पात्राणां च संस्कार्यत्वात्प्रतिसंस्कार्यं संस्कारावृत्तेर्न्याय्यत्वात्प्रतिपात्रं प्रोक्षणम्" इति । श्रुतावुद्देश्यगतं बहुत्वं न विवक्षितमिति । नैतदपि विचारसहम्, तथाहि–क्रमावेदकमानापेक्षा तत्रैव यत्राशक्यानुष्ठानमनेकविषयमेकं कर्म । नचैतत्प्रकृते । सकृदेव सर्वेषां प्रोक्षणस्य शक्तिगोचरत्वात् । अथासादनकालिकक्रमरूपविशेषाश्रयादेकत्वप्रतीतिरिति चेत्तर्हि "शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात्" एकस्यैव प्रोक्षणं भवेत् ! अथ सर्वेषां संस्कार्यत्वादावृत्तिराश्रयणीयेति चेत्, तर्हि किमर्थमुक्तमुद्देश्यगतमनेकत्वं न विवक्षितमिति । तदा हि फलवत्यविवक्षा स्यात् यदैकत्वद्वित्वान्यतरसंख्यावच्छिन्नस्य सामर्थ्यात्प्राप्तौ सत्यां बहुत्वसंख्यावच्छिन्नस्य शब्दबोध्यस्याविवक्षामाश्रित्य सामर्थ्याक्षेपाद्यथाप्राप्तेषु सर्वग्रहेषु संमार्गोऽङ्गीक्रियते । किंच विवक्षितमविवक्षितं वेति जिज्ञासाऽपि तत्रैव यत्र कर्तृकालदेशफलसंस्कार्याणां विधिबोधिता भिन्ना संख्या, भिन्ना च सामर्थ्याक्षिप्ता । नचैवं प्रकृते । तस्मान्मन्त्रात्मकवेदगतं बहुत्वं न विवक्षितमित्येतद्रिक्तं वचः । अथासादनक्रमदर्शनसञ्जातः प्रोक्षणेऽपि क्रमसंशयो विना प्रमाणं कथमपनेय इति चेत्, तर्हि युगपदनेकप्रोक्षणस्य लाघवात्प्राप्तौ क्रमे किं प्रमाणमिति विपरीता प्रमाणापेक्षा । अथ सुहृद्भावेन पृच्छामि विना प्रमाणं कथं संशयोऽपनेय इति । सर्वपात्राणां युगपत्प्रोक्षणे शक्यानुष्ठाने किं सकृदेव कर्तव्यं किंवा आसादने क्रमदर्शनात्क्रम आश्रयणीय इति । "शब्दावगम्येऽर्थे शब्द एव प्रमाणं नान्यत्" इति मन्त्रलिङ्गमेव प्रमाणम्, "शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यते" इति न्यायादिति । एतेन प्रोक्षणकर्तव्यताबोधकवेदाविनियुक्तमन्त्रस्मारितबहुत्वस्य कथमुद्देश्यगतत्वं साक्षादुद्देश्यगतस्य पूजार्थतां नोपपादयाम इत्यपास्तम् । क्रियाहेत्वर्थस्मारकमन्त्रगतबहुत्वस्याप्युद्देश्यगतबहुत्वतात्पर्यकत्वात् । "यत्परः शब्दः स शब्दार्थः" इति न्यायात् । तथापि प्रतिसंस्कार्यं न्यायाकृष्टा संस्कारावृत्तिः" कथमपहस्तयितुं शक्येति चेत् नं, "व्रीहीन्प्रोक्षति" इत्यत्र व्रीहीणामपि संस्कार्यत्वात्प्रतिव्रीहिप्रोक्षणापत्तेः । ननु चरुपुरोडाशाद्यनेकहविषां सकृदेव प्रोक्षणं कुतो नेति चेत् । तद्यस्यै देवतायै हविर्भवति तस्यै मेध्यं करोतीति देवतोद्देश्यकहविःसम्बन्धेन प्रोक्षणसम्बन्धं दर्शयन्ती श्रुतिरेवात्र प्रमाणमित्युत्तरदानं यथा–तथा "यज्ञपात्राणि प्रोक्षति दैव्याय कर्मणे शुन्धध्वम्" इत्येवमाकारा सकृत्प्रोक्षणादेः श्रुतिरेवात्र प्रमाणमिति किं पुनर्भवतोऽमुना विक्लवविक्रोशमात्रेण । अपरे तु–"पात्राणि प्रोक्षति व्रीहीन्प्रोक्षति" इत्यादौ पात्रव्रीह्यादेः संस्कार्यतामेव नाङ्गीकुर्मः । तथाच कथं प्रतिसंस्कार्यं संस्कारावृत्तिः । तत्र परेषामयमाशयः–"व्रीहीन्प्रोक्षति" इत्यादौ व्रीह्यादेस्तावत्प्रोक्षणादिकर्मता प्रतीयते । सा च तत्फलाधारत्वव्यतिरेकेणानुपपद्यमाना व्रीह्यादेस्तत्फलाधारतां बोधयति । कथमन्यथा प्रोक्षितानामेवावघातादावुपयोगः । प्रोक्षणस्य चिरध्वस्तत्वात् । नच प्रोक्षणमुपलक्षणं तद्ध्वंसो वा व्यापार इति वक्तुं शक्यम् । यागादौ तथाभावप्रसङ्गेनापूर्वकल्पनाया अभावप्रसङ्गात् । चेतनस्य संस्कार्यत्वे व्रीहेः कर्मता न स्यादित्युक्तम् । तथाच पात्रव्रीह्यादिषु कर्मत्वान्यथानुपपत्तिप्रसूतार्थापत्त्या पात्रादेः संस्कार्यतायामावेदितायां प्रतिसंस्कार्यं संस्कारावृत्तिरपि न्यायसमर्पितैवेति तेषां निर्गर्वः । अत्र वदन्ति । प्रोक्षणादिजन्योऽतिशयः यागजन्यातिशयसमानाधिकरण एव कल्प्यते लाघवात् । नच चेतनस्य संस्कार्यत्वे व्रीहेः कर्मत्वानुपपत्तिः । प्रोक्षणजन्यसंयोगरूपफलभागित्वेनैव तदुपपत्तेः । नच संयोगावच्छिन्नक्रियाविशेषस्यैव प्रोक्षणपदार्थतेति वाच्यम्, ग्रामं गच्छतीत्यादौ ग्रामादेस्तादृशक्रियानाधारत्वेन कर्मत्वानुपपत्तिप्रसङ्गात् । तस्माद्यथा क्रियाविशेषणीभूतसंयोगाधारतया ग्रामादेः कर्मत्वं ,तथा प्रकृतेऽपीति । कथमन्यथा "सक्तून्प्रोक्षति" इत्यादौ लौकिकप्रोक्षणे सक्तूनां कर्मता । किंच व्रीहीन्प्रोक्षतीत्यत्र व्रीहेः प्रोक्षणजन्यसंस्काराश्रयत्वे कल्प्यमाने किं प्रतिव्रीहिव्यक्ति आवृत्तयो भिन्ना व्रीहिसमसंख्याः संस्काराः कल्प्यन्ते, यद्वा तावद्व्रीहिव्यक्तिवृत्त्येक एव वा । न तावदाद्यः गौरवात् । न द्वितीयः किंचिद्व्रीहिनाशात्तन्नाशे अवशिष्टव्रीहेरुत्तरत्रोपयोगोऽवघातादौ न स्यात् । नच यावदाश्रयनाशः प्रयोजक इति वाच्यम्, गौरवात् । तस्माच्चेतन एव संस्कार्यः । एवं च चेतनसमवेतसंस्कारेण स्वरूपसंबन्धाद्वा व्रीहेः कर्मत्वमिति न किंचिदनुपपन्नमित्याहुः । **निरुप्याज्यम्**–कुशैरसतिस्विति **कात्यायनोक्तेः** कुशोपग्रहः सन् आज्यस्थाल्यामाज्यं प्रक्षिपेदित्यर्थः । **अधिश्रित्य**–अग्नेरुपरीति शेषः । प्राक्सूत्रादाज्यपदानुवृत्तिः । उपलक्षणमेतत् । तथाच चर्वाद्यविनाभूतक्रियायां चर्वादिकमप्यधिश्रित्येत्यर्थः । **पर्यग्नि कुर्यात्**–अधिश्रितघृतचर्वादेः परित एकं ज्वलदुल्मुकं प्रादक्षिण्येन भ्रामयित्वाऽप्रदक्षिणं कर्मानयेदित्यर्थः । ततः श्रपणम् । स्रुवं प्रतप्य । अर्धश्रृते चर्वादौ स्फ्योपग्रहः । **स्रुवं प्रतप्य**–खादिरोऽरत्निमात्रः स्रुवोऽङ्गुष्ठपर्ववृत्तपुष्करः । स्फ्योऽस्याकृतिः **कात्यायन**प्रणयनात् । **संमृज्य**–कुशैरिति शेषः । ते च त्रयः पञ्च सप्त वा आचारात् । **अभ्युक्ष्य**–प्रोक्षणीनां क्लृप्तत्वात्तज्जलेनेति शेषः । **पुनः प्रतप्य**–

पुनःपदोपादानात्स्रुवमिति शेषः । **निदध्यात्**–स्थापनीयचर्वादेर्दक्षिणत इत्यर्थः । **आज्यमुद्वास्य**–कुशोपग्रहः घृतमुदीच्यामवतार्येत्यर्थः । ततः प्रोक्षण्यपरेण निधानम् । **उत्पूय**–पवित्राभ्यामिति शेषः । **अवेक्ष्य**–आज्यमिति शेषः । **प्रोक्षणीश्च पूर्ववत्**–पवित्राभ्यामुत्पूयेत्यर्थः । प्रोक्षण्यादानं समिद्विस्रंसनं पक्षाद्यादिष्वष्टादश, अन्यत्र विंशतिः । समित्प्रोक्षणं, वेदिप्रोक्षणम् । अग्नेरपरस्यामुदगग्रस्य बर्हिषः प्रोक्षणम् । सशेषो मूलावसेकः । प्रोक्षणीपात्रनिधानं, बर्हिर्बन्धनमास्तीर्य कुशैरवच्छादनम् । त्रिवृत्स्तरणं बर्हिषः । शृतस्य चर्वादेरभिघारः । उद्वासनं शृतानां तु पूर्वेण उद्वासितानां तु पृष्ठतः । आज्यादुत्तरस्यां क्रमेण निधानम् । क्रमेण चर्वादौ प्राणदानम् । वेद्यां बर्हिषि आज्यादिक्रमेण निधानम् । **उपयमनान्कुशानादाय**–उपयमनसंज्ञकान्कुशान् दक्षिणहस्तेन गृहीत्वा सव्ये कृत्वा । **समिधोऽभ्याधाय**–तिष्ठन्सप्तदशसमिधः विकृतौ प्रकृतौ पक्षादिषु पञ्चदश समिधः°। अग्नौ प्रक्षिप्य सर्वेषु कर्मप्रतिश्रुतादिषु प्रादेशमात्रीः पालाशीः समिधः सप्तदश हुत्वा पश्चात्स्रुवग्रहणं, पूर्णमासयोः पञ्चदशेति **शाङ्खायनसू**त्रात् । पर्युक्ष्य दक्षिणहस्तोपात्तेन सपवित्रेण प्रोक्षणीजलेन अग्निमिति शेषः । प्रोक्षणीपात्रं च संस्रवधारणार्थं प्रणीताग्न्योरन्तरास्थाप्यम् । **जुहुयात्**–आघाराज्यभागादिनामधेयाः आहुतीरिति शेषः । **एष एव विधिर्यत्र क्वचिद्धोमः**–एषः परिसमूहनादिपर्युक्षणान्तो विधिक्रियाकलापः । एवकारस्तु प्रणयनादिक्रियाकलापे कर्त्तृत्वेयादिमन्त्रजन्यार्थस्मृतेः करणत्वव्यवच्छेदार्थः । इयं परिभाषा॥१॥

आवसथ्याधानं दारकाले ॥१॥ दायाद्यकाल एकेषाम् ॥ २॥ वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य ॥ ३ ॥ चातुष्प्राश्यपचनवत्सर्वम् ॥ ४ ॥ अरणिप्रदानमेके ॥ ५ ॥ पञ्चमहायज्ञा इति श्रुतेः ॥ ६॥ अग्न्याधेयदेवताभ्यः स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति ॥ ७ ॥ त्वन्नोऽअग्ने सत्वन्नोऽअग्न इमम्मेवरुण तत्त्वायामि येतेशतमयाश्चाग्न उदुत्तमम्भवतन्न इत्यष्टौ पुरस्तात् ॥ ८ ॥ एवमुपरिष्टात्स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा जुहोति ॥ ९ ॥ स्विष्टकृते च ॥ १० ॥ अयास्यग्नेर्वषट्कृतं यत्कर्मणात्यरीरिचं देवा गातुविद इति ॥ ११ ॥ बर्हिर्हुत्वा प्राश्नाति ॥ १२ ॥ ततो ब्राह्मणभोजनम् ॥१३॥ * ॥ २ ॥

कर्क०–गृह्यस्थालीपाकानाङ्कर्मप्रक्रान्तमतो गृह्यस्यैवोत्पत्त्यर्थमिदमाह–**आवसथ्याधानं दारकाले**–इति। आवसथ्यो गृह्यः शालाग्निरित्यनर्थान्तरम्। तस्याधानं स्थापनमात्मसात्करणमिति यावत्। तद्दारकाले भवति। दारशब्देन पाणिग्रहणादिसंस्कारसंस्कृतं स्त्रीद्रव्यमभिधीयते । तस्याहरणकालो दारकालस्तत्र । केचित्तु पाणिग्रहणात्प्रागिच्छन्ति गृह्यकारान्तरवचनात् । एवं हि तेनोक्तम्–"जायायाः पाणिञ्जिघृक्षन्नादधीत"इति तत्पुनर्नातीव युक्तरूपम्। येनाद्याप्यसंस्कृतमेव स्त्रीद्रव्यम् नचासंस्कृतं तत्सहायताम्प्रतिपद्यते, ससहायस्य च कर्मस्वधिकारः । मध्यगं हि दम्पत्योर्द्रव्यं नैकः शक्नोति परित्यक्तुम् । पत्न्यपि च तेन विनाऽनधिकृतैव,तस्मात्ससहायस्याधिकारः । तथाच लिङ्गम्–"असर्वो हि तावद्भवति यावज्जायां न विन्दते" इति,अतः संस्काराभिनिर्वृत्त्युत्तरकालं दारकालः । अपि च स्मरन्ति तमेव दारकालम्प्रकृत्य "धर्मे चार्थे च कामे च तया सह नातिचरितव्यम्" इति । पूर्वञ्च क्रियमाणे आधाने एकाकिनाऽग्निराहितो भवति, तथा सत्यतिचारस्स्यादिति । तस्मात्"चतुर्थ्युत्तरकालन्दारकालः" इति सम्प्रदायः । यत्पुनरुक्तम्–"वैवाहिकेऽग्नौ कुर्वीत गार्ह्यङ्कर्म यथाविधि । पञ्चयज्ञविधानञ्च पंक्तिञ्चान्वाहिर्कीं गृही"इति,तद्विवाहसम्बन्धादुत्तरकालमपि क्रियमाणोऽसौ वैवाहिको भवत्येव। **दायाद्यकाल एकेषाम्**–एकेषामाचार्याणाम्मते दायाद्यकाले कर्तव्यम् । दायाद्यकालश्च भ्रातॄणान्धनविभागकालः; तस्मिन्हि काले स्वेन द्रव्येण कर्मानुष्ठानसमर्थो भवति । साधारण-

द्रव्यस्य हि परित्यागासामर्थ्यादनधिकार एव, अतोऽयं व्यवस्थितविकल्पः । अभ्रातृकस्य दारकाले भ्रातृमतो दायाद्यकाल इति । **वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य चातुष्प्राश्यपचनवत्सर्वम्**–हुतोच्छिष्टोऽग्निरत्र गृह्यते असंस्कृतो वा अविरोधात्।**अरणिप्रदानमेके**–एके आचार्या अरणिसम्बन्धमिच्छन्ति, अरणिः प्रसिद्धा, प्रशब्द उपशब्दार्थ उपादाने च वर्तते । अरण्युपादानमेकेऽग्निमिच्छन्ति, एके वैश्यस्य कुलादिषूभयोर्विकल्पेन स्मरणम्। तत्र चातुष्प्राश्यपचनवत्सर्वं कर्म कर्त्तव्यम् । चातुष्प्राश्यपचनं यस्मिन्कर्मणि विद्यते तदिहापि सर्वम्भवति । कुत एतत् **पञ्चमहायज्ञा इति श्रुतेः**–पञ्च महायज्ञा हि श्रुतौ पठ्यन्ते तत्साधनभूतश्चायमग्निः।श्रौतकर्मसाधनभूते चाग्नौ चातुष्प्राश्यपचनवतीतिकर्तव्यता दृष्टा । अथमपि श्रौतकर्मसाधनभूत एवेत्यभिप्रायः । तस्माच्चातुष्प्राश्यपचनवतीतिकर्तव्यताप्रवृत्तिरत्रापि। अपिचाधाने सेतिकर्तव्यता दृष्टा ।इदमपि चाधानमेव ।एवं हि श्रूयते एतदेव, प्रकृत्य“अथैनं वयन्त्वेव धास्यामहे” इति । तेनाधानसामान्यादिहापि प्रवर्तत एवेति । एवं स्थित उच्यते, एके आचार्या नेच्छन्त्यत्र चातुष्प्राश्यपचनवतीतिकर्तव्यताम् । यत्कारणम् । उपदेशेन वा धर्मः प्रवर्तते अतिदेशेन वा । न चात्रोपदेशो न चातिदेशः । तस्मान्नैव प्रवर्तते । कथन्तर्हीदमुक्तम् । यस्य नाम श्रौतकर्मसाधनभावेनाधानसामान्याद्वा प्रवृत्तिबुद्धिस्तान्निवर्तयितुमित्यदोषः । गृह्यकारान्तरैश्चानयैव भ्रान्त्या इयमितिकर्तव्यतोपदिष्टा तन्निराकरणायेह पूर्वपक्ष उपन्यस्तः। **अग्न्याधेयदेवताभ्यः स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति त्वन्नो अग्ने सत्वन्नो अग्न इमम्मेवरुण तत्त्वायामि येते शतमयाश्चाग्न उदुत्तमं भवतन्न इत्यष्टौ** स्थालीपाकं श्रपयित्वा इत्युच्यते माभूत्तद्भूतोपादानम् । अग्न्याधेयदेवताभ्य इति च वक्तुमशक्यम्, वक्ष्यत्यग्न्याधेयदेवताभ्यो हुत्वा जुहोतीति । उक्तञ्च तत्किमर्थम्, बहुत्वविशिष्टानामत्र देवतात्वं यथा स्यादिति । किञ्च स्यात् द्वे अप्यग्न्याधेयदेवते स्त एव, तयोरेव देवतात्वं माभूदिति पुनर्ग्रहणाच्च बह्वीनां देवतात्वम् । आज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोतीति किमर्थमिदमुच्यते।आघारादीनाञ्चतुर्दशाज्याहुतीनां क्रम उक्तः, तत्राष्टाज्याहुतीनामवसरविधानार्थमाज्यभागग्रहणम् । अष्टग्रहणञ्च मन्त्रप्रतीकसंशयव्युदासार्थम् । अष्टौ पुरस्तादाज्याहुतीर्जुहोत्यग्न्याधेयदेवताहोमस्य । **एवमुपरिष्टात्स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा जुहोति स्विष्टकृते चायास्यग्नेरिति**–स्थालीपाकस्येत्यवयवलक्षणा षष्ठी । अग्न्याधेयदेवताभ्यो हुत्वा एवमुपरिष्टादष्टावेव आज्याहुतीर्जुहोति । हाविरन्तरे सति प्राङ्महाव्याहृतिभ्यः स्विष्टकृद्धोमो विहितः तस्मै हुत्वा,चशब्दादाज्याहुतिं जुहोति। अयास्याग्नेरित्यनेन मन्त्रेण । **बर्हिर्हुत्वा प्राश्नाति** । बर्हिर्होमश्चात्रैव विधानसामर्थ्यादिहैव वचनान्नान्यत्र ।**ततो ब्राह्मणभोजनम्**–एकद्विबहुषु समासस्य तुल्यत्वादेकस्मिन्नपि चार्थस्य कृतत्वादेकस्यैव भोजनमिति ॥ २ ॥

जय०–गृह्यस्थालीपाकानां कर्म प्रक्रान्तम् अतो गृह्यस्यैवार्थमिदमाह–**आवसथ्याधानमिति**–आवसथ्यो गृह्यः शालाग्निरिति पर्यायाः । तस्याधानं स्थापनम् आत्मसात्करणमिति यावत् । तत्कदाभवतीत्यपेक्षायामाह–**दारकाल इति**–दारशब्देन पाणिग्रहणादिसंस्कारसंस्कृतं स्त्रीद्रव्यमभिधीयते, तस्याहरणकालो दारकालः तत्र।केचित्तु पाणिग्रहणात्प्रागिच्छन्ति । गृह्यकारान्तरवचनात् । एवं हि तेनोक्तम्–“जायायाः पाणिं जिघृक्षन्नादधीत”इति ।तत्पुनर्नातीव युक्तरूपम् । यतस्तदाऽसंस्कृतमेव स्त्रीद्रव्यं न चासंस्कृतं

तत्सहायतां प्रतिपद्यते,ससहायस्य च कर्मस्वधिकारः,उभयस्वामिकं हि दम्पत्योर्द्रव्यं नैकः शक्नोति परित्यक्तुम्। पत्न्यपि तेन विनाऽनधिकृतैव,तस्मात्ससहायस्याधिकारः।तथाच लिङ्गम्–"असर्वो हि तावद्भवति यावज्जायान्न विन्दते" अतः संस्काराभिनिर्वृत्त्युत्तरकालं दारकालः।अपि च स्मरन्ति तमेव दारकालं प्रकृत्य"धर्मे चार्थे च कामे च नातिचरितव्यम्"इति। पूर्वं च क्रियमाणे आधाने एकेनैवाग्निराहितो भवति तथासत्यतिचारः स्यात्,तस्माच्चतुर्थ्युत्तरकालमेव दारकाल इति सम्प्रदायः । यत्पुनरुक्तम्–"वैवाहिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि। पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं गृही" इति, तद्विवाहसमनन्तरं क्रियमाणोऽसौ वैवाहिक एव। **दायाद्यकाल एकेषाम्**–केषाञ्चिदाचार्याणां मते दायाद्यकाले तत्कर्तव्यम्। दायाद्यकालश्च भ्रातॄणां धनविभागकालः । तस्मिन्हि काले स्वेन द्रव्येण कर्मानुष्ठानसमर्थो भवति, साधारणद्रव्यस्य हि परित्यागासामर्थ्यादनधिकार एव, अतोऽयं व्यवस्थितविकल्पः, अभ्रातृकस्य दारकाले भ्रातृमतो दायाद्यकाल इति। **वैश्यस्येति**–हुतोच्छिष्टोऽग्निर्गृह्यते असंस्कृतो वा अविरोधात् । अरणिप्रदानमिति प्रशब्द उपशब्दार्थे अरण्युपादानकर्मेके आचार्या इच्छन्ति। एके वैश्यस्य कुलादित्युभयोर्विकल्पेन स्मरणम् । **तत्र चातुष्प्राश्यपचनवदिति**–वतिना वैश्यकुलाम्बरीषमहानसरूपयोनित्रये निर्दिष्टे वैश्यस्येति ग्रहणं योन्यन्तरव्युदासार्थम् । वैश्यकुलग्रहणाच्च नान्यथा प्रक्लृप्तिः। अतएवोभयोरेव विकल्पेन स्मरणमुक्तम्। तत्र चातुष्प्राश्यपचनवत्सर्वङ्कर्म कर्तव्यम्। चातुष्प्राश्यपचनं यत्र कर्मणि विद्यते तदिहापि सर्वम्भवति । तत्कुतः। **पञ्च महायज्ञा इति श्रुतेः**–पञ्चमहायज्ञा हि श्रुतौ पठ्यन्ते तत्साधनभूतश्चायमग्निः। श्रौतकर्मसाधनभूते चाग्नौ चातुष्प्राश्यपचनवतीतिकर्तव्यता दृष्टा, अयमपि श्रौतकर्मसाधनभूत एवेत्यभिप्रायः । तस्माच्चातुष्प्राश्यपचनवतीतिकर्तव्यताप्रवृत्तिरत्रापि । अपिचाधाने सेतिकर्तव्यता दृष्टा इदमप्याधानमेव। एवं हि श्रूयते एतदेव प्रकृत्य "अथैनं वयन्त्वेव धास्यामः" इति। तेनाधानसामान्यादिहापि प्रवर्तत एवेति। एवं स्थित उच्यते,एके आचार्या नेच्छन्त्यत्र चातुष्प्राश्यपचनवतीतिकर्तव्यताम्। यत उपदेशेन धर्मः प्रवर्तते अतिदेशेन वा ॥ न चात्रोपदेशो नातिदेशस्तस्मान्नैव प्रवर्तते । कथन्तर्हीदमुक्तम्, यस्य नाम श्रौतकर्मसाधनभावेन आधानसामान्याद्वा प्रवृत्तिबुद्धिस्तां निवर्तयितुमित्यदोषः । गृह्यकारान्तरैरप्यनयैव भ्रान्त्येयमितिकर्तव्यतोपदिष्टा, तन्निराकर्तुमिह पूर्वपक्ष उपन्यस्तः । **अग्न्याधेयदेवताभ्य इति**–वक्तुमशक्यम्। वक्ष्यत्यग्न्याधेयदेवताभ्यो हुत्वा जुहोतीति तर्हि किमर्थमुक्तम्, बहुत्वविशिष्टानामत्र देवतात्वं यथा स्यादिति॥ किञ्च स्यात्, द्वे अप्यग्न्याधेयदेवते स्त एव,तयोरेव देवतात्वम्माभूदिति पुनर्ग्रहणाद्बह्वीनामेव देवतात्वम्। **श्रपयित्वेति**–श्रपणोपदेशान्न शृतासादनम्। **आज्यभागाविष्ट्वेति**–किमर्थमुक्तम् । उच्यते, आघारादीनाञ्चतुर्दशाज्याहुतीनाङ्क्रम उक्तः । तत्रेहाष्टानामनिर्दिष्टावसराणामवसरविधानार्थम्। अथ शाखान्तरीयमन्त्रव्याख्यानमारभते स्वशाखीयमन्त्राणामुव्वटाचार्यादिभिर्व्याख्यातत्वात् । ऋष्यादि तु सर्वेषामुच्यते तज्ज्ञानस्यौदयिकत्वात् । तत्र **त्वन्नः,सत्वन्न इति द्वे**–वामदेवदृष्टे त्रिष्टुभौ अग्नीवारुण्यौ त्रिपशौ । **इमं मे तत्त्वायामीति द्वे**–शुनःशेपदृष्टे, प्रथमा गायत्री द्वितीया त्रिष्टुबुभे वारुण्यौ त्रिपशौ । "ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो अद्य सवितोतविष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः।" अस्यार्थः–तत्र वामदेवऋषिस्त्रिष्टुप् लिङ्गोक्ता देवता सर्वप्रायश्चित्ते । हे वरुण ते तव ये शतं बहुसंख्याताः, ये च सहस्रम् असंख्याताः पाशाः पापानि बन्धनहेतुत्वात्। किम्भूताः यज्ञियाः यज्ञप्रत्यूहोत्पन्नाः वितताः सर्वत्र विस्तृताः महान्तः अपरिहार्याः तेभिः तैः पाशितान्नोऽस्मान् अद्य अस्मिन्नेव अहनि सवित्रादयो देवा मुञ्चन्तु मोचयन्तु । अकरणायथाकरणान्यथाकरणप्रत्यवायाभिभूतान्पुनन्त्वित्यर्थः ॥ उत अप्यर्थः । किम्भूताः स्वर्काः स्वञ्चनाः सर्वगाः सर्वपूज्या वेत्यर्थः । "अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि । अया नो यज्ञं वहास्ययानो

धेहि भेषजम् ॥" अस्यार्थः—तत्र वामदेवस्त्रिष्टुप् अग्निः प्रायश्चित्तहोमे ॥ हे अग्ने त्वम् अयाः न यातीत्ययाः या प्रापणे सर्वत्र बाह्याभ्यन्तरावस्थितः असि भवसि । किम्भूतः अनभिशस्तिपाः न विद्यते अभिशस्तिरभिशापो येषान्ते अनभिशस्तयः तान्पाति आत्मसात्करोति शोधयतीति यावत् प्रायश्चित्तानुष्ठानेन कर्मानुष्ठानपरिपालक इत्यर्थः । किञ्च हे अग्ने यस्त्वम् अयाः शुभावहो विधिरसि तत्सत्यमित् सत्यमेव इत् एवार्थे दीर्घश्छान्दसः यस्माद्धे अयाः नोऽस्माकम् अयाः सुमनाः स्वाश्रयो वा भूत्वा यज्ञं वहासि वहसि, यद्वा यज्ञं यज्ञसम्पादनञ्चरुपुरोडाशादिवस्तुजातं कृपालुत्वेन देवेभ्यः सम्पादयसि तस्मान्नोऽस्मभ्यम्भेषजं सुखजननन्दुःखध्वंसनरूपमपूर्वन्धेहि देहीति प्रार्थना । बिभ्यत्यस्मादिति भेषस्तं जयतीति भेषजम् । चकारावुत्कर्षसूचनार्थौ । **उदुत्तममिति०** शुनःशेप० त्रिष्टुप्०वारुणी० पाशोन्मोके० । **भवतन्नः**—प्रजापतिः पङ्क्तिर्जातवेदसावग्निप्रासने । अष्टाविति मन्त्रप्रतीकसंशयव्युदासार्थम् । **पुरस्तादिति, अग्न्याधेयदेवता**होमस्य । ताश्चाग्निपवमानाग्निपावकाग्निशुचयो दितिश्चेति । एवमुपरिष्टात्तस्यैवाष्टावाज्याहुतीस्तथैव जुहोति । **स्विष्टकृते चेति**—हविरन्तरे प्राङ् महाव्याहृतिभ्यः स्विष्टकृद्धोमो विहितः तस्मै च हुत्वा चकारादाज्याहुतिञ्जुहोति **अयास्यग्नेरिति** मन्त्रेण । अस्यार्थः । तत्र गौतमो गायत्री गातुविदो देवा देवता आज्यहोमे । हे गातुविदो यज्ञवेत्तारो देवा अग्नेः सम्बन्धि यद्वषट्कृतं हुतं यत् येन कर्मणा यजनविधिना कृत्वा अहमत्यरीरिचम् अधिकृतवानस्मि । तेन कर्मणा प्रसन्नानाम्भवतां प्रसादात्तद्यासि अनश्वरमव्याहतमस्तु । बर्हिर्होमश्चात्र विधानसामर्थ्यादिहैव स्यान्नान्यत्र । **ब्राह्मणभोजनम्**—इत्येकद्विबहुषु समासस्य तुल्यत्वादेकस्मिन्नपि भोजिते चार्थस्य कृतत्वादेकस्यैव भोजनमिति ॥ २ ॥

हरि०—**आवसथ्याधानन्दारकाले**—आवसथ्याग्निना साध्यानि कर्माणि व्याख्यातुं प्रतिज्ञातानि प्रथमसूत्रे सूत्रकृता **पारस्करेण** यतोऽतस्तस्याधानविधिं व्याख्यातुमुपक्रमते । आवसथ्यस्य गृह्यस्य अग्नेराधानमावसथ्याधानम् तद्दारकाले विवाहकाले चतुर्थीकर्मानन्तरं कुर्यात्, प्राक्चतुर्थीकर्मणः पत्न्या भार्यात्वस्यानुपपत्तेः । सभार्यस्य च आधानेऽधिकारः । वैवाहिकोऽग्निरेवौपासनाग्निरित्याश्वलायनादीनाम्पक्षः । ते हि विवाहहोममेव दाराग्न्योः संस्कारकम्मन्यन्ते । अस्माकन्तु आवसथ्याधानन्दारकाल इत्यारभ्याग्निसंस्कारस्य पारस्कराचार्येण पृथगभिधानात् तत्संस्कारसंस्कृतोऽग्निरौपासनः । **दायाद्यकाल एकेषाम्**—एकेषामाचार्याणाम्मते दायाद्यकाले भ्रातॄणाम् पितृधनविभागकाले । अविभक्ते हि पित्र्ये धने सर्वेषाम्भ्रातॄणां स्वत्वस्य साधारणत्वेन विनियोगानर्हत्वात् धनविनियोगसाध्यं हि आवसथ्यादिकर्मानुष्ठानम् । अतो भ्रातृमतां विभक्तानामाधानेऽधिकार इति तेषामभिप्रायः । अभ्रातृकस्य दारकाले एवं व्यवस्थितो विकल्पः । एवंकृतविवाहस्य विभक्तधनस्य च आधाने अधिकारमभिधाय इदानीमाहरणपक्षे आधानमाह—**वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य चातुष्प्राश्यपचनवत्सर्वम्**-तत्रावसथ्याधानङ्करिष्यन् उक्तकालातिक्रमाभावे ज्योतिःशास्त्रे अग्न्याधानार्थोपदिष्टमासतिथिनक्षत्रवारादिके काले प्रातः सुस्नातः सुप्रक्षालितपाणिपादः स्वाचान्तः सपत्नीकः गोमयोपलिप्ते शुचौ देशे स्वासने उपविश्य अद्येहेत्यादिदेशकालौ स्मृत्वा आवसथ्याग्निमहमाधास्य इति सङ्कल्पं विधाय मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं यथोक्तं कुर्यात् । कालातिक्रमे तु "यावन्त्यब्दान्यतीतानि निरग्नेर्विप्रजन्मनः । तावन्ति कृच्छ्राणि चरेद्धौम्यं दद्याद्यथाविधि" इति वचनात् अतिक्रान्तसंवत्सरसङ्ख्यया प्राजापत्यरूपम्प्रायश्चित्तम्मुख्यविधिना चरित्वा तदशक्तौ प्रतिप्राजापत्यङ्गान्दत्त्वा तदलाभे तन्मूल्यं निष्कमेकमर्द्धन्तदर्द्धं वा द्वादशब्राह्मणभोजनमयुतगायत्रीजपं वा गायत्र्या तिलाज्यसहस्रहोमं वा शक्त्यपेक्षयाऽन्यतमं विधाय हौम्यं सायम्प्रातर्होमद्रव्यं प्रत्यहमाहुतिचतुष्टयपर्याप्तमतिक्रान्तदिवसान्गणयित्वा ब्राह्मणेभ्यो दद्यात् । तत्रावसथ्यप्रशंसावाक्यं गृह्यकाण्डे—" नावसथ्यात्परो धर्मो नावसथ्यात्परन्तपः । नावसथ्या[illegible]द् नावसथ्यात्परन्धनम् ॥

नावसथ्यात्परं श्रेयो नावसथ्यात्परं यशः । नावसथ्यात्परा सिद्धिर्नावसथ्यात्परा गतिः॥ नावसथ्यात्परं स्थानं नावसथ्यात्परं व्रतम् '' इत्यावश्यकत्वान्नित्यम् । तस्मादकरणे प्रत्यवायात् तत्क्षयार्थं प्रायश्चित्तमुचितम् । तत्र वाक्यम् । आवसथ्याधानमुख्यकालातिक्रान्तैतावद्वर्षनिरग्नित्वजानितदुरितक्षयाय एतावन्ति प्राजापत्यव्रतानि चरिष्ये । तदशक्तौ प्राजापत्यप्रत्याम्नायत्वेन प्रतिप्राजापत्यमेकैकां गां ब्राह्मणेभ्योऽहं सम्प्रददे । एवमन्येषु गोमूल्यदाननिष्कतदर्द्धार्द्धद्वादशब्राह्मणभोजनायुतगायत्रीजपगायत्र्या तिलाहुतिसहस्ररूपेषु वाक्यमूहनीयम् । ततः स्वशाखाध्यायिनं कर्मसु तत्त्वज्ञं ब्राह्मणं गन्धपुष्पमाल्यवस्त्रालङ्कारादिभिरभ्यर्च्यामुकगोत्रममुकशर्माणममुकवेदममुकशाखाध्यायिनमावसथ्याधानं करिष्यन्कृताकृतावेक्षकत्वेन ब्रह्माणमेभिश्चन्दनपुष्पाक्षतवस्त्रालङ्कारैस्त्वामहं वृणे, वृतोऽस्मीति तेन वाच्यम्। केचिद्ब्रह्माणं मधुपर्केणार्चयन्ति, ऋत्विक्त्वाविशेषात्। ततः पत्न्या सहाहते वाससी परिधाय अग्न्याधानदेशे स्थण्डिलमुपलिप्य पञ्च भूसंस्कारान्कृत्वा तन्देशमहतवाससा पिधाय ब्रह्मणा सह समृदं स्थालीमादाय ब्राह्मणैः परिवृतो वेदघोषमङ्गलगीतवाद्यादिभिर्जनितोत्साहो वैश्यस्य तृतीयवर्णस्य बहुपशोः पशुभिः समृद्धस्य तदलाभे गोभिलादिसूत्रवचनात् भ्राष्ट्रगृहात् अम्बरीषाद्बहुयाजिनो ब्राह्मणस्य गृहात् वा बह्वन्नपाकात् ब्राह्मणस्य महानसाद्वा स्थाल्यामग्निं गृहीत्वा तथैव गृहमागत्य परिसमूहनादिपञ्चभूसंस्कारसंस्कृते स्थण्डिले प्राङ्मुख उपविश्यात्माभिमुखमग्निं निदध्यात् । ततो ब्रह्मोपवेशनादि ब्राह्मणभोजनान्तं वक्ष्यमाणं कर्म कुर्यात्। चातुष्प्राश्यपचनवत्सर्वमिति सूत्रकृता पूर्वपक्ष उपन्यस्तो न तु सम्मत इति कर्कोपाध्यायो भाष्ये निरूपितवान् । अधुनाऽऽरणेयपक्षमाह—**अरणिप्रदानमेके**—(एके आचार्याः अरणिप्रदानं प्रशब्द उपशब्दस्यार्थे अरणिप्रदानमुपादानं कारणम् उत्पत्तिस्थानं यस्याग्नेः सोऽरणिप्रदानस्तमरणिप्रदानमग्निमादधीतेति मन्यन्ते) **पञ्चमहायज्ञा इति श्रुतेः**—पञ्चमहायज्ञानां श्रौतत्वात् आरणेयेऽग्नावनुष्ठानं युक्तमित्याभिप्रायः । ततो ब्रह्मोपवेशनादि आज्यभागान्तं कर्म कृत्वा । **अग्न्याधेयदेवताभ्यः—स्थलीपाकँ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति त्वन्नो अग्ने सत्वन्नो अग्न इमम्मे वरुण तत्त्वायामि ये ते शतमयाश्चाग्न उदुत्तमम्भवतन्न इत्यष्टौ**—अग्न्याधेयस्य श्रौतस्य देवताः अग्निः पवमानोऽग्निः पावकोऽग्निः शुचिरादितिश्च अग्न्याधेयदेवताः ताभ्यः स्थालीपाकं चरुं श्रपयित्वा यथाविधि पक्त्वा आज्यभागौ आग्नेयसौम्यौ आघारपूर्वकौ हुत्वा आज्येन आहुतयो होतव्याः .आज्याहुतयस्ता आज्याहुतीर्जुहोति । त्वन्नो अग्न इत्यादिभिर्भवतन्न इत्यष्टौ ताभिरष्टभिर्ऋग्भिः प्रत्यृचमष्टौ । ननु "अग्न्याधेयदेवताभ्यो हुत्वा जुहोति" इति वक्ष्याति तत्किमर्थमत्राग्न्याधेयदेवताभ्य इत्युक्तम् । बह्वीनां देवतानां देवतात्वज्ञापनायेति चेत् ननु बहुत्वमस्त्येव कुत इयं शङ्का पवमानादिविशेषणविशिष्टस्याग्नेरेकत्वात् । अग्नेरेका अदितिर्द्वितीयेति द्वे एवाग्न्याधेयदेवते इति द्वयोरेव देवतात्वं माभूदिति पुनर्ग्रहणात् बह्वीनामेव देवतात्वं विशिष्टस्य देवतान्तरत्वमिति इन्द्रमहेन्द्राधिकरणे जैमिनीयैर्निर्णीतत्वात्। "आज्यभागाविष्ट्वेति" किमर्थम्पुनर्वचनम् आघारादीनां चतुर्दशानां क्रमेण पठिष्यमाणत्वात् । उच्यते । आज्याहुतीनां किं स्थानमिति संशये आज्याहुतिस्थानविधानार्थम्।अष्टग्रहणं तु मन्त्रप्रतीकसंशयानिवृत्त्यर्थम्। **पुरस्तादेवमुपरिष्टात्स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा जुहोति**—पुरस्तात् पूर्वं कस्य अग्न्याधेयदेवताहोमस्याष्टौ जुहोति यथा । **एवमुपरिष्टात्**—एवं तथा त्वन्नो अग्न इत्यादिना क्रमेण उपरिष्टादूर्ध्वं जुहोत्यष्टौ किं कृत्वा हुत्वा काभ्यः अग्न्याधेयदेवताभ्यः पूर्वोक्ताभ्यः कस्य स्थालीपाकस्य चरोः स्थालीपाकस्येत्यवयवलक्षणा षष्ठी। **स्विष्टकृते**—स्विष्टकृते चाग्नयेऽष्टर्चहोमान्ते स्थालीपाकस्य हुत्वा च शब्दात् **अयास्यग्नेर्वषट्कृतं यत्कर्मणात्यरीरिचं देवागातु विद इति**—अयास्यग्नेर्वषट्कृतमित्यनेन मन्त्रेणाज्याहुतिं जुहोति । ननु स्विष्टकृते इति किमर्थमुक्तम्, प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविरिति वक्ष्यमाणत्वात् अत्र चान्यस्य हविषः सद्भावात् प्राङ्महाव्याहृतिभ्यः प्राप्तस्य स्विष्टकृद्धोमस्य अयास्यग्नेरिति आज्याहुतेर्महाव्याहृतिभ्यः पूर्वं प्राप्त्यर्थम । **बर्हिर्हुत्वा प्राश्नाति**—बर्हिः परिस्तरणार्थम् । अग्नौ प्रक्षिप्य प्राश्नाति भक्षयति । अत्र प्राशनोपदेशसामर्थ्यात् प्राश्यमाकाङ्क्षितम्, तत्किं हुतशेषः अन्यद्वा किञ्चिदु-

च्यते। 'पाकयज्ञेष्ववत्तस्यासर्वहोमो हुत्वा शेषप्राशनम्' इति कात्यायनोक्तेः। स्रुवेणावत्तस्य होमद्रव्यस्य सर्वस्य होमनिषेधात् हुतशेषस्य च प्राशनविधानात्सर्वासामाहुतीनां होमद्रव्यं स्रुवेऽवशेषितं संस्रवत्वेन प्रसिद्धं पात्रान्तरे प्रक्षिप्यते तत्प्राश्यमिति। ननु अकृते वैश्वदेवे त्वित्यादिवचनाद्वैश्वदेवात्प्राक् स्थालीपाकानुष्ठानं प्राप्तं तत्र च संस्रवप्राशनं विहितं तत्कृत्वा कथं माध्याह्निके वैश्वदेवादिकर्मण्यधिकार इति चेत् उच्यते—शेषप्राशनस्य कर्माङ्गत्वेन विधानात् अप्राशने च कर्मणो वैगुण्यात् नोत्तरकर्माधिकारनिवृत्तिः। बर्हिर्होमश्च विधानसामर्थ्यादग्न्याधान एव भवति नान्येषु कर्मसु। **ततो ब्राह्मणभोजनम्**- ततः समाप्ते कर्मणि ब्राह्मणभोजनं दद्यात्। ब्राह्मणभोजनमित्यत्र एकस्मै द्वाभ्यां बहुभ्यो वा भोजनं ब्राह्मणभोजनमिति समासस्य तुल्यत्वात् एकस्मिन्नपि ब्राह्मणे भोजिते अर्थस्यानुष्ठितत्वात् एकस्यैव भोजनमिति युक्तम्। इति सूत्रार्थः॥

अथ पद्धतिः—तत्रावसथ्याधानङ्करिष्यन् उक्तकालातिक्रमाभावे अग्न्याधानार्थोपदिष्टमासतिथि-
वारनक्षत्रादिके काले प्रातः सुस्नातः सुप्रक्षालितपाणिपादः स्वाचान्तः सपत्नीको गोमयोपलिप्ते शुचौ
देशे स्वासन उपविश्य अद्येहेत्यादिदेशकालौ स्मृत्वा आवसथ्याग्निमहमाधास्ये इति सङ्कल्पं विधाय
मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं यथोक्तं कुर्यात्। कालातिक्रमे तु—"यावन्त्यब्दान्यतीतानि निरग्नेर्विप्र-
जन्मनः। तावन्ति कृच्छ्राणि चरेद्धौम्यं दद्याद्यथाविधि"। इति वचनादतिक्रान्तसंवत्सरसङ्ख्यप्राजापत्य-
रूपं प्रायश्चित्तं मुख्यविधिना चरित्वा तदशक्तौ प्रतिप्राजापत्यं गां दत्त्वा तदलाभे तन्मूल्यं निष्कमेक-
मर्द्धं तदर्द्धं वा द्वादशब्राह्मणभोजनं वा अयुतगायत्रीजपं वा गायत्र्या तिलाज्यसहस्रहोमं वा शक्त्य-
पेक्षयाऽन्यतमं विधाय हौम्यं सायम्प्रातर्होमद्रव्यं प्रत्यहमाहुतिचतुष्टयपर्याप्तमतिक्रान्तदिवसान्गणयित्वा
ब्राह्मणेभ्यो दद्यात्। अथ वाक्यम्।आवसथ्याधानमुख्यकालातिक्रान्तैतावद्वर्षनिरग्नित्वजनितदुरितक्षयाय
एतावन्ति प्राजापत्यव्रतानि चरिष्ये। तदशक्तौ प्राजापत्यप्रत्याम्नायत्वेन प्रतिप्राजापत्यव्रतानि चरिष्ये।
तदशक्तौ प्राजापत्यप्रत्याम्नायत्वेन प्रतिप्राजापत्यमेकैकां गां ब्राह्मणेभ्योऽहं सम्प्रददे।एवमन्येष्वपि वाक्ये-
पूहनीयम्। तद्यथा—आवसथ्याधानमुख्यकालातिक्रान्तैतावद्वर्षनिरग्नित्वजनितदुरितक्षयाय प्राजापत्यप्रात्या
म्नायत्वेन प्रतिप्राजापत्यमेतावतीनां गवां मूल्यमिदमेतावत्सुवर्णं ब्राह्मणेभ्योऽहं सम्प्रददे। तद्वत्प्राजापत्य-
प्रत्याम्नायत्वेनैतावतो ब्राह्मणान्भोजयिष्ये। आवसथ्याधानमुख्यकालातिक्रान्तैतावद्वर्षनिरग्नित्वजनित-
दुरितक्षयाय एतावत्प्राजाप्रत्यप्रत्याम्नायत्वेन गायत्र्या एतावन्त्ययुतानि जपिष्ये। तद्वदेतावन्ति तिला-
हुतिसहस्राणि होष्यामीति। एवं कृतप्रायश्चित्तो होमद्रव्यं दद्यात्। तद्यथा—आवसथ्याधानमुख्यकालाति-
क्रान्तैतावद्दिनसंबन्धि सायम्प्रातर्होमद्रव्यमेतावत्परिमाणं दधितण्डुलयवानामन्यतमं ब्राह्मणेभ्योऽहं
सम्प्रददे। 'तन्मूल्यं द्रव्यमेतावत्परिमाणं वा हौम्यं दद्यात्' इति वचनात् इतरपक्षाद्यादिकर्मद्रव्यदाननिवृत्तिः
छन्दीपस्सरणम् इषेत्वादि खं ब्रह्मान्तम्। ततः स्वशाखाध्यायिनं कर्मसु तत्त्वज्ञं ब्राह्मणं गन्धपुष्पमाल्य-
वस्त्रालङ्कारादिभिरभ्यर्च्य अमुकगोत्रममुकशर्माणममुकवेदममुकशाखाध्यायिनमावसथ्याधानं कारि-
ष्यन्कृताकृतावेक्षकत्वेन ब्रह्माणमेभिश्चन्दनपुष्पाक्षतवस्त्रालङ्कारैस्त्वामहं वृणे। वृतोऽस्मीति तेन वाच्यम्।
केचित् ब्रह्माणं मधुपर्केणार्चयन्ति ऋत्विक्त्वाविशेषात्। ततः पत्न्या सहाहते वाससी परिधाय अग्न्या-
धानदेशे स्थण्डिलमुपलिप्य पञ्चभूसंस्कारान्कृत्वा तं देशं वस्त्रेण पिधाय ब्रह्मणा सह समृदं स्थाली-
मादाय ब्राह्मणैः परिवृतो वेदघोषमङ्गलगीतवाद्यादिभिर्जनितोत्साहो वैश्यस्य बहुपशोर्गृहात्सूत्रान्तरमतेन
अम्बरीषाद्बहुयाजिनो ब्राह्मणस्य गृहाद्वा बह्वन्नपाकाद् ब्राह्मणमहानसाद्वा स्थाल्यामग्निं गृहीत्वा तथैव
गृहमागत्य परिसमूहनादिपञ्चभूसंस्कारसंस्कृते स्थण्डिले प्राङ्मुख उपविश्य आत्माभिमुखमग्निन्निदध्यात्
इत्याहरणपक्षे। आरणेयपक्षे तु गृह्याग्न्याधानजातेच्छो यजमानः पुण्येऽहनि "अश्वत्थो यः शमीगर्भः
प्रशस्तोर्वीसमुद्भवः। तस्य या प्राङ्मुखी शाखा उदीची चोर्ध्वगापि वा॥ १॥ अरणिस्तन्मयी ज्ञेया
तन्मध्ये चोत्तरारणिः। सारवद्दारवञ्चात्र सौविली च प्रशस्यते॥२॥ संसक्तमूलो यः शम्याः स शमीगर्भ
उच्यते। अलाभे त्वशमीगर्भादाहरेदविलम्बितः॥ ३॥ (आहरेत् [illegible]र्भाद्धरेदवाविलम्बितः॥) चतु-

विंशाङ्गुला दीर्घा विस्तारेण षडङ्गुला । चतुरङ्गुलमुत्सेधा अरणिर्याज्ञिकैः स्मृता ॥४॥ मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलम् । अन्तरं देवयोनिः स्यात्तत्र मथ्यो हुताशनः ॥५॥ मूर्द्धाक्षिकर्णवक्त्राणि कन्धरा चापि पञ्चमी।अङ्गुष्ठमात्राण्येतानि द्व्यङ्गुष्ठं वक्ष उच्यते ॥६॥ अङ्गुष्ठमात्रं हृदयं त्र्यङ्गुष्ठमुदरं तथा । एकाङ्गुष्ठा कटिर्ज्ञेया द्वौ वस्तिर्द्वौ च गुह्यकम् ॥ ७ ॥ ऊरू जङ्घे च पादौ च चतुस्त्र्येकैर्यथाक्रमम् । अरण्यवयवा ह्येते याज्ञिकैः परिकीर्त्तिताः ॥ ८ ॥ यत्तद्गुह्यमिति प्रोक्तं देवयोनिः स उच्यते । तस्यां यो जायते वह्निः स कल्याणकृदुच्यते ॥ ९ ॥ प्रथमे मन्थने ह्येष नियमो नोत्तरेषु च । अष्टाङ्गुलः प्रमन्थः स्याच्चात्रं स्याद्द्वादशाङ्गुलम् ॥ १० ॥ ओविली द्वादशैव स्यादेतन्मन्थनयन्त्रकम् । गोवालैः शणसम्मिश्रैस्त्रिवृद्वृत्तमनंशुकम् ॥ ११ ॥ व्यामप्रमाणं नेत्रं स्यात्तेन मथ्यो हुताशनः । चात्रबुध्ने प्रमन्थाग्रं गाढं कृत्वा विचक्षणः ॥१२॥" इत्युक्तलक्षणमरण्यादिकं सम्पाद्य उक्तकाले माघादिपञ्चमासानामन्यतमे मासे कृत्तिकारोहिणीमृगशिरःफल्गुनीद्वयहस्तानामृक्षाणामन्यतमर्क्षान्वितायां शुभतिथौ चन्द्रशुद्धौ गृह्याग्निमादधीत । मुख्यकालातिक्रमे तु एतावान्विशेषः । उक्तविधिना कृतप्रायश्चित्तो दत्तहौम्यद्रव्यः स्नानादिपूर्वकं सङ्कल्पादिमातृपूजाभ्युदयिकश्राद्धब्रह्मवरणाहतवासःपरिधानादि कृत्वा शालायां यजमान उपविशति। तस्य दक्षिणाङ्गे पत्नी ।अथ ब्रह्मा अरणी आदाय अधरारणिं पत्न्यै उत्तरारणिं यजमानाय दद्यात् । तौ चावसथ्याग्निसाधनभूते इमे अरणी आवाभ्यां परिगृहीते तत्रेयमधरा इयमुत्तरा इदं चात्रम् इयमोविली इमानि स्रुवादीनि पात्राणि परिगृहीतानि; इति परिगृह्णीतः । ततोऽग्न्याधानदेशे शङ्कुं द्वादशाङ्गुलं खादिरं चतुरङ्गुलमस्तकं निखाय तत्र रज्जुपाशं क्षिप्त्वा आमुच्य सार्द्धत्रयोदशाङ्गुलरज्जुं शङ्क्वन्तराले संवेष्ट्य प्रदक्षिणपरिभ्रामणेन परिलिख्य तत्र परिसमूहनादिपञ्चभूसंस्कारान्कृत्वा आच्छाद्य मन्थनमारभेत । तद्यथा प्राग्ग्रीवमुत्तरलोमकृष्णाजिनमास्तीर्य तत्रोदगग्रामधरारणिं निधाय तत्पूर्वत उत्तरारणिं च अधरारण्याम् उक्तलक्षणमन्थनप्रदेशे प्रमन्थमूलं निधाय चात्राग्रे चोविलीमुदगग्रां च नेत्रेण चात्रं त्रिर्वेष्टयित्वा गाढं धृत्वा पश्चिमाभिमुखोपविष्टया पत्न्या मन्थयेत् यावदग्नेरुत्पत्तिः । पत्न्या मन्थनासामर्थ्ये अन्ये ब्राह्मणाः शुचयो मन्थयन्ति।एवं यजमानासामर्थ्ये अन्यो यन्त्रन्धारयति । ततो जातमग्निं मृन्मये पात्रे शुष्कगोमयपिण्डचूर्णोपरि निहिततूले सपुरीषं परिक्षिप्य सन्धुक्ष्य प्रज्वाल्य पूर्वसंस्कृते देशे आदध्यात् । तत्र ब्रह्मोपवेशनादि देवताभिधानपर्युक्षणान्तं कृत्वा स्रुवमादाय दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धः प्रजापतये स्वाहेति मनसा ध्यायन् प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाघारमाघारयाति इदं प्रजापयय इति त्यागं कृत्वा हुतशेषं पात्रान्तरे प्रक्षिपेत्। तथैवेन्द्राय स्वाहेति अग्नेर्दक्षिणप्रदेशे उत्तराघारमिदमिन्द्रायेति त्यागं विधाय अग्नये स्वाहेति अग्नेरुत्तरार्द्धपूर्वार्द्धे आग्नेयमाज्यभागं हुत्वा इदमग्नय इति द्रव्यं त्यक्त्वा तथैव सोमाय स्वाहेति दक्षिणार्द्धपूर्वार्द्धे सौम्यमाज्यभागं हुत्वा इदं सोमायेति स्वत्वं त्यजेत्। समिद्धतमे वाग्निप्रदेशे आघाराद्याः सर्वाहुतीर्जुहुयात्। अथाष्टर्चहोमः। नान्वारम्भः।"त्वन्नो अग्ने,सत्वन्नो अग्ने,इमम्मेवरुण,तत्त्वायामि,येते शतम्,अयाश्चाग्ने,उदुत्तमं,भवतन्नः" इत्येताभिरष्टभिर्ऋग्भिः प्रत्यृचमेकैकामष्टाज्याहुतीर्हुत्वा यथादैवतं स्वत्वत्यागं च कृत्वा स्थालीपाकस्य जुहुयात् । तद्यथा–त्वन्नो अग्न इति वामदेव ऋषिः त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः। सत्वमिति पूर्ववत्। इमम्म इति शुनःशेफ ऋषिः गायत्रीछन्दः वरुणो देवता। तत्त्वायामीति शुनःशेफ ऋषिः त्रिष्टुप्छन्दः वरुणो देवता । ये ते शतमिति शुनःशेफ ऋषिः जगतीछन्दः वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवताः प्रायश्चित्तहोमे विनियोगः । अयाश्चाग्न इति प्रजापतिर्ऋषिः विराट् छन्दः अग्निर्देवता प्रायाश्चित्तहोमे विनियोगः । उदुत्तममिति शुनःशेफ ऋषिः त्रिष्टुप् छन्दः वरुणो देवता विष्णुक्रमेषु पाशोन्मोचने विनियोगः । भवतन्न इति मन्त्रस्य प्रजापतिर्ऋषिः पङ्क्तिछन्दः जातवेदसौ देवते अग्निप्रासने विनियोगः। त्वन्नो अग्न इत्यादि प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां न मम ।सत्वन्नो अग्ने०सुहवोन एधि स्वाहा इदमग्नीवरुणाभ्याम् न०।इमम्मे वरुण०चके स्वाहा इदं वरुणाय न०।तत्त्वायामि० प्रमोषीः स्वाहा इदं वरुणाय न० । ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नोऽद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो

देवेभ्यो मरुद्भ्यः स्वर्केभ्यः, केचिदिदं वरुणायेति । अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्त्वमयाअसि । अयानो यज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा इदमग्नये अयसे । उदुत्तमं० अदितये स्याम स्वाहा इदं वरुणाय० । भवतन्नः० शिवौ भवतमद्य नः स्वाहा इदं जातवेदोभ्याम्, केचिदिदमग्निभ्यामिति । अथ स्थालीपाकेन चतस्रोऽग्न्याधेयदेवताः । अग्नये पवमानाय स्वाहा इदमग्नये पवमानाय० । अग्नये पावकाय स्वाहा इदमग्नये पावकाय० । अग्नये शुचये स्वाहा इदमग्नये शुचये नमः । अदित्यै स्वाहा इदमदित्यै० । इत्यग्न्याधेयदेवताभ्यः । ततः पूर्ववदाज्येनाष्टर्चहोमः । ततो ब्रह्मान्वारब्ध उत्तरार्द्धात्स्रुवेण चरुमादाय अग्नये स्विष्टकृते स्वाहेति अग्नेरुत्तरार्द्धे जुहुयात् इदमग्नये स्विष्टकृते० । अथानन्वारब्ध आज्येन अयास्यग्नेर्वषट्कृतं यत्कर्मणात्यरीरिचं देवागातुविदः स्वाहा इदं देवेभ्यो गातुविद्भ्यः, इति स्वत्वं त्यक्त्वा । अथ ब्रह्मान्वारब्धः ॐ भूर्भुवः स्वरिति क्रमेण प्रजापतिर्ऋषिर्गायत्रीछन्दोऽग्निर्देवता प्रजापतिर्ऋषिरुष्णिक्छन्दो वायुर्देवता प्रजापतिर्ऋषिरनुष्टुप्छन्दः सूर्यो देवता व्याहृतिहोमे विनियोगः । ॐ भूः स्वाहा इदमग्नये । ॐ भुवः स्वाहा इदं वायवे । ॐ स्वः स्वाहा इदं सूर्याय । इदं भूर्वा इदं भुव इति वा इदं स्वरिति वा । "त्वन्नो अग्ने,सत्वन्नो अग्ने,अयाश्चाग्ने,यते शतं,उदुत्तमम्" पञ्च मन्त्राः प्रजापत्यन्ता नवाहुतीर्हुत्वा बर्हिर्होमञ्च कृत्वा संस्रवम्प्राश्याचम्य पवित्राभ्याम्मुखम्मार्जयित्वा पवित्रे अग्नौ प्रक्षिप्य प्रणीता अग्नेः पश्चिमतो निनीय आसादितपूर्णपात्रवरयोरन्यतरस्य ब्रह्मणे दक्षिणात्वेन दानं कृत्वा एकब्राह्मणभोजनदानम्।तथा स्मृत्यन्तरोक्तत्रयोविंशतिब्राह्मणभोजनम् । अत्र मार्जनम्, पवित्रप्रतिपत्तिः, बर्हिर्होमः,प्रणीताविमोक इत्येते चत्वारः पदार्थाः भाष्यकारमते गृह्यकर्मसु न भवन्ति वचनाभावात् । आवसथ्याधाने तु बर्हिर्होमो वचनाद्भवति इत्यावसथ्याधानम् । ततो मणिकाधानपञ्चमहायज्ञसायम्प्रातर्होमनिमित्तञ्च श्राद्धचतुष्कं तद्दिने एव कार्यम् । अथ पुनराधाननिमित्तानि लिख्यन्ते । तत्र कृतावसथ्याधानौ पत्नीयजमानौ अग्निम्परित्यज्य यदि ग्रामसीमामतीत्य वसेतामेकां रात्रिं तत्र प्रातः गृहमागत्याग्निम्मथित्वोक्तविधिना ब्रह्मोपवेशनादि ब्राह्मणभोजनान्तमाधानं कुर्यात् । तत्र होमलोपे तु एकतन्त्रेण सायम्प्रातर्होमं कुर्यात् । बहुहोमलोपेऽप्येवम् । अथ यदि कृताधानो यजमानः प्रजार्थी कामार्थी चोद्वहेत्तत्र अन्ये अरणी सम्पाद्य प्रातर्होमं विधाय दिवा विवाहं कृत्वा आचतुर्थीकर्मणो होमं त्यक्त्वा तदन्ते अतिक्रान्तहोमद्रव्यं दत्त्वा पञ्चमेऽहनि पुनराधानं यथोक्तमित्येकः पक्षः । प्रातर्होमं कृत्वा दिवा विवाहं सम्पाद्य सद्यः चतुर्थीकर्म च कृत्वा तद्दिन एवावसथ्याधानमिति द्वितीयः पक्षः । अत्र पक्षद्वयेऽपि पूर्वारण्योः स्फोटितयोरावसथ्ये दहनम् । अन्यारण्योराधानम् । पात्राणि तान्येव । यत्तु छन्दोगपरिशिष्टे —"सदारो यः पुनर्दारान् कथञ्चित् कारणान्तरात् । य इच्छेदग्निमान् कर्तुं क्व होमोऽस्य विधीयते ॥ स्वेऽग्नावेव भवेद्धोमो लौकिके न कदाचन । न ह्याहिताग्नेः स्वङ्कर्म लौकिकेऽग्नौ विधीयते ।" इति पुनराधानाभावप्रतिपादनं तच्छन्दोगविषयम् । अनेकपत्नीकस्यैकस्याः पत्न्या मरणे अरणिपात्रैः सहावसथ्येन तां दाहयित्वाऽऽशौचान्ते पुनराधानम् । एकपत्नीकस्य तु पत्नीमरणे कृतविवाहस्य चतुर्थीकर्मानन्तरम्पुनराधानम् । अग्नावुपशान्ते होमकालद्वयातिक्रमे गृहपतौ प्रोषिते प्रमादात्पत्न्या ग्रामान्तरवासे तथा गृहस्थिते यजमाने पत्न्याः प्रवासे प्राग्घोमकालादनागमने पुनराधानम् । केचित्तु ज्येष्ठायामग्निसन्निधौ तिष्ठन्त्यामन्यासाम्पतिसहितानाङ्केवलानां वा कार्यवशाद्ग्रामान्तरस्थितौ पत्यौ वा अग्निसन्निधौ तिष्ठति सर्वासाम्पत्नीनां ग्रामान्तरगमनेनाग्निनाश इत्याहुः।तथा पत्न्याः अग्निं विना समुद्रगानद्यतिक्रमे,भर्तृरहितायाश्चाग्निना सहितायाः भर्यं विना सीमातिक्रमे, कर्मार्थाहरणादन्यत्र शकटं विना शम्यापरासादूर्ध्वं हरणे त्रिरुच्छ्वसतः प्रत्यक्षाग्निहरणे,मथ्यमानस्य दृष्टस्याग्नेर्मन्थनयन्त्रोत्थापनादूर्ध्वन्नाशे,संवत्सरमेकं यजमानस्य होमाकरणे,प्राजापत्यब्रह्मकूर्चयोरन्यतरप्रायश्चित्ताचरणादूर्ध्वम्पत्न्याश्च पादकृच्छ्राचरणात्पुनर्विवाहवदाधानम् । उदकेनाग्न्युपशमने शिक्येनाग्न्युद्वाहने प्रत्यक्षस्यारणिसमारूढस्य वा अग्नेः एकनामधेयशतयोजनगामिनदीयोजनाधिकगामिनदीसन्तरणे वा सर्वत्र सीमातिक्रमणे आद्यन्तसीमातिक्रमणे वा पत्नीयजमानयोरन्वारम्भाभावे सूकरगर्दभकाकशृगालश्वकुक्कुटमर्कटशूद्रान्त्यजमहापातकिशवसूतिकारजस्वलारेतोमूत्रपुरीषमेदोऽश्रुश्लेष्मशोणितपूयास्थिमांसमज्जासुराप्रभृतिभिरमेध्यैः

प्रत्यक्षस्यारंणिसमारोपितस्य वाऽग्नेः स्पर्शे त्रीन्पक्षान्निरन्तरं पक्षहोमकरणे पुनराधानम् । तथाऽग्नेरपहरणे प्रादुष्करणादूर्ध्वं पूर्वं वा शान्तेऽग्नौ मन्थने प्रारब्धेऽग्निजन्माभावे लौकिकाग्निब्राह्मणदक्षिणहस्ताऽजादक्षिणकर्णकुशस्तम्बजलानामन्यतमे ऽग्निस्थानेऽप्रकल्पिते सूर्यास्तमये उदये वा जाते पुनराधानम्। अग्निनाशभ्रान्त्या अग्निं मन्थयित्वा पूर्वाग्निन्दृष्ट्वा मथितमग्निम् अयन्ते योनिरिति मन्त्रेणारण्योः समारोप्य पूर्वेऽग्नौ होमादिकं विदध्यात् । यदा तु लौकिकाग्न्याद्यन्यतमं निधाय होमं कृत्वा मन्थने प्रारब्धे द्वितीयहोमकालात्तृतीयाद्वा अग्नेर्जन्माभावस्तदा पुनराधानम् । आरोपिताग्न्योररण्योर्नाशे एकस्या वा पुनराधानम् ; असमारोपितयोस्तु एकतरविनाशे द्वितीयां छित्त्वा मन्थनम् । नष्टायाः प्रतिपत्तिरावसथ्ये दाहः । यदा पुनर्जन्तुभक्षणेन मन्थनेन वा मन्थनायोग्ये भवतस्तदाऽन्ये अरणी गृहीत्वा दर्शपक्षादिकर्म निर्वर्त्य जीर्णमरणिद्वयं शकलीकृत्य तस्मिन्नग्नौ प्रज्वाल्य दक्षिणहस्तेन नूतनामुत्तरारणिं सव्यहस्तेनाधरारणिं गृहीत्वा दीप्तेऽग्नौ धारयन् "उद्बुध्यस्वाग्ने प्रविशस्व योनिमन्यां देवयज्यां वोढवे जातवेदः । अरण्या अरणिमनुसंक्रमस्व जीर्णां तनुमजीर्णया निर्णुदस्व । अयं ते योनिर्ऋत्वियः" इत्येतौ मन्त्रौ जपित्वा मन्थनयन्त्रं निधायाग्निम्मन्थयित्वा भूसंस्कारपूर्वकं स्थाने निधाय पूर्णाहुतिवदाज्यं संस्कृत्यानादिष्टहोमं कुर्यात् । **अथ पक्षहोमविधिः ।** तत्र यजमानस्य आमयादिनिमित्ते रोगार्तावध्वगमने राष्ट्रभ्रंशे धनाभावे गुरुगृहवासे अन्यास्वपि भयाद्यापत्सु होमानां समासो भवति । तद्यथा प्रतिपदि सायङ्काले आहुतिपरिमाणं होमद्रव्यं चतुर्दशकृत्व एकस्मिन्पात्रे कृत्वा अग्नये स्वाहेति हुत्वा पुनस्तथैव चतुर्दशकृत्वो होमद्रव्यं गृहीत्वा प्रजापतये स्वाहेति जुहुयात् । एवमेव होमद्रव्यं चतुर्दशकृत्वः एकपात्रे निधाय सूर्याय स्वाहेति प्रातर्हुत्वा पुनस्तथैव चतुर्दशकृत्वो होमद्रव्यं गृहीत्वा प्रजापतये स्वाहेति जुहुयात् । ततो दक्षिणेन पाणिना प्रागग्रामुत्तरामरणिं गृहीत्वा सव्येनाधरारणिमग्नेरुपरि धारयन् अयं ते योनिरिति मन्त्रेणाग्निं समारोप्यारणी धारयेत् । अथ पौर्णमास्याममावास्यायां वा प्राप्तायां प्रातररण्योरग्निं निर्मथ्य कुण्डे निधायावसरप्राप्तं वैश्वदेवादिकं कर्म. विधाय सायङ्काले सायंहोमं प्रातःकाले प्रातर्होमं हुत्वा पक्षादिहोमं कुर्यात् । एतावताऽपि कालेन यद्यापन्न निवर्तते तदा उक्तविधिना पुनः पक्षहोमान्कुर्यात् । तृतीये पक्षे तु आपदनुवृत्तावपि न पक्षहोमविधिः किन्तु कृच्छ्रेणापि पृथगेव सायम्प्रातर्होमान्विदध्यात् । ततोऽप्यापदनुवृत्तौ पुनरुक्तविधिना पक्षे पक्षे होमसमासं कुर्यात् नतु तृतीये पक्षे । एवं यदैवापन्निमित्तं तदादि औपवसथ्याहात्प्रातर्होमपर्यन्तानां होमानां समासं कुर्यात्, न पक्षान्तरगतानां समासं कुर्यात् । कठश्रुतिपक्षे तु न पक्षद्वयमेकपक्षहोमनियमः अपितु आपदनुवृत्तौ यावदापन्निवृत्तिस्तावत्प्रतिपक्षमुक्तप्रकारेण निरन्तरम्पक्षहोमान्समस्येदित्येकः प्रकारः। प्रकारान्तरं तु सायङ्काले समिदाधानपर्युक्षणानन्तरमाहुतिपरिमाणं होमद्रव्यम् अग्नये स्वाहेति हुत्वा पुनस्तथैव सूर्याय स्वाहेति हुत्वा आहुतिद्वयपर्याप्तं होमद्रव्यमादाय प्रजापतये स्वाहेति सकृज्जुहुयात् इति सायम्प्रातस्तनयोर्होमयोः समासं यावदापदमाचरेत् । यदा तु आपदो गुरुत्वं भवति तदा सायंहोमैरेव अनेन विधानेन प्रातर्होमानां समासं कुर्यात् । एवम्पक्षहोमसमासे कृते यदन्तराले आपन्निवृत्तिस्तदा प्रत्यहं सायम्प्रातर्होमान्हुतानपि जुहुयान्नवेति कठा * आमनन्ति। एते च होमसमासाः सायमुपक्रमाः प्रातरपवर्गा इत्युत्सर्गः । आपद्विशेषे तु प्रातरुपक्रमाः सायमपवर्गाः पूर्वाह्णापराह्णादिकालानपेक्षा अपि बोद्धव्याः । यतः तत्रापत्कालपुरस्कारेणैव होमसमासोपक्रमो युज्यते। अपराह्णे **पिण्डपितृयज्ञः** । **पिण्डपितृयज्ञपद्धतिः** लिख्यते । अमावास्यायामपराह्णे श्राद्धपाकाद्वैश्वदेवं पात्रनिर्णेजनान्तं विधाय प्राचीनावीती नीवीं बद्ध्वा दक्षिणाभिमुखोऽग्निसन्निधावुपविश्याद्य पिण्डपितृयज्ञेनाहं यक्ष्ये, तत्राग्निम् कव्यवाहनं सोमं पितृमन्तम् अमुकगोत्रान् यजमानपितृपितामहप्रपितामहान् अमुकामुकशर्मणः व्रीहिमयैः पिण्डैः यक्ष्य इति प्रतिज्ञाय, आग्नेयादिदक्षिणान्तं

---

* कठकारिका "आपच्चेदनुवर्त्तेत दीर्घकालं कथञ्चन । यावज्जीवमविच्छिन्नान्पक्षहोमान्समाचरेत् ॥ आपदेवावधिस्तत्र न पक्षगणनाविधिः" ॥

दक्षिणाग्रैः कुशैरग्निं परिस्तीर्य पात्राणि सादयेत् पश्चादग्नेर्दक्षिणसंस्थानि । तत्र कृष्णाजिनं स्रुचमुलूखलं मुसलं शूर्पम्·उदकं चरुस्थालीम् आज्यं मेक्षणं स्फ्यम् उदकपात्रं सकृदाच्छिन्नदर्भान् तण्डुलादिद्रव्यं सूत्राणि चेति । पञ्चाशद्वर्षाधिकवयसि यजमाने सूत्रस्थाने यजमानवक्षःस्थलोमानि । स्रुचोऽभावे पक्षे कृष्णाजिनं चरुस्थालीम् उलूखलं शूर्पं मुसलम् उदकम् आज्यं मेक्षणमित्यादित्रयोदश । ततोऽग्निमपरेणापूर्णां स्रुचं व्रीहीन् गृहीत्वोत्तरतोऽग्नेः कृष्णाजिनमास्तीर्य तत्रोलूखलं निधाय व्रीहीनुलूखले निक्षिप्य मुसलमादाय तिष्ठन्दक्षिणामुखस्त्रिः कृत्वोऽवहन्यात्, यावद्बहुव्रीहयो वितुषा भवन्ति । ततः शूर्पेण निष्पूय पुनरुलूखले निक्षिप्य सकृत्फलीकृत्य पुनः शूर्पें कृत्वा निष्पूय सोदकायां चरुस्थाल्यां तण्डुलानोप्याग्नावधिश्रित्याप्रदक्षिणं मेक्षणेन चालयित्वैषच्छृतं चरुं श्रपयेत्, श्रृतमासादितेन घृतेनाभिघार्य दक्षिणत उद्वास्य पूर्वेणाग्निमुत्तरत आनीय स्थापयेत् । ततः सव्यं जान्वाच्य मेक्षणेन चरुमादायाग्नये कव्यवाहनाय स्वाहेत्येकामाहुतिं हुत्वा इदमग्नये कव्यवाहनायेति त्यागं विधाय पुनर्मेक्षणेन चरुमादाय सोमाय पितृमते स्वाहेति हुत्वा इदं ॰ सोमाय पितृमत इति त्यागं विधाय मेक्षणमग्नौ प्रास्याग्नेर्दक्षिणतः पश्चाद्वा दक्षिणाभिमुख उपविश्य सव्यं जान्वाच्योपलिप्य स्फ्येनापहता असुरा रक्षा॰ सि वेदिषद इति दक्षिणायतां लेखामुल्लिख्योदकमुपस्पृश्य ये रूपाणीत्युल्मुकं रेखाग्रे निधाय पुनरुदकमुपस्पृश्योदपात्रमादाय पितृतीर्थेन लेखायाममुकगोत्रास्मत्पितरमुकशर्मन् अवनेनिक्ष्वेत्येवं पितामहप्रपितामहयोरवनेजनं दत्त्वोपमूल॰ सकृदाच्छिन्नानि दक्षिणाग्राणि लेखायामास्तीर्य तत्रावनेजनक्रमेणामुकगोत्रास्मत्पितरमुकशर्मन् एतत्तेऽन्नं स्वधा नम इति पिण्डं दत्त्वा इदं पित्रे इति त्यागं विधायैवं पितामहप्रपितामहाभ्यां प्रत्येकं पिण्डं दत्त्वाऽत्र पितर इत्यर्द्धर्चं जपित्वा पराङावृत्य वायुं संधार्यात्तमना उदङ्मुख आसित्वा तेनैवावृत्यामी मदन्तेत्यर्द्धर्चं जपित्वा पूर्ववदवनेज्य नीवीं विस्रंस्य नमो व इति प्रतिमन्त्रमञ्जलिं करोति गृहान्न इत्याशिषं प्रार्थ्यैतद्व इति प्रतिपिण्डं सूत्राणि दत्त्वोर्जमिति पिण्डेष्वपो निषिच्य पिण्डानुत्थाप्य स्थाल्यामवधायावजिघ्रति सकृदाच्छिन्नान्यग्नौ प्रास्योल्मुकं प्रक्षिप्योदकं स्पृष्ट्वाऽऽचम्य पिण्डान्वाहार्यकं श्राद्धमारभेदिति **पिण्डपितृयज्ञः**। "क्षुत्तृट्क्रोधत्वरायुक्तो हीनमन्त्रो जुहोति यः। अप्रवृद्धे सधूमे वा सोऽन्धः स्यादन्यजन्मनि ॥ स्वल्पे रूक्षे सस्फुलिङ्गे वामावर्ते भयानके । आर्द्रकाष्ठैश्च सम्पूर्णे फूत्कारवति पावके ॥ कृष्णार्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम् । आहुतीर्जुहुयाद्यस्तु तस्य नाशो भवेद्ध्रुवम् ॥ " इदं **ब्रह्मपुराणे** । इति हरिहरभाष्ये द्वितीया कण्डिका ॥ २ ॥

गदा०—अवसथ्याधानन्दारकाले—आवसथं गृहं तत्रस्थोऽग्निरावसथ्य इत्युच्यते तस्याधानं स्थापनमात्मसात्करणमात्मनिष्ठफलसाधनकर्मानुष्ठानसम्पादकसंस्कारविशिष्टत्वेन सम्पादनमिति यावत् तद्दारकाले भवति । दारकालशब्देन पाणिग्रहणं स्त्रिया उच्यते । चतुर्थ्युत्तरकालन्दारकाल इति सम्प्रदायः । पित्रा प्रत्तामादाय निष्क्रामतीत्येष दारकाल इति **भर्तृयज्ञभाष्ये**। **दायाद्यकाल एकेषाम्—**एकेषामाचार्याणां मते दायाद्यकाले अग्न्याधानं भवति । पैतृकद्रव्यस्य भ्रातृभिः सह ऋक्थविभागकालो दायाद्यकालः । तस्मिन्काले स्वेन द्रव्येण कर्मानुष्ठानसमर्थो भवति । साधारणद्रव्यस्य परित्यागासामर्थ्यादनधिकार एव अतो व्यवस्था भ्रातृमतो दायाद्यकाले अभ्रातृकस्य दारकाले । अविभक्तस्यापि विवाहकालेऽपि आधानाधिकार इति **मदनपारिजाते** । **आश्वलायनादीनां** वैवाहिकोऽग्निरेवौपासनाग्निर्दिष्टः । अत्र **साङ्ख्यायनगृह्ये** तु"अभिसमावर्त्स्यमानो यत्रान्त्यां समिधमभ्यादध्यात्तमाग्निमिन्धीत वैवाह्यं वा दायाद्यकाल एके प्रेते वा गृहपतौ स्वयं ज्यायान्वैशाख्याममावास्यायामन्यस्यां वा कामतो नक्षत्र एक इति।"अत्र **छन्दोगगृह्ये** विशेषः । भूर्भुवः स्वरिति अभिमुखमग्निं प्रणयन्ति प्रेते वा गृहपतौ परमेष्ठिकरणं तथा तिथिनक्षत्रसमवाये दर्शे वा पौर्णमासे वाऽग्निसमाधानं कुर्वीत इति तत्र कारिकायां विशेषः । "अपि वैवाहिको येन न गृहीतः प्रमादतः । पितर्युपरते तेन ग्रहीतव्यः प्रयत्नतः ॥ कृतदारो न तिष्ठेच्च क्षणमप्यग्निना विना । तिष्ठन्भवेद्द्विजो व्रात्यस्तथाचं पतितो भवेत् ॥ पितृपाकोपजीवी स्याद्भ्रातृपाकोपजीवकः । ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना ॥ यथा सन्ध्या यथा स्नानं वेदस्याध्ययनं यथा । तथैवौपासनं प्रोक्तं नस्थितिस्तद्वियोगतः ॥ योऽग्निं स्मार्त्तमनादृत्य कर्म स्नानजपादिकम् । होमान्समान्[illegible] न स पुण्येन युज्यते ॥ यो दद्यात्काञ्चनं

मेरुं पृथिवीं च ससागराम् । तत्सायंप्रातर्होमस्य तुल्यं भवति वा नवा ।। योऽगृहीत्वा विवाहाग्निं गृहस्थ इति मन्यते । अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः ।। वृथापाकस्य भुञ्जानः प्रायश्चित्तं समाचरेत् । प्राणायामत्रयं कृत्वा घृतं प्राश्य विशुध्यति।।" तथा--"कालद्वयेऽपि चेद्येन नाधानं तु कृतं पुरा । स कृत्वाऽऽन्यतमं कृच्छ्रमाग्निमभ्याहरेत्ततः ।।" एतदाधानं गृहपतौ मृते एकादशाहे द्वादशाहे वा कार्यं तदुक्तं **रेणुकदीक्षितैः**–"एतद्गृहपतौ प्रेते कुर्यादेकादशेऽहनि । प्रागेवैकादशश्राद्धाद्वृद्धिश्राद्धविवर्जितम् ।। एवं ज्येष्ठः समादध्यात्कनीयांश्च विवर्जयेत् । एकादशेऽह्नि कुर्वन्ति द्वादशे वा विचक्षणाः ।। अधिकारेऽपि न कुर्वीत मले वास्तङ्गते गुरौ ।" तथाह **लल्लः**–"आधानपुनराधाने न कुर्यात्सिंहगे रवौ। "कालातिक्रमे तु प्रायश्चित्तमुक्तम् । "यावन्त्यब्दान्यतीतानि निरग्नेर्विप्रजन्मनः । तावन्ति कृच्छ्राणि चरेद्धौम्यं दद्याद्यथाविधि ।। कृतदारो गृहे ज्येष्ठो यो नादध्यादुपासनम् । चान्द्रायणं चरेद्वर्षं प्रतिमासमहोऽपि वा" इति । कालप्रसङ्गान्मुहूर्त्तविचारोऽप्यत्र क्रियते तत्र **कारिकायाम्**–"माघादिपञ्चमासेषु श्रावणे चाश्विनेऽथवा । कुर्यान्मृगोत्तमाङ्गे वा आधानं शुक्लपक्षतः ।।" मृगोत्तमाङ्गो मार्गशीर्षः । "हस्तद्वये विशाखासु कृत्तिकादित्रये तथा ।" पुनर्वसुद्वये तद्वद्रेवतीषूत्तरासु च ।। भौमार्कवर्जिते वारे नाधिमासे क्षये तथा । चन्द्रेऽनुकूले पूर्वाह्ने रिक्ताविष्टिविवर्जिते ।। ". चतुर्थीनवमीचतुर्दश्यो रिक्ताः । " सवैधृतिश्च व्यतिपातनामा सर्वोऽप्यनिष्टः परिघस्य चार्द्धम् ।" "विष्कम्भे घटिकास्तिस्रो नव व्याघातवज्रयोः । गण्डातिगण्डयोः षट् च शूले पञ्च न शोभनाः ।।" **महेश्वरः**–" चूडाकर्मनृपाभिषेकनिलयाग्न्याधानपाणिग्रहान्देवस्थापनमौञ्जिबन्धनविधीन्कुर्यान्न याम्यायने । देवेज्यास्फुजितोस्तथाऽस्तमितयोर्बाल्ये च वार्धे तयोः केतावभ्युदिते तथा ग्रहणतो यावत्तिथिश्चाष्टमी ।।" देवेज्यो गुरुः । आस्फुजिच्छुक्रः । " केतुनिर्घातभूकम्पविद्युत्स्तनितदर्शने । आधानं नहि कर्तव्यं सुधिया शुभमिच्छता ।। पश्चिमायां दिशि सितो बालः स्याद्दश वासरान् । वृद्धः पञ्च दिनान्यैन्द्र्यां त्रिदिनं पक्षमेव च ।। शिशुवृद्धौ जीवसितावुभयत्राप्युदीरितौ । अन्यैः पञ्चदशाहानि दशान्यैः सप्त चापरैः ।। उपरागनिवृत्तौ च यावत्स्याद्दिनसप्तकम् । अग्न्याधेयं विवाहादि मङ्गलं न समाचरेत् ।।" **रत्नमालायाम्**–"राशौ विलग्नेऽम्बुचरे घटे वा तदंशके वाप्यथवा शशाङ्के । आधानकाले द्विजपुङ्गवानां जातोऽपि निर्वाणमुपैति वह्निः ।।" विलग्नं लग्नपर्यायः । अम्बुचरे कर्के मीने मकरोत्तरार्द्धे च । मेषकर्कटतुलामकराश्च चरलग्नानि । घटे कुम्भलग्ने । तदंशके चरांशे कुम्भांशे च । शशाङ्के चन्द्रे चरराशिस्थिते कुम्भराशिस्थिते तदंशस्थिते चेत्यर्थः । "त्रिकोणकेन्द्रोपचयेषु सूर्ये बृहस्पतौ शीतकरे कुजे च । शेषग्रहेषूपचयस्थितेषु धूमध्वजोत्पादनमामनन्ति ।। " त्रिकोणं नवपञ्चकम् , लग्नसप्तमदशमचतुर्थं च केन्द्रम् । तृतीयषष्ठदशमैकादशमुपचयः । कुजो मङ्गलः । "चन्द्रे पत्नी मृत्युगे मृत्युमेति क्षिप्रं वह्न्याधायकः क्ष्मासुते च । भानोः सूनौ देवपूज्ये रवौ वा रोगैर्जुष्टो दुःखितः स्याद्द्विजेन्द्रः" "नो कुर्याद्धुतभुक्परिग्रहमिनक्ष्मापुत्रजीवेन्दुभिर्नीचस्थैर्विजिते रिपोर्भवनगैरस्तङ्गतैर्वा द्विजः । चापस्थे तनुगे गुरौ क्रियगते सप्ताम्बरस्थे कुजे शीतांशौ त्रिषडायगे दिनकरे वा स्यात्तदा दीक्षितः ।" "पापग्रहेषु धनगेषु धनेन हीनः सौम्यग्रहेषु धनवानुडुपेऽन्नदः स्यात् । लग्नस्थिते च सबुधार्कजभार्गवेन्दावुत्पादितोऽग्निरचिरात्खलु नाशमेति ।।" चापस्थे धनूराशिस्थिते । तनुगे लग्नस्थे । क्रियगते मेषराशिस्थिते । अम्बरस्थे दशमस्थे । आयगे एकादशस्थे । कन्यायां मिथुने च मङ्गलः शत्रुगृहस्थः । कन्यामिथुनतुलावृषेषु बृहस्पतिः शत्रुगृहस्थः, रविमङ्गलशनैश्चराः पापग्रहाः क्षीणचन्द्रश्च । धनगेषु द्वितीयस्थेषु । अथाधिकारी निरूप्यते । "ब्राह्मणाः क्षत्रिया वैश्याः शूद्रं हित्वाऽनुलोमजाः । अधिकुर्वन्ति गार्ह्येषु सह भर्त्रा स्त्रियस्तथा ।। मासोर्द्ध्वं स्त्रीप्रसूर्या स्यात्पुत्रसूर्दिनैर्विंशतेः । रजस्युपरते स्नानं दिनादूर्ध्वं रजस्वला ।। नाधिकारोऽस्ति सर्वेषां सूतके मृतकेऽपि च । तथैव पतितानां च तथा दोषयुजामपि ।। अग्न्याधानेऽधिकारोऽस्ति रथकारस्य चोत्तरे । माहिष्येण करण्यां तु रथकारः प्रजायते ।। वैश्यायां क्षत्रियाज्जातो माहिष्यो मुनिभिः स्मृतः । जाता वैश्येन शूद्रायां करणीत्यभिधीयते ।। वेदाध्ययनसम्पन्नाः प्रयोगेन श्रुतेन च । अधिकुर्वन्ति सर्वत्र यद्वाऽर्थश्रवणं विना ।। यद्वाऽध्ययनवेदार्थविज्ञानरहितोऽपि सन् । नाधिकारी क्रियाशून्यो भर्तृयज्ञादिशासनात् ।। द्रविडस्त्वन्यथा प्राह सर्वशून्येऽप्यधिक्रियाम् । श्रद्धावांश्चेद्भवेत्कर्ता नेदृक् सर्वानुसम्मतम् ।। भार्याः सन्तीह यावत्यस्ताभिः सर्वाभिरन्वितः । यद्वा सवर्णय

ज्येष्ठभार्ययैव समन्वितः ॥ व्यभिचारवती पापा रोगिणी द्वेषिणी च या । आधाने सा परित्याज्या न वा त्याज्या मतान्तरात् ॥ तुल्याधिकार उभयोर्यज्ञपार्श्वे निरूपणात् । अतस्त्वन्यतराभावे नाधिकारोऽस्ति कुत्रचित् ॥" अथा**नधिकारिणः** । " आवसथ्यं विवाहं च प्रयोगे प्रथमे स्थितः । न कुर्याज्जनके ज्येष्ठे सोदरे चाप्रकुर्वति ॥ क्षेत्रजादावनीजाने विद्यमानेऽपि सोदरे । नाधिकारविघातोऽस्ति भिन्नौदर्येऽपि चौरसे ॥ पङ्ग्वन्धमूकबधिरपतितोन्मादहूषणे । संन्यस्ते छिन्नकर्णादौ यद्वा षण्ढादिदूषणे ॥ जनके सोदरे ज्येष्ठे कुर्यादेवेतरः क्रियाम् । ज्येष्ठे श्रद्धाविहीने च सत्याधेयं तदाज्ञया ॥ पितृसत्त्वेऽप्यनुज्ञातो नादधीत कदाचन । जीवत्पितरि चादध्यादाहिताग्निः स वै यदि ॥ तथैव भ्रातरि ज्येष्ठे यजेच्चैव विवाहयेत् । अनाहिताग्नौ पितरि योऽग्न्याधानं करोति हि ॥ अरण्योरग्निमारोप्य तमाधाप्यादधीत सः । उद्वाहं चाग्निसंयोगं कुरुते योऽग्रजे स्थिते ॥ परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ परिवित्तिः परीवेत्ता नरकं गच्छतो ध्रुवम् ॥ अपि चीर्णप्रायश्चित्तौ पादोनफलभागिनौ। पितृव्यक्षत्त्रियोत्पन्नपरनारीसुतोऽपि वा ॥ (दत्तकादयः परनारीसुताः) विवाहे चाग्निसंयोगे न दोषः परिवेदने । देशान्तरस्थक्लीबैकवृषणानसहोदरान् ॥ वेश्यानिष्ठांश्च पतिताञ्शूद्रतुल्यातिरोगिणः । जडमूकान्धबधिरकुब्जवामनखञ्जकान् ॥ अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च । धनवृद्धिप्रसक्तांश्च कामतोऽकारिणस्तथा । कुटिलोन्मादरोगांश्च परिविन्दन्न दुष्यति । गीतवादित्रनिरतान्नर्तकान्पारदारिकान् । वशिकान्गारुडांश्चैव परिविन्दन्न दुष्यति । योगशास्त्राभियुक्ते च द्विजे प्रव्रजिते तथा । नास्तिके चाग्निसंयोगे न दोषः परिवेदने ॥ पिता पितामहो यस्य अग्रजो वाऽप्यनग्निमान् । इज्यातपोऽग्निसंयोगे न दोषः परिवेदने ॥ परिवेदनवाक्ये ये श्रूयन्ते दोषसंयुताः । तेषामप्यधिकारोऽस्ति प्रायश्चित्तादनन्तरम् ॥ पिता पितामहो वापि नास्तिको वाप्यनाश्रमी । यस्य दोषोऽस्ति नैवेह तस्याधाने कदाचन ॥ अग्रजे सति निर्दुष्टे यवीयानग्निमान्भवेत् । प्रतिपर्व भवेत्तस्य ब्रह्महत्या न संशयः ॥ नाग्नयः परिविन्दन्ति न वेदा न तपांसि च । न च श्राद्धं कनिष्ठस्य विरूपा या च कन्यका ॥ ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव चाश्रयेत् । अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा ॥ ज्येष्ठभ्रात्रा त्वनुज्ञातः कुर्यादग्निपरिग्रहम् । अनुज्ञातोऽपि सन्पित्रा नादध्यान्मनुरब्रवीत् ॥ धनवार्धुषिकं राजसेवकं कर्षकं तथा । प्रोषितं च प्रतीक्षेत वर्षत्रयमपि त्वरन् ॥ प्रोषितश्चेत्त्रिवर्षं स्यात् त्र्यब्दादूर्ध्वं समाचरेत् । आगते तु पुनस्तस्मिन्पादकृच्छ्रद्वयं चरेत् ॥ देशान्तरस्थो न ज्येष्ठो ज्ञायेताहितवानिति । कनीयानधिकारी चेदादधीताविचारयन् ॥ द्वादशैव तु वर्षाणि ज्यायान्धर्मार्थयोगतः । न्याय्यः प्रतीक्षितो भ्राता श्रूयमाणः पुनः पुनः ॥ प्रोषितस्तु यदा ज्येष्ठो ज्ञायेतानाहितानलः । षड्वत्सरान्प्रतीक्षेत आदधीतानुजस्तथा ॥ पितरि प्रेतभार्ये वा देशान्तरगतेऽपि सन् । अधिकारविघातो हि न पुत्रस्योपजायते ॥ सोदराणां च सर्वेषां परिवेत्ता कथं भवेत् । दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया" इति । अग्न्याहरणार्थं योनिमाह—**वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य चातुष्प्राश्यपचनवत्सर्वमरणिप्रदानमेके पञ्च महायज्ञा इति श्रुतेः**- पशुभिः समृद्धस्य वैश्यस्य गृहादाग्निं हुतोच्छिष्टमसंस्कृतं वा आनीयाधानं कुर्यात् । एके अरणिप्रदानम् अरण्युपादानकमिच्छन्ति । अयमर्थः । प्रशब्दोऽत्र उपशब्दार्थे, अरणिप्रदानमुपादानकारणमुत्पत्तिस्थानं यस्याग्नेः सोऽरणिप्रदानस्तमग्निमादधीतेति मन्यन्ते अतो विकल्पः । अत्र **साङ्ख्यायनगृह्ये**—बहुपशुविट्कुलाम्बरीषबहुयाजिनामन्यतमं तस्मादग्निमिन्धीतेति । **छन्दोगगृह्ये**—"वैश्यकुलाद्वाऽम्बरीषाद्वाऽग्निमाहृत्याभ्यादध्यादपि वा बहुयाजिन एवाऽगाराद्ब्राह्मणस्य वा राजन्यस्य वा वैश्यस्य वाऽपि वा अन्यम्मथित्वाऽभ्यादध्यात्**पुण्यस्त्वेवानर्धुको भवतीति**

पुण्यस्त्वेवानर्द्धुको भवतीति–पुण्यः पुण्यकृत्, केवलपुण्यकोशवृद्धिकृदेवायमारणेयोऽग्निरिति । अनर्द्धुकः । ऋद्धिर्वृद्धिः । ब्रह्मवर्चसादीनां वृद्धिं न करोतीत्यनर्द्धुकः ॥ तु शब्दो विशेषणार्थः । वैश्यकुलादियोन्याहृतादग्नेरारणेयो विशिष्ट इति । यतश्चात्र स्वाधीनत्वात् योनेरनुगतोऽप्यग्निः क्षिप्रमेव पुनर्निर्मथ्योत्पाद्यते । अन्यत्र पराधीनत्वात् । वहुयाजिवैश्याम्बरीषयोश्च दुर्लभत्वात्प्रायश्चित्तप्रसङ्गः पुनराधानप्रसंगो वा स्यात् । अनर्द्धुकत्वाद्विशिष्टविरोध इति चेन्न । उरुपुण्यकोशवृद्धिकारित्वादनर्द्धुकस्यापि अविरोध एव । तथाचोक्तम् । " न हि पुण्यकृतः किञ्चित्त्रिषु लोकेषु दुर्लभम् । दुःप्राप्यमपि येनाप्तं ब्राह्मण्यं गाधिसूनुना " इति । तस्मादारणेय एव विशिष्टोऽग्निरिति । पुण्यमेवादधीताग्नेः स हि सर्वैः प्रशस्यते । अनर्द्धुकत्वं यत्तस्य काम्यैस्तन्नीयते शमम्" इति वचनात् । यथा कामयेत तथा कुर्यात्–य एतेऽन्त्यसमिदाधानादयः षडाधानकल्पाः सप्त वोक्ता याश्चेमा वैश्यकुलाद्याः पञ्चाग्नियोनयः तत्र गुणदोषान्विविच्य यथा कामयेत तथा कुर्यादिति गोभिलगृह्यसूत्रप्रथमाध्यायस्य प्रथमखण्डभाष्यम् ।

यथा कामयेत तथा कुर्यात्स एवास्य गृह्योऽग्निर्भवति इति'' ॥ तथा गृह्यान्तरं **छन्दोगभाष्ये**–"ब्राह्मणकुलात्तु ब्रह्मवर्चसकामोऽग्निमाहृत्यादधीत राजन्यादोजोवीर्यकामो वैश्यात्पशुकामोऽम्बरीषात् धनधान्यकाम आरणेयमुरुपुण्यकोशकामः'' इति।पुनराधाने अग्न्यनुगमने च आधाने या योनिरङ्गीकृता सैव भवति। तथा च **छन्दोगभाष्ये** शाखान्तरगृह्यम्–"पूर्वैवानुगतेऽग्नौ योनिः पुनराधेये चेति'' वैश्यगृहाग्न्यभावे शाखान्तरोक्ताया योनेरग्न्याहरणमिति **हरिहरः**। अस्मत्सूत्रोपरि तु"वैश्यगृहादग्न्याहरणं वाऽरण्योः''इति युक्तम्, न तु वैश्याभावे गृह्यान्तरोक्ताया योनेराहरणम्, गृह्यान्तरयोन्यपेक्षया वरं विकल्पेन स्वगृह्योक्ता योनिर्ग्राह्येति नमो **हरिहरमिश्रेभ्यः**।यस्मिंन्पक्षे वैश्यगृहादग्न्याहरणं तस्मिन्पक्षे यावज्जीवं वैश्यसन्निधौ निवासः।शान्तेऽग्नौ वैश्यकुलादाहृत्य सर्वप्रायीश्चत्तं कृत्वा तेनैव विधिना यावज्जीवं वर्त्तयेदिति **गर्गपद्धतौ**।**चातुष्प्राश्यपचनवत्सर्वमिति**–चातुष्प्राश्यपचनं यस्मिन् कर्मणि विद्यते तदिहापि सर्वम्भवति,कुतः 'पञ्च महायज्ञा इति श्रुतेः'पञ्चमहायज्ञानां श्रुतौ पाठस्तत्साधनभूतोऽयमग्निरतस्तद्वदिहापि सर्वं भवतीति पूर्वः पक्षः।सिद्धान्तस्तु उत्सूत्रः । चातुष्प्राश्यपचनवतीतिकर्तव्यता न भवतीति यत्कारणम्, उपदेशातिदेशयोरन्यतरेण धर्माणाम्प्रवृत्तिः नात्रोपदेशो न चातिदेशः तस्मान्नैव चातुष्प्राश्यपचनवतीतिकर्तव्यता प्रवर्तते । ननु तर्हि किमर्थमिदमुक्तम्, "आधानसामान्याद्वा श्रौतानाम्पञ्चमहायज्ञानां साधनभूतत्वाद्वा श्रौताऽऽधानधर्माः स्युः इति बुद्धिः स्यात्तां निराकर्तुमिदमुक्तमित्यदोषः। गृह्यान्तरे चानयैव भ्रान्त्या श्रौताधानेतिकर्तव्यता उक्ताऽस्ति तां निवारयितुमिह सूत्रकृता पूर्वपक्षः कृतः । अरणिलक्षणं चोक्तम् यज्ञपार्श्वसङ्ग्रहकारिकायाम् । "अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः। तस्य या प्राङ्मुखी शाखा उदीची चोर्ध्वगाऽपि वा ॥ १ ॥ अरणिस्तन्मयी ज्ञेया तन्मय्येवोत्तरारणिः। सारवद्दारवञ्चात्रमोविली च प्रशस्यते ॥ २ ॥ संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते । अलाभे त्वशमीगर्भादाहरेदविलम्बितः ॥ ३ ॥ चतुर्विंशाङ्गुला दीर्घा विस्तारेण षडङ्गुला । चतुरङ्गुलमुत्सेधा अरणिर्याज्ञिकैः स्मृता ॥ ४ ॥ मूलादष्टाङ्गुलन्त्यक्त्वा अग्राच्च द्वादशाङ्गुलम् । अन्तरं देवयोनिः स्यात्तत्र मथ्यो हुताशनः ॥ ५ ॥ मूर्धाक्षिकर्णवक्त्राणि कन्धरा चापि पञ्चमी । अङ्गुष्ठमात्राण्येतानि द्व्यङ्गुष्ठं वक्ष उच्यते ॥६॥ अङ्गुष्ठमात्रं हृदयमङ्गुष्ठमुदरं तथा। एकाङ्गुष्ठा कटिर्ज्ञेया द्वौ वस्तिर्द्वौ च गुह्यके ॥ ७ ॥ ऊरू जङ्घे च पादौ च चतुस्त्र्येकैर्यथाक्रमम् । अरण्यवयवा ह्येते याज्ञिकैः परिकीर्तिताः ॥ ८ ॥ यत्तद्गुह्यमिति प्रोक्तं देवयोनिः स उच्यते । तस्यां यो जायते वह्निः स कल्याणकृदुच्यते ॥९॥प्रथमे मन्थने ह्येष नियमो नेतरेषु च। अष्टाङ्गुलः प्रमन्थः स्याच्चात्रं स्याद्द्वादशाङ्गुलम् ॥१०॥ओविली द्वादशैव स्यादेतन्मन्थनयन्त्रकम् । गोवालैः शणसम्मिश्रैस्त्रिवृद्वृत्तमनंशुकम् ॥११॥ व्यामप्रमाणं नेत्रं स्यात्तेन मथ्यो हुताशनः। चात्रबुध्ने प्रमन्थाग्रं गाढं कृत्वा विचक्षणः॥१२॥(बहुदिने मन्थनेन प्रमन्थनाशे तत्रैवोक्तम् ।) उत्तराया अभावाद्धि ग्राह्यो मन्थो धरारणेः ॥ १३ ॥ व्याख्यातं कैश्चिदेवं तन्निर्मूलत्वादुपेक्ष्यते। (मानप्रकारो यज्ञपार्श्वे)शिरश्चक्षुः कर्णमास्यं प्रथमेंऽशे प्रकीर्तितम् ॥१४॥ द्वितीये कन्धरा वक्षस्तृतीये ह्युदरं स्मृतम् । चतुर्थे चैव योनिः स्यादूरुद्वन्द्वं च पञ्चमे ॥१५॥ षष्ठे जङ्घे तथा पादौ पूर्णा चारणिरङ्गतः । यदि मन्थेच्छिरस्यग्निं शिरोरोगैः प्रमीयते॥१६॥ यजमानस्तथा कण्ठे ह्यंसे चैव विशेषतः । मन्येद्यो यजमानस्तु पक्षहीनो भवेद्ध्रुवम् ॥ १७ ॥ यो मन्थत्युदरे कर्ता क्षुधया म्रियते तु सः । देवयोन्यां तु यो मन्थेद् देवसिद्धिः प्रजायते ॥ १८ ॥ मन्थेदूरुद्वये यस्तु राक्षसङ्कर्म तस्य तत् । जङ्घायां यातुधानेभ्यः पादयोः स्यात्पिशाचके॥१९॥ प्रथमे मन्थने ज्ञेयं द्वितीयादौ न शोधयेत् । अष्टाऽङ्गुलः प्रमन्थः स्याद्दीर्घो द्व्यङ्गुलविस्तृतः ॥ २० ॥ उत्सेधो द्व्यङ्गुलन्तस्य त्वैशानपूर्व उर्ध्वगः । एवमष्टादश प्रोक्ताः प्रमन्था ह्युत्तरारणेः ॥ २१ ॥ पादौ तस्याः स्मृतं मूलमग्रस्तु शिर उच्यते । अध्वर्युः प्राङ्मुखो मन्थेत्प्रत्यग्दिक्चरणा हि सा ॥ २२ ॥ ओविली यजमानेन धृत्वा गाढं च मन्थयेत् । मथ्नीयात्प्रथमं पत्नी यद्वा कश्चिद् दृढो द्विजः ॥ २३ ॥ मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलम् । अन्तरा देवयोनिः स्यात्तत्र मथ्यो हुताशनः ॥ २४ ॥ मूलादङ्गुलमुत्सृज्य अग्रात्सार्द्धाङ्गुलं तथा । योनिमध्ये पुनर्मानं कृत्वा मथ्यो हुताशनः ॥२५॥ नान्यवृक्षेण मथ्नीयान्न कुर्याद्योनिसंकरम् । क्लेदिता स्फाटिता चैव सुषिरा ग्रन्थिमस्तका ॥ २६ ॥ चतुर्विधाऽरणिस्त्याज्या श्रेयस्कामैर्द्विजातिभिः । क्लेदिता हरते पुत्रान् स्फाटिता शोकमावहेत् ॥ २७ ॥ ग्रन्थिमूर्द्धा हरेत्पत्नीं सुषिरा पतिमारिणी ।'' इति श्रौतस्मार्ताधानेऽरणिलक्षणम् । " इतरेषु च संस्कारेष्वरणिर्द्वादशाङ्गुला । मूलात् त्रिभागजननिस्तदर्धेनोत्तराराणिः ॥ वक्ष्ये जातारणेः पक्षं कुमाराग्नेः प्रसिद्धये । निर्माय यन्त्रविहितं पिता संस्थाप्य यत्नतः ॥ जाते कुमारे मथ्नीयादग्निं यथाविधि स्वयम् । आयुष्यहोमान् जुहुयाच्चास्मिन्नग्नौ समाहितः ॥ तत्रा-

न्नप्राशनं चौलं मौञ्जीबन्धनमेव च । व्रतादेशश्च कर्तव्यास्तस्मिन्गोदानिकाः क्रियाः ॥ कुर्याद्वैवाहिको होमो वह्नौ तस्मिन्समाहितः । शालाग्निकर्म तत्रैव कुर्यात्पंक्तिं च नैत्यकीम् ॥ नित्यहोमं पञ्चयज्ञान् कुर्यात्तस्मिन्ननाहितः । स्मार्तसंस्थादिकं यच्च तत्सर्वं तत्र गद्यते" इति । जातारणिपक्षस्तु युगान्तरे भवति न कलौ । "प्रजार्थन्तु द्विजाग्र्याणां प्रजारणिपरिग्रहः "। इति कलिवर्ज्यत्वात् ।"दानवाचनान्वारम्भणवरवरणव्रतप्रमाणेषु यजमानं प्रतीयात् इति परिभाषितत्वात् यजमानाङ्गुलादिमानं ग्राह्यम् । "अङ्गुष्ठाङ्गुलमानं तु यत्र यत्रोपदिश्यते । तत्र तत्र बृहत्पर्वग्रन्थिभिर्मिनुयात्सदा" इति **छन्दोगपरिशिष्टम्** । बृहत्पर्वाणि मध्यपर्वाणि तन्मूलग्रन्थयो यत्राङ्गुष्ठनोदना तत्राङ्गुष्ठस्याङ्गुलिनोदनायामङ्गुलीनाम् । छन्दोगानां स्वपरिशिष्टोक्तत्वादङ्गुष्ठैररणिमानम् । वाजिनां तु यज्ञपार्श्वादङ्गुलैरिति । सूत्रोक्तपक्षस्तु यजमानेनोर्ध्वबाहुप्रपदोच्छ्रितेन समास्थितेन वेति । "पञ्चारत्निर्दशवितास्तिर्विंशतिशताङ्गुलः पुरुषः" इति सूत्रात्तु पुरुषस्य पञ्चमोंऽशोऽरत्निस्तच्चतुर्विंशोऽङ्गुलमिति **रामवाजपेयिभिराधानप्रकरणे** उक्तम् । अथात्र **पात्रलक्षणमुच्यते** । तत्र यज्ञपार्श्वसंग्रहकारिकायाम् " खादिरस्स्फ्याकृतिर्वज्रोऽरत्निमात्रः प्रशस्यते । आसनं ब्रह्मणः कार्यं वारणं वा विकङ्कतम् ॥ हस्तमात्रं चतुःस्रक्ति मूलदण्डसमन्वितम् । त्रिषडङ्गुलसङ्ख्याको मूलदण्डो विकङ्कतः ॥ प्रस्थमात्रोदकग्राही प्रणीता चमसो भवेत् । वैकङ्कतं पाणिमात्रं प्रोक्षणीपात्रमुच्यते ॥ हंसमुखप्रसेकं च त्वग्बिलं चतुरङ्गुलम् । आज्यस्थाली तु कर्त्तव्या तैजसद्रव्यसम्भवा ॥ माहेयी वापि कर्त्तव्या नित्यं सर्वाग्निकर्मसु । आज्यस्थाल्याः प्रमाणं तद्यथाकामं तु कारयेत् ॥ मृन्मय्यौदुम्बरी वापि चरुस्थाली प्रशस्यते । तिर्यगूर्ध्वं समिन्मात्रदृढा नातिबृहन्मुखी ॥ कुलालचक्रघटितमासुरं मृन्मयं स्मृतम् । तदेव हस्तघटितं स्थाल्यादि खलु दैविकम् ॥यज्ञवास्तुनि मुष्टौ च स्तम्बे दर्भवटौ तथा।दर्भसङ्ख्या न विहिता विष्टरास्तरणेषु च॥ अङ्गुष्ठपर्ववृत्तश्चारत्निमात्रः स्रुवो भवेत् ।पुष्करार्द्धं भवेत्खातं पिण्डकार्द्धं स्रुचस्तथा॥" पिण्डकार्द्धम्मुष्ट्यर्द्धमित्यर्थः । "यावताऽन्नेन भोक्तुस्तु तृप्तिः पूर्णैव जायते । तं वरार्थमतः कुर्यात्पूर्णपात्रमिति स्थितिः ॥ यवैर्वा व्रीहिभिः पूर्णं भवेत्तत्पूर्णपात्रकम् । वरोऽभिलषितं द्रव्यं सारभूतं तदुच्यते । अष्टमुष्टि भवेत्किञ्चित्किञ्चिदष्टौ च पुष्कलम् । पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते ॥" इत्या**धानपात्राणि** । अन्यान्यप्यत्रैव लिख्यन्ते । "शूर्पं त्वरत्निमात्रं स्यादैषिकं वैणवन्तु वा । लम्बं त्वरत्निमात्रं स्यादुपला च दृषत्तथा ॥ विस्तारो दृषदः प्रोक्तो द्वादशाङ्गुलसङ्ख्यया। पालाशं जानुमात्रं स्यात्पृथुबुध्नमुलूखलम् ॥अर्द्धखातं बृहद्वक्त्रं मध्ये रास्नासमन्वितम्।खादिरं मुसलं प्रोक्तमरत्नित्रयसम्मितम् ॥ प्रादेशमात्रं विज्ञेयं मेक्षणन्तु विकङ्कतम् । वृत्तमङ्गुष्ठपर्वाग्रमवदानक्रियाक्षमम् ॥ ईदृश्येव भवेद्दर्वी विशेषस्तामहं ब्रुवे । वारण्यरत्निमात्रा स्यात्तुर्यांशाधिकपुष्करा ॥ हस्ताकारा च पृथ्वग्रा अग्रे सर्पफणाकृतिः । आकर्षफलकं हस्तमात्रं स्याद्धनुराकृतिः॥अग्रे सर्पफणाकारं खादिरं वा विकङ्कतम् ।कङ्कतानि त्रिदन्तीनि वारणानि भवन्ति हि ॥ वारण्यरत्निमात्रा स्यादभ्रिः शासन्दशाङ्गुलम् । द्वात्रिंशदङ्गुला शम्या वारणीत्यभिधीयते ॥ श्रेपणीन्पारिधीन्कुर्याद्बाहुमात्रानपुष्करान् । श्रीपर्ण्यौ हस्तमात्रे च श्रपण्यौ शूलमेव च ॥ तच्छूलं यस्य कस्यापि यज्ञियस्य तरोर्भवेत् । लौही वा मृन्मयी वा स्यात्पशूखा च यथार्थतः ॥ लौही ताम्रमयी वापी कुर्यांच्चैव यथार्थतः । पात्राणि वारणान्यत्र यानि प्रोक्तान्यसम्भवे ॥ वैकङ्कतानि कार्याणि सूत्रान्तरमतादपि । अभावे मुख्यवृक्षस्य यज्ञियस्य तरोरिह ॥ यत्किञ्चित्पात्रजातं तदिति भास्करसम्मतिः । अश्वत्थस्यारणी ग्राह्या नान्यस्मादेव वृक्षतः ॥ एवं सर्वेषु शास्त्रेषु दृष्टा सूत्रान्तरेष्वपि ॥" **अग्न्याधेयदेवताभ्यः स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाज्याहुतीर्जुहोति । त्वन्नोअग्ने सत्वन्नो अग्न इमम्मे वरुण तत्त्वायामि येते शतमयाश्चाग्न उदुत्तमं भवतन्न इत्यष्टौ**--श्रौतस्याग्न्याधेयस्य देवताः अग्निः पवमानोऽग्निः पावकोऽग्निः शुचिरादितिश्चेति । आभ्यः स्थालीपाकमोदनमुक्तप्रकारेण श्रपयित्वा आज्यभागौ हुत्वा त्वन्नो अग्ने इत्याद्यष्टभिराज्येनाहुतयो होतव्याः । अत्र चरुर्व्रीहीणां भवति । "कामादीजानोऽन्यत्रापि व्रीहियवयोरेवान्यतरꣳ स्थालीपाकꣳ श्रपयेत् । न पूर्वचोदितत्वात्सन्देहोऽसम्भवाद्विनिवृत्तिः"इति सीतायज्ञे वक्ष्यमाणन्यायात् । अयमर्थः सूत्रस्य--कामादिच्छया अन्यत्र पक्षादिषु यागं कुर्वन्व्रीहियवयोरन्यतरं चरुं श्रपयेत् । नैवात्र सन्देहः। कुतः"व्रीहीन्यवान्वा हाविषि"इति पूर्वं चोदितत्वादुक्तत्वात् ।यावस्य चरोरसम्भवात् विनिवृत्तिः पूर्वचोदितस्य व्रीहीन्यवान्वेत्यस्य । अनवस्रावितान्तरोष्मपक्के ईषदसिद्धे तण्डुलपाके चरुशब्दप्रसिद्धेः । आग्रयणेष्टौ 'व्रीहीणां यवानां च' इति सूत्रणाच्च । 'व्रीहीन्यवान्वा हाविषि'इति परिभाषणादग्रपाकस्येत्येतावत्युक्तेऽपि व्रीहीणां यवानामग्रपाकस्येति सिद्ध्यति । किमर्थं व्रीहीणां यवानामिति ग्रहणम् । उच्यते वैश्वदेवश्चरुर्विहितः सोऽपि यवैर्यथा स्यात् इति यवानामित्युक्तं, व्रीहिग्रहणं तु यवानामेवेति नियमो माभूदिति ।

अतः सर्वत्र “व्रीहीणामेव चरुः कार्यः” इति गम्यते । श्रपयित्वेति ग्रहणं सिद्धचरोरुपादाननिवृत्त्यर्थम् । आघारावाज्यभागावित्यनेन प्राप्तत्वात्पुनराज्यभागग्रहणम् अष्टाज्याहुतीनामवसरविधानार्थम्, अष्टाविति ग्रहणं मन्त्रप्रतीकसंशय-निराकरणार्थम् । यद्यष्टसङ्ख्याग्रहणं न क्रियते तर्हि त्वन्नो अग्ने नयेति द्वितीया शङ्क्येत तथा सत्वन्नो अग्ने सहस्राक्षेति । त्वन्नो अग्न इति प्रथमा सत्वन्नो अग्न इति द्वितीया इमम्मे वरुणेति तृतीया तत्त्वायामि इति च० येतेशतमिति पं० अयाश्चाग्न इति ष० उदुत्तममिति स० भवतन्न इत्यष्ट० । **पुरस्तादेवमुपरिष्टात्स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा जुहोति**–अग्न्याधेयदेवताभ्य इत्यवाच्यम् । अग्न्याधेयदेवताभ्यो हुत्वेति वक्ष्यमाणत्वात् । वाच्यं वा अग्न्याधेये हि विकल्पेन द्वयोरपि देवतात्वमस्ति तयोर्देवतात्वं मा भूत्, किन्तु बहुत्वविशिष्टानामत्र देवतात्वं यथा स्यादित्यदोषः । स्थालीपाकस्येत्यवयवषष्ठी । पुरस्तात्स्थालीपाकस्य स्थालीपाकात्पूर्वमष्टर्चहोमः । अग्न्याधेयदेवताभ्यो हुत्वा एवमुपरिष्टादष्टर्चहोमः । **स्विष्टकृते चायास्यग्नेर्वषट्कृतं यत्कर्मणात्यरीरिचं देवा गातुविद इति**–उपरितनान्ते अष्टर्चहोमान्तस्थालीपाकस्याग्नये स्विष्टकृते स्वाहेति आहुतिं जुहोति । चशब्दादाज्येन अयास्यग्न इति–मन्त्रेणाहुतिं जुहुयात् । स्विष्टकृद्धोमस्य प्राप्तत्वात्पुनर्ग्रहणमयास्यग्न इति होमस्यावसरविधानार्थम् । मन्त्रस्यायमर्थः । हे देवा गातुविदो यज्ञवेत्तरो देवाः अग्नेः संबन्धि यद्वषट्कृतं हुतं यत् येन कर्मणा यजनविधिना कृत्वा अहमत्यरीरिचमाधिकं कृतवानस्मीति तेन कर्मणा प्रसन्नानां भवतां प्रसादात्तददयासि अनश्वरमव्याहतमस्तु । **बर्हिर्हुत्वा प्राश्नाति**–परिस्तरणबर्हिर्हस्तेनैव हुत्वा पात्रान्तरस्थापितहोमशेषद्रव्यं भक्षयति । प्राशनस्य प्राप्तत्वात् । बर्हिर्होमोत्तरकालविधानार्थं ग्रहणम् । शेषरक्षणं भक्षणं च श्रौतसूत्रे उक्तमस्ति । पाकयज्ञेष्ववत्तस्यासर्वहोमो हुत्वा शेषप्राशनमिति । अस्यार्थः पाकशब्देन च स्मार्तहोमा उच्यन्ते । तत्र होमार्थं यदवत्तं गृहीतं तस्य असर्वहोमः कर्तव्यः स्रुवादिभिर्यद् गृहीतं तद्धुत्वा किञ्चित्परिशेष्य पात्रान्तरे स्थापनमित्यर्थः । सर्वहोमान्हुत्वा पात्रान्तरस्थापितसर्वशेषाणां प्राशनम् । बर्हिर्होमश्चात्रैव वचनान्नान्यकर्मसु । बर्हिर्होमे प्रजापतिर्देवता अनिरुक्तत्वात् । तथा च लिङ्गम् अनिरुक्तो वै प्रजापतिरिति । “आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते । मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः” इति **छन्दोगपरिशिष्टे कात्यायनोक्तेश्च** । **ततो ब्राह्मणभोजनम्**–तत इति सूत्रादेवं ज्ञायते मध्ये मार्जनं, पवित्रप्रतिपत्तिः, प्रणीताविमोको, दक्षिणादानं च कृत्वा ब्राह्मणभोजनम् । एकद्विबहुषु समासस्य तुल्यत्वादेकस्मिन्नपि चरितार्थत्वादेकस्यैव भोजनमिति । यत्र बहूनां भोजनं तत्र स्वयमेवोपदिशति यथा संस्थिते कर्मणि ब्राह्मणान्भोजयेदिति तथा सर्वासाम्पयसि पायस श्रपयित्वा ब्राह्मणान्भोजयेदिति । अत्र स्मृत्यन्तरोक्तत्रयोविंशतिब्राह्मणभोजनमिति **हरिहरपद्धतौ** । चतुस्त्रिंशद्भोजनमिति **रेणुकदीक्षिताः** । यज्ञपार्श्वे विशेषः । “गर्भाधानादिसंस्कारे ब्राह्मणान्भोजयेद्दश । शतं विवाहसंस्कारे पञ्चाशन्मेखलाविधौ ॥ आवसथ्ये त्रयस्त्रिंशच्छ्रौताधाने शतात्परम् । अष्टकं भोजयेद्भक्त्या तत्तत्संस्कारसिद्धये ॥ सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ । चातुर्मास्ये तु चत्वारि*शतानि पञ्च सुराग्रहे* ॥ अयुतं वाजपेये च ह्यश्वमेधे चतुर्गुणम् । आग्रयणे प्रायश्चित्ते ब्राह्मणान्दश पञ्च च” इति अत्रैवं व्यवस्था । यत्र ततो ब्राह्मणभोजनमिति सूत्रमस्ति तत्रैकं पूर्वं भोजयित्वा यज्ञपार्श्वोक्तं ब्राह्मणभोजनम् । यत्र विवाहादौ सूत्रं नास्ति तत्र कर्मान्ते परिशिष्टोक्तमेव भोजनम् । इति श्रीत्रिराग्निचित्सम्राट्स्थपति–श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे द्वितीया कण्डिका ॥ २ ॥ * ॥

अथावसथ्याधाने पदार्थक्रमः । तच्च चतुर्थ्युत्तरकालेऽभ्रातृमतः, भ्रातृमतस्तु धनविभागकाले । गृहपतौ प्रेते एकादशेऽहानि प्रागेवैकादशश्राद्धाद्द्वादशेऽहानि वा मातृपूजाऽऽभ्युदयिकरहितं ज्येष्ठः कुर्यात् । कालातिक्रमे तु प्रायश्चित्तं कृत्वा माघादिपञ्चमासेषु श्रावणे आश्विने वा कार्यम् । तत्र पूर्वं वपनं कृत्वा अतिक्रान्तसंवत्सरसङ्ख्यया प्राजापत्यरूपं प्रायश्चित्तं मुख्यविधिना चरेत् । तदशक्तौ प्रतिप्राजापत्यं गां दद्यात् । तदभावे तन्मूल्यं निष्कमेकमर्द्धं तदर्द्धं वा दद्यात् । तदभावे प्रतिप्राजापत्यं द्वादशब्राह्मणभोजनम्, अयुतगायत्रीजपं गायत्र्या तिलाज्यसहस्रहोमं वा शक्त्यपेक्षया कुर्यात् । तत्रैवं सङ्कल्पः । आधानाकरणजनितदोषनाशार्थं वर्षसङ्ख्याकान्कृच्छ्रानहमाचरिष्ये । अथवा प्राजापत्यप्रत्याम्नायत्वेन प्रतिप्राजापत्यमेकैकां गां ब्राह्मणेभ्योऽहं सम्प्रददे । अथवा एतावतीनां गवां मूल्यमिदं सम्प्रददे । ब्राह्मणान्वा भोजयिष्ये । एवमग्रेऽपि सङ्कल्पः । ततः सायंप्रातर्होमद्रव्यं प्रत्यहमाहुतिचतुष्टय-

---

* ‘शतानि पञ्च सुराग्रहे’ इत्येव पाठो बहुपुस्तकेषु दृश्यते ।

परिमितमतिक्रान्तदिवसान्गणयित्वा ब्राह्मणेभ्यो दद्यात् । तन्मानं च **कारिकायाम्**—"षष्टिप्रस्थमितं धान्यं त्रिप्रस्थप्रमितं घृतम्" इति संवत्सरस्योक्तम् । "प्रसृतिद्वितयं मानं प्रस्थं मानचतुष्टयम्" इति च । तत्र संकल्पः । होमाकरणजनितप्रत्यवायपरिहारार्थम् एतावद्वार्षिकं दधियवतण्डुलानामन्यतमं ब्राह्मणेभ्योऽहं सम्प्रददे । तन्मूल्यं वा दद्यात् । इतरपक्षाद्यादिकर्मद्रव्यदाननिवृत्तिः । "हौम्यं दद्यात्" इति वचनादिति **रामवाजपेयिनः हरिहरश्च** । **गङ्गाधरस्तु** सायम्प्रातर्होमपक्षादिकर्मपिण्डपितृयज्ञाद्यनुसन्धानार्थं साधनभूतं होमद्रव्यमिति लिखितवान् । ततो यथोक्ते काले पूर्वाह्णे वैश्वदेवं कृत्वा गणपतिं पूजयित्वा पुण्याहवाचनं कुर्यात् । तद्यदत्र कर्तव्यं तदुच्यते । **व्यासः**—"सम्पूज्य गन्धमाल्याद्यैर्ब्राह्मणान्स्वस्ति वाचयेत् । धर्मकर्मणि माङ्गल्ये संग्रामेऽद्भुतदर्शने"। **गृह्यपरिशिष्टे**--"अथ स्वस्तिवाचनमृद्धिपूर्तेषु ऋद्धिर्विवाहान्ता अपत्यसंस्काराः । प्रतिष्ठोद्यापने पूर्तं तत्कर्मणश्चाद्यन्तयोः कुर्यात्" इति । **आश्वलायनस्मृतिः**—"वैदिके तान्त्रिके चादौ ततः पुण्याह इष्यते"। **शौनकः**—"पुण्याहवाचनविधिं वक्ष्यमोऽथ यथाविधि । प्रयोक्तुः कर्मणामादावन्ते चोदयसिद्धये" इति । तच्च कर्मप्रयोगान्तर्गतमिति । केचित् बह्वस्तु प्रयोगबहिर्भूतमिति । आद्यपक्षे कर्मप्रयोगसङ्कल्पं कृत्वा कार्यम् । द्वितीये तु तत्कृत्वा कर्मसङ्कल्पः । अथ **प्रयोगः** । **हेमाद्रौ दानखण्डे** **बह्वृचगृह्यपरिशिष्टत्वेनोक्तः** सकलसाधारणशिष्टाचारप्राप्तश्च **पुण्याहवाचनप्रयोगः** । कृतमङ्गलस्नानः स्वलङ्कृतः कृताचमनः प्राङ्मुखो यजमानो वस्त्राच्छादिते पीठे उपविश्य पत्नीं च स्वदक्षिणतः प्राङ्मुखीमुपवेश्य संस्कार्यं च तथैवोपवेश्य सुमुखश्चैकदन्तश्चेत्यादि शुक्लाम्बरधरं देवम्० अभीप्सितार्थ० सर्वमङ्गलमाङ्गल्ये० सर्वदा सर्वकार्येषु० सर्वेषु कालेषु समस्तदेशेषु० तदेव लग्नम्० यत्र योगेश्वरः कृष्णो० सर्वेष्वारम्भकार्येषु० इति श्लोकान्पठित्वा । ॐ लक्ष्मीनारायणाभ्यां नमः । उमामहेश्वराभ्यां नमः । शचीपुरन्दराभ्यां नमः । मातापितृभ्यां नमः । इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः । आचमनप्राणायामौ कृत्वा देशकालौ सङ्कीर्त्य अमुकफलसिद्ध्यर्थं श्वोऽद्य वाऽमुककर्माहं करिष्ये । तदङ्गतयाऽऽदौ पुण्याहवाचनादि करिष्ये इति सङ्कल्पयेत् । यदा तु प्रयोगाद्बहिर्भूतं पुण्याहवाचनाद्यङ्गं तदाऽमुकफलसिद्ध्यर्थममुककर्म कर्तुमङ्गभूतमादौ पुण्याहवाचनादि करिष्ये इति प्रत्येकं सङ्कल्पः । प्रधानसङ्कल्पस्तु सर्वं कृत्वा तद्दिने श्वो वा कार्यः । ततः कर्त्ता । स्वपुरतः महीद्यौः पृथिवीचन इति भूमिं स्पृष्ट्वा ओषधयः समिति तण्डुलपुञ्जं कृत्वा आजिघ्रकलशमिति पुञ्जोपरि सलक्षणं धातुमयं मृन्मयं वा कलशं निधाय । इमम्मे वरुणेति तीर्थजलेन पूरयित्वा गन्धद्वारामिति गन्धङ्कलशे प्रक्षिप्य चन्दनादिना तमनुलिप्य या ओषधीरिति सर्वौषधीः ओषधयः समिति यवान्काण्डात्काण्डादिति दूर्वाः अश्वत्थेव इति पञ्च पल्लवान् स्योनापृथिवीति पञ्च सप्त वा मृदः याः फलिनीरिति फलं परिवाजपतिरिति पञ्च रत्नानि हिरण्यगर्भ इति हिरण्यं युवासुवासा इति वस्त्रेण रक्तसूत्रेण च वेष्टयेत्, पूर्णादर्वीति धान्यपूर्णं फलसहितं पात्रमुपरि निदध्यात्, तत्त्वायामीति कलशे वरुणमावाहयेत् चन्दनादिना पूजयेच्च । ततः कलशे देवता आवाहयेत् । "कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः । अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ॥ आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः । सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ।" इति । ततः कलशप्रा० । "देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ।" अवनिकृतजानुमण्डलः कमलमुकुलसदृशमञ्जलिं शिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा आशिषः प्रार्थयेत् । प्रार्थनामाह—एताः सत्या आशिषः सन्तु दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च । तेनायुष्प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु । शिवा आपः सन्तु सौमनस्यमस्तु अक्षतं चारिष्टं चास्तु गन्धाः पान्तु सुमङ्गल्यं चास्तु अक्षताः पान्त्वायुष्यमस्तु पुष्पाणि पान्तु सौश्रियमस्तु ताम्बूलानि पान्त्वैश्वर्यमस्तु दक्षिणाः पान्तु बहु देयं चास्तु दीर्घमायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु । अत्र सर्वत्र ब्राह्मणैरस्त्विति प्रत्युत्तरं देयम् । मङ्गला सर्ववेदयज्ञक्रियाकरणकर्मा-

रम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोङ्कारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं वह्वृषिसम्मतं संविज्ञात भवाद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये, विप्राः वाच्यतामिति वदेयुः । एवमुत्तरत्रापि यथायोगं प्रत्युत्तरम् । ततो यजमानः भद्रं कर्णेभिः० ऋ० १ द्रविणोदाद्रविण स० ऋ० १ सवितापश्चात्तात्० ऋ० १ नवोनवो भवति० ऋक् उच्चादिवि० ऋ० १ आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे । यस्त्वाहृदाकीरिणामन्यमानोमर्त्यं मत्या जोहवीमि जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् । यस्मै त्वᳬ सुकृते जातवेद उलोकमग्ने कृणवस्योनम् । अश्विनᳬ सपुत्रिणं वीरवन्तं गोमन्तं रयिन्नशते स्वस्ति । व्रतनियमतपःस्वाध्यायक्रतुशमदमदानाविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् । विप्राः समाहितमनसः स्मः । यजमानः प्रसीदन्तु भवन्तः । विप्राः प्रसन्नाः स्मः । यज० शान्तिरस्तु पुष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तु अविघ्नमस्तु आयुष्यमस्तु आरोग्यमस्तु शिवङ्कर्मास्तु कर्मसमृद्धिरस्तु वेदसमृद्धिरस्तु शास्त्रसमृद्धिरस्तु पुत्रसमृद्धिरस्तु धनधान्यसमृद्धिरस्तु इष्टसम्पदस्तु अरिष्टनिरसनमस्तु यत्पापं तत्प्रतिहतमस्तु यच्छ्रेयस्तदस्तु उत्तरे कर्मण्यविघ्नमस्तु उत्तरोत्तरमहरहरभिवृद्धिरस्तु उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम् तिथिकरणमुहूर्तनक्षत्रसम्पदस्तु तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे सदैवते प्रीयेताम् दुर्गापाञ्चाल्यौ प्रीयेताम् अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम् ब्रह्मपुरोगाः सर्वे देवाः प्रीयन्ताम् माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम् वशिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् ऋषयश्छन्दांस्याचार्या वेदा यज्ञाश्च प्रीयन्ताम् ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् श्रीसरस्वत्यौ प्रीयेताम् श्रद्धामेधे प्रीयेताम् भगवती कात्यायनी प्रीयताम् भगवती वृद्धिकरी प्रीयताम् भगवन्तौ विघ्नविनायकौ प्रीयेताम् भगवान्स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्रीय० हरिहरहिरण्यगर्भाः प्रीयन्ताम् सर्वा ग्रामदेवताः प्रीयन्ताम् सर्वाः कुलदेवताः प्रीयन्ताम् हताश्च ब्रह्मविद्विषः हताः परिपन्थिनः हताः अस्य कर्मणो विघ्नकर्तारः शत्रवः पराभवं यान्तु शाम्यन्तु घोराणि शाम्यन्तु पापानि शाम्यन्त्वीतयः शुभानि वर्द्धन्ताम् शिवा आपः सन्तु शिवा ऋतवः सन्तु शिवा अग्नयः सन्तु शिवा आहुतयः सन्तु शिवा ओषधयः सन्तु शिवा वनस्पतयः सन्तु शिवा अतिथयः सन्तु अहोरात्रे शिवे स्याताम् निकामे० कल्पताम् । शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम् भगवान्नारायणः प्रीयताम् भगवान्पर्जन्यः प्रीयताम् भगवान्स्वामी महासेनः प्रीयताम् पुण्याहकालान्वाचयिष्ये ब्राह्मणाः वाच्यताम् । उद्गाते० पुण्यमावद । अनया पुण्याह एव कुरुते । ब्राह्मणा मम गृहे अस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु । इति स्वयं मंदस्वरेणोक्त्वा ब्राह्मणैॐ पुण्याहमिति तथोक्ते पुनरेव मध्यमस्वरेणोक्त्वा तथैव तैरुक्ते पुनरेवमुच्चस्वरेणोक्ते तथैव तैरुक्ते । स्वस्तये० पुनः । आदित्य० ममृत ᳬ स्वस्ति ब्राह्मण इत्यादि कर्मणइत्यन्तं पूर्ववत्स्वस्ति भवन्तो ब्रुवन्तु इति त्रिः । आयुष्मते स्वस्तीति प्रतिवचनन्त्रिः-। ऋध्याम० काममप्राः सर्वामृद्धिं प्रतितिष्ठति ब्राह्मणमित्यादि । अस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु इति त्रिः । ॐ ऋध्यतामिति त्रिः । श्रिये जातः श्रिये० मितद्रौ । श्रिय एवै० एवं वेद ब्राह्मणमित्यादि । अस्य कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्त्विति त्रिर्ब्रूयात् । अस्तु श्रीरिति विप्रास्त्रिः । ततः कर्तुर्वामतः पत्नीमुपवेश्य पात्रपातितजलेन पल्लवदूर्वादिभिरुदङ्मुखा विप्रा अभिषिञ्चेयुस्तिष्ठन्तः । तत्र मन्त्राः । देवस्यत्वेत्यादि । सुरास्त्वामभिषिञ्चन्त्वित्यादि पौराणान् श्लोकानपि पठन्त्याभिषेके ततो नीराजनं कुर्यात् । अथाभ्युदयिक**श्राद्धविधिः** । तच्च गर्भाधानादिषु गर्भसंस्कारेषु जातकर्मादिष्वपत्यसंस्कारेषु अग्न्याधानादिषु श्रौतकर्मसु श्रवणाकर्मसु वापीकूपतडागारामाद्युद्यापनादिषु देवप्रतिष्ठायां वानप्रस्थाश्रमसंन्यासस्वीकारे तुलापुरुषादिमहादानादौ नवगृहप्रवेशे महानाम्न्यादिवेदव्रतेषु राजाभिषेके शान्तिकपौष्टिकेषु च सर्वेषु उपाकर्मोत्सर्जनयोरप्येके नवीनयोर्वाऽनयोरन्यत्राप्येवंविधे कार्यम् । इदमाभ्युदयिकश्राद्धं वक्ष्यमाणं च मातृपूजनमेकस्यानेकसंस्कारेष्वेककर्तृकेषु युगपदुपस्थितेषु सर्वादौ सकृदेव तन्त्रेणैव कार्यम्, न तु प्रतिसंस्कारमावृत्त्या । यथा दैवादकृतजातकर्मादिकस्योपनयनकाले जातकर्माद्यनुष्ठाने देशान्तरगतस्य मृतबुद्ध्या कृतौर्ध्वदेहिकस्यागतस्य पुनर्जातकर्मादिसंस्काराणां विहितानां युगपदनुष्ठाने कर्मनाशाजलस्पृष्टादीनां प्रायश्चित्ततया पुनः संस्काराणां युगपदनुष्ठाने वा । तदुक्तं—**ब्रह्मपुराणे**—"गणशः क्रियमाणानां मातृभ्यः पूजनं सकृत् । सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु ॥" इति **कात्यायनः**—"कुड्यलग्ना वसोर्द्धाराः पञ्चधारा घृतेन तु । कारयेत्सप्त वा धारा नातिनीचा न चोच्छ्रिताः ॥

गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह" इति। आत्मदेवता आत्मकुलदेवता।"आयुष्याणि च शान्त्यर्थं जपेदत्र समाहितः।" आयुष्याणि आनोभद्रा इत्यादीनि । ततो वृद्धिश्राद्धं नवदैवत्यं पार्वणत्रयात्मकम् । तत्र क्रममाहाश्वलायनाचार्यः–"माता पितामही चैव सम्पूज्या प्रपितामही । पित्रादयस्त्रयश्चैव मातुः पित्रादयस्त्रयः ॥ एते नवार्चनीयाः स्युः पितरोऽभ्युदये द्विजैः" इति । यत्तु **वृद्धवसिष्ठः**–"नान्दीमुखे विवाहे च प्रपितामहपूर्वकम् । नाम सङ्कीर्तयेद्विद्वानन्यत्र पितृपूर्वकम् ॥" इति । **स्मृत्यर्थसारश्च**–"वृद्धमुख्यास्तु पितरो वृद्धिश्राद्धेषु भुञ्जते" इति तच्छाखान्तरविषयम् । **कात्यायनानां** तु आनुलोम्येन मात्रादिक्रमेणैव नान्दीमुखाः पितरः पितामहाः प्रपितामहा इति प्रयोगदर्शनात् । यत्तु **ब्रह्मपुराणे**–"पिता पितामहश्चैव तथैव प्रपितामहः । त्रयो ह्यश्रुमुखा ह्येते पितरः सम्प्रकीर्तिताः ॥ तेभ्यः पूर्वे त्रयो ये तु ते तु नान्दीमुखाः स्मृताः ।" इति तत् महालयप्रकरणपठितप्रौष्ठपदपौर्णमासीनिमित्तकश्राद्धविषयं तत्प्रकरणपाठादित्येव **हेमाद्र्यादय** ऊचिरे । इह च नान्दीमुखसंज्ञकान्मात्रादीनुद्दिशेत् । **विष्णुपुराणे**–कन्याविवाहादीननुक्रम्य "नान्दीमुखान्पितॄनादौ तर्पयेत् प्रयतो गृही" इत्युक्तेः । **ब्रह्मपुराणे** च–जन्माद्यनुक्रम्य "पितॄन्नान्दीमुखान्नाम तर्पयेद्विधिपूर्वकम्" इत्युक्तेः । **वृद्धपराशरेण** तु देवानामपि नान्दीमुखविशेषणमुक्तम् । नान्दीमुखेभ्यो देवेभ्यः प्रदक्षिणं कुशासनमिति । वृद्धिश्राद्धे च कालः । कर्माहात्पूर्वेद्युर्मातृपार्वणम्, कर्माहे पितृपार्वणम्, कर्मोत्तराहे मातामहपार्वणमिति । अस्यासम्भवे पूर्वेद्युरेव पूर्वाह्णे मातृकम्, मध्याह्ने पैतृकम्, अपराह्णे मातामहानाम् । अस्याप्यसम्भवे आह **वृद्धमनुः**–"अलाभे श्राद्धकालानां नान्दीश्राद्धत्रयं बुधः । पूर्वेद्युरेव कुर्वीत पूर्वाह्णे मातृपूर्वकम् ॥" इति । इदं च महत्सु कर्मसु । अल्पेषु तु कर्माह एव श्राद्धम् । पुत्रजन्मनि तु दिने वा रात्रौ वा भुक्तवतोपवासिना वा पुत्रजन्मान्तरमेव कार्यम्, अत्र सङ्कल्पादौ विशेषः **सङ्ग्रहे**–"शुभाय प्रथमान्तेन वृद्धौ सङ्कल्पमाचरेत् । न षष्ठ्या यदि वा कुर्यान्महान्दोषोऽभिजायते ॥ अनस्मद्धृद्धशब्दानामरूपाणामगोत्रिणाम् । अनाम्नामतिलाद्यैश्च नान्दीश्राद्धं च सव्यवत् ॥" **आश्वलायन**कारिकायाम्–"सम्बन्धनामरूपाणि वर्जयेदत्र कर्मणि" इदं तु शाखान्तरविषयम् । अत्र सत्यवसू विश्वेदेवौ तत्स्थाने द्वौ विप्रौ । मात्रादीनां च प्रत्येकं द्वौ द्वौ एवं विंशतिर्ब्राह्मणाः । यद्वा मात्रादीनां त्रयाणां द्वौ द्वौ एवमष्टौ।अत्र नापसव्यम्,तिलस्थाने यवा एव स्वधास्थाने स्वाहाशब्दः सव्यजानुनिपाताभावः सर्वं प्राङ्मुख एव कुर्यात् । प्रदक्षिणमुपचार ऋजुदर्भैः क्रियेत्यादयो विशेषा ग्रन्थान्तरतो ज्ञेयाः । पिण्डदाने कुलदेशाचारतो व्यवस्था । **भविष्यत्पुराणे**–"पिण्डनिर्वपणं कुर्यान्न वा कुर्यान्नराधिप । वृद्धिश्राद्धे महाबाहो कुलधर्मानवेक्ष्य तु ॥" पिण्डदानपक्षे विशेषो **वसिष्ठेनोक्तः**–"दधिकर्कन्धुमिश्रांश्च पिण्डान्दद्याद्यथाक्रमम् ।" कर्कन्धुर्बदरीफलम् । एकैकस्मै पिण्डद्वयं देयम् । "एकं नाम्नाऽपरं तूष्णीं दद्यात्पिण्डद्वयं बुधः" इति **चतुर्विंशति**मतात् । अन्ये च बहवो विशेषा ग्रन्थान्तरतो ज्ञेयाः । दाक्षिणात्यानां गुर्जराणां च विस्तृतवृद्धिश्राद्धाभावान्नेहोच्यते । अथाभ्युदयिके कर्तृनिर्णयः **सायणीये**–"नान्दीश्राद्ध पिता कुर्यादाद्ये पाणिग्रहे पुनः । अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकम् ॥" द्वितीयपाणिग्रहादौ वर एव कुर्यादित्यर्थः । **कात्यायनः**–"स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु । पिण्डानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात् ॥" तेषां सुतानामोद्वाहनात्प्रथमविवाहपर्यन्तं पिता स्वपितृभ्यः पिण्डास्तदुपलक्षितं वृद्धिश्राद्धं कुर्यात् । तस्य पितुरभावे तु तस्य संस्कार्यस्य पितॄणां यः क्रमस्तेन क्रमेण पितृव्याचार्यमातुलादिः श्राद्धं दद्यात् न च स्वपितृभ्यः इति **हेमाद्रिणा** व्याख्यातम् । जीवत्पितृकस्तु पितृमात्रादिभ्यो वृद्धिश्राद्धं कुर्यात् । "वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति । येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥" एतत्साग्निकविषयमित्येके । **विष्णुः**–"पितरि जीवति यः श्राद्धं कुर्यात्स येषां पिता कुर्यात्तेभ्य एव तत्कुर्यात्पितरि पितामहे च येषां पितामहः । पितरि पितामहे प्रपितामहे च नैव दद्यात्" इति । **अथाश्वलायनगृह्यपरिशिष्टे** तु जीवत्पिता सुतसंस्कारेषु मातृमातामहयोः कुर्यात् तस्यां जीवत्यां मातामहस्यैव कुर्यात्" इति ॥ अथास्य शिष्टप्रचाराचारपरिगृहीतः सङ्कल्पविधिना प्रयोगः । उपनयादिमहत्सु कर्मसु पूर्वेद्युर्जातकर्माद्यल्पेषु तदहरेव नान्दीश्राद्धं कुर्यात् । तत्रादौ कर्ता कृतमाङ्गलिकस्नानो धौतवासाः कृतस्वस्त्ययनो नान्दीश्राद्धपूर्वाङ्गं मातृकापूजनं कुर्यात् । पूजाप्रकारस्तु पूजोपकरणान्युपकल्प्य प्राङ्मुख उपविश्य कुशयवजलान्यादाय अद्येत्यादि अमुककर्माङ्गतया गणपतिगौर्यादिचतुर्दशमातृका-

पूजनमहं करिष्ये इति सङ्कल्प्य । अक्षतैः भूर्भुवः स्वः गणपते इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः गौरि इहागच्छ इह तिष्ठ । एवं पद्मे शचि मेधे सावित्रि विजये जये देवसेने स्वधे स्वाहे धृते तुष्टे पुष्टे आत्मकुलदेवते इति प्रत्येकमावाह्य ततो मनो जूतिरिति प्रतिष्ठाप्य ॐ गणपतये नम इति प्रणवादिनमोऽन्तचतुर्थ्यन्तस्वस्वनाममन्त्रेण पञ्चदशापि षोडशोपचारैः पूजयेत् । मातृणां गणदेवतात्वपक्षे तु गणपतिः गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा धृतिः तुष्टिः पुष्टिरात्मकुलदेवता । इहागच्छत इह तिष्ठतेति आवाह्य प्रतिष्ठाप्य ॐ गणपत्यादिभ्यो नम इति पूर्ववदुपचारैः पूजयेत् । ततः पञ्च सप्त वा नातिनीचा नचोच्छ्रिताः कुड्यादिषु वसोः पवित्रमसीति घृतधारा उत्तरसंस्थाः कुर्यात् । ततो वसोर्द्धारादेवताभ्यो नम इति पञ्चोपचारैः पूजां कुर्यात् । वसोर्द्धाराकरणं च कातीयानामेव नान्येषाम् । तत आयुष्यमन्त्रजपः आयुष्यं वर्चस्यं० दुमाम् ॥ १ ॥ न तद्रक्षा ९ सि० मायुः ॥२॥ यदाबध्नन्दा० यथासम् ॥ ३ ॥ इत्यादि आयुष्यमन्त्रजपः ॥ अथ **नान्दीश्राद्धम्** । तच्च त्रिविधम् । विवाहादिनित्यनैमित्तिकं पुत्रजन्माद्यनियतनिमित्तम् अग्न्याधानादिनिमित्तं चेति । तत्र विवाहादिनिमित्तं प्रातः कार्यम् । तदाह **शातातपः** । " प्रातर्वृद्धिनिमित्तकम् " इति । अत्र प्रातःशब्दः सार्द्धप्रहरात्मककालवचनः । तदाह **गार्ग्यः**—"ललाटसम्मिते भानौ प्रथमः प्रहरः स्मृतः । स एव सार्द्धसंयुक्तः प्रातरित्यभिधीयते ॥ " अग्न्याधाननिमित्तं त्वपराह्णे कार्यम् । तदाह **गालवः**—"पार्वणं चापराह्णे तु वृद्धिश्राद्धं तथाग्निकम्" इति । अग्न्याधाननिमित्तं वृद्धिश्राद्धमपराह्णे कुर्यादित्यर्थः । पुत्रजन्मादौ निमित्तानन्तरमेव तत्कार्यम् । **निर्णयामृतेऽप्येवम्** । कर्ता उक्तकाले सुस्नातः सुप्रक्षालितकरचरणः स्वाचान्तः सुस्नातानाचान्तानष्टौ ब्राह्मणानाहूय बहिरुपक्लृप्ते गोमयोपलिप्ते मण्डले स्वागतं वः सुस्वागतमिति प्रत्येकं प्रश्नोत्तरपूर्वकं प्रागग्रकुशोत्तरेष्वासनेषु प्राङ्मुखान् दक्षिणोपक्रमान् उदगपवर्गान् उपवेश्य स्वयमुदङ्मुख उपविश्य आद्ययोर्विप्रयोर्जानुनी स्पृशन् प्राग्वद्देशकालौ सङ्कीर्त्य अमुककर्मनिमित्ताभ्युयिकश्राद्धाख्ये कर्मणि नान्दीमुखास्मन्मात्रादित्रय--नान्दीमुखास्मत्पित्रादित्रय—नान्दीमुखास्मन्मातामहादित्रयसम्बन्धि—सत्यवसुसंज्ञकाविश्वेदेवकृत्ये भवन्तौ मया निमन्त्रिताविति ताम्बूलादिदानपूर्वकं निमन्त्रयेत् । निमन्त्रितौ स्व इति प्रतिवचनम् । पुनस्ताम्बूलादिकमादाय तदुत्तरयोर्जानुनी स्पृशन् अद्येहामुकगोत्राणां नान्दीमुखास्मन्मातृपितामहीप्रपितामहीनाममुकामुकदेवीनामद्येहकर्तव्यामुककर्मनिमित्ताभ्युदायिकश्राद्धे भवन्तौ मया निमन्त्रितौ इति ताम्बूलादिदानपूर्वकं निमन्त्रयेत् । निमन्त्रितौ स्व इति प्रतिवचनम् । पुनस्ताम्बूलादिकमादाय तदुत्तरयोर्विप्रयोर्जानुनी स्पृशन् अद्येहामुकगोत्राणां नान्दीमुखास्मत्पितृपितामहप्रपितामहानाममुकामुकशर्म्मणामद्यकर्तव्यामुककर्मनिमित्ताभ्युदायिकश्राद्धे भवन्तौ मया निमन्त्रिताविति ताम्बूलादिदानपूर्वकं निमन्त्रयेत् । निमान्त्रितौ स्व इति प्रतिवचनम् । पुनस्ताम्बूलादिकमादायेहामुकगोत्राणां नान्दीमुखास्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणामद्यकर्तव्यामुककर्मनिमित्ताभ्युदायिकश्राद्धे भवन्तौ मया निमन्त्रिताविति ताम्बुलादिदानपूर्वकं निमन्त्रयेत् । निमन्त्रितौ स्व इति प्रतिवचनम् । "अक्रोधनैः शौ० कारिणा" इति सर्वत्र नियमं श्रावयेत् । ततो देवद्विजपूर्वकं चरणप्रक्षालनं विधाय अद्येह नान्दीमुखास्मन्मात्रादित्रय—नान्दीमुखास्मत्पित्रादित्रय—नान्दीमुखास्मन्मातामहादित्रयसम्बान्धि—सत्यवसुसञ्ज्ञका विश्वेदेवा एतत्पादार्घ्यं वो नम इति गन्धाक्षतादियुक्तं पादार्घ्यं दत्त्वा अद्येहामुकगोत्रा नान्दीमुखास्मन्मातृपितामहीप्रपितामह्योऽमुकामुकदेव्य एतत्पादार्घ्यं वो नम इति मातृवर्गत्रयब्राह्मणचरणयोर्दत्त्वा अद्येहामुकगोत्रा नान्दीमुखास्मत्पितृपितामहप्रपितामहा अमुकामुकशर्माण एतत्पादार्घ्यं वो नम इति पित्रादिवर्गब्राह्मणचरणयोर्दत्त्वा अद्येहामुकगोत्रा नान्दीमुखास्मन्मातामहप्रमातामहवृद्धप्रमातामहा अमुकामुकशर्माण एतत्पादार्घ्यं वो नम इति मातामहवर्गब्राह्मणचरणयोरर्घ्यं दद्यात् । ततो ब्राह्मणानाचामय्य स्वयमप्याचम्य श्राद्धदेशे प्रथमकल्पितेष्वासनेषु इदमासनमास्यतामिति प्रयोगेणोदगपवर्गं प्राङ्मुखान्देवपूर्वं द्विजानुपवेश्य स्वयमुदङ्मुख उपविश्य कर्मसौकर्यार्थं कर्मपात्रं जलेनापूर्य दूर्वादधियवकुशांस्तत्र निक्षिप्य प्राणायामत्रयपूर्वकं विष्णुस्मरणं कृत्वा कर्मपात्रजलेनोपकरणानि प्रोक्ष्य दूर्वाकुशयवजलानि दक्षिणकरेणादाय पूर्ववद्देशकालकीर्तनान्ते अमुककर्मनिमित्ताभ्युदायिकश्राद्धाख्ये कर्मणि अमुकगोत्राः नान्दीमुखास्मन्मातृपितामहीप्रपितामह्योऽमुकामुकदेव्योऽमुकगोत्रा नान्दीमुखास्मत्पितृपिताहप्रपितामहा अमुकामुकशर्माणः अमुकगोत्रा नान्दीमुखा अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणः प्रधानदेवताः सत्यवसुसञ्ज्ञका विश्वेदेवा अङ्गदेवताः यथोक्तलक्षणं हविः ब्राह्मण आहवनीयार्थेऽमुकगोत्राणां नान्दीमुखास्मन्मातृपितामहीप्रपितामहीनाममुकामुकदेवीनाममुकगोत्राणां नान्दीमुखास्मत्पितृपितामहप्रपितामहानाममुकामुकशर्मणाम-

मुकगोत्राणां नान्दीमुखास्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणाममुककर्मनिमित्तं सत्यवसुसञ्ज्ञकविश्वेदेवपूर्वकं साङ्कल्पिकमाभ्युदयिकं श्राद्धं भवदनुज्ञयाऽहं करिष्ये इति सङ्कल्पः । कुरुष्वेति प्रतिवचनम् । ततः सप्रणवव्याहृतिपूर्विकाया गायत्र्यास्त्रिर्जपः, विष्णुस्मरणम् । मात्रादित्रयपित्रादित्रयमातामहादित्रयश्राद्धसम्बन्धिनः सत्यवसुसञ्ज्ञका विश्वेदेवा इदमासनं वो नम इति प्रागग्रऋजुकुशत्रयं सयवजलं दक्षिणतः आसनोपरि दत्त्वा अमुकगोत्राः नान्दीमुख्योऽस्मन्मातृपितामहीप्रपितामह्योऽमुकामुकदेव्यः इदमासनं वो नम इति मातृवर्गविप्रद्वयासनोपरि विभज्य दत्त्वा अमुकगोत्राः नान्दीमुखास्मत्पितृपितामहप्रपितामहा अमुकामुकशर्माणः इदमासनं वो नम इति पितृवर्गब्राह्मणद्वयासनोपरि दत्त्वा पित्रादिपदस्थाने मातामहादिपदप्रक्षेपेण तदीयब्राह्मणद्वयासनोपर्यासनं दद्यात् । ततः प्रत्यासनं दीपस्थापनम् । ततो द्वितीयब्राह्मणहस्ते प्रथमब्राह्मणहस्तं दत्त्वा तत्र जलदानपूर्वकं गन्धादि दत्त्वा कुशयवजलान्यादाय मात्रादिपित्रादिमातामहादित्रयसम्बन्धिसत्यवसुसञ्ज्ञका विश्वेदेवा इमानि गन्धपुष्पधूपदीपवासोऽलङ्करणताम्बूलानि वो नमः । अमुकगोत्राः नान्दीमुख्यः अस्मन्मातृपितामहीप्रपितामह्योऽमुकामुकदेव्यः इमानि गन्ध० ताम्बूलानि वो नमः । अमुकगोत्राः नान्दीमुखास्मत्पितृपितामहप्रपितामहाः अमुकामुकशर्माणः इमानि गन्ध० ताम्बूलानि वो नमः । अमुकगोत्रा नान्दीमुखास्मन्मातामहप्रमातामहवृद्धप्रमातामहा अमुकामुकशर्माण इमानि गन्ध० ताम्बूलानि वो नमः । अन्नपरिवेषणम् । पात्रमालभ्य पृथिवी ते० जुहोमि स्वाहेति जपित्वाऽङ्गुष्ठमन्नेऽवगाह्य इदमन्नमिमा आप इदमाज्यं हविरित्युक्त्वा मात्रादित्रयपित्रादित्रयमातामहादित्रयसम्बन्धिनः सत्यवसुसञ्ज्ञका विश्वेदेवा इदमन्नं घृताद्युपस्करसहितं परिविष्टं परिवेष्यमाणं च द्विजेभ्यस्तृप्तिपर्यन्तममृतरूपं वो नम इत्युत्सृजेत् । एवमेव मात्रादिपात्रद्वयमालभ्यामुकगोत्रा नान्दीमुख्योऽस्मन्मातृपितामहीप्रपितामह्योऽमुकामुकदेव्य इदमन्नं घृताद्युपस्करसहितममृतरूपं वो नमः । एवमेव पित्रादिपात्रयोर्मातामहादिपात्रयोरपि सङ्कल्पं कुर्य्यात् । ततोऽश्नत्सु पित्र्यमन्त्रवर्जं जपः । तृप्तान् ज्ञात्वाऽन्नं विकीर्य सकृत्सकृदपो दत्त्वा पूर्ववद्गायत्रीं जपित्वा मधुमतीर्मधुमाध्वीति च सम्पन्नमिति पृष्ट्वा सुसम्पन्नमिति तैरुक्ते शेषमन्नं किं क्रियतामिति पृष्ट्वा इष्टैः सह भुज्यतामिति तैरुक्ते ब्राह्मणानाचामयेत् । सुप्रोक्षितमस्तु शिवा आपस्सन्तु सौमनस्यमस्तु अक्षतं चारिष्टं चास्तु नान्दीमुख्यो मातरः प्रयिन्ताम् । नान्दीमुख्यः पि० न्ताम् । नान्दीमुख्यः प्र० न्ताम् । नान्दीमुखाः पितरः प्रीयन्ताम् । नान्दी० पितामहाः प्रीयन्ताम् । नान्दी० प्रपि० न्ताम् । नान्दी० मातामहाः प्रीयन्ताम् । नान्दी० प्रमा० प्रीयन्ताम् । नान्दी० वृद्धप्रमा० प्री० । इति क्षीरयवजलानि दद्यात् । ततः प्राञ्जलिराशीः प्रार्थयेत् । अघोराः पितरः सन्तु सन्त्विति ब्राह्मणाः । गोत्रं नो वर्द्धतामिति यजमानः वर्द्धतामिति ते । दातारो नोऽभिवर्द्धन्ताम् अभिवर्द्धन्तामिति ते । वेदास्सन्ततिरेव च अभिवर्द्धतामिति क्रमेणोत्तरे । श्रद्धा च नो मा व्यगमत् । मा गात् । बहु देयं च नोऽस्तु अस्तु इति प्रतिवचनम् । ततो मात्रादित्रयपित्रादित्रयमातामहादित्रयश्राद्धसम्बन्धि—वैश्वदेविकश्राद्धप्रतिष्ठार्थममुकशर्मभ्यां भवद्भ्यामियं द्राक्षामलकार्द्रमूलकादिरूपा विष्णुदेवता दक्षिणा मया दत्ता इति देवब्राह्मणाभ्यां दक्षिणां दत्त्वाऽमुकगोत्राणां नान्दीमुखीनां मातृपितामहीप्रपितामहीनाममुकामुकदेवीनां कृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थममुकगो० दत्तेति मात्रादिब्राह्मणाभ्यां दक्षिणां दत्त्वा अमुकगोत्राणां नान्दीमुखानां पितृ० नाम् अमुकामुकशर्मणां कृतैतदाभ्युदयि० दत्तेति पित्रादि० दत्त्वा पित्रादिपदस्थाने मातामहादिपदप्रक्षेपेण मातामहादिब्राह्मणाभ्यां दक्षिणां दद्यात् । ततो विश्वेदेवाः प्रीयन्तामित्युक्त्वा देवद्विजाभ्यां विश्वेदेवाः प्रीयन्तामिति प्रत्युत्तरे दत्ते स्वस्ति भवन्तो ब्रुवन्त्विति सर्वान्प्रत्युक्त्वा स्वस्तीति तैरुक्ते ब्राह्मणान्प्रणिपत्य प्रसाद्य वाजेवाजेवतेति मात्रादिवर्गत्रयद्विजपूर्वकं देवद्विजौ विसृज्य आमावाजस्येति विप्राननुव्रज्य प्रदक्षिणीकृत्याचामेत् । ततो मातृकादि विसर्जयेत् । जीवन्मातृकस्य न मातृपार्वणम् । जीवन्मातामहस्य न मातामहपार्वणम् । द्वारलोपात् । "जीवत्पितृकस्तु येभ्यः पिता दद्यात्तेभ्यो दद्यात्" इत्युक्तमेव । यदा तु पक्वान्नासम्भवस्तदा आमश्राद्धविधिना आमान्नेन कर्तव्यम् । आमान्नस्याप्यलाभे हिरण्येन कर्तव्यम् । ततः पत्नीयजमानयोरहतवस्त्रपरिधानम् । ततः सपत्नीकः प्राङ्मुख उपविश्याद्येत्यादि देशकालौ स्मृत्वा स्मार्ताग्निमहमाधास्ये इति सङ्कल्पं कुर्यात् । "आभ्युदयिकश्राद्धात्पूर्वं सङ्कल्पः" इति **हरिहरः** । "श्राद्धोत्तरम्" इति **रेणुकः** । वैकल्पिकावधारणम् । मन्थनाग्निः, उत्तरतः पात्रासादनम्, द्वे पवित्रे, घृतस्थाली मृन्मयी, चरुस्थाली औदुम्बरी, पालाश्यः समिधः, प्राक्षाघारौ, कोणयोराज्यभागौ, दक्षिणा, पूर्णपात्रम् इत्यवधारणम् । **हरिहरमते** ब्रह्मवरणम्, अरणिप्रदानं च । तत्रैवं ब्रह्मा अरणी आदायाधरारणिं पत्न्यै, उत्तरारणिं यजमानाय प्रयच्छति । तौ चाव-

सथ्याग्निसाधनभूते इमे अरणी आवाभ्यां परिगृहीते इति परिगृहीतः । अरणिप्रदानं स्मार्ते निर्मूलत्वादुपेक्षणीयम् । प्रदानाभावेऽपि धारणम्भवत्येव "अधरामरणिम्पत्नी बिभृयादुत्तरां पतिः" इति **यज्ञपार्श्वपरिशिष्टात्** । उक्तप्रकारेणारणिमानम् । अरणिपूजनम् । ततो यवोनचतुर्दशाङ्गुलमानेन मेखलायुक्तवृत्तखरकरणमग्नेः, सभ्यावसथ्ययोर्गार्हपत्यवत्कुण्डमिति निगमपरिशिष्टात् । यज्ञपार्श्वेऽपि वृत्तमेव कुण्डमुक्तम् । मेखला द्वादशाङ्गुलोच्चा कार्या । ततः खरे परिसमूहनम्, उपलेपनम्,उल्लेखनम्,उद्धरणम्,अभ्युक्षणम्, अरणिपक्षेऽग्निमन्थनम् । तत्र यजमानः प्राङ्मुख ओविलीं धारयति प्रत्यङ्मुखी पत्नी मन्थनं करोति । "पत्नीबहुत्वे सर्वाभिर्मन्थनम्" इति **रेणुकः** । पत्न्या मन्थनाशक्तौ ब्राह्मणेन केनचिन्मन्थनङ्कार्यम् । काष्ठैरग्नेः प्रज्वालनम् । खरे निधानम् । अथवा वैश्यगृहादग्निमाहृत्याग्नेः खरे स्थापनम् । ऋष्यादिस्मरणमत्रेति **रेणुकगङ्गाधरहरिहराः** । तद्विचारणीयम् । कर्मकाले प्रतिमन्त्रं स्मरणमुत पूर्वमेव स्मरणं कृत्वा कर्मारम्भः, "एतान्यविदित्वा योऽधीतेऽनुब्रूते यजते याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भवति"इति **सर्वानुक्रमण्यामुक्तत्वात्**। तत्तत्पदार्थज्ञानमात्रमपेक्षितं,न तु कर्मकालोच्चारणम् यथार्थज्ञानम् । अस्मिन्नावसथ्याधाने त्वं ब्रह्मा भवेति ब्रह्मणो व्यपदेशः, दक्षिणतो ब्रह्मासनमास्तीर्य तत्र ब्रह्मोपवेशनम् । अग्नेरुत्तरतः प्रणीताप्रणयनम्, परिस्तरणम् , पात्रासादनम् , त्रीणि पवित्रच्छेदनानि, पवित्रे द्वे, प्रोक्षणीपात्रं वारणम् , वैकङ्कतमिति **रेणुकः** । आज्यस्थाली, चरुस्थाली, सम्मार्गकुशाः, उपयमनकुशाः, समिधस्तिस्रः प्रादेशमात्र्यः, खादिरः स्रुवः, आज्यं, व्रीहितण्डुलाः, दक्षिणा पूर्णपात्रो वरो वा । पवित्रे कृत्वा प्रोक्षणीसंस्कारः, प्रत्येकं पात्रप्रोक्षणम् । प्रणीताग्न्योर्मध्ये प्रोक्षणीनिधानम् , आज्यनिर्वापः, चरुपात्रे प्रणीतोदकमासिच्य तण्डुलप्रक्षेपः। चर्वाज्ययोस्सहाधिश्रयणमिति **पद्धतिकारः** । दक्षिणत आज्यस्य ब्रह्मणः उत्तरतश्चरोस्स्वस्य । पर्यग्निकरणमुभयोस्स्वस्यैव, स्रुवप्रतपनम् , सम्मार्गकुशैस्सम्मार्जनम् , प्रणीतोदकेनाभ्युक्षणम् , पुनः प्रतपनम् , आज्योद्वासनम् , चरोरुद्वासनम् , आज्योत्पवनम्, अवेक्षणम् , अपद्रव्यनिरसनम् , प्रोक्षण्युत्पवनम् , उपयमनादानम् , तिष्ठतः समिधः प्रक्षेपः, प्रोक्षण्युदकेन पर्युक्षणम् ,प्रणीतासु पवित्रकरणम् , अग्नेरुत्तरतः प्राङ्मुख उपविश्य दक्षिणं जान्वाच्य ब्रह्मणाऽन्वारब्धः स्रुवेण होमः । मनसा पूर्वाघारः । ॐ प्रजापतये स्वाहा इदं प्रजापतये न ममेति त्यागान्तेऽग्नौ द्रव्यप्रक्षेपः । सर्वत्र त्यागान्ते द्रव्यप्रक्षेपः । ॐ इन्द्राय स्वाहा इदमिन्द्राय न मम । ॐ अग्नये स्वाहा इदमग्नये न मम । ॐ सोमाय स्वाहा इदं सो० । ततोऽष्टर्चहोमः, सर्वत्र होममन्त्रेषु अनाम्नातोऽपि स्वाहाकारः कार्यः । सर्वत्र मन्त्रवत्सु जुहोत्युपदेशादित्युक्तत्वात् । ॐ त्वन्नो अग्ने० प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्याम् । ॐ सत्वन्नो० एधि स्वाहा इदमग्नीवरुणाभ्याम् । ॐ इमम्मे० चके० इदं वरुणाय । ॐ तत्त्वा० मोषीः० इदं वरुणाय । ॐ येते शतं० स्वर्काः० इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्चेति त्याग इति **पद्धतिकाराः** । वस्तुतस्तु देवेभ्य इति पदं विहायैव त्यागः । ॐ अयाश्चाग्ने० भेषजꣳ० इदमग्नये न० । ॐ उदुत्तमं० स्याम० इदं वरुणाय० । ॐ भवतन्नः० मद्य नः० इदं जातवेदोभ्याम्० इदमग्निभ्यामिति वा त्यागः। ततस्स्थालीपाकहोमः । ॐ अग्नये पवमानाय स्वाहा ॐ अग्नये पावकाय स्वाहा ॐ अग्नये शुचये स्वाहा ॐ अदित्यै स्वाहा । सुगमास्त्यागाः । ततः पुनरष्टर्चहोमः । ततश्चरुशेषादग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते० । आज्येन अयास्यग्ने० विदः स्वाहा इदं देवेभ्यो गातुविद्भ्यः । भूः स्वाहा इदमग्नये० । भुवः स्वाहा इदं वायवे० । स्वः स्वाहा इदं सूर्याय० । अथवा इदं भूः इदं भुवः इदं स्वः इति त्यागा इति **वासुदेवभट्टाः** । त्वन्नो अग्ने० सत्वन्नो अग्ने० अयाश्चाग्ने० येते शतम्० उदुत्तमम्० त्यागाश्चोक्ताः । प्रजापतये स्वाहा इदं प्रजापतये। बर्हिर्होमः स्वाहेति, इदं प्रजापतये न ममेति त्यागः । ततोऽवत्तशेषप्राशनम्, पवित्राभ्यां मार्जनम्, पवित्रयोरग्नौ प्रक्षेपः । "यदत्र विलिप्तन्तन्नेद्बर्हिर्धाग्नेरसत्"इति लिङ्गात्पवित्रयोरुत्पवने लिप्तत्वात् । ब्रह्मणो दक्षिणादानम् । प्रणीतानिनयनम् । एकब्राह्मणभोजनम् । ततः स्मृत्यन्तरोक्तब्राह्मणभोजनम् । अत्र "मणिकावधानम्" इति **हरिहररेणुकदीक्षितौ** । तत्रायं क्रमः । मातृपूर्वमाभ्युदयिकम् , अभ्यादानन्देवस्य त्वेति । इदमहमिति अवटपरिलेखः, उत्तरपूर्वस्यां खननम् पांसूद्वापः प्राच्याम् । अवटे कुशास्तरणम् । अक्षतारिष्टकानां चावापः । हरिद्रादीनाञ्च । मणिकस्य दानं समुद्रोऽसि शम्भूरित्यन्तेन। आपो रेवतीः क्षयथाहिवस्वः क्रतुञ्च भद्रं बिभृथामृतञ्च । रायश्चस्थस्वपत्यस्य पत्नीः सरस्वतीतद्गृणते वयोदाः । आपोहिष्ठेति तिसृभिश्चोदकासेकः । ततो ब्राह्मणभोजनम् । आधाने पदार्थोपचारे नैमित्तिकहोमस्याभावः अग्न्यभावात् । नन्वस्ति मन्थनादूर्ध्वमग्निस्तत्र होमः स्यादिति चेन्नैवम्। आवसथ्यशब्दो हि संस्कारनिमित्तो न जातिनिमित्तो न योगनिमित्तो वा । संस्कारेषु सत्सु शब्द-

प्रयोगदर्शनात्।अतश्च ये पदार्था दृष्टार्था अदृष्टार्थाश्च पठितास्ते सर्वे आवसथ्याधानशब्दवाच्याः । एवं सति संस्कारैकदेशाभावेऽप्यनावसथ्यता । अतः सकलकर्मसमुदायावृत्तिरिति सम्प्रदायः । तथा च **कारिकायाम्**—"अग्न्याधेयस्य मध्ये च विलिष्टं किञ्चिदाप्यते । प्रायश्चित्तं न विद्येत आधानावृत्तिरिष्यते ॥ तत्राग्निमन्थनादूर्ध्वं विलिष्टे मन्थनादितः । आवर्तत इदं कर्म पूर्वं च नान्दिकं विना" इति । अत्र वदामः । "कश्चित्संस्कारोऽङ्गवान्भवति ।" यथाऽऽज्याहुतिहोमे । आज्याधिश्रयणाद्यङ्गम् । चर्वाहुतौ चरुसंस्काराः । पर्यग्निकरणादि । "यस्यैवाङ्गिनोऽङ्गोपचारस्तस्यैवावृत्तिर्युक्तरूपा न सकलस्याधानस्य" इति । न तु प्रायश्चित्तमिति **कर्कोपाध्यायाः**,युक्तरूपं चैतत् । इत्यावसथ्याधानम् । आधानमध्ये यदा पत्नी रजस्वला तदा विशेषः **कारिकायाम्**—"अर्वाक्पूर्णप्रदानाच्चेदाधाने स्त्री रजस्वला । तच्छुद्धौ पुनराधानं मातृपूजनपूर्वकम् ॥ स्यातां ते अरणी तत्र योनिस्सैवोत्तरा तथा । आधानानन्तरञ्चेत्स्याद्रजोयुक्ता कथञ्चन ॥ मणिकादि न कर्तव्यमृषिर्देवोऽब्रवीदिदम् । आधानग्रहणादूर्ध्व न स्यात्तत्रैव सूतकम् ॥ मणिकादि न कर्तव्यं कुर्यादेकादशेऽहनि । बौधायनमतादेवं भारद्वाजमतादपि ॥ " अत्र प्रायश्चित्तं **देवभाष्ये** । "पत्न्यां रजस्वलायां सूतिकायां वा प्रारब्धङ्कर्म क्रियत एव" इति **गदाधरः** । तथा **त्रिकाण्डमण्डनः** । "रजोदोषे समुत्पन्ने सूतके मृतकेऽपि वा । नित्यं नैमित्तिकं कुर्यात्काम्यं कर्म न किञ्चन ॥ आधानं पुनराधानम्पशुः सौत्रामणी तथा । चातुर्मास्यानि सोमश्च तथैवाग्रयणाक्रिया ॥ अकाम्यत्वेऽपि नैतेषां सूतकादावनुष्ठितिः । प्रक्रान्तेष्वपि चैतेषु सूतकादिसमुद्भवे ॥ कर्तव्यान्येव ह्येतानि वारितान्यप्यशेषतः" इति । अतः प्रारब्धस्य सूतकरजोदोषादावप्यनुष्ठानमेव युक्तम्, न शुद्धिप्रतीक्षणम् । **कारिकाकारमते** तु आधानं न भवतीत्युक्तमेव पूर्वम् । अथ पुनराधाननिमित्तानि लिख्यन्ते । "अग्नावनुगते यस्य होमकालद्वयं व्रजेत् । उभयोर्विप्रवासे वा लौकिकोऽग्निर्विधीयते ॥ १ ॥ अनो विना समारूढमूर्ध्वं शम्या परासनात् । हृतोऽग्निर्लौकिको ज्ञेयः श्रुतौ सर्वत्र दर्शनात् ॥ २ ॥ कुरुक्षेत्रादितीर्थानां गमने देशविप्लवे । समारोपं विनैवाग्नीन्नोद्वहेयुर्विपश्चितः । आरोप्याग्नीनरण्योः स्वानुदवस्येत्सहाग्निभिः ॥ ३ ॥ दृष्टोऽग्निर्यदि नश्येत मथ्यमानो हुताशनः । ग्रामात्सीमान्तरं गच्छेत्प्रत्यक्षो हव्यवाहनः ॥ अहुतो वत्सरं तिष्ठेदुदकेन शमङ्गतः । शिक्येनोद्वाहयेदग्नीन्पुनराधानमर्हति ॥ अग्निहोत्रेण रहितः पन्थानं शतयोजनम् । आहिताग्निः प्रयायाच्चेदग्निहोत्रं विनश्यति ॥ ४ ॥ अब्दं स्वयमजुह्वद्यो हावयेदृत्विगादिना । तस्य स्यात्पुनराधेयं पवित्रेष्टिरथापि वा ॥ ५ ॥ विहायाग्निं सभार्यश्चेत्सीमामुलङ्घ्य गच्छति । होमकालात्यये तस्य पुनराधानमिष्यते ॥ ६ ॥ अरण्योः क्षयनाशाग्निदाहेष्वग्निं समाहितः । पालयेदुपशान्तेऽस्मिन्पुनराधानमिष्यते ॥ ७ ॥ ज्येष्ठा चेद्बहुभार्यस्य ह्यतिचारेण गच्छति । पुनराधानमत्रैक इच्छन्ति न तु सूरयः ॥ ८ ॥ दाहयित्वाऽग्निभिर्भार्यां सदृशीं पूर्वसंस्थिताम् । पात्रैश्चाथाग्निमादध्यात्कृतदारोऽविलम्बतः ॥ ९ ॥ दाहयित्वाऽग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः । आहरेद्विधिवद्दारानग्नींश्चैवाविलम्बयन् ॥ १० ॥ "जीवन्त्यामपि ज्येष्ठायां द्वितीयपरिणये कृते उत्सर्गेष्ट्याऽग्नीनुत्सृज्यान्यया सह पुनरादध्यात्"इति **स्मृतिचन्द्रिकायाम्** ॥ भार्यायां विद्यमानायां द्वितीयामुद्वहेद्यदि । तदा वैवाहिकङ्कर्म कुर्यादावसथ्येऽग्निमान् ॥ ११ ॥ उपघातः।क्रियालोप उपेक्षा च प्रमादतः । चतुर्विधमिदं प्रोक्तं पुनराधानकारणम् ॥ १२ ॥ (प्रसिद्धः कर्मणां लोप उपघातोऽन्त्यजादिना । उपेक्षणं प्रवासादि प्रमादोऽग्नेरधारणम् ॥) स्पृष्टोऽग्निर्यदि चाण्डालैरुदक्यादिभिरेव वा । उपघातेषु सर्वेषु पुनस्त्वेति समिन्धनम् ॥ १३ ॥ यजमानश्च पत्नी च उभौ प्रवसितौ यदा । आहोमान्न निवर्तेत पुनराधानमर्हति ॥ १४ ॥ यदोभावप्यतिक्रम्य सीमां प्रत्यागतौ पुनः । होमकालमतिक्रम्य तदा नश्यन्ति वह्नयः ॥ १५ ॥ विनाऽग्निभिर्यदा पत्नी नदीमम्बुधिगामिनीम् । अतिक्रामेत्तदाऽग्नीनां विनाशः स्यादिति श्रुतिः ॥ १६ ॥ पत्न्यन्तरेऽथवा पत्यौ हुताशनसमीपगे । तदा पत्नी यथाकाममतिक्रामेन्नदीमपि ॥ १७ ॥ पत्नी सीमामतिक्रान्ता यजमानो गृहे यदि । आहोमाद्यदि नागच्छेत्पुनराधानमर्हति ॥ १८ ॥ एकाकिनी यदा पत्नी वह्निमादाय गच्छति । तत्र नाशोऽपरे त्वाहुर्भयाद्याते न दुष्यति ॥ १९ ॥ रजोदोषे समुत्पन्ने सूतके मृतकेऽपि वा । प्रवसन्नग्निमान्विप्रः पुनराधानमर्हति ॥ २० ॥ वह्नीनामथवैकस्यामुदक्यायां तु न व्रजेत् । एकादशे चतुर्थेऽह्नि गन्तुमिच्छेन्निमित्ततः ॥ २१ ॥ त्रयीम्मुक्त्वा तु यो लोभात्प्रवसेत्पर्वसन्धिषु । करोति पुनराधानम्प्रायश्चित्तमृणादृते ॥ २२ ॥ नाग्निकार्यस्य वेलायाम्प्रवसेन्न च पर्वणि । न विना च निमित्तेन क्रीडाद्यर्थन्तु न व्रजेत् ॥ २३ ॥ नदीसन्तरणेऽग्नीनां सीमातिक्रमणे तथा । सर्वत्राद्यन्तसीम्नोर्वा स्वाभिस्पृष्टास्स्युरग्नयः ॥ २४ ॥ प्रत्यक्षमरणिद्वारश्चान्यथाऽग्निविनाशनम् । आत्मारम्भणपक्षे तु

नान्वारम्भणमिष्यते ॥ २५ ॥ तत्र नान्वारभेदग्निं पुनराधिरुदाहृतः । न क्वाप्यारम्भणं किञ्चिल्लौगाक्ष्यादिनिवन्धनात्
॥ २६ ॥ उदक्या चेद्भवेत्पत्नी प्रसूता प्रवसत्यपि । अन्वारम्भविकल्पत्वात्पुनराधिर्नं तन्मतात् ॥२७॥
ज्येष्ठान्वारभते वह्निं वहुनार्यस्य नेतराः । न रुच्यैकाकिनी पत्नी प्रयायादग्निभिः सह ॥ २८ ॥ राष्ट्रभ्रंशादिसम्प्राप्तावुचितं
यानमीदृशम् । अन्यथा प्रवसन्त्यां हि वह्नयो लौकिकाः खलु ॥ २९ ॥ राष्ट्रभ्रंशादिगमने
प्राप्ते देशे मनस्वतीम् । जुहुयाच्चतुरात्तेन स्मार्तेऽग्नौ सर्वमीरितम् ॥ ३० ॥ सायम्प्रातर्हुते सर्वमेव स्याद्गमनेऽन्वहम्
। यस्त्वग्न्याधेयमात्मार्थं कृतवान्मृतभार्यकः ॥ ३१ ॥ पत्नीविरहितो वह्नीन्यथाकामं स निर्हरेत् ।
होमद्वयात्यये दर्शपूर्णमासात्यये तथा । पुनरेवाग्निमादद्यादिति **भार्गवशासनम्** ॥ ३२ ॥ बहुधा विहृतो
ह्यग्निरावसथ्यात्कथञ्चन । यावदेकोऽपि तिष्ठेत तावदन्यो न मथ्यते ॥ ३३ ॥ वैश्वदेवात्तथा होमात्प्राग्ज्ञेयं
नैव मन्थनम् । एकेनान्तरितो वह्निरावसथ्यस्तु मथ्यते ॥ ३४ ॥ आवसथ्यात्तु कर्मार्थे योऽग्निराह्रियते
क्वचित् । पूर्वेण योजयित्वा तं तस्मिन्होमो विधीयते ॥ ३५ ॥ (**चतुर्विंशतिमते** ।) प्रातर्होमं तु निर्वृत्य
समुद्धृत्य हुताशनात् । शेषं महानसे कृत्वा तत्र पाकं समाचरेत् ॥ ३६ ॥ ततोऽस्मिन्वैश्वदेवादिकर्म
कुर्यादतन्द्रितः ॥ ३७ ॥ **वह्वृचकारिकायाम्** ॥ नित्यपाकाय शालाग्नेरेकदेशस्य कार्यतः । पाकार्थमुल्मुकं हृत्वा
तत्र पक्त्वा महानसे ॥ ३८ ॥ वैश्वदेवोऽग्न्यगारे स्यात्पाकार्थोऽग्निश्च लौकिकः । भूरिपाको भवेद्यत्र
श्राद्धादावुत्सवेषु च ॥ ३९ ॥ कृते च वैश्वदेवेऽथ लौकिको नैव कार्यतः । होमेनान्तरितं केचिदाहुः सर्वत्र
लौकिकम् ॥ ४० ॥ न तत्समञ्जसं तेषामुपयद्धोमदर्शनात् । समासं चोल्मुकस्याहुरग्न्यगारे महानसात् ।
पाकान्ते वैश्वदेवात्प्राक् चैतदप्युपपद्यते ॥ ४१ ॥ आहृते ह्युल्मुके पाकः शामित्रे दृश्यते पशौ । वचनादाहृतिः
सा तु लौकिकस्त्वपवर्गतः ॥ ४२ ॥ दीपको धूपकश्चैव तापार्थं यश्च नीयते । सर्वे ते लौकिका
ज्ञेयास्तावन्मात्रापवर्गतः ॥ ४३ ॥ पचनाग्नौ पचेदन्नं सूतके मृतकेऽपि वा । अपक्त्वा तु वसेद्रात्रीं पुनराधानमर्हति
॥ ४४ ॥ अरण्योर्दग्धयोर्वाऽपि नष्टयोः क्षीणयोस्तथा । आहृत्यान्ये समारोप्य पुनस्तत्रैव निर्मथेत् ॥४५॥
अरण्योरल्पमप्यङ्गं यावत्तिष्ठति पूर्वयोः । न तावत्पुनराधानमन्यारण्योर्विधीयते ॥ ४६ ॥ पूर्वैव योनिः पूर्वाकृत्
पुनराधानकर्मणि ॥ ४७ ॥ एकाकिनी यदा पत्नी कदाचिद्ग्रामममाव्रजेत् । होमकालेऽभिसम्प्राप्ता न सा दोषेण
युज्यते ॥ ४८ ॥ अथ तत्रैव निवसेद्ग्रामं गत्वा प्रमादतः । लौकिकोऽग्निः स विज्ञेय इत्येषा नैगमी श्रुतिः
॥ ४९ ॥ भार्यायां प्रोषितायां चेदुदेत्यर्कोऽस्तमेति वा । तत्र स्यात्पुनराधेयमन्ये त्वाहुरिहान्यथा ॥ ५० ॥
पत्न्याः प्रवासविषये पुनराधिरुदाहृतः । वाक्यैर्मनीषिभिः प्रोक्तैरेकभार्यस्य सेष्यते ॥ ५१ ॥ बहुभार्यस्य ज्येष्ठा
चेत्प्रवसेत्पुनराहितिः । ज्येष्ठा चेदग्निसंयुक्ता गच्छन्त्यन्या यथारुचि ॥ ५२ ॥ यजमानेन सहिता यद्वा ता एव
केवलाः । एकस्यामप्यतिष्ठन्त्यामग्निहोत्रसमीपतः ॥ ५३ ॥ पतिस्तिष्ठति चेदग्निनाशो नेत्यपरे जगुः । यदा
सीमामतिक्रम्य रात्रौ तत्रैव वत्स्यति ॥ ५४ ॥ अगृहस्य प्रयाणं यत्प्रवास उच्यते बुधैः । यत्तु **नारायणेनोक्तं**
ग्रामाच्चाग्निसमन्वितात् ॥ गत्वा ग्रामान्तरे वासः प्रवासोऽप्ययमीदृशः ॥५५॥ ग्रामान्तरे नगर्यां वा पत्न्यां वाऽन्यत्र
वा क्वचित् । सीमामतीत्य चेद्रात्रौ वासः प्रवसनं स्मृतम् ॥ ५६ ॥ प्रवसेद्धनसम्पत्त्यै न तीर्थाय कदाचन ॥ इति
कूर्मपुराणोक्तं तथा **बौधायनेन** च ॥५७॥ सहाग्निर्वा सपत्नीको गच्छेत्तीर्थानि मानवः । पुराणवचनात्साग्नेः प्रवासोऽस्तीति
केचन ॥ ५८ ॥ न कुर्युरग्न्युपस्थानं प्रवत्स्यन्त्योऽपि योषितः । त्यागान्न प्रोषिताः कुर्युरश्नन्त्येव सधर्मकम्
॥ ५९ ॥ आगतोपस्थितिं चापि स्त्रीणां नेच्छन्ति सूरयः । सगृहस्य प्रयाणं यत्तत्पत्न्यग्निसमन्वितम् ॥ ६० ॥
क्लिष्टश्चेत्स तु वृत्त्यर्थमनसा सह गच्छति । अनस्यारोपयेदग्नींस्तत्पात्राण्यपि तत्र च ॥ ६१ ॥ स्वाङ्गेन वा
नयेदग्निं **कात्यायनमतादपि** । नयेद्वा ब्राह्मणस्त्वन्यो यो याज्येन समन्वितः ॥ ६२ ॥ प्रत्यक्षेण नयन्नग्निमुच्छ्वसेच्चेद्विनश्यति
। यदि वाऽनुच्छ्वसन्नीत्वा निधायोच्छ्वस्य तं पुनः ॥ ६३ ॥ हरेदनुच्छ्वसन्नेव नश्येन्निर्हरणेऽनलः ।
शकटेनापि दूरं वा हरेदेवं यथारुचि ॥ ६४ ॥ स्वाङ्गेनैवाथ वा शम्या परासात्प्राङ्नयेच्छ्वसन् । कर्मार्थं हरणेऽग्नीनां
नानुच्छ्वासादि चोद्यते ॥ ६५ ॥ **कात्यायनमतात्**केचिच्छ्वसन्तोऽप्यातिदूरतः । प्रत्यक्षेण नयन्त्यग्नीन्
शकटेन विनापि तु ॥ ६६ ॥ आधानावसरे जाते यद्याधातुरुपद्रवः । अत्रृद्धिर्नाम सा प्रोक्ता तत्र स्यात्पुनराहितिः
॥ ६७ ॥ उद्धातेऽग्नौ विहारात्प्राक् मथ्यमानेऽप्यजन्मानि । लोकाग्न्यादावनिक्षिप्तेऽभ्युदयेऽस्तमयेऽपि वा ॥ ६८ ॥
विनष्टहेतुनाऽनेन जातवेदा विनश्यति । विहारोत्तरकालं वा नष्टौ पूर्वापरानलौ ॥ ६९ ॥ शेषं

पूर्वोदितं सर्वं तत्राप्यग्निर्विनश्यति । कालाल्पत्वे त्वनिर्मथ्य लोकाग्न्यादि क्षिपेद्यदि ॥ ७० ॥ उदयास्तमयात्पूर्वं कर्कोऽत्रानाशमिच्छति । लोकाग्न्यादावलब्धेऽपि पुराकास्तमयोदयात् ॥ ७१ ॥ मन्थनारम्भमात्रेण नाशो वृद्धैर्निवारितः । उभयोर्नाशविज्ञानादूर्ध्वमर्कोऽस्तमेति चेत् ॥ ७२ ॥ कर्कोऽग्निनाशमाचष्टे पश्चाद् ज्ञातेऽपि नेच्छति । एकयोनित्वपक्षेऽपि सर्वाग्न्यनुगमो यदि ॥ ७३ ॥ उदयास्तमये तत्र नाशमेकेन तूभयोः । अथ चेदुभयोर्घातेऽभ्युदयास्तमयात्पुरा ॥ ७४ ॥ परोऽग्निरेको जातश्चेत्तावताऽपि न नश्यति । तदनुत्पत्तिमात्रेण स्यादग्न्याधिर्न पूर्वयोः ॥ ७५ ॥ मन्त्रं विना समारूढोऽरण्योरात्मनि वा यदि । तत्र ज्वलनशान्तौ स्यादसमारूढशान्तिवत् ॥ ७६ ॥ आरूढोऽपि यथाशास्त्रमवरूढो न शास्त्रतः । तृतीये होमकालेऽथ सम्प्राप्ते पुनराहितिः ॥ ७७ ॥ यदा तु लौकिकाग्न्यादिर्निधाय हवनं तदा । हुतेऽपि लौकिकाग्न्यादौ मथ्यमानोऽप्यनन्तरम् ॥ ७८ ॥ द्वितीयाद्वा तृतीयाद्वा होमकालात्पुरा यदि । अग्निर्न जायते तत्र पुनराधेयमाचरेत् ॥७९॥ हुतेषु पक्षहोमेषु पक्षत्रयमनन्तरम् । कर्तव्यं पुनराधेयं मथ्यमानो हुताशनः ॥ ८० ॥ दृष्टमात्रोऽनुगच्छेच्चेत्तत्र तस्य विनाशनम् । शतशोऽनुगमे चान्ये पुनर्निर्मथ्य जप्यते ॥ ८१ ॥ नष्टे मथितमात्रे वा समारोपयजुर्जपेत् । पुनर्निर्मथ्य जप्तव्यं यजुस्तूपावरोहणम् ॥ ८२ ॥ जलेन हेतुना वह्निरुपशान्तो यदा भवेत् । कर्तव्यं पुनराधेयं यज्ञपार्श्वे निरूपितम् ॥ ८३ ॥ तदेव पुनराधेयमग्नावनुगते सति । असमाधाय चेत्स्वामी सीमामुल्लङ्घ्य गच्छति ॥ ८४ ॥ श्वशूकररासभकाकशृगालैः कुक्कुटमर्कटशूद्रैः । अन्त्यजपातकिभिः कुणपैर्वा सूतिकयापि रजस्वलया वा ॥ ८५ ॥ रेतोमूत्रपुरीषैर्वा पूयांशुश्लेष्मशोणितैः । दुष्टास्थिमांसमज्जाभिरन्यैर्वापि जुगुप्सितैः ॥ ८६ ॥ आरोपितारणिस्पर्शे कृतेऽग्नौ स्पर्शनेऽपि वा । आत्मारूढेषु मज्जेद्वा वदेद्वा पतितादिभिः ॥ ८७ ॥ अथवा योषितं गच्छेदनृतौ काममोहितः । वदन्त्येषु निमित्तेषु केचिदग्निविनाशनम् ॥८८॥ तत्रारणिगते वह्नौ नष्टे स्यात्पुनराहितिः । इतरेषु निमित्तेष्वग्न्याधेयं परिचक्षते ॥ ८९ ॥ यद्वा सर्वोपघातेषु पुनस्त्वेति समिन्धनम् । द्रव्यस्थाग्न्युपघातेषु द्रव्यशुद्धिः समिन्धने ॥ ९० ॥ (समिन्धनं पुनस्त्वादित्यारुद्रा वसव इति मन्त्रेण समिद्धस्याप्यग्नेः पुनरिन्धनप्रक्षेपेण प्रदीप्ततरकरणम्) आरोपितारणी चोभे एका वा यदि नश्यति । तत्राग्न्याधेयमिच्छन्ति पुनराधेयमेव वा ॥ ९१ ॥ इत्यनारोपितारण्योः क्षये ग्राह्ये नवे पुनः । तदलाभे यदोद्वापादत्र स्यात्पुनराहितिः ॥ ९२ ॥ शूद्रोदक्यान्त्यकाकैश्च पतितामेध्यरासभैः । अनारूढारणिस्पर्शे ते विहायान्ययोर्ग्रहः ॥९३॥ भवतं नः समेत्यप्सु मज्जयेद्दूषितारणी । एकारण्येव दुष्टा चेत्तामेवाप्सु निमज्जयेत् ॥ ९४ ॥ तत्रान्यारणिलाभात्प्रागुद्वाते पुनराहितिः । काष्ठशुद्ध्या विशोध्ये वा त्यजेद्दोषेऽतिसन्तते ॥ ९५ ॥ नष्टायामरणौ यावदग्निस्तिष्ठति वेश्मनि । तावद्धोमादिकं कृत्वा तन्नाशे पुनराहरेत् ॥ ९६ ॥ प्रागादित्योदयाद्धोमं सङ्कल्प्य न जुहोति चेत् । अग्न्याधिः पुनराधिर्वा नोभयं स्वाम्यसन्निधौ ॥ ९७ ॥ नाशापहारावग्नीनां यद्वाऽऽरूढारणेर्यदा । कुर्याच्च पुनराधेयमिति **बौधायनो**ऽब्रवीत् ॥ ९८ ॥ अत्रैतेषु निमित्तेषु नष्टानां पुनराहितिः । स्थितानुत्सृज्य चान्येषु पुनराधेयमिष्यते ॥ ९९ ॥ अग्निहोत्रं च नित्येष्टिः पितृयज्ञ इति त्रयम् । कर्तव्यं प्रोषिते पत्यौ नान्यत्स्वामिक्रियान्वितम् ॥ १०० ॥ नैमित्तिकास्तु जातेष्टिर्गृहदाहेष्टिपूर्विकाः । स्वाम्यागमनपर्यन्तमुत्कृष्टव्या ह्यशेषतः ॥१०१॥ अग्न्याधेयादिकं प्राप्तमुभयानुगमादिनं । स्वाम्यागमनपर्यन्तमुत्कृष्टव्यमसंशयम् ॥ १०२ ॥ मथित्वा पावकं सर्वप्रायश्चित्तं विधाय च । मित्रायेत्यादिभिर्हुत्वा द्वादशानुगमाहुतीः ॥१०३॥ अग्निहोत्रं यथाकालं नित्येष्टिं च समाचरेत् । आस्वाम्यागमनात्तिष्ठेदागत्याथादधीत सः ॥ १०४ ॥ एवं केशवसिद्धान्तात्प्रोषितस्याग्निषु क्रियाः । अवश्यम्भाविनीरुक्त्वाऽधुना वक्ष्ये मतान्तरम् ॥ १०५ ॥ काम्याः क्रिया न कर्तव्याः स्वामिनि प्रोषिते सति । नित्यनैमित्तिकीः कुर्यात्प्रवसत्यपि भर्तरि ॥ ॥ १०६ ॥ तत्रापि नैव कर्तव्याः क्रियाः सोत्तरवेदिकाः । आधानपुनराधाने न स्तः पत्यौ प्रवासिनि ॥ १०७ ॥ उभयानुगमादौ तु प्राप्तेऽग्न्याधेयतः पुरा । न किञ्चिदग्निहोत्रादि कर्तव्यमिति दर्शने ॥ १०८ ॥ रजोदोषे समुत्पन्ने सूतके मृतकेऽपि वा । नित्यं नैमित्तिकं कुर्यात्काम्यं कर्म न किञ्चन ॥ १०९ ॥ आधानं पुनराधानं पशुः सौत्रामणी तथा । चातुर्मास्यानि सोमश्च तथैवाग्रयणक्रिया ॥ ११० ॥ अकाम्यत्वेऽपि नैतेषां सूतकादावनुष्ठितिः । प्रक्रान्तेष्वपि चैतेषु सूतकादिसमुद्भवे ॥ १११ ॥ कर्तव्यान्येव चैतानि वारितान्यप्यशेषतः । जातोऽपि वा विना भस्मस्पर्शं जातजपं विना ॥ ११२ ॥ प्रायश्चित्तं विना काष्ठमन्थने चोदितं विना । लौकिकः स्यादतो लुप्तादारभ्यावर्तयेत्पुनः ॥ ११३ ॥ यदि नावर्तयेद्वह्नौ तादृश्येव जुहोति च । हूयमानेऽपि लुप्येत होमकालादनन्तरम् ॥ ११४ ॥ भस्मस्पर्शं विनाप्येके

लौकिकत्वं न मन्यते । होमाष्टकाधिके लुप्ते धृतोऽप्यग्निर्विनश्यति ॥११५॥ अतोऽल्पहोमलोपेऽपि यज्ञुद्वापो विनश्यति । आधानपुनराधाने विकल्पेनात्र चोदिते ॥ ११६ ॥ लुप्ते होमद्वये प्राह **लौगाक्षि**रनलाहितिम् । ज्वलत्स्वग्निषु कर्तव्या तन्तुमत्येव केवला ॥११७॥ आपद्यग्निषु दीप्यत्सु मासार्धं चेन्न हूयते । सर्वहोमानतिक्रान्तान्पक्षान्ते पक्षहोमवत् ॥११८॥ समस्य जुहुयात्पश्चादिष्टिस्तन्तुमती भवेत् । न तत्र पुनराधेयामिति **कौषीतकिश्रुतेः** ॥ ११९ ॥ वत्सरं वत्सरार्द्धं वा होमलोपे मतान्तरम् । आपत्काले न नश्यन्ति दीप्यन्ते चेद्धुताशनाः ॥ १२० ॥ पञ्च कार्याः पुरोडाशा होमे लुप्तेऽर्द्धवत्सरम् । पथिकृत्प्रथमो ज्ञेयः पावकः शुचिरेव च ॥ १२१ ॥ व्रतपतिस्तन्तुमांश्च वह्नेर्देवगुणाः क्रमात् । सप्त कुर्यात्पुरोडाशान्होमे लुप्ते तु वत्सरम् ॥ १२२ ॥ पवमानः पावकश्च शुचिः पथिकृदित्यपि । वैश्वानरो व्रतपतिस्तन्तुमानिति सप्तमः ॥१२३॥ विशेषतोऽग्निरेव स्याद्देवतात्र यथाक्रमम् । एकारम्भपरार्द्धान्तविच्छेदेष्वविशेषतः ॥ १२४ ॥ मनस्वतीं व्रतयुतां नाधानमनले सति । इयमापत्सु घोरासु मिलितासूपयोक्ष्यते ॥१२५॥ द्वादशाहाहुतिच्छेदे कुर्युरन्ये मनस्वतीम् । अरण्योः क्षयनाशाग्निदाहेष्वग्निं समाहितः ॥१२६॥ पालयेदुपशान्तेऽस्मिन्पुनराधानामिष्यते । एकारण्यां विनष्टायामस्ति चेदितराऽरणिः ॥ १२७ ॥ ताञ्छित्त्वा मन्थनं प्रोक्तं भाष्ये **बौधायनीयके** । अरणी मथनाशक्ते तन्तुभिर्मथनेन वा ॥१२८॥ स्याताञ्चेदरणी नूत्ने ग्राह्ये शास्त्रोक्तलक्षणे । श्वोभूतेऽनुष्ठिते दर्शे तस्मिञ्जीर्णारणिद्वयम् ॥१२९॥ शकलीकृत्य पाश्चात्ये वह्नौ निक्षिप्य दीपयेत् । ततो दक्षिणहस्तेन नूतनामुत्तरारणिम् ॥१३०॥ गृहीत्वा सव्यहस्तेन गृह्णीयादधरारणिम् । ते उभे अरणी तत्र दीप्तेऽग्नौ धारयन् जपेत् ॥१३१॥ उद्बुध्यस्वाग्न इत्येतदयं ते योनिरित्यपि । "उद्बुध्यस्वाग्ने प्रविशस्व योनिमन्यां देवयज्यायै वोढवे जातवेदः ॥ अरण्योररणिमनुसङ्क्रमस्व जीर्णां तनुमजीर्णया निर्णुदस्वेति प्रथमो मन्त्रः।" मन्थनस्यावृता सम्यङ्माथित्वाऽग्निं विहृत्य च ॥ १३२ ॥ विलाप्योत्पूय दर्भाभ्यां स्रुच्यादाय चतुर्घृतम् । जुहोत्याहवनीयेऽग्नौ मनस्वत्या घृतं तथा ॥ १३३ ॥ इष्टिं तन्तुमतीं कुर्याच्छरावं दक्षिणां ददेत् । वृत्तं प्रादेशमात्रं तु शरावं निगमोदितम् ॥ १३४ ॥ इत्यनारोपितारण्योः क्षये ग्राह्ये नवे पुनः । तदलाभे यदोद्वापेत्तदा स्यात्पुनराहितिः ॥ १३५ ॥ कामे निमित्तयोगे वा पुनराधेयमिष्यते । निमित्तेषु यथायोगमाधानमपि वा भवेत् ॥ १३६ ॥ तत्र येषु निमित्तेषु शृङ्गग्राहिकया विधिः । तत्रैव पुनराधेयमन्यथाऽऽधानमिष्यते ॥ १३७ ॥ अन्यत्राप्यपरे प्राहुः पुनराधिर्विकल्पतः । यद्वित्तं जीवनायालं क्षुद्रं चास्यैकवत्सरम् ॥ १३८ ॥ तन्नाशे पुत्रमर्त्यानां ज्ञातीनामवरोधने । अङ्गनाशेऽङ्गनानाशः पुनराधानमिष्यते ॥ १३९ ॥ ज्यानिः सर्वस्वहानिः स्यात्स्पष्टं **माध्यन्दिनिश्रुतेः** । पुण्यान्यन्यानि कुर्वीत श्रद्दधानो विमत्सरः ॥ १४० ॥ नत्वल्पदाक्षिणैर्यज्ञैर्यजेतेह कथञ्चन । इन्द्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजां पशून् ॥ १४१ ॥ हन्त्यल्पेन धनेनैव विप्रोऽनल्पधनो यजन् ।" इति पुनराधानपुनराधेययोर्निमित्तानि । **अथ पुनराधाने पदार्थक्रमः** । तत्र प्रमादात्त्रिरात्रमग्नित्यागे प्राणायामशतम्, विंशतिरात्रे एकदिनोपवासः । मासद्वये त्रिरात्रमुपवासः । अब्दे प्राजापत्यकृच्छ्रः । एवं त्यागानुसारेण प्रायश्चित्तं कृत्वा पुनराधानम् । आलस्यादिना बुद्धिपूर्वकमग्नित्यागे तत्तत्कालानुसारेणैन्दवादि प्रायश्चित्तम् । द्वादशाहपर्यन्तं त्रिरात्रमुपवासः । मासपर्यन्तं द्वादशरात्रमुपवासः । अब्दपर्यन्तं मासं पयोव्रतम् । द्विवर्षपर्यन्तं चान्द्रायणम् । त्र्यब्दपर्यन्तं चान्द्रायणं सोमायनं च । तदूर्ध्वमब्दकृच्छ्रं धनिनो गोदानं चेति **प्रयोगपारिजाते** । **स्मृत्यर्थसारे** तु द्वादशाहातिक्रमे त्र्यहमुपवासः । मासातिक्रमे द्वादशाहमुपवासः । संवत्सरातिक्रमे मासमुपवासः पयोभक्षणं वेति विशेषः । एवं कालविलम्बे सङ्कल्पपूर्वकं प्रायश्चित्तं कृत्वा पुनराधानम् । यत्र तु येन केनचिन्निमित्तेनाग्निनाशः कालविलम्बश्च नास्ति तत्र प्रायश्चित्तमकृत्वैव पुनराधानम् । नित्यक्रियां विधाय देशकालौ सङ्कीर्त्यैतावन्तं कालमावसथ्याग्निविच्छेदजनितप्रत्यवायपरिहारार्थमेतावत्प्रायश्चित्तममुकप्रत्याम्नायत्वेनाहं करिष्य इति सङ्कल्पः । लुप्तानां होमानां तण्डुलादिद्रव्यं ब्राह्मणाय सम्प्रददे इति हौम्यं दद्यात् । "सायम्प्रातर्होमानां तथा दर्शपूर्णमासस्थालीपाकानां सम्पत्तिपर्याप्तं व्रीह्यादिद्रव्यमाज्यं च दद्यात्" इति **प्रयोगरत्ने** । ततः शुचौ काले शुचिराचान्तः प्राणानायम्य देशकालौ स्मृत्वा विच्छिन्नावसथ्यस्य पुनराधानं करिष्य इति सङ्कल्पः । नान्दीश्राद्धाभावः । खरे पञ्चभूसंस्कारादिब्राह्मणतर्पणान्तमाधानवत्सर्वं कार्यम् । **अथ सभार्यस्य प्रवासप्रसक्तोऽग्निसमारोपविधिः** । प्रातर्होमानन्तरमरणिद्वयमयं ते योनिरिति मन्त्रेणावसथ्ये प्रतपतीत्यरणिपक्षे समारोपः । आहरणपक्षे तु अयन्तेयोनिरिति मन्त्रेणाश्वत्थसमिधमावसथ्ये प्रतपाति । अथवा "या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानमच्छावसूनि कृण्वन्नस्मे नर्यापुरूणि यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव आजायमानः सक्षय एहि" इति मन्त्रेण पाणौ प्रतप्यात्मनि समारोपयेत् । तत्र प्रादुष्करणकाले अरणीसमारोपे अरणी

निर्मथ्य "प्रत्यवरोहजातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन् । प्रजाम्पुष्टिं रयिमस्मासु धेह्यथा भव यजमानाय शंय्योः ।" इत्यनेन खरेऽग्निस्थापनम् । अश्वत्थसमित्समारोपणे वैश्यादिगृहादग्निमाहृत्य खरे पञ्चाग्न्यर्थान्संस्कारान्कृत्वा अग्निं स्थापयित्वा प्रत्यवरोहेति मन्त्रेण तां समिधमग्नौ निदध्यात् । आत्मसमारोपपक्षे सर्वदा स्पृश्यस्पर्शनं जले निमज्जनं स्नानं स्त्रीगमनं चाकुर्वन्मूत्रपुरीषोत्सर्गे शौचमकृत्वा चिरकालमतिष्ठँश्च होमकाले आत्मसमारूढमग्निमुच्छ्वासरूपेण प्रत्यवरोहेति मन्त्रेण लौकिकाग्नौ निदध्यात् । एवं यथाधिकारमग्निं प्रतिष्ठाप्य होमं कुर्यात् । इदं समारोपणं "द्वादशरात्रपर्यन्तमेव कुर्यात्" इति **प्रयोगरत्ने** । **कातीयानां** त्वरणिसमारोपः श्रौते दृष्टः तद्वत्स्मार्तेऽपि कार्य उक्तत्वादिति शिष्टाः । समित्समारोपणेऽपि अयन्तेयोनिरिति मन्त्रेण समारोप्य प्रादुष्करणकाले लौकिकमग्निं संस्थाप्य तत्र तूष्णीं समिधमादध्यादिति वृद्धाः । वस्तुतस्तु **कातीयानाम**पि समित्समारोपः शाखान्तरोक्त एव भवति, स्वशाखायां समित्समारोपस्यानुक्तत्वात् ॥ २ ॥

विश्व०—आवसथ्या०—[आवसथ्यमिति शास्त्रबोधितसंस्कारसंस्कृते प्रदेशविशेषे स्थापनम् । केचित्तु आवसथ्यं च तदाधानात्कृते प्रदेशविधिकारिकर्तृककर्तव्यताविशेषोपलक्षितस्याग्नेर्नामधेयं, तस्याधानं परिभाषाशास्त्रबोधितं चेति कर्मधारयमाहुः । तन्न, समस्यमानपदार्थसामानाधिकरण्यस्य कर्मधारयार्थत्वेन वह्निकर्तव्यतयोः प्रत्येकमावसथ्यपदावाच्यत्वाभावेन सामानाधिकरण्याभावादिति दिक् । ?] तत्कदा कर्तव्यमित्याकाङ्क्षायामुक्तं—**दारकाले** इति । दारत्वनिष्पत्त्यधिकरणक्षणाऽव्यवहितोत्तरे क्षण इत्यर्थः । **दायाद्यकाल एकेषाम्**—विभागिनो भ्रात्रादेर्धनविभागकालो दायाद्यकालः, एकेषामाचार्याणामित्यर्थः । तथाच तेषां मते भ्रात्रादिमतो दारावच्छिन्नदायाद्यकालकरणपक्षेऽपि दारकालाकरणप्रयोज्यप्रायश्चित्ताभावेनाऽभ्रात्रादिमतो दारकाल एवाधिकारादकरणप्रयुक्तप्रायश्चित्ताच्च व्यवस्थया विकल्पोऽत्र द्रष्टव्यः । अभ्रातृमतो दारकाले, भ्रातृमतो दायाद्यकाल इति । उपलक्षणमेतत् । वैशाखामावास्यायां वा पौर्णमास्यां वा शुक्लपक्षे नक्षत्राधानं वा पितरि प्रेते एकादशाहे वा । तथाच **शाङ्खायनगृह्यकारः**—"समावत्स्यमानो यत्रान्त्यां समिधमादध्यात्तमग्निमिन्धीत वैवाह्यं वा दायाद्यकाल एके प्रेते वा गृहपतौ स्वयं ज्यायान्वैशाख्याममावास्यायामन्यस्यां वा कामतो नक्षत्र एके" इति । एवं ज्योतिःशास्त्रप्रतिपाद्या अपि कालाः आवसथ्याद्यर्थं ध्येयाः । केचित्तु ज्योतिःशास्त्रप्रतिपाद्यदोषराहित्ये सति दारकालदायाद्यकालयोरेवावसथ्याधानमिच्छन्ति । तत्कथं कर्तव्यमित्याकाङ्क्षायामाह **वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य चातुष्प्राश्यपचनवत्सर्वं**—कुर्यादिति सूत्रशेषः । यथाहि चातुष्प्राश्यपचनेनाग्निहोत्राधाने आहरणपक्ष उक्तः तथात्रापि चातुष्प्राश्यपाककरणकः पूर्वोत्तरकर्तव्यतास्तोमान्वितः अग्निहोत्रवदेव, यथा ह्यग्निहोत्रे गार्हपत्यः आह्रियते तथात्रापि आवसथ्याभिधोऽग्निराहर्तव्य इत्यर्थः । तत्र निर्मथ्याभ्याधानांशमपवदितुमाह **गृहादग्निमाहृत्य**—गृहिण्यन्वितादित्यर्थः । 'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते' इत्यादिश्रवणात् । तथाच गृहिणीसम्बन्धेनावसथ्याधिकारद्योतनादावसथ्याग्निमतो गृहादित्यर्थः । अग्निं पाकार्थं महानसे उद्धृत्य पुनश्च वैश्वदेवार्थमावसथ्ये नीतशेषमित्यर्थः । आहृत्य स्वावसथ्यागारसंस्कृतं खरं प्रतीति शेषः । आवसथ्याग्निमत्त्वमप्यातिप्रसक्तमत आह—**वैश्यस्येति** । अन्यदपि गुणवत्त्वं तस्य विवक्षितमित्याह—**बहुपशोरिति** । तादृशवैश्यालाभे कात्यायनसूत्रात्सूत्रान्तराच्चाम्बरीषाद्बहुयाजिनो ब्राह्मणगृहाद्बह्वन्नपाकाद्ब्राह्मणमहानसाद्वा अग्निराहर्तव्यः । तथाच तादृशगृहादग्निमाहृत्य चातुष्प्राश्यपचनवत्सर्वं कुर्यादित्यन्वयः । तत्रायं **पदार्थक्रमः** । अधिकारसंपत्त्यनन्तरं कालानतिक्रमे शरीरशुद्ध्यर्थं किंचित्प्रायश्चित्ताचरणं कृत्वा तत्कालमेवावसथ्याधानं कुर्यात् । अधिकारे सत्यकरणात्कालातिक्रमश्चेदतिक्रान्तमाससमसंख्यानि कृच्छ्राणि चरित्वा समार्द्धपादपक्षाद्यतिक्रमे कृच्छ्रार्धतुर्यांशद्वादशांशादि चरित्वा तर्जनीमध्यमानामिकानां समुदितानां पर्वद्वयपूर्त्तिपर्याप्ताहुतीरतिक्रान्ताहचतुर्गुणाः ब्राह्मणाय दत्त्वा तदुत्तरकाले आवसथ्यं कुर्यात् । हौम्यं दद्यादित्युक्तत्वात्पक्षाद्यादिद्रव्यदाननिषेधः । तत्रादौ मातृपूजाभ्युदयिके विधाय देशकालौ संकीर्त्यावसथ्याग्निमहमाधास्य इति संकल्प्य तत्र मे त्वमध्वर्युर्भवेत्यध्वर्योः वरणं कुर्यात् । ततस्तं गन्धपुष्पवस्त्रचन्दनादिभिरर्चयेत् । ततः सुप्रोक्षितादि कृत्वा यजमानयोस्तिलकादि कृत्वा आशीर्मन्त्रान्ब्राह्मणाः पठन्ति । ततोऽध्वर्युः स्फ्यं गृहीत्वा अग्न्यगारं दक्षिणपूर्वद्वारं **जाबालश्रुतितः** पञ्चारत्निप्रमाणं करोति । ततो वपनम् । यजमानयोर्हस्ते उपलब्धक्षौमसमर्पणं तदभावे वस्त्रसमर्पणम् । "परिधास्ये" इति मन्त्रेण यजमानो वस्त्रं परिधत्ते । उत्तरीयं च यशसामेति । ततो यजमानः द्विराचमनं करोति, पत्नी च वस्त्रयोः परिधानं करोति । ततोऽध्वर्युरावसथ्यखरे पञ्च संस्कारान्कृत्वा पुनरुल्लिख्य यजमानेनान्वारब्धोऽभ्युक्ष्य तत्र हिरण्यशकलं निधायोषान्निवपति । ततस्तैरूषैः सकलं मण्डलं छादयित्वा आखूत्करान्निवपति । ततस्तेनाखूत्करेण वृत्ताकारः आवसथ्यखरः कार्यः । स च चतुर्दशाङ्गुलमितरज्जु-

भ्रामणेन क्षेत्रफलादरत्निमात्रमितः संपद्यते । तत; परितः प्रान्तेषु पञ्चाशतं शर्कराः संलग्ना निदधाति । उपर्यपि हिरण्यमेके । तत आचारादहतेन वस्त्रेण तं खरमाच्छाद्य स्वस्तिवाचनशान्तिपाठादि कुर्वन् वहुपशोर्वैश्यस्य गृहं गच्छेत् । तदलाभे **गोभिलादिसूत्रादम्बरीषाद्** बहुयाजिनो ब्राह्मणगृहाद्बह्वन्नपाकाद्ब्राह्मणमहानसाद्वाऽग्निमाहृत्य [स्वाग्न्यगारे वर्तमानं खरं प्रवरस्य ? "भूर्भुवः आदित्यानां त्वा देवानां व्रतपते व्रतेनादधे" इति मन्त्रेण पूर्वसंस्कृते खरे तमग्निं संमुखं स्थापयत्यध्वर्युः । .ततो यजमानः यथोपपन्नं भोजनं करोति । ततोऽध्वर्युरस्तमिते सवितरि रोहिते चर्मण्यानडुहे चत्वारि प्रसृतित्रयमितानि व्रीहितण्डुलपात्राणि मिमीते । तं चातुष्प्राश्यं पचत्युद्वास्यासेचनं मध्ये कृत्वा सर्पिरासिच्याश्वत्थीस्तिस्रः समिधो घृताक्ता आदधाति समिधाग्निमिति प्रत्यृचमुपत्वेति जपति द्वितीयां वाऽध्वर्युः । चत्वारो ब्राह्मणाः प्राश्नन्ति चतुर्थोऽध्वर्युस्ततोऽध्वर्यू राद्धस्ते ब्रह्मौदन इत्याह । ततो यजमानश्चातुष्प्राश्यभोक्तृभ्यो वरं ददाति । ततो यजमानश्छन्दांस्यनेन प्रीणीम इत्याह । एवमावसथ्याधानदिवसात्प्रागव्यवहितसंवत्सरपरिपूर्तिपर्यन्तं प्रत्यहं चातुष्प्राश्यं पक्त्वाऽध्वर्युप्रभृतिभ्यश्चतुर्भ्यो भोजयित्वा, वरं च दत्त्वा, तावच्चातुष्प्राश्यसंस्कृतेऽग्नौ पूर्णाहुतिहोममावसथ्यहोमं च कृत्वा, आधेयदेवताभ्यः स्थालीपाकं श्रपयित्वेत्यादिवक्ष्यमाणमाधानाङ्गं चरुं श्रपयेत् । पूर्णाहुतिहोमो वक्ष्यते । अयं च सर्वोऽप्यर्थः "चातुष्प्राश्यपचनवत्सर्वम्" एतत्सूत्रातिदिष्टाग्निहोत्राधानधर्मलाभाल्लभ्यते । केचित्तु वैश्यादिकुलादग्निमाहृत्य चातुष्प्राश्यं पक्त्वा,चतुर्भ्यो दत्त्वा,'वरं च दत्त्वा तत्कालमेवाग्न्याधेयदेवताभ्यः स्थालीपाकादीच्छन्ति । अपरे तु पञ्चसंस्कारान्कृत्वा अग्निं प्रतिष्ठाप्य चातुष्प्राश्यं पक्त्वा ब्राह्मणेभ्यो दत्त्वाग्न्याधेयदेवताभ्यः स्थालीपाकादीच्छान्ति । अत्रापि स्थालीपाकादौ विशेषः अग्रे लेखनीयः। एवमाहरणपक्षमुक्त्वा इदानीमारणेयपक्षमाह—**अरणिप्रदानमेके**-यजमानायाऽध्वर्युः करोतीति शेषः । अरण्योः शास्त्रोक्तलक्षणयोः अधरोत्तरयोः प्रदानं प्रकर्षेण दानमाधानप्राग्दिने दिने दिवाशनदेवाः पितर इत्यादिजपानन्तरं पूर्वद्वाराऽगारं प्रविश्याग्नेर्जघनभागे पत्न्युत्तरेणोपविष्टायाशनप्राक्कालकृताभ्युदयिकाय यजमानाय शास्त्रोक्तविधिना दानं प्रकर्षः । दानमित्यत्र द्वितीयान्तकर्माकृष्टमध्वर्युरित्येतत्कर्तृपदं, कर्मणः कर्त्रधीनत्वात् । धात्वर्थाकृष्टं च यजमानायेत्येतत्संप्रदानवाचिपदं, दानस्य संप्रदानाधीनत्वात् । ननु तथापि कर्तृसम्प्रदानयोरर्थाध्याहार एव घटते न पदाध्याहार इति चेत् न, पदाध्याहारस्यापि सकलतान्त्रिकैकवाक्यतापन्नत्वात् । विस्तरभयान्न लिख्यते । एके श्रौतस्मार्ताद्याचारे आचार्या इत्यर्थः । तथाचोद्भटपण्डावतामयमेव सिद्धान्तपक्ष इत्यभिप्रायः । अत्र हेतुमाह—**पञ्च महायज्ञा इति श्रुतेः**-अथारणी पाणौ कृत्वेत्याद्यग्निष्टोमे अरण्योः पाणिकरणं श्रुत्या प्रतिपाद्यते तच्चारणिसाध्यम् । एवं चासाद्य हवींष्यग्निमधरारणिं निदधातीत्यादिश्रुत्या मन्थनक्रियापीष्ट्यङ्गतया प्रतिपाद्यते । साप्यरणिसाध्या । एवं चासाद्य हवींष्यग्निमन्थनादि श्रूयते । एवं च वेदबोधितकर्तव्यतास्तोमस्यारणिसाध्याग्निसाध्यत्वेन पञ्चमहायज्ञानामपि वेदबोधितकर्त्तव्यताकत्वात्तेषां चावसथ्याग्निसाध्यत्वादावसथ्याग्नेरप्यारणेयतैव सिद्धान्तः । तदिदमुक्तं पञ्चमहायज्ञा इति श्रुतेरिति । अत्राप्ययं **पदार्थक्रमः** । आदौ देहशुद्धिः । कालानतिक्रमश्चेत्तत्कालमेवाधानम् । कालातिक्रमे—"यावन्त्यब्दान्यतीतानि निरग्नेर्विप्रजन्मनः । तावन्ति कृच्छ्राणि चरेद्धौम्यं दद्याद्यथाविधि"इत्यादिस्मृतिबोधितं प्रायश्चित्ताचरणं कृत्वाऽऽवसथ्यं कुर्यात् । एतच्च आहरणपक्षोपपादनप्रस्तावे उपपादितं, तत्रैवानुसन्धेयम् । ततः' आधानपूर्वदिने पूर्वाह्णे देशकालौ संकीर्त्यावसथ्याग्निमहमाधास्य इति संकल्प्य मातृपूजाभ्युदयिके विधायाऽध्वर्युं वृणीते पूर्ववत्संकल्प्य ततस्तं गन्धपुष्पादिभिरभ्यर्च्य, मधुपर्केण वा पूजयित्वा स्वस्य माङ्गल्याशीर्ग्रहणं ब्राह्मणानां च अर्थात् ततोऽग्न्यगारकरणमध्वर्योः । पौर्णमासवद्वपनं यजमानस्य । उपलब्धक्षौमसमर्पणमध्वर्योः । दम्पत्योर्यजमानयोर्मन्त्रेण परिधानम् । तत आचमनम् । ततोऽध्वर्युः खरे पञ्चसंस्कारान् करोति । आहरणपक्षोक्तयोनेराहरणम् खरे स्थापनं, यजमानो भुङ्क्ते । सूर्यास्तसमीपेऽग्न्यगारप्राग्द्वाराग्रे दर्भास्तृतायां भूमौ पत्न्युत्तरत उपविश्य तिष्ठतो वा यजमानस्य " देवाः पितर " इति जपः । पूर्वद्वारेण प्रविशाति यजमानो, दक्षिणेन पत्नी । पश्चादग्नेरुपविशतः दक्षिणतः पत्नी । ततोऽध्वर्युः अश्वत्थशमीगर्भारणी शास्त्रोक्तलक्षणे आचारादहतवस्त्राच्छादिते यजमानाय समर्पयाति । यजमान अङ्के स्थापयति । पत्न्यपि अधरारणिं यजमानाङ्काद्गृहीत्वा स्वाङ्के स्थापयति । आवसथ्याग्निसाधनभूते इमे अरणी आवाभ्यां परिगृहीत इत्यङ्गीकारं कुरुतः । इमानि पात्राणि परिगृहीतानीति पात्राणि परिगृह्णीतः । पीठादौ स्थापिते अरणी चन्दनादिभिः पूजयतः । द्विजाशीः प्रतिगृह्य देवब्राह्मणान्नमस्यतः । ततोऽस्तामिते सवितरि आवसथ्यागारेऽजं बध्नाति न वा । तत आहरणपक्षवच्चातुष्प्राश्यपाको वरदानान्तः । एके अध्वर्यवे वरदानमिच्छन्ति न सर्वेभ्यः । प्रतिग्रहकर्तुरभीष्टदातुर्दानशक्यं द्रव्यमुच्यते वरः । समर्थश्चेत्तदा चतुष्कार्षापणो वरः । ततः स्थापितस्याग्नेः रात्रौ जागरणधारणे काष्ठैर्गोमयपिण्डैर्वा न समुचितैः। ततः प्रातः प्रत्यूषे स्नात्वा त एव वस्त्रे पुनः प्रक्षाल्य शोषयित्वा पत्नीयजमानौ परिदधीयाताम् । अध्वर्युरपि प्रातः स्नात्वां तमग्निमुपशमय्य वाचं यच्छापूर्णाहुतेरिति यजमानं प्रेष्याति । तत आपूर्णाहुति वाग्यतो भवति यजमानः । ततोऽध्वर्युरावसथ्यखरे पञ्चसंस्कारान्कृत्वा पुनरुल्लिख्याभ्युक्ष्याऽन्वारब्धे हिरण्यं निधायोषाखूत्करनिवपनान्तमाहरणपक्षवत्करोति । हिरण्यमुपर्येके । तत आचारादहतेन वस्त्रेण खरमाच्छाद्योदिते सूर्येऽनुदिते वा मन्थनं कुर्यात् ।

तत्र पूर्वमश्वमानयेति प्रैषो यजमानपुरुषं प्रति । अग्नेरपरभागे दर्भास्तृतायां भुवि उत्तराग्रामधरारणिं निधायोत्तरारणेरीशानदिक्स्थं प्रमन्थं छित्त्वा श्लक्ष्णं कृत्वा चात्रवुध्नगतगर्तमध्ये प्रोतयेत् । ततोऽधरारणेर्मूलादष्टाङ्गुलं त्यक्त्वाऽग्राच्च द्वादशाङ्गुलम् । "अन्तरं देवयोनिः स्यात्तत्र मथ्यो हुताशनः" इत्यनेन देवयोनौ प्रमन्थनं कुर्यात् । यजमानस्य यन्त्रधारणम्, पत्न्याः मन्थनम् । तयोरशक्तावन्ये यन्त्रं धारयन्ति मथ्नन्ति च । जातेऽग्नावध्वर्यवे वरदानम् । मनसैके । ततः शरावादिनाऽग्निं धृत्वा धूप्यमानेऽग्नौ श्वासप्रक्षेपः । प्राणममृते दध इति । तत उच्छ्वासोऽमृतं प्राण आदध इति । ततो दारुभिर्ज्वलन्तमग्निं भूर्भुवः आदित्यानां त्वेत्यादिमन्त्रेणाहरणपक्षवत् खरे स्थापयति । अश्वस्योत्सर्गः अजस्य च । ततः पूर्णाहुतिहोमः । आज्यनिर्वापः, अधिश्रयणं, स्रुक्स्रुवयोः संमार्गः, आज्योद्वासनं, पवित्राभ्यामुत्पवनमवेक्षणं, चतुर्गृहीतग्रहणं चतुर्थेऽन्यस्रुवेण स्रुचं पूरयेत् । परिस्तरणं तिष्ठन्त्समिदाधानमुपविश्य अग्निं ध्यात्वा यजमानान्वारब्धो जुहोति । वरं ददामीति वाग्विसर्जनम् । इदमग्नय इति त्यागो वरदानं ततस्तूष्णीमावसथ्यहोमः । तिष्ठन्समित्त्रयप्रक्षेपः । उपविश्य पर्युक्षणम् । प्रथमामाहुतिमग्निं ध्यात्वा हुत्वाग्नेयं त्यक्त्वा द्वितीयां च पात्रान्तरे प्रक्षिप्य तृतीयां सूर्यं ध्यात्वा जुहोति इदं सूर्यायेति त्यागः । चतुर्थीं गृहीत्वा द्वितीयया सह प्रजापतिं ध्यात्वा जुहोति । इदं प्रजापतये इति त्यागः । अपरे पुनः सद्यस्कालतामावसथ्याधानस्येच्छन्ति । अग्न्याधेयं न केवलं होमान्तमावसथ्यं, किंत्वन्यदप्यस्तीत्याह **अग्न्याधेयेति** । अग्नयो गार्हपत्यादय आधीयन्ते निष्पाद्यन्ते यस्मिंस्तदग्न्याधेयमग्निहोत्रमित्यर्थः । तस्मिंस्तस्य वा देवता अग्न्याधेयदेवताः, अग्निः, पवमानोऽग्निः, पावकोऽग्निः, शुचिरादितिस्ताभ्यः, स्थाल्यां पाकः स्थालीपाकः तमग्निहोत्राधानदेवतोद्देश्यकं स्थालीपाकमित्यर्थः । **श्रपयित्वा**–परिभाषाशास्त्रोक्तविधिना पक्त्वाऽऽज्यभागान्तं कृत्वा । तच्चैवम्, –आवसथ्यं हुत्वा दक्षिणतो ब्रह्मासनमास्तीर्येत्यारभ्य पर्युक्षणान्तां परिभाषां निर्वर्त्य स्रुवेणाज्यमादाय प्रजापतये स्वाहा इन्द्राय स्वाहेत्याघारसंज्ञके आहुतीर्हुत्वाग्नये स्वाहा, सोमाय स्वाहेत्याज्यभागान्तं कृत्वेत्यर्थः । तत्र विशेषः अग्नये पवमानायाग्नये पावकायाग्नये शुचयेऽदित्यै त्वा जुष्टं गृह्णामि । एवं त्रिः । तूष्णीं चतुर्थम् । प्रोक्षणे अग्नये पवमानायाग्नये पावकायाग्नये शुचयेऽदित्यै त्वा जुष्टं प्रोक्षामि । शेषं प्रकृतिवत् । आज्यभागान्ते **आज्याहुतीर्जुहोति**–आज्येनाहुतय आज्याहुतयस्ताः काः **त्वन्नो अग्ने, स त्वन्नो अग्ने, इमम्मे वरुण, तत्त्वायामि-येते शतम्, अयाश्चाग्ने, उदुत्तमम्, भवतन्न** इत्यष्टौ प्रातिमन्त्रमाज्याहुतीर्जुहोतीत्यन्वयः । तथा चाष्टसंख्यावच्छिन्नैर्मन्त्रैरष्टावाज्याहुतीर्जुहोतीत्यर्थः ।"आज्यभागाविष्ट्वा" इत्येतत्सूत्रमाहुतीनामवसरज्ञापनार्थमष्टग्रहणं मन्त्रप्रतीकसंशयव्युदासार्थम् । त्यागस्तु इदमग्नीवरुणाभ्याम् १ । इदमग्नीवरुणाभ्याम् २ । इदं वरुणाय ३ इदं वरुणाय ४ । इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ५ । इदमग्नयेऽयसे ६ । इदं वरुणायादितये ७ । इदं जातवेदोभ्याम् ८ । **पुरस्तात्** । **एवमुपरिष्टात्स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा जुहोति**–प्रागुक्ताभ्यः अग्निहोत्रदेवताभ्यः स्विष्टकृत्सहिताभ्यः स्थालीपाकं हुत्वा पुरस्ताद्यथाऽष्टर्चहोमः कृतः एवमुपरिष्टात्स्थालीपाकहोमानन्तरमष्टर्चं जुहुयादित्यर्थः । ननु पुरस्तादित्येतत्पदं व्यर्थमाज्यभागाविष्ट्वाज्याहुतीरित्यनेनैव स्थालीपाकहोमात्प्राक्तस्य लब्धत्वादिति चेत् न, उत्तरसूत्रातिदेशप्राप्त्यर्थत्वात् । **स्विष्टकृते......गातुविद इति**–अत्र चशब्दोऽप्यर्थः । अपिश्च समुच्चयार्थः । पुरस्तादेवमुपरिष्टादित्येतत्सूत्रांशं समुच्चिनोति । स्विष्टकृद्धोमेऽपि अयास्यग्नेरित्यारभ्य विदः स्वाहा इत्यन्तामाज्याहुतिं पुरस्तादेवमुपरिष्टाज्जुहोतीत्यन्वयः । तथाच स्थालीपाकेन प्रधानाश्चतस्र आहुतीर्हुत्वा अयास्यग्नेरित्याद्याहुतिं हुत्वा स्थालीपाकेन स्विष्टकृद्धोमं कृत्वा पुनरयास्यग्न इत्याज्याहुतिं जुहुयादित्यर्थः । ततः स्थालीपाकहोमोत्तरकालिकोऽष्टर्चहोमः । ततो महाव्याहृत्यादिप्राजापत्यान्ता नित्या वक्ष्यमाणा नवाहुतयः । **बर्हिर्हुत्वा प्राश्नाति**–पाकयज्ञेष्ववत्तस्यासर्वहोमो हुत्वा शेषप्राशनमित्यस्यानुवादोऽयं प्राश्नातीति । एतच्च कदा कर्तव्यमित्याकाङ्क्षायामुक्तं **बर्हिर्हुत्वेति** । प्राश्नातीत्यनेन श्रुतौ दृष्टानि प्रतिपत्तिकर्माणि लक्ष्यन्ते । तथाहि । मार्जनं पवित्रयोः स्मार्त्तेऽग्नौ प्रक्षेपः । ततः पूर्णपात्रवरयोरन्यतरादावसथ्याधानस्य साङ्गतासिद्ध्यर्थं पूर्णपात्रं वरं वा दक्षिणां चतुर्मुखप्रीतये संप्रददे इति संकल्प्य कस्मैचिद्द्विजाय दद्यात् । चतुर्थीकर्मादौ उपविष्टाय ब्रह्मणे दद्यात् । ततः सर्वप्रायश्चित्तहोमः । व्यस्ताः समस्ताश्चतस्रो महाव्याहृतयः, " त्वन्नः, सत्वन्नः, अयाश्चाग्ने, ये ते शतं, उदुत्तमम्"इत्याद्याहुतिनवकं सर्वप्रायश्चित्तसंज्ञकं, ततः प्रणीताविमोकः,तत एकस्मै वक्ष्यमाणलक्षणाय ब्राह्मणाय भोजनं दद्यात् । कर्मापवर्गे समित्प्रक्षेपोऽग्नौ । उत्सर्जनं ब्रह्मणः । उपयमनकुशानामग्नौ प्रक्षेपः । अयं च पदार्थक्रमः प्राश्नातीत्येतत्सूत्रलक्षितो लभ्यते । **ततो ब्राह्मणभोजनम्** "आवसथ्ये त्रयस्त्रिंशत्" इति परिशिष्टात्त्रयस्त्रिंशत्संख्याकेभ्यो ब्राह्मणेभ्यो भोजनदानम् । केचित्तु त्रयोविंशतिमिति पाठमाहुस्तन्मते त्रयोविंशतिसंख्याकेभ्य एव भोजनदानम् । ते चाध्ययनशीलास्तपस्विनो ज्ञेयाः । **शाङ्खायनगृह्यकारोऽपि**–" कर्मापवर्गे ब्राह्मणभोजनं वाग्रूपवयःश्रुतशीलवृत्तानि गुणाः । श्रुतं तु सर्वानत्येति न श्रुतमतीयात् ।" "मन्त्राश्च ब्राह्मणं चैव श्रुतमित्यभिधीयते । अधिदैवतमध्यात्ममधियज्ञमिति त्रयम् ॥ क्रियावन्तमधीयानं श्रुतवृद्धं तपस्विनम् । भोजयेत्तं सकृद्यस्तु न तं भूयस्तदश्नुते ॥ यां तितर्पयि-

षेत्कांचिद्देवतां सर्वकर्मसु ॥ तस्या उद्दिश्य मनसा दद्यादेवंविधाय वै । नैवंविधे हविर्न्यस्तं न गच्छेद्देवतां क्वचित् ॥ निधिरेष मनुष्याणां देवानां पात्रमुच्यते" इति । तथा चैवंविधानां ब्रह्मणानां त्रयस्त्रिंशत्संख्याकानां त्रयोविंशतिसंख्याकानां वा भोजनमिति षष्ठीतत्पुरुषः। प्रयोगश्चैवम्–देशकालौ संकीर्त्य कृतैतदावसथ्याधानकर्मणः साङ्गतासिद्ध्यर्थं यथासंपन्नेनान्नेनातृप्तिपर्याप्तेन त्रयस्त्रिंशत्संख्याकान् त्रयोविंशतिसंख्याकान्वा ब्राह्मणानहं तर्पयिष्ये इति । एतेन लाघवादेकमेव ब्राह्मणमावसथ्ये भोजयेदित्येवं वर्णयन्तो **हरिहरादयः** प्रत्युक्ता वेदितव्याः । ततः सुप्रोक्षितादि कृत्वा आत्मवाससी पत्नीवाससी च अध्वर्यो तुभ्यमहं संप्रददे इत्यात्मपत्नीपरिहितवस्त्रदानमध्वर्यवे, " बृहस्पतये त्वा " इति प्रतिग्रहः । ततो यजमानस्य माङ्गल्याद्याशीर्वादांश्च द्विजाः पठेयुः । **इत्यावसथ्याधानम्** ॥ २ ॥

प्रसङ्गात्किंचिल्लिख्यते । अधिकारे सत्यालस्याद्वर्षमाधानाकरणे चान्द्रायणम् । मासातिक्रमे त्वेकमुपोषणम् । तदुक्तं—"कृतदारो गृहे ज्येष्ठो यो नादध्याद्धुताशनम् । चान्द्रायणं चरेद्वर्षं प्रतिमासमहोऽपि वा " अथ कृतधानआलस्याच्चेदग्निं त्यजति मासद्वयं स प्राजापत्यं चरेत् । मासचतुष्टयं चेदतिकृच्छ्रम् । मासषट्कं चेत्पाराकः । संवत्सरं चेत्पयोव्रतम् । तदाह **व्याघ्रपादः**—"मासद्वयं तु यो वह्निं त्यजेदेतत्समाचरेत् । नास्तिक्यात्कृच्छ्रमेकं तु होमद्रव्यं ददाति चेत् ॥ " तथा " योऽग्निं त्यजति नास्तिक्यात्प्राजापत्यं चरेद्द्विजः । अन्यत्र पुनराधानमुपदिष्टं मनीषिभिः "तथा-"चतुष्टये तु संपूर्णे मासानां तु हुताशनम् । त्यक्त्वातिकृच्छ्रं कुर्वीत ततः पापात्प्रमुच्यते ॥" तथा–" षण्मासास्त्यजते योऽग्निं पाराकं स समाचरेत् । ऊर्ध्वं पयोव्रतं कुर्यान्मासमेकं समाहितः" इति । संवत्सराधिककालातिक्रमे पयोव्रतं कृत्वा द्वैमासिकादि समाचरेत् । तदुक्तं **स्कन्दपुराणे**—" ऊर्ध्वं संवत्सरादग्निं यस्त्यजेत्स पयोव्रतम् । द्वैमासिकं ततः कृत्वा त्रैमासिकमथापि वा । एवमधिकोनकालिकाग्निपरित्यागे प्रायश्चित्ताधिक्यं न्यूनत्वं च परिकल्पनीयम् । त्यागकालिकहौम्यं च विप्रेभ्यो देयम् । तदुक्तं **भारद्वाजगृह्ये**—" यावत्कालमहोमी स्यात्तावद्द्रव्यमशेषतः।तद्दानं चैव विप्रेभ्यो यथा होमस्तथैव तत् " इति । एवं प्रायश्चित्ताचरणं कृत्वा हौम्यं च दत्त्वा पुनराधानं कुर्यात् । एतच्च नास्तिक्यादग्निपरित्यागे । विपत्तौ तु शरीरशुद्धिं संपाद्य हौम्यं दत्त्वा पुनराधानं कुर्यात् । प्रसङ्गात्पुनराधाननिमित्तान्युच्यन्ते—" अग्नावनुगते यस्य होमकालद्वयं व्रजेत् । उभयोर्विप्रवासे वा लौकिकाग्निर्विधीयते ॥ १ ॥ " एवं " विहायाग्निं सभार्यश्चेत्सीमामुल्लङ्घ्य गच्छति । होमकालात्यये तस्य पुनराधानमिष्यते ॥ २ ॥ अनो विना समारूढ ऊर्ध्वं शम्यापरासनात् । हुतोऽग्निर्लौकिको ज्ञेयः श्रुतौ सर्वत्र दर्शनात् ॥ ३ ॥ कुरुक्षेत्रादितीर्थानां गमने देशविप्लवे । समारोपं विनैवाग्निं नोद्वहेयुर्विपश्चितः ॥ ४ ॥ आरोप्याग्नीनरण्योः स्वानुदवस्येत्सहाग्निभिः ।" मथ्यमानस्य दृष्टस्य नाशे, प्रत्यक्षस्य सीमान्तरनयने होमं विना वर्षातिक्रमे, उदकेनोपगमे, शिक्येनोद्वहनेऽग्निं विना शतयोजनपर्याप्तमार्गातिक्रमे, अन्त्यजादिनाग्नेरुपघाते प्रसिद्धक्रियालोपे प्रवासादिनाऽग्नेरुपेक्षायां, प्रमादादधारणे, यजमानयोः प्रवासे होमसमयेऽनागतयोरेकपत्नीके पत्यौ प्रोषिते, पत्न्याः अग्निं विना समुद्रगनदीसंतरणे, भयेन च विनाऽग्निना सहापि तादृशनदीसंतरणे, पत्न्याः सीमातिक्रमणे, पत्यावनागते एके, एवं पत्न्या रजोदोषे सूतके मृतके वा होमकाले वा पर्वणि वा यजमानस्य प्रवासे धूपदीपादिकरणे, स्वेदादिकरणे, प्रत्यहीयपाकाकरणे, अव्यवधानं पक्षत्रयसमारोपेऽनुपहताभ्यां पूर्वारणिभ्यां पुनराधानं कुर्यात् । **अनुपहतेति**—पूर्वारणी मन्थनादिना मन्थनायोग्ये चेत्तदाऽन्ये शास्त्रोक्तलक्षणे नूतने ग्राह्ये । अनुपहते अयोग्ये शकलीकृत्य दाह्ये । उपहते तु अप्सु निक्षेप्तव्ये । नष्टायामप्यरणौ अग्निश्चेद्वर्त्मानि तिष्ठेत्तदाग्निस्थितिपर्यन्तं होमादि सर्वं कुर्यात् । उपशान्ते तस्मिन्पुनराधानं कुर्यात् । पुनराधानमप्याधानवद्भवति, प्रोषिते भर्तरि आधानं पुनराधानं च न भवति । काम्यानित्यनैमित्तिकानुष्ठानं भवति । "साग्निकस्य धनार्थमेव प्रवासः " इति केचित् । अपरे तु " सहाग्निः सपत्नीकस्तीर्थानि व्रजेत्" इत्याहुः । पुनश्चेत् वचनसद्भावादुभयं समूलम् । यस्तु नास्तिक्यादग्निं परित्यज्य पुनराधानादि न कुर्यात् स पतितवद्बहिः कार्यः । पुनश्चेत् चिरकालेन व्यवहर्तुमिच्छति तदा द्वादशाब्दं कारयित्वा व्यवहर्तव्यम् । तदुक्तं—"स्वकर्महानौ नास्तिक्यान्मासेन पतनं स्मृतम् । द्वादशाब्दव्रतेनैव शुद्धिस्तस्य तु नान्यथा" नास्तिक्यं तु वेदप्रामाण्यानभ्युपगमः । अन्यथा क्रियाबाहुल्यपरित्यागे स्वल्पप्रायश्चित्तानुपदेशप्रसङ्ग इति पश्यामः ॥ २ ॥

षडर्घ्या भवन्त्याचार्य ऋत्विग्वैवाह्यो राजा प्रियः स्नातक इति ॥ १ ॥ प्रतिसंवत्सरानर्हयेयुः ॥ २ ॥ यक्ष्यमाणास्त्वृत्विजः ॥ ३ ॥ आसनमाहार्याह साधु भवानास्तामर्चयिष्यामो भवन्तमिति ॥ ४ ॥ आहरन्ति विष्टरं पद्यं पादार्थमुदकमर्घमाचमनीयं मधुपर्कं दधिमधुघृतमपिहितं काꣳस्ये काꣳस्येन ॥ ५ ॥ अन्यस्त्रिस्त्रिः प्राह विष्टरादीनि ॥ ६ ॥ विष्टरं प्रतिगृह्णाति ॥ ७ ॥ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः । इमन्तम-

भितिष्ठामि यो मा कश्चाभिदासतीत्येनमभ्युपाविशति ॥ ८ ॥ पादयोरन्यं विष्टर आसीनाय ॥ ९ ॥ सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति ॥१०॥ ब्राह्मणश्चेद्दक्षिणं प्रथमम् ॥११॥ विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोह इति ॥ १२ ॥ अर्घम्प्रतिगृह्णात्यापःस्थ युष्माभिः सर्वान्कामानवाप्नवानीति ॥१३॥ निनयन्नभिमन्त्रयते, समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । अरिष्टा अस्माकं वीरा मा परासेचि मत्पय इति ॥१४॥ आचामत्यामागन्यशसा सꣳसृज वर्चसा। तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनामिति ॥ १५ ॥ मित्रस्य त्वेति मधुपर्कं प्रतीक्षते ॥१६॥ देवस्य त्वेति प्रतिगृह्णाति ॥१७॥ सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया त्रिः प्रयौति नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामीति ॥ १८ ॥ अनामिकाङ्गुष्ठेन च त्रिंर्निरुक्षयति ॥ १९ ॥ तस्य त्रिः प्राश्नाति यन्मधु मधव्यं परमꣳरूपमन्नाद्यम् । तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानीति ॥२०॥ मधुमतीभिर्वा प्रत्यृचम् ॥२१॥ पुत्रायान्तेवासिने वोत्तरत आसीनायोच्छिष्टं दद्यात् ॥ २२ ॥ सर्वं वा प्राश्नीयात् ॥२३॥ प्राग्वा सञ्चरे निनयेत् ॥२४॥ आचम्य प्राणान्त्सम्मृशति वाङ्म आस्ये नसोः प्राणोऽक्ष्णोश्चक्षुः कर्णयोः श्रोत्रं बाह्वोर्बलमूर्वोरोजोऽरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सहेति ॥२५॥ आचान्तोदकाय शासमादाय गौरिति त्रिः प्राह ॥२६॥ प्रत्याह । माता रुद्राणां दुहिता वसूनाꣳस्वसादित्यानाममृतस्य नाभिः । प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट । मम चामुष्य च पाप्मानꣳहनोमीति यद्यालभेत ॥ २७ ॥ अथ यद्युत्सिसृक्षेन्मम चामुष्य च पाप्मा हत ओमुत्सृजत तृणान्यत्त्विति ब्रूयात् ॥ २८ ॥ न त्वेवामाꣳसोऽर्घः स्यात् ॥ २९ ॥ अधियज्ञमधिविवाहं कुरुतेत्येव ब्रूयात् ॥ ३० ॥ यद्यप्यसकृत्संवत्सरस्य सोमेन यजेत कृतार्घ्या एवैनं याजयेयुर्नाकृतार्घ्या इति श्रुतेः ॥३१॥*॥३॥

कर्कः–आवसथ्याधानं दारकाल इत्युक्तम् । दाराहरणमेव कथं क्रियत इति तदभिधीयते । तत्र च वैवाहिकस्यार्घदानं स्मर्यते । तत्प्रसङ्गेन यावन्तोऽर्घ्यास्ते सर्व एवाभिधीयन्ते **षडर्घ्या भवन्तीति**–षडर्घार्हा भवन्तीत्यर्थः । तानाह । **आचार्यः, ऋत्विक्, वैवाह्यो, राजा, प्रियः, स्नातक इति**–प्रियस्नातकयोः पृथक्त्वज्ञापनार्थं षड्ग्रहणम् । उपनयनपूर्वकं यो वेदमध्यापयति स आचार्यः । ऋत्विक् प्रसिद्धः । वैवाह्यो जामाता । राजा च प्रियश्च प्रसिद्धौ । वेदमधीत्य यः स्नातस्तस्याचार्योऽर्घदानं करोति । एवं हि स्मरन्ति “तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः । स्रग्विणं तल्प आसीनमर्हयेत्प्रथमं गवा ” इति आचार्यस्यायमुपदेशः । **प्रतिसंवत्सरानर्हयेयुः**–आचार्यादीनपि । नत्वर्वाक् संवत्सरादागतान् । **यक्ष्यमाणास्त्वृत्विजः**–पुनर्यक्ष्यमाणा एवार्घ्याः न ततोऽन्यत्र । **आसनमाहार्याह साधु भवानास्तामर्चयिष्यामो भवन्तमिति**–अर्घ्यं प्रत्यध्येषणमेतत् । आहार्येत्यानाय्येत्युच्यते ।

आहरन्ति विष्टरं पद्यं पादार्थमुदकमर्घमाचमनीयं मधुपर्कं दधिमधुघृतमपिहितं का ँस्येका ँस्येन–विष्टरः उपवेशनार्थं विष्टरिका। पद्यं च विष्टरम्। पादार्थमुदकं सुखोष्णम्। अर्घम् अर्घशब्देन च उदपात्रमेवोच्यते। तथाच लिङ्गम् "यथा राज्ञ आगतायोदकमाहरेदेवमेतत्" इति सोमस्योदपात्रनिनयनं विधाय एतदुक्तम्। आचमनीयम् उदकमेव। तथा मधुपर्कं दधिमधुघृतं कांस्यपात्रे स्थितं कांस्येनैवापिहितम्। एतान्याहरन्ति बहुवचननिर्देशादर्घयितुः सम्बन्धिनः पुरुषाः। उच्चारणार्थं वा बहुवचनम्। **अन्यस्त्रिस्त्रिः प्राह विष्टरादीनि**–अर्घयितुर्व्यतिरिक्तोऽन्यो विष्टरादीनि त्रिस्त्रिः प्राह विष्टरो विष्टरो विष्टरः प्रतिगृह्यतामित्येवम्। **विष्टरं प्रतिगृह्णाति**– तूष्णीमेव। **वर्ष्मोऽस्मि समानानामि**त्यनेन मन्त्रेण विष्टरे एवाभ्युपविशति। ग्रहणोपवेशनयोर्मध्ये मन्त्रः पठितः स लिङ्गादुपवेशने विनियुज्यते, लिङ्गं हि भवति। **इमन्तमभितिष्ठामीति**–पादयोरन्यं द्वितीयं विष्टरं ददातीति वाक्यशेषः। स चायमुपदेशः। प्रक्षाल्य हि पादौ विष्टरे क्रियेते, तस्मात्पाद्योत्तरकालं द्वितीयं विष्टरं ददातीति पाठोऽर्थेन बाध्यते। तथाचोत्तरं सूत्रम्। **विष्टरआसीनाय सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयतीति**–एकस्मिन्नेव विष्टरे आसीनस्य पादप्रक्षालनम्। ततो द्वितीयो विष्टर इति। ❀ **ब्राह्मणश्चेद्दक्षिणं प्रथमं विराजो दोहोऽसीति**–यदि ब्राह्मणोऽर्घ्यस्तदा दक्षिणं प्रथमं प्रक्षालयेत्। विराजो दोहोऽसीत्यनेन मन्त्रेण। पादार्थमुदकं गृहीत्वा प्रक्षालयत्यर्घ्य एव। **अर्घं प्रतिगृह्णात्यापः स्थ युष्माभिरिति**–अनेन मन्त्रेणार्घ्य एव। लिङ्गादेवावगम्यते आप एवार्घ इति। **निनयन्नभिमन्त्रयते समुद्रं वः प्रहिणोमीति**–न मन्त्रान्ते निनयनम्। **आचामत्यामागन्यशसेति**–अनेन मन्त्रेण। **मित्रस्य त्वेति मधुपर्कं प्रतीक्षते**–अर्घ्यः। सर्वेषु चैतेषु त्रिस्त्रिरेतानि द्रव्याण्यभिधाय प्रतिगृह्यतामित्यर्घ्यमाहान्यः। **देवस्य त्वेति प्रतिगृह्णाति**–मधुपर्कम्। **सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया त्रिः प्रयौति नमः श्यावास्यायानिति**–अनेन मन्त्रेण सव्ये पाणौ स्थितं तमेव मधुपर्कं दक्षिणस्यानामिकया त्रिः प्रयौति। **अनामिकाङ्गुष्ठेन च त्रिर्निरुक्षयति**–दक्षिणस्यैव च शब्दात्प्रयौति च। अतश्च प्रतिप्रयवणं निरुक्षणम्। एवञ्च त्रिर्निरुक्षणं व्यवधानात्प्रतिप्रयवणं मन्त्राभ्यासः। **तस्य त्रिः प्राश्नाति यन्मधुनो मधव्यमिति**–अनेन मन्त्रेण। **मधुमतीभिर्वा प्रत्यृचम्**–प्राश्नाति। उच्छिष्टस्यैव मन्त्रोच्चारणम्, एवं हि स्मरन्ति। "मधुपर्के च सोमे च नोच्छिष्टो भवति" इति। **पुत्रायान्तेवासिने वोत्तरत आसीनायोच्छिष्टं दद्यात्**–यदवशिष्टं मधुपर्कस्य सर्वं वा प्राश्नीयात्–प्राग्वाऽसञ्चरे निनयेत्। इति विकल्पः। **आचम्य प्राणान्त्संमृशति वाङ्म आस्यं**–इत्येवमादिभिर्मन्त्रैः प्रतिमन्त्रम्। अनाचान्तस्यैव प्राणायतनसम्मर्शनं माभूदित्याचम्येति ग्रहणम्। साकाङ्क्षत्वादस्त्वित्यध्याहारः। मे इत्यस्य च सर्वत्रानुषङ्गः। अरिष्टानि मेऽङ्गानि तनूरित्यत्र सन्त्वित्यध्याहारः। **आचान्तोदकाय शासमादाय गौरिति त्रिः प्राहेति**–आचान्तोदकग्रहणं पुनराचमनमिति केचित्। अपरे त्वाहुः। आचान्तमुदकं येनासावाचान्तोदकः तदर्थं शासादानमिति। तादर्थ्यञ्च पश्वालम्भनस्य तदर्थत्वात्। गौरिति त्रिः प्राहार्घ-

---

❀ ब्राह्मणपूर्वकत्वेन धर्मानुष्ठाने प्राप्ते [illegible] नेति न्यायसूचनार्थम् ॥

यिता । **प्रत्याह मातारुद्राणामिति**–प्रत्याहार्घ्यो मातारुद्राणामित्यमुं मन्त्रम् । तदन्ते च मम चामुष्य च पाप्मानꣳहनोमीति प्रयोगः । अमुष्येति चार्घयितुर्नामग्रहणम् । यद्यालभेत् पाप्मानꣳहनोमीति प्रयोगः । **अथ यद्युत्सिसृक्षेन्मम चामुष्य च पाप्मा हत ॐ उत्सृजत तृणान्यत्त्विति ब्रूयात्** । अत्राप्यमुष्येत्यर्घयितुर्नामादेशः । ॐ उत्सृजत तृणान्यत्त्वित्येतदुच्चैर्ब्रूयात् । निगदो ह्ययमिति । शेषमुपांश्वेव । **नत्वेवामाꣳसोऽर्घः स्यादधियज्ञमधिविवाहं कुरुतेत्येव ब्रूयात्**–यज्ञमधिकृत्य विवाहं चाधिकृत्य कुरुतेत्येवं वक्तव्यम् । पाप्मानꣳहनोमि कुरुतेत्येवम् यस्माद्यज्ञविवाहयोरमांसोऽर्घो न भवतीति स्मरणम् । यज्ञविवाहवर्ज्जमन्यत्र पशोरालम्भाविकल्पः । **यद्यप्यसकृत्संवत्सरस्य सोमेन यजेत कृतार्घ्या एवैनं याजयेयुर्नाकृतार्घ्या इति श्रुतेः**–परिगतसंवत्सरा अर्घ्या भवन्तीत्युक्तं तदपवादोऽयम् । अत एवावगम्यते सोमेन यक्ष्यमाणा एवर्त्विजोऽर्घ्या नेतरैर्यागैरिति ॥ ३ ॥ * ॥

जय०–"आवसथ्याधानं दारकाले" इत्युक्तम् तद्दाराहरणमेव कथं क्रियते इति तदभिधीयते । तत्र च वैवाहिकस्यार्घदानं स्मर्यते । तत्प्रसङ्गेन यावन्तोऽर्घ्यास्तानाह–**षट् अर्घ्याः**=अर्घार्हा भवन्तीति । तान्विभजते । आचार्यः उपनयनपूर्वकं वेदाध्यापकः । ऋत्विक् प्रसिद्धः । वैवाह्यो जामाता । राजा च । प्रियोऽपि । वेदमधीत्य यः स्नातस्तस्याचार्योऽर्घदानं करोत्यादौ । "तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः । स्रग्विणं तल्प आसीनमर्हयेत्प्रथमं गवा" इत्याचार्यस्योपदेशात् । प्रियस्नातकयोः पृथक्त्वज्ञापनार्थम् षड्ग्रहणम् । **प्रतिसंवत्सरान्**–प्रतिरत्रात्यर्थः । अतिसंवत्सरानित्यर्थः । तेन संवत्सरोपर्यागतानाचार्यादीनपि अर्हयेयुः । अर्घदानेन पूजयेयुः । नत्वर्वाक्संवत्सरादागतान् । **यक्ष्यमाणास्तु**–यागं करिष्यन्त एवर्त्विजोऽर्हयेयुः । संवत्सरोपर्य्यागतानपि न ततोऽन्यत्रेत्यर्थः । कथमित्यपेक्षायामाह–**आसनमिति**–आसनं पीठादि **आहार्य्य**–स्वपुरुषैरानाय्याहार्घयिता **साधुभवानास्तामिति**-अर्घ्यं प्रत्यद्वयेषणमेतत् । **आहरन्तीति**-स्वपुरुषा एव विष्टरमुपवेशनार्थं पञ्चविंशच्छलाकारचितं कुशपुलकम्, पद्यं च विष्टरमेव तादृशम् । पादार्थमुदकं सुखोष्णम् । अर्घशब्देनोदपात्रमुच्यते । तथा च लिङ्गम् "यथा राज्ञ आगतायोदकमाहरेदेवमेतत्" इति सोमस्योदपात्रनिनयनं, विधायैतदुक्तम् । आचमनीयमुदकमेव । तथा मधुपर्कं तस्यैव प्रपञ्चः दधिमधुघृतं कांस्यभाजने स्थितं कांस्यभाजनेनैवापिहितमाच्छादितम् । **अन्यः**–अर्घयितुर्व्यतिरिक्तः कश्चिद्विष्टरादीनि त्रिस्त्रिः प्राह विष्टरो विष्टरो विष्टर इत्येवम् । ततोऽर्घयित्राऽर्पितमुभाभ्यां हस्ताभ्यामर्घ्यो गृह्णाति तूष्णीम् ग्रहणमात्रोपदेशात् । वर्ष्मोऽस्मीति मन्त्रेणैनं विष्टरमेवाभ्युपविशति । ग्रहणोपवेशनयोर्मध्ये पठितोऽपि मन्त्रो लिङ्गादुपवेशने विनियुज्यते । लिङ्गं च । **इमं तमभितिष्ठामीति** । अथ मन्त्रार्थः । तत्र अथर्वणोऽनुष्टुप् विष्टरो देवता उपवेशने आत्मानमर्घ्यत्वायार्घ्यः स्तौति कुलज्ञानाचारवपुर्वयोगुणैरहं समानानां सजातीयानां मध्ये वर्ष्मः श्रेष्ठः ज्येष्ठ इति यावत् । अस्मि भवामि । उद्यतां उदयं प्रकाशं कुर्वतां ग्रहनक्षत्रादीनां मध्ये सूर्य इव, किञ्च इमं विष्टरं तं पुरुषमुद्दिश्य विष्टरवद्धद्ममभिलक्ष्यीकृत्य अभिभूय वा तिष्ठामि अधः कृत्वा उपर्युपविशामि, यः कश्चन मा माम् अभिदासति उपक्षीणं कर्तुमिच्छति । "दसु उपक्षये" **पादयोरन्यं**–द्वितीयं विष्टरं ददातीति वाक्यशेषः । स चायमुपदेशो नानुक्रमः । प्रक्षाल्य हि पादौ विष्टरे क्रियेते इति, तस्मात्पाद्योत्तरकालं द्वितीयं विष्टरं ददातीति पाठोऽर्थेन बाध्यते । तथाचोत्तरसूत्रम्, **विष्टर आसीनायेति**–तेनैकस्मिन्विष्टरे आसीनस्य पादप्रक्षालनं ततो द्वितीयविष्टरदानमिति । अर्घ्यश्च पूर्ववत्तूष्णीम् प्रतिगृह्य पुनर्वर्ष्मोऽस्मीति मन्त्रेण निदधाति प्रक्षालितपादयोरधस्तात् । प्रक्षालनं चाञ्जलिना **विराजो दोहोऽसीति**–मन्त्रेण स्वयमेव । यदि ब्राह्मणोऽर्घ्यस्तदा दक्षिणं प्रथमं प्रक्षालयेन्नान्यः । अनेन मन्त्रावृत्तिरवगम्यते । तत्र मन्त्रः । **विराजो दोहोऽसीति** । अस्यार्थः । तत्र

प्रजापतिर्यजुरापः पादयोर्जलप्रक्षेपे । प्राणधारणादिगुणैः सकलसौहित्येन विविधतया राजत इति विराडन्नं तस्य विराजो दोहः परिणामसारो रसः स त्वम् असि भवसि । हे उदक तंत्वां विराजो दोहम् अशीय अश्नुवै । छान्दसो विकरणलोपः । किञ्च मयि विषये या पाद्या पादयोः साध्वी सपर्या तस्यै तदर्थं विराजो दोहः मन्त्रसंस्कृतं जलं भवेति शेषः । अर्घोऽर्घोऽर्घः प्रतिगृह्यतामित्यन्येनोक्ते अर्घ्योऽर्घं प्रतिगृह्णाति आपः स्थेति मन्त्रेण । अर्घ्यतेऽनेनेत्यर्घः आप एव मन्त्रलिङ्गात् । अथ मन्त्रार्थः । तत्र प्रजापतिर्यजुरापः अपामादाने । हे आपः यतो यूयमापः आप्तिहेतवः स्थ भवथ तस्माद्युष्माभिः कृत्वा सर्वानशेषान्कामान् अभीष्टार्थान् अहम् अवाप्नवानि लभेयम् । ततोऽर्घ्योऽर्घं गृहीत्वा उपमौलिमानीय निनयन् नामयन् अभिमन्त्रयते समुद्रं व इति मन्त्रेण न तु मन्त्रान्ते । अस्यार्थः । तत्र अथर्वणोऽनुष्टप् आपोऽर्घप्रतिक्षेपे । हे आपः साधितार्था वो युष्मान् समुद्रं प्रहिणोमि गमयामि, अतः स्वां योनिं स्वकारणभूतं समुद्रमभिलक्ष्यीकृत्य गच्छत व्रजत । किञ्च युष्मत्प्रसादाच्चास्माकं वीराः पुत्रा भ्रातरश्चारिष्टा अनुपहताः सन्तु, मत् मत्तः पयः अर्घादिमङ्गलं जलं मा परासेचि अपगतं मास्तु, सदैवाहमर्घ्यो भवानीत्यर्थः । ततोऽर्घ्य आचामति आमागन् यशसेति मन्त्रेण सकृद् द्विस्तूष्णीम् । अस्यार्थः । तत्र परमेष्ठी बृहती आचमने । हे जलेश वरुण तमेवंरूपेण त्वामाश्रितं मा माम् यशसा आमा सह सहभावं सामीप्यं वा अगन् आगमय । तथा वर्चसा ब्रह्मवर्चसेन संसृज संसृष्टं कुरु । किञ्च प्रजानां श्रेष्ठजनानां प्रियं श्रेष्ठं प्रीतं वा पशूनां गोऽश्वादीनामधिपतिं स्वामिनं च तथा तनूनां देहावयवानां शरीरिणां वा अरिष्टम् अहिंसकं सुखजनकं वा कुरु। हिंसा च "अनभ्यासेन वेदानाम्" इत्यादिना दर्शिता । ततो मित्रस्य त्वेति मन्त्रेणार्घ्यो मधुपर्कं प्रतीक्षते पश्यति, तत्र प्रजापतिः पङ्क्तिर्मित्रो दर्शने। सर्वेषु चैषु त्रिस्त्रिरेतानि द्रव्याणि अभिधाय प्रतिगृह्यतामित्याहान्योऽर्घ्यम्। **देवस्य त्वेति**-मन्त्रेणार्घ्यः **प्रतिगृह्णाति**–मधुपर्कम् । अस्य परमेष्ठी गायत्री सूर्यो ग्रहणे । सव्ये पाणौ स्थितं मधुपर्कं दक्षिणहस्तस्यानामिकया त्रिः प्रयौति प्रदक्षिणमालोडयति **नमः श्यावास्यायेति**–मन्त्रेण। अस्यार्थः। त त्रप्रजापतिर्यजुः सविता निरुक्षणे । हे अग्ने ते तुभ्यं नमः किम्भूताय श्यावास्याय कपिशमुखाय ते तव अन्नशने अन्नाशने अद्यते इत्यन्नं तस्याशने । ह्रस्वश्छान्दसः । आविद्धं संश्लिष्टम् अनदनीयं यत् तन्निष्कृन्तामि निरस्यामि अतः शुद्धमन्नं गृहाणेत्यर्थः । तमेव दक्षिणहस्तस्यानामिकाङ्गुष्ठभ्यां त्रिर्निरुक्षयति अपसारयति चशब्दात्प्रयौति च अतश्च प्रतिप्रयवणमेव निरुक्षणम्, एवंप्रयवणनिरुक्षणयोर्युगपद्भावः मन्त्रलिङ्गाच्च । एवं च निरुक्षणव्यवधानात्प्रतिप्रयवणं मन्त्राभ्यासः। **तस्य त्रिः प्राश्नाति यन्मधुन** इति–मन्त्रेण। तस्येत्यवयवलक्षणा षष्ठी। त्रिशब्दानुवृत्तौ पुनस्त्रिर्ग्रहणम् एकद्रव्ये कर्मावृत्तौ सकृन्मन्त्रवचनशङ्काव्युदासार्थम्। मधुमतीभिर्वा मधुव्वाता इति तिसृभिर्ऋग्भिर्वा प्रत्यृचं प्राश्नात्यनामिकाङ्गुष्ठाभ्यामेव । उच्छिष्टस्यैवापरं वारद्वयं मन्त्रोच्चारणम् । "मधुपर्के च सोमे च नोच्छिष्टो भवति द्विजः" इति स्मरणात् । अथ मन्त्रार्थः । यन्मधुन इति कुत्सो जगती मधुपर्को मधुपर्कप्राशने । हे देवाः मधुनः मकरन्दस्य यन्मधव्यं मधुनि साधु परमम् उत्कृष्टं रूपयति प्रकाशयति देहसङ्घातमितिरूपमन्नाद्यं व्रीह्यादिवत् प्राणधारकम् अन्नोपादानकं वा अन्नादिरसकदम्बं वा तेन सर्वरूपापन्नेन रसेन उक्तविशेषणविशिष्टेन अहं परमः सर्वेभ्यो गुणाधिको मधव्यः मधुपर्कार्हः अन्नादः सदन्नभोक्ता च असानि भवानि। मधुव्वातात्रयस्य गौतमो गायत्री विश्वेदेवा मधुपर्कप्राशने। मधुपर्कशेषप्रतिपत्तिमाह **पुत्रायेति**–सुताय उत्तरत आसीनायोपविष्टाय अन्तेवासिने शिष्याय वोच्छिष्टं दद्यात् स्वयं वा सर्वं प्राश्नीयादिति व्यवस्थाविकल्पः । व्यवस्था च नियमितस्य नियमनम् । तेन आचार्यः शिष्याय, ऋत्विक्प्रियौ पुत्राय, वरस्नातौ सर्वं प्राश्नीयाताम् । राजा असञ्चरे जनसञ्चाररहिते देशे पूर्वस्यां दिशि निनयेदित्यपरे । सर्वेषां वा सर्वे पक्षा इत्यन्ये। **आचम्य प्राणान्** इन्द्रियस्थानानि सम्मृशति–**वाङ्म**

आस्ये इति–एवमादिभिर्मन्त्रैर्यथालिङ्गं सम्मर्शनम् । अनाचान्तस्य प्राणायतनस्पर्शनं मा भूदिति आचम्येति ग्रहणम् । अस्त्वित्यध्याहारः साकाङ्क्षत्वात् , मे इत्यस्य च सर्वत्रानुषङ्गः । **अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह**–इत्यत्र सन्त्वित्यध्याहारः । अथ मन्त्रार्थः । मम वाक् वागिन्द्रियमास्येऽस्तु, नसोर्नासिकयोः प्राणः प्राणवायुः, अक्ष्योः अक्ष्णोर्नेत्रगोलकयोरिति यावत्, चक्षुः चक्षुरिन्द्रियम्, अक्षीशब्दोऽपि अक्षिवाचकोऽस्ति तद्रूपमिदम् । श्रोत्रं श्रवणेन्द्रियम् । बलं शक्तिः, ओजः पाटवम् , मे मम, तनूर्देहः, तन्वा देहस्याङ्गानि च सह युगपत् अरिष्टानि मे अनुपहतानि सन्तु । आचान्तोदकग्रहणात्पुनराचमनमित्येके । अपरे त्वाहुः । आचान्तमुदकं येन स आचान्तोदकस्तदर्थम् शासं शस्त्रमादाय तादर्थ्यं च पश्वालम्भस्य तदर्थत्वात् , ततो गौर्गौर्गौरिति त्रिः प्राहार्घयिता । अर्घ्यस्तु प्रत्याह **माता रुद्राणामिति**–अमुं मन्त्रम् । अस्यार्थः । तत्र ब्रह्मा त्रिष्टुप् गौः अभिमन्त्रणे । मातेत्यादि, निगदः अमृतस्य क्षीरस्य नाभिराश्रयः, नु वितर्के "छन्दसि व्यवहिताश्च" इति प्रवोचं ब्रवीमि । चिकितुषे चेतनावते, जनाय पुम्मात्राय, मह्यं माम् तोष्टुं यूयम् इमां गाम् मा वधिष्ट माघ्नत किन्तु गोपशुम् विधातुं घ्नतेति तात्पर्यार्थः । किम्भूतानाम् अनागाम् अनागसम्, अदितिम् अखण्डनीयाम् देवमातरं वा पयोदानात् । तदन्ते च ममेत्यादि हनोमीति प्रयोगः कार्यः । आलम्भनपक्षे अहं च मम अमुष्यार्घयितुश्च पाप्मानं गोस्थाने हनोमि हन्मीति । **अथेति**–पक्षान्तरे उत्सर्गपक्षे तु मम चामुष्य च पाप्मा हत ॐ उत्सृजत तृणान्यत्त्विति ब्रूयादुच्चैः, मन्त्रपाठादिशेषमुपांश्वेव, **नत्वेति**-यस्माद्यज्ञविवाहयोरमांसोऽर्घो न भवतीति स्मरणं तस्माद्यज्ञमधिकृत्य विवाहं चाधिकृत्य च पाप्मानं हनोमीत्येव वक्तव्यम् । "यज्ञविवाहवर्जमन्यत्र पश्वालम्भविकल्पः" इति **कर्काचार्याः** । अपरे त्वाहुः । यज्ञविवाहयोरेवालम्भस्यावश्यकत्वेन विधानात् कलौ च गवालम्भस्यैव प्रतिषेधाद्द्रोप्रतिनिधित्वेन पश्वन्तरं स्मार्तपशुः पायसं वा भवतीति । "यक्ष्यमाणास्त्वृत्विजः" इत्युक्तम् । तन्नियममाह **यद्यपीति**–यदि संम्वत्सरस्य मध्ये पुनः पुनः सोमेन यजेत तदा कृतार्घ्या एव ऋत्विजस्तं याजयेयुर्न यागान्तरेणेति गम्यते । अतः "**प्रतिसंवत्सरान् इति**"–संवत्सरोपर्येव यजद्भिर्ऋत्विजोऽर्घ्याः इति यदुक्तम् तदपवादोऽपि जातः ॥ ३ ॥

हरि०–**षड*र्घ्या भवन्ति**–षट् पुरुषा अर्घ्या भवन्ति अर्घार्हा भवन्तीति शेषः । के ते । **आचार्यः, ऋत्विग्, वैवाह्यो, राजा, प्रियः, स्नातक इति**–आचार्य उपनयनपूर्वकं वेदाध्यापकः । ऋत्विक् श्रौतस्मार्तादिकर्मार्थं वृतो ब्रह्मादिः । वैवाह्यो वरः । राजा अभिषेकादिगुणवान् प्रजापालनेऽधिकृतः क्षत्रियः । प्रिय उत्कृष्टजातिस्समानजातिर्वा सखा । स्नातकः ब्रह्मचर्यात्समावृतः आचार्यस्यार्घ्यो नान्यस्य । तथा **च मनुः**–" तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः । स्रग्विणं तल्प आसीनमर्चयेत्प्रथमं गवा" इति, इत्येते । **प्रतिसंवत्सरानर्हयेयुः**–प्रतिसंवत्सरमागतानेतान् आचार्यादीन् अर्घेण पूजयेयुः नार्वाक् । **यक्ष्यमाणास्त्वृत्विजः** यक्ष्यमाणाः यज्ञं कारिष्यन्तो यजमानाः । ऋत्विजः याजकान् तु पुनः अर्हयेयुरित्यनुषङ्गः । न प्रतिसंवत्सरं नियमः । कथमर्हयेयुरित्यपेक्षायामाह । **आसनमाहार्याह साधु भवानास्तामर्चयिष्यामो भवन्तमिति**– आसनं वारणादि दारुमयं पीठादि आहार्य्यं अनुचरैरानाय्य आह ब्रवीति अर्चकः किमिति । एवं कथं भवान्पूज्यः साधु सुखं यथा भवति तथा आस्तां तिष्ठतु । **अर्चयिष्यामः**–पूजयिष्यामो भवन्तमर्चनीयं यावत् । अर्चयिष्याम इति बहुवचनं भार्यापुत्रादिसर्वगृह्यापेक्षम् । तथा च श्रुतिः–"यत्र वा अर्हन्नागच्छति सर्वगृह्या इव तत्र वै चेष्टयन्ति" **आहरन्ति विष्टरं पद्यं पादार्थमुदकमाचमनीयं मधुपर्कं दधिमधुघृतमपिहितं कांस्ये कांस्येन**–आहरन्ति आन-

---

* वरशाखया मधुपर्कदानमिति गृह्यपरिशिष्टे "वरस्य या भवेच्छाखा तच्छाखागृह्यचोदितः । मधुपर्कः प्रदातव्यो नान्यशाखेऽपि दातरि" । अत्र ऋत्विगाद्युपलक्षणार्थं वरदातृशब्दौ, तदुक्तम् अर्घ्यशाखया मधुपर्क इति ।

यन्ति यजमानपुरुषाः विष्टरादिमधुपर्कपर्यन्तान्यर्हणोपकरणानि । तत्र विष्टरं पञ्चविंशतिदर्भतरुणमयं
कूर्चम् । "पञ्चविंशतिदर्भाणां वेण्यग्रे ग्रन्थिभूषिता । विष्टरे* सर्वयज्ञेषु लक्षणं परिकीर्तितम् ॥"
"विष्टरास्त्रिवृतो दर्भकूर्चदाः" इति । पद्यं पद्भ्यामाक्रमणीयमुक्तलक्षणं द्वितीयं विष्टरम् । पादार्थमुदकं
पादप्रक्षालनार्थं ताम्रादिपात्रस्थं जलं सुखोष्णम् । अर्घं गन्धपुष्पाक्षतकुशतिलशुभ्रसर्षपदधिदूर्वा-
न्वितं सुवर्णादिपात्रस्थमुदकम् । आचमनीयम्–आचमनार्थं कमण्डलुसम्भृतं जलम् । मधुपर्कम्–
कांस्यपात्रस्थं दधिमधुघृतं कांस्यपात्रेणाच्छादितम् । **अन्यस्त्रिस्त्रिः प्राह विष्टरादीनि**–अन्यः अर्चकाद-
परः विष्टरो विष्टरो विष्टरः इत्येवमेकैकां त्रिस्त्रिः त्रींस्त्रीन्वारान् ब्रूयात् विष्टरादीनि विष्टरप्रभृतीन्प-
द्यपादार्थोदकार्घाचमनीयमधुपर्कान् । **विष्टरं प्रतिगृह्णाति**–प्रत्यङ्मुखेन यजमानेन तिष्ठता दत्तमास-
नात्पश्चिमे प्राङ्मुखस्तिष्ठन्नर्घ्यः पूर्वोक्तलक्षणं विष्टरं तूष्णीं पाणिभ्यामुदगग्रमादत्ते । **वर्ष्मोऽस्मि समा-**
नानामुद्यतामिव सूर्यः इमं तमभितिष्ठामि यो मा कश्चाभिदासतीत्येनमभ्युपविशति-
वर्ष्मोऽस्मीति मन्त्रान्ते एनं विष्टरमुदगग्रमासने निधायाभ्युपविशति । **पादयोरन्यं विष्टर आसी-**
नाय विष्टरे आसीनायार्घ्यायान्यं विष्टरं यजमानः पूर्ववद्ददाति स च तं पूर्ववत्प्रतिगृह्य प्रक्षालि-
तयोः पादयोरधस्ताद्वर्ष्मोऽस्मीत्यनेन मन्त्रेण निदधाति । **सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति**
ब्राह्मणश्चेद्दक्षिणं प्रथमम्–ततोऽन्येन पाद्यमिति त्रिरुक्ते यजमानार्पितं पाद्योदकमादाय वामं चरणं
प्रक्षाल्य इतरं प्रक्षालयाति क्षत्रियादिरर्घ्यः । यदि ब्राह्मणोऽर्घ्यः स्यात्तदा प्रथमं दक्षिणं प्रक्षाल्य वामं
प्रक्षालयति । **विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोह इति-**
विराजो दोहोऽसीत्यावृत्तेन मन्त्रेण **अर्घं प्रतिगृह्णाति**–ततोऽर्घ इत्येतत्त्रिरुक्ते यजमानदत्तमर्घम् ।
आपः स्थ युष्माभिः सर्वान्कामानवाप्नवानीति–आपः स्थ युष्माभिरित्यनेन मन्त्रेण प्रतिगृह्णाति ।
निनयन्नभिमन्त्रयते समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । अरिष्टा अस्माकं वीरा मा
परासेचि मत्पय इति–प्रतिगृहीतमर्घं शिरसाऽभिवन्द्य निनयन् भूमौ प्रवाहयन् अभिमन्त्रयते
समुद्रं व इति मन्त्रेण । **आचामत्यामागन्यशसा सꣳसृज वर्चसा । तं मा कुरु प्रियं प्रजाना-**
मधिपतिं पशूनामरिष्टिं तनूनामिति--तत आचमनीयमिति त्रिरन्योक्ते यजमानदत्तमाचमनीयं प्रति-
गृह्यामागन्यशसेत्यनेन मन्त्रेणाचामति सकृत्प्राश्नाति जलम् । ततः स्मार्तमाचमनं करोति एवं सर्वत्र ।
मित्रस्य त्वेति मधुपर्कं प्रतीक्षते–ततो मधुपर्क इति त्रिरन्येनोक्ते यजमानहस्तगतमुद्घाटितं मधुपर्कं
मित्रस्य त्वेति मन्त्रेणार्घ्यः प्रतीक्षते पश्यति । **देवस्य त्वेति प्रतिगृह्णाति**–देवस्यत्वेति मन्त्रेण यजमा-
नदत्तं मधुपर्कं दक्षिणहस्तेन प्रतिगृह्णाति **सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया त्रिः प्रयौति**
नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामीति–तं मधुपर्कं वामहस्ते निधाय दक्षि-
णस्य पाणेरनामिकाङ्गुल्या त्रिवारमालोडयति नमः श्यावास्येति मन्त्रेण । **अनामिकाङ्गुष्ठेन**
च त्रिर्निरुक्षयति--अनामिका च अङ्गुष्ठश्च अनामिकाङ्गुष्ठौ अनयोः समाहारः अनामिकाङ्गुष्ठं तेन
त्रिवारं निरुक्षयति पात्राद्बहिर्निर्गमयति चकारात्प्रतिसंयवनं निरुक्षणम् । **तस्य त्रिः प्राश्नाति यन्म-**
धुनो मधव्यं परमꣳ रूपमन्नाद्यम् तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो
मधव्योऽन्नादोऽसानीति–तस्य मधुपर्कस्यैकदेशमादाय यन्मधुनो मधव्यमित्यादिना मन्त्रेण
सकृत्प्राश्य पुनरनेनैव मन्त्रेण उच्छिष्ट एव द्वितीयं प्राश्य तथैव तृतीयं प्राश्नाति । **मधुमतीभिर्वा**
प्रत्यृचम्–मधुव्वाता इति तिसृभिर्ऋग्भिः प्रत्यृचं प्रतिमन्त्रं वा पूर्ववत्त्रिः प्राश्नाति । **पुत्रायान्तेवासिने**

---

* विष्टरलक्षणं परिशिष्टे, "पञ्चाशता भवेद्ब्रह्मा तदर्द्धेन तु विष्टरः । उर्ध्वकेशो भवेद्ब्रह्मा लम्बकेशस्तु विष्टरः॥ दक्षिणा-
वर्त्तब्रह्मा च वामावर्त्तस्तु विष्टरः ।" यद्वा, मूलोक्तं बोध्यम् ।

वोत्तरत आसीनायोच्छिष्टं दद्यात्सर्वं वा प्राश्नीयात्प्राग्वाऽसञ्चरे निनयेत्—मधुपर्कस्य शेषप्रतिपत्तिमाह—पुत्राय सूनवे अन्तेवासिने उपनयनप्रभृति विद्यार्थित्वेन आचार्यकुलवासिने शिष्याय वा कथम्भूताय उत्तरत आसीनाय उच्छिष्टं प्राशितशेषं मधुपर्कं प्रयच्छेत् । अथवा सर्वं भक्षयेत् । यद्वा प्राक् पूर्वस्यां दिशि असञ्चरे जनसञ्चारवर्जितदेशे त्यजेत् । अत्र पूर्वपूर्वासम्भवे उत्तरोत्तरां प्रतिपत्तिं कुर्यात् । **आचम्य प्रणान्त्सम्मृशति वाङ्म आस्ये नसोः प्राणोऽक्ष्णोश्चक्षुः कर्णयोः श्रोत्रं बाह्वोर्बलमूर्वोरोजोऽरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सहेति**—आचम्य प्राणान्सम्मृशति वाङ्म इत्यादिभिर्मन्त्रैः । तद्यथा—आचमनं सकृन्मन्त्रेण । ततस्त्रिराचम्य एवं सर्वत्र स्मार्त्तमाचमनं कृत्वा प्राणानिन्द्रियाणि सम्मृशति सजलमालभते । तद्यथा—वाङ्म आस्येऽस्त्विति मुखं कराग्रेण, नसोर्मे प्राणोऽस्त्विति तर्जन्यङ्गुष्ठाभ्यां युगपद्दक्षिणादिनासारन्ध्रे, अक्ष्णोर्मे चक्षुरस्त्विति अनामिकाङ्गुष्ठाभ्यां युगपच्चक्षुषी, कर्णयोर्मे श्रोत्रमस्त्विति मन्त्रावृत्त्या दक्षिणोत्तरौ कर्णौ, बाह्वोर्मे बलमस्त्विति कर्णवद्बाहू, ऊर्वोर्मे ओजोऽस्त्विति युगपद्धस्तेनोरू । अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्त्विति शिरःप्रभृतीनि पादान्तानि सर्वाण्यङ्गान्युभाभ्यां हस्ताभ्यामालभते । **आचान्तोदकाय शासमादाय गौरिति त्रिः प्राह प्रत्याह**—आचान्तमुदकं येन स आचान्तोदकस्तस्मै अर्घ्याय शासं खड्गं गृहीत्वा यजमानः गौर्गौर्गौरालभ्यतामिति प्राह ब्रवीति । ततोऽर्घ्यः प्रत्याह—**माता रुद्राणां दुहिता वसूनाᳬ स्वसादित्यानाममृतस्य नाभिः । प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट मम चामुष्य च पाप्मानᳬ हनोमीति यद्यालभेत**— ततोऽर्घ्यः । माता रुद्राणामित्यादि वधिष्टेत्यन्तं मन्त्रं पठित्वा मम चामुकशर्मणो यजमानस्य च पाप्मानं हनोमीति पठति यदि गामालभेत पाप्मानं हनोमीति प्रयोगः । **अथ यद्युत्सिसृक्षेन्मम चामुष्य च पाप्मा हत ॐ उत्सृजत तृणान्यत्त्विति ब्रूयात्**—अथ यद्युत्सिसृक्षेत् । अथवा अर्घ्यो यदि गामुत्स्रष्टुमिच्छेत्तदा मम चामुकशर्मणो यजमानस्य च पाप्मा हतः ॐ उत्सृजत तृणान्यत्त्विति ब्रूयात् । ओमित्यन्तमुपांशु पठित्वा उत्सृजत तृणान्यत्त्विति ब्रूयादित्यन्तमुच्चैः पठेत् । **नत्वेवामाᳬ सोऽर्घः स्यात्**—तुशब्दः पक्षव्यावृत्तौ । अर्घः अमांसः पश्वालम्भवर्जितो नैव भवेत् । अत्र यद्यालभेत यद्युत्सिसृक्षेदित्यनेन सूत्रेण गवालम्भस्य विकल्पं विधाय नत्वेवामाᳬ स इत्यनेन गवालम्भनमर्घमात्रे नियमेन विधत्ते । तथा च सति द्वयोः स्मृत्योर्विरोधेन अप्रामाण्ये प्राप्ते व्यवस्थामाह **अधियज्ञमधिविवाहं कुरुतेत्येव ब्रूयात्**—अधियज्ञं यज्ञे, अधिविवाहं विवाहे कुरुत विदधत गवालम्भं पाप्मानं हनोमीत्यस्यान्ते इत्येवं वदेत् । अन्यत्र पाप्मा हत इति । पाप्मानं हनोमीति वा विकल्पो नान्यत्रेति भावः । यद्यप्येवं मधुपर्के गवालम्भ आचार्येणोक्तः तथापि अस्वर्ग्यत्वाल्लोकविद्विष्टत्वाच्च कलौ न विधेयः । "अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नतु" इति । याज्ञवल्क्यादिस्मृतिषु निषेधदर्शनात् । **यद्यप्यसकृत्संवत्सरस्य सोमेन यजेत कृतार्घ्या एवैनं याजयेयुर्नाकृतार्घ्या इति श्रुतेः**—यद्यप्यसकृत्संवत्सरस्य संवत्सरे असकृत्पुनः पुनः सोमेन ज्योतिष्टोमादिना यजेत तदा तदापि एनं सोमयाजिनं कृतोऽर्घो येषां ते कृतार्घ्या एवं सन्तः याजयेयुर्यज्ञं कारयेयुः । "न अकृतार्घ्या याजयेयुः" इति श्रुतिवचनात् । सोमेन यजेतेत्यनेन सोमयागार्थमेव वृता ऋत्विजः अर्घ्या इति गम्यते न यागान्तरार्थम् ॥ इति हरिहरभाष्ये तृतीया काण्डिका ॥ ३ ॥ * ॥

गदा०—आवसथ्याधानं दारकाले इत्युक्तं दारग्रहणं कथं क्रियते तदुच्यते । तत्र वरस्यार्घदानं स्मर्यते तत्प्रसङ्गेन यावन्तोऽर्घ्यास्ते कथ्यन्ते **षडर्घ्या भवन्ति**—"अर्ह पूजायाम्" इति धातोर्भावे घञ्प्रत्ययः । न्यङ्क्वादित्वात्कुत्वम्, ततो "दण्डादिभ्यो यत्" इति यत्प्रत्ययः । अर्घमर्हन्तीत्यर्घ्याः । षट् पुरुषा अर्घार्हा भवन्तीत्यर्थः । तानाह **आचार्यः, ऋत्विग्, वैवाह्यो, राजा, प्रियः, स्नातक इति**—उपनयनपूर्वकं कृत्स्नवेदाध्यापयिता आचार्यः, ऋत्विक् यो दक्षिणापरिक्रीतः कर्माणि करोति । वैवाह्यो जामाता । राजा दण्डपूर्वकं परिपालनकर्ता । प्रियो य इष्ट उत्कृष्टजातिः समानजातिर्वा । स्नातको ब्रह्मचर्यात्समावृत्तस्तस्य चार्हणमाचार्यकर्तृकं स्मृतम् । "तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः । स्रग्विणं तल्प आसीनमर्चयेत्प्रथमं गवा" इति । पूर्वसूत्रे षड्ग्रहणं प्रियस्नातकयोः

पृथक्त्वज्ञापनार्थम् । **प्रतिसंवत्सरानर्हयेयुः**--प्रतिसंवत्सरं गृहे आगतानाचार्यादीनर्घेणार्चयेयुः, न संवत्सरादर्वाक् । प्रतिसंवत्सरानर्हयेयुरित्यविशेषेणोक्तत्वादृत्विजोऽपि संवत्सरान्तेऽर्हयितव्या इति प्राप्ते आह **यक्ष्यमाणास्त्वृत्विजः**--ऋत्विजस्तु यक्ष्यमाणा यागकाल एव पूजनीयाः न ततोऽन्यत्र । इदं सूत्रं **हरिहरे**णान्यथा व्याख्यातम् । यज्ञं करिष्यन्तो यजमानाः ऋत्विजो याजकानिति । पूजनीया उक्ताः कालश्च । इदानीमर्हणप्रकारमाह **आसनमाहार्य्याह साधु भवानास्तामर्चयिष्यामो भवन्तमिति**--अर्घ्यायासनं पीठादि आसनमाहरेति प्रैषपूर्वकमनुचरद्वाराऽऽनाय्य साधु भवानित्यर्घयिता अर्घ्यं प्रति वदति, अर्घ्यं प्रत्यध्येषणमेतत् । **आहरन्ति विष्टरं पद्यं पादार्थमुदकमर्घमाचमनीयं*मधुपर्कं दधिमधुघृतमपिहितं काꣳस्ये काꣳस्येन**--बहुवचनादर्घयितुः पुरुषाः विष्टरादीनि आहरन्ति । तत्र "विष्टरस्त्रिवृदरत्निमात्रः कौशो रज्जुविशेषः" इति **भर्तृयज्ञः** । "प्रादेशमात्रं त्रिवृतं कौशं वा काशनिर्मितम्" इति **रेणुकः** । "पञ्चविंशतिदर्भतरुणमयं कूर्चम्" इति **हरिहरः** । "पञ्चाशद्भिर्भवेद्ब्रह्मा तदर्धेन तु विष्टरः" इति परिशिष्टात् । "पादयोरन्यम्" इति वचनादन्यत्र द्वयोराहरणमिति **भर्तृयज्ञः** । पद्यं पादयोरधस्तान्निधानार्थं विष्टरम् । **भर्तृयज्ञ**मते तु पादप्रक्षालनार्थमुदकं पद्यशब्देन पादार्थमुदकं सुखोष्णम् । अर्घशब्देनोदपात्रमेवोच्यते । तद्धैक उदपात्रमुपनिनयन्ति यथा राज्ञ आगतायोदकमाहरेदेवं तदिति लिङ्गात् । उदकगन्धपुष्पाण्यक्षतबदराणीति **भर्तृयज्ञः** । गन्धपुष्पाक्षतकुशतिलशुभ्रसर्षपदूर्वादध्यन्वितं सुवर्णादिपात्रस्थमुदकमिति **हरिहरः** । आचमनीयमाचमनार्थमुदकमेव । दधिमधुघृतमेकस्मिन्कांस्यपात्रे कृतमपरेण कांस्यपात्रेणापिहितं मधुपर्कशब्देनोच्यते । मधुपर्के दध्यलाभे पयो जलं वा प्रतिनिधिः । मध्वलाभे "घृतं गुडो वा" इत्याश्वलायनः । **अन्यस्त्रिस्त्रिः प्राह विष्टरादीनि**--अर्घयितुर्व्यतिरिक्तोऽन्यो विष्टरादीनि द्रव्याणि त्रिस्त्रिर्वारत्रयं वदति विष्टरो विष्टरो विष्टरः प्रतिगृह्यतामित्येवम् । **विष्टरं प्रतिगृह्णाति वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः । इमं तमभितिष्ठामि यो मा कश्चाभिदासतीत्येनमभ्युपविशति**--ततोऽर्घ्योऽर्घयितुः सकाशाद्विष्टरं तूष्णीमेव प्रतिगृह्य तं विष्टरमासने निधाय वर्ष्मोऽस्मीति मन्त्रेणोपविशति । ग्रहणोपवेशनयोर्मध्ये पठितोऽपि मन्त्रः "इमं तमभितिष्ठामीति" लिङ्गादुपवेशने विनियुज्यते पाणिभ्यां विष्टरप्रतिग्रह इति **हरिहरः** । तदतीव मन्दम्, प्रमाणाभावात् । मन्त्रस्यायमर्थः । अर्घ्य आत्मानं स्तौति अर्घ्यत्वाय कुलज्ञानाचारवपुर्वयोगुणैरहं समानानां सजातीयानां मध्ये वर्ष्मः श्रेष्ठः ज्येष्ठः, अस्मि भवामि, उद्यतामुदयं प्रकाशं कुर्वतां ग्रहनक्षत्रादीनां मध्ये सूर्य इव । किञ्च इमं विष्टरं तं पुरुषमुद्दिश्य विष्टरवत् बद्धमभिलक्ष्यीकृत्य तिष्ठामि अधः कृत्वोपर्युपविशामि । यः कश्चन मा मामभिदासति उपक्षीणं कर्तुमिच्छति । "दसु उपक्षये" **पादयोरन्यं विष्टर आसीनाय**—विष्टरे आसीनायोपविष्टायार्घ्याय पादयोरधस्तान्निधानार्थमन्यं विष्टरं ददाति । एतच्च पादप्रक्षालनोत्तरं द्रष्टव्यम् । तथा सति दृष्टार्थता स्यात् । प्रक्षाल्य हि पादौ विष्टरे क्रियेत इति । तेनात्रार्थेन पाठबाधः । तदुक्तं विरोधेऽर्थस्तत्परत्वादिति । **सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति ब्राह्मणश्चेद्दक्षिणं प्रथमं विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोह इति**–ततः पाद्यं प्रतिगृह्य विराजो दोहोऽसीति मन्त्रेण सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति क्षत्रियादिरर्घ्यश्चेद्ब्राह्मणोऽर्घ्यः स्यात्तदा दक्षिणं पादं प्रथमं प्रक्षाल्य ततः सव्यं प्रक्षालयति । मन्त्रार्थः । प्राणधारणादिगुणैः सकलसौहित्येन विविधतया राजत इति विराडन्नं तस्य विराजो दोहः परिणामसारो रसः स त्वमसि भवासि । हे उदक तं त्वां विराजो दोहम् अशीय अश्नुवै व्याप्नुयाम् । किञ्च मयि विषये या पाद्या पादयोः साध्वी सपर्या तस्यै तदर्थं विराजो दोहः । मन्त्रसंस्कृतं जलं भवेति शेषः । **अर्घं प्रतिगृह्णात्यापः स्थ युष्माभिः सर्वान्कामानवाप्नवानीति**–अर्घ्यः समर्पितमर्घं प्रतिगृह्णात्यापः स्थ युष्माभिरिति मन्त्रेण । मन्त्रार्थः । हे आपः यूयमापः स्थ आप्तिहेतवो भवथ । युष्माभिः कृत्वा सर्वान्कामानभीष्टार्थान् अवाप्नवानि लभेयम् । **निनयन्नभिमन्त्रयते समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । अरिष्टा अस्माकं वीरा मा परासेचि मत्पय इति**–तमर्घं भूमौ निनयन् प्रापयन्नभिमन्त्रयते समुद्रं व इति मन्त्रेण नतु मन्त्रान्ते । अर्घं शिरसाऽभिवन्द्य प्रागुदग्वा निनयनमिति **वासुदेवः** । मन्त्रार्थः । हे आपः वो युष्मान् समुद्रं प्रहिणोमि गमयामि । अतः स्वां योनिं स्वकारणभूतं समुद्रमभिलक्ष्यीकृत्य गच्छत व्रजत । किञ्च युष्मत्प्रसादाच्चास्माकं वीराः पुत्रा भ्रातरः अरिष्टा अनुपहताः सन्तु । मत्तः पयः अर्घ्यादिमङ्गलं जलं मा परासेचि अपगतं मास्तु सदैवाहमर्घ्यो

---

* तथा च स्मृतिः । "आज्यमेकपलं ग्राह्यं दध्नस्त्रिपलमेव च । मधुनः पलमेकं तु मधुपर्कः स उच्यते" ॥

भवानीत्यर्थः । **आचामत्यामागन्यशसा सꣳसृज वर्चसा तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनामिति**–ततो दत्तमाचमनीयं प्रतिगृह्यामागन्नित्याचामति सकृद्भक्षयति । ततः स्मार्त्ताचमनम् । मन्त्रार्थः । हे वरुण जलेश तमेवंरूपेण त्वामाश्रितं मा मां यशसा सह भावं सामीप्यं वा अगन् आगमय । आङुपसर्गो । अगन्निति क्रियापदेन सम्बध्यते । तथा वर्चसा ब्रह्मवर्चसेन संसृज संसृष्टं कुरु । किञ्च प्रजानां पुत्रपौत्रादीनां प्रियम्, पशूनां गोऽश्वादीनामधिपतिं स्वामिनं च तथा तनूनां देहावयवानां शरीराणां वा अरिष्टिमहिंसकं कुरु । हिंसाऽत्र "अनभ्यासेन वेदानामाचारस्य च लङ्घनात् । आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति" इत्यादिदर्शिता । **मित्रस्य त्वेति मधुपर्कं प्रतीक्षते**–ततोऽर्घ्योऽर्घयितुर्हस्तस्थितमुद्घाटितं मधुपर्कं मित्रस्य त्वेति प्राशित्रमन्त्रेण प्रतीक्षते पश्यतीत्यर्थः । **देवस्य त्वेति प्रतिगृह्णाति**–ततो देवस्य त्वेति प्राशित्रप्रतिग्रहणमन्त्रेण मधुपर्कं प्रतिगृह्णाति । **सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया त्रिः प्रयौति नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामीति**–तं मधुपर्कं सव्यहस्ते कृत्वा दक्षिणस्य हस्तस्यानामिकयाऽङ्गुल्या प्रदक्षिणं त्रिरालोडयति । नमः श्यावास्यायानिति मन्त्रेण । अत्र सव्यहस्तस्थितस्यैव दक्षिणस्यानामिकया त्रिरालोडनं यथा स्यादित्येतदर्थं दक्षिणग्रहणम् । मन्त्रार्थः । हे अग्ने ते तुभ्यं नमः । किं भूताय श्यावास्याय कपिशमुखाय । ते तव अन्नशने अन्नाशने अद्यत इत्यन्नं तस्याशने अदनीये मधुपर्के । ह्रस्वश्छान्दसः । यद्द्रव्यमाविद्धं संश्लिष्टमनदनीयं तन्निष्कृन्तामि निरस्यामि **अनामिकाङ्गुष्ठेन च त्रिर्निरुक्षयति**–अनामिका चाङ्गुष्ठश्चेत्यनामिकाङ्गुष्ठं तेनानामिकाङ्गुष्ठेन वारत्रयं निरुक्षयति मधुपर्कैकदेशं पात्राद्बहिः प्रक्षिपति । चशब्दात्प्रतिसंयवनं निरुक्षणम् । एवञ्च निरुक्षणव्यवधानात्प्रतिसंयवनं मन्त्रावृत्तिः । **तस्य त्रिः प्राश्नाति । यन्मधुनो मधव्यं परमꣳरूपमन्नाद्यन्तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानीति**–तस्येत्यवयवलक्षणा षष्ठी । तस्य मधुपर्कस्य त्रिः प्राश्नीयाद्यन्मधुनो मधव्यमिति अनेन मन्त्रेण प्राशनत्रयेऽपि हविर्ग्रहणन्यायेन मन्त्रावृत्तिः । उच्छिष्टस्यैव मन्त्रोच्चारणम् । एवं हि स्मरन्ति । "ताम्बूलेक्षुफले चैव भुक्तस्नेहानुलेपने । मधुपर्के च सोमे च नोच्छिष्टं मनुरब्रवीत्" इति । मन्त्रार्थः । हे देवाः मधुनो मकरन्दस्य यन्मधव्यं मधुनि साधु परममुत्कृष्टं रूपयति प्रकाशयति देहसङ्घातमिति रूपम् । अन्नाद्यं व्रीह्यादिवत्प्राणधारकमन्नोपादानकं च । तेन सर्वरूपोपपन्नेन रसेनोक्तविशेषणविशिष्टेनाहं परमः सर्वेभ्यो गुणाधिकः मधव्यो मधुपर्कार्हः अन्नादः सदन्नभोक्ता च असानि भवानि । **मधुमतीभिर्वा प्रत्यृचम्** । वा विकल्पेन मधुवाता ऋतायते इत्येताभिर्ऋग्भिः प्रत्यृच प्राश्नाति । ततश्चैवम् । मधुव्वाता इति प्रथमम् । मधुनक्तमिति द्वितीयम् । मधुमान्न इति तृतीयम् । **पुत्रायान्तेवासिने वोत्तरत आसीनायोच्छिष्टं दद्यात्**–अवशिष्टं मधुपर्कस्य उच्छिष्टं पुत्राय अन्तेवासिने शिष्याय वोत्तरत उपविष्टाय दद्यात् । **सर्वं वा प्राश्नीयात्**–अथवा सर्वं स्वयं प्राश्नाति । **प्राग्वाऽसञ्चरे निनयेत**–प्राक् प्राच्यां यत्र जना न सञ्चरन्ति तस्मिन्नसञ्चरे मधुपर्कशेषं प्राक्षिपेत् ॥

आचम्य प्राणान्त्सम्मृशति वाङ्म आस्ये नसोः प्राणोऽक्ष्णोश्चक्षुः कर्णयोः श्रोत्रं वाह्वोर्बलमूर्वोरोजोऽरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सहेति–आचम्य वाङ्म आस्य इत्येतैर्मन्त्रैः प्रतिमन्त्रं यथालिङ्गं प्राणायतनानि सम्मृशति हस्तेन स्पृशति । सर्वत्र साकाङ्क्षत्वादस्त्वित्यध्याहारः । अरिष्टानि मेऽङ्गानि तनूरित्यत्र तु सन्त्वित्यध्याहारः । मे पदस्य सर्वत्रानुषङ्गः । नन्वध्याहारानुषङ्गयोः को विशेषः । उच्यते अनुषङ्गः श्रुतपदानयनम् । अध्याहारः अश्रुतपदस्य लौकिकस्यानयनम् वाक्यनिराकाङ्क्षार्थम् । प्रयोजनं चाध्याहृतपदस्य संहितावत्प्रयोगो न भवति । सावसानं प्रयोग इत्यर्थः । अयमर्थः । **कर्कोपाध्यायैरपि** पशुसमञ्जनप्रकरणे प्रदर्शितः । अत्रैवं वाङ्म आस्ये अस्त्विति मुखम् । नसोर्मे प्राणोऽस्त्विति नासिकाछिद्रद्वयं युगपत् । अक्ष्णोर्मे चक्षुरस्त्वित्यक्षिद्वयं युगपत् । कर्णयोर्मे श्रोत्रमस्त्विति दक्षिणं कर्णमभिमृश्य ततो वाममनेनैव मन्त्रेण । वाह्वोर्मे बलमस्त्विति दक्षिणं वाहुं ततो वाममनेनैव मन्त्रेण, ऊर्वोर्मे ओजोऽस्त्वित्यूरुद्वयं युगपदेव । अरिष्टानि॰ सह सन्त्विति शिरःप्रभृति सर्वाङ्गानां युगपत् । **हरिहरेण** प्राणायतनस्पर्शः सजलहस्तेन कर्तव्य इत्युक्तम् तदतीव मन्दम् । नह्यत्र सूत्रे जलग्रहणमस्ति । सर्वाङ्गालम्भे उभाभ्यां हस्ताभ्यामालम्भ उक्तः सोऽपि न युक्तः । आचम्येति ग्रहणम् । आचान्तोदकायेति वक्ष्यमाणत्वादनाचान्तस्यैव प्राणायतनसम्मर्शनं माभूदित्येतदर्थम् । मन्त्रार्थः । मे मम वागिन्द्रियमास्येऽस्तु । नसोर्नासिकयोः प्राणः प्राणवायुः । अक्ष्णोर्नेत्रगोलकयोरिति यावत् । चक्षुश्चक्षुरिन्द्रियम् ।

श्रोत्रं श्रवणेन्द्रियम् । बलं शक्तिः । ओजस्तेजः । मे मम तनूः देहः । तन्वा देहस्याङ्गानि च सह युगपत् अरिष्टानि अनुपहतानि सन्तु । **आचान्तोदकाय शासमादाय गौरिति त्रिः प्राह**–आचान्तमुदकं येनासौ आचान्तोदकः तदर्थं शासमसिमादाय गामानीय गौरित्यर्घयिता त्रिः प्राह । आलभ्यतामित्यध्याहारः । आचान्तोदकग्रहणात्पुनराचमनमिति केचित् । आचान्तोदकायेति तादर्थ्ये चतुर्थी । शासादानस्य तादर्थ्यं तु तदर्थपश्वालम्भनद्वारकम्* । **प्रत्याह माता रुद्राणां दुहिता वसूनाꣳस्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकितुषे जनाय मा गा मनागामदितिं वधिष्ट मम चामुष्य च पाप्मानꣳ हनोमीति यद्यालभेत**–अर्घ्यो यजमानं प्रत्याह मातेत्यमुं मन्त्रम् । यदि गामालभेत तदा मम चामुष्य च पाप्मानꣳ हनोमीति तदन्ते प्रयोगः । अत्रामुष्यशब्दमुद्धृत्यार्घयितुर्नामग्रहणं कार्यम् । मन्त्रार्थः । अमृतस्य क्षीरस्य नाभिराश्रयः । नु वितर्के । "छन्दासि व्यवहिताश्च" इत्युक्तेरुपसर्गस्य वोचमित्यत्रान्वयः । प्रवोचं ब्रवीमि चिकितुषे चेतनावते जनाय, यूयम् इमां गां, मा वधिष्ट मा घ्नताम् किन्तु गोपशुं विधातुं घ्नतेति तात्पर्यार्थः । किम्भूतामनागामनपराधाम् । अदितिं देवमातरं पयोदानात् । अहं ममामुष्यार्घयितुश्च पाप्मानं गोस्थाने हनोमि हन्मीति । **अथ यद्युत्सिसृक्षेन्मम चामुष्य च पाप्मा हत ॐ उत्सृजत तृणान्यत्त्विति ब्रूयात्**–यद्यर्घ्यो गामुत्स्रष्टुमिच्छेत्तदैवं प्रयोगः । माता रुद्राणामित्युक्त्वा मम चामुष्य च पाप्मा हतः ॐ उत्सृजत तृणान्यत्तु । अत्राप्यमुष्यस्थाने अर्घयितुर्नामग्रहणम् । ॐ उत्सृजत तृणान्यत्त्विति उच्चैर्ब्रूयात् शेषमुपांशु । एवं गवालम्भस्य सर्वत्र विकल्पे प्राप्ते क्वचिन्नियममाह **नत्वेवामाꣳसोऽर्घः स्यादधियज्ञमधिविवाहं कुरुतेत्येव ब्रूयात्**–यज्ञविवाहयोरमांसोऽर्घो न भवति । यज्ञमधिकृत्य विवाहमधिकृत्य कुरुतेत्येवं प्रयोगः । अतश्चालम्भनियमो यज्ञविवाहयोः । गोरालम्भश्च कलिवर्जिते काले भवति "यज्ञाधानं गवालम्भं संन्यासं पलपैतृकम् । देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्" इति **पराशरस्मृतेः** । अतश्च गवालम्भस्य कलौ निषिद्धत्वादुत्सर्गस्य च यज्ञविवाहयोरप्राप्तत्वाद्गौरित्युच्चारणादि यज्ञविवाहयोः कलौ न प्रवर्तते । यज्ञविवाहयोरन्यत्र तूत्सर्गपक्ष एव कलौ । "कलौ गोपशोर्निषेधात्तत्स्थाने अजालम्भः ।" "पायस वा" इति **जयरामः** । परिगतसंवत्सरा अर्घ्या भवन्तीत्युक्तम्, तदपवादमाह–**यद्यप्यसकृत्संवत्सरस्य सोमेन यजेत कृतार्घ्या एवैनं याजयेयुर्नाकृतार्घ्या इति श्रुतेः**–यद्यपि संवत्सरस्य मध्ये असकृत्पुनः पुनः सोमेन यजेत तथाप्येनं यजमानं कृतार्घ्या एव ऋत्विजो याजयेयुः नाकृतार्घ्याः कुतः श्रुतेः । एतत्सूत्रादेवं ज्ञायते "सोमयागार्थमेव वृता ऋत्विजोऽर्घ्या नेतरयागार्थम्" इति । "यक्ष्यमाणास्त्वृत्विजः" इत्यनेनैव गतार्थत्वात्सोमेन यक्ष्यमाणा एवार्घ्या इति नियमविधानार्थं पृथगारम्भः । ननु "वसन्ते वसन्ते ज्योतिषा यजेत" इत्येकस्मिन्संवत्सरे एक एव सोमयागः प्राप्तस्तत्कथमुच्यते असकृत्संवत्सरस्य सोमेन यजेतेति । सत्यम् । उच्यते । यद्यपि नित्यः सोमयागः सकृदेवानुष्ठातव्यस्तथापि कामनायां चोदितायां पुनः पुनरनुष्ठानं सम्भवत्येव द्वादशाहादीनाम् । यद्वा नित्यो वाजपेयस्तस्यानुष्ठाने तदङ्गभूतानां परियज्ञानामनुष्ठानं भवति । तस्मात्साधूक्तमसकृत्संवत्सरस्य सोमेन यजेतेति । वरशाखया मधुपर्कदानं **गृह्यपरिशिष्टे**—"वरस्य या भवेच्छाखा तच्छाखा गृह्यचोदिता । मधुपर्कः प्रदातव्यो नान्यशाखेऽपि दातरि" इति । अत्र ऋत्विगाद्युपलक्षणार्थं वरदातृशब्दौ । तदुक्तम्–अर्च्यशाखया मधुपर्क इति । याज्ञिकास्तु "अर्च्यस्य यच्छाखीयं कर्म तच्छाखीयो मधुपर्कः" इति वदन्ति । तथा **जगन्नाथकारिकायाम्**–"तत्तद्गृह्योक्तविधिना विष्टराद्यर्हणं ततः" इति । सर्वत्र यजमानशाखयैव मधुपर्क इति **जयन्तः**, तत्तु कैरपि नादृतम् ॥ * ॥ इति श्रीत्रिरभिचित्सम्राट्स्थपति–श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे तृतीया कण्डिका ॥ ३ ॥

विश्व०–" आवसथ्याधानं दारकाले " इत्युक्तं दारक्रिया च विना विवाहं न निष्पद्यत इत्युपोद्घातसंगत्या विवाहं सूत्रयन्प्रसङ्गादर्घ्यानाह **षडर्घ्या भवन्ति**–आचार्यत्वादयः षट्संख्याकाः उपाधयः सन्ति तैरवच्छिन्नाः सर्वेऽपि अर्घ्याः अर्घयोग्या भवन्तीत्यर्थः । ननु आचार्यत्वादयो धर्माः जातय एव किं न स्युः । न स्युः । जातिसंकरप्रसंगात् । तथाहि–आचार्यत्वपरिहारेणान्यत्र ऋत्विक्त्वम्, ऋत्विक्त्वपरिहारेणान्यत्राचार्यत्वम् । एकत्रोभयं संकीर्णं तस्मादुपाधय एते । उपधेयाः क इत्यपेक्षायामाह **आचार्य ऋत्विग्वैवाह्यो राजा प्रियः स्नातक इति**–उपनयनपूर्वकवेदाध्यापकत्वमाचार्यत्वं तस्याधारः आचार्यः । एवं श्रौतस्मार्तादिक्रियोद्देशेन वृतत्वमृत्विक्त्वम् तदाश्रय ऋत्विक् ।

---

* द्वि० पश्वालम्भनस्य तदर्थत्वात् ।

कूकुदकर्तृककन्याप्रदानसंप्रदानत्वं वैवाह्यत्वम्, तदाश्रयो वरः । राजसूयान्तर्गताभिषेकाभिषिक्तत्वे सति प्रजापालनाधिकृतत्वाश्रयो राजा । मैत्र्याश्रयः प्रियः स्वानपकृष्टजात्यवच्छिन्नः । विद्याव्रतोभयस्नातकत्वाद्यन्यतमोपाध्यवच्छिन्नः स्नातकः । इतिशब्दः षडुपाध्युपधेयसमाप्तिद्योतकः । कस्मिन्काल इत्यपेक्षायामाह–**प्रतिसंवत्सरानर्हयेयुः**—निमित्तमन्तरा समागतानिति शेषः । संवत्सरं संवत्सरं प्रत्यागताः प्रतिसंवत्सराः तान् आचार्यादीनर्हयेयुः मधुपर्केण पूजयेयुः । अर्चकानामृत्विगर्चने विशेषमाह **यक्ष्यमाणास्त्वृत्विजः**– यज्ञारम्भं करिष्यन्तः । "तुशब्दः" प्रतिसंवत्सरानित्यादिनोक्तं व्यवच्छिनत्ति । ऋत्विजः याजकानर्चयेयुरित्यर्थः । एतेन ऋत्वारम्भप्रवृत्तेनैवारम्भकाले ऋत्विगर्चनं विधेयं, नान्यदेत्यर्थः । तथाच ऋत्विक्त्वप्रयोज्यं नान्यदार्चनमिति ध्येयम् । कथमर्हयेयुरित्यपेक्षायामाह । **आसनमाहार्याह साधु भवानास्तामर्चयिष्यामो भवन्तमिति**–आसनं यज्ञियदारुनिर्मितं पीठादि आहार्य आनाय्य आह ब्रवीति अर्चक इति शेषः । किमित्यत उक्तं, साधु भवानित्यादि भवन्तामित्यन्तम् । विवाहे तु वरसमानशाखाध्यायिनाऽऽचार्येण प्राङ्मुखोपविष्टेन मध्येचतुरिकमुपलिप्त उद्धृतावोक्षितेऽग्नावाहिते साधु भवानास्तामित्याद्यर्चकः श्वशुरादिर्ब्रूयादिति विशेषमाहुः । अग्निमुपसमाधायेत्यादि कुमार्याः पाणिं गृह्णीयादित्यन्तसूत्रे साङ्गपाणिग्रहणविधेरग्निस्थापनोत्तरकालिकत्वस्य क्त्वाप्रत्ययवललभ्यत्वेन मधुपर्ककरणकार्चनस्यापि विवाहाङ्गत्वादग्निस्थापनोत्तरकालतेत्याशयादेवमाहुः । **आहरन्ति विष्टरं पाद्यं पादार्थमुदकमर्घमाचमनीयं मधुपर्कं दधिमधुघृतमपिहितं का ँस्ये का ँस्येन**–आहरन्ति अर्चकपुरुषाः । विष्टरौ पादार्थमुदकमष्टाङ्गमर्घमाचमनीयपात्रं, मधुपर्कमित्येतस्यैव विवरणं दधिमधुघृतं कांस्येनापिहितम् । पुनः कीदृशं कांस्ये स्थितम् । **अन्यस्त्रिः त्रिः प्राह विष्टरादीनि**–अर्च्यार्चकाभ्यामन्यः अर्चकपुरुषः विष्टरादीनि त्रिस्त्रिः प्राह । विष्टरः आदिर्येषां तानि त्रिस्त्रिः त्रींस्त्रीन् वारान् एकैकं प्राह अनुब्रूयात् । प्रयोगश्चैवं, विष्टराविति वारत्रयमाहान्यः । प्रतिगृह्यतामित्याहार्चकः । प्रतिगृह्णामीत्यर्च्यः । प्रतिगृह्णातीत्यन्यः । किमित्यत उक्तं **विष्टरांभाति । वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः । इमं तमभितिष्ठामि यो मा कश्चाभिदासतीत्येनमभ्युपाविशति**— निगदव्याख्यातम् । पादयोरन्यं विष्टर आसीनाय, अन्यं द्वितीयं पादयोरधः विष्टरं स्थापयेदर्च्य इत्यर्थः । कथंभूतः विष्टर आसीनः, चतुर्थ्यत्र न विवक्षितेत्याहुः । केचित्तु चतुर्थीबलात्क्रमिकं दानमाहुः । **सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति ब्राह्मणश्चेद्दक्षिणं प्रथमम्**–ततोऽन्येन पादार्थमुदकमिति त्रिरुक्तेऽर्चकेन प्रतिगृह्यतामित्युक्ते प्रतिगृह्णामीति प्रतिगृह्यार्च्य इति शेषः । मन्त्रेण वा तूष्णीं वेत्यत आह **विराजो......दोह इति**—दोह इत्यन्तेन मन्त्रेण पादौ प्रक्षालयेदर्च्य इत्यर्थः । **अर्घं प्रतिगृह्णाति**—ततोऽर्घमापः स्थ अर्घमित्यन्येन त्रिरुक्ते प्रतिगृह्यतामित्यर्चकेनोक्ते "आपः स्थ" इत्यमुं मन्त्रं पठित्वा प्रतिगृह्णामीति । अर्घं प्रतिगृह्णामीत्यर्थः । मन्त्रमाह **आपः स्थ...वानि**–इति । **निनयन्नभिमन्त्रयते समुद्रं व......मत्पयः इति**–शिरसाऽभिवन्द्य संमुखं निनयन्समुद्रं व इत्यभिमन्त्रयत इत्यर्थः । **आचामत्यामाग......तनूनामिति**—आचमनीयमित्यन्येन त्रिरुक्ते प्रतिगृह्यतामित्यर्चकेनोक्ते प्रतिगृह्णामीति गृहीत्वा आमागन्नित्याचामतीत्यर्थः । ततः स्मार्ताचमनम् । **मित्रस्य त्वेति मधुपर्कं प्रतीक्षते**—मधुपर्क इत्यन्येन त्रिरुक्ते प्रतिगृह्यतामित्यर्चकेनोक्ते "मित्रस्य त्वा" इति अर्चकहस्तस्थं मधुपर्कमीक्षते उद्घाटितम् । पूर्वं कातीयसूत्रे उक्तत्वादिह मन्त्रो नोक्तः, संहितायामविद्यमानोऽप्ययाश्चाग्न इतिवत् । देवस्य त्वेति प्रतिगृह्णाति प्रतिगृह्णामीत्यन्तेन देवस्यत्वेति मन्त्रेण यजमानहस्ताद्गृह्णातीत्यर्थः । **सव्ये पाणौ...तत्ते निष्कृन्तामीति**–मधुपर्कं वामहस्ते निधाय दक्षिणहस्तस्यानामिकयाङ्गुल्या त्रिवारमालोडयति "नमः श्यावा" इति मन्त्रेण । **अनामिकाङ्गुष्ठेन च त्रिर्निरुक्षयति**—दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां त्रिवारं निरुक्षयाति बहिः प्रक्षिपतीत्यर्थः । चकारः समुच्चयार्थः । **तस्य त्रिः प्राश्ना......दोऽसानीति**–"यन्मधुन" इति मन्त्रेण त्रिवारं मधुपर्कं प्राश्नातीत्यर्थः । उच्छिष्टोऽपि मन्त्रानुच्चरेत् । '**मधुमतीभिर्वा प्रत्यृचम्**–"मधुवाता" इति त्र्यृचेन वा प्रत्यृचं प्राश्नाति । **पुत्राया......निनयेत्**–असंचरे जनसंचारवर्जिते देशे । शेषं सुगमम् । इयं च प्रतिपत्तिः पूर्वाभावे उत्तरा ज्ञेया । **आचम्य प्राणान्संमृशति**–आचमनं कृत्वा वक्ष्यमाणान् प्राणान् स्पृशतीत्यर्थः । **वाङ्म आस्ये**–अनेनास्यं स्पृशति, **नसोर्मे प्राणः**–अनेन नासारन्ध्रे सहैव स्पृशति, **अक्ष्णोर्मे चक्षुः**—अनेन चक्षुषी **कर्णयोर्मे श्रोत्रम्**–अनेन कर्णौ । मन्त्रावृत्तिः दक्षिणोत्तरे, **बाह्वोर्मे बलम्**—अनेन बाहू मन्त्रावृत्त्या स्पृशति **ऊर्वोर्मे ओजः**—अनेन ऊरू, **अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह**–इत्यनेन शिरःप्रभृतीनि पादान्तानि सर्वाण्यङ्गान्युभाभ्यां हस्ताभ्यामालभते । **आचान्तोदकाय शासमादाय गौरिति त्रिः प्राह प्रत्याह**—आचान्तमुदकं येन स आचान्तोदकः तस्मै अर्घ्याय, सन्निहिते कन्यादानकाले, शासं खड्गमादाय गौरिति त्रिवारमाहार्चकः । तमर्चकं प्रत्याहार्च्यः । किमित्यत आह—**माता रु......न्यस्त्विति ब्रूयात्**–वधिष्टेत्यन्तं मन्त्रमुच्चार्य आत्मनोऽर्चकस्य च षष्ठ्यन्ते नामनी गृहीत्वोभयोः पाप्मा हत ओमुत्सृज तृणान्यत्त्वित्युत्सर्गपक्षे । आलम्भपक्षे तु पूर्ववन्नामनी गृहीत्वा उभयोः पाप्मानं हनोमीत्युक्त्वा ॐ कुरुतेति ब्रूयादित्यर्थः । उत्सर्गपक्षे गवे तृणदानम्, आलम्भपक्षे तु पालाशीं शाखां निखाय द्विगुणरशनयेत्यारभ्य प्रजापतये जुष्टं नियुनज्मीति शाखायां नियोजनं मारणान्तम् । तस्मिन्पक्षे मांसेनार्घदानम्, कर्तव्यता

विशेषं गोयज्ञे वक्ष्यति । अस्यैवोपोद्वलकमाह—**नत्वेवामांसोऽर्घः स्यात्**–"तु" शब्दः पक्षव्यावृत्तौ । अमांसः मांसवर्जितः अर्घो नैव भवेत् । पूर्वं षोडशीग्रहणवद्विकल्पमभिधायाद्यार्थकत्वेन चानुष्ठानपक्षं संस्तूयेदानीं विवाहे क्रतौ च तस्यावश्यकतामाह **अधिय…ब्रूयात्**–क्रतौ विवाहे च कुरुतेत्येव ब्रूयात् । प्रयोगस्तु प्राग्दर्शितः । आलम्भस्तु कलौ निषिद्धात्वान्नादरणीयः । **यद्यप्य…… इति श्रुतेः**–असकृत्पुनः पुनः संवत्सरस्य संवत्सरसंबन्धिना सोमेन यजेत, यद्वा संवत्सरस्य मध्ये असकृत्पुनः पुनः सोमेन यजेत तदा कृताघ्या एवैनं यजमानं याजयेयुः नाकृतमधुपर्का इत्यर्थः । श्रुतिप्रमाणं तु सोमादन्यत्र मधुपर्कस्याऽनावश्यकताप्रदर्शनार्थम् । अपरे तु–सोम एव ऋत्विजां मधुपर्कमाहुः । ततः पुण्याहवाचनम् यथाशक्त्यलङ्कृतां सितवस्त्रयुग्मवेष्टितां चन्दनविलेपिताङ्गां पुष्पाद्यलङ्कृतां ब्राह्मणेषु पुण्याहं पठत्सु, कुमारीं पुण्याहस्थाने समानीय तस्याः दक्षिणं हस्तं गृहीत्वा पिता ददाति । पित्रभावे पितामहादिः । सर्वेषामभावे कन्या कुर्यात्स्वयंवरम् । तत्र विधिः । चतुरिकोत्तरतः वरं प्राङ्मुखं कुशास्तीर्णे आसने उपविष्टं वराद्दक्षिणतः कन्यामुपवेश्य ततः प्रागुदङ्मुखः प्रदः कन्यायाः आसने उपविशेत् । दक्षिणतः पत्नी तिष्ठेत् । तत्र पूर्वं देशकालौ स्मृत्वा कन्यादानमहं करिष्य इति संकल्प्य कन्यादाननिमित्तं वराय पाद्यार्घौ दत्त्वा तस्यैव पादौ प्रक्षाल्य स्वपादावपि प्रक्षाल्याचम्य, प्राणानायम्य, पुनराचम्य "स्वस्ति न इन्द्रः" इत्यादि पठित्वोदकं पात्रे प्रक्षिप्य "अपवित्रः" इत्यनेन पुण्डरीकाक्षं संस्मृत्यात्मानं मार्जयित्वा, सप्तव्याधेत्यादि पठित्वा, कन्यादानोपहाराणामित्युपहारं प्रोक्ष्य, पुनः "स्वस्ति व" इति पठित्वा, चन्दनपुष्पागुरुधूपारार्तिकादिभिर्वरं संपूज्य इमानि अर्चितानि ज्योतींषीत्युक्त्वाऽर्चनविधेः पूर्णतास्त्वित्युक्त्वा यवान्प्रकीर्य पुण्याहं दीर्घमायुरस्त्वित्यादिनाऽऽत्मानं संप्रोक्ष्य सोदकान्दर्भाक्षतान्गृहीत्वा देशकालौ संकीर्त्य शास्त्रोक्तफलावाप्त्यर्थममुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रायैवं पितामहपित्रोर्नामनी संकीर्त्य पौत्राय पुत्रायेत्युक्त्वामुकगोत्रायामुकशर्मणे वराय तुभ्यमित्युक्त्वाऽमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रीमेवं पौत्रीं तथा पुत्रीमित्युक्त्वामुकगोत्रीममुकनाम्नीमनुपहतसर्वेन्द्रियां वस्त्रयुग्माच्छादितां सोपानत्कां यथाशक्ति सुवर्णरजताद्यलङ्कृताम्, प्रजापतिदैवताम् एवं त्रिः प्रयोगः । अमुकगोत्रोऽहं मार्तण्डोपरागादिकालिककुरुक्षेत्राद्यधिकरणकानवद्यविद्यावते ब्राह्मणाय सुवर्णभारसहस्रदानजन्यफलोपमशास्त्रबोधितफलावाप्तिकामः संप्रदद इत्युक्त्वा कन्यादक्षिणहस्तं वरदक्षिणहस्ते दद्यात् । वरश्चो ३ मिति प्रतिगृह्य स्वस्तीत्याशिषं दत्त्वा कोऽदात् इति कामस्तुतिं पठेत् । ततः कन्यादानप्रतिष्ठार्थमिति संकल्प्य हिरण्यं वराय दद्यात् । ततः पयस्विनीं ग कन्यादानसमृद्ध्ये यथोपपन्नोपस्करसहितां दद्यात् । ततो दक्षिणाः पान्त्वित्याद्याशीःप्रार्थना । ततः कृतैतत्कन्यादानकर्मणो यन्न्यूनं यदतिरिक्तं तत्सर्वं परिपूर्णमस्त्विति संप्रार्थ्य द्विजान्प्रणमेत् । कौतुकगृहप्रवेशादि कुर्यात् । इति तृतीया कण्डिका॥३॥

चत्वारः पाकयज्ञा हुतोऽहुतः प्रहुतः प्राशित इति ॥१॥ पञ्चसु बहिःशालायां विवाहे चूडाकरण उपनयने केशान्ते सीमन्तोन्नयन इति ॥ २ ॥ उपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधाय ॥ ३ ॥ निर्मन्थ्यमेके विवाहे ॥ ४ ॥ उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयात् ॥ ५ ॥ त्रिषु त्रिषूत्तरादिषु ॥ ६ ॥ स्वातौ मृगशिरसि रोहिण्यां वा ॥ ७ ॥ तिस्रो ब्राह्मणस्य वर्णानुपूर्व्येण ॥ ८ ॥ द्वे राजन्यस्य ॥ ९ ॥ एका वैश्यस्य ॥ १० ॥ सर्वेषां शूद्रामप्येके मन्त्रवर्जम् ॥ ११ ॥ अथैनां वासः परिधापयति जरां गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपा वा । शतं च जीव शरदः सुवर्च्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वास इति ॥ १२ ॥ अथोत्तरीयम् । या अकृन्तन्नवयं या अतन्वत । याश्च देवीस्तन्तूनभितो ततन्थ । तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वास इति ॥ १३ ॥ अथैनौ समञ्जयति । समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ । सम्मातरिश्वा सन्धाता समुदेष्ट्री दधातु नाविति ॥ १४ ॥ पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामति । यदैषि मनसा दूरं दिशोऽनु पवमानो वा । हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्विंत्यसाविति ॥ १५॥ अथैनौ समीक्षयति । अघोरचक्षुर-

पतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्च्चाः । वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे । सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः । सोमोऽददद् गन्धर्वाय गन्धर्वोऽदददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् । सा नः पूषा शिवतमामैरय सा न ऊरू उशती विहर । यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्या इति ॥ १६ ॥ ॥ ४ ॥ ॥ * ॥

कर्कः–चत्वारः पाकयज्ञाः कोऽस्याभिसम्बन्धः विवाहः प्रक्रान्तः, तत्र च बहिःशालायां कर्मेष्यते, तेनान्यत्रापि यत्र यत्र बहिःशाला तदर्थमभिधीयते । चतुष्प्रकाराः पाकयज्ञाः भवन्तीति शेषः । तानाह हुतोऽहुतः प्रहुतः प्राशित इति–यत्र होम एव भवति स हुत उच्यते यथा अक्षतहोमः ।अहुतश्च यत्र होमो नास्ति यथा स्रस्तरारोहणम् । प्रहुतो यत्र होमो बलिहरणं च यथा पक्षादिषु । प्राशितो यत्र प्राशनमेव न होमो न च बलिहरणम् । यथा–सर्वासां पयसि पायसꣳ श्रपयित्वा ब्राह्मणान्भोजयेदिति । पञ्चसु बहिःशालायाम्-कर्म भवति । विवाहे, चूडाकरणे, उपनयने, केशान्ते, सीमन्तोन्नयन इति-एतेषु बहिःशाला कार्या ।उपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधायेति–उपलेपनादि शक्यमेवावक्तुम् परिसमूहनादेरुक्तत्वात् ।अतः परिसमूहनव्युदासार्थमिति केचित् ।अपरे तु गृह्यस्थालीपाककर्मणि परिसमूहनाद्युक्तम्, अगृह्यार्थोऽयमारम्भः । विवाहादयश्चागृह्याग्निविषयाः, येनैवाहितोऽग्निस्तदीयमेव हि कर्म तत्रेष्यते उपग्रहविशेषात् । तस्मादगृह्यार्थमुद्धतावोक्षितग्रहणमिति । तदेतदपि नोपपद्यते । “यत्र क्वचिद्धोमः” इत्यनेनात्रापि प्राप्तत्वात् । कथं तर्ह्येतत् । अयमभिप्रायः सूत्रकारस्य । यत्र क्वचिद्धोम इत्यनेनाप्राप्तिः परिसमूहनादीनाम् अग्न्यर्थत्वात्तेषाम् । “यत्र यत्राग्नेः स्थापनं तत्र तत्रैत कर्तव्याः” इति स्मृतिः । तथा च लिङ्गम् । “उद्धते अवोक्षितेऽग्निमादधाति ” “एष एव विधिर्यत्र क्वचिद्धोमः” इत्यनेन स्थालीपाकादिषु परिसमूहनादेरप्राप्तिप्रज्ञप्त्यर्थमिदमुद्धतावोक्षितग्रहणम् । निर्मन्थ्यमेके विवाहे–निर्मन्थ्योऽचिरनिर्मथित उच्यते । सर्व एव ह्यग्निर्मन्थनाज्जायते । यथा नवनीतेन भुङ्क्ते इत्याचिरदग्धेनेति गम्यते । एके लौकिकमेवाग्निमिच्छन्ति । उदगयन आपूर्यमाणपक्षे पुण्याहे–दैवानि कुर्वीतेति वाक्यशेषः । देवानां चोदगयनमिष्यते । तद्धि देवानामिति । स यत्रोदङ्ङावर्तते देवेषु तर्हि भवतीति देवानामुदगयनम् । नच देवा उदगयने न किञ्चित्कुर्वन्ति । तस्माद्दैवं कर्म तत्रोचितमिति गम्यते । आपूर्यमाणपक्षो गृहीतः सोऽपि देवानामेव य एवापूर्यतेऽर्द्धमासः स देवानामित्यनेन पुण्याहस्तु स्मरणात् ! सर्वं दैवविषयमेतदभिधीयते । कुमार्याः पाणिं गृह्णीयात्त्रिषु त्रिषूत्तरादिषु नक्षत्रेषु । कुमारीग्रहणं विंशतिप्रसूताव्युदासार्थम् । स्मर्यते हि विंशतिप्रसूतायाः पुनर्विवाहः । स्वातौ मृगशिरसि रोहिण्यां वा इति विकल्पः । तिस्रो ब्राह्मणस्य वर्णानुपूर्व्येण–भार्या भवन्ति वर्णानुपूर्व्यग्रहणाच्च न व्युत्क्रमेणेति । द्वे राजन्यस्य–वर्णानुपूर्व्येणेति वर्तते । एका वैश्यस्य–सर्वेषाꣳ शूद्रामप्येके मन्त्रवर्जम्–सर्वेषां वर्णानामेवैके शूद्रामिच्छन्ति एके नेच्छन्ति नह्यस्या धर्मकार्येष्वधिकार इति । तथाच यास्काचार्याः–“रामा रमणायोपेयते न धर्मायेति । एके तु रमणार्थतयेच्छन्ति । तथाचाह-“अग्निं प्रथमं चित्वा न रामामुपेयात्”इति। प्राप्तिपूर्वको हि प्रतिषेधो भवति,तस्माद्विकल्प एवा-

यमिति।**अथैनां वासः परिधापयति जरां गच्छ परिधत्स्वेति**—अनेन मन्त्रेण। मन्त्रश्च कारितार्थे। परिधापयिता चात्र वर एव। अपरे त्वध्वर्युमत्र कर्तारमिच्छन्ति। परिभाषितं ह्येतदध्वर्युकर्मसु वेदयोगादिति। नैतदित्यपरे। न हि स्मार्तेष्वध्वर्योः कर्तृत्वं, समाख्यया हि श्रौतेष्वध्वर्योः कर्तृत्वमिष्यते न चात्र समाख्याऽस्ति वेदयोगाभावात्। स्मरणादेव हि स्मृतीनां प्रामाण्यमुक्तम्। अतः समाख्याऽभावात् स्वयमेव कर्तृत्वम्। ननु च पाकयज्ञेषु दक्षिणा श्रूयते। पूर्णपात्रों दक्षिणा वरो वेति। दक्षिणाशब्दश्च परिक्रयार्थे द्रव्ये वर्त्तते। न च परिक्रेयमन्तरेण परिक्रयो भवति। तस्मादन्यस्य कर्तृत्वमिति। नैतदेवम्। अस्ति ह्यत्रान्योऽपि ब्रह्माख्यः कर्त्ता परिक्रेतव्यस्तदर्थः परिक्रयोऽयमिति क्षीणार्थापत्तिः। अपि च परकीये कर्मणि परो नैव प्रवर्तते वचनमन्तरेण श्रौतेषु च समाख्ययाऽन्यस्य कर्तृत्वमिति। नचेह समाख्याऽस्तीत्युक्तम्। वेदमूलत्वेऽपि हि स्मृतीनां समाख्याऽपरिज्ञानादकर्तृनियमः। श्रौतेषु तु परिक्रयाम्नानादन्यस्य कर्तृत्वमिति तदुक्तम्,अपि च परकर्तृत्वे सा मामनुव्रता भवेत्येवमादीनि मन्त्रलिङ्गानि विरुध्यन्ते। **अथोत्तरीयं या अकृन्तन्नवयन्निति**, अनेन मन्त्रेण परिधापयतीत्यनुवर्तते। **अथैनौ समञ्जयति,समञ्जन्तु विश्वेदेवा इति**-अनेन मन्त्रेण। सत्यपि कारितार्थत्वे वरस्यैव मन्त्रपाठो मन्त्रलिङ्गात्। कारयितृत्वं च सन्निधानात्कन्यापितुः। सन्निहितो ह्यसौ प्रदातृत्वात्। **पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामति यदैषि मनसा** इत्यनेन मन्त्रेण॥ आदाय गृहीत्वेति चोभयं न वक्तव्यम्। उच्यते च। किमर्थं तत्। अप्रतिग्रहस्यापि प्रतिग्रहविधिना दानं यथा स्यादिति। असाविति कन्यानामग्रहणं मन्त्रान्ते। **अथैनौ समीक्षयति अघोरचक्षुरपतिघ्न्येधीति**। समीक्षणक्रियां कारयति। कारिते चाध्येषणा परस्परं समीक्षेथामिति। कारयितृत्वं कन्यादातुः सन्निधानात्। मन्त्रस्तु वरस्यैव मन्त्रलिङ्गात् ॥ ४ ॥

जयः०—चत्वारः पाकयज्ञाः—भवन्तीति शेषः। कोऽस्याभिसन्धिः। उच्यते विवाह उपक्रान्तः। तत्र बहिःशालायां कर्मेष्यते, तत्प्रसङ्गेनान्यत्रापि यत्र यत्र बहिःशाला तदर्थमभिधीयते, चतुष्प्रकाराः पाकयज्ञाः। तदाह—**हुत इति**—यत्र होम एव स हुतः यथाऽक्षतहोमः। अहुतश्च यत्र न होमः यथा स्रस्तरारोहणम्। प्रहुतो यत्र होमो बलिहरणं च यथा पक्षादिः। प्राशितो यत्र प्राशनमात्रं न होमादिः यथा सर्वासां पयसि पायसं श्रपयित्वा ब्राह्मणान्भोजयेदिति। **पञ्चस्विति**—विवाहादिषु पञ्चसु बहिःशालायां कर्म भवति। एषु बहिःशाला कार्येत्यर्थः। बहिःशालाशब्दसामर्थ्यात् अग्निरत्र लौकिक एव। **उपलिप्त उद्धतावोक्षित इति**—शक्यमेवावक्तुम् परिसमूहनादेरुक्तत्वात्, अतः परिसमूहनादिन्युदासार्थमित्येके। अपरे तु गृह्यस्थालीपाकानां कर्मणि परिसमूहनाद्युक्तम्। अतो गृह्यार्थोऽयमारम्भः विवाहादयश्चागृह्याग्निविषयाः, येनैवाहितोऽग्निस्तदीयमेव कर्म तत्रेष्यते उपग्रहविशेषात्। तस्मादगृह्यार्थमुद्धतावोक्षितग्रहणमिति। तदपि न, यत्र कचिद्धोम इत्यनेन प्राप्तत्वात्। कथं तर्हीदमुक्तम्। श्रूयताम्, अयमभिप्रायः सूत्रकृतः। "यत्र कचिद्धोमः" इत्यनेन परिसमूहनादीनामप्राप्तिः, अग्न्यर्थत्वात्तेषां यत्र यत्राग्नेः स्थापनं तत्र तत्रैते कर्तव्या इति। तथा च लिङ्गम् "उद्धते वा अवोक्षितेऽग्निमादधति"इति।तस्मादेष एव विधिर्यत्र कचिद्धोम इत्यनेन स्थालीपाकादिषु परिसमूहनादेरप्राप्तिप्रज्ञप्त्यर्थमिदमुद्धतावोक्षितग्रहणम्। **निर्मन्थ्यमेके—विवाहे** निर्मन्थ्यः अचिरनिर्मथितो गृह्यते। सर्वोऽप्यग्निर्मन्थनाज्जायत इति।यथा नवनीतेन भुङ्क्ते इत्यचिरादग्धेनेति गम्यते। एके लौकिकाग्निमेवात्रेच्छन्ति अतो विकल्पः। उदगयनादौ दैवानि कुर्वीतेति शेषः। **तद्धि देवानामिति**—स यत्रोदङ्मुखो वर्तते देवेषु

तर्हि भवति। देवानामुदगयनम् तस्माद्दैवं कर्म तत्रोचितमिति गम्यते। आपूर्यमाणपक्षोऽपि देवानामेव य एवापूर्यतेऽर्द्धमासः स देवानाम् इत्यनेन। पुण्याहस्तु स्मरणात्॥ सर्वं दैवविषयमेव तदवगम्यते। कुमार्या ग्रहणं विंशतिप्रसूताव्युदासार्थम्। स्मर्यते हि "विंशतिप्रसूतायाः पुनर्विवाहः" इति ॥ **त्रिषु त्रिषु नक्षत्रेषूत्तरादिषु** उत्तरासहितेषु तेषु त्रिष्वित्यर्थः।स्वात्यादिषु वेति विकल्पः । **तिस्रो ब्राह्मणस्येति**—वर्णानुपूर्व्यग्रहणान्न व्युत्क्रमेण भार्या भवन्ति । वर्णानुपूर्व्येणेति राजन्यवैश्ययोरप्यनुवर्तते । सर्वेषां वर्णानां शूद्रामिच्छन्त्येके विना मन्त्रम् । एके न, नह्यस्या धर्मकार्येष्वधिकार इति । तथाच **यास्कः**—"रामा रमणायोपेयते न धर्माय" इति । एके तु रमणार्थतयेच्छन्ति । तथा चाह—"अग्निं चित्वा प्रथमं रामामुपेयात् " इति । प्राप्तिपूर्वको हि निषेधः, अतोऽयं विकल्पः॥ अथैनां वधू वर एव वासः परिधापयति जरां गच्छेति मन्त्रेण मन्त्रस्य कारितार्थत्वात् । अपरे त्वध्वर्युमत्र कर्तारं मन्यन्ते, परिभाषितं ह्येतत् अध्वर्युः कर्मसु वेदयोगादिति । नैतदित्यन्ये । न हि स्मार्तेष्वध्वर्योः कर्तृत्वम्, समाख्यया हि श्रौतेष्वध्वर्योः कर्तृत्वमिष्यते । न चात्र समाख्याऽस्ति वेदयोगाभावात् । स्मरणादेव स्मृतीनां प्रामाण्यमुक्तम् । अतः समाख्याया अभावात्स्वस्यैव कर्तृत्वम् । ननु पाकयज्ञेषु दक्षिणा श्रूयते । पूर्णपात्रो दक्षिणा वरो वेति । दक्षिणाशब्दश्च परिक्रयार्थे द्रव्ये वर्तते । नच परिक्रेतव्यमन्तरेण परिक्रयो भवति । ततोऽन्यस्य कर्तृत्वमिति । नैवम् । अस्ति ह्यत्रान्योऽपि ब्रह्माख्यः परिक्रेतव्यस्तदर्थः परिक्रयोऽयमिति क्षीणाऽर्थापत्तिः । अपि च परकीये कर्मणि परो नैव प्रवर्तते वचनं विना, श्रौतेषु च समाख्ययाऽन्यस्य कर्तृत्वम् । न चेह समाख्याऽस्तीति उक्तम् । वेदमूलकत्वेऽपि स्मृतीनां समाख्याऽपरिज्ञानादकर्तृनियमः । श्रौतेषु तु परिक्रयाऽऽम्नानादन्यस्य कर्तृत्वमिति युक्तम् । अपि च परकर्तृत्वे 'सा मामनुव्रता भव' इत्येवमादीनि मन्त्रलिङ्गानि विरुध्यन्ते । तत्र मन्त्रमाह । **जरां गच्छेति**—अस्यार्थः । तत्र प्रजापतिस्त्रिष्टुप् तन्तुदेव्यः परिधापने । हे कन्ये त्वं जरां निर्दुष्टं वृद्धत्वं मया सह गच्छ प्राप्नुहि । वासश्च मया सम्पादितं परिधत्स्व परिधेहि, अभिशस्तिरभिशापः " शंसु प्रमादे " तस्मात्पातीत्यभिशस्तिपा वा भव । आक्रुष्यन्ते कामादिभिरित्याक्रुष्टयो मनुष्याः तेषां मध्ये शतं च शरदो वर्षाणि जीव प्राणिहि । सुवर्चाः पातिव्रत्यतेजोयुक्ता भूत्वा रयिं च धनं पुत्रांश्च अन्वनु संव्ययस्व उत्पाद्य राशीकुरु । हे आयुष्मति इदं वासः परिधत्स्वेत्यनुवादः । **अथोत्तरीयं**—वासः **या अकृन्तन्निति** मन्त्रेण परिधापयतीत्यनुवर्तते । अस्यार्थः । तत्र प्रजापतिर्गायत्री विधात्र्यो वस्त्रधारणे । या देवीः देव्यः इदं वासः अकृन्तन् कर्तितवत्यः तत्तत्सामर्थ्यवाहाः या अवयन् वीतवत्यः तन्तुसन्तानं कृतवत्यः ओतवत्य इत्यर्थः,यास्तन्तून्सूत्राणि अतन्वत प्रोतवत्यः तिर्यक्तन्तून् विस्तारितवत्य इत्यर्थः । चकारात् या ओतान् प्रोताँश्च तन्तूनभित उभयपार्श्वयोरपि ततन्थ तेनुः तुरीवेमादिव्यापारेण ग्रथितवत्य इत्यर्थः । ताः तत्तत्सामर्थ्यदात्र्यो देव्यः स्वकार्यं रूपवदिदं वासः, त्वा, त्वां,जरसे दीर्घकालनिर्दुष्टजीवनाय, संव्ययस्व परिधापयन्तु । पुरुषादित्यव्ययश्छान्दसः । अतो हे आयुष्मति इदमेतादृशं वासः परिधत्स्व उत्तरीयत्वेन वृणीष्व। **अथैनौ** वधूवरौ कन्यापिता समञ्जयति परस्परं संमुखीकरोति **समञ्जन्तु विश्वेदेवा**—इति मन्त्रेण । समञ्जनं च युवां परस्परं समञ्जेथामिति प्रैषितयोः परस्परं सम्मुखीकरणम् । सत्यपि कारितत्वे वरस्यैव मन्त्रपाठो मन्त्रलिङ्गात् । कारितत्वं च सन्निधानात्कन्यापितुरेव । सन्निहितो ह्यसौ प्रदातृत्वात् । मन्त्रपाठश्च कन्यासम्मुखमेव । अथ मन्त्रार्थः । तत्र अथर्वणोऽनुष्टुप् लिङ्गोक्ता मैत्रीकरणे । हे कन्ये नौ आवयोः, हृदयादीनि मनांसि तद्धर्मान् वा सङ्कल्पादीन्, विश्वे सर्वे देवाः तथा सम्यग्भूता आपः समञ्जन्तु गुणातिशयाधानेन संस्कुर्वन्तु। तथा सम्यग्भूतो मातरिश्वा अनुकूलो वायुः । तथा सन्धाता अनुकूलः प्रजापतिः । उ अप्यर्थे । **देष्ट्री**—धर्माद्युपदेशकर्त्री वाक्सन्दधातु

सुस्थितानि करोतु । **पित्रा प्रत्तामित्यत्राऽऽदाय गृहीत्वेति** उभयग्रहणम्, अप्रतिग्रहस्यापि प्रतिग्रहविधिना दानं यथा स्यादिति । अप्रतिग्रहश्च क्षत्रियादिः । तत्र मन्त्रः । **यदैषीति**—अस्यार्थः । तत्राथर्वणोऽनुष्टुप् पवमानो निष्क्रमणे । हे कन्ये यद्यतस्त्वं पितृगृहाद्दूरमेषि आगच्छसि मनसा अनुकूलया मनोवृत्त्या दिशः प्राच्याद्या अनु पवमानो वायुरिव । वाशब्द उपमार्थे । अतः स वायुः त्वा त्वां मन्मनसां मदेकनिष्ठचित्तां करोतु, किम्भूतः हिरण्यम् ऊर्जस्वत्पर्णं पतनं यस्य, विशिष्टः कर्ण आश्रयो यस्य सः । वायोरपि स्वकारणगुणसम्बन्धात् कर्णाश्रयत्वम् । विकर्ण एव वैकर्णः स्वार्थे अण् । असाविति कन्यानामग्रहणं वरेणैव मन्त्रान्ते हे अमुकीत्येवम् । अथैनौ वधूवरौ समीक्षणक्रियां कारयति **अघोरचक्षुरिति**—मन्त्रेण । कारितार्थे चाध्येषणा, युवां परस्परं समीक्षेथामिति । मन्त्रपाठस्तु मन्त्रलिङ्गाद्वरस्यैव । अथ मन्त्रार्थः । तत्र चतुर्णां प्रजापतिर्द्वितीयस्यानुष्टुप्, शेषाणां त्रिष्टुप् कुमारी समीक्षणे । हे कन्ये त्वम् अघोरचक्षुः सौम्यदृष्टिः अपापदृष्टिर्वा एधि भव । तथा अपतिघ्नी अकार्यकरणेन पत्यर्थघातिनी तथा मा भव । एतस्मात्संस्कारात्तथा पशुभ्यः पशुवदाश्रितेभ्यः शिवा हितैषिणी च भव । सुमनाः सुप्रसन्नचित्ता सुवर्चाः सुप्रभावयुक्ता वीरसूः सुपुत्रजननी देवकामा देवान् अग्न्यादीन् कामयते सेवार्थमीहते, यद्वा देवं देवनं क्रीडां कामयते । स्योना सुखवती, नोऽस्माकं, शं सुखहेतुः, द्विपदे मनुष्यवर्गाय मनुष्यवर्गमुपाकर्तुम्, तथा—चतुष्पदे पशुवर्गाय पशुवर्गमुपाकर्तुं च शं सुखहेतुर्भव । हे कन्ये ते त्वां सोमश्चन्द्रस्ते तव प्रथमः आद्यः पतिः विविदे जन्मदिने लब्धवान् । " विद्लृ लाभे " धातुः । ततः सार्द्धवर्षद्वयानन्तरं गन्धर्वः सूर्यो विविदे । अत उत्तरः तव द्वितीयोऽयं पतिः । ततोऽग्निरपि तावत्कालेन विविदे । अतोऽयं तव तृतीयः पतिः । यथाहुः—"पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः " इति । तथा ते तव तुरीयश्चतुर्थश्चिरकालभोगाय पतिर्मनुष्यजाः मानुषः अहमेवेत्यर्थः । किमिदानीं चतुर्णामपि इयं पत्नी नेत्याह—**सोमोऽददिति** मन्त्रार्थं ख्यापयन् ॥ अस्यार्थः । सोमश्चन्द्रस्त्रिंशन्मासान्भुक्त्वा, गन्धर्वः सूर्यस्तस्मै अददत् ददौ । सोऽपि तावत्कालं भुक्त्वाऽग्नयेऽददत् । स चाग्निर्मह्यमिमामदात् दत्तवान् । न केवलमिमां किन्तु पुत्रान् सुतान् रयिं धनं च चकाराद्धर्मादि चादादिति सम्बन्धः । या जगच्चक्षुः पूषा देवता सा इमां शिवतमाम् कल्याणगुणशीलां कृत्वा नोऽस्मान्प्रत्यैरय ईरयतु । आटो दर्शनं विभक्तेरदर्शनं च छान्दसम् । अस्मास्वनुरक्तां करोत्वित्यर्थः । सा चास्मत्तः सुखं पुत्रांश्च कामयमाना ऊरू सक्थिनी विहर विवृणोतु प्रसारयत्वित्यर्थः । मध्यमपुरुषश्छान्दसः । प्रयोजनमाह—यस्यां स्त्रियोनौ उशन्तः पुत्रान् सुखं चेच्छन्तः शेपम् शिश्नं प्रहराम प्रवेशयाम । वयं यस्यां च कन्यायाम् उ एवार्थे यस्यामेव बहवः, कामाः धर्मपुत्ररतिसुखरूपाः सन्ति सन्तु वा । किमर्थम्, निविष्ट्यै अग्निहोत्राद्युपासनयाऽन्तःकरणशुद्धिद्वारा सायुज्यमुक्तये ॥ ४ ॥ * ॥ * ॥

हरि०—**चत्वारः पाकयज्ञाः**—पच्यते श्रप्यते ओदनादिकमस्मिन्निति पाको गृह्याग्निस्तस्मिन्पाके नान्यत्रेति भावः । पाके यज्ञाः पाकयज्ञाः । यतः—"वैवाहिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि । पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं गृही " इति मनुना दैनन्दिनपाको गृह्येऽग्नौ स्मर्यते । ते चत्वारः चतुर्विधा भवन्ति, कथम् **हुतोऽहुतः प्रहुतः प्राशित इति**—तत्र हुतो होममात्रं यथा सायम्प्रातर्होमः । अहुतः होमबलिरहितं कर्म यथा स्रस्तरारोहणम् । अहुतो यत्र होमो बलिकर्म भक्षणं च यथा पक्षादि कर्म । प्राशितो यत्र प्राशनमात्रं न होमो न बलिः यथा सर्वासां गवां पयसि पायसश्रपणानन्तरं ब्राह्मणभोजनम्, इत्थं चतुर्विधः । **पञ्चसु बहिःशालायां विवाहे चूडाकरण उपनयने केशान्ते सीमन्तोन्नयन इति**—पञ्चसु संस्कारकर्मसु बहिःशालायां

गृहाद्बहिः शाला बहिःशाला मण्डप इति यावत् । तस्यां कर्म भवति । यथा विवाहे परिणयने, चूडाकरणे क्षौरकर्मणि, उपनयने मेखलाबन्धे, केशान्ते गोदानकर्मणि, सीमन्तोन्नयने गर्भसंस्कारे । एतेषु पञ्चसु बहिःशालायामनुष्ठानम् । अन्यत्र गृहाभ्यन्तरे मुख्यशालायामेव । **उपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधाय**—उपलिप्ते गोमयोदकेन उद्धते स्फ्येनोल्लिखितेनेति तिसृभी रेखाभिः, अवोक्षिते उदकेनाभ्युक्षिते, बहिःशालागृहयोः अन्यतरस्मिन्प्रदेशे आग्निमुपसमाधाय अग्निं लौकिकमावसथ्यं वा उपसमाधाय स्थापयित्वा । अयं च लेपनादिविधिर्नापूर्वः । अपि तु परिसमुह्येत्यादिपूर्वोक्तस्यैवानुवादः, ततश्चात्रानुक्तमपि परिसमूहनमुद्धरणं च सर्वत्र भवति—"एष एव विधिर्यत्र क्वचिद्धोमः" इति वचनात् । **निर्मन्थ्यमेके विवाहे**—एके आचार्याः विवाहे पाणिग्रहे निर्मन्थ्यमारणेयमग्निं वैवाहिकहोमाधिकरणमिच्छन्ति । अथ विवाहाख्यं कर्माह **उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयात्**—उदगयने मकरादिराशिषट्कस्थिते रवौ, आपूर्यमाणपक्षे शुक्लपक्षे, पुण्याहे ज्योतिःशास्त्रोक्तविष्टयादिदोषरहिते, कुमार्याः अनन्यपूर्विकायाः कन्यायाः । अनेन विंशतिप्रसूतायाः स्मृत्यन्तरविहितस्य पुनर्विवाहस्यानियमः । इच्छा चेत्करोति । **पाणिं गृह्णीयात्**-- पाणिं हस्तं स्वगृह्योक्तविधिना गृह्णीयात् । अस्मिन् अयनपक्षदिनानि नियम्य नक्षत्रनियममाह—**त्रिषु त्रिषूत्तरादिषु स्वातौ मृगशिरसि रोहिण्यां वा**—उत्तरा आदिर्येषां तान्युत्तरादीनि तेषु कतिषु त्रिषु त्रिषु, तथाहि उत्तराफाल्गुनी, हस्तः, चित्रा इति त्रीणि, उत्तराषाढा, श्रवणं, धनिष्ठा इति त्रीणि, तथा उत्तराभाद्रपदारेवत्यश्विन्य इति त्रीणि । स्वातौ मृगशिरसि रोहिण्यां वा । एतेषां नक्षत्राणांमन्यतमे इत्यर्थः । "कुमार्याः पाणिं गृह्णीयात्" इति सामान्येनोक्तं तत्र विशेषमाह **तिस्रो ब्राह्मणस्य वर्णानुपूर्व्येण द्वे राजन्यस्यैका वैश्यस्य**—ब्राह्मणस्य द्विजाग्र्यस्य वर्णानुपूर्व्येण वर्णक्रमेण तिस्रो ब्राह्मणीक्षत्त्रियावैश्या विवाह्या भवन्ति । द्वे क्षत्त्रियावैश्ये राजन्यस्य विवाह्ये भवतः । एका वैश्यैव वैश्यस्य विवाह्या भवति । वर्णानुपूर्व्यग्रहणात् व्युत्क्रमो निषिद्धः । **सर्वेषाᳪ शूद्रामप्येके मन्त्रवर्जम्**—सर्वेषां ब्राह्मणक्षत्त्रियविशां शूद्रामप्येके विवाह्यां मन्यन्ते तत्र विशेषः । मन्त्रवर्जं मन्त्ररहितं यथा भवति तथा । अत्र द्विजातीनामपि शूद्रापरिणयने आचार्येण मन्त्रवत्क्रियानिषेधात् । अतः शूद्रस्य शूद्रापरिणयने मन्त्रवत्क्रिया नास्ति किन्तु मन्त्ररहितं क्रियामात्रमिति गम्यते । ततश्च शूद्रस्य शूद्रापरिणयने मन्त्रवद्धोमादि कर्म कुर्वन्ति तदशास्त्रीयम् । एके न मन्यन्ते शूद्राविवाहम्, कुतः शूद्रायाः धर्मकार्येष्वनधिकारात् । कुतो नाधिकार इति चेत्, "रामा रमणायोपेयते न धर्माय कृष्णजातीया" इति निरुक्तकारयास्काचार्यवचनात् । अतो रमणार्थं शूद्रापरिणयनं पक्षे । एवं सति षणमासदीक्षाद्यनन्तरमग्निं चित्वा प्रथमं न रामामुपेयात् इति निषेध उपपद्यते, प्राप्तं हि प्रतिषेधस्य विषयः, यदि रामोढा न स्यात्तदा अग्निचितः कथं तत्प्रथमगमनं प्रातिषिध्येत । तस्माच्छूद्रापरिणयनमुपभोगार्थमिच्छया कुर्वतो न शास्त्रातिक्रमः धर्मप्रजारत्यर्थो हि विवाहः । प्रासङ्गिकमभिधायेदानीं प्रकृतमाह—तत्र पुण्येऽहनि । **अथैनां वासः परिधापयति जरां गच्छ परिधस्त्व वासो भवाकृष्टीनामभिशस्तिपा वा शतं च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वास इति**—अथाग्निस्थापनानन्तरमेनां कुमारीं वासः अहतं सदशं वस्त्रं परिधापयति परिहितं कारयति वरः । जरां गच्छेति मन्त्रं पठित्वा । कुमारी च स्वयं परिधत्ते । **अथोत्तरीयम् या अकृन्तन्नवयं या अतन्वत याश्च देवीस्तन्तूनभितो ततन्थ । तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वास इति**—अथोत्तरीयम् । वस्त्रपरिधानानन्तरमुत्तरीयं वासः परिधापयति वरः । या अकृन्तन्निति मन्त्रमुक्त्वा । अत्र परिधापयतीति णिजन्तस्य कारितार्थत्वात्परिधत्स्व वास इति मन्त्रस्यापि तदर्थत्वात्परिधापयिताऽन्य इत्यवगम्यते, स किं वरः अध्वर्युर्वा इति संशयः । तत्र "अध्वर्युः कर्मसु वेदयोगात्" इति परिभाषाबलात् अध्वर्युः परिधापयितेति चेत् तन्न, स्मार्तेषु कर्मसु अध्वर्योः कर्तृत्व-

योगाभावात् । समाख्यया हि अध्वर्योः कर्मसु योगः, समाख्या च वेदयोगात् । न च स्मृतिर्वेदः स्मरणादेव स्मृतीनां प्रामाण्यात्, न पुनर्वेदमूलत्वेन । अतः समाख्याया अभावात् स्वयं कर्तृत्वं पाकयज्ञेषु अतो वर एव परिधापयिता । ननु पूर्णपात्रो दक्षिणा वरो वेति पाकयज्ञेषु परिक्रियार्था दक्षिणा श्रूयते सा च दक्षिणा परिक्रेतव्याभावे नोपपद्यते । अतस्तदन्यथानुपपत्त्या अन्यस्य कर्तृत्वं कल्प्यताम्, नैतदेवम् । अन्यस्य ब्रह्मणः परिक्रेतव्यस्य कर्तुर्विद्यमानत्वात् परिक्रियार्थदक्षिणांश्रवणस्योपपत्तेः । किञ्च वचनाभावे परः परस्य कर्म कर्तुं न प्रवर्तते नात्र वचनमस्ति पाकयज्ञेषु स्वतोऽन्यकर्तृत्वविधायकम् । श्रौतवत्समाख्यापि नास्ति । ननु स्मृतीनां वेदमूलत्वात् यद्वेदमूलं स्मार्तं कर्म तद्वेदसमाख्यया अन्यस्य कर्तृत्वं कल्प्यताम् । मैवम्, यतः स्मृतयोऽनिश्चितवेदमूलाः अतो न ज्ञायते किं वेदमूलमिदं कर्म । यद्वेदसमाख्यया अन्यः कर्ता कल्प्यते । मन्त्रलिङ्गविरोधोऽपि परकर्तृत्वे कथं सा मामनुव्रता भव । प्रजापतिष्ट्वा नियुनक्तु मह्यम् । अमोहमस्मीत्यादि, सा नः पूषाशिवतमेत्यादयो वैवाहिकमन्त्राः आत्मलिङ्गाः, ते च परकर्तृत्वे विरुद्धयन्ते तस्मात्पाकयज्ञेषु स्वयं यजमानस्यैव कर्तृत्वमिति सिद्धम् । अत्र वरोऽपि वाससी परिधत्ते, परिधास्यै यशसामेति मन्त्राभ्याम् ॥ **अथैनौ समञ्जयति समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ सम्मातरिश्वा सन्धाता समुदेष्ट्री दधातु नाविति**–अथ वस्त्रपरिधानानन्तरं परस्परं समञ्जेथामिति प्रैषेण कन्यापिता एनौ वधूवरौ समञ्जयति सम्मुखौ वरकुमार्यौ करोति, अत्र विशेषमाह **ऋष्यशृङ्गः**–"वरगोत्रं समुच्चार्य प्रपितामहपूर्वकम् । नाम सङ्कीर्तयेद्विद्वान्कन्यायाश्चैवमेव हि" तत्र वरः समञ्जन्तु विश्वेदेवा इत्यादिकं मन्त्रं कन्यासम्मुखीभूतः पठति ! अत्र **कन्यादानप्रयोगो** लिख्यते। उत्तरत्र "पित्रा प्रत्ताम्" इति सूत्रस्मरणात् तद्यथा–अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्राय, अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्राय, अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्राय इति वरपक्षे । अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रीम्, अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रीम्, अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रीम् इति कन्यापक्षे । एवमेव पुनर्वारद्वयमुच्चार्यामुकगोत्रायामुकप्रवरायामुकशर्मणे ब्राह्मणाय इति ब्राह्मणवरपक्षे । इतरवरपक्षे वर्मणे अमुकगोत्रगुप्ताय अमुकदासायेति विशेषः । अमुकगोत्राममुकप्रवराममुकनाम्नीमिमां कन्यां प्रजापतिदैवतां यथाशक्त्यलङ्कृतां पुराणोक्तकन्यादानफलकामो भार्यात्वेन तुभ्यमहं संप्रददे । इति सकुशेन जलेन कन्याहस्तं वरस्य हस्ते दद्यात् । वरश्च द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णात्विति मन्त्रेण प्रतिगृह्णीयात् । ततः कोऽदादिति कामस्तुतिं पठेत् । ततः कन्यापिता कृतैतत्कन्यादानप्रतिष्ठासिद्ध्यर्थं सुवर्णं गोमिथुनं च दक्षिणां दद्यात् । अत्राचारादन्यदपि यौत×कत्वेन सुवर्णरजतताम्रगोमहिष्यश्वग्रामादि कन्यापिता यथासम्भवं ददाति । अन्येऽपि बान्धवादयो यथासम्भवं यौतकं प्रयच्छन्ति । केचन यौतकं होमान्ते प्रयच्छन्ति । अत्र देशाचारतो व्यवस्था । **पित्राप्रत्तामादाय गृहीत्वा निष्क्रामति यदैषीति**–पित्रा जनकेन प्रत्तां सङ्कल्प्य दत्तामादाय प्रतिग्रहविधिना प्रतिगृह्य गृहीत्वा हस्ते धृत्वा निष्क्रामति गृहमध्यात् मण्डपाद्वा । अग्निसमीपं गन्तुम् । **यदैषि मनसा दूरं दिशोऽनु पवमानो वा हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्वित्यसाविति**–यदैषि मनसेत्यादिना मन्त्रेण करोत्वमुकदेवि इत्यन्तेन । अत्र पित्रेत्युपलक्षणम् । "पिता पितामहो भ्राता सकुल्यो जननी तथा । कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः" इति **याज्ञवल्क्येन** अन्येषामपि कन्यादाने अधिकारस्मरणात् । **अथैनौ समीक्षयति**–अथ निष्क्रमणानन्तरमेतौ "वधूवरौ परस्परं समीक्षेथाम्" इति प्रैषेण कन्यापिता समीक्षयति समीक्षणं कारयति । तत्र समीक्षमाणो वरः । **अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं**

× "यौतकादि तु यद्देयं सुदायोहरणं च यत् ।" इत्यमरः । युतकं योनिसंबन्धस्तत्र भवं 'तत्र भवः' इत्यण् । युतयोर्वरवध्वोर्वा इदं "तस्येदम्" इत्यण् । आदिना व्रतभिक्षादि ।

चतुष्पदे । सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः । सोमोऽददद् गन्धर्वाय गन्धर्वोऽददद्ग्नये रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् । सा नः पूषा शिवतमा मैरय सा न ऊरू उशती विहर, यस्यामुशन्तः प्रहराम शेपं यस्यासु कामा बहवो निविष्ट्या इति–अघोरचक्षुरित्यादीन् निविष्टया इत्यन्तान्मन्त्रान्पठति वरः । इति हरिहरभाष्ये चतुर्थी कण्डिका ॥ ४ ॥ * ॥

गदा०–**चत्वारः पाकयज्ञाः**–पाकयज्ञा इति कर्मणां नामधेयानि । चतुष्प्रकारा भवन्ति । के ते **हुतोऽहुतः प्रहुतः प्राशित इति**–हुतो होममात्रम् यथा सायम्प्रातर्होमः । अहुतो यत्र न हूयते यथा स्रस्तरारोहणम् । प्रहुतो यत्र हूयते बलिहरणञ्च यथा पक्षादिः । प्राशितो यत्र प्राश्यत एव न होमो न बलिहरणम्, यथा सर्वासां पयसि पायस ँ श्रपयित्वा ब्राह्मणान्भोजयेदिति । ननूपदिश्यमाना एवैते चत्वारो भवन्ति । प्रकारकथनं प्रवृत्तिविशेषकरत्वाभावादनर्थकमिति चेत् नानर्थकम्, प्रकारान्तरसूचनार्थत्वात् । चत्वारः प्रकारा उपदिष्टाः । अस्ति हि पञ्चमः प्रकारः स नोपदिष्टः, तत्सूचनार्थमेवैतत्सूत्रम् । कश्चासौ ब्रह्मयज्ञ इति तस्य विधेर्ब्राह्मणोपदिष्टत्वात् । एतावता तदवश्यम् "अहरहरध्येतव्यम्" इति **भर्तृयज्ञः** । **पञ्चसु बहिःशालायां विवाहे चूडाकरण उपनयने केशान्ते सीमन्तोन्नयन इति**–विवाहादिषु पञ्चसु कर्मसु गृहाद्बहिःशालायां कर्म भवति । अन्यत्रान्तःशालायाम् बहिःशालायां वा भवति । विवाहे तु मण्डपो **वशिष्ठेनोक्तः**–" षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितम् । मण्डपं तोरणैर्युक्तं तत्र वेदिं प्रकल्पयेत् । अष्टहस्तं तु रचयेन्मण्डपं वा द्विषट्करम् " वेदीकरणं **नारदोक्तम्**–" हस्तोच्छ्रितां चतुर्हस्तैश्चतुर्हस्तां समन्ततः । स्तम्भैश्चतुर्भिः सुश्लक्ष्णां वामभागे तु सद्मनः ॥ समां तथा चतुर्दिक्षु सोपानैरतिशोभिताम् । प्रागुदक्प्रवणां रम्भास्तम्भहंसशुकादिभिः ॥ एवंविधामारुरुक्षेन्मिथुनं साग्निवेदिकाम् " इति । **सप्तर्षिमते** च–" मङ्गलेषु च सर्वेषु मण्डपो गृहवामतः । कार्यः षोडशहस्तो वा ह्यूनहस्तो दशावधिः ॥ स्तम्भैश्चतुर्भिरेवात्र वेदी मध्ये प्रतिष्ठिता" इति । कारिकायामपि विवाहे मण्डपवेदीकरणमुक्तम् । **उपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधाय**–यत्राग्नेः स्थापनं तत्रोपलिप्ते उद्धते अवोक्षिते उदकेनाभ्युक्षिते देशेऽग्निस्थापनम् । अत्रानेन पञ्चाग्निसंस्कारा लक्ष्यन्ते । ननु परिसमूहनादेरुक्तत्वात्किमर्थमुपलेपनादिकमुच्यते । सत्यम्, उच्यते यत्र क्वचिद्धोम इत्यनेनाप्राप्तिः परिसमूहनादेरग्न्यर्थत्वाद्यत्र यत्राग्नेः स्थापनं तत्र तत्रैते भवन्ति । तथा च लिङ्गम्–"उद्धते वा अवोक्षितेऽग्निमादधाति " इति । "एष एव विधिर्यत्र क्वचिद्धोमः" इत्यनेन च होमार्थमग्निस्थापने स्युः । अन्यत्र गृहान्तरेऽग्निनिधाने अग्निगमने मथित्वाऽग्निस्थापने च न स्युः किञ्च एष एवेत्यनेन यत्र स्वस्थानस्थितेऽग्नौ स्थालीपाकादिकं क्रियते तत्रापि पञ्चैते स्युः तन्मा भूदित्यनेन सूत्रेण ज्ञाप्यते । "उपलिप्त उद्धतावोक्षिते देशेऽग्निमुपसमाधाय विवाहो भवति" इति **भर्तृयज्ञैः** सूत्रं योजितम् । परिसमूहनपरिसङ्ख्या च तेषां मते । **निर्मन्थ्यमेके विवाहे**–विवाह इति कर्मणो नामधेयम् । एके विवाहकर्मणि निर्मथ्यमग्निमिच्छन्ति अन्ये लौकिकमिच्छन्ति । निर्मथ्योऽचिरनिर्मथितो ग्राह्यः । सर्व एव ह्यग्निर्मन्थनाज्जायते यथा नवनीतेन भुङ्क्ते इत्युक्ते अचिरदग्धेनेति ज्ञायते । अत्र या काचिदरणिर्ग्राह्या । **उदगयन आपूर्यमाणपक्षे पुण्याहे**–उदगयने उत्तरायणे, आपूर्यमाणपक्षे शुक्लपक्षे, पुण्याहे शोभने विष्ट्यादिरहितकाले, दैवानि कर्माणि कुर्यात् । एवं हि श्रूयते–" स यत्रोदङ्ङावर्तते देवेषु तर्हि भवति " इति तस्मात्तत्र देवकर्मोचितम् । आपूर्यमाणः सोऽपि देवानामेव । तथा " य एवापूर्यतेऽर्धमासः स देवाः" इति श्रुतेः । पुण्याहोऽपि उदगयनादीनां समुच्चयः, तेन सर्वं देवकर्मोदगयन आपूर्यमाणपक्षे पुण्याहे कार्यम् । इदं चानुक्तकालविषयं सूत्रम्, यत्र नियतः कालो यथा 'सायं जुहोति प्रातर्जुहोति' यथा–"पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेत" इत्यादौ तत्तत्काले कार्यम् । न हि शुक्लपक्षे पुण्याहादावग्निहोत्राद्यनुष्ठानमिष्टमहरहरनुष्ठातव्यत्वात् । अत उपनयनचूडाकरणादीनि उदगयनादौ कार्याणि । अन्यानि तु येषु न समुच्चयः सम्भवति तानि यथासम्भवमेतेषु कर्तव्यानि । यथा "सर्पबलिरनाहिताग्न्याग्रयणमित्यादीनि " इति **तन्त्ररत्ने** । एवं पित्र्याणि दक्षिणायनेऽपराह्णे च । **कुमार्याः पाणिं गृह्णीयात्**–कुमार्याः अक्षतयोन्याः पाणिं गृह्णीयात् वक्ष्यमाणेन विधिना विवाहं कुर्यात् । विंशतिप्रसूताव्युदासार्थं कुमारीग्रहणम् । स्मर्यते हि तस्याः पुनर्विवाहः । **त्रिषु त्रिषूत्तरादिषु**–उत्तरा आदिर्येषां तान्युत्तरादीनि तेषु तेषु त्रिषु ।

अयमर्थः । उत्तराफाल्गुन्यां, हस्ते, चित्रायां च । एवमुत्तराषाढायां, श्रवणे, धनिष्ठायां च । एवमुत्तराप्रोष्ठपदि रेवत्यामश्विन्यां च । **स्वातौ मृगशिरसि रोहिण्यां वा**–एतेषामन्यतमे वा नक्षत्रे विवाहो भवतीत्यर्थः । “उदगयन आपूर्यमाणपक्षे पुण्याहे ” इत्युक्तत्वात् कालप्रसङ्गाच्च स्मृत्यन्तरोक्तसंवत्सरादिकन्याविवाहकालोऽत्र निरूप्यते । तत्र **ज्योतिर्निबन्धे**–“ षडब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं यतः । सोमो भुङ्क्ते ततस्तद्वद्गन्धर्वश्च तथाऽनलः ॥” तथा **यमः**--“ सप्त संवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः । कन्यायाः शस्यते राजन्नान्यथा धर्मगर्हितः ॥” **राजमार्तण्डे**--“अयुग्मे दुर्भगा नारी युग्मे तु विधवा भवेत् । तस्माद्गर्भान्विते युग्मे विवाहे सा पतिव्रता ॥” “मासत्रयादूर्ध्वमयुग्मवर्षे युग्मेऽपि मासत्रयमेव यावत् । विवाहशुद्धिं प्रवदन्ति सन्तो **वात्स्यादयः** स्त्रीजनिजन्यमासात् । ” **स्मृत्यन्तरे** तु–“जन्मतो गर्भाधानाद्वा पञ्चमाब्दात्परं शुभम् । कुमारीवरणं दानं मेखलाबन्धनं तथा” इत्युक्तम् । सर्वसंग्रहवाक्यानि **कारिकायाम्**–“ अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी । दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥ दशमेऽनग्निका वा स्याद् द्वादशे वृषली स्मृता । अपरा वृषली ज्ञेया कुमारी या रजस्वला ॥ प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति । मासि मासि रजस्तस्याः पिता पिबति शोणितम् ॥ एतच्च प्रायिकं ज्ञेयं न रजोदर्शनं भवेत् । स्त्रीणां कासाञ्चिद्वर्षेऽस्मिन्नाभाणि **मनुना**ऽपि तत् ॥ उद्वहेत्त्रिंशदब्दस्तु कन्यां द्वादशवार्षिकीम् । त्र्यष्टवर्षोऽष्टवर्षां न, धर्मे सीदति सत्वरः ॥ एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात् । वर्षैरेकगुणां भार्यामुद्वहेत्त्रिगुणः स्वयम् ॥ त्रिंशद्वर्षो दशाब्दां च भार्यां विन्दति नग्निकाम् । तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत् ॥ प्रदानं प्रागृतोस्तस्या ऊर्ध्वं कुर्वन्स दोषभाक् । ज्येष्ठो भ्राता पिता माता दृष्ट्वा कन्यां रजस्वलाम् ॥ त्रयस्ते नरकं यान्ति स्वयमित्यब्रवीद्**यमः** । यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः ॥ असम्भाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः । वृषलीसङ्ग्रहीता यो ब्राह्मणो मदमोहितः ॥ सततं सूतकं तस्य ब्रह्महत्या दिने दिने । पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ॥ भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता । दद्याद् गुणवते कन्यां नग्निकां ब्रह्मचारिणीम् ॥ अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम्” इति । अथ **मासः** । **व्यासः**–“माघफाल्गुनवैशाखे यदूढा मार्गशीर्षके । ज्येष्ठे चाषाढके चैव सुभगा वित्तसंयुता ॥ श्रावणेऽपि च पौषे वा कन्या भाद्रपदे तथा । चैत्राश्वयुक्कार्तिकेषु याति वैधव्यतां लघु ॥” **नारदः**–“माघफाल्गुनवैशाखज्येष्ठमासाः शुभावहाः । कार्तिको मार्गशीर्षश्च मध्यमौ निन्दिताः परे ॥” “पौषेऽपि कुर्यान्मकरस्थितेऽर्के चैत्रे भवेन्मेषगतो यदा स्यात् । प्रशस्तमाषाढकृतं विवाहं वदन्ति गर्गा मिथुने स्थितेऽर्के ॥” “मार्गे मासि तथा ज्येष्ठे क्षौरं परिणयव्रतम् । ज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्जयेत् ॥ कृत्तिकास्थं रविं त्यक्त्वा ज्येष्ठपुत्रस्य कारयेत् । उत्सवादिषु कार्येषु दिनानि दश वर्जयेत् ॥” तथा **रत्नकोशे**–“ जन्मर्क्षे जन्मदिवसे जन्ममासे शुभं त्यजेत् । ज्येष्ठे मास्यादिगर्भस्य शुभं वर्ज्यं स्त्रिया अपि ॥” **राजमार्तण्डे**–“ जातं दिनं दूषयते **वसिष्ठो** ह्यष्टौ च **गर्गो** नियतं दशाऽत्रिः । जातस्य पक्षं किल **भागुरिश्च** शेषाः प्रशस्ताः खलु जन्ममासि ॥” “जन्ममासे तिथौ भे च विपरीतदले सति । कार्यं मङ्गलमित्याहुर्**गर्गभार्गवशौनकाः** ॥ जन्ममासे निषेधेऽपि दिनानि दश वर्जयेत् । आरभ्य जन्मदिवसाच्छुभाः स्युस्तिथयोऽपरे ॥ ” **पराशरस्मृतौ** विशेषः–“ अज्येष्ठा कन्यका यत्र ज्येष्ठपुत्रो वरो यदि । व्यत्ययो वा तयोस्तत्र ज्येष्ठो मासः शुभप्रदः ॥ ज्येष्ठस्य ज्येष्ठकन्याया विवाहो न प्रशस्यते । तयोरन्यतरे ज्येष्ठे ज्येष्ठो मासः प्रशस्यते ॥” तथा–“द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकज्येष्ठं शुभावहम् । ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसम्मतम् ॥ ” यत्तु “ सार्वकालमेके विवाहः ” इति वदन्ति तत्प्रौढायां कन्यायां वेदितव्यम् । तथा च **राजमार्तण्डे**–“राहुग्रस्ते तथा युद्धे पितॄणां प्राणसंशये । अतिप्रौढा च या कन्या चन्द्रलग्नबलेन तु ॥” यद्वा तदासुरादिविवाहविषयम् । तथा च **गृह्यपरिशिष्टम्** । “धर्म्येषु विवाहेषु कालपरीक्षणं नाधर्म्येषु” इति । अथ **गुर्वादिबलम्** । तत्र **गर्गः**–“स्त्रीणां गुरुबलं श्रेष्ठं पुरुषाणां रवेर्बलम् । तयोश्चन्द्रबलं श्रेष्ठमिति गर्गेण भाषितम् ॥” **देवलः**–“नष्टात्मजा धनवती विधवा कुशीला पुत्रान्विता हतधवा सुभगा विपुत्रा । स्वामिप्रिया विगतपुत्रधवा धनाढ्या वन्ध्या भवेत्सुरगुरौ क्रमशोऽभिजन्म ॥” **गर्गः**–“जन्मत्रिदशमारिस्थः पूजया शुभदो गुरुः । विवाहेऽथ चतुर्थाष्टद्वादशस्थो मृतिप्रदः ॥” अस्यापवादः । “सर्वत्रापि शुभं दद्याद्द्वादशाब्दात्परं गुरुः । पञ्चषष्ठाब्दयोरेव शुभगोचरता मता ॥ सप्तमात्पञ्चवर्षेषु स्वोच्चस्वर्क्षगतो यदि । अशुभोऽपि शुभं दद्याच्छुभदर्क्षेषु किंपुनः । रजस्वलाया कन्यायाः गुरुशुद्धिं न चिन्तयेत् । अष्टमेऽपि प्रकर्तव्यो विवाहस्त्रिगुणार्चनात् ॥ अर्कगुर्वो-

बलं गौर्या रोहिण्यर्कबला स्मृता । कन्या चन्द्रबला प्रोक्ता वृषली लग्नतो बला॥ अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी । दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥" **बृहस्पतिः**—"झषचापकुलीरस्थो जीवोऽप्यशुभगोचरः । अतिशोभनतां दद्याद्विवाहोपनयादिषु ॥" **शौनकः**—"गुर्वादित्ये व्यतीपाते वक्रातीचारगे गुरौ । नष्टे शशिनि शुक्रे वा बाले वृद्धेऽथवा गुरौ ॥ पौषे चैत्रेऽथ वर्षासु शरद्यधिकमासके । केतूद्गमे निरंशेऽर्के सिंहस्थेऽमरमन्त्रिणि ॥ विवाहव्रतयात्रादि पुनर्हर्म्यगृहादिकम् । क्षौरं विद्योपविद्यां च यत्नतः परिवर्जयेत् ॥" तथा—"सिंहस्थे मकरस्थं च गुरुं यत्नेन वर्जयेत् ।" **लल्लः**—"अतिचारगतो जीवस्तं राशिं नैति चेत्पुनः । लुप्तसंवत्सरो ज्ञेयः सर्वकर्मबहिष्कृतः ॥" सिंहस्थगुरोरपवादो **वशिष्ठेनोक्तः**—"विवाहो दक्षिणे कूले गौतम्या नेतरत्र तु । भागीरथ्युत्तरे कूले गौतम्या दक्षिणे तथा ॥ विवाहो व्रतबन्धश्च सिंहस्थे ज्ये न दुष्यति ।" **पराशरोऽपि**—"गोदाभागीरथीमध्ये नोद्वाहः सिंहगे गुरौ । मघास्थे सर्वदेशेषु तथा मीनगते रवौ ॥" सर्वत्र गुरुबलालाभे **शौनकोक्ता** शान्तिः कार्या । सा चास्माभिः प्रयोगे लेखनीया । अतिचारगे गुरौ तु **वसिष्ठः**—"अतिचारगते जीवे वर्जयेत्तदनन्तरम् । विवाहादिषु कार्येषु अष्टाविंशतिवासरान् ।" **रत्नमालायाम्**—"एकपञ्चनवयुग्मषड्दशत्रीणिसप्तचतुरष्टलाभदः । द्वादशाजवृषभादिराशितो घातचन्द्र इति कीर्तितो बुधैः ।" **नारदः**—"भूबाणनवहस्ताश्च रसो दिग्वह्निशैलजाः । वेदा वसुशिवादित्या घातचन्द्रा यथाक्रमम् ॥ यात्रायां शुभकार्येषु घातचन्द्रं विवर्जयेत् । विवाहे सर्वमाङ्गल्ये चौलादौ व्रतबन्धने ॥ घातचन्द्रो नैव चिन्त्य इति **पाराशरोऽब्रवीत्** ।" **ज्योतिर्निबन्धेऽप्युक्तम्**—"विवाहचौलव्रतबन्धयज्ञे महाभिषेके च तथैव राज्ञाम् । सीमन्तयात्रासु तथैव जाते नो चिन्तनीयः खलु घातचन्द्रः ॥" अकालवृष्टौ **नारदः**—"अकालजा भवेयुश्चेद्विद्युन्नीहारवृष्टयः । प्रत्यर्कपरिवेषेन्द्रचापाभ्रध्वनयो यदि ॥ दोषाय मङ्गले नूनमदोषायैव कालजाः ।" अकालवृष्टिस्वरूपं च **लल्लेनोक्तं**—"पौषादिचतुरो मासान्प्रोक्ता वृष्टिरकालजा" इति ॥ "निर्घाते क्षितिचलने ग्रहयुद्धे राहुदर्शने चैव । आपञ्चदिनात्कन्या परिणीता नाशमुपयाति ॥" "उल्कापातेन्द्रचापप्रबलघनरजोधूमनिर्घातविद्युद्वृष्टिप्रत्यर्कदोषादिषु सकलबुधैस्त्याज्यमेवैकरात्रम् । दुःस्वप्ने दुर्निमित्ते ह्यशुभतरदशे दुर्मनोद्भ्रान्तबुद्धौ चौले मौञ्जीनिबन्धे परिणयनविधौ सर्वदा त्याज्यमेव ॥" **ज्योतिष्प्रकाशे**—"अर्वाक् षोडश नाड्यः सङ्क्रान्तेः पुण्यदाः परतः । उपनयनव्रतयात्रापरिणयनादौ विवर्ज्यास्ताः ॥" **गर्गः**—"दिग्दाहे दिनमेकं च ग्रहे सप्त दिनानि तु । भूकम्पे च समुत्पन्ने त्र्यहमेव तु वर्जयेत् ॥ उल्कापाते त्रिदिवसं धूमे पञ्च दिनानि च । वज्रपाते चैकदिनं वर्जयेत्सर्वकर्मसु ॥ दर्शनादर्शनाद्राहुकेत्वोः सप्तदिनं त्यजेत् । यावत्केतूद्गमस्तावदशुभः समयो भवेत्" **अद्भुतसागरे** अस्यापवादः । अथ "यदि दिवसत्रयमध्ये मृदु पानीयं यदा भवति. । उत्पातदोषप्रशमनं तदैव शं प्राहुराचार्याः" **सम्बन्धतत्त्वे** च—"भूकम्पादेर्न दोषोऽस्ति वृद्धिश्राद्धे कृते सति ।" अथ प्रतिकूलादिः । **मेधातिथिः**—"वधूवरार्थं घटिते सुनिश्चिते वरस्य गेहेऽप्यथ कन्यकायाः । मृत्युर्यदि स्यान्मनुजस्य कस्यचित्तदा न कार्यं खलु मङ्गलं बुधैः ॥" मङ्गलं विवाहः । तथा **गर्गः**—"कृते तु निश्चये पश्चान्मृत्युर्भवति कस्यचित् । तदा न मङ्गलं कुर्यात्कृते वैधव्यमाप्नुयात् ॥" **स्मृतिचन्द्रिकायाम**—"कृते वाङ्नियमे पश्चान्मृत्युर्मर्त्यस्य गोत्रिणः । तदा न मङ्गलं कार्यं नारीवैधव्यदं ध्रुवम् ॥" **भृगुः**—"वाग्दानानन्तरं यत्र कुलयोः कस्यचिन्मृतिः । तदोद्वाहो नैव कार्यः स्ववशक्षयदो यतः ॥" **शौनकः**—"वरवध्वोः पिता माता पितृव्यश्च सहोदरः । एतेषां प्रतिकूलं हि महाविघ्नप्रदं भवेत् ॥ पिता पितामहश्चैव माता चैव पितामही । पितृव्यः स्त्री सुतो भ्राता भगिनी चाविवाहिता ॥ एभिरत्र विपन्नैश्च प्रतिकूलं बुधैः स्मृतम् । अन्यैरपि विपन्नैस्तु केचिदूचुर्न तद्भवेत् ॥" सङ्कटे **मेधातिथिराह**—"वाग्दानानन्तरं यत्र कुलयोः कस्यचिन्मृतिः । तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत् ॥" **स्मृतिरत्नावल्याम्**—"पितुरब्दमशौचं स्यात्तदर्द्धं मातुरेव च । मासत्रयं तु भार्यायास्तदर्द्धं भ्रातृपुत्रयोः ॥ अन्येषां तु सपिण्डानामाशौचं मासमीरितम् । तदन्ते शान्तिकं कृत्वा ततो लग्नं विधीयते ॥" **ज्योतिष्प्रकाशे**—"प्रतिकूलेऽपि कर्तव्यो विवाहो मासतः परः । शान्तिं विधाय गां दत्त्वा वाग्दानादि चरेत्पुनः ॥" **शान्तिरत्ने विनायकशान्तिः** । तथा च **मेधातिथिः**—"सङ्कटे समनुप्राप्ते **याज्ञवल्क्येन** योगिना । शान्तिरुक्ता गणेशस्य कृत्वा तां शुभमाचरेत् ॥" **स्मृत्यन्तरे**—"प्रतिकूले न कर्तव्यो गच्छेद्यावदृतुत्रयम् । प्रतिकूलेऽपि कर्तव्यमित्याहुर्बहुविप्लवे ॥ प्रतिकूले सपिण्डस्य मासमेकं विवर्जयेत् ।" **ज्योतिःसागरेऽपि**—"दुर्भिक्षे राष्ट्रभङ्गे च पित्रोर्वा प्राणसंशये । प्रौढायामपि कन्यायां नानुकूल्यं प्रतीक्ष्यते ॥" **मेधातिथिः**—"पुरुषत्रयपर्यन्तं प्रतिकूलं स्वगोत्रिणाम् । प्रवेशनिर्गमस्तद्वत्तथा मुण्डन-

मण्डने ॥ प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियाम् । आचतुर्थं ततः पुंसि पञ्चमे शुभदं भवेत् ॥" मासिकविषये–**शाठ्यायनिः**–प्रेतश्राद्धानि सर्वाणि सपिण्डीकरणं तथा । अपकृष्यापि कुर्वीत कर्तुं नान्दीमुखं द्विजः ॥" वृद्ध्यभावे अपकर्षे दोषमाह**ोशनाः**–"वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत् । स श्राद्धी नरके घोरे पितृभिः सह मज्जति" इति । स्मृत्यन्तरे–"सपिण्डीकरणादर्वागपकृष्य कृतान्यपि । पुनरप्यपकृष्यन्ते वृद्ध्युत्तरनिषेधनात् ॥" विवाहदिनादारभ्य चतुर्थीपर्यन्तं मध्ये श्राद्धदिनं दर्शदिनं च नायाति । तादृशः कालो ग्राह्यः।तदुक्तं **ज्योतिर्निबन्धे**–"विवाहमारभ्य चतुर्थिमध्ये श्राद्धं दिनं दर्शदिनं यदि स्यात्। वैधव्यमाप्नोति तदाशु कन्या जीवेत्पतिश्चेदनपत्यता स्यात्।तथा विवाहमध्ये यदि चेत्क्षयाहस्तत्र स्वमुख्याः पितरो न यान्ति । वृत्ते विवाहे परतस्तु कुर्याच्छ्राद्धं स्वधाभिर्नतु दूषयेत्तम्" श्रुतावपि–"ये वै भद्रं दूषयन्ति स्वधाभिः" इति । **तिस्रो ब्राह्मणस्य वर्णानुपूर्व्येण**–ब्राह्मणस्य वर्णानुपूर्व्येण वर्णक्रमेण ब्राह्मणी क्षत्रिया वैश्येति तिस्रो भार्या भवन्ति । वर्णानुपूर्व्यग्रहणात् न व्युत्क्रमेण विवाहः । प्रथमा ब्राह्मणी । तत इतरे वर्णक्रमेण । **द्वे राजन्यस्य**–वर्णानुपूर्व्येण क्षत्रिया वैश्या चेति राजन्यस्य भार्ये भवतः । **एका वैशस्य**–सवर्णा एका वैशस्य भार्या भवति । **सर्वेषा ँ शूद्रामप्येके मन्त्रवर्जम्**–सर्वेषां ब्राह्मणादीनां शूद्रामप्येके भार्यामिच्छन्ति तस्यास्तु मन्त्रवर्जं विवाहकर्म भवति । एके पुनः शूद्रापरिणयनं नेच्छन्ति । न शूद्राया धर्मकार्येष्वधिकार इति–तथा च **यास्कः**–"रामा रमणाय विदन्ते न धर्माय" इति । अतः शूद्रापरिणयनं नेच्छन्ति रमणार्थमेव । **अथैनां वासः परिधापयति जरां गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपा वा । शतं च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वासः**–अथ वरो जरां गच्छेति मन्त्रेणैनां वधूं वासः परिधापयति । **भर्तृयज्ञ**मते तु आचार्यकर्तृकं परिधापनम् । अत्राचारादहतं वासो ग्राह्यम् । अहतलक्षणं **कश्यपेनोक्तम्** । "अहतं यन्त्रनिर्मुक्तं वासः प्रोक्तं स्वयम्भुवा । शस्तं तन्मङ्गले नूनं तावत्कालं न सर्वदा" इति । **मन्त्रार्थः** । हे कन्ये त्वं जरां निर्दुष्टवृद्धत्वं मया सह गच्छ प्राप्नुहि वासश्च मया सम्पादितम्, परिधेहि । आक्रुष्यन्ति कामादिभिरित्याकृष्टयो मनुष्याः तेषां मध्ये अभिशस्तिरभिशापः । "शसु प्रमादे" तस्मात्पातीत्यभिशस्तिपा वा भव । शतं च शरदो वर्षाणि जीव प्राणिहि । सुवर्चाः तेजस्विनी रायं च धनं पुत्रांश्च अनु पश्चात् संव्ययस्व अतिसुसंवृणीष्व उत्पाद्य राशिं कुरु ॥ हे आयुष्मति इदं वासः परिधत्स्वेत्यनुवादः । मन्त्र एवात्र कारितार्थे । **अथोत्तरीयं या अकृन्तन्नवयं या अतन्वत याश्च देवीस्तन्तूनभितो ततन्थ तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः**–या अकृन्तन्नित्यनेन मन्त्रेणोत्तरीयं परिधापयति वर एव तदप्यहतमेव । अत्रापि कारितार्थे मन्त्रः । **मन्त्रार्थः** । या देवीः देव्यः इदं वासः अकृन्तन् कर्त्तितवत्यः, या अवयन् वीतवत्यः । "वेञ् तन्तुसन्ताने" ओतवत्य इत्यर्थः । यास्तन्तून् सूत्राणि अतन्वत प्रोतवत्यः, तिर्यक् तन्तून्, विस्तारितवत्य इत्यर्थः । ताः तत्तचकाराद्या ओतान्प्रोतांश्च तन्तूनभित उभयपार्श्वयोरपि ततन्थ तेनुः, तुरीवेमादिव्यापारेण ग्रथितवत्यः । ताः तत्सामर्थ्यदाव्यो देव्यः स्वकार्यरूपवदिदं वासः त्वा त्वां जरसे दीर्घकालनिर्दुष्टजीवनाय संव्ययस्व परिधापयन्तु । पुरुषादिव्यत्ययश्छान्दसः । अतो हेतोः आयुष्मति इदम् एतादृशं वासः परिधत्स्व उत्तरीयत्वेन वृणीष्व । **अथैनौ समञ्जयति समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ सम्मातरिश्वा सन्धाता समुदेष्ट्री दधातु नौ**–कन्यापिता परस्परं समञ्जेथामिति अध्येषणेनैनौ वधूवरौ समञ्जयाति । समञ्जनं नाम सम्मुखीकरणं "परस्परं गात्रविश्लेषः" इति **भर्तृयज्ञः** । "परस्परानुलेपनम्" इति केचित् । सत्यपि कारितत्वे वरस्यैव मन्त्रो मन्त्रलिङ्गात् । कारयितृत्वं च सन्निधानात् कन्यापितुः सन्निहितो ह्यसौ प्रदातृत्वात् । "उभयोर्मन्त्रपाठः" इति **भर्तृयज्ञः** । **मन्त्रार्थः** । हे कन्यके नौ आवयोः हृदयानि मनांसि तन्निष्ठव्यापारान् सङ्कल्पविकल्पात्मकान् विश्वेदेवाः आपश्च समञ्जन्तु गुणातिशयाधानेन संस्कुर्वन्तु । तथा सम्यग्भूतो मातरिश्वा अनुकूलो वायुः, तथा अनुकूलः प्रजापतिः देष्ट्री धर्मोपदेष्ट्री देवता आवयोर्हृदयानि सन्दधातु । उ अप्यर्थे । **पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामति यदैषि मनसा दूरं दिशोऽनु पवमानो वा हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्वित्यसाविति**–समञ्जनोत्तरं कन्यायाः । पित्रा दत्तां कन्यामादाय वरः प्रतिग्रहविधिना प्रतिगृह्य वस्त्रान्ते गृहीत्वा "यदैषि मनसा दूरम्" इत्यनेन मन्त्रेण निष्क्रामति गृहमध्याद्बहिःशालायां स्थापितमग्निं प्रतिगच्छाति । असावित्यत्र सम्बुद्ध्यन्तं कन्यानामग्रहणम् । अत्र कर्कभाष्यम् । आदाय गृहीत्वेति चोभयं न वक्तव्यम् । उच्यते च तत्किमर्थमप्रतिग्रहस्यापि

प्रतिग्रहविधिना दानं यथा स्यादिति । अयमर्थः । अप्रतिग्रहस्यापि कन्याद्रव्यस्य प्रतिग्रहविधिना आदानं प्रतिग्रहो यथा स्यादित्येतदर्थमुभयग्रहणम् । ननु "कन्यां दद्यात्कन्यां प्रतिगृह्य" इति स्मरणात् । कथमप्रतिग्रहयोग्यं कन्याद्रव्यमित्युच्यते । सत्यम् । उच्यते स्वत्वत्यागपूर्वकं हि परस्वत्वापादानं दानम् । नच कन्या कथञ्चिदप्यस्वकन्या कर्तुं शक्यते नापि परस्य कन्या भवति विवाहोत्तरमपि ममेयं कन्येत्याभिधानादत्र गौणो ददातिः । यत्तु स्मृतिषु पुत्रदानं चोद्यते तत्रापि गौणो ददातिः । पितुरिव परस्यापि पिण्डदानं रिक्थभाक्त्वं च भवतीत्यर्थः । षष्ठाध्यायस्य सप्तमे पद्दे **आद्याधिकरणे** अयमर्थस्तन्त्ररत्ने । यद्वा—"अप्रतिग्रहयोग्यस्य प्रतिग्रहविधानतः । क्षत्रियादेर्यथादानं स्यादादायेति सूत्रितम्" इति रेणुः । मन्त्रार्थः । हे कन्यके यत् एषि गच्छसि मनसा चित्तेन दूरं दूरदेशं दिशः ककुभः अनुलक्ष्यीकृत्य पवमान इव वायुवत् चित्तस्य वायुवच्चञ्चलत्वात् । ततः पवमानो वायुः हिरण्यपर्णः सुवर्णपक्षः विकर्णापत्यं गरुत्मान् त्वा त्वां मन्मनसां मद्गतचित्तां करोतु । समायत्तां मय्यनुरागिणीं विदधातु । दातृक्रममाह **याज्ञवल्क्यः**—"पिता पितामहो भ्राता सकुल्यो जननी तथा । कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥ अप्रयच्छन्समप्नोति भ्रूणहत्यामृतावृतौ । गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरम्" इति । " सकुल्यः प्रत्यासत्तिक्रमेणादौ पितृकुलस्थस्तदभावे मातामहकुलस्थः सर्वाभावे जननी" इति **प्रयोगरत्ने** । प्रकृतिस्थ उन्माददोषरहितः । गम्यं गमनार्हं लावण्यादिगुणयुक्तम् । **नारदोऽपि** । "पिता दद्यात्स्वयं कन्यां भ्राता वाऽनुमते पितुः । मातामहो मातुलश्च सकुल्यो बान्धवस्तथा । माता त्वभावे सर्वेषां प्रकृतौ यदि वर्त्तते । तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः ॥ यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत् ।' अत्र प्रकृतिस्थग्रहणादप्रकृतिस्थेन यत्कृतं तदकृतमेव । तथाचापरार्के नारदवचनम् । "स्वतन्त्रो यदि तत्त्वार्थं कुर्यादप्रकृतिं गतः । तदप्यकृतमेव स्यादस्वातन्त्र्यस्य हेतुतः" इति । यदि तु सप्तपदीविवाहहोमादि प्रधानं जातं तदाङ्गवैकल्येऽपि नावृत्तिर्विवाहस्येति **दाक्षिणात्यगौडग्रन्थेषु** । विवाहश्च कन्यास्वीकारोऽन्यदङ्गम् इति **स्मृत्यर्थसारे** । **अथैनौ समीक्षयत्यघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः । वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः सोमोऽददद्गन्धर्वाय, गन्धर्वोऽददद्ग्नये रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम्, सा नः पूषा शिवतमामैरय सा न ऊरू उशती विहर यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्टया इति**—अथ निष्क्रमणोत्तरं कारितोपदेशात् कन्यापिता परस्परं समञ्जथामित्यध्येयंणेन समीक्षणं कारयति । ततस्तौ वधूवरौ परस्परं समीक्षणं कुरुतः । लिङ्गाद्वरः समीक्षमाणां कन्यां समीक्षमाणः "अघोरचक्षुः" इत्येतांश्चतुरो मन्त्रान्पठति । मन्त्रार्थः । हे कन्ये त्वम् अघोरचक्षुः सौम्यदृष्टिरपापदृष्टिर्वा एधि भव । तथा अपतिघ्नी अकार्यकरणेन पत्यर्थघातिनी तथा मा भव । तथा पशुभ्यः पशुवदाश्रितेभ्यः शिवा हितैषिणी च भव, सुमनाः प्रसन्नचित्ता सुवर्चाः सुप्रभावयुक्ता वीरसूः सत्पुत्रजननी देवकामा देवानग्न्यादीन् काम्यते स्योना सुखवती नोऽस्माकं शं सुखहेतुः द्विपदे मनुष्यवर्गाय चतुष्पदे पशुवर्गाय शं सुखहेतुर्भव ॥ १ ॥ हे कन्ये ते त्वां सोमश्चन्द्रः ते तव प्रथम आद्यः पतिः विविदे जन्मदिने लब्धवान् । "विद्लृ लाभे" । ततः सार्द्धवर्षद्वयानन्तरं गन्धर्वः सूर्यो विविदे उत्तरः तद्वद् द्वितीयोऽयं पतिः । ततोऽग्निरपि तावता कालेन विविदे । अतोऽयं तव तृतीयः पतिः । यथाऽऽहुः—"पूर्वं स्त्रियः स्युर्भुक्ताश्च सोमगन्धर्ववन्हिभिः" इति । तथा ते तव तुरीयश्चतुर्थः मनुष्यजाः मानुषः अहमेवेत्यर्थः ॥ २ ॥ किमिदानीं चतुर्णासपीयं पत्नी नेत्याह—सोमश्चन्द्रस्त्रिंशन्मासान्भुक्त्वा गन्धर्वः सूर्यस्तस्मै अददद्ददौ सोऽपि तावत्कालं भुक्त्वा अग्नयेऽददत् स चाग्निर्मह्यमिमामदात् दत्तवान् । न केवलमिमां किन्तु पुत्रान् सुतान् रयिं धनं च । चकाराद्धर्मादि च, अदादिति सम्बन्धः । या सर्वलोकसाक्षिणी पूषा देवता सा इमां शिवतमां कल्याणगुणशीलां कृत्वा नो—ऽस्मान्प्रति ऐरय ईरयतु । आटो दर्शनं विभक्तेरदर्शनं च छान्दसम् । अस्मास्वनुरक्तं करोत्वित्यर्थः । सा चास्मत्तः सुखं पुत्रांश्च कामयमाना ऊरू सक्थिनी जानुनोरूर्ध्वभागदण्डौ विहरताम् विवृणोतु प्रसारयत्वित्यर्थः । मध्यमपुरुषश्छान्दसः । प्रयोजनमाह—यस्यां स्त्रीयोनौ उशन्तः सुखमिच्छन्तः शेपं शिश्नं प्रहराम प्रवेशयाम वयम्, यस्यां कन्यायाम्, उ एवार्थे । यस्यामेव बहवः कामाः धर्मपुत्ररतिसुखरूपाः सन्तु वा । किमर्थम्, निविष्टयै अग्निहोत्राद्युपासनयाऽन्तःकरणशुद्धिद्वारा सायुज्यमुक्तये ॥ इति श्रीत्रिराग्निचित्सम्राट्स्थपति—श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यभाष्ये प्रथमकाण्डे चतुर्थी कण्डिका ॥ ४ ॥ * ॥

विश्व०–पाकयज्ञानाह **चत्वारः पाकयज्ञाः**—चत्वारः चतुर्विधाः । पाकः अग्निस्तद्वन्तो यज्ञाः । तथाच साग्नेश्चतुष्प्रकाराः पाकयज्ञा भवन्तीत्यर्थः । तान्प्रकारानाह **हुतो……इति**—हुतः सायंप्रातःक्रियमाणोऽक्षतहोमः होममान्त्रात्मकः । अहुतः स्रस्तरारोहणादिः होमबलिप्राशनैर्वर्जितः । प्रहुतः पक्षाद्यादिः, होमबलिप्राशनान्वितः । प्राशितः सर्वासां पयसि पायसं श्रपयित्वा ब्राह्मणान्भोजयेदित्यादिः केवलं प्राशनात्मकः । अपरे तु प्रत्यहमभ्यस्यमानान् व्रह्मयज्ञव्यतिरिक्तान्महायज्ञानेव पाकयज्ञानाहुः । सूत्रार्थस्तु "हुत" इत्यादिसूत्राच्चतुःसंख्यालाभेऽपि सायंप्रातरभ्यासादिना द्विगुणसंख्याप्रसक्तिमपवदितुं **चत्वार** इति पदम् । तथाच "चत्वारः पाकयज्ञाः" इति सिद्धे हुत इत्यादिसूत्रं पक्षाद्यादिसंग्रहार्थम् । तथाच **कारिकायाम्**—"चत्वारः पाकयज्ञाः स्युर्ब्रह्मयज्ञश्च पञ्चमः । एते पञ्चमहायज्ञाः प्रत्यहं सूतकादृते ॥ जनादिवादात्सिद्धेपि चत्वार इति सूत्रितम् । चतुर्णां सायमभ्यास आद्ये श्राद्धं च तत्सकृत् ॥ अभ्यासा वैश्वदेवे च पूर्वस्यैव हि कर्मणः । अतश्चत्वार एवैते नाष्टौ स्युः कालभेदतः" **पञ्चसु बहिःशालायां विवाहे चूडाकरण उपनयने केशान्ते सीमन्तोन्नयने**–पञ्चसु संस्कारकर्मसु वहिःशालायां शालाया बहिः मण्डप इति यावत् । तथा च विवाहादिकर्मपञ्चकं मण्डपे भवतीत्यर्थः । पूर्वं परिभाषासूत्रे पञ्च संकारा भुवः उक्ताः । अधुना लौकिकाग्निसाध्ये विवाहादौ तेषामपवादमाह—**उपलि……माधाय**–लौकिकाग्निसाध्यं विवाहादिक्रियाकलापं कुर्यादिति शेषः । **निर्मन्थ्यमेके विवाहे**–एके आचार्या विवाहे निर्मन्थ्यमारणेयमग्निमिच्छन्ति । एतच्च कृताधानस्य भार्यायां विद्यमानायां द्वितीयापरिणयनविषयम् । तदुक्तं—"भार्यायां विद्यमानायां द्वितीयामुद्वहेद्यदि । तदा वैवाहिकं कर्म कुर्यादावसथ्येऽग्निमान् ॥" अन्ये तु विवाहमात्रविषयमेतदाहुः । विवाहकालमाह **उदग……गृह्णीयात्**—उत्तरायणे शुक्लपक्षे पुण्याहे कुमार्याः अनन्यपूर्विकायाः पाणिं गृह्णीयादित्यर्थः । स्वगृह्योक्तविधिनेति शेषः । नक्षत्रविशेषानाह—**त्रिषु…… हिण्यां वा**—उत्तरा आदिर्येषां तानि उत्तरादीनि तेषु । एकं त्रित्वमुत्तरायामन्वेति । अपरं त्रित्वं तदादिषु । तथाचोत्तरात्रयं येषां नक्षत्राणामादिभूतं तन्त्रिकं ग्राह्यमित्यर्थः । तथाहि । उत्तराहस्ताचित्राः, उत्तराश्रवणधनिष्ठाः, उत्तरारेवत्यश्विन्यः । **स्वातौ……हिण्यां वा**–वाशब्दोऽवधारणे । एष्वन्यतमस्मिन्विवाहं कुर्यादित्यर्थः । यद्वा वाशब्दः चकारार्थः । चशब्दश्च ज्योतिःशास्त्राद्युपात्तनक्षत्रसमुच्चयार्थः । वैवाह्याः स्त्रीराह **तिस्रो……श्यस्य**–वर्णानुपूर्व्येण वर्णक्रमेण ब्राह्मणस्य तिस्रः, ब्राह्मणी क्षत्रिया वैश्या च भार्या भवन्ति । एवं द्वे राजन्यस्य, क्षत्रिया वैश्या च । एका वैश्या समानवर्णैव वैश्यस्य । **सर्वेषाꣳ……वर्जं**–चतुर्णामपि वर्णानामेके शूद्रापरिणयनमिच्छन्ति । अपरे नेच्छन्ति । अन्यवर्णासमुच्चयार्थोऽपिशब्दः । इदानीं प्रकृतमाह—**अथैनां……वास इति**–अत्रायमथशब्दः कौतुकागारप्रवेशाद्यानन्तर्यवाचकः । एनां कुमारीं वासः परिधापयति परिहितं कारयाति । केन मन्त्रेणेत्यत उक्तं **जरां गच्छ**–इत्यादि । इतिशब्दो मन्त्रसमाप्तिद्योतकः । **अथोत्तरी……वास इति**–अथ अन्तरीयपरिधानानन्तरमुत्तरीयं परिधापयति । **या अकृन्तन्निति** मन्त्रेणेत्यर्थः । अत्र परिधापयिता वर एव । **अथैनौ……धातु नाविति**–अथ वस्त्रपरिधानानन्तरं एनौ कन्यावरौ आचार्यः समञ्जयाति परस्परं समञ्जेथामिति प्रैषपूर्वम् । तत्र मन्त्रमाह–**समञ्जन्त्वि**त्यादि । इतिशब्दः मन्त्रसमाप्त्यर्थे । ततः कङ्कणबन्धनं परस्परम् । **पित्रा प्रत्ता……त्यसाविति**–नाम गृह्णाति । पित्रा जनकेन, उपलक्षणमेतत् । पितुरभावे पितामहादिस्मृत्युक्तदानाधिकारिणा प्रत्तां कन्यादानकाले दत्ताम् । केचिदमुमेव कन्यादानावसरमाहुः । आदाय प्रतिगृह्य गृहीत्वा वरः स्वदक्षिणहस्तेन कन्यादक्षिणहस्तं गृहीत्वा निष्क्रामति चतुरिकायां गन्तुं कौतुकागारान्निर्गच्छति । केन मन्त्रेणेत्यत उक्तं **यदैषी**त्यादि । असौस्थाने कन्यानामग्रहणम् । अमुकि देविदेत्येवं प्रयोगः । **अथैनो……निविष्ट्या इति**–अथ निष्क्रमणानन्तरमेनौ कन्यावरौ आचार्यः समीक्षयति समीक्षणं कारयति परस्परं समीक्षेथामिति प्रैषपूर्वम् । केनेत्यत उक्तम् **अघोरचक्षुरिति** । तथा च "अघोरचक्षुरित्यारभ्य यस्यामु कामा वहवो निविष्ट्यै" इत्यन्तेन सौत्रमन्त्रसमुदायेन वरः कन्यामीक्षत इत्यर्थः ॥ इति चतुर्थी कण्डिका ॥ ४ ॥

प्रदक्षिणमग्निं पर्याणीयैके ॥१॥ पश्चादग्नेस्तेजनीं कटं वा दक्षिणपादेन प्रवृत्योपविशति ॥ २ ॥ अन्वारब्ध आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यꣳ स्विष्टकृच्च ॥ ३ ॥ एतन्नित्यꣳ सर्वत्र ॥ ४ ॥ प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः ॥ ५ ॥ सर्व*प्रायश्चित्तप्राजापत्यान्तरमेतदावापस्थानं विवाहे ॥ ६ ॥ राष्ट्रभृत इच्छञ्जयाभ्यातानांश्च जानन् ॥ ७ ॥ येन + कर्मणेच्छैंदितिवचनात् ॥८॥ चित्तं

---

* सर्वप्रायश्चित्तम् पा० । + कर्मणेत्सैंदिति कर्मणेच्छैंदीति च पाठान्तरम् ।

च चित्तिश्चाकूतं चाकूतिश्च विज्ञातं च विज्ञातिश्च मनश्च शक्करीश्च दर्शश्च पौर्णमासं च बृहच्च रथन्तरं च। प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतना जयेषु। तस्मै विशः समनमन्त सर्वाः स उग्रः स इहव्यो बभूव स्वाहेति ॥ ९ ॥ अग्निर्भूतानामधिपतिः स मावत्विन्द्रो ज्येष्ठानां यमः पृथिव्या वायुरन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो मित्रः सत्यानां वरुणोऽपाꣳ समुद्रः स्रोत्यानामन्नꣳ साम्राज्यानामधिपति तन्मावतु सोम ओषधीनाꣳ सविता प्रसवानाꣳ रुद्रः पशूनां त्वष्टा रूपाणां विष्णुः पर्वतानां मरुतो गणानामधिपतयस्ते मावन्तु पितरः पितामहाः परेवरे ततास्ततामहाः। इह मावन्त्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहेति सर्वत्रानुषजति ॥ १० ॥ अग्निरैतु प्रथमो देवतानाꣳ सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात्। तदयꣳ राजा वरुणोऽनुमन्यतां यथेयꣳ स्त्री पौत्रमघं न रोदात्स्वाहा। इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियꣳ स्वाहा। स्वस्ति नो अग्ने दिव आपृथिव्या विश्वानि धेह्ययथा यजत्र। यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रꣳ स्वाहा। *सुगन्तु पन्थां प्रदिशन्न एहि ज्योतिष्मध्ये ह्यजरन्न आयुः। अपैतु मृत्युरमृतं न*आगाद्वैवस्वतो नोऽअभयं कृणोतु स्वाहेति॥११॥ परं मृत्यविति चैके प्राशनान्ते ॥ ॥ १२ ॥ ॥ ५ ॥ ॥ * ॥

कर्कः—***प्रदक्षिणमग्निं पर्याणीयैके**—एके आचार्याः प्रदक्षिणमग्निमानीय कन्यावासःपरिधानादि कुर्वन्ति। एवमपि हि स्मरणमिति। अतश्च विकल्पः। **पश्चादग्नेस्तेजनीं कटं वा दक्षिणपादेन प्रवृत्योपविशति**—कटः प्रसिद्ध एव। तेजनी तृणपुलकः। तयोरन्यतरं दक्षिणपादेन परिक्रम्योपविशति। अत्रोपकल्पनीयानि। शमीपलाशमिश्रा लाजाः रोहितानुडुहं चर्म दृषदुपलं च उदकुम्भः शूर्पं च। **अन्वारब्ध आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यꣳ स्विष्टकृच्चैतन्नित्यꣳ सर्वत्र**—आघारौ पूर्व उत्तरश्च। उत्तराघारे प्रतिनिगद्य होममात्रम्। नह्यत्र मन्त्रोऽस्ति। आज्यभागौ एक आग्नेयः, अपरः सौम्यः। भूर्भुवः स्वरित्येता महाव्याहृतयः। त्वन्नोऽअग्ने इति चैवमादि सर्वप्रायश्चित्तम्। प्राजापत्यं प्रजापतिदेवत्यो होमः। स्विष्टकृत्। अग्नये स्विष्टकृते स्वाहेति वक्ष्यत्युपरिष्टात्। एतच्चतुर्दशाहुतिकं नित्यं सर्वकर्मसु भवति। यत्र यत्र होमोऽस्ति। यथा "घृताक्तानि कुशेण्ड्वानि जुहुयात्"इति। यत्र पुनर्होम एव नास्ति। यथा स्त्रस्तरारोहणे लाङ्गलयोजने च तत्रैतन्न भवति। **प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः**—यत्राज्यव्यतिरिक्तमन्यदपि हविर्भवति तत्र महाव्याहृतिहोमात्प्राक् स्विष्टकृद्धोमः। यथा पक्षादाविति। **सर्वप्रायश्चित्तप्राजापत्यान्तरमेतदावापस्थानं विवाहे**—आगन्तुकत्वादन्ते

---

* सुगन्नः। * म्म इति पाठान्तरम्। * इतरथाव्रति निवृत्यर्थम्।

निवेशो माभूदिति सूत्रमारब्धम् । राष्ट्रभृत इच्छन्-विवाह एव जुहोति। जयाभ्यातानाँश्च जानन्-चित्तञ्च चित्तिश्चेत्येवमादि प्रजापतिर्जयानिन्द्रायेत्येवमन्ता जया मन्त्रलिङ्गात् ! शेषा अभ्याताना मन्त्राः। एताँश्च इच्छन्नेव जुहोति। जानन्शब्दो विकल्पार्थः। चशब्दो राष्ट्रभृद्भिः सन्नियोगार्थः। चित्तञ्च चित्तिश्चेत्यत्र केचिच्चतुर्थ्यन्तेन प्रयोगमिच्छन्ति। तदयुक्तम् । नह्येतानि देवतापदानि किन्तर्हि मन्त्रा एव ॥ मन्त्राणां च यथाऽऽम्नातानामेव प्रयोग इष्यते इति । जयाभ्यातानांश्चेच्छया जुहोतीति कुत एतत् । येन कर्मणेर्त्सेदिति वचनात्—येन कर्मणा ऋद्धिमिच्छेत्तत्र जयान् जुहोतीति वचनं भवति । अतश्चान्यत्रापि ऋद्धिमिच्छता जयाहोमः कर्तव्य इति गम्यते । अग्निर्भूतानामित्येवमादिष्वधिपतिः स माऽवत्विति सर्वत्रानुषङ्गः। एवमेव स्मर्यत इति। एवं च सति अत्र ९ साम्राज्यानां मरुतो गणनामिति च विशेषेणैव पाठः। पितरः पितामहा इत्येवमादि परं मृत्यविति चैक इति यावत्सूत्रम्। एतैश्च मन्त्रैर्होमः कर्तव्य इति। एके प्राशनान्ते परं मृत्यविति जुह्वति। एवमपि हि स्मर्यत इति ॥ ॥ * ॥ ॥ ९ ॥॥ * ॥ ॥ * ॥ ॥ * ॥

जयरामः—प्रदक्षिणमग्निम्--अग्निं प्रदक्षिणं कृत्वाऽऽनीय कन्यावासःपरिधापनादि कुर्वन्त्येक आचार्याः एके नेति विकल्पः। अग्नेः पश्चात्तेजनीं तृणपुलकम्, कटं वा प्रसिद्धम्, तयोरन्यतरद्दक्षिणपादेन प्रवृत्य आक्रम्य तदुपरि पादं कृत्वेति यावत्, उपविशति वरः अन्वारब्धो ब्रह्मणा संस्पृष्टः। आघारौ पूर्वोत्तरौ उत्तराघारे प्रतिनिगद्य होमत्वम्, नह्यत्र मन्त्रोऽस्ति। आज्यभागौ आग्नेयसौम्यौ महाव्याहृतयस्तिस्रो भूर्भुवः स्वरिति। **"त्वन्नो अग्ने"** इत्यादिमन्त्रपञ्चकं सर्वप्रायश्चित्तं प्राजापत्यं प्रजापतिदेवत्यो होमः। स्विष्टकृत् अग्नये स्विष्टकृते स्वाहेत्युपरिष्टाद्वक्ष्यति। एतच्चतुर्दशाहुतिकं नित्यं सर्वकर्मसु भवति। यत्र यत्र होमोऽस्ति। यथा "घृताक्तानि कुशेण्ड्वानि जुहुयात्" इति। यत्र पुनः स्रस्तरारोहणलाङ्गलयोजनादौ होमो नास्ति तत्रैतन्न भवति। **प्राङ्महाव्याहृतिभ्य इति**—यत्राज्यव्यतिरिक्तमन्यद्धविर्भवति पक्षादाविव तत्र महाव्याहृतिहोमात्प्राक् स्विष्टकृद्धोमः, अन्यत्र सर्वाहुत्यन्ते। सर्वप्रायश्चित्तेति सूत्रारम्भो राष्ट्रभृदादीनामागन्तुकत्वादन्ते निवेशो मा भूदिति तेन सर्वप्रायश्चित्तं " त्वन्नो अग्ने " इत्यादिमन्त्रपञ्चकं प्राजापत्यं तद्देवत्यो होमः। तयोरन्तरं मध्यं वक्ष्यमाणहोमस्य स्थानं विवाहे एव दर्शितम्। राष्ट्रभृतः " ऋताषाड् " इत्यादिद्वादशमन्त्रानिच्छन्नपि विवाहे एव जुहोति। जयाभ्यातानाँश्च मन्त्रलिङ्गाच्चित्तञ्च चित्तिश्चेत्यादि प्रजापतिर्जयानिन्द्रायेत्येव मन्त्रा जयामन्त्राः। शेषा अग्निर्भूतानामित्यादयोऽभ्यातानसञ्ज्ञाः। ते च ते च ताँश्चेच्छन्नपि विवाहे एव जुहोति। "जानन्" शब्दो विकल्पार्थः। चशब्दो राष्ट्रभृद्भिः सन्नियोगार्थः। जयाभ्यातानान् स्वेच्छया जुहोतीति। कुतः येन कर्मणा ईर्त्सेत् ऋद्धिमिच्छेत्तत्र जयान् जुहुयादिति वचनमस्ति। ततश्चान्यत्रापि ऋद्धिमिच्छता जयाहोमः कार्य इति गम्यते। **चित्तञ्चेति**--अत्र केचिच्चतुर्थ्यन्तेन प्रयोगमिच्छन्ति तदयुक्तम्, नह्येतानि देवतापदानि किन्तु मन्त्रा एव, मन्त्राणां च यथाम्नातानामेव प्रयोग इष्यते इति। स्वाहाकारस्त्वन्ते भवत्येव। " स्वाहाकारप्रदानाः " इति **श्रुतेः**। त्यागे तु भवत्येव चतुर्थ्यन्तम् अमन्त्रत्वात्त्यागस्य। अथ मन्त्रार्थः। चित्तमित्यादिद्वादशमन्त्राणां परमेष्ठी॰यजुः॰ लिङ्गोक्ता॰ जयाहोमे॰। चित्तञ्चेति प्रजापतिर्यथेन्द्राय जयान् प्रायच्छत्। चकारोऽप्यर्थः। तथा चित्तादि च मह्यमपि प्रयच्छत्विति क्रियां विपरिणमय्योत्तरत्र सम्बन्धः। तस्मै च सुहुतमस्तु। तत्र चित्तं ज्ञानाधारं हृदयम्। चित्तिस्तत्रत्या चेतना। आकूतञ्चाभिमतम्। आकूतिश्चाभिमानः। यद्वा चित्तं ज्ञानेन्द्रियम्। जातावेकवचनम्। चित्ति-

स्तद्देवता । आकूतङ्कर्मेन्द्रियम् । आकूतिस्तद्देवता । विज्ञातं शिल्पादिज्ञानम् । विज्ञातिमपरोक्षम् । मनः प्रसिद्धम् । शक्करीः शक्र्यः तच्छक्तयः । दर्शपूर्णमासौ तद्देवते । बृहद्रथन्तरे सामनी तद्देवते वा । प्रथममन्त्रोक्तवाक्यार्थः सर्वत्र सम्बध्यते । **प्रजापतिरिति**–परमेष्ठी०त्रिष्टुप्० इन्द्रो०जयाहोमे० । प्रजापतिः परमेश्वरः । जयन्ति शत्रूनिति जयान् मन्त्रानिन्द्राय प्रायच्छद्ददौ किमर्थम् वृष्णे अभिमतार्थवर्षणाय । इन्द्रविशेषणं वा । ततः स इन्द्रः पृतनाजयेषु सेनाविजयाख्यकर्मसु उग्रः प्रचण्डो बभूव । किञ्च ततस्तस्मै इन्द्राय सर्वा विशः प्रजाः समनमन्त सम्यक् नेमुः । स इ इश्चार्थे स चेन्द्रो हव्यः हवनीय इज्य इति यावत् बभूव । स्वाहा । तस्मै सुहुतमस्तु । तथा च **तैत्तिरीया** श्रुतिः । "स इन्द्रः प्रजापतिमुपाधावत्तस्मा एतान् जयान् प्रायच्छत् तान् अजुहोत् । ततो देवा असुरान् अजयन्त यदजयँस्तज्जयानां जयत्वम्" इति । **अग्निर्भूतानामिति**-एवमादिष्वधिपतिः स माऽवत्विति सर्वत्रानुषङ्गः । अस्मिन्ब्रह्मन्नित्यादेश्च एवमेव स्मर्यत इति एवं च सत्यन्नःसाम्राज्यानामधिपति मरुतो गणानामधिपतय इति च विशेषणैरेव पाठः । अग्निर्भूतानामित्यष्टादश मन्त्रा अभ्यातानसञ्ज्ञाः । तथा च श्रुतिः । "यद्देवा अभ्यातानैरसुरान् अभ्यातन्वत तदभ्यातानानामभ्यातानत्वम्" इति । अभ्यातन्वत आयुधानि प्राहिण्वत । अथ मन्त्रार्थः । तत्राग्निरित्यष्टादशानां प्रजापतिः० पङ्क्तिलिङ्गोक्ता०अभ्यातानहोमे० । अग्निः प्रजापतिः भूतानां स्थावरादीनामधिपतिरीशः स मा माम् अवतु पातु । क अस्मिन् ब्रह्मन् ब्रह्मणि लुप्तसप्तम्यन्तं ह्येतत् । अस्मिन्ब्रह्मकर्मणि होमादौ पुनरस्मिन्क्षत्रे क्षत्रकर्मणि प्रजापालनादौ पुनरस्यामाशिषि ब्राह्मणैः सम्पादितेष्टाशंसने । पुत्रादिसुखकामनायां वा । कुत्र अस्यां कन्यायाम् । किम्भूतायाम् पुरोधायां पुरः स्थितायाम् । अस्मिन्कर्मणि विवाहे अस्यां देवहूत्याम् देवताह्वाने देवतोद्देशेन होमे वा स्वाहा सुहुतमस्तु । अयं च वक्यार्थ उपरिष्टादपि सप्तदशसु सम्बध्यते । शिष्टं स्पष्टम् । ततो अग्निरैतवित्यादि परं मृत्यवित्यन्तैश्च मन्त्रैर्होमः कार्यः । अथ मन्त्रार्थः । तत्र चतुर्णां प्रजापति० त्रिष्टुप् लिङ्गोक्ता० आज्यहोमे० । अग्निः ऐतु आ एतु आगच्छतु । किम्भूतः देवतानां यज्ञभुजाम् प्रथम आद्यः प्रधानत्वात् । स चाग्निः अस्यै अस्याः कन्यायाः प्रजाम् भाविपुत्रादिरूपां मुञ्चतु मोचयतु कुतः मृत्युपाशात् । यद्वा मृत्युपाशान् अत्ति भस्मीकरोतीति मृत्युपाशात् । अस्यै कन्यायै प्रजाम् मुञ्चतु ददातु । तच्च प्रजामोचनम् राजा वरुणोऽनुमन्यताम् अनुजानातु । यथा येनानुज्ञानेन प्रकारेण च इयं कन्या पौत्रं पुत्रभवम् अघं दुःखं न रोदात् न रोदिति । अस्यै अस्याः प्रजाः दीर्घमायुः निर्दुष्टबहुकालजीवनं नयतु प्रापयतु । इयं च अशून्योपस्था सफलप्रसवा अवन्ध्यात्वायेति यावत् अवन्ध्योत्सङ्गा वा अस्तु भवतु । जीवतामेव दीर्घायुषाम् माता चास्तु जीवपुत्रा भवत्वित्यर्थः । किञ्च पौत्रं पुत्रसम्बन्धजम् आनन्दं सुखसन्दोहम् अभि अधिगम्य आभिमुख्येन सर्वभावेन वा प्राप्य विविधं बुध्यताम् जानातु सर्वज्ञाऽस्त्वित्यर्थः । यद्वा पौत्रमानन्दं प्राप्य विशिष्टतया बुध्यतां निद्रासुखापेक्षां त्यत्क्वा जागर्त्विति । हे अग्ने यजन्तं त्रायत इति हे यजत्र यस्मात्त्वं सर्वप्रत्यक् अतो नोऽस्माकं विश्वानि सर्वाणि कर्माणि अयथा अन्यथा वा कृतानि प्रतिषिद्धत्वेन प्रतिकूलानि वा तानि स्वस्ति यथा स्यात्तथा धेहि अनुकूलानि कृत्वा स्थापय । किञ्च दिव आ स्वर्गमभिव्याप्य आपृथिव्याः पृथिवीमभिव्याप्य च यन्महि महिमा तमस्मासु धेहि स्थापय । किञ्च अस्यां पृथिव्यां जातं यत् द्रविणं वसु चित्रं नानारूपं स्वर्णरत्नादिभेदेन प्रशस्तं पवित्रं यच्च दिवि स्वर्गे अमृतादि तदप्यस्मासु धेहि । हे अग्ने नोऽस्मान् एहि आगच्छ । अस्मद्गृहानागत्य नोऽस्माकं सुगं पन्थां पन्थानम् अर्चिरादिमार्गं प्रदिशन् उपदिशन् सम्पादयन्निति यावत् । आयुः निर्दुष्टजीवनं धेहि देहि । किम्भूतम् अजरं जरारोगादिपराभवरहितम्, अजरम् इत्यग्निविशेषणं वा आयुः पुष्यन्नित्यर्थः । पुनः किम्भूतम्, ज्योतिष्मत् प्रकाशकम्, ऊर्जस्करमित्यर्थः । तत्प्रतिबन्धको मृत्युरपि नोऽस्माकं भवत्प्रसादात्परैतु अपगच्छतु । अमृतम् आनन्दं च नोऽस्मान् आगात्

आगच्छतु । वैवस्वतो यमश्च नोऽस्माकम् अभयं त्वत्सम्बन्धेन पापाभावाद्दुःखहेतुभयाभावं कृणोतु करोतु । परम्मृत्यविति च जुहोति । एके परं मृत्यविति प्राशनान्ते जुह्वति तेन विकल्पः । तत्र सङ्कसुकः० त्रिष्टुप्० मृत्युः० आज्यहोमे विनियोगः ॥ ९ ॥ ॥ * ॥

हरि०—**प्रदक्षिणमग्निं पर्याणीयैके**—एके आचार्याः अग्नेः प्रदक्षिणं कारयित्वा वासःपरिधानं समञ्जनं समीक्षणं च मन्यन्ते एके न मन्यन्ते ततो विकल्पः । **पश्चादग्नेस्तेजनीं कटं वा दक्षिणपादेन प्रवृत्त्योपविशति**--समीक्षणानन्तरमग्निं प्रदक्षिणीकृत्याग्नेः पश्चिमतः प्राङ्मुख उपविशति दक्षिणतो वरस्य वधूः किं कृत्वा दक्षिणपादेन तेजनीं तृणपूलिकां कटं वा तृणमयं स्स्तरं प्रवृत्य प्रक्रम्य उल्लङ्घ्येत्यर्थः । दक्षिणपादेनोल्लङ्घयन् चलन् चलित्वा उभयोः संस्कार्यत्वात्सवधूकः । **अन्वारब्ध आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यꣳ स्विष्टकृच्चैतन्नित्यꣳ सर्वत्र**—अत्र वैवाहिकहोमप्रसङ्गेन सर्वकर्मसाधारणीं परिभाषां करोत्याचार्यः । तद्यथा—ब्रह्मणा दक्षिणबाहौ दक्षिणहस्तेन अन्वारब्धे कर्तरि आघारसञ्ज्ञके आज्याहुती यथा मनसा प्रजापतये स्वाहा इदं प्रजापतये मनसा । त्यागमपि इन्द्राय स्वाहा इदमिन्द्राय । आज्यभागौ आज्यभागसञ्ज्ञकौ होमौ यथा अग्नये स्वाहा इदमग्नये । सोमाय स्वाहा इदं सोमाय । महाव्याहृतयः भूराद्यास्तिस्रः यथा ॐ भूः स्वाहा इदमग्न० । इदं भूः इति वा त्यागः । तथैव ॐ भुवः स्वाहा इदं वाय० इदं भुव इति वा । ॐ स्वः स्वाहा इदं सूर्याय० । इदं स्वरिति वा । सर्वप्रायश्चित्तसञ्ज्ञकाः पञ्चाहुतयः । यथा त्वन्नो अग्न इत्यादि प्रमुमुग्ध्यस्मत्स्वाहा । सत्वन्नो अग्ने० सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां० । द्वाभ्यां त्यागः । अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि । अयानो यज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा इदमग्नये अयसे० । ये ते शतं वरुण ये सहस्रं यज्ञिकाः पाशा वितता महान्तः । तेभिर्नो अद्य सवितोऽत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम । "उदुत्तमम्" इत्यादि अदितये स्याम स्वाहा इदं वरुणाय० । प्राजापत्यं प्रजापतिदेवताको होमः यथा प्रजापतये स्वाहा इदं प्रजापतये० । स्विष्टकृच्च स्विष्टकृद्धोमः यथा अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृ० । चकारः सर्वसमुच्चयार्थः । **एतन्नित्यꣳ सर्वत्र**—एतदाघारादिस्विष्टकृदवसानं सर्वत्र सर्वेषु होमात्मकेषु कर्मसु नित्यम्, यत्र होमाभावस्तत्र नास्ति । यथा स्स्तरारोहणलाङ्गलयोजनपायसब्राह्मणभोजनेषु । अन्ते विहितस्य स्विष्टकृद्धोमस्य कर्मविशेषे स्थानान्तरमाह-**प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः**-महाव्याहृतिभ्यः प्राक् पूर्वं स्विष्टकृद्धोमो भवति चेद्यदि आज्यात्सकाशादन्यदपि चरुप्रभृतिहविर्भवति । केवलाज्ययागे सर्वाहुतिशेषे भवति । **सर्वप्रायश्चित्तप्राजापत्यान्तरमेतदावापस्थानं विवाहे**—सर्वप्रायश्चित्तं त्वन्नो अग्न इत्यारभ्य उदुत्तममित्यन्तमाहुतिपञ्चकम् । प्राजापत्यः प्राजापत्याहुतिः । सर्वप्रायश्चित्तं च प्राजापत्यश्च सर्वप्रायश्चित्तप्राजापत्यौ । तयोरन्तरम् सर्वप्रायश्चित्तप्राजापत्यान्तरम् । एतदावापस्थानम् । कस्मिन्कर्मणि विवाहे । आवापस्थानम् आवापश्चान्यत्र विहितस्य होमजपादेः कर्मणः कर्मान्तरप्रक्षेपः । आवापस्य आगन्तुकत्वेन अन्ते निवेशो युक्तः न्यायात् तन्निवृत्त्यर्थं तमेवाह—**राष्ट्रभृत इच्छन्**—विवाहे वैवाहिके होमकर्मणि राष्ट्रभृतः राष्ट्रभृत्सञ्ज्ञका आहुतीः आवपेदित्यध्याहारः । **जयाभ्यातानाँश्च**—जयाश्च अभ्यातानाश्च जयाभ्यातानाः तान् जयाभ्यातानाँश्च आवपेत् । किं कुर्वन् इच्छन् राष्ट्रभृज्जयाभ्यातानानां होमफलं कामयन् । किं प्रमाणमिति चेत् । **जानन्येन कर्मणेर्त्सेदिति वचनात्**—येन कर्मणा अस्मिन्कर्माणि ओप्य तेन यत्फलं भवतीति जानन् विदन् तत्कर्मफलमिच्छस्तस्मिन् कर्माणि तत्कर्म आवपेदिति वचनात् श्रतेरित्यर्थः । तत्र राष्ट्रभृतो यथा—'ऋताषाड् ऋतधामाग्निर्गन्धर्वः" इत्यादिका द्वादश मन्त्रा राष्ट्रभृत्सञ्ज्ञकाः । **चित्तञ्च चित्तिश्चाकूतञ्चाकूतिश्च विज्ञातञ्च विज्ञातिश्च मनश्च शक्वरीश्च दर्शश्च पौर्णमासञ्च बृहच्च**

रथन्तरञ्च प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु । तस्मै विशः समनमन्त सर्वाः स उग्रः स इ हव्यो बभूव स्वाहा–चित्तञ्चेत्येवमादीनां पदानां चतुर्थ्यन्तानां केचिदिच्छन्ति तदसाम्प्रतम् । कुतः नह्येतानि देवतापदानि किन्तु मन्त्रा एवैते । मन्त्राश्च यथाऽऽम्नाता एव प्रयुज्यन्ते । **अग्निर्भूतानामधिपतिः स मावत्विन्द्रो ज्येष्ठानां यमः पृथिव्या वायुरन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणाम्बृहस्पतिर्ब्रह्मणो मित्रः सत्यानां वरुणोऽपाꣳ समुद्रः स्रोत्यानामन्नꣳसाम्राज्यानामधिपति तन्मावतु सोम ओषधीनाꣳसविता प्रसवानाꣳ रुद्रः पशूनान्त्वष्टा रूपाणां विष्णुः पर्वतानाम्मरुतो गणानामधिपतयस्ते मावन्तु पितरः पितामहाः परेवरे ततास्ततामहाः इह मावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यान्देवहूत्या१७ स्वाहेति**–अभ्यातानसञ्ज्ञका ह्येते अष्टादश मन्त्राः । **सर्वत्रानुषजति** । अग्निर्भूतानामित्यादिषु पितरः पितामहा इत्यन्तेष्वष्टादशसु मन्त्रेषु प्रतिमन्त्रं यथालिङ्गं यथावचनं समावत्वित्यादि देवहूत्या स्वाहेत्यन्तं वाक्यैकदेशमनुषजति संयुनक्ति । **अग्निरैत्वित्यादि परम्मृत्यविति चैके प्राशनान्ते**–अग्निरैत्वित्यादिकाः परम्मृत्यवित्यन्ताः पञ्च मन्त्राः परम्मृत्यविति च जुहुयात् । एके आचार्याः परं मृत्यवित्येतामाहुतिं प्राशनान्ते संस्रवप्राशनान्ते जुहुयादितीच्छन्ति । उदकस्पर्शः । इति हरिहरभाष्ये प्रथमकाण्डे पञ्चमी कण्डिका ॥ ५ ॥ * ॥

गदा०–**प्रदक्षिणमग्निं पर्याणीयैके**–एके आचार्या अग्नेः प्रदक्षिणं कारयित्वा कन्यायाः वासःपरिधानादि कर्तव्यमिति वदन्ति । अपरे तु समीक्षणान्ते अग्नेः प्रदक्षिणकरणं वदन्ति । अतश्च विकल्पः । **पश्चादग्नेस्तेजनीं कटं वा दक्षिणपादेन प्रवृत्योपविशति**–ततो वरोऽग्नेः पश्चात्स्थापितां तेजनीं कटं वा दक्षिणपादेन प्रवृत्य आक्रम्य उल्लङ्घ्याग्नेः पश्चादुपविशति । तेजनी तृणपूलिकोच्यते । कटः प्रसिद्धः । अत्र पश्चादुपवेशनं वचनात् । वचनाभावे तु सर्वत्रोत्तरत उपचारो यज्ञ इत्यनेन उपवेशनम् । स्मृत्यन्तराद्वरस्य दक्षिणतः कन्या उपविशति । तेजनीं कटमिति द्वितीयानिर्देशादेतयोः संस्कारः । ननूपयुक्तमुपयोक्ष्यमाणं वा द्रव्यं संस्कार्यम्, न चानयोरन्यतरमुपयुक्तमुपयोक्ष्यमाणं वा भवति ततश्च कथं संस्कारः । सत्यम् । यद्यप्यत्र शब्देनोपयोगो नोक्तस्तथाप्यासने द्रव्याकाङ्क्षत्वादेतस्य च प्रयोजनाकाङ्क्षत्वादेवं कल्प्यते उपवेशनार्थोऽयं संस्कार इति । तेन तेजन्युपरि कटस्योपरि वोपवेशनम् । एवं च दृष्टार्थतालाभः आक्रमणं च तया सह कर्तव्यमिति भर्तृयज्ञहरिहरौ । **अन्वारब्ध आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यꣳस्विष्टकृच्च**–आघारौ आज्यभागौ च विधीयेते । आघारः पूर्व उत्तरश्च । तत्र तूष्णीं पूर्वः । हरिहरेण प्रजापतये स्वाहेति पूर्वाघारो दर्शितः, तदतीवाशुद्धम् । नह्यत्र मन्त्रोऽस्ति । दर्शपूर्णमासयोः परिभाषातः प्राप्तः स्वाहाकारोऽपि प्रतिषिध्यते । न स्वाहेति च नानिरुक्तꣳहि मनो निरुक्तꣳ ह्येतद्यस्तुष्णीमिति । ननु आघारादिपृष्ठभावेन वेद्यादिकं कुतो नायाति, उच्यते । "गृह्यस्थालीपाकानां कर्म" इत्युपक्रम्य "एष एव विधिर्यत्र क्वचिद्धोमः" इत्यनेनैवं ज्ञायते यावन्तोऽत्र पदार्था उक्तास्तावन्त एव भवन्ति नान्ये । उत्तराघारे प्रतिनिगद्य होमत्वम् । नह्यत्र मन्त्रोऽस्ति । एवमाज्यभागयोरपि । महाव्याहृतयो महाव्याहृतिका मन्त्रास्त्रयः । "भूर्भुवः स्वस्तिस्रो महाव्याहृतयः" इत्युक्तत्वात् । सर्वप्रायश्चित्तं च "त्वन्नो अग्ने" इत्यादिमन्त्रैः पञ्चाहुतयो हूयन्ते तासां सञ्ज्ञा । प्राजापत्यं प्रजापतिदेवताको होमः । स्विष्टकृत्स्विष्टकृद्धोमम् । यजमानो ब्रह्मणा अन्वारब्ध आघारादि स्विष्टकृदन्तं करोति । अन्वारम्भश्च कुशेन निगमपरिशिष्टात् । **एतन्नित्यꣳ सर्वत्र**–एतदाघारादि स्विष्टकृदन्तं कर्म यत्र यत्र होमः तत्र सर्वत्र भवति । यत्र पुनर्होम एव नास्ति यथा स्तरारोहणे लाङ्गलयोजने च तत्रैतन्न भवति **प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः**–चेद्यदि आज्यद्रव्यादन्यद् द्रव्यं चर्वादिकमपि । भवति तदा महाव्याहृतिहोमात्प्राक् पूर्वं स्विष्टकृद्धोमो भवति । चर्वादिद्रव्यशेषादेव केवलाज्यहोमे तु सर्वहोमान्ते आज्येनैव स्विष्टकृत् । **सर्वप्रायश्चित्तं प्राजापत्यान्तरमेतदावापस्थानं विवाहे**–सर्वप्रायश्चित्तं च " त्वन्नो अग्ने" इत्यादिमन्त्रैः पञ्च होमाः । प्राजापत्यं प्रजापतिदेवताको होमः । एतयोरन्तरं मध्यं सर्वप्रायश्चित्तं प्राजापत्यान्तरमेतद्विवाहे विवाहकर्मणि आवापस्थानं वक्ष्यमा-

णानां राष्ट्रभृदादीनाम् अनुष्ठानकाल इत्यर्थः । **राष्ट्रभृत इच्छन्**–अस्मिन् विवाहकर्मणि इच्छन्निच्छया राष्ट्रभृत्सञ्ज्ञका होमा स्युः । " ऋताषाडृतधामाग्निर्गन्धर्वः" इत्यादिभिर्मन्त्रैराग्निका द्वादश होमा राष्ट्रभृतः । **जयाभ्यातानाँश्च जानन्येन कर्मणेर्छेदिति वचनात्**–जयाश्च अभ्यातानाश्च जयाभ्यातानाः तान् जयाभ्यातानान् जानन् इच्छञ्जुहोति अतश्च विकल्पः । चशब्दो राष्ट्रभृद्भिः सन्नियोगार्थः । इच्छया जुहोतीति । कुत इति चेत्, येन कर्मणेर्छेदिति वचनात् । येन कर्मणा ऋद्धिमिच्छेत्तत्र जयाञ्जुहोतीति वचनं भवति । अतश्चान्यत्रापि ऋद्धिमिच्छता जयाहोमः कार्य इति ज्ञायते । जैमिनिस्तु "जयादीनामनारभ्याधीतानां येन कर्मणेर्च्छेत्तत्र जयाञ्जुहुयादित्यादिभिर्वाक्यैरेव सामान्यतो लौकिकवैदिककर्माङ्गत्वे प्राप्ते जयादयस्तु वैदिकास्तेन यत्राहवनीयोऽस्ति तत्रैते स्युः" इति सिद्धान्तितवान् । जयाहोमानां मन्त्रानाह–**चित्तं च चित्तिश्चाकूतं चाकूतिश्च विज्ञातं च विज्ञातिश्च मनश्च शक्वरीश्च दर्शश्च पौर्णमासं च बृहच्च रथन्तरं च प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतना जयेषु तस्मै विशः समनमन्त सर्वाः स उग्रः स इ हव्यो बभूव स्वाहेति**—मन्त्रार्थः । **चित्तं चेति**–प्रजापतिर्यथेन्द्राय जयान्प्रायच्छत् तथा चित्तादि च मह्यमपि प्रयच्छत्विति क्रियां विपरिणम्योत्तरत्र सम्बन्धः । तस्मै च सुहुतमस्तु । तत्र चित्तं ज्ञानाधारं हृदयम्, चित्तिस्तत्रत्या चेतना । आकूतं चाभिमतमाकूतिश्चाभिमानः । यद्वा चित्तं ज्ञानेन्द्रियम् । जातावेकवचनम् । चित्तिस्तद्देवता, आकूतं कर्मेन्द्रियम्, आकूतिस्तद्देवता, विज्ञातं शिल्पादिज्ञानमपरोक्षम्, विज्ञातिस्तद्देवता, मनः प्रासिद्धम्, शक्वरीः शक्वर्यस्तच्छक्तयः, दर्शपौर्णमासौ तद्देवते, बृहद्रथन्तरे सामनी तद्देवते वा । सर्वत्र प्रथममन्त्रोक्तवाक्यार्थः सम्बध्यते । प्रजापतिः परमेश्वरः जयन्ति शत्रूनिति जयाः तान् जयान्मन्त्रानिन्द्राय प्रायच्छत् ददौ । किमर्थम्, वृष्णे अभिमनोरथवर्षणाय । इन्द्रविशेषणं वा । ततः स इन्द्रः पृतनाजयेषु असुरसेनाविजयाख्यकर्मसु उग्रप्रचण्डो बभूव । किञ्च ततस्तस्मै इन्द्राय विशः प्रजाः समनमन्त सम्यङ् नेमुः । स इ इश्चार्थे । स चेन्द्रः हव्यः हवनीयः इज्यः बभूव । स्वाहा तस्मै सुहुतमस्तु । तथाच **तैत्तिरीया** श्रुतिः । "देवासुराः संयत्ता आसन् ! स इन्द्रः प्रजापतिमुपाधावत्तस्मा एताञ्जयान्प्रायच्छंत्तानजुहोत्ततो देवा असुरानजयंस्तज्जयानां जयत्वाभीति ।" अत्र प्रजापतिर्जयानित्येकेनापि जयालिङ्गेन छत्रिन्यायेन त्रयोदशमन्त्रा जया इत्युच्यन्ते । इमानि शाखान्तरोपादिष्टानि देवतापदानि, एषां प्रयोगकाले सम्प्रदानलक्षणेन सम्प्रयोगश्चित्ताय स्वाहेत्यादीनि **भर्तृयज्ञः** । नेति **कर्कादयः** । नचेमानि देवतापदानि । किन्तर्हि । मन्त्राश्चैते । ते च यथाऽऽम्नाता एव प्रयोक्तव्याः । अभ्यातानसञ्ज्ञकान्मन्त्रानाह–**अग्निर्भूतानामधिपतिः स मावत्विन्द्रो ज्येष्ठानां यमः पृथिव्या वायुरन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो मित्रः सत्यानां वरुणोऽपाᳬं समुद्रः स्रोत्यानामन्नᳬं साम्राज्यानामधिपति तन्मावतु सोम ओषधीनाᳬं सविता प्रसवानाᳬं रुद्रः पशूनां त्वष्टा रूपाणां विष्णुः पर्वतानां मरुतो गणानामधिपतयस्ते मावन्तु पितरः पितामहाः परेवरे ततास्ततामहाः । इह मावन्त्वस्मिन्ब्रह्मण्यस्मिन्क्षत्त्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याᳬं स्वाहा**–मन्त्रार्थः । अग्निः प्रजापतिः भूतानां स्थावरादीनामधिपतिः ईशः स मा मामवतु पातु, क्व अस्मिन्ब्रह्मणि अस्मिन्ब्रह्मकर्मणि होमादौ पुनरस्मिन्क्षत्त्रे क्षत्त्रकर्मणि प्रजापालनादौ पुनरस्यामाशिषि ब्राह्मणैः सम्पादितेष्टाशंसने पुत्रादिसुखकामनायां वा, कुत्र अस्यां कन्यायाम्, किम्भूतायाम् पुरोधायाम् पुरः स्थितायाम्; अस्मिन्कर्मणि विवाहे, अस्यां देवहूत्याम् देवताह्वाने देवतोद्देशेन होमे वा स्वाहा सुहुतमस्तु । अयं च वाक्यार्थ उपरिष्टादपि सप्तदशसु सम्बध्यते । शेषं स्पष्टम् । एतेऽष्टादश मन्त्रा अभ्यातानाः । अग्निर्भूतानामित्यादि सुगन्नुपन्थामित्यन्ता द्वाविंशतिरभ्यातानाः इति **कर्ककारिकाकारौ** । इति **सर्वत्रानुषजति**–एतेषु मन्त्रेषु प्रतिमन्त्रं यथालिङ्गं यथावचनं स मावत्वित्यादि देवहूत्यां स्वाहेत्यन्तं वाक्यैकदेशमनुवक्तव्यम् । तच्चास्माभिः प्रयोगलेखने प्रदर्शयितव्यम् । **अग्निरैतु प्रथमो देवतानाᳬं सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् । तदयᳬं राजा वरुणोऽनुमन्यतां यथेयᳬं स्त्रीपौत्रमघं न रोदात्स्वाहा । इमामग्निस्त्रायतां गार्हपत्यः । प्रजामस्यै नयतु दीर्घमायुः । अशून्योपस्था जवितामस्तु माता पौत्रमानन्दमभिविबुद्ध्यतामियᳬं स्वाहा स्वस्ति नो अग्ने दिव आपृथिव्या विश्वानि धेह्ययथा यजत्र । यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रᳬं स्वाहा ॥ सुगं नु पन्थां प्रदिशन्न एहि ज्योतिष्मध्येह्यजरन्न आयुः । अपैतुमृत्युरमृतं म**

आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहेति–अग्निरैतु प्रथम इत्यादिचतुर्भिर्मन्त्रैश्चतस्र आज्याहुतीर्जुहोति । अग्निरैतु प्रथम इति प्रथमा, इमामग्निरिति द्वितीया, स्वस्ति न इति तृतीया, सुगन्नुपन्थामिति चतुर्थी । मन्त्रार्थः । अग्निः ऐतु आगच्छतु । किम्भूतः देवतानां यज्ञभुजां प्रथमः आद्यः प्रधानत्वात् । स चाग्निः अस्यै अस्याः कन्यायाः प्रजां भाविपुत्रादिरूपां मुञ्चतु मोचयतु, कुतः मृत्युपाशात् । यद्वा मृत्युपाशात्*। अग्निः अस्यै कन्यायै प्रजां मुञ्चतु ददातु । तच्च प्रजामोचनं राजा वरुणोऽनुमन्यताम् अनुजानातु । यथा येनानुज्ञानेन प्रकारेण वा इयं कन्या पौत्रं पुत्रभवं अघं दुःखं न रोदात् शोकं प्राप्य न रोदिष्यति कदाचिदपि अपत्यवियोगो मा भवतु इत्यर्थः ॥१॥ इमां कन्यां गार्हपत्योऽग्निस्त्रायताम् रक्षतु गार्हपत्याभिधो भाव्याग्निः पालयतु । इमां पत्नीमग्निहोत्रिणीं कृत्वा रक्षतु । अस्यै अस्याः प्रजां दीर्घमायुः निर्दुष्टबहुकालजीवनं नयतु प्रापयतु । इयं च अशून्योपस्था सफलप्रसवा अवन्ध्यतयेति यावत् । यद्वा नित्यं भर्तृसङ्गतोत्सङ्गा अस्तु भवतु जीवतामेव दीर्घायुषां माता चास्तु जीवपुत्रा भवत्वित्यर्थः । किञ्च पौत्रम् पुत्रसम्बन्धजमानन्दं सुखम् अभि अधिगम्य आभिमुख्येन सर्वभावेन वा प्राप्य विविधं बुध्यताम् जानातु सर्वज्ञास्त्वित्यर्थः । यद्वा पौत्रमानन्दं त्रिशिष्टतया बुध्यताम् निद्रासुखापेक्षां त्यक्त्वा जागर्त्विति ॥ २ ॥ हे अग्ने यजन्तं त्रायत इति यजत्रः । हे यजत्र यस्मात्त्वं सर्वप्रत्यक् अतो नोऽस्माकं विश्वानि सर्वाणि कर्माणि अयथा अन्यथा कृतानि कर्माणि स्वस्ति सम्पूर्णानि यथा स्यात्तथा धेहि अनुकूलानि कृत्वा स्थापय । किञ्च दिव आ स्वर्गं लोकमभिव्याप्य आ पृथिव्याः पृथिवीमभिव्याप्य च यत् महि महिमा तमस्मासु धेहि स्थापय । किञ्च अस्यां पृथिव्यां जातं यद् द्रविणं वसु चित्रं नानारूपं स्वर्णरत्नादिभेदेन प्रशस्तं प्रशस्यं श्रेष्ठम्, यच्च दिवि स्वर्गे जातं तदप्यस्मासु धेहि ॥ ३ ॥ हे अग्ने नोऽस्मान् एहि आगच्छ अस्मद्गृहानागत्य नोऽस्माकं सुगं सुखगम्यं पन्थाम् पन्थानम् अर्चिरादिमार्गं प्रदिशन् उपदिशन् सम्पादयन्निति यावत् । आयुर्निर्दुष्टजीवनं धेहि देहि । किम्भूतम् अजरं जरारोगादिपराभवरहितम् अजरमित्याग्निविशेषणं वा विभक्तिव्यत्ययेन । पुनः किम्भूतम् ज्योतिष्मत्प्रकाशकम् तत्प्रतिबन्धको मृत्युरपि नोऽस्माकं भवत्प्रसादादपैतु अपगच्छतु । अमृतमानन्दं च नोऽस्मान् आगात् आगच्छतु । वैवस्वतो यमश्च नोऽस्माकम् अभयं त्वत्सम्बन्धेन पापाभावाद् दुःखहेतुभयाभावं कृणोतु करोतु । **परं मृत्यविति च**–चकारादाहुतिं जुहोति परम्मृत्यविति अनेन मन्त्रेण । मन्त्रस्य पित्र्यत्वादुदकस्पर्शः । **एके प्राशनान्ते**–एके आचार्याः संस्रवप्राशनान्ते इमामाहुतिमिच्छन्ति, तस्मिन्पक्षे परं मृत्यविति होमान्ते पुनरेतस्य संस्रवप्राशनम् । इति श्रीत्रिरग्निचित्संम्राट्स्थपति–श्रीवामनात्मजदीक्षितगदाधरकृते गृह्यभाष्ये पञ्चमी कण्डिका ॥ ५ ॥ * ॥

विश्व०- प्रदक्षिणमग्निं पर्याणीयैके–एके आचार्याः कन्यावरौ अग्निं प्रदक्षिणं पर्याणीय वासःपरिधानादि मन्यन्ते । **पश्चादग्नेस्तेजनीं कटं वा दक्षिणपादेन प्रवृत्योपविशति**–दक्षिणपादेन तेजनीं तृणपूलकं कटं वा प्रवृत्य परिवर्त्य उल्लङ्घ्येत्यपरे अग्नेः पश्चादुपविशति, वर इति शेषः । दक्षिणतः कन्या वरादुत्तरत आचार्यः । **अन्वारब्ध आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यꣳ स्विष्टकृच्चैतन्नित्यꣳ सर्वत्र** –दक्षिणतो ब्रह्मासनमास्तीर्येत्यारभ्य पर्युक्ष्य जुहुयात् इत्यन्ते परिभाषाशास्त्रार्थे कृते कन्यावराभ्यामन्वारब्ध आचार्यः आघारौ प्रजापतये स्वाहा इन्द्राय स्वाहेत्याज्याहुती, आज्यभागौ अग्नये सोमायेत्याज्याहुती । **महाव्याहृतयः**–भूर्भुवः स्वस्तिस्रो महाव्याहृतयः, **सर्वप्रायश्चित्तं**–"त्वन्नो अग्ने, सत्वन्नो अग्ने, अयाश्चाग्ने, येते शतं, उदुत्तमम् इत्याहुतिपञ्चकस्य सर्वप्रायश्चित्तसंज्ञा । प्राजापत्यं प्रजापतये स्वाहेति प्रजापतिदेवत्ताकं होमं स्विष्टकृच्च स्विष्टकृद्गुणविशिष्टाग्निदेवताको होमः । **नित्यꣳ सर्वत्र**–सर्वस्मिन्होमे एतदाहुतिचतुर्दशकं नित्यं भवत्येवेत्यर्थः । विशेषविधिं विनेति शेषः । तत् नित्यावसथ्यहोमादौ न भवतीति ध्येयम् । **महाव्या……ज्याद्धविः**–आज्याच्चेदितरदनुपहृतं चर्वादि हविः स्यात्तदा महाव्याहृतिहोमात्प्राक् प्रधानहोमानन्तरमेव स्विष्टकृद्धोमो भवतीत्यर्थः । **सर्वप्रा……वाहे**–एतत्सर्वप्रायश्चित्तहोमप्राजापत्यहोमयोर्मध्यं विवाहाख्ये कर्मणि आगन्तुकहोमस्थानमित्यर्थः । **राष्ट्रभृत इच्छन्**–राष्ट्रभृत्संज्ञकांश्चान्तरावपेदित्यर्थः । प्रयोगश्च—"ऋताषाडृतधामाग्निर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् । इदमग्नये गन्धर्वायेति त्यागः । तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा । इदमोषधिभ्योऽप्सरोभ्यः । एवं सर्वत्र त्यागे विशेषः । इदं सूर्याय गन्धर्वाय । इदं मरीचिभ्योऽप्सरोभ्यः । इदं चन्द्रमसे गन्धर्वाय । इदं नक्षत्रेभ्योऽप्सरोभ्यः । इदं वाताय गन्धर्वाय । इदमद्भ्योऽप्सरोभ्यः । इदं यज्ञाय गन्धर्वाय । इदं दक्षिणाभ्योऽप्सरोभ्यः । इदं मनसे गन्धर्वाय । इदमृक्सामभ्योऽप्सरोभ्यः । इच्छन् फलं कामयमानः आहुतीनामिति शेषः । **जयाभ्यातानांश्च** आवापं कुर्यादिति शेषः । चकारः समुच्चयार्थः । न केवलं राष्ट्रभृतामेवावापः । अपि तु जयाभ्या-

---

* अस्मिन्नेव प्रकरणे जयरामभाष्ये एतस्यार्थः स्फुटः ।

तानानामपीत्यर्थः । अत्र श्रुतिं प्रमाणयति **जानन्येन कर्मणेत्सेंदिति वचनात्**–आवापे येन कर्मणा यत्फलं साधयेत् तत्फलकामः तस्मिन् कर्मणि तत्कर्म आवपेदित्यर्थः । अपरे तु जानन्नित्यमुं शब्दं विकल्पार्थमाहुः । ईत्सेंदित्यस्यार्थं ऋद्धिमिच्छेदिति । जयाहुतीनां देवताः प्राह—**चित्तं च चित्तिश्चाकूतं चाकूतिश्चेत्यादि स इ हव्यो बभूव स्वाहेत्यन्तं** सूत्रम् । प्रयोगश्चैवं—चित्ताय स्वाहा । इदं चित्ताय । चित्त्यै स्वाहा इदं चित्त्यै एवमन्यत्र । आकूताय स्वाहा । आकूत्यै स्वाहा । विज्ञाताय स्वाहा । विज्ञात्यै स्वाहा । मनसे स्वाहा । शक्वर्यै स्वाहा । दर्शाय स्वाहा । पौर्णमासाय स्वाहा । वृहते स्वाहा । रथन्तराय स्वाहा । प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतना जयेषु । तस्मै विशः समनमन्त सर्वाः स उग्रः स इ हव्यो वभूव स्वाहेति । इदं प्रजापतय इति त्यागः । अथा**भ्यातानाः—अग्निर्भूतानामधिपतिः स मावत्विन्द्रो ज्येष्ठानामित्यादि देवहूत्याꣳस्वाहे**त्यन्तं सूत्रम् । एभिरष्टादशसंख्याकैर्मन्त्रैरभ्यातानसंज्ञका आहुतीर्जुहुयादित्यर्थः । **सर्वत्रानुषजति**—अग्निर्भूतानामित्याद्यष्टादशमन्त्रेषु प्रतिमन्त्रं यथालिङ्गं **स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यꣳयां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳस्वाहे**त्यनुषङ्गं करोतीत्यर्थः । प्रयोगश्चैवम्–अग्निर्भूतानामधिपतिः स मावत्वस्मिन्ब्र० देवहूत्याꣳ स्वाहा इदमग्नये भूतानामधिपतये १ । एवमन्यत्र । त्यागस्तु इदमिन्द्राय ज्येष्ठानामधिपतये २ । इदं यमाय पृथिव्या अधिपतये ३ । इदं वायवेऽन्तरिक्षस्याधिपतये ४ । इदं सूर्याय दिवोऽधिपतये ५ । इदं चन्द्रमसे नक्षत्राणामधिपतये ६ । इदं बृहस्पतये ब्रह्मणोऽधिपतये ७ । इदं मित्राय सत्यानामधिपतये ८ । इदं वरुणायापामधिपतये ९ । इदं समुद्राय स्रोत्यानामधिपतये १० । अन्नꣳसाम्राज्यानामत्रानुषङ्गविशेषः अधिपति तन्मावत्विति । इदमन्नाय साम्राज्यानामधिपतये ११ । इदꣳ सोमायौषधीनामधिपतये १२ । इदꣳ सवित्रे प्रसवानामधिपतये १३ । इदं रुद्राय पशूनामधिपतये १४ । इदं त्वष्ट्रे रूपाणामधिपतये १५ । इदं विष्णवे पर्वतानामधिपतये १६ । मरुतो गणानामत्रापि विशेषः गणानामधिपतयस्ते मावन्त्वस्मिन्निति, इदं मरुद्भ्यो गणानामधिपतिभ्यः १७ । इदं पितृभ्यः–१८ । **इत्यभ्यातानहोमः । अग्निरैत्वित्यारभ्य परं मृत्यविति चैके प्राशनान्ते**–इत्यन्तं सूत्रम् । "अग्निरैतु, इमामग्निः, स्वस्तिनो अग्ने, सुगन्नुपन्था, परं मृत्यो" एभिः पञ्चमन्त्रैः पञ्चाहुतीर्जुहुयादित्यर्थः । त्यागः इदमग्नये ३ इदं वैवस्वताय ४ इदं मृत्यवे ५ एके परं मृत्यविति पञ्चमीमाहुतिं प्राशनान्त इच्छन्ति ॥ इति पञ्चमी कण्डिका ॥ ५ ॥ ॥ * ॥

कुमार्या भ्राता शमीपलाशमिश्राँल्लाजानञ्जलिनाञ्जलावावपति ॥ १ ॥ ताञ्जुहोति सꣳहतेन तिष्ठती अर्यमणं देवं कन्या अग्निमयक्षत । स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा । इयं नार्युपब्रूते लाजानावपन्तिका । आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा । इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव । मम तुभ्यं च संवननं तदग्निरनुमन्यतामियꣳ स्वाहेति ॥ २ ॥ अथास्यै दक्षिणꣳ हस्तं गृह्णाति साङ्गुष्ठं गृभ्णामि ते ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः । भगोऽअर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गार्हपत्याय देवाः । अमोऽहमस्मि सा त्वꣳ सा त्वमस्यमोऽअहम् । सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं तावेहि विवहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान्विन्द्यावहै बहून् ते सन्तु जरदष्टयः सम्प्रियौ रोचिष्णू सुमनस्यमानौ पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतमिति ॥ ३ ॥ ६ ॥

कर्कः–कुमार्या भ्राता शमीपलाशमिश्राँल्लाजानञ्जलिनाञ्जलावावपति । ताञ्जुहोति सꣳहतेन तिष्ठती–संहतेनाञ्जलिना तिष्ठती प्रतिमन्त्रं लाजान् जुहोति । अर्यमणं देवमित्येवमादिभिर्मन्त्रैः । तान् जुहोतीति वचनात्तुरीयायां वेलायां सर्वहोमः । अथास्यै दक्षिणꣳ हस्तं गृह्णाति साङ्गुष्ठं गृभ्णामि त इति–अनेन मन्त्रेण । अस्यै इति चतुर्थी षष्ठ्यर्थां ॥ ६ ॥ ॥ * ॥ * ॥

जय०-कुमार्या भ्राता इति-स्वाञ्जलिना कुमार्या अञ्जलौ आवपति प्रक्षिपति । सा च संहतेन मिलितेनाञ्जलिना तिष्ठतीति तिष्ठन्ती तान् लाजान् चतुर्थांशमिताम् जुहोति । अर्यमणं देवमित्येवमादिभिर्मन्त्रैः प्रतिमन्त्रं तान् जुहोतीति वचनात् तृतीयवेलायाम् अञ्जलिस्थसर्वहोमः । चतुर्थम् शूर्पकुष्ठयेति शूर्पावशिष्टानां सर्वहोमस्य वक्ष्यमाणत्वात् । आवपने तु सकृदेव आवृत्तेरश्रवणात् । अथ मन्त्रार्थः । तत्राथर्वणोऽनुष्टुप् अग्निर्लाजाहोमे । एवं त्रयाणामपि । कन्यायाः पूर्वः प्रथमम् अर्यमणं सूर्यम् देवं कान्तम् अग्निम् अग्निस्वरूपम् वरलाभाय अयच्छत् अयजत् । लिङि छान्दसं रूपम् । स चार्यमा देवस्ताभिरिष्टो इतो नोऽस्मान् इदानीं परिणीता कन्या इतः पितृकुलत्वात् प्रमुञ्चतु प्रमोचयतु मा पतेः पत्युः कुलत्वात्सहचरित्वाद्वा मा प्रमोचयतु । यद्वा वरो ब्रूते । कन्येयम् अर्यमणम् अग्निरूपेणायजत् । सोऽर्यमा देवः पतेः पत्युः मत्तः सकाशात् इमां नो प्रमुञ्चतु मा प्रमोचयतु । इतः अस्याः कन्यायाः सकाशात् मा माम् नो प्रमुञ्चत्विति । अत्रेदं मन्त्रत्रयं कन्यैव वरपाठिता पठति । इयं नारी वधूः उप पत्युः समीपे ब्रूते । किं कुर्वती लाजान् भृष्टव्रीहीन् आवपन्तिका अग्नौ विभागशः प्रक्षिपन्ती (स्वार्थे कः) । किम्ब्रूते तदाह—मे मम पतिरायुष्मान् सकलदीर्घायुरस्तु भवतु । मम ज्ञातयो बान्धवा एधन्तां वर्द्धन्तामिति । किञ्च हे पते इमाँल्लाजान् अग्नौ आवपामि प्रक्षिपामि । किम्भूतान् तव समृद्धिकरणं समृद्धिहेतूनित्यर्थः । अतो मम कन्यायाः तुभ्य च तव च भर्तुः मलोपश्छान्दसः, संवननं वशीकरणम्, अन्योऽन्यमनुरागः तदयमग्निरर्यमा अनुमन्यताम् अनुमोदनं कुरुताम्, इयं च स्वाहा तत्पत्नी अनुमन्यताम् । अथास्यै अस्याः षष्ठयर्थे चतुर्थी, हस्तं साङ्गुष्ठं गृभ्णामीति मन्त्रेण वरो गृह्णाति । अथ मन्त्रार्थः । तत्र याज्ञवल्क्यस्त्रिष्टुप् लिङ्गोक्ता हस्तग्रहणे । हे कन्ये ते तव साङ्गुष्ठं हस्तं करं गृभ्णामि गृह्णामि " ह्मग्रहोर्भश्छन्दसि " इति भत्वम् । यथा—येन गृहीतेन हस्तेन मया पत्या सह जरदष्टिः जरच्छरीरा बहुवर्षाऽऽयुष्मती आसः भवसीत्यर्थे निपातः । ग्रहणमेव तावत्कृत्यम् तत्राह—भगादयस्त्रयो देवास्त्वा त्वाम् मह्यम् अदुः दत्तवन्तः । किमर्थम् , गार्हपत्याय गृहस्वामिनीत्वाय भाविगार्हपत्यं सेवितुं वा, किञ्च सौभगत्वाय सुभगानां समूहः सौभगं तस्य भावस्तत्त्वं तस्मै तदर्थं निरतिशयानन्दावाप्तये इत्यर्थः । किम्भूतां त्वाम् , पुरन्धिः पुरन्धिम् द्वितीयार्थे प्रथमा, श्रेष्ठाम् सुरूपवतीं वा । तथा च **श्रुतिः** । " पुरन्धिर्योषेत्येवं रूपं दधाति " इति । भगत्वादिविशेषणैरेव विशिष्टार्थनिष्पादकत्वद्योतनार्थम् । **अमोऽहमिति**-भरद्वाज उष्णिक् विष्णुर्हस्तग्रहणे । हे कन्ये यत अमो विष्णुरहमस्मि अमति सर्वत्र गच्छति सर्वं जानाति वेति, न मिनोति हिनस्तीति वा अमः । तथा सौति सुवति सूते वा विश्वमिति सा लक्ष्मीस्त्वमसि । किञ्च सा देवी त्रयीरूपा त्वमसि, अमो देवत्रयरूपोऽहमस्मि । किञ्च अहम् सामास्मि त्वं च ऋगसि । अहं द्यौरस्मि त्वं च पृथिव्यसि । तद्गुणाश्रितावावामित्यर्थः । **ताविति**-अथर्वणोऽनुष्टुप् विष्णुर्हस्तग्रहणे । तावेव आवाम् विवहावहै विवाहं करवावहै सह संयुक्तौ भूत्वा रेतः पुत्रदेहरूपं दधावहै धारयाव ततः प्रजां पुत्रं प्रजनयावहै तत्पुत्रान् पुत्रपौत्रादीन् बहून् विन्द्यावहै लभावहै । **ते सन्त्विति**-प्रजापतिर्यजुर्विष्णुर्हस्तग्रहणे—ते च पुत्रा जरदष्टयः शतायुषः सन्तु । आवामपि सम्प्रियौ सम्यक् प्रीतौ परस्परं प्रेमशालिनौ रोचिष्णू सुदीप्तौ शोभमानौ वा सुमनस्यमानौ शोभनमनोवृत्तिं कुर्वाणौ सुमनसो भावः सौमनस्यम्, सुमनस्यं वा तत्कुर्वाणावित्यर्थः, आस्वेति सन्तुक्रियां विपरिणमय्य योज्यम् । इन्द्रियपाटवमाशास्ते वयं च पुत्रादिसहिताः शतं शरदो वत्सरान्पश्येम रूपग्रहणसमर्थाः आस्म तथा शतं शरदो जीवेम निरुपद्रुतप्राणान्धारयाम तथैव शरदः शतं शृणुयाम निर्दुष्टं शब्दग्रहणसमर्थमस्माकं श्रवणेन्द्रियं भवत्वित्यर्थः ॥ ६ ॥ ॥ * ॥

हरि०—कुमार्या भ्राता शमीपलाशमिश्राँल्लाजानञ्जलिनाञ्जलावावपति ताञ्जुहोति सꣳहतेन तिष्ठती—कुमार्याः कन्यायाः भ्राता शमीपलाशमिश्रान् शमीपत्रयुक्तान् लाजान् भृष्टानि धान्यानि अञ्जलिना कृत्वा वध्वा अञ्जलौ आवपति निक्षिपति तान् जुहोति सा च अञ्जलिस्थान् लाजान् संहतेन मिलितेनाञ्जलिना जुहोति विवाहाग्नौ प्रक्षिपति तिष्ठती ऊर्ध्वा । अर्यमणं देवकन्या अग्निमयक्षत स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा इयं नार्युपब्रूते लाजानावपन्तिका आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा । इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव मम तुभ्य च संवननं तदग्निरनुमन्यतामियꣳ स्वाहेति—अर्यमणं देवमिति प्रथमम्, इयं नार्युपब्रूत इति द्वितीयम्, इमाँल्लाजानावपामीति तृतीयम् । अथास्यै दक्षिणꣳ हस्तं गृह्णाति साङ्गुष्ठं गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथाऽऽसः । भगो अर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गार्हपत्याय देवाः । अमोऽहमस्मि सा त्वꣳ सा त्वमस्यमो अहम् । सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं तावेहि विवहावहै सहरेतो दधावहै प्रजां प्रजनयावहै पुत्रान्विन्दावहै बहून्ते सन्तु जरदष्टयः सम्प्रियौ रोचिष्णू सुमनस्यमानौ पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतमिति—अथ लाजाहोमानन्तरं अस्यै अस्याः कुमार्या दक्षिणं हस्तं गृह्णाति स्वदक्षिणहस्तेन आदत्ते, कीदृशं हस्तं साङ्गुष्ठं अङ्गुष्ठेन सहितम्, गृभ्णामि ते सौभगत्वायेत्यादि शृणुयाम शरदः शतमित्यन्तं मन्त्रं पठति वरः । इति हरिहरभाष्ये प्रथमकाण्डे षष्ठी कण्डिका ॥ ६ ॥ ॥ * ॥

गदा०—कुमार्या भ्राता शमीपलाशमिश्राँल्लाजानञ्जलिनाञ्जलावावपति—कुमार्याः कन्याया वध्वा भ्राता शमीपत्रैर्मिश्रितान् लाजानञ्जलिना कन्यायाः अञ्जलौ आवपति प्रक्षिपति, लाजाशब्देन भृष्टव्रीहय उच्यन्ते । ताञ्जुहोति सꣳहतेन तिष्ठत्यर्यमणं देवं कन्या अग्निमयक्षत । स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा । इयं नार्युपब्रूते लाजानावपन्तिका आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा । इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव मम तुभ्य च संवननं तदग्निरनुमन्यतामियꣳ स्वाहेति—ततः कुमारी तिष्ठती ऊर्ध्वा ताँल्लाजान् स्वाञ्जलौ स्थितान् सꣳहतेन अविरलेनाङ्गुलिना अर्यमणमित्यादित्रिभिर्मन्त्रैर्जुहोति । "अविच्छिन्नाञ्जलिना स्रुचेव जुहुयात्" इत्याश्वलायनः । तत्रैकैकेन मन्त्रेण प्रक्षिप्तलाजानां तृतीयांशं तृतीयांशं जुहोति एवञ्च होमत्रयं भवति । अत्र कारिकाकारः—"तिष्ठन्त्यास्तिष्ठता पत्या गृहीताञ्जलिनैव सा । अञ्जलिस्थांस्त्रिधा सर्वान् प्राङ्मुखी प्रतिमन्त्रतः ॥ प्राजापत्येन तीर्थेन देवेनैवेति बह्वृचाः । अन्यो भ्रातुरभावे स्याद्बान्धवो जातिरेवच" इति । "भ्राता भ्रातृस्थानो वा" इत्याश्वलायने गृह्ये । "भ्रातृस्थाने पितृव्यस्य मातुलस्य च यः सुतः । मातृष्वसुः सुतस्तद्वत्सुतस्तद्वत्पितृष्वसुः" इति बह्वृचकारिकायाम् । द्रव्यत्यागे तु वरस्य कर्तृत्वम् "प्रधानꣳ स्वामी फलयोगात्" इत्युक्तत्वात्, मन्त्रार्थः । कन्याः पूर्वाः प्रथममर्यमणं सूर्यं देवं कान्तम् अग्निमग्निस्वरूपम् वरलाभाय अयक्षत अयजन् । लिङि छान्दसरूपम् । स चार्यमा देवस्ताभिरिष्टो यतोऽतो नोऽस्मान् इदानीं परिणीता कन्या इतः पितृकुलं प्रमुञ्चतु प्रमोचयतु मा पतेः पत्युः कुलात्सहचरित्वाद्वा मा प्रमोचयतु, यद्वा वरो ब्रूते कन्याः यम् अर्यमणम् अग्निरूपेणायजन्, सोऽर्यमा देवः पतेः पत्युर्मत्तः सकाशादिमां नो प्रमुञ्चतु मा प्रमोचयतु इत अस्याः कन्यायाः सकाशान्मा मां नो प्रमुञ्चतु, अत्रेदं मन्त्रत्रयं कन्यैव वरपाठिता पठति । इयं नारी वधूः उप पत्युः समीपे ब्रूते, किंकुर्वती लाजान् भृष्टव्रीहीन् आवपन्तिका अग्नौ विभागशः प्रक्षिपन्ती, स्वार्थे कः । किं ब्रूते तदाह—मे मम पतिरायुष्मान् सकलदीर्घायुरस्तु भवतु, मम ज्ञातयः एधन्ताम् वर्द्धन्तामिति । किञ्च हे पते इमानग्नौ आवपामि प्रक्षिपामि किम्भूतान् तव समृद्धिकरणम् समृद्धिहेतवे, अतो मम कन्यायाः तुभ्य च तव च भर्तुः, मलोपश्छान्दसः । संवननं वशीकरणमन्योन्यमनुरागः, तदयमग्निरर्यमा अनुमन्यताम् अनुमोदनं कुरुताम् इयं च स्वाहा तत्पत्नी अनुमन्यताम् । अथास्यै दक्षिणꣳ हस्तं गृह्णाति साङ्गुष्ठं गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथाऽऽसः । भगो अर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गा-

र्हपत्याय देवाः। अमोऽहमस्मि सा त्वꣳसा त्वमस्यमो अहम् सा माहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वम् । तावेव विवाहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान्विन्द्यावहै बहून् ते सन्तु जरदष्टयः सम्प्रियौ रोचिष्णू सुमनस्यमानौ पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतमिति– अस्यै इति चतुर्थी षष्ठ्यर्थे, अस्याः कुमार्याः दाक्षिणं साङ्गुष्ठमङ्गुष्ठसहितं हस्तं गृह्णाति वरः स्वहस्तेनादत्ते "गृभ्णामि ते" इति मन्त्रेण। अथशब्दोऽत्र स्वस्थाने तिष्ठता कर्तव्यमिति द्योतनार्थः । मन्त्रार्थः । हे कन्ये ते तव हस्तं करं गृभ्णामि गृह्णामि । "हृग्रहोर्भश्छन्दसि" इति भत्वम् । यथा येन गृहीतहस्तेन मया पत्या भर्त्रा सह जरदष्टिः जरच्छरीरा बहुवर्षाऽऽयुष्मती आसः भवसीत्यर्थे निपातः । ग्रहणमेव तावत्कृत्यं तत्राह–भगादयस्त्रयो देवास्त्वा त्वां मह्यमदुः दत्तवन्तः, किमर्थम् गार्हपत्याय गृहस्वामिनीत्वाय भाविगार्हपत्यं सेवितुं वा। किञ्च सौभगत्वाय सुभगानां समूहः सौभगं तस्य भावः सौभगत्वं तस्मै तदर्थम् निरतिशयानन्दावाप्तय इत्यर्थः । किम्भूतां त्वां पुरन्धिः पुरन्धिर्द्वितीयार्थे प्रथमा, श्रेष्ठा सुरूपवती वा तथा च श्रुतिः । "पुरन्धिर्योषेति योषित्येव रूपं दधाति" इति । हे कन्ये यत अमो विष्णुरुद्रब्रह्मरूपोऽहमास्मि अमति सर्वत्र गच्छाति सर्वं जानाति वेति न मिनोति हिनस्तीति वा अमः तथा सौति सुवाति सूते वा विश्वमिति सा लक्ष्मीस्त्वमसि किञ्च सा देवी त्रयीरूपा त्वमासि अमो देवत्रयरूपोऽहमस्मि । किञ्च अहं सामास्मि त्वं ऋगसि अहं द्यौरस्मि त्वं पृथिव्यसि तावेवावां विवहावहै विवाहं करवावहै सह संयुक्तौ भूत्वा रेतः पुत्रदेहरूपं दधावहै धारयाव । ततः प्रजां स्त्रीरूपां सन्ततिं प्रजनयावहै उत्पादयाव पुत्रान् पुत्रपौत्रादीन् बहून् विन्द्यावहै लभावहै ते च पुत्रा जरदष्टयः शतायुषः सन्तु आवामपि सम्प्रियौ सम्यक् प्रीतौ परस्परप्रेमशालिनौ रोचिष्णू सुदीप्तौ शोभमानौ वा सुमनस्यमानौ शोभनमनोवृत्तिं कुर्वाणौ सुमनसो भावः सौमनस्यम् तत्कुर्वाणावित्यर्थः । सन्त्विति क्रियां विपरिणमय्य योज्यम्, इन्द्रियपाटवमाशास्ते वयं च पुत्रादिसहिताः शतं शरदो वत्सरान्पश्येम रूपग्रहणसमर्थाः स्याम तथा शतं शरदो जीवेम निरुपद्रवप्राणान्धारयाम तथैव शरदः शत शृणुयाम निर्दुष्टं शब्दग्रहणसमर्थमस्माकं श्रवणेन्द्रियं भवत्वित्यर्थः । इति श्रीत्रिरग्निचित्सम्राट्स्थपति–श्रीवामनात्मज-दीक्षितगदाधरकृते गृह्यभाष्ये प्रथमकाण्डे षष्ठी कण्डिका ॥ ६ ॥ * ॥

विश्व०—कुमार्या भ्राता…**सꣳहतेन तिष्ठतीति**-सूत्रम् । शमीपत्रमिश्राणि भृष्टानि धान्यानि कन्याभ्राता तिष्ठन्त्याः कन्यायाः अञ्जलौ प्रक्षिपति सा च तिष्ठती मिलितेनाञ्जलिना अग्नौ जुहोतीत्यर्थः । केनेत्यत आह **अर्यमणं देवमित्यारभ्य** **स्नुमन्यतामितः स्वाहेत्यन्तं** सूत्रम् । एभिस्त्रिभिर्मन्त्रैराहुतित्रयं कन्या जुहोत्यञ्जलिनेत्यर्थः । विवाहप्रधानमाह—**अथास्यै दक्षिणꣳहस्तं गृह्णाति साङ्गुष्ठमित्यारभ्य शृणुयाम शरदः शतम्**-इत्यन्तं सूत्रम् । अस्यै अस्याः इत्यर्थः । **उदगयन** इत्याद्युपक्रम्य **कुमार्याः पाणिं गृह्णीयादि**त्यत्र लिङा पाणिग्रहणस्यैव प्राधान्यख्यापनादिह च मन्त्रकरणकपाणिग्रहस्य विधानादयं पाणिग्रहः ज्योतिःशास्त्रप्रतिपाद्ये समये कर्तव्यः । अन्यत्सर्वं सूक्ष्मसमयासाध्यत्वेन समयान्तरे स्थूले कर्तव्यम् । शेषं निगदव्याख्यातम् । षष्ठी कण्डिका ॥ ६ ॥ * ॥

अथैनामश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षिणपादेन आरोहेममश्मानमश्मेव त्वꣳ स्थिरा भव । अभितिष्ठ पृतन्यतोऽववाधस्व पृतनायत इति ॥१॥ अथ गाथां गायति सरस्वति प्रेदमव सुभगे वाजिनीवती । यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः यस्यां भूतꣳ समभवद्यस्यां विश्वमिदं जगत् । तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यश इति ॥ २ ॥ अथ परिक्रामतः तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतु नासह । पुनः पतिभ्यो जायांदाग्ने प्रजया सहेति ॥ ३ ॥ एवं द्विरपरं लाजादि ॥ ॥ ४ ॥ चतुर्थꣳ शूर्पकुष्ठया सर्वाँल्लाजानावपति भगाय स्वाहेति ॥ ५ ॥ त्रिः परिणीतां प्राजापत्यं हुत्वा ॥ ६ ॥ * ॥ ७ ॥

कर्कः—अथैनामश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षिणपादेनारोहेममश्मानमिति—एनां वधूमुत्तरतोऽग्नेर्व्यवस्थितमश्मानमारोहयत्यारोहेममश्मानमित्यनेन मन्त्रेण, प्रकृतं कर्तृत्वं चात्र वरस्य, मन्त्रश्च । **अथ गाथां गायति सरस्वति प्रेदमव सुभगे इति**—वर एव । अथ परिक्रामतस्तुभ्यमग्ने—इति अनेन मन्त्रेण वरवध्वौ मन्त्रश्च लिङ्गाद्वरस्यैव । **एवं द्विरपरं लाजादिकर्म भवति चतुर्थꣳशूर्पकुष्ठया सर्वाँल्लाजानावपति**—अग्रं शूर्पस्य कुष्ठा तया शूर्पकुष्ठया सर्वाँल्लाँजानावपति कुमार्याः पाणौ भगाय स्वाहेत्यनेन मन्त्रेण तानेव जुहोति कुमारी । **त्रिः परिणीतां प्राजापत्यꣳ हुत्वेति**—त्रिः परिणीतामिति त्रिर्ग्रहणमितरथावृत्तिव्युदासार्थम्, उक्तं हि परिभाषायाम् " विवृत्यावृत्य वेतरथा वृत्तिः " इति ॥ ७ ॥

जय०—अथैनां वधूमुत्तरतोऽग्नेरवस्थापितमश्मानमारोहयति दक्षिणपादेन वर **आरोहेममश्मानमिति**—मन्त्रेण प्रकृतं कर्तृत्वं चात्र वरस्य मन्त्रपाठश्च । तस्यार्थः । तत्राथर्वणोऽनुष्टुप् वधूर्देवता अश्मारोहणे । हे कन्ये इमं पुरोवर्त्तिनमश्मानं प्रस्तरमारोह आरुह अधितिष्ठेति यावत् । आरोहणेन संस्कृता त्वमश्मेव पाषाणवत्स्थिरा दृढाङ्गी भव । किञ्च अभि अधिकृत्य आक्रम्य तिष्ठ, कान् पृतनां संग्राममिच्छन्ति पृतन्यन्ति त एव पृतन्यतः तान्पृतन्यतः कलहकारिण इत्यर्थः । ततश्च पृतनाभिः सेनाभिर्यतन्ते इति पृतनायतः तान्पृतनायतः अव अवाचीनान्कृत्वा बाधस्व भग्नोद्यमान्कुरुष्व । अथ अश्मारूढायां कन्यायां वरो गाथां गीयते स्तूयते अनयेति गानं, तिष्ठत्यस्यामिति वा गाथा, तां गायति । अस्यार्थः । तत्र विश्वावसुरनुष्टुब्, सरस्वती गाने हे सरस्वति वैखरीवाक् सुभगे कल्याणि वाजिनीवति वाजः अन्नं तदस्ति अस्यामिति वाजिनी अन्नशाला, यद्वा वाजाः पक्षाः सन्त्यस्या इति वाजिनी हंसी तद्वति इदं युग्मम्, कर्म च प्राव प्रकृष्टतया अव रक्ष, यां त्वा त्वाम् अस्य विश्वस्य भूतस्य जातस्य पृथिव्यादेर्वा प्रजायां प्रकृष्टां जनित्रीमाहुः, मन्त्राः किम्भूताम् अग्रतः प्रथमाम् । तदेव प्रपञ्चयति । **यस्यामिति**—यस्यां प्रकृतिरूपायां त्वयि इदं सर्वं विश्वं तथा भूतं पृथिव्यादि सर्वं जगत् अस्तं गच्छत् आस प्रलये लीनमित्यर्थः, पुनः सृष्ट्यादौ च यस्याः सकाशात् समभवत् जातम्, शेषं स्पष्टम् । अथ वधूवरौ अग्निं परिक्रामतः प्रदक्षिणं कुरुतः । **तुभ्यमग्र इति**—मन्त्रेण । मन्त्रश्च लिङ्गाद्वरस्यैव तस्यार्थः, तत्राथर्वणोऽनुष्टुप् अग्निः तत्प्रादक्षिण्ये । अग्ने तुभ्यं त्वदर्थमेव सोमादयः अग्रे पूर्वं जन्मदिनादारभ्य पर्यवहन् परिगृहीतवन्तः ततः सूर्याम् नवोद्गतकान्तिम् पतिभ्यः सोमादिभ्यः इमां भवान् वहतु प्राप्नोतु । किम्भूतः ना पुरुषः परमपुरुषार्थहेतुरित्यर्थः । ऊढ्वा च तां जायां जायात्वेन पुनः पश्चात्स्वभोगानन्तरं प्रजया पुत्रैः सह मह्यं त्वम् दाः देहि, सन्धिरार्षः । एवं द्विरपरं लाजादिकर्म भवति । चतुर्थहोमे शूर्पस्य कुष्ठया कोणेन सर्वान् शूर्पावशिष्टाँल्लाजान् कुमार्या अञ्जलावावपति भ्राता, ताँश्च भगाय स्वाहेति कुमारी जुहोति । **त्रिः परिणीतामिति**—त्रिर्ग्रहणमितरथावृत्तिव्युदासार्थम् , इतरथावृत्तिश्चोक्ता परिभाषायाम् "विवृत्यावृत्य वा इतरथावृत्तिः" इति । परितोऽग्नेर्नीतां परिणीतामिति पदस्य प्राजापत्यं प्रजापतये हुत्वा उदीचीं प्रक्रामयतीत्यन्वयः । प्रक्रामयिता चात्र वर एव प्रस्तुतत्वात् ॥ ७ ॥

हरि०—अथैनामश्मानमारोहयति । उत्तरतोऽग्नेर्दक्षिणपादेनारोहेममश्मानमश्मेव त्वꣳस्थिरा भव । अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायत इति—अथ पाणिग्रहणानन्तरमेनां वधूमश्मानम् दृषदमुत्तरतोऽग्नेर्ध्रियमाणं दक्षिणपादेन कृत्वा आरोहयति आरोहेममित्यादि-

पृतनायत इति मन्त्रेण । **अथ गाथां गायति**–अथ अश्मारोहणानन्तरं गाथां गायति तां गाथामाह–**सरस्वति प्रेदमव सुभगे वाजिनीवती यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः यस्यां भूतꣳ समभवद्यस्यां विश्वमिदं जगत् तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यश इति**–इमं मन्त्रं पठति गाथागाने। **अथ परिक्रमतस्तुभ्यमग्ने पर्यवहन्सूर्यां वहतु नासह पुनः पतिभ्यो जायां दाग्ने प्रजया सहेति**–अथ गाथायां समाप्तायामग्निं प्रादक्षिण्येन परिक्रामतो वधूवरौ । तत्र मन्त्रः । तुभ्यमग्ने पर्यवहन्नित्यादिकस्य प्रजया सहेत्यन्तस्य मन्त्रस्य वरपठितस्यान्ते । अत्र हस्तग्रहणादि परिक्रमणान्तेषु कर्मसु वर एव मन्त्रान्पठति । **एवं द्विरपरं लाजादि**–एवमुक्तप्रकारेण द्विः वारद्वयमपरं पुनरपि लाजादि कुमार्या भ्रातेत्यारभ्य परिक्रमणान्तं कर्म भवति । **चतुर्थꣳ शूर्पकुष्ठया सर्वाँल्लाजानावपति भगाय स्वाहेति**–ततस्तृतीयपरिक्रमणानन्तरं कुमार्या भ्राता शूर्पकुष्ठया शूर्पस्य कोणेन सर्वान् यावच्छूर्पेऽवशिष्टान् लाजान् कुमार्या अञ्जलौ आवपति निक्षिपति तान् लाजान् तिष्ठती कुमारी भगाय स्वाहेति मन्त्रेण चतुर्थं जुहोति। ततः समाचारात्तूष्णीं चतुर्थं परिक्रमणं वधूवरौ कुरुतः, नेतरथावृत्तिम् इतरथावृत्तेः कारणस्य व्यवायस्याभावात् । ब्रह्माग्न्योरन्तरागमनं हि इतरथावृत्तिकारणम् कुत इति चेत् "हविष्पात्रस्वाम्यृत्विजां पूर्वं पूर्वमन्तरमृत्विजां च यथापूर्वम्" इति परिभाषासूत्रात् । तेन परिक्रमणं कुर्वन्तौ वधूवरौ ब्रह्माग्न्योर्मध्ये न गच्छेताम् । **त्रिः परिणीतां प्राजापत्यꣳ हुत्वा**–पूर्ववदुपविश्य प्रजापतये स्वाहेति ब्रह्मान्वारब्धो हुत्वा इदं प्रजापतय इति त्यागं विधाय ।। इति श्रीहरिहरकृते पारस्करगृह्यसूत्रभाष्ये सप्तमी कण्डिका ।। ७ ।। ।। * ।।

गदा०–**अथैनामश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षिणपादेनारोहेममश्मानमश्मेव त्वꣳ स्थिरा भव । अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायत इति**–अथ धृतकर एव वर एनां वधूमुत्तरतोऽग्नेः स्थापितमश्मानं पाषाणं दक्षिणपादेन कृत्वा आरोहयत्यारोहेममश्मानामित्यनेन मन्त्रेण, मन्त्र एव कारितार्थे । **वासुदेवेन** कुमार्या दक्षिणपादं हस्तेन गृहीत्वा अश्मानमुपरि वरः करोतीत्युक्तम् । **कारिकायाम्** "गत्वोभावुत्तरेणाग्निं तस्याः सव्येतरं करम् । सव्येनादाय हस्तेन वधूपादं तु दक्षिणम् ।। शिलामारोहयेत्प्रागायतां दक्षिणपाणिना ।" इति मन्त्रपाठश्च वरस्य न कुमार्याः । मन्त्रार्थः । हे कन्ये इमं पुरोवर्तिनमश्मानं प्रस्तरमारोह आक्रम अधितिष्ठेति यावत् । आरोहणेन संस्कृता त्वमश्मेव पाषाणवत् स्थिरा दृढा भव, किञ्च आभि अधिकृत्य आक्रम्य तिष्ठ कान् पृतनां संग्राममिच्छन्ति पृतन्यान्ति त एव पृतन्यतः तान् पृतन्यतः कलहकारिण इत्यर्थः । ततश्च पृतनाभिः सेनाभिर्यतन्त इति पृतनायतः तान्पृतनायत अव अवाचीनान्कृत्वा बाधस्व भग्नोद्यमान्कुरु । **अथ गाथां गायति सरस्वति प्रेदमव सुभगे वाजिनीवती । यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः यस्यां भूतꣳसमभवद्यस्यां विश्वमिदं जगत् तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यश इति**—अथ कन्याया दक्षिणपादं अश्मनि निहित एव वरः सरस्वति प्रेदमवेति इमां गाथां गायति, मन्त्रार्थः । हे सरस्वति वाग्देवते सुभगे कल्याणि वाजिनीवती वाजः अन्नं तदस्ति अस्यामिति वाजिनीवती अन्नवती, यद्वा वाजाः पक्षाः सन्त्यस्या इति वाजिनी हंसी तद्वतीदं युग्मं कर्म च प्राव प्रकृष्टतया अव रक्ष । त्वा त्वामस्य विश्वस्य भूतस्य जातस्य पृथिव्यादेर्वा प्रजायां प्रकृष्टां जनित्रीमाहुः । किम्भूतामग्रतः प्रथमाम्, तदेव प्रपञ्चयति । यस्यां प्रकृतिरूपायां त्वयीदं सर्वं विश्वं तथा भूतं पृथिव्यादि सर्वं जगत् अस्तं गच्छत् आस प्रलये लीनमित्यर्थः । पुनः सृष्ट्यादौ च यस्याः सकाशात्समभवत् जातं तस्याः सरस्वत्याः सम्बन्धिनीं तां गाथां गुणप्रभावस्तुतिप्रकाशिकामद्य गास्यामि या श्रुता सती स्त्रीणामुत्तमं श्रेष्ठं यशः कीर्तिं ददाति । **अथ परिक्रामतस्तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतु ना सह पुनः पतिभ्यो जायां दाग्ने प्रजया सहेति**–अथ धृतकरावेव वरवध्वौ अग्नेः परिक्रमणं कुरुतस्तुभ्यमग्र इत्यनेन मन्त्रेण, मन्त्रश्च लिङ्गाद्वरस्यैव । मन्त्रार्थः । हे अग्ने तुभ्यं त्वदर्थमेव सोमादयः अग्रे पूर्वं जन्मदिनादारभ्य पर्यवहन् परिगृहीतवन्तः । ततः सूर्याम्, सूर्यसम्बन्धिनीं भार्यामिमाम् भवान्वहतु, किम्भूतः ना पुरुषः परमपुरुषार्थहेतुरित्यर्थः तां जायां जायात्वेन पुनः पश्चात्स्वभोगानन्तरं प्रजया पुत्रैः सह मह्यं दाः देहि । सन्धिरार्षः । एवमनेन प्रकारेण **द्विरपरं लाजादि**–

कुमार्या भ्रातेत्याद्यारभ्य परिक्रमणान्तं यावत्कर्मोक्तं तावद् द्विः वारद्वयमपरं पुनर्भवति । **चतुर्थꣳ शूर्पकुष्ठया सर्वाँल्लाँजानावपति भगाय स्वाहेति**—तृतीयप्रक्रमे समाप्ते चतुर्थलाजाहोमं जुहुयात् । तत्रायं विशेषः कुमार्या भ्राता शूर्पकुष्ठया शूर्पकोणेन शूर्पे अवशिष्टान् सर्वाल्लाँजान् कुमार्या अञ्जलावावपति तान्कुमारी भगाय स्वाहेत्यनेन मन्त्रेण जुहोति । अत्र **हरिहरमिश्रैरबुद्**ध्वैव पाण्डित्यं कृतमास्ति तत्र तेषां ग्रन्थः । ततः समाचारात्तूष्णीं चतुर्थं परिक्रमणं वधूवरौ कुरुतः नेतरथावृत्तिम् । इतरथावृत्तेः कारणस्य व्यवायस्याभावात् । ब्रह्माग्न्योरन्तरागमनं हीतरथावृत्तिकारणं, कुत इति चेत् । "हविष्पात्रस्वाम्यर्त्विजां पूर्वं पूर्वमन्यतरमृत्विजां च यथापूर्वम्" इति परिभाषासूत्रात् । तेन परिक्रमणं कुर्वन्तौ वधूवरौ ब्रह्माग्न्योर्मध्ये न गच्छेताम् इति सर्वोऽप्ययं ग्रन्थस्तावदशुद्धः । न हीतरथावृत्तिकारणं व्यवायः । किन्तर्हि वचनादप्रदक्षिणावर्तनं कृत्वा प्रदक्षिणावर्तनं वा इतरथावृत्तिः कार्या । तथा च परिभाषासूत्रम् "विवृत्यावृत्य वेतरथावृत्तिः" इति । अयमर्थः । विवृत्याप्रदक्षिणमावर्त्तनं कृत्वा आवृत्य प्रदक्षिणमावर्तनं कृत्वा इतरथावृत्तिः प्रत्यावृत्तिः कर्तव्या । यत्र शास्त्रतः प्रदक्षिणावृत्तिः कृता तत्र तदानीमेवाप्रदक्षिणावृत्तिरविहिताऽपि सर्वत्र कर्तव्या, यत्र चाप्रदक्षिणावृत्तिः कृता तत्र तदानीमेव प्रदक्षिणावृत्तिरविहिताऽपि सर्वत्र कर्तव्या, यत्र चाप्रदक्षिणावृत्तिः कृता तत्र प्रदक्षिणावृत्तिरित्यर्थः । "ब्रह्माग्न्योर्मध्ये वधूवरौ न गच्छेताम्" इत्येतस्य हेतूपन्यासार्थं हविष्पात्रेति सूत्रं दर्शितं तदपि विपरीतम्, नह्येतत्सूत्राद्ब्रह्माग्न्योर्मध्ये वधूवरौ न गच्छत इत्यायाति । किन्त्वेतस्मादेव सूत्रान्मध्ये गमनम् , हविष्पात्रेत्यस्यार्थः । हाविर्व्रीह्यादि पात्राणि शूर्पादीनि, स्वामी कर्मजन्यफलभोक्ता यजमानः पत्नी च, ऋत्विजो ब्रह्माद्याः एतेषामेकत्र समावेशे सति "पूर्वं पूर्वमस्मिन्सूत्रे प्रथमं प्रथममुपादिष्टमन्तरमग्निसन्निकृष्टं भवति" अर्थात्पश्चात्पश्चादुपदिष्टं तदपेक्षया बाहिर्भवति हविरादीनामितस्ततो नयने ऋत्विग्यजमानानां च इतस्ततो गमनागमने कर्मार्थमुपवेशने च सर्वत्राप्ययमन्तर्बहिर्भावो ज्ञेय इत्यर्थः । ऋत्विजां ब्रह्मादीनामेकत्र समावेशने चान्तर्बहिर्भावः, ततश्च वधूवरावग्नेः प्रदक्षिणं कुर्वन्तौ अन्तरङ्गत्वात्तन्मध्य एव गच्छेतामिति । तथा च **कारिकायाम्**—"दम्पत्योर्गच्छतोस्तत्र ब्रह्माग्नी अन्तरागतिः" इति । **त्रिःपरिणीतां प्राजापत्यठं हुत्वा**—त्रिः परिणीतां सतीं कुमारीं प्राजापत्यं प्रजापतिदेवताकहोमं कृत्वा त्रिर्ग्रहणमितरथावृत्तिव्युदासार्थम्, उक्तं हि परिभाषायाम्—"विवृत्यावृत्य वेतरथावृत्तिः" इति । अत्राचारात् "तूष्णीं चतुर्थं परिक्रमणं कुरुतः" इति **वासुदेवगङ्गाधरहरिहररेणुदीक्षिताः** ।

इति श्रीत्रिराग्निचित्सम्राट्स्थपति—श्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे सप्तमी कण्डिका ॥ ७ ॥

विश्व०—अथैनामश्मानमारोहयतीत्यारभ्य पृतनायते—इत्यन्तं सूत्रम् । **अथ गाथां गायति**— अथ अश्मारोहणानन्तरम् । तामाह—**सरस्वती प्रेद**···**यश**—इत्यन्तम् । **अथ परिक्रामतस्तुभ्यमग्रे**···**सहे**त्यन्तं सूत्रम् । अथ गानानन्तरं वधूवरौ अग्निं परिक्रामतस्तुभ्यमित्यारभ्य **सह** इत्यन्तेन मन्त्रेणेत्यर्थः । **एवं द्विरपरं लाजादि**—कुमार्या भ्रातेत्यारभ्य परिक्रमणान्तं कर्म भवतीत्यर्थः । चतुर्थꣳ शूर्पस्य कुष्ठया कोणेन सर्वान् शूर्पावशिष्टान् लाजानावपति कुमार्याः अञ्जलौ भ्राता, तांश्च भगाय स्वाहेति कुमारी मन्त्रावृत्त्या आहुतित्रयं जुहोति इदं भगायेति त्यागः ॥ ३ ॥ आचाराद्वधूभ्रातुः वराङ्गुष्ठग्रहणम् । वरस्तु नारिकेरादि तस्मै ददाति । **परिणीतां प्राजापत्यꣳ हुत्वा**—अग्नेः परितो नीतकन्यामुपवेश्य कन्यावराभ्यामन्वारब्ध आचार्यः प्रजापतये स्वाहेति हुत्वा पदप्रक्रमणाद्युत्तरं यथोक्तं कारयतीत्यर्थः । इदं प्रजापतय इति त्यागः ॥ सप्तमी कण्डिका ॥ ७ ॥ * ॥

अथैनामुदीचीꣳ सप्त पदानि प्रक्रामयति एकमिषे द्वे ऊर्ज्जे त्रीणि रायस्पोषाय चत्वारि मायोभवाय पञ्च पशुभ्यः षडृतुभ्यः सखे सप्तपदा भव सा मामनुव्रता भव ॥ १ ॥ विष्णुस्त्वा नयत्विति सर्वत्रानुषजति ॥ २ ॥ निष्क्रमणप्रभृत्युदकुम्भठं स्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतः स्थितो भवति ॥ ३ ॥ उत्तरत एकेषाम् ॥ ४ ॥ तत एनां मूर्द्धन्यभिषिञ्चति आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजमिति ॥ ५ ॥ आपोहिष्ठेति च तिसृभिः ॥ ६ ॥ अथैनाꣳ सूर्यमुदीक्षयति तच्चक्षुरिति ॥ ७ ॥ अथास्यै दक्षिणाꣳ

समधिहृदयमालभते मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यमिति ॥ ८ ॥ अथैनामभिमन्त्रयते सुमङ्गलीरियं वधूरिमाꣳ समेत पश्यत सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतनेति ॥ ९ ॥ तां दृढः पुरुष उन्मथ्य प्राग्वोदग्वाऽनुगुप्त आगार आनडुहे रोहिते चर्मण्युपवेशयति इह गावो निषीदन्त्विहाश्वा इह पूरुषाः । इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदन्त्विति ॥ १० ॥ ग्रामवचनं च कुर्युः ॥ ११ ॥ विवाहश्मशानयोर्ग्रामं प्रविशतादिति वचनात् ॥ १२ ॥ तस्मात्तयोर्ग्रामः प्रमाणमिति श्रुतेः ॥ १३ ॥ आचार्याय वरं ददाति ॥ १४ ॥ गौर्ब्राह्मणस्य वरः ॥ १५ ॥ ग्रामो राजन्यस्य ॥ १६ ॥ अश्वो वैश्यस्य ॥ १७ ॥ अधिरथꣳ शतं दुहितृमते ॥ १८ ॥ अस्तमिते ध्रुवं दर्शयति । ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि मह्यं त्वादाद्बृहस्पतिर्मया पत्या प्रजावती संजीव शरदः शतमिति ॥ १९ ॥ सा यदि न पश्येत्पश्यामीत्येव ब्रूयात् ॥ २० ॥ त्रिरात्रमक्षारालवणाशिनौ स्यातामधः शयीयाताꣳ संवत्सरं न मिथुनमुपेयातां द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः ॥ २१ ॥ * ॥ ८ ॥

कर्कः-अथैनामुदीचीꣳ सप्तपदानि प्रक्रामयत्येकमिषे द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वारि मायोभवाय पञ्च पशुभ्यः षड्ऋतुभ्यः सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयत्विति-एभिर्मन्त्रैः प्रतिमन्त्रं विष्णुस्त्वा नयत्विति च सर्वत्रानुषङ्गः, तुल्ययोगित्वात्साकाङ्क्षत्वाच्च पूर्वमन्त्राणाम्। निष्क्रमणप्रभृत्युदकुम्भꣳ स्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतः स्थितो भवति-निष्क्रमणकालादारभ्योदकुम्भं स्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतस्तिष्ठेदन्यः उत्तरत एकेषामाचार्याणां मतम्, ततश्च विकल्पः। तत एनां मूर्द्धन्यभिषिञ्चत्यापः शिवाः शिवतमा इति-अनेन मन्त्रेणैनां वधूं शिरस्यभिषिञ्चति । आपो हिष्ठेति च तिसृभिः-चशब्दात्त्रिभिरभिषेकः । अथैनाꣳ सूर्यमुदीक्षयति तच्चक्षुरिति-उदीक्षयतीति कारितत्वादध्येषणा सूर्यमुदीक्षस्वेति । तच्चक्षुरित्यनेन मन्त्रेणोदीक्षते । अथास्यै दक्षिणाꣳसमधिहृदयमालभते मम व्रते त इति-अस्या वध्वा दक्षिणांसमधिबाहुं नीत्वा हृदयमालभते मम व्रते त इत्यनेन मन्त्रेण । अथैनामभिमन्त्रयते सुमङ्गलीरियमिति-अनेन मन्त्रेण । तां दृढपुरुष उन्मथ्य प्राग्वोदग्वानुगुप्त आगार आनडुहे रोहिते चर्मण्युपवेशयतीह गावो निषीदन्त्विति-तामिति वधूम् उन्मथ्योत्क्षिप्य प्राच्यां दिश्युदीच्यां वाऽनुगुप्तागारे देशे आनडुहे रोहिते चर्मणि उपवेशयतीह गाव इत्यनेन मन्त्रेण । ग्रामवचनं च कुर्युर्विवाहश्मशानयोः-कुत एतत् ग्रामं प्रविशतादिति वचनात्-तस्मात्तयोर्ग्रामः प्रमाणमिति श्रुतेः । तयोर्विवाहश्मशानयोः । श्रुतिग्रहणं च ग्रामवचनप्रामाण्यज्ञापनार्थम् । ग्रामशब्देन किमभिधीयत इति चेत् 'ग्रामं प्रविशतात्' इतिवचनात्-स्त्रियो ग्रामशब्देनाभिधीयन्ते । ताश्च यत्स्मरन्ति तदपि कर्तव्यमिति।

आचार्याय वरं ददाति—वरशब्दार्थज्ञापनायाह **गौर्ब्राह्मणस्य वरो ग्रामो राजन्यस्याश्वो वैश्यस्याधिरथꣳ शतं दुहितृमते ददातीत्यनुवर्तते**—दुहितृमाँश्च यस्य दुहितर एव सन्ति न पुत्रास्तस्मै रथादिकं गवां शतं दत्त्वा दुहितरं तस्योद्वहेत् । प्रतिषिद्धा ह्यसौ " नाभ्रातृकामुपयच्छेत् " इति वचनात्तत्परिक्रयायाधिरथदानम् । **अस्तमिते ध्रुवं दर्शयति ध्रुवमसीति**—अनेन मन्त्रेण कारितार्थे चायं मन्त्रः । पश्यामीत्यत्रान्तर्भूतो णिच् । यदुक्तं भवति दर्शयामीति तदुक्तं भवति पश्यामीति मन्त्रोऽप्येवमेव व्यवस्थितः । **ध्रुवैधि पोष्ये मयि मह्यं त्वादाद्बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदः शतमिति कुमार्य्या वाच्यते । सा यदि न पश्येत्पश्यामीत्येव ब्रूयात् न तु न पश्यामीति । त्रिरात्रमक्षारालवणाशिनौ स्याताम्**—वरवध्वौ । **अधः शयीयाताम्**—खट्वाव्युदासार्थोऽयमधःशब्दो नास्तरणव्युदासार्थः । **संवत्सरं न मिथुनमुपेयातां द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः ॥ ८ ॥**

जय०—**अथेति**—परिणयानन्तरम् "एकमिषे" इत्येभिर्मन्त्रैः प्रतिमन्त्रं विष्णुस्त्वा नयत्विति सर्वत्रानुषजति साकाङ्क्षत्वात् तुल्ययोगित्वाच्च पूर्वमन्त्राणाम् । अथ मन्त्रार्थः । तत्र सर्वत्र प्रजापतिर्यजुर्लिङ्गोक्ताः प्रक्रामणे । इषे अन्नाय ऊर्जे बलाय । रायस्पोषाय धनपुष्ट्यै । मायः सुखं तस्य भवः उत्पत्तिः पश्वादिभ्यः तत्तत्सुखाय । सखे इहामुत्र मित्रं सा त्वं सप्तपदा भूरादिसप्तलोकप्रख्याता भव मामनुव्रता अनुवर्तिनी च भव, निष्क्रमणप्रभृति निष्क्रमणकालादारभ्योदकुम्भं स्कन्धे कृत्वा, अग्नेर्दक्षिणतस्तिष्ठेदन्यः उत्तरतः एकेषां मतम्, अतो विकल्पः । तत उदकुम्भाज्जलं गृहीत्वा एनां कन्यां मूर्द्धनि विरोऽभिषिञ्चति **आपः शिवा इति**—मन्त्रेण । **आपोहिष्ठेति च**—इति चकारात् त्रिभिरप्यभिषेकः । अथ मन्त्रार्थः । आपः शिवा इति प्रजापतिर्यजुरापोऽभिषेचने । याः आपः शिवाः कल्याणहेतवः शिवतमाः अतिशयाभ्युदयकारिण्यः शान्ताः सुखकर्त्र्यः शान्ततमाः परमानन्ददात्र्यः ता आपः ते तव भेषजम् आरोग्यम् कृण्वन्तु । कुर्वन्तु । "आपोहिष्ठा" इत्यादेः सिन्धुद्वीपो गायत्री आपो मार्जने । अथैनामुदीक्षयतीति कारितार्थत्वाद्वरस्याध्येषणा सूर्यमुदीक्षस्वेति । ततश्च **तच्चक्षुरिति**—मन्त्रेणोदीक्षते कन्या तत्र दध्यङ्ङाथर्वणः पुर उष्णिक् सूर्यस्तदीक्षणे । अथास्यै अस्याः वध्वाः दक्षिणांसमधि दक्षिणांसस्योपरि स्वहस्तं तस्या नीत्वा हृदयमालभते स्पृशति वरो **मम व्रते इति**—मन्त्रेण । अस्यार्थः । तत्र परमेष्ठी त्रिष्टुप् प्रजापतिर्हृदयालम्भे । हे कन्ये इत्यध्याहारः, मम व्रते शास्त्रविहितनियमादौ ते तव हृदयं मनः, बृहताम् मरीच्यादीनां पतिर्बृहस्पतिः ब्रह्मा दधातु धारयतु । किञ्च मम चित्तमनु मम चित्तानुकूलं ते तव चित्तमस्तु । त्वं च मम वाचं वचनमेकमना अव्यभिचारिमनोवृत्तिर्जुषस्व हृष्टचित्ताऽऽदरेण कुरुष्व । त्वा त्वां च स एव बृहस्पतिर्मह्यं मदर्थं मां प्रसादयितुमित्यर्थः **नियुनक्तु**—नियोजयतु । अथैनां वधूं वरोऽभिमन्त्रयते **सुमङ्गलीरिति**—मन्त्रेण । अस्यार्थः । तत्र प्रजापतिरनुष्टुप् विवाहाधिष्ठात्र्योऽभिमन्त्रणे । हे विवाहदेवताः इयं वधूः सुमङ्गलीः शोभनमङ्गलरूपा, विसर्गश्छान्दसः । अत इमां कन्यां समेत सङ्गच्छत सङ्गत्य च इमां पश्यत मङ्गलदृष्ट्या विलोकयत । किञ्च अस्यै कन्यायै सौभाग्यं दत्त्वा अस्तं स्वस्वगृहं प्रति याथ यातेत्यर्थः न विपरेत । न विशिष्टमुखतया परावृत अपगच्छत, पुनरपि पुत्रादिमङ्गलमाशास्य पुनरागमनाय व्रजतेत्यर्थः । यद्वा यद्यस्तं याथ तर्हि न विपरेतेति "अस्तं गृहाः" इति श्रुतेः । तां वधूं दृढपुरुषो दृढाङ्गपुरुषोऽन्यो वरो वा उन्मथ्य उत्थाप्य प्राग्वा पूर्वस्यां दिशि उदग्वा उत्तरस्याम् अनुगुप्ते वस्त्रादिनाऽऽच्छादिते आगारे गृहे तत्र च प्राग्ग्रीवे उत्तरलोम्नि आस्तीर्णे

चर्मणि उपवेशयति । **इह गाव**–इति मन्त्रेण । अस्यार्थः । तत्र प्रजापतिरनुष्टुप् लिङ्गोक्ता उपवेशने । इह कन्यानिवेशने गावः अश्वाः पुरुषाश्च निषीदन्तु वसन्तु । इह पदावृत्तिः कर्त्तृभेदापेक्षया । किञ्च उ एवार्थे इहैव सहस्रं गावो दक्षिणा यस्य स यज्ञः पूषा पुष्टिकरो निषीदतु । "पूषा वै सहस्रदक्षिण आस" इति श्रुतेः । ग्रामवचनं वृद्धस्त्रीवाक्यं विवाहे मरणे च प्रमाणम् । कुतः "ग्रामं प्रविशतात्" इति वचनाद्धेतोः । तस्मादित्यादिश्रुतेश्च । ताश्च यत्स्मरन्ति तत्कर्तव्यमित्यर्थः । आचार्याय वरो वरं ददाति । वरशब्देन किमभिधीयते तदाह–**गौर्ब्राह्मणस्येत्यादि**--दुहितृमते यस्य दुहितर एव न पुत्रास्तस्मै रथाधिकं गवां शतं दत्त्वा तद्दुहितरमुद्वहेत् । प्रतिषिद्धा ह्यसौ "नाभ्रातृकामुपयच्छेत्" इति तत्परिक्रियायाधिरथदानम् । **अस्तमिते इति**–दिवा विवाहे अस्तमिते सूर्ये ध्रुवमीक्षस्वेति प्रैषेण वरो वधूं प्रेषयति । रात्रिविवाहे तु गोदानानन्तरमेव । **सा ध्रुवमसीति**--मन्त्रस्य वरपठितस्यान्ते समीक्षते कारितार्थे चाऽयं मन्त्रः । कारयिता चात्र वर एव मन्त्रलिङ्गात् । अथ मन्त्रार्थः । तत्र परमेष्ठी पङ्क्तिः प्रजापतिरीक्षणे । हे वधु त्वं ध्रुवं ध्रुवा शाश्वती असि भवसि, यतस्त्वा त्वां ध्रुवं तारकाविशेषं पश्यामि दर्शयामि अत्रान्तर्भूतो णिच् ज्ञेयः, अतस्त्वं मयि ध्रुवा शाश्वती पोष्या पोषणीया मत्प्रजापोष्ट्री वा एधि भव वर्द्धयेति वा । एतदर्थमेव बृहस्पतिर्ब्रह्मा त्वा त्वां मह्यमदात् दत्तवान्, अतो मया पत्या भर्त्रा सह प्रजावती पुत्रपौत्रादियुक्ता शतं शरदो वर्षाणि सम्यक् जीव प्राणिहि । सा यदि न पश्यति पश्यामीत्येवं ब्रूयात् नतु न पश्यामीति । त्रिरात्रमिति वधूवरौ । **अध इति**–खट्वाव्युदासो नास्तरणव्युदासः, संवत्सरमिथुनं नोपगच्छेताम् । अन्ततः अत्र संवत्सरादौ त्रिरात्रपक्षो ह्यन्तिमः संवत्सादिविकल्पास्तु शक्त्यपेक्षया व्यवस्थिता ज्ञेयाः । संवत्सरादिपक्षाशक्तौ त्रिरात्रपक्षाश्रयेऽपि चतुर्थीकर्मानन्तरं पञ्चम्यादिरात्रावभिगमनम्, चतुर्थीकर्मणः प्राक्तस्या भार्यात्वमेव नोपन्नं विवाहैकदेशत्वाच्चतुर्थीकर्मणः ॥ ८ ॥

हरि०–**अथैनामुदीचीꣳ सप्त पदानि प्रक्रामयत्येकमिषे द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वारि मायोभवाय पञ्च पशुभ्यः षडृतुभ्यः सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयत्विति सर्वत्रानुषजति**–अथ प्राजापत्यहोमानन्तरमेनां वधूम् उदीचीमुदङ्मुखीम् सप्त पदानि प्रक्रामयति । सप्त प्रक्रमान् दक्षिणपादेन कारयति उत्तरोत्तरं वरः । कथम्भूताम्, त्रिः परिणीताम् त्रीन्वारान् अग्नेः प्रादक्षिण्येनानीतामिति व्यवहितेन सम्बन्धः, कुतः " पाठक्रमादर्थक्रमो बलीयान् " इति न्यायात् । " एकमिषे " इत्यादिभिः सप्तभिर्मन्त्रैः । तद्यथा–एकमिषे विष्णुस्त्वा नयत्विति वरेणोक्ते मन्त्रे वधूरेकं पदमुदग्ददाति । तथा द्वे ऊर्जे विष्णुस्त्वा नयत्विति मन्त्रान्ते द्वितीयम् । त्रीणि रायस्पोषाय विष्णुस्त्वा नयत्वित्युक्ते तृतीयम् । चत्वारि मायोभवाय विष्णुस्त्वा नयत्वित्युक्ते चतुर्थम् । पञ्च पशुभ्यो विष्णुस्त्वा नयत्वित्युक्ते पञ्चमम् । षडृतुभ्यो विष्णुस्त्वा नयत्वित्युक्ते षष्ठम् । सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयत्वित्युक्ते सप्तमम् । विष्णुस्त्वा नयत्वित्येतावन्मन्त्रभागं सर्वत्रैकमिष इत्यादिसर्वेषु मन्त्रेषु अनुषजति संबध्नाति । **निष्क्रमणप्रभृत्युदकुम्भꣳ स्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतः स्थितो भवत्युत्तरत एकेषाम्**–निष्क्रमणप्रभृति पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामतीत्यादित आरभ्य कश्चित्पुरुषो जलपूर्णं कलशं स्कन्धे निधाय वधूवरयोः पृष्ठत आगत्याग्नेर्दक्षिणस्यां दिशि मौनी स्थित आस्ते केषाञ्चित्पक्षे उत्तरतः । **तत एनां मूर्द्धन्यभिषिञ्चत्यापः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजमित्यापो हि ष्ठेति च तिसृभिः**–ततस्तस्मात्स्कन्धस्थितादुदकुम्भादाचारादाम्रादिपल्लवसहितेन हस्तेन जलमादायैनां वधूं मूर्द्धनि शिरस्यभिषिञ्चति वरः, आपः शिवा इत्यादिना भेषजमित्यन्तेन मन्त्रेण । पुनस्तथैवोदकमादाय आपोहिष्ठेत्यादि आपो जनयथा च न इत्यन्ताभिस्तिसृभिर्मूर्द्धन्यभिषिञ्चतीति चकारादनु-

षज्यते। **अथैनाꣳ सूर्यमुदीक्षयति तच्चक्षुरिति**–अथाभिषेकादुपरि सूर्यमुदीक्षस्वेति प्रैषेण सूर्यमेनां वधूं वर उदीक्षयति सूर्यनिरीक्षणं कारयतीत्यर्थः । सा च वरप्रेषिता सती तच्चक्षुरिति मन्त्रेण स्वयंपठितेन सूर्यं निरीक्षते दिवा विवाहपक्षे । **अथास्यै दक्षिणाꣳसमधि हृदयमालभते**–अथ सूर्येक्षणानन्तरमस्यै इति षष्ठ्यर्थे चतुर्थी । अस्या वध्वाः दक्षिणांसमधि दक्षिणस्य स्कन्धस्योपरि हस्तं नीत्वा तस्या हृदयमालभते वरः स्पृशति । **मम व्रते ते हृदयं दधामि, मम चित्तमनुचित्तं ते अस्तु, मम वाचमेकमना जुषस्व, प्रजापतिसखा नियुनक्तु मह्यमिति**–अनेन मन्त्रेण । **अथैनामभिमन्त्रयते सुमङ्गलीरित्यादि विपरेतनेत्यन्तं–सूत्रम्** । अथ हृदयालम्भनानन्तरमेनां वधूं वरोऽभिमन्त्रयते सुमङ्गलीरित्यादिना मन्त्रेण । अत्र शिष्टसमाचारात् उत्तरत आयतना हि स्त्रीतिश्रुतिलिङ्गाच्च वधूं वरस्य वामभागे उपवेशयति । **तां दृढपुरुष उन्मथ्य प्राग्वोदग्वाऽनुगुप्त आगार आनडुहे रोहिते चर्मण्युपवेशयति इह गाव इति**–ततस्तां वधूं दृढपुरुषः,बलवान् कश्चित्पुमानुन्मथ्योत्थाप्य प्राक् पूर्वस्यां दिशि उदक् उदीच्यां वा दिशि पूर्वकल्पिते अनुगुप्ते सर्वतः परिवृते आगारे गृहे तत्र च पूर्वमास्तीर्णे आनडुहे आर्षभे रोहिते लोहितवर्णे चर्मणि अजिने प्राग्ग्रीवे उत्तरलोम्नि उपवेशयति इह गाव इत्यादिना निषीदन्त्विति अस्य मन्त्रस्य पाठान्ते। केचन जामातैव दृढपुरुष इत्याहुः, तत्पक्षे जामातैव वधूमुत्क्षिप्य मन्त्रमुक्त्वा चर्मण्युपवेशयति। तत आगत्य यथास्थानमुपविश्य ब्रह्मणाऽन्वारब्धः स्विष्टकृद्धोमं विधाय संस्रवं प्राश्य ब्रह्मणे पूर्णपात्रवरयोरन्यतरं दक्षिणात्वेन दत्त्वा **आचार्याय वरं ददाति**–वरः स्वकीयाचार्याय वरं ददाति । वरशब्दार्थमाह । **गौर्ब्राह्मणस्य वरो ग्रामो राजन्यस्याश्वो वैश्यस्य**-ब्राह्मणः परिणेता गां वरं ददाति ।क्षत्रियश्चेद्वरस्तदा ग्रामं ददाति। वैश्यश्चेदश्वम्। **अधिरथꣳ शतं दुहितृमते**–"यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता । नोपयच्छेत तां कन्यां पुत्रिकाधर्मशङ्कया"इति मनुवचनात् । अभ्रातृमतीपरिणयनं प्रतिषिद्धम्, तदतिक्रम्य यदि कश्चित्तामुद्वहेत् तदा तस्याः पुत्रिकात्वदोषपरिहाराय च एकेन रथेन अधिकं गवां शतं तत्पित्रे दत्त्वा उद्वहेत् । **ग्रामवचनं च कुर्युः**–(अत्र विवाहे ग्रामशब्दवाच्यानां स्वकुलवृद्धानां स्त्रीणां श्मशाने च वाक्यं कुर्युः) अङ्कुरार्पणहरिद्राक्षतचन्दनादिधर्मप्रतिपादकम् । कस्मात् **विवाहश्मशानयोर्ग्रामं प्राविशतादितिवचनात् तस्मात्तयोर्ग्रामः प्रमाणमिति श्रुतेः**–विवाहे च श्मशाने च ग्रामम् स्वकुलवृद्धाः स्त्रियः **प्राविशतात्**–शास्त्रातिरिक्तं कर्तव्यमाचारं पृच्छेदिति वचनात् इति स्मृतेः । न केवलं स्मृतेः श्रुतेश्चापि । का सा श्रुतिः । **तस्मात्तयोर्ग्रामः प्रमाणमिति**–यतः स्वकुलवृद्धाः स्त्रियः पूर्वपुरुषानुष्ठीयमानं सदाचारं स्मरन्ति तस्मात्तयोर्विवाहश्मशानयोर्ग्रामः प्रमाणं सदाचारबोधकमित्यर्थः । **अस्तमिते ध्रुवं दर्शयति**–दिवा विवाहश्चेत्तदा अस्तमिते सूर्ये अमुकि ध्रुवमीक्षस्वेति प्रैषेण वधूं ध्रुवं तारकाविशेषं दर्शयति । रात्रौ विवाहश्चेत्तदा वरदानानन्तरमेव । तद्यथा ध्रुवमसीत्यादि सञ्जीव शरदः शतमित्यन्तं वरेण पाठितेन मन्त्रेण वधूर्ध्रुवमीक्षते । **सा यदि न पश्येत्पश्यामीत्येव ब्रूयात्**–सा वधूर्यदि ध्रुवं नेक्षेत तथापि पश्यामीत्येवं वदेत् न विपरीतम् । **त्रिरात्रमक्षारालवणाशिनौ स्यातामधः शयीयाताम्**–विवाहदिनमारभ्य त्रिरात्रम् त्रीणि अहोरात्राणि अक्षारालवणाशिनौ अक्षारं च अलवणं च अक्षारालवणं तदश्नीत इत्येवं शीलौ अक्षारालवणाशिनौ स्यातां भवेताम् । अधः आस्तरणास्तृतायां भूमौ न खट्वायां शयीयाताम् स्वपेताम् । **संवत्सरं न मिथुनमुपेयातां द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः**–संवत्सरं वर्षं यावन्मिथुनम् अभिगमनं नोपेयाताम् । नोपगच्छेताम् । अथवा द्वादशरात्रम्। अथवा षड्रात्रम् । यद्वा त्रिरात्रम् । अन्ततः संवत्सरादिपक्षाणामन्ते त्रिरात्रमित्यर्थः। संवत्सरादिविकल्पास्तु शक्त्यपेक्षया व्यवस्थिता विज्ञेयाः, संवत्सरादिपक्षाशक्तौ त्रिरात्रप-

क्षाश्रयणेऽपि चतुर्थीकर्मानन्तरं पञ्चम्यादिरात्रावभिगमनम्, चतुर्थीकर्मणः प्राक् तस्या भार्यात्वमेव न संवृत्तं विवाहैकदेशत्वाच्चतुर्थीकर्मणः ॥ ८ ॥

अथ पद्धतिः । अथ प्रकृतं विवाहकर्माह–तत्र पुण्येऽहनि मातृपूजापूर्वकं वरस्य पिता स्वपितृभ्यः पुत्रविवाहनिमित्तं नान्दीमुखं श्राद्धं विधाय वैवाह्यं पुत्रं मङ्गलतूर्यवेदघोषेण कन्यापितृगृहमानयति, कन्यापिता च मातृपूजापूर्वकं कन्याविवाहनिमित्तकं स्वपितृभ्यो नान्दीमुखं श्राद्धं विधाय मण्डपद्वारमागतं वरमभ्युत्थानादिभिः प्रतीक्ष्य मधुपर्केणार्चयेत् । तद्यथा–अर्चयिता आसनमानाय्य तस्यासनस्य पश्चात्तिष्ठन्तमर्घ्यं प्रति 'साधु भवानास्तामर्चयिष्यामो भवन्तम्' इति ब्रवीति । तत आचार्यस्तत्सम्बन्धिनः पुरुषाः विष्टरं पाद्यं पादार्थमुदकमर्घमाचमनीयं यमधुपर्कं तत्समीपमानयन्ति । अथार्चयिता एकं विष्टरमादाय तिष्ठति, अन्यः कश्चिद्ब्राह्मणो विष्टरो विष्टरो विष्टर इति श्रावयति । प्रतिगृह्यतामित्यर्घ्यस्य हस्तयोर्ददाति । अर्घ्यश्च "वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः । इमं तमभितिष्ठामि यो माकश्चाभिदासति" इत्यनेन मन्त्रेण विष्टरमासने निधाय तदुपर्युपविशति । ततोऽन्येन पाद्यं पाद्यं पाद्यमिति श्राविते पादार्थमुदकमर्चयिता अर्घ्याय प्रतिगृह्यतामित्युक्त्वा समर्पयति।अथार्घ्यस्तत्पात्रं भूमौ निधायाञ्जलिना जलमादाय " विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः " इति मन्त्रेण ब्राह्मणो दक्षिणं पादं प्रक्षाल्य तथैव वामं प्रक्षालयति । क्षत्रियादयस्त्वन्ये सव्यं पादं प्रक्षाल्यानेनैव विधिना दक्षिणं प्रक्षालयन्ति । ततः पुनर्विष्टरो विष्टरो विष्टर इत्यन्येन श्राविते प्रतिगृह्यताभिति यजमानदत्तं विष्टरं प्रतिगृह्य वर्ष्मोऽस्मीति मन्त्रेण पादयोरधस्तान्निदधाति । ततोऽर्घोऽर्घोऽर्घ इत्यन्येन श्राविते ऽर्चयिता प्रतिगृह्यतामित्युक्त्वा अर्घ्यायार्घम् । " आपः स्थ युष्माभिः सर्वान्कामानवाप्नवानि " इति मन्त्रं पठितवते प्रयच्छति । अर्घ्यश्चार्घं प्रतिगृह्य मूर्द्धपर्यन्तमानीय " समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । अरिष्टास्माकं वीरा मा परासेचि मत्पयः " इत्यनेन मन्त्रेण निनयन्नभिमन्त्रयते । अथाचमनीयमाचमनीयमाचमनीयमित्यन्येन श्राविते ऽर्चयिताऽर्घ्याय प्रतिगृह्यतामित्युक्त्वा आचमनीयं प्रयच्छति । अर्घ्यश्च प्रतिगृह्य "आमागन्यशसा सꣳ सृज वर्चसा तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्" इति मन्त्रेण सकृदाचम्य स्मार्तमाचमनं करोति । अथ मधुपर्को मधुपर्को मधुपर्क इत्यन्येनोक्ते प्रतिगृह्यतामिति यजमानेनोक्ते यजमानहस्तस्थितमुद्घाटितं मधुपर्कं "मित्रस्य त्वा चक्षुषा प्रतीक्षे" इति मन्त्रेण प्रतीक्ष्य "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्" प्रतिगृह्णामीति मन्त्रेणाञ्जलिना प्रतिगृह्य सव्ये पाणौ निधाय दक्षिणस्य पाणेरुपकनिष्ठिकयाऽङ्गुल्या "नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि" इति मन्त्रेण सकृदालोडय पुनर्मन्त्रेणैवं द्विरालोडयति अनामिकाङ्गुष्ठाभ्यामादाय बहिर्निक्षिप्य पुनरेवं द्विर्वारमालोडनं निरुक्षणं च करोति । ततो "यन्मधुनो मधव्यं परमꣳ रूपमन्नाद्यम् तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि" इति मन्त्रेण अनामिकाङ्गुष्ठाभ्यामादाय त्रिः प्राश्नाति। "मधुव्वाता ऋतायते" इत्यादिभिस्तिसृभिर्ऋग्भिः प्रत्यृचं त्रिः प्राश्नाति। वा प्राशितशेषं पुत्राय शिष्याय वा दद्यात्सर्वं वा भक्षयेत् पूर्वस्यां दिशि असञ्चरे प्रदेशे वा क्षिपेत् । ततः स्मार्त्तेन विधिनाऽऽचम्य वाङ्म आस्येऽस्त्विति कराग्रेण मुखं स्पृशति, नसोर्मे प्राणोऽस्त्विति दक्षिणवामे नासारन्ध्रे, अक्ष्णोर्मे चक्षुरस्त्विति दक्षिणोत्तरे चक्षुषी, कर्णयोर्मे श्रोत्रमस्त्विति दक्षिणं श्रोत्रं संस्पृश्य पुनः कर्णयोर्मे श्रोत्रमस्त्विति वामम्, एवम् बाह्वोर्मे बलमस्त्विति दक्षिणोत्तरौ बाहू, ऊर्वोर्मे ओजोऽस्त्विति युगपदूरू, अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्त्विति शिरःप्रभृतीनि पादान्तानि सर्वाण्यङ्गान्युभाभ्यां हस्ताभ्यामालभेत । एवमाचान्तोदकाय खड्गहस्तो यजमानः गौर्गौर्गौरालभ्यताभिति ब्रूयात् । ततोऽर्घ्यः "माता रुद्राणां दुहिता वसूनाꣳ स्वसादित्यानाममृतस्य नाभिः प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट" मम चामुकशर्मणो यजमानस्य च पाप्मानꣳ हनोमि " इति गवालम्भपक्षे प्रतिब्रूयात् । उत्सर्गपक्षे तु मातारुद्राणामित्यादि पाप्मा हत ओमित्युपांशूक्त्वा

उत्सृजत तृणान्यत्त्वित्युच्चैः प्रतिब्रूयात् । ततो वरो बहिःशालायामीशान्यां दिशि चतुर्हस्तायां सिकताच्छन्नायां वेदिकायां लौकिकं निर्मथ्य वाऽग्निं स्थापयित्वा, पश्चादग्नेस्तृणपुलकं कटं वा स्थापयेत् । अथ कन्यापिता वस्त्रचतुष्टयं वराय प्रयच्छति वरश्च तेषु मध्ये "जरां गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपा वा शतं च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वासः" इत्यनेन मन्त्रेण एकं कुमारीं परिधापयति । द्वितीयं "या अकृन्तन्नवयं या अतन्वत याश्च देवीस्तन्तूनभितो ततन्थ तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं पररिधत्स्व वासः" इति मन्त्रेण । स्वयं च "परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि । शतं च जीवामि शरदः पुरूचीरायस्पोषमभिसंव्ययिष्ये" इति मन्त्रेण एकं परिधत्ते । "यशसामाद्यावापृथिवी यशसेन्द्रावृहस्पती यशोभगश्च मा विदद्यशो मा प्रतिपद्यताम्" इति द्वितीयम् । अथ कुमार्याः पिता एतौ परिहिताहतसदशवस्त्रौ कन्यावरौ "समञ्जयति परस्परं समञ्जेथाम्" इति प्रैषेण ततो वरः कन्यासम्मुखीभूतः "समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ सम्मातरिश्वा सन्धाता समुदेष्ट्री दधातु नौ" इति मन्त्रं पठति । अथ कन्यादानं करोति पित्रादिः कन्यादानाधिकारी । तत्र वाक्यम् अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्राय, अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्राय अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्राय इति वरपक्षे । अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रीम्, अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रीम्, अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रीमिति कन्यापक्षे । एवमेव पुनर्द्विवारमभिहिते अथ कन्यापिता कुशजलाक्षतपाणिः उदङ्मुखोपविष्टः प्राङ्मुखोपविष्टाय वराय प्रत्यङ्मुखोपविष्टां कन्याम् । अमुकगोत्रायामुकप्रवरायामुकशर्मणे ब्राह्मणाय इति ब्राह्मणवरपक्षे । इतरवरपक्षे तु वर्मणे अमुकगुप्तायामुकदासायेति विशेषः । अमुकगोत्राममुकप्रवराममुकनाम्नीमिमां कन्यां सालङ्काराम् प्रजापतिदैवताम् पुराणोक्तशतगुणीकृतज्योतिष्टोमातिरात्रसमफलप्राप्तिकामः कन्यादानफलप्राप्तिकामो वा भार्यात्वेन तुभ्यमहं सम्प्रददे इत्युक्त्वा सकुशाक्षतजलं कन्यादक्षिणहस्तं वरदक्षिणहस्ते दद्यात्, वरश्च द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णात्वित्यनेन मन्त्रेण तां प्रतिगृह्णीयात् । अथ कोऽदादिति कामस्तुतिं पठेत् । ततः कृतैतत्कन्यादानप्रतिष्ठासिद्ध्यर्थं सुवर्णं गोमिथुनं च दक्षिणां दद्यात् । अत्राऽऽचारात् अन्यदपि*यौतकत्वेन सुवर्णरजतताम्रगोमहिष्यश्वग्रामादि कन्यापिता यथासम्भवं ददाति, अन्येऽपि बान्धवादयः यथासम्भवं यौतकं प्रयच्छन्ति । केचन यौतकं होमान्ते प्रयच्छन्ति, अत्र देशाचारतो व्यवस्था । एवं पित्रा दत्तां गृहीत्वा प्रतिग्रहस्थानान्निष्क्रामति । "यदैषि मनसा दूरं दिशोऽनुपवमानो वा । हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोतु" अमुकि इत्यन्तेन मन्त्रेण । अथ निष्क्रमणप्रभृत्येको जलपूर्णकलशं स्कन्धे निधायाग्नेर्दक्षिणतो वाग्यत ऊर्ध्वस्तिष्ठति उत्तरतो वा अभिषेकपर्यन्तम् । अथैनौ वधूवरौ अग्निसमीपमागतौ कन्यापिता "परस्परं समीक्षेथाम्" इति प्रैषेण समीक्षयति । ततः प्रेषितो वरः समीक्षमाणां कन्यां समीक्षमाणः "अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे । सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः । सोमोऽददद्गन्धर्वाय गन्धर्वोऽददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् । सा नः पूषा शिवतमा मैरय सा न ऊरू उशती विहर । यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्यै" इत्यादिकान् चतुरो मन्त्रान्पठति ततः । प्रदक्षिणमग्निं परीत्य पश्चादग्नेः पूर्वस्थापिततेजनीकटयोरन्यतरे दक्षिणं पादमग्रे कृत्वोपविशति वरः । तस्य दक्षिणतो वधूः, ततो ब्रह्मोपवेशनादि चरुवर्जं पर्युक्षणान्तं कुर्यात् । इयाँस्तु विशेषः । शमीपलाशमिश्राः लाजा, अश्मा, अखण्डलोहितमानडुहं चर्म, कुमार्या भ्राता, शूर्पम्, दृढपुरुषः, आचार्याय वरद्रव्यम् इत्येतावन्ति वस्तूनि उपकल्पयेत् न प्रोक्षेत् । ततः स्रुवमादाय दक्षिणं जान्वाच्य आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं ब्रह्मान्वारब्धो हुत्वा राष्ट्रभृज्जयाभ्यातानाग्निरैत्वित्यादिकान्परं मृत्यवित्यन्तान् अनन्वारब्धो जुहुयात् । प्राशनान्ते वा

---

* कन्यादानमारभ्य चतुर्थीकर्मपर्यन्तं विवाहशब्देनोच्यते तन्मध्ये कन्यया स्वपित्रादिभ्यो यद्धनं प्राप्तं तद्यौतकम् ।

परं मृत्यविति । तद्यथा-ॐ प्रजापतये स्वाहा इदं प्रजापतये । इन्द्राय स्वाहा इदमिन्द्राय । अग्नये स्वाहा इदमग्नये । सोमाय स्वाहा इदं सोमाय । ॐ भूः स्वाहा इदमग्नये । ॐ भुवः स्वाहा इदं वायवे । ॐ स्वः स्वाहा इदं सूर्याय । “त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः । यजिष्ठो व्वह्नितमः शोशुचानो विश्वाद्वेषाꣳसि प्रमुमुग्ध्यस्मत्स्वाहा” इदमग्नीवरुणाभ्याम् । “स त्वं नो अग्नेवमोभवोतीनेदिष्ठो अस्या उषसो व्युष्टौ । अवयक्ष्व नो वरुणꣳरराणो वीहिमृडीकꣳसुहवो न एधि स्वाहा” इदमग्नीवरुणाभ्याम् । “अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया असि । अयानो यज्ञं वहास्ययानो धेहि भेषजꣳस्वाहा” इदमग्नये अयसे । “ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो अद्य सवितोऽत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा” इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च । “उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳ श्रथाय । अथाव्वयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा” इदं वरुणाय० । ब्रह्मान्वारब्धो हुत्वा ततो राष्ट्रभृतो यथा—“ऋताषाडृतधामाग्निर्गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्” इदमृतासाहे ऋतधाम्नेऽग्नये गन्धर्वाय न० ॥ “ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदो नाम-ताभ्यः स्वाहा” इदमोषधिभ्योऽप्सरोभ्यो मुद्भ्यो न मम । “सꣳहितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्” इदं सꣳहिताय विश्वसाम्ने सूर्याय गन्धर्वाय । “सꣳहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम-ताभ्यः स्वाहा ।” इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यः । “सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्” इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय । “सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयोनाम-ताभ्य”स्वाहा इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यः । “इषिरोविश्वव्यचा वातो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्” इदमिषिराय विश्वव्यचसे वाताय गन्धर्वाय । “इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽप्सरस ऊर्जो नाम--ताभ्यः स्वाहा ।” इदमद्भ्योऽप्सरोभ्य ऊग्भ्यः । भुज्युः सुपर्णो यज्ञो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्” इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय । “भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम-ताभ्यः स्वाहा ।” इदं दाक्षिणाभ्योऽप्सरोभ्यस्तावाभ्यः । “प्रजापतिर्विश्वकर्मा मनो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्” इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय ।“प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम—ताभ्यः स्वाहा ।” इदमृक्सामभ्योऽप्सरोभ्य एष्टिभ्यः । केचित्तु अन्यथा मन्त्रप्रयोगं कुर्वन्ति तत्प्रदर्श्यते । “ऋताषाडृतधामाग्निर्गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्” इति प्रथमः । “तस्यौषधयोऽप्सरा सो मुदो नाम ताभ्यः स्वाहा” इति द्वितीयः।एवं सर्वत्र मन्त्रेषु । अस्मिन्नपि पक्षे त्यागास्तु त एव।

अथ जयाहोमः। चित्तं च स्वाहा इदं चित्ताय १ चित्तिश्च स्वाहा इदं चित्त्यै २ आकूतं च स्वाहा इदमाकूताय३ आकूतिश्च स्वाहा इदमाकूत्यै४ विज्ञातं च स्वाहा इदं विज्ञाताय५ विज्ञातिश्च स्वाहा इदं विज्ञात्यै ६ मनश्च स्वाहा इदं मनसे ७ शक्वरीश्च स्वाहा इदं शक्वरीभ्यः ८ दर्शश्च स्वाहा इदं दर्शाय ९ पौर्णमासं च स्वाहा इदं पौर्णमासाय १० बृहच्च स्वाहा इदं बृहते ११ रथन्तरं च स्वाहा इदं रथन्तराय १२ चित्तं चेत्येवमादीनां पदानां चतुर्थ्यन्तानां प्रयोगं केचिदिच्छन्ति तदसाम्प्रतम्, कुतः नह्येतानि देवतापदानि किन्तु मन्त्रा एवैते मन्त्राश्च यथाऽऽम्नाता एव प्रयुज्यन्ते ।“प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु।तस्मै विशः समनमन्त सर्वाः स उग्रः स इ हव्यो बभूव स्वाहा”इदं प्रजापतये जयानिन्द्राय । **अथाभ्यातानाः**। “अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा” इदमग्नये भूतानामधिपतये । इन्द्रो ज्येष्ठानामधिपतिः स मावत्वित्येवमादि स्वाहाकारान्तो मन्त्रः । इदमिन्द्राय ज्येष्ठानामधिपतये । एवं स मावत्वस्मिन्नित्यादिवक्ष्यमाणेषु सर्वमन्त्रेष्वनुषङ्गः । यमः पृथिव्या अधिपतिः इदं यमाय पृथिव्या अधिपतये । वायुरन्तरिक्षस्याधिपतिः इदं वायवेऽन्तरिक्षस्याधिपतये । सूर्यो दिवोऽधिपतिः इदं सूर्याय दिवोऽधि।

पतये । चन्द्रमा नक्षत्राणामधिपतिः इदं चन्द्रमसे नक्षत्राणामधिपतये । बृहस्पतिर्ब्रह्मणोऽधिपतिः इदं बृहस्पतये ब्रह्मणोऽधिपतये । मित्रः सत्यानामधिपतिः इदं मित्राय सत्यानामधि पतये । वरुणोऽपामधिपतिः इदं वरुणायापामधिपतये । समुद्रः स्रोत्यानामधिपतिः इदं समुद्राय स्रोत्यानामधिपतये । "अन्नꣳ साम्राज्यानामधिपति तन्मावत्वास्मिन्" इत्यादि इदमन्नाय साम्राज्यानामाधिपतये । सोम ओषधीनामधिपतिः इदं सोमायौषधीनामधिपतये । सविता प्रसवानामधिपतिः इदं सवित्रे प्रसवानामधिपतये । रुद्रः पशूनामधिपतिः इदं रुद्राय पशूनामधिपतये । उदकस्पर्शनम् । त्वष्टा रूपाणामधिपतिः इदं त्वष्ट्रे रूपाणामधिपतये । विष्णुः पर्वतानामिधिपतिः इदं विष्णवे पर्वतानामधिपतये । मरुतो गणानामधिपतयस्ते मावन्त्वस्मिन् । इदं मरुद्भ्यो गणानामधिपतिभ्यः । पितरः पितामहाः परेऽवरे ततास्ततामहाः इह मावन्त्वस्मिन् ब्रह्मणीत्यादि समानम् । इदं पितृभ्यः पितामहेभ्यः परेभ्योऽवरेभ्यस्ततेभ्यस्ततामहेभ्यः । उदकस्पर्शनम् । एते अष्टादश मन्त्रा अभ्यातानसंज्ञकाः । "अग्निरैतु तु प्रथमो देवतानाꣳ सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् । तदयꣳराजा वरुणोऽनुमन्यतां यथेयꣳस्त्री पौत्रमघं न रोदात्स्वाहा" इदमग्नये ॥१॥ "इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः । अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियꣳ स्वाहा" इदमग्नये ॥ २ ॥ "स्वस्ति नो अग्ने दिवा आपृथिव्या विश्वानि धेह्ययथा यजत्र । यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणंधाहि चित्रꣳस्वाहा" इदमग्नये ॥ ३ ॥ "सुगं नु पन्थां प्रदिशन्न एहि ज्योतिष्मध्ये ह्यजरन्न आयुः । अपैतु मृत्युरमृतं म आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा" इदं वैवस्वताय ॥ ४ ॥ परं मृत्यो अनुपरेहि पन्थां यस्ते अन्य इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मानः प्रजाꣳरीरिषो मोत वीरान्स्वाहा" इदं मृत्यवे ॥ एके संस्रवप्राशनान्ते जुहुयादितीच्छन्ति । उदकस्पर्शः । कुमार्या भ्राता उपकल्पितान् शमीपलाशमिश्राँल्लाजान् शूर्पे कृतान् स्वेनाञ्जलिना गृहीत्वा कुमार्या अञ्जलावावपति ताँल्लाजान् प्राङ्मुखी तिष्ठती कुमारी सव्यहस्तसहितेन दक्षिणहस्तेनाञ्जलिना विवाहाग्नौ जुहोति । "अर्यमणं देवं कन्या अग्निमयक्षत । स नो अर्यमा देवः प्रेतो मुञ्चतु मा पते स्वाहा" । इत्यनेन मन्त्रेण हस्तस्थितलाजानां तृतीयांशं जुहोति इदमर्यम्णे । "इयं नार्युपब्रूते लाजानावपन्तिका । आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा" इत्यनेन मन्त्रेण पुनरञ्जलिस्थितानां लाजानामर्द्धं जुहोति इदमग्नये । " इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव मम तुभ्य च संवननं तदग्निरनुमन्यतामियꣳस्वाहा " इत्यनेन मन्त्रेण सर्वाँल्लाँजान् जुहोति इदमग्नये। मन्त्रत्रयं कन्यैव पठति । अथ कुमार्याः साङ्गुष्ठं दक्षिणं हस्तं वरो गृह्णाति । "गृभ्णामि ते सौभगत्वाय हस्तं माया पत्या जरदष्टिर्यथा ऽऽसः । भगो अर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गार्हपत्याय देवाः । अमोऽहमस्मि सात्वꣳ सा त्वमस्यमो अहम् । सा माहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं तावेहि विवहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान् विन्द्यावहै बहून् ते सन्तु जरदष्टयः सम्प्रियौ रोचिष्णू सुमनस्यमानौ पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्" इत्यन्तेन मन्त्रसन्दर्भेण । अथ कुमार्याः दक्षिणं पादं स्वदक्षिणहस्तेन गृहीत्वा "आरोहेममश्मानमश्मेव त्वꣳस्थिरा भव अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायत" इत्यनेन मन्त्रेण अग्नेरुत्तरतो व्यवस्थितस्याश्मन उपरि वरः करोति । अथाश्मन्यारूढायां कुमार्यां वरो गाथां गायति " सरस्वति प्रेदमव सुभगे वाजिनीवति । यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः । यस्यां भूतꣳसमभवद्यस्यां विश्वमिदं जगत् तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः" इत्यन्ताम् । अथ वधूवरौ प्रदक्षिणमग्निं परिक्रामतः । "तुभ्यमग्ने पर्यवहन्सूर्यां वहतु ना सह । पुनः पतिभ्यो जायांदाग्ने प्रजया सह" इत्यन्तस्य मन्त्रस्य वरपठितस्यान्ते । एवं पुनर्वारद्वयं लाजावपनादिपरिक्रमणान्तं कर्म निर्विशेषं भवति । ततस्तृतीयपरिक्रमणानन्तरं कुमार्या भ्राता शूर्पकोणप्रदेशेन सर्वाँल्लाँजान् कुमार्यञ्जलावावपति सा तिष्ठती कुमारी तान् 'भगाय स्वाहा' इत्यनेन जुहोति इदं भगाय । ततः सदाऽऽचारात्तूष्णीं चतुर्थं परिक्रमणं कुरुतः, नेतरथावृत्तिम् । अथ प्रजापतये स्वाहेति ब्रह्मान्वारब्धो हुत्वा इदं प्रजापतये

इति त्यागं विधाय एनां वधूमुदीचीं सप्तपदानि प्रक्रामयति । तद्यथा—एकमिषे विष्णुस्त्वा नयत्विति वरेणोक्ते मन्त्रे वधूरेकं पदमुदग्ददाति । द्वे ऊर्ज्जे विष्णुस्त्वानयत्विति द्वितीयम् । त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु इत्युक्ते तृतीयम् । चत्वारि मायोभवाय विष्णुस्त्वानयत्विति चतुर्थम् । पञ्च पशुभ्यो विष्णुस्त्वा नयत्विति पञ्चमम् । षडृतुभ्यो विष्णुस्त्वा नयत्विति षष्ठम् । सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयत्विति सप्तमम् । एवं वर एकैकं मन्त्रं समुच्चार्योच्चार्य सप्त पदानि दापयत्युत्तरोत्तरं दक्षिणपादेन । अथ वरः स्कन्धकृतादुदकुम्भादुदकमादाय वधूमूर्द्धन्यभिषिञ्चति । "आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्" इत्यनेन मन्त्रेण पुनस्तथैवोदकमादायापोहिष्ठेति ऋचं पठित्वा तथैव मूर्द्धन्यभिषिञ्चति । अथ वरः सूर्यमुदीक्षस्वेति वधूं प्रेषयति, सा च प्रेषिता सती सूर्यमुदीक्षते, तच्चक्षुरित्यादि शृणुयाम शरदः शतमित्यन्तं मन्त्रं स्वयं पठित्वा । अथ वरो वध्वाः दक्षिणांसस्योपरि हस्तं दत्त्वा हृदयमालभते "मम व्रते ते हृदयं दधामि, मम चित्तमनुचित्तं ते अस्तु, मम वाचमेकमना जुषस्व,प्रजापतिष्ट्वा नियुनक्तु मह्यम्" इत्यन्नेन मन्त्रेण।अथ हृदयालम्भनानन्तरं वरो वधूमभिमन्त्रयते। "सुमङ्गलीरियं वधूरिमां समेत पश्यत।सौभाग्यमस्यै दत्त्वा याथास्तं विपरेतन" इत्यनेन मन्त्रेण । अथात्र शिष्टाचारात् वधूं वरस्य वामभागे उपवेशयन्ति, तस्याः सीमन्ते वरेण सिन्दूरं दापयन्ति । अथाग्नेः प्रागुदग्वा पूर्वकल्पितेऽनुगुप्त आगारे उत्तरलोम्नि प्राग्ग्रीवे आनडुहे चर्मणि तां वधूं दृढपुरुष उत्थाप्योपवेशयति "इह गावो निषीदन्त्विहाश्वा इह पूरुषाः । इहोसंहस्रदक्षिणो यज्ञ इह पूषा निषीदन्तु" इति मन्त्रेण । यद्वा जामाता दृढपुरुषस्तस्मिन्पक्षे वर उपवेशयाति वधूम् । तत आगत्य पूर्ववद्यथास्थानमुपविश्य ब्रह्मान्वारब्धो वरः'अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते' इति स्विष्टकृद्धोमं विधाय, संस्रवान्प्राश्य, ब्रह्मणे पूर्णपात्रवरयोरन्यतरं दत्त्वा स्वकीयाचार्याय वरं ददाति ब्राह्मणश्चेद् गाम् क्षत्रियश्चेद्ग्रामम्,वैश्यश्चेदश्वम्। अन्यच्च सुवर्णादिद्रव्यं यथाश्रद्धं यथाशक्ति ब्राह्मणेभ्यो दातुं संकल्पयेत्। "ग्रामवचनं च कुर्युः" इत्यनेन शिष्टाचारप्राप्तं तिलककरणाक्षतचन्दनमन्त्रविप्राशीर्वचनप्रतिष्ठामन्त्रपाठादिकं यथाकुलं यथादेशसमाचारं तत्र तत्र क्रियमाणमनुमन्येरन् । दिवा चेद्विवाहस्तदाऽस्तमिते ध्रुवं दर्शयति वरो वध्वाः । रात्रौ चेद्वरदानानन्तरमेव । तद्यथा ध्रुवमीक्षस्वेति प्रेषिता वधूः "ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि मह्यं त्वाऽदाद्बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदः शतम्" इत्यन्ते मन्त्रे वरेणोक्ते ध्रुवमीक्षते।सा वधूर्यदि ध्रुवं न पश्येत् तथापि पश्यामीत्येवं वदेत् । विवाहादारभ्य त्रिरात्रमक्षारालवणाशिनौ स्याताम् जायापती।अधःखट्वारहिते भूभागे स्वास्तृते शयीयातां त्रिरात्रमेव। "संवत्सरं समम्रं मिथुनं नोपेयाताम् द्वादशरात्रं षड्रात्रं त्रिरात्रं च" इति एते विकल्पा मिथुनकरणशक्त्यपेक्षया।अत्र त्रिरात्रपक्षाश्रयणं चतुर्थ्युत्तरकालम्।हेतुस्तु व्याख्याने विहितः। **इति विवाहकर्मपद्धतिः** ॥ ८ ॥ ॥ * ॥ * ॥

गदा० । **अथैनामुदीचीं सप्तपदानि प्रक्रामयत्येकमिषे ऊर्ज्जे त्रीणि रायस्पोषाय चत्वारि मायोभवाय पञ्च पशुभ्यः षडृतुभ्यः सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयत्विति सर्वत्रानुषजति**—अथ वर एनां कुमारीमग्नेरुत्तरतः उदीचीमुदङ्मुखीम् एकमिष इत्येतैः सप्तमन्त्रैः सप्तपदानि प्रक्रामयति प्रक्रमणं कारयति, कारितत्वात्सप्तपदानि प्रक्रमस्वेत्यध्येषणोति । कुमार्य्या दक्षिणपादं गृहीत्वा अग्रे अग्रे स्थापयतीत्यन्ये । विष्णुस्त्वा नयत्विति सर्वत्र षट्सु मन्त्रेषु अनुषङ्गः नतु सप्तमे मन्त्रे, "तुल्ययोगित्वात्साकाङ्क्षत्वाच्च पूर्वमन्त्राणाम्" इति **कर्काचार्यः** । अन्येषां भाष्यकाराणां पद्धतिकाराणां च मते सर्वमन्त्रेष्वनुषङ्गः । मन्त्रपाठो वरस्य । अत्रैवं प्रयोगः, एकमिषे विष्णुस्त्वा नयतु । द्वे ऊर्ज्जे विष्णुस्त्वा नयतु । त्रीणि रायस्पोषाय वि० । चत्वारि मायोभवाय वि० । पञ्च पशुभ्यो वि० । षडृतुभ्यो वि० । सप्तमे प्रक्रमे सखे सप्तपदा भव सा मामनुव्रता भवेति । प्रक्रमेषु सव्यपादस्य नातिक्रमणमिति रेणुदीक्षिताः । मन्त्रार्थः । इषे अन्नाय ऊर्ज्जे बलाय रायस्पोषाय धनपुष्ट्यै, मायः सुखं तस्य भव उत्पत्तिः पश्वादिभ्यस्तत्तत्सुखाय । सखे इहामुत्रमित्र सा त्वं सप्तपदा भूरादिसप्तलोकप्रख्याता भव मामनुवर्त्तिनी च भव । **निष्क्रमणप्रभृत्युदकुम्भं स्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतः स्थितो भवति**—निष्क्रमणं पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामतीत्येतावदुच्यते । तदारभ्य कश्चित्पुरुषः उदकपूर्णं कुम्भं स्कन्धे गृहीत्वा विवाहाग्नेर्दक्षिणतो वाग्यतस्तूष्णीं तिष्ठेत् । **उत्तरत एकेषाम्**—एकेषामाचार्याणां मते अग्नेरुत्तरतस्तिष्ठति

अतश्च विकल्पः । **तत एनां मूर्द्धन्यभिषिञ्चति आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजमिति**—ततस्तस्मादुदकुम्भाद्धस्तेन जलमादाय एनां वधूं मूर्ध्नि शिरसि वर एव आपः शिवा इत्यनेन मन्त्रेणाभिषिञ्चति । मन्त्रार्थः । या आपः शिवाः कल्याणहेतवः शिवतमाः अतिशयाभ्युदयकारिण्यः शान्ताः सुखकर्त्र्यः शान्ततमाः परमानन्ददात्र्यः ता आपस्ते तव भेषजमारोग्यं कृण्वन्तु कुर्वन्तु । **आपोहिष्ठेति च तिसृभिः**—चशब्दात्तस्मादुदकादापोहिष्ठेति त्रिभिर्मन्त्रैरभिषेकः कार्यः । **अथैनाꣳ सूर्यमुदीक्षयति तच्चक्षुरिति**—अथैनां वधूं वरः सूर्यमुदीक्षयति सूर्यावेक्षणं कारयति, उदीक्षयतीति कारितत्वात् अध्येषणा सूर्यमुदीक्षस्वेति, सा च वरेण प्रेरिता सूर्यं पश्यति तच्चक्षुरित्यनेन मन्त्रेण, दिवा विवाहपक्षे एतदिति **रेणुदीक्षितहरिहरौ** । अस्माभिस्तु सूर्यावेक्षणान्यथाऽनुपपत्त्या "अस्तमिते ध्रुवं दर्शयति" इत्यत्रास्तमितग्रहणाच्च एतद्गृह्यानुसारिणां दिवैव विवाह इत्युच्यते । **अथास्यै दक्षिणाꣳसमधिहृदयमालभते मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यमिति**—अस्या इति चतुर्थी षष्ठ्यर्थे । अस्याः वध्वाः दक्षिणांसमाधि—दक्षिणस्य अंसस्य स्कन्धस्य अधि उपरि, हस्तं नीत्वा मम व्रते त इत्यनेन मन्त्रेण तस्या हृदयमालभते वरः । हे कन्ये इत्यध्याहारः, मम व्रते शास्त्रविहितनियमादौ ते तव हृदयं मनः दधामि स्थापयामि, किञ्च मम चित्तमनु मम चित्तानुकूलं ते तव चित्तमस्तु, त्वं च मम वाचं वचनम् एकमना अव्यभिचारिमनोवृत्तिर्जुषस्व हृष्टचित्तादरेण कुरुष्व, त्वा त्वां स च एव प्रजापतिर्मह्यं मदर्थं मां प्रसादयितुमित्यर्थः, नियुनक्तु नियोजयतु । **अथैनामभिमन्त्रयते सुमङ्गलीरियं वधूरिमाꣳ समेत पश्यत । सौभाग्यमस्यै दत्त्वा याथास्तं विपरेतनेति**—वर एनां वधूं सुमङ्गलीरित्यनेन मन्त्रेणाभिमन्त्रयते । अत्राचाराच्चतस्रः स्त्रियो मङ्गलं कुर्वन्ति । तथा च **कारिकायाम्**—"पतिपुत्रान्विता भव्याश्चतस्रः सुभगा अपि । सौभाग्यमस्यै दद्युस्ता मङ्गलाचारपूर्वकम्" इति । मन्त्रार्थः । हे विवाहदेवताः इयं वधूः सुमङ्गलीः शोभनमङ्गलरूपा, विसर्गश्छान्दसः । अत इमां कन्यां समेत सङ्गच्छत सङ्गत्य च इमां पश्यत दृष्ट्या विलोकयत, किञ्च अस्यै कन्यायै सौभाग्यं दत्त्वा अस्तं गृहं याथ यात इत्यर्थः । न विपरेत न विमुखतया पराइत अपगच्छत पुनरपि पुत्रादिमङ्गलमाशास्य पुनरागमनाय व्रजत इत्यर्थः । यद्वा—यद्यस्तं याथ तर्हि न विपरेत नेति "अस्तंगृहाः" इति श्रुतेः । **तां दृढपुरुष उन्मथ्य प्राग्वोदग्वाऽनुगुप्त आगार आनुडुहे रोहिते चर्मण्युपवेशयतीह गावो निषीदन्त्विहाश्वा इह पूरुषाः इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदन्त्विवाति**—ततो वरस्तां वधूम् उन्मथ्य उत्क्षिप्य उत्थाप्य, प्राक् प्राच्यामुदगुदीच्यां वा अनुगुप्ते आगारे परिवृते गृहे, रोहिते रक्तवर्णे आनडुहे चर्मणि उपवेशयतीह गाव इत्यनेन मन्त्रेण । चर्म च प्राग्ग्रीवमुत्तरलोमास्तीर्णं भवति । "चर्माण्युत्तरलोमानि प्राग्ग्रीवाणि" इति परिभाषितत्वात् । दृढपुरुषः कश्चिद्बलवान् पुरुष इति **हरिहरः** । दृढपुरुषो जितेन्द्रिय इति **भर्तृयज्ञः** । जामातैव दृढपुरुष इति **रेणुकदीक्षितगङ्गाधरौ** । अस्माकमपि मते वर एव । तस्य च दृढत्वं जितेन्द्रियत्वेन, अन्यथा वध्वा अनुगुप्तागारनयने मनसि उन्मादोत्पत्तेः, नह्यद्यापि भार्यात्वमुत्पन्नमिति । मन्त्रार्थः । इह कन्यानिवेशने गावः, अश्वाः, पुरुषाश्च निषीदन्तु वसन्तु । इह-पदावृत्तिः कर्तृभेदापेक्षया, किञ्च उ एवार्थे इहैव सहस्रं गावो दक्षिणा यस्य स यज्ञः पूषा पुष्टिकरो निषीदतु "पूषा वै सहस्रदक्षिण आस" इति श्रुतेः । **ग्रामवचनं च कुर्युर्विवाहश्मशानयोः**—विवाहे श्मशाने च वृद्धानां स्त्रीणां वचनं वाक्यं कुर्युः । सूत्रे अनुपनिबद्धमपि वधूवरयोर्मङ्गलसूत्रं गले मालाधारणम्, उभयोर्वस्त्रान्ते ग्रन्थिकरणम्, करग्रहणे न्यग्रोधपुटिकाधारणं, वरागमने नासिकाधारणं, वरहृदये दध्यादिलापनादि. ताश्च यत्स्मरन्ति तदपि कर्तव्यमित्यर्थः । चशब्दोद्देशाचारोऽपि । ग्रामशब्देन स्वकुलवृद्धाः स्त्रियोऽभिधीयन्ते ता हि पूर्वपुरुषैरनुष्ठीयमानं सदाचारं स्मरन्ति । ग्रामवचनं "लोकवचनम्" इति **भर्तृयज्ञः** । वृद्धानां स्त्रीणां वचनं कार्यमिति कुत इत्यत आह—**ग्रामं प्रविशतादिति वचनात्तस्मात्तयोर्ग्रामः प्रमाणमिति** श्रुतेः—"ग्रामं वृद्धानां स्त्रीणामाचारं प्रविशतात्" इति स्मृतिवचनात् । ननु ग्रामं प्रविशतादिति स्मृतिवचनाद्धरिद्रालपनादौ अस्तु प्रामाण्यं, यत्र तु अथैनामश्मानमारोहयतीत्येतदनन्तरं तूष्णीं वरस्य पाषाणावरोहणं कारयित्वा, कुमार्या भ्राता वराङ्गुष्ठोपरि उपलं निधाय, वराद्रूप्यादि गृह्णाति ताः स्मरन्ति तदप्रमाणं, लोभमूलत्वेन वैसर्जनयिवस्त्रवदित्यत आह—"तयोर्विवाहश्मशानयोर्ग्रामः प्रमाणम्" इति श्रुतिवचनात्ताभिर्यत्स्मर्यते रूप्यग्रहणादि, तदपि प्रमाणमिति प्रत्यक्षश्रुतिमूलत्वात् । **आचार्याय वरं ददाति**—ततो वरः आचार्याय स्वकीयाय वरं ददाति ।

गौर्ब्राह्मणस्य वरो ग्रामो राजन्यस्याश्वो वैश्यस्य—वरशब्दार्थव्याख्यानं करोति ब्राह्मणश्चेत्परिणेता तदा गां वरं ददाति । क्षत्रियश्चेद्वरस्तदा ग्रामं वरं ददाति । वैश्यश्चेद्वरस्तदाऽश्वं वरं ददाति । एते वरा विवाहे एव प्रकरणात् । "सर्वासु वरचोदनासु गवादयो वरशब्दवाच्याः" इति **भर्तृयज्ञः** । **अधिरथꣳ शतं दुहितृमते**—ददातीत्यनुवर्तते, दुहितृमाँश्च यस्य दुहितर एव न पुत्रास्तस्मै दुहितृमते, रथेन अधिकं गोशतं दत्त्वा तस्य कन्यामुद्वहेत्। प्रतिषेधत्यसौ **मनुः**—"यस्यास्तु न भवेद् भ्राता न विज्ञायेत वा पिता । नोपयच्छेत तां कन्यां पुत्रिकाधर्मशङ्कया" इति ॥ तस्याः परिक्रयाय रथाधिकं गवां शतं ददाति । **अस्तमिते ध्रुवं दर्शयति ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि मह्यं त्वादाद्बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदः शतमिति**—अस्तमिते सूर्ये वधूं ध्रुवसञ्ज्ञं नक्षत्रं दर्शयति ध्रुवमसीत्यनेन मन्त्रेण । नात्र ध्रुवमीक्षस्वेत्यध्येषणा, अयमेव मन्त्रः कारितार्थे । अत्र **कर्कभाष्यम्**—अस्तमिते ध्रुवं दर्शयति ध्रुवमसीत्यनेन मन्त्रेण कारितार्थे चायमेव मन्त्रः । पश्यामीत्यन्तर्भूतण्यर्थः । यदुक्तं भवति दर्शयामीति तदुक्तं भवति पश्यामीति मन्त्रोऽपि चैवं व्यवस्थितः । "ध्रुवैधि पोष्ये मयि मह्यं त्वादाद् बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदः शतम्" इति। कुमार्यैवोच्यत इति । वध्वा मन्त्रपाठ इति भ्रान्तिमान् **गङ्गाधरः**, ध्रुवमीक्षस्वेति प्रैष इति **हरिहरगङ्गाधरौ** । मन्त्रार्थः । हे वधु त्वं ध्रुवमसि ध्रुवा शाश्वती असि भवसि, यतः त्वा त्वां ध्रुवं तारकाविशेषं पश्यामि, दर्शयामि अत्रान्तर्भूतो णिच् ज्ञेयः । अतस्त्वमपि ध्रुवा शाश्वती पोष्या पोषणीया मत्प्रजापोष्ट्री वा एधि भव वर्द्धयेति वा । एतदर्थमेव बृहस्पतिर्ब्रह्मा त्वा त्वां मह्यमदात् दत्तवान्, अतो मया पत्या भर्त्रा सह प्रजावती पुत्रपौत्रादियुक्ता शतं शरदो वर्षाणि जीव प्राणिहि । **सा यदि न पश्येत्पश्यामीत्येव ब्रूयात्**—सा कन्या यदि ध्रुवसञ्ज्ञकं सूक्ष्मं नक्षत्रं न पश्येत् तदा पश्यामीत्येव वक्तव्यम्, तया न पश्यामीति वचनं न ब्रूयात् । **त्रिरात्रमक्षारालवणाशिनौ स्याताम्**—लग्नदिनमारभ्य त्रिरात्रं यावत् वरवध्वौ अक्षारम् अलवणं चाश्नीत इत्येवंशीलौ स्याताम् । **अधः शयीयाताम्**—अधोभूमौ स्वपेतां, खट्वाव्युदासार्थोऽधःशब्दः नास्तरणव्युदासार्थः । **संवत्सरं न मिथुनमुपेयातां द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः**—विवाहदिनमारभ्य संवत्सरं यावत् न मिथुनमुपेयातां ब्रह्मचारिणौ स्याताम्, द्वादशरात्रं वा षड्रात्रं वा त्रिरात्रं वा । इति श्रीत्रिरग्निचित्सम्राट्स्थपतिश्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे अष्टमी कण्डिका ॥ ८ ॥ * ॥

अथ विवाहे **पदार्थक्रमः** । तत्र तावदुपयोगितया किञ्चित्संक्षेपेणोच्यते । "अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः । आश्रमेण विना तिष्ठन् प्रायश्चित्ती भवेद्धि सः" इति दक्षस्मृतेः । "अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् । अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ॥ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्" इति च **याज्ञवल्क्योक्तेः**। अविप्लुतब्रह्मचर्यो बाह्याभ्यन्तरलक्षणयुक्तां स्त्रियमुद्वहेत् । "अत्र कुलमग्रे परीक्षेत" इति गृह्यान्तरवचनादादौ सदाचारादिगुणवत्तया हीनक्रियत्वादिदोषहीनतया च परीक्ष्य, कुलं तज्जोद्वाह्या तदनु लक्षणान्यपि परीक्ष्यम्, लक्षणानि च शुभाशुभसूचकानि । तनुलोमकेशदशनत्वगादीनि प्रत्यक्षगम्यानि बाह्यानि । तथा च **मनुः**—"अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् । तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रियम्" इति । यान्यान्तराणि तान्युक्तान्याश्वलायनगृह्ये—"दुर्विज्ञेयानि लक्षणान्यष्टौ पिण्डान् कृत्वा ऋतमग्रे प्रथमं जज्ञे ऋते सत्यं प्रतिष्ठितम्, यदिदं कुमार्यभिजानीयात्तदियमिह प्रतिपद्यताम्, यत्सत्यं तद्दृश्यताम्" इति पिण्डानभिमन्त्र्य, कुमारीं ब्रूयादेषामेकं गृहाणेति क्षेत्राच्चेदुभयतःसस्याद् गृह्णीयादन्नवत्यस्याः प्रजा भविष्यतीति विन्द्याद्गोष्ठात्पशुमती, वेदिपुरीषाद्ब्रह्मवर्चस्विनी, अविदासिनो ह्रदात्सर्वसंपन्ना,देवनात्कितवी, चतुष्पथाद्विप्रवाजिनीरिणादधन्या,श्मशानात्पतिघ्नी" इति । अस्यार्थः । दुर्विज्ञेयानि लक्षणान्येवं परीक्षेत । क्षेत्रादिभ्यो मृदमादाय आहृत्य अष्टौ पिण्डान् कृत्वा ऋतमग्रे इत्यनेन मन्त्रेण मृत्पिण्डानभिमन्त्र्य कुमारीं ब्रूयात् एषां पिण्डानां मध्ये एकं पिण्डं गृहाणेति । यदेकस्मिन्वत्सरे द्विः फलति तदुभयतःसस्यं क्षेत्रं तस्मात्क्षेत्रादाहृतपिण्डं गृह्णीयाच्चेदन्नवती अस्याः प्रजा भविष्यति इति विन्द्यात् । एवमुत्तरत्रापि ज्ञेयम् । अपवृक्ते कर्मणि या वोदिः सा वेदिपुरीषम् । अविदासीनो नाम अशोष्यो ह्रदः, देवनं द्यूतस्थानम्, ईरिणमूषरम्, विप्रवाजिनी विविधं प्रव्रजनशीला स्वैरिणीति यावत् । पतिं हन्तीति पतिघ्नी । अत्रैवं क्रमः, क्षेत्रादिभ्यो मृदाहरणं पिण्डाष्टककरणमन्यस्य ऋतमग्र इति पिण्डाभिमन्त्रणम्, एषामेकं गृहाणेति प्रैषः, क्षेत्रपिण्डग्रहणे अस्याः प्रजा अन्नवती भविष्यतीति ज्ञातव्यम् । गोष्ठिपिण्डादाने

पशुमती । वेदिपिण्डाऽऽदाने ब्रह्मवर्चस्विनी । ह्रदपिण्डाऽऽदाने सर्वसम्पन्ना । द्यूतस्थानपिण्डाऽऽदाने द्यूतिनी । चतुष्पथपिण्डाऽऽदाने स्वैरिणी । ऊषरपिण्डाऽऽदाने धनहीना । श्मशानभूमिपिण्डाऽऽदाने पतिघ्नी । अत्र प्रजास्तुतिनिन्दाद्वारेण सैव वस्तुतो निन्दिताऽनिन्दिता चेति मन्तव्यम् । उत्तरैस्तु त्रिभिर्वाक्यैः सैव निन्द्यते । अनन्यपूर्विकेत्यनेन वाग्दत्ता, मनोदत्ता, अग्निं परिगता, सप्तपदीं नीता, भुक्ता, गृहीतगर्भा, प्रसूता चेति सप्त पुनर्भ्वो व्यावर्त्यन्ते । कान्तां वोढुर्मनोनयनयोराह्लादकरीम् । असपिण्डेति सापिण्ड्यवर्जनम् । तच्चैकशरीरावयवान्वयेन भवति । एकस्य हि पितुर्मातुर्वा शरीरावयवाः पुत्रपौत्रादिषु साक्षात्परम्परया वा शुक्रशोणितादिरूपेणानुस्यूताः । यद्यपि पत्न्याः पत्या सह भ्रातृपत्नीनां च परस्परं नैतत्सम्भवति तथाप्याधारत्वेनैकशरीरावयवान्वयोऽस्त्येव । " एकस्य हि पितृशरीरस्यावयवाः पुत्रद्वारा तास्वाहिताः" इति **मिताक्षराकारमदनपारिजातादय** आहुः । कथञ्चिदेकपिण्डक्रियाप्रवेशेन निर्वाप्य साविण्ड्यं **चन्द्रिकापरार्कमेधातिथिमाधवादयो** वदन्ति । नन्वेवं विधातृशरीरावयवान्वयेन सापिण्ड्यातिप्रसङ्गेन एकपिण्डदानक्रियान्वयित्वेन वा गुरुशिष्यादेरपि श्राद्धदेवतात्वात्सापिण्ड्यमिति न काप्यसपिण्डेत्यत आह— **याज्ञवल्क्यः**—"पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा" इति । मातृपक्षे पञ्चमात् पितृपक्षे सप्तमादूर्ध्वं सापिण्ड्यं निवर्तते इति शेषः । कूटस्थमारभ्यात्र गणना कार्या। तदुक्तम्—"वध्वा वरस्य वा तातः कूटस्थाद्यदि सप्तमः । पञ्चमी चेत्तयोर्माता तत्सापिण्ड्यं निवर्तते" इति । कूटस्थो मूलपुरुषः, यतः सन्तानभेदः । यवीयसीम् स्वापेक्षया वयसा वपुषा च न्यूनाम् । अरोगिणीमचिकित्स्यराजयक्ष्मादिरोगरहिताम्, भ्रातृमतीमिति पुत्रिकाकरणशङ्कानिवृत्त्यर्थम्, यत्र तु पुत्रिकाकरणाभावनिश्चयस्तामभ्रातृकामप्युद्वहेत् । "असमानार्षगोत्रजाम्" ऋषेरिदमार्षम्, गोत्रप्रवर्त्तकस्य मुनेर्व्यावर्तकः प्रवर इत्यर्थः। गोत्रं वंशपरम्पराप्रसिद्धम् । स्वसमाने आर्षगोत्रे यस्य तस्माज्जाता या न भवति तां यास्कवाधूलमौनमूकानां भिन्नगोत्राणामपि भार्गववैतहव्यसावेधसेति प्रवरैक्यमस्ति तत्र विवाहो माभूदिति **असमानार्षजामित्युक्तम्**, आङ्गिरसाम्बरीषयौवनाश्वेति, मान्धात्रम्बरीषयौवनाश्वेति । आङ्गिरसमान्धातृप्रवरभेदेऽपि यौवनाश्वगोत्रैक्यम्, तादृशविवाहवारणाया**समानगोत्रजामिति** उक्तम् । तथा च गोत्रप्रवरौ पृथक्पर्युदासे निमित्तभूतौ । प्रवरैक्ये विशेषमाह—**बौधायनः**—"पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः । भृग्वङ्गिरोगणेष्वेव शेषेष्वेकोऽपि वारयेत्" इति। विवाहम् इति शेषः । इति **संक्षिप्तगोत्रप्रवरनिर्णयः** । अथ समानार्षगोत्रजाविवाहे प्रायश्चित्तम् । "परिणीय सगोत्रां तु समानप्रवरां तथा। त्यागं कुर्याद् द्विजस्तस्यास्ततश्चान्द्रायणं चरेत् ॥" त्यागश्चोपभोगस्यैव न तु तस्याः, "समानप्रवरां कन्यामेकगोत्रामथापि वा । विवाहयति यो मूढस्तस्य वक्ष्यामि निष्कृतिम् ॥ उत्सृज्य तां ततो भार्यां मातृवत्परिपालयेत्" इति **शातातपस्मृतेः** । समानप्रवरस्वरूपं च **बौधायनेनोक्तम्** । "एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते । तावत्समानगोत्रत्वमृते भृग्वङ्गिरोगणात्" इति ॥ समानगोत्रत्वं समानप्रवरत्वमित्यर्थः । अथ सापत्नविषये सापिण्ड्यम् । सपत्नमातामहकुलेऽप्यातिदेशिकात्सापिण्ड्यादविवाहः । तथाच **सुमन्तुः**—" पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्तिद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भागिन्यस्तदपत्यानि भागिनेयानि अन्यथा सङ्करकारिण्यः स्युः" इति । अत्र " यावद्वचनं वाचनिकम् " इति न्यायेन परिगणितेष्वेवातिदेशिकं सापिण्ड्यम् नतु पञ्चमसप्तमपर्यन्तम् । क्वचित्तु वचनादेव विवाहनिषेधः । तथाच **बह्वृचगृह्यपरिशिष्टे**—" अविरुद्धसम्बन्धामुपयच्छेत्" इत्युक्त्वा स्वयमेव विरुद्धं सम्बन्धं दर्शयति, यथा भार्यास्वसुर्दुहिता पितृव्यपत्नीस्वसा चेति । तथा **नारदः**—" प्रत्युद्वाहो नैव कार्यो नैकस्मै दुहितृद्वयम् । नैवैकजन्ययोः पुंसोरेकजन्ये च कन्यके॥ नैवं कदाचिदुद्वाहो नैकदा मुण्डनद्वयम् ।" अन्यच्चापि। "एकजन्ये च कन्ये द्वे पुत्रयोर्नैकजन्मनोः । न पुत्रीद्वयमेकस्मै प्रदद्याद्वै कदाचन" इति ॥ अथ **वरगुणाः** । तत्र "बुद्धिमते कन्यां प्रयच्छेत् " इति **बह्वृचगृह्यम्** । **यमः**—" कुलं च शीलं च वयश्च रूपं विद्यां च वित्तं च सनाथतां च । एतान् गुणान् सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् ॥" **याज्ञवल्क्यः**—"एतैरेव गुणैर्युक्तः सवर्णश्रोत्रियो वरः । यत्नात्परीक्षितः सम्यक्* युवा धीमान् जनप्रियः ॥" एतैः कन्यागुणैरनन्यपूर्वकत्वयवीयस्त्वभ्रातृमत्वव्यतिरिक्तैर्युक्तः । **कात्यायनः**—"उन्मत्तः पतितः कुष्ठी षण्ढश्चैव स्वगोत्रजः । चक्षुःश्रोत्रविहीनश्च तथाऽपस्मारदूषितः ॥ वरदोषाः स्मृता ह्येते कन्यादोषाः प्रकीर्तिताः ।" **नारदः**—"परीक्ष्य पुरुषः पुंस्त्वे निजैरेवाङ्गलक्षणैः । पुंमाश्चेदविकल्पेन स कन्यां लब्धुमर्हति ॥ सुबद्धजत्रुजान्वस्थिसुबद्धांसशिरोधरः ।

---

* पुंस्त्वे इति वा पाठः ।

यस्याविप्लवते रेतो ह्लादि मूत्रं च फेनिलम् ॥ पुमान्स्याल्लक्षणैरेभिर्विपरीतस्तु षण्ढकः । अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं वीजिनो नराः ॥ क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हति ॥" अथ कन्यावरयोर्बृहस्पत्यानुकूल्याभावे तदाऽऽनुकूल्याय **बृहस्पतिशान्तिः** । तत्र **शौनकः**—"कन्योद्वाहस्य काले तु आनुकूल्यं न विद्यते । ब्राह्मणस्योपनयने गुरोर्विधिरुदाहृतः ॥ सुवर्णेन गुरुं कृत्वा पीतवस्त्रेण वेष्टयेत् । ईशान्यां धवलं कुम्भं धान्योपरि निधाय च ॥ दमनं मधुपुष्पं च पलाशं चैव सर्षपान् । मांसी गुडुच्यपामार्गो विडङ्गी शङ्खिनी वचा ॥ सहदेवी हरिक्रान्ता सर्वौषधिशतावरी । बला च सहदेवी च निशाद्वितयमेव च ॥ कृत्वाऽऽज्यभागपर्यन्तं स्वशाखोक्तविधानतः । यथोक्तमण्डलेऽभ्यर्च्य पीतपुष्पाक्षतादिभिः ॥ देवपूजोत्तरे काले ततः कुम्भानुमन्त्रणम् । अश्वत्थसमिधश्चाज्यं पायसं सर्पिष युतम् ॥ यवव्रीहितिलाः साज्या मन्त्रेणैव बृहस्पतेः । अष्टोत्तरशतं सर्वं होमशेषं समापयेत् । पुत्रदारसमेतस्य अभिषेकं समाचरेत् । कुम्भाभिमन्त्रणोक्तैश्च समुद्रज्येष्ठमन्त्रतः ॥ प्रतिमां कुम्भवस्त्रं च आचार्याय निवेदयेत् । ब्राह्मणान्भोजयेत्पश्चाच्छुभं स्यान्नात्र संशयः ॥" अथापरिहार्यकन्यावैधव्ययोगे तूच्यते । तत्र **मार्कण्डेयपुराणे**—"बालवैधव्ययोगे तु कुम्भेषु प्रतिमादिभिः । कृत्वा लग्नं ततः पश्चात्कन्योद्वाह्येति चापरे ॥" तत्र पुनर्भूदोषाभाव उक्तो **विधानखण्डे**—" स्वर्णाम्बुपिप्पलानां च प्रतिमा विष्णुरूपिणी । तया सह विवाहे तु पुनर्भूत्वं न जायते ॥" **सूर्यारुणसंवादे**—" विवाहात्पूर्वकाले च चन्द्रताराबलान्विते । विवाहोक्ते च मन्थन्या कुम्भेन सह चोद्वहेत् ॥ सूत्रेण वेष्टयेत्पश्चाद्दशतन्तुविधानतः । कुङ्कुमालङ्कृतं देहं तयोरेकान्तमन्दिरे ॥ ततः कुम्भं च निस्साय प्रभज्य सलिलाशये ॥ ततोऽभिषेचनं कुर्यात्पञ्चपल्लववारिभिः ॥" कुम्भप्रार्थनाऽपि तत्रैवोक्ता—"वरुणाङ्गस्वरूपाय जीवनानां समाश्रय । पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु ॥ देहि विष्णो वरं देव कन्यां पालय दुःखतः । ततोऽलङ्कारवस्त्रादि वराय प्रतिपादयेत् ।" इति **कुम्भविवाहः** । तत्रैव मूर्तिदानमप्युक्तम् " ब्राह्मणं साधुमामन्त्र्य सम्पूज्य विविधार्हणैः । तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं चतुर्भुजाम् ॥ शुद्धवर्णसुवर्णेन वित्तशक्त्याऽथवा पुनः । निर्मितां रुचिरां शङ्खगदाचक्राब्जसंयुताम् ॥ दधानां वाससी पीते कुमुदोत्पलमालिनीम् ॥ सदक्षिणां च तां दद्यान्मन्त्रमेनमुदीरयेत् । यन्मया प्राचि जनुषि त्यक्त्वा पतिसमागमम् ॥ विषोपविषशस्त्राद्यैर्हतो वाऽतिविरक्तया । प्राप्य मानं महाघोरं यशःसौख्यधनापहम् ॥ वैधव्याद्यतिदुःखौघनाशाय सुखलब्धये । बहुसौभाग्यलब्धौ च महाविष्णोरिमां तनुम् ॥ सौवर्णीं निर्मितां शक्त्या तुभ्यं सम्प्रददे द्विज । अनघाऽद्याहमस्मीति त्रिवारं प्रजपेदिति ॥ एवमस्त्विति तस्योक्तं गृहीत्वा स्वगृहं विशेत् । ततो वैवाहिकं कुर्याद्विधिं दाता मृगीदृशः ॥" अन्येऽप्यश्वत्थवृक्षविवाहवृक्षसेचनादयस्तत्रैव ज्ञेयाः । ग्रन्थगौरवभयान्नेहोच्यन्ते । अथ विवाहकाले कन्या ऋतुमती चेत्तत्र **यज्ञपार्श्वे**—"विवाहे विहिते तन्त्रे होमकाले उपस्थिते । कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः ॥ स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि । युञ्जानामाहुतिं हुत्वा ततः कर्मणि योजयेत् ॥" "युञ्जानः प्रथमम्" इत्येनन मन्त्रेणाहुतिं हुत्वेत्यर्थः । यद्वा—"विवाहहोमे प्रक्रान्ते यदि कन्या रजस्वला। त्रिरात्रं दम्पती स्यातां पृथक्शय्यासनाशनौ॥चतुर्थेऽहनि सुस्नातौ तस्मिन्नग्नौ यथाविधि" इति। जुहुयाताग्मिति शेषः।अथ विवाहे **आशौचनिर्णयः**।विधिवत्कृते कन्यावरणे त्रिरात्रादिव्रतसमाप्तिपर्यन्तमध्ये आशौचप्राप्तौ तदपोह्य सद्यःशौचं **चन्द्रिकाकार** आह । तत्र **याज्ञवल्क्यः**—"दाने विवाहे यज्ञे च संग्रामे देशविप्लवे । आपद्यपि च कष्टायां सद्यःशौचं विधीयते" इति । दातुर्वरस्य कन्यायाश्च सद्यःशौचम् । **बृहस्पतिः**—"विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके । पूर्वसङ्कल्पितार्थेषु न दोषः परिकीर्तितः ।" **षट्त्रिंशन्मते**—"विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके । परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः ॥ व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे । प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥" प्रारम्भश्च तेनैवोक्तः "प्रारम्भो वरणं यज्ञे सङ्कल्पो व्रतसत्रयोः । नान्दीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया" इति । वरणमिति मधुपर्कपरम् । तथा च **ब्राह्मे**—"गृहीतमधुपर्कस्य यजमानाच्च ऋत्विजः । पश्चादशौचे पतिते न भवेदिति निश्चयः" "मधुपर्कात्पूर्वं तु भवत्येवमाशौचम्" इति **रामाण्डारभाष्ये** । **शुद्धिविवेकेऽ**प्येवमेव । नान्दीमुखविधिश्चावश्यकत्वे आधिक उक्तः—"एकविंशत्यहर्यज्ञे विवाहे दश वासराः । त्रिषट् चौलोपनयने नान्दीश्राद्धं विधीवते" इति । तेन एकविंशत्याद्यहरन्तःपाती यदि यज्ञादिर्भवति तदा आवश्यके यज्ञादौ पूर्वं श्राद्धं कुर्यादित्यर्थः । प्रारम्भाभावेऽपि कन्याया अधार्यत्वे विवाह इत्यर्थः । सन्निहितलग्नान्तराभावे च होमादिपूर्वकं विष्णुरनुज्ञामाह—"अनारब्धविशुध्यर्थं कूष्माण्डैर्जुहुयाद् घृतम् । गां दद्यात्पञ्चगव्याशी ततः शुध्यति सूतकी ॥"उपक-

पितबहुसम्भारस्यापि तत्सन्निहितलग्नान्तराभावेन सम्भारधारणाशक्तौ आशौचाभावमाह **विष्णुः**–"न देवप्रतिष्ठाविवाहयोः पूर्वसम्भृतयोः" इति । अथ **रजोदोषे निर्णयः** । ""वधूवरान्यतरयोर्जननी चेद्रजस्वला । तस्याः शुद्धेः परं कार्यं माङ्गल्यं **मनुरब्रवीत्** ।" **माधवीये**–"प्रारम्भात्प्राग्विवाहस्य माता यदि रजस्वला । निवृत्तिस्तस्य कर्तव्या सहत्वश्रुतिचोदनात्" प्रारम्भात्प्रागिति नान्दीश्राद्धात्प्रागिति ज्ञेयम्, नान्दीश्राद्धं विवाहादावित्यादिना तस्यैव प्रारम्भोक्तेः । **वृद्धमनुः**–"विवाहव्रतचूडासु माता यादि रजस्वला । तदा न मङ्गलं कार्यं शुद्धौ कार्यं शुभेप्सुभिः" इति । **मेधातिथिः**–"चौले च व्रतबन्धे च विवाहे यज्ञकर्मणि । भार्या रजस्वला यस्य प्रायस्तस्य न शोभनम् ॥" **गर्गः**–"यस्योद्वाहादिमाङ्गल्ये माता यदि रजस्वला । तदा न तत्प्रकर्तव्यमायुःक्षयकरं यतः ॥" **बृहस्पतिः**–"वैधव्यं च विवाहे स्याज्जडत्वं व्रतबन्धने । चूडायां च शिशोर्मृत्युर्विघ्नं यात्राप्रवेशयोः ॥ " आभ्युदयिकश्राद्धोत्तरं तु **कपर्दिकारिकासु** विशेषः—" सूतिकोदक्ययोः शुद्धयै गां दद्याद्धोमपूर्वकम् । प्राप्ते कर्मणि शुद्धिः स्यादितरस्मिन्न शुद्ध्यति ॥ अलाभे सुमुहूर्तस्य रजोदोषे च सङ्गते । श्रियं सम्पूज्य तत्कुर्यात्पाणिग्रहणमङ्गलम् ॥ हैमीं माषमितां पद्मां श्रीसूक्तविधिनाऽर्चयेत् । प्रत्यृचं पायसं हुत्वा अभिषेकं समाचरेत्" इति । अथ **विवाहभेदाः** । **मनुः**–" ब्राह्मो दैवस्तथाचार्षः प्राजापत्यस्तथाऽऽसुरः । गान्धर्वो राक्षसश्चैव पैशाचस्त्वष्टमो मतः ॥ चत्वारो ब्राह्मणस्याद्या राज्ञां गान्धर्वराक्षसौ । राक्षसश्चासुरो वैश्ये शूद्रे चान्त्यस्तु गर्हितः " अन्त्यः पैशाचः । **याज्ञवल्क्यः**–" ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता । तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥ यज्ञस्थऋत्विजे दैव आदायार्षस्तु गोद्वयम् । चतुर्दश प्रथमजः पुनात्युत्तरतश्च षट् ॥ इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने ॥ स कायः पावयेत्तज्जः षट् षड् वंश्यान्सहात्मना ॥ आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः । राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात्" इति । गान्धर्वादिष्वपि पतिभावाय पश्चाद्धोमादि सप्तपदीपर्यन्तं कार्यम् । " गान्धर्वासुरपैशाचा विवाहो राक्षसश्च यः । पूर्वं परिग्रहस्तेषु पश्चाद्धोमो विधीयते" इति परिशिष्टात् । होमाद्यभावे वरान्तराय देया, सति तु नेति **बौधायन** आह–" बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता । अन्यस्मै विधिवद्देया यथा कन्या तथैव सा " इति । बलादिति छलादेरुपलक्षणम् । अथ वाग्दानोत्तरं वरमरणे विशेषः–"अद्भिर्वाचा च दत्तायां म्रियेतोर्ध्वं वरो यदि । न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा ॥" देशान्तरगमने तु **कात्यायनः**–"वरयित्वा तु यः कश्चित्प्रवसेत्पुरुषो यदा । ऋत्वागमांस्त्रीनतीत्य कन्यान्यं वरयेत्पतिम् ॥" **याज्ञवल्क्यः**–"दत्तामपि हरेत्पूर्वाच्छ्रेयाँश्चेद्वर आव्रजेत्" **वसिष्ठः**–"कुलशीलविहीनस्य षण्ढादिपतितस्य च । अपस्मारिविधर्मस्य रोगिणां वेषधारिणाम् ॥ दत्तामपि हरेत्कन्यां सगोत्रोढां तथैव च ।" अथ धर्मार्थविवाहकरणे फलम् । तत्र **महाभारते**–"ज्ञात्वा स्ववित्तसामर्थ्यादेकं चोद्वाहयेद्द्विजम् । तेनाप्याप्नोति तत्स्थानं शिवभक्तेन यद्ध्रुवम् ॥ मातृपितृविहीनं तु संस्कारोद्वाहनादिभिः । यः स्थापयति तस्येह पुण्यसंख्या न विद्यते ॥" **भविष्ये**–"विवाहादिक्रियाकाले तत्क्रियासिद्धिकारणम् । यः प्रयच्छति धर्मज्ञः सोऽश्वमेधफलं लभेत् ॥" अथ **वाग्दानविधिः** । ज्योतिःशास्त्रोक्ते शुभे काले द्वौ चत्वारोऽष्टौ वा प्रशस्तवेषा वरपित्रादिना सहिताः शकुनदर्शनपूर्वकं कन्यागृहमेत्य कन्यापितुः प्रार्थनां कुर्युः । मत्पुत्रार्थं कन्यां प्रयच्छेति । अथ दाता भार्याद्यनुमतिं कृत्वा दास्यामीति चोच्चैर्ब्रूयात् । ततः कन्यादाता प्राङ्मुखं उपविश्याचम्य देशकालौ स्मृत्वा करिष्यमाणविवाहाङ्गभूतं वाग्दानमहं करिष्ये तदङ्गं गणपतिपूजनं च करिष्ये इति सङ्कल्प्य गन्धादिदक्षिणान्तैर्गणपतिं पूजयित्वा, स्वस्थाने वरपितरं प्राङ्मुखमुपवेश्य स्वयं च तत्प्राच्यां प्रत्यङ्मुख उपविश्य तं गन्धताम्बूलादिभिः पूजयित्वा, हरिद्राखण्डपञ्चकं दृढपूगीफलानि च गन्धाक्षतालङ्कृतानि गृहीत्वाऽमुकगोत्रोत्पन्नाममुकपुत्रीममुकनाम्नीमिमां कन्यां ज्योतिर्विदादिष्टे मुहूर्ते दास्य इति वाचा सम्प्रददे इति चोक्त्वा " अव्यङ्गे पतिते क्लीबे दशदोषविवर्जिते । इमां कन्यां प्रदास्यमि देवाग्निद्विजसन्निधौ " इति पठेत् । ततो मन्त्रान्तरं पठेत् " वाचा दत्ता मया कन्या पुत्रार्थं स्वीकृता त्वया । कन्यावलोकनविधौ निश्चितस्त्वं सुखी भव ॥" वरपिता च ब्रूयात्–" वाचा दत्ता त्वया कन्या पुत्रार्थं स्वीकृता मया । वरावलोकनविधौ निश्चितस्त्वं सुखी भव" । भ्रात्रादौ स्वीकर्तरि भ्रातृमित्रार्थमित्याद्यूहः कार्यः । ततो वरपित्रादिर्गन्धाक्षतशुभवस्त्रादियुग्मभूषणताम्बूलपुष्पादिभिः कन्यां यथाचारं पूजयेत् । ततो ब्राह्मणा आशीर्मन्त्रान्पठेयुः । इति

वाग्दानम् । अथ **मृदाहरणं ज्योतिर्निबन्धे**–"कर्तव्यं मङ्गलेष्वादौ मङ्गलायाङ्कुरार्पणम् । नवमे सप्तमे वाऽपि पञ्चमे दिवसेऽपि वा ॥ तृतीये बीजनक्षत्रे शुभवारे शुभोदये । सम्यग्गृहाण्यलङ्कृत्य वितानध्वजतोरणैः ॥ सहवादित्रनृत्याद्यैर्गत्वा प्रागुत्तरां दिशम् । तत्र मृत्सिकतां श्लक्ष्णां गृहीत्वा पुनरागतः ॥ मृन्मयेष्वथवा वैणवेषु पात्रेषु योजयेत्। अनेकबीजसंयुक्तां तोयपुष्पोपशोभिताम् ॥" **शौनकः**–"आधानं गर्भसंस्कारं जातकर्म च नाम च। हित्वाऽन्यत्र विधातव्यं मङ्गलेऽङ्कुरवापनम् ॥" **बृहस्पतिः**–"आत्यन्तिकेषु कार्येषु कार्यं सद्योऽङ्कुरार्पणम् । " ततो वैवाहिके शुभे मुहूर्ते वधूवरयोस्तैलहरिद्रालेपनादि यथाऽऽचारं कार्यम् । अथ **विवाहदिनात्पूर्वदिनकृत्यम्**। तत्र पूर्वं गणपतिपूजनम्। ततः पूर्वोक्तलक्षणं मण्डपं कृत्वा तत्प्रतिष्ठां कुर्यात् । तत्र पूर्वाह्णे सपत्नीकः कृताभ्यङ्गो धृतमाङ्गलिकवेषः शुभासने उपविश्याचम्य प्राणानायम्येष्टदेवतागुर्वादिनमस्कारं कृत्वा, देशकालौ सङ्कीर्त्यास्या अमुकनाम्न्याः श्वः करिष्यमाणविवाहाङ्गभूतं स्वस्तिवाचनं; मण्डपप्रतिष्ठां, मातृपूजनं, वसोर्धारापूजनमायुष्यजपं, नान्दीश्राद्धं च अहं करिष्य इति सङ्कल्पं कुर्यात् । ततो ब्राह्मणानुपवेश्य स्वस्तिवाचनं कुर्यात् । **मण्डपप्रतिष्ठा** चैवम् । दूर्वाशमीपल्लवबकुलवृक्षपल्लवानाम्रादिप्रशस्तवृक्षपत्रवेष्टितान् सूत्रेण पञ्चधा वेष्टयेत् । आग्नेयकोणस्थमण्डपस्तम्भोपरि नन्दिनीनामकं वेष्टितं मनोजूतिरिति स्थापयित्वा तत्र नन्दिनीं पूजयेत् । तच्चेत्थम् "आपो हिष्ठा" इति प्रोक्ष्य "गन्धद्वाराम्" इति गन्धाक्षतं, "दधिक्राव्णः" इति दधि, "काण्डात्काण्डात्" इति दूर्वाः, पुष्पाणि समर्पयेत् । ततो नैर्ऋत्यवायव्येशानस्तम्भेषु मण्डपमध्योपरिभागे काष्ठे च क्रमेण नलिनीमैत्रोमापशुवर्द्धनीनामकवेष्टितानि पूर्ववत्स्थापयित्वा पूजयेत् । ततो मातृपूजनम्, वसोर्द्धारापूजनम्, "आयुष्यं वर्चस्यम्" इत्यायुष्यजपं च कुर्यात् । एषामनुष्ठानप्रकारः पूर्वोक्तो द्रष्टव्यः । ततो **नान्दीश्राद्धम्**, इदं चोद्वाहे पिता कुर्यात् । द्वितीयादौ वर एव । तथा च स्मृतौ "नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे पुनः । अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकम् ॥" **मण्डनः**–" पित्रोस्तु जीवतोः कुर्यात्पुनः पाणिग्रहं यदा । पितुर्नान्दीमुखं श्राद्धं नोक्तं तस्य मनीषिभिः" इति। पितुरभावे "असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः" इति यः कर्तृक्रमस्तेन क्रमेण ज्येष्ठभ्रात्रादिर्दद्यादिति **चन्द्रिकादय** आहुः । **हेमाद्रिस्तु**–" तस्य पितुरभावे यः पितृव्यमातुलादिः संस्कुर्यात् स तत्क्रमात्संस्कार्यपितृभ्यो दद्यान्नतु स्वपितृभ्यः" इति व्याचख्यौ । अत्र बहु वक्तव्यं विस्तरभिया नोच्यते । **रेणुकारिकायाम्**–" उक्ते काले विवाहाङ्गं कुर्यान्नान्दीमुखं पिता । देशान्तरे विवाहश्चेत्तत्र गत्वा भवेदिदम् ॥" अत्र पदार्थक्रमोऽस्मत्कृते श्राद्धप्रयोगे आलोचनीयः । एवं वरपिता स्वगृहेऽपि सर्वं कुर्यात् । इदं च वधूपित्रा कृते नान्दीश्राद्धे कार्यम् । तदुक्तं **कारिकायाम्**–" इत्थं वधूपिता कृत्वोद्वाहारम्भनिमित्तकम् । नान्दीश्राद्धत्रयं कुर्यात्तस्मिन्नहनि संयतः ॥ न मण्डपादिकं कर्म वरस्य श्राद्धमन्तरा " इति । आचारोऽप्येवम् । ततो वरगृहे गत्वा वरवरणं कार्यम् । तत्र गणपतिं स्मृत्वा देशकालौ सङ्कीर्त्य करिष्यमाणविवाहाङ्गं वरणं करिष्य इति सङ्कल्प्य उपवीतादिद्रव्यैस्त्वां वृणे इति तानि द्रव्याणि वराय दत्त्वा पादौ प्रक्षाल्य चन्दनादिभिः पूजां कुर्यात् । वरणे देयानि द्रव्याण्याह—**चन्द्रेश्वरः**–"उपवीतं फलं पुष्पं वासांसि विविधानि च । देयं वराय वरणे कन्याभ्रात्रा द्विजेन च" इति । इति **पूर्वदिनकृत्यम्** । अगतौ सर्वमेतद्विवाहदिन एव पूर्वं सर्वं कुर्यात् । अथ **विवाहदिनकृत्यम्** । तत्र पूर्वं घटीस्थापनं कार्यम्। **नारदः**—"षडङ्गुलमितोत्सेधं द्वादशाङ्गुलमायतम् । कुर्यात्कपालवत्ताम्रपात्रं तद्दशभिः पलैः ॥ ताम्रपात्रे जलैः पूर्णे मृत्पात्रे वाऽथवा शुभे । मण्डलार्धोदयं वीक्ष्य रवेस्तत्र विनिक्षिपेत् ॥" तत्र मन्त्रः–"मुखं त्वमसि यन्त्राणां ब्रह्मणा निर्मितं पुरा । भावाभावाय दम्पत्योः कालसाधनकारणम् " इति । ततो वरः कृतनित्यक्रिय इष्टदेवतां पित्रादींश्च नमस्कृत्य तैरनुमोदितो यथाविभवमश्वादियानमारुह्य वधूगृहं गत्वा तद्द्वारदेशे प्राङ्मुखः स्थितो नीराजनपूर्णकुम्भयुक्तैः पुरन्ध्रीजनैः प्रत्युद्यातो नीराजितोऽन्तर्गृहं प्रविश्य प्राङ्मुखस्तिष्ठेत् । ततः कन्यापिता मधुपर्केण समर्चयेत् । अथ **मधुपर्कः** । तत्र वरस्य वैकल्पिकावधारणम्, "यन्मधुन" इति मधुपर्काशनम्, शेषस्य प्रागसञ्चरे निनयनम्, एतौ विकल्पौ स्मरेत् । ततः साधु भवानिति अर्चयिता अर्घ्यं प्रति वदाति, अर्चयेत्यर्घ्यस्य प्रतिवचनमिति **वासुदेवभट्टादयः**। विष्टरादीनामाहरणम्, अर्घयितुर्विष्टरादानम्: अर्घयितुर्व्यतिरिक्तः अन्यः अर्घ्यं संबोधयाति । विष्टरो विष्टरो विष्टरः प्रतिगृह्यतामित्यन्येन ततोऽर्घ्योऽर्घयितुः सकाशात्तूर्णीं विष्टरमादायासने निधाय वर्ष्मोऽस्मि समानानामित्युपविशति । ततः पाद्योदक-

दानमर्घयितुः ततोऽर्घ्यमन्यः सम्बोधयति । पाद्यं पाद्य पाद्यं प्रतिगृह्यतामिति । ततोऽर्घयितुः सकाशात्पाद्य प्रतिगृह्य दक्षिणं पादं प्रक्षालयति विराजो दोहोऽसीति । ततोऽनेनैव मन्त्रेण वामपादप्रक्षालनम् । राजन्यवैश्ययोस्तु पूर्वं वामपादप्रक्षालनम् । अर्घयितुर्विष्टरादानम् । अन्यः प्राह विष्टरो विष्टरो विष्टरः प्रतिगृह्यतामिति । ततोऽर्घ्यो द्वितीयं विष्टरं तूष्णीं प्रतिगृह्य भूमौ निधाय वर्ष्मोऽस्मीत्यनेन तस्योपरि पादौ निदधाति । अर्घयितुरर्घादानम् । अन्यः प्राह—अर्घोऽर्घोऽर्घः प्रतिगृह्यतामिति । ततोऽर्घ्य आपः स्थ युष्माभिरित्यर्घं प्रतिगृह्णाति । अर्घ्यस्तमर्घं "निनयन्नभिमन्त्रयते समुद्रं वः " इति । ततोऽर्घयितुराचमनीयादानम् । ततोऽन्यः प्राह—आचमनीयमाचमनीयमाचमनीयं प्रतिगृह्यतामिति । ततोऽर्घ्योऽर्घयितुराचमनीयं प्रतिगृह्य आमागन्यशसेति सकृदाचामति । ततः स्मार्त्ताचमनम् । अर्घयितुर्मधुपर्कादानम् । अन्य आह—मधुपर्को मधुपर्को मधुपर्कः प्रतिगृह्यतामिति । ततोऽर्घ्योऽर्घयितुर्हस्तस्थितं मधुपर्कं मित्रस्य त्वेत्यनेनेक्षते, ततो मधुपर्कं देवस्य त्वा० भ्यां प्रतिगृह्णामीति प्रतिगृह्य सव्ये पाणौ कृत्वा दक्षिणस्यानामिकयाऽऽलोडयति नमः श्यावास्यायेति । ततो मधुपर्कैकदेशस्य अनामिकाङ्गुष्ठेन बहिः प्रक्षेपः । एवं च त्रिरालोडनं त्रिर्निरुक्षणमनामिकाङ्गुष्ठेन भवति । ततोऽर्घ्यो मधुपर्कैकदेशं यन्मधुनो मधव्यमिति प्राश्नाति पुनरनेनैव मन्त्रेण वारद्वयमुच्छिष्ट एव प्राश्नाति । उच्छिष्टदोषाभावो मनूक्तो द्रष्टव्यः । मधुमतीभिर्वा प्रत्यृचं प्राशनम् । ततोऽर्घ्यो मधुपर्कशेषं पुत्राय शिष्याय वा उत्तरत उपविष्टाय ददाति, अथवा स्वयमेव सर्वं प्राश्नाति प्रागसंचरे वा निनयनम् । ततोऽर्घ्यः आचम्य प्राणान्संमृशेत् । तत्रैवं वाङ्म आस्ये अस्त्विति मुखमालभते । नसोर्मे प्राणः अस्त्विति नासिकाछिद्रद्वयं युगपत् । अक्ष्णोर्मे चक्षुरस्त्विति अक्षिद्वयं युगपत् । कर्णयोर्मे श्रोत्रमस्त्विति दक्षिणं कर्णमभिमृश्य ततो वाममनेनैव मन्त्रेण । बाह्वोर्मे बलमस्त्विति दक्षिणं बाहुं, ततो वाममनेनैव मन्त्रेण । ऊर्वोर्मे ओजास्त्विति ऊरुद्वयं युगपदेव । अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्त्विति शिरःप्रभृति सर्वाङ्गानां युगपत् । ततो गामानीयार्चयिता शासमादाय गौर्गौर्गौः आलभ्यतामित्यर्घ्यं प्रति वदति । ततोऽर्घ्यः प्रत्याह माता रुद्राणामित्यादि वधिष्टेत्यन्तमुक्त्वा मम चामुष्य च पाप्मानꣳ हनोमीति ब्रूयात् । यद्युत्सिसृक्षेन्मम चामुष्य च पाप्मा हत ओमुत्सृजत तृणान्यत्त्विति ब्रूयात् । विवाहयज्ञयोस्तु नियमेनालम्भः । स च कलौ न भवति स्मृत्यन्तरात् । आलम्भाभावे तु गौरित्युच्चारणादिकमपि न भवति । सर्वत्रालम्भाभावेऽप्युत्सर्ग एवेति **कारिकायाम्**—" गोरालम्भनिषेधात्स्यात्सर्वत्रोत्सर्जनं कलौ" इति । **इति मधुपर्कः** । ततो दाता गन्धमाल्यवस्त्रयुगोपवीतयुगाभरणादिभिर्वरं यथाविभवं पूजयेत् । अथ कन्या स्नाता परिहिताहतवस्त्रा गृहान्तः सौभाग्यादिकामनया गौरीं पूजयित्वा तत्रैव गौरीं ध्यात्वा तिष्ठेत् । ततो वरो बहिःशालायां पञ्च भूसंस्कारान् कृत्वा लौकिकाग्निस्थापनं करोति । निर्मन्थ्याग्नेर्वा स्थापनम् । ततो वैकल्पिकावधारणं वरस्य । अग्नेः पश्चात्तेजन्या निधानम्, अग्नेरुत्तरतः कुम्भधृक्, उत्तरतः पात्रासादनम्, द्वे पवित्रे, मृन्मयी आज्यस्थाली, पालाश्यः समिधः, प्राज्ञावाघारौ, समिद्धतमे आज्यभागौ, वरो दक्षिणा, राष्ट्रभृद्धोमः, जयाहोमः, अभ्यातानहोमः, सुगन्तु पन्थामित्याहुत्यन्ते परं मृत्यो इत्येकाऽऽहुतिः । वध्वा आनडुहचर्मोपवेशनं प्राच्याम् । त्रिरात्रमधःशयनाद्युभयोः । इति **वैकल्पिकानामवधारणम्** । ततो मातुलादिः कन्यानयनं करोति, सा चागत्य प्रत्यङ्मुखी उपविशति । अत्र वधूवरयोर्मध्ये वस्त्रेणान्तर्द्धानम् । ततो वरो वधूं " जरां गच्छ " इति मन्त्रेण वासः परिधापयति । वर एवोत्तरीयम् " या अकृन्तन्" इत्यनेन परिधापयति । ततः कन्यापितुरध्येषणं परस्परं समञ्जेथामिति अन्तःपटस्यापसारणम् । वधूवरयोः समञ्जनम् । ततः संमुखीकरणं "समञ्जन्तु" इति मन्त्रेण । अत्र "वधूवरयोर्गोत्रप्रवरपूर्वकं प्रपितामहपितामहपितॄणां त्रिर्नामग्रहणं कार्यम्" इति **वासुदेवहरिहरौ** । सकृदिति **गङ्गाधरः** । अथ **कन्यादानम्** । तत्रायं क्रमः । दाता वरदक्षिणतः स्वदक्षिणदेशस्थपत्नीसहित उदङ्मुख उपविश्य, बद्धशिखः शुचिराचम्य, कुशपाणिः प्राणानायम्य, देशकालावनुकीर्त्य मम समस्तपितॄणां निरतिशयानन्दब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तये अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसन्तत्या द्वादशावरान् द्वादशापरान् पुरुषाँश्च पवित्रीकर्तुमात्मनश्च श्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानमहं करिष्ये इति कुशाक्षतयुतजलेन सङ्कल्प्य सपत्नीकः—"कन्यां कनकसम्पन्नां कनकाभरणैर्युताम् । दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥ विश्वम्भरः सर्वभूता साक्षिण्यः सर्वदेवताः । इमां कन्यां प्रदास्यामि पितॄणां तारणाय च" इति मन्त्रौ पठित्वा स्वदक्षिणस्थ-

भार्यादत्तपूर्वकल्पितजलधारां कन्यादक्षिणहस्तगृहीतवरदक्षिणकरे क्षिपेत् । अमुकगोत्रोऽमुकोऽहं मम समस्तेत्यादि प्रीतये इत्यन्तं पूर्ववदुच्चार्यामुकामुकप्रवरोपेतायामुकगोत्रायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकस्मै श्रीधररूपिणे वराय, अमुकप्रवरोपेताममुकगोत्राममुकप्रपौत्रीममुकपौत्रीममुकस्य मम पुत्रीममुकनाम्नीं कन्यां श्रीरूपिणीं प्रजापतिदेवत्यां प्रजोत्पादनार्थं तुभ्यं सम्प्रददे इति वरहस्ते सकुशाक्षतजलं क्षिपेत् । प्रजापतिः प्रीयतामिति मनसा स्मरेत् । न मम वाच्यमिति **प्रयोगरत्ने** । नेत्यपरे । वरः ॐ स्वस्तीत्युक्त्वा द्यौस्त्वेति प्रतिग्रहं करोति । ततो दाता "गौरीं कन्यामिमां विप्र यथाशक्ति विभूषिताम् , गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ॥ कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः । कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम् ॥ मम वंशकुले जाता पालिता वत्सराष्टकम् । तुभ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्द्धिनी ॥" न्यूनवयस्कायां पालिता वर्षसप्तकमित्याद्यूहः कार्यः । धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयम् , नातिचरामीति वरः । दाता देशकालौ स्मृत्वा 'कृतस्य कन्यादानस्य प्रतिष्ठासिद्ध्यर्थमिमां दक्षिणां तुभ्यमहं सम्प्रददे' इति सजलं यथाशक्ति सुवर्णं दानदक्षिणात्वेन वरहस्ते दत्त्वा न ममेति वदेत् । ॐ स्वस्तीति वरः । ततो दाता जलभाजनभोजनभाजनगोमहिष्यश्वगजदासदासीभूवाहनालङ्कारादि यथाविभवसङ्कल्पपूर्वकं वराय दद्यात् । अत्र "कोऽदात्" इति कामस्तुतिपाठ इति **हरिहरगङ्गाधरौ** । वरो वधूं गृहीत्वा निष्क्रामति यदैषि मनसेति । असौ स्थाने वधूनामादेशः । निष्क्रमणप्रभृति कश्चन पुरुषो दक्षिणस्कन्धे वारिपूर्णं कलशं गृहीत्वाऽग्नेरुत्तरतो दक्षिणतो वा वाग्यतस्तिष्ठेत् । ततः परस्परं समीक्षेथामित्याह—अन्योऽन्यं समीक्षणम्, अघोरचक्षुरिति वरकर्तृके समीक्षणे मन्त्रपाठः । दम्पत्योरग्नेः प्रदक्षिणकरणम्, अत्र वा वासः परिधानादिकर्म । ततः "पश्चादग्नेस्तेजनीं कटं वा दक्षिणपादेन प्रवृत्योपविशाति" वरः । वरदक्षिणतो वध्वा उपवेशनम् । ततो ब्रह्मोपवेशनादि चरुवर्ज्यमाज्यभागान्ते विशेषः । पवित्रच्छेदनकुशादिवरान्तानामासादनम् । उपकल्पनीयानि शूर्पं, शमीपलाशमिश्रा लाजाः, दृषत्, लोहितमानडुहं चर्म, कुमार्या भ्राता, आचार्याय वरद्रव्यम् , आज्यभागान्ते आज्येनैव 'भूः स्वाहा, भुवः स्वाहा, स्वः स्वाहा' । "त्वन्नो० । स त्वन्नो० । अयाश्चाग्ने० । येते शतं० । उदुत्तमम्०" । एतत्सर्वप्रायश्चित्तं हुत्वा **राष्ट्रभृद्धोमः** । तत्र नान्वारम्भः । "ऋताषाड् ऋतधामाग्निर्गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदमृतासाहे ऋतधाम्नेऽग्नये गन्धर्वाय न मम ॥ १ ॥ ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा । इदमोषधिभ्योऽप्सरोभ्यो मुद्भ्यो न मम ॥ २ ॥ सꣳहितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् । इदं सꣳहिताय विश्वसाम्ने सूर्याय गन्धर्वाय न मम ॥ ३ ॥ सꣳहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा । इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यो न मम ॥ ४ ॥ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् । इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय न० ॥ ५ ॥ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा । इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यो न मम ॥ ६ ॥ इषिरो विश्वव्यचा वातो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् । इदमिषिराय विश्वव्यचसे वाताय गन्धर्वाय न मम ॥७॥ इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापो अप्सरस ऊर्जो नाम ताभ्यः स्वाहा । इदमद्भ्योऽप्सरोभ्य ऊर्ग्भ्यो न० ॥८॥ भुज्युः सुपर्णो यज्ञो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् । इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय न मम ॥ ९ ॥ भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणाप्सरसस्तावानाम ताभ्यः स्वाहा । इदं दक्षिणाभ्योऽप्सरोभ्यस्तावाभ्यो न मम ॥ १० ॥ प्रजापतिर्विश्वकर्मा मनो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वा० ॥ ११ ॥ प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा । इदमृक्सामेभ्योऽप्सरोभ्य एष्टिभ्यो न मम ॥ १२ ॥" इति **राष्ट्रभृद्धोमः** । अथ **जयाहोमः** । "चित्तं च स्वाहा । इदं चित्ताय न मम ।" न ममेति सर्वत्र वाच्यम् । "चित्तिश्च स्वाहा । इदं चित्त्यै० । आकूतं च स्वाहा । इदमाकूताय० । आकूतिश्च स्वाहा । इदमाकूत्यै० । विज्ञातं च स्वाहा । इदं विज्ञाताय० । विज्ञातिश्च स्वा० । इदं विज्ञात्यै० । मनश्च स्वाहा इदं मनसे । शक्करीश्च स्वाहा इदं शक्करीभ्यः । दर्शश्च स्वाहा इदं दर्शाय० । पौर्णमासं च स्वाहा इदं पौर्णमासाय० । बृहच्च स्वाहा इदं बृहते० । रथन्तरं च स्वाहा इद रथन्तराय न मम । प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु । तस्मै

विशः समनमन्त सर्वाः स उग्रः सइ हव्यो बभूव स्वाहा । इदं प्रजापतये० ।" ॐकारस्तु सर्वत्र योज्यः । इति **जयाहोमः** । अथा**भ्यातानहोमः** । "अग्निर्भूतानामधिपतिः स मावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याᳪ स्वाहा । इदमग्नये भूतानामधिपतये न मम (१) । इन्द्रो ज्येष्ठानामधिपतिः स मा० त्याᳪ स्वाहा । इदमिन्द्राय ज्येष्ठानामधिपतये० (२) ।' वक्ष्यमाणेषु सर्वमन्त्रेषु स मावत्वित्यादि मन्त्रशेषस्यानुषङ्गः । "यमः पृथिव्या अधिपतिः स० हूत्याᳪ स्वाहा । इदं यमाय पृथिव्या अधिपतये०" (३) । अत्रोदकालम्भ इति **वासुदेवः** । "वायुरन्तरिक्षस्याधिपतिः स० ।इदं वायवेऽन्तरिक्षस्याधिपतये० (४) । सूर्यो दिवोऽधिपतिः स०। इदं सूर्याय दिवोऽधिपतये० (५) । चन्द्रमा नक्षत्राणामधिपतिः स० । इदं चन्द्रमसे नक्षत्राणामधिपतये० (६) । बृहस्पतिर्ब्रह्मणोऽधिपतिः स० । इदं बृहस्पतये ब्रह्मणोऽधिपतये० (७) । मित्रः सत्यानामधिपतिः स०। इदं मित्राय सत्यानामधिपतये० (८) । वरुणोऽपामधिपतिः स० । इदं वरुणायापामाधिपतये० (९) । समुद्रः स्रोत्यानामधिपतिः स०। इदं समुद्राय स्रोत्यानामधिपतये० (१०) । अन्नᳪ साम्राज्यानामधिपति तन्मावत्वास्मिन्ब्रह्मण्य०। इदमन्नाय साम्राज्यानामधिपतये०।(११) । सोम ओषधीनामधिपतिः स०। इदं सोमायौषधीनामधिपतये० (१२) । सविता प्रसवानामधिपतिः स०। इदं सवित्रे प्रसवानामधिपतये० (१३) । रुद्रः पशूनामधिपतिः स०। इदं रुद्राय पशूनामधिपतये० (१४) ।" उदकस्पर्शनम् । "त्वष्टा रूपाणामधिपतिः स०। इदं त्वष्ट्रे रूपाणामधिपतये० (१५) । विष्णुः पर्वतानामधिपतिः स०। इदं विष्णवे पर्वतानामधिपतये०(१६) । मरुतो गणानामधिपतयस्ते मावन्त्वास्मिन्ब्रह्मण्यास्मिन्नित्यादि । इदं मरुद्भ्यो गणानामधिपतिभ्यो०(१७) । पितरः पितामहाः परेऽवरे ततास्ततामहाः इह मावन्त्वास्मिन्ब्रह्मणीत्यादि । इदं पितृभ्यः पितामहेभ्यः परेभ्योऽवरेभ्यस्ततेभ्यस्ततामहेभ्यश्च० (१८) ।" उदकोपस्पर्शः । इत्य**भ्यातानहोमः** । "अग्निरैतु प्रथमो देवतानां०रोदात्स्वाहा । इदमग्नये (१) । इमामग्निस्त्रायतां०। इदमग्नये० (२) । स्वस्ति नो अग्ने० त्रᳪ स्वाहा । इदमग्नये (३) । सुगं नु पन्था० कृणोतु स्वाहा । इदं वैवस्वताय० (४) । परं मृत्यो अनु० वीरान्स्वाहा । इदं मृत्यवे० ।" उदकोपस्पर्शः । संस्रवप्राशनान्ते वा अयं होमः । ततः कुमार्या भ्राता शमीपलाशमिश्राँल्लाजानञ्जलिनाञ्जलावावपति तान्कुमारी त्रिर्जुहोति । अर्यमणमिति प्रथमाम् । इदमग्नये न ममेति वरस्य त्यागः । 'इयं नार्य्युपब्रूते' इति द्वितीयाम्। इदमग्नये०। इमाँल्लाजानावपामीति तृतीयाम्। इदमग्नये० । कन्यैव मन्त्रत्रयं पठति। ततो वरो गृभ्णामि ते सौभगत्वायेत्याद्यारभ्य शरदः शतमित्यन्तेन मन्त्रेण कन्याया अङ्गुष्ठसहितं दक्षिणं हस्तं गृह्णाति । अथैनामश्मानमारोहयति दक्षिणपादेनोत्तरतः स्थापितमारोहेममश्मानमिति मन्त्रेण । वरस्य मन्त्रपाठः । ततो वरः सरस्वतीप्रेदमवेतीमां गाथां पठति । अथ वधूवरौ अग्नेः प्रदक्षिणं परिक्रामतस्तुभ्यमग्रे पर्यवहन्निति वरपठितमन्त्रेण। ततो लाजावपनादि परिक्रमणान्तं पुनर्वारद्वयं कुर्यात् । ततस्तृतीयपरिक्रमणान्ते शूर्पकोणेन सर्वलाजानामञ्जलौ प्रक्षेपः । ततः कुमारी तान् जुहोति भगाय स्वाहेति। इदं भगाय न ममेति वरः । अत्राचारात्तूष्णीं चतुर्थं परिक्रमणं कुरुत इति **रेणुदीक्षितादयः** । ततो वर आज्येन प्रजापतये स्वाहेति इदं प्रजापतये । अथैनामुदीचीᳪ सप्तपदानि प्रक्रामयति । तत्र वरः सप्तपदानि प्रक्रमस्वेति ब्रूयात् । एकमिषे विष्णुस्त्वा नयतु इति मन्त्रं पठित्वा प्रथमम्, द्वे ऊर्जे विष्णु० द्वितियम्, त्रीणि रायस्पोषाय वि० तृतीयम्, चत्वारि मायोभवाय वि० चतुर्थम्, पञ्च पशुभ्यो वि० पञ्चमम्, षड्ऋतुभ्यो वि० षष्ठम्, सखे सप्तपदा भव सा मामनुव्रता भवेति सप्तमम् । ततो वरः पूर्वधृतादुदकुम्भादुदकमादायापः शिवेति मन्त्रेण वधूमूर्द्धन्यभिषिञ्चति। ततो वरः सूर्यमुदीक्षस्वेति वधूं प्रेरयति । सा च तच्चक्षुरित्यादि शृणुयाम शरदः शतमित्यन्तेन मन्त्रेण सूर्यमुदीक्षते । ततो वरो वध्वा दक्षिणस्कन्धोपरि हस्तं नीत्वा " मम व्रते " इति मन्त्रेण तस्या हृदयमालभते । ततो वरो वधूमभिमन्त्रयते सुमङ्गलीरिति । अत्राचारात्स्त्रियः सिन्दूरदानादि कुर्वन्ति । ततो वरस्तामुत्थाप्य प्राच्यामुदीच्यां वा परिवृते रोहितानडुहे उपवेशयतीह गाव इति । ततो वर आगत्य पश्चादग्नेरुपविश्याग्नये स्विष्टकृते स्वाहेति जुहोति इदमग्नये स्विष्टकृते० । संस्रवप्राशनम्, मार्जनम्, पवित्रप्रतिपत्तिः, प्रणीताविमोकः, ब्रह्मणे दक्षिणादानम् । ततः स्वकीयायाचार्याय गां ददाति ब्राह्मणश्चेत् । ततोऽस्तमिते वरो ध्रुवं दर्शयति ध्रुवमसीति मन्त्रेण । सा च तूष्णीं ध्रुवं पश्यति। सा यदि ध्रुवं न पश्येत् तदा पश्यामीत्येव ब्रूयात्। ततो दम्पत्योरक्षारादिनियमाः । इति विवाहे **पदार्थक्रमः** । । अथ **देवकोत्थापनं मण्डपोद्वासनविधिः** । तत्र कालः—"समे च दिवसे कुर्याद्देवको-

त्थापनं बुधः । षष्ठं च विषमं नेष्टं मुक्त्वा पञ्चमसप्तमौ ।" समेषु षष्ठं, विषमेषु पञ्चमसप्तमातिरिक्तं दिनं नात्रेष्टमित्यर्थः । सङ्कल्पपूर्वकं सर्वाः देवताः प्रत्येकं पूजयित्वा "उत्तिष्ठ ब्रह्मणस्पते" इति विसर्जयेत् । मण्डपोद्वासनं यथाकुलाचारं कृत्वा द्विजाशिषो मन्त्रोक्ता गृह्णीयात् । अथ **वध्वाः प्रथमगृहप्रवेशः** । " वधूप्रवेशः प्रथमे तृतीये शुभप्रदः पञ्चमकेऽथ वाऽह्नि । द्वितीयके वाऽथ चतुर्थके वा षष्ठे वियोगामयदुःखदः स्यात् ॥" **लल्लः**—" स्वभवनपुरप्रवेशे देशानां विप्लवे तथोद्वाहे । नववध्वा गृहगमने प्रतिशुक्रविचारणा नास्ति" "नित्ययाने गृहे जीर्णे प्राशनान्तेषु सप्तसु । वधूप्रवेशमाङ्गल्ये न मौढ्यं गुरुशुक्रयोः ॥" **ज्योतिष्प्रकाशे**—" वामे शुक्रे नवोढायाः सुखहानिश्च दक्षिणे । धनं धान्यं च पृष्ठस्थे सर्वनाशः पुरःस्थिते ॥ नवोढायास्तु वैधव्यं यदुक्तं संमुखे भृगौ । तदेव विबुधैर्ज्ञेयं केवलं तद्द्विरागमे ॥ पूर्वतोऽभ्युदिते शुक्रे प्रयायाद्दक्षिणापरे । पश्चादभ्युदिते चैव यायात्पूर्वापरे दिशौ ॥" तथा भाद्रपदमासमारभ्य पूर्वादिमुख्यदिक्षु प्रतिदिशं मासत्रयं कपाटं ज्ञेयम् । चैत्रमारभ्य पूर्वाद्यष्टदिक्षु मुख्यदिशि मासद्वयं, विदिक्ष्वेकमासं क्रमेण कण्टकं जानीयात् । इदं द्वयं ग्रामान्तरे नववधूगमने वर्ज्यम् । नियतकालेऽपि कदाचिन्निषेधमाह गर्गः—"व्यतीपाते च संक्रान्तौ ग्रहणे वैधृतावपि । श्राद्धं विना शुभं नैव प्राप्तकालेऽपि मानवः ॥" तथा " अमासंक्रान्तिविष्ट्यादौ प्राप्तकालेऽपि नाचरेत् " इति । "विवाहात्प्रथमे पौषे आषाढे चाधिमासके । भर्तृगृहे वसेन्न स्त्री चैत्रे तातगृहे तथा ॥" इति **वधूगृहगमनविधिः** । अथ **गर्गमते पदार्थक्रमे** विशेषः । अग्निस्थापनादि ब्राह्मणतर्पणान्तं विवाहकर्म । प्रथममाचार्यकर्तृकमग्निस्थापनम् । ततो मधुपर्कादि । अर्चयेति वरः । विष्टरो विष्टरो विष्टरावित्यन्यः ।: प्रतिगृह्येतामिति दाता । प्रतिगृह्णामीति वरः । एवमग्रे सर्वत्र पाद्यादौ ज्ञेयम् । एकस्मिन्विष्टरे आसनम् । तदेव तेनैव मन्त्रेण पादयोरधस्तान्निधानं द्वितीयविष्टरस्य । प्राणसंमर्शनेनास्त्वित्यध्याहारः सर्वत्र । गोरालम्भान्ते लीढशान्तिवाचनं पुण्याहवाचनस्थाने । ततो मधुपर्कार्चनसमापनम् । ततः सदक्षिणं कन्यादानम् । ततः कौतुकागारं प्रविशति । युवतीनां मङ्गलाचारयुक्तानां प्रतिकूलभावेन प्रविशति । अन्यत्राभक्ष्यपातकेभ्यः । तत आचार्यो वासः परिधापयति जरां गच्छेति । उत्तरीयं च । ततः समञ्जनम् । अध्येषणमाचार्यस्य । कङ्कणबन्धनं परस्परम् :। दक्षिणहस्तेन पाणिं गृहीत्वा निष्क्रामति यदैषीति । कन्यानामग्रहणे आचार्यः । परस्परं समीक्षणम् । उदकुम्भं स्कन्धे कृत्वाऽवस्थेयम् । ततः प्रदक्षिणमग्निं परीत्य पश्चादग्नेस्तेजन्यां कटे दक्षिणपादं दत्त्वोपवेशनम् । ब्रह्मोपवेशनादिसर्वप्रायश्चित्तान्ते विशेषः । आसादने चरोरभावः । शूर्पे शमीपलाशमिश्रा लाजाः । दृषदुपले च । आनडुहम् । भ्राता । वरश्च । पर्युक्षणान्ते आघारादि सर्वप्रायश्चित्तान्तम् । राष्ट्रभृदादीनामिच्छया होमः । राष्ट्रभृद्धोमे ऋताषा० स न इदं० इति प्रथमः । तस्यौषधय इति द्वितीयः । एवमग्रेऽपि । ततो **जयाहोमः** । तत्र चित्ताय स्वाहेति चतुर्थ्यन्तेन प्रयोग इति । **श्रीअनन्तो दाक्षायणयज्ञे** " स्वाहाकारः सर्वत्र साकाङ्क्षत्वात् " इति सूत्रे । नेति **गर्गः** । **ततोऽभ्यातानहोमः** । ततोऽग्निरैत्वित्याहुति**चतुष्टयम्** । परं मृत्याविति चात्र । ततः कुमार्या हस्तयोरुपस्तरणं भ्रातुः । माता कुमारीहस्तलेपनं ददाति । लाजानामावपनमञ्जलौ । प्रत्यभिघारणम् । सव्यसंहतेन दक्षिणेन होमः । इदमर्यम्णे इति प्रथमस्य त्यागः । द्वितीयतृतीययोरग्नये । अर्यमणमिति त्रयाणां मन्त्राणां पाठो वरस्य । पाणिग्रहणम् । अश्मानमारोहस्वेति प्रैषपूर्वकमारोहणम् । परिक्रमणम् । एवं वारद्वयं लाजादि परिक्रमणान्तम् । भगाय स्वाहेत्यनेन हविर्ग्राहं वारत्रयं होमः । तूष्णीं परिक्रमणम् । प्रजापतये होमः । सप्त पदानि । अभिषेकः । ततस्तिसृभिश्च प्रैषपूर्वकं सूर्यावेक्षणम् । हृदयालम्भः । अभिमन्त्रणम् । शकटे चर्मास्तीर्णे वरः कन्यामुपवेशयाति । स्विष्टकृद्धोमः । संस्रवभक्षः । परं मृत्यवित्यत्र वा होमः । मार्जनम् । पवित्रप्रतिपत्तिः । ब्रह्मणे दक्षिणादानम् । आचार्याय गोदानम् । अस्तमिते ध्रुवं दर्शयाति प्रैषपूर्वकम् । ध्रुवमसीति वध्वाः पाठः । बर्हिर्होमः । प्रणीताविमोकः । कर्मापवर्गे समिदाधानम् । उत्सर्जनम् ब्रह्मणः । उपयमनकुशानामग्नौ प्रक्षेपः । ब्राह्मणभोजनम् । इति गर्गमते विशेषः । अथ **पुनर्विवाहः** । कृते विवाहे पञ्चाङ्गशुद्धिराहित्यादिदोषश्चेत् ज्ञातः तदा ज्योतिःशास्त्रोक्तकालविशेषे पुनर्विवाहः कार्यः । तदाह **नृसिंहः श्रीधरीये**—" पुनर्विवाहं वक्ष्यामि दम्पत्योः शुभवृद्धिदम् । लग्नेन्दुलग्नयोर्दोषे ग्रहतारादिसम्भवे ॥ अन्येष्वशुभकालेषु दुष्टयोगादिसम्भवे । विवाहे चापि दम्पत्योराशौचादिसमुद्भवे ॥ तस्य दोषस्य शान्त्यर्थं पुनर्वैवाह्यमिष्यते । अयनं चोत्तरं श्रेष्ठं वर्द्धयेत्तु विशेषतः ॥ आषाढमार्गशीर्षौ द्वौ वर्ज्यौ शेषाः शुभावहाः । विवाहोक्तर्क्षतिथ्यन्ता राशिवारादिवर्गजाः । करणा योगसञ्ज्ञा वै ग्रहगोचरयोगकाः ॥

तस्मिन्विवाहसमये शुभदाश्च तथैव हि ॥ पूर्वास्ते पूर्वरात्रे च विवाहः शुभदो भवेत् ॥" अथ द्वितीयादिविवाहविधिः ॥ तत्राधिवेदनीया आह **याज्ञवल्क्यः**–"सुरापी व्याधिता धूर्ता वन्ध्याऽर्थघ्न्यप्रियंवदा । स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ॥ अधिविन्ना तु भर्तव्या महदेनोऽन्यथा भवेत् ।" अधिवेत्तव्या तदुपरि स्त्र्यन्तरं कर्तव्यमित्यर्थः । **आपस्तम्बः**–" धर्मप्रजासम्पन्ने दारे नान्यां कुर्वीत" इति। अधिवेदने प्रतीक्षाकालं **मनुराह**–"वन्ध्याऽष्टमेऽधिवेत्तव्या दशमे तु मृतप्रजा । एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥" रत्यर्थे तु विवाहान्तरे विशेषः । "एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति । समर्थस्तोषयित्वाऽर्थैः पूर्वोढामपरां वहेत् ॥" **याज्ञवल्क्यस्तु**–"आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम् । त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः ॥" सधनो धनतृतीयांशम्, अधनोऽशनाच्छादनात्मकं भरणं दाप्य इत्यर्थः । या त्वेतावताऽपरितुष्टा गृहान्निर्गच्छेत्तां प्रत्याह **मनुः**–" अधिविन्ना तु या नारी निर्गच्छेद्रोषिता गृहात् । सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसन्निधौ" इति । बहुभार्यो ज्येष्ठयैव सह धर्मं सपत्नीकसाध्यं कुर्यादिति **हेमाद्रौ कात्यायनः**–"अग्निशिष्टादिशुश्रूषां बहुभार्यः सवर्णया । कारयेत्तद्बहुत्वं चेज्ज्येष्ठया गर्हिता न चेत् ।" इति । शिष्टशुश्रूषा आतिथ्यादिपूजा । सा च पत्नीसम्पाद्यधर्ममात्रोपलक्षणार्था । गर्हिता धर्मायोग्यत्वापादकपातित्यादिदोषवती न चेदित्यर्थः । तादृशी चेन्न तया । किन्त्वनेनैवंविधया कनिष्ठयाऽपि कारयेत् । **याज्ञवल्क्यः**–" सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् । सवर्णासु विधौ धर्मे ज्येष्ठया न विनेतरा ॥" अन्यामसवर्णाम् । इदं चाधाने सहाधिकृतानेकभार्याविषयम् । अनधिकृतायास्तु प्रसक्त्यभाव एव । तत्रापि केवलकर्त्वर्थमाज्यावेक्षणादि यजमानौदुम्बरीसमानवदेकयैव सवर्णया ज्येष्ठया कारयेत् । पत्नीसन्नहनादि तु कर्तृसंस्कारकम्, सहाधिकृताभिः सवर्णाभिरित्यादि मीमांसामांसलमनसां सुज्ञानम्। द्वितीयादिविवाहेऽग्निनियममाह होमाय **कात्यायनः**–" सदारोऽन्यान्पुनर्दारानुद्वोढुं कारणान्तरात् । यदीच्छेदग्निसान्कुर्वन्क होमोऽस्य विधीयते ॥ स्वाग्नावेव भवेद्धोमो लौकिके न कदाचन" इति । अयं च नियमः संभवे । ग्रामान्तरादावसम्भवे तु लौकिकाग्नौ । अत्र द्वितीयादिविवाहे जीवत्पितृकोऽपि स्वयमेव नान्दीश्राद्धं कुर्यात् । " नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे पुनः । अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकम् " इति स्मृतेः । तत्र पितृवर्गं विहाय मातृमातामहवर्गयोः कुर्यात् । मातरि जीवत्यां मातामहवर्गस्यैव । तस्मिन्नपि जीवति द्वारलोपाद् वृद्धिश्राद्धलोप एव । सोऽपि साग्निकश्चेद्येभ्यः पिता दद्यात्तेभ्यः स्वयमपि दद्यात् । " येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः " इति वचनात् । अन्ये तु असाग्निकोऽपि पितृदेवताभ्यो दद्यान्नतु लोपः । " वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति । येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः" इति **मैत्रायणीयपरिशिष्टादित्याहुः** । द्वितीयादिविवाहे कालविशेषः **संग्रहे**–" प्रमदामृतिवासरादितः पुनरुद्वाहविधिर्वरस्य च । विषमे परिवत्सरे शुभो युगले चापि मृतिप्रदो भवेत् " जीवन्त्यां पूर्वपत्न्यां द्वितीयादिविवाहे नायं कालनियमः । अथ तृतीयमानुषीविवाहस्य निषिद्धत्वात्तस्मिन्कर्तव्येऽर्कविवाहविधिः । तृतीयादिनिषेधमाह **काश्यपः**–" तृतीयां मानुषीं नैव चतुर्थीं यः समुद्वहेत् । पुत्रपौत्रादिसंपन्नः कुटुम्बी साग्निको वरः ॥ उद्वहेद्रतिसिद्ध्यर्थं तृतीयां न कदाचन । मोहादज्ञानतो वाऽपि यदि गच्छेत्तु मानुषीम् । नश्यत्येव न सन्देहो **गर्गस्य** वचनं यथा ।" अन्यत्रापि–" तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत् ॥" **संग्रहे**–" तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत् । चतुर्थादिविवाहार्थं तृतीयार्कं समुद्वहेत् ॥ आदित्यदिवसे वाऽपि हस्तर्क्षे वा शनैश्चरे । शुभे दिने वा पूर्वाह्णे कुर्यादर्कविवाहकम् " । देशादि **ब्रह्मपुराणे** दर्शितम्–" ग्रामात्प्राच्यामुदीच्यां वा सपुष्पफलसंयुतम् । परीक्ष्यार्कं ततोऽधस्तात्स्थण्डिलादि यथाविधि ॥" **व्यासः**–" ज्ञात्वाऽलङ्कृतवासास्तु रक्तगन्धादिभूषितम् । सपुष्पफलशाखैकमर्कगुल्मं समाश्रयेत् ॥ संलक्षणेन संयुक्तमर्कं संस्थाप्य यत्नतः । अर्ककन्याप्रदानार्थमाचार्यं कल्पयेत्पुरा ॥ अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् । नान्दीश्राद्धे हिरण्येन अष्टवर्गान्प्रपूजयेत् ॥ पूजयेन्मधुपर्केण वरं विप्रस्य हस्ततः । यज्ञोपवीतं वस्त्रं च हस्तकर्णादिभूषणम् ॥ उष्णीषगन्धमाल्यादि वरायास्मै प्रदापयेत् । स्वशाखोक्तप्रकारेण मधुपर्कं समाचरेत् ॥" **ब्रह्मपुराणे** यथाविधीत्यस्यानन्तरं–" कृत्वाऽर्कं पुरतस्तिष्ठन् प्रार्थयेत द्विजोत्तमः । त्रिलोकवासिन्सप्ताश्व छायया सहितो रवे ॥ तृतीयोद्वाहजं दोषं निवारय सुखं कुरु । तत्राध्यारोप्य देवेशं छायया सहितं रविम् ॥ वस्त्रैर्माल्यैस्तथा गन्धैस्तन्मन्त्रेणैव पूजयेत् ।" **तन्मन्त्रेणाकृष्णेने**त्यादिना । अन्यत्रापि "श्वेतवस्त्रेण संवेष्ट्य तथा कार्पासतन्तुभिः । गन्धपुष्पैः समभ्यर्च्याप्यल्लिङ्गैरभिषिच्य च ॥ गुडौदनं तु नैवेद्यं ताम्बूलं च समर्पयेत् । अर्कं प्रदक्षिण

कुर्वन् जपेन्मन्त्रमिमं बुधः ॥ मम प्रीतिकरा येयं मया सृष्टा पुरातनी । अर्कजा ब्रह्मणा सृष्टा अस्माकं परिरक्षतु ॥ पुनः प्रदक्षिणां कुर्यान्मन्त्रेणानेन मन्त्रावित् । नमस्ते मङ्गले देवि नमः सवितुरात्मजे ॥ त्राहि मां कृपया देवि पत्नीत्वं मे इहागता । अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च ॥ वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्द्धनः । तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय ॥ ततश्च कन्यावरणं त्रिपुरुषं कुलमुच्चरेत् । आदित्यः सविता सूर्यः पुत्री पौत्री च नप्त्रिका ॥ गोत्रं काश्यपं इत्युक्तं लोके लौकिकमाचरेत् । सुमुहूर्तेऽर्कं निरीक्षेत स्वस्तिसूक्तमुदीरयन् ॥ आशीर्भिः सहितः कुर्यादाचार्यप्रमुखैर्द्विजैः । अथाचार्यं समाहूय विधिना तन्मुखाच्च ताम् ॥ प्रतिगृह्य ततो होमं गृह्योक्तविधिनाऽऽचरेत् ।" आचार्यस्य दानमन्त्रमाह **व्यासः**–" अर्ककन्यामिमां विप्र यथाशक्ति विभूषिताम् । गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय" इति । " अञ्जल्यक्षतकर्माणि कृत्वा कङ्कणपूर्वकम् । यावत्पञ्चावृतं सूत्रं तावदर्कं प्रदर्शयेत् ॥ स्वशाखोक्तेन मन्त्रेणं गायत्र्या वाऽथवा जपेत् । पञ्चीकृत्य पुनः सूत्रं स्कन्धे बध्नाति मन्त्रतः ॥ बृहत्सामेति मन्त्रेण सूत्ररक्षां प्रकल्पयेत् । अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरतस्तथा ॥ कुम्भांश्च निक्षिपेत्पश्चादाग्नेयादिचतुष्टये । सवस्त्रं प्रतिकुम्भं च त्रिः सूत्रेणैव वेष्टयेत् ॥ हरिद्रागन्धसंयुक्तं पूरयेच्छीतलं जलम् । प्रतिकुम्भं महाविष्णुं संपूज्य परमेश्वरम् ॥ पाद्यार्घ्यादिनिवेद्यान्तं कुर्यान्नाम्नैव मन्त्रवित् ।" अत्र होमप्रकारः **शौनकेन** प्रदर्शितः–" तृतीये स्त्रीविवाहे तु संप्राप्ते पुरुषस्य तु । अर्कविवाहं वक्ष्यामि शौनकोऽहं विधानतः ॥ अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् । नान्दीश्राद्धं प्रकुर्वीत स्थण्डिलं च प्रकल्पयेत् ॥ अर्कमभ्यर्च्य सौर्या च गन्धपुष्पाक्षतादिभिः । (सौर्या सूर्यदेवत्यया आकृष्णेनेत्यादिऋचा) स्वयं चालङ्कृतस्तद्वद्वस्त्रमाल्यादिभिः शुभैः । अर्कस्योत्तरदेशे तु समन्वारब्ध एतया ॥ (एतया कन्यया) उल्लेखनादिकं कुर्यादाघारान्तमतः परम् । आज्याहुतिं च जुहुयात्सङ्गोभिरनयैकया ॥ यस्मै त्वा कामकामायेत्येतयर्चा ततः परम् । व्यस्ताभिश्च समस्ताभिस्ततश्च स्विष्टकृद्भवेत् ॥ परिषेचनपर्यन्तमयाश्चेत्यादिकं क्रमात् ।" प्रार्थनामन्त्रादिविशेषमाह **व्यासः**–"पुनः प्रदक्षिणं कृत्वा मन्त्रमेतमुदीरयेत् । मया कृतामिदं कर्म स्थावरेषु जरायुणा ॥ अर्कापत्यानि नो देहि तत्सर्वं क्षन्तुमर्हसि । इत्युक्त्वा शान्तिसूक्तानि जप्त्वा तं विसृजेत्पुनः ॥ गोयुग्मं दक्षिणां दद्यादाचार्याय च भक्तितः । इतरेभ्योऽपि विप्रेभ्यो दक्षिणां चाभिशक्तितः ॥ तत्सर्वं गुरवे दद्यादन्ते पुण्याहमाचरेत् ॥"–अत्र पञ्चमदिने कर्तव्यमुक्तं **ब्रह्मपुराणे**–"चतुर्थे दिवसेऽतीते पूर्ववत्तां प्रपूज्य च । विसृज्य होममग्निं च विधिना मानुषीं पराम् ॥ उद्वहेदन्यथा नैव पुत्रपौत्रादिवृद्धिमान् । न पशून्न च मित्राणि मङ्गलं नैव गच्छति ॥ एवमेव द्विजश्रेष्ठ विधिना सम्यगुद्वहेत् । धनधान्यसमृद्धिश्च इच्छाशक्तिः परत्र च" इति । अत्रैवं **संक्षेपतः प्रयोगः** । उक्ते आदित्यवारादौ, उक्ते देशे, यथोक्तार्कसमीपे गत्वाऽऽचम्य, देशकालौ संकीर्त्य, 'मम तृतीयमानुषीविवाहजदोषाभावार्थमर्कविवाहं करिष्ये ' इति संकल्प्य आचार्यवरणस्वस्तिवाचनाद्युक्तक्रमेण कुर्यात् । अत्र होमे विशेषः । देशादि संकीर्त्यार्कविवाहाङ्गभूतं होमं करिष्ये । ततोऽग्निस्थापनाद्याघारान्तं कृत्वा आज्येन षडाहुतीर्जुहुयात् । "संगोभिराङ्गिरसो नक्षमाणो भग इवेदर्यमणं निनाय । जने मित्रा न दम्पती अनक्ति बृहस्पते वाजयाशूरिवाजौ स्वाहा" इदं बृहस्पतये न मम । " यस्मै त्वा कामकामाय वयं सम्राट् यजामहे । तमस्मभ्यं कामं दत्त्वाऽथेदं त्वं घृतं पिब स्वाहा " इदमग्नये न मम । भूः स्वाहा, भुवः स्वाहा, स्वः स्वाहा, भूर्भुवः स्वः स्वाहा । त्यागा उक्ताः । ततः स्विष्टकृन्नवाहुत्यादिशेषं समापयेत् । ततः प्रदक्षिणप्रार्थनादिकर्मशेषसमापनम् । **इत्यर्कविवाहः** । **अथैकक्रियानिर्णयः** । तत्र **वृद्धमनुः**–" एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः । न समानक्रियां कुर्यान्मातृभेदे विधीयते ॥" अत एकस्य पुंसो विवाहद्वयमेकवत्सरे निषिद्धं मातृभेदाभावात् । **नारदः**–" पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्रये । न तयोर्व्रतमुद्वाहान्मण्डनादपि मुण्डनम् ॥" **वराहः**–" विवाहस्त्वेकजातानां षण्मासाभ्यन्तरे यदि । असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत् ॥" **वसिष्ठः**–" न पुंविवाहोर्ध्वमृतुत्रयेऽपि विवाहकार्यं दुहितुः प्रकुर्यात् । न मण्डनाच्चापि हि मुण्डनं च गोत्रैकतायां यदि नाब्दभेदः ॥ एकोदरभ्रातृविवाहकृत्यं स्वसुर्न पाणिग्रहणं विधेयम् । षण्मासमध्ये मुनयः समूचुर्न मुण्डनं मण्डनतोऽपि कार्यम् ॥"एतदपवादोऽप्यत्रैव–"ऋतुत्रयस्य मध्ये चेदन्याब्दस्य प्रवेशनम् । तदा ह्येकोदरस्यापि विवाहस्तु प्रशस्यते" । **सारावल्याम्**–"फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने । भेदादब्दस्य कुर्वीत नर्तुत्रयविलम्बनम् ॥" **संहिताप्रदीपे**–"उर्ध्वं विवाहात्तनयस्य नैव कार्यो विवाहो दुहितुः समार्द्धम् । अप्राप्य कन्यां श्वशुरालयं च वधूं प्रवे-

श्यात्स्वगृहं नचादौ ॥" **वसिष्ठः**–"द्विशोभनं त्वेकगृहेऽपि नेष्टं शुभ तु पश्चान्नवभिर्दिनैस्तु । आवश्यकं शोभनमुत्सवा वा द्वारेऽथ वाऽऽचार्यविभेदतो वा ॥ एकोदरप्रसूतानां नाग्निकार्यत्रयं भवेत् । भिन्नोदरप्रसूतानां नेति **शातातपोऽ**ब्रवीत् ॥" **ज्योतिर्निबन्धे कात्यायनः**–"कुले ऋतुत्रयादर्वाङ्मण्डनान्नतु मुण्डनम् । प्रवेशान्निर्गमो नेष्टो न कुर्यान्मङ्गलत्रयम् ॥ कुर्वन्ति मुनयः केचिदन्यस्मिन्वत्सरे लघु । लघु वा गुरु वा कार्यं प्राप्तं नैमित्तिकं तु यत् ॥ पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः । मुण्डनं चौलमित्युक्तं व्रतोद्वाहौ तु मङ्गलम् ॥ चौलं मुण्डनमेवोक्तं वर्जयेन्मण्डनात्परम् । मौञ्जी चोभयतः कार्या यतो मौञ्जी न मुण्डनम् ॥ आभिन्ने वत्सरेऽपि स्यात्तदहस्तं न भेदयेत् । अभेदे तु विनाशः स्यान्न कुर्यादेकमण्डपे ॥" संकटे तु **कपर्द्दिकारिकासु**–"उद्वाह्य पुत्रीं न पिता विदध्यात्पुत्र्यन्तरस्योद्वहन कदाऽपि । यावच्चतुर्थं दिनमत्र पूर्वं समाप्य चान्योद्वहनं विदध्यात् ॥" **काश्यपः**–"मौञ्जीबन्धस्तथोद्वाहः षण्मासाभ्यन्तरेऽपि वा । पुत्र्युद्वाहं न कुर्वीत विभक्तानां न दोषकृत् ॥" **गार्ग्यः**–"भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा । न कुर्यान्मङ्गलं किञ्चिदेकस्मिन्मण्डपेऽहनि ॥" **ज्योतिर्विवरणे**–"एकोदरयोर्द्वयोरेकदिनोद्वहने भवेन्नाशः । नद्यन्तरे त्वेकदिनं केऽप्याहुः सङ्कटे च शुभम् ॥ ऊर्ध्वं विवाहाच्छुभदो नरस्य नारीविवाहो न ऋतुत्रये स्यात् । नारीविवाहात्तदहेऽपि शस्तं नरस्य पाणिग्रहमाहुरार्याः ॥" भिन्नमातृजयोस्तु एकवासरे विवाहमाह **मेधातिथिः**–"पृथङ्मातृजयोः कार्यो विवाहस्त्वेकवासरे । एकस्मिन्मण्डपे कार्यः पृथग्वेदिकयोस्तथा ॥ पुष्पपट्टिकयोः कार्यं दर्शनं न शिरःस्थयोः । भगिनीभ्यामुभाभ्यां च यावत्सप्तपदी भवेत् " । यमलयोस्तु विशेषः । **गार्ग्यः**–"एकस्मिन्वासरे प्राप्ते कुर्याद्यमलजातयोः । क्षौरं चैव विवाहं च मौञ्जीबन्धनमेव च ॥" तथा **भट्टकारिकायाम्**–"एकस्मिन्वत्सरे चैव वासरे मण्डपे तथा । कर्तव्यं मङ्गलं स्वस्रोर्भ्रात्रोर्यमलजातयोः" इति । अथ **कन्यागृहे भोजननिषेधः** । **मदरत्ने भविष्ये**—"अप्रजायां तु कन्यायां न भुञ्जीत कदाचन । दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचति ॥" **अपरार्के आदित्यपुराणे**–"विष्णुं जामातरं मन्ये तस्य कोपं न कारयेत् । अप्रजायां तु कन्यायां नाश्नीयात्तस्य वै गृहे ॥ यदि भुञ्जीत मोहाद्वा पूयाशी नरकं व्रजेत् ॥" इति । अथ **नान्दीश्राद्धानन्तरं धर्माः** । **निर्णयदीपे गार्ग्यः**–"नान्दीश्राद्धे कृते पश्चाद्यावन्मातृविसर्जनम् । दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च ॥ अपसव्यं स्वधाकारं नित्य*श्राद्धं तथैव च । ब्रह्मयज्ञं चाध्ययनं नदीसीमातिलङ्घनम् ॥ उपवासव्रतं चैव श्राद्धभोजनमेव च । नैव कुर्युः सपिण्डाश्च मण्डपोद्वासनावधि ॥" **ज्योतिषे**–"स्नानं सचैलं तिलमिश्रकर्म प्रेतानुयानं कलशप्रदानम् । अपूर्वतीर्थामरदर्शनं च विवर्जयेन्मङ्गलतोऽब्दमेकम् ॥ (पितृणामुद्देशेन कलशदानमित्यर्थः) मासषट्कं विवाहादौ व्रतप्रारम्भण न च । जीर्णभाण्डादि न त्याज्यं गृहसम्मार्जनं तथा ॥ ऊर्ध्वं विवाहात्पुत्रस्य तथा च व्रतबन्धनात् । आत्मनो मुण्डनं नैव वर्षं वर्षार्द्धमेव च ॥ अभ्यङ्गे सूतके चैव विवाहे पुत्रजन्मनि । माङ्गल्येषु च सर्वेषु न धार्यं गोपिचन्दनम्" **बृहस्पतिः**–"तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे । नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति ॥" **योगियाज्ञवल्क्यः** "न स्नायादुत्सवेऽतीते मङ्गलं विनिवर्त्य च । अनुव्रज्य सुहृद्बन्धूनार्चयित्वेष्टदेवताम् ॥" **ज्योतिर्निबन्धे**–"उद्वाहात्प्रथमे शुचौ यदि वसेद्भर्तुर्गृहे कन्यका हन्यात्तज्जननीं क्षये निजतनुं ज्येष्ठे पतिज्येष्ठकम् । पौषे च श्वशुरं पतिं च मलिने चैत्रे स्वपित्रालये तिष्ठन्ती पितरं निहन्ति न भयं तेषामभावे भवेत् ॥" **निबन्धे** "विवाहात्प्रथमे पौषे आषाढे चाधिमासके । न सा भर्तृगृहे तिष्ठेच्चैत्रे पितृगृहे तथा ॥" **हेमाद्रौ स्मृत्यन्तरे** "विवाहव्रतचूडासु वर्षमर्द्धं तदर्द्धकम् । पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम् ॥" **स्मृतौ**–"महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि । कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वपणं सुतः" ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति–श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरविरचिते विवाहप्रयोगः समाप्तः ॥ ८ ॥

विश्व०–अथैना······**क्रामयति**—कन्यायाः दक्षिणपादेन । आचार्यापेक्षया अन्तरङ्गत्वाद्वर इत्यर्थः । प्रतिपदं क्रमणमन्त्रानाह । **एकमिषे**········**नुषजति**-सूत्रम् । साकाङ्क्षत्वाद्विष्णुस्त्वा नयत्वित्यस्य सर्वत्रानुषङ्गः, वरस्य मन्त्रपाठः । **निष्क्रमणप्रभृत्युदकुंभꣳ स्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतः स्थितो भवति**—पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामतीत्येतत्कालमारभ्याग्नेर्दक्षिणतः कश्चित्तिष्ठति उत्तरत एकेषामतो विकल्पः । **तत एनां मूर्द्ध**-

---

* अत्र नित्यश्राद्धनिषेधेन तत्कार्यविहितपितृयज्ञनिषेधे सिद्धे स्वधाकारग्रहणं तत्सहचरितवैश्वदेवनिषेधार्थमाचारसंवादलाभाचेति बहवः ।

न्यभिषिञ्चति आपो हिष्ठेति च तिसृभिरित्यन्तं सूत्रम् । आचार्य इति शेषः । **अथैनाꣳ सूर्यमुदीक्षयति तच्चक्षुरिति**–सूर्यमुदीक्षस्वेति प्रैष आचार्यस्य । " तच्चक्षुः " इति मन्त्रेण वधूः सूर्यमुदीक्षते । **अथास्यै दक्षिणाꣳसमि**त्यारभ्य **प्रजापतिष्ट्वा नियनक्तु मह्यमि**त्यन्तं सूत्रम् । अस्याः दक्षिणांसस्योपरि बाहुं नीत्वा " मम व्रते " इति मन्त्रेण वर इति शेषः । **तां दृढपुरुष उन्मथ्ये**त्यारभ्य **पूषा निषीदन्त्वि**त्यन्तं सूत्रम्। चतुरिकायामीशान्यामनुगुप्तेऽआस्तीर्णे आनडुहे रोहिते चर्माणि वरो वा भ्राता वा यो बलवान् स कन्यामुपवेशयतीह गाव इति मन्त्रेणेत्यर्थः। ततः स्वस्थाने उपविश्यान्वारब्ध आचार्यः अग्नये स्विष्टकृते स्वाहेति जुहोति । इदमग्नये स्विष्टकृत इति त्यागः । संस्रवप्राशनं, मार्जनं, पवित्रप्रतिपत्तिः । **ग्रामवचनं च कुर्युः**–ग्रामवचनं वृद्धस्त्रीवाक्यं विवाहे प्रमाणं तस्मात्तदर्थं कुर्युरित्यर्थ; । अस्मिन्नर्थे श्रुतिः प्रमाणम् । **विवाहश्मशानयोर्ग्रामं प्राविशतादिति वचनात्**–हेतोरित्यर्थः । उपसंहरति निगमनवाक्येन **तस्मात्तयोर्ग्रामः प्रमाणमिति श्रुतेः** । **आचार्याय वरं ददाति**–दीयमानवरसंप्रदानप्रतिपत्त्यर्थम् । आचार्यपदमुपलक्षणं वा । तेन ब्रह्मणे पूर्णपात्रदानं वधूवस्त्रं सूर्यापाठकेभ्यः । वरशब्दार्थं विवाहे सूत्रकृदाह—**गौर्ब्राह्मणस्य वरो ग्रामो राजन्यस्याश्वो वैश्यस्याधिरथꣳ शतं दुहितृमते** ' ब्राह्मणश्चेद्वरः तदा गौः, क्षत्रियश्चेद्ग्रामः, वैश्यश्चेदश्वः, पुत्ररहितश्चेत्कन्यापिता तदा तस्मै रथाधिकं गवां शतं दत्त्वा विवाहं कुर्यात । **अस्तमिते ध्रुवं दर्शयति**–ध्रुवमीक्षस्वेति प्रैष आचार्यस्य । वधूर्ध्रुवमीक्षते । बर्हिर्होमादिब्राह्मणभोजनान्तम् । **त्रिरात्रमक्षारालवणाशिनौ स्यातामधःशयीयाताꣳ संवत्सरं न मिथुनमुपेयातां द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः**–क्षारं गुडादि सूत्राणि निगदव्याख्यातानि । इति अष्टमी कण्डिका ॥ ८ ॥ * ॥

उपयमनप्रभृत्यौपासनस्य परिचरणम् ॥ १ ॥ अस्तमितानुदितयोर्दध्ना तण्डुलैरक्षतैर्वा ॥ २ ॥ अग्नये स्वाहा प्रजापतये स्वाहेति सायम् ॥ ३ ॥ सूर्याय स्वाहा प्रजापतये स्वाहेति प्रातः ॥ ४ ॥ पुमाꣳसौ मित्रावरुणौ पुमाꣳसावश्विनावुभौ पुमानिन्द्रश्च सूर्यश्च पुमाꣳ संवर्ततां मयि पुनः स्वाहेति पूर्वां गर्भकामा ॥ ५ ॥ * ९ ॥ * ॥

कर्कः—**उपयमनप्रभृत्यौपासनस्य परिचरणमस्तमितानुदितयोः**—उपयमनकुशादानादि औपासनस्य परिचरणं व्याख्यास्यत इति सूत्रशेषः । होमेऽपि सति परिचरणग्रहणादितिकर्तव्यता न भवति । अस्तमितानुदितयोरित्यस्तमिते चानुदिते च तत्कर्म कर्तव्यम्, तच्च सर्वदा, न सकृत्क्रिया येनैवमाह—ततोऽस्तमितेऽग्निं परिचर्य दर्व्योपघातꣳ सक्तून् सर्पेभ्यो बलिꣳ हरेदिति बलिहरणविधिपरे वाक्ये परिचरणस्य नित्यत्वं ज्ञापयति, हस्तेनैवात्र होमः इतिकर्तव्यताव्युदासात् । व्युदासः कथमिति चेत् उपयमनप्रभृत्युक्तत्वात् । **दध्ना तण्डुलैरक्षतैर्वा** होमः **अग्नये स्वाहा प्रजापतये स्वाहेति सायं जुहोति। सूर्याय स्वाहा प्रजापतये स्वाहेति प्रातः** जुहोति । **पुमाꣳसौ मित्रावरुणौ** इति पूर्वामाहुतिं जुहोति, गर्भकामेति स्त्रीप्रत्ययनिर्देशात्स्त्र्येव जुहोति । पूर्वाहुतिविकारश्चायम् । अत्रैव च स्त्री, उत्तराहुतौ तु यजमान एव ॥ ९ ॥ * ॥ * ॥

जय०—उपयमन—प्रभृतिउपयमनान्कुशानादायेत्यारभ्य औपासनाग्नेः परिचरणं व्याख्यास्यत इति सूत्रशेषः । होमेऽपि च सत्युपयमनप्रभृतिग्रहणादितरेतिकर्त्तव्यताव्युदासः । अत एव हस्तेनैव होमः । अस्तमितानुदितयोरित्यस्तमिते च अनुदिते च तत्कर्म कर्तव्यम् । तच्च सर्वदा, नतु सकृत्क्रिया । येनाह–ततोऽस्तमितेऽस्तमितेऽग्निं परिचर्य दर्व्योपघातꣳ–सक्तून्सर्पेभ्यो बलिꣳ हरति । बलिहरणविधिपरे वाक्ये परिचरणस्य नित्यत्वं ज्ञापयति दध्नेति । पूर्वपूर्वालाभे उत्तरोत्तरद्रव्येण होमः कर्तव्यः । अग्नये स्वाहेत्याहुतिद्वयं सायं जुहोति । सूर्यायेत्यादि तु प्रातः । तत्र मेधातिथिर्गायत्री अनुष्टुभौ लिङ्गोक्ता होमे० **पुमाꣳसाविति** मन्त्रेण स्वयंपठितेन पूर्वामाहुतिमा-

ग्नेयसौर्यस्थाने । **गर्भकामेति**—स्त्रीप्रत्ययनिर्देशात्पत्न्यैव जुहोति । अयं च पूर्वाहुतिविकारः । अत्रैव च स्त्री । उत्तराहुतौ तु यजमान एव मुख्यत्वात् । मुख्यत्वं च **स्मृत्यर्थसारे** । सन्ध्याकर्मावसाने तु स्वयं होमो विधीयते । स्वयं होमे फलं यत्स्यान्न तदन्येन लभ्यते ॥ होमे यत्फलमुद्दिष्टं जुह्वतः स्वयमेव तु । हूयमाने तदन्येन फलमर्द्धं प्रपद्यते ॥" स्वयं होमाशक्तौ तु "यजमानः प्रधानं स्यात्पत्नी पुत्रश्च कन्यका । ऋत्विक् शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः ॥ एतैरेव हुतं यत्तु तद्धुतं स्वयमेव हि । पत्नी कन्या च जुहुयाद्विना पर्युक्षणक्रियाम् ।" इति । ततः सायं "समास्त्वा" इति । प्रातर्विभ्राडित्यनुवाकेनोत्थायोपस्थानं परिचरणोपदेशात् पुमाꣳसावित्यस्यार्थः सुगमः । तत्र मेधातिथिरनुष्टुप् लिङ्गोक्ता होमे ॥ ९ ॥

हरि०—उपयमनप्रभृत्यौपासनस्य परिचरणम्—अत्रौपासनस्यावसथ्यस्याग्नेः परिचरणमुपासनं व्याख्यास्यते, कथमुपयमनप्रभृति उपयमनकुशादानमारभ्य कोऽर्थः "उपयमनकुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयात्" इति यावत् । तस्य कालनियममाह **अस्तमितानुदितयोः**—अस्तमितश्च अनुदितश्च अस्तमितानुदितौ तयोस्तथा सूर्य्ययोः सूर्य्यस्यास्तमयानुदिताभ्याम् उपलक्षितयोः कालयोरित्यर्थः । तत्रास्तमितलक्षणं **छन्दोगपरिशिष्टे**—"यावत्सम्यङ् न भाव्यन्ते नभस्यृक्षाणि सर्वतः । न च लोहितिमापैति तावत्सायं तु हूयते ॥"अनुदितस्य द्वैविध्यम् । अनुदितः, समयाध्युषितश्च । तत्रानुदितः स्पष्टतारकोपलक्षितः, ततः परमुदयात्प्राक् समयाध्युषितः । तथा च मनुः—" उदितेऽनुदिते चैव समयाध्युषिते तथा । सर्वथा वर्त्तते यज्ञ इत्यर्था वैदिकी श्रुतिः ॥"इति संपूर्णादित्यमण्डलदर्शनोपलक्षित उदितः, तत्र वाजसनेयिनां नियमेनानुदिते होमः"सूर्यो ह वा अग्निहोत्रमित्यारभ्य तस्मादुदितहोमिनां विच्छिन्नमग्निहोत्रं मन्यामहे" इत्यन्तेन "श्रुतिसमाम्नायेन उदितहोमनिन्दापूर्वकमनुदितहोमस्य समर्थितत्वात् छन्दोगानामुदितानुदितयोर्विकल्पः"उदितेऽनुदिते वेति" **गोभिलवचनात् आश्वलायनानां** पुनरुदितहोमनियमः । तथाच **तैत्तिरीयब्राह्मणम्** ।"प्रातः प्रातरनृतं ते वदन्ति पुरोदयात् जुह्वति येऽग्निहोत्रम् । दिवाकीर्त्यमदिवाकीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषाम्" इति अनुदिते होमे निन्दार्थवादपुरःसरं तस्मादुदिते होतव्यमिति उदिते होमविधानात् । होमद्रव्यनियममाह **दध्ना तण्डुलैरक्षतैर्वा**—जुहुयात् दध्ना गव्येन तण्डुलैर्व्रीहिमयैः अक्षतैः सत्वकैर्यवैर्वा विकल्पेन एतेषामन्यतमेनेत्यर्थः । **अग्नये स्वाहा प्रजापतये स्वाहेति सायं सूर्याय स्वाहा प्रजापतये स्वाहेति प्रातः**—तत्र सायमग्नये स्वाहेति पूर्वाहुतिं प्रजापतये स्वाहेत्युत्तरां जुहुयात् । सर्वत्र प्रजापतियाग उपांशु स्वाहाकारश्चान्यस्त्यागश्च । आघारे तु स्वाहान्तोऽपि मानसः तथा सूर्याय स्वाहेति पूर्वाम, प्रजापतये स्वाहेत्युत्तराम्, प्रातस्त्यागास्तु प्रयोगे वक्ष्यन्ते । ते च यजमानकृत्याः । कुतः प्रधानत्वात् । "प्रधानꣳ स्वामी फलयोगात्" इति कात्यायनवचनात् । प्रधानं हि द्रव्यस्वत्वपरित्यागः । ततश्च प्रवसता यजमानेन यथाकालं यथादैवतं शुचिना आचान्तेन प्राङ्मुखोपविष्टेन सर्वकर्मसु कर्तव्याः । तत्र " सायमादिप्रातरन्तमेकं कर्म प्रचक्षते " इति वचनात् सायंहोमद्रव्येणैव प्रातर्होमः कर्तव्यः । तथा " येन होत्रा सायं हुतं तेनैव प्रातर्होतव्यम्, येनारम्भस्तेनैव समाप्तिः " इति न्यायाच्च । तथा दधितण्डुलयवानामलाभे श्यामाकनीवारवेणुयवकन्दमूलफलजलसप्तानां पूर्वपूर्वालाभे परंपरं नित्यहोमाय ग्राह्यम्, कन्दं सूरणादि, फलमाम्रादि । अस्यैव कर्मणः कामसंयोगमाह—**पुमाꣳसौ मित्रावरुणौ पुमाꣳसावश्विनावुभौ । पुमानिन्द्रश्च सूर्यश्च पुमाꣳसं वर्त्ततां मयि पुनः स्वाहेति पूर्वां गर्भकामा**—पुमाꣳसौ मित्रावरुणावित्यादिना मन्त्रेण गर्भकामा पत्नी पूर्वामाहुतिं जुहुयात् । अत्र पूर्वां गर्भकामेत्यस्य कोऽर्थः । किं नित्ययोर्द्वयोराहुत्योः प्रथमा पूर्वशब्देन विवक्षिता, उत ताभ्यां पूर्वा पूर्वं होतव्या अन्यैव । किं तावत्प्राप्तम् । अन्यैवेति । मन्त्रान्तरेण देवतान्तरहोमविधानात् मन्त्रस्य देवतायाश्च गुणत्वेन कर्मभेदकत्वात् ।

किंच द्वयोः प्रथमायाः पूर्वत्वे विवक्षिते नित्याग्नेयस्य सौर्यस्य च होमस्य बाधः प्रसज्येत । अत्रोच्यते सत्यम्, मन्त्रदेवतयोः कर्मभेदकत्वं पूर्वां गर्भकामेतीदं काम्यं कर्म, प्रकृतं तु नित्यम्, काम्यं नित्यस्य बाधकम्, "पुरुषार्थसमासक्तं काम्यं नित्यस्य बाधकम्" इति न्यायात्। तस्मादग्नये स्वाहा सूर्याय स्वाहेति नित्ये आहुती बाधित्वा पुमाꣳसौमित्रावरुणावित्यादिमन्त्रविहिता पत्नीकर्तृका कर्मान्तररूपा हि काम्य आहुतिः प्रवर्तते । यथा "गोदोहनेन पशुकामस्य प्रणयेत् " इत्यत्र काम्यं गोदोहनप्रणयनं, नित्यं चमसं बाधित्वैव प्रवर्तते । अत्र कथं बाध्यबाधकभावः । उच्यते,नित्यं तावदफलमकरणे प्रत्यवायजनकं,काम्यं तु फलवत्।तत्र फलवद्बलवत् अफलं दुर्बलं बाधते।अत्र यदि केचित् प्रत्यवतिष्ठेरन् आधानानुविधानानन्तरं सायं प्रातर्होमानुविधानं कर्तव्यम् । आचार्येण केन हेतुनाऽत्र कृतं को दोष इति चेत,परप्रकरणाम्नातं कथं षडर्घ्या भवन्तीत्यारभ्य तामुदुह्येत्यन्तं विवाहप्रकरणं,यतः तत्र समाधीयते। सूत्रकारस्य शैलीयम्,विवाहात्प्राक् आवसथ्याधानकथनं यथा नैतच्छङ्कनीयम्, "विवाहाग्निरेवावसथ्याग्निः" इति पक्षश्चाचार्यस्याभिमतस्तेनात्र होमानुविधानं कृतमिति। विवाहाग्नेरौपासनत्वं कुतोऽवगतमिति चेत् "वैवाहिकेऽग्नौ कुर्वीत स्मार्तं कर्म यथाविधि । पञ्चयज्ञविधानं च पक्तिं चान्वाहिकीं द्विज" इति मनुवचनात् । "कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही । दायकालाहृते वाऽपि श्रौतं वैतानिकाग्निषु" इति याज्ञवल्क्यवचनात् । कृतविवाहस्य सभार्यस्यावसथ्याधानाधिकारः, आश्वलायनगोभिलादिगृह्यकारवचनाच्च तस्माद्बहुसम्मतत्वाद्विवाहसमनन्तरमेव होमविधानाच्चाचार्यस्य विवाहहोमसाधनाग्निरेवौपासनः सम्मत इति । तत्रोच्यते, आश्वलायनगृह्यमतं मन्वादिवचनं तु यथागृह्यमाहितौपासनाग्निपर, स्वस्वशाखाधर्मप्रतिपादनपरम्, वाजसनेयिनां पञ्चदशशाखाश्रयिणां माध्यन्दिनकाण्वप्रभृतीनां च। पारस्कराचार्यस्य तु आवसथ्याधानप्रयोगं विवाहप्रयोगात्पृथगनुविदधतो नैषः पक्षः सम्मत इति गम्यते । यदि "विवाहाग्निरेवौपासनाग्निः"इति सम्मतः स्यात्तदा "आवसथ्याधानं दारकाले" इत्यादि न पृथक् प्रयोगमनुविदध्यात्, विवाहहोमेनैव आवसथ्याग्नौ सिद्धे पृथक् प्रयोगारम्भस्य वैयर्थ्यात् । तस्मादन्यस्थानपाठो न दोषः। इदं च औपासनपरिचरणं सर्वदा न सकृत्, यतः ततोऽस्तमितेऽग्निं परिचर्य दर्व्योपघातꣳ सक्तन् सर्वेभ्यो बलिꣳ हरेत् इति बलिहरणविधिपरे वाक्ये परिचरणस्य नित्यत्वं ज्ञापयति । "छिन्नं लूनं च पिष्टं च साम्नाय्यं मृन्मयं तथा । लोकसिद्धं गृहीतं चेन्मन्त्रा जप्या कठाशयात् ॥ छिन्नादि लोकसिद्धं चेदाद्रियेत क्रतुं प्रति । तत्तन्मन्त्रजपं प्राह भारद्वाजः कृताकृतम् ॥ छिन्ने चावहने लूने पिष्टे दुग्धे च मृन्मये । खाते च लौकिके प्राप्ते जपो नास्त्येव वाजिनाम् ॥" अत्र च न मन्त्रान्ते स्वाहाकारहोमौ किन्तु आदावेव । नचोङ्कारः प्रतिमन्त्रं किन्तु आद्य एव । यदाह–"स्वाहा कुर्यान्न मन्त्रान्ते नचैव जुहुयाद्धविः । स्वाहाकारेण हुत्वाऽग्नौ पश्चान्मन्त्रं समापयेत् ॥" सामगानामयम्–"नोंकुर्याद्धोममन्त्राणां पृथगादिषु कुत्रचित् । अन्येषां चाविकृष्टानां कालेनाचमनादिना ॥" आविकृष्टानामनन्तरितानां कालेन आचमनादिना वा ॥ ९ ॥

अथ प्रयोगः । आवसथ्याधानोत्तरकालं तद्दिवस एव सायम्प्रातर्होमनिमित्तं मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा, सन्ध्यावन्दनानन्तरमग्निसमीपं गत्वा, पश्चादग्नेः प्राङ्मुख उपविश्य उपयमनकुशान् समिधस्तिस्रः मणिकवारि दध्यादीनामन्यतमं होमद्रव्यम् अग्नेरुत्तरतः प्राच आसाद्य उपयमनकुशानादाय तिष्ठन् समिधोऽभ्याधाय पर्युक्ष्य द्वादशपर्वपूरकेण दधितण्डुलयवानामेकतमेन द्रव्येण हस्तेनैव स्वङ्गारिणि स्वर्चिषि वह्नौ मध्यप्रदेशे देवतां ध्यायन् जुहुयात् अग्नये स्वाहा इदमग्नये, तदुत्तरतः मनसा प्रजापतये स्वाहा इदं प्रजापतये, इति सायम् । तथैव सूर्याय स्वाहा इदं सूर्याय, प्रजापतये स्वाहा इति त्यागमिति । प्रातः पत्नी चेद्गर्भकामा भवति तदा "पुमाꣳसौ मित्रावरुणौ पुमाꣳसावश्विनावुभौ पुमानिन्द्रश्च सूर्यश्च पुमाꣳसं वर्ततां मयि पुनः स्वाहा" इति पूर्वामाहुतिं पत्नी जुहोति, उत्तरां यजमानः। इदं मित्रावरुणाभ्यामश्विभ्यामिन्द्राय सूर्याय च । इति नित्यहोमविधिः ॥ ९ ॥

गदा०–आवसथ्येऽग्नौ होममाह–**उपयमनप्रभृत्यौपासनस्य परिचरणम्**–उपयमनकुशादानादि औपासनस्यावसथ्यस्याग्नेः परिचरणं व्याख्यास्यत इति सूत्रशेषः । प्रभृतिग्रहणेन उपयमनान् कुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयादेतावल्लभ्यते, होमश्चात्रोपदिष्टः । होमेऽपि च सति परिचरणग्रहणादितिकर्तव्यता न भवति, हस्तेनैवात्र होमः इति कर्तव्यताव्युदासात् । कथमितिकर्तव्यताव्युदास इति चेत्, उपयमनप्रभृतीत्युक्तत्वात् । पर्युक्षणं च च मणिकोदकेन । होमकालनियममाह **अस्तमितानुदितयोः**–अस्तमितश्चानुदितश्चास्तमितानुदितौ तयोः तत्कर्म कर्तव्यामिति शेषः । आवसथ्याधानानन्तरमस्तमिते च सूर्ये अनुदिते च सर्वदा होमः कार्यः, न सकृत् । येनैवं सूत्रकार आह–**ततोऽस्तमितेऽग्निं परिचर्य दर्व्योपघातꣳ सक्तून् सर्पेभ्यो बलिं हरेदिति**–बलिहरणविधिपरे वाक्ये होमस्य नित्यत्व ज्ञापयति । अस्तमितलक्षणं **कात्यायनेनोक्तम्** । "यावत्सम्यङ् न भाव्यन्ते नभस्यृक्षाणि सर्वतः । लोहितत्वं च नोपैति तावत्सायं तु हूयते ॥" अनुदितस्तु द्विविधः । अनुदितः समयाध्युषितश्च । तथाच **मनुः**–"उदितेऽनुदिते चैव समयाध्युषिते तथा" इति । तत्रानुदितः स्पष्टतारकोपलक्षितः । ततः परमुदयात्प्राक् समयाध्युषितः सम्पूर्णादित्यमण्डलदर्शनोपलक्षित इति उदितः । तत्रास्माकं सूत्रेऽनुदित एव परिचरणमुक्तम् । मनुवचने उदितग्रहणं शाखान्तरगृह्याभिप्रायेण । मुख्यकाले यदा होमो न भवति तदा गौणकालेऽपि कार्यः । तथा च **मण्डनः**--"मुख्यकाले यदावश्यं कर्म कर्तु न शक्यते । गौणकालेऽपि कर्तव्यं गौणोऽप्यत्रेदृशो भवेत् ॥" गौणकालपरिमाणमपि तेनैवोक्तम्–"आसायमाहुतेः कालात्कालोऽस्ति प्रातराहुतेः । प्रातराहुतिकालात्प्राक् कालः स्यात्सायमाहुतेः ॥" इति । मुख्यकालातिक्रमे प्रायश्चित्तपूर्वकं गौणकालेऽनुष्ठानं, गौणकालातिक्रमे तु लोप एव प्रायश्चित्तद्वयमात्रम् । एकमाविज्ञातम्–"सन्ध्योपासनहानौ च नित्यस्नानं विलोप्य च । होमं च नैत्यिकं शुद्धयेत् सावित्र्यष्टसहस्रकृत् ॥" इति प्राजापत्युक्तं द्वितीयम्, होमे कर्तारः स्वयं, स्वस्यासम्भवे पत्न्यादयः । **प्रयोगरत्ने स्मृतौ**–"पत्नी कुमारी पुत्रो वा शिष्यो वापि यथाक्रमम् । पूर्वपूर्वस्य चाभावे विदध्यादुत्तरोत्तरः" । **स्मृत्यर्थसारेऽपि** "यजमानः प्रधानं स्यात्पत्नी पुत्रश्च कन्यका । ऋत्विक् शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः ॥ एतैरेव हुतं यच्च तद्धुतं स्वयमेव तु । पत्नी कन्या च जुहुयाद्विना पर्युक्षणक्रियाम् ।" इति । अत्र वचनात्पत्न्यादीनां मन्त्रपाठेऽधिकारः, केवलं पर्युक्षणेऽनधिकारः । अग्निहोत्रे तु "न वा कन्या न युवती नाल्पविद्यो न बालिशः । होमे स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथा" इति वचनात्पत्न्यादीनामनधिकारः । त्यागे विशेषः । "सन्निधौ यजमानः स्यादुद्देशत्यागकारकः । असन्निधौ तु पत्नी स्यादुद्देशत्यागकारिका ॥ असन्निधौ तु पत्न्याः स्यादध्वर्युस्तदनुज्ञया । उन्मादे प्रसवे चर्तौ कुर्वीतानुज्ञया विना ॥" **मण्डनः**–"त्यागं तु सर्वथा कुर्यात्तत्राप्यन्यतरस्तयोः । उभावप्यसमर्थौ चेन्नियुक्तः कश्चन त्यजेत् ॥" **दध्ना तण्डुलैरक्षतैर्वा**–गव्येन दध्ना वा व्रीहितण्डुलैर्वा । अक्षतैर्यवैर्वा जुहुयादित्यर्थः । तेषामभावे शाखान्तरगृह्यपरिशिष्टोक्तानि द्रव्याणि ग्राह्याणि । तत्र **प्रयोगरत्ने**–पयो, दधि, सर्पिः, यवागूः, ओदनं, तण्डुलाः, सोमः, तैलम्, आपः, व्रीहयः, यवाः, तिलाः इति होम्यानि । तण्डुला नीवारश्यामाकयावनालानां, व्रीहिशालियवगोधूमप्रियङ्गवः स्वरूपेणापि होम्याः, तिलाः स्वरूपेणैव । शतं चतुःषष्टिर्वाऽऽहुतिर्व्रीहितुल्यानां, तदर्द्धं तिलानाम्, तदर्द्धं सर्पिस्तैलयोः । तैलं च तिलजर्तिलातसीकुसुम्भानाम् । येन प्रथमां देवतां जुहुयात्तेनैव द्वितीयां जुहुयाद्येन च सायं जुहुयात्तेनैव प्रातरिति । अत्र तेनैव प्रातरिति प्रतिनिधिवर्जम् । बृहस्पतिस्त्वाहुतिपरिमाणमाह–" प्रस्थधान्यं चतुःषष्टेराहुतेः परिकीर्तितम् । तिलानां च तदर्द्धं तु तण्डुला व्रीहिभिः समाः ॥ प्रस्थश्च "प्रसृतीद्वितयं मानं प्रस्थं मानचतुष्टयम् " इति । **बौधायनस्तु** "व्रीहीणां च यवानां वा शतमाहुतिरिष्यते ।" **अगस्त्यः**–" द्रवद्रव्यस्य मानं स्याद्धारा गोकर्णदीर्घिका ।" **सिद्धान्तशेखरे**–" अन्नं ग्राससमं प्रोक्तं लाजा मुष्टिमिता मता " इति । दधिपक्षे तण्डुलपक्षे च शेषप्राशनम् , अक्षतपक्षे त्वभावः अनदनीयत्वादिति **भर्तृयज्ञः** । **अग्नये स्वाहा प्रजापतये स्वाहेति सायꣳ सूर्याय स्वाहा प्रजापतये स्वाहेति प्रातः**–तत्र सायङ्काल अग्नये स्वाहेति पूर्वामाहुतिं जुहोति । प्रजापतये स्वाहेत्युत्तरां च जुहोति । प्रातःकाले सूर्याय स्वाहेत्यनेन मन्त्रेण पूर्वामाहुतिं हुत्वा प्रजापतये स्वाहेत्युत्तरां च जुहुयात् । **पुमाꣳ सौ मित्रावरुणौ पुमाꣳसावश्विनावुभौ पुमानिन्द्रश्च सूर्यश्च पुमाꣳ संवर्ततां मयि स्वाहेति पूर्वां गर्भकामा**–यदि गर्भकामा पत्नी भवति तदा सायम्प्रातः पूर्वामाहुतिं पत्न्येव "पुमाꣳसौमित्रावरुणा" इत्यनेन मन्त्रेण जुहोति, उत्त-

रामाहुतिं तु यजमान एव जुहोति । सर्वत्र होमे प्रतिमन्त्रं नोङ्कारः । " नोङ्कुर्याद्धोममन्त्राणां पृथगादिषु कुत्रचित् । अन्येषां चाविकृष्टानां कालेनाचमनादिना ।" इति वचनात् ॥ "विकृष्टानामनन्तरितानां कालेनाचमनादिना वा" इति **हरिहरः** । मन्त्रार्थः । एतेषां देवानामेतौ युग्मौ मम आहुत्या सद्दत्तया परितुष्टौ सन्तौ मयि विषये पुमांसं पुंल्लक्षणं गर्भं संवर्ततामुत्पादयेतामिति । इति श्रीत्रिरग्निचित्सम्राट्स्थपति—श्रीयाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे नवमी कण्डिका ॥ ९ ॥ * ॥ * ॥

अथ पदार्थक्रमः । तत्रावसथ्याधानोत्तरकालं तस्मिन्नेवाहनि भोजनात्प्राक् यजमानो होमारम्भनिमित्तं मातृपूजनपूर्वकं नान्दीश्राद्धं कुर्यात् । ततः कृतसन्ध्यावन्दनोऽग्नेरुत्तरतः उपविश्य प्राणानायम्य देशकालौ सङ्कीर्त्याग्निरूपपरमेश्वरप्रीत्यर्थम् औपासनहोमं करिष्य इति सङ्कल्प्य । वैकल्पिकं द्रव्यमवधार्योपयमनकुशानादाय, सव्ये कृत्वा दक्षिणेन हस्तेन तिस्रः समिधोऽभ्याधाय मणिकोदकेन पर्युक्ष्य प्रदीप्तेऽग्नौ शतसंख्यान् प्रस्थस्य चतुःषष्टितमभागमितान्वा तण्डुलानादायाङ्गुल्युत्तरपार्श्वेन समिन्मूलतो द्व्यङ्गुलप्रदेशे अग्नये स्वाहेति जुहोति । इदमग्नये न ममेति त्यागं विधाय प्रक्षिपेत् । संस्रवरक्षणम् । पुनस्तण्डुलानादाय प्रजापतये स्वाहेत्युपांशूक्त्वा ॐ प्रजापतये न ममेति त्यागं विधाय प्रक्षिपेत् । संस्रवरक्षणम् । "पत्नी पुमांसौ" इत्यनेन मन्त्रेण गर्भकामा चेत्पूर्वामाहुतिं जुहोति । इदं मित्रावरुणाभ्यामश्विभ्यामिन्द्राय सूर्याय न ममेति त्यागो यजमानस्य । संस्रवप्राशनम् । पत्नीकर्तृकहोमशेषस्य पत्न्येव प्राशनं करोति । अत्र **समास्त्वेत्युपस्थानमिति जयरामभाष्ये** इति **सायंहोमः** । अथ प्रातर्होमे विशेषः । उदयात्पूर्वं सायंद्रव्येणैव सूर्याय स्वाहेति पूर्वाहुतिः । प्रजापतये स्वाहेत्युत्तराहुतिः । यथादैवतं त्यागौ । गर्भकामा चेदत्रापि पुमांसावितिहोमः । अत्र **विभ्राडित्यनुवाकेनोपस्थानमिति जयरामभाष्ये** । इति **प्रातर्होमे** विशेषः । अन्यत्सर्वं सायंहोमवत् । एवमुपयमनकुशादानादि प्रत्यहमौपासनस्य परिचरणम् । अथापत्काले कर्तव्यो होमद्वयसमासप्रयोगः । तत्र पूर्ववत्सायङ्कालिकाहुतिद्वयं हुत्वा किञ्चित्कालं निमील्य पुनः कुशादानादिपर्युक्षणान्तं कृत्वा श्वःकर्तव्यप्रातराहुतिद्वयमपकृष्य जुहुयादिति । **प्रयोगरत्ने हरिहरमिश्रैस्तु** तन्त्रेण होमो लिखितः । स चैवं पर्युक्षणान्तं कृत्वाऽग्नये स्वाहेति हुत्वा तथैव सूर्याय स्वाहेति हुत्वा आहुतिद्वयपर्याप्तं होमद्रव्यमादाय प्रजापतये स्वाहेति सकृज्जुहुयात् । अथ गुर्वापदि पक्षहोमः । तत्र प्रतिपदि सायङ्काले उपयमनादानादिपर्युक्षणान्तं कृत्वा आहुतिप्रमाणेन तण्डुलान्पात्रद्वये प्रतिपात्रं चतुर्दशवारं गृहीत्वा होमकाले प्रथमपात्रस्थानग्नये स्वाहेति जुहुयात् । ततो द्वितीयपात्रस्थान्प्रजापतये स्वाहेति जुहोति । एवं द्वितीयायां प्रातः पर्युक्षणान्तं कृत्वा पूर्ववत्पात्रद्वये तण्डुलान्कृत्वा सूर्याय स्वाहेति प्रथमपात्रस्थान् हुत्वा प्रजापतये स्वाहेति द्वितीयपात्रस्थां स्तण्डुलान् जुहुयात् । पक्षमध्ये वा आपत्तावागामिचतुर्दशीसायङ्कालिकहोमान्तान् शेषहोमान् सायं समस्येत् । पर्वप्रातर्होमान्तांश्च प्रातः शेषहोमान् समस्येत्, सर्वथा पर्वसायंहोमः प्रतिपत्प्रातर्होमश्च पृथगेव होतव्यौ । तत्र पूर्ववदग्निमभिरक्षेत्, अन्तरापन्निवृत्तौ तु तदारभ्य पूर्ववत्सायम्प्रातर्होमान् यथाकालं कुर्यादिति **प्रयोगरत्ने** । अनापदि पक्षहोमे प्रायश्चित्तमुक्तं **देवयाज्ञिकपद्धतौ**—"अनातुरोऽप्रवासी च निश्चिन्तो निरुपद्रवः । पक्षहोमं तु यः कुर्यात्स चरेत्पतितव्रतम् ॥" इति श्रीत्रिरग्निचित्सम्राट्स्थपति-श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरविरचिते गृह्यसूत्रभाष्ये होमविधिः ॥ ९ ॥ * ॥

विश्व०—**उपयम……चरणम्**—उपयमनान्कुशानादायेत्यारभ्य समिधश्चात्र तिस्रः प्रकरणात् । उपासन आवसथ्याग्निः । प्रभृतिग्रहणात्प्रागुक्तपरिभाषाव्यवच्छेदः **अस्तमितानुदितयोः**—तत्र प्रथमप्रयोगे मातृश्राद्धम् । द्रव्यमाह—**दध्ना तण्डुलैरक्षतैर्वा**-कर्तव्यतामाह—**अग्नये स्वाहा, प्रजापतये स्वाहेति सायम्**-परिमाणं तु दक्षिणहस्तकनिष्ठाशून्यस्याङ्गुलित्रयस्य द्विपर्वापूरणपर्याप्तम् । त्यागस्तु स्वाहाकाररहितो मन्त्र एवेदंपूर्वकः । एवं प्रातर्होमेऽपि । एवं सायंहोममुक्त्वा प्रातर्होममाह-**सूर्याय स्वाहा, प्रजापतये स्वाहेति प्रातः**-दध्ना होमपक्षे स्रुवं प्रतप्य पाणिना संमृज्यासर्वहोमं कृत्वा संस्रवं पात्रान्तरे प्रक्षिप्य शेषं प्राश्नीयादित्याहुः । **पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ पुमानिन्द्रश्च सूर्यश्च पुमांसं वर्ततां मयि पुनः स्वाहेति पूर्वां पत्नी गर्भकामा जुहोति**—उत्तरां यजमान एव । इदं मित्रावरुणाभ्यामिति त्यागः । स्वयंहोमाशक्तौ तु—"यजमानः प्रधानं स्यात्पत्नी पुत्रश्च कन्यका । ऋत्विक् शिष्यो गुरुर्भ्राता भागिनेयश्च विट्पतिः ॥ एतैरेव हुतं यत्तु तद्धुतं स्वयमेव तु । पत्नी कन्या च जुहुयाद्विना पर्युक्षणक्रियाम्" इति नवमी कण्डिका ॥ ९ ॥ * ॥

राज्ञोऽक्षभेदे नद्धविमोक्षे यानविपार्यासेऽन्यस्यां वा व्यापत्तौ स्त्रियाश्चोद्वहने तमेवाग्निमुपसमाधायाज्यꣳसंस्कृत्येह रतिरिति जुहोति नानामन्त्राभ्याम् ॥ १ ॥ अन्यद्यानमुपकल्प्य तत्रोपवेशयेद्राजानꣳस्त्रियं वा प्रतिक्षत्र इति यज्ञान्तेनात्वाहार्षमिति चैतया ॥ २ ॥ धुर्यौ दक्षिणा ॥ ३ ॥ प्रायश्चित्तिः ॥ ४ ॥ ततो ब्राह्मणभोजनम् ॥ ५ ॥ ॥ १० ॥

कर्कः–**राज्ञोऽक्षभेदे नद्धविमोक्षे यानविपर्यासेऽन्यस्यां वा व्यापत्तौ स्त्रियाश्चोद्वहने तमेवाग्निमुपसमाधायाज्यꣳ संस्कृत्येह रतिरिति जुहोति नानामन्त्राभ्याम्**–राज्ञो रथाक्षभेदे, नद्धस्य वा रथस्य विमोक्षे, यानस्य विपर्यासे, अन्यस्यां वा कस्यांचिद्व्यापदि, स्त्रियाश्चोद्वहने । उद्वहनं च पितृगृहाद्भर्तृगृहं प्रति प्रथमं नयनम् । अत्र चैतेष्वपि निमित्तेषु नैमित्तिकमिदमुच्यते । **तमेवाग्निमुपसमाधायेति**–राज्ञः सेनाग्निः, स्त्रियाश्चैव विवाहाग्निः। आज्यं संस्कृत्येति ग्रहणमाघारादिभ्योऽपि पूर्वकालत्वज्ञापनार्थम्। इह रतिरिति नानामन्त्राभ्यां जुहोति। नानाग्रहणाच्च द्वे आहुती। तत आघारादि । **अन्यद्यानमुपकल्प्य तत्रोपवेशयेद्राजानꣳस्त्रियं वा प्रतिक्षत्र इति यज्ञान्तेन**–परादिना पूर्वान्ताभावाद्यज्ञान्तग्रहणम् । **आत्वाहार्षमिति चैतया**–ऋचोपवेशयेत् । **धुर्यौ दक्षिणा प्रायश्चित्तिः**–धुर्यावनड्वाहौ दक्षिणा। प्रायश्चित्तिरिति सञ्ज्ञास्य । **ततो ब्राह्मणभोजनम्** ॥ १० ॥ * ॥

जय०–राज्ञो रथाक्षस्य भेदे भङ्गे, नद्धस्य रथस्य विमोक्षे वा आकस्मिके यानस्य विपर्यासे वा अधोभावापत्तौ, अन्यस्यां वा कस्याञ्चिद्व्यापदि, उद्वहने पितृगृहाद्भर्तृगृहं प्रति प्रथमगमने स्त्रिया वध्वाः । चकाराद्रथाक्षभेदादिनिमित्ते नैमित्तिकमिदमुच्यते ॥ तमेवेति राज्ञः सेनाग्निं, स्त्रियाश्च वैवाहिकाग्निम् । **आज्यं संस्कृत्येति**–ग्रहणम् **इह रति**रित्याहुत्योराघारादिभ्योऽपि पूर्वकालत्वज्ञापनार्थम् । **नानामन्त्राभ्यामिति**–ग्रहणादिह रतिरिति, "उपसृजम्" इति चेत्याहुतिद्वये मन्त्रभेदः । तत आघारादि प्राजापत्यन्तं **प्रतिक्षत्र इति**–अत्र परादिना पूर्वान्तत्वाभावाद्यज्ञान्तेनग्रहणम्, ततः प्रतिक्षत्रे प्रतितिष्ठामीत्यादि प्रतितिष्ठामियज्ञे इति मन्त्रेण ॥ तत्र प्रजापतिरतिशक्करी विश्वेदेवा आरोहणे । **आत्वाहार्षमिति चैतया**–ऋचा पुरोहितो राजानं वरश्च वधूम् । आत्वाहार्षमिति ध्रुवोऽनुष्टुप् अग्निरारोहणे । **धुर्याविति**–बलीवर्दौ अस्य कर्मणो **दक्षिणा प्रायश्चित्तिरिति**-च संज्ञाऽस्य कर्मणः । **ब्राह्मणभोजनं** चोक्तार्थाः ॥ १० ॥

हरि०–अथ नैमित्तिकमुच्यते । **राज्ञोऽक्षभेदे नद्धविमोक्षे यानविपर्यासेऽन्यस्यां वा व्यापत्तौ स्त्रियाश्चोद्वहने**–राज्ञः प्रजापालनाधिकृतस्य यात्रादिप्रस्थितस्य अक्षभेदे रथावयवभङ्गे, नद्धविमोक्षे नद्धस्य रथस्य विमोक्षे, सन्नहनच्छेदे वा यानविपर्यासे यानस्य विपर्यासे अधोमुखादिभावे वा अन्यस्यां वा व्यापत्तौ अन्यस्मिन्वा अशुभसूचके निमित्ते, स्त्रियाश्चोद्वहने उद्वाहितायाः पूर्वं पतिगृहनयने, चशब्दात् रथाक्षभेदादिकनिमित्ते सञ्जाते नैमित्तिकं प्रायश्चित्तरूपं कर्मोच्यते । "कर्मोपपाते प्रायश्चित्तं तत्कालम्" इति वचनात् । निमित्तसमनन्तरमेव नैमित्तिकं कुर्यात् । तद्यथा । **तमेवाग्निमुपसमाधायाज्यꣳसंस्कृत्येह रतिरिति जुहोति नानामन्त्राभ्याम्**–तमेवेति यदि राज्ञो निमित्तं तदा प्रास्थानिकं सेनाग्निं, यदि स्त्रियाः निमित्तं तदा वैवाहिक-

मग्निं पञ्चभूसंस्कारान्कृत्वा उपसमाधाय स्थापयित्वा ब्रह्मोपवेशनादि पर्युक्षणान्तां कुशकण्डिकां विधाय "एष एव विधिर्यत्र क्वचिद्धोमः" इत्यनेनैवाज्यसंस्कारे प्राप्ते पुनराज्यꣳ संस्कृत्येति वचनम् आघारहोमात्प्रागेव इह रतिरित्याज्याहुतिद्वयप्राप्त्यर्थम्, ततश्च पर्युक्षणान्ते इह रतिरिति नानामन्त्राभ्याम् द्वाभ्यां जुहोत्याहुतिद्वयम्। तत आघारादिस्विष्टकृदन्ते। **अन्यद्यानमुपकल्प्य तत्रोपवेशयेद्राजानꣳ स्त्रियं वा प्रतिक्षत्र इति यज्ञान्तेनात्वाहार्षमिति चैतया**—अन्यद्रथादिकं यानं वाहनमुपकल्प्य संयोज्य तत्र तस्मिन् याने राजानं नृपं स्त्रियं चोद्वाहितां वधूमुपवेशयेत् आरोहयेत्। कथं प्रतिक्षत्त्रे प्रतितिष्ठामीत्यादिना प्रतितिष्ठामि यज्ञ इत्यन्तेन मन्त्रेण "आत्वाहार्षम्" इत्येतयर्चा च। **धुर्यौ दक्षिणा प्रायश्चित्तिः**—धुर्यौ धुरि साधू अनड्वाहौ, दक्षिणा ब्रह्मणे देया। दक्षिणाशब्दः परिक्रयार्थे द्रव्ये वर्तते येन ऋत्विजामानतिर्भवति। इदं कर्म प्रायश्चित्तिः दुर्निमित्तसूचितदुरितापहारिणी अतः सति निमित्ते भवति। **ततो ब्राह्मणभोजनम्**—ततः कर्मसमाप्त्यनन्तरं ब्राह्मणस्य भोजनं कारयितव्यम्। इति सूत्रार्थः॥ १०॥

अथ प्रयोगः। अक्षभेदादिनिमित्तानामेकतमे निमित्ते सञ्जाते शुचौ देशे पञ्चभूसंस्कारान्कृत्वा राज्ञः पुरोहितः सेनाग्निमुपसमाधाय वध्वा वरो वैवाहिकमग्निं ब्रह्मोपवेशनादिपर्युक्षणान्ते "इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा" इति प्रथमामाहुतिं जुहुयात्, इदमग्नये०। उपसृजन् धरुणम्मात्रे धरुणो मातरन्धयन्। रायस्पोषमस्मासु दीधरत्स्वाहेति द्वितीयाम्, इदमग्नये०। इत्याहुतिद्वयं हुत्वा तत आघारादिस्विष्टकृदन्तं चतुर्दशाहुतिकं होमं विधाय संस्रवं प्राश्याचम्य धुर्यावनड्वाहौ ब्रह्मणे अस्य कर्मणः प्रतिष्ठार्थमेतावनड्वाहौ तुभ्यं ब्रह्मणे मया दत्ताविति प्रयोगेण दक्षिणां दत्त्वा अन्यद्यानमानीय तत्पुरोहितो राजानं वरो वधूमुपवेशयेत्। "प्रतिक्षत्त्रे प्रतितिष्ठामि राष्ट्रे आत्वाहार्षम्" इति मन्त्राभ्यां, ततो ब्राह्मणभोजनम्॥ १०॥

गदा०। **राज्ञोऽक्षभेदे नद्धविमोक्षे यानविपर्यासेऽन्यस्यां वा व्यापत्तौ स्त्रियाश्चोद्वहने तमेवाग्निमुपसमाधायाज्यꣳ संस्कृत्येह रतिरिति जुहोति नानामन्त्राभ्याम्**—राज्ञः प्रजापालनकर्तुर्देशान्तरे प्रस्थितस्य, युद्धे वा अक्षस्य रथावयवस्य भेदे भङ्गे, नद्धस्य रथस्य विमोक्षे आकस्मिकबन्धविच्छेदे वा यानविपर्यासे हयरथादिके वा अधोभावापत्तौ, अन्यस्यां वा कस्यां चिद्व्यापत्तौ अशुभसूचकोत्पाते, स्त्रियाश्चोद्वहने स्त्रियाः वध्वाः पितृगृहाद्भर्तृगृहं प्रति प्रथमगमने चकाराद्रथाक्षभेदादिनिमित्ते नैमित्तिकमिदमुच्यते तमेवाग्निमुपसमाधायेति। राज्ञश्चेन्निमित्तं तदा सेनाग्निं, स्त्रियाश्चेत्तदा वैवाहिकमग्निमुपसमाधाय स्थापयित्वा आज्यं संस्कृत्य आज्यसंस्कारान्निरुप्याज्यमित्यादिना कृत्वा 'इह रतिरिति नानामन्त्राभ्यां जुहोति, एष एव विधिरित्यनेनैवाज्यसंस्कारस्य प्राप्तत्वादत्राज्यं संस्कृत्येति ग्रहणम् इह रतिरित्याहुत्योराघारादिभ्योऽपि पूर्वकालत्वज्ञापनार्थम्, नानाग्रहणाच्च द्वे आहुती इह रतिरित्येका उपसृजमिति द्वितीया। तत आघारादि। **अन्यद्यानमुपकल्प्य तत्रोपवेशयेद्राजानꣳ स्त्रियं वा प्रतिक्षत्र इति यज्ञान्तेनात्वाहार्षमिति चैतया**—ततस्तद्यानं त्यक्त्वाऽन्यद्यानं वाहनं रथादिकमुपकल्प्य तत्र तस्मिन्याने वाहने राजानं स्त्रियं वा वधूमुपवेशयेत्। "प्रतिक्षत्र" इति मन्त्रेण, यज्ञ इत्यन्तेन, आत्वाहार्षमिति चैतया ऋचाऽपि उपवेशयेत्। एवं च मन्त्राभ्यामुपवेशनम्। अत्रोपवेशयेति ण्यन्तत्वादध्येषणं याने उपविशस्वेति। तच्च राज्ञो ब्रह्मकर्तृकम्। वध्वा वरकर्तृकम्। अत्र "परादिना पूर्वान्त" इति न्यायाभावात्तेषां वाक्यमित्यनेन च प्रतिक्षत्रे प्रतितिष्ठामीत्येतदन्तमन्त्रप्राप्तौ यज्ञान्तग्रहणं वाक्यसमुच्चयविधानार्थम्। आत्वाहार्षमिति ऋक्त्वात्संपूर्णायाः पाठः। तेषां वाक्यमित्यत्र। तच्छब्देन यजुषां परामर्शात्। ततश्च यत्र ऋक्प्रतीकग्रहणं तत्र सम्पूर्णायाः पाठः त्वन्नो अग्ने इत्यादौ। **धुर्यौ दक्षिणा प्रायश्चित्तिः**—अत्र धुर्यावनड्वाहौ दक्षिणा भवतीति शेषः। दक्षिणान्तरस्य निवृत्तिः दृष्टार्थत्वात्। प्रायश्चित्तिरिति चास्य कर्मणः सञ्ज्ञा। **ततो ब्राह्मणभोजनम्**—ततः कर्मान्ते ब्राह्मणस्यैकस्य भोजनं कार्यम्, कारयितव्यम्॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे दशमी कण्डिका॥ १०॥

अथात्र पदार्थक्रमः। तत्र निमित्ते जाते पञ्चभूसंस्कारपूर्वकमग्नेः स्थापनम्। राजा सेनाग्नेः स्थापनं कुर्यात्, वरश्च वैवाहिकाग्नेः स्थापनं कुर्यात्, ततो ब्रह्मोपवेशनादिपर्युक्षणान्तं कृत्वा "इह रतिः" इति प्रथमामाहुतिं जुहोति, उप-

सृजन् वरुणमित्यादिदीधरत्स्वाहेत्यन्तेन मन्त्रेण द्वितीयामाहुतिं जुहोति । इदमग्नये न ममेतिद्वयोस्त्यागौ । तत आघारादिप्रणीताविमोकान्तं कृत्वा धुर्यावनड्वाहौ दत्त्वा अन्ययानमानीय तत्र राजानं "प्रतिक्षत्रे प्रतितिष्ठामि, आत्वाहार्षम्" इमाति मन्त्राभ्यामुपविशस्वेत्यध्येषणपूर्वकमुपवेशयेत् । वधूमेताभ्यामेव मन्त्राभ्यामुपवेशयेत् । ततो ब्राह्मणभोजनम् । इति पदार्थक्रमः ॥ १० ॥ * ॥ * ॥

विश्व०–राज्ञोऽक्षभेदे–अक्षस्य भेदोऽक्षभेदः तस्मिन्नित्यर्थः । **नद्धविमोक्षे**–नद्धस्य बद्धस्य विमोक्षे वा आकस्मिके इत्यर्थः । **यानविपर्यासे**–यानस्य विपर्यासः अधोभावाद्यापत्तिस्तस्मिन्नित्यर्थः । **अन्यस्यां वा व्यापत्तौ**–अन्यस्यां वा कस्यांचिद्विपत्तौ । **स्त्रियाश्चोद्वहने**–स्त्रियाः वध्वाः उद्वहने पितृगृहाद्भर्तृगृहं प्रति गमने प्रथमे इत्यर्थः । नैमित्तिकत्वसूचनार्थश्चकारः । **तमेवाग्निमुपसमाधायाज्यꣳसंस्कृत्येह रतिरिति जुहोति नानामन्त्राभ्याम्**–तमेव राज्ञः सेनाग्निं स्त्रियाः वैवाहिकमग्निमुपलिप्त उद्धतावोक्षिते समाधाय आज्यं पूर्णाहुतिवत्संस्कृत्येह रतिरिति जुहोति । संस्कारोत्तरकालं होमविधानादाघारादिना न व्यवधानम् । स्वाहाकारान्ताभ्यां संहितापठिताभ्यां मन्त्राभ्यां नाना आहुतयो होतव्याः । ताश्चाहुतयः षट् । "वृषोत्सर्गे षट् जुहोति" इति सूत्रात् । इदमग्नय इति सर्वासु त्यागः । तत आघारादिचतुर्दशाहुतीर्हुत्वा संस्रवं प्राश्य पवित्राभ्यां मार्जनं कृत्वा ब्रह्मणे दक्षिणां दद्यात् । **अन्ययानमुपकल्प्य तत्रोपवेशयेद्राजानꣳ स्त्रियं वा प्रतिक्षत्र इति यज्ञान्तेन**–प्रतिक्षत्र इत्यत्र परादिना पूर्वान्तत्वाभावाद्यज्ञान्तेनेत्युक्तम् । तथाच प्रतितिष्ठामि यज्ञ इत्यन्तो मन्त्रः पुरोहितो राजानं स्त्रियं वधूं वर इति । **आत्वाहार्षमिति चैतया**—उपवेशयेदिति समुच्चयार्थश्चकारः । "आ त्वाहार्षम्" इत्यनयापि ऋचा कल्पिते यानान्तरे स्त्रियं राजानं चोपवेशयेदित्यर्थः । **धुर्यौ दक्षिणा**–धुर्यौ बलीवर्दौ अस्य कर्मणो दक्षिणा । **प्रायश्चित्तिः**–इति कर्मनामधेयम् ॥ **ततो ब्राह्मणभोजनम्**–बर्हिर्होमादि ब्राह्मणभोजनान्तमित्यर्थः ॥ इति दशमी कण्डिका ॥ १० ॥

चतुर्थ्यामपररात्रेऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति ॥ १ ॥ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा । वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा । सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा । चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा । गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहेति ॥ २ ॥ स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति ॥ ३ ॥ हुत्वा हुत्वैतासामाहुतीनामुदपात्रे सꣳस्रवान्त्समवनीय तत एनां मूर्द्धन्यभिषिञ्चति । या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सहासाविति ॥ ४ ॥ अथैनाꣳ स्थालीपाकं प्राशयति प्राणैस्ते प्राणान्त्संदधाम्यस्थिभिरस्थीनि माꣳसैर्माꣳसानि त्वचा त्वचमिति ॥ ५ ॥ तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति ॥ ६ ॥ तामुदुह्य यथर्तु प्रवेशनम् ॥ ७ ॥ यथाकामी वा काममाविजनितोः सम्भवामेति वचनात

॥ ८ ॥ अथास्यै दक्षिणाᳪंसमधिहृदयमालभते । यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतᳪं शृणुयाम शरदः शतमिति ॥ ९ ॥ एवमत ऊर्ध्वम् ॥ १० ॥ * ॥ ॥ ११ ॥

कर्कः—**चतुर्थ्यामपररात्रेऽभ्यन्तरतोऽग्निमुपसधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकᳪं श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोत्यग्ने प्रायश्चित्त इति**—विवाहशेषोऽयमुच्यते, चतुर्थेऽहन्यपररात्रे गृहाभ्यन्तरतोऽग्निमुपसमाधाय विवाहशेषत्वाद्बहिःशालायां माभूदित्यभ्यन्तरग्रहणं, पूर्वाह्णव्युदासार्थं चापररात्रस्य, ब्रह्माणमुपवेश्योति चोदपात्रावसरविधित्सया । स्थालीपाकं श्रपयित्वेत्युच्यते, तद्भूतोपादानं माभूदिति । आज्यभागाविष्ट्वेत्येतदाज्याहुत्यवसरविधित्सयोक्तम् । "अग्ने प्रायश्चित्ते" इत्येवमादिपञ्चाज्याहुतीर्हुत्वा । **स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति**—अनेन मन्त्रेण स्थालीपाकस्येत्यवयवलक्षणा षष्ठी । **हुत्वा हुत्वैतासामाहुतीनामुदपात्रे सᳪंस्रवान्त्समवनीय तत एनां मूर्द्धन्यभिषिञ्चति या ते पतिघ्नीति**—अनेन मन्त्रेण । असाविति च नामधेयग्रहणम् । सर्वाहुत्यन्ते माभूदिति हुत्वा हुत्वेत्युक्तम् । मूर्द्धाभिषेकश्चागन्तुकत्वात्सर्वान्ते भवति । **अथैनाᳪंस्थालीपाकं प्राशयति प्राणैस्ते प्राणान्त्सन्दधामीति**—अनेन मन्त्रेण । एनामिति वधूम् । **तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति**—यस्मादस्या ऐवयं संवृत्तं तस्माच्छ्रोत्रियदारेण नोपहास एष्टव्यः । उपहासशब्देन चाभिगमोऽभिधीयते । स चैवंवित् एवं कुर्वन् परो भवति पराभवति निन्दार्थवादोऽयम् । **तामुदुह्य यथर्तुप्रवेशनम्**—साऽनेन प्रकारेण ऊढा भवति । तामूढ्वा च यथर्तु ऋतावृतौ प्रवेशनमभिगमनं कुर्यात् । **यथाकामी वा काममाविजनितोः सम्भवामेति वचनात्**—यथाकामं वा भवत्यभिगमो न ऋतावृतावेव । कुत एतत् प्रजापतिना हि वरो दत्तः स्त्रीणाम्, ताभिश्च वृतः काममाविजनितोः इच्छया आविजनितोः आविजननकालात् पुंसा सह सम्भवामेति । एवं च सति विकल्प एवायम् । तथाच स्मरणम्—" ऋतौ भार्यामुपेयात्सर्वत्र वा प्रतिषिद्धवर्जम् " इति । **अथास्यै दक्षिणाᳪंसमधिहृदयमालभते यत्ते सुसीम इति**—अनेन मन्त्रेण हृदयालम्भश्चाभिगमोत्तरकालिकः । "प्राक्कालिकः " इत्यपरे अप्रयतत्वादिति । **एवमत ऊर्ध्वम्**—ऋतावृतावेव कर्म कर्तव्यम् ॥ ११ ॥ * ॥

जय०—अथ विवाहशेषः कथ्यते । **चतुर्थ्याम्**—चतुर्थेऽहनि **अपररात्रेऽभ्यन्तरतोऽग्निमुपसमाधायेति**—ग्रहणस्य विवाहशेषत्वाद्बहिःशालायां माभूदित्यभ्यन्तरग्रहणम् । पूर्वाह्णव्युदासार्थं चाऽपररात्रस्य । ब्रह्माणमुपवेश्येति चोदपात्रावसरविधित्सया । **स्थालीपाकᳪं श्रपयित्वेति**—तद्भूतोपादानं माभूदिति । आज्यभागाविष्ट्वेत्याज्याहुत्यवसरविधित्सयोक्तम् । "अग्ने प्रायश्चित्ते" इत्येवमादिपञ्चभिर्मन्त्रैः पञ्चाज्याहुतीर्जुहोति वरः । अथ मन्त्रार्थः । तत्र सर्वेषां परमेष्ठी त्रिष्टुप् लिङ्गोक्ता घृतहोमे० । हे अग्ने हे प्रायश्चित्ते सर्वदोषापकरण यतस्त्वं देवानामिन्द्रादीनां मध्ये प्रायश्चित्तिः दोषापाकर्ताऽसि अहं च ब्राह्मणः ब्रह्मण्यः वैदिको वा भूत्वा त्वाम् उपधावामि आराधयामि । किम्भूतोऽहम् । नाथकामः, आशीष्कामः, ऐश्वर्यकामो वा प्रार्थयमानो वा । उपधावनप्रयोजनमाह-अस्यै अस्याः वध्वाः

पतिघ्नी तनूः तन्वा अवयवस्ताम् अस्यै इमामुपकर्तुं नाशय अपनय । तुभ्यं स्वाहा सुहुतमस्तु । समुदायवाचकोऽपि तनूशब्दोऽत्रावयववाचको ज्ञेयः । तेन यदस्याः पतिनाशकमङ्गलक्षणं तदपाकृत्य स्वङ्गं विधेहीत्येतावानेव वाक्यार्थः । एवमुपर्यपि व्याख्येयम्, तन्विशेषणं देवता च भिद्यते । तद्यथा· हे वायो पवन प्रजाघ्नी अपत्यनाशिनी । एवमुत्तरत्रापि । **स्थालीपाकस्ये**त्यवयलक्षणा षष्ठी । **हुत्वा हुत्वेति**–सर्वाहुत्यन्ते माभूदित्येतदर्थम् । ततः संस्रवजलैनैनां वधूं मूर्द्धन्यभिषिञ्चति वरो **या ते पतिघ्नीति**–मन्त्रेण । मूर्द्धाभिषेकश्च सर्वान्ते भवत्यागन्तुकत्वात् । अथ मन्त्रार्थः । तत्र प्रजापति· स्त्रिष्टुप् वध्वभिषेके० । **असाविति**–कन्यानामादेशः । हे असौ कन्ये या ते तव पत्यादिघातिनी पञ्चधा दुष्टा तनूः अतएव निन्दिता ततोऽनेनाभिषेचनेन एनां तनूं जारघ्नीम् उपपत्यादिदोषघातिनीं करोमि । सा त्वम् मया पत्या भर्त्रा सह जीर्य निर्दुष्टवृद्धत्वं गच्छ । अथैनां वधूम्, स्थालीपाकशेषं वरः प्राशयति सकृत् । **प्राणैस्त**–इति मन्त्रेण । अस्यार्थः । तत्र प्रजापतिर्यजुर्वधूप्राशने० । हे कन्ये मम प्राणादिभिस्ते तव प्राणादीन् सन्दधामि संयोजयामि **तस्मादिति**–हि यस्मात् अस्या एतेन प्राशनाख्यसंस्कारेण भर्त्रा सहैक्यं वृत्तं तस्माच्छ्रोत्रियस्य दारेण उपहासम् अभिगमनं नेच्छेत् । स चैवं-वित् एवं कुर्वन्परोभवति पराभवं गच्छति । यद्वा एवंवित् श्रोत्रियः। परः शत्रुर्भवति। उत अप्यर्थे। निन्दार्थ-वादोऽयम् । **तामिति**–साऽनेन प्रकारेणोढा भवति । तामुदुह्य एवमूढ्वा च यथर्तु ऋतावृतौ प्रवेशनम· भिगमनं कुर्यात् । **यथाकामी वेति**–याथाकाम्यं वा स्त्रियाः काममनतिक्रम्याभिगमो भवति न ऋतावृतावेव । तत् कुतः। **काममेति**। प्रजापतिना हीन्द्रेण वरो दत्तः स्त्रीणाम्, ताभिश्च वृतः । कामम् इच्छया आविजनितोः विजननकालादासम्भवामेति वचनात्पुंसा सङ्गता गर्भानुपघातेन भवामेति । अतो विकल्पः । तथा च स्मरणम् । "ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जम्" इति । **अथेति**–हृदयालम्भश्चाभिग-मनोत्तरकालिकः । प्राक्कालिक इत्यपरे । अप्रयतत्वात् । नैतत् । यतो गर्भसम्भावनायां तदुपयुज्यते । प्रय-तत्वं च शौचादिनाऽपि स्यादेव । यथाऽऽह **याज्ञवल्क्यः** । "ऋतौ तु गर्भशङ्कित्वात्स्नानं मैथुनिनः स्मृतम् । अनृतौ तु सदा गच्छञ्छौचं मूत्रपुरीषवत्" इति । तत्र मन्त्रः। **यत्ते सुसीम इति**-अस्यार्थः। तत्र प्रजापतिरनुष्टुप् वधूहृदयालम्भने० । हे सुसीमे शोभनसीमन्तिनि यत्ते तव हृदयं मनः दिवि स्वर्गे वर्तमाने चन्द्रमसि श्रितं तदधीनतया स्थितम्, चन्द्राधिष्ठितत्वात् तदहं वेद जानीयाम्, तच्च मां विन्द्यात् जानातु । एवं परस्परानुगुणितहृदया अपत्यादिसहिता वयं शरदः शतमित्याद्युक्तार्थम् । एवमत ऊर्ध्वम् ऋतावृतौ एवमेवाभिगमनाख्यं कर्म कुर्यात् ॥ ११ ॥ * ॥

हरि०–**चतुर्थ्यामपरात्रेऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति**–चतुर्थ्यां तिथौ विवाहतिथिमारभ्य अपररात्रे रात्रेः पश्चिमे यामे, अभ्यन्तरतः गृहस्य मध्ये, अग्निं वैवाहिकमुपसमाधाय पञ्चभूसंस्कारान्कृत्वा अग्निं स्थापयित्वा, दक्षिणतो ब्रह्मासनमास्तीर्य तत्र पूर्ववद्ब्रह्माणमुपवेश्य उत्तरत उदपात्रं प्रतिष्ठाप्य प्रणीतास्थानादुत्तरतः जलपूर्णं ताम्रादिपात्रं स्थापयित्वा अत्र ब्रह्माणमुपवेश्येति पुनर्वचनमुदपात्रप्रतिष्ठापनावसरज्ञापनार्थम्। स्थालीपाकं चरुं यथाविधि श्रपयित्वा पर्युक्षणान्ते आघारा· नन्तरमाज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति । **अग्ने प्रायश्चिते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा । वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा । सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम**

उपधावामि याऽस्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा । चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा । गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा— आज्येन पञ्चाहुतीरेतैः स्वाहान्तैर्मन्त्रैर्जुहोति । **स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति—**स्थालीपाकस्य चरोः प्रजापतये स्वाहेत्येकामाहुतिं जुहोति । **हुत्वा हुत्वैतासामाहुतीनामुदपात्रे सꣳस्रवान्त्समवनीय—**अग्ने प्रायश्चित्त इत्यादीनां प्राजापत्यान्तानां षण्णामाहुतीनां प्रत्येकं हुत्वा संस्रवान् हुतशेषानुदपात्रे समवनीय प्रक्षिप्य केषाञ्चिन्मते स्विष्टकृदाहुतेरपि । **तत एनां मूर्द्धन्यभिषिञ्चति—**ततस्तस्मादुदपात्रादुदकमादाय एनां वधूं वरो मूर्द्धन्यभिषिञ्चति । **या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सहासाविति—**अभिषेचनमन्त्रोऽयं, असावित्यत्र वधूनाम । **अथैनाꣳ स्थालीपाकं प्राशयति—**अथाभिषेकानन्तरमेनां वधूं स्थालीपाकं , चरुशेषं प्राणैस्ते प्राणान्त्सन्दधामीत्यादिना त्वचा त्वचमित्यन्तेन मन्त्रेण वरः प्राशयति । **तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति—**यतोऽनेन चरुशेषप्राशनकर्मणा भर्त्रा सहैक्यं प्राप्ता दारा तस्मादेवंवित्पुरुषः श्रोत्रियस्य विदुषः दारेण भार्यया सह उपहासं मैथुनं नेच्छेत् न कामयेत, हि यस्मात् एवंविदपि श्रोत्रियः परः शत्रुर्भवति । **तामुदुह्य यथर्तु प्रवेशनम्—**एवं पूर्वोक्तेन प्रकारेण तां वधूमुदुह्य विवाह्य विवाहकर्मणा भार्यात्वं संपाद्य यथर्तुप्रवेशनम् ऋतुकालमृतुकालं प्रवेशनमभिगमनं कुर्यादिति शेषः । **यथाकामी वा—**स्त्रियाः काममनतिक्रम्य यथाकामं तदस्यास्तीति यथाकामी वा भवेत् न ऋतुकालाभिगमननियमः । कुतः **काममाविजनितोः सम्भवामेति वचनात्—**कामं स्वेच्छया आविजनितोः आप्रसवात् सम्भवाम भर्त्रा सह सङ्गता भवामेति स्त्रीणाम् इन्द्राद्वरप्रार्थनावचनात् । प्रजापतेरिति केचित् । अत्र यद्यपि “यथर्तुप्रवेशनम्” इति सामान्येनोक्तम्, तथापि स्मृत्यन्तरोक्तपर्वादिनिषेधपालनं कुर्यात् । यथा मनुः—“अमावास्याऽष्टमी चैव पौर्णमासी चतुर्दशी । ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥” याज्ञवल्क्योऽपि—“षोडशर्तुर्निशाः स्त्रीणां तासु युग्मासु संविशेत् । ब्रह्मचार्येव पर्वण्याद्याश्चतस्रश्च वर्जयेत् ॥” इत्यादि निषेधो यथाकामपक्षेऽपि समानः । यतः प्राप्तेऽभिगमने निषेधः प्रवर्तते । गर्भिण्यभिगमने निषेधस्तु “काममाविजनितोः सम्भवाम” इति वचनाद्बाध्यते । ऋतावनभिगमने दोषमाह—मनुः—“ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां ब्रह्महत्यायां युज्यते नात्र संशयः ॥” तथाच “ऋतुस्नातां तु यो भार्यां शक्तः सन्नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥” तथा—“लोकानन्त्यं दिवःप्राप्तिः पुत्रपौत्रप्रपौत्रकैः । यस्मात्तस्मात्स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः” इत्यादिभिः स्मृतिभिः स्त्रीरक्षाया विहितत्वात् । तासां कामातिक्रमणे व्यभिचारशङ्कासम्भवात्तद्रक्षार्थं याथाकाम्यम्, तस्माद्याथाकाम्ये तु न नियमः “यथाकामी वा”इति विकल्पेनाभिधानात् । अनभिगमने तु प्रत्यवायस्मरणाभावाच्च । अतो लोकानन्त्यं दिवः प्राप्तिश्च । **अथास्यै दक्षिणाꣳसमधि हृदयमालभते यत्ते सुसीम इति—**अथाभिगमनानन्तरमस्यै अस्या भार्यायाः दक्षिणांसं दक्षिणस्कन्धमधि उपरि दक्षिणं हस्तं नीत्वा हृदयमालभते हृदयं वक्षः आलभते स्पृशति । **यत्ते सुसीम इत्यादिना शृणुयाम शरदः शतमिति—**अनेन मन्त्रेण । **एवमत ऊर्ध्वम्—**एवमनेनैव प्रकारेण अतोऽनन्तरमृतावृतौ प्रवेशनं यथाकामं वा । इति सूत्रव्याख्या ॥ ११ ॥

अथ चतुर्थीकर्मप्रयोगः । अत्र विवाहाच्चतुर्थ्यामपररात्रे गृहाभ्यन्तरतः पञ्चभूसंस्कारान् कृत्वा विवाहाग्नेः स्थापनम्, दक्षिणतः ब्रह्मोपवेशनम्, प्रणीता[illegible]: उदपात्रस्थापनम्,

प्रणीताप्रणयनादि आज्यभागान्तम् आवसथ्याधानवत् कुर्यात् । आज्यभागानन्तरम् अग्ने प्रायश्चित्त इत्यादिभिः पञ्चभिर्मन्त्रैः पञ्चाज्याहुतीर्हुत्वा । तद्यथा—“अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा” इदमग्नये० । “वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा” इदं वायवे० । “सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि, याऽस्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा” इदं सूर्याय० । “चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा” इदं चन्द्रमसे० । “गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा” इदं गन्धर्वाय०। ततः स्थालीपाकेन प्रजापतये स्वाहा इदं प्रजापतये इति प्राजापत्यान्तं हुत्वा । अग्ने प्रायश्चित्त इत्यादिप्राजापत्यान्तानां षडाहुतीनां संस्रवम् उदपात्रे प्रक्षिपेत् । केषाञ्चिन्मते स्विष्टकृतोऽपि संस्रवं प्रक्षिपेत् । अन्यासामाहुतीनां पात्रान्तरे संस्रवान्प्रक्षिपेत् । ततोऽग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते हुत्वा आज्येन महाव्याहृत्यादि प्राजापत्यान्ता नवाहुतीर्वा जुहोति । ततः पात्रान्तरस्थान् संस्रवान् प्राश्य पूर्णपात्रवरयोरन्यतरं ब्रह्मणे दत्त्वा उदपात्रादुदकमादाय वधूं मूर्द्धन्यभिषिञ्चति । “या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सहासाविति” इत्यनेन मन्त्रेण । अथ वरो वधूं स्थालीपाकं हुतशेषं सकृत्प्राशयति प्राणैस्ते “प्राणान्त्सन्दधामि अस्थिभिरस्थीनि माꣳसैर्माꣳसानि त्वचा त्वचम्” इत्यनेन मन्त्रेण। सा च भर्त्रा मन्त्रे पठिते प्राश्नाति । अथ ऋतुकाले रजोदर्शने संजाते पुण्याहे गर्भाधाननिमित्तं मातृपूजापूर्वकं स्वयमाभ्युदयिकं कृत्वा रात्रावभिगमनं कुर्यात् । अभिगमनानन्तरं वध्वा दक्षिणस्कन्धस्योपरि दक्षिणहस्तं नीत्वा हृदयं स्पृशति “यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्” इत्यन्तेन मन्त्रेण। एवं श्राद्धवर्जं प्रत्यृतुकालमभिगमनं कुर्यात्। यथाकामी वा भवेत् । ऋतुकालाभिगमनं कुर्वन् ब्रह्मचर्यान्न स्खलति । “ब्रह्मचार्येव पर्वण्याद्याश्चतस्रश्च वर्जयेत् ।” इति याज्ञवल्क्यस्मरणात् । अनभिगमने तु दोषस्य श्रवणात्–“ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः” “ऋतुस्नातां तु यो भार्यां शक्तः सन्नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः॥” इत्यादिप्रत्यवायस्मरणाच्च ऋतुकालाभिगमने नियमः । याथाकाम्ये तु न नियमः, यथाकामी वेति विकल्पविधानात् । अतो “लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः । यस्मात्तस्मात्स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः ॥” इत्यादिभिः स्मृतिभिः स्त्रीरक्षाया विहितत्वात्तासां कामातिक्रमणे व्यभिचारशङ्कासम्भवात्तद्रक्षार्थं याथाकाम्यमिति । **विष्णुपुराणे**–“ऋतावभिगमः शस्तः स्वपत्न्यामवनीपते । पुन्नामर्क्षे शुभे काले श्रेष्ठे युग्मासु रात्रिषु ॥ नास्नातां तां स्त्रियं गच्छेन्नातुरां न रजस्वलाम् । नाप्रशस्तां न कुपितां नानिष्टां न च गुर्विणीम् ॥ नादक्षिणां नान्यकामां नाकामां नान्ययोषितम् । क्षुत्क्षामां नातिभुक्तां वा स्वयं चैभिर्गुणैर्युतः ॥ स्नातः स्रग्गन्धधृक् प्रीतो नाध्मा*तः क्षुधितोऽपि वा । सकामः सानुरागश्च व्यवायं पुरुषो व्रजेत् ॥ चतुर्दश्यष्टमी चैव अमावास्याऽथ पूर्णिमा । पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च॥ तैलस्त्रीमांससम्भोगी पर्वस्वेतेषु वै पुमान् । विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः” ॥ इति **चतुर्थीकर्मपद्धतिः** ॥ ११ ॥

गदा०–चतुर्थ्यामपररात्रेऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्राह्मणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोत्यग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा । वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै प्रजाघ्नी तनूस्तामस्यै

---

* “आध्मानं पवन[illegible]” इति [illegible] ॥

नाशय स्वाहा । सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्य पशुघ्नी तनूस्तामस्यै नाशय स्वाहा । चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा । गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहेति– विवाहाद्या चतुर्थी तिथिस्तस्यामपररात्रे अन्तिमप्रहरे, अभ्यन्तरतः गृहस्य मध्ये, अग्निमुपसमाधाय वैवाहिकमग्निं स्थापयित्वा, दक्षिणतो ब्रह्माणमुपवेश्याग्नेर्दक्षिणतो ब्रह्मण उपवेशनार्थं कुशानास्तीर्य तत्र ब्रह्माणमुपवेश्य, उत्तरत उदपात्रं प्रतिष्ठाप्य, अग्नेरुत्तरतः प्रणीतास्थलं त्यक्त्वोदकयुक्तं पात्रं स्थापयित्वा, स्थालीपाकꣳ श्रपयित्वा स्थालीपाकं चरुं श्रपयित्वा, आज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति । आज्येन “अग्ने प्रायश्चित्ते” इत्येतैः पञ्चभिर्मन्त्रैः पञ्चाहुतीर्जुहोति । अत्रापररात्रग्रहणं पूर्वाह्णव्युदासार्थम् । चतुर्थीकर्मणो विवाहाङ्गत्वाद्बहिःशालायां माभूदित्यभ्यन्तरग्रहणम्, अग्निमुपसमाधायेति ग्रहणमभ्यन्तरगुणविधानार्थम् । ब्रह्माणमुपवेश्येति च उदपात्रस्थापनावसरविधानायोक्तम् । चरोर्भूतोपादानं माभूदिति श्रपयित्वेत्युच्यते । आज्यभागाविष्ट्वेति ग्रहणमाज्याहुतिकालविधानार्थम् । मन्त्रार्थः । हे अग्ने हे प्रायश्चित्ते सर्वदोषापाकरण यतस्त्वं देवानामिन्द्रादीन मध्ये प्रायश्चित्तिः दोषापाकर्ताऽसि अहं च ब्राह्मणः ब्रह्मण्यः वैदिको वा भूत्वोपधावामि आराधयामि । किंभूतोऽहं “नाथ उपयाच्ञायाम्” आशीष्कामः ऐश्वर्यकामो वा प्रार्थयमानो वा । उपधावनप्रयोजनमाह—या अस्यै षष्ठ्यर्थे चतुर्थी, अस्या वध्वाः पतिघ्नी तनूस्तन्वा अवयवस्ताम् अस्यै इमामुपकर्तुं नाशय अपनय तुभ्यं स्वाहा सुहुतमस्तु। समुदायवाचकोऽपि तनूशब्दोऽत्रावयववाचको ज्ञेयः । तेन यदस्या पतिनाशकमङ्गलक्षणं हस्तरेखादिसामुद्रिकलक्षणोक्तं तदपाकृत्य शोभनमङ्गं विधेहीति वाक्यार्थः । एवमुपर्यपि व्याख्येयम् । तनूविशेषणं देवता च भिद्यते। तद्यथा–हे वायो पवन प्रजाघ्नी अपत्यनाशिनी । एवमुत्तरत्रापि योज्यम् । **स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति**–आज्याहुत्यनन्तरं स्थालीपाकस्य चरोः प्रजापतये स्वाहेति मन्त्रेणोपांशु पठितेनैकामाहुतिं जुहोति, स्थालीपाकस्येत्यवयवलक्षणा षष्ठी । **हुत्वा हुत्वैतासामाहुतीनामुदपात्रे सꣳस्रवान्त्समवनीय तत एनां मूर्द्धन्यभिषिञ्चति । या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सहासाविति**–एतासां षण्णामाहुतीनामेकैकामाहुतिं हुत्वा उत्तरतः प्रतिष्ठापिते उदपात्रे संस्रवान् समवनीय स्रुवलग्नाज्यचर्ववयवान् प्रक्षिप्य ततस्तस्मात्संस्रवमिश्रमुदकं गृहीत्वा एनां वधूं मूर्द्धनि मस्तके अभिषिञ्चति “ या ते पतिघ्नी ” इति मन्त्रेण । षण्णामाहुतीनामत्र संस्रवभक्षणलोपः । इतरासां तु भवत्येव हुत्वा हुत्वेतिग्रहणं सर्वाहुत्यन्ते संस्रवनिनयनं माभूदित्येतदर्थम् । मूर्द्धाभिषेकश्चागन्तुकत्वाद्दक्षिणादानान्ते भवति । असौ स्थाने आमन्त्रणविभक्तियुक्तं वध्वा नामग्रहणं कार्यम् । मन्त्रार्थः । हे असौ कन्ये या ते तवापत्यादिघातिनी पञ्चधा दुष्टा तनूः अतएव निन्दिता ततोऽनेनाभिषेचनेन एनां तनूं जारघ्नीम् उपपत्यादिदोषघातिनीं करोमि । सा त्वं मया पत्या भर्त्रा सह जीर्य निर्दुष्टवृद्धत्वं गच्छ । **अथैनाꣳ स्थालीपाकं प्राशयति प्राणैस्ते प्राणान्त्सदधाम्यस्थिभिरस्थीनि माꣳसैर्माꣳसानि त्वचा त्वचमिति**–अथाभिषेकानन्तरमेनां वधूं स्थालीपाकं चरुं वरः प्राशयेत् “ प्राणैस्ते प्राणान्” इति मन्त्रेण । वधूसंस्कारोऽयं नतु द्रव्यप्रातिपत्तिः, अतो द्रव्यस्य नाशदोषादावन्यद्रव्येण प्राशनं कार्यम् । तदुक्तं **कारिकायाम्**–“ वधूसंस्कार एवायं प्रतिपत्तिरियं नतु । अतो द्रव्यविनाशादौ द्रव्येणान्येन तद्भवेत् । शेषद्रव्यविनाशादौ लुप्यन्ते प्रतिपत्तयः ॥” अत्र स्त्रिया सह वरोऽपि समाचाराद्भोजनं करोति । स्त्रिया सह भोजनेऽपि न दोष इत्याह **हेमाद्रौ** प्रायश्चित्तकाण्डे **गालवः**– “ एकयानसमारोह एकपात्रे च भोजनम् । विवाहे पथि यात्रायां कृत्वा विप्रो न दोषभाक् । अन्यथा दोषमाप्नोति पश्चाच्चान्द्रायणं चरेत् ।” **मिताक्षरायामप्येवम्** । मन्त्रार्थः । हे कन्ये मम प्राणादिभिस्ते तव प्राणादीन्संदधामि संयोजयामि । **तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति**–हि यस्मादस्या एतेन प्राशनाख्यसंस्कारेण भर्त्रा सहैक्यं वृत्तं तस्माच्छ्रोत्रियस्य दारेण उपहासमभिगमनं नेच्छेत् स चैवंविदेवंकुर्वन्परो भवति पराभवं गच्छति । यद्वा एवंविच्छ्रोत्रियस्य परः शत्रुर्भवति, उत अप्यर्थे । निन्दार्थवादोऽयम् । परदाराभिगमनमतो न कार्यम् । **समाप्तं चतुर्थीकर्म** । स्वभार्याऽभिगमनमाह–**तामुदुह्य यथर्तु प्रवेशनम्**–तां वधूं पूर्वोक्तविधिना उदुह्य विवाह्य यथर्तु ऋतावृतौ प्रवेशनमभिगमनं कुर्यादित्यर्थः । **याज्ञवल्क्यः**– “ षोडशर्तुर्निशाः स्त्रीणां तासु युग्मासु संविशेत् । ब्रह्मचार्येव पर्वण्याद्याश्चतस्रश्च वर्जयेत् ॥” स्त्रीणां षोडश-

निशा ऋतुः गर्भाधानयोग्यः कालः,तत्रोक्तविधिना गच्छन् ब्रह्मचार्येव । "चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा । चत्वार्येतानि पर्वाणि रविसंक्रान्तिरेव च ॥" **मनुः**—"अमावास्याऽष्टमी चैव पौर्णमासी चतुर्दशी ॥ ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥" तथा—" तासामाद्याश्चतस्रस्तु निन्दितैकादशी तथा । त्रयोदशी च शेषाः स्युः प्रशस्ता दश रात्रयः ॥" ऋतोरेकादशीत्रयोदश्यौ न पक्षस्य । **हारीतस्तु**—"शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला । दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुद्ध्यति" इति । ततश्चतुर्थ्यां स्त्रीगमनस्य विहितप्रतिषिद्धत्वाद्विकल्पः । स च व्यवस्थितः । रजोनिवृत्तौ चतुर्थ्यां विधिः, तदनिवृत्तौ प्रतिषेधः । **मनुः**—"रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला" इति । साध्वी गर्भाधानादिविहितकर्मयोग्येत्यर्थः । ज्योतिःशास्त्रे "पित्र्यं पौष्णं नैर्ऋतं चापि धिष्ण्यं त्यक्त्वा" इति । पित्र्यं मघा, पौष्णं रेवती, नैर्ऋतं मूलम् । अत्र "समासु पुत्रो विषमासु कन्या" इति ज्ञेयम् । **हेमाद्रौ शङ्खः**—"युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।" तत्राप्युत्तरोत्तराः प्रशस्ताः । तदाह**आपस्तम्बः**—"तत्राप्युत्तरोत्तराः प्रशस्ताः" इति । **व्यासः**—"रात्रौ चतुर्थ्यां पुत्रः स्यादल्पायुर्धनवर्जितः । पञ्चम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः ॥ सप्तम्यामप्रजा योषिदष्टम्यामीश्वरः पुमान् । नवम्यां सुभगा नारी दशम्यां प्रवरः सुतः ॥ एकादश्यामधर्मा स्त्री द्वादश्यां पुरुषोत्तमः । त्रयोदश्यां सुता पापा वर्णसंकरकारिणी ॥ धर्मज्ञश्च कृतज्ञश्च आत्मवेदी दृढव्रतः । प्रजायते चतुर्दश्यां पञ्चदश्यां पतिव्रता । आश्रयः सर्वभूतानां षोडश्यां जायते पुमान् ॥" तच्चैकस्यां रात्रौ सकृदेव कार्यम् । "सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान्" इति **याज्ञवल्क्योक्तेः** । इदं चर्तौ गमनमन्यकाले प्रतिबन्धादिनाऽसम्भवे श्राद्धैकादश्यादावपि कार्यम् । "ब्रह्मचार्येव पर्वण्याद्याश्चतस्रश्च वर्जयेत्" इति **याज्ञवल्क्योक्तेः** । व्याख्यातं चेदं **मिताक्षरायाम्**—'यत्र श्राद्धादौ ब्रह्मचर्यं विहितं तत्राप्यृतौ गच्छतो न ब्रह्मचर्यस्खलनदोषः' इति । स्त्रीणां बहुत्वे ऋतौ यौगपद्ये च गमनक्रममाह **देवलः**—" यौगपद्ये तु तीर्थानां विप्रादिक्रमशो व्रजेत् । रक्षणार्थमपुत्राणां ग्रहणं क्रमशोऽपि वा" इति । तीर्थमृतुः, विप्रादिक्रमो वर्णक्रमः, ग्रहणक्रमो विवाहक्रमः । अगमने दोषमाह **पराशरः**—"ऋतौ स्नातां तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः" इति । अस्यापवादमाह—**मदनरत्ने**—"व्याधितो बन्धनस्थो वा प्रवासेष्वथ पर्वसु ॥ ऋतुकालेऽपि नारीणां भ्रूणहत्या प्रमुच्यते ॥ वृद्धां वन्ध्यामसद्वृत्तां मृतापत्यामपुष्पिणीम् । कन्यां च बहुपुत्रां च वर्जयेन्मुच्यते भयात् ॥" ऋतौ स्नानमाह**आपस्तम्बः**—"ऋतौ तु गर्भशङ्कित्वात्स्नानं मैथुनिनः स्मृतम् । अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवत् ॥" स्त्रीणां तु न स्नानम् । "उभावप्यशुची स्यातां दम्पती शयनं गतौ । शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् ॥" इति **वृद्धशातातप**वचनात् । अत्र प्रसङ्गाद्रजस्वलोपयोगि किंचिन्निरूप्यते । तत्र **स्मृत्यर्थसारे** "दिवा रजःस्रावे तद्दिनमशुचित्वं स्यात् । रात्रौ रजःस्रावे सति अर्द्धरात्रादर्वाक्चेत्पूर्वदिनमित्येकः पक्षः । रात्रिं त्रिधा विभज्य पूर्वभागद्वये चेत्पूर्वदिनमित्यन्यः पक्षः । उदयात्पूर्वं चेत्पूर्वदिनमित्यपरः पक्षः ।" एषां पक्षाणां देशाचारतो व्यवस्था । अविज्ञाते रजःस्रावे तु दिनेषु जातेषु रजःस्रावावधिकमशुचित्वं स्यात्, ज्ञानात्पूर्वं च रजस्वलास्पृष्टं दुष्टमेव । रजस्वला त्रिरात्रमशुचिः स्यात्, चतुर्थेऽहनि स्नाता शुद्धा भवति भर्तुः स्पृश्या । दैवे पित्र्ये च कार्ये रजोनिवृत्तौ शुचिः । रजस्वला चतुर्थेऽहनि मृत्तिकादिभिः शौचं कृत्वा क्षत्रियादिस्त्री च पादपादन्यूनमृत्तिकाभिः, विधवा द्विगुणमृत्तिकाभिः शौचं कृत्वा दन्तधावनपूर्वकं सङ्गवे सचैलं स्नायात् । रजस्वलायाः स्नातायाः पुनरपि रजोदृष्टौ अष्टादशदिनादर्वागशुचित्वं नास्ति । अष्टादशे दिने रजोदृष्टावेकरात्रमशुचित्वम्, नवदशदिने द्विरात्रम्, विंशतिदिने त्रिरात्रमेव, प्रायो विंशतिदिनादूर्ध्वं रजःस्राविणीनामेवं भवति । विंशतिदिनादर्वाक् प्रायशो रजोदर्शनवतीनामष्टादशदिनेऽपि त्रिरात्रमशुचित्वम् । त्रयोदशादिनादूर्ध्वं प्रायो रजःस्राविणीनामेकादशदिनादर्वागशुचित्वं नास्ति । एकादशादिने रजोदृष्टौ एकदिनमशुचित्वम्, द्वादशादिने द्विरात्रम्, त्रयोदशादिने त्रिरात्रमेव । **प्रयोगपारिजाते**ऽप्येवम् । रोगजे तु तत्रैवोक्तम् । "रोगेण यद्रजः स्त्रीणामन्वहं हि प्रवर्तते । नाशुचिस्तु भवेत्तेन यस्माद्वैकारिकं मतम्" इति । तत्रापि स्वकाले अशुचिरेव । तदुक्तं—"रोगजे वर्तमानेऽपि काले निर्याति कालजम् । तस्मादप्यप्रमत्ता स्यादन्यथा संकरो भवेत् ॥" रजस्वलाया रजस्वलास्पर्शे अकामतः स्नानं, कामतः उपवासः, पञ्चगव्याशनं च । असवर्णासु तु ब्राह्मण्याः क्षत्रियादिस्पर्शे क्रमेण कृच्छ्रार्द्धपादोनकृच्छ्रकृच्छ्राः । क्षत्रियादीनां तु कृच्छ्रपाद एव । क्षत्रियादीनां हीनवर्णस्पर्शे त्रिरात्रमुपवासः, एतच्च कामतः । अकामतस्तु प्राक् शुद्धेरनशनम्, अकामतश्चाण्डालादिस्पर्शेऽप्यनशनमेव प्राक् शुद्धेः । कामतस्तु प्रथमेऽह्नि त्र्यहः, द्वितीये द्व्यहः, तृतीये

एकाहः । श्वस्पर्शे तु द्व्यह एकाहो वा । भुञ्जानायाश्चाण्डालादिस्पर्शे षड्रात्रम् । उच्छिष्टयोः स्पर्शे तु कृच्छ्र इत्यादि **मिताक्षरायां** ज्ञेयम् । **स्मृत्यर्थसारे** तु सर्वत्र बालापत्यास्पर्शे स्नाने कृते भुक्तिः पश्चादनशनप्रत्याम्नाय इति । स्नानविधिं चाह--**पराशरः**-“ स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला । पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेत् ॥ सिक्तगात्रा भवेदद्भिः साङ्गोपाङ्गा कथंचन । न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत् ॥” व्रतान्याह **मदनपारिजाते वसिष्ठः**-“ सा नाञ्ज्यान्नाभ्यञ्ज्यान्नाप्सु स्नायादधः शयीत न दिवा सुप्यान्न रज्जुं सृजेत् न मांसमश्नीयान्न ग्रहान्निरीक्षेत न हस्तेन किंचिदाचरेदखर्वेण पात्रेण पिबेदञ्जलिना वा पात्रेण लोहितायसेन वा” इति खर्वो वामहस्तः । **यथाकामी वा काममाविजनितोः सम्भवामेति वचनात्**-स्त्रियाः काममनतिक्रम्य यथाकामं तदस्यास्तीति यथाकामी वा भवेत् । न नियम ऋतावेवेति । कुत एतत् “ काममाविजनितोः सम्भवाम” इति वचनात्, कामं स्वेच्छया आविजनितोः आप्रसवात् सम्भवाम भर्त्रा सह सङ्गता भवामेत्यर्थः । तथा **तैत्तिरीयश्रुतौ**-“ स इन्द्रः स्त्रीषंससादमुपासीदन् अस्यै ब्रह्महत्यायै तृतीयं प्रतिगृह्णीतेति ता अब्रुवन्वरं वृणामहै ऋत्वियात्प्रजा विन्दामहै काममाविजनितोः सम्भवामेति तस्मादृत्वियात्स्त्रियः प्रजा विन्दत ” इति । अस्यार्थः । स इन्द्रः स्त्रीणां षंससादं समूहम् उपासीदन् उपससाद, षत्वं छान्दसम्, अस्यै अस्याः ब्रह्महत्यायास्तृतीयांशं प्रतिगृह्णीतेति, ता अब्रुवन् वरं वृणामहै ऋतुसम्बन्धिगमनमृत्वियं तस्मात् आविजनम् आविजनितुः तस्मात् आविजनितोः आगर्भप्रसवकालात् सम्भवाम पुरुषेण संयुक्ता भवाम । एवं च सति विकल्पोऽयम् । तथाच **स्मृतिः**-“ ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जम् ” इति ॥ **अथास्यै दक्षिणांसमधि हृदयमालभते यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतमिति**-अथ मैथुनोत्तरम् अस्या भार्याया दक्षिणांसं दक्षिणस्कन्धमधि उपरि स्वहस्तं नीत्वा तेनैव हस्तेन हृदयमालभते स्पृशति “यत्ते सुसीमे” इति मन्त्रेण । अत्र **कर्कभाष्यम्** । “ हृदयालम्भश्चाभिगमनोत्तरकालिकः । प्राक्कालिकः इत्यपरे अप्रयतत्वात् ” इति । नैतदिति **जयरामः** । यतो गर्भसम्भावनायां तदुपयुज्यते । प्रयतत्वं च शौचादिनाऽपि स्यादेव । यथाऽऽह-**याज्ञवल्क्यः**-“ऋतौ तु गर्भशङ्कित्वात्स्नानं मैथुनिनः स्मृतम् । अनृतौ तु सदा गच्छञ्छौचं मूत्रपुरीषवत्” इति । ‘अभिगमनानन्तरमनाचान्त एव दक्षिणांसमधि हृदयमालभते’ इति **भर्तृयज्ञः** । मन्त्रार्थः । शोभना सीमा मूर्ध्नि केशमध्ये पद्धतिर्यस्याः सा तस्याः सम्बोधनं हे सुसीमे शोभनसीमन्तिनि, यत्ते तव, हृदयं मनः, दिवि स्वर्गे वर्तमाने चन्द्रमसि श्रितं तदधीनतया स्थितम्, तदहं वद जानीयाम्, तच्च मां विद्यात् जानातु, एवं परस्परानुगुणितहृदयाऽपत्यादिसहिता वयं शरदः शतमित्याद्युक्तार्थम् । **एवमत ऊर्ध्वम्**-प्रथमर्तौ यथा हृदयालम्भः कृतः, एवमनेन प्रकारेण अतोऽनन्तरमूर्ध्वम् ऋतावृतौ हृदयालम्भः कार्यः । **हरिहर**व्याख्या चैवम् । एवमनेन प्रकारेणातोऽनन्तरम् ऋतावृतौ प्रवेशनं यथाकामं वेति ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति-श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे एकादशी कण्डिका ॥ ११ ॥

अथ **पदार्थक्रमः** । तत्र चतुर्थ्यामपररात्रे स्नानपूर्वकं गृहाभ्यन्तरतः कर्म कार्यम् । देशकालौ स्मृत्वा विवाहाङ्गं चतुर्थीकर्म करिष्य इति सङ्कल्पः । ततो वैवाहिकमग्निं स्थापयेत् । ब्रह्मोपवेशनम्, अग्नेरुत्तरत उदपात्रनिधानम्, ततः प्रणीताप्रणयनाद्याज्यभागान्तमाधानवत् । आज्यभागान्ते स्थाल्याज्येन पञ्चाहुतयो होतव्याः । “अग्ने प्रायश्चित्ते” इति प्रथमा । इदमग्नये न मम । “वायो प्रायश्चित्ते” इति द्वितीया । इदं वायवे न० । “सूर्य प्रायश्चित्ते” इति तृतीया । इदं सूर्याय न० । “चन्द्र” इति चतुर्थी । इदं चन्द्राय । “ गन्धर्व ” इति पञ्चमी । इदं गन्धर्वाय न० । ततश्चरुं स्रुवेणादाय प्रजापतये स्वाहेति होमः । इदं प्रजापतये न० । “अग्ने” इत्यादिषण्णामाहुतीनां संस्रवाणामुदपात्रे प्रक्षेपो हुत्वा हुत्वैव अन्यासामन्यत्र । ततः स्विष्टकृदादिदक्षिणादानान्तम् । तत उदपात्रजलेन वधूमूर्द्ध्नि “या ते पतिघ्नी” इत्यभिषेकः, असौस्थाने नामग्रहणम् । हे प्रिये इति । ततो वरः **“प्राणैस्ते”** इति चरुशेषं वधूं प्राशयति सकृत् ' अत्र समाचाराद्वरोऽपि कन्याहस्तेन भोजनं करोति । इति **पदार्थक्रमः** । अथ **गर्गमते** विशेषः । ब्रह्मोपवेशनाद्याज्यभागान्तं पूर्ववत् । प्रत्यक्षब्रह्मण उपवेशनम् । ग्रहणे प्रजापतये जुष्टं गृह्णामि । आज्यभागान्ते पञ्चाहुतयः । ततः स्थालीपाकेन प्रजापतये स्वाहेति मूर्द्ध्न्यभिषेकः । ततः स्थालीपाकं प्राशयति “प्राणैस्ते” इति चतुर्भिः प्रति-

मन्त्रम् । महाव्याहृत्यादिस्विष्टकृदित्यन्तम् । आज्येन स्विष्टकृदिति **गर्गपद्धतौ** । प्राशनादिपूर्णपात्रदानान्तम् इति **गर्गमते** क्रमः । अथ **गर्भाधाने पदार्थक्रमः** । प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकश्राद्धम् । सङ्कल्पः देशकालौ स्मृत्वा अस्या मम भार्यायाः प्रतिगर्भं संस्कारातिशयद्वाराऽस्यां जनिष्यमाणसर्वगर्भाणां वीजगर्भसमुद्भवैनोनिवर्हणद्वारा च श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं कर्माहं करिष्य इति । ततो रात्रावभिगमनम् । ब्रह्मसूत्रं मूत्रपुरीषवद्धार्यम् । स्नानम् । ततो दक्षिणांसमधिहृदयमालभते । "यत्ते सुसीम" इति । न कश्चिदत्र विशेषो **गर्गमते** । इति **गर्भाधाने क्रमः** । अथ **प्रथमे रजोदर्शने विशेषः** । तत्र प्रथमे रजोदर्शने मासादौ दुष्टे सति गर्भाधानस्य शान्तिपूर्वकं कर्तव्यत्वाच्छान्तिकं वक्तुं दुष्टमासाद्युच्यते । प्रथमे रजसि चैत्रज्येष्ठाषाढभाद्रपदकार्त्तिकपौषा अशुभाः, आश्विनो मध्यमः, शेषा शुभाः । क्वचिद्वैशाखफाल्गुनपूर्वार्द्धयोरधमत्वमुक्तम् । तिथिषु प्रतिपच्चतुर्थीषष्ठ्यष्टमीद्वादशीचतुर्दशीपौर्णमास्यमावास्याः अशुभाः, शेषाः शुभाः, क्वचित्सप्तम्यैकादश्यावशुभे अष्टमीद्वादश्यौ शुभे इत्युक्तम् । वारेषु रविभौममन्दवारा अशुभाः, अन्ये तु शुभाः । कैश्चित्सोमोऽप्यशुभ उक्तः । नक्षत्रेषु भरण्यार्द्रापुष्याश्लेषापूर्वाज्येष्ठामूलपूर्वाषाढापूर्वाभाद्रपदारेवत्योऽशुभाः, चित्राविशाखाश्रवणाश्विनीमघास्वातयो मध्यमाः, अन्यानि शुभानि । कैश्चित्तु कृत्तिकापुनर्वस्वनुराधारेवत्योऽप्यशुभा उक्ताः । एवं च तासां मध्यमत्वम्, एवमन्यत्रापि । योगेषु व्याघातस्याद्या नव नाड्यः, गण्डातिगण्डयोः षट्, षट् । शूलस्य पञ्चदश, परिघपूर्वार्द्धं वैधृतिव्यतीपाताश्चेत्यशुभाः, वज्रं मध्यमम्, अन्ये शुभाः । करणानि विष्टिं विना सर्वाणि शुभानि । अह्नि त्रेधा विभक्ते आद्यो भागः शुभः, द्वितीयो मध्यमः, तृतीयो दुष्टः । एवं रात्रौ सूर्योदयास्तमयावप्यशुभौ, रविसंक्रमादधोनाडीचतुष्टयमूर्द्ध्वं चान्त्यं शुभम्, सङ्क्रान्त्यादिदग्धदिनेष्वशुभम्, रविचन्द्रोपरागयोरप्यशुभम्, सन्ध्योपप्लवशावाशौचेषु भर्त्तुरात्मनश्च चतुर्थाष्टमद्वादशस्थे चन्द्रे जीर्णरक्तनीलमलिनकृष्णवस्त्रेषु परिहितेषु न शुभम् । सम्मार्जनीकाष्ठतृणाग्निशूर्पतुषशुष्काक्षतलोहपाषाणशस्त्रादिधारिण्या एतैर्युक्ते देशे चाशुभम्, देहलीद्वाररथ्यादिपितृमातृगृहेष्वशुभम्, ऊर्ध्वं स्थिताया निद्रितायाश्चाशुभम्, शय्यादौ शुभम्, पित्रादिसखिस्वभर्तृभिर्दृष्टमशुभम्, शय्यादौ शुभमित्यादि ज्ञेयम् । दुष्टमासादौ प्रथमरजोदर्शने ताम्बूलभक्षणादि मङ्गलाचारान्न कुर्यात् । द्वितीये तु शुभे तत्र कुर्यादिति । प्रथमे दुष्टरजोदर्शने द्वितीयं प्रतीक्ष्य तस्मिन्नप्यशुभे वक्ष्यमाणां विस्तरेण शान्तिं कुर्यादिति केचित् । "प्रथम एव यथाशक्ति शान्तिं चरेत्" इत्यपरे । अत्रैकस्मिन्नप्यशुभे वक्ष्यमाणा शान्तिः कार्या । द्वित्राद्यशुभसन्निपाते तु तत्सूचितबह्वशुभनिरासार्थं वक्ष्यमाणाहुतिसङ्ख्यादिविवृद्धया कार्या । यथाशक्तीत्यादि ज्ञेयम् । इति **शुभाशुभविचारः** । अथ **शान्तिरुच्यते**, **प्रयोगपरिजाते शौनकः** । "पञ्चमेऽह्नि चतुर्थे वा ग्रहातिथ्यपुरःसरम् । द्रोणप्रमाणधान्येन व्रीहिराशित्रयं भवेत् ॥ कुम्भत्रयं न्यसेद्राशौ तन्तुवस्त्रादिवेष्टितम् । सूक्तेनाथ नवर्चेन प्रसुव आप इत्यथ ॥ आचार्यः प्रवरस्तद्वद्वायव्या च ततः क्रमात् । मध्यकुम्भे क्षिपेद्धान्यमौषधानि च हेम च ॥ उदुम्बरः कुशा दूर्वा राजीवं चम्पविल्वकाः । विष्णुक्रान्ताऽथ तुलसी बर्हिषः शङ्खपुष्पिका ॥ शतावर्यश्वगन्धा च निर्गुण्डी सर्षपद्वयम् । अपामार्गः पलाशश्च पनसो जीवकस्तथा ॥ प्रियङ्गवश्च गोधूमा व्रीहयोऽश्वत्थ एव च । क्षीरं दधि च सर्पिश्च पद्मपत्रं तथोत्पलम् ॥ कुरण्टकत्रयं गुञ्जा वचाभद्रकमुस्तकाः । द्वात्रिंशदौषधानीह यथासम्भवमाहरेत् ॥ मृत्तिकाश्चौषधादीनि तन्मन्त्रेण क्षिपेत्क्रमात् । कुम्भोपरि न्यसेत्पात्रं कांस्यमृद्वेणुताम्रजम् ॥ भुवनेश्वरीं न्यसेत्तत्र इन्द्राणीं च पुरन्दरम् । जपेद्गायत्रीं मध्यमे श्रीसूक्तं च जपेत्ततः ॥ स्पृशन्वै दक्षिणं कुम्भमृत्विगेको जपेदथ । चत्वारि रुद्रसूक्तानि चतुर्मन्त्रोत्तराणि च ॥ संस्पृशन्नुत्तरं कुम्भं श्रीरुद्रं रुद्रसङ्ख्यया । शन्न इन्द्राग्निसूक्तं च तत्रैव संस्पृशञ्जपेत् ॥ कुम्भस्य पश्चिमे देशे शान्तिहोमं समाचरेत् । दूर्वाभिस्तिलगोधूमैः पायसेन घृतेन च ॥ तिसृभिश्चैव दूर्वाभिरेका वाऽप्याहुतिर्भवेत् । अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ॥ गायत्र्यैव तु होतव्यं हविरत्र चतुष्टयम् । ततः स्विष्टकृतं हुत्वा समुद्रादूर्मिसूक्ततः ॥ सन्ततामाज्यधारां तां पूर्णाहुतिमथाचरेत् । अथाभिषेकं कुर्वीत प्रतिकुम्भस्थितोदकैः ॥ आपोहिष्ठेति नवभिः सूक्तेन च ततः परम् । इन्द्रो अङ्ग त्र्यृचेनैव पावमानैः क्रमेण तु ॥ उभयं शृणवच्चन स्वस्तिदाविशएकया । त्रैयम्बकेन मन्त्रेण जातवेदस एकया ॥ समुद्रज्येष्ठा इत्यादि गायन्तां च त्रिभिः क्रमात् । इमा आपस्त्र्यृचेनैव देवस्यत्वेति मन्त्रतः ॥ मन्त्रेणाथ तमीशाने त्वमग्ने रुद्र इत्यथ । तमुष्टुहीति मन्त्रेण भुवनस्य पितरं यथा ॥ या ते रुद्रेति मन्त्रेण शिवसङ्कल्पमन्त्रतः । इन्द्र त्वा वृषभं पञ्चमन्त्रैश्चैवाभिषेचयेत् ॥ धेनुं पयस्विनीं दद्यादाचार्याय च भूषणैः । सदक्षिणमनड्वाहं प्रदद्याद्रुद्रजापिने ॥ महाशान्तिं प्रजप्याथ ब्राह्मणान्भोजयेत्ततः ।" नारदः—"तत्र

शान्तिं प्रकुर्वीत घृतदूर्वातिलाक्षतैः । प्रत्येकाष्टशतं चैव गायत्र्या जुहुयात्ततः ॥ स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तये ।" अथ **प्रयोगः** । तत्रैवं " विनायकं सम्प्रपूज्य ग्रहांश्चैव विधानतः । कर्मणां फलमाप्नोति " इति **याज्ञवल्क्येन** कर्मफलसिद्धावविघ्नार्थत्वेन ग्रहयज्ञस्यावश्यकत्वोक्तेरिह च **शौनकेन**–"आर्तवानां तु नारीणां शान्तिं वक्ष्यामि शौनकः" इत्युपक्रम्य ग्रहातिथ्यपुरःसरमिति प्रकारेणोक्तेरावश्यकत्वादेकदेशकालकर्तृकाणां च विशेषवचनाभावे तन्त्रेण कर्तव्यत्वाद् ग्रहमखपूर्वकस्तन्त्रेण **शान्तिप्रयोग** उच्यते । रजोदर्शनानन्तरं पञ्चमादिदिने चन्द्रताराद्यानुकूल्ये शुचिदेशे सुस्नातया पत्न्या युतः पतिः प्राङ्मुख उपविश्य प्राणानायम्य देशकालौ सङ्कीर्त्य मम पत्न्या प्रथमरजोदर्शनेऽमुकदुष्टमासादिसूचितसकलारिष्टनिरासद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखां शौनकोक्तां शान्तिं करिष्ये इति सङ्कल्प्य, गणेशपूजनपुण्याहवाचनगौर्य्यादिषोडशमातृकापूजनब्राह्म्यादिसप्तमातृकापूजननान्दीश्राद्धानि कृत्वा, शान्तं दान्तं कुटुम्बिनं मन्त्रतन्त्रज्ञमाचार्यं ब्रह्माणं च जपहोमार्थमष्टौ, षट्, चतुरो वा ऋत्विजोऽपि वृत्वा गन्धादिना पूजयेत् । तत आचार्यो गृहेशानदेशे शुचौ " मही द्यौः " इति भूमिं स्पृष्ट्वा, तद्दक्षिणोत्तरतश्च तथैव मन्त्रावृत्त्या भूमिं स्पृष्ट्वा, " ओषधयः समवदन्त " इति द्रोणप्रमाणव्रीहिभिर्मध्ये तद्दक्षिणोत्तरतश्च पृष्ठदेशे मन्त्रावृत्त्या राशित्रयं कृत्वा तेनैव क्रमेण राशित्रये नवमकालकमभग्नं कुम्भत्रयम् "आजिघ्रकलशम् " इति मन्त्रावृत्त्या स्थापयेत् । एवं सर्वत्र मन्त्रावृत्तिः । ततः " प्रसुव आपः " इति नवर्चेन कलशेषूदकपूरणम् । "गन्धद्वाराम्" इति त्रिष्वपि गन्धं प्रक्षिप्य " या ओषधीः " इति सर्वौषधीः, " ओषधयः सम् " इति यवान् क्षिपेत् । ततो मध्यकुम्भे यवव्रीहितिलमाषकङ्गुश्यामाकमुद्गान् क्षिप्त्वा गायत्र्यौदुम्बरकुशदूर्वारक्तोत्पलचम्पकबिल्वविष्णुक्रान्तातुलसीबर्हिषशङ्खपुष्पीशतावर्यश्वगन्धानिर्गुण्डीरक्तपीतसर्षपापामार्गपलाशपनसजीवकप्रियङ्गुगोधूमव्रीह्यश्वत्थदधिदुग्धघृतपद्मपत्रनीलोत्पलसितरक्तपीतकुरण्टकगुञ्जावचाभद्रकाख्यानि द्वात्रिंशदौषधानि सर्वाणि यथासम्भवं वा क्षिपेत् । ततस्त्रिषु कलशेषु "काण्डात्काण्डात् " इति दूर्वाः, " अश्वत्थेव " इति पञ्चपल्लवान्, गजाश्वस्थानरथ्यावल्मीकसङ्गमह्रदगोष्ठस्थानमृदः " स्योना पृथिवि " इति क्षिप्त्वा, " याः फलिनीः" इति पूगीफलानि, 'सहिरत्नानि' इति कनककुलिशनलिपद्मरागमौक्तिकानि पञ्चरत्नानि, " हिरण्यरूप " इति हिरण्यं च क्षिपेत् । "युवा सुवासाः" इति सूत्रेण वाससा च कलशकण्ठान् वेष्टयित्वा, गन्धाक्षतपुष्पमालादीभिः कलशान्भूषयेत् । ततः कलशत्रयोपरि तेनैव क्रमेण सौवर्णं, राजतं, कांस्यमयं, ताम्रमयं, वैणवं, मृन्मयं वा यवादिपूरितं पात्रत्रयं "पूर्णा दर्वि" इति निधाय, तदुपरि श्वेतं वस्त्रत्रयं न्यस्य, तत्र चन्दनादिनाऽष्टदलानि कुर्यात् । तत्र मध्ये गायत्र्या भुवनेश्वरीमावाहयामीति यथाशक्ति सुवर्णनिर्मितां भुवनेश्वरीप्रतिमामग्न्युत्तारणपूर्वकं स्थापयेत् । तद्दक्षिणकुम्भोपरि वस्त्रे "इन्द्राणीमासु" इति इन्द्राणीमावाहयामीति । तथैव सौवर्णीमिन्द्राणीप्रतिमां संस्थाप्योत्तरकलशोपरि " इन्द्र त्वा " इति इन्द्रमावाहयामीति सौवर्णीमिन्द्रप्रतिमां स्थापयेत् । तत उक्तमन्त्रैरुक्तक्रमेण देवत्रयस्य काण्डानुसमयेन षोडशोपचारपूजां कुर्यात् । ततो मध्यमकुम्भे आचार्योऽष्टसहस्रमष्टशतं वा गायत्रीं जप्त्वा श्रीसूक्तं जपेत् । " हिरण्यवर्णाम् " इति पञ्चदशर्चं श्रीसूक्तम् । तत एक ऋत्विक् दक्षिणकुम्भे रुद्रसूक्तानि जपेत् । " कद्रुद्राय " इति नवर्चम्, " इमा रुद्राय " इत्येकादशर्चम्, " आते पितः " इति पञ्चदशर्चम् । "इमा रुद्राय स्थिरधन्वन" इति चतस्रः । "आवो राजानं " (१) । "तमुष्टुहि" (२) । "भुवनस्य पितरं" (३) । "त्र्यम्बकम्" (४) । अथान्य ऋत्विगुत्तरकुम्भे एकादशावृत्तिभी रुद्रं जपेत् । रुद्रं जप्त्वा " शन्न इन्द्राग्नी " इति सूक्तं पञ्चदशर्चं जपेत् । ततः कुम्भपश्चिमदेशे स्थण्डिलेऽग्निं प्रणीय, तदीशान्यां वेद्यादौ नवग्रहादींस्तत्तन्मन्त्रैरावाह्य, षोडशोपचारैः सम्पूज्य, तदीशान्यां प्राग्वत् कुम्भं संस्थाप्य, तत्र वरुणमावाह्याग्निसमीपमेत्य ब्रह्मोपवेशनाद्याज्यभागान्ते विशेषः । प्रणीताप्रणयने पयसः प्रणयनम्, आसादने आज्यानन्तरं ग्रहसमिधः, तिलाः, दूर्वाः, तिलमिश्रगोधूमाः, तण्डुलाः, चरोः पयसि श्रपणम् , आज्यभागान्ते यजमानो दक्षिणतः उपविश्य " होमार्थं च जपार्थं च वरयेदृत्विजो बहून् । आचार्यो द्विजैः सह " इति चोक्तेराचार्यर्त्विजां होमावगमात्तेषां चास्वत्वेन त्यागायोगात्तैश्च क्रियमाणे होमे यजमानेन प्रत्याहुतित्यागस्याशक्यत्वात्तदानीमेवाङ्गप्रधानहोमदेवता उद्दिश्य एताभ्य इदं न ममेति त्यजेत् । तत आचार्यः सऋत्विक् नवग्रहेभ्योऽष्टशताष्टाविंशत्यष्टान्यतमसंख्याका घृताक्ता अर्कादिसमिधस्तिलाज्याहुतीश्च हुत्वाऽधिदेवताप्रत्यधिदेवताविनायकादिपञ्चलोकपालेभ्यस्तन्न्यूनसंख्यया जुहुयात् । [illegible] तदाऽन्येभ्यश्चतस्र इति सम्प्रदायः ।

CC0. In Public Domain. Kritikant Sharma Najafgarh Delhi Collection.

ततो भुवनेश्वर्यै गायत्र्या दधिमधुघृताक्ताभिस्तिस्रभिर्दूर्वाभिरेकाहुतिरित्येवमष्टसहस्रमष्टशतं वा दूर्वाहुतीर्घृताक्ततिलमिश्रगोधमाहुतीः, पायसाहुतीर्घृताहुतीश्च जुहुयात् । एवमिन्द्राणीन्द्रयोः प्रागुक्तमन्त्राभ्यां क्रमेण हविश्चतुष्टयं प्रत्येकमष्टशतसङ्ख्यं भुवनेश्वर्या अष्टसहस्रपक्षे जुहुयात् । तस्या अष्टशतपक्षे तु तयोरष्टाविंशतिरिति सम्प्रदायः । अन्ये तु "गायत्र्यैव तु होतव्यं हविरत्र चतुष्टयम् । ततः स्विष्टकृतं हुत्वा" इति **शौनकेने**न्द्राणीन्द्रयोर्होमानभिधानात्तयोर्होमो नास्तीत्याहुः । ततः स्विष्टकृदादिप्रणीताविमोकान्तं कृत्वा, इन्द्रादिदिक्पालेभ्यो नवग्रहेभ्यो भुवनेश्वरीन्द्राणीन्द्रेभ्यः क्षेत्रपालाय च सदीपान्माषभक्तबलीँस्तत्तन्मन्त्रैर्दत्त्वा, पूर्णाहुतिं "समुद्रादूर्मिः" इति त्र्यृचेन जुहुयात् । ततो भुवनेश्वर्यादिकलशोदकं, ग्रहकलशोदकं च पात्रान्तरे गृहीत्वा तेन तत्स्थपञ्चपल्लवैः सकुशदूर्वैर्धृतनववस्त्रं यजमानं, धृतनववस्त्रकञ्चुकीं च तद्वामस्थाम् ऋतुमतीं सऋत्विगुदङ्मुख आचार्योऽभिषिञ्चेदेतैर्मन्त्रैः । ते च "आपोहिष्ठा" इति नवभिः, "य एक इद्विदयत" इत्येकया, "त्रिभिष्ट्वं देव" इति सप्तर्चेन, "उभयं शृणवचन" इत्येकया, "स्वस्तिदा विश" इति च "त्र्यम्बकम्" इति, "जातवेदस" इत्येकया, "समुद्रज्येष्ठा" इति चतसृभिः, "त्रायन्ताम्" इति तिसृभिः, "इमा आपः" इति तिसृभिः, "देवस्यत्वा" इति त्रिभिः, "तमीशानं जगतः" इत्येकया "त्वमग्ने रुद्र" इत्यापस्तम्बशाखागतेनैकेन "तमुष्टुहि" इति मन्त्रेण "भुवनस्य पितरम्" इति च, "या ते रुद्र" इति, "यज्जाग्रतः" इति षण्मन्त्रैः, "इन्द्र त्वा वृषभं वयम्" इति पञ्चमन्त्रैः । ततः "सुरास्त्वामभिषिञ्चन्तु" इति नवभिः पौराणैर्मन्त्रैरभिषिञ्चेत् । ततः कलशोदकेनान्येन चोदकेन सुस्नातौ दम्पती शुक्लवासोगन्धमाल्यादि धृत्वोपविशेताम् । तत्र पत्नी दक्षिणतः । ततो यजमानोऽग्निं सम्पूज्य विभूतिं धृत्वाऽऽचार्यादीन् गन्धपुष्पवस्त्रालङ्कारादिभिर्यथाशक्ति पूजयित्वाऽऽचार्याय धेनुं दक्षिणां दद्यात् । दक्षिणात्वेन चास्या, न दक्षिणान्तरमनवस्थाप्रसङ्गात् । ततो ब्रह्मणे यथाशक्ति दक्षिणां दत्त्वा, रुद्रजापिने सदक्षिणमनड्वाहं दक्षिणां दद्यात् । अथ धेनुन्यायेनादक्षिणत्वे प्राप्ते "सदक्षिणमनड्वाहं प्रदद्याद्रुद्रजापिने" इति प्रतिप्रसवकरणात्सदक्षिणत्वम् । ततोऽन्येभ्य ऋत्विग्भ्योऽन्येभ्यश्च ब्राह्मणेभ्यो भूयसीं दक्षिणां दद्यात् । ततो ग्रहपीठदेवतानां भुवनेश्वर्यादीनां चोत्तरपूजां पञ्चोपचारैः कृत्वा समाप्य "यान्तु देवगणाः" इति विसृज्याचार्यहस्ते प्रतिपाद्य अग्निं सम्पूज्य 'गच्छ गच्छ सुरश्रेष्ठ' इति विसर्जयेत् । ततो ब्राह्मणा महाशान्तिं पठेयुः । तद्यथा "आनोभद्रा" इति दश, "स्वस्ति नो मिमीताम्" इति पञ्च, "शन्न इन्द्राग्नी" इति पञ्चदश,—"त्यमूषु" इति तिस्रः, "तच्छंयोः" इत्येका । ततो यजमानो नवग्रहप्रीत्यर्थं त्रीन् भुवनेश्वरीन्द्राणीन्द्रप्रीतये च प्रत्येकं त्रीँस्त्रीन् ब्राह्मणान् भोजयित्वा सङ्कल्प्य वा विप्राशिषो गृहीत्वा सुहृद्युतो भुञ्जीत । एवं कृते सर्वारिष्टशान्तिर्भवति । ततः शुभे काले गर्भाधानं कुर्यात् । इति **दुष्टरजोदर्शनशान्तिः** । अथ **चन्द्रसूर्योपरागकाले प्रथमरजोदर्शने शान्तिविशेष** उच्यते । **शौनकः**—"ग्रहणे चन्द्रसूर्यस्य प्रसूतिर्यदि जायते । व्याधिपीडा तदा स्त्रीणामादौ तु ऋतुदर्शनात् ॥ इत्थं संजायते यस्य तस्य मृत्युर्न संशयः ।" शान्तिस्तु—"तद्दक्षाधिपते रूपं सुवर्णेन प्रकल्पयेत् ॥ सूर्यग्रहे सूर्यरूपं हैमं चन्द्रं तु राजतम् । राहुरूपं प्रकुर्वीत नागेनैव विचक्षणः ॥ (नागः सीसम्) त्रयाणां चैव रूपाणां स्थापनं तत्र कारयेत् ।" "आकृष्णेन, आप्यायस्व, स्वर्भानोः" इति पूजामन्त्रा उक्ताः । नक्षत्रदेवतायास्तन्मन्त्रेण नाममन्त्रेण वा । "सम्पूज्य तु यजेत्सूर्यं समिद्भिश्चार्कसम्भवैः । चन्द्रग्रहे तु पालाशैर्दूर्वाभी राहुमेव च ॥ समिद्भिर्ब्रह्मवृक्षस्य मेशाय जुहुयाद् बुधः । आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः ॥ पञ्चगव्यैः पञ्चरत्नैः पञ्चत्वक्पञ्चपल्लवैः । जलैरोषधिकल्कैश्च अभिषेकं समाचरेत् ॥ मन्त्रैर्वारुणसम्भूतैरापोहिष्ठादिभिस्त्रिभिः । इमंमे गङ्गे परतस्तत्त्वायामीति मन्त्रकैः ॥ यजमानस्ततो दद्याद्भक्त्या प्रतिकृतित्रयीम् ।" अथ **प्रयोगः** । उपरागस्य पौर्णमास्यमावास्याभ्यामविनाभावात्तदतिरिक्तवारादौ दुष्टे प्रागुक्तशान्त्या समुच्चीयन्ते, निमित्तभेदाददृष्टार्थत्वाच्च प्रत्यक्षविध्यभावे तत्कार्यं कारयित्वानवगमेनामनहोमैर्नारिष्टहोमानामिवानयः तन्निवृत्त्ययोगात् ग्रहणमात्रे त्वियमेव । अत्र च पुनः श्रवणाभावान्नवग्रहमखः कृताकृत इति विवेकः । तत्र केवलायाः प्रयोगः । पूर्वोक्तकाले सस्त्रीकः शुचिः प्राङ्मुख उपविश्य प्राणानायम्य देशकालौ स्मृत्वा मम पत्न्याश्चन्द्रोपरागे प्रथमरजोदर्शनसूचितारिष्टनिरासद्वारा श्रीपरमेश्वरप्रीत्यर्थं शान्तिं करिष्य इति सङ्कल्प्य प्राग्वदृत्विक्पूजां कुर्यात् । नवग्रहपक्षे सनवग्रहमखमिति । सूर्योपरागे तु सूर्योपरागे प्रथमेत्यादि पूर्ववत् । तत आचार्यः । शुचिदेशे गोमयेनोपलिप्य तत्र पञ्चवर्णरजोभिरष्टदलं पद्मं कृत्वा, तदुपरि नवं श्वेतं वस्त्रमुदग्दशं संस्थाप्य, यथाशक्ति रजतनिर्मितां चन्द्रप्रतिमाम् "आप्या-

यस्व" इति मन्त्रेण चन्द्रमावाहयामीति स्थापयेत् । सूर्यग्रहे तु यथाशक्ति सुवर्णनिर्मिताम् "आकृष्णेन" इति सूर्यमावाह० । ततो यथाशक्ति सीसानिर्मितां राहुप्रतिमां "स्वर्भानोः" इति राहुमावा० । तदुत्तरतः स्था० । ततो यस्मिन्नक्षत्रे ग्रहणं तन्नक्षत्रदेवताप्रतिमां यथाशक्ति सुवर्णनिर्मितां तत्तन्मन्त्रैर्नाममन्त्रैर्वा "ॐ अश्विनावावाहयामि नमः" इति प्रणवादिनमोऽन्तैः स्था० । मन्त्रास्त्वापस्तम्बानामष्टौ वाक्यानीति प्रसिद्धाः । नामानि तु "अश्विनौ यमः अग्निः प्रजापतिः सोमः रुद्रः अदितिः बृहस्पतिः सर्प्पाः पितरः भगः अर्यमा सविता त्वष्टा वायुः इन्द्राग्नी मित्रः इन्द्रः निर्ऋतिः आपः विश्वेदेवाः विष्णुः वसवः वरुणः अजैकपात् अहिर्बुध्न्यः पूषा" इति एवं देवतात्रयमावाह्यैभिरेव मन्त्रैः काण्डानुसमयेन षोडशोपचारैः पूजयेत् । तत्र चन्द्रग्रहे चन्द्राय श्वेतानि वस्त्रगन्धाक्षतमाल्यानि देयानि । सूर्यग्रहे तु सूर्याय रक्तवस्त्ररक्तचन्दनरक्ताक्षतकरवीरपुष्पाणि देयानि । राहवे कृष्णानि । नक्षत्रदेवताभ्यः श्वेतानि । ततः पश्चिमतोऽग्निं प्रतिष्ठाप्य पक्षे नवग्रहानप्यावाहनपूर्वं सम्पूज्य ब्रह्मोपवेशनादिचरुं श्रपयित्वाज्यभागान्तम् । ततः पक्षे नवग्रहहोमः । ततश्चन्द्रमुद्दिश्योक्तसंख्यया पालाशसमिदाज्यचरुतिलैर्होमः राहुमुद्दिश्योक्तसंख्यया दूर्वाज्यचरुतिलैर्होमः, नक्षत्रदेवतामुद्दिश्योक्तसंख्यया पालाशसमिदाज्यचरुतिलैर्होमः, सूर्यग्रहे तु चन्द्रस्थाने सूर्यमुद्दिश्योक्तसंख्ययाऽर्कसमिदाज्यचरुतिलैर्होमः, तिसृणां दूर्वाणामेकैकाहुतिः । समिधश्च त्रिमध्वक्ताः कार्याः । ततः स्विष्टकृदादिपूर्णाहुत्यन्तं प्राग्वत् । तत आचार्य एकस्मिन् कलशे जलपूर्णे पञ्चगव्यानि पञ्चरत्नानि वटाश्वत्थोदुम्बराम्रबिल्वानां त्वचः पञ्चपल्लवान्सर्वौषधिकल्कंदूर्वाः कुशाँश्च निक्षिप्य सऋत्विक् दम्पती पूर्ववदभिषिञ्चेदेतैर्मन्त्रैः "आपोहिष्ठेति, इमम्मे गङ्गे इति तत्त्वा यामीति" अन्येऽपि "समुद्रज्येष्ठा" इत्यादयः । "सुरास्त्वाम्" इत्यादयः पौराणाश्च । ततः स्नानदक्षिणादानप्रतिमाप्रतिपादनादि पूर्ववत् । यदा तु पूर्वशान्तिसमुच्चयस्तदा कालैक्यात्कर्त्रैक्यादाग्नेयादिवत्तन्त्रप्रयोगः । तत्र यजमानो देशकालौ स्मृत्वा मम पत्न्याः प्रथमरजोदर्शनेऽमुकदुष्टमासतिथ्याद्यमुकग्रहणसूचितेत्यादि सङ्कल्प्यर्त्विक्पूजान्तं विदध्यात् । तत आचार्यो भुवनेश्वर्यादिपूजातः प्राक् पश्चाद्वा तत उदीच्यां चन्द्रादीन् सम्पूज्य यथोपक्रमं होमाभिषेकौ कुर्यादिति विशेषः । अन्यत्समानम् । इति **ग्रहणे रजोदर्शने शान्तिः** ॥—इति श्रीत्रिरग्निचित्सम्राट्स्थपति-श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे एकादशी कण्डिका ॥ ११ ॥ ॥ * ॥

विश्व-०चतुर्थ्या·····धाय—चतुर्थ्यां रात्रौ रात्रेरपरभागे, यद्वा चतुर्थीतिथिसंबन्धिरात्र्यपरभागे । यत्तु चतुर्थ्यां तिथौ भविष्यद्रात्र्यपरभाग इति । तस्य रात्र्यंशस्य पञ्चमतिथिसंबन्धित्वात् । तथाच पञ्चमीकर्मत्वापत्त्या चतुर्थीकर्मेति नामव्याकोपः । "त्रिरात्रे निर्वृत्ते चतुर्थीकर्म्म" इति **शाङ्खायन**विरोधाच्च । गृहस्याभ्यन्तरतोऽग्निमुपलिप्त उद्धतावोक्षिते समाधाय **दक्षिण·····वेश्य**—उपवेश्येत्युक्तत्वात्प्रत्यक्षब्रह्मण उपवेशनम् । अपरे तु उदपात्रप्रतिष्ठापनावसरविधित्सया ब्रह्माणमुपवेश्येत्युक्तम् । तेन स्मार्तकर्मसु सर्वत्र प्रत्यक्षब्रह्मोपवेशनमाहुः । **उत्तरत...र्जुहोति—स्थालीपाकं॰ श्रपयित्वा**—इत्यनेन परिभाषाप्रज्ञप्तिः । पात्रासादने विंशतिसंख्याकाः समिधः । चरुग्रहणे 'प्रजापतये जुष्टं गृह्णामि ।' ग्रहणं प्राजापत्येन तीर्थेन । चतुर्थं तूष्णीम् । प्रोक्षणे 'प्रजापतये त्वा जुष्टं प्रोक्षामि ।' अन्यत्प्रकृतिवत् । आज्यभागानन्तरम् "अग्ने प्रायश्चित्त" इत्यादिपञ्चमन्त्रैः पञ्चाज्याहुतयः, "आज्यभागाविष्ट्वा" इत्याज्याहुत्यवसरविधित्सयोक्तत्वात् । आज्याहुतिकरणार्थं स्मृतिकरणान्मन्त्रानाह **अग्ने प्रायश्चित्ते···नाशय स्वाहा**—इदमग्नये । **वायो प्राय···नाशय स्वाहा**—इदं वायवे । **सूर्यप्रा···शय स्वाहा**—इदं सूर्याय । **चन्द्रप्रा···शय स्वाहा**- इदं चन्द्रमसे । **गन्धर्व प्रा···नाशय स्वाहा**—इदं गन्धर्वाय । इतिशब्द आज्याहुतिमन्त्रसमाप्तिद्योतकः । **स्थालीपा···पतये स्वाहेति**—स्थालीपाकस्य होमः । प्रजापतये स्वाहा इदं प्रजापतये । **हुत्वा हुत्वै···मूर्धनि वरः अभिषिञ्चति**—उदपात्रोदकेन असावित्यत्र प्रथमान्तवधूनामग्रहणम् । **अथैनां॰···त्वचामिति**—चतुर्भिर्मन्त्रैः प्रतिमन्त्रं वध्वा प्राशनं कारयतीत्यर्थः । ततो महाव्याहृत्यादिस्विष्टकृदन्तम् । चरोरुपहतत्वादाज्येन स्विष्टकृत् । संस्रवप्राशनादि ब्राह्मणभोजनान्तम् । इति **चतुर्थीकर्म** । एवं निष्पन्ने भार्यात्वे तस्याः पुरुषान्तरकर्तृकोपहासनिषेधमाह—**तस्मादे···भवति**—एवंवित् श्रोत्रियस्य स्त्रियं नोपहसेदिति ज्ञानवान् परः श्रेष्ठो भवतीत्यर्थः । अभिगमनमाह—**तामुदुह्य यथर्तु प्रवेशनम्**—एवं तामुद्वाह्य यथर्तु ऋतुसमयमनतिक्रम्य प्रवेशनम् अभिगमनं कुर्यात् ॥ **यथाकामी···वचनात्**—अत्रापि निषिद्धवर्जम् । **अथास्यै···शतमिति**—अथाभिगमनानन्तरमस्याः स्त्रियाः दक्षिणांसमधि हृदयमालभते "यत्ते सुसीम" इति मन्त्रेण । एवः मत ऊर्ध्वम् । अतः परमृतावनृतौ वा स्त्रियं गच्छेत् तदा हृदयालम्भान्तं कुर्यादित्यर्थः । प्रमादाद्दिवामैथुने बहिःसंध्योपासनं प्रायश्चित्तम् । तदुक्तं **स्कान्दे काशीखण्डे**—"उपासिता बहिःसंध्या दिवामैथुनपातकम् । शमयेदनृतोक्ताद्यं मधुगन्धजमेव च" इति । इति **गर्भाधानम्** ॥ एकादशी कण्डिका ॥ ११ ॥ ॥ * ॥

पक्षादिषु स्थालीपाकꣳ श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति ॥ १ ॥ विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्य आकाशाय च ॥ २ ॥ वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहाऽग्नये स्विष्टकृते स्वाहेति प्राशनान्ते ॥ ३ ॥ बाह्यतः स्त्रीबलिꣳ हरति नमः स्त्रियै नमः पुꣳसे वयसेऽवयसे नमः शुक्लाय कृष्णदन्ताय पापिनां पतये नमः। ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्यो नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददत्विति ॥ ४ ॥ शेषमद्भिः प्रप्लाव्य ततो ब्राह्मणभोजनम् ॥ ५ ॥ १२ ॥

कर्कः—**पक्षादिषु स्थालीपाकꣳ श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति**—पक्षादिष्विति बहुवचनोपदेशात्सर्वपक्षादिषु क्रिया स्थालीपाकꣳ श्रपयित्वेत्युच्यते, तद्भूतोपादानं माभूदिति तेनैव स्थालीपाकेन दर्शपूर्णमासदेवताभ्यो विनिष्कृष्य दर्शे दर्शदेवताभ्यो हुत्वा पौर्णमासे पौर्णमासदेवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये इत्येवमादिभ्यः। **विश्वेभ्यो देवेभ्यो बलिहरणम्, भूतगृह्येभ्य आकाशाय च**—स्थालीपाकादेव द्रव्यान्तरानुपदेशात् बलिहरणे च नमस्कारः। **वैश्वदेवस्याग्नौ जुहोति अग्नये स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहाऽग्नये स्विष्टकृते स्वाहेति**—वैश्वदेवस्येत्यवयवलक्षणा षष्ठी। वैश्वदेवं च केचित् पृथक् चरुं कुर्वन्ति, यथा पौष्णस्य जुहोतीति पौष्णम् तत्पुनरयुक्तम्, वैश्वदेवशब्देन विश्वेदेवा देवता अस्येति सर्वार्थः पाकोऽभिधीयते ततो जुहोतीत्युक्तं भवति। यत्तु पौष्णवदिति नहि पौष्णशब्दवाच्योऽन्यः क्वचिच्चरुर्भवति तेनास्य पृथक्क्रिया। वैश्वदेवस्तु पुनः पाको विद्यत एवेति। तथाच वक्ष्यति वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयादिति। अग्नौ जुहोतीति किमर्थमिदमुक्तम्। अग्नावेव हि होमो नान्यत्रेति तेनाग्निग्रहणं बलिकर्मार्तो माभूदिति। अग्नये स्विष्टकृते स्वाहेति प्रयोगप्रदर्शनार्थं प्राजापत्यꣳ स्विष्टकृच्चेति प्रदेशान्तरेऽभिहितं, तेनेह प्रयोग उपदर्श्यते। अपि च स्थालीपाकेन दर्शपौर्णमासदेवतादीनां होमविधानस्यावसरविधित्सया। तत्कथम्, प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविरिति प्रदेशान्तरे उक्तम्, तेन प्राङ्महाव्याहृतिहोमादाज्यभागोत्तरकालं चावसरोऽवगम्यत इति। **बाह्यतः स्त्रीबलिꣳ हरति नमः स्त्रियै नमः पुꣳसे वयसेऽवयस** इत्येवमादि पृथङ्मन्त्रवाक्यैः। एतच्चागन्तुकत्वात्प्राशनान्ते भवति। **शेषमद्भिः प्रप्लाव्य ततो ब्राह्मणभोजनम्**—शेषं च स्थालीपाकशेषम् ॥ * ॥ १२ ॥

जय०—**पक्षादिष्विति**—बहुवचनोपदेशात्सर्वपक्षादिषु क्रिया। **श्रपयित्वेति**—तद्भूतोपादानं माभूदिति। तेनैव स्थालीपाकेन दर्शपूर्णमासदेवताभ्यो विनिष्कृष्य दर्शे दर्शदेवताभ्यः पौर्णमासे च पौर्णमासदेवताभ्यो हुत्वा जुहोति। **ब्रह्मणे** इत्येवमादिभ्यश्चतुर्भ्यो विश्वेभ्यो देवेभ्य इति द्रव्यान्तरानुपदेशात्स्थालीपाकादेव विश्वेदेवादिभ्यो बलित्रयमग्नेरुदक्प्राक्संस्थम्। वैश्वदेवस्येत्यवयवलक्षणा षष्ठी। वैश्वदेवं च केचित्पृथक् चरुं कुर्वन्ति। यथा पौष्णस्य जुहोतीति पौष्णम्। तदसत्। वैश्वदेवशब्देन विश्वेदेवा देवता

अस्येति सवार्थः पाकोऽभिधीयते । अतस्ततो जुहोतीत्युक्तम् । यत्तु पौष्णवदिति, नहि पौष्णशब्दवाच्योऽन्यत्र कश्चिच्चरुर्भवति । तेनास्य पृथक्क्रिया । वैश्वदेवस्तु पुनः पाको विद्यत एव । तथा च वक्ष्यति । "वैश्वदेवादन्नात् पर्युक्ष्य स्वाहाकारैर्जुहुयात्" इति । अग्नौ जुहोतीति किमर्थमिदमुक्तम् । अग्नावेव होमो नान्यत्रेत्यग्निग्रहणम् । जुहोतीति बलिकर्मातो माभूदिति । **अग्नये स्विष्टकृते स्वाहेति**–प्रयोगोपदर्शनार्थम् । प्राजापत्यं स्विष्टकृच्चेति प्रदेशान्तरे दर्शितत्वात् । तेनेह प्रयोग उपदर्श्यते । अपिच स्थालीपाकेन दर्शपौर्णमासदेवताहोमावसरविधित्सयैतत् । तत्कथम् । प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविरिति प्रदेशान्तरे उक्तम, स्विष्टकृद्धोमश्च शेषादेव भवति, तेनैव प्राङ्महाव्याहृतिहोमादाज्यभागोत्तरकालं चावसरोऽवगम्यत इति । बाह्यत इत्येतदागन्तुकत्वात्प्राशनान्ते भवति । क बाह्यतः शालाया बहिः । नमः **स्त्रियै** इत्यादिभिर्मन्त्रैः प्रतिमन्त्रं स्थालीपाकात्तत्र स्त्रीभ्यो बलिः । स्त्र्यादिभ्यो बलिः स्त्रीबलिः । तं हरति । स्रुवेण बलिहरणम् । तानाह–**नमः स्त्रिय इति**–अथ मन्त्रार्थः । स्त्रियै सन्तानसुखविघातिन्यै नमः नमस्कारोऽस्तु, अतः सन्तानसुखेच्छवोऽत्र बाह्यबल्यधिकारिणः। तथा पुंसे उक्तस्वरूपाय। वा किम्भूताय वयसे अवयसे च वृद्धाय बालाय च शुक्लाय बहिःकृष्णदन्ताय असितान्तरङ्गाय अतिमलिनमनस इत्यर्थः । अतएव पापीनां पतये श्रेष्ठाय बालकाय वा दीर्घश्छान्दसः, अत्र बलित्रये पुमानेव विशिष्यते । ये च मे मम प्रजां सन्तानमुपलोभयन्ति मोहयन्ति ग्रामे वसन्तः उत अपि वा समुच्चये, अरण्ये अप्यरण्ये वा वने वाऽपि तेभ्यो नमः नमस्कारोऽस्तु तेभ्यो बलिपूजां हरामि समर्पयामि । मम नमस्कारबलिभ्या यूय सन्तुष्टा भवत । ततो भवतां प्रसादान्मे मम स्वस्तिकल्याणमस्तु । भवन्तश्च मे मह्यं प्रजां पुत्रादिसुखजातं ददतु प्रयच्छन्तु । शेषं स्थालीस्थितमवशिष्टं चरुम् अद्भिः प्रणीताशेषाद्भिः प्रप्लाव्य मज्जयित्वा ततो विप्रभोजनं कार्य्यम् ॥ १२ ॥

हरि०–**पक्षादिषु स्थालीपाकं श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति**–पक्षाणामादयः पक्षादयः तासु पक्षादिषु प्रतिपत्सु । अत्र यद्यपि पक्षादिष्वित्युक्तम्, तथापि "सन्धिमभितो यजेत" इति वचनात् "पर्वणो यश्चतुर्थांश आद्याः प्रतिपदस्त्रयः । यागकालः स विज्ञेयः प्रातर्युक्तो मनीषिभिः ।" इति पर्वचतुर्थांशोऽपि यागकालत्वेनाभिमतः । तथा "पूर्वाह्णे वाऽथ मध्याह्ने यदि पर्व समाप्यते । स एव यागकालः स्यात्परतश्चेत्परेऽहनि ॥" तत्रापि–"सन्धिर्यद्यपराह्णे स्याद् यागं प्रातः परेऽहनि । कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यति ।" इत्यादिभिर्वचनैर्यागकालं निर्णीय पर्वदिवसे कृतोपवसथिकाशनः सपत्नीकः शालायां जघनेनाग्निं रात्रौ जाग्रन्मिश्र इतिहासमिश्रो वा पृथक् शयित्वा प्रातः कृतस्नानसन्ध्यावन्दनप्रातर्होमः स्वाचान्तोऽग्नेः पश्चात्प्राङ्मुख उपविश्य पूर्वोक्तविधिना चरुं श्रपयित्वाऽऽज्यभागान्ते दर्शे दर्शदेवताभ्यः पौर्णमासे पौर्णमासदेवताभ्यः प्रयोगे वक्ष्यमाणाभ्यश्चरुं हुत्वा ब्रह्मप्रजापतिविश्वेदेवाद्यावापृथिवीभ्यश्चरुं जुहोति । **विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्य आकाशाय च**–बलिहरणं, बलिदानम् स्थालीपाकदेवताभ्यो विश्वेभ्यो भूतगृह्येभ्यः आकाशाय च । **वैश्वदेवस्याग्नौ जुहोति अग्नये स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहाऽग्नये स्विष्ट*कृते स्वाहेति**–वैश्वदेवस्य विश्वेदेवा देवपितृमनुष्या देवा अस्येति वैश्वदेवः पाकः पञ्चमहायज्ञार्थ

---

* स्विष्टकृद्ग्रहणं न कर्तव्यम् कुतः प्राङ्महाव्याहृतिभ्य इति स्विष्टकृत इत्युक्तत्वात् । स्विष्टकृद्धोमस्तु स्थालीपाकादेव । कुतः, "यस्यै कस्यै च देवतायै हविर्गृह्यते सर्वत्रैव स्विष्टकृदन्वाभक्त" इति श्रुतेः । वैश्वदेवस्य तु स्थालीपाकाभावात् ततः स्विष्टकृन्न भविष्यति तन्माभूदिति स्विष्टकृद्ग्रहणम् । चिन्तायाः प्रयोजनम् द्रव्यदेवतागुणसामान्ये उक्तत्वात् उभयोः सहव स्विष्टकृद्भवति ।

साधितपाक इत्यर्थः । ननु वैश्वदेवस्याग्नौ जुहोतीति विश्वेदेवसम्बद्धस्य चरोस्तद्भूतोपात्तस्य वा अग्नौ जुहोतीति कथं नोच्यते यथा वृषोत्सर्गे पौष्णस्य जुहोतीति पूषसम्बद्धः पृथगेव पिष्टमयपूर्वसिद्धश्चरुर्गृह्यते,किमिति पञ्चमहायज्ञार्थः,उच्यते–"स्थालीपाकꣳ श्रपयित्वा" इत्यत्र स्थालीपाकस्यैकवचनान्तत्वात् द्वितीयस्य वैश्वदेवस्य चरोरभावोऽवगम्यते पौष्णवत् । वैश्वदेवस्य सिद्धोपात्तस्य पृथगुपादान तु पञ्चमहायज्ञार्थवैश्वदेवपाकस्य सद्भावान्निवर्तते । पञ्चमहायज्ञार्थस्य वैश्वदेवत्वं कुत इति चेत् 'वैश्वदेवादन्नात्पर्युक्ष्य''इति सूत्रात् अग्नौ जुहोतीति अग्निग्रहणं वलिकर्मता माभूदिति अग्नये स्वाहेत्यादिप्रयोगदर्शनार्थं सर्वत्र तस्यैकदेशस्योद्धृत्यासादितप्रोक्षितस्य अग्नये प्रजापतये विश्वेभ्यो देवेभ्यो हुत्वा, स्थालीपाकाद्वैश्वदेवाच्च अग्नये स्विष्टकृते जुहोति, ततः शेषसमाप्तिं विधाय । **बाह्यतः स्त्रीबलिꣳ हरति नमः स्त्रियै नमः पुꣳसे वयसेऽवयसे नम इत्यादिभिर्मन्त्रैः**–बाह्यतः शालायाः प्राङ्गणे स्त्रीवलिं स्त्र्यादिभ्यो बलिः स्त्रीबलिस्तं स्त्रीबलिं हरति ददाति । **शेषमद्भिः प्रप्लाव्य**–स्थालीस्थितमवशिष्टं चरुमद्भिर्जलेन प्रप्लाव्य मज्जयित्वा अत्रापः प्राणीताः तासां सर्वकर्मार्थत्वेन प्रणीतत्वात् । **ततो ब्राह्मणभोजनम्**–व्याख्यातः सूत्रार्थः ॥ १२ ॥

अथ **प्रयोगः** । अथ पक्षादिकर्मोच्यते । तत्र प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा, अमाषममांसम् अक्षारालवणं हविष्यं व्रताशनं विधाय रात्रावग्निसमीपे भूमौ दम्पती पृथक् शयीयाताम् । प्रातः स्नात्वा सन्ध्यावन्दनानन्तरं प्रातर्होमं च निर्वर्त्य, उदिते सूर्ये पौर्णमासं स्थालीपाकमारभेत । तत्रात्मनः ब्रह्मणः प्रणीतानां चासनचतुष्टयं कुशैर्दत्त्वा पक्षादिकर्मणाऽहं यक्ष्ये, तत्र मे त्वं ब्रह्मा भव, भवामीति तेनोक्ते आसने उपवेश्य, अत्रासादने वैश्वदेवान्नासादनं विशेषः । तत्प्रोक्षणं च आज्यभागान्तं यथोक्तं कर्म निर्वर्त्य स्थालीपाकमभिघार्य स्रुवेण चरुमादाय अग्नये स्वाहा इदमग्नये० ।अग्नीषोमाभ्यां स्वाहा इदमग्नीषोमाभ्यां०।उपांशु पुनरग्नीषोमाभ्यां स्वाहा इदमग्नीषोमाभ्यां०। उच्चैः ब्रह्मणे स्वाहा इदं ब्रह्मणे० । प्रजापतये स्वाहा इदं प्रजापतये० । विश्वेभ्यो देवेभ्यः स्वाहा इदं विश्वेभ्यो देवेभ्यो० । द्यावापृथिवीभ्याꣳ स्वाहा इदं द्यावापृथिवीभ्यां० । हुतशेषात्स्रुवेण अग्नेरुत्तरतः प्राक्संस्थं विश्वेभ्यो देवेभ्यो नमः इदं विश्वेभ्यो देवेभ्यो०। भूतगृह्येभ्यो नमः इदं भूतगृह्येभ्यो०। आकाशाय नमः इदमाकाशाय० चेति स्रुवेण बलित्रयं दत्त्वा अभिघारितवैश्वदेवान्नात्स्रुवेणादाय अग्नये स्वाहा इदमग्नये० । प्रजापतये स्वाहा इदं प्रजापतये० । विश्वेभ्यो देवेभ्यः० स्वाहा इदं विश्वेभ्यो देवेभ्यो० । इत्याहुतित्रयमग्नौ हुत्वा स्थालीपाकोत्तरार्द्धाद्वैश्वदेवोत्तरार्द्धाच्च अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते० । इति हुत्वा भूरित्यादिप्राजापत्यान्ता नवाहुतीर्जुहुयात् । संस्रवप्राशनम्, मार्जनम्, पवित्रप्रतिपत्तिः, प्रणीताविमोकः, ब्रह्मणे दक्षिणादानान्तं कृत्वा चरुशेषमादाय शालाया बहिरुपलिप्तायां भूमौ प्राङ्मुख उपविश्य स्रुवेण नमः स्त्रियै इदं स्त्रियै०।नमः पुꣳसे वयसेऽवयसे इदं पुꣳसे वयसेऽवयसे०। नमः शुक्लाय कृष्णदन्ताय पापीनां पतये इदं शुक्लाय कृष्णदन्ताय पापीनां पतये०। नमो ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्य इदं ये मे इत्यादि नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददतु । इदं स्त्रियै पुꣳसे वयसेऽवयसे शुक्लाय कृष्णदन्ताय पापीनां पतये, ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्यः इदमेभ्य इति वा त्यागः। शेषं प्रणीताऽद्भिः प्रप्लाव्याचम्याग्निसमीपमागत्य एकस्मै ब्राह्मणाय भोजनं ददामीति सङ्कल्पयेदिति पक्षादिकर्मविधिः। दर्शे पुनरियान्विशेषः । स्थालीपाकेनाग्नये विष्णवे इन्द्राग्निभ्यामिति दर्शदेवताभ्यो होमः । अनुदिते चारम्भः।शेषं समानम् । "सायमादिप्रातरन्तमेकं कर्म प्रचक्षते । पौर्णमासादिदर्शान्तमेकमेव विदुर्बुधाः" इति वचनात् । कृष्णपक्षे यद्याधानं तदा दर्शमकृत्वैव पौर्णमास्यां पक्षादिकर्मारम्भः । यत्तु छन्दोगपरिशिष्टे वचनम् । "ऊर्ध्वं पूर्णाहुतेर्दर्शः पौर्णमासोऽपि चाग्रिमः । य आयाति स होतव्यः स एवादिरिति श्रुतेः" तत्पुनराधानविषयं तच्छाखिविषयं वा।इति पक्षादिप्रयोगः।।।१२।।

गदा०—**पक्षादिषु स्थालीपाकꣳ श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति**—पक्षाणामादयः पक्षादयस्तासु पक्षादिषु प्रतिपत्सु बहुवचनोपदेशात्सर्वपक्षादिष्वेतत्कर्म भवति । उक्तेन विधिना स्थालीपाकं श्रपयित्वा तेनैव स्थालीपाकेन दर्शपूर्णमासदेवताभ्यो विभागेन होमः । पौर्णमासे पक्षादौ पौर्णमासदेवताभ्यो हुत्वा दर्शकालपक्षादौ दर्शदेवताभ्यो हुत्वा ब्रह्मण इत्येवमादिभ्यश्चतुर्भ्यो जुहोति स्थालीपाकेनैव दर्शपौर्णमासे च विधिः समान इति कृत्वा, ग्रन्थगौरवभयादाचार्येण समस्तोपदेशः कृतः, अतो यादृशस्ताभ्यो होमो विभागेन सिद्धस्तादृश एवेहापीति । एवं च स्मृत्यन्तरैः सहानुगतार्थो भवति । केचित्तु समस्तोपदेशात्सर्वाभ्यो होममिच्छन्ति । सिद्धचरोरुपादानं माभूदिति श्रपयित्वेत्युच्यते । यद्यप्यत्र पक्षादिष्विति सामान्येनोक्तं तथापि स्मृत्यन्तरोक्तो यागकालो ग्राह्यः । **वृद्धशातातपः**-"पर्वणो यश्चतुर्थोऽश आद्याः प्रतिपदस्त्रयः । यागकालः स विज्ञेयः प्रातर्युक्तो मनीषिभिः ॥" **कारिकायाम्** । "आवर्तनेऽथवा तत्प्राग्यदि पर्व समाप्यते । तत्र पूर्वाह्ण एव स्यात्सन्धेरूर्ध्वं द्विजाशनम् ॥ आहिताग्नेर्न नियम इष्टेरूर्ध्वं विधानतः । ऊर्ध्वमावर्तनाच्चेत्स्याच्छ्वोभूते प्रातरेव हि ॥" प्रतिपदि वृद्धिगामिन्यां क्षीणायां वा सन्धिज्ञानोपायमाह--**लौगाक्षिः**-"तिथेः परस्या घटिकाश्च याः स्युर्न्यूनास्तथैवाभ्यधिकाश्च तासाम् । अर्द्धं वियोज्यं च तथा प्रयोज्यं ह्रासे च वृद्धौ प्रथमे दिने स्यात्" इति । प्रतिपद्वृद्धिनाडिका द्विधा विभज्यार्द्धं पर्वणि संयोज्य सन्धिः कल्पनीयः । तथैव प्रतिपत्क्षयनाडिकाश्च द्वेधा विभज्यार्द्धं पर्वणि वियोज्य सन्धिः कल्पनीयः । आधानानन्तरं शुक्ला कृष्णा वा प्रतिपद्भवति तस्यामारम्भः कार्यः । तदुक्तं **कारिकायाम्**-"आधानानन्तरं शुक्ला कृष्णा वा प्रतिपद्भवेत् । तस्यां पक्षादिकर्मैतत्कार्यं पूर्वाह्ण एव तत्" इति । **हरिहरभाष्ये** तु "सायमादिप्रातरन्तमेकं कर्म प्रचक्षत । पौर्णमासादिदर्शान्तमेकमेव विदुर्बुधाः" इति वचनात्कृष्णपक्षे यद्याधानं तदा दर्शमनिष्ट्वैव पौर्णमास्यां पक्षादिकर्मारम्भः । यत्तु "**छन्दोगपरिशिष्टवचनम्** । "ऊर्ध्वं पूर्णाहुतेर्दर्शः पूर्णमासोऽपि चाग्रिमः । य आयाति स होतव्यः स एवादिरिति श्रुतेः" इत्येतत्पुनराधानविषयं तच्छाखिविषयम्" इत्युक्तम् । अत्रैके वदन्ति आधानस्य शुक्लपक्षे विहितत्वात्तदुत्तरं पौर्णमासस्थालीपाककालस्य विद्यमानत्वात्पौर्णमासस्थालीपाकारम्भो युक्तः । तच्चिन्त्यम्, अस्माकं सूत्रे दारकाले दायाद्यकाले वेत्यावसथ्याधानस्य काल उक्तः । तत्र यदा दायाद्यकाल आधानं कृतं तदुत्तरं या प्रतिपद्भवति तस्यामारम्भो युक्तः । ननूदगयन आपूर्यमाणपक्षे पुण्याह इत्युक्तत्वाद्विभागोऽपि शुक्लपक्षे स्यात्तदा कृष्णायां प्रतिपद्यारम्भः सिद्ध्येदेव । सत्यम्, विभागस्तावद्रागतः प्राप्तस्तत्र कालापेक्षाभावादापूर्यमाणादिनियमो न स्यादतो यदैव विभागस्तदैवाधानं, ततः प्रतिपद्यारम्भ इति युक्तम् । नन्वस्तु कृष्णपक्षे शुक्लपक्षे वा विभागः । आधानं तु शुक्लपक्षे एव कार्यम् । नैवम् । कालविलम्बे प्रमाणाभावाद्विभागोत्तरं कार्यमेव, ततो या प्रतिपदायाति तस्यामारम्भ इति । अत्र बहु वक्तव्यमस्ति, ग्रन्थगौरवभयान्नोच्यते । यद्यारम्भकाले सूतकमलमासपौषमासगुरुशुक्रास्तबाल्यवार्द्धकग्रहणादि भवति तदाऽपि प्रारम्भः कार्यः । यानि तु तत्रारम्भनिषेधकानि । "उपरागोऽधिमासश्च यादि प्रथमपर्वणि । तथा मलिम्लुचे पौषे नान्वारम्भणमिष्यते ॥ गुरुभार्गवयोर्मौढ्ये चन्द्रसूर्यग्रहे तथा" इत्यादीनि **सङ्ग्रहकारादि**वचनानि तानि आलस्यादिना स्वकालानुपक्रान्तस्थालीपाकादिप्रारम्भविषयकाणीति **प्रयोगपारिजातकारः प्रयोगरत्नकारश्च** । तथाचापरार्कस्थं **गर्ग**वचनमुदाजहार । "नामकर्म च दर्शेष्टिं यथाकालं समाचरेत् । अतिपाते सति तयोः प्रशस्ते मासि पुण्यभे" इति । **देवयाज्ञिकैस्तु** । "दर्शपूर्णमासानीजान" इति सूत्रव्याख्याने सूतकशुक्रास्तादिनिमित्तवशाद्दर्शपूर्णमासारम्भोत्कर्षे सति आग्रयणकाले आगते तदतिक्रमशङ्कायामयं प्रकार इत्युक्तम् । अतो याज्ञिकानामनभीष्टः शुक्रास्तादावारम्भ इत्याभाति । तथाच **त्रिकाण्डमण्डनः**—"आधानानन्तर पौर्णमासी चेन्मलमासगा । तस्यामारम्भणीयादीन्न कुर्वीत कदाचन ॥" इति । आचारोऽप्येवम् ।

विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्य आकाशाय च—द्रव्यान्तरानुपदेशात्स्थालीपाकादेव विश्वेदेवादिभ्यो बलित्रयमग्नेरुदक्प्राक्संस्थं कुर्यात्, बलिहरणवाक्ये च नमःशब्दोऽन्ते कार्यः । उक्तं चैतत् **कर्कोपाध्यायै**र्बलिहरणे च नमस्कार इति, पितृभ्यः स्वधा नम इति, दक्षिणत इति सूत्रव्याख्यानावसरे च, नमस्कारश्चात्र प्रदर्शित आचार्येण स सर्वबलिहरणेषु प्रत्येतव्य इत्युक्तम् । **वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहाऽग्नये स्विष्टकृते स्वाहेति**—वैश्वदेवस्येत्यवयवलक्षणा षष्ठी । विश्वेदेवा देवता देवपितृमनुष्यादय अस्येति वैश्वदेवः सर्वार्थः प्रत्यहं क्रियमाणः पाकस्तस्य वैश्वदे-

वस्याग्नये स्वाहेत्यादिभिर्मन्त्रैर्जुहोति । वैश्वदेवस्येति सिद्धवदुपदेशात् "द्वितीयः स्थालीपाको वैश्वदेवसमानतन्त्रः पक्षादिषु भवति" इति **भर्तृयज्ञभाष्ये**।—**कर्कोपाध्यायैस्तु** वैश्वदेवं केचित्पृथक्चरुं कुर्वन्ति यथा पौष्णस्य जुहोतीति पौष्णम् । तत्पुनरयुक्तम्, वैश्वदेवशब्देन विश्वेदेवा देवता अस्येति सर्वार्थः पाकोऽभिधीयते ततो जुहोतीत्युक्तं भवति । यत्तु पौष्णवदिति नहि पौष्णशब्दवाच्योऽन्यः कश्चिच्चरुर्भवति । तेनास्य पृथक्क्रिया । वैश्वदेवस्तु पुनः पाको विद्यत एवेति । तथाच वक्ष्यति "वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयात्" इतीत्युक्तम् । अग्नौ होमः प्राप्त एव पुनरग्नौ जुहोतीति अग्निग्रहणं बलिकर्माग्नौ माभूदिति अग्नये स्विष्टकृते स्वाहेति प्रयोगोपदर्शनार्थम्, प्राजापत्यश्चस्विष्टकृच्चेति प्रदेशान्तरे उक्तम् इह प्रयोग उपदर्श्यते । अपि च स्थालीपाकेन दर्शपूर्णमासदेवतादीनां होमविधानस्यावसरविधित्सयैतत् । तत्कथम् "प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः" इति प्रदेशान्तरे उक्तम्, तेन प्राङ्महाव्याहृतिहोमादाज्यभागोत्तरकालं चावसरोऽवगम्यत इति स्विष्टकृद्धोमश्च शेषादेव भवति । स्विष्टकृद्ग्रहणं वक्ष्यमाणस्य बलिहरणस्य प्राधान्यद्योतनार्थमिति **भर्तृयज्ञः** । परिभाषातः प्राप्तत्वात्स्वाहाकारग्रहणं बलिनिवृत्त्यर्थं, प्रदानार्थोऽपि स्वाहाकारो न बलिहरणेषु भवति । **बाह्यतः स्त्रीबलिꣳ हरति नमः स्त्रियै नमः पुꣳसे वयसेऽवयसे नमः शुक्लाय कृष्णदन्ताय पापीनां पतये नमो ये मे प्रजामुपलोभयन्ति पुꣳसे ग्रामे वसन्त उत वाऽरण्ये तेभ्यो नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददत्विति**—ततो बाह्यतः शालायाः बहिष्प्रदेशे "नमः स्त्रियै" इत्यादिमन्त्रैः प्रतिमन्त्रं स्थालीपाकात् स्त्रीबलिं स्त्र्यादिभ्यो बलिः स्त्रीबलिः तं हरति स्रुवेण मन्त्रान्ते भूमौ प्रक्षिपति, एतच्चागन्तुकत्वात्सर्वान्ते भवति । मन्त्रार्थः स्त्रियै सन्तानसुखविघातिन्यै नमः नमस्कारोऽस्तु, अतः सन्तानसुखेच्छवोऽत्र बाह्यबल्यधिकारिण इति **जयरामः** । तथा पुंसे उक्तस्वरूपायैव । किंभूताय वयसे अवयसे च वृद्धाय बालाय च शुक्लाय बहिः कृष्णदन्ताय असितान्तरङ्गावयवाय अतिमलिनमनसे इत्यर्थः। अतएव पापीनां पतये श्रेष्ठाय। दीर्घश्छान्दसः। अत्र बलित्रये पुमानेव विशिष्यते। ये च मे मम प्रजां सन्तानमुपलोभयन्ति मोहयन्ति ग्रामे वसन्तः उत अपि वा समुच्चये, अरण्ये वा वने वाऽपि तेभ्यो नमः नमस्कारोऽस्तु । एभ्यो बलिं पूजां हरामि समर्पयामि। मम नमस्कारबलिभ्यां यूयं सन्तुष्टा भवत। ततो भवतां प्रसादान्मम स्वस्ति कल्याणमस्तु । भवन्तश्च मे मह्यं प्रजां पुत्रादिसुखजातं ददतु प्रयच्छन्तु । **शेषमद्भिः प्रप्लाव्य ततो ब्राह्मणभोजनम्**—बलिहरणानन्तरं शेषं स्थालीपाकस्थितमवशिष्टं चरुमद्भिर्लौकिकोदकेन प्रलाव्य मज्जयित्वा ब्राह्मणभोजनं कुर्यात् । प्रणीतोदकेन प्राप्लवनमिति **वासुदेवादयः**। नेति **कारिकायाम्** । इति श्रीत्रिरचितसम्राट्स्थपति-श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वादशी कण्डिका ॥ १२ ॥

अथ **पदार्थक्रमः**। आधानानन्तरं प्रथमप्रतिपदि प्रातः स्नात्वाकृतनित्यक्रियो निर्णेजनान्तं वैश्वदेवं कृत्वा मातृपूजापूर्वकमाभ्युदयिकं कुर्यात्। ततः सङ्कल्पः देशकालौ स्मृत्वा ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं स्थालीपाककर्माहं करिष्ये । अत्र "आत्मनो ब्रह्मणः प्रणीतानां चासनचतुष्टयं कुशैः कुर्यात्" इति **हरिहरः**। तत्र प्रणीतार्थं द्वयम्, ततः ब्रह्मोपवेशनाद्याज्यभागान्त चरुसहितं कुर्यात्। तत्र विशेषस्तण्डुलानन्तरं वैश्वदेवान्नस्यासादनप्रोक्षणे । तत आज्यभागान्ते स्थालीपाकमभिघार्य स्रुवेण चरोर्होमः । अग्नये स्वाहा इदमग्नये न मम । उपांशु अग्नीषोमाभ्यां स्वाहा इदमग्नीषोमाभ्यां०। पुनः उच्चैः अग्नीषोमाभ्यां स्वाहा इदमग्नीषोमाभ्यां०। ब्रह्मणे स्वाहा इदं ब्र०। प्रजापतये स्वाहा इदं प्र०। विश्वेभ्यो देवेभ्यः स्वाहा इदं वि०। द्यावापृथिवीभ्याꣳ स्वाहा इदं द्यावा० । ततस्तेनैव चरुणाऽग्नेरुत्तरतः प्राक्संस्थं बलित्रयं कुर्यात्। विश्वेभ्यो देवेभ्यो नमः इदं विश्वेभ्यो देवेभ्यो न मम। भूतगृह्येभ्यो नमः इदं भू०। आकाशाय नमः इदमा०। "त्रयाणां बलिकर्मणां संस्रवरक्षणं न कार्यम्" इति **गङ्गाधरः** । "ततो वैश्वदेवान्नमभिघार्य तेन होमः । अग्नये स्वाहा इदमग्नये नमम । प्रजापतये स्वाहा इदम्प्र०। विश्वेभ्यो देवभ्यः स्वाहा इदं वि०। चरोर्वैश्वदेवान्नस्य च होमः। अग्नये स्विष्टकृते स्वाह इदमग्नये स्विष्टकृते न मम । तत आज्येन भूराद्या नवाहुतयः। प्राशनम्, मार्जनम्, पवित्रप्रतिपत्तिः । प्रणीताविमोकः, दक्षिणादानम्, ततः स्थालीपाकेन शुद्धायां भूमौ बहिः स्रुवेण बलिहरणम्, ॐ नमः स्त्रियै इदं स्त्रियै नमः, नमः पुꣳसे वयसेऽवयसे इदम्पुꣳसे० । नमः शुक्लाय कृष्णदन्ताय पापीनां पतये इदं शु०। नमो ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्यः इदं ये मे प्र० नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददतु इदमेभ्यः इति त्यागः" इति **हरिहरः** । इदं स्त्रियै पुꣳसे वयसेऽवयसे शुक्लाय कृष्णदन्ताय

पापीनां पतये ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वाऽरण्ये तेभ्यश्च न ममेति **गङ्गाधरकारिकाकारौ** । शेषमद्भिः प्रप्लाव्यैकब्राह्मणभोजनं कारयेत् । इति **पौर्णमासस्थालीपाकः** । अथ दर्शे विशेषः । तत्राधानानन्तरं याऽमावास्या आयाति तस्यां त्रेधाविभक्तदिनतृतीयांशे परमक्षये पिण्डपितृयज्ञः कार्यः । "तस्मिन् क्षीणे ददाति" इति श्रुतेः । चन्द्रक्षयश्च यद्यपि कृष्णपक्षे प्रत्यहं भवति तथापि परमक्षयोऽत्र विवक्षितः । स चामान्ते शास्त्रोक्त इति दिनद्वयेऽप्यपराह्णैकदेशव्याप्तौ सत्यां परादिनेऽर्द्धघटिकामात्रपरिमितामालाभेऽपि तत्रैव पिण्डपितृयज्ञानुष्ठानमुचितम्, एकस्मिन्नेव दिनेऽपराह्णव्याप्तौ तु यस्मिन्नेव दिनेऽपराह्णव्याप्तिस्तत्रैव तदनुष्ठानम् । एवं च पिण्डपितृयज्ञकालस्य वाजसनेयिशाखायामुपदेशाद्यागकालस्यानुपदेशात्पिण्डपितृयज्ञादिनात्परदिने यागः कार्यः । पूर्वेद्युः पितृभ्यो निष्क्रीय "प्रातर्देवेभ्यः प्रतनुत" इति **कर्कोदाहृतशाखान्तरीयश्रुतेः** । "पूर्वो वाऽङ्गत्वात्पिण्डपितृयज्ञः" इति सूत्राच्च । यद्यपि चन्द्रदर्शने यागनिषेधः स्मर्यते—"द्वितीया त्रिमुहूर्त्ता चेत्प्रतिपद्यापराह्णिकी । अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात्" इत्यादिना तथाप्युक्तन्यायेन वाजसनेयिनां पिण्डपितृयज्ञः परदिन एव । चन्द्रदर्शनवत्यपि यागानुष्ठानस्योचितत्वाद्वाजसनेयिव्यतिरिक्तविषयत्वेन पूर्वाह्णमध्याह्नसन्धिविषयत्वेन वा निषेधो नेतव्यः । नचास्य दर्शाङ्गत्वादनाहिताग्नेरेष न भवतीति वाच्यम्, "अनाहिताग्नेरप्येषः" इत्युक्तत्वात् । अयं च मृतपितृकस्यैव भवति अत्र "मातृकापूजनपूर्वकमाभ्युदयिकं कार्यम्" इत्युक्तं **गङ्गाधरेण** । अत्र सर्वकर्मापसव्येन दक्षिणामुखेन कार्यम् । अत्रैवं **पदार्थक्रमः** । प्राचीनावीतिकरणम्, नीविबन्धनम्, तच्च कुशतिलसंयुक्तानां वस्त्रदशानां सव्यभागे परिहितवस्त्रेण संवेष्ट्यावगूहनमिति **देवयाज्ञिकाः** । नीविं परिहितमध्येऽवगूहितवस्त्रप्रान्तं विस्रंस्येति, "नीविं विस्रंस्य" इति सूत्रव्याख्याने **श्रीअनन्तयाज्ञिकाः** । "न नीविं कुरुत" इत्येतद्व्याख्याने नीविपरिधानदार्ढ्यार्थं प्रदेशान्तरे प्रदेशान्तरावगूहनमित्युक्तम् **श्रीअनन्तैः** । 'नीविं कुरुते सोमस्य नीविः' इत्यत्र च नीविरपवर्तिकेति **कर्कादयः** । सर्वसूत्रव्याख्यावलोकने प्रदेशान्तरे प्रदेशान्तरावगूहनमेवायाति । " नीविं वासोदशान्तेन स्वरक्षार्थं प्रबन्धयेत् " इत्याश्वलायनः । वेदिश्रोणिसन्नहनावच्छादनवाक्यशेषो दक्षिणत इव हीयं नीविरिति । "दक्षिणे कटिदेशे तु तिलैः सह कुशत्रयम् " इति **वृद्धयाज्ञवल्क्यः** । " नीवी कार्या दशागुप्तिर्वामकुक्षौ कुशैः सह " इति यत्कात्यायनवचनं तद्वृद्धिश्राद्धे । " पितॄणां दक्षिणे पार्श्वे विपरीता तु दैविके " इति **स्मृत्यन्तरात्** । " वामे दक्षिणे वेत्याचाराद्व्यवस्था " इति **प्रयोगपारिजाते** । ततोऽग्नेर्दक्षिणसंस्थमपसव्यं परिस्तरणम्, अग्नेः पश्चादुत्तरतो वा दक्षिणसंस्थं दक्षिणाग्राणां पात्राणामेकैकेनासादनम् न द्विशः । स्रुक्, उलूखलमुसलम्, शूर्पम्, चरुस्थाली, उदकम्, आज्यम्, मेक्षणम्, वज्रम्, उदपात्रम्, सकृदाच्छिन्नानि, व्रीहयः, सूत्राणि, च ऊर्णा वा वस्त्रदशा वा । स्थाल्यां ग्रहणपक्षे पूर्वं तस्या आसादनम् न स्रुचः, अपरेणाग्निं चरुमपूर्णं स्रुचं वा गृह्णाति, ततोऽग्नेरुत्तरत उलूखले व्रीहीनोप्य तिष्ठतोऽवहननम्, शूर्पे न्युप्य निष्पवनम्, सकृत्फलीकरणम्, अपूर्णस्य चरोः सारतण्डुलस्य श्रपणम्, अभिघारणम्, दक्षिणेनोद्वासनम्, अपसव्येनाहरणम् । ततो दक्षिणामुख एवाहुतिद्वयं जुहोति । ॐ अग्नये कव्यवाहनाय स्वाहा इदमग्नये क० । सोमाय पितृमते स्वाहा इदं सोमाय पि० । अग्नौ मेक्षणप्रासनम्, अग्निमपरेण दक्षिणेन वा "अपहता" इति स्फ्येन दक्षिणसंस्थां लेखां कुर्यात् । ये रूपाणीति परस्तादुल्मुककरणम्, लेखायां पितृप्रभृतित्रिभ्योऽवनेजनम्, पितः असुक अवनेनिक्ष्वेति रेखामूले, पितामह अवनेनिक्ष्वेति रेखामध्ये, अमुक प्रपितामह अवनेनिक्ष्वेति रेखान्ते । सकृदाच्छिन्नानि लेखायां कृत्वा यथाऽवनिक्तं पिण्डदानम्, पितरमुक एतत्ते अन्नमिति मन्त्रेण रेखामूले पिण्डदानम् , पितामह असुक एतत्ते अन्नमिति रेखामध्ये, प्रपितामह अमुक एतत्त अन्नमिति रेखान्ते । "अत्र पितर" इति जपः, अपसव्येनोदङ्ङावर्तनम्, आतमना*त्तिष्ठेत् पुनस्तेनैव "अमीमदन्त" इति जपः । पूर्ववदवनेजनं पिण्डानामुपरि । नीविविस्रंसनम् । "नमो वः" इत्यञ्जलिकरणं षड्भिः प्रतिमन्त्रम् । "गृहान्नः" इति जपः । सूत्रादीनामन्यतमस्य प्रदानम् "एतद्वः" इति प्रतिपिण्डम् । ऊर्जमिति पिण्डानामुपरि उदकनिषेकः, उखायां पिण्डावधानम् , अवघ्राणम् सकृदाच्छिन्नावधानमग्नौ उल्मुकस्य च । पुत्रकामाया ऋतुमत्याः पत्न्या मध्यमपिण्डस्य प्राशनम्, तस्मिन्पक्षे अनवघ्राणं यजमानस्य । उदकोपस्पर्शनम् ततः । पार्वणश्राद्धमिति **पदार्थक्रमः** । ततः श्वः प्रतिपादि ब्रह्मोपवेशनाद्याज्यभागान्तं कृत्वा स्थालीपाकेनाग्नये स्वाहा, विष्णवे स्वाहा, इन्द्राग्निभ्यां स्वाहेति दर्शदेवताभ्यो हुत्वा ब्रह्मणे स्वाहेत्यादिब्राह्मणतर्पणान्तं पूर्व-

---

* आतमनादिति ग्लानिपर्यन्तमित्यर्थः ।

वत्कुर्यात्। सर्वत्र पूर्वं स्थालीपाकः पश्चाद्वैश्वदेवः। तदुक्तं **कारिकायाम्** "अकृते वैश्वदेवे तु स्थालीपाकाः प्रकीर्तिताः। अन्यत्र पितृयज्ञात्तु सोऽपराह्णे विधीयते॥" प्रथमायां प्रतिपदि तु आभ्युदयिकात्पूर्वं कार्यं इति तत्रैवोक्तम् । **गर्गमते** तु "पिण्डपितृयज्ञे चरोरुद्वासनान्ते तिसृणां समिधामग्नौ प्रक्षेपः,यज्ञोपवीती भूत्वाऽग्नौ होमः एतत्ते अन्नमिति नाध्याहारः" इति विशेषः । अथ **गर्गमते** स्थालीपाके विशेषः । प्रथमप्रयोगे पौर्णमास्यां मातृपूजा श्राद्धपूर्विकाऽन्वारम्भणीया। ब्रह्मासनाद्याज्यभागान्तं पूर्ववत्। ग्रहणे अग्नाविष्णुभ्यां सरस्वत्यै सरस्वते जुष्टं गृह्णामीति ग्रहणम्। प्रोक्षणे त्वाधिकः। आज्यभागान्ते चरुहोमः । अग्नाविष्णुभ्यां स्वाहा, सरस्वत्यै स्वा०, सरस्वते स्वा०,अग्नये स्विष्टकृते स्वा० । महाव्याहृत्यादिब्राह्मणभोजनान्तम् । ततो वैश्वदेवः। ततः श्वोभूते ब्रह्मोपवेशनाद्याज्यभागान्ते विशेषः। चरुस्थालीद्वयम् । ग्रहणे अग्नये अग्नीषोमाभ्यामग्नीषोमाभ्यां ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां जुष्टम्, अग्नये प्रजापतये विश्वेभ्यो देवेभ्यो जुष्टमिति द्वितीयचरुग्रहणम्। प्रोक्षणे त्वाधिकः । आज्यभागान्ते पूर्वचरुणा हुत्वा तेनैव बलिहरणम्। ततो वैश्वदेवस्याग्नौ जुहोतीत्यादिवैश्वदेवचरुणा उभयोः स्विष्टकृद्धोमः।ततो बाह्यतः स्त्रीबलिहरणम्।पञ्चमन्त्रैः द्वितीयचरुशेषेण बलिहरणम् । शेषमद्भिः प्रप्लाव्य महाव्याहृत्यादिप्राजापत्यान्तम्, संस्रवप्राशनम् ब्राह्मणभोजनान्तम्,तदनन्तरं चरुशेषेणैव वैश्वदेवः । अमावास्यापक्षादिषु कर्मविशेषः । तत्र ग्रहणे प्रोक्षणे होमे चाग्नेरनन्तरं विष्णुः इन्द्राग्नी च शेषं पौर्णमासवत् । 'कृतसोमस्य यजमानस्याग्नेरनन्तरमग्नीषोमौ इन्द्रश्च भवति' इति **गर्गमते** विशेषः । स्वकाले स्थालीपाकपिण्डपितृयज्ञयोरकरणे विशेष उच्यते । "पक्षादिः पिण्डयज्ञादि प्रमादादकृतं यदि । प्रायश्चित्तं ततो हुत्वा कर्तव्यं तद्दिनान्तरे ॥" पिण्डपितृयज्ञस्तु अमादिन एव भवति न दिनान्तरे, अमायामननुष्ठाने प्रायश्चित्तत्वेन वैश्वानरश्चरुरेव न पिण्डपितृयज्ञः । तथाच **कात्यायनः** "परेणाग्नौ हुते स्वार्थं परस्याग्नौ हुते स्वयम् । पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च ॥ अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा । भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् ॥" अनाहिताग्नेश्चरुः, आहिताग्नेस्तु इष्टिरेव । **कारिकायाम्**—"मुख्यकाले यदा न स्यात्पौर्णमासः कथञ्चन । कृत्वाऽनादिष्टमा दर्शात्कर्तव्यो यत्र कुत्रचित्॥ दर्शात्प्राक्स न वा चेत्स्याद्दर्शेन सह तत्क्रिया । यदि दर्शोऽप्यतिक्रान्तस्तदा पथिकृती भवेत् ॥" अत्रापि चरुरेवानाहिताग्नेः । 'य एवाहिताग्नेः पुरोडाशास्ते एवानाहिताग्नेश्चरवः' इत्युक्तत्वात् ॥ "एवं दर्शोऽतिपन्नः प्राक्पौर्णमासान्न चेत्कृतः । पितृयज्ञं विना सोऽपि कर्तव्यो यत्र कुत्रचित् ॥ न पौर्णमासतन्त्रे स्याद्दर्शो भिन्ने प्रयोगतः । पौर्णमासेऽप्यतिक्रान्तेऽतिपत्तिः पथिकृत्तदा"॥ १२ ॥

विश्व०-। पक्षादिषु……पृथिवीभ्यामिति—पक्षाणामादयः पक्षादयः तेषु प्रतिपत्सु । अत्र प्रतिपन्निर्णयस्य पौर्णमास्यमावास्यानिर्णयाधीनत्वेनाऽमावास्यापौर्णमास्यौ निर्णीयेते । तत्र समग्रयोरुपोष्यतायां तदुत्तरदिने पक्षादिकर्तव्यतायां न संदेहः। खण्डितयोस्तु मध्याह्नात्प्राक्चेत्पर्वप्रतिपत्संधिः तदा पूर्वदिनमुपोष्यं संधिदिने पक्षादिः। मध्याह्नोत्तरं यदा संधिस्तदा तद्दिनमुपोष्यं तदुत्तरदिने याग इति । तत्र प्रतिपदि प्रातः प्रतिपच्चतुर्थांशो दूषणं साधारणम्। अमावास्यायाः प्रतिपदि तु चन्द्रदर्शनं षण्मुहूर्तादूनो यागकालश्चाधिकं दूषणम्। नच प्रतिपद्यापराह्णिकद्वितीयोपरागोऽपि प्रतिपद्दूषणमिति वाच्यम्, तस्य चन्द्रदर्शनाधायकत्वेनैव दूषणत्वात्। अत एवोक्तं "परतः सोमदर्शनादिति, ननु द्वितीयोपरागात्" इति। नच द्वितीयासहितं यस्मादित्यादौ द्वितीयोपरागस्यापि दूषकत्वप्रतीतेर्द्वितीयासंबन्धोऽपि दूषकः, अन्यथा चन्द्रदर्शनस्यैव द्वितीयोपरागाधायकत्वेन दूषकत्वस्य सुवचत्वादिति वाच्यम्, चन्द्रदर्शनस्य श्रुतौ सूत्रे च दूषकत्वं निश्चितम्, तथाच तदाधायकत्वेनैव द्वितीयासंबन्धस्यापि दूषकत्वोपपत्तौ किमर्थं साक्षाद् दूषकत्वं कल्प्यम्। किंच द्वितीयासंबन्धस्य प्रतिपद्यापराह्णिकस्य दूषकत्वे नाडीमात्रात्मकद्वितीयासंबन्धोऽपि प्रतिपदं दूषयेत्। वाक्यान्तरमर्यादया त्रिमुहूर्तात्मक इति चेत् तर्हि तन्मर्यादयैव चन्द्रदर्शनाधायकतया दूषक इति निर्व्यूढम्। तथाच यथोपाधिर्व्याप्तिविरहमाधाय सत्प्रतिपक्षं चोत्थाप्यानुमानं दूषयति, तद्वत्प्रतिपद्यपराह्णाधिकरणकद्वितीयासंबन्धोऽपि प्रतिपदं दूषयतीति युक्तमुत्पश्यामः। अत एव प्रतिपदो यजनीयताप्रतिबन्धिका त्रिदोषीति **कालनिर्णयकाराः**। एवं च 'यज्ञकालस्तिथिद्वैध' इत्यत्र मुहूर्तं कलापदार्थः। कस्य हेतोरिति चेत् न, उपोष्यताप्रयोजकधर्मावच्छिन्नदर्शकालादिनिर्णायकवाक्यानां स्वतात्पर्यविषयीभूतनिर्णेतव्योपपत्तये पक्षादिकर्तव्यताबोधकशास्त्रैकवाक्यतापन्नशास्त्रसमर्पितचन्द्रदर्शनादिदूषणाक्रान्तं समयं यथासंभवमपवदितुं कलापदार्थो मुहूर्तमिति **कालनिर्णयकाराः**। नच विवक्षयापि दूषणानपवादानाऽपेव कलापदार्थ इति वाच्यम्, समयावाह्या प्रतिपक्षपक्षाणां सावकाशतापत्तेः। विवक्षया च काले कवलिते न सावकाशाः प्रतिपक्षपक्षा इत्येकं विवक्षाफलम्। नन्वेवं विवक्षया चोद्विपक्षा विपक्षा जायन्ते दूषणं चापहरयेत तर्हि सार्वकालिकदूषणापहवक्षमविवक्षया तादृशदूषणापवादे का हानिः? न कापि। तर्हि तथैव किं न क्रियत इति चेन्न, "त्रिमुहूर्ता द्वितीया" इत्यादिवाक्यानां तात्पर्यविषयीभूतप्रकृतपदा-

र्थसंसर्गाप्रतिपत्तिहेतुत्वेन प्रामाण्यव्याकोपापत्तेः। यदुक्तं **याज्ञिकचरणैः** स्वभाष्ये-"त्रिमुहूर्ता द्वितीया" इत्याद्यनुरोधादिति। अत एव षण्मुहूर्तोनयागकालस्य चन्द्रदर्शनाधायकत्वेन दूषकतायामपि स्वतन्त्रदूषणत्वानभ्युपगमवादः। अत एव **देवयाज्ञिकै**स्तथैव व्याहृतं स्वभाष्ये। तथाचापचीयमानामावास्यायाः दिवसावच्छेदेनावसितायाः प्रतिपदि यदि प्रातः स्वचतुर्थांशाभावः, षण्मुहूर्तात्मा यागकालः, चन्द्रदर्शनाभावश्चैतत्त्रयं चेत्स्यात् तदा तस्यां यागः । नोचेच्चतुर्दश्यवच्छिन्नायां व्रतं दिवसावच्छेदेनोपरतामावास्यायां याग इति **कालनिर्णयकाराः**। एवं च चतुर्थीक्षयाऽन्यथानुपपत्त्या चतुर्विंशतिसंख्यनाड्यवच्छिन्नामावास्याक्षयमारभ्य चतुर्थीप्रतियोगिकनिःशेषक्षयवशाच्चतुर्थीदिनं पञ्चमी यत्र व्याप्नोति तत्र, पञ्चमी यत्र संपूर्णेत्यादियागकर्तव्यताप्रतिपादकवाक्यानां प्राङ्निर्णीतापचीयमानामावास्याविषयत्वमेव । न च "चरुरिष्टिः" इत्यादिना शुद्धायामेव यागकर्तव्यत्वावगमात्किमर्थं प्रतिपत्संबन्धाद्यपेक्षेति वाच्यम्, अर्थापत्तेः सर्वबलाधिकत्वात् । तदुक्तं **कालनिर्णयदीपिकायाम्**—"सायात्प्रागपि पर्वणः प्रतिपदश्चान्ते द्वितीयाप्रभृत्यत्यन्तापचये तिथेर्यजिरमावास्यादिनेऽत्र स्मृतः" इति । न चात्यन्तापचयादिपदकदम्बप्रतिपाद्यार्थसंसर्गस्य 'चतुर्दशीचतुर्यामे' इत्यादिवाक्यार्थभिन्नविषयतैव। अन्यथा यदा चतुर्दशीत्यादिवाक्यानामर्थैक्यापत्तेरिति वाच्यम्, एकार्थानेकशब्दश्रवणादर्थभेदे पदभेदस्याकरणतेव वाक्यार्थभेदं प्रत्यपि पदार्थभेदस्याहेतुत्वात्। यदा चतुर्दशीत्यादावर्थैक्यं वक्ष्यते । एवं चानेकवाक्यानामप्यन्योऽन्यसाचिव्यादेकवाक्यतायां संभवन्त्यामनेकार्थाभ्युपगमस्याऽन्याय्यत्वात्। अन्यथा यथाकथंचिदर्थभेदावाप्तौ तदभ्युपगमेऽनन्तामावास्या स्यादिति। तदुक्तचतुर्दशीचतुर्याम इति वाक्ये श्वोभूते इत्यस्यार्थोऽमावास्यायां चतुर्थयाम एव चेत्प्रतिपत्तदा भूते चतुर्दश्यां दिवसावच्छेदेनामयानुपरक्तायामपि कव्यादिकी पिण्डपितृयज्ञाऽग्न्यन्वाधानादिकीत्यर्थः। ननु यदा चतुर्दशीत्यादिवाक्यैकवाक्यतानुरोधाच्चतुर्दश्यां चतुर्थयामैकदेशावच्छेदेनामावास्यासंसर्गोपपत्तये चतुर्दशीचतुर्याम इत्यत्र न दृश्यत इत्यस्य किंचिदवच्छेदभेदेन दृश्यत इत्यर्थो वाच्यस्तथा चामयोपरक्तायामेव चतुर्दश्यां कव्यादिकी क्रियेति चेत् न, लक्षणापत्तेः। इतरवाक्यैकवाक्यतानुरोधात्तदभ्युपगमे यदा चतुर्दशीत्यस्मिन्नपि तृतीयमनुपूरयन्ती तुरीयमनुपूरयेदित्येवमाकाराध्याहारेणाऽर्धे चतुर्दशीति वाक्यैकवाक्यतालाभात्तस्यापि कर्तव्यतापत्तेः। एककर्तृकानेकवाक्यानामेकार्थत्वेऽन्यतरव्यर्थतापत्तेश्च । नचैतत्पक्षान्तरेऽपि समानमेककर्तृकत्वानभ्युपगमात्। अन्यथा समानार्थसकलवाक्यविलोपापत्तेः । एवं चोपचयिमानामावास्यायां यामत्रयान्यूनसमयगामिन्यामपि व्रताग्न्यन्वाधानादिकम्, यदि प्रतिपदि प्रातः प्रतिपच्चतुर्थांशाभावः, षण्मुहूर्तात्मा यागकालः, चन्द्रदर्शनाभावश्च, नो चेत्तत्रापि चतुर्दश्यामेव व्रतं संधिदिने याग इति। तदुक्तं **कालनिर्णयदीपिकायां**–"प्रातिपदस्त्वन्त्योऽङ्घ्रिरिन्द्वीक्षणं स्याच्चेत्तत्र तदादिमेऽह्न्यविहितेऽप्यंशे यजेत्पर्वणः।" पौर्णमासीप्रतिपदि तु त्रिमुहूर्तात्मनोऽपि यागकालस्य लाभे यष्टव्यम्। तथाच तत्र प्रतिपच्चतुर्थांशस्याद्यास्तस्याश्चतुर्थोऽपीत्यादियागीयताबोधकं शास्त्रं सावकाशम्। नचैवं **कालनिर्णयकाराणामपि** सिद्धान्तः । केवलस्य प्रतिपच्चतुर्थांशस्य यागीयतानिषेधेऽपि तृतीयांशावच्छिन्नस्य तस्य तेषामप्यभ्युपगमात्, अन्यथा विधिनिषेधशास्त्रयोर्विषयभेदमन्तरा प्रवृत्तेरशक्यत्वात्। नहि येन रूपेण यद्विहितं तेनैव रूपेण तन्निषेद्धुं शक्यम्, न वा येन रूपेण यन्निषिद्धं तेन रूपेण तद्विधातुं शक्यं, यथाऽपराह्णे विहितं श्राद्धं रात्रौ निषिद्धं पुनश्चन्द्रोपरागे विधीयते तथा प्रकृतेऽपि न यष्टव्यमित्यादिशास्त्रनिषिद्धस्य प्रतिपच्चतुर्थांशस्याद्यास्तस्याश्चतुर्थोऽपीत्यादिना रूपान्तरमन्तरा विधातुमशक्यतया तृतीयांशावच्छिन्नश्चतुर्थांशोऽप्युपादेय इत्यवसीयते। यत्र तु प्रातःसमयावच्छिन्नदिवसद्वयेऽपि क्रतुकालः प्रतीयते तत्र पूर्वदिवसस्य समग्रस्यैव यागीयकालावच्छिन्नत्वात्पूर्वदिवसे याग इति। यत्र तु दिनद्वयेऽपि यागकालो न लभ्यते तत्रापि प्रातःसमयाधिकरणकयागकालालाभेऽपि संगवाद्यधिकरणकप्रचुरतरयागकाललाभादपचयवशादुत्तरदिने च यागकालात्यन्ताभावात्पूर्वदिने यागः,एवं चोपचयवशाद्यत्रोत्तरदिने प्रातःसमयावच्छिन्नस्या त्यन्ताभावः तत्र तृतीयांशावच्छिन्नस्य चतुर्थांशस्यापि यागीयतया तत्रोत्तरदिने याग इति **कालनिर्णयकाराः** तदुक्तं। **कालनिर्णयदीपिकायां**—"प्रातर्यद्यपराह्णसंधिषु यजेः कालो द्व्यहे स्यात्तथा नैव स्यादुभयत्र पूर्वदिवसे यागस्तदापीष्यते" इति । ननु सामान्यवाचिनां न विशेषपरता सामान्ये प्रमाणपक्षपातादिति चेत् न, चन्द्रदर्शनस्य तावद्यामावास्येत्याद्युपक्रम्य दूषणत्वावगमाद्दर्शप्रतिपद्दूषकत्वमेव। आपराह्णिकद्वितीयोपरागषट्कालन्यूनयागकालयोरपि चन्द्रदर्शनाधायकत्वेनैव दूषकत्वोपपादनात्तयोः पौर्णमासप्रतिपदि निरवकाशता। नच पौर्णमासप्रतिपद्यपि चन्द्रदर्शनं दूषणमिति वाच्यम्, "एष एव पूर्णमापचन्द्रमा एतस्य ह्यनुपूरणं पौर्णमासीत्याचक्षते" इत्यादिश्रुत्यर्थपर्यालोचनया चन्द्रपूरणमुपजीव्य पौर्णमासप्रवृत्तेस्तस्यैव तद्दूषकत्वे पौर्णमासस्य नित्यमननुष्ठानापत्तेः। अत एवाद्यकलाक्षयोऽपि न दूषक इति ध्येयम्।एवंच चन्द्रक्षयमुपजीव्य दर्शस्य प्रकृतत्वेऽप्याद्यकलोपचयस्तत्रापि न दूषणं दर्शस्यापि नित्यमननुष्ठानापत्तेः। एवं चन्द्रदर्शनस्यामावास्यायामेव दूषणत्वात्तदाधायकदूषणोपरागो न पौर्णमासकर्तौ। तथाच सामान्यवाचकानामपि बलवद्बाधकाद्विशेषपरतैवेति सर्वं समञ्जसम्। प्रतिपन्निर्णायकवाक्येषु श्रूयमाणापराह्णपदं द्विधाविभक्तदिनोत्तरकालवाचकम् **कालनिर्णयकारमते**। अपि च यत्र निर्णायकवाक्याहितसंशयकोटौ क्वाप्यौत्कट्यं नोपल[illegible] दिवसद्वयेऽपि प्रतिपच्चतुर्थांशादिदूषितं तदा पञ्च-

दशमुपादेयम् । एवं वृद्धिवशात्षोडशाह्नो यागीयताऽनवगमस्तत्र सप्तदशे यागः । तदेतदुक्तं—पञ्चदशेऽपीत्यनुक्तसमुच्चयार्थेनापिना साधितं च “दिननाशो यदा भवेत्” इत्यनेन । तथाच सप्तदशेऽपि यष्टव्यं दिनवृद्धिर्यदा भवेदित्यर्थः । एवं च दिनयोर्नाशे चतुर्दशेऽपि यष्टव्यम् । अत एवाधिकरणं भेदयन्निर्णयान्तरं रचयन्नाह **वार्तिककारः**–“सर्वव्याख्याविकल्पानां द्वयमेव प्रयोजनम् । पूर्वत्रापरितोषो वा विषयव्याप्तिरेव वा” इति ।तेन विषयव्याप्त्यर्थमनुक्तसमुच्चयार्थ.एवायमपिशब्दः । निन्दार्थवादस्तु “मुख्ये लभ्यमाने जघन्यस्याऽनुपादेयतायोजनार्थम्” इति **कालनिर्णयकारः** । अन्ये तु चतुर्दश्यवच्छिन्नायां चतुर्दश्यष्टमांशविरहप्रयुक्तचन्द्रदर्शनसंभवेनोत्तरदिने चापराह्णावच्छिन्नामावास्यालाभे तस्यां व्रतम् । उत्तरदिने प्रतिपदि षट्कलस्य ततो न्यूनस्य यागकालस्य संभवे चन्द्रदर्शने सत्यपि याग इति । तन्मते चन्द्रदर्शननिषेधस्य पूर्वाह्णमध्याह्नान्यतरकाले पर्वसंधौ प्रमादाच्चन्द्रदर्शनदिने यागानुष्ठानविषयता । प्रतिपद्यापराह्णिकद्वितीयोपरागश्च पञ्चधाविभक्तस्याह्नश्चतुर्थांशात्मकाऽपराह्णः परभागः । षट्कल इत्यत्र कलापदार्थो घटिका स्वतात्पर्यविशेषवशात् । तदनुरोधाच्चतुर्दशीचतुर्याम इत्यादिवाक्यान्यध्याहारेण योजयन्ति । चन्द्रदर्शनस्य काचित्कीं दूषणतां मन्यन्त इति चिन्त्यम् । ‘चन्द्रप्रतियोगिकनिविडक्षयावच्छिन्नसमयप्रत्यासन्नतरापराह्णायास्तिथेरुपोष्यत्वम्’ इति **हरिस्वामिनः** । केचित्तु संशयस्थले उत्तराया एवोपोष्यत्वम् “उत्तरामुपवसेदनिर्ज्ञायेति श्रवणात्” इत्याहुः । “मध्याह्नात्प्रागपि पर्वप्रतिपत्संधौ सा पौर्णमास्युपोष्या” इति **वाजसनेयिनः** । तदुक्तम्—“आवर्तनादधः संधिर्यद्यन्वाधाय तद्दिने । परेद्युरिष्टिरित्याहुर्विप्रा वाजसनेयिनः ॥” तथा—“संधिश्चेत्संगवादूर्ध्वमर्वागावर्तनाद्भवेत् । सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिः” इति । अथ साधारणवाक्यानि पर्वद्व (विष) ये **कालादर्शः**—“पर्वप्रतिपदोः संधिर्मध्याह्ने पूर्वतोऽपि वा । अन्वाधानं पूर्वदिने तद्दिने याग इष्यते ॥ परतश्चेत्परत्रेष्टिस्तद्दिनेऽन्वाहितिर्भवेत् ।” **गोभिलः**—“आवर्तने यदा संधिः पर्वप्रतिपदोर्भवेत् । तदहर्याग इष्येत परतश्चेत्परेऽहनि ॥ पर्वप्रतिपदोः संधिरर्वागावर्तनाद्यदि । तस्मिन्नहनि यष्टव्यं पूर्वेद्युः स्यादुपक्रमः ॥” **लौगाक्षिः**–“पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समाप्यते । उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते ।” **गोभिलः**—“आवर्तनात्परः संधिर्यदि तस्मिन्नुपक्रमः । परेद्युरिष्टिरित्येष पर्वद्वयविनिर्णयः ॥” **लौगाक्षिरपि**—“अपराह्णेऽथवा सायं यदि पर्व समाप्यते । उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते ॥” अपराह्णेऽथवा रात्राविति क्वचित्पाठः । एतावत्पर्वद्वयसाधारणम् । तथा–“संकृष्टे च विकृष्टे च यष्टव्यं षोडशेऽहनि । पञ्चदशेऽपि यष्टव्यं दिननाशो यदा भवेत्” इति । पर्वावसानज्ञानोपायः । **लौगाक्षिः**—“तिथेः परस्या घटिकास्तु या स्युर्न्यूनास्तथैवाभ्यधिकाश्च तासाम् । अर्धं प्रयोज्यं च तथा वियोज्यं ह्रासे च वृद्धौ प्रथमे दिने तत्” इति । **कात्यायनः**—“परेऽह्नि घटिका न्यूनास्तथैवाभ्यधिकाश्च याः । क्षिप्त्वा तदर्धं पूर्वस्मिन् ह्रासवृद्धी प्रकल्पयेत्’ इति । अथ **यागकालः** । **याज्ञवल्क्यः**—“पञ्चदश्याः परः पादः पक्षादेः प्रथमास्त्रयः । कालः पार्वणयागे स्यादन्यथा तु न विद्यते ॥” **वृद्धशातातपः**—‘पर्वणो यश्चतुर्थोऽश आद्याः प्रतिपदस्त्रयः । यागकालः स विज्ञेयः प्रातर्युक्तो मनीषिभिः” इति । तथा–“चतुर्थः पर्वणो योंऽशो येंऽशाः प्रतिपदस्त्रयः । आद्यास्तस्याश्चतुर्थोऽपि यागकाल उदाहृतः” इति । “संधिर्यद्यपराह्णे स्याद्यागं प्रातः परेऽहनि । कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यति” इति । निषेधोऽपि–“न यष्टव्यं चतुर्थेंऽशे यागैः प्रतिपदः क्वचित् । रक्षांसि तद्विलुम्पन्ति श्रुतिरेषा सनातनी” इति । उक्त एव न्यायोऽत्रानुसर्तव्योऽन्यथा वस्तुनो द्वैरूप्यापत्तेः । विधिनिषेधाभ्यामतिरात्रे षोडशीवन्नापि विकल्पः । विषयभेदोपपत्तौ तस्यान्याय्यत्वात् । पौर्णमास्यां **भाष्यार्थसंग्रहकारः**—“अपराह्णेऽथवा रात्रौ यदि पर्व समाप्यते । उपोष्या तत्र राका स्यात्सा पूर्णोत्सर्पिलक्षणा ॥ पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समाप्यते । उपोष्याऽनुमतिस्तत्र सा श्वःपूरितलक्षणा ॥” अथाऽमावास्यायां विशेषः—“यदा चतुर्दशी यामं तुरीयमनुपूरयेत् । अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते ॥” **यज्ञपार्श्वः**—“अर्धे चतुर्दशी यत्र परे पञ्चदशी भवेत् । चतुर्दश्यवसाने तु पितृयज्ञं तु कारयेत् ॥” **हारीतः**:—“यस्यां संध्यागतः सोमो मृणालमिव दृश्यते । अपराह्णे क्षयस्तस्यां पिण्डानां करणं स्मृतम्” ‘यदैवैष न पुरस्तान्न पश्चाद्दृशेऽथैभ्यो ददाति’ इति **श्रुतिः** । **चन्द्रक्षयकालः**–“अष्टमेंऽशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः । अमावास्याष्टमांशे च पुनः किल भवेदणुः ॥ यच्चोक्तं दृश्यमानेऽपि तच्चतुर्दश्यपेक्षया । अमावास्यां प्रतीक्षेद्वा तदन्ते वापि निर्वपेत् ॥” इति । **वृद्धवसिष्ठः**—“इन्दौ निरस्ते हविषि पुरस्तादुदिते विधौ । यद्वैगुण्यं हुते तस्मिन् पश्चादपि हि तद्भवेत्” इति । तथा–“त्रिमुहूर्ता द्वितीया चेत्प्रतिपद्यापराह्णिकी । अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात्” इति । तथा–“पञ्चमी यत्र संपूर्णा द्वितीया क्षयगामिनी । चरुरिष्टिरमावास्यां भूते कव्यादिकी क्रिया” इति । तथा—“चतुर्दशीचतुर्यामे अमा यत्र न दृश्यते । श्वोभूते प्रातिपद्यत्र भूते कव्यादिकी क्रिया” इति । तथा—यज्ञकालस्थितिद्वैधे षट्कलो यदि लभ्यते । पर्व तत्रोत्तरं कार्यं हीने पूर्वमुपक्रमेत्” इति । तथा–“पर्वणोंऽशे तृतीयेऽपि कर्तव्येष्टिर्द्विजातिभिः । द्वितीयासहितं यस्माद्दूषयत्**याश्वलायनः** ॥” पर्वमध्ये इष्टिपक्षादिकरणेऽपि तत्समापनं प्रतिपदि प्रविष्टायामेव कर्तव्यम् । **कालनिर्णयदीपिकायां**—“पर्वणि त्वपि यजौ तत्पूरणं पक्षताविति ।” अन्यथात्वे तु “प्रतिपद्यप्रविष्टायां यदि त्विष्टिः समाप्यते । पुनः प्रणीय कृत्स्नेष्टिः कर्तव्या साग्निकैर्द्विजैः” इति । वृद्धौ तु—“वर्धमानाममावास्यां लभेचेद्

परेऽहनि । यामांस्त्रीनधिकान्वापि पितृयज्ञस्ततो भवेत्'' इति । इति **पर्वनिर्णयः** ॥ अत्र पूर्वां पौर्णमासीमुत्तरां वेत्यत्र **कात्यायनोक्तौ** उपपूर्वस्य भुक्त्यर्थस्य वसतेराधारस्य कर्मत्वाद् द्वितीयोपपत्तिः । उत्तरोपवासपक्षाश्रयणे तु व्रत्याशनसायाशनाऽन्यगारशयनानां रागप्राप्तानां स यदेवाशितमनशितं तदश्नीयादारण्यमेव वाश्नीयादधः शयीतेत्यादिना नियमनात्प्रकृते च तदभावात्तेषां बाधः । पूर्वोपवासपक्षाश्रयणे पुनर्यथा चान्द्रायणमुपवसेदित्यत्र शास्त्रपरिगृहीतनियमवतः परिमाणविशेषावच्छिन्नद्रव्याशनमुपपूर्वस्य वसतेरर्थः । तथा प्रकृतेऽपि मैथुनमांसादिवर्जनयुक्तस्य गृहीताग्नेः सत्यवदनव्रतावैगुण्याय व्रत्याशनं लिङर्थः । **पुलस्त्यः**—''सकृत्पर्वणि सर्पिष्मद्धविष्यं लघु भोजनम् । न सायं नोपवासः स्यात्तैलामिषविवर्जितम् ॥'' **कात्यायनोऽपि**—'अपराह्णे व्रतोपायनीयमश्नीतः सर्पिषाऽसुहितौ' । असुहितावतृप्तौ । क्रियाविशेषणमेतत् । एतच्च पौर्णमास्यामेव न त्वमावास्यायाम् । ''स वै पौर्णमासेनोपवत्स्यन्नसत्रासुहित इव स्यात्'' इति **शतपथे** श्रुतत्वात् । तच्च 'देवेभ्यो यन्न दातव्यं स यदेवाशितमित्याद्युपक्रम्य यस्य वै हविर्न गृह्णाति तदश्नीयात्' इति श्रुतत्वात् ''घृतोपसिक्ता मुद्गा भुज्यन्ते'' इति संप्रदायः । व्रत्याहवर्ज्यमाह **कात्यायनः**—''शाकं मांसं मसूरं च चणकं कोरदूषकान् । माषान्मधु परान्नं च वर्जयेदौपवसथ्यके ॥ लवणं मधु मांसं च क्षारांशो येन हूयते । उपवासे न भुञ्जीत नाथ रात्रौ न किंचन'' इति । तथा—''तिलमुद्गादृते सेव्यं सस्ये गोधूमकोद्रवौ । चीनकं देवधान्यं च सर्वशाकं तथैक्षवम् ॥ सर्जीक्षारं यवक्षारं टङ्कणक्षारमेव च । व्रतस्थो वर्जयेन्नित्यं सामुद्रं लवणं तथा ।'' इति । सामुद्रलवणस्य प्रतिषिद्धत्वात्सैन्धवादेरुपादानं केचिदिच्छन्ति । एतच्च व्रत्याशनं वपनपक्षे । वपनानन्तरं मांसमैथुने संकल्पपूर्वं परित्यज्य केशश्मश्रु वापयित्वा भुञ्जीत व्रत्यम् । 'अहनि मांसमैथुने वर्जयेत्केशश्मश्रु वपते वाऽशिखमपराह्णे व्रतोपायनीयमश्नीतः सर्पिषाऽसुहितौ' इति क्रमस्य दृष्टत्वात् । केचित्तु वपनस्यावश्यकतामाहुः । तदनन्तरं सत्यवदनसंकल्पं कृत्वा रात्रावधः शयनम् अग्निसमीपे यजमानस्य । एतावद्व्रत्याहकृत्यम् । अमावास्या चेदनाहिताग्नेरप्येष इत्युक्तत्वाद्वैश्वदेवानन्तरमपराह्णे पिण्डपितृयज्ञः । तत्र विधिः—सव्येन परिस्तरणं होमस्य दैवत्वात् । ततोऽपसव्यकरणम् । नीविकरणम् । अग्नेरुत्तरतोऽपरेण वा दक्षिणाग्राणां पात्राणामासादनम् । स्फ्यं, शूर्पमग्निहोत्रहवणी वा, चरुस्थाली, व्रीहयः, कृष्णाजिनम्, उलूखलं, मुसलं, श्रपणार्थमुदकम्, आज्यं, मेक्षणं, तिस्रः समिधः, उदपात्रमवनेजनाद्यर्थं सकृदाच्छिन्नानि सूत्राणि ऊर्णादशा वा वयस्युत्तरे यजमानलोमानि वा । ततोऽग्नेः प्रतीच्यां स्फ्योपहितमोषधीकरणम् । अत्र सर्वं प्राचीनावीतिना दक्षिणामुखेन कर्तव्यम् । पितॄन् ध्यात्वा शूर्पेऽग्निहोत्रहवण्यां पितृतीर्थेन मुष्टिचतुष्टयग्रहणमथवा स्थाल्यामेव ग्रहणं नाग्निहोत्रहवण्याम् । अस्मिन्पक्षेऽग्निहोत्रहवणीं नासादयेत् । ततोऽग्नेरपरेणासादनम् । अग्नेरुत्तरतः कृष्णाजिनास्तरणमुदग्ग्रीवमुत्तरलोमं, सव्याशून्येनोलूखलनिधानं, व्रीहीनोप्य मुसलमादाय दक्षिणाभिमुखस्य तिष्ठतः पितृतीर्थेनावितुषीभावं कण्डनम्, ततः शूर्पे न्युप्य निष्पूय तुषान् पृथक्कृत्य पुनः कण्डनं, सकृत्फलीकरणं, स्थाल्यां तण्डुलप्रक्षेपः, सकृत्प्रक्षालनं, द्वितीयोदकेनाधिश्रयणम् । अपूर्णं श्रपयित्वाभिघार्योद्वास्याग्नेः पश्चिमत आसादनम् । तिष्ठन्समित्त्रयमग्नावाधायोपविश्य सव्यं कृत्वा मेक्षणेन होमः । तत्र मन्त्रः—अग्नये कव्यवाहनाय स्वाहा इदमग्नये कव्यवाहनाय । सोमाय पितृमते स्वाहा इदं सोमाय पितृमते । ततो मेक्षणमग्नौ प्रक्षिप्याऽपसव्यं कृत्वाग्नेर्दक्षिणतः पश्चाद्वा स्फ्येन दक्षिणाग्रां रेखाम् ''अपहता'' इत्युल्लिखेत् । उदकस्पर्शः । उल्मुकं पुरस्तात्करोति ''ये रूपाणि'' इति । उदपात्रमादाय सव्यं जान्वाच्य रेखामूलमध्याग्रेषु पित्रादित्रितयायावनेजनं दद्यात् । अमुकसगोत्र पितः अमुकशर्मन् अवनेनिक्ष्वेति पित्रे, एवं पितामहप्रपितामहयोः । तत उपमूलं सकृदाच्छिन्नानि लेखायां कृत्वा यथावनिक्तं पिण्डदानम् अमुकसगोत्र पितः अमुकशर्मन्नेतत्ते इति । एवं पितामहप्रपितामहयोः । ''अत्र पितरः'' इत्युक्त्वोदङ्ङास्त आतमनादावृत्य ''अमीमदन्त'' इति जपत्यवनेज्य पूर्ववन्नीवीं विस्रस्य ''नमो व'' इति षडञ्जलीन्कृत्वा ''गृहान्नः'' इति जपति । ''एतद्व'' इत्युपास्यति सूत्राणि प्रतिपिण्डमूर्णादशा वा वयस्युत्तरे यजमानलोमानि वा । ''ऊर्जम्'' इत्युदपात्रस्था अपो निषिञ्चति पिण्डसन्निधौ । स्थाल्यां पिण्डावधानमवघ्राणमुल्मुकसकृदाच्छिन्नानामग्नौ प्रक्षेपः । अध्वर्युकर्तृकत्वे विशेषः । पितृपदात्पूर्वं यजमानस्येति प्रयोगः । यजमानस्य पितरित्येवं, त्यागावघ्राणयोरभावः । अन्यत्प्रकृतिवत् । यजमानपत्नी चेत्पुत्रकामा तदाऽधत्त इति मन्त्रेणानवघ्रातं मध्यमपिण्डं भक्षयति । जीवत्पितृकस्य होमान्तोऽयमनारम्भो वा । केचित्तु पक्षाद्यङ्गतां पिण्डपितृयज्ञस्येच्छन्ति । तन्न, अनङ्गहेतोरङ्गहेतुत्वानुपपत्तेः । इति **पिण्डपितृयज्ञः** ॥ ततः पिण्डान्वाहार्यकं श्राद्धमग्नौकरणसहितं श्राद्धकल्पोक्तम् । ततः प्रातः स्थालीपाकमित्यादि सौत्रं पक्षादिकर्म । तत्र प्रथमप्रयोगे पौर्णमास्यां मातृपूजनपूर्वकमाभ्युदयिकं, ततोऽन्वारम्भणीयेष्टिदेवताकश्चरुः, दर्विहोमेषु पौर्णमासधर्मातिदेशात् । तत्र ब्रह्मासनाद्याज्यभागान्ते विशेषः—अग्नाविष्णुभ्यां सरस्वत्यै सरस्वते जुष्टं गृह्णामीति ग्रहणे, प्रोक्षणे त्वाशब्दोऽधिकः । तत आज्यभागानन्तरं **स्थालीपाकहोमः** । अग्नाविष्णुभ्यां स्वाहा इदमग्नाविष्णुभ्याम् । सरस्वत्यै स्वाहा इदं सरस्वत्यै । सरस्वते स्वाहा इदं सरस्वते । अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते । ततो महाव्याहृत्यादिब्राह्मणभोजनान्तं ततो वैश्वदेवः । प्रथमप्रयोगेऽयं विशेषः—पौर्णमास्यां, ततः प्रतिपदि प्रातः सौत्रं स्थालीपाकं श्रपयित्वेत्यादि पक्षादिकर्म । तत्र वैश्वदेवस्येत्यादिसौत्रहोमस्य

चरुसाध्यत्वात्स्थालीपाकमित्यत्रैकत्वं न विवक्षितमित्याचार्याः । अन्ये तु स्थालीपाकमित्यत्रैकत्वं विवक्षितमेव । वैश्वदेवश्च प्राक् सिद्ध एवासाद्यः, वृषोत्सर्गे पौष्णवदित्याहुः । **आचार्यमते** तु पौष्णश्चरुः पक्षसम एवेति ध्येयम् । तथाच दक्षिणतो ब्रह्मासनेत्यादि प्रातर्होमानन्तरं परिभाषोक्तविधिना स्थालीपाकौ श्रपयित्वा आज्यभागान्तं कुर्यात् । तत्र विशेषः–आसादने चरुस्थालीद्वयं,ग्रहणे अग्नये, अग्नीषोमाभ्यामग्नीषोमाभ्यां, ब्रह्मणे,प्रजाप्रतये, विश्वेभ्यो देवेभ्यो, द्यावापृथिवीभ्यां जुष्टं गृह्णामि, अग्नये, प्रजापतये, विश्वेभ्यो देवेभ्यो जुष्टं गृह्णामीति द्वितीयचरोर्ग्रहणं, प्रोक्षणं पूर्ववत् । अन्यत्प्रकृतिवदाज्यभागान्तम् । तत आज्यभागानन्तरं दर्शपौर्णमासदेवताभ्यो हुत्वा, द्वन्द्वश्चात्र समासः । द्वन्द्वान्ते श्रूयमाणत्वाद्देवतापदस्य प्रत्येकं संबन्धः । अग्निर्विष्णुरिन्द्राग्नी इत्येताः दर्शदेवताः । सान्नाय्ययाजिनस्तु अग्न्यनन्तरं विष्णुस्थानापन्नावग्नीषोमौ इन्द्राग्निप्रतिनिधिश्चेन्द्रः । दर्शे अग्नये, विष्णव, इन्द्राग्निभ्यां । ब्रह्मण इत्यादिग्रहणादौ प्रयोगः । दीक्षितस्य तु अग्नयेऽग्नीषोमाभ्यामिन्द्राय, ब्रह्मणे, प्रजापतय इत्यादिप्रयोगः । अग्निरग्नीषोमावाग्नीषोमौ एताः पौर्णमासदेवताः । "ताभ्यो हुत्वा ब्रह्मणे" इत्यादिसूत्रोक्तदेवताभ्यो जुहोतीत्यर्थः । होमश्चायं स्थालीपाकेन । भानोर्मयूखाः यदा तरूणामग्राणि स्पृशन्ति स होमकालः । दर्शपौर्णमासदेवताभ्य उदक्संस्थमाहुतित्रयं हुत्वा प्रथमाहुतिसंलग्नमाहुतिचतुष्टयं प्राक्सस्थं ब्रह्मण इत्यादिकं जुहुयात् । त्यागस्तु इदमग्नये, इदमग्नीषोमाभ्याम्, इदं ब्रह्मणे, इदं प्रजापतये, इदं विश्वेभ्यो देवेभ्यः, इदं द्यावापृथिवीभ्याम् । दर्शे तु इदमग्नये, इदं विष्णवे, इदमिन्द्राग्निभ्याम् । दीक्षितस्य तु इदमग्नये । इदमग्नीषोमाभ्याम् । इदमिन्द्राय । ततः ब्रह्मण इत्याद्याहुतिचतुष्टयम् । "विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्य आकाशाय च" इति सूत्रम् । हरणं दानं, तच्चैवं–चरोरुत्तरतः प्राक्संस्थमुदकसंस्थं वा विश्वेभ्यो देवेभ्यो नमः इदं विश्वेभ्यो देवेभ्यः । भूतगृह्येभ्यो नमः इदं भूतगृह्येभ्यः । आकाशाय नमः इदमाकाशाय । समुच्चयार्थश्चकारः । वैश्वदेवस्याग्नौ जुहोत्यग्नये स्वाहा, प्रजापतये स्वाहा, विश्वेभ्यो देवेभ्यः स्वाहा, अग्नये स्विष्टकृते स्वाहेति । द्वितीयाहुतिसंलग्नाः प्राक्संस्थास्तिस्रः । उभयोरुत्तरांशात् गृहीत्वोत्तरार्धे स्विष्टकृद्धोमः । होमत्वप्रतिपत्तयेऽग्निपदं, प्रयोगः पूर्ववत् । "बाह्यतः स्त्रीबलिꣳ हरति नमः स्त्रियै नमः पुꣳसे वयसे नमः शुक्लाय कृष्णदन्ताय पापीनां पतये नमो ये मे प्रजामुपलोभयन्ति ग्रामे वसन्त उत वारण्ये तेभ्यो नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददातु" इति सूत्रम् । अग्न्यगाराद्बाह्यतः स्त्र्यादिभ्यो बलिः । जात्याख्यायामेकवचनम् । हरति ददाति । नमःपदारम्भाः पञ्चमन्त्रा इत्येके । चत्वार इत्यन्ये । तन्मते आद्याभ्यामेकः । नमःस्थाने इदंपदाध्याहारेण त्यागाः । "प्राञ्च्युदञ्चि कर्माणि" इति **कात्यायनोक्तेः** प्राक्संस्थता उदक्संस्थता वा ध्येया । "शेषमद्भिः प्रप्लाव्य ततो ब्राह्मणभोजनम्" ततः शेषसमाप्त्यनन्तरं कर्मापवर्गान्ते ब्राह्मणस्य भोजनमित्यर्थः । शेषसमाप्तिश्चैवं महाव्याहृत्यादिप्राजापत्यान्ता नवाहुतयः । ततः संस्रवप्राशनं, मार्जनं, पवित्रप्रतिपत्तिः, ब्रह्मणे पूर्णपात्रदानं, सर्वप्रायश्चित्तहोमः, बर्हिर्होमः, प्रणीताविमोकः, कर्मापवर्गसमित्प्रक्षेपः, उत्सर्जनं ब्रह्मणः, उपयमनकुशस्याग्नौ प्रक्षेपः, ब्राह्मणभोजनमिति । तदनन्तरं वैश्वदेवो द्वितीयचरुणा, आद्यस्याप्लुतत्वात् ॥ आवृत्तियोग्यानि कर्माणि लिख्यन्ते—सायंप्रातर्होमः, पञ्चमहायज्ञाः, पक्षादिद्वयं, पिण्डपितृयज्ञः, अनन्तरं पिण्डान्वाहार्यकं श्राद्धं श्राद्धकल्पविधानेन, आग्रयणद्वयम्, अष्टकाश्चतस्रः, उपाकर्म, उत्सर्गश्च एतानि यावज्जीवं यथाकालमावृत्त्या कर्तव्यानि । श्रवणाकर्मादेः सकृदेव प्रयोगः। तेषामप्यावर्तनमित्यन्ये । इति द्वादशी कण्डिका ॥ १२ ॥

सा यदि गर्भं न दधीत सिꣳह्याः श्वेतपुष्प्या उपोष्य पुष्येण मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चति । इयमोषधी त्रायमाणा सहमाना सरस्वती अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति ॥ १ ॥ १३ ॥ * ॥

कर्कः–सा यदि गर्भं न दधीत सिꣳह्याः श्वेतपुष्प्या उपोष्य पुष्येण मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चति इयमोषधी त्रायमाणेति–सेति शब्देन या सा व्यूढा सोच्यते, यद्यसौ गर्भं न धारयति तर्हि सिꣳह्याः श्वेतपुष्प्याः सिंहीति रिङ्गणिकोच्यते (कण्टालिकेति) लोकप्रसिद्धा तस्या उपोष्य पुष्येण नक्षत्रेण मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां रात्रावुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चतीयमोषधी त्रायमाणेत्यनेन मन्त्रेण ॥ १३ ॥ * ॥

जय०—सा व्यूढा गर्भकामा वा । यदि गर्भं नादधीत न धारयति · तदोपचारः प्रोच्यते सिंही कण्टकारिकेति यावत् । तस्याः किम्भूतायाः श्वेतपुष्प्याः सितकुसुमायाः मूलं पुष्येण नक्षत्रेण उपोष्य किमप्यभक्षयित्वा उत्थाप्योत्पाट्य चतुर्थेऽहनि स्नाता चतुर्थस्नाता तस्यां दक्षिणस्यां नासिकायामासिञ्चति भर्ता । **इयमोषधीति**—मन्त्रेण मन्त्रमाह—इयमोषधीरिति । अस्यार्थः। तत्र प्रजापतिर्बृहती ओषधी आसेचने०। ओषति दहति दोषान् धत्ते गुणानित्योषधी इयं त्रायमाणा यथोक्तप्रयोक्तॄन् रक्षन्ती। सहमाना दोषवेगान् सोढ्वाऽपि नाशयन्तीत्यर्थः। सरस्वती सरति कारणतयाऽनुगच्छतीति सरः समुद्रः तद्वती तत्सम्बद्धा, अतः अस्याः बृहत्याः बहुफलायाः बृंहयति पुत्रादिदानेनेति वा तस्याः प्रभावात् । अहं पितुर्जनकस्य नाम अहमस्य पुत्र इति जग्रभं गृहीतवानस्मि। तथाऽयं पुत्रोऽप्युत्पत्स्यमानोऽहमस्य पुत्र इति मम नाम गृह्णात्विति शेषः ॥ १३ ॥

हरि०—**सा यदि गर्भं न दधीत**—सा भार्या यदि चेत् गर्भं न धारयेत्। **सिंह्याः श्वेतपुष्प्या उपोष्य पुष्येण मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चति**—गर्भधारणोपायमाह—सिंह्याः कण्टकारिकायाः कथम्भूतायाः श्वेतपुष्प्याः श्वेतानि पुष्पाणि यस्याः सा श्वेतपुष्पी तस्या उपोष्य उपवासं कृत्वा, पुष्येण चन्द्रमसा युक्तेन पुष्यनक्षत्रेण मूलं शिफामुत्थाप्य उद्धृत्य, रजोदर्शनाच्चतुर्थेऽहनि स्नातायां भार्यायां रात्रौ उदपेषं यथा भवति तथा तन्मूलम् उदकेन पिष्ट्वा द्रवीभावमापाद्येत्यर्थः। दक्षिणस्यां नासिकायां दक्षिणे नासारन्ध्रे सिञ्चति प्रक्षिपति भर्ता। **इयमोषधी त्रायमाणा सहमाना सरस्वती अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति**—अनेन मन्त्रेण ॥ १३ ॥ * ॥

गदा०—**सा यदि गर्भं न दधीत सिंह्याः श्वेतपुष्प्या उपोष्य पुष्येण मूलमुत्थाप्य, चतुर्थेऽहनि स्नातायां निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चतीयमोषधी त्रायमाणा सहमाना सरस्वती। अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति**—सा व्यूढा स्त्री गर्भकामा यदि गर्भं न दधीत न धारयति तदा भर्ता सिंह्याः श्वेतपुष्प्याः सिंहीति रिङ्गणी कण्टकारिकापरपर्याया, श्वेतानि पुष्पाणि यस्याः सा श्वेतपुष्पी तस्याः उपोष्य पुष्यनक्षत्रदिनात्पूर्वदिने स्वयमुपवासं कृत्वा, पुष्येण मूलमुत्थाप्य पुष्यनक्षत्रादिने पूर्वोक्तायाः कण्टकारिकायाः मूलमुत्पाट्य यत्नेन स्थापयित्वा, ऋतुयुक्ता यदा भार्या भवति तदा चतुर्थेऽहनि स्नातायां रात्रौ तन्मूलमुदकेन पिष्ट्वा पेषयित्वा दक्षिणनासिकापुटे आसिञ्चति'इयमोषधी त्रायमाणा'इत्यनेन मन्त्रेण भर्तैव। ततो भर्त्रा भोजनं कार्यमिति **गर्गपद्धतौ**। मन्त्रार्थः। ओषति दहति दोषान्, धत्ते गुणानित्योषधी इयं त्रायमाणा यथोक्तप्रयुक्ता रक्षन्ती सहमाना दोषवेगान् सोढ्वाऽपि नाशयन्तीत्यर्थः। सराति कारणतयाऽनुगच्छति इति सरः समुद्रस्तद्वती तत्सम्बद्धा, अतः अस्या बृहत्याः महत्याः, बृंहयति पुत्रादिदानेन वा तस्याः प्रभावाच्चाहं पुत्रः पितुरयमित्यहं नाम जग्रभम् गृह्णीयाम् लभेयम्प्राप्नुयाम्पुत्रस्य पितेति लोकाः कथयन्ति। सुगमत्वादत्र पदार्थक्रमो नोच्यते। इति श्रीत्रिरग्निचित्सम्राट्स्थपति—श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये त्रयोदशी कण्डिका १३

विश्व०—भार्या चेद्गर्भं न धारयेत् तत्रोपायमाह—**सिंह्याः…मासिञ्चति**—सिंह्याः कण्टकारिकाया लोकप्रसिद्धायाः उपोष्य पुष्यचन्द्रमसोर्योगात्पूर्वदिने उपवासं कृत्वा, पुष्येण युक्तश्चन्द्रो यस्मिन् दिने तस्मिन्नाप्लाव्येष्टदेवतां स्मृत्वा पुत्रकामः प्राङ्मुख उपविश्य तस्याः मूलमुत्थाप्य स्वगृहे समानीय रक्षयेत्। ततः रजोदर्शनानन्तरं चतुर्थेऽहनि स्नातायां भार्यायां रात्रावुदपेषं यथा भवति तथा पिष्ट्वा तस्याः मूलमुदकेन द्रवीभूतमापाद्य भार्यायाः दक्षिणे नासारन्ध्रे क्षारयति भर्ता। तत्र मन्त्रमाह—**इयमोषधी त्रायमाणा सहमाना सरस्वती। अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति**—नच पिण्डाशनसाधनावरुद्ध एतत्साधनान्वयो न विकल्पमन्तरा व्रीहियवयोरिव। तथा चोभयत्र कथं शास्त्रार्थतेति वाच्यम्। उद्देश्यतया स्वर्गवदेतत्कृत्यसाध्यत्वात् क्रियाभेदाच्च। अत एव पुत्रोत्पत्तिप्रातिबन्धकदुरितनिवृत्तिरेव कारीरीवदेतत्क्रियासाध्या। अत एव प्राचितदुरितशङ्कया हविःप्राशनादेरपि हेतुत्वमिति। न

चैवं क्रियाजन्यापूर्वस्यैव विहितंप्रधानजन्यापूर्वतया फलसंपादकाशेषसामग्रीसंपादकतया फलावश्यंभावेनेतरा व्यर्थेति वाच्यम्, अप्रचितदुरितस्थलीयपुत्रलाभस्य तथात्वेऽपि प्रचुरतरदुरितस्थलीयपुत्रोत्पत्तौ स्वतन्त्रक्रियाकलम्बकस्य हेतुत्वादिति॥ इति त्रयोदशी कण्डिका ॥ १३ ॥

अथ पुꣳसवनम् ॥ १ ॥ पुरा स्पन्दत इति मासे द्वितीये तृतीये वा ॥ २ ॥ यदहः पुꣳसा नक्षत्रेण चन्द्रमा युज्येत तदहरुपवास्याप्लाव्याहते वाससी परिधाप्य न्यग्रोधावरोहाञ्छुङ्गाꣳश्च निशायामुदपेषं पिष्ट्वा पूर्ववदासेचनꣳ हिरण्यगर्भोऽद्भ्यः सम्भृत इत्येताभ्याम् ॥ ३ ॥ कुशकण्टकꣳ सोमाꣳशुं चैके ॥ ४ ॥ कूर्मपित्तं चोपस्थे कृत्वा स यदि कामयेत वीर्यवान्त्स्यादिति विकृत्यैनमभिमन्त्रयते सुपर्णोऽसीति प्राग्विष्णुक्रमेभ्यः ॥ ५ ॥ १४ ॥

कर्कः–अथ पुꣳसवनं पुरा स्पन्दत इति मासे द्वितीये तृतीये वा–पुꣳसवनमिति गर्भसंस्कारकर्मणो नामधेयम्, तच्च पुरा गर्भस्पन्दनाद्भवति। मासे द्वितीये तृतीये वा। **यदहः पुꣳसा नक्षत्रेण चन्द्रमा युज्येत तदहरुपवास्याप्लाव्याहते वाससी परिधाप्य न्यग्रोधावरोहाञ्छुङ्गाꣳश्च निशायामुदपेषं पिष्ट्वा पूर्ववदासेचनꣳ हिरण्यगर्भोऽद्भ्यः सम्भृत इत्येताभ्याम्**–यस्मिन्नहनि पुंसा नक्षत्रेण पुनर्वसुपुष्यादिना चन्द्रमसो योगो भवति तदहस्तां स्त्रियमुपवास्य स्नापयित्वा चाहते वाससी परिधाप्य न्यग्रोधावरोहान् न्यग्रोधावलम्बिकान् शुङ्गाँस्तदङ्कुरान् रात्रावुदपेषं पिष्ट्वा पूर्ववद्दक्षिणस्यां नासिकायामासिञ्चति 'हिरण्यगर्भोऽद्भ्यः सम्भृतः' इत्येताभ्यामृग्भ्याम्। **कुशकण्टकꣳ सोमाꣳशुं चैके**–पिष्यमाणेषु प्रक्षिपन्ति । **कूर्मपित्तं चोपस्थे कृत्वा स यदि कामयेत वीर्यवान्त्स्यादिति विकृत्यैनमभिमन्त्रयते सुपर्णोऽसीति प्राग्विष्णुक्रमेभ्यः**–कूर्मपित्तशब्देनोदकशरावमुच्यते तदस्याः स्त्रिया उपस्थे कृत्वा स यदि कामयेत वीर्यवान् गर्भः स्यात्स्यादिति तदा विकृत्यैनमभिमन्त्रयते " सुपर्णोऽसि" इति प्राग्विष्णुक्रमेभ्यः ॥ १४ ॥

जय०–अथेति–गर्भे धृते **पुंसवनमिति**–गर्भसंस्कारकर्मणो नामधेयम् । तच्च स्पन्दते पुरा स्पन्दिष्यते " यावत्पुरानिपातयोर्लट् " इति भविष्यदर्थे वर्तमानप्रयोगः । पुरा गर्भस्पन्दनाद्भवतीति हेतोः शुद्धे द्वितीये वा तृतीये मासे गर्भाधानात् यदहः यस्मिन्नहनि पुंसा पुष्यादिना नक्षत्रेण चन्द्रमा युक्तो भवति तदहस्ताम् स्त्रियमुदवास्य अनाशयित्वा, आप्लाव्य स्नापयित्वा, अहते वाससी परिधाप्य च न्यग्रोधो वटः तस्यावरोहान् अव अधः रोहन्तीति तथा तान् शुङ्गान् ऊर्द्ध्वाङ्कुरान् सन्निधानाद्वटस्यैव रात्रौ उदपेषम् सलिलं यथा भवत्येवं पूर्ववद्दक्षिणनासिकायामासिञ्चति । "हिरण्यगर्भोऽद्भ्यः सम्भृतः" इत्येताभ्यामृग्भ्याम् । तत्राद्यायाः हिरण्यगर्भः प्रजापतिरुभयोस्त्रिष्टुप् अन्त्यायाः पुरुषो नारायण आदित्यः सेके०। कुशकण्टकं कुशमूलम्, सोमांशु सोमलताखण्डं च पिष्यमाणेषु प्रक्षिपन्त्येके, एके नेति विकल्पः। काम्यमाह **कूर्मपित्तमिति**–कूर्मपित्तशब्देनोदकंयुक्तशरावमुच्यते, तदस्या उपस्थे भगे कृत्वा निधाय भर्ता विकृत्य विशिष्टया कृत्या कृतिच्छन्दस्कया सुपर्णोऽसीत्यादिस्वः पतेत्यन्तया एनं गर्भमभिमन्त्रयते तत् स्पृष्ट्वा मन्त्रं जपतीत्यर्थः । विशिष्टत्वं चतुरवसानत्वं तत्र प्रजापतिः कृतिर्गरुत्मान् मन्त्रणे० विष्णुक्रमेभ्यः विष्णुक्रममन्त्रेभ्यः प्राक् पूर्वं यावद्विकृतेः परिमाणमित्यर्थः ॥ १४ ॥ * ॥

हरि०–**अथ पुंसवनम्**–अथावसरप्राप्तं पुंसवनाख्यं गर्भसंस्कारकं कर्म व्याख्यास्यते। **पुरा स्पन्दत इति**–पुरा अग्रे स्पन्दते चलिष्यति। "यावत्पुरानिपातयोर्लट्" इति पुरायोगे भविष्यदर्थे वर्तमानप्रयोग इति हेतोः। **मासे द्वितीये तृतीये वा यदहः पुंसा नक्षत्रेण चन्द्रमा युज्येत**–गर्भधारणकालात् द्वितीये तृतीये वा मासे यस्मिन्नहनि पुंसा पुरुषनाम्ना पुष्यादिनक्षत्रेण उडुना शशी युक्तो भवेत्। **तदहरुपवास्याप्लाव्याहते वाससी परिधाप्य**–तस्मिन्नहनि उपवास्य भोजनमकारयित्वा, भार्यामाप्लाव्य स्नापयित्वा,अहते नवे सदशे सकृत्प्रक्षालिते वाससी अन्तरीयोत्तरीये द्वे परिधाप्य परिधानं कारयित्वा। **न्यग्रोधावरोहाञ्छुङ्गाँश्च निशायामुदपेषं पिष्ट्वा पूर्ववदासेचनम्**–न्यग्रोधस्य वटस्य अवरोहान् अवाचीनम् अधः रोहन्ति जायन्ते इत्यवरोहास्तान् शुङ्गान् तदग्रपल्लवान् मुकुलाकारान् सान्निध्याच्चकारोऽवरोहसमुच्चयार्थः। ततश्चोभयं रात्रौ पूर्ववत् गर्भधारणार्थोक्तवत् पिष्ट्वा पूर्ववदेव आसेचनं भर्तुः दक्षिणनासारन्ध्रे। मन्त्रविशेषमाह–**हिरण्यगर्भोऽद्भ्यः सम्भृत इत्येताभ्याम् ऋग्भ्याम् कुशकण्टकꣳ सोमाꣳशुं चैके**–एके आचार्याः। न्यग्रोधावरोहशुङ्गेषु पिष्यमाणेषु कुशस्य कण्टकं, मूलं, सोमांशुं, सोमलताखण्डं च प्रक्षिपन्ति तत्पक्षे द्रव्यचतुष्टयपेषणम्। **कूर्मपित्तं चोपस्थे कृत्वा स यदि कामयेत वीर्यवान्त्स्यादिति विकृत्यैनमभिमन्त्रयते सुपर्णोऽसीति प्राग्विष्णुक्रमेभ्यः**–अत्र काम्यमाह–स भर्ता यदि कामयेत अयं गर्भः वीर्यवान् शक्तिमान् स्यादितीच्छेत् तदा अस्या भार्यायाः उपस्थे उत्सङ्गे कूर्मपित्तं जलपूर्णशरावं निधाय विकृत्या विकृतिच्छन्दस्कया "सुपर्णोऽसि" इत्यनया ऋचा **स्वः पतेत्यन्तया** एनं गर्भमभिमन्त्रयते हस्तेन गर्भाशयं स्पृष्ट्वा मन्त्रं जपतीत्यर्थः। विष्णुक्रमेभ्यो विष्णुक्रममन्त्रेभ्यः प्राक् पूर्वं यावद्विकृतेः परिमाणमिति सूत्रार्थः॥ १४ ॥

अथ प्रयोगः। तत्र गर्भाधानप्रभृति द्वितीये वा मासे यस्मिन्दिने पुंनक्षत्रयुक्तश्चन्द्रस्तस्मिन्नहनि गर्भिणीमुपवासं कारयित्वा मातृपूजाभ्युदयिकं विधाय तां स्नापयित्वाऽहते वाससी परिधाप्य रात्रौ न्यग्रोधावरोहाञ्छुङ्गांश्च उदकेन पिष्ट्वा पक्षे कुशकण्टकं सोमांशुं च तन्नासिकाया दक्षिणपुटे आसिञ्चति भर्ता "हिरण्यगर्भोऽद्भ्यः सम्भृतः" इति ऋग्भ्याम्। स यदीच्छेत् वीर्यवान्त्स्यादयं गर्भस्तदा तस्याः स्त्रियाः उदकपूर्णं शरावं उपस्थं कृत्वा सुपर्णोऽसीत्यनया विष्णोः क्रमोऽसीत्येतत्प्राक् पठितया विकृत्या ऋचाऽन्तर्गर्भमभिमन्त्रयते पिता। इति **प्रयोगः** ॥ १४ ॥ * ॥

गदा०–**अथ पुꣳसवनम्। पुरा स्पन्दत इति मासे द्वितीये तृतीये वा**–पुंसवनमिति गर्भसंस्कारकर्मणो नामधेयम्। तच्च स्पन्दते पुरा स्पन्दिष्यते चलिष्यति "यावत्पुरानिपातयोर्लट्" इति च भविष्यदर्थे वर्तमानवत्प्रयोगः। पुरा गर्भस्पन्दनात् भवतीति हेतोः शुद्धे द्वितीये वा मासे तृतीये वा मासे गर्भाधानाद्भवति "प्रथमे मासे वा पूर्णे भवति द्वितीये वा तृतीये वा" इति **भर्तृयज्ञः**। तथा **हेमाद्रौ यमः**–"प्रथमे मासि द्वितीये वा तृतीये वा यदा पुन्नक्षत्रेण चन्द्रमा युक्तः स्यात्" इति। गर्भसंस्कारत्वात्प्रतिगर्भमावर्तनीयमेतत्। तथा **कारिकायाम्**–"गर्भसंस्कार एवायम्" इति **कर्कस्य** सम्मतिः। "अतस्तद्गर्भसंस्काराद्गर्भं गर्भं प्रयुज्यते" इति। **बह्वृचकारिकायाम**प्येवम्। कालातिक्रमे स्पन्दितेऽपि कार्यमेव। तदुक्तं **कारिकायाम्**–"एतदेव पुरा गर्भचलनादकृतं यदि। सीमन्तात्प्राग्विधातव्यं स्पन्दितेऽपि बृहस्पतिः॥" इति। **यदहः पुꣳसा नक्षत्रेण चन्द्रमा युज्येत तदहरुपवास्याप्लाव्याहते वाससी परिधाप्य न्यग्रोधावरोहाञ्छुङ्गांश्च निशायामुदपेषं पिष्ट्वा पूर्ववदासेचनꣳ हिरण्यगर्भोऽद्भ्यः सम्भृत इत्येताभ्याम्**–मासे द्वितीये तृतीये वा यस्मिन्नहानि पुंसा पुन्नामनक्षत्रेण पुष्यादिना नक्षत्रेण चन्द्रमा युक्तो भवति तदहस्तस्मिन्दिने गर्भिणीमुपवास्यानाशयित्वा आप्लाव्य स्नापयित्वा अहते वाससी परिधाप्य च न्यग्रोधो वटस्तस्यावरोहान् अव अधः रोहन्तीति तथा तान् शुङ्गान् ऊर्ध्वाङ्कुरान्सन्निधानाद्वटस्यैव। चकारः समुच्चये "हिरण्यगर्भोऽद्भ्यः सम्भृतः" इत्येताभ्यामृग्भ्याम्। हिरण्यगर्भोऽद्भ्यः सम्भृत इत्येताभ्यामासिच्यमाने समुच्चिताभ्यामासेचनं प्राप्नोति तन्माभूदिति यत्नः क्रियते एताभ्यां पृथग्भूताभ्यां प्रत्यृचमासेचनमिति **भर्तृयज्ञः**। पुन्नक्षत्राणि च रत्नकोशे दर्शितानि। हस्तो,मूलं,श्रवणः पुनर्वसुर्मृगशिरः पुष्यमिति। अनुराधाऽपि पुन्नक्षत्रम्। "अनुराधान्ह-

विषा वर्द्धयन्त" इति श्रुतेः ।। ज्योतिःशास्त्रेऽप्येवम् । **कुशकण्टकꣳसोमाꣳशुं चैके**–कुशकण्टकं कुशमूलं, सोमांशुं सोमलताखण्डं च पिष्यमाणेषु न्यग्रोधावरोहशुङ्गेषु प्रक्षिपन्त्येके आचार्याः । अस्मिन्पक्षे द्रव्यचतुष्टयस्य पेषणम्, एकग्रहणाद्विकल्पः । काम्यमाह–**कूर्मपित्तं चोपस्थे कृत्वा स यदि कामयेत वीर्यवान्त्स्यादिति विकृत्यैनमभिमन्त्रयते सुपर्णोऽसीति प्राग्विष्णुक्रमेभ्यः**–स भर्ता यदि कामयेत अयं गर्भो वीर्यवान् शक्तिमान् भवतु तदा अस्याः स्त्रिया उपस्थे उत्सङ्गे अङ्के उदपूर्णं शरावं निधाय मुक्त्वा विकृत्या विकृतिच्छन्दस्कया ऋचा एनं गर्भमभिमन्त्रयते, गर्भिण्या उदरं विकृत्य अनामिकाग्रेण स्पृशन् विलोकयित्वा वा मन्त्रं पठतीत्यर्थः । तदुक्तं-**कात्यायनेन**–" स्पृशंस्त्वनामिकाग्रेण क्वचिदालोकयन्नपि । अनुमन्त्रणीयं सर्वत्र सदैवमनुमन्त्रयेत्" इति । आभिमन्त्रणानुमन्त्रणयोर्न कश्चिद्विशेषः । विकृतेरप्रसिद्धत्वादाह-**सुपर्णोऽसीति प्राग्विष्णुक्रमेभ्यः**–सुपर्णोऽसि गरुत्मानित्यारभ्य विष्णुक्रम मन्त्रेभ्यः प्राक् पूर्वं यावद्विकृतेः परिमाणमित्यर्थः ।। इति श्रीत्रिरग्निचित्सम्राट्स्थपति –श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये चतुर्दशी कण्डिका ॥ १४ ॥ * ॥

अथ पदार्थक्रमः । गर्भमासप्रभृति द्वितीये तृतीये वा मासि, अरिक्तादितिथौ, पुष्यादिपुन्नक्षत्रे, शुक्रसोमबुधगुरुवासरेषु, विष्ट्यादिदोषरहिते दैवज्ञोक्ते काले पुंसवनं कुर्यात् । अत्र नियतकालत्वात् गुरुशुक्रास्तबाल्यवार्द्धकमलमासादिष्वपि न दोषो दोषरहितकालालाभे, तद्रहितकाललाभे शुक्रास्तादौ न कार्यम् । कालातिक्रमे तु समिन्तादिने कार्यम् । उक्ते दिवसे स्वस्तिवाचनग्रहयज्ञाभ्युदयिकानि कृत्वा देशकालौ स्मृत्वाऽस्यां भार्यायामुत्पत्स्यमानगर्भस्य बैजिकगार्भिकदोषपरिहारसुरूपताज्ञानोदयप्रतिरोधिपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुंसवनं करिष्ये इति सङ्कल्पः । ततस्तास्मिन्नहानि गार्भिणीमुपवासं कारयित्वा तां स्नापयित्वाऽहते वाससी परिधाप्य रात्रौ न्यग्रोधावरोहशुङ्गानामुदकेन सह पेषणम् । ततो गार्भिणीमुपवेश्य तदुदकं वस्त्रपावितं दाक्षिणस्यां नासायामासिञ्चाति । "हिरण्यगर्भः समवर्तताग्रे, अद्भयः सम्भृतः" इति ऋग्भ्याम् । स यदि कामयेत वीर्यवान् स्यादयं गर्भस्तदाऽस्या उत्सङ्गे उदरे शरावं निधाय सुपर्णोऽसीत्यनेन दिवं गच्छ स्वः पतेत्यन्तेन तं गर्भमभिमन्त्रयते । इति **पदार्थक्रमः** । **गर्गमते** नात्र विशेषः ॥ १४ ॥

विश्व०-एवं गर्भे जाते इदानीं तत्संस्कारकं कर्माह—**अथ पुंसवनम्**—उच्यत इति शेषः । केचित्तु गार्भिण्या एव संस्कारकं पुंसवनमित्याहुः । **पुरा स्पन्दत इति**–गर्भचलनात्पूर्वमित्यर्थः । भविष्यदर्थे वर्तमानताप्रयोगः । चलनप्राक्त्वस्यानियतत्वादिदानीं नियतं समयमाह–**मासे द्वितीये तृतीये वा यदहः पुं सा नक्षत्रेण चन्द्रमा युज्येत**–गर्भोत्पत्त्यवधिकं मासानिष्ठाद्वितीयत्वादि । पुरुषनक्षत्रं पुष्यादि । चलनं तु सप्तमे । तथाच **यास्कः**— सप्तमे चलनसमर्थो भवति, अत एव तत्प्राक्त्वमननुगतम् । ज्योतिःशास्त्रोक्तं शुक्लपक्षादिकमपि ग्राह्यम् । **तदहरुपवास्याप्लाव्याहते वाससी परिधाप्य**–उपवासस्याहोरात्रसाध्यत्वात्तदुत्तरत्वस्य स्नाने प्रतीयमानत्वात्पूर्वेद्युरुपोषणं, ततः पुरुषोडूपरक्तचन्द्राधिकरणाह्नि वैश्वदेवपूर्वकं मातृश्राद्धं कृत्वा उपोषितां भार्यामाप्लाव्याहते वाससी परिधाप्येत्यर्थः । **न्यग्रोधावरोहाञ्छुङ्गांश्च निशायामुदपेषं पिष्ट्वा पूर्ववदासेचनम्** । न्यग्रोधो वटः अधो रोहन्तीत्यवरोहाः, षष्ठीतत्पुरुषश्च समासः । तान् पूर्ववदिति गर्भाधानप्रतिबन्धकापनयोक्तो विधिरतिदिश्यते । तेन वटावरोहाञ्छुङ्गान् वटपल्लवाग्राणि सूक्ष्माणि । तदुभयं चकारार्थः । निशायामुदपेषं पिष्ट्वा दाक्षिणस्यां नासिकायामासिञ्चतीत्यर्थः । आसेचनमन्त्रावाह—**हिरण्यगर्भोऽद्भ्यः संभृत इत्येताभ्याम् कुशकण्टकं सोमांशु चैके**–अवरोहपल्लवैः सहैतयोरपि पेषणमिच्छन्त्येक इत्यर्थः । वीर्यवत्पुत्रकामिकार्यमाह—**कूर्मपित्तं चोपस्थे कृत्वा स यदि कामयेत वीर्यवान्स्यादिति विकृत्यैनमभिमन्त्रयते सुपर्णोऽसीति प्राग्विष्णुक्रमेभ्यः**—कूर्मपृष्ठानीर्मितं पात्रं कूर्मपित्तम् । उदकपूर्णशरावमित्यन्ये । स भर्ता यदि कामयेत अयं गर्भः शक्तिमान्स्यात् तदा भार्यायाः उत्सङ्गे कूर्मपित्तं निधाय विकृतिच्छन्दस्कया " सुपर्णोऽसि" इत्यनया प्राग्विष्णुक्रमेभ्यः " स्वः पत" इत्यन्तया उदरस्थं गर्भमभिमन्त्रयते, सगर्भमुदरं विलोक्य पठतीत्यर्थः ॥ इति चतुर्दशी काण्डिका ॥ १४ ॥ ॥ * ॥

अथ सीमन्तोन्नयनम् ॥ १ ॥ पुꣳसवनवत् ॥ २ ॥ प्रथमगर्भे मासे षष्ठेऽष्टमे वा ॥ ३ ॥ तिलमुद्गमिश्रꣳ स्थालीपाकꣳ श्रपयित्वा प्रजापतेर्हुत्वा पश्चादग्नेर्भद्रपीठ उपविष्टायां युग्मेन सटालुग्रप्सेनौदुम्बरेण त्रिभिश्च दर्भपिञ्जुलैस्त्र्येण्या शलल्या वीरतरशङ्कुना

पूर्णचात्रेण च सीमन्तमूर्ध्वं विनयति भूर्भुवः स्वरिति ॥ ४ ॥ प्रतिमहाव्याहृतिभिर्वा ॥ ५ ॥ त्रिवृतमाबध्नाति । अयमूर्ज्जावतो वृक्ष ऊर्ज्जीव फलिनी भवेति ॥ ६ ॥ अथाह वीणागाथिनौ राजानꣳ सङ्गायेतां यो वाऽप्यन्यो वीरतर इति ॥ ७ ॥ नियुक्तामप्येके गाथामुपोदाहरन्ति । सोम एव नो राजेमा मानुषीः प्रजाः । अविमुक्तचक्र आसीरंस्तीरे तुभ्यमसाविति यां नदीमुपावसिता भवति तस्या नाम गृह्णाति ॥ ८ ॥ ततो ब्राह्मणभोजनम् ॥ ९ ॥ १५ ॥

कर्कः–अथ सीमन्तोन्नयनम्–व्याख्यास्यत इति सूत्रशेषः । सीमन्तोन्नयनमिति संस्कारः । सच गर्भस्य तदभावेऽभाव इति, अतश्च प्रतिगर्भं क्रिया ॥ **पुंसवनवदिति**–यदहः पुंसा नक्षत्रेण चन्द्रमसो योगस्तदहरुपवास्याप्लाव्याहते वाससी परिधाप्येति च भवति न सर्वं लभ्यते । **प्रथमगर्भे मासे षष्ठेऽष्टमे वा**–द्वितीयादिषु गर्भेष्वनियमः । अपरे तु वर्णयन्ति सीमन्तोन्नयनं प्रथमगर्भ एवेति । अस्मिन्व्याख्याने द्वितीयादीनां गर्भाणां तत्संस्कारलोपः प्राप्नोति तस्मान्नैतदिष्यते । **तिलमुद्गमिश्रꣳ स्थालीपाकꣳ श्रपयित्वा प्रजापतेर्हुत्वेत्यादि भूर्भुवः स्वरित्येतदन्तं सूत्रम्**–तिलमुद्गानां स्थालीपाके मिश्रणमात्रम् न तत्प्राधान्यम् मिश्रणोपदेशात् । तेनैव स्थालीपाकेन प्राजापत्यो होमः । स चाज्यभागमहाव्याहृत्यन्तराले । तत एव स्विष्टकृत् प्राङ्महाव्याहृतिभ्यः स्विष्टकृदित्युक्तत्वात् । **पश्चादग्नेर्भद्रपीठ इति**–पश्चादग्नेर्भद्रपीठ इत्येवमाद्यन्ते भवति आगन्तुकत्वादन्ते निवेशः । भद्रपीठं मृदुपीठं तत्रोपविष्टायाः स्त्रिया युग्मेन सटालुग्रप्सेनौदुम्बरेण फलस्तबकेन त्रिभिश्च दर्भपिञ्जुलैस्त्र्येण्या शलल्या च वीर*तरशङ्कुना पूर्णचात्रेण च सीमन्तमूर्ध्वं विनयति, भूर्भुवः स्वरित्यनेन मन्त्रेण । विनयामीत्यध्याहारः साकाङ्क्षत्वात् । **प्रतिमहाव्याहृतिभिर्वा**–विनयनम् । वा शब्दो विकल्पार्थः । **त्रिवृतमाबध्नाति अयमूर्ज्जावतो वृक्ष ऊर्ज्जीव फलिनी भवेति**–त्रिवृतदेशं प्रतिवेण्याख्यं तस्मिन्नेतान्याबध्नाति अयमूर्ज्जावतो वृक्ष इत्यनेन मन्त्रेण । **अथाह वीणागाथिनौ राजानꣳ सङ्गायेतां यो वाऽप्यन्यो वीरतर इति**–ततश्च तौ राजसम्बन्धि सोत्साहौ गायतः, यो वाऽप्यन्यः कश्चिद्वीरतरस्तमिति । विकल्पोऽयम् । **नियुक्तामप्येके गाथामुपोदाहरन्ति सोम एव नो राजेमा इति**–एके आचार्या एनां गाथामुपोदाहरन्ति, एके नेति विकल्पः । असाविति च नामादेशः । **यां नदीमुपावसिता भवति तस्या नाम गृह्णाति ततो ब्राह्मणभोजनम्** ॥ १५ ॥ ॥ * ॥

जय०–अथ सीमन्तोन्नयनं–व्याख्यास्यत इति सूत्रशेषः । सीमन्तोन्नयनमिति संस्कारः । स च गर्भस्य तद्भवे भवति तदभावे चाभाव इति । अतएव "प्रतिगर्भं क्रियते" इति केचित् । **पुंसवन वदिति**–चन्द्रयुक्तपुन्नक्षत्रे उपवासाप्लावनाहतवासःपरिधापनान्येव भवन्ति नतु सर्वम् । तच्च प्रथमगर्भे षष्ठेऽष्टमे वा मासि द्वितीयादिष्वनियमः । अपरे तु 'प्रथम एव गर्भे' इत्याहुः । नैतत् द्वितीयादिगर्भाणां तत्संस्कारलोपापत्तेः । **तिलेति**–तिलमुद्गयोः स्थलीपाके मिश्रणमात्रं न तत्प्राधान्यम् मिश्रणोपदेशात्, तेनैव स्थालीपाकेनाज्यभागमहाव्याहृत्यन्तराले प्राजापत्यस्विष्टकृतौ हुत्वा प्राङ्महाव्यहृतिभ्यः स्विष्टकृदित्युक्तत्वात् ।

---

* आश्वत्थेन शङ्कुना ।

पश्चादग्नेरित्येवमादि सर्वमागन्तुत्वात् प्राशनान्ते भवति । भद्रपीठं मृदुपीठम्, तत्रोपविष्टायाः स्त्रियाः त्र्येण्या त्रिःश्वेता, वीरतरशङ्कुः, शरेषी, पूर्णं सूत्रेण चात्रं तर्कुः, युग्मेन द्व्यादियुगलसङ्ख्यान्वितेन सटालुग्रप्सेन आमफलैकस्तवकनिबद्धसर्वसमुदायेन विनयनं **भूर्भुवः स्वरिति**—मन्त्रेण केशविभजनं सकृत् । विनयामीत्यध्याहारः साकाङ्क्षत्वात् । **प्रतिमहाव्याहृतिभिर्वा**—विनयनम् । एवं विकल्पः । अथ मन्त्रार्थः। सर्वत्र प्रजापतिर्गायत्री उष्णिगनुष्टुभः अग्निवायुसूर्या विनयने० । भूरादिलोकान् तत्सुखं च तुभ्यं विनयामि प्रापयामीति । **त्रिवृतमिति**—त्रिभिर्वृत्यते ग्रथ्यते इति त्रिवृत् । वेणी तां प्रति तत्रैवेत्यर्थः । औदुम्बरादिपुञ्जमाबध्नाति भर्ता **अयमूर्जावत**—इति मन्त्रेण । अस्यार्थः । तत्र प्रजापतिर्यजुः फलिनी बन्धने० । हे सीमन्तिनि यतोऽयमूर्जावान् वृक्ष इति शेषः । अस्य चोर्जावतो वृक्षस्य ऊर्जीव सफलशाखेव त्वं फलिनी भव । **अथेति**—वेणीबन्धनानन्तरं वीणागाथिनौ वीणां गृहीत्वा गाथागायिनौ प्रति भर्ताऽऽह—किम्भवन्तौ राजानम् अन्यो वा यः कश्चिद्वीरतरः अतिशूरः तम् संप्रगायेतामिति । आत्मनेपदमार्षम् । एवं च गेये विकल्पः । **नियुक्तामिति** ॥ एके आचार्या नियुक्तां निगमविहितां गाथां मन्त्रम् उपोदाहरन्ति समीपे गायन्ति । एके नेति विकल्पः । अपिः समुच्चयार्थः । ततश्च गाथागानपक्षे द्वयम् । तामाह **सोम एवेति**—अस्यार्थः । तत्र प्रजापतिर्गायत्री सोमा गाने० सोमश्चन्द्र एव नोऽस्माकं प्रजानां राजा प्रभुः अत इमाः प्रजाः मानुषीर्मानुष्यः सौम्याः हे गङ्गादिनद्यः तुभ्यं तव सोमरूपायास्तीरे आसीरन् त्वामाश्रित्य स्थिताः, किम्भूते तीरे अविमुक्तचक्रे अनुल्लङ्घितशास्त्रे, अतो भवद्भ्यां पातव्या इति शेषः । **असाविति**—सीमन्तिनी यां नदीमाश्रिता भवति तन्नामादेशः ॥ १९ ॥ * ॥

हरि०—**अथ सीमन्तोन्नयनं पुꣳसवनवत्**—अथ पुंसवनानन्तरं क्रमप्राप्तं सीमन्तोन्नयनं गर्भसंस्कारकं कर्म व्याख्यास्यते। तच्च पुꣳसवनवत् पुन्नक्षत्रे भवति। **प्रथमगर्भे मासे षष्ठेऽष्टमे वा**—आद्यगर्भे गर्भाधानप्रभृतिषष्ठेऽष्टमे वा मासे नियमेन कुर्यात् । "गर्भान्तरेष्वनियमः" इति कर्कोपाध्यायः। अन्ये तु प्रथमगर्भ एवेति । तथाचाश्वलायनगृह्यपरिशिष्टे—"प्रथमे गर्भे सीमन्तोन्नयनसंस्कारो गर्भमात्रसंस्कारः" इति। "सकृत्संस्कृतसंस्काराः सीमन्तेन द्विजस्त्रियः । यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत्" इति हारीतो देवलश्च । "सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता ।" उपवासाप्लावनाहतवासोयुगपरिधापनानि वर्तिना गृह्यन्ते । **तिलमुद्गमिश्रꣳ स्थालीपाकꣳ श्रपयित्वा प्रजापतेर्हुत्वा**—तत्र विशेषमाह—तिलैर्मुद्गैर्मिश्रस्तिलमुद्गमिश्रस्तं स्थालीपाकमोदनं चरुं श्रपयित्वा आज्यभागान्ते प्रजापतये स्वाहेत्येकामाहुतिं हुत्वा स्विष्टकृदादि प्राशनान्तं विदध्यात् । **पश्चादग्नेर्भद्रपीठ उपविष्टायाम्**—अग्नेः पश्चिमतः भर्तुर्दक्षिणतः मृद्वासने आसीनायां गर्भिण्यां सत्याम् । **युग्मेन सटालुग्रप्सेनौदुम्बरेण त्रिभिश्च दर्भपिञ्जुलैस्त्र्येण्या शलल्या वीरतरशङ्कुना पूर्णचात्रेण च सीमन्तमूर्ध्वं विनयति भूर्भुवः स्वरिति प्रतिमहाव्याहृतिभिर्वा**—ततो भर्ता औदुम्बरेण उदुम्बरवृक्षोद्भवेन युग्मेन द्व्यादियुग्मफलवता, सटालुग्रप्सेन अपक्वफलैकस्तवकनिबद्धेन, त्रिभिश्च दर्भपिञ्जुलैस्त्रिभिर्दर्भपवित्रैश्च त्र्येण्या त्रिषु स्थानेषु श्वेता त्र्येणी तया त्र्येण्या शलल्या शल्यकाख्यपक्षकण्टकेन, वीरतरशङ्कुना शरेषीकया आश्वत्थेन वा शङ्कुना पूर्णचात्रेण च सूत्रेण पूर्णं चात्रं सूत्रकर्तनसाधनं तर्कुरिति यावत् । तेन लोहकीलकेन च । चकारः सर्वसमुच्चयार्थः । अतश्चौदुम्बरयुग्मादिभिः सर्वैः पुञ्जीकृतैः सीमन्तं स्त्रिया ऊर्ध्वं विनयति पृथक्करोति ललाटान्तरमारभ्य केशान् द्विधा करोति भूर्भुवःस्वर्विनयामि इत्येतावता मन्त्रेण सकृदेव । पक्षान्तरमाह—वा इति । प्रतिमहाव्याहृतिभिः विनयति । ततश्च भूर्विनयामि, भुवर्विनयामि,स्वर्विनयामि इत्येवं त्रिर्विनयनं भवति । अत्र व्याहृतिमन्त्रपदानामाख्यातपदं विना वाक्यस्यासम्पूर्णत्वात् आख्यातपदाध्याहारः कर्तव्यः । तत्र "विधियुक्तस्य मन्त्रभावः स्यात्" इति न्यायात् विनय-

तीति विधिपदं विपरिणम्य विनयामीत्यध्याह्रियते । **त्रिवृतमाबध्नाति**–त्रिवृतं वेणीं प्रति आबध्नाति पुञ्जीकृतमौदुम्बरादिपञ्चकं वेण्यां नियुनक्तीत्यर्थः । **अयमूर्ज्जावतो वृक्ष ऊर्ज्जीव फलिनी भवेति**–अनेन मन्त्रेण । **अथाह वीणागाथिनौ राजानꣳ सङ्गायेतां यो वाप्यन्यो वीरतर इति**–अथौदुम्बरादिपञ्चकस्य वेणीबन्धनानन्तरमाह–ब्रवीति किं हे वीणागाथिनौ राजानं भूपतिं सङ्गायेताम् राजवर्णनसम्बद्धं ध्रुवादिरूपकं सम्यग्गायेतां युवाम्, अथवा योऽन्योऽपि राजव्यतिरिक्तो वीरतरः प्रकृष्टो वीरः शूरस्तं सङ्गायेतामित्यनुषङ्गः इत्याह–ब्रवीति । **वियुक्तामप्येके गाथामुपोदाहरन्ति**–एके आचार्याः नियुक्तां गाने विहितां गाथां मन्त्रमुपोदाहरन्ति पठन्ति । अपिः समुच्चयार्थः । तत्पक्षे राजवीरतरयोरन्यतरगानं गाथागानं च समुच्चितं भवति । पक्षान्तरे राजवीरतरयोरन्यतरगानं गाथागानं वा तां गाथामाह–**सोम एव नो राजेत्यादितीरे तुभ्यमित्यन्ताम्** । **पद्धतिकारपक्षे** राजवीरतरगाथानां एकतमस्यैव गानं तत्पक्षे नियुक्तामपीत्यपिशब्दो विवक्षितार्थः स्यात् । **असाविति यां नदीमुपावसिता भवति तस्या नाम गृह्णाति**–ततो गर्भिणी यां नदीमुप समीपे आवसिता स्थिता भवति तस्या नद्या असाविति गङ्गा यमुना इत्येवं प्रथमान्तं नाम गृह्णाति । **ततो ब्राह्मणभोजनम्**–इत्युक्तार्थमिति सूत्रव्याख्या ॥१५॥

अथ सीमन्तोन्नयनप्रयोगः । तत्र प्रथमे गर्भे षष्ठेऽष्टमे वा मासि पुन्नक्षत्रे मातृपूजां वृद्धिश्राद्धं च कृत्वा बहिःशालायां पञ्चभूसंस्कारान्कृत्वा लौकिकाग्निमुपसमाधाय ब्रह्मोपवेशनाद्याज्यभागान्तं विदध्यात् । तत्र विशेषः । पात्रासादने आज्यानन्तरं तण्डुलतिलमुद्गानां क्रमेण पृथगासादनम् । उपकल्पनीयानि मृदुपीठं, युग्मान्यौदुम्बरफलानि एकस्तबकनिबद्धानि, त्रयो दर्भपिञ्जुलाः, त्र्येणी शलली, वीरतरशङ्कुः शरेषिका, आश्वत्थो वा शङ्कुः, पूर्णचात्रं वीणागाथिनौ चेति आज्यमधिश्रित्य चरुस्थाल्यां मुद्गान् प्रक्षिप्याधिश्रित्य ईषच्छृतेषु मुद्गेषु तिलतण्डुलप्रक्षेपं कृत्वा पर्यग्निकरणं कुर्यात् । तत आज्यभागान्ते स्थालीपाकेन प्रजापतये स्वाहेति हुत्वा इदं प्रजापतय इति त्यागं विधाय स्थालीपाकेनोत्तरार्द्धात्स्विष्टकृदाहुतिं हुत्वा, महाव्याहृत्यादिप्राजापत्यादिप्राजापत्यान्ता नवाहुतीर्हुत्वा संस्रवं प्राश्य पूर्णपात्रवरयोरन्यतरं ब्रह्मणे दत्त्वा पश्चादग्नेर्भद्रपीठं स्थापयित्वा गर्भिण्यां योषिति स्नातायां परिहिताहतवासोयुग्मायां भद्रपीठ उपविष्टायां युग्मेन सटालुग्रप्सेनौदुम्बरेण, त्रिभिश्च दर्भपिञ्जुलैस्त्र्येण्या शलल्या वीरतरशङ्कुना पूर्णचात्रेण चेति सर्वैः पुञ्जीकृतैः स्त्रियाः सीमन्तं भूर्भुवस्स्वर्विनयामीति ऊर्ध्वं विनयति मन्त्रेण सकृत् । यद्वा भूर्विनयामि भुवर्विनयामि स्वर्विनयामि इति त्रिर्विनयति, ततो विनयनसाधनमौदुम्बरादिपञ्चकं स्त्रिया वेण्यां बध्नाति । 'अयमूर्जावतो वृक्ष उर्जीव फलिनी भव' इति मन्त्रेण । अथ वीणागाथिनौ राजानं सङ्गायेतामिति प्रैषं ददाति, अथवा अमुकं वीरतरं सङ्गायेतामिति ततस्तौ यद्वानाय प्रेषितौ तं गायतः । अथवा वीणागाथिनौ सोमं राजानं सङ्गायेतामिति प्रेषितौ । सोम एव नो राजेमा मानुषीः प्रजाः अविमुक्तचक्र आसीरंस्तीरे तुभ्यमित्यन्तां गाथां वीणागाथिनौ गायतः । इति विकल्पः पक्षः । समुच्चयपक्षे राजानमन्यं वीरतरं वा सोमं राजानं च सङ्गायेतामिति प्रेषितौ उभयं गायतः, असौस्थाने समीपावस्थिताया गङ्गाप्रमुखाया नद्याः सम्बुद्ध्यन्तं गङ्गेत्यादिनाम गृह्णाति, गर्भिण्येव ततो ब्राह्मणभोजनं ददाति । अत्र "प्रथमगर्भे" इति वचनात् स्त्रीसंस्कारकर्मत्वाच्च न प्रतिगर्भं सीमन्तोन्नयनं, यतः–"सकृत्संस्कृतसंस्काराः सीमन्तेन द्विजस्त्रियः । यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत् ॥" इति स्मरणात् । न प्रतिगर्भं सीमन्तोन्नयम्, पुंसवनं तु दृष्टार्थत्वा द्भाष्यकरमते प्रतिगर्भं भवति ॥ १५ ॥ * ॥

गदा०–**अथ सीमन्तोन्नयनम्**–व्याख्यास्यत इति सूत्रशेषः । अथ सीमन्तोन्नयनमिति वक्ष्यमाणसंस्कारकर्मणो नामधेयम् । "गर्भसद्भावे क्रियमाणत्वात्तदभावे चाभावाद्गर्भसंस्कारोऽयम्" इति कर्कोपाध्यायाः । अतश्च तेषां मते प्रतिगर्भं क्रिया । तथाच **हेमाद्रौ कारिकायां** च विष्णुवचनम्–" सीमन्तोन्नयनं कर्म न स्त्रीसंस्कार इष्यते । " " कैश्चित्तु गर्भसंस्काराद्गर्भे गर्भे प्रयुज्यते " इति । "स्त्रीसंस्कारः" एवायमित्यन्ये । तथाच **देवलः**–" सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता " इति । **हारीतोऽपि** । "सकृत्संस्कृतसंस्काराः सीमन्तेन द्विजस्त्रियः ।

यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत्'' इति । **पुंसवनवत्**–अनेन यदहः पुंसा नक्षत्रेण चन्द्रमसो योगस्तदहरुपवास्याप्लाव्याहते वाससी परिधाप्येति लभ्यते । ननु सर्वमिति **कर्कः** । पुंसवनवदिति । यदहः पुंसा नक्षत्रेण चन्द्रमा युज्येत तदहरित्यर्थ इति **भर्तृयज्ञः** । **प्रथमगर्भे**–एतत्सीमन्तोन्नयनं प्रथमगर्भे आद्यगर्भे भवति । **आपस्तम्बः**–" सीमन्तोन्नयनं प्रथमे गर्भे चतुर्थे मासि '' इति । **शाङ्खायनगृह्ये**–''सप्तमे मासि प्रथमगर्भे सीमन्तोन्नयनम्'' इति । **आश्वलायनगृह्यपरिशिष्टे**–" प्रथमे गर्भे सीमन्तोन्नयनसंस्कारो गर्भमात्रसंस्कारः '' इति । **कर्कोपाध्यायैस्तु**–''प्रथमगर्भे मासे षष्ठेऽष्टमे वा'' इति सूत्रं योजयित्वा द्वितीयादिष्वनियम इत्युक्तम् । ननु प्रथमगर्भ एव सीमन्तोन्नयनसंस्कारे क्रियमाणे द्वितीयादिगर्भाणां तत्संस्कारलोपः स्यादिति चेत् मैवम् । " यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत्'' इति **हारीत**वचनादाद्यगर्भे संस्कारे कृते सर्वगर्भाणां संस्कार इति न संस्कारलोपः । अकृतसीमन्तायाः प्रसवे सत्यव्रतोक्तो विशेषः । " स्त्री यदाऽकृतसीमन्ता प्रसवेत्तु कथञ्चन । गृहीतपुत्रा विधिवत्पुनः-संस्कारमर्हति '' इति । **मासे षष्ठेऽष्टमे वा**–सीमन्तोन्नयनं गर्भधारणात् षष्ठे मासि अष्टमे वा भवति । **तिलमुद्गमिश्रꣳस्थालीपाकꣳश्रपयित्वा प्रजापतेर्हुत्वा पश्चादग्नेर्मद्रपीठ उपविष्टायां युग्मेन सटालुग्रप्सेनौदुम्बरेण' त्रिभिश्च दर्भपिञ्जुलैस्त्र्येण्या शलल्या वीरतरशङ्कुना पूर्णचात्रेण च सीमन्तमूर्ध्वं विनयति भूर्भुवः-स्वरिति**–तिलमुद्गानां स्थालीपाके मिश्रणमात्रं न तत्प्राधान्यं मिश्रणोपदेशात् । प्रयोजनं चान्तराये उपेक्षैव । त्यागोऽपि तद्व्यतिरिक्तस्यैव तिलैर्मुद्गैर्मिश्रस्तिलमुद्गमिश्रस्तं चरुं श्रपयित्वा आज्यभागानन्तरं प्रजापतये स्थालीपाकेनैकामाहुतिं हुत्वा स्थालीपाकेनैव स्विष्टकृदाहुतिं हुत्वा दक्षिणादानान्तं कृत्वा पश्चादग्नेर्मद्रपीठ उपविष्टायामग्नेः पश्चिमतः भर्तुर्दक्षिणतः मृदुपीठे आसीनायां गर्भिण्यां सत्यां युग्मेनौदुम्बरवृक्षोद्भवेन द्व्यादियुग्मफलवता सटालुग्रप्सेन अपक्वफलस्तबकानिबद्धेन सटालुमिति । अपक्वफलानामाख्या, ग्रप्सः स्तबकसङ्घातः, युग्मानि एकस्तबकबद्धानि औदुम्बरफलानि, तेन त्रिभिर्दर्भपवित्रैश्च त्र्येण्या शलल्या त्रिषु स्थानेषु श्वेता त्र्येणी तया त्र्येण्या शलल्या शलल्याख्यपक्षकण्टकेन, वीरतरशङ्कुना आश्वत्थेन शङ्कुना, पूर्णचात्रेण च सूत्रकर्तनसाधनभूतो लोहकीलस्तर्कुरपरपर्यायश्चात्रम्, तेन सूत्रपूर्णेन च चकार औदुम्बरफलस्तबकादिद्रव्यपञ्चकसमुच्चयार्थः । अतो द्रव्यपञ्चकेन स्त्रियाः सीमन्तमूर्ध्वं विनयति केशललाटयोः सन्धिमारभ्य ऊर्ध्वं केशान् पृथक्करोति द्विधा करोति भूर्भुवस्स्वरिति मन्त्रेण । सीमन्तशब्दो व्याख्यातो**ऽभिधानग्रन्थे**–''सीमन्तः कथ्यते स्त्रीणां केशमध्ये तु पद्धतिः '' इति । साकाङ्क्षत्वाद्विनयामीत्यध्याहारः पश्चादग्नेर्मद्रपीठ इत्येवमादि कर्मान्ते भवति आगन्तुकत्वात् । ''मद्रपीठशब्दो गोमयपीठे चतुरस्रे प्रसिद्धः'' इति **भर्तृयज्ञः** ॥ ''वीरतरशङ्कुः शरः'' इति **जयरामः** ''अश्वत्थशङ्कुः शरेषीका वा'' इति **हरिहरकारिकाकारौ** । ''अश्वत्थशङ्कुः'' इति **कर्कः** । ''खादिरः शङ्कुः इत्यपरे'' इति **गर्गपद्धतौ** । **प्रतिमहाव्याहृतिभिर्वा**–विनयनं सीमन्तस्य कार्यमित्यर्थः । वाशब्दो विकल्पार्थः । अत्रापि चाध्याहारः । तच्चैवम् । भूः विनयामि, भुवः विनयामि, स्वः विनयामि । **त्रिवृतमाबध्नाति अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भवेति**–त्रिभिर्वर्त्यते ग्रथ्यते इति त्रिवृत् वेणी तां प्राति तत्रैव औदुम्बरादिपुञ्जमाबध्नाति भर्ता 'अयमूर्जावत' इति मन्त्रेण । मन्त्रार्थः । हे सीमन्तिनि यतोऽयमूर्जावान् वृक्ष इति शेषः । अस्य चोर्जावतो वृक्षस्योर्जीव सफलशाखेव फलिनी भव । **अथाह वीणागाथिनौ राजानꣳ सङ्गायेतां यो वाऽप्यन्यो वीरतर इति**–अथ वेण्यां बन्धनानन्तरं वीणां गृहीत्वा गाथागायनौ प्रति कर्ता वीणागाथिनौ राजानꣳ सङ्गायेतामिति प्रैषमाह । ततश्च तौ ब्राह्मणावेव वीणागाथिनौ राजसम्बन्धि सोत्साहौ गायतः । अन्यो वा यः कश्चिद्वीरतर अतिशूरो नलादिस्तं सम्यग्गायेतामिति । आत्मनेपदमार्षम् । एवं च गेये विकल्पः । **नियुक्तामप्येके गाथामुपोदाहरन्ति सोम एव नो राजेमा मानुषीः प्रजाः अविमुक्तचक्रे आसीरंस्तीरे तुभ्यमसाविति**–एके आचार्या नियुक्तां गाने विहितां गाथां मन्त्रं सोम एव नो राजेति उपोदाहरन्ति समीपे गायन्ति । एके नेति अतश्च विकल्पः । अपिः समुच्चयार्थः । ततो गाथागानपक्षे राजसम्बन्धि वीरतरसम्बन्धि वा गानं गाथागानं च द्वयं भवति । केषाञ्चिन्मते राजवीरतरयोरन्यतरगानं गाथागानं वा । **पद्धतिकार**मते राजवीरतरगाथानामन्यतमस्य गानम् । असावित्यत्र नामादेशः । गाथागानमपि वीणागाथिनौ कुरुतः । मन्त्रार्थः । सोमश्चन्द्रः नोऽस्माकं प्रजानां राजा प्रभुः अत इमाः प्रजाः मानुषीर्मानुष्यः सौम्याः हे गङ्गादिनादि तुभ्यं तव सोमरूपायास्तीरे आसीरन् त्वामाश्रित्य स्थिताः । किंभूते तीरे अविमुक्तचक्रे अनुल्लङ्घितराज्ञाके अतो भवद्भ्यां पातव्या इत्यर्थः । **यां नदीमुपावसिता भवति**

तस्या नाम गृह्णाति–असावित्यत्र च सीमन्तिनी यां नदीमुपसमीपे आवसिता स्थिता भवति तस्या नद्याः गाथागानकर्ता गङ्गे यमुने इत्येवं नाम गृह्णाति । ततो **ब्राह्मणभोजनम्**–व्याख्यातं चैतत् । अत्र भोजन प्रायश्चित्तमुक्तम् , **पाराशरमाधवीये** धर्म्येन ।"ब्रह्मौदने च सोमे च सीमन्तोन्नयने तथा । जातकर्मनवश्राद्धे भुक्त्वा चान्द्रायणं चरेत् ॥" इदं च "कर्माङ्गब्राह्मणभोजनविषयम् । नत्विष्टकुटुम्बादिभोजनविषयम्" इति **मुरारिमिश्राः** । इति श्रीत्रिराग्निचित्सम्राट्स्थपति-श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे पञ्चदशी कण्डिका ॥ १५ ॥

सीमन्तोन्नयने **पदार्थक्रमः** । तच्च गर्भमासापेक्षया षष्ठेऽष्टमे वा मासि असम्भवे यावत्प्रसवं शुक्लपक्षे पुनर्वसु-पुष्याभिजिद्धस्तप्रोष्ठपदानुराधाऽश्विनीमूलश्रवणरेवतीरोहिणीमृगशिरःसञ्ज्ञकानाम् पुन्नक्षत्राणां चतुर्द्धा विभक्तानां मध्यमपादद्वये षष्ठयष्टमीद्वादशीचतुर्थीनवमीचतुर्दश्यमावास्याव्यतिरिक्तितिथौ सोमबुधबृहस्पतिशुक्रवारेषु चन्द्रानुकूल्ये विष्ट्यादिदोषाभावे शुभलग्नादौ कार्यम् । अत्राप्यधिकमासगुरुशुक्रास्तादीनां न दोषः । कालान्तरासम्भवे पूर्वान्नियतकालत्वात् । पुण्याहवाचनग्रहयज्ञाभ्युदयिकानि कृत्वा मङ्गलस्नातां परिहितप्रावृताहतवासोयुगलामलङ्कृतां पत्नीं स्वदक्षिणत उपवेश्य देशकालौ स्मृत्वा तनुरुधिरप्रिया लक्ष्मीभूतराक्षसीगणदूरनिरसनक्षमसकलसौभाग्यनिदानभूतमहालक्ष्मीसमावेशनद्वारा प्रतिगर्भं बीजगर्भसमुद्भवैनोनिबर्हणजनकातिशयद्वारा च श्रीपरमेश्वरप्रीत्यर्थं स्त्रींसंस्काररूपं सीमन्तोन्नयनाख्यं कर्म करिष्ये । इति सङ्कल्पं कुर्यात् । ततो बहिःशालायां पञ्च भूसंस्कारान्कृत्वाऽग्नेः स्थापनम् । वैकल्पिकावधारणम् । प्रतिमहाव्याहृतिभिर्विनयनम् । वीरतरस्य गानम् । ततो ब्रह्मासनाद्याज्यभागान्ते विशेषः । उपकल्पनीयानि । तिलाः, मुद्गाः, मृदुपीरम्, युग्मान्यौदुम्बरफलान्येकस्तबकानिबद्धानि । त्रीणि कुशपिञ्जुलानि । त्र्येणी शलली । वीरतरशङ्कुः । पूर्णचात्रम् । वीणागाथिनौ त्रैवर्णिकौ चेति । "ब्राह्मणौ वीणागाथिनौ" इति **प्रयोगरत्ने** । "नियुक्तगाथागानस्य विहितत्वाच्छूद्रस्य च तत्रानधिकारात्त्रैवर्णिकौ" इति वयम् । अधिश्रयणकाले स्थाल्यां मुद्गान्प्रक्षिप्याधिश्रित्य ईषच्छृतेषु मुद्गेषु तिलतण्डुलप्रक्षेपं कृत्वा पर्यग्निकरणादि कार्यम् । आज्यभागान्ते स्थालीपाकेन प्रजापतये स्वाहेति होमः इदं प्रजाप० । ततः स्थालीपाकेन स्विष्टकृद्धोमः । ततो भूराद्या नवाहुतयः । ततः प्राशनादिदक्षिणान्तम् । ततोऽग्नेः पश्चान्मद्रपीठ उपविष्टाया गर्भिण्या औदुम्बरादिभिः पूर्णचात्रान्तैः फलीकृतैः सीमन्तमूर्ध्वं विनयाति भूर्भुवःस्वर्विनयामि प्रतिमहाव्याहृतिभिर्वा विनयनम् । भूः विनयामि । भुवः विनयामि । स्वः विनयामि । ततो भर्ता अयमूर्जावत इति औदुम्बरादिपञ्चकं तस्याः वेण्यां बध्नाति । "वीणागाथिनौ राजान१ सङ्गायेताम्" इति प्रैषः । ततस्त्रैवर्णिकौ वीणागाथिना राजवर्णनसम्बन्धि गानं कुरुतः । अथवाऽन्यो नलादिस्तस्य गानम् । तस्मिन्पक्षे "नलादिकं सङ्गायेतामिति प्रैषः" इति **गर्गपद्धतौ** । नियुक्तगाथागानं वा । तत्र सामगानापरिज्ञाने "मन्त्रमात्रं पठेताम्" इति **प्रयोगरत्ने** । तस्मिन्पक्षे प्रैषाभाव इति **गर्गपद्धतौ** । नियुक्तगाथागानेऽपि प्रैषः । "सोम १ राजान १ सङ्गायेताम्" इति **हरिहरः** । "नद्या नामग्रहणं गर्भिणीकर्तृकम्" इति तत्पद्धतौ । ततो ब्राह्मणभोजनम् । इति **पदार्थक्रमः** । अथ **गर्ग**मते विशेषः । मातृपूजापूर्वकमाभ्युदयिकम् । अग्नेः स्थापनम् । ब्रह्मासनाद्याज्यभागान्ते विशेषः । आसादने तण्डुलानन्तरं तिलाः । मुद्गाः । मद्रपीठम् । औदुम्बरादिपञ्चकम् । वीणागाथिनौ चेति । ग्रहणात्प्राक् तण्डुलानां तिलमुद्गाभ्यां मिश्रणम् । ग्रहणे प्रजापतये जुष्टं गृह्णामि । प्रोक्षणे त्वाधिकः । आज्यभागान्ते प्रजापतये स्वाहेति स्थालीपाकस्य होमः । ततोऽग्नेः पश्चान्मद्रपीठनिधानम् । ततस्तां गर्भवतीं स्नापयित्वाऽहते वाससी परिधाप्य मद्रपीठ उपवेशयेत् । तत औदुम्बरादिपञ्चद्रव्यैर्गर्भिण्याः सीमन्तविनयनम् । विनयामीत्यध्याहारः । ततः पादाङ्गुष्ठेन सूत्रमाक्रम्य मस्तकं यावत्सूत्रं मीत्वा तन्नवगुणं कृत्वा तस्मिन्सूत्रे औदुम्बरादिपञ्चकं बद्ध्वा तस्यास्तु नाभेरुपरि यथा भवति तथा कण्ठे प्रतिमुञ्चते "अयमूर्जावतो वृक्ष" इत्यनेन मन्त्रेण । गानप्रैषः । राज्ञो गानम् । नालादेर्वा गानम् । नलादिकं सङ्गायेतामिति प्रैषः । नियुक्तगाथागानं वा । नास्मिन्पक्षे प्रैषः । असावित्यत्र गङ्गे इत्येवं नाम गृह्णाति स्त्र्येव । ततः स्विष्टकृदादि ब्राह्मणभोजनान्तम् । दाक्षिणादानान्ते मद्रपीठ उपवेशनादि कार्यमिति **वासुदेवः** । एतदुभयं समूलमतो यथारुच्यनुष्ठेयमिति **गर्गपद्धतौ** । इति **गर्गमते** विशेषः । अथ **गर्भिणीधर्माः** । **कारिकायाम्**–"अङ्गारभस्मास्थिकपालचुल्लीशूर्पादिकेषूपविशेन्न नारी । सोलूखलाद्ये दृषदादिके वा यन्त्रे तुषाद्ये न तथोपविष्टा ॥ नो मार्जनीगोमयपिण्डकादौ मूत्रं पुरीषं शयनं च कुर्यात् । नो मुक्तकेशी विवशाऽथवा स्यान्नुङ्क्ते न सन्ध्यावसरे न शेते ॥ नामङ्गलं वाक्यमुदीरयेत्सा शून्यालयं वृक्षतलं न यायात् । " **प्रयोगपरिजाते**–" गर्भिणी कुञ्जराश्वादिशैलहर्म्यादिरोहणम् । व्यायामं शीघ्रगमनं

शकटारोहणं त्यजेत् ॥ शोकं रक्तविमोक्षं च साध्वसं कुक्कुटासनम् । व्यवसायं दिवास्वापं रात्रौ जागरणं त्यजेत् ॥" **वराहः**–"सामिषमशनं यत्नात्प्रमदा परिवर्जयेत्" अतः प्रभृति **याज्ञवल्क्यः**–"दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुयात् । वैरूप्यं मरणं वाऽपि तस्मात्कार्यं प्रियं स्त्रियः ॥" दौहृदं गार्भिणीप्रियम् । **मदनरत्ने**–"हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा । कूर्पासकं च ताम्बूलं माङ्गल्याभरणं शुभम् ॥ केशसंस्कारकबरीकण्ठकर्णविभूषणम् । भर्तुरायुष्यमिच्छन्ती दूरयेद्गर्भिणी न हि ॥" **बृहस्पतिः**–"चतुर्थे मासि षष्ठे वाऽप्यष्टमे गर्भिणी यदा । यात्रा नित्यं विवर्ज्या स्यादाषाढे तु विशेषतः ॥" अथ **गर्भिणीपतिधर्माः** । **आश्वलायनः**–"वपनं मैथुनं तीर्थं वर्जयेद्गर्भिणीपतिः । श्राद्धं च सप्तमान्मासादूर्ध्वं चान्यत्र वेदवित् ॥" श्राद्धं तद्भोजनमिति **प्रयोगपारिजाते । रत्नसङ्ग्रहे** । "दहनं वपनं चैव चौलं वै गिरिरोहणम् । नाव आरोहणं चैव वर्जयेद्गर्भिणीपतिः" "प्रव्यक्तगर्भापतिरङ्घियानं मृतस्य वाहं क्षुरकर्मसङ्गम्" इति तत्रैवोक्तम्, न कुर्यादित्युत्तरार्द्धेनान्वयः । **मुहूर्तदीपिकायाम्**–"क्षौरं तथानुगमनं नखकृन्तनं च युद्धादिवास्तुकरणं त्वातिदूरयानम्" इति । नो भवेदिति शेषः । इति **गर्भिणीपतिधर्माः** । इति श्रीत्रिरग्निचित्सम्राट्स्थपति–श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये सीमन्तोन्नयनपदार्थक्रमः ॥ ॥ १५ ॥ ॥ * ॥

विश्व०–अथ सीमं........पुंसवनवत्–अथ पुंसवनानन्तरं सीमन्तोन्नयनमिति कर्मनामधेयं, पुंसवनवदित्यनेन पुंनक्षत्राद्यतिदेशः । **प्रथम......ऽष्टमे वा**–गर्भान्तरे सीमन्तोन्नयनानिवृत्त्यर्थं प्रथमपदम् । "आद्ये गर्भे नियमः । गर्भान्तरेष्वनियम" इति **कर्कोपाध्यायाः** । **तिलमुद्ग......हुत्वा** वैश्वदेवपूर्वं मातृश्राद्धं कृत्वा भार्यायाः स्नानं वस्त्रयोः परिधानं च । ततो भर्त्ता उपलिप्त उद्धतावोक्षिते लौकिकाग्निं स्थापयेद्बहिःशालायाम् । ततो दक्षिणतो ब्रह्मासनमित्यन्वारभ्य तिलैर्मुद्गैर्मिश्रं स्थालीपाकमोदनं चरुमाज्यभागान्तं परिभाषाशास्त्रविधिना संपाद्य स्थालीपाकेन प्रजापतेर्हुत्वेत्यर्थः । तत्र विशेषः । पात्रासादने तण्डुलानन्तरं तिलमुद्गासादनम्, युग्मफलसंबद्धमौदुम्बरं काष्ठम्, गोमयनिर्मितं भद्रपीठं चतुरस्रं मृदुवस्त्राद्यान्वितं पीठं वा । दर्भपिञ्जूलत्रयम्, त्र्येणी शलली, वीरतरः, शङ्कुः आयसः खादिरो वा, पूर्णचात्रं, वीणाद्वयं गाथिनश्च, तिलमुद्गमिश्रिततण्डुलग्रहणम् । प्रजापतये जुष्टं गृह्णामि, प्रोक्षणे त्वाशब्दोऽधिकः । आज्यभागान्तं प्रकृतिवत् । ततः स्थालीपाकेन प्रजापतेर्हुत्वा इदं प्रजापतय इति त्यागं विदध्यात् । **पश्चादग्नेर्भद्रपीठ उपविष्टायां युग्मेन सटालुग्रप्सेनौदुम्बरेण त्रिभिश्च दर्भपिञ्जूलैस्त्रेण्या शलल्या वीरतरशङ्कुना पूर्णचात्रेणच सीमन्तमूर्ध्वं विनयति भूर्भुवःस्वरिति प्रतिमहाव्याहृतिभिर्वा**–अग्नेः पश्चाद्भर्तुर्दक्षिणतः मृद्वासने आसीनायां द्व्यादिफलवता अनाप्तपाकफलस्तोमवता औदुम्बरवृक्षोद्भवेन त्रिभिर्दर्भतृणैः, चकारः समुच्चयार्थः । त्रेण्या शलल्या, वीरतरशङ्कुना खादिरेण आयसेन वा पूर्णसूत्रेण चात्रेण कर्तनसाधनविशेषेण सीमन्तमूर्ध्वं विनयति । ललाटमारभ्य शिरःप्रदेशं यावत् । भूर्भुवःस्वर्विनयामीत्येवं भूर्विनयामि,भुवर्विनयामि, स्वर्विनयामीत्येवं प्रतिमहाव्याहृतिभिर्वा । **त्रिवृतमाबध्नात्ययमूर्जावतो वृक्ष उर्जीव फलिनी भवेति**––पादाङ्गुष्ठमारभ्य ललाटान्तामितं सूत्रं त्रिवृतं नव वै त्रिवृदिति श्रुतत्वान्नववृतं गुम्फितानेकोदुम्बरफलं हाराकृतिना बध्नाति । यथा नाभिमातिक्रामाति तथा कण्ठे क्षिपतीत्यर्थः । मन्त्रमाह–**अयमूर्जावत**–इति । इतिशब्द; मन्त्रसमाप्तिद्योतकः । **अथाह वीणागाथिनौ राजानꣳ संगायेतां यो वाप्यन्यो वीरतर इति**––ततस्तौ यथाप्रेषितं गानं कुरुतः । अपिः समुच्चये । **नियुक्तामप्येके गाथामुपोदाहरन्ति**—एके आचार्याः नियुक्तां गर्भसंस्कारकसीमन्तकालिकगाने विहितां गाथां मन्त्रमुपोदाहरान्ति तद्गानमिच्छन्ति । पूर्वप्रेषितगानसमुच्चयार्थोऽपिर्विकल्पार्थो वा । अभिलषितगानगोचरां गाथामाह—**सोम एव नो राजेत्यादि तीरे तुभ्यमित्यन्ताम्** । असाविति यां नदीमुपावसिता भवति तस्या नाम गृह्णाति । प्रथमान्तमसाविति गङ्गे यमुने नर्मदेत्येवं यस्याः नद्याः समीपे गर्भिणी स्थिता भवाति तस्याः नाम गर्भिण्येव उच्चारयतीत्यर्थः । **ततो ब्राह्मणभोजनम्**—स्विष्टकृद्धोमादि ब्राह्मणभोजनान्तम् । ब्राह्मणाश्चात्र दश । गर्भिण्याः संस्कार्यत्वान्न प्रतिगर्भं । सीमन्तोन्नयनम्, गर्भस्यैव संस्कार्यत्वात्प्रतिगर्भमित्यप्यन्ये । इति पञ्चदशी कण्डिका ॥ १५ ॥

सोष्यन्तीमाद्भिरभ्युक्षाति । एजतु दशमास्य इति प्राग्यस्यैत इति ॥ १ ॥ अथावरावपतनम् । अवैतु पृश्नि शेवलꣳ शुने जराय्वत्तवे । नैव माꣳसेन पीवरीं न कस्मिंश्चनायतनमवजरायु पद्यतामिति ॥२॥ जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननायुष्ये करोति ॥ ३ ॥

अनामिकया सुवर्णान्तर्हितया मधुघृते प्राशयाति घृतं वा भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति ॥ ४ ॥ अथास्यायुष्यं करोति ॥ ५ ॥ नाभ्यां दक्षिणे वा कर्णे जपति । अग्निरायुष्मान्त्स वनस्पतिभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । सोम आयुष्मान्त्स ओषधीभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । ऋषय आयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । पितर आयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । यज्ञ आयुष्मान्त्स दक्षिणाभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । समुद्र आयुष्मान्त्सस्रवन्तीभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमीति ॥ ६ ॥ त्रिस्त्रिस्त्र्यायुषमिति ॥ ७ ॥ स यदि कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेत् ॥ ८ ॥ दिवस्परीत्येतस्यानुवाकस्योत्तमामृचं परिशिनष्टि ॥ ९ ॥ प्रतिदिशं पञ्चब्राह्मणानवस्थाप्य ब्रूयादिममनुप्राणितेति ॥ १० ॥ पूर्वो ब्रूयात्प्राणेति ॥ ११ ॥ व्यानेति दक्षिणः ॥ १२ ॥ अपानेत्यपरः ॥ १३ ॥ उदानेत्युत्तरः ॥ १४ ॥ समानेति पञ्चम उपरिष्टादवेक्षमाणो ब्रूयात् ॥ १५ ॥ स्वयं वा कुर्यादनुपरिक्राममविद्यमानेषु ॥ १६ ॥ स यस्मिन्देशे जातो भवति तमभिमन्त्रयते । वेद ते भूमिहृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतमिति ॥ १७ ॥ अथैनमभिमृशत्यश्मा भव परशुर्भव हिरण्यमस्तुतं भव । आत्मा वै पुत्रनामाऽसि स जीव शरदः शतमिति ॥१८॥ अथास्य मातरमभिमन्त्रयत इडासि मैत्रावरुणी वीरे वीरमजीजनथाः । सा त्वं वीरवती भव याऽस्मान्वीरवतोऽकरदिति ॥१९॥ अथास्यै दक्षिणꣳस्तनं प्रक्षाल्य प्रयच्छतीमꣳस्तनमिति ॥२०॥ यस्ते स्तन इत्युत्तरमेताभ्याम् ॥२१॥ उदपात्र शिरस्तो निदधात्यापो देवेषु जाग्रथ यथा देवेषु जाग्रथ॥ एवमस्याꣳ सूतिकायाꣳ सपुत्रिकायां जाग्रथेति ॥२२॥ द्वारदेशे सूतिकाग्निमुपसमाधायोत्थानात्सन्धिवेलयोः फलीकरणमिश्रान्सर्षपानग्नावावपति शण्डा मर्का उपवीरः शौण्डिकेय उलूखलः । मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा । आलिखन्ननिमिषः किं वदन्त उपश्रुतिर्हर्यक्षः कुम्भी शत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहेति ॥२३॥ यदि कुमार उपद्रवेज्जालेन प्रच्छाद्योत्तरीयेण वा पिताऽङ्क आधाय जपति कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः । चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् । यत्ते देवा वरमददुः स त्वं कुमारमेव वा वृणीथाः । चेच्चे-

च्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् । यत्ते सरमा माता सीसरः पिता श्यामशबलौ भ्रातरौ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वरेति ॥ २४ ॥ अभिमृशाति न नामयति न रुदाति न हृष्याति न ग्लायति यत्र वयं वदावो यत्र चाभिमृशामसीति ॥ २५ ॥ १६ ॥

कर्कः—**सोष्यन्तीमद्भिरभ्युक्षत्येजतु दशमास्य इति प्राग्यस्यैत इति**—"षूङ् प्राणिगर्भविमोचने।" गर्भं विमुञ्चन्तीं विजनयन्तीमित्यर्थः। अद्भिरभ्युक्षति। "एजतु दशमास्यः" इत्यनेन मन्त्रेण प्राग्यस्यैत इति-चोच्यते। प्रकरणे पाठाभावात् । परिसमाप्तत्वाच्च वाक्यस्य। **अथावरावपतनम्**—मन्त्रं जपतीत्यध्याहारः । अवरेति जरायुविशेषः अभिधानात् । तस्याधःपतने जपः पितुः । **अवैतु पृश्नि शेवलमित्यस्य** । **जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननायुष्ये करोति अनामिकया सुवर्णान्तर्हितया मधुघृते प्राशयति घृतं वा भूस्त्वयि दधामीति**—अनेन मन्त्रेण । प्रतिवाक्यमित्यपरे । अच्छिन्ने नाले एतत् क्रियते । कुमारग्रहणाच्च स्त्रिया अतःप्रभृति न क्रियते । **अथास्यायुष्यं करोति नाभ्यां दक्षिणे वा कर्णे जपति अग्निरायुष्मानिति**—अधिकरणसप्तम्यभावात्समीपसप्तमीयम् । गङ्गायां गावो यथा । त्रिरेतज्जपति । त्र्यायुषमिति च त्रिरेव । यदि दैवान्मानुषादपचारान्मेधाजननं स्वकाले न कृतं तथाप्यायुष्यकरणं भव*त्येव । मेधाजननस्य हि कालः श्रूयते । "तस्मात्कुमारं जातं घृतं वै वाऽग्रे प्रतिलेहयन्ति स्तनं वाऽनुधापयन्ति" इति । **स यदि कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेत्** । **दिवस्परीत्येतस्यानुवाकस्योत्तमामृचं परिशिनष्टि**—दिवस्परीत्येतस्योत्तमामृचं परिशेषयित्वाऽवशिष्टं वात्सप्रमुच्यते । **प्रतिदिशं पञ्चब्राह्मणानवस्थाप्य ब्रूयादिममनुप्राणितेति**—प्रतिदिशमेकैकमेवं ब्राह्मणानामवस्थापनं कुमारस्य । तत्र पूर्वं तान्प्राति ब्रूयात् इममनुप्राणितेति । **पूर्वो ब्रूयात्प्राणेति** । **व्यानेति दक्षिणः** । **अपानेत्यपरः** । **उदानेत्युत्तरः** । **समानेति पञ्चम उपरिष्टादवेक्षमाणो ब्रूयात्** । **स्वयं वा कुर्यादनुपरिक्राममविद्यमानेषु**—अविद्यमानेषु ब्राह्मणेषु स्वयमेव करोत्यनुपरिक्रम्यानुपरिक्रम्य । **स यस्मिन्देशे जातो भवति तमभिमन्त्रयते वेद ते, भूमीत्यनेन मन्त्रेण** । **अथैनमभिमृशत्यश्मा भव परशुर्भवेति**—अनेन मन्त्रेण । वात्सप्राभिमर्शनाद्येतदभिमर्शनान्तं कालव्यतिक्रमेणापि क्रियते तत्संस्कारत्वात् । **अथास्य मातरमभिमन्त्रयते इडासीत्यनेन**—मन्त्रेण । **अथास्यै दक्षिणं स्तनं प्रक्षाल्य प्रयच्छति इमꣳ स्तनमित्यनेन मन्त्रेण** । **यस्ते स्तन इत्युत्तरमेताभ्याम् ऋग्भ्याम्** । द्विवचनोपदेशाच्च इमꣳ स्तनमिति, यस्ते स्तनमिति च द्वितीये । स्तनसमर्पणं च पीतस्तनस्य न भवति । **उदपात्रꣳ शिरस्तो निदधाति आपो देवेषु जाग्रथेत्यनेन मन्त्रेण** । एतच्च प्रागुत्थानाद्भवत्येव । **द्वारदेशे सूतिकाग्निमुपसमाधायोत्थानात्सन्धिवेलयोः फलीकरणमिश्रान्सर्षपानग्नावावपति शण्डा मर्का**—इति प्रतिमन्त्रम् । फलीकरणाः कणाः सर्ष-

---

* "अनुप्राणनवात्सप्राभिमर्शनानुमन्त्रणे । कालान्तरेऽपि कुर्वीत आयुष्यकरणं तथा "। कर्तव्यमिति ॥

पाश्च । आवपनोपदेशाच्च होमेतिकर्तव्यता न भवति । **यदि कुमार उपद्रवेज्जालेन प्रच्छाद्योत्तरीयेण वा पिताऽङ्क आधाय जपति कूर्कुरस्सुकूर्कुर**–इत्यनेन मन्त्रेण । **अभिमृशति न नामयति न रुदति न हृष्यति न ग्लायति यत्र वयं वदामो यत्र चाभिमृशामसीत्यनेन मन्त्रेण** । कुमारशब्देन कुमारग्रहोऽभिधीयते ॥ १६ ॥

जय०–सोष्यन्तीं गर्भं मुञ्चन्तीं प्रसवशूलवतीमित्यर्थः । “ षूङ् प्राणिगर्भविमोचने ” **अद्भिरभ्युक्षति**–भर्ता वक्ष्यमाणमन्त्रेण । मन्त्रमाह–**एजतु दशमास्य इति । प्रागयस्यैत इति**–प्रकरणे पाठक्रमाभावाद्वाक्यस्य च परिसमाप्तत्वादुच्यते । तत्र प्रजापतिर्महापङ्क्तिर्गर्भः अभ्युक्षणे० । **अथावरावपतनम्**–मन्त्रं जपतीत्यध्याहारः । अवरो जरायुविशेषः तस्य अव अधः पतनं पतनहेतुं मन्त्रं जपति पिता । तमाह **अवैत्विति**–तस्यार्थः । तत्र प्रजापतिर्बृहती अग्निरवपतने० । हे सोष्यन्ति तव जरायु अव अधः एतु आयातु पतत्वित्यर्थः । किम्भूतम् पृश्नि अग्निरूपम् नानारूपं वा । शेवलं पिच्छलं जलोपचितं वा । किमर्थम्, शुने श्वानमुपकर्तुम् । यद्वा शुने इति षष्ठ्यर्थे चतुर्थी । शुनोऽत्तवे भक्षणाय । हे पीवरि पुत्रादिगर्भधारणेन सुपुष्टगात्रि तच्च जरायु मांसेन गर्भव्यथकावयवेन सह आयतं सम्बद्धं विस्तृतं वा । अव अधः नैव मैव पद्यतां पततु । न च कस्मिँश्चन गर्भोपघाते निमित्ते सत्यपीति । **जातस्येति**–तस्य नालच्छेदात्प्राक् मधुघृते मिलिते असम्भवे घृतमेव वा प्राशयति सकृत्पिता । **भूस्त्वयि इत्यादि सर्वं त्वयि दधामि**–इत्यन्तेन मन्त्रेण । प्रतिवाक्यमित्यपरे । कुमारग्रहणादतःप्रभृति स्त्रिया न भवति । अथ मन्त्रार्थः । सर्वासां प्रजापतिः क्रमेण गायत्र्युष्णिगनुष्टुभः, अग्निवायुसूर्याः प्राशने० । ‘भूरादिव्याहृतित्रयेणोपलक्षितं वेदत्रयं सर्वोपलक्षितमर्थत्रयेणोपलक्षितम् अथर्ववेदं च त्वयि दधामि स्थापयामि । यद्वा वेदत्रयं लोकत्रयं च त्वदधीनं स्थापयामि’ इति । अस्य कुमारस्य आयुष्यमेवाह नाभ्यामित्यादि करोतीत्यभिमन्त्रणं यावत्, नाभ्यां स्थितेरसम्भवान्नाभेः कर्णस्य वा समीपे स्थित्वा **अग्निरायुष्मानित्याद्यष्टौ**–मन्त्राँस्त्रिर्जपति पिता । अथ मन्त्रार्थः । तत्र सर्वेषां प्रजापतिर्गायत्री लिङ्गोक्ता आयुष्यकरणे० । अग्निः कारणात्मना आयुष्मानरित । स च वनस्पतीभिरिध्मसमिद्भिरिष्ट आयुष्मान् आयुष्मत्त्वहेतुर्भवति वनस्पतिभिः कृत्वेति वा तेन अग्न्यायुषा त्वा त्वाम् आयुष्मन्तं निर्दुष्टदीर्घायुषं करोमीति वाक्यार्थ उत्तरत्रापि सम्बध्यते । एवं सोमोऽपि व्याख्येयः । स च ओषधीभिरिति सन्धि*रार्षः । २ । ब्रह्म वेदः ब्राह्मणैरध्येतृभिः । ३ । देवाः अमृतेन सुधया । ४ । ऋषयो व्रतैः कृच्छ्रादिभिः ॥ ५ ॥ पितरः स्वधाभिः तृप्तिजनकमन्त्रैः । ६ । यज्ञो दक्षिणाभिः परिक्रयद्रव्यैः । ७ । समुद्रः स्रवन्तीभिर्नदीभिरित्येतावान्विशेषः । ८ । एतानष्टौ मन्त्राँस्त्रिर्जपति । **त्र्यायुषमिति च**–त्रिरेव । यदि चास्य मेधाजननं स्वकाले न कृतं विघ्नवशात्तर्हि तिष्ठत्येव तस्य नियतकालत्वात् । तथा च श्रूयते–“तस्मात्कुमारं जातं घृतं वै वाऽग्रे प्रतिलेहयन्ति स्तनं वाऽनुधापयन्ति” इति अपीतस्तनस्यैतत् आयुष्यन्तु भवत्येव । स पिता यदि कामयेत अयं सर्वं शतवर्षमायुरियात्प्राप्नुयादिति तर्हीदं काम्यमुच्यते । उत्तमां चरमामृचं परिशेषयित्वा तत्रावशिष्टं वात्सप्रमत्र गृह्यते । तत्र द्वादशानां वत्सप्रीर्भालन्दनः त्रिष्टुप् । अग्निरभिमर्शने० प्रतिदिशमवस्थापितान् पञ्चब्राह्मणान्प्रति पिताह–भो ब्राह्मणा इमं कुमारमनुप्राणित अनुकूलप्राणं मन्त्रैः कुरुतेति । ततस्ते ब्राह्मणाः प्राणेत्याद्याहुः । क्रमेण अविद्यमानेषु विप्रेषु स्वयमेव अनुपरिक्रामम् परिक्रम्य परिक्रम्य । अथ मन्त्रार्थः । भो कुमार त्वं प्राण सुस्थितप्राणो भव ।

---

* सौषधीभिरिति सूत्रपाठभिप्रायेण ।

एवमुपर्यपि । तत्र सर्वाङ्गेषु सुस्थो व्यानः, गुदे सुस्थोऽपानः, कण्ठे सुस्थ उदानः, नाभौ सुस्थः समानो भवेति स्थानभेदः । एवमेते वायवोऽस्य सुजीवनं कुर्वन्त्विति वाक्यार्थः । स कुमारो यत्र प्रदेशे जातस्तं **वेद त इति**–मन्त्रेण मन्त्रयते । वेद त इति प्रजापतिरनुष्टुप्, भूमिस्तदभिमन्त्रणे० । हे भूमे कुमारजन्मप्रदेश तव हृत् यदुपकरणम् अयं प्रत्यगात्मा सूर्यः भूमिश्च कुमारश्चवेद जानाति विसर्गाभावश्छान्दसः, किम्भूतम् दिवि द्युलोके वर्तमाने चन्द्रमसि प्रसादरूपेण श्रितं स्थितम् तत्कर्मभूतमहं वेद जानामि । तत्कर्तृभूतम् एवम्पुनरुपकर्तुं मां विद्याज्जानातु, अतस्त्वद्दत्तपुत्रेण सह वयं पश्येमेत्याद्युक्तार्थम् । अथैनं कुमारं पिताऽभिमृशति हृदि स्पृशति **अश्मा भवेति**–मन्त्रेण । अस्यार्थः । तत्र प्रजापतिरनुष्टुप् लिङ्गोक्ता अभिमर्शने० । हे कुमार त्वम् अश्मा मणिरिव दृढः प्रियश्च भव, परशुर्वज्र इवापकर्तृनाशको भव । किञ्च अस्रुतं अनभिभूतम् अप्रच्युतस्वरूपमिति यावत् । हिरण्यम् हिरण्यवत्तेजोयुक्तः स्पृहणीयश्च भव, यथा धात्वन्तरासम्भिन्नं सुवर्णं शुद्धं भवति तथा त्वमपि रोगाद्युपद्रवहीनो भवेत्यर्थः । यतस्त्वं पुत्रनामा आत्माऽसि अतः स त्वम् वै निश्चयेन शतं शरदो जीव प्राणिहि । वात्सप्राभिमर्शनाद्येतदभिमर्शनान्तं कर्म कालातिक्रमेऽपि भवति संस्कारत्वात् । अथास्य मातरं कुमारस्य प्रसूम् अभि अभिमुखो भूत्वा मन्त्रयते मन्त्रश्रावणेन संस्करोति **इडासीति**–मन्त्रेण । अस्यार्थः । तत्र प्रजापतिरनुष्टुप् इडाभिमन्त्रणे० । हे वीरे वीरवति पुत्रवतीति यावत् । त्वमिडा मानवी यज्ञपात्री तद्गतद्रव्यं चासि मैत्रावरुणी मित्रावरुणयोरंशोत्पन्ना । यथा इडायां पुरूरवा उत्पन्नः । यथा च यज्ञपात्र्यां तद्द्रव्ये वा पुरोडाशो भवति तथा त्वय्यपि तादृशाः स्वर्गादिसाधनपराः पुत्राः सन्त्वित्यभिप्रायः । यतस्त्वं वीरं पुत्रमजीजनथाः असौषीः, अतः सा त्वं वीरवती जीवपतिपुत्रा भव, या त्वमस्मान्वीरवतः जीवबहुपुत्रान् अकरत् अकरोः । अथास्यै अस्या मातुर्दक्षिणं स्तनं स्वयं प्रक्षाल्य कुमाराय प्रयच्छति ददाति पिता । **इमꣳस्तनमिति**–मन्त्रेण।उत्तरं वामम् **इमꣳस्तनं यस्ते स्तन**–इत्येताभ्यां मन्त्राभ्यां द्विवचनोपदेशात् । तत्राद्ये प्रजापतिस्त्रिष्टुप् अग्निर्द्वितीये दीर्घतमा त्रिष्टुप् वाक्स्तनदाने० । उदपात्रं सजलं शरावं, शिरस्तः सूतिकायाः शिरःप्रदेशे खट्वाऽधस्तान्निदधाति । **आपो देवेष्विति**–मन्त्रेण । तच्चोत्थानपर्यन्तं तिष्ठति । अथ मन्त्रार्थः । तत्र प्रजापतिरनुष्टुप् आपो जलपात्राधाने० । हे आपः जीवनादिहेतवः यूयम् देवेषु देवकार्यनिमित्तं जाग्रथ तत्साधनत्वेन तिष्ठथ, अतो यथा देवेषु जाग्रथ एवं तथा अस्यां सूतिकायां सूतिकाहिते जाग्रथ जाग्रतेत्यर्थः । पुरुषव्यत्ययश्छान्दसः । किम्भूतायां सपुत्रिकायां पुत्रादिसहितायाम्, द्वारदेशे सूतिकागृहस्य च होमः । प्रतिमन्त्रं फलीकरणास्तण्डुलकणाः आवपनोपदेशान्नचात्र होमेतिकर्तव्यता, अग्निस्थापनं तु भवत्येव उपसमाधायेत्युक्तत्वात् । अथ मन्त्रार्थः । तत्र द्वयोः प्रजापतिरनुष्टुप् जायालिङ्गोक्ता आवपने० । शण्डाः शण्डः, मर्काः मर्कः, तत्र शृणोति हिनस्तीति शण्डो बालग्रहः इतः स्थानान्नश्यताम् अपगच्छतु । अयं च वाक्यार्थ उत्तरत्रापि योज्यः । मारयतीति मर्कः, उपघाते वीरः समर्थः उपवीरः विघ्नकुशलः, शौण्डिकेयः आश्रितघातकः, उलूखलः अप्रतीकार्यः, मलिम्लुचः अतिमलिनाशय इत्यर्थः । दीर्घनासो द्रोणासः, च्यावयत्यङ्गानि सर्वेन्द्रियाणि वा तच्छक्तीर्वा च्यवनः । एते सर्वे मत्कृतावपनोपद्रुता भीताश्चापसर्पन्त्वित्यर्थः । एवमासमन्ततो भावेन लिखन् भक्षयन् य आस्ते स आलिखन् पराभवितुमव्यवच्छिन्नदृष्टिरनिमिषः, उप समीपे श्रुत्वा अपकर्ता उपश्रुतिः, हर्यक्षः पिङ्गलनयनः, कुम्भयति स्तम्भयत्येवंशीलः कुम्भी,शातयतीति शत्रुः, कर्परहस्तः करपात्रहस्तो वा पात्रपाणिः, नॄन् मिनोति हिनस्तीति नृमणिः, हन्त्री हिंसा हननं मुखे यस्यासौ हन्त्रीमुखः, सर्षपवदरुण उग्रो धूसरो वा सर्षपारुणः । च्यवत्यनेनेति च्यवनः, येनोपद्रुतश्च्यवति प्रकृतेः परिभ्रश्यतीत्यर्थः । इतः स्थानान्नश्यतादिति सर्वपदानामेवा-

न्वयः । गणमभिप्रेत्याह–**किंवदन्त इति**–एते सर्वे किंवदन्तो किंवदद्गणोऽयमित्यर्थः । इदमग्नय इत्युभयत्र त्यागः । यदि कुमारो बालग्रह एतं बालमुपद्रवेत् विघ्नयेत्तदैनं जालेन आनायेन उत्तरीयेण वाससा वा प्रच्छाद्याङ्के कृत्वा पिता जपति । **कूर्कुर इत्यादि**–मन्त्रत्रयम् । अथ मन्त्रार्थः । तत्र त्रयाणां प्रजापतिरनुष्टुप्, शुनको जपे० । कूर्कुरो भीषणाख्यो बालग्रहः तथा सुकूर्कुरश्चातिभीषणः बालान्बध्नाति वशयतीति बालबन्धनः, कूर्कुरः कर्कशश्च यो बालग्रहः सीसरोऽङ्गसारकः हे शुनक तद्गणमुख्य, लपेत लापनं रोधो वेति यावत् । अपह्वर गात्रापहारक " ह्वृ कौटिल्ये" ते तुभ्यं नमोऽस्तु । ततस्तुष्टश्चैनं कुमारं सृज मुञ्च किं कुर्वन् चेचेत् छुछुशब्दं कुर्वन् । हे शुनक तत्सत्यम्, यत्ते तुभ्यं देवदूताय देवा वरमददुः दत्तवन्तः स च त्वं हिंसाविहारः कुमारमेव वा वृणीथाः वृतवानसीति शिष्टमुक्तार्थम् । हे शुनक तत्सत्यम्, यत्ते तव सरमा देवशुनी माता, सीसरश्च देवश्वा पिता, श्यामशबलौ च भ्रातराविति । शिष्टमुक्तार्थम् । तत एनं कुमारं पिताऽभिमृशति **न नामयति–इति** मन्त्रेण सर्वाङ्गेष्वभिमृशति । अथ मन्त्रार्थः । तत्र प्रजापतिरनुष्टुप्, वायुरभिमर्शने० । यत्र यस्मिन्कुमारे वयं वदामो ब्रूमः । साकाङ्क्षत्वान्मन्त्रे यत्र चाभिमृशाम अभितः स्पर्शं कुर्मः । स कुमारो न नामयत्यङ्गानि । शिष्टं स्पष्टम् ॥ १६ ॥ * ॥

हरि०–**सोष्यन्तीमद्भिरभ्युक्षत्येजतु दशमास्य इति प्रागयस्यैत इति**–सोष्यन्तीं प्रसवशूलवतीं स्त्रियं भर्ता अद्भिर्जलेनाभ्युक्षति प्रसिञ्चति "एजतु दशमास्यः" इत्येतया "प्रागयस्यैत" इति प्राक्पठितया ऋचा त्र्यवसानया विराट्जगत्या । **अथावरावपतनम्**·अथाभ्युक्षणानन्तरमवरावपतनम् । अवरमुल्बं जरायुवेष्टितं गर्भवेष्टनम् अवाचीनमधः पतत्यनेन जप्तेनेत्यवरावपतनो मन्त्रः तं स्त्रीसमीपे उपविश्य भर्त्ता जपति, यथा-**अवैतु पृश्नि शेवलमित्यादि अवजरायु पद्यतामित्यन्तम्** –अवरावपतनमन्त्रो भर्त्रा जाप्यः । **जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननायुष्ये करोति** । ततो जातस्य उत्पन्नस्य कुमारस्य पुत्रस्य अच्छिन्नायां नाड्यामखण्डिते नाले सति मेधाजननायुष्ये मेधाजननं च आयुष्यं च मेधाजननायुष्ये ते करोति पिता । मेधाजननं तावदाह–**अनामिकया सुवर्णान्तर्हितया मधुघृते प्राशयति घृतं वा भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति**–अनामिकयाऽङ्गुल्या सुवर्णेनाच्छादितया मधु च घृतं च मधुघृते द्वन्द्वसमाससामर्थ्यादेकीकृते घृतं वा केवलं कुमारं सकृत् प्राशयति कुमारस्य जिह्वायां निर्मार्ष्टि भूस्त्वयीत्यादि सर्वं त्वयि दधामीत्यन्तेन मन्त्रवाक्यसमुदायेन । ननु "अर्थैकत्वादेकं वाक्यम्" इति **जैमिनि**सूत्रात् । "तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ।" इत्य**मरसिंहो**क्तेश्च "एकार्थमेकं वाक्यमेकस्य वाक्यस्य च तेषां वाक्यं निराकाङ्क्षं मिथः सम्बद्धम्" इति **कात्यायन**वचनेनैकमन्त्रत्वमिति प्रतिपादनात् । कथं मन्त्रवाक्यसमुदायस्यैकमन्त्रत्वम् । अत्रोच्यते, सत्यं यदि इतिकारादिकं मन्त्रावसानज्ञापकं किञ्चिन्न स्यात् तदैतच्छक्यम् । अत्र पुनरितिकारो मन्त्रावसानज्ञापको जागर्ति तेन नायं दोषः । यथा स वै भूर्भुव इत्येतावतैव गार्हपत्यमादधाति तैः सर्वैः पञ्चभिराहवनीयमादधाति । "भूर्भुवःस्वः" इति च श्रुतौ वाक्यसमुदायस्य इतिकारेण मन्त्रावसानं ज्ञायते, **कातीयसूत्रे**ऽपि "दारुभिर्ज्वलन्तमादधाति भूर्भुवः इति, आहवनीयमादधाति भूर्भुवःस्वः इति" । अत्र यद्यपि एकैकस्याः व्याहृतेर्मन्त्रत्वं युक्तं समस्तानां व्याहृतीनां च, तथापि इतिकारेण द्वयोरपि व्याहृत्योर्मन्त्रत्वं व्यवस्थाप्यते । एवमन्यत्रापि बहूनां मन्त्रवाक्यानामितिकारादिविनियोजकेन मन्त्रैक्यम् । तत्र तत्रायमेव न्यायोऽनुसर्तव्यः । **अथास्यायुष्यं करोति नाभ्यां दक्षिणे वा कर्णे जपति**–अथ मेधाजननानन्तरमस्य कुमारस्यायुष्यमायुषे हितं जीवनवर्द्धनं कर्म करोति । तद्यथा–नाभिदेशे दक्षिणे वा श्रवणे नाभ्यां दक्षिणे वा कर्णे इति सामीपिकाधिकरणे सप्तमी "गङ्गायां घोष"

इतिवत् । तेन नाभिसमीपे दक्षिणकर्णसमीपे वा जपति। **अग्निरायुष्मानित्यादिकान्**—मन्त्रान् त्रिर्जपति त्रीन् वारान् उपांशु पठति "अग्निसोमब्रह्मदेवऋषिपितृयज्ञसमुद्र" इत्यन्तान् । **त्र्यायुषमिति च**— ततः त्र्यायुषं जमदग्नेरित्यादि तन्नो अस्तु त्र्यायुषमित्यन्तं च मन्त्रं तथैव त्रिर्जपति। इदं चायुष्यकरणं कालातिक्रमेऽपि क्रियते । मेधाजननं तु मुख्यकालातिक्रमान्निवर्तते " तस्मात्कुमारं जातं घृतं वै वाऽग्रे प्रतिलेहयन्ति स्तनं वाऽनुधापयन्ति" इति जातमात्रस्य कुमारस्य श्रुत्या मेधाजननोपदेशात् । **स यदि कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेत्**—स पिता यदीच्छेत् अयं कुमारः सर्वं सम्पूर्णम् आयुर्जीवितमियात् प्राप्नुयात् इत्येवं तदा वात्सप्रेण वात्सप्रिणा भालन्दनेन दृष्टेनानुवाकेन दिवस्परीत्यादिद्वादशर्चेन एनं कुमारम् अभि समन्ततः सर्वं शरीरमालभेत । तत्र विशेषमाह—**दिवस्परीत्येतस्यानुवाकस्योत्तमामृचं परिशिनष्टि**—दिवस्परीत्यादिको द्वादशर्चोऽनुवाको वात्सप्रः । एतस्य उत्तमामन्त्यां द्वादशीम् "अस्ताव्यग्निः" इत्येतामृचं परिशिनष्टि व्युदस्यति तां परित्यज्य एकादशभिर्ऋग्भिरभिमृशेदित्यर्थः। **प्रतिदिशं पञ्च ब्राह्मणानवस्थाप्य ब्रूयादिममनुप्राणितेति पूर्वो ब्रूयात्प्राणेति व्यानेति दक्षिणोऽपानेत्यपर उदानेत्युत्तरः समानेति पञ्चम उपरिष्टादवेक्षमाणो ब्रूयात्स्वयं वा कुर्यादनुपरिक्राममविद्यमानेषु**—इत्यन्तं सूत्रम् । कुमारस्य प्रतिदिशं दिशं दिशं प्रति चतसृषु दिक्षु प्राच्यादिषु मध्ये च यथाक्रमं पञ्च ब्राह्मणानवस्थाप्य सन्निवेश्य कुमाराभिमुखान् तान्प्रति ब्रूयात् । किम् इममनुप्राणितेति । इमं कुमारमनुप्राणितानुलक्षीकृत्य प्राणेत्यादि ब्रूत इति प्रैषः । ततः प्रेषिता ब्राह्मणाः पूर्वादिक्रमेण प्राणेति कुमारं लक्षीकृत्य पूर्वो ब्रूयात् । व्यानेति दक्षिणो ब्राह्मणः, अपानेति पश्चिमः, उदानेत्युत्तरः, समानेति पञ्चम उपरिष्टादूर्द्ध्वमवेक्षमाणः अविद्यमानेषु असत्सु ब्राह्मणेषु स्वयं वा स्वयमेव अनुप्राणनं कुर्यात् । कथम्, अनुपरिक्रामं परिक्रम्य परिक्रम्य पूर्वादिकां दिशं प्राणेत्यादि अनुपरिक्राममिति णमुलन्तम् । अस्मिन्पक्षे प्रैषाभावः । **स यस्मिन्देशे जातो भवति तमभिमन्त्रयते**—स कुमारः यस्मिन्देशे भूभागे उत्पन्नः पतति तं देशमभिमन्त्रयते हस्तेन स्पृशति वेद ते भूमिः इत्यादि **शरदः शतमित्यन्तेन** मन्त्रेण । **अथैनमभिमृशत्यश्मा भव परशुर्भव हिरण्यमस्रुतं भव। आत्मा वै पुत्रनामाऽसि स जीव शरदः शतमिति**—अथ जन्मदेशाभिमन्त्रणानन्तरमेनं कुमारं पिताऽभिमृशति समन्ततः सर्वशरीरे स्पृशति **अश्माभवेत्यादिना स जीव शरदः शतमित्यन्तेन** मन्त्रेण । वात्सप्राभिमर्शनादि एतदभिमर्शनान्तं कालातिक्रमेऽपि क्रियते संस्कारकर्मत्वात् । **अथास्य मातरमभिमन्त्रयते इडाऽसि मैत्रावरुणे वीरे वीरमजीजनथाः सा त्वं वीरवती भव याऽस्मान्वीरवतोऽकरदिति**—अथ कुमाराभिमर्शनानन्तरमस्य जननीमभिमन्त्रयते अभिलक्षीकृत्य । इडासीत्यादिना **वीरवतोऽकरदित्यन्तेन** । **अथास्यै दक्षिणꣳ स्तनं प्रक्षाल्य प्रयच्छतीमꣳ स्तनमिति यस्ते स्तन इत्युत्तरमेताभ्याम्**—अथाभिमन्त्रणं कृत्वा अस्यै अस्याः मातुर्दक्षिणं स्तनं प्रक्षाल्य धावयित्वा कुमाराय ददाति "इमꣳ स्तनम् " इत्येतयर्चा, तत उत्तरं वामं स्तनं प्रक्षाल्य प्रयच्छति । "यस्ते स्तन इमꣳ स्तनम्" इत्येताभ्यामृग्भ्याम् । **उदपात्रꣳ शिरस्तो निदधात्यापो देवेषु जाग्रथ यथा देवेषु जाग्रथ । एवमस्याꣳ सूतिकायाꣳ सपुत्रिकायां जाग्रथेति**—उदपात्रं जलपूर्णपात्रं शिरस्तः शिरःप्रदेशे कुमारस्य निदधाति स्थापयति । आपो देवेष्वित्यादिना जाग्रथेत्यन्तेन मन्त्रेण । **द्वारदेशे सूतिकाग्निमुपसमाधायोत्थानात्सन्धिवेलयोः फलीकरणमिश्रान्सर्षपानग्नावावपति शण्डा मर्का** इत्यादि । ततः पञ्चभूसंस्कारपूर्वकं द्वारदेशे सूतिकागृहस्य सूतिकाग्निं स्थापयित्वा ओत्थानात् उत्थानं यावत् सन्धिवेलयोः सायं प्रातः फलीकरणमिश्रान् फलीकरणैः तण्डुलकणैः मिश्रान् युक्तान् सर्षपान् तास्मिन्नग्नौ आवपति जुहोति द्वे आहुती "शण्डा मर्का" इति "आलिखन्ननिमिष" इति द्वाभ्यां

मन्त्राभ्याम् । आवपनोपदेशात् होमेतिकर्तव्यतानिवृत्तिः । नैमित्तिकमाह–यदि कुमार उपद्रवेज्जालेन प्रच्छाद्योत्तरीयेण वा पिताऽङ्क आधाय जपति कूर्कुर–इत्यादि । यदि चेत्कुमारो बालग्रहः । बालमुपद्रवेत् अभिभवेत् तदा तं बालं जालेन मत्स्यग्रहणसाधनेन तदलाभे उत्तरीयेण वा वाससा प्रच्छाद्य छादयित्वा अङ्के उत्सङ्गे निधाय धृत्वा कूर्कुर इत्यादिकम् अपह्वरेत्यन्तं मन्त्रं जपति । अभिमृशति न नामयति । जपान्ते कुमारस्य सर्वाङ्गमभिमृशति, न नामयतीत्यादि यत्र चाभिमृशामसीत्यन्तेन मन्त्रेणेति सूत्रार्थः ॥ १६ ॥

अथ प्रयोगः । अथ प्रसवशूलवत्यभिमन्त्रणादि कुमारोपद्रवशमनान्तानां चतुर्दशानां प्रयोगः । सोष्यन्तीं स्त्रियमेजतु दशमास्य–इत्यनयर्चा अस्रज्जरायुणा सह इत्यन्तया अद्भिरभ्युक्षति पतिः । ततः स्त्रीसमीपे "अवैतु पृश्नि सेवलꣳ शुने जराय्वत्तवे नैव माꣳसेन पीवरीं न कस्मिꣳश्चनायतनमवजरायु पद्यताम्" इत्यन्तम् अवरावपतनं मन्त्रं जपति । तत्र यदि कुमार उत्पद्यते तदा* मातृपूजाभ्युदयिके विधाय अच्छिन्ने नाले मेधाजननायुष्ये करोति । तत्र मेधाजननं यथा–"अनामिकयाऽङ्गुल्या सुवर्णेनान्तर्हितया मधुघृते मेलयित्वा केवलं घृतं वा कुमारं भूस्त्वयि दधामि, भुवस्त्वयि दधामि, स्वस्त्वयि दधामि, भूर्भुवःस्वः सर्वं त्वयि दधामि" इत्यनेन मन्त्रेण सकृत्प्राशयति । अथायुष्यं करोति तद्यथा–कुमारस्य नाभिसमीपे दक्षिणकर्णसमीपे वा अग्निरायुष्मानित्यादिकान् समुद्र आयुष्मानित्यन्तानष्टौ मन्त्रान् त्रिर्जपति । "अग्निरायुष्मान्त्सवनस्पतीभिरायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि"।"सोम आयुष्मान्त्सौषधीभिरायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि"। "ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि।" "देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि" ।"ऋषय आयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि" । पितर आयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि" । " यज्ञ आयुष्मान्त्स दक्षिणाभिरायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि" । "समुद्र आयुष्मान्त्स स्रवन्तीभिरायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि" इति । ततः "त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम्" इति मन्त्रं त्रिर्जपति । स पिता "यदि कामयेत अयं कुमारः सर्वमायुरियात्" इति तदा तं कुमारं दिवस्परीत्यारभ्य उशिजो विवव्रिरित्यन्तेन वात्सप्रसञ्ज्ञकेनानुवाकेनाभिमृशेत् । अथ कुमारस्य पूर्वादिचतसृषु दिक्षु चतुरो ब्राह्मणान् एकं मध्ये च अवस्थाप्य इममनुप्राणितेति तान् ब्रूयात् । ततः पूर्वदिक्स्थितो ब्राह्मणः कुमारं लक्षीकृत्य प्राण इति । दक्षिणो व्यान इति । पश्चिमः अपान इति । उत्तर उदान इति । पञ्चमः समान इति । उपरिष्टादवेक्षमाणो ब्रूयात् । अविद्यमानेषु तु ब्राह्मणेषु स्वयमेव तस्यां दिशि कुमाराभिमुखं स्थित्वा प्राणेत्यादि पूर्वोक्तं ब्रूयात् । अस्मिन्पक्षे प्रैषो न । ततो यस्मिन्देशे कुमारो जातो भवति तं देशं "वेद ते भूमिहृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्" इत्यन्तेन मन्त्रेणाभिमन्त्रयते । अथैनं कुमारम् "अश्मा भव परशुर्भव हिरण्यमस्रुतं भव । आत्मा वै पुत्रनामासि स जीव शरदः शतम्" इत्यन्तेन मन्त्रेणाभिमृशति । अथास्य कुमारस्य मातरमभिमन्त्रयते ।"इडासि मैत्रावरुणी वीरे वीरमजीजनथाः । सा त्वं वीरवती भव याऽस्मान्वीरवतोऽकरत्" इत्यनेन मन्त्रेण । अथास्य कुमारस्य मातुः दक्षिणं स्तनं प्रक्षाल्य प्रयच्छति " इमꣳ स्तनम् " इत्येतयर्चा । तत उत्तरं वामं प्रक्षाल्य प्रयच्छति " यस्ते स्तन, इमꣳस्तनम्" इत्येताभ्यामृग्भ्याम् । ततः कुमारस्य शिरःप्रदेशे जलपूर्णं पात्रं निदधाति स्थापयति । "आपो देवेषु जाग्रथ यथा देवेषु जाग्रथ । एवमस्याꣳ सूतिकायाꣳ सपुत्रिकायां

---

* देशकालौ स्मृत्वा ममास्य कुमारस्य गर्भाम्बुपानजनितसकलदोषनिर्बर्हणायुर्मेधाभिवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा परमेश्वरप्रीत्यर्थं जातकर्माहं करिष्य इति सङ्कल्प्य तदङ्गत्वेन ।

जाग्रथ ” इत्यनेन तदुदपात्रं प्रागुत्थानात्स्थापितमेव तिष्ठति । ततः सूतिक गृहस्य द्वारदेशे पञ्च भूसंस्कारान्कृत्वा सूतिकाग्निं स्थापयित्वा, सायंप्रातः सन्ध्याद्वये फलीकरणमिश्रान् तण्डुलकणयुतान् सर्षपान् तस्मिन्नग्नौ हस्तेन जुहोति यावत्सूतिकोत्थानम् । कथं “ शण्डामर्का उपवीरः शौण्डिकेय उलूखलः मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा ” इत्यनेन मन्त्रेणैकामाहुतिम् । “आलिखन्ननिमिषः किंवदन्त उपश्रुतिर्हर्यक्षः कुम्भीशत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहा ” इत्यनेन द्वितीयाम् । इदमग्नये इत्युभयत्र त्यागः । यदि कुमारग्रहो बालमुपद्रवेत्तदा तं बालं जालेन उत्तरीयेण वा वस्त्रेण प्रच्छाद्य अङ्के गृहीत्वा पिता जपति । “ कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् । यत्ते देवा वरमददुः स त्वं कुमारमेव वा वृणीथाः । चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् । यत्ते सरमा माता सीसरः पिता श्यामशबलौ भ्रातरौ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेताह्वपर ” इत्यन्तं मन्त्रं “ न नामयति, न रुदति, न हृष्यति न ग्लायति यत्र वयं वदामो यत्र चाभिमृशामसि ” इत्यनेन मन्त्रेण पिता कुमारमभिमृशति ॥ १६ ॥

गदा०—सोष्यन्तीमद्भिरभ्युक्षत्येजतु दशमास्य इति प्राग्यस्यैत इति—“षूङ् प्राणिगर्भविमोचने” । गर्भं विमुञ्चन्तीं विजनयन्तीं प्रसवकाले शूलादिप्रसववेदनान्वितां स्त्रियं भर्ता एजतु दशमास्य इति मन्त्रेणास्नजरायुणा सहेत्यन्तेनाद्भिरभ्युक्षति उदकेन प्रसिञ्चति । जरायुणा सहेत्यत्र परिसमाप्तत्वाद्वाक्यस्य प्राग्यस्यैत इत्युच्यते । नह्यत्र परादिना पूर्वान्तन्यायः, प्रकरणान्तरे पाठात् । अत्र श्रुतौ विशेषः । “सोष्यन्तीमद्भिरभ्युक्षति यथा वातपुष्करिणीᳪ समीं गमयाति सर्वतः” इत्यादि । **अथावरावपतनमवैतु पृश्नि शेवलᳪ शुने जराय्वत्तवे नैव माᳪसेन पीवरीं न कस्मिँश्चनायतनमव जरायु पद्यतामिति**—अथाभ्युक्षणानन्तरमवरावपतनसञ्ज्ञकं मन्त्रं जपतीत्यध्याहारः । अवरो जरायुविशेषः तस्य अव अधःपतनम्, पतनहेतुं “अवैतु” इति मन्त्रं जपति पिता । मन्त्रार्थः । हे सोष्यन्ति तव जरायु अत्र अधः एतु आयातु पतत्वित्यर्थः । किम्भूतं पृश्नि नानारूपं शेवलं पिच्छलं जातोपचितं वा किमर्थम् । शुने श्वानमुपकर्तुम्, यद्वा-शुने इति षष्ठ्यर्थे चतुर्थी । शुनः अत्तवे भक्षणाय । हे पीवरि पुत्रादिगर्भधारणेन सुपुष्टगात्रि तच्च जरायु मांसेन गर्भव्यथकावयवेन सह आयतं सम्बद्धं विस्तृतं वा अधः नैव पद्यतां पततु । न च कस्मिँश्चन गर्भो विपद्यतां निमित्ते सत्यपीति । **जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननायुष्ये करोति**—जातस्योत्पन्नस्य कुमारस्य बालस्याच्छिन्नायां नाड्याम् अच्छिन्ने नाभिनाले पिता मेधाजननायुष्ये मेधाजननं च आयुष्यं च मेधाजननायुष्ये ते करोति । कुमारग्रहणाच्च “स्त्रिया अतः प्रभृति न क्रियते” इति भाष्ये । अत्र **वसिष्ठः**—“श्रुत्वा जातं पिता पुत्रं सचैलं स्नानमाचरेत् ।” हेमाद्रौ । जातकर्म-जन्मनोऽनन्तरं कार्यं जातकर्म यथाविधि । दैवादतीतकालं चेदतीते सूतके भवेत् ” अत्र नामकर्मादावुक्तकालातिक्रमे नक्षत्रादिकं ज्ञेयम् । तथा **बृहस्पतिः**—“मुख्यालाभे विधिज्ञेन विधिश्चिन्त्यः प्रमाणतः । नक्षत्रतिथिलग्नानां विचार्यैवं पुनः पुनः ॥” **कार्ष्णाजिनिः**—“प्रादुर्भावे पुत्रपुत्र्योर्ग्रहणे चन्द्रसूर्ययोः । स्नात्वाऽनन्तरमात्मीयान्पितॄञ्श्राद्धेन तर्पयेत्” । श्राद्धं चात्राभ्युदयिकमेव न स्वतन्त्रम् । अत्र “श्राद्धसामेन हेम्ना वा कार्यम्” इत्युक्तं **पृथ्वीचन्द्रोदये**—“ जातश्राद्धे न दद्यात्तु पक्वान्नं ब्राह्मणेष्वपि ।” इति । **हेमाद्रौ** तु-“पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान् । न पक्वेन न चामेन कल्याणान्यभिकामयन्” इति **संवर्त्तोक्तेर्हेम्नै**-वेत्युक्तम् । **संवर्तः**—“जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते” इति । एतच्च स्नानं रात्रावपि भवति नैमित्तिकत्वात् । यदाह **व्यासः**—“रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः । नैमित्तिकं तु कुर्वीत स्नानं दानं च रात्रिषु” इति । नैमित्तिकदानान्यपि स एवाह—“ग्रहणोद्वाहसंक्रान्तियात्रादौ प्रसवेषु च । दानं नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यति” इति । **जैमिनिः**—“यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम् । छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते ॥ ” । **हेमाद्रौ** दानखण्डे—“यावत्कालं सुते जाते न नाडी छिद्यते नृप । चन्द्रसूर्योपरागेण तमाहुः समयं समम् ॥” **विष्णुधर्मोत्तरे** । “अच्छिन्ननाड्यां यद्दत्तं पुत्रे जाते द्विजोत्तमाः । संस्कारेषु च पुत्रस्य तदक्षय्यं प्रकीर्तितम् ॥” । “[illegible] तदहर्वा” इति **मदनपारिजाते** ।

तथाच **शङ्खः**—"कुमारप्रसवे नाड्यामच्छिन्नायां गुडतिलहिरण्यवस्त्रगोधान्यप्रतिग्रहेष्वदोषस्तदहस्त्वेके कुर्वते" इति । एतच्च जननाशौचे मरणाशौचे च कार्यमित्याह—**प्रजापतिः**—"आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् । कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति" इति । **मदनपारिजाते**ऽप्येवम् । केचित्तु—"मृताशौचस्य मध्ये तु पुत्रजन्म यदा भवेत् । आशौचापगमे कार्यं जातकर्म यथाविधि ॥" इति **स्मृतिसङ्ग्रहोक्ते**राशौचान्ते कार्यमित्याहुः । **स्मृत्यर्थसारे**ऽपि विकल्प उक्तः । **कारिकायाम्**—"जाते पुत्रे सचैलं स्यात्स्नानं नैमित्तिकं पितुः । तच्च शीतेन रात्रावप्येवं **जाबालि**रब्रवीत् ॥ दिवाऽऽहृतेन तोयेन स्वर्णयुक्तेन स्नापयेत् । इति **साङ्ख्यायनः** प्राह रात्रावनलसन्निधौ । अच्छिन्ननाड्यां कर्तव्यं श्राद्धं स्नानादनन्तरम् । आमद्रव्येण तत्कार्यं वचनात्तु **प्रजापतेः** ॥ हिरण्येन भवेच्छ्राद्धमामद्रव्यं गृहे न चेत् । इति **व्यास**वचः प्रोक्तं पक्वान्नं स निषेधति ॥ अन्नामं द्विगुणं भोज्यं हिरण्यं तु चतुर्गुणम्" इति । **व्यासः**—"पुत्रजन्मनि यात्रायां शर्वर्यां दत्तमक्षयम्" इति । मेधाजननमाह—**अनामिकया सुवर्णान्तर्हितया मधुघृते प्राशयति घृतं वा भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति**—सुवर्णेनान्तर्हितया सुवर्णेनाच्छादितयाऽनामिकयाऽङ्गुल्या, मधु च घृतं च मधुघृते एकीकृते कुमारं प्राशयति घृतं वा केवलम्। अत्र **भूस्त्वयि दधामीत्यादि सर्वं त्वयि दधामी**त्यन्तेन मन्त्रेण । प्रतिवाक्यं प्राशयतीति केचित् । **माध्यन्दिनश्रुतौ** विशेषः । जातेऽग्निमुपसमाधायाङ्क आधाय कंसे पृषदाज्यमानीय पृषदाज्यस्योपघातं जुहोतीत्युपक्रम्य अथास्यायुष्यं करोति दक्षिणं कर्णमभिनिधाय वाग्वागिति त्रिरथास्य नामधेयं करोति । वेदोऽसीति तदस्यैतद्गुह्यमेव नाम स्यादथ दधिमधुघृतं संसृज्यान्तर्हितेन जातरूपेण प्राशयतीत्युक्तः । 'जातरूपेण हिरण्येन प्राशयत्येतैर्मन्त्रैः प्रत्येकम्' इति **वासुदेवप्रकाशिकायाम्** । यदि च मेधाजननं स्वकाले दैवान्मानुषापराधाद्वा न जातं तदा कालान्तरे न भवति, नियतकालत्वात् । तथा च श्रूयते—"तस्मात्कुमारं जातं घृतं वै वाऽग्रे प्रतिलेहयन्ति स्तनं वाऽनुधापयन्ति" इति । अयमर्थः श्रुतेः । तस्मात्कुमारं बालं जातं घृतं चैव त्रैवर्णिका जातकर्मणि जातरूपसहितं प्रतिलेहयन्ति प्राशयन्ति स्तनं वा अनुधापयन्ति पश्चात्पाययन्तीति । अपीतस्तनस्यैतदिति गम्यते । आयुष्यकरणमाह—**अथास्यायुष्यं करोति नाभ्यां दक्षिणे वा कर्णे जपत्यग्निरायुष्मान्त्स वनस्पतीभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । सोम आयुष्मान्त्सौषधीभिरायुष्माँस्तेनत्वाऽऽयुषाऽऽयुष्मन्तं करोमि। ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि। ऋषय आयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । पितर आयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । यज्ञ आयुष्मान्त्स दक्षिणाभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुमष्न्तं करोमि।समुद्र आयुष्मान्त्स स्रवन्तीभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमीति त्रिः**—अथ मेधाजननोत्तरमस्य शिशोरायुष्यनामकं कर्म आयुषे हितमायुष्यं कर्म करोति । नाभ्यामिति । अधिकरणसप्तम्यभावात्समपिसप्तमयिम् । यथा 'गङ्गायां घोषः' । तेन पिता बालकनाभेः कर्णस्य वा समीपे स्थित्वा **अग्निरायुष्मा**नित्यष्टौ मन्त्रान् त्रिर्जपति । मन्त्रार्थः । अग्निः कारणात्मना आयुष्मानस्ति । स च वनस्पतीभिरिध्मसमिद्भिरिष्ट आयुष्मत्वहेतुर्भवति । वनस्पतिभिः कृत्वा वा । तेन अग्न्यायुषा त्वा त्वामायुष्मन्तं निर्दुष्टदीर्घायुषं करोमीति वाक्यार्थ उत्तरत्रापि सम्बध्यते (१) । एवं सोमोऽपि व्याख्येयः । स च ओषधीभिः । सन्धिरार्षः(२) ब्रह्म वेदः ब्राह्मणैरध्येतृभिः (३)।देवा अमृतेन सुधया (४) । ऋषयो व्रतैः कृच्छ्रादिभिः (५)।पितरः स्वधाभिः पितृदेयं स्वधोच्यते (६)।यज्ञो दक्षिणाभिः परिक्रयद्रव्यैः (७)। समुद्रः स्रवन्तीभिर्नदीभिरित्येतावान्विशेषः (८)। **त्र्यायुषमिति च** त्र्यायुषं जमदग्नेरिति मन्त्रं चकारात् त्रिर्जपेत् । नाभ्यां दक्षिणे वा कर्णे । यदि दैवान्मानुषाद्वाऽपचारान्मेधाजननं स्वकाले न कृतं तथाप्यायुष्यकरणं कालान्तरे भवत्येव । **स यदि कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेत्**—संस्कारकर्ता यदि कामयेत अयं सर्वं सम्पूर्णं शतवर्षमायुर्जीवितमियात्प्राप्नुयात्तदा वात्सप्रेणैनं कुमारमभिमृशेत्।वात्सप्रभेदात्संशयः।किं"दिवस्परि"इत्येतेन वात्सप्रेण किम्" पप्रयन्तो अध्वरम्"इत्येतेनेति संशयनिवृत्त्यर्थमाह—**दिवस्परीत्येतस्यानुवाकस्योत्तमामृचं परिशिनष्टि**—"दिवस्परि प्रथमं जज्ञे" इत्येतस्यानुवाकस्योत्तमामृचं"अस्ताव्यग्नि"इत्येतां परिशेषयित्वा वर्जयित्वाऽवशिष्टं वात्सप्रमुच्यते। यत एकादशासु ऋक्षु वात्सप्रशब्दः प्रसिद्धः । अथ वात्सप्रेणोपतिष्ठेत इति प्रकृत्य भवति वाक्यशेषोऽथ यत्त्रिष्टुप् यदेकादश तेनेति वा ।

वात्सप्रद्वयसद्भावेऽपि अग्निप्रकरणस्थवात्सप्रग्रहणं वाक्यशेषात् । तस्माद्यं जातं कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेदिति । **प्रतिदिशं पञ्च ब्राह्मणानवस्थाप्य ब्रूयादिममनुप्राणितेति पूर्वो ब्रूयात्प्राणेति व्यानेति दक्षिणोऽपानेत्यपर उदानेत्युत्तरः समानेति पञ्चम उपरिष्टादवेक्षमाणो ब्रूयात्**—ततः संस्कारकर्ता कुमारस्य प्रतिदिशं प्राच्यादिषु चतसृषु दिक्षु मध्ये च एवं पञ्च ब्राह्मणानवस्थाप्य स्थापयित्वा तान्प्रति "इममनुप्राणित" इति प्रैषं ब्रूयात् । ततस्ते प्रेषिताः पूर्वादिक्रमेण कुमारं लक्षीकृत्य **प्राणे**ति पूर्वो ब्रूयात् । **व्यानेति** दाक्षिणः । **अपानेति** पश्चिमः । **उदानेत्युत्तरः** । **समानेति** पञ्चम उपरिष्टाद्बालकमवेक्षमाणो ब्रूयात् । तस्मात्पुत्रं जातमकृत्तनाभिं पञ्च ब्राह्मणान् ब्रूयादित्येनमनुप्राणितेति श्रुतत्वात् । मन्त्रार्थः । इमं कुमारमनु लक्षीकृत्य भो ब्राह्मणा अनुप्राणित यूयं सर्वे प्राणादिपञ्चवायुयुक्तं कृत्वा दीर्घायुष्ट्वेनायुष्मन्तं कुरुत । कोष्ठस्थितो वायुर्मुखनासिकाभ्यां निःसरन् प्राणः, पुनस्तेनैव मार्गेणान्तः प्रविशन्नपानः । प्राणो रेचकः । अपानः पूरकः । तयोर्वा अधः सन्धिः सन्धानं व्यानः कुम्भकरूपः । उत्क्रमणादिरूर्ध्वगतिरुदानः । देहस्थितस्याशितपीतस्यान्नरसस्य सर्वाङ्गेषु समनयनात्समानः । **स्वयं वा कुर्यादनुपरिक्राममविद्यमानेषु**—अविद्यमानेषु ब्राह्मणेषु स्वयमेव पिताऽनुप्राणनं कुर्यादनुपरिक्रामं पूर्वादिकां दिशं परिक्रम्य परिक्रम्य । "यद्यु तान्न विन्देदपि स्वयमेवानुपरिक्राममनुप्राण्यात्" इति श्रुतत्वात् । अस्मिन्पक्षे "इममनुप्राणित" इति प्रैषनिवृत्तिः । स्वात्मनि स्वकर्तृकप्रेरणासम्भवात् । **स यस्मिन्देशे जातो भवति तमभिमन्त्रयते वेद ते भूमिहृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदःशतᳫं शृणुयाम शरदः शतमिति**—स बालो यस्मिन्प्रदेशे भूभागे जातो भवति उत्पन्नो भवति तं देशमभिमन्त्रयते "वेद ते भूमिहृदयम्" इति मन्त्रेण हस्तेन स्पृशति । मन्त्रार्थः । हे भूमे कुमारजन्मप्रदेश ते तव हृदयमन्तःकरणं भूमिर्वेद यत्र विद्यते गुप्तम् । विसर्गाभावश्छान्दसः । किम्भूतं दिवि द्युलोके वर्तमाने चन्द्रमसि श्रितम् । कृष्णीभावेन देवयज्ञरूपस्थानम् असुरजयार्थं गोपितम् तत्प्रदेशोपलक्षितम्, "तदेतच्चन्द्रमसि कृष्णम्" इति श्रुतेः । तत्कर्मभूतमहं वेद जानामि । तत्कर्तृभूतम् एवं पुनरुपकर्तुं मां विद्याज्जानातु । अतस्त्वद्दत्तपुत्रेण सह वयं पश्येमेत्याद्युक्तार्थम् । **अथैनमभिमृशत्यश्मा भव परशुर्भव हिरण्यमस्रुतं भव । आत्मा वै पुत्रनामाऽसि स जीव शरदः शतमिति** अथैनं कुमारं पिता अभिमृशति हस्तेन स्पृशति "अश्मा भव" इति मन्त्रेण । "हृदि स्पृशति" इति **जयरामः** । "मस्तके" इति **कारिकायाम्** । "सर्वशरीरे" इति **हरिहरः** । श्रुतिः—**अथैनमभिमृशत्यश्मा भव परशुर्भव हिरण्यमस्रुतं भवेति**—वात्सप्राद्येतदभिमर्शनान्तं कालातिक्रमेऽपि कर्म भवति संस्कारत्वात् । मन्त्रार्थः । हे कुमार त्वम् । अश्मा पाषाण इव दृढः स्थिरश्च । परशुरिव वज्र इवापकर्तृनाशको भव । किंच । अस्रुतमनभिभूतम् अप्रच्युतस्वरूपमिति यावत् । हिरण्यं हिरण्यवत्तेजोयुक्तश्च ग्रहणीयश्च भव । यथा धात्वन्तरामिश्रितं सुवर्णं शुद्धं भवति तथा त्वमपि रोगाद्युपद्रवेण हीनो भवेत्यर्थः । यतस्त्वं पुत्रनामा आत्माऽसि देहः सन् वै निश्चये पुत्रेतिसञ्ज्ञामात्रेण भिन्नोऽसि न तु स्वरूपेण स त्वं शतं शरदो जीव । **अथास्य मातरमभिमन्त्रयते इडाऽसि मैत्रावरुणी वीरे वीरमजीजनथाः सा त्वं वीरवती भव याऽस्मान्वीरवतोऽकरदिति**—अथास्य कुमारस्य मातरं जननीमभिमुखो भूत्वा मन्त्रयते । मन्त्रश्रावणेन संस्करोति इडासीति मन्त्रेण । अथास्य मातरमभिमन्त्रयते "इडाऽसि मैत्रावरुणी" इति श्रुतेः । मन्त्रार्थः । हे वीरे वीरवति पुत्रवतीति यावत् । त्वम् इडा मानवी यज्ञपात्री तद्गतद्रव्यं वाऽसि । मैत्रावरुणी मित्रावरुणयोरंशोत्पन्ना । यथेडायां पुरूरवा उत्पन्नः यथा च यज्ञपात्र्यां तद्गतद्रव्ये वा पुरोडाशो भवति तथा त्वय्यापि तादृशाः स्वर्गादिसाधनपराः पुत्राः सन्त्वित्याभिप्रायः । यतस्त्वं वीरं पुत्रमजीजनथाः असौषीः । अतः सा त्वं वीरवती पतिपुत्रवती भव । या त्वमस्मान्वीरवतः पुत्रवतः पुत्रयुक्तान् अकरत् अकरोः कृतवत्यासि । **अथास्यै दक्षिणᳫं स्तनं प्रक्षाल्य प्रयच्छतीमᳫं स्तनमिति**—अथास्यै अस्या मातुर्दक्षिणं स्तनं प्रक्षाल्य उदकेन क्षालयित्वा पिता कुमाराय पानाय प्रयच्छति ददाति "इमᳫं स्तनम्" इति मन्त्रेण । "अथैनं मात्रे प्रदाय स्तनं प्रयच्छति" इति श्रवणात् । स्तनसमर्पणं चापीतस्तनस्य भवति । **यस्ते स्तन इत्युत्तरमेताभ्याम्**—ततः पिता उत्तरं वामं स्तनम् "इमᳫंस्तनं" "यस्ते स्तन" इत्येताभ्यामृग्भ्यां प्रयच्छति कुमारायेत्यर्थः । अत्र द्विवचनोपदेशादिमᳫंस्तनमित्येव द्वितीया । **उदपात्रᳫं शिरस्तो निदधात्यापो देवेषु जाग्रथ यथा देवेषु जाग्रथ एवमस्याᳫं सूतिकायाᳫं सपुत्रिकायां जाग्रथेति**—तत्र उदपात्रं सजलं शरावं शिरस्तः सूतिकायाः शिरःप्रदेशे

खट्वाऽधस्तान्निदधाति “आपो देवेषु” इति मन्त्रेण । तच्चोत्थानपर्यन्तं तत्रैव तिष्ठति । मन्त्रार्थः । हे आपः जीवनहेतवः यूयं देवेषु देवकार्यनिमित्तं जाग्रथ तत्साधनत्वेन तिष्ठथ । अतो यथा देवेषु जाग्रथ एवं तथाऽस्यां सूतिकायां सूतिकाया हिते जाग्रथ जाग्रतेत्यर्थः । पुरुषव्यत्ययश्छान्दसः । किम्भूतायां पुत्रादिसहितायाम् । **द्वारदेशे सूतिकाग्निमुपसमाधायोत्थानात्सन्धिवेलयोः फलीकरणमिश्रान्सर्षपानग्नावावपति शण्डा मर्का उपवीरः शौण्डिकेय उलूखलः । मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा आलिखन्ननिमिषः किंवदन्त उपश्रुतिर्हर्यक्षः कुम्भी शत्रुः पात्रपाणिर्नृमणिर्हन्त्रीसुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहेति–** सूतिकागृहस्य द्वारदेशे पञ्च भूसंस्कारान् कृत्वा तत्र सूतिकाऽग्निमुपसमाधाय स्थापयित्वोत्थानात् आउत्थानात् उत्थानं यावत्, सन्धिवेलयोः सायंप्रातः फलीकरणैः तण्डुलकणैर्मिश्रान् युक्तान् सर्षपान् तस्मिन्नग्नौ आवपति प्रक्षिपति शण्डा मर्का–इति द्वाभ्यां मन्त्राभ्याम् । “सूतिकाग्नेर्ग्रहणम् आवसथ्याग्निनिवृत्त्यर्थम्” इति भर्तृयज्ञः । अत्र आवपनोपदेशाद्धोमेतिकर्तव्यता न भवति । अत्राग्नेर्देवतात्वं जयरामाचार्या वदन्ति । तथा कारिकायाम्–“अनयोर्देवताग्निः स्यान्मन्त्रोक्ताः कैश्चिदीरिताः” इति । एतच्च स्वकाले एव भवति नियतकालत्वात् । मन्त्रार्थः । शण्डाः शण्डः, मर्काः मर्कः, तत्र शृणोतीति शण्डो बालग्रहः । स्वस्थानात् नश्यतात् अपगच्छतु । अयं च वाक्यार्थ उत्तरत्रापि योज्यः । मारयतीति मर्कः । उपघाते वीरः समर्थ उपवीरः विघ्नकुशलः । शौण्डिकेयः आश्रितपातकः । उलूखलः अप्रतिकार्यः । मलिम्लुचः अतिमालिनाशय इत्यर्थः । दीर्घनासो द्रोणासः । च्यावयत्यङ्गानीति च्यवनः । एते सर्वे मत्कृतावपनोपकृताः भीताश्चापसर्पन्त्वित्यर्थः । एवम् आ समन्ततो भावेन लिखन् भक्षयन् आस्ते स आलिखन् । पराभवितुमव्यवच्छिन्नदृष्टिरनिमिषः । उप समीपे श्रुत्वा । अपकर्ता उपश्रुतिः । हर्यक्षः पिङ्गलनयनः । कुम्भयति स्तम्भयतीत्येवंशीलः कुम्भी । शातयतीति शत्रुः । पात्रहस्तः पात्रपाणिः । नृन्मिनोति हिनस्तीति नृमणिः । हन्त्री हिंसा हननं मुखे यस्यासौ हन्त्रीसुखः । सर्षपवदरुण उग्रो धूसरो वा सर्षपारुणः । च्यवत्यनेनेति च्यवनः । येनोपद्रुतश्च्यवति प्रकृतेः परिभ्रश्यतीत्यर्थः । इतः स्थानान्नश्यतादिति सर्वपदानामेवमेवान्वयः । गणमभिप्रेत्याह–किं वदन्त इति एते सर्वे किंवदन्तः किंवदद्गणोऽयमित्यर्थः । **यदि कुमार उपद्रवेज्जालेन प्रच्छाद्योत्तरीयेण वा पिताऽङ्क आधाय जपति कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः। चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् । यत्ते देवा वरमददुः स त्वं कुमारमेव वा वृणीथाः । चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यं यत्ते सरमा माता सीसरः पिता श्यामशबलौ भ्रातरौ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वरेत्यभिमृशति न नामयति न रुदति न हृष्यति न ग्लायति यत्र वयं वदामो यत्र चाभिमृशामसीति–**कुमारशब्देन बालग्रहोऽभिधीयते । स यदि एनं बालमुपद्रवेद्विघ्नयेत् तदा एनं बालकं पिता जालेन प्रच्छाद्याच्छादयित्वा स्वोत्तरीयेण वा प्रच्छाद्याङ्के उत्सङ्गे निधाय “कूर्कुरः” इति मन्त्रत्रयं जपति । जपान्त एनं पिताऽभिमृशति “न नामयति” इति मन्त्रेण । मन्त्रार्थः । कूर्कुरो भषणाख्यो बालग्रहः । तथा सुकूर्कुरश्चातिभषणः । बालान्बध्नातीति बालबन्धनः । कूर्कुराख्यो बालग्रहः । सीसरोऽङ्गसारकः । हे शुनक तद्गणमुख्य लपेत लापनरोधकेति यावत् । अपह्वर गात्रापहारक “ह्वृ कौटिल्ये” ते तुभ्यं नमोऽस्तु । ततस्तुष्टश्चैनं कुमारं सृज मुञ्च । किं कुर्वन् चेच्चेच्छुश्छुः शब्दं कुर्वन् ॥ १ ॥ हे शुनक तत्सत्यं यत्ते तुभ्यं देवदूताय देवा वरमददुः दत्तवन्तः स च त्वं हिंसाविहारः कुमारमेव वा वृणीथाः वृतवानसीति । शेषम् उक्तार्थम् ॥ २ ॥ हे शुनक तत्सत्यं यत्ते तव सरमा देवशुनी माता सीसरो देवश्वा पिता । श्यामशबलौ च तव भ्रातराविति । शेषमुक्तार्थम् ॥ ३ ॥ न नामयतीत्यस्यार्थः । यत्राऽस्मिन्कुमारे वयं वदामो ब्रूमः साकाङ्क्षत्वान्मन्त्रम् । यत्र च अभिमृशामसि अभितः स्पर्शनं कुर्मः स कुमारो न नामयत्यङ्गानि । शेषं स्पष्टम् । इति श्रीत्रिराग्निचित्सम्राट्स्थपति–श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे षोडशी कण्डिका ॥ १६ ॥

अथ “पदार्थक्रमः ।” सोष्यन्तीमद्भिरभ्युक्षत्येजतु दशमास्य इति ततोऽवरावपतनमन्त्रजपः “अवैतु पृश्निः” इति । ततो जातमात्रे पुत्रे पिता तस्य मुखं निरीक्ष्य नद्यादावुदङ्मुखः स्नात्वा असम्भवे दिवाऽऽहृताभिः शीताभिरद्भिः सुवर्णयुताभिर्गृह एव स्नात्वाऽऽचम्य सितचन्दनमाल्यादिभिरलङ्कृतो नालच्छेदात्पूर्वं सूतिकादिव्यतिरिक्तैरस्पृष्टमकृतस्तनपानं प्रक्षालितमलं कुमारं मातुरुत्सङ्गे प्राङ्मुखमवस्थाप्य ब्राह्मणैः सह पुण्याहवाचनं कृत्वा देशकालौ स्मृत्वा ममास्य कुमारस्य गर्भाम्बुपानजनितसकलदोषनिबर्हणायुर्मेधाभिवृद्धि-

बीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्म करिष्ये इति सङ्कल्प्याभ्युदयिकश्राद्धं हिरण्येन कार्यम् । तत एकस्मिन्पात्रे मधुघृते मिश्रयित्वाऽनामिकया सुवर्णान्तर्हितया प्राशयति कुमारं, " भूस्त्वयि दधामि, भुवस्त्वयि दधामि, स्वस्त्वयि दधामि, भूर्भुवः स्वः सर्वं त्वयि दधामि" इति मन्त्रेण । अथवा केवलं घृतं प्राशयति । इदं **मेधाजननम्** । **अथायुष्यकरणम्** । तत्र बालकस्य नाभिसमीपे दक्षिणकर्णसमीपे वा अग्निरायुष्मानित्याद्यष्टौ मन्त्रान् त्रिर्जपेत् । अग्निरायुष्मान्० करोमि (१) । सोम आयुष्मान्० (२) । ब्रह्म आयुष्मत् (३) । देवाः आयुष्मन्तः (४) । ऋषय आयुष्मन्तः (५) । पितर आयुष्मन्तः (६) । यज्ञ आयुष्मान् (७) । समुद्र आयुष्मान् (८) । ततस्त्र्यायुषमिति च त्रिर्जपेत् । **इत्यायुष्यकरणम्** । पिता यदि कामयेदयं कुमारः सर्वमायुरियात्तदैनं "दिवस्परि" इत्येकादशभिरभिमृशेत् । ततो बालकस्य पूर्वादिदिक्षु चतसृषु चतुरो ब्राह्मणानेकं मध्ये चावस्थाप्य "इममनुप्राणित" इति प्रैषः । ततः पूर्वदिक्स्थितः **प्राणे**ति ब्रूयात् । **व्याने**ति दक्षिणः । **अपाने**त्यपरः । **उदाने**त्युत्तरः । **समाने**ति पञ्चम उपरिष्टादवेक्षमाणो ब्रूयात् । आविद्यमानेषु विप्रेषु स्वयमेवानुपरिक्रम्य परिक्रम्य प्राणेत्यादि ब्रूयात् । नात्र प्रैषः । ततो जन्मभूमेरभिमन्त्रणं—**वेद ते भूमि**रिति । ततो बालाभिमर्शन**मश्मा भवे**ति । ततः कुमारमातुरभिमन्त्रण**मिडासि मैत्रावरुणी**ति । ततो मातुर्दक्षिणं स्तनं प्रक्षाल्य कुमाराय प्रयच्छती**मꣳ स्तन**मिति । ततो "यस्ते स्तन, इमꣳ स्तनम्" इति मन्त्राभ्यां सव्यं स्तनं प्रयच्छाति । कालातिक्रमे स्तनप्रदानाभावः । अत्र **कारिकायां** विशेषः—"अत्र दद्यात्सुवर्णं वा भूमिं गां तुरगं रथम् । छत्रं छागं वस्त्रमाल्यं शयनं चासनं गृहम् ॥ धान्यं गुडतिलान्सर्पिरन्यद्वाऽस्ति गृहे वसु । आयान्ति पितरो देवा जाते पुत्रे गृहं प्रति । तस्मात्पुण्यमहः प्रोक्तं **भारते** चादिपर्वणि । अष्टाङ्गुलं परित्यज्य नालं छिन्द्यात्क्षुरादिना"इति । ततः सूतिकायाः खट्वाऽधस्ताच्छिरःप्रदेशे उदकपूर्णपात्रनिधान**मापो देवेष्वि**ति । ततः सूतिकागृहद्वारे पञ्च भूसंस्कारान् कृत्वा लौकिकाग्नेः स्थापनम् । तस्मिन्नग्नौ सायंप्रातः सन्ध्याद्वये प्रत्यहं यावत्सूतिका स्नानं न करोति तावद्धस्तेन तण्डुलकणमिश्रान्सर्षपान् जुहोति । तत्रैवं " शण्डा मर्का " इति प्रथमाम् । " आलिखन्ननिमिषः " इति द्वितीयाम् । इदमग्नये न ममेत्युभयोस्त्यागः । यदि बालं क्रूरग्रह उपद्रवति तदा तं जालेन उत्तरीयेण वाऽऽच्छाद्य पिता स्वोत्सङ्गे स्थापयित्वा **कूर्कुर** इति जपति । ततः कुमाराभिमर्शनं **न नामयती**ति । अत्र सूतिकासम्बन्धि सर्वं लौकिकाग्नौ भवति । तदुक्तं **कारिकायाम्**—"सूतीसम्बन्धि प*क्त्यादि कर्म तल्लौकिकानले । पर्वण्यपि च तत्पक्वमश्नीयान्नैव दोषभाक्" इति जातकर्माणि **पदार्थक्रमः** । अथ **गर्ग**मते विशेषः । तत्र **सोष्यन्ती**त्यारभ्य न. **नामयती**त्याभिमर्शनान्ते विशेषः । हिरण्यश्राद्धान्ते वागिति त्रिरुच्चार्य **वेदोऽसि** इति गुह्यनाम कृत्वा मेधाजननं करोति । " भूस्त्वयि दधामि" इत्येवमादिभिः प्रतिमन्त्रं प्राशनम् । कुमारस्य शिरःप्रदेशे उदपात्रनिधानम् । सर्वान्ते बालं जनन्यै प्रदाय पिता स्नानं करोतीति विशेषः । अन्यत्समानम् । " कुमार्याश्चैतज्जातकर्माऽमन्त्रकं कार्यम् " इति **प्रयोगरत्ने** । रात्रौ सन्ध्यायां ग्रहणे जाताशौचान्तरेऽपीदं कार्यम्, मृताशौचान्तरेऽपीदं कार्य्यम् । मृताशौचमध्ये जातश्चेत्तदैवाशौचान्ते वा तत्कार्यम् । पितरि ग्रामान्तरं गते पितृव्यादिर्गोत्रजो ज्येष्ठक्रमेणेदं कुर्यात् । इति **जातकर्म** । अथ **षष्ठीपूजा** । पञ्चमे षष्ठे च दिवसे षष्ठ एव वा पूर्वरात्रौ पित्रादिराचम्य प्राणानायम्य देशकलौ स्मृत्वाऽस्य शिशोरायुरारोग्यसकलारिष्टशान्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विघ्नेशस्य जन्मदानां षष्ठीदेव्या जीवान्तिकायाश्च यथामिलितोपचारैः पूजनं करिष्य इति सङ्कल्प्य षोडशोपचारैस्तन्त्रेण पूजयेत् । पृथक् वा सङ्कल्प्य पृथगेव पूजा कार्या । एतत्प्रतिमाश्च लेपनादिना कुड्ये लेखनीयाः । पीठादौ वाऽक्षतपुञ्जरूपेण निवेश्याः । सूतिकागृहं च सधूमाग्निदीपशस्त्रमुसलाम्बुविभूतियुतं कार्यम्, सर्षपांश्च सर्वतोऽवकिरेत् । अन्यदपि यथाचारं सर्वं कार्यं जन्मदाभ्योऽन्नादिना बलिर्देयः । विप्रेभ्यश्च ताम्बूलखाद्यदक्षिणादि दद्यात् । पुरुषाः शस्त्रहस्ताः, स्त्रियश्च नृत्यगीतकारिण्योऽस्यां रात्रौ जागरणं कुर्युः । जननाशौचमध्ये प्रथमषष्ठदशमदिनेषु दाने प्रतिग्रहे च न दोषः । अन्नं तु निषिद्धम् । षष्ठीप्रार्थना ।"गौरीपुत्रो यथा स्कन्दः शिशुत्वे रक्षितः पुरा । तथा ममाप्ययं बालः षाष्ठिके रक्ष्यतां नमः ।" इति **षष्ठीपूजा** । **मिताक्षरायां मार्कण्डेयः**--"रक्षणीया तथा षष्ठी निशा

---

* पक्तिः पाकः ।

तत्र विशेषतः । रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः ॥ पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः । रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतके ॥" **व्यासः**—"सूतिकावासनिलया जन्मदा नाम देवताः । तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता ॥ प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा । त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि" । **अपरार्के**—"कन्याश्चतस्रो राकाद्या वातघ्नी चैव पञ्चमी । क्रीडनार्था च बालानां षष्ठी च शिशुरक्षिणी ॥ खड्गे तु पूजनीया वै ब्राह्मणैश्च द्विजातिभिः" राकाऽनुमतिः, सिनीवाली, कुहूरिति चतस्रः कन्याः । अथ **यमयोर्ज्येष्ठकनिष्ठभावः संस्कारार्थं लिख्यते** । तत्र **मनुः**—"जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम् । यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता" । **देवलः**--"यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखम् । सन्तानः पितरश्चैव तस्मिञ्ज्यैष्ठ्यं प्रतिष्ठितम् ॥" क्वचित्पश्चादुत्पन्नस्य ज्यैष्ठ्यमुक्तम् । तत्र देशाचारतो व्यवस्था ज्ञेया । अथ **यमलजननशान्तिः** । तत्र याज्ञिकाः पठन्ति । अथातो यमलजनने प्रायश्चित्तं व्याख्यास्यामो यस्य भार्या गौर्दासी महिषी वडवा वा विकृतं प्रसवेत्प्रायश्चित्ती भवेत्सम्पूर्णे दशाहे चतुर्णां क्षीरवृक्षाणां काषायमुपसंहरेत्प्लक्षवटौदुम्बराश्वत्थशमीदेवदारुगौरसर्षपास्तेषामपो हिरण्यदूर्वाङ्कुराम्रपल्लवैः प्रकल्प्य तैरष्टौ कलशान्प्रपूर्य्य सर्वौषधीभिर्दम्पती स्नापयेदापोहिष्ठेति तिसृभिः, **कया नश्चित्र** इति द्वाभ्यां, **पञ्चैन्द्रेण**, पञ्च **वारुणेन**, **इदमापोऽयोंद्येति** द्वाभ्यां स्नात्वाऽलङ्कृत्य, तौ दर्भोपर्युपवेश्य तत्र मारुतं स्थालीपाकं श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति पूर्वोक्तैः स्नपनमन्त्रैः स्थालीपाकस्य जुहोत्यग्नये स्वाहा, सोमाय स्वाहा, पवमानाय स्वाहा, पावकाय स्वाहा, मरुताय स्वाहा, मारुताय स्वाहा, मरुद्भ्यः स्वाहा, यमाय स्वाहा, अन्तकाय स्वाहा, मृत्यवे स्वाहा, ब्रह्मणे स्वाहा, अग्नये स्विष्टकृते स्वाहेत्येतदेव ग्रहोत्पातनिमित्तेषूलूकः कङ्कः कपोतः गृध्रः श्येनो वा गृहं प्रविशेत्स्तम्भं प्ररोहेद्वल्मीकं मधुजालं वा भवेदुदकुम्भप्रज्वलनासनशयनयानभङ्गेषु गृहगोधिकाकृकलासशरीरसर्पणे छत्रध्वजविनाशे सार्पे नैर्ऋते गण्डयोगेष्वन्येष्वप्युत्पातेषु भूकम्पोल्कापातकाकसर्पसङ्गमप्रेक्षणादिष्वेतदेव प्रायश्चित्तं ग्रहशान्त्युक्तेन विधिना कृत्वाऽऽचार्याय वरं दत्त्वा, ब्राह्मणान्भोजयित्वा, स्वस्तिवाच्याशिषः प्रतिगृह्य शान्तिर्भवति शान्तिर्भवतीति । अथ **स्मृत्युक्ता शान्तिः** । विधानमालायां **काशीखण्डे**—"त्रिविधा यमलोत्पत्तिर्जायते योषितामिह । सुतौ च सुतकन्ये च कन्ये एव तथा पुनः ॥ **एकलिङ्गौ** विनाशाय **द्विलिङ्गौ मध्यमौ स्मृतौ** । पित्रोर्विघ्नकरौ ज्ञेयौ तत्र शान्तिर्विधीयते ॥ हेममूर्ती विधातव्ये दस्रयोश्च द्विजोत्तम । पलेन वा तदर्द्धेन तदर्द्धार्द्धेन वा पुनः ॥ ब्रह्मवृक्षस्य पट्टे च स्थापयेद्रक्तवाससी । स्वस्तिके तण्डुलानां च न्यस्ते पीठे द्विजोत्तम ॥ पूजयेद्रक्तपुष्पैश्च चन्दनेनानुलेपयेत् । दशाङ्गेनैव धूपेन धूपयेत्प्रयतः पुमान् ॥ दीपैर्नीराजयेच्चैव नैवेद्यं परिकल्पयेत् ।" "यस्मै त्वं सुकृते जातवेद" इति मन्त्रेणाक्षतैरर्चयेत् । "अनेनैव तु मन्त्रेण होमं कुर्यादतन्द्रितः । अष्टोत्तरसहस्रं च पायसेन ससर्पिषा ॥ शान्तिपाठं जपेद्विद्वान्सूर्यसूक्तं जपेत्ततः । विष्णुसूक्तं तथा गाथां वैश्वदेवीं जपेद्बुधः । अश्वदानं ततो दद्यादाचार्याय कुटुम्बिने ॥ तयोर्मूर्ती प्रदातव्ये यजमानेन धीमता ॥ " तत्र दानमन्त्रः । " अश्वरूपौ महाबाहू अश्विनौ दिव्यचक्षुषौ । अनेन वाजिदानेन प्रीयेतां मे यशस्विनौ ॥" अथ **मूर्तिदान**मन्त्रः । "आचार्यः प्रथमो वेधा विष्णुस्तु सविता भगः । दस्रमूर्तिप्रदानेन प्रीयतामश्विनौ भगः ॥" ततोऽभिषेचनं कार्यं दम्पत्योर्विधिवद्बुधैः । ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत् ॥ सालङ्कारैश्च वस्त्रैश्च प्रार्थयेद्वचनैः शुभैः । एवं कृते विधाने तु यमलोत्पत्तिशान्तिकम् ॥ जायते नात्र सन्देहः सत्यमेतद्ब्रवीमि ते ।" अथ जन्मनि **दुष्टकालाः** । तत्र **मूलफलम्** । **लल्लः**—"अभुक्तमूलसम्भवं परित्यजेत्तु बालकम् । समाष्टकं पिताऽथवा न तन्मुखं विलोकयेत् ॥ तदाद्यपादके पिता विपद्यते जनन्यथ । तृतीयके धनक्षयश्चतुर्थके शुभावहम् ॥ प्रतीपमन्त्यपादतः फलं तदेव सार्पभे ।" अभुक्तमूलं त्वाह **बृहद्वसिष्ठः**—"ज्येष्ठाऽन्ते घटिका चैका मूलादौ घटिकाद्वयम् । अभुक्तमूलमित्याहुर्जातं तत्र विवर्जयेत्" । केचिज्ज्येष्ठान्त्यं मूलाद्यं च पादमभुक्तमूलमित्याहुः । **कश्यपेन** त्वन्यथोक्तम्—"मूलाद्यपादजो हन्ति पितरं तु द्वितीयजः । मातरं त्वां तृतीयोऽर्थान्सुहृदं तु तुरीयजः ॥ फलं तदेव सार्पर्क्षे प्रतीपं त्वन्त्यपादतः ।" अथ **मूलवृक्षफलम्** । **जयार्णवे**—"मूलं स्तम्भस्त्वचा शाखा पत्रं पुष्पं फलं शिखा । वेदा४ श्च मुनयश्चैव७ दिश१०श्च वसवस्तथा ॥ नन्दा ९ बाण५ रसा ६ रुद्रा ११ मूलभेदाः प्रकीर्तिताः । मूलं मूलविनाशाय स्तम्भे हानिर्धनक्षयः ॥ त्वचि भ्रातृविनाशाय शाखा मातुर्विनाशकृत् ।

पत्रे सपरिवारः स्यात्पुष्पेषु नृपवल्लभः ॥ फलेषु लभते राज्यं शिखायामल्पजीवितम् ।" अन्यत्र त्वन्यथोक्तम् । मूले सप्तघटीषु मूलहवनं स्तम्भेऽष्टसु स्वक्षयं त्वग्दिग्बन्धुविनाशनं च विटपे रुद्रैर्हतो मातुलः । पत्रेऽर्कैः सुकृती तु बाणकुसुमे मन्त्री फले सागरै राजा वह्निशिखाल्पमायुरिति सम्मूलाङ्घ्रिपे स्यात्फलम् ॥" **भूपालवल्लभः**–"वृषालिसिंहेषु घटे च मूलं दिवि स्थितं युग्मतुलाङ्गनान्त्ये । पातालगं मेषधनुःकुलीरनक्रेषु मर्त्येष्विति संस्मरन्ति ॥" "स्वर्गे मूलं भवेद्राज्यं पाताले च धनागमम् । मृत्युलोके यदा भूतं तदा शून्यं समादिशेत्" । **प्रयोगपारिजाते**–" मूलजा श्वशुरं हन्ति व्यालजा च तदङ्गनाम् । माहेन्द्रजाऽग्रजं हन्ति देवरं तु द्विदैवजा ॥ " **नृसिंहप्रसादे**–" धवाग्रजां हान्ति सुरेन्द्रजाता तथैव पत्न्या भगिनीं पुमाँश्च । द्विदैवजा देवरमाशु हन्याद्भार्यानुजामाशु हि हन्ति सूनुः ॥ " " पत्न्यग्रजामग्रजं वा हन्ति ज्येष्ठर्क्षजः पुमान् । तथा भार्यास्वसारं वा शालकं वा द्विदैवजः ॥ कन्यका देवरं हान्ति विशाखाऽन्त्यसमुद्भवा । आद्यपादत्रयेनैव आद्यभे तु पुमान्भवेत् ॥ न हन्याद्देवरं कन्या तुलामिश्रद्विदैवजा । तादृशान्त्योद्भवा वर्ज्या दुष्टा वृश्चिकपुच्छवत् ॥ " " चित्राद्यार्द्धे पुष्यमध्ये द्विपादे पूर्वाषाढाधिष्ण्यपादे तृतीये । जातः पुत्रश्चोत्तराऽऽद्ये विधत्ते मातापित्रोर्भ्रातरं बालनाशम् ॥" " द्विमासं चोत्तरादोषः पुष्ये चैव त्रिमासिकः । पूर्वाषाढाष्टमे मासि चित्रा षाण्मासिकं फलम् ॥ नवमासं तथाऽऽश्लेषा मूले चाष्टकवर्षकम् । ज्येष्ठा पञ्चदशे मासि पुत्रदर्शनवर्जिता ॥ "। **वशिष्ठः**–" व्यतीपातेऽङ्गहानिः स्यात्परिघे मृत्युमादिशेत् । वैधृतौ पितृहानिः स्यान्नष्टेन्दावन्धतां व्रजेत् ॥ मूले समूलनाशः स्यात्कुलनाशो यतो भवेत् । विकृताङ्गे च हीने च सन्ध्ययोरुभयोरपि ॥ पर्वण्यपि प्रसूतौ च सर्वारिष्टभयप्रदा । तद्वत्सदन्तजातश्च पादजातस्तथैव च ॥ तस्माच्छान्तिं प्रकुर्वीत ग्रहाणां क्रूरचेतसाम् ।" **गर्गः**–"कृष्णां चतुर्दशीं षोढा कुर्यादादौ शुभं स्मृतम् । द्वितीये पितरं हन्ति तृतीये हान्ति मातरम् ॥ चतुर्थे मातुलं हन्ति पञ्चमे वंशनाशनम् । षष्ठे तु धननाशः स्यादात्मनो वंशनाशनम् ॥" **देवकीर्तिः**–"यद्येकस्मिन्धिष्ण्ये जायन्ते दुहितरोऽथ वा पुत्राः । पितुरन्तकरा ह्येते यद्यपरे प्रीतिरतुला स्यात् ॥ " **गर्गः**–" एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः । प्रसूतिश्च तयोर्मृत्युर्भवेदेकस्य निश्चितम् ॥" **शौनकः**–"ग्रहणे चन्द्रसूर्यस्य प्रसूतिर्यदि जायते । व्याधिपीडा तदा स्त्रीणामादौ तु ऋतुदर्शनात् ॥ इत्थं संजायते यस्य तस्य मृत्युर्न संशयः " । अथ **गण्डान्तः** । **ज्योतिर्निबन्धे**–"पूर्णानन्दाख्ययोस्तिथ्योः सन्धिर्नाडीद्वयं तथा । गण्डान्तं मृत्युदं जन्म यात्रोद्वाहव्रतादिषु ॥ कुलीरसिंहयोः कीटचापयोर्मीनमेषयोः । गण्डान्तमन्तरं कालं घटिकार्द्धं मृतिप्रदम् ॥" कुलीरः कर्कटः । कीटो वृश्चिकः । चापं धनुः । " सार्पेन्द्रपौष्णभेष्वन्त्यषोडशांशेन सन्धयः । तदग्रभेष्वाद्यपादा भानां गण्डान्तसञ्ज्ञकाः ॥" सार्पमाश्लेषा । ऐन्द्रं ज्येष्ठा । पौष्णं रेवती । "पौष्णाश्विन्योः सार्पपित्रर्क्षयोश्च यच्च ज्येष्ठामूलयोरन्तरालम् । तद्गण्डान्तं स्याच्चतुर्नाधिकं हि यात्राजन्मोद्वाहकालेष्वनिष्टम् " । **रत्नसङ्ग्रहे**–" सर्वेषां गण्डजातानां परित्यागो विधीयते । वर्जयेद्दर्शनं श्राद्धं तच्च षाण्मासिकं भवेत् ॥ " " तिथ्यर्क्षगण्डे पितृमातृनाशो लग्ने तु सन्धौ तनयस्य नाशः । सर्वेषु नो जीवति हान्ति बन्धूञ्जीवन्पुनः स्याद्बहुवारणश्च " । अथैषां दानम् । " तिथिगण्डे त्वनड्वाहं नक्षत्रे धेनुरुच्यते । काञ्चनं लग्नगण्डे तु गण्डदोषो विनश्यति ॥ उत्तरे तिलपात्रं स्यात्पुष्ये गोदानमुच्यते । अजाप्रदानं त्वाष्ट्रे स्यात्पूर्वाषाढे च काञ्चनम् ॥ उत्तरातिष्याचित्रासु पूर्वाषाढोद्भवस्य च । कुर्याच्छान्तिं प्रयत्नेन नक्षत्राकरजां बुधः ॥ " । अथ **ब्रह्मेशफलम्** । "मूर्द्धास्यनेत्रगलकांसयुगं च बाहुहृज्जानुगुह्यपदमित्यहिदेहभागः । बाणा ५ द्रि ७ नेत्र २ हुतभुक् ३ श्रुति ४ नाग ८ रुद्र ११ षण् ६ नन्द ९ पञ्च ५ शिरसः क्रमशस्तु नाड्यः ॥" राज्यं च पितृनाशः स्यात्तथा कामक्रिया रतिः ।:पितृभक्तो बली स्वघ्नस्त्यागी भोगी धनी क्रमात् ॥ " **ज्येष्ठाफलमुक्तं ब्रह्मयामले**–" ज्येष्ठादौ जननी माता द्वितीये जननीपिता । तृतीये जननीभ्राता स्वयं माता चतुर्थके ॥ आत्मानं पञ्चमे हन्ति षष्ठे गोत्रक्षयो भवेत् । सप्तमे चोभयकुलं ज्येष्ठभ्रातरमष्टमे ॥ नवमे श्वशुरं हन्ति सर्वं हन्ति दशांशके " इति । अथ **मूलशान्तिः** । तत्र याज्ञिकाः पठन्ति । अथातो मूलविधिं व्याख्यास्यामो मूलांशे प्रथमे पितुर्नेष्टो, द्वितीये मातुः, तृतीये धनधान्ययोः, चतुर्थे कुलशोकावहः, स्वयं पुण्यभागी स्यान्मूलनक्षत्रे मूलविधानं कुर्यात्सर्वौषध्या सर्वगन्धैश्च संयुक्तं तत्रोदकुम्भं कृत्वा वस्त्रगन्धपुष्परत्नसहितं श्वेतसिद्धार्थकुसुमयुक्तं कुर्यात् । तस्मिन् रुद्रान् जपित्वा, प्रतिरथं रक्षोघ्नं च सूक्तं द्वितीयोदकुम्भं कृत्वा चतुःप्रस्रवणसंयुक्तं तस्मिन्नुपरिष्टान्मूलानि धारयेद्वंशपात्रे कृत्वा वस्त्रे बद्ध्वा तस्मिन्प्रधानानि मूलानि वक्ष्यामि–हिरण्यमूलं, सप्तधान्यानि, प्रथमा काश्मर्या, सहदेव्यपरा-

जिता, बालापाठाऽधोपुष्पी, शङ्खपुष्पी, मधुयष्टिका, चक्राङ्किता, मयूरशिखा, काकजङ्घा, कुमारीद्वयं, जीवन्त्यपामार्गौ, भृङ्गराजकलक्ष्मणा, जातीव्याघ्रपत्रश्चक्रमर्दकः, सिद्धेश्वराश्वत्थौदुम्बरपलाशप्लक्षवटार्कदूर्वारौहितकशमीशतावरीत्येवमादिमूलशतं पूरयित्वा, तस्मिन्निषिद्धानि मूलानि वक्ष्यामि—बैल्वधवनिम्बकदम्बराजवृक्षोक्षशालाप्रयालुदाधिकपित्थकोविदारश्लेष्मान्तकबिभीतकशाल्मलीररलुसर्वकण्टकिवर्जं तत्राषेकं कुर्यात्पितुः शिशोर्जनन्या देवस्य त्वेत्यौदुम्बर्यासन्दीमुदगग्रामास्तृणाति । तत्रासीनान् सम्पातेनैकेनाभिषिञ्चाति “ शिरसोऽध्यनुलोमꣳशिरो मे शीर्यशः । ” इति यथालिङ्गमङ्गानि सम्मृशाति, स्नानादूर्ध्वं नैर्ऋतं पायसꣳ श्रपयित्वा काश्मर्यमयꣳ स्रुक्स्रुवं प्रतप्य संमृज्यान्वारब्ध आघारावाज्यभागौ हुत्वा “ असुन्वन्तम् ” इति चतस्रः स्थालीपाकेन जुहुयात्पञ्चदशाज्याहुतीर्जुहोति “ कृणुष्वपाजः ” इति पञ्च, “मानस्तोके ” इति द्वे, “ या ते रुद्र शिवातनूः ” इति षडग्निरक्षाꣳसि सेधाति शुक्रशोचिरमर्त्यः । शुचिः पावक ईड्य इति “त्वन्नः सोम विश्वतो रक्षाराजन्नघायतो; न रिष्येत्वावतः सखा ” इति स्विष्टकृदादि प्राशनान्ते कृष्णा गौः, कृष्णाश्च तिलाः, हिरण्मयमूलꣳ सप्तधान्यसंयुक्तमाचार्याय दद्यात्कृष्णोऽनड्वान्ब्रह्मणे दद्यान्नक्षत्रसूचकेभ्यो वा दद्यादन्येभ्यो ब्राह्मणेभ्यः सुवर्णं दद्यात्कृसरपायसेन ब्राह्मणान्भोजयेत्सार्पदैवते गण्डजात एष एव विधिः **कात्यायनेनोक्तः** । स्मृत्यन्तरोक्ता शान्तिस्तु रजस्वलाशान्तावुक्ता । **मात्स्ये** विशेषः । “अकालप्रसवा नार्यः कालातीतप्रजास्तथा । विकृतप्रसवाश्चैव युग्मप्रसवकास्तथा ॥ अमानुषा अमुण्डाश्च अजातव्यञ्जनास्तथा । हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः ॥ पशवः पक्षिणश्चैव तथैव च सरीसृपाः । विनाशं तस्य देशस्य कुलस्य च विनिर्दिशेत् ॥ निर्वासयेत्तां नगरात्ततः शान्तिं समाचरेत् ” । **पाद्मे**—“उपरि प्रथमं यस्य जायन्ते च शिशोर्द्विजाः । दन्तैर्वा सह यस्य स्याज्जन्म भार्गवसत्तम ॥ द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा । यदा दन्ताश्च जायन्ते मासे चैव महद्भयम् ॥ मातरं पितरं चास्य खादेदात्मानमेव च ।” **अथोर्ध्वदन्तजननशान्तिः** । “ गजपृष्ठगतं बालं नौस्थं वा स्थापयेद् द्विज । तदभावे तु धर्मज्ञ काञ्चने तु वरासने ॥ सर्वौषधैः सर्वगन्धैर्बीजैः पुष्पैः फलैस्तथा । पञ्चगव्येन रत्नैश्च मृत्तिकाभिश्च भार्गव ।” स्नापयेदित्यन्वयः । “ स्थालीपाकेन धातारं पूजयेत्तदनन्तरम् । सप्ताहं चात्र कर्तव्यं तथा ब्राह्मणभोजनम् ॥ अष्टमेऽहनि विप्राणां तथा देयाऽत्र दक्षिणा । काञ्चनं रजतं गाश्च भुवं वा धनमेव च ॥ दन्तानामष्टमे मासि षष्ठे मासि ततः पुनः । दन्ता यस्य च जायन्ते माता वा म्रियते पिता ॥ बालको म्रियते तत्र स्वयमेव न संशयः । दधिक्षीद्रघृताक्तानामश्वत्थसमिधां ततः ॥ जुहुयादष्टशतं तत्र समन्त्रेण तु मन्त्रवित् । धेनुं च दद्याद्गुरवे ततः सम्पद्यते शुभम् ॥ ” **ज्योतिर्निबन्धे** तु—“अष्टमादिषु दन्तोत्थानं शुभावहम् ” इत्युक्तम् । **रुद्रयामले** । “ प्रथमं दन्तनिर्मुक्तिरूर्ध्वं बालस्य चेद्भवेत् । क्लेशाय मातुलस्येह तदा प्रोक्ता महर्षिभिः ॥ सौवर्णं राजतं वापि ताम्रं कांस्यमयं तु वा । दध्योदनेन सम्पूर्तं पात्रं दद्याच्छिशोः करे ॥ समन्त्रं भाजनं दत्त्वा स पश्येन्मातुलः शिशुम् । सालङ्कारं सवस्त्रं च शिशुमालिङ्ग्य सादरः ॥” तत्र मन्त्रः । “रक्ष मां भागिनेय त्वं रक्ष मे सकलं कुलम् । गृहीत्वा भाजनं सान्नं प्रसन्नो भव मे सदा ॥ निर्विघ्नं कुरु कल्याणं निर्विघ्नां च स्वमातरम् । मय्यात्मानमधिष्ठाप्य चिरं जीव मया सह ॥” इति “ततोऽभिनन्दयेद्विद्वान् भगिनीं भगिनीपतिम् । होमं कृत्वा तिलाज्येन ब्राह्मणानपि पूजयेत् ॥ एवं कृते विधाने तु विघ्नः कोऽपि न जायते ” । अथ. **त्रिकशान्तिः** । **गर्गसंहितायाम्**—“सुतत्रये सुता चेत्स्यात्तत्त्रये वा सुतो यदि । मातापित्रोः कुलस्यापि तदाऽनिष्टं महद्भवेत् ॥ ज्येष्ठनाशो धने हानिर्दुःखं चैषु महद्भवेत् । तत्र शान्तिं प्रकुर्वीत वित्तशाठ्यविवर्जितः ॥ जातस्यैकादशाहे वा द्वादशाहे शुभे दिने । आचार्यमृत्विजो वृत्वा ग्रहयज्ञपुरःसरम् ॥ ब्रह्मविष्णुमहेशेन्द्रप्रतिमाः स्वर्णतः कृताः । पूजयेद्धान्यराशिस्थकलशोपरि शक्तितः ॥ पञ्चमे कलशे रुद्रं पूजयेद्रुद्रसङ्ख्यया । रुद्रसूक्तानि चत्वारि शान्तिसूक्तानि सर्वशः ॥ आचार्यो जुहुयात्तत्र समिदाज्यतिलाँश्चरुम् । अष्टोत्तरसहस्रं तु षट्शतं त्रिशतं तु वा ॥ देवताभ्यश्चतुर्वक्त्रादिभ्यो ग्रहपुरःसरम् । ब्रह्मादिमन्त्रैरिन्द्रस्य यत इन्द्रं भजामहे ॥ ततः स्विष्टकृतं हुत्वा बलिं पूर्णाहुतिं ततः । अभिषेकं कुटुम्बस्य कृत्वाऽऽचार्यं प्रपूजयेत् ॥ हिरण्यं धेनुरेका च ऋत्विजां दक्षिणा ततः । आज्यस्य वीक्षणं कृत्वा शान्तिपाठं तु कारयेत् ॥ ब्राह्मणान्भोजयेच्छक्त्या दीनानाथांश्च तर्पयेत् । कृत्वैवं विधिना शान्तिं सर्वारिष्टाद्विमुच्यते ॥” । अथ **दत्तकपुत्रपरिग्रहविधिः** । **पारिजाते शौनकः**—“ अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च । वाससी कुण्डले दत्त्वा उष्णीषं चाङ्गुलीयकम् ॥ बन्धूनन्नेन सम्भोज्य ब्राह्मणाँश्च विशेषतः । अन्वाधानादि यत्तन्त्रं कृत्वाऽऽज्योत्पवनान्तकम् ॥ दातुः समक्षं गत्वा तु पुत्र देहीति याचयेत् । दाने समर्थो दाताऽस्मै ये यज्ञेनेति

पञ्चाभिः ॥ **देवस्यत्वेति** मन्त्रेण हस्ताभ्यां परिगृह्य च । आङ्गादङ्गेत्यृचं जप्त्वा आघ्राय शिशुमूर्द्धनि ॥ गृहमध्ये तमाधाय चरुं हुत्वा विधानतः । **यस्त्वाहृदेत्यृचा** चैव **तुभ्यमग्रऋचैकया** ॥ **सोमोऽददर्दित्येताभिः** प्रत्यृचं पञ्चभिस्तथा । स्विष्टकृदादिहोमं च कृत्वा शेषं समापयेत् ॥ ब्राह्मणानां सपिण्डेषु कर्तव्यः पुत्रसङ्ग्रहः । तदभावेऽसपिण्डो वा अन्यत्र तु न कारयेत् ॥" **मिताक्षरादौ** तु व्याहृतिभिराज्येन होम उक्तः–तत्रैव **वसिष्ठः** । " न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुः" इति । यत्तु ' समन्त्रकहोमस्य पुत्त्रप्रतिग्रहाङ्गत्वात् व्याहृत्यादिमन्त्रपाठे च स्त्रीशूद्रयोरनधिकारात्तयोर्दत्तकः पुत्त्रो न भवत्येव' इति **शुद्धिविवेके** । तन्नेत्यन्ये । भर्तुरनुज्ञया स्त्रिया अपि प्रतिग्रहोक्तेः । यद्यपि **मेधातिथिना** भार्यात्ववददृष्टरूपं दत्तकत्वं होमसाध्यमुक्तं, स्त्रियाश्च होमासम्भवस्तथापि " व्रतादिवद्विप्रद्वारा होमादि कारयेत् " इति **हरिनाथादयः** । **सम्बन्धतत्त्वेऽप्येवम्** । शूद्रस्यापि चैवम् । " स्त्रीशूद्राश्च सधर्माणः" इति स्मृतेः । अतएव **पराशरेण** शूद्रकर्तृको होमो विप्रद्वारैवोक्तः । दत्तके विशेषः । **कालिकापुराणे**–" पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते । आचूडान्तं न पुत्त्रः स पुत्त्रतां याति चान्यतः ॥ चूडोपायनसंस्कारा निजगोत्रेण वै कृताः । दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥ ऊर्ध्वं तु पञ्चमाद्वर्षान्न दत्ताद्याः सुता नृप । गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत्" इति । अथ **सूतिकास्नानम्** । **ज्योतिषे**–"करेन्द्रभाग्यानिलवासवान्त्यमैत्रैन्दवाश्विध्रुवभेऽह्नि पुंसाम् । तिथावरिक्ते शुभमामनन्ति प्रसूतिकास्नानविधिं मुनीन्द्राः ॥" हस्तज्येष्ठापूर्वाफाल्गुनीस्वातीधनिष्ठारेवत्यनुराधामृगशीर्षाश्विनीरोहिणीषु त्रिषूत्तरासु च सूतिकास्नानमित्यर्थः । पुंसामह्नि रविभौमगुरुवारेषु ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति–श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते **जातकर्मविधिः** ॥ १६ ॥

विश्व०–सोष्यन्ती""ग्यस्यैत इति–सोष्यन्तीं प्रसवशूलवतीं जलेन । मन्त्रमाह—**एजतु दशमास्य इति**-
'परादिना पूर्वान्त' इति परिभाषाया अप्रवृत्तेराह—**प्राग्यस्यैत** इति जरायुणा सहेत्यन्तेनेत्यर्थः । **अथावरापतनम्**–
गर्भनिर्गमक्रियाहेत्वर्थस्मारकं मन्त्रं पठतीत्यर्थः । तमेव सूत्रयति मन्त्रम्। **अवैतु पृश्नि शैवलꣳ शुने जराय्व-**
त्तवे नैव माꣳसेन पीवरीं न कस्मिꣳश्चनायतमवजरायु पद्यतामिति । **जातस्य कुमारस्याच्छि-**
न्नायां नाड्यां मेधाजननायुष्ये करोति–तत उत्पन्नस्य पुत्रस्य अच्छिन्ने नाले मङ्गलोदकेन स्नात्वा अहते
वाससी परिधाय वैश्वदेववर्जं वसोर्धारामातृपूजनसहितं नान्दीमुखं हिरण्यश्राद्धं कृत्वा मेधाजननं च आयुष्यं च ते
करोतीत्यर्थः । तत्रादौ कुमारदक्षिणे श्रवणे वागिति त्रिः पठित्वा **वेदोऽसीति** गुह्यं नाम कृत्वा मेधाजननायुष्ययोराद्यं
मेधाजननं करोति । सूत्रयति च सूत्रकृत्–**अनामिकया दधामीति**–सुवर्णान्वितोपकनिष्ठया मधुघृते मिश्रिते केवलं
घृतं वा **भूस्त्वयि दधामी**त्यादिभिश्चतुर्भिर्मन्त्रैः प्रतिमन्त्रं कुमारं प्राशयति कुमारस्य जिह्वायां निमार्ष्टि । यत्तु
इतिशब्देन मन्त्रावसानज्ञप्तेश्चतुर्णामप्येकमन्त्रतेति । तन्न, "पृथिव्यास्त्वा नाभौ सादयामीत्यदित्या उपस्थे" इत्यादाव-
नेकेतिकारैरनेकमन्त्रतापत्तेः । मित्रविन्दासूत्रे "अग्निरन्नाद" इत्यादिमन्त्रेष्वितिशब्दाभावान्मन्त्रैक्यापत्तेः । नच स्वाहा-
कार एवात्र मन्त्रान्तं बोधयतीति वाच्यम्, अग्निरायुष्मानित्याद्यायुष्यकरणमन्त्राणामैक्यापत्तेश्चेति न किञ्चिदेतत् ।
अथास्यायुष्यं करोति नाभ्यां दक्षिणे वा कर्णे जपति–आयुषो हितमायुष्यम् । मेधाजननानन्तरमस्य
कुमारस्य करोति । कथमित्यत आह **नाभ्यामिति** । सप्तम्यर्थो विषयत्वं, नाभिविषयकमालम्भं कृत्वा जपती-
त्यन्वयः । " दक्षिणे वा कर्णे " दक्षिणकर्णशष्कुल्यवच्छिन्ननभसि समवेतां मन्त्ररूपशब्दानां क्रमेणाभिव्यक्तिं करोतीत्यर्थः ।
आयुष्यहेत्वर्थस्मृतिहेतून्सूत्रयति सूत्रकृन्मन्त्रान् ।**अग्निरायुष्मान्स वनस्पतिभिरायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं**
करोमि,सोम आयुष्मान्सौषधीभिरायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि,ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्म-
त्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि, देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि,
ऋषय आयुष्मन्तस्तेन व्रतैरायुष्मन्तस्तेन त्वायुऽऽषाऽऽयुष्मन्तं करोमि, पितर आयुष्मन्तस्ते स्वधाभिरा-
युष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि, यज्ञ आयुष्मान्सदक्षिणाभिरायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं
करोमि, समुद्र आयुष्मान्स स्रवन्तीभिरायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमीति त्रिः । पूर्वोक्तानष्टौ
मन्त्रान् कुमारस्य दक्षिणे कर्णे जपेत् वारत्रयम् । **त्र्यायुषमिति च** "त्र्यायुषं जमदग्नेः" इत्यमुमपि मन्त्रं त्रिर्जपति ।
पूर्वसूत्रस्थत्रिःपदानुकर्षकश्चकारः ॥ **स यदि कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेत्**–स यदि
पिता इच्छेत् अयं कुमारः समग्रं सुखजीवनं लभतां तदा भालन्दनेन वात्सप्रेण दृष्टानुवाकेन तं कुमारं स्पृशेत् । पूर्वोक्तमनुवा-
कमेवाह-**दिवस्परीति एतस्यानुवाकस्योत्तमामृचं परिशिनष्टि**–अयं चानुवाको द्वादशर्चः । तस्योत्तमामृचमन्त्या-
मस्ताव्यग्निरिति नाम्नीं परिशिनष्टि व्युदस्यति।तां व्युदस्यैकादशभिरभिमृशेदित्यर्थः। **प्रतिदिशं पञ्च ब्राह्मणानवस्थाप्य**

ब्रूयादिममनु प्राणितेति । पूर्वो ब्रूयात्प्राणेति, व्यानेति दक्षिणोऽपानेत्यपर उदानेत्युत्तरः, समानेति पञ्चम उपरिष्टादवेक्षमाणो ब्रूयात्स्वयं वा कुर्यादनुपरिक्रामम्नविद्यमानेषु । स यस्मिन्देशे जातो भवति तमभिमन्त्रयते वेद ते भूमि हृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतमित्यथैनमभिमृशत्यश्मा भव परशुर्भव हिरण्यमस्तुतं भव । आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यथास्य मातरमभिमन्त्रयत इडासि मैत्रावरुणी वीरे वीरमजीनथाः । सा त्वं वीरवती भव यास्मान्वीरवतोऽकरदिति–चतुःसूत्री निगदव्याख्याता । ब्राह्मणान् कुमाराभिमुखान् । ब्राह्मणाभावे स्वस्य कर्तृत्वे अतिक्रमणा प्रैषाभावश्चेति अन्यत्सुगमम् । **अथास्यै दक्षिणꣳ स्तनं प्रक्षाल्य प्रयच्छतीमꣳ स्तनमिति यस्ते स्तन इत्युत्तरमेताभ्याम्**–कुमाराभिमन्त्रणानन्तरमस्यै अस्याः मातुः दक्षिणं स्तनं क्षालयित्वा कुमाराय ददाति कुमारस्य मुखे प्रवेशयति **इमꣳ स्तनम्** इति, "यस्ते स्तन इमꣳ स्तनमित्येताभ्याम्" ऋग्भ्याम् । **उदपात्रꣳ शिरस्तो निदधाति**--जलपूर्णं पात्रमतिखट्वं कुमारशिरःप्रदेशाधस्ताद्भूमौ निदधाति । तत्र मन्त्रमाह–**आपो देवेषु जाग्रथ यथा देवेषु जाग्रथ । एवमस्याꣳ सूतिकायाꣳ सपुत्रिकायां जाग्रथेति**–अनेन मन्त्रेण **द्वारदेशे सूतिकाग्निमुपसमाधायोत्थानात्संधिवेलयोः फलीकरणमिश्रान्सर्षपानग्नावावपति**–सूतिकागृहस्य द्वारोपलक्षिते वहिःप्रदेशे दक्षिणत उपलिप्त उद्धतावोक्षिते सूतिकाग्निमुपसमाधाय, तथाच तत्र स्थापितस्याग्नेः सूतिकाग्निरिति नामधेयं, तस्मिन्नग्नौ तण्डुलकणोपरक्तान् सिद्धार्थानावपति । अवधिमाह–आउत्थानात् उत्थानं सूतकान्तं यावत् । कदेत्यत आह–सन्धिवेलयोः सायंप्रातरित्यर्थः । अनेनेतरहोमेतिकर्तव्यतानिरासः । **शण्डा मर्का उपवीरः शौरिकेय उलूखलः । मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा । आलिखन्ननिमिषः किंवदन्त उपश्रुतिर्हर्यक्षः कुम्भी शत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहेति**–द्वाभ्यामाभ्यां मन्त्राभ्यां द्वे आहुती अग्नौ प्रक्षिपतीत्यर्थः । इदमग्नय इति त्यागः । **यदि कुमार उपद्रवेज्जालेन प्रच्छाद्योत्तरीयेण वा पिताङ्क आधाय जपति**–यदि कुमारस्य स्कन्दनादिभ्यः ग्रहोपद्रवो भवेत् ततः पिता अङ्के कुमारमाधाय उत्तरीयजालाभ्यामन्यतरेणाच्छाद्य वक्ष्यमाणं मन्त्रं जपति । किं तादित्यत आह–**कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः । चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यं यत्ते देवा वरमददुः स त्वं कुमारमेव वावृणीथाः । चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् । यत्ते सरमा माता सीसरः पिता श्यामशबलौ भ्रातरौ । चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वरेति**–इतिशब्दो मन्त्रसमाप्तिद्योतकः । **अभिमृशति न नामयति न रुदति न हृष्यति न ग्लायति यत्र वयं वदामो यत्र चाभिमृशामसीति**–पूर्वं मन्त्रं जपित्वा **न नामयती**त्यादिनाऽभिमृशामसीत्यन्तेन कुमारं स्पृशतीत्यर्थः । ततः कुमारमात्रे कुमारं दत्त्वा स्पर्शनिमित्तं पितुः स्नानम् । इति **जातकर्म** ॥

इति षोडशी कण्डिका ॥ १६ ॥

दशम्यामुत्थाप्य ब्राह्मणान्भोजयित्वा पिता नाम करोति ॥ १ ॥ द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तःस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितम् ॥ २ ॥ अयुजाक्षरमाकारान्तꣳ स्त्रियै तद्धितम् ॥ ३ ॥ शर्म ब्राह्मणस्य वर्म क्षत्रियस्य गुप्तेति वैश्यस्य ॥ ४ ॥ चतुर्थे मासि निष्क्रमणिका ॥ ५ ॥ सूर्यमुदीक्षयति तच्चक्षुरिति ॥ ६ ॥ ॥ १७ ॥ * ॥

कर्कः–**दशम्यामुत्थाप्य ब्राह्मणान्भोजयित्वा पिता नाम करोति द्व्यक्षरं चतुरक्षरं वा**–दशम्यां रात्र्यामतीतायामेकादशेऽहानि श्राद्धव्यतिरेकेण ब्राह्मणान्भोजयित्वा पिता नाम करोति कुमारस्य । अन्यस्मिन्नपि संस्कारे पितुरेवोत्सर्गात्कर्तृत्वम् । इह पितृग्रहणादन्यत्रापि नियमोऽवगम्यते । तच्च द्व्यक्षरं चतुरक्षरं वा कर्तव्यम् । **घोषवदादि**–घोषवदक्षरमादौ कृत्वा भवति । वर्गाणां प्रथमद्वितीयाः शषसहाश्चाघोषाः । अन्ये घोषवन्तः । तदादि कर्तव्यम् । **अन्तरन्तःस्थम्**–अन्तःस्था यरलवास्ते नाम्नोऽन्तर्मध्ये कर्तव्याः । **दीर्घाभिनिष्ठानम्**–निष्ठानं समाप्तिरुच्यते सा दीर्घा कर्तव्या । **कृतं कुर्यात्**–कृदिति प्रत्ययसञ्ज्ञा तदन्तं कुर्यात् । अपरे पितामहादिकृतं वर्णयन्ति । **न तद्धितम्**–तद्धितप्रत्ययान्तस्यापवादोऽयम् । **अयुजाक्षरमाकारान्तꣳ स्त्रियै तद्धितम्**–अयुग्मैरक्षरैराकारान्तं च स्त्रियै

तद्धितान्तं कर्तव्यम् । **शर्म ब्राह्मणस्य**–शर्मशब्दः सुखवाचकः, सुखनीयं ब्राह्मणस्य कर्तव्यम् । यथा शुभङ्करः प्रियङ्कर इति । **वर्म क्षत्रियस्य**–वर्मशब्दश्च शौर्यवचनः शौर्ययुक्तं क्षत्रियस्य कर्तव्यम् । नरवर्मा । शशिवर्मा । **गुप्तेति वैश्यस्य**–गुप्तशब्दश्चाढ्यवचनः । आढ्यत्वाभिधायि वैश्यस्य । मणिभद्रः । **चतुर्थे मासि निष्क्रमणिका** । कुमारस्य कार्या– तत्र **सूर्यमुदीक्षयति तच्चक्षुरिति**–अनेन मन्त्रेण ॥ १७ ॥ ॥ * ॥

जय०–दशम्यां–रात्र्यामतीतायामेकादशेऽह्नि इत्यर्थः । **ब्राह्मणान्**–श्राद्धव्यतिरिक्तान् त्रिप्रभृतीन् । **पितेति**–ग्रहणादन्यत्रापि संस्कारे पितुरेव कर्तृत्वनियमोऽवगम्यते । तच्च **द्व्यक्षरं चतुरक्षरं वा घोषवद**क्षरम् वर्गाणां प्रथमद्वितीयाः शषसहाश्चाघोषाः । अन्ये घोषवन्त इति त आदौ यस्य तत्कुर्यात् । अन्तर्मध्ये अन्तःस्था यरलवा यस्य तत्, **दीर्घाभिनिष्ठानं**–दीर्घं द्विमात्रमभिनिष्ठानं निष्ठा समाप्तिर्यस्य तत् । **कृतं**–कृत्प्रत्ययान्तम्, पितामहादीनां कृतमित्यपरे । **न तद्धितेति**–तद्धितापवादोऽयम् । अयुजाक्षरमित्यादि तु स्त्रिया एव अयुजैरयुग्मैरक्षरैराकारान्तम् । तद्धितप्रत्ययान्तं च स्त्रियै कन्यायाः कुर्यात् । शर्म सुखवाचकम् । वर्म शौर्यवाचकम् । गुप्तशब्दश्चाढयवचनः । **चतुर्थे मासि** निष्क्रमणं कार्यम् । तत्र **सूर्यमुदीक्षयति**–दर्शयति पिता **तच्चक्षुरिति** मन्त्रेण ॥ १७ ॥

हरि०–दशम्यामुत्थाप्य ब्राह्मणान्भोजयित्वा पिता नाम करोति–प्रसवदिनमारभ्य दशम्यां तिथौ सूतिकां सूतिकागृहादुत्थाप्य नामकरणाङ्गतया ब्राह्मणान् त्रीन् भोजयित्वा भोजनं कारयित्वा पिता अपत्यस्य नामधेयं करोति । अत्र "दशम्याम्" इति सूतकान्तोपलक्षणम् । ततश्च यस्य यावन्ति दिनानि सूतकं तदन्तदिने सूतिकोत्थापनमित्यर्थः । अपरदिने च नामकरणम् । तथाच **गोभिलसूत्रम्**–"दशरात्रे व्युष्टे नामकरणम्" इति । **याज्ञवल्क्यवचनं च**–" अहन्येकादशे नामेति नाम करोति" इत्युक्तम् । तत्कीदृशमित्यपेक्षायामाह–**द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तःस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितमयुजाक्षरमाकारान्तं स्त्रियै तद्धितम्**–द्वे अक्षरे अस्य तत् द्व्यक्षरं, चत्वार्यक्षराणि यस्य तच्चतुरक्षरम्, अनयोर्विकल्पः । किंच घोषवदादि घोषवदक्षरमादौ यस्य नाम्नः तत् घोषवदादि । घोषवन्ति चाक्षराणि गघङ—जझञ—डढण—दधन—बभम—ह्–इत्येतानि । अन्तरन्तःस्थम् अन्तर्मध्ये अन्तःस्था यस्य तदन्तरन्तस्थम्, अन्तःस्था यरलवाः । दीर्घाभिनिष्ठानं दीर्घमह्रस्वम् अभिनिष्ठानमवसानं यस्य तत् दीर्घाभिनिष्ठानम् । कृतं कृत्प्रत्ययान्तं कुमारस्य नामधेयं कुर्य्यात् । पक्षान्तरे कृतं पितामहादिनाम तत्कुर्यात् । न तद्धितं तद्धितप्रत्ययान्तं न कुर्य्यात् । स्त्रिया नाम्नि विशेषमाह–अयुजाक्षरम् अयुजानि विषमाणि त्र्यादीन्यक्षराणि यस्मिन्नाम्नि तदयुजाक्षरम् । आकारान्तम् आकारः अन्ते यस्य तदाकारान्तम् । तद्धितं तद्धितप्रत्ययान्तं स्त्रियै स्त्रिया नाम कुर्यादित्यनुषङ्गः । आपिच ; **शर्म ब्राह्मणस्य वर्म क्षत्रियस्य गुप्तेति वैश्यस्य**–ब्राह्मणस्य विप्रस्य पूर्वोक्तलक्षणनामान्ते **शर्मेति** । क्षत्रियस्य पूर्वोक्तलक्षणनामान्ते **वर्मेति** । वैश्यस्य पूर्वोक्तनामान्ते **गुप्तेति** पदं कुर्यात् । अथवा ब्राह्मणस्य नाम शर्म मङ्गलप्रतिपादकं कुर्यात् । क्षत्रियस्य वर्म शौर्यरक्षावत्ताप्रतिपादकम् । वैश्यस्य गुप्तेति धनवत्ताप्रतिपादकम् । शूद्रस्य प्रेष्यत्वप्रतिपादकमिति बोद्धव्यम् । अथ **नामकरणप्रयोगः** । सूतकान्तद्वितीयादिने नामकरणनिमित्तं मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं विधाय अन्यब्राह्मणत्रयं भोजयित्वा पिता कुमारस्य " द्व्यक्षरम्" इत्यादिनोक्तलक्षणं नाम करोति यथाशिष्टाचारं **देवराजशर्मा** इत्यादि । **चतुर्थे मासि निष्क्रमणिका**–कुमारस्य

जन्मचतुर्थे मासि निष्क्रमणिका गृहाद्बहिर्निष्क्रमणं करोति पिता । **सूर्यमुदीक्षयति तच्चक्षुरिति**–अथ **तच्चक्षुर्देवहितमि**त्यादिना **भूयश्च शरदः शता**दित्यन्तेन मन्त्रेण । श्रीसूर्यं भगवन्तं रश्मिमालिनमुदीक्षयति कुमारं प्रदर्शयति पिता । अथ **निष्क्रमणप्रयोगः** । जन्मादिने जन्मनक्षत्रे वा प्राणानायम्य देशकालौ स्मृत्वा अस्य कुमारस्य गृहान्निष्क्रमणं करिष्ये इति सङ्कल्प्य तदङ्गत्वेन चतुर्थे मासि शुभे दिने मातृपूजाभ्युदयिके विधाय; मात्रा अङ्के कृतं कुमारं गृहाद्बहिरानीय "तच्चक्षुर्देवहितम्" इति मन्त्रेण शिशोः सूर्यस्योदीक्षणं पिता कारयति ।। १७ ।।

गदा०–**दशम्यामुत्थाप्य ब्राह्मणान्भोजयित्वा पिता नाम करोति**–प्रसवाद्दशम्यां रात्र्यामतीतायामेकादशेऽहनि सूतिकागृहात्सूतिकामुत्थाप्य श्राद्धव्यतिरेकेण त्रीन् ब्राह्मणान्भोजयित्वा पिता कुमारस्य नाम सञ्ज्ञां संव्यवहारार्थं करोति । अन्यस्मिन्नपि संस्कारे पितुरेवोत्सर्गात्कर्तृत्वम् । इह पितुर्ग्रहणादन्यत्रापि नियमोऽवगम्यते । अत्र "दशम्याम्" इति सूतकान्तोपलक्षणम् । तथाच **मदनरत्ने नारदीये**–"सूतकान्ते नामकर्म विधेयं स्वकुलोचितम्" इति । ततश्च "यस्य यावन्ति दिनानि सूतकं तदन्तादिने कार्यम्" इति **हरिहरः** । **सूत्रकार**वचनादेकादशेऽहन्येवेत्यन्ये । **गोभिलसूत्रे** "दशरात्रे व्युष्टे नामकरणम्" इति । **याज्ञवल्क्यः**–"अहन्येकादशे नाम" इति । **मदनरत्ने** विशेषः–"द्वादशे दशमे वाऽपि जन्मतोऽपि त्रयोदशे । षोडशे विंशतौ चैव द्वाविंशे वर्णतः क्रमात् ॥" **कारिकायाम्**–"एकादशे द्वादशे वा मासे पूर्णेऽथवा परे । अष्टादशेऽहनि तथा वदन्त्यन्ये मनीषिणः ॥ शतरात्रे व्यतीते वा पूर्णे संवत्सरेऽथवा ।" **ज्योतिर्निबन्धे गर्गः**–"अमासङ्क्रान्तिविष्ट्यादौ प्राप्तकालेऽपि नाचरेत् ।" एकादशेऽहानि नामकरणाशक्तौ **स्मृत्यन्तरो**क्तद्वादशाहादिकालो ग्राह्यः । तदुक्तं **कारिकायाम्**–"मुख्यकाले यदा नामधेयं कर्तुं न शक्यते । उक्तानामन्यतमस्मिन्दिने स्याात्तु गुणान्विते ॥" कीदृशं नाम कार्यमित्यत आह–**द्व्यक्षरं चतुरक्षरं वा** नाम कुर्यादिति शेषः । द्वे अक्षरे यस्य तत् द्व्यक्षरम्, चत्वार्यक्षराणि यस्य तच्चतुरक्षरम्, अनयोर्विकल्पः। **घोषवदाद्यन्तरन्तःस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितम्**–घोषवदादि घोषवदक्षरमादौ यस्य तत्, घोषवन्तो वर्गान्तास्त्रयो वर्णा यरलवाश्चोच्यन्ते । ते च गघङ-जझञ-डढण-दधन-बभम-ह-इति । अन्तरन्तःस्थम् अन्तर्मध्ये अन्तःस्थाः यस्य तत्, अन्तःस्था यरलवा उच्यन्ते। एते नाम्नो मध्ये कर्तव्या इत्यर्थः । दीर्घाभिनिष्ठानम् अभिनिष्ठानं समाप्तिरवसानं दीर्घं यस्य तत् । दीर्घो गुरुरुच्यते । कृतं कुर्यादिति कृदिति प्रत्ययसञ्ज्ञा तदन्तं कुर्यात् । अपरे पितामहादिकृतं वर्णयन्ति । न तद्धितम् तद्धितप्रत्ययान्तं कुमारस्य नाम न कुर्यात् । ततश्चेदृङ् नाम कार्यम् । भद्रकारीति । स्त्रिया नाम्नि विशेषमाह-**अयुजाक्षरमाकारान्तं स्त्रियै तद्धितम्**–अयुजानि विषमाणि त्र्यादीन्यक्षराणि यस्मिन्नाम्नि तत् आकारान्तम् आकारोऽन्ते यस्य तत् । तद्धितं तद्धितप्रत्ययान्तं च स्त्रियै स्त्रिया नाम कुर्यादित्यर्थः । **शर्म ब्राह्मणस्य**–शर्मशब्दः सुखनीयवचनः, । सुखनीयं ब्राह्मणस्य नाम कर्तव्यम् । यथा–"शुभङ्करः प्रियङ्करः" इति **कर्कः** । "ब्राह्मणस्य नाम्नि शर्मेत्यनुषङ्गो भवति" इति **भर्तृयज्ञहरिहरौ** । **वर्म क्षत्रियस्य**–वर्मशब्दः शौर्यवचनः, "शौर्ययुक्तं क्षत्रियस्य नाम कार्यम्" इति **कर्कः** । क्षत्रियनाम्नि वर्मेत्यनुषङ्ग इत्यन्ये । **गुप्तेति वैश्यस्य**–"गुप्तशब्द आढयत्वाभिधायी वैश्यस्य नाम भवति" इति **कर्कः** । गुप्तेति नाम्नि अनुषङ्ग इत्यन्ये । **मनुः**-" शर्मान्तं ब्राह्मणस्य स्याद्वर्मान्तं क्षत्रियस्य तु । वैश्यस्य धनसंयुक्तं शूद्रस्य प्रेष्यसंयुतम्॥" । **चतुर्थे मासि निष्क्रमणिका**–कुमारस्य जननाच्चतुर्थे मासि निष्क्रमणिका गृहाद्बहिर्नयनं कर्तव्यम् । **ज्योतिर्निबन्धे**–"तृतीये वा चतुर्थे वा मासि निष्क्रमणं भवेत् । ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनम् ॥ चतुर्थे मासि कर्तव्यं शिशोश्चन्द्रस्य दर्शनम् ।" अत्र "सूर्येन्द्वोः कर्मणी ये च तयोः श्राद्धं न विद्यते" इति **छन्दोगपरिशिष्टात्** "छन्दोगानां निष्क्रमणे वृद्धिश्राद्धं नास्ति" इति **कल्पतरुः** । **व्यासः**–"मैत्रे पुष्यपुनर्वसुप्रथमभे पौष्णेऽनुकूले विधौ हस्ते चैव सुरेश्वरे च मृगभे तारासु शस्तासु च । कुर्यान्निष्क्रमणं शिशोर्बुधगुरौ शुक्रेष्वरिक्तातिथौ कन्याकुम्भतुलामृगारिभवने सौम्यग्रहालोकिते ॥" **मदनरत्ने**–"अन्नप्राशनकाले वा कुर्यान्निष्क्रमणक्रियाम् ।" **सूर्यमुदीक्षयति तच्चक्षुरिति**–गृहाद्बहिर्नयनानन्तरं पिता कुमारं सूर्यं दर्शयति "तच्चक्षुः" इति मन्त्रेण । सूर्यमुदीक्षस्वेति प्रैष इति **गर्गपद्धतौ** तन्मृग्यम् । इति श्रीत्रिराग्निचित्सम्राट्स्थपति–श्रीमद्याज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे सप्तदशी कण्डिका ॥ १७ ॥

अथ **पदार्थक्रमः** । जन्मत एकादशे द्वादशे वा यथाचारं नियतादिने वा नामकरणं कार्यम् । नियतका-
लेऽपि विष्टिवैधृतिव्यतीपातग्रहणसङ्क्रान्त्यमावास्याश्राद्धादिनेषु न कार्यम् । नियतकाले क्रियमाणेषु गुरुशुक्रास्तबाल्य-
वार्द्धकवक्रातिचारमलमासदिननिषेधो नास्ति । नियतकालातिक्रमे तु ज्योतिःशास्त्रोक्ते शुभे काले कार्यम् । सर्वथाऽत्र
पूर्वाह्णः प्रशस्तः । प्राणानायम्य देशकालौ स्मृत्वाऽस्य शिशोर्बीजगर्भसमुद्भवैनोनिबर्हणायुरभिवृद्धिव्यवहारसिद्धिद्वारा
श्रीपरमेश्वरप्रीत्यर्थं नामकरणं करिष्य इति सङ्कल्प्य मातृपूजापूर्वकमाभ्युदयिकं कृत्वा ब्राह्मणत्रयभोजनं कार्यम् । ततः
स्वकुलदेवताभक्त इति नाम कृत्वा जन्मकालिकमासनाम कुर्यात् । तच्च "कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ
जनार्दनः । उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः ॥ योगीशः पुण्डरीकाक्षो मासनामान्यनुक्रमात् ।" अत्र यथाचारं
चैत्रादिर्मार्गशीर्षादिर्वा क्रमः । ततोऽवकहडाख्यज्योतिःशास्त्रोक्तचक्रानुसारेण जन्मनक्षत्रपादयुक्ताक्षरादि नाम ।
ततो व्यावहारिकं स्वेष्टं नामेति । अत्रायं **दाक्षिणात्यशिष्टाचारः** । तण्डुलान् कांस्यादिपात्रे प्रसार्य तदुपरि
सुवर्णशलाकया कुलदेवताप्रयुक्तममुकभक्त इत्यादि नामचतुष्टयं लेख्यम् । ततो देवताभ्यो नम इति सम्पूज्यामुकनाम्ना
त्वममुकोऽसीति स्वदक्षिणस्थमातुरुत्सङ्गस्थशिशोर्दक्षिणे कर्णे कथयित्वा "मनो जूतिः" इत्यादिमन्त्रपाठान्ते विप्रैर्नाम
सुप्रतिष्ठितमस्त्वित्युक्तेऽमुकनाम्नाऽमुकनामाऽयं भवतोऽभिवादयत इत्युक्त्वा नामकर्ता प्रतिनाम विप्रानभिवादयेत् । ते
चायुष्मान् भवत्वमुक इति वदेयुरिति । ततः कर्ता देवताभ्यो ब्राह्मणेभ्यश्च नत्वा दशसङ्ख्याकान्विप्रान्भोजयेद्दक्षिणां
च दद्यात् । विप्राशिषश्च ग्राह्याः । कुमार्या अपि नामकरणममन्त्रकं कार्यम् । इति **नामकरणे पदार्थक्रमः** । नात्र
गर्गमते विशेषः । अथ **खट्वारोहः** । **पारिजाते** । "खट्वारोहस्तु कर्तव्यो दशमे द्वादशेऽपि वा । षोडशे दिवसे
वाऽपि द्वाविंशे दिवसेऽपि वा" **ज्योतिर्निबन्धे**–"करत्रये वैष्णवरेवतीषु दितिद्वये चाश्विनकध्रुवेषु । कुर्याच्छिशूनां
नृपतेश्च तद्वदान्दोलनं वै सुखिनो भवन्ति" । तत्रैवम्–"आन्दोलाशयने पुंसो द्वादशो दिवसः शुभः । त्रयोदशस्तु
कन्याया न नक्षत्रविचारणा ॥ अन्यस्मिन्दिवसे चेत्स्यात्तिर्यगास्ये प्रशस्यते ।" तत्र नामकरणदिने षोडशे द्वात्रिंशे-
ऽन्यस्मिन्वा ज्योतिर्विदादिष्टे शुभे काले यथाचारं कुलदेवतादिपूजां विधायालङ्कृतं शिशुं हरिद्राद्यलङ्कृते पर्यङ्के
मात्राद्याः सौभाग्ययुक्ताः स्त्रियो योगशायिनं हरिं स्मरन्त्यो गीतवाद्यादिसमकालं प्राक्शिरसं न्यसेयुः । स्वस्वाचारप्राप्तं
चान्यदपि कार्यम् । अथ **दुग्धपानम्** । **नृसिंहः**–"एकत्रिंशद्दिने चैव पयः शङ्खेन पाययेत् ।
अन्नप्राशननक्षत्रे दिवसोदयराशिषु ॥" अथ **ताम्बूलभक्षणम्** । **चण्डेश्वरः**–"सार्द्धमासद्वये दद्यात्ताम्बूलं
प्रथमं शिशोः । कर्पूरादिकसंयुक्तं विलासाय हिताय च" "मूलार्कचित्रकटतिष्यहरीन्द्रभेषु पौष्णे तथा
मृगशिरोऽदितिवासरेषु । अर्केन्दुजीवभृगुबोधनवासरेषु ताम्बूलभक्षणविधिर्मुनिभिः प्रदिष्टः ।" कुमारस्यास्मिन्नेव
मासे शुभदिने रात्रौ चन्द्रदर्शनं कारयेत् । "चन्द्रार्कयोर्दिगीशानां दिशां च वरुणस्य च । निक्षेपार्थमिमं
दद्मि ते त्वां रक्षन्तु सर्वदा ॥ अप्रमत्तं प्रमत्तं वा दिवारात्रमथापि वा । रक्षन्तु सततं सर्वे देवाः शक्रपुरोगमाः" ।
एवं शिशुरक्षणार्थं देवान्प्रार्थयेत् । **अथोपवेशनविधिः** । **प्रयोगपारिजाते**–"पञ्चमे च तथा मासि
भूमौ तमुपवेशयेत् । तत्र सर्वे ग्रहाः शस्ता भौमोऽप्यत्र विशेषतः ॥ उत्तरात्रितयं सौम्यं पुष्यर्क्षं शक्रदैवतम् । प्राजा-
पत्यं च हस्तश्च शस्तमाश्विनमित्रभम् ॥" पञ्चममासे, शुक्लपक्षे, शुभतिथ्यादौ, पूर्वाह्णे स्वस्तिवाचनं कृत्वा, तत्र
शङ्खतूर्यादिमाङ्गलिकध्वनौ क्रियमाणे शिशुमुपवेशयेदित्येतैर्मन्त्रैः । "रक्षैनं वसुधे देवि सदा सर्वगतं शुभे । आयु-
ष्प्रमाणं निखिलं निक्षिपस्व हरिप्रिये ॥ आचिरादायुषस्त्वस्य ये केचित्परिपन्थिनः । जीवितारोग्यवित्तेषु निर्दहस्वाचि-
रेण तान् ॥ धारिण्यशेषभूतानां मातस्त्वमधिका ह्यसि । कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यताम् " इति । ततो
ब्राह्मणान्पूजयित्वाऽऽशिषो वाचयित्वा नीराजनाद्युत्सवं कुर्यात् । एवं कुमार्या अपि । अथ **कर्णवेधः** । तत्र याज्ञिकाः
पठन्ति । अथ कर्णवेधो वर्षे तृतीये पञ्चमे वा पुष्येन्दुचित्राहरिरेवतीषु पूर्वाह्णे कुमारस्य मधुरं दत्त्वा, प्रत्यङ्मुखायोप-
विष्टाय दाक्षिणं कर्णमभिमन्त्रयते भद्रं **कर्णेभिरिति सव्यं वक्ष्यन्ती** वेदेति चाथ भिन्द्यात् । ततो ब्राह्मणभोजनम् ।
मदनरत्ने–" प्रथमे सप्तमे मासि अष्टमे दशमे तथा । द्वादशे च तथा कुर्यात्कर्णवेधं शुभावहम् ।" **हेमाद्रौ व्यास-**
वचनम्–" कार्तिके पौषमासे वा चैत्रे वा फाल्गुने ऽपि वा । कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने" **कारिकायाम्**–
"सुनक्षत्रे शुभे चन्द्रे स्वस्थे शीर्षोदये तथा । दिनच्छिद्रव्यतीपातविष्टिवैधृतिवर्जिते " " चित्राऽनुराधामृगरेवतीषु
पुनर्वसौ पुष्यकराश्विनीषु ॥ श्रुतौ धनिष्ठातिसृषूत्तरासु लग्ने गुरौ लाभनृगे शुभे तत् " **मदनरत्ने**–" द्वितीया दशमी
षष्ठी सप्तमी च त्रयोदशी । द्वादशी पञ्चमी शस्ता तृतीया कर्णवेधने ॥ सौवर्णी राजपुत्रस्य राजती विप्रवैश्ययोः ।

शूद्रस्य चायसी सूची मध्यमाष्टाङ्गुलात्मिका '' **हेमाद्रौ देवलः**–"कर्णरन्ध्रे रविच्छाया न विशेदग्रजन्मनः । तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुनः पुनः " । **शङ्खः**–"अङ्गुष्ठमात्रसुषिरौ कर्णौ न भवतो यदि । तस्मै श्राद्धं न दातव्यं दत्तं चेदासुरं भवेत्॥" ततो यथोक्तकाले देशकालौ स्मृत्वाऽस्य शिशोः कर्णवेधं करिष्ये इति स ङ्कल्प्य, कुमारं स्नापयित्वा, तस्मै शर्करादि मधुरं दत्त्वा "भद्रं कर्णेभिः" इति दक्षिणकर्णमभिमन्त्र्य "वक्ष्यन्ती वेद" इति मन्त्रेण सव्यकर्णस्याभिमन्त्रणं कुर्यात् । ततः सूच्या दाक्षिणकर्णस्य वेधः । ततः सव्यस्य । ततो ब्राह्मणभोजनम् । अत्राभ्युदयिकं केषांचिन्मते नास्ति॥ इति श्रीत्रिराग्निचित्सम्राट्स्थपति–श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते **कर्णवेधपदार्थक्रमः** ॥ १७ ॥

विश्व०–अथेदानीं नामकर्मनिष्क्रमणिके क्रमेण सूत्रयाति **दशम्या...करोति**--जननाशौचस्य प्रक्रान्तत्वात् तत्प्रतियोगिनी दशमी चरमावस्था तस्यां जातायां सूतके विनष्टे दशाहे निवृत्त इत्यर्थः । तत एकादशेऽहानि सूतिकागृहात्सूतिकामुत्थाप्य स्नापयित्वा नाम करोति जननाशौचत्वाद्वस्त्रशरीरादिगोचरां शुद्धिं सूतिकायाः संपाद्य पिता नाम करोतीत्यन्वयः । तदुक्तं—"अहन्येकादशे नाम" इति । अत्राप्येकादशाहपदं सूतकान्तोपलक्षणम् तेन क्षत्रियादेरपि सूतकनिवृत्त्यनन्तरमेव नामकरणम् । कथमित्यपेक्षायामाह–**ब्राह्मणान् भोजयित्वेति** । एतस्य नामकरणपूर्वाङ्गत्वादादौ वैश्वदेवपूर्वकमाभ्युदयिकं श्राद्धं कुर्यात् । तत इतरान्ब्राह्मणान्नामकरणाङ्गत्वेन भोजयेत् । कीदृशं तदित्याह–**द्व्यक्षरं तद्धितम्**–अत्राज्झलसमुदायस्याक्षरत्वम्, द्वे अक्षरे यस्य तद् द्व्यक्षरम्, चत्वारि अक्षराणि यस्य तत्तादृशं, वाशब्दो विकल्पार्थः । पुनः कीदृशं **घोषवदादि**–घोषवदक्षरम् आदौ यस्य तत्तादृशं, वर्गाणां प्रथमद्वितीयाः शषसाश्चाऽघोषाः । तद्भिन्नहलां घोषवत्त्वम् । पुनः कीदृशं **अन्तरन्तःस्थम्**–अन्तर्मध्ये अन्तःस्था यस्य तत्तादृशम् । यरलवा अन्तःस्थाः । पुनः कीदृक् **दीर्घाभिनिष्ठानम्**–दीर्घमक्षरमभिनिष्ठानेऽवसाने यस्य तद्दीर्घाभिनिष्ठानं, **कृतम्**—राशिचक्रादिविचारेण ज्योतिःशास्त्रे कृतं कर्त्तव्यतया बोधितम्, अथवा पितामहादेः कृतं यत्प्रपितामहादिभिः, अथवा रामकृष्णादिदेवतासंबन्धि पुराणादौ कृतमिति श्रुतं, यद्वा कृत्प्रत्ययान्तं, कृतामिति क्रियाविशेषणं वा **कुर्यात्**–कुमारस्य दक्षिणं कर्णमभिनिधाय पठेदित्यर्थः । कुमार्यास्तु वामश्रवणे जपेदिति शेषः । **न तद्धितं**–तद्धितप्रत्ययान्तं न कुर्यात् । कुमार्याः कीदृशं नामेत्यत आह–**अयुजाक्षरम्** अयुग्माक्षरम् । **आकारान्तम्**–आशब्दः अन्ते यस्य । **तद्धितं**–ताद्धितान्तं कन्यानाम कुर्यादिति पूर्वानुषङ्गः । अपिच **शर्म...वैश्यस्य**–ब्राह्मणक्षत्रियविशां नामकीर्तनानन्तरं शर्मवर्मगुप्तेति यथाक्रमं प्रयोगादौ प्रयोक्तव्यम् । यद्वा केषांचिच्छर्मविशेषाः सन्ति । तत्तदुपस्थापकपदप्रयोगानन्तरं शर्मपदं प्रयोगादौ प्रयोक्तव्यम् । यद्वा केषांचित्क्लृप्तम् । एवं क्षत्रियादिरपि वर्मोपस्थापकपदविशेषप्रयोगानन्तरं वर्मेति पदप्रयोगः । एवं वैश्यस्यापि धनविशेषविषयकरक्षणपदप्रयोगानन्तरं गुप्तेति पदप्रयोगः । शूद्रस्यापि प्रेष्यत्वप्रतिपादकं दासादिपदं नामकीर्तनानन्तरं प्रयोक्तव्यमिति नामकरणं यथाकुलाचारं वा । निष्क्रमं सूत्रयाति । **चतुर्थे मासि निष्क्रमणिका**–निष्क्रमणिकेति कर्मनामधेयम्, कदेत्यत उक्तं **चतुर्थे मासीति** । तदुक्तं चतुर्थे मासि निष्क्रम इति । कथमित्यत आह–"सूर्यमुदक्षिस्व "इति प्रैषपूर्वं कुमारं **सूर्यमुदीक्षयति चक्षुरिति** मन्त्रेण । बालकस्यायोग्यत्वात्स्वयं मन्त्रपाठः । कन्यायास्तु सूर्यावेक्षणं तूष्णीम् ॥ १७ ॥ इति सप्तदशी कण्डिका ॥ * ॥

प्रोष्येत्य गृहानुपतिष्ठते पूर्ववत् ॥ १ ॥ पुत्रं दृष्ट्वा जपति । अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे । आत्मा वै पुत्रनामाऽसि स जीव शरदः शतमिति ॥ २ ॥ अथास्य मूर्द्धानमवजिघ्रति । प्रजापतेष्ट्वा हिङ्कारेणावजिघ्रामि सहस्रायुषाऽसौ जीव शरदः शतमिति ॥ ३ ॥ गवां त्वा हिङ्कारेणेति च त्रिर्दक्षिणेऽस्य कर्णे जपति । अस्मे प्रयन्धि मघवन्नृजीषिन्निन्द्ररायो विश्ववारस्य भूरेः । अस्मे शतꣳ शरदो जीवसेऽधा अस्मे व्वीराञ्छश्वत इन्द्र शिप्रिन्निति ॥ ४ ॥ इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे । पोषꣳ रयीणामरिष्टिं तनूनाꣳ स्वात्मानं वाचः सुदिनत्वमह्नामिति सव्ये ॥ ५ ॥ स्त्रियै तु मूर्द्धानमेवावजिघ्रति तूष्णीम् ॥ ६ ॥ १८ ॥

कर्कः–**प्रोष्येत्य गृहानुपातिष्ठते पूर्ववत्**–प्रोषितः सन्नेत्य गृहोपस्थानं करोति । पूर्ववद् गृहा माबिभीतेति । **पुत्रं दृष्ट्वा जपत्यङ्गादङ्गात्सम्भवसीत्यमुं**–मन्त्रम् । **अथास्य मूर्द्धानमवजिघ्राति प्रजापतेष्ट्वा हिङ्कारेणेति**–मन्त्रेण । असाविति तस्यैव नामग्रहणम् । **गवां त्वा हिङ्कारेणेति** च–त्रिरवघ्राणं करोति । सहस्रायुषेत्यत्राप्यनुषङ्गः । सकृच्च मन्त्रवचनम् । **दक्षिणेऽस्य कर्णे जपत्यस्मे प्रयन्धि मघवन्नित्यमुं**–मन्त्रम् । अस्येति पुत्रोऽभिधीयते । **इन्द्र श्रेष्ठानि द्रविणानि धेहीति**–सव्ये कर्णे जपति । **स्त्रियै तु मूर्द्धानमेवावजिघ्राति तूष्णीम्** ।

जय०–प्रोष्य प्रवासं कृत्वा एत्य आगत्य गृहानुपतिष्ठते स्तौति साग्निः, कथं पूर्ववत् श्रौतवत् । **गृहा माबिभीते**त्यादित्रिभिर्मन्त्रैरित्यर्थः तत्र त्रयाणां शंयुर्बार्हस्पत्यः प्रथमस्य विराड्रूपा त्रिष्टुप् येषामनुष्टुप् उपहूता महापङ्क्तिर्द्व्यवसाना तिस्रो वास्तव्यः उपस्थाने० **क्षेमाये**ति प्रवेशनम् । तत्र **पुत्रं दृष्ट्वा जपति अङ्गादङ्गादिति**–मन्त्रम् । अस्याः । तत्र प्रजापतिरनुष्टुप् आयुर्जपे० । हे पुत्र यतस्त्वमङ्गादङ्गात् प्रत्यङ्गात्सम्भवसि उत्पत्स्यसे हृदयादन्तरङ्गादपि अधि अधिकतया जायसे, अतस्त्वं वै निश्चितंपुत्र नामा आत्मा अभिन्नरूपोऽसि । स त्वं शतं शरदो वर्षाणि जीव प्राणिहि । पुत्रमूर्द्धानं शिरः अस्य पुत्रस्यैवावजिघ्रति **प्रजापतेष्ट्वेति**–मन्त्रेण । अस्यार्थः । तत्र परमेष्ठी, उष्णिक्, प्रजापतिरवघ्राणे० । हे पुत्र प्रजापतेः ब्रह्मणः हिङ्कारेण स्नेहार्द्रशब्देन सामवेदेन वा त्वा त्वामवजिघ्रामि अतोऽवघ्राणात् हे असौ अमुकशर्मन् असौस्थाने नामादेशः। सहस्रायुषा सुबहुजीवनेन शरदः शतमित्युक्तार्थम् । अवघ्राणं च त्रिः । सकृन्मन्त्रेण, द्विस्तूष्णीम् । **गवां त्वेति**–मन्त्रेण त्रिवारं जिघ्रति । सहस्रायुषेत्यादेरत्राप्यनुषङ्गः । तेन प्रजापतिस्थाने गवां त्वेति पदं मन्त्रे पठेदित्यर्थः । दक्षिणे कर्णे जपश्च “ अस्मे प्रयन्धि ” इति मन्त्रेण । तस्यार्थः । तत्र द्वयोः प्रजापतिस्त्रिष्टुप् इन्द्रः कर्णजपे० । हे मघवन् नाकेश, ऋजीषिन् स्निग्धचित्त, हे इन्द्र लोकेश, शिप्रिन् सुखद लघुहस्तेति वा अस्मे अस्मै कुमाराय, इन्द्ररायः ऐश्वर्ययुक्तधनानि, प्रयन्धि प्रयच्छ । विश्ववारस्य सर्ववरणीयस्य वराणां समूहो वारम् सर्वेषां वराणां समूहः सर्ववारम् तस्येति वा भूरेर्बहुतरस्य अत्र कर्मणि षष्ठी, प्रचुरं सर्ववारं रायं प्रयच्छेत्यर्थः । प्रयोजनमाह–अस्मे अस्य शतं शरदो जीवसे जीवनायेति । किञ्च अस्मिन् वीरान्पुत्रान् शश्वतः शाश्वतान् दीर्घायुषः अधाः निधेहि अस्मै देहीत्यर्थः । वामे तु **इन्द्र श्रेष्ठानीति**–मन्त्रेण जपः । अस्यार्थः । हे इन्द्र परमैश्वर्ययुक्त, अस्मे अस्मिन्, श्रेष्ठानि सुमङ्गलानि द्रव्याणि, धेहि स्थापय । चित्तिं ज्ञानम्, तनूनामवयवानामरिष्टिं नीरोगत्वं दक्षस्य प्रजापतेरिव सुभगत्वं सौभाग्यं सर्वप्रभुत्वं च धेहि । तथा रयीणां धनानां पोषं पुष्टिम्, वाचः वागिन्द्रियस्य स्वात्मानं स्वादुत्वम्, माधुर्यमिति यावत् । अह्नां दिनानां सुदिनत्वं साफल्यं च धेहीति । स्त्रियै स्त्रियास्तु मूर्द्धावघ्राणमात्रं नत्वन्यत्, तदपि तूष्णीं नतु मन्त्रेण ॥ १८ ॥ ॥ * ॥

हरि०–**प्रोष्येत्य गृहानुपातिष्ठते पूर्ववत्**–प्रोष्य प्रवासादेत्य गृहान् गृहस्थान्भार्यापुत्रादीनुपतिष्ठते प्रार्थयते । कथं पूर्ववत् । आहिताग्निप्रवासप्रकरणोक्तवत् । तद्यथा । **गृहा माबिभीते**त्यारभ्य **उपहूतो गृहेषु नः** इत्येतावत्पर्यन्तैस्त्रिभिर्मन्त्रैः गृहानुपस्थाय क्षेमाय व इत्यादिना शँय्योः इत्यन्तेन मन्त्रेण गृहं प्रविशेत् । केचित्तु सूत्रकारेण गृहोपस्थानमात्रविधानात् मन्त्रवत्प्रवेशं नेच्छन्ति० **पुत्रं दृष्ट्वा** जपत्यङ्गादङ्गात्सम्भवसि हृदयादधिजायसे । आत्मा वै पुत्रनामाऽसि स जीव शरदः

शतमिति—पुत्त्रमात्मजं दृष्ट्वा विलोक्य "अङ्गादङ्गात्" इत्यादिकं मन्त्रं जपति । **अथास्य मूर्द्धानमवजिघ्रति**—अथ जपानन्तरमस्य पुत्त्रस्य मूर्द्धानं शिरः अवजिघ्रति अवाचीनं जिघ्रति । केन मन्त्रेण । **प्रजापतेष्ट्वा हिङ्कारेणावजिघ्रामि सहस्रायुषाऽसौ जीव शरदः शतमिति**—अनेन मन्त्रेण सकृत् । असावित्यस्य स्थाने अमुकशर्मन्निति पुत्त्रनामग्रहणम् । **गवां त्वा हिङ्कारेणेति च त्रिः**—प्रजापतेष्ट्वेति सकृज्जिघ्रणानन्तरं पुनः "गवां त्वा हिङ्कारेणावजिघ्रामि सहस्रायुषाऽसौ जीव शरदः शतम्" इति मन्त्रेण सकृन्मूर्द्धानमवघ्राय द्विस्तूष्णीमवजिघ्रति । **दक्षिणेऽस्य कर्णे जपत्यस्मे प्रयन्धि मघवन्नृजीषिन्निन्द्ररायो विश्ववारस्य भूरेः अस्मे शतꣳ शरदो जीवसेऽधा अस्मे व्वीराञ्छश्वत इन्द्र शिप्रिन्निति**—अस्य पुत्रस्य दक्षिणे कर्णे अस्मे प्रयन्धीत्यादि इन्द्रशिप्रिन्नित्यन्तं मन्त्रं जपति । **इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे । पोषꣳ रयीणामरिष्टिं तनूनाꣳ स्वात्मानं वाचः सुदिनत्वमह्नामिति सव्ये**—सव्ये वामकर्णे इन्द्रश्रेष्ठेत्यादि सुदिनत्वमह्नामित्यन्तं मन्त्रं जपति । **स्त्रियै तु मूर्द्धानमेवावजिघ्रति तूष्णीम्**—स्त्रियाः पुत्रिकायाः मूर्द्धानमेव अवजिघ्रति तूष्णीम्, विना मन्त्रेण एवकारेण दर्शनजपकर्णजपयोर्निवृत्तिः ॥ १८ ॥

गदा०—**प्रोष्येत्य गृहानुपतिष्ठते पूर्ववत्** साग्निकः प्रवासं कृत्वा एत्य गृहान् गृहस्थितान् भार्यापुत्त्रादीनुपतिष्ठते तत्समीपे स्थित्वा मन्त्रं पठति पूर्ववत् श्रौतवत् । "गृहा माबिभीत" इति त्रिभिर्मन्त्रैरित्यर्थः । उपस्थानानन्तरं "क्षेमाय वः" इति प्रवेशनमिति **भर्तृयज्ञहरिहरौ** । प्रवासश्च साग्निकेन द्रव्यार्जनादिदृष्टकार्यार्थमेव केवलेन पुरुषेण कार्यः, न तु तीर्थयात्राद्यदृष्टकार्यार्थमिति **प्रयोगरत्ने** । **"पुत्त्रं दृष्ट्वा जपत्यङ्गादङ्गात्सम्भवसि हृदयादधिजायसे आत्मा वै पुत्त्रनामाऽसि स जीव शरदःशतमिति**—पुत्त्रमात्मजं दृष्ट्वा विलोक्य "अङ्गादङ्गात्" इति मन्त्रं पठति । मन्त्रार्थः । हे पुत्त्र यतस्त्वमङ्गात्प्रत्यङ्गात्सम्भवसि उत्पत्स्यसे । हृदयादन्तरङ्गादपि अधिकतया जायसे । अतस्त्वं वै निश्चितं पुत्त्रनामा आत्माऽभिन्नरूपोऽसि । स त्वं शतं शरदो वर्षाणि जीव प्राणिहि । **अथास्य मूर्द्धानमवजिघ्रति प्रजापतेष्ट्वा हिङ्कारेणावजिघ्रामि सहस्रायुषाऽसौ जीव शरदः शतमिति**—जपोत्तरमस्य पुत्रस्य मूर्द्धानं शिरः अवजिघ्रति । अवाचीनं जिघ्रति "प्रजापतेष्ट्वा" इति मन्त्रेण । असाविति तस्यैव नामग्रहणम् । मन्त्रार्थः । हे पुत्त्र प्रजापतेर्ब्रह्मणः हिङ्कारेण स्नेहार्द्रकृतध्वनिविशेषेण सामवेदावयवेन वा त्वा त्वाम् अवजिघ्रामि शिरसि चुम्बामि । अतोऽवघ्राणात् हे असौ अमुकशर्मन् सहस्रायुषा सुबहुजीवनेन शरदः शतमिति उक्तार्थम् । **गवां त्वा हिङ्कारेणेति च त्रिः**—"गवां त्वा" इति च मन्त्रेण त्रिरवजिघ्रति, **सहस्रायुषेत्यादेरत्राप्यनुषङ्गः** । तेन प्रजापतिस्थाने **गवां त्वेति** पदं मन्त्रे पठेदित्यर्थः । ततश्च "गवां त्वा हिङ्कारेणावजिघ्रामि सहस्रायुषाऽमुकशर्मन् जीव शरदः शतम्" इति मन्त्रेण सकृन्मूर्द्धानमवघ्राय द्विस्तूष्णीमवजिघ्रति । **दक्षिणेऽस्य कर्णे जपति । अस्मे प्रयन्धि मघवन्नृजीषिन्निन्द्ररायो विश्ववारस्य भूरेः अस्मे शतꣳ शरदो जीवसेऽधा अस्मे व्वीराञ्छश्वत इन्द्र शिप्रिन्निति**—अस्य पुत्त्रस्य दक्षिणे कर्णे "अस्मे प्रयन्धि मघवन्" इति मन्त्रं जपति । मन्त्रार्थः । हे मघवन् इन्द्र, ऋजीषिन् स्निग्धचित्त, हे इन्द्र लोकेश, शिप्रिन् सुखद लघुहस्तेति वा । अस्मे अस्मै कुमाराय, इन्द्ररायः ऐश्वर्याणि धनानि च प्रयन्धि प्रयच्छ । विश्ववारस्य सर्ववरणीयस्य वराणां समूहो वारं सर्वेषां वाराणां समूहः सर्ववारं तस्येति वा । भूरेः बहुतरस्य । उभयत्र कर्मणि षष्ठी । प्रचुरसर्ववारं रायं प्रयच्छ इत्यर्थः । प्रयोजनमाह—अस्मे अस्य शतं शरदो जीवसे जीवनायेति । किञ्च अस्मे अस्मिन्, वीरान् पुत्रान्, शश्वतः शाश्वतान् दीर्घायुषः, अधाः निधेहि अस्मै देहीत्यर्थः । **इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे पोषꣳ रयीणामरिष्टिं तनूनाꣳ स्वात्मानं वाचः सुदिनत्वमह्नामिति**—सव्ये सव्यकर्णे इन्द्रश्रेष्ठानीति मन्त्रं जपति । मन्त्रार्थः । हे इन्द्र परमैश्वर्ययुक्त, अस्मे अस्मिन्, श्रेष्ठानि सुमङ्गलानि, धेहि स्थापय । चित्तिं ज्ञानं, दक्षस्य दक्षप्रजापतेरिव, सुभगत्वं सौभाग्यं सर्वप्रभुत्वं च धेहि । तथा रयीणां धनानां पोषं पुष्टिं, तनूनामवयवानां अरिष्टिं नीरोगत्वं, वाचः वाण्याः स्वात्मानं स्वादुत्वं माधुर्यमिति यावत् । अह्नां दिनानां सुदिनत्वं साफल्यं च धेहि । **स्त्रियै तु मूर्द्धानमेवावजिघ्रति तूष्णीम्**—स्त्रियै स्त्रियाः दुहितुः पुत्रिकायाः मूर्द्धानमेव तूष्णीं जिघ्रति न

त्वन्यत्, एवकारेण "दर्शनजपकर्णजपयोर्निवृत्तिः" इति हरिहरः । एवकारकरणं "कर्णजपप्रतिषेधार्थकम्" इति भर्तृयज्ञः । इति श्रीत्रिराग्निचित्सम्राट्स्थपति–श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डेऽष्टादशी कण्डिका ॥ १८ ॥ * ॥

विश्व०–प्रवासादागतस्य संजातापत्यस्य विशेषं वक्तुं प्रवासतद्धर्माद्यसूत्रणप्रयोज्यमानत्वमपनेतुं सूत्रयति–**प्रोष्येत्य ...पूर्ववत्**–प्रवासं कृत्वा आगत्य आवसथ्यभार्यापुत्रादेर्वासस्थानान्युपतिष्ठते । कथमित्यत उक्तम् । **पूर्ववदिति** । पूर्वं कात्यायनसूत्रे यथोक्तं तद्वदित्यर्थः । एतेन कात्यायनगृह्ययोः समानकर्तृकता कात्यायननिष्ठा पूर्वकालता च द्योत्यते । तद्यथा–**गृहा मा बिभीतेति गृहानुपैति क्षेमाय वः**–इति प्रविशतीति । अत्राप्यावसथ्यनतिमौने चावेलं गमनागमनयोः । **पुत्रं दृष्ट्वा...शतमिति**–पुत्रमात्मजं दृष्ट्वा **अङ्गादङ्गा**दित्यादिकं मन्त्रं जपति । **अथास्य...शतमिति**-अस्य पुत्रस्य असावित्यत्र संबोधनान्तं पुत्रनामग्रहणम् । सहस्रायुषेत्यनन्तरं **गवां त्वा हिंकारेणेति** च । **अवजिघ्रामी**त्यारभ्य समग्रमन्त्रसमुच्चयार्थश्चकारः।अत्रापि मूर्ध्नोऽवाचीनं घ्राणम् । पुत्रनामग्रहणं च पूर्ववत् । **त्रिः दक्षिणेऽस्य... शिप्रिन्निति**–इतिशब्दो मन्त्रसमाप्तिद्योतकः । **अस्मे प्रयन्धि मघवन्नि**त्यमुं मन्त्रं त्रिर्वारं कुमारस्य दक्षिणे कर्णे जपतीत्यर्थः । **इन्द्रश्रेष्ठा...महामिति सव्ये**–सव्ये वामकर्णे **इन्द्रश्रेष्ठानि द्रविणानी**त्यमुं मन्त्रं त्रिः पठतीत्यर्थः । **स्त्रियै तु मूर्द्धानमेवावजिघ्रति तूष्णीम्**–एवकारः कर्णजपव्यवच्छेदार्थः । इति अष्टादशी कण्डिका ॥ १८ ॥

षष्ठे मासेऽन्नप्राशनम् ॥ १ ॥ स्थालीपाकꣳश्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोति देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहेति ॥ २ ॥ वाजो नो अद्येति च द्वितीयाम् ॥ ३ ॥ स्थालीपाकस्य जुहोति प्राणेनान्नमशीय स्वाहाऽपानेन गन्धानशीय स्वाहा चक्षुषा रूपाण्यशीय स्वाहा श्रोत्रेण यशोऽशीय स्वाहेति ॥४॥ प्राशनान्ते सर्वान् रसान्सर्वमन्नमेकत उद्धृत्याथैनं प्राशयेत् ॥ ५ ॥ तूष्णीꣳहन्तेति वा हन्तकारं मनुष्या इति श्रुतेः ॥ ६ ॥ भारद्वाज्या माꣳसेन वाक्प्रसारकामस्य ॥ ७ ॥ कपिञ्जलमाꣳसेनान्नाद्यकामस्य ॥ ८ ॥ मत्स्यैर्जवनकामस्य ॥ ९ ॥ कृकषाया आयुष्कामस्य ॥ १० ॥ आट्या ब्रह्मवर्चसकामस्य ॥ ११ ॥ सर्वैः सर्वकामस्य ॥१२॥ अन्नपर्याय वा ततो ब्राह्मणभोजनमन्नपर्याय वा ततो ब्राह्मणभोजनम् ॥ १३ ॥ ॥ १९ ॥ * ॥

कर्कः—षष्ठे मासेऽन्नप्राशनम् । कुमारस्य कर्तव्यमिति सूत्रशेषः । स्थालीपाकꣳश्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोति । देवीं वाचमजनयन्त इत्येकाम् । वाजो नो अद्येति च द्वितीयाम् । चशब्दात्पूर्वया च स्थालीपाकस्य जुहोति प्राणेनान्नमशीय स्वाहेति–प्रतिमन्त्रं चतुर्भिः । ततः स्विष्टकृदादि । प्राशनान्ते सर्वान्रसान्सर्वमन्नमेकत उद्धृत्याथैनं प्राशयेत्तूष्णीꣳ हन्तेति वा हन्तकारं मनुष्या इति श्रुतेः–विकल्पोऽयं सर्वे रसाः कटुतिक्तादयः । सर्वमन्नं च शालिसूपापूपादि । एकत इत्येकपात्रोद्धरणम् । भारद्वाज्या माꣳसेन वाक्प्रसारकामस्य–भारद्वाजी पक्षिविशेषस्तस्य मांसेन वाग्ग्मी कुमारः स्यादित्येवङ्कामस्य प्राशनम् । कपिञ्जलमाꣳसेनान्नाद्यकामस्य, मत्स्यैर्जवनकामस्य–जवनो वेगोऽभिधीयते । कृकषाया आयुष्कामस्य–कृकषेति कङ्कणहारिकोच्यते । तन्मांसेनायुष्कामस्य॥ आट्या ब्रह्मवर्च-

सकामस्य–आटीनाम जलचरः पक्षी तस्य मांसेन ब्रह्मवर्चसकामस्य प्राशनम् । सर्वैः सर्वकामस्य–य एतान्सर्वान्कामान्कामयते तस्य सर्वैरेतैर्मांसैः प्राशनं कारयेत् ॥ अन्नपर्याय वा–अन्नपरिपाट्या वैकीकृत्य सर्वमांसानि प्राशयेत् । ततो ब्राह्मणभोजनमित्युक्तार्थम् ॥ इति श्रीकर्कोपाध्यायकृते गृह्यसूत्रभाष्ये प्रथमकाण्डविवरणं सम्पूर्णम् ॥ १९ ॥ * ॥

जय०–षष्ठे मासे कुमारस्यान्नप्राशनाख्यं कर्म कार्यमिति शेषः । **श्रपयित्वेति**–सिद्धस्यासादनव्युदासार्थम् । आज्यभागान्ते **देवीं वाच**मिति अनेन मन्त्रेणैकामाज्येनाहुतिं जुहोति । द्वितीयां तु **देवीं वाचमिति** चशब्दाद्वाजो न इत्येताभ्याम्मन्त्राभ्यां जुहोति । अथ मन्त्रार्थः । तत्र प्रजापतिस्त्रिष्टुप् वाक् आज्यहोमे० । देवीं द्युतिमतीं, वाचं वाणीम्, देवाः प्राणादिवायवः । अजनयन्त उत्पादितवन्तः । ततस्तां वाचमैश्वर्याख्यां पशवो मनुष्यादयो वदन्ति । "पशुरेवं स देवानाम्" इति श्रुतेः । सा वाक् नोऽस्मान् उपैतु सन्निहिताऽस्तु । किम्भूता मन्द्रा हर्षकरी । इषम् रसम् । ऊर्जमन्नादीनि च दुहाना । सुष्टुता शोभनैर्मन्त्रैस्तद्द्रष्टृभिर्वा स्तुता नुता । तत्र दृष्टान्तः । वत्सां धेनुरिवेति । **वाजो नो इति**–अस्य प्रजापतिरनुष्टुप् अन्नं तत्प्राशनाङ्गहोमे० । स्थालीपाकस्येत्यवयवलक्षणा षष्ठी । ततः चतस्र आज्याहुतीः प्रतिमन्त्रम् मन्त्रार्थः । सुगमः । तद्यथा–प्राणेन वायुना अन्नम् अशीय अश्नानि । एवमुपर्यपि । ततः स्विष्टकृदादि प्राशनान्तम् । **एकत**–इत्यत्र संधिश्छान्दसः । एकस्मिन्पात्रे एकीकृत्येत्यर्थः । **हन्तेति**–मन्त्रेण वेति विकल्पः । भारद्वाजी पक्षिविशेषः । तस्य मांसेन वाक्प्रसारः अयङ्कुमारो वाग्मी स्यादित्येवंकामो यस्मिन्कुमारे तस्य प्राशनं, कपिञ्जलस्तित्तिरो वेति मयूरो वा कृकषा कङ्कणहारिका । आटी प्लवविशेषः । सर्वैरिति य एतान्सर्वान्कामान् कामयते तस्य सर्वैरेतैरेव मांसैर्व्यस्तैस्समस्तैर्वा प्राशनं कारयेत् । ततस्तैः सर्वैः रसैः सर्वान्नेन च प्राशनम् । अन्नपर्याय वेति छान्दसम् । अन्नपरिपरिपाटया सर्वान्नैः सर्वरसैश्च सर्वमांसान्येकीकृत्य प्राशयेद्वा । **ततो ब्राह्मणभोजनम्**–इत्युक्तार्थम् । तत्पदावृत्तिः काण्डपरिसमाप्तिप्रज्ञप्त्यर्थम् ॥ १९ ॥ इत्याचार्यजयरामकृते गृह्यभाष्ये सज्जनवल्लभाख्ये प्रथमकाण्डविवरणं समाप्तिमगमत् ॥ * ॥

हरि०–**षष्ठे मासेऽन्नप्राशनम्**–जन्मतः षष्ठे मासे कुमारस्य अन्नप्राशनं कर्म कुर्यात् । **स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोति**–अन्नप्राशनस्येतिकर्तव्यताविशेषमाह–स्थालीपाकं चरुं यथाविधि श्रपयित्वा आघारावाज्यभागौ हुत्वा द्वे आहुती जुहोति । **देवीं वाचमित्यादि वाजो नो अद्येति च द्वितीयामित्यन्तं** सूत्रम् । आज्येन **देवीं वाचमित्यादिकया** ऋचा एकामाहुतिं जुहुयात् । इदं वाचे इति त्यागं विधाय चकारात्पुनर्देवीं **वाचमित्येतस्यान्ते** "वाजो नः" । यथा देवीं वाचमिति, वाजो नो अद्येति च द्वाभ्यामृग्भ्यां द्वितीयामाज्याहुतिं हुत्वा इदं वाचे वाजाय चेति त्यागं कुर्यात् । **स्थालीपाकस्य जुहोति**–स्थालीपाकस्य चरोः **प्राणेनान्नमशी**येत्यादिभिश्चतुर्भिर्मन्त्रैश्चतस्र आहुतीर्जुहोति ततः स्विष्टकृदादि प्राशनान्तं विधाय । **सर्वान् रसान्त्सर्वमन्नमेकतोद्धृत्याथैनं प्राशयेत्तूष्णीꣳ हन्तेति वा हन्तकारं मनुष्या इति श्रुतेः**–सर्वान् मधुरादीन् रसान्सर्वमन्नं भक्ष्यभोज्यलेह्यपेयचोष्यादि । एकतोद्धृत्येत्यत्र विसर्जनीयलोपेऽपि पुनः सन्धिरार्षः । पृथुगुकारोच्चारणं वा । एकत एकस्मिन्पात्रे उद्धृत्य कृत्वा अथानन्तरमेनं कुमारं प्राशयेत् । तूष्णीं मन्त्ररहितं हन्तेति वा मन्त्रेण । कुतः, "हन्तकारं मनुष्या उपजीवन्ति" इति श्रवणात् । **भारद्वाज्या माꣳसेन वाक्प्रसारकामस्य कपिञ्जलमाꣳसेनान्नाद्यकामस्य मत्स्यैर्जवनकामस्य कृकषाया आयुष्कामस्याट्या ब्रह्मवर्चसकामस्य सर्वैः सर्वकामस्यान्नपर्याय वा**–अत्र गुणफलमाह–भारद्वाज्याः पक्षि-

ण्याः मांसेन कुमारस्य प्राशनं कारयितव्यम् । यदयिं कामना भवति कस्य पितुः कथम्भूतस्य वाक्प्रसारकामस्य वाचः प्रसारो बहुत्वं तत्कुमारस्य कामयते इति वाक्प्रसारकामः तस्य कर्तरि षष्ठी, कृत्यप्रत्ययान्तत्वात् । एवमन्नाद्यकामस्य कपिञ्जलमांसेन । एवमुत्तरत्रापि । अयमर्थः । यदि कुमारस्य अयं वाग्मी स्यादिति कामयेत्तदा भारद्वाज्या मांसं प्राशयेत् । यदि कुमारोऽन्नादः स्यादिति कामयेत्तदा कपिञ्जलमांसं प्राशयेत् । कपिञ्जलः कारण्डवो मैरिर्वा मयूरो वा केचित्तित्तिरो वेति । यदि कुमारोऽयं जवनः शीघ्रगामी स्यात्तदा यथासम्भवं मत्स्यान्प्राशयेत् । स यदि कुमारो दीर्घायुः स्यादिति कामयेत् तदा कृकषाया मांसं प्राशयेत् । यदि कुमारो ब्रह्मवर्चस्वी स्यादिति कामयेत्तदा आट्या मांसं प्राशयेत् । यदि वाक्प्रसारादीनि ब्रह्मवर्चसान्तानि सर्वाणि कुमारस्य भवन्त्विति कामयेत्तदा भारद्वाज्यादीनामाट्यन्तानां सर्वाणि मांसानि क्रमेण प्राशयेत् । अन्नपर्याय वा अन्नपरिपाटया वा अन्नवदेकीकृत्य प्राशयेदित्यर्थः। अन्नपर्यायेति अविभक्तिकमार्षं पदम्। **ततो ब्राह्मणभोजनम्**—ततः कर्मसमाप्तौ एकस्य ब्राह्मणस्य भोजनं कारयितव्यम् । अत्र काण्डपरिसमाप्तौ द्विरुक्तिः । यथा कात्यायनसूत्रे अध्यायपरिसमाप्तौ "उपस्पृशेदप उपस्पृशेदपः" इति सूत्रार्थः ॥ १९ ॥

अथान्नप्राशनप्रयोगः । कुमारस्य षष्ठे मासे चन्द्रतारानुकूले शुभे दिने मातृपूजापूर्वकं नन्दीमुखश्राद्धं विधाय पञ्च भूसंस्कारान्कृत्वा लौकिकाग्निं स्थापयित्वा ब्रह्मोपवेशनाद्याज्यभागान्तं विदध्यात् । तत्र आज्येन "देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहा" इति प्रथमाम् । इदं वाचे इति त्यागं विधाय पुनर्देवीं **वाच**मित्येतस्यान्ते "वाजो नो अद्य प्रसुवातिदानं वाजो देवाँ ऋतुभिः कल्पयाति । वाजो हि मा सर्ववीरं जजान विश्वा आशा वाजपतिर्जयेयꣳ स्वाहा" इति द्वितीयाम् । इदं वाचे वाजायेति च त्यागं कुर्यात् । अथ स्थालीपाकेन चतस्र आहुतीर्जुहोति । तद्यथा—प्राणेनान्नमशीय स्वाहा । इदं प्राणाय० । अपानेन गन्धानशीय स्वाहा । इदमपानाय० । चक्षुषा रूपाण्यशीय स्वाहा । इदं चक्षुषे० । श्रोत्रेण यशोऽशीय स्वाहा । इदं श्रोत्राय० । ततः स्थालीपाकेन स्विष्टकृतं हुत्वा महाव्याहृत्यादिप्राजापत्यान्ता नवाहुतीराज्येन हुत्वा । संस्रवप्राशनम् । दक्षिणादानान्तं कृत्वा सर्वान् रसान्सर्वं चान्नमेकस्मिन् पात्रे समुद्धृत्य सकृदेव कुमारं तूष्णीं प्राशयेत् । हन्तेति वा मन्त्रेण । स यदि कुमारस्य वाग्मित्वमिच्छेत्तदा भारद्वाज्या मांसं प्राशयेत् । यद्यन्नाद्यत्वं कामयेत् तदा कपिञ्जलमांसं, यदि जवनत्वं तदा मत्स्यमांसं, यदि दीर्घायुष्ट्वं तदा कृकषायाः मांसं, यदि ब्रह्मवर्चसं तदा आटया मांसं, यदि सर्वकामस्तदा सर्वमांसानि क्रमेण प्राशयेत् । एकीकृत्य वा अस्य कर्मणः समृद्ध्यर्थं ब्राह्मणमेकं भोजयिष्ये इति सङ्कल्प्य ब्राह्मणे भोजयेत्। **इत्यन्नप्राशनम्** ॥ १९ ॥ इत्यग्निहोत्रिहरिहरविरचितायां पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ प्रथमः काण्डः ॥

गदा०—**षष्ठे मासेऽन्नप्राशनम्** । जन्मतः षष्ठे मासे कुमारस्यान्नप्राशनाख्यं कर्म कुर्यात्। **नारदः**। "जन्मतो मासि षष्ठे स्यात्सौरेणान्नाशनं परम्। तदभावेऽष्टमे मासि नवमे दशमेऽपि वा ॥ द्वादशे वाऽपि कुर्वीत प्रथमान्नाशनं परम् । संवत्सरे वा संपूर्णे केचिदिच्छन्ति पण्डिताः । षष्ठे वाऽप्यष्टमे मासि पुंसां स्त्रीणां तु पञ्चमे ॥ सप्तमे मासि वा कार्यं नवान्नप्राशनं शुभम् । रिक्तां दिनक्षयं नन्दां द्वादशीमष्टमीममाम् ॥ त्यक्त्वाऽन्यातिथयः **प्रोक्ताः** सितजीवज्ञवासराः । चन्द्रवारं प्रशंसन्ति कृष्णे चान्त्यत्रिकं विना" **श्रीधरः**—"आदित्यतिष्यवसुसौम्यकरानिलाश्विचित्राजविष्णुवरुणोत्तरपौष्णामित्राः । बालान्नभोजनविधौ दशमे विशुद्धे छिद्रां विहाय नवमीं तिथयः शुभाः स्युः"। **वसिष्ठः**। "बालान्नभुक्तौ व्रतबन्धने च राजाभिषेके खलु जन्मधिष्ण्यम् । शुभं त्वनिष्टं सततं विवाहे सीमन्तयात्रादिषु मङ्गलेषु ॥" **स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाज्याहुती जुहोति**--स्थालीपाकं चरुं यथाविधि श्रपयित्वाज्यभागौ हुत्वा द्वे आज्याहुती वक्ष्यमाणैर्मन्त्रैर्जुहोति । **देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहेति वाजो नो अद्येति च** द्वितीयाम्- द्वे आहुती जुहोतीत्युक्तम् । तत्र "देवीं वाचमजनयन्त" इति मन्त्रेणैकामाहुतिं जुहोति । "वाजो नो अद्य"इति च द्वितीयाम् । चशब्दात्पूर्वया ऋचा सह **वाजो नो अद्येति** अनया द्वितीयामाहुतिं जुहोति ततश्च देवीं वाचमिति, वाजो नो अद्येति च द्वाभ्या-

मृग्भ्यां द्वितीयामाहुतिं जुहोतीत्यर्थः । मन्त्रार्थः । देवीं देवसम्बन्धिनीं, वाचं वाणीं, देवाः प्राणादिवायवः, अजनयन्त उत्पादितवन्तः, ततस्तां देवीं वाचं विश्वरूपाः नानारूपा ऋषिमुनिब्राह्मणादयः, पशवः संसरणत्वाद्वदन्ति ।"पशुरेवं स देवानाम्"इति श्रुतेः । सा नः अस्मान् उपैतु सन्निहिताऽस्तु । किम्भूता मन्द्रा हर्षकरी । इषं रसम् ऊर्जम् अन्नादि च दुहाना सुष्टुता शोभनैर्मन्त्रैः तद्द्रष्टृभिर्वा स्तुता । तत्र दृष्टान्तः । वत्सान् धेनुरिवेति । **स्थालीपाकस्य जुहोति प्राणेनान्नमशीय स्वाहाऽपानेन गन्धानशीय स्वाहा चक्षुषा रूपाण्यशीय स्वाहा श्रोत्रेण यशोऽशीय स्वाहेति**--स्थालीपाकस्येत्यवयलक्षणा षष्ठी । स्थालीपाकस्य चरोः प्राणेनान्नमशीयं स्वाहेति प्रतिमन्त्रं चतुर्भिर्मन्त्रैश्चतस्र आहुतीर्जुहोति । ततः स्विष्टकृदादिप्राशनान्तम् । मन्त्रार्थः । प्राणेन वायुनाऽन्नमशीय अहं प्राप्नुयां लभेयम् । अपानेन वायुना गन्धान् परिमलान् लभेयम् । एवमग्रेऽपि योज्यम् । **प्राशनान्ते सर्वान् रसान्त्सर्वमन्नमेकतोद्धृत्याथैनं प्राशयेत्तूष्णीꣳ हन्तेति वा हन्तकारं मनुष्या इति श्रुतेः**--प्राशनान्ते कर्मणि सर्वान् रसान् कटुमधुरतिक्तकषायादीन् सर्वमन्नं भक्ष्यं, भोज्यं, लेह्यं, चोष्यं, पेयं चैकत एकस्मिन् सुवर्णादिपात्रे उद्धृत्य थैनं कुमारं तस्मादन्नं गृहीत्वा तूष्णीं प्राशयेत्,हन्तेति मन्त्रेण वा प्राशयेत्।तस्यै द्वौ स्तनौ देवा उपजीवान्ति स्वाहाकारं च,"हन्तकारं मनुष्याः,स्वधाकारं पितरः"इति श्रवणात् । इतिरपि च लिङ्गभूता स्मरणस्य द्योतिका भवति । नवग्रहमुद्धृत्य ब्राह्मणाय दीयते तत्र कृतार्थमेतद्दर्शनमिति चेत् मैवम् उभयोर्द्योतिका भविष्याति । एकतोद्धृत्येत्यत्र छान्दसः सान्धिः । **मार्कण्डेयः** । "देवतापुरतस्तस्य धात्र्युत्सङ्गगतस्य च । अलङ्कृतस्य दातव्यमन्नं पात्रे सकाञ्चनम् ॥ मध्वाज्यदधिसंयुक्तं प्राशयेत्पायसं तु वा " इति । गुणफलमाह--**भारद्वाज्या माꣳसेन वाक्प्रसारकामस्य**--भारद्वाजी पक्षिणीविशेषः । चिटीकेति प्रसिद्धा । तस्याः मांसेन वाक्प्रसारः। अयं कुमारो वाग्मी स्यादित्येवं कामो यस्मिन् कुमारे तस्य प्राशनं कुर्यात्।**कपिञ्जलमाꣳसेनान्नाद्यकामस्य**--कपिञ्जलः पक्षिविशेषः प्रसिद्धः। यद्ययं कुमारोऽन्नादः स्यादिति कामयेत्तदा कपिञ्जलमांसेन प्राशनं कुर्यात्।एवमग्रेऽपि योज्यम्।**मत्स्यैर्जवनकामस्य**--जवनः शीघ्रगामी स्यादिति कामयेत् तदा मत्स्यानां मांसेन प्राशनं कुर्यात् । **कृकषाया आयुष्कामस्य**--कृकषा कङ्कणहारिका तन्मांसेन दीर्घायुष्कामस्य प्राशनम् ।**आटया ब्रह्मवर्चसकामस्य**--आटिर्जलचरः पक्षी तन्मांसेन ब्रह्मवर्चसकामस्य प्राशनं कुर्यात् । **सर्वैः सर्वकामस्य**--यो वाक्प्रसारादिसर्वान्कामान् कामयते तस्य भारद्वाज्यादिसर्वैर्मांसैः क्रमेण प्राशनं कुर्यात्।'मिश्रैः प्राशनम्'' इति **भर्तृयज्ञः** । **अन्नपर्याय वा ततो ब्राह्मणभोजनमन्नपर्याय वा ततो ब्राह्मणभोजनम्**--अन्नपरिपाट्या वाऽन्नवत् सर्वमांसान्येकीकृत्य प्राशयेदित्यर्थः ।"अन्नपरिपाट्या वा क्रमेण प्राशयेन्नैकत उद्धृत्य"इति **भर्तृयज्ञः** । अन्नपर्यायत्यविभीक्तकं छान्दसं पदम् । तत इत्युक्तार्थम् । द्विरुक्तिः काण्डसमाप्तिसूचनार्था ॥ इति श्रीत्रिराग्निचित्सम्राट्स्थपतिश्रीमहायाज्ञिक--वामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डे एकोनविंशी कण्डिका ॥ १९ ॥

अथ **पदार्थक्रमः** । जन्मतः षष्ठे मासे रेवत्यश्विनीरोहिणीमृगाशिरःपुनर्वसुपुष्यहस्तचित्राश्रवणधनिष्ठोत्तरात्रयेषु बुधजीवभानुवारेषु शुभे चन्द्रे पूर्वाह्णे पित्रादिः शिशोरन्नप्राशनं कारयेत् । षष्ठे च क्रियते तदा गुरुशुक्रभौमादिदोषोऽधिकमासादिदोषश्च नास्ति । पित्रादिः सभार्यः शिशोर्मङ्गलस्नानं कारयित्वा देशकालौ स्मृत्वा ममास्य शिशोर्मातृगर्भमलप्राशनशुद्धयन्नाद्यब्रह्मवर्चसतेजइन्द्रियायुर्लक्षणफलसिद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थमस्य कुमारस्यान्नप्राशनाख्यं कर्माहं करिष्ये । ततः स्वस्तिवाचनाभ्युदयिके कृत्वा पञ्च भूसंस्कारान्कृत्वा लौकिकाग्नेः स्थापनम् । वैकल्पिकावधारणे हन्तेति प्राशनामिति विशेषः । ततो ब्रह्मोपवेशनाद्याज्यभागान्तम् । तत आज्येन **देवीं वाचमिति** प्रथमाहुतिः। इदं वाचे नमम । पुनर् "देवीं वाचं,वाजो नो अद्य"इति मन्त्राभ्याम् आज्येन द्वितीयाऽऽहुतिः । इदं वाचे वाजाय न मम । ततः स्थालीपाकेन चतस्र आहुतयः । प्राणेनान्नमशीय स्वाहा इदं प्राणाय न० । अपानेन गन्धानशीय स्वाहा इदमपानाय० । चक्षुषा रूपाण्यशीय स्वाहा इदं चक्षुषे न० । श्रोत्रेण यशोऽशीय स्वाहा इदं श्रोत्राय० । ततः स्थालीपाकेन स्विष्टकृद्धोमः । ततो महाव्याहृत्यादिप्राजापत्यान्ता नवाहुतयः । ततः संस्रवप्राशनम् । पवित्राभ्यां मार्जनम् । पवित्रप्रतिपत्तिः । ब्रह्मणे पूर्णपात्रदानम् । प्रणीताविमोकः । ततः सर्वान् रसान् सर्वमन्नं चैकस्मिन्पात्रे उद्धृत्य सकृदेव हन्तेति मन्त्रेण कुमारं प्राशयेत् । काम्यं यथोक्तम् । एकब्राह्मणभोजनम् । ततो दशब्राह्मणभोजनम् । बालं भूमावुपवेश्य तदग्रे पुस्तकवस्त्रशस्त्रादिशिल्पानि विन्यस्य जीविकापरीक्षां कुर्यात् । शिशुः स्वेच्छया यत्प्रथमं स्पृशेत्साऽस्य जीविकेति विद्यात् । तदुक्तं **कारिकायाम्**--

"कृतप्राशनमुत्सङ्गाद्धात्री बालं समुत्सृजेत् । कार्यं तस्य परिज्ञानं जीविकाया अनन्तरम् ॥ देवताग्रेऽथ विन्यस्य शिल्पभाण्डानि सर्वशः । शास्त्राणि चैव शस्त्राणि ततः पश्येत्तु लक्षणम् ॥ प्रथमं यत्स्पृशेद्बालस्ततो भाण्डं स्वयं तदा । जीविका तस्य बालस्य तेनैवेति भविष्यति ॥ गर्भाधानादिका अन्नप्राशनान्ता मलिम्लुचे । आकर्णवेधाः स्युः क्रिया नान्या इत्याह **भास्करः** ॥" कुमार्या अप्येतदमन्त्रकं कार्यम् । **इत्यन्नप्राशने पदार्थक्रमः** । **गर्ग**मते—"प्राणापानाय चक्षुत्रे श्रोत्राय जुष्टं गृह्णामि" इति चरुग्रहणम् । प्रोक्षणे त्वाधिकः । अन्यत्समानम् । अथ **वर्द्धापनविधिः** । **आदित्यपुराणे**—"सर्वैश्च जन्मादिवसे स्नातैर्मङ्गलवारिभिः । गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः" इति । "स्वनक्षत्रं च पितरस्तथा देवः प्रजापतिः । प्रतिसंवत्सरं यत्नात्कर्तव्यश्च महोत्सवः ॥" स्वनक्षत्रं स्वनक्षत्रदेवता । स्वनक्षत्रं वित्तपश्चेति क्वचित्पाठः । तदा वित्तपः कुबेरः । अथ **प्रयोगः** । तत्र वर्षपर्यन्तं प्रतिमासं, ततः प्रतिवर्षं तिलतैलेनैव स्नात्वा शुक्लवस्त्रयुगं परिधायाचान्तो गृहाभ्यन्तरत उपविश्य कुशयवजलान्यादाय ॐ अद्य मदीयजन्मादिने दीर्घायुष्यकामो मार्कण्डेयादीनां पूजनमहं करिष्य इति सङ्कल्प्य तत्र निर्विघ्नार्थं गणपतिपूजनमहं करिष्ये । ॐ गणपतये नमः इति गन्धादीनि दत्त्वा प्रणम्य गणपते क्षमस्वेति विसर्जयेत् । एवम् गौरीं, पद्मां, शचीं, मेधां, सावित्रीं, विजयां, जयाम्, देवसेनां, स्वधां, स्वाहां, मातृः लोकमातृः, धृतिं, पुष्टिं, तुष्टिम्, आत्मनः कुलदेवतां पूजयेत् । ततो घृतेन वसोर्द्धारां कुर्यात् । ततः ॐ गणपतये नमः, दुर्गायै नमः, कुलदेवतायै नमः, गुरुभ्यो नमः, देवताभ्यो नमः, अग्नये नमः, विप्रेभ्यो नमः, मातृभ्यो नमः, पितृभ्यो नमः, सूर्याय नमः, चन्द्राय नमः, मङ्गलाय नमः, बुधाय नमः, बृहस्पतये नमः, शुक्राय नमः, शनैश्चराय नमः, राहवे नमः, केतवे नमः, पञ्चभूतेभ्यो नमः, कालाय नमः, युगाय नमः, संवत्सराय नमः, मासाय नमः, पक्षाय नमः, अस्मज्जन्मातिथये नमः, अस्मज्जन्मनक्षत्राय नमः, अस्मज्जन्मराशये नमः, शिवायै नमः, सम्भूत्यै नमः, प्रीत्यै नमः, सन्तत्यै नमः, अनुसूयायै नमः, क्षमायै नमः, विष्णवे नमः, भद्रायै नमः, इन्द्राय नमः, अग्नये न०, यमाय न०, निर्ऋतये न०, वरुणाय न०, वायवे न०, धनदाय न०, ईशानाय न०, अनन्ताय न०, ब्रह्मणे नमः इति सम्पूज्य । षष्ठिके इहागच्छेह तिष्ठेत्यावाह्य पाद्यादिकं दत्त्वा ॐ "जगन्मातर्जगद्धात्रि जगदानन्दकारिणि । प्रसीद मम कल्याणि नमोऽस्तु षष्ठि देवते" इति मन्त्रेण पुष्पाञ्जलित्रयेण सम्पूज्य गन्धादिकं दत्त्वा वरं प्रार्थयेत् । "रूपं देहि यशो देहि भद्रं भगवति देहि मे । पुत्रान्देहि धनं देहि सर्वान्कामाँश्च देहि मे" इति वरं प्रार्थ्य प्रणम्य विसर्जयेत् । ततश्चन्दनेनाष्टदलं कृत्वा अक्षतानादाय ॐ भगवन्मार्कण्डेय इहागच्छेह तिष्ठेत्यावाह्य स्थापयित्वा, पाद्यादीनि दत्त्वा, इदमनुलेपनम् ॐ मार्कण्डेयाय नमः इति चन्दनं दत्त्वा । "ॐ आयुष्प्रद महाभाग सोमवंशसमुद्भव । महातपो मुनिश्रेष्ठ मार्कण्डेय नमोऽस्तु ते" इति पुष्पाञ्जलित्रयेण सम्पूज्य गन्धादीनि दत्त्वा वरं प्रार्थयेत् । "ॐ मार्कण्डेयाय मुनये नमस्ते महदायुषे । चिरजीवी यथा त्वं भो भविष्यामि तथा मुने ॥ मार्कण्डेय महाभाग सप्तकल्पान्तजीवन । आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव ॥ नराणामायुरारोग्यैश्वर्यसौख्यैः सुखप्रदः । सौम्यमूर्ते नमस्तुभ्यं भृगुवंशवराय च ॥ महातपो मुनिश्रेष्ठ सप्तकल्पान्तजीवन । मार्कण्डेय नमस्तुभ्यं दीर्घायुष्यं प्रयच्छ मे ॥ मार्कण्डेय महाभाग प्रार्थये त्वां कृताञ्जलिः । चिरजीवी यथा त्वं भो भविष्येऽहं तथा मुने ॥" इति वरं प्रार्थ्य प्रणम्य । अश्वत्थाम्ने नमः, बलये नमः, व्यासाय न०, हनुमते न०, बिभीषणाय नमः, कृपाय नमः, परशुरामाय०, कार्तिकेयाय०, जन्मदेवतायै०, स्थानदेवतायै०, प्रत्यक्षदेवतायै०, वासुदेवाय०, क्षेत्रपालाय०, पृथिव्यै०, अद्भ्यो नमः, तेजसे०, वायवे०, आकाशाय० । इत्यष्टदिग्भागे सम्पूज्य "प्रीयन्तां देवताः सर्वाः पूजां गृह्णन्तु ता मम । प्रयच्छन्त्वायुरारोग्यं यशः सौख्यं च सम्पदः ॥ मन्त्रहीनं भक्तिहीनं क्रियाहीनं महामुने । यदर्चितं मया देव परिपूर्णं तदस्तु मे ॥" इति पठित्वा तिलवपनम् । ब्राह्मणाय तिलदानम् । देयद्रव्याणि सम्पूज्य कुशत्रयतिलजलान्यादाय अद्य मदीयजन्मादिने दीर्घायुष्ट्वकाम एतान् तिलान् सोमदैवतान् यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे इति दद्यात् । ततो घृताक्ततिलैर्व्याहृतिभिर्होमः । ततः पयसा सर्वभूतेभ्यो नम इति बलिं दद्यात् । तण्डुलेभ्यो नमः इति सम्पूज्य जलेन सिक्त्वा कुशत्रयतिलजलान्यादाय अद्य मदीयजन्मादिने दीर्घायुष्ट्वकाम एतान् सोपकरणान् तण्डुलान् यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे । घृताय नम इति घृतं सम्पूज्य जलेन सिक्त्वा अद्य मदीयजन्मदिने दीर्घायुष्ट्वकाम इदं घृतं प्रजापतिदैवतं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे । ततस्तिलगुडसहितदुग्धपानम् । तत्र मन्त्रः—"अञ्जल्यर्द्धमितं क्षीरं सतिलं गुडमिश्रितम् । मार्कण्डेयवरं लब्ध्वा पिबाम्यायुष्यहेतवे ॥" इति तिलगुडसहितं दुग्धं पीत्वाऽऽचम्य मार्कण्डेयाय नमः, गोभ्यो न०, ब्राह्मणेभ्यो नमः इति

प्रणम्य मार्कण्डेय क्षमस्वेति विसर्जयेत्। "अश्वत्थामा बलिर्व्यासो हनूमाँश्च विभीषणः। कृपः परशुरामश्च सप्तैते चिरजीविनः॥ सप्तैताँश्च स्मरेन्नित्यं मार्कण्डेयमथाष्टमम्। जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः॥" इति वचनादश्वत्थामादिमार्कण्डेयान्तानष्टौ स्मरेत्। इदं च वर्द्धापनं यदि जन्ममासोऽसङ्क्रान्तस्तदा शुद्धमास एव कार्यं नत्वधिके। इदं वर्द्धापनं यावद्बाल्यं पित्रादिभिः कार्यम्। पश्चात्तु प्रतिवर्षं स्वयमेवेति। ग्रन्थान्तरे तु माङ्गल्यस्नानं कृत्वा कुमुदादिदेवताः सम्पूज्य यथाशक्ति ब्राह्मणभोजनं दक्षिणां च दत्त्वा सुवासिनीभिर्नीराजितो धृतनूतनवस्त्रो ब्राह्मणीभ्यः शिशुभ्यश्चापूपपूरिकाः साज्याः कुमुदादिप्रीतये आयुर्वृद्धये च वायनादि दद्यात्। जन्मर्क्षदेवताप्रीत्यै च दद्यात्। वर्षान्ते सुदृढद्वादशवंशपेटिकाः सुमोदकादिखाद्यं निधाय नूतनवस्त्राच्छादिताः जीवत्पतिपुत्राभ्यो दत्त्वा तदाशिषो गृह्णीयात्। इदं सर्वं जीवन्ती मातैवापत्यायुषे कुर्यात् ॥ १९ ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति-श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये प्रथमकाण्डं समाप्तम् ॥ * ॥

विश्व०-अन्नप्राशनं सूत्रयति। **षष्ठे...शनमिति**-इति। कथमित्यत आह-**स्थाली...जुहोति**-स्थालीपाकमिति परिभाषाशास्त्रमाक्षिप्यते। अतः वैश्वदेवपूर्वं मातृपूजाभ्युदयिके विधायोपलिप्त उद्धतावोक्षिते लौकिकाग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्येत्यारभ्य स्थालीपाकं परिभाषोक्तविधिना पक्त्वा आज्यभागौ हुत्वा वक्ष्यमाणमन्त्राभ्यां द्वेआज्याहुती जुहोतीत्यर्थः। तत्र विशेषः। प्राणायापानाय चक्षुषे श्रोत्राय जुष्टं गृह्णामि, प्रोक्षणे चतुर्थ्यनन्तरं त्वा जुष्टं प्रोक्षामीत्यर्थः। आज्याहुत्योर्मन्त्रावाह-**देवीं वाच...द्वितीयाम्**-इति सूत्रम्। द्वितीये मन्त्रे आद्यस्य समुच्चयार्थश्चकारः! तथाच **देवीं वाच**मित्यारभ्य **सुष्टुतैतु स्वाहे**त्यन्तेनैकामाहुतिं हुत्वेदं वाच इति त्यागं विधाय **वाजो नो अद्येति देवीं वाच**मिति च द्वाभ्यां द्वितीयाहुतिहोमः। इदं वाजाय वाच इति त्यागः। चकाराच्छेषत्वे शेषे पाठः। **स्थालीपाक...शीय स्वाहेति**--चरोः स्थालीपाकाऽवयवमादाय **प्राणेनान्नमशीये**त्यादिभिश्चतुर्भिर्मन्त्रैश्चतस्र आहुतीर्जुहोति। प्रयोगश्चैवं—प्राणेनान्नमशीय स्वाहा इदं प्राणाय। अपानेन गन्धानशीय स्वाहा इदमपानाय। चक्षुषा रूपाण्यशीयं स्वाहा इदं चक्षुषे। श्रोत्रेण यशोऽशीय स्वाहा इदं श्रोत्राय। **प्राशनान्ते...श्रुतेः**—प्राशनान्ते स्विष्टकृद्धोमादिदक्षिणादानान्ते सर्वान् रसान्मधुरादीनैक्षवादिविकारान्सर्वमन्नमोदनादिकमन्नमदनीयम्। यद्यपि गुणस्य गुण्याश्रितत्वेन भेदाभावः तथापि गुणस्य रसस्य प्राधान्यात्तदाश्रयोपादानं गुणभूतम्। एवमन्यत्राश्रयस्य प्रधानत्वाद्गुणोपादानं गुणभूतं तथाचोभयत्रोभयनान्तरीयकत्वेनोभयादानेऽपि गुणप्रधानभावाद्भेदः। तथाच सर्वान्रसान्सर्वमन्नमेकस्मिन्पात्रे उद्धृत्यासने कुशास्तीर्णे उपविश्यैनं कुमारं **तूष्णीं हन्तेति वा**-मन्त्रेण प्राशयेत्। हन्तेति मन्त्रोच्चारणे श्रुतिं प्रमाणयति **हन्तकारमिति**-काम्यं कामिकार्यं प्राशनमाह **भारद्वाज्यामाꣳसेन वाक्प्रसारकामस्य**-भारद्वाजी पक्षिविशेषः। वाचः प्रसारः वक्ता स्यादिति कामाविष्टस्य। **कपिञ्जलमाꣳसेनान्नाद्यकामस्य**-कपिञ्जलोऽपि पक्षिविशेषः। **मत्स्यैर्जवनकामस्य**-जवनं वेगित्वम्। **कृकषाया आयुष्कामस्य**-कृकषा कङ्कणहारिका गोधा वा। **आट्या ब्रह्मवर्चसकामस्य**-आटी प्लवविशेषः। **सर्वैः सर्वकामस्य**—वागन्नवेगायुर्ब्रह्मवर्चसकामस्य। सर्वैः भारद्वाज्यादिसर्वमांसैः। कामना च काम्यस्य संस्कार्यकुमाराधिकरणतावगाहिप्राशयितृज्ञानम्। **अन्नपर्याय वा**-यावमेषन्यायेन काम्यमांसाकृति अन्नं निष्पाद्य प्राशयेत् वाशब्दो विकल्पार्थः। विभक्तेरनिर्देशश्छान्दसः। कन्यायास्तूष्णीं प्राशनं कारयेदन्नस्य। आचाराकृष्टमन्यदपि सरस्वत्यादिग्रहणपरीक्षा कार्या। **ततो ब्राह्मणभोजनम्**—बर्हिर्होमादिकर्मापवर्गान्ते दश ब्राह्मणान् भोजयेत्परिशिष्टात्। द्विरभ्यासः काण्डसमाप्तिप्रज्ञप्त्यर्थः। **इत्यन्नप्राशनम्**। इत्यकोनविंशी कण्डिका॥१९॥

इति श्रीपण्डितनृसिंहात्मजपण्डितविश्वनाथकृतायां गृह्यसूत्र-
व्याख्यायामाद्यं काण्डं समाप्तिमगमत्॥

इति भाष्यपञ्चकभूषितपारस्करगृह्यसूत्रस्य प्रथमकाण्डं समाप्तम्।

श्रीः।

(१६६)

पारस्करगृह्यसूत्रम् ।

भाष्यपञ्चकभूषितम् ।

द्वितीयकाण्डम् ।

सांवत्सरिकस्य चूडाकरणम् ॥ १ ॥ तृतीये वाऽप्रतिहते ॥ २ ॥ षोडशवर्षस्य केशान्तः ॥ ३ ॥ यथामङ्गलं वा सर्वेषाम् ॥ ४ ॥ ब्राह्मणान्भोजयित्वा माता कुमारमादायाप्लाव्याहते वाससी परिधाप्याङ्क आधाय पश्चादग्नेरुपविशति ॥ ५ ॥ अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्ते शीतास्वप्सूष्णा आसिञ्चत्युष्णेन वाय उदकेनेह्यदिते केशान्वपेति ॥ ६ ॥ केशश्मश्र्विति च केशान्ते ॥ ७ ॥ अथात्र नवनीतपिण्डं घृतपिण्डं दध्नो वा प्रास्यति ॥ ८ ॥ तत आदाय दक्षिणं गोदानमुन्दति सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूं दीर्घायुत्वाय वर्चस इति ॥९॥ त्र्येण्या शलल्या विनीय त्रीणि कुशतरुणान्यन्तर्दधात्योषध इति ॥ १० ॥ शिवो नामेति लोहक्षुरमादाय निवर्तयामीति प्रवपति, येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् । तेन ब्रह्माणो वपतेदमस्यायुष्यं जरदष्टिर्यथा सदिति ॥ ११ ॥ सकेशानि प्रच्छिद्यानडुहे गोमयपिण्डे प्रास्यत्युत्तरतो ध्रियमाणे॥१२॥एवं द्विरपरं तूष्णीम् ॥ १३ ॥ इतरयोश्चोन्दनादि ॥ १४ ॥ अथ पश्चात्त्र्यायुषमिति ॥ १५ ॥ अथोत्तरतो येन भूरिश्चरा दिवं ज्योक्च पश्चाद्धि सूर्यम् । तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तय इति ॥१६॥ त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति समुखं केशान्ते ॥ १७ ॥ यत्क्षुरेण मज्जयता सुपेशसा वप्त्वा * वा वपति केशाञ्छिन्धि शिरो माऽस्यायुः प्रमोषीः ॥ १८ ॥ मुखमिति च केशान्ते ॥ १९ ॥ ताभिरद्भिः शिरः समुद्य नापिताय क्षुरं प्रयच्छति । अक्षण्वन्परिवपेति ॥ २० ॥ यथामङ्गलं केशशेषकरणम् ॥ २१ ॥ अनुगुप्तमेतꣳ सकेशं गोमयपिण्डं निधाय गोष्ठे पल्वल उदकान्ते वाऽऽचार्याय वरं ददाति ॥२२॥ गां केशान्ते ॥ २३ ॥ संवत्सरं ब्रह्मचर्यमवपनं च केशान्ते द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः ॥ २४ ॥ १ ॥

कर्कः—सांवत्सरिकस्य चूडाकरणम्—संवत्सरो यस्य जातः स सांवत्सरिकः । तस्य सांवत्सरिकस्य चूडाकरणाख्यं कर्म कर्तव्यम् । तृतीये वाऽप्रतिहते—तृतीये वा संवत्सरेऽप्रपन्ने, वाशब्दो विकल्पार्थः । षोडशवर्षस्य केशान्तः—कर्तव्य इति शेषः । तुल्यत्वात्तत्कर्मणः केशान्तोऽत्राभिधीयते । यथामङ्गलं वा सर्वेषाम्—यद्यस्य मङ्गलमुचितं कुले कस्यचित्तृतीये कस्यचित्संवत्सरे । अन्ये तु यथामङ्गलशब्देन कालान्तरं कल्पयन्ति ।

---

* वप्त्वेति जयरामसम्मतः पाठः ।

ब्राह्मणान्भोजयित्वा माता कुमारमादायाप्लाव्याहते वाससी परिधाप्याङ्क आधाय पश्चादग्नेरुपविशति–माता कुमारमादायाप्लाव्य स्नापयित्वाऽहते वाससी परिधाप्याङ्के कृत्वा पश्चादग्नेरुपविशति । **अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्ते शीतास्वप्सूष्णा आसिञ्चत्युष्णेन वाय उदकेनेह्यदिते केशान्वपेति**–अनेन मन्त्रेण । केशश्मश्रिवति च केशान्ते विशेषः । **अथात्र नवनीतपिण्डं घृतपिण्डं दध्नो वा प्रास्यति**–अत्रेति प्रकृतोदकमुच्यते । **तत आदाय दक्षिणं गोदानमुन्दति सवित्रा प्रसूता दैव्या इति**–तत उदकमादाय दक्षिणं गोदानमुन्दति । गोदानशब्देनाङ्गविशेषोऽभिधीयते इति । अङ्गमिति शीर्षपार्श्वमुच्यते । उन्दति क्लेदयतीत्यर्थः । तच्च "सवित्रा प्रसूता" इत्यनेन मन्त्रेण । **त्र्येण्या शलल्या विनीय**–त्र्येणी शलली प्रसिद्धा, तया विनीय केशान् । **त्रीणि कुशतरुणान्यन्तर्दधात्योषध इति**–अनेन मन्त्रेण । **शिवो नामेति लोहक्षुरमादाय निवर्तयामीति प्रवपति**–"शिवो नाम" इति मन्त्रेण ताम्रमयं क्षुरमादाय गृहीत्वा "निवर्तयामि" इत्यनेन मन्त्रेण कुशतरुणेष्वन्तर्हितेषु संलागयति । प्रपूर्वो वपतिः संलागने । "येनावपत्सविता क्षुरेण" इत्यनेन मन्त्रेण सकेशान्प्रच्छिद्य कुशान् । **आनडुहे गोमयपिण्डे प्रास्यत्युत्तरतो ध्रियमाणे एवं द्विरपरं तूष्णीम्**–एवं द्विरपरं कर्म तूष्णीं भवति । **इतरयोश्चोन्दनादि**–इतरयोश्च गोदानयोः उन्दनाद्येव कर्म भवति सकृन्मन्त्रेण, द्विस्तूष्णीम् । **अथ पश्चात्त्र्यायुषमिति**–छेदनमन्त्रः । **अथोत्तरतो येन भूरिश्चरा दिवमिति**-छेदनमन्त्र एव । **त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति समुखं केशान्ते**–यत्क्षुरेणेत्यनेन मन्त्रेण मुखमिति च केशान्ते–मन्त्रविशेषः । **ताभिरद्भिः शिरः समुद्य नापिताय क्षुरं प्रयच्छति । अक्षण्वन्परिवपेति**–ताभिरेवाद्भिः शिरः समुद्य । उन्दयतिः क्लेदनार्थः । तस्य कित्त्वादनुनासिकलोपः क्रियते । समुद्येतिरूपम् । क्लेदयित्वेत्यर्थः । नापिताय क्षुरं प्रयच्छति "अक्षण्वन्परिवप" इत्यनेन मन्त्रेण । **यथामङ्गलं केशशेषकरणम् ।** यथाशास्त्रं यद्यस्य गोत्रे उचितम् । केचित् त्रिशिखाः, केचित्पञ्चशिखाः यथा यस्य प्रसिद्धिः । **अनुगुप्तमेतꣳ सकेशं गोमयपिण्डं निधाय गोष्ठे पल्वल उदकान्ते वाऽऽचार्याय वरं ददाति । गां केशान्ते**–तस्यैव ह्याचार्यस्य नेतरस्येति । **संवत्सरं ब्रह्मचर्यमवपनं च केशान्ते**–व्रतं भवति । **द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः**–स चायं विकल्पः । तुल्यं हि स्मरणमन्यत्रेति ॥ १ ॥

जय०–संवत्सरो जातो यस्य स सांवत्सरिकः संवत्सरातिक्रान्तः । तस्य चूडाकरणाख्यं कर्म कर्तव्यमिति शेषः । तृतीये वा संवत्सरे अप्रतिहते अगते असम्पूर्ण इत्यर्थः । तुल्यत्वात्तत्कर्मणः केशान्तोऽप्यत्रोच्यते । स च नियतकाल एव विवाहिताऽविवाहितयोः संवत्सरं ब्रह्मचर्यमित्यादि वक्ष्यमाणत्वात् । **यथामङ्गलमिति**–यद्यस्य कुले मङ्गलमुचितं कस्यचित्संवत्सरे कस्यचित्तृतीये । यथामङ्गलं कालान्तरे कार्यमित्यपरे । आदौ ब्राह्मणान् सम्भोज्य शिशोर्माता बालं संस्नाप्याहतं वस्त्रयुगं परिधाप्य उत्सङ्गे बालमारोप्य स्थापितस्य वह्नेः पश्चाद्भर्तुरुत्तरत उपविशति, अन्वारम्भेणैवाघारादिस्विष्टकृदन्ताश्चतुर्दशाहुतयो हूयन्ते ता एव हुत्वा । शीतासूपकल्पितास्वप्सु उष्णा अप आसिञ्चति पिता । **उष्णेनेति**–मन्त्रेण । अस्यार्थः । तत्र परमेष्ठी प्रतिष्ठा वायुर्वपनोदकासेके० । हे वायो हे अदिते अखण्डिते । दितिः खण्डनं "दो अवखण्डने" ।

इहि एहि आगच्छ । आगत्य चोष्णेन जलेन सह वर्तमानेनेतरेणोदकेन केशार्द्रीकरणेनास्य केशान्वप छिन्धि। केशश्मश्रु वपेति केशान्ते कर्मणि विशेषः। अथात्र प्रकृतोदके दध्यादीनामेकतमस्य पिण्डं प्रास्यति प्रक्षिपति । ततस्तस्मादुदकमादाय दक्षिणं गोदानं केशसटामुन्दति क्लेदयति । **सवित्रा प्रसूता दैव्या आप इति**–मन्त्रेण । “उन्दी क्लेदने ”। अथ मन्त्रार्थः–तत्र प्रजापतिर्गायत्री आपः क्लेदने० । हे कुमार सवित्रा सूर्येण प्रसूता उत्पादिता आपः ते तव तनूं चूडाख्यमङ्गम् उन्दन्तु क्लेदयन्तु । किम्भूता दैव्याः दिवि भवाः । किमर्थम्,तव दीर्घायुत्वाय चिरकालं निर्दुष्टजीवनाय,वर्चसे प्रतापाय ऐश्वर्याय च । त्र्येण्या त्रिश्वेतया शलल्या शल्यकपक्षकण्टकेन नयनम् ।पृथक्करणम् । तूष्णीं कुशतृणत्रयान्तर्द्धानम् **ओषधे त्रायस्वे**त्येतावतमन्त्रेण । तत्र प्रजापतिर्यजुर्गायत्री तृणमन्तर्द्धाने० । **शिवो नामेति**–मन्त्रेण ताम्रपरिष्कृतक्षुरादानम् । तत्र प्रजापतिः प्राजापत्या बृहती क्षुरः तदादाने० । **निवर्तयामीति**–मन्त्रेण संलागनकरणम् । प्रपूर्वो वपतिः संलागने । तत्र प्रजापतिः प्राजापत्या त्रिष्टुप् क्षुरःस्पर्शने० । **येनावपदिति** मन्त्रेण सकेशानि कुशतरुणानि प्रच्छिद्य छित्त्वा प्रास्यति प्रक्षिपति,उत्तरत अग्नेरेव आनडुहे ध्रियमाणे गोमयपिण्डे । अथ मन्त्रार्थः । तत्र लम्बायनः, पङ्क्तिः, सविता, कुशतरुणप्रच्छेदने० । हे ब्रह्माणः ब्राह्मणाः येन कारणेन क्षुरेण वा सविता प्रसविता पिता, आदित्यो वा राज्ञः सोमस्य वरुणस्य च शिरः अवपत् राजसूयदीक्षायै अमुण्डयत् । किम्भूतः विद्वान् सर्वज्ञः, तेन कारणेन क्षुरेण वा प्रकारेण वाऽस्य कुमारस्य इदं शिरो यूयं वपत मुण्डयत । तथाऽयं कुमार आयुष्मान् दीर्घायुः जरदष्टिः सुपरिणतवपुश्च सन् स्यात् । एवम् एवमेवोन्दनादिकर्म।**द्विरपरं तूष्णीं**-मन्त्रान् विना भवति । इतरयोश्च पश्चिमोत्तरयोर्गोदानयोरुन्दनादि । चकारा देवमेव सकृन्मन्त्रेण, द्विस्तूष्णीम् । अथ पश्चात्पश्चिमगोदाने **त्र्यायुषमिति**–छेदने मन्त्रभेदः । तत्र उत्तरनारायण, उष्णिक्, आशीः छेदने०। **अथोत्तरतो येन भूरिरिति** छेदने मन्त्रभेदः। अस्यार्थः। तत्र वामदेवः, यजुः, क्षुरः केशच्छेदने० । हे कुमार येन ब्रह्मणा मन्त्रेण तपसा वा चराः चरणशीलो वायुः, ज्योक् चिरम् आकल्पमित्यर्थः । दिवं द्याम् ,पश्चात्तामनुसूर्यं तमनुविश्वं च चरति । किम्भूतः भूरिः प्रचुरः। तेन ब्रह्मणा तपसा वा तन्मन्त्रितक्षुरेण वा ते तव शिरो वपामि । किमर्थं, जीवातवे जीवनहेतवे धर्माद्यर्थं, जीवनायायुषे, सुश्लोक्याय शोभनयशसे, स्वस्तये मङ्गलाय । त्रिः क्षुरेण क्षुरभ्रामणेन शिरः प्रदक्षिणं त्रिः करोति । सकृन्मन्त्रेण, द्विस्तूष्णीम् । केशान्ते तु समुखमिति विशेषः । तत्र मन्त्रः । **यत्क्षुरेणेति**–अस्यार्थः–तत्र वामदेवो यजुः क्षुरभ्रामणे०। हे क्षुरदेवते यत् यस्मात् वप्त्रा क्षुरेण आवपति शिरो मुण्डयति नापितादिः,किम्भूतेन एनं कुमारं मज्जयता संस्कुर्वता तथा सुपेशसा शोभयता । वाशब्दश्चार्थे । अतोऽस्य कुमारस्य केशान् छिन्धि मुण्डय । शिरः आयुश्च मा प्रमोषीः मा मुषाण । “मुष स्तेये”। केशान्ते तु मुखमिति च मन्त्रान्ते वाच्यम् । ताभिरेवाद्भिः शिरः समुद्य क्लेदयित्वाऽऽर्द्रभावमापाद्येत्यर्थः । नापिताय क्षुरं प्रयच्छति पिता तस्याधिकारित्वावगमात् ।“अक्षण्वन्परिवप” इत्येतावता मन्त्रेण । अस्यार्थः तत्र वामदेवो यजुः क्षुरो वपने० । हे नापित अस्य शिरः अक्षण्वन् क्षतमकुर्वन् परिवप परितो वप शिखां रक्षित्वा परितो मुण्डयेत्यर्थः । यथामङ्गलं यथाशास्त्रं त्रिशिखत्वादि । अनुगुप्तं सुगुप्तं वरमिति चूडाकरणे संस्कर्ता स्वाचार्याय केशान्ते संस्कृतोऽपि गाम् । संवत्सरमिति केशान्ते एव । संवत्सरादिकालं ब्रह्मचर्यव्रतम् । नतु कुमारस्य, असम्भवात् । अवपनं च विहितवपनव्यतिरिक्तवपनाभावोऽत्रैव । ब्रह्मचर्यकालविकल्पश्च शक्तिश्रद्धापेक्षः ॥ १ ॥

हरि०–अथ चूडाकरणकेशान्तौ तन्त्रेण सूत्रयति।**सांवत्सरिकस्य चूडाकरणं तृतीये वाऽप्रतिहते**–संवत्सरमब्दम् अतिक्रान्तः सांवत्सरिकः । तस्य कुमारस्य चूडाकरणं । चूडाकर्म कुर्यात् । तृतीये वा

संवत्सरे अप्रतिहते अल्पावशिष्टे । **यथामङ्गलं वा सर्वेषाम्**—यद्वा यथामङ्गलं यथाकुलाचारम् एतदुक्तं भवति यस्य कुले सांवत्सरिकस्य चूडाकर्म क्रियते तस्य सांवत्सरिकस्य । यस्य तृतीयेऽब्दे तस्य तदा इति व्यवस्था । यस्य कुले नास्ति नियमः, तस्य यदृच्छया विकल्पः । अन्ये तु यथामङ्गलशब्देन धर्मशास्त्रान्तरैः विहितकालान्तरोपलक्षणमाहुः । अतश्च सर्वेषां तुल्यविकल्पः । **षोडशवर्षस्य केशान्तः**—षोडशवर्षाण्यतीतानि यस्य असौ षोडशवर्षः तस्य सप्तदशे वर्षे केशान्तः केशान्ताख्यः संस्कारो भवति । अत्र यद्यपि सूत्रक्रमोऽन्यथा, तथापि केशान्तस्य कालविकल्पाभावात् "चूडाकरण एव कालविकल्पः" इति हेतोः "यथामङ्गलं वा सर्वेषाम" इति सूत्रं पूर्वं व्याख्यातं, "पाठक्रमादर्थक्रमो बलीयान्" इति न्यायात् । **ब्राह्मणान्भोजयित्वा माता कुमारमादायाप्लाव्याहते वाससी परिधाप्याङ्क आधाय पश्चादग्नेरुपविशति**—एवं कालमभिधाय कर्माभिधत्ते । चूडाकरणाङ्गतया त्रीन् ब्राह्मणान् भोजयित्वा माता जननी कुमारं पुत्रं चूडाकरणार्हमादाय गृहीत्वा, आप्लाव्य स्नापयित्वा, अहते नवे सकृद्धौते वाससी द्वे वस्त्रे परिधाप्य परिहिते कारयित्वा, अन्तरीयोत्तरीयत्वेन अङ्के उत्सङ्गे आधाय स्थापयित्वा पश्चादग्नेः पश्चिमतः उपविशति आस्ते । **अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्ते शीतास्वप्सूष्णा आसिञ्चति**—ततोऽन्वारब्धः ब्रह्मणा उपस्पृष्टः आज्याहुतीः आघारादिस्विष्टकृदन्ताश्चतुर्दश हुत्वा संस्रवप्राशनान्ते शीतासु अप्सु उष्णा अप आसिञ्चति प्रक्षिपति वक्ष्यमाणमन्त्रेण । अन्वारब्धग्रहणेन नित्याज्याहुतिहोमो नियम्यते । **उष्णेन वाय उदकेनेह्यदिते केशान्वपेति केशश्मश्रिव्रति च केशान्ते**—केशान्ते पुनः उष्णेन वाय उदकेनेह्यदिते केशश्मश्रु वपेति विशेषः । **अथात्र नवनीतपिण्डं घृतपिण्डं दध्नो वा प्रास्यति**—अथ उष्णोदकसेकानन्तरमत्र आस्वप्सु नवनीतपिण्डं घृतपिण्डं दध्नो वा पिण्डं प्रास्यति । "असु क्षेपणे" प्रक्षिपति । **तत आदाय दक्षिणं गोदानमुन्दति सवित्रा प्रसूता इति**—ततस्ताभ्योऽद्भ्यः चुलुकेनैकदेशमादाय दक्षिणं गोदानं शिरसो दक्षिणप्रदेशस्थं गोदानं केशसमूहम् उन्दति आर्द्रं करोतीत्यर्थः । केन मन्त्रेण । **सवित्राप्रसूतेत्यादिना दीर्घायुत्वाय वर्चसे** इत्यन्तेन । **त्र्येण्या शलल्या विनीय त्रीणि कुशतरुणान्यन्तर्दधात्योषध इति**—त्र्येण्या त्रिश्वेतया शलल्या शल्यकपक्षककण्टकेन विनीय पृथक्कृत्य, पूर्वदिनाधिवासितां केशलतिकां तस्या अन्तर्मध्ये अन्तरा त्रीणि त्रिसङ्ख्याकानि कुशतरुणानि दर्भपत्राणि दधाति धारयाति "ओषधे त्रायस्व" इति मन्त्रेण । **शिवो नामेति लोहक्षुरमादाय निवर्तयामीति प्रवपति**—ततः "शिवो नाम" इत्यनेन मन्त्रेण लोहक्षुरं ताम्रपरिष्कृतमायसं क्षुरमादाय गृहीत्वा दक्षिणकरेण निवर्तयामीत्यनेन मन्त्रेण प्रवपति तं क्षुरं कुशतरुणान्यभिनिदधाति । "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते" इति न्यायात् धातूनामनेकार्थत्वाच्चेत्यत्र प्रपूर्वो वपतिराभिनिधानार्थः । छेदनार्थत्वे तु उत्तरसूत्रविहितप्रच्छेदनानर्थक्यं प्रसज्येत । **येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् तेन ब्रह्माणो वपतेदमस्यायुष्यं जरदष्टिर्यथा सदिति सकेशानि प्रच्छिद्यानडुहे गोमयपिण्डे प्रास्यत्युत्तरतो ध्रियमाणे**—"येनावपत्" इति मन्त्रेण केशसहितानि कुशतरुणानि प्रच्छिद्य खण्डयित्वाऽग्नेरुत्तरतो भूभागे, ध्रियमाणे स्थाप्यमाने, आनडुहे आर्षभे, गोमयपिण्डे गोशकृत्पिण्डे प्रास्यति प्रक्षिपति । **एवं द्विरपरं तूष्णीम्** । एवमुक्तेन प्रकारेण द्विः द्विवारम् उन्दनादि गोमयपिण्डनिधानान्तमपरं कर्म तूष्णीं मन्त्ररहितं कुर्यात् । **इतरयोश्चोन्दनादि**—इतरयोः पश्चिमोत्तरयोः गोदानयोः उन्दनादि छेदनप्रभृति कर्म चकारात्सकृन्मन्त्रकं, द्विरमन्त्रकं भवति । **अथ पश्चात् त्र्यायुषमिति**—अथ दक्षिणगोदानस्य त्रिरुन्दनादिप्रच्छेदनानन्तरं पश्चाद्गोदाने विशेषमाह—**त्र्यायुषमिति**—"त्र्यायुषं जमदग्नेः" इत्यादिना मन्त्रेण सकेशानि कुशतरुणानि सकृत्प्रच्छिद्य, तूष्णीं द्विः प्रच्छिद्य गोमयपिण्डे प्रास्यति । **अथोत्तरतः**—अथानन्तरमुत्तर-

गोदाने उन्दनादिगोमयपिण्डनिधानान्ते विशेषमाह-**येन भूरिश्चरेति स्वस्तय**-इत्यन्तेन मन्त्रेण सकृत्सकेशानां कुशतरुणानां प्रच्छेदनं,द्विस्तूष्णीम् । **त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति समुखं केशान्ते**-त्रिः त्रीन्वारान् क्षुरेण शिरः मूर्द्धानं प्रदक्षिणं यथा भवति तथा परिहरति शिरसः समन्तात्प्रदक्षिणं क्षुरं भ्रामयतीत्यर्थः । तत्र मन्त्रमाह-**यत्क्षुरेणेत्या**दि **मास्यायुः प्रमोषी**रित्यन्तं, केशान्ते च समुखमिति पदं प्रक्षिपेन्मन्त्रे आवपेत् । अत्रापि सकृन्मन्त्रो द्विस्तूष्णीम् । **ताभिरद्भिः शिरः समुद्य नापिताय क्षुरं प्रयच्छति अक्षण्वन्परिवपेति**-ताभिः शीतोष्णाभिरद्भिः कुमारस्य शिरः समुद्य आर्द्रं विधाय नापिताय क्षौरकर्त्रे जातिविशेषाय "क्षुरमक्षण्वन्परिवप" इत्यनेन मन्त्रेण प्रयच्छति । **यथामङ्गलं केशशेषकरणम्**-केशानां शेषकरणं शिखास्थापनं केशशेषकरणम् । यथामङ्गलं मङ्गलं कुलाचारव्यवस्थामनतिक्रम्य भवति । कुलाचाराश्च बहुधा-तद्यथा **लौगाक्षिः**-"तृतीयस्य वर्षस्य भूयिष्ठे गते चूडां कारयेत् । दक्षिणतः कम्बुजानां **वशिष्ठानाम्**, उभयतोऽत्रिकश्यपानाम्, मुण्डा भृगवः, पञ्चचूडा **अङ्गिरसः** । **वाजसनेयिनाम्** एकाम्, मङ्गलार्थं शिखिनोऽन्य इति ।"कम्बुजानां **वसिष्ठानां** दक्षिणे कारयेच्छिखाम् । द्विभागेऽत्रिकश्यपानां मुण्डाश्च **भृगवो** मताः ॥ पञ्चचूडा **अङ्गिरस** एका **वाजसनेयिनाम्** । मङ्गलार्थं शिखिनोऽन्य उक्ता चूडाविधिः क्रमात् ॥ " इति । **अनुगुप्तमेतꣳ सकेशं गोमयपिण्डं निधाय गोष्ठे पल्वल उदकान्ते वा**-अनुगुप्तमावृतम् एवं गोमयपिण्डं सकेशं केशैः सहितं निधाय स्थापयित्वा गोष्ठे गवां व्रजे,पल्वले अल्पोदके सरसि, उदकान्ते वा उदकस्य समीपे वा । **आचार्याय वरं ददाति**-स्वकीयाय आचार्याय वरम् आचार्याभिलषितं द्रव्यं ददाति कर्मकर्ता पित्रादिः । **गां केशान्ते** । केशान्ते कर्माणि संस्कार्यस्य आचार्याय गां ददाति । **संवत्सरं ब्रह्मचर्यमवपनं च केशान्ते द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः**-केशान्तकर्मानन्तरं संवत्सरं यावत् ब्रह्मचर्यं भवेत् । अवपनं केशान्ते द्वादशरात्रं षड्रात्रं त्रिरात्रमन्ततः । केशान्तकर्मा- नन्तरं यावज्जीवमवपनं च विहितवपनव्यतिरेकेण विहितवपनं च । "गङ्गायां भास्करक्षेत्रे माता- पित्रोर्गुरौ मृते । आधाने सोमपाने च वपनं सप्तसु स्मृतम् " । तथा-"वपनं चानुभाविनाम्" प्रेतकनी- यसां वपनम् तथा-"मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः । वर्जयित्वा कुरुक्षेत्रं विशालं विरजं गयाम् " । नैमिषं पुष्करं गयामिति पाठान्तरम् । "प्रयागे वपनं कुर्याद् गयायां पिण्डपातनम् । दानं दद्यात्कुरुक्षेत्रे वाराणस्यां तनुं त्यजेत्॥"इत्यादिवचनानि च यप्रतिपादितानिमित्तेषु । अत्र गर्भाधानादिषु विवाहपर्यन्तेषु संस्कारकर्मसु मुख्यत्वेन पितैव कर्ता । तदभावे सन्निहितोऽन्यः । तथाच स्मरणम्-"स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु । पिण्डानोद्वाहनात्तेषां तस्याभावेऽपि तत्क्रमात् " । एतान्युक्तानि नामकरणादीनि चूडाकरणान्तानि कर्माणि दुहितॄणामपि मन्त्ररहितानि कुर्यात् । यथाह **याज्ञवल्क्यः**- "तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः" इति । तथा शूद्रस्य यथार्हम् । यथाह **यमः**- "शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः । न केनचित्समसृजच्छन्दसा तं प्रजापतिः ॥" एवंविधः गर्भाधानादिचूडाकरणान्तैः संस्कारैर्बैजिकगार्भिकपापशून्यः विना मन्त्रेण तूष्णीं यतस्तं शूद्रं केनापि एकतमेनापि छन्दसा वेदेन प्रजापतिः परमेश्वरः न समसृजत् समयोजयत् इति । तथा **ब्रह्मपुराणे**-" विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा । " मात्रशब्देन विहितेतरसंस्कारनिवृत्तिश्च । यमब्रह्मपुराणवचनाभ्यां शूद्रस्य " गर्भाधानपुंसवनसीमन्तजातकर्मनामधेयनिष्क्रमणान्नप्राशनचूडाकरणविवाहान्ताः " नवसंस्कारा विहितास्ते च तूष्णीम्, इतरेषां निवृत्तिः । प्रसङ्गादनुपनीतधर्मा लिख्यन्ते । **मनुः**-"नास्मिन्युज्यते कर्म किञ्चिदामौञ्जिबन्धनात् । नाभिव्याहारयेद् ब्रह्म स्वधानिनयनादृते ॥ शूद्रेण हि समस्तावद्यावद्वेदे न जायते । " **वृद्धशातातपः**-"प्राक्चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः । कुमारस्तु स विज्ञेयो यावन्मौञ्जीनिबन्धनम् ॥ शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतम् । रजस्वलादिसंस्पर्शे स्नातव्यं तु कुमारकैः । " **गौतमः**-"प्रागुपनयनात्कामचारवादभक्षः । **ब्राह्मे**-"मातानित्यं मद्यं ब्राह्मणोऽनुपनीतोऽपि वर्जयेत्। उच्छिष्टादावप्रयता न स्युः।महापातकवर्जम्।।"

पित्रोरथोच्छिष्टं बालो भुञ्जन्भवेत्सुखी।''संस्कारप्रयोजनं च स्मृत्यन्तरोक्तम्।यथाह **याज्ञवल्क्यः**–''एवमेनः शमंयाति बीजगर्भसमुद्भवम्।''आङ्गिराः–''चित्रकर्म यथाऽनेकै रागैरुन्मील्यते शनैः । ब्राह्मण्यमपि तद्वत्स्यात्संस्कारैर्विधिपूर्वकैः।''मनुः''गार्भैर्होमैर्जातकर्मचूडामौञ्जीनिबन्धनैः।बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते'' । **हारीतः** ।''गर्भाधानवदुपेतो ब्रह्मगर्भं संदधाति पुंसवनात्पुंसीकरोति, फलस्नपनात्पितृजं पाप्मानमपोहति जातकर्मणा प्रथममपोहति, नामकरणेन द्वितीयं, प्राशनेन तृतीयम्, चूडाकरणेन चतुर्थम्, स्नानेन पञ्चमम् । एतैरष्टाभिर्गार्भसंस्कारैर्गर्भोपघातात्पूतो भवति । उपनयनाद्यैरेभिरनुव्रतैश्चाष्टभिः स्वच्छन्दसम्मितो ब्राह्मणः परं पात्रं देवापितॄणां भवति ।'' छन्दसामायतनम । **सुमन्तुः** । तत्र ब्राह्मणक्षत्त्रियवैश्यानां वृत्तिगर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणनिष्क्रमणान्नप्राशनचूडोपनयनं, चत्वारि वेदव्रतानि, स्नानं, सहधर्मचारिणीसंयोगः । पञ्चानां यज्ञानामनुष्ठानम् । देवपितृमनुष्यभूतब्रह्मयज्ञानाम् । एतेषां चाष्टकाः । पार्वणश्राद्धं श्रावण्याग्रहायणीचैत्र्याश्वयुजीतिपाकयज्ञसंस्थाः । अग्न्याधेयमग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्याग्रयणेष्टिर्निरूढपशुबन्धः सौत्रामणीति, सप्त हविर्यज्ञसंस्थाः । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽऽतिरात्रोप्तोर्याम इति सप्त सोमसंस्थाः।एते चत्वारिंशत्संस्काराः । **हारीतः** । द्विविध एव संस्कारो भवति । ब्राह्मो दैवश्च । गर्भाधानादिस्नानान्तो ब्राह्मः । पाकयज्ञहविर्यज्ञसौम्याश्चेति दैवः । ब्राह्मसंस्कारसंस्कृत ऋषीणां समानतां सायुज्यतां गच्छति । दैवेनोत्तरेण संस्कारेणानुसंस्कृतो देवानां समानतां सालोक्यतां सायुज्यतां गच्छतीत्यलमतिप्रसङ्गेन । इति सूत्रार्थः ॥ १ ॥

अथ **प्रयोगः** । तत्र सांवत्सरिकस्य तृतीये वा वर्षे भूयिष्ठे गते कुमारस्य चूडाकरणाख्यं कर्म कुर्यात् । कुलधर्मव्यवस्थया वा दैवयोगाद् गृह्योक्तकालालाभे स्मृत्यन्तरोक्तान्यतमकाले मातृपूजामाभ्युदयिकं च कृत्वा श्राद्धातिरिक्तं ब्राह्मणत्रयं भोजयित्वा, बहिःशालायां परिसमूहनादिभिर्भुवं संस्कृत्य लौकिकाग्निं स्थापयेत् । अथ माता कुमारमादाय स्नापयित्वा वासोयुगं परिधाप्य उत्सङ्गे निधाय अग्नेः पश्चिमत उपविशति । ततो ब्रह्मोपवेशनाद्याज्यभागान्ते विशेषः । तण्डुलवर्जमासादनम् । उपकल्पनीयानि च शीतोदकमुष्णोदकम् । नवनीतघृतदधिपिण्डानामेकतमः पिण्डः । त्र्येणी शलली। त्रीणि त्रीणि कुशतरुणानि पृथक्बद्धानि, नवताम्रपरिष्कृत आयसः क्षुरः, गोमयपिण्डं, नापितश्चेति । ततः पवित्रकरणादिपर्युक्षणान्ते आघारादिस्विष्टकृदन्तं चतुर्दशाहुतिहोमं विधाय, संस्रवं प्राश्य, पूर्णपात्रवरयोरन्यतरं ब्रह्मणे दद्यात् । ततः शीतास्वप्सु उष्णा अप आसिच्य ''उष्णेन वाय उदकेनेह्यदिते केशान्वप'' इत्यनेन मन्त्रेण । अत्र उष्णोदकमिश्रितशीतोदके उपकल्पितं नवनीताद्यन्यतमं पिण्डं प्रक्षिपति । तदुदकमादाय ''सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनुं दीर्घायुत्वाय वर्चसे'' इत्यनेन मन्त्रेण दक्षिणं गोदानमुन्दति । ततस्त्र्येण्या शलल्या केशान्विनीय ''ओषधे त्रायस्व'' इति मन्त्रेण त्रीणि कुशतरुणान्यन्तर्द्धाय ''शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मामाहिꣳसीः'' इति उपकल्पितं क्षुरमादाय कुशतरुणान्तर्हितेषुकेशषु''निवर्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय इत्यनेन मन्त्रेण क्षुरमभिनिदधाति । ''येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् तेन ब्रह्माणो वपतेदमस्यायुष्यं जरदष्टिर्यथासत्'' इत्यनेन मन्त्रेण सकेशानि कुशतरुणानि प्रच्छिद्य आनडुहे गोमयपिण्डे उत्तरतो ध्रियमाणे प्रक्षिपति । एवमेवापरं नारद्वयमुन्दनकेशविनयन कुशतरुणान्तर्द्धानक्षुराभिनिधानसकेशकुशतरुणप्रच्छेदनगोमयपिण्डप्राशनानि तूष्णीं कुर्यात् । तथा--पश्चिमोत्तरयोः गोदानयोः एवमेव सकृत्समन्त्रकं,द्विस्तूष्णीं करोत्येतावान्विशेषः।पश्चिमगोदाने ''त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम्'' इति मन्त्रेण छेदनम् । उत्तरगोदाने ''येन भूरिश्चरा दिवं ज्योक्च पश्चाद्धि सूर्यम् । तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तये'' इत्यनेन मन्त्रेण छेदनम् । अन्यत्सर्वमुन्दनादि गोमयपिण्डप्राशनान्तं समानम् । ततो

"यत्क्षुरेण मज्जयता सुपेशसा वप्त्वा वा वपति केशाञ्छिन्धि शिरो मास्यायुः प्रमोषीः" इत्यन्तेन मन्त्रेण शिरसः समन्तात्प्रदक्षिणं क्षुरं भ्रामयति सकृन्मन्त्रेण, द्विस्तूष्णीम् । ततस्तेनैवोदकेन समस्तं शिर आर्द्रमापाद्य " अक्षण्वन्परिवप" इत्यनेन मन्त्रेण नापिताय क्षुरं समर्पयति । स च नापितः केशवपनं कुर्वन् यथोक्तं केशशेषकरणं करोति । ततः सकेशं गोमयपिण्डम् अनुगुप्तं पल्वले गोष्ठे वा उदकान्ते निधाय चूडाकरणकर्ता स्वाचार्याय वरं ददाति। केशान्तेऽपि षोडशवर्षस्य सप्तदशे वर्षे इयमेव चूडाकरणोक्तेतिकर्तव्यता भवति। एतावांस्तु विशेषः। उष्णोदकासेचमन्त्रे 'उष्णेन वाय उदकेनेह्यदिते।' तथा क्षुरपरिहरणे मुखसहितं शिरः परिहरति । तत्र परिहरणमन्त्रे च **यत्क्षुरेण मज्जयते**त्यादि **माऽस्यायुः प्रमोषीर्मुखम्** इति । तथा यस्य केशान्तः स स्वाचार्याय गां ददाति । संवत्सरं वा द्वादशरात्रं षड्रात्रं वा ब्रह्मचर्यं करोति । शक्त्यपेक्षया विकल्पः । तथा केशान्तादूर्ध्वं शास्त्रीयवपनव्यतिरेकेण यावज्जीवमवपनं शास्त्रीयवपनं चोक्तम् ।। १ ।।

गदा०–चूडाकरणमाह–**सांवत्सरिकस्य चूडाकरणम्**–संवत्सरो जातो यस्य स सांवत्सरिकः । तस्य बालकस्य चूडाकरणं चूडाकरणाख्यं कर्म कुर्यादिति शेषः । चूडाकरणमिति वक्ष्यमाणसंस्कारकर्मणो नामधेयम् । **तृतीये वाऽप्रतिहते** –अथवा तृतीये संवत्सरे अप्रतिहते असंपूर्णेऽसमाप्ते चूडाकरणं कुर्यात् । **षोडशवर्षस्य केशान्तः**–केशान्त इति संस्कारकर्मनामधेयम् । षोडशवर्षाण्यतीतानि यस्य स षोडशवर्षः । तस्य पुरुषस्य केशान्ताख्यः संस्कारः स्यात् । अयं च नियतकाल एव । अतो " विवाहिताविवाहितयोर्भवति " इति **जयरामः** । अत्र **कारिकायाम्**–" केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यबन्धोर्द्वाविंशे वैश्यस्य ह्यधिके ततः " इति कर्मणस्तुल्यत्वात्केशान्तकथनमत्र भगवता **कात्यायनेन** कृतम् ।: **यथामङ्गलं वा सर्वेषाम्**–अथवा यथामङ्गलं यथाकुलाचारं चूडाकरणं कार्यम् । यस्य कुले सांवत्सरिकस्य कुमारस्य कुर्वन्ति तस्य सांवत्सरिकस्य चूडाकरणम् । यस्य कुले तृतीयेऽब्दे कुर्वन्ति तस्य तृतीये असंपूर्णे कार्यमिति व्यवस्था । यस्य कुले नियमो नास्ति तस्य विकल्पः । यथामङ्गलशब्देन केचित्कालान्तरं कल्पयान्ति । अत्र **स्मृत्यन्तरोक्ताः काला** उच्यन्ते । **नारदः**–" जन्मतस्तु तृतीयेऽब्दे श्रेष्ठमिच्छन्ति पण्डिताः । पञ्चमे सप्तमे वाऽपि जन्मतो मध्यमं भवेत् । अधमं गर्भतः स्यात्तु नवमैकादशेऽपि वा " इति । **बृहस्पतिः**–"तृतीयेऽब्दे शिशोर्गर्भाज्जन्मतो वा विशेषतः ।। पञ्चमे सप्तमे वाऽपि स्त्रियाः पुंसोऽपि वा समम् ।।" **प्रयोगपारिजाते**–" आद्येऽब्दे कुर्वते केचित्पञ्चमेऽब्दे द्वितीयके । उपनीत्या सहैवेति विकल्पाः कुलधर्मतः " । **कारिकायाम्**–" सम्भवत्युदगयने शुक्लपक्षे विशेषतः । " इति । **बृहस्पतिः** "शुक्लपक्षे शुभं प्रोक्तं कृष्णपक्षे शुभेतरत् । अशुभोऽन्त्यत्रिभागः स्यात्कृष्णपक्षे निराकृते" **कारिकायाम्**–"आश्विनीश्रवणस्वातीचित्रापुष्यपुनर्वसु ।--धनिष्ठारेवतीज्येष्ठामृगहस्तेषु कारयेत् ।। तिथिं प्रतिपदां रिक्तां पातं विष्टिं विवर्जयेत् । वाराञ्छनैश्चरादित्यभौमानां रात्रिमेव च" । **बृहस्पतिः**–"पापग्रहाणां वारादौ विप्राणां शुभदं रवेः । क्षत्रियाणां क्षमासूनोर्विट्छूद्राणां शनौ शुभम् " । **वसिष्ठः**–" द्वित्रिपञ्चमसप्तम्यामेकादश्यां तथैव च । दशम्यां च त्रयोदश्यां कार्यं क्षौरं विजानता " ! **ग्रन्थान्तरे**—" षष्ठ्यष्टमी चतुर्थी च नवमी च चतुर्दशी । द्वादशी दर्शपूर्णे द्वे प्रतिपच्चैव निन्दिता " इति । सर्वेषामिति सर्वेषां वर्णानामित्यर्थः । **भर्तृयज्ञभाष्ये** तु यस्य यादृशे ब्राह्मणभोजने मङ्गलबुद्धिः स तादृशं ब्राह्मणं भोजयित्वा चूडाकरणं कुर्यादिति सूत्रं योजितम्। चूडाकर्मणि कालोऽभिहितः । कर्माह–**ब्राह्मणान् भोजयित्वा माता कुमारमादायाप्लाव्याहते वाससी परिधाप्याङ्क आधाय पश्चादग्नेरुपविशति**––आभ्युदयिकश्राद्धब्राह्मणव्यतिरिक्तान् त्रीन् ब्राह्मणान् भोजयित्वा, माता कुमारजननी कुमारं स्वपुत्रमादाय हस्ते गृहीत्वा आप्लाव्य स्नापयित्वाऽहते नवे यन्त्रमुक्ते सकृद्धौते वाससी वस्त्रे परिधाप्य परिहिते कारयित्वा अङ्क आधाय तं कुमारमङ्के उत्सङ्गे स्थापयित्वाऽग्नेः पश्चादुपविशति । मातरि रजस्वलायां तु विशेषः । **बृहस्पतिः**–"प्राप्तमभ्युदयश्राद्धं पुत्रसंस्कारकर्मणि । पत्नी रजस्वला चेत्स्यान्न कुर्यात्तत्पिता तदा" । पितेति कर्तृमात्रोपलक्षणम् । दोषमाह–**गर्गः**–"विवाहोत्सवयज्ञेषु माता यदि रजस्वला । तदा स मृत्युमाप्नोति पञ्चमं दिवसं विना ।।" इति । अग्रे सुमुहूर्त्तालाभे तु **वाक्यसारे**–"अलाभे सुमुहूर्तस्य रजोदोषे उपस्थिते । श्रियं संपूज्य विधिवत्ततो मङ्गलमाचरेत् ।।" इति । कुमारस्य मातरि गर्भिण्यामपि चूडाकरणं न कार्यम् । तथाच **बृहस्पतिः**–"गर्भिण्यां मातरि शिशोः क्षौरकर्म न कारयेत् । व्रताभिषेकेऽप्येवं स्यात्कालो वेदव्रते-

ष्वपि" । **मदनरत्ने**–"पुत्रचूडाकृतौ माता यदि सा गार्भिणी भवेत् । शस्त्रेण मृत्युमाप्नोति तस्मात्क्षौरं विवर्जयेत्" एतदपवादोऽपि तत्रैव । "सूनोर्मातरि गार्भिण्यां चूडाकर्म न कारयेत् ।" पञ्चमात्प्रागत ऊर्ध्वं तु गर्भिण्यामपि कारयेत् । "सहोपनीत्या कुर्याच्चेत्तदा दोषो न विद्यते । गर्भे मातुः कुमारस्य न कुर्याच्चौलकर्म तु ॥ पञ्चमासादधः कुर्यादत ऊर्ध्वं न कारयेत्" "पञ्चमासादूर्ध्वं मातुर्गर्भस्य जायते मृत्युः" इति तत्रैवोक्तम् । कुमारस्य ज्वरोत्पत्तौ न कार्यमित्याह—**गर्गः** "ज्वरस्योत्पादनं यस्य लग्नं तस्य न कारयेत् । दोषनिर्गमनात्पश्चात्स्वस्थो धर्मं समाचरेत्" । लग्नमिति सर्वमङ्गलोपलक्षणम् । **अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्ते शीतास्वप्सूष्णा आसिञ्चति उष्णेन वाय उदकेनेह्यदिते केशान्वपेति केशश्मश्रिवति च केशान्ते**–ब्रह्मणाऽन्वारब्धे आघारादिस्विष्टकृदन्ता आज्याहुतीर्हुत्वा संस्रवप्राशनान्ते शीतासु पूर्वमुपकल्पितासु अप्सु उष्णा अप आसिञ्चति प्रक्षिपति, "उष्णेन वाय उदकेनेहि" इति मन्त्रेण । केशान्ते तु "उष्णेन वाय उदकेनेह्यदिते केशश्मश्रु वप" इति मन्त्रे विशेषः । 'कुमारेणान्वारम्भः कार्यः' इति **भर्तृयज्ञमते** विशेषः । मन्त्रार्थः । रविकिरणसम्बन्धादन्तर्गतज्योतिषो वायोरुष्णत्वम् । हे वायो त्वमप्युष्णोदकेन गृहीतेन कुमारस्य शिरःप्लवनाय एहि । हे अदिते देवमातः केशान् लक्षीकृत्य केशार्द्रकरणार्थं शीतोदकमध्ये उष्णोदकं वप क्षिप, अनेकार्थत्वाद्धातोः । **अथात्र नवनीतपिण्डं घृतपिण्डं दध्नो वा प्रास्यति**--अथ उष्णोदकसेकानन्तरम् अत्र प्रकृतोदके नवनीतपिण्डं, घृतस्य पिण्डं, दध्नो वा पिण्डं प्रास्यति प्रक्षिपति । "असु प्रक्षेपे" । **तत आदाय दक्षिणं गोदानमुन्दति सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूं दीर्घायुत्वाय वर्चस इति**–ततस्तस्माद्यत्र नवनीतादीनामन्यतमपिण्डप्राशनं कृतं तस्मादुदकात्किञ्चिदुदकमादाय दक्षिणं गोदानं गावि पृथिव्यां दीयते निधीयते स्थाप्यते शयनकाले इति गोदानं दक्षिणकर्णसमीपवर्तिशिरःप्रदेशमुन्दाति "उन्दी क्लेदने" क्लेदयति आर्द्रं करोति, **सवित्रेति** मन्त्रेण । मन्त्रार्थस्तु–हे कुमार सवित्रा सूर्येण प्रसूता जनिता उत्पादिता आपः दैव्या दिवि भवाः ते तव तनूं शरीरं चूडालक्षणमङ्गमुन्दन्तु क्लेदयन्तु । किमर्थम्, तव दीर्घायुत्वाय चिरं जीवनार्थं वर्चसे प्रतापाय । **त्रेण्या शलल्या विनीय त्रीणि कुशतरुणान्यन्तर्दधात्योषध इति**–त्रिषु स्थानेषु एनी श्वेता त्र्येणी शलली सेधाशलाका तया क्लिन्नान्केशान् विनीय पृथक्कृत्य विरलान् कृत्वा त्रीणि कुशतरुणानि दर्भतृणान्यन्तर्मध्ये दधाति धारयति "ओषधे त्रायस्व" इति मन्त्रेण । **शिवो नामेति लोहक्षुरमादाय निवर्तयामीति प्रवपति**–ततः कर्ता "शिवो नाम" इति मन्त्रेण लोहक्षुरं लोहेन ताम्रेण परिष्कृतमयोमयमेव क्षुरमादाय हस्तेन गृहीत्वा, "निवर्तयामि" इति मन्त्रेण प्रवपाति तं क्षुरं कुशतरुणान्तर्हितेषु केशेषु संलागयाति स्थापयति । अत्र प्रपूर्वो वपतिः संलागने, छेदनार्थत्वे तु उत्तरसूत्रविहितं छेदनमनर्थकं स्यात् । "शिव" इत्यस्यार्थः । हे क्षुर यस्त्वं शिवो नामाऽसि शान्तनामाऽसि भवसि ते तव स्वधितिर्वज्रं पिता हे भगवन् तस्मै तुभ्यं नमः, मा मां, मा हिंसीः मा विनाशयेति । निवर्तयामीत्यस्यार्थः । निवर्तयामि मुण्डयामि । भाविनि भूतोपचारात् । आयुषे आयुरर्थम् । अन्नाद्याय अन्नादनाय । प्रजननाय गर्भोत्पत्त्यै । रायस्पोषाय धनस्य पुष्ट्यै । सुप्रजास्त्वाय शोभनापत्यभवनार्थम् । सुवीर्याय शोभनवीर्याय । **येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् । तेन ब्रह्माणो वपतेदमस्यायुष्यं जरदष्टिर्यथासदिति सकेशानि प्रच्छिद्यानडुहे गोमयपिण्डे प्रास्यत्युत्तरतो ध्रियमाणे**–"येनावपत्सविता" इति मन्त्रेण सकेशानि केशसहितानि कुशतृणानि प्रच्छिद्य छित्त्वा खण्डयित्वाऽग्नेरुत्तरतो भूमौ ध्रियमाणेऽवस्थाप्यमाने आनडुहे बलीवर्दगोसम्बन्धिमये पिण्डे गोपुरीषे तानि प्रास्याति प्रक्षिपति । अत्र गोमयपिण्डस्य स्थापनं कार्यम् । ततः केशान् प्रच्छिद्य पिण्डे प्रासनम्, अत्र केशान् प्रच्छिद्येति पाठो दर्शितः **कर्कभर्तृयज्ञाभ्याम्** । "सकेशानि" इति केचित्पठन्ति । तेषां कुशतरुणानीति कुशतरुणविषयं नपुंसकमिति **भर्तृयज्ञैः** प्राचीनपाठो दर्शितः । मन्त्रार्थः । हे ब्रह्माणः येन क्षुरेण तेजोमयेन सविता सूर्यः सोमस्य राज्ञः वरुणस्य च शिरः अवपत् राजसूयदीक्षायै अमुण्डयत् विद्वान् सर्वज्ञः, तेन क्षुरेणास्य शिशोरिदं शिरो यूयं वपत मुण्डयत । इदं शिरः अस्य कुमारस्य आयुषे हितम् आयुष्यम् आयुषो भावः सत्ता वा । यथाऽयं कुमारः जरदष्टिः सम्पूर्णायुः असत् भूयात् । जरामश्नुते व्याप्नोति जरदष्टिः जरद्भावः । **एवं द्विरपरं तूष्णीम्**–एवमेवोक्तरीत्या द्विवारं तूष्णीं मन्त्रं विनोन्दनादि गोमयपिण्डनिधानान्तमपरं दक्षिण एव गोदाने कर्म कुर्यात् । अत्रैवं पदार्थाः । उन्दनम् केशानां विनयनम् । दर्भतृणान्तर्द्धानम् । क्षुराभिनिधानम् । सकेशानां छेदनम् । गोमयपिण्डे प्रासनम् । **इतरयोश्चोन्दनादि**–इतरयोः पश्चिमोत्तरयोर्गोदानयोरुन्दनादि, चकारादेवमेव सकृन्मन्त्रेण,

द्विस्तूष्णीं कर्म कुर्यात् । तत्र पूर्वपश्चिमगोदाने कृत्वा तत उत्तरगोदाने कार्यम् । " अथ पश्चादथोत्तरतः " इति सूत्रकारप्रस्थानाच्च प्रादक्षिण्यानुग्रहाच्च । क्षुरादानं तु मन्त्रेण पुनर्न भवति, मन्त्रेण सकृद्गृहीतत्वात् । **अथ पश्चात् त्र्यायुषमिति**—इतरयोश्चोन्दनादीत्युक्तम् । तत्र स एव मन्त्रो माभूदित्याह--पश्चात् पश्चिमगोदानकर्मणि "त्र्यायुषम्" इति मन्त्रेण सकेशतृणानां छेदनं कुर्यात्। त्रीण्यायूंषि समाहृतानि बाल्ययौवनस्थाविराणि इत्येवमेतेषामेवावस्थात्रयव्यापकमायुरस्माकमस्त्विति मन्त्रार्थः । **अथोत्तरतो येन भूरिश्चरा दिवं ज्योक् च पश्चाद्धि सूर्य्यम् । तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तय इति**—अथोत्तरगोदानकर्मणि सकेशानां कुशतृणानां " येन भूरिश्चराः " इति मन्त्रेण छेदनं कुर्यात् । अन्यत्सर्वं दक्षिणगोदानवत्कार्यम् । मन्त्रार्थस्त्वयम् । येन ब्रह्मणा मन्त्रेण तपसा वा चरणशीलो वायुः ज्योक् चिरं आकल्पमित्यर्थः, दिवं द्याम् पश्चात्तामनु सूर्यं तमनु विश्वं च चरति । किम्भूतः भूरिः प्रचुरः । तेन ब्रह्मणा तपसा वा तन्मन्त्रितक्षुरेण ते तव शिरो वपामि । किमर्थम्, जीवातवे जीवनहेतवे धर्माद्यर्थं, जीवनायायुषे । सुश्लोक्याय शोभनयशसे । स्वस्तये अविनाशाय । **त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति समुखं केशान्ते यत्क्षुरेण मज्जयता सुपेशसा वप्त्वा वाऽऽवपति केशाञ्छिन्धि शिरो माऽस्यायुः प्रमोषीर्मुखमिति च केशान्ते**—त्रिवारं क्षुरभ्रामणेन शिरः मस्तकं परिहराति दक्षिणकर्णादारभ्य प्रदक्षिणं शिरसः समन्तात्पुनर्दक्षिणकर्णपर्यन्तं " यत्क्षुरेण " इति मन्त्रेण क्षुरं भ्रामयतीत्यर्थः । समुखं केशान्ते मुखसहितं शिरः परिहराति केशान्ते कर्मणि । मन्त्रेऽपि विशेषः । केशान्ते मुखमितिपदं मन्त्रे अधिकं भावयेत् । "यत्क्षुरेण इति सकृन्मन्त्रेण, द्विस्तूष्णीं शिरःपरिहरणम् ; हे क्षुर यत् यस्मात्क्षुरेण वप्त्वा मुण्डित्वा आवपति गोमयपिण्डे केशान् क्षिपति । किम्भूतेन एनं कुमारं मज्जयता संस्कुर्वता तथा सुपेशसा शोभयता । अतोऽस्य केशाञ्छिन्धि अवखण्डय । शिरो मस्तकं मा छिन्धि मा सव्रणं कुरु, अस्य मा आयुः प्रमोषीः मा अपहर । **ताभिरद्भिः शिरः समुद्य नापिताय क्षुरं प्रयच्छत्यक्षण्वन्परिवपेति**—ताभिरेव प्रकृताभिः शीतोष्णाभिरद्भिः बालकस्य शिरः मस्तकं समुद्य क्लेदयित्वा आर्द्रभावमापाद्य, उन्दातिः क्लेदनार्थः । तस्य क्त्वान्तत्वादनुनासिकलोपः क्रियते, समुद्येति रूपम् । नापिताय क्षुरं प्रयच्छति मुण्डनार्थं समर्पयाति " अक्षण्वन् परिवप " इति मन्त्रेण । मन्त्रार्थः । हे नापित त्वमस्य शिरः अक्षण्वन् क्षतरहितं यथा स्यात्तथा परि समन्ताद्वप मुण्डय । **यथामङ्गलं केशशेषकरणम्**—क्षुरसमर्पणानन्तरं नापितेन वपनं कार्यम् । तत्र केशानां शेषकरणं शिखारक्षणं स्थापनं यथामङ्गलं यस्य कुले यथा प्रसिद्धं तस्य तथैव शिखास्थापनं कार्यम् । अत्र **कारिकायाम्**—"केशशेषं ततः कुर्याद्यस्मिन् गोत्रे यथोचितम् । वासिष्ठा दक्षिणे भागे उभयत्रापि कश्यपाः ॥ शिखां कुर्वन्त्यङ्गिरसः शिखाभिः पञ्चभिर्युताः । परितः केशपङ्क्त्या वा मुण्डाश्च भृगवो मताः ॥ कुर्वन्त्यन्ये शिखामत्र मङ्गलार्थमिह क्वचित् " । **लौगाक्षिः**—"दक्षिणतः **कम्बुजवसिष्ठानाम्,** उभयतोऽत्रिकश्यपानां, मुण्डा **भृगवः,** पञ्चचूडा **अङ्गिरसः वाजसनेयिनामेका** । मङ्गलार्थं शिखिनोऽन्ये " इति । एतच्छूद्रातिरिक्तविषयम् । "शूद्रस्यानियताः केशवेषाः" इति **वसिष्ठोक्तेः** । यत्तु **पाद्मे**—"न शिखी नोपवीती स्यान्नोच्चरेत्संस्कृतां गिरम्" इति शूद्रमुपक्रम्योक्तम् । तदसच्छूद्रस्येति केचित् । विकल्प इति तु युक्तम् । **अनुगुप्तमेतꣳ सकेशं गोमयपिण्डं निधाय गोष्ठे पल्वल उदकान्ते वा**—ततो वपनोत्तरं सर्वान्केशान् गोमयपिण्डे कृत्वा तं गोमयपिण्डं वस्त्रादिवेष्टनेनानुगुप्तमावृतं कृत्वा गोष्ठे गवां व्रजे स्थापयेत् । अथवा पल्वले अल्पोदके सरासि स्थापयेत् । उदकान्ते यत्र कुत्रचिदुदकसमीपे वा स्थापयेत् । **आचार्याय वरं ददाति**—ततश्चूडाकरणकर्मकर्ता पित्रादिः स्वाचार्याय वरम् अभिलषितद्रव्यं ददाति । अभिलषितद्रव्याभावे "चतुष्कार्षापणो वरः" इति मूल्याध्यायोक्तद्रव्यदानमिति वृद्धाः । **गां केशान्ते**—केशान्ते कर्मणि केशान्तसंस्कारकर्ता स्वाचार्याय गां ददाति "संस्कार्यस्याचार्याय" इति **हरिहरः** । **संवत्सरं ब्रह्मचर्यमवपनं च केशान्ते**—केशान्तकर्मानन्तरं केशान्तकर्मणा यः संस्कृतः स संवत्सरं यावद्ब्रह्मचर्यं चरेत् । स्त्रीसम्भोगं न कुर्यादित्यर्थः । अवपनं च केशान्तोत्तरकालं संस्कृतः संवत्सरं वपनं वर्जयेत् । चशब्दः संवत्सरानुवृत्त्यर्थः । केशान्तकर्मोत्तरम् अवपनं च यावज्जीवं शास्त्रीयवपनव्यतिरेकेणेति **वासुदेवहरिहरगर्गाः** । **द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः**—संवत्सरं ब्रह्मचर्यमवपनं च द्वादशरात्रं वा षड्रात्रं त्रिरात्रं वा । एते चत्वारो विकल्पाः पूर्वपूर्वाशक्त्या। अत्र **स्मृत्यन्तरोक्तो** वपने विधिर्निषेधश्चोच्यते—" गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ । आधाने सोमपाने च वपनं सप्तसु स्मृतम्॥" तथा—"मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः । वर्जयित्वा कुरुक्षेत्रं विशालं विरजं गयाम् ।"

वपनं चानुभाविनां प्रेतकनीयसाम् । तथा–"प्रयागे वपनं कुर्याद् गयायां पिण्डपातनम्" इत्यादिषु निमित्तेषु वपनं कार्यम् । वृथा तु न कार्यम् । तथाच **विष्णुः**–"प्रयागे तीर्थयात्रायां पितृमातृवियोगतः । कचानां वपनं कुर्याद्वृथा न विकचो भवेत्॥" इति निषेधेऽपि "नीचकेशो विप्रः स्यात्" इति नीचकेशत्वविधानात्कर्त्तनादिना नीचत्वं सम्पादनीयम् । "मुण्डनस्य निषेधेऽपि कर्त्तनं तु विधीयते" इति **बृहस्पतिवचनात्** । **भारते**–"प्राङ्मुखः श्मश्रुकर्माणि कारयेत समाहितः । उदङ्मुखो वाऽथ भूत्वा तथाऽऽयुर्विन्दते महत् ॥" **अपरार्के**–"केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेत् । दाक्षिणं कर्णमारभ्य धर्मार्थं पापसङ्क्षये ॥ हन्वाद्यन्तं च संस्कारे शिखाद्यन्तं शिरो वपेत्" यतीनां तु विशेषो **निगमे**–"कक्षोपस्थशिखावर्जं ऋतुसन्धिषु वापयेत् ।" इति ॥ * ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति–महायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे प्रथमा कण्डिका॥ १॥

अथ **पदार्थक्रमः** । तत्र कालस्तावत्प्रथमे, द्वितीये, तृतीये, पञ्चमे, सप्तमे वा वर्षे गततृतीयभागे अगतत्रिभागे वा उपनीत्या सह वा यथाकुलाचारं चौलं कार्यम् । तत्रापि द्वितीयादौ वर्षे जन्मतो मुख्यम्, गर्भतो गौणम् । उदगयने शुक्लपक्षे गुरुशुक्रयोः बाल्यवार्द्धकास्तमयाभावे अक्षयेऽनधिके च मासि ज्योतिःशास्त्रोक्तप्रशस्ततिथिवारलग्नेषु शुभमुहूर्ते दिन एव न तु रात्रौ कार्यम् । तत्र मातृपूजापूर्वकमाभ्युदयिकश्राद्धम् । कुमारस्य हरिद्रालापनादिमङ्गलकरणम् । ततो ब्राह्मणत्रयभोजनम् । ततः सङ्कल्पः । देशकालौ स्मृत्वा कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणेन बलायुर्वर्चोऽभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं चूडाकरणाख्यं कर्म करिष्य इति सङ्कल्पः । ततो बहिःशालायां पञ्च भूसंस्कारान् कृत्वा लौकिकाग्नेः स्थापनम् । ततो माता कुमारं स्नापयित्वाऽहते वाससी परिधाप्योत्सङ्गे कृत्वा पश्चादग्नेरुपविशति । ततो वैकल्पिकावधारणम् । ब्रह्मणो गमनादिपूर्ववदवधारणम् । घृतपिण्डप्रासनम् । सकेशगोमयपिण्डस्योदकान्ते प्रासनम् । इत्यवधारणम् । ततो ब्रह्मोपवेशनाद्याज्यभागान्ते विशेषः । नात्र चरुः । उपकल्पनीयानि–शीतोदकम् । उष्णोदकम् । नवनीतपिण्डघृतपिण्डदधिपिण्डानां मध्येऽवधारितान्यतमम् । त्र्येणी शलली । सप्तविंशतिकुशतरुणानि । ताम्रपरिष्कृत आयसः क्षुरः । आनडुहगोमयपिण्डः । नापितो वरश्चेति । आज्यभागानन्तरं महाव्याहृत्यादिप्राजापत्यान्ता नवाहुतयः । ततः स्विष्टकृत् । ततः संस्रवप्राशनादि ब्रह्मणे पूर्णपात्रवरयोरन्यतरदानान्तम् । ततः शीतोदके उष्णोदकस्य निनयनम् "उष्णेन वाय उदकेनेह्यदिते केशान्वप" इति। उष्णोदकमिश्रितास्वप्सु नवनीतघृतदधिपिण्डानामन्यतमप्रासनम् । अतः प्रभृत्यनेनैवोदकेनोन्दनं कार्यं सर्वत्र । उदकमादाय दक्षिणं गोदानमुन्दति **सवित्रा प्रसूता**इति । ततस्त्र्येण्या शलल्या विनयनम् । त्रयाणां कुशतरुणानामन्तर्द्धान**मोषधे त्रायस्व**इति । **शिवो नामे**ति क्षुरादानम् । **निवर्तयामी**ति कुशतरुणान्तर्हितेषु केशेषु क्षुरनिधानम् । ततो **येनावपत्सविते**ति सकेशानि कुशतरुणानि प्रच्छिद्यानडुहे गोमयपिण्डे उत्तरतो ध्रियमाणे प्रक्षिपति । ततस्तस्मिन्नेव दक्षिणगोदाने एवमेवापरं वारद्वयं तूष्णीं कर्म कर्तव्यम् । तत्रैवं पदार्थाः । उदकमादायोन्दनम् । त्र्येण्या शलल्या विनयनम् । त्रयाणां कुशतरुणानामन्तर्द्धानम् । क्षुराभिनिधानम् । सकेशानां कुशतरुणानां छेदनम् । गोमयपिण्डे प्रासनम् । दक्षिणगोदानवदेवोन्दनादि पिण्डे प्रासनान्तं पश्चिमोत्तरयोर्गोदानयोः सकृत्समन्त्रकं, द्विस्तूष्णीं कर्म कुर्यात् । एतावान्विशेषः । पश्चिमगोदाने **त्र्यायुषमि**ति छेदनम्, न तु **येनावपदि**ति । उत्तरगोदाने "येन भूरिश्चरा दिवम्" इति मन्त्रेणैव छेदनम् । ततो **यत्क्षुरेणे**ति शिरसः समन्तात्प्रदक्षिणं क्षुरं भ्रामयति सकृन्मन्त्रेण, द्विस्तूष्णीम् । ततस्ताभिरेवाद्भिः शिरस उन्दनम् । नापिताय क्षुरसमर्पणं **अक्षण्वन्परिवपे**ति । यथामङ्गलं शिखास्थापनं नापितः करोति । ततः सकेशं गोमयपिण्डम् अनुगुप्तं पल्वले गोष्ठे वा उदकान्ते वा निदधाति । ततश्चूडाकरणकर्ता स्वाचार्याय वरं ददाति । **यज्ञपार्श्वो**क्तं दशब्राह्मणभोजनम् । अत्र भोजने प्रायश्चित्तमुक्तम्, **पराशरमाधवीये**–"निर्वृत्ते चूडहोमे तु प्राङ् नामकरणात्तथा । चरेत्सान्तपनं भुक्त्वा जातकर्माणि चैव हि ॥ अतोऽन्येषु तु संस्कारेषूपवासेन शुद्ध्यति ।" इति **चूडाकर्मणि पदार्थक्रमः** । अथ **केशान्ते पदार्थक्रमः** । कालश्चूडाकरणोक्तो ज्ञेयः । सप्तदशे वर्षे इदं कार्यम् । लौकिकेऽग्नौ । आरम्भनिमित्तं मातृपूजापूर्वकं नान्दीश्राद्धं देशकालौ स्मृत्वा केशान्तकर्म करिष्य इति सङ्कल्पः । ब्राह्मणत्रयभोजनादि परिशिष्टोक्तब्राह्मणभोजनान्तं चूडाकरणवत् । इयांस्तु विशेषः । उष्णोदकसेकमन्त्रे "उष्णेन वाय उदकेनेह्यदिते केशश्मश्रू वप"। इति । क्षुरपरिग्रहणमन्त्रे च यत्क्षु० **प्रमोषीर्मुख**मिति मुखसहितं शिरः परिहरति । वरस्थाने आचार्याय गोदानं संवत्सरं ब्रह्मचर्यमित्यादि यथोक्तम् । इति केशान्तः । एतानि जातकर्मादिचूडाकरणान्तानि कर्माणि कुमार्या अमन्त्रकाणि कार्याणि । तत्र

होमस्तु समन्त्रकः । तदुक्तं **कारिकायाम्**—"जातकर्मादिकाः स्त्रीणां चूडाकर्मान्तिकाः क्रियाः । तूष्णीं होमे तु मन्त्रः स्यादिति **गोभिलभाषितम्** ॥" होमस्तु समन्त्रक इति प्रयोगपारिजाते । **याज्ञवल्क्यः**—"तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः" इति । अथ **शूद्रस्य संस्काराः** । **मनुः**—"शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः । न केनचित्समसृजच्छन्दसा तं प्रजापतिः ॥" छन्दसा मन्त्रेण । **व्यासः**—"गर्भाधानं पुंसवनं सीमन्तो जातकर्म च । नामक्रिया निष्क्रमोऽन्नप्राशनं वपनक्रिया ॥ कर्णवेधो व्रतादेशो वेदारम्भाक्रियाविधिः । केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः ॥ त्रेताऽग्निसङ्ग्रहश्चैव संस्काराः षोडश स्मृताः ॥" इत्युक्त्वाऽऽह—"नवैताः कर्णवेधान्ता मन्त्रवर्जं क्रियाः स्त्रियाः । विवाहो मन्त्रतस्तस्याः शूद्रस्यामन्त्रतो दश ॥" इति **यमब्रह्मपुराणवचनाभ्याम्** शूद्रस्य "गर्भाधानपुंसवनसीमन्तजातकर्मनामधेयनिष्क्रमणान्नप्राशनचूडाकरणविवाहान्ता नव संस्कारा विहितास्ते च तूष्णीम्" इति **हरिहरभाष्ये** । **शार्ङ्गधरस्तु**—"द्विजानां षोडशैव स्युः शूद्राणां द्वादशैव हि । पञ्चैव मिश्रजातीनां संस्काराः कुलधर्मतः ॥ वेदव्रतोपनयनं महानाम्नी महाव्रतम् । विना द्वादश शूद्राणां संस्कारा नाममन्त्रतः" इत्याह । **ब्रह्मपुराणे** तु—"विवाहमात्रं संस्कारं शूद्रोऽपि लभतां सदा" इति । अत्र सदसच्छूद्रविषयत्वेन व्यवस्था । सच्छूद्रस्य द्वादश । असच्छूद्रस्य विवाहमात्रम् । एते च तूष्णीं कार्याः । तथा च **व्यासः** । "शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति । वेदमन्त्रं स्वधास्वाहावषट्कारादिभिर्विना" इति । **मरीचिः**—"अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते" इति । तेन शूद्रधर्मेषु सर्वत्र विप्रेण मन्त्रः पठनीयः । सोऽपि पौराण एवेति **शूलपाणिः** । एवं "शूद्रकर्तृहोमो विप्रद्वारैव" **पराशरेणोक्तः**—"दक्षिणार्थं तु यो विप्रः शूद्रस्य जुहुयाद्धविः । ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेत् ॥" अत्र **माधवाचार्यैर्व्याख्यातम्** । यो विप्रः शूद्रदक्षिणामादाय तदीयं हविः शान्तिपुष्ट्यादिसिद्धये वैदिकैर्मन्त्रैर्जुहोति तस्य विप्रस्यैव दोषः । शूद्रस्तु होमफलं लभत एवेति । शूद्रस्य यत्र यत्र होमस्तत्र तत्र लौकिकाग्नावेव मन्त्रान्तराविधानात् । "नमस्कारमन्त्रेण" इति **मदनपारिजाते** । शूद्रस्य विवाहहोमाभावश्च तत्रैवोक्तः तच्चिन्त्यम् । **अथानुपनीतधर्माः**।-"**गौतमः**—"प्रागुपनयनात्कामचारवादभक्षाः । नित्यं मद्यं ब्राह्मणोऽनुपनीतो वर्जयेत् । उच्छिष्टतादावप्रयतमनस्को महापातकवर्जम्" **ब्रह्मपुराणे**—"मातापित्रोरथोच्छिष्टं बालो भुञ्जन् भवेत्सुखी" इति। **वृद्धशातातपः**—शिशोरभ्युक्षणं प्रोक्त बालस्याचमनं स्मृतम् । रजस्वलादिसंस्पर्शे स्नानमेव कुमारके ॥ प्राक्चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः । कुमारस्तु स विज्ञेयो यावन्मौञ्जीनिबन्धनम् ॥" तस्यानुपनीतस्य चण्डालादिस्पृष्टस्यापि स्पर्शनान्न स्नानम् । इदं च षष्ठवर्षात्प्राक् । ऊर्ध्वं तु भवत्येव । "बालस्य पञ्चमाद्वर्षाद्रक्षार्थं शौचमाचरेत्" इति स्मृतेः । कामचारादिकेऽप्येवम् । "ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च । चरेद्गुरुः सुहृच्चैव प्रायश्चित्तं विशुद्धये ॥" इति स्मृतेः । अथ **गर्गमते पदार्थक्रमः** । आभ्युदयिकम् । ब्राह्मणत्रयभोजनम् । बहिःशालायां लौकिकाग्नेः स्थापनम् । माता कुमारमादायेत्यादि यथोक्तम् । ततो ब्रह्मासनादिदक्षिणादानान्ते विशेषः । बर्हिरासादनानन्तरमुष्णोदकम् । शीतोदकम् । नवनीतघृतदधिपिण्डानामन्यतमः पिण्डः । त्र्येणी शलली । कुशपवित्राणि सप्तविंशतिः । क्षुरः । गोमयम् । नापितः । वरः । इत्यासादनम् । नोपकल्पनम् । ततो दक्षिणादानान्तं कर्म कृत्वा शीतासु उष्णा अप आसिञ्चति । नवनीतादीनामन्यतमप्रासनं, तत्र उन्दनम्। तूष्णीं विनयनम् । कुशतरुणान्तर्द्धानम् । क्षुरादानम् । **त्र्यायुषम्, येनावपदिति** मन्त्रद्वयेन कुशतरुणान्तर्हितेषु केशेषु क्षुरमभिनिधाय सकेशानि तृणानि प्रच्छिद्यानडुहे गोमयपिण्डे प्रासनम् । एवं तूष्णीमुन्दनानि द्विरपरं क्षुरादानवर्जम्। ततः पश्चिमगोदाने एवं सकृन्मन्त्रेण, द्विस्तूष्णीम्।**त्र्यायुषमिति** छेदनमन्त्रे विशेषः।अथोत्तरगोदानेएवमेव सकृन्मन्त्रेण, द्विस्तूष्णीम् । "येन भूरिश्चरा"इति छेदने विशेषः । शिरःपरिहरणम् । शिरःसमुन्दनम् । क्षुरसमर्पणम् । शिखास्थापनम् । गोष्ठाद्यन्यतमान्ते गोमयपिण्डनिधानम् । आचार्याय वरदानम् । इति **गर्गमते पदार्थक्रमः** ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपतिश्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे **चूडाकरणपदार्थक्रमः** ॥ * ॥ * ॥

विश्व०—क्रमाकृष्टमाद्यं क्षौरविधिं सूत्रयंस्तत्समयमाह—**सांवत्सरिकस्य चूडाकरणम्**—अतिक्रान्तसंवत्सरस्येत्यर्थः । **तृतीये वाऽप्रतिहते**—अपूर्णे तृतीये वर्षे इत्यर्थः । चूडाकरणकेशान्तयोः समानजातीयकर्तव्यतासाम्यत्वेन ग्रन्थप्राचुर्यमपनेतुमसमाप्यैव चूडाकरणकर्तव्यतां सूत्रकृत्सूत्रयाति केशान्तविधिम्-**षोडशवर्षस्य केशान्तः**-षोडशवर्षस्य केशान्तकर्म, भवतीति सूत्रशेषः । **यथामङ्गलं वा सर्वेषाम्**—ब्राह्मणक्षत्रियविशां यथामङ्गलं यथाकुलाचारं

चूडाकरणाख्यं कर्म कर्तव्यमित्यर्थः। न चान्वयः क्रियान्वयः केशान्तेऽपि स्यादिति वाच्यम्, "चूडा कार्या यथाकुलम्" इत्यादिवाक्यैश्चूडायामेव तदन्वयात्। अतः केशान्तः षोडशे एव। नच चूडाकरणकर्तव्यतान्तर्गतकर्तव्यताकत्वेन चूडाकर्मवत्केशान्तकर्मणोऽपि विवाहप्राक्कालकर्तव्यताकत्वेन षोडशाब्दरूपनियतसमयकर्तव्यताकत्वाभ्युपगमे केशान्तस्य स्वसमयप्राक्काले विवाहप्रतिबन्धकत्वापत्तिरिति चेत् न, "संवत्सरं ब्रह्मचर्यम्" इत्यादिना कृच्छ्रब्रह्मचारिण एव ब्रह्मचर्यकर्तव्यताबोधकशास्त्रस्याऽप्रामाण्यापत्तेर्न प्रतिबन्धकत्वम्। समयमभिधाय कर्तव्यतामाह—**ब्राह्मणा...पविशति**—तत्र पुण्येऽहनि वैश्वदेवपूर्वकं मातृपूजाभ्युदयिके विधाय चूडाकरणाङ्गतया प्रयोगपूर्वकं संपन्नेनान्नेन संतर्प्य संस्कारत्रयसंस्कृतायां भुवि लौकिकाग्निं स्थाप्य, जननी चूडाकरणार्हं पुत्रमादाय स्नापयित्वा अहते वस्त्रे परिधाप्याङ्के उत्सङ्गे संस्थाप्याग्नेः पश्चिमत उपविशति। **अन्वार...नान्ते**—ब्रह्मासनादिप्राशनान्ते दक्षिणादानान्त इत्यर्थः। तत्र विशेषः पात्रासादने। शीतोष्णोदके, नवनीतघृतदध्याद्यन्यतमम्, त्रिगुणानि त्रीणि कुशतृणान्येकैकगोदानाय तथाच गोदानत्रयार्थे सप्तविंशतिः, ताम्रखचितः क्षुरः, आनडुहं गोमयम्, नापितश्च, वरश्च। ततः पवित्रकरणादिपर्युक्षणान्ते कुमारान्वारब्ध आघारादिचतुर्दशाहुतीर्हुत्वा संस्रवं प्राश्य दक्षिणां दद्यात्। **शीतास्व...न्वपेति**—शीतोदके उष्णोदकासेकः। मन्त्रार्थः—हे वायो हे अदिते एहि आगच्छ। उष्णेन उदकेनार्द्रीकृतान् केशान्वप छिन्धि। अस्य परमेष्ठी ऋषिः प्रतिष्ठा वाय्वदिती उदकासेके। केचित्तु उष्णे शीतोदकासेकः। तन्मते मन्त्राभावः। उष्णेनेति न मन्त्रावयव इत्याहुः। केशान्ते मन्त्राध्याहारमाह—**केशश्मश्र्विति च केशान्ते**—केशानित्यत्र केशश्मश्रु वपेत्यध्याहर्तव्यमित्यर्थः। **अथात्र...प्रास्यति**—अत्र शीतोष्णोदके। **तत आदा...स इति**—तस्माद्दुदकमादाय प्राक्शिरस उदीच्याभिमुखं शयानस्य पृथिव्यां दीयमानं शिरोदेशमुन्दाति क्लेदयति, "उन्दी क्लेदने" **सवित्रा** इति मन्त्रेण। अस्यान्वयः। सूर्येणोत्पादिता आपः तव चूडाख्यमङ्गमुन्दन्तु क्लेदयन्तु। किंभूता दिवि भवाः, किमर्थं दीर्घायुत्वाय चिरकालं निर्दुष्टजीवनाय, वर्चसे प्रतापाय ऐश्वर्याय वा। **त्रेण्या...षध इति**—त्रेण्या त्रिःश्वेतया शलल्या शल्यकपक्षकण्टकेन विनीय उन्दितगोदानतृतीयांशं पृथक्कृत्य त्रीणि कुशतृणान्यन्तर्दधात्योषधे **त्रायस्वे**त्येतावता मन्त्रेण। **शिवो...यथासदिति शिवो नामेत्यादिना हिꣳसीरि**त्यन्तेन मन्त्रेण ताम्रयुक्तं क्षुरमादाय **निवर्तयामि येनावपदिति**—मन्त्राभ्यां प्रवपनम्। 'काकाक्षिगोलकन्यायेन' मन्त्रयोरन्तरे वर्तमानस्य प्रवपतेर्मन्त्रयोरन्वयः। नचोत्तरानर्थक्यशङ्कया पूर्वस्याभिनिधानार्थतेति वाच्यम्, अनर्थत्वात्। नचोपसर्गबलात्तथा धात्वर्थ इति वाच्यम्, **कात्यायन**-पञ्चमाध्यायस्थे निवर्तयामीति प्रवपतीत्यस्मिन्सूत्रे तथैव कल्पनापत्तेः। किंचेच्छागोचरीभूतार्थस्योपसर्गबललभ्यत्वे एकेनैवानेकार्थलाभादितरव्यर्थतापत्तेश्च। नचान्यथानुपपत्त्यैवमिति वाच्यम्, अन्यथोपपत्तेर्दर्शितत्वादिति दिक्। सौत्रत्वान्मन्त्रान्वयः—हे ब्रह्माणः ब्राह्मणाः येन कारणेन क्षुरेण वा सविता प्रसविता पिता आदित्यो वा राज्ञः सोमस्य वरुणस्य च शिरः अवपत् राजसूयदीक्षायै अमुण्डयत्। किंभूतः विद्वान्सर्वज्ञः तेन कारणेन क्षुरेण वाऽस्य कुमारस्येदं शिरो यूयं वपत मुण्डयत। यथायं कुमार आयुष्मान् दीर्घायुः जरदष्टिः सुपरिणतवपुश्च सत् स्यात्। अस्यालम्बायनः पङ्क्तिः सविता वपने०। **सकेशानि...माणे**—केशसहितानि कुशतृणानि। **एवं द्विरपरं तूष्णीम्**—एवमेव दक्षिणगोदानस्य द्वितीये तृतीये च तृतीयांशरूपे केशभागे अधिवासनाहानि पृथग्बद्धे क्रमेणापरं वारद्वयमुन्दनकेशविनयनकुशतृणान्तर्धानसतृणकेशप्रच्छेदनोदगवस्थितानडुहगोमयपिण्डप्रक्षेपान्तं तूष्णीं कुर्यादित्यर्थः। जातत्वात् क्षुरादानानिवृत्तिः। **इतरयोश्चोन्दनादि**—इतरयोः पश्चिमोत्तरयोर्गोदानयोः सकृत्समन्त्रकं द्विस्तूष्णीमित्यनुकर्षणार्थश्चकारः। किं तदित्याह—**उन्दनादि**। पाश्चात्यगोदाने प्रवपने द्वितीयमन्त्रस्थानापन्नं मन्त्रान्तरमाह—**अथ पश्चा...स्वस्तय इति**—उत्तरगोदानेऽपि निवर्तयामीति मन्त्रानन्तरं द्वितीयोऽयं प्रवपनमन्त्रो **येनभूरिश्चरादिवमिति**। अस्यान्वयः—हे कुमार येन ब्रह्मणा मन्त्रेण तपसा वा चरा चरणशीलो वायुः ज्योक् चिरमाकल्पमित्यर्थः। दिवं द्यां पश्चात् तामनुसूर्यं तमनु विश्वं च चरति। किंभूतः भूरिः प्रचुरः तेन ब्रह्मणा तपसा वा तन्मन्त्रितक्षुरेण वा ते तव शिरो वपामि। किमर्थं, जीवातवे जीवनहेतवे धर्माद्यर्थं, जीवनायायुषे सुश्लोक्याय शोभनयशसे स्वस्तये मङ्गलाय। अस्य वामदेवो यजुः क्षुरः केशच्छेदने। **त्रिक्षु...हरति**—प्रदक्षिणं यथा स्यात्तथा शिरसि परितः सर्वतः हरति भ्रामयति। किमित्यत उक्तं क्षुरेणेति द्वितीयार्थे तृतीया। सकृदसकृद्वेत्याशङ्क्याह त्रिरिति। शिरसि त्रिवारं प्रदक्षिणं भ्रामयतीत्यर्थः। केशान्ते विशेषमाह—**समुखं केशान्ते**—तूष्णीं मन्त्रेण वेत्याकाङ्क्षायामाह—**यत्क्षुरे...मोषीरिति**—अस्यान्वयः—हे क्षुर अस्य कुमारस्य केशान् छिन्धि मुण्डय। **सत्** यस्माद्वप्त्रा क्षुरेण नापितः वपति मुण्डयति किंभूतेन संस्कार्यं कुमारं मज्जयता संस्कुर्वता तथा सुपेशसा शोभयता, वाशब्दश्चार्थे। शिरः आयुश्च मा प्रमोषीः मा मुषाण मा चोरय। "मुष स्तेये" अस्य वामदेवो यजुः क्षुरः भ्रामणे०। केशान्ते त्वस्याऽध्याहारमाह—**मुखमिति च केशान्ते**—शिरोमुखं माऽस्यायुः प्रमोषीरित्येवं केशान्तेऽध्याहरणीयो मन्त्रः। **ताभि...वपेति**—समुद्य क्लेदयित्वा। अक्षण्वन् क्षतमकुर्वन्परिवप परितो वप मुण्डयेत्यर्थः। अस्य वामदेवो यजुः नापितः क्षुरदाने०। **यथा...रणम्**—पञ्चशिखाः, तिस्रः शिखाः, एका वा, मुण्डो वेत्यादि यथाकुलाचारं कर्तव्यमित्यर्थः। **अनु...**

दाति एतमानडुहं गोमयपिण्डं किंभूतं सकेशं केशैः सहितमनुगुप्तं सुरक्षितं यथा भवति तथा गोभिरुपलक्षितभुवि क्षुद्रतडागे उदकसमीपे वा संस्थाप्य कुलाचार्याय वरमभिलषितं ददातीत्यर्थः । अनेन वर्हिर्होमान्ता कर्मसमाप्तिर्वरदाननोपलक्षिता । केशान्ते विशेषमाह–**गां केशान्ते**–ददातीति शेषः । **संव...शान्ते**–यद्यपि चूडासंस्कार्यस्याऽप्राप्तिरर्थात्तथापि स्पष्टार्थं **केशान्त** इत्युक्तम् । अवपनस्य कर्माङ्गतानिर्देशार्थं वा । **द्वाद...ततः**–अशक्त्यपेक्षाः पक्षाः । आद्या कण्डिका ॥ १ ॥

अष्टवर्षं ब्राह्मणमुपनयेद्गर्भाष्टमे वा ॥ १ ॥ एकादशवर्षꣳ राजन्यम् ॥ २ ॥ द्वादशवर्षं वैश्यम् ॥ ३ ॥ यथामङ्गलं वा सर्वेषाम् ॥ ४ ॥ ब्राह्मणान्भोजयेत्तं च पर्युप्तशिरसमलङ्कृतमानयन्ति ॥ ५ ॥ पश्चादग्नेरवस्थाप्य ब्रह्मचर्यमागामिति वाचयति ब्रह्मचार्यसानीति च ॥ ६ ॥ अथैनं वासः परिधापयति येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतम् । तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चस इति ॥ ७ ॥ मेखलां बध्नीते । इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात् । प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयमिति ॥ ८ ॥ युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त इति वा ॥ ९ ॥ तूष्णीं वा ॥ १० ॥ (यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः । यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामीत्यथाजिनं प्रयच्छति 'मित्रस्य चक्षुर्द्धरुणं बलीयस्तेजो यशस्वि स्थविरꣳ समिद्धम्.अनाहनस्यं वसनं जरिष्णुः परीदं वाज्यजिनं दधेऽहमिति) दण्डं प्रयच्छति ॥ ११ ॥ तं प्रतिगृह्णाति “यो मे दण्डः परापतद्वैहायसोऽधिभूम्यां तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसायेति” ॥ १२ ॥ दीक्षावदेके दीर्घसत्रमुपैतीति वचनात् ॥ १३ ॥ अथास्याद्भिरञ्जलिनाऽञ्जलिं पूरयति आपोहिष्ठेति तिसृभिः ॥ १४ ॥ अथैनꣳ सूर्यमुदीक्षयति तच्चक्षुरिति ॥ १५ ॥ अथास्य दक्षिणाꣳसमधि हृदयमालभते । मम व्रते ते हृदयं दधामि । मम चित्तमनुचित्तं ते अस्तु मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति ॥१६॥ अथास्य दक्षिणꣳ हस्तं गृहीत्वाह को नामासीति ॥ १७ ॥ असावहं भो ३ इति प्रत्याह ॥ १८॥ अथैनमाह कस्य ब्रह्मचार्यसीति ॥ १९ ॥ भवत इत्युच्यमान इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासाविति ॥२०॥ अथैनं भूतेभ्यः परिददाति प्रजापतये त्वा परिददामि देवाय त्वा सावित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्या इति ॥ २१ ॥ २ ॥

कर्कः–अष्टवर्षं ब्राह्मणमुपनयेत्–उपनयनसंस्कारं कुर्यादष्टमे वर्षे । गर्भाष्टमे वा–गर्भसहितं वर्षं गर्भशब्देन साहचर्यादभिधीयते । तथाच गौतमः–गर्भादिसङ्ख्यवर्षाणा-

मिति वाशब्दो विकल्पार्थः ।**एकादशवर्षꣳ राजन्यम्–द्वादशवर्षं वैश्यम्–उपनयेत्** । **यथामङ्गलं वा सर्वेषाम्**–सर्वेषां ब्राह्मणादीनां यथामङ्गलं वा भवति । मङ्गलशब्दः शास्त्रान्तरवाची । यथा पञ्चमे नवमे वा कार्यमित्येवमादि । **ब्राह्मणान्भोजयेत्तं च**–श्राद्धव्यतिरिक्तान् ब्राह्मणान्भोजयेत् । तं चेति कुमारोऽभिधीयते । **पर्युप्तशिरसमलंकृतमानयन्ति**–परिपूर्वस्य वपतेः कृतसम्प्रसारणस्यैतद्रूपम् । पर्युप्तं शिरोऽस्येति पर्युप्तशिराः तं पर्युप्तशिरसम् । अलंकृतं स्रङ्मालादिना । आनयन्ति ये तदाचार्येणोपनीताः, शिरसश्च परिवपनं भोजनात्पूर्वमेव कर्तव्यम् । नेदानीं तदुपदेशो भूतकालनिर्देशात् । **पश्चादग्नेरवस्थाप्य ब्रह्मचर्यमागामिति वाचयति**–अग्नेः पश्चात्कुमारमवस्थाप्य ब्रह्मचर्यमागामिति ब्रूहीत्येवं वाचयत्याचार्यः । **ब्रह्मचार्यसानीति च** । चशब्दाद्वाचयति । **अथैनं वासः परिधापयति येनेन्द्रायेत्यनेन मन्त्रेण** । **मेखलां बध्नीत इयं दुरुक्तमिति-मन्त्रेण युवा सुवासा**--इत्यनेन मन्त्रेण वा । तूष्णीं वा मेखलां बध्नीते । अस्मिन्नवसरे प्रसिद्ध्या यज्ञोपवीतमेवेच्छन्ति । अथ तूष्णीमैणेयमुत्तरीयमजिनं करोति । **दण्डं प्रयच्छाति तं प्रतिगृह्णाति यो मे दण्ड–इति** । प्रयच्छत्याचार्यः । कुमारः प्रतिगृह्णाति । **दीक्षावदेके दीर्घसत्रमुपैतीति वचनात्**--दीक्षावदेके आचार्याः दण्डं प्रतिग्रहीतुमिच्छन्ति । कुत एतत् । दीर्घसत्रमुपैतीति वचनात् । दीर्घसत्रं वा एष उपैति यो ब्रह्मचर्यमुपैतीति वचनात् । दण्डप्रतिग्रहणसामान्याद्दीर्घसत्रताऽस्योक्ता । यद्येवं न दीक्षावत्प्रतिग्रहणं स्मरणाभावात् । या अत्र दीर्घसत्रसंस्तुतिः सा दीर्घकालसामान्यात् । **अथास्याद्भिरञ्जलिनाऽञ्जलिं पूरयति आपोहिष्ठेति तिसृभिः**--अथास्य कुमारस्याञ्जलिं पूरयत्यद्भिराचार्यः । स्वेनाञ्जलिना आदाय आपोहिष्ठेति तिसृभिर्ऋग्भिः । **अथैनꣳ सूर्यमुदीक्षयति तच्चक्षुरिति**–इत्यनेन मन्त्रेणावेक्षते । सूर्यमुदीक्षस्वेत्याचार्यप्रैषः । **अथास्य दक्षिणाꣳसमधिहृदयमालभते**–“मम व्रते ते” इत्याचार्यः । अथास्य दक्षिणꣳहस्तं गृहीत्वाऽऽह को नामासीत्याचार्यः । असावहंभो इति प्रत्याह–कुमारः । अथैनमाह-कस्य ब्रह्मचार्यसीत्याचार्य एव । भवत इत्युच्यमाने कुमारेण । इन्द्रस्य ब्रह्मचार्यसीत्यमुं मन्त्रमाहाचार्यः । असाविति नामादेशः । **अथैनं भूतेभ्यः परिददाति प्रजापतये त्वा परिददामीत्यनेन मन्त्रेण** ॥ २ ॥ * ॥

जय०–अष्टवर्षमुपनयेत्–उपनयनाख्यसंस्कारेण संस्कुर्यात् अष्टमे वर्षे, गर्भसहचरितं वर्षं गर्भशब्देनाभिधीयते । साहचर्यात् । तथाच **गौतमः**। गर्भादिसङ्ख्या वर्षाणामिति वाशब्दो विकल्पार्थः । एकादशवर्षमित्यादौ उपनयेदित्यनुषज्यते। **यथेति**–सर्वेषां ब्राह्मणादीनां यथामङ्गलं शास्त्रान्तरविहितकालान्तरकृतमुपनयनं भवति, यथा–पञ्चमे, षष्ठे, नवमे वा कार्यमिति । ब्राह्मणान् श्राद्धव्यतिरिक्तान् त्रिप्रभृतीन् भोजयेत् । तं च कुमारं पर्युप्तशिरसं मुण्डितमुण्डं भोजयेत् । परिपूर्वो वपतिर्मुण्डने । शिरसश्च वपनं भोजनात्प्रागेव भवति । भूतकालनिर्देशात् । अलङ्कृतं स्रगादिना तेनाचार्येणोपनीता एनमाचार्यसमीपमानयन्ति । आचार्यश्च तमग्नेः पश्चात्स्वस्य च दक्षिणतोऽवस्थाप्य ब्रह्मचर्यमागामिति ब्रूहीति वाचयति । ब्रह्मचार्यसानीति ब्रूहीति वाचयति, चशब्दात् माणवकश्च प्राङ्मुखस्तिष्ठंस्तथैव ब्रूयात् । अथाचार्य एनं कुमारं वासोऽहतं परिधापयति । **येनेन्द्रायेति**–मन्त्रेण स्वयम्पठितेन । अस्यार्थः । तत्राङ्गिरा बृहती बृहस्पतिर्वासःपरिधापने०। हे कुमार येन विधिना इन्द्राय इन्द्रं संस्कर्तुं बृहस्पतिः सुराचार्यो वासः पर्यदधात्

परिधापितवान्।किम्भूतम् । अमृतम् अहतम् तेन विधिना त्वा त्वां माणवकं परिदधामि परिधापयामि।उभयत्रान्तर्भूतो णिच् ज्ञेयः। परिधापयतीति सूत्रितत्वात् ।यद्वा इन्द्राय पर्यदधात् । इन्द्रे अव्यवच्छिन्नं स्थापितवान्। तथा त्वा त्वां लक्ष्यीकृत्य परिदधामि त्वयि अव्यवच्छेदेन धारयामीति । प्रयोजनमाह—दीर्घायुत्वाय तव चिरजीवनाय, आयुः उकारान्तोऽप्यस्ति। बलाय देहशक्तये वर्चसे इन्द्रियशक्तये ऐश्वर्याय वेति । अथाचार्यो माणवककट्यां मेखलां बध्नीते । **इयं दुरुक्तमिति**-मन्त्रेण माणवकपठितेन मन्त्रलिङ्गात् । अस्यार्थः । तत्र वामदेवस्त्रिष्टुप् मेखला तद्बन्धने० । इयमितीदंशब्द आद्यन्तयोर्वाक्यालङ्कारार्थः । इयं मेखला मां अगात् आगता । किं कुर्वती । दुरुक्तमित्युपलक्षणम्, तेन कामचारवादभक्षणात् तज्जातं वाऽपावित्र्यं परितो बाधमाना अपसारयन्ती । वर्णं वर्णत्वम् पवित्रं शुद्धम् पुनती सत्कुर्वती । मे मम प्राणापानाभ्यां तयोर्बलं सामर्थ्यम् आदधाना स्थापयन्ती स्वसा स्वसृवत् हिता देवी दीप्तिदात्री सुभगा सौभाग्यप्रदा । **युवा सुवासा**—इत्यनेन वा । अस्यार्थः । तत्राङ्गिरा बृहती बृहस्पतिः परिधाने० । यौति गुणानेकीकरोतीति युवा, सुवासाः शोभनवस्त्रः, अहतं शोभनमुच्यते। तच्च—“ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् । अहतं तद्विजानीयात्सर्वकर्मसु पावनम्” इति। यत्तूक्तम् । “अहतं यन्त्रनिर्मुक्तमुक्तं वासः स्वयम्भुवा । स्वच्छं तन्माङ्गलिकेषु तावत्कालं न सर्वदा” इति । तद्विवाहादिविषयमिति व्यवस्था । परिवीतः माल्याभरणैरलङ्कृतः य एवंभूतो मेखलार्थमागात् आगतः । उ वितर्के । स यदि जायमानः श्रेयान् शुद्धः स्यात् । धीरासः स्थिरप्रजाः, कवयः क्रान्तदर्शनाः, स्वाध्यः शोभनचित्तवृत्तयः तं बटुमुन्नयन्ति उत्कर्षं गमयन्ति । किं कुर्वन्तः मनसा मनोवृत्त्या देवयन्तः वेदार्थं ज्ञापयन्तः । तूष्णीं वा मेखलाबन्धनम् । अत्रावसरे यज्ञोपवीताजिने भवत आचारात् । तत्र चाविरोधित्वादुपशाखान्तरीयोऽपि मन्त्रो गृह्यते । ततश्चाचार्यो माणवकायोपवीतं ददाति । **स च तत्प्रतिगृह्य परिधत्ते । यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेज**—इति मन्त्रेण। अस्यार्थः । तत्र प्रजापतिस्त्रिष्टुप् लिङ्गो यज्ञोपवीतपरिधाने० । हे आचार्य इदं ब्रह्मसूत्रमहं प्रतिमुञ्च प्रतिमुञ्चानि बध्नानीत्यर्थः। प्रतिपूर्वो मुञ्चतिर्बन्धनार्थः । पुरुषव्यत्ययश्छान्दसः । किम्भूतं यज्ञोपवीतम् । यज्ञेन प्रजापतिना यज्ञाय वेदोक्तकर्माधिकारायेति वा । उपवीतं रचितम् परमम् पर आत्मा मीयते ज्ञाप्यते तेन, वाक्योपदेशाधिकारित्वात् । पवित्रं शोधकम् । प्रजापतेर्ब्रह्मणः सहजं स्वभावशुद्धम् । पुरस्तात्प्राग्भवम्, अत इदम् आयुषे हितम् आयुष्यम् अस्तु । अग्र्यं मुख्यम् । अनुपहतम् शुभ्रं निर्मलीकरणम् । बलं धर्मसामर्थ्यप्रदम् । तेजः प्रभावप्रदम् । अस्यात्रानुक्तिः **कात्यायन**परिभाषितत्वात् । परिभाषा च—“वचनात् अन्यच्छेषमितरे यथाख्यमुपवीतिनः” इति। अजिनं तु एण्या एवाखण्डं तूष्णीम् । अथाचार्योऽस्मै दण्डं प्रयच्छति । माणवकश्च प्रतिगृह्णाति **यो मे दण्ड**-इति मन्त्रेण । अस्यार्थः । तत्र प्रजापतिर्यजुः दण्डः तद्ग्रहणे० । हे आचार्य यो दण्डः मे मह्यं परापतत् अभिमुखमागतः, वैहायसः आकाशे प्रसृतः, अधिभूम्याम् भूमेरुपरि वर्तमानः तं दण्डम् अहमाददे गृह्णामि । पुनर्ग्रहणात्सोमदीक्षायां यो दण्डो ग्राह्यः तमप्याददे इत्याशंसनम् । किमर्थम् । आयुषे निर्दुष्टजीवनाय ब्रह्मणे वेदग्रहणाय ब्रह्मवर्चसाय याजनाध्यापनोत्कर्षतेजसे। दीक्षावत् सोमदीक्षायां यथा तूष्णीं दण्डग्रहणं विहितं तद्वदत्रापीत्येके आचार्याः । कुतः “दीर्घसत्रं वा एष उपैतीति यो ब्रह्मचर्य्यमुपैति” इति वचनात् । दण्डप्रतिग्रहणसामान्याद्दीर्घसत्रताऽस्योक्ता । यद्येवं न दीक्षावत्प्रतिग्रहणं स्मरणाभवात् । या चात्र दीर्घसत्रसंस्कृतिः सा दीर्घकालसामान्यात् । अथाचार्योऽस्य अञ्जलिं स्वेनाञ्जलिनाऽप आदाय ताभिः पूरयत्यापोहिष्ठेति तिसृभिर्ऋग्भिः । अथैनं सूर्यमुदीक्षस्वेति प्रेषयत्याचार्यः । स च तत्प्रेषितस्तच्चक्षुरिति मन्त्रेणोदीक्षते ।

अथास्य बटोर्दक्षिणांसस्योपरि स्वदक्षिणहस्तं नीत्वाऽऽहाचार्यो **मम व्रते ते हृदयं दधामीति**–मन्त्रेण। व्याख्यातश्चायं विवाहप्रकरणे। अथास्य दक्षिणहस्तग्रहणेनाभिमुखीकरणं कृत्वाऽऽहाचार्यः। को नामासीति। ततो बटुः प्रत्याह असौ अमुकशर्माऽहमस्मि भो ३ इति। अथैनमाचार्य आह-कस्येति। भवत इति बटुनोक्ते तुष्ट आहाचार्य इन्द्रस्येति। "इदि परमैश्वर्ये" इन्द्रस्य प्रजापतेर्ब्रह्मचारी त्वमसि। तव चाग्निराचार्यः प्रथमः, द्वितीयस्तव चाहम्। हे अमुकशर्मन् ब्रह्मचारिन्। अथैनं बटुं भूतेभ्यः परितः अरिष्टयै रक्षायै ददाति गुरुः। **प्रजापतये त्वेति**–मन्त्रेण। अस्यार्थः सुगमः। तत्र प्रजापतिर्यजुर्लिङ्गोक्ता रक्षणे० ॥ २ ॥

हरि०(**अष्टवर्षं ब्राह्मणमुपनयेद्गर्भाष्टमे वा**–अष्टौ वर्षाण्यतीतानि यस्यासौ अष्टवर्षस्तं ब्राह्मणं द्विजोत्तमम् उपनयेत् उपनयनाख्येन संस्कारेण संस्कुर्यात्। गर्भाष्टमे वा, गर्भः गर्भसहचरितः शब्दः अष्टमो येषां तानि गर्भाष्टमानि तेषु अतीतेषु वा उपनयेत्। ततश्च जन्मतो नवमेऽष्टमे वा वर्षे उपनयेदित्यर्थः। **एकादशवर्षं राजन्यम्**–एकादशवर्षाण्यतीतानि यस्यासौ एकादशवर्षस्तं जन्मतो द्वादशवर्षे इत्यर्थः। राजन्यं क्षत्रियमुपनयेदित्यनुषज्यते। **द्वादशवर्षं वैश्यम्**–द्वादशवर्षाण्यतीतानि यस्यासौ तथा तं जन्मतस्त्रयोदशे वर्षे वैश्यमुपनयेत्। **यथामङ्गलं वा सर्वेषाम्**–पक्षान्तरमाह–अथवा सर्वेषां ब्राह्मणक्षत्रियविशां यथामङ्गलं यथाकुलधर्मं, यद्वा यथामङ्गलशब्देन स्मृत्यन्तरोक्तपञ्चवर्षादिकालसङ्ग्रहः। यथाह–**मनुः**–"ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे। राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे"। **आपस्तम्बो**ऽपि। अथ **काम्यानि**। सप्तमे ब्रह्मवर्चसकाममष्टमे आयुष्कामं, नवमे तेजस्कामं, दशमे अन्नाद्यकाममेकादशे इन्द्रियकामं, द्वादशे पशुकाममुपनयेत्। तथा वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदि वैश्यम्। गर्भाष्टमे वर्षे वसन्ते ब्राह्मण आत्मानमुपनाययेत्। एकादशे क्षत्रियो ग्रीष्मे। द्वादशे वैश्यो वर्षासु। वर्षाशब्देन शरदेवाभिधीयते। "ऋतुः संवत्सरो ग्रीष्मो वर्षा हेमन्तः" इति **पारस्कर**वचनाद्वर्षास्वन्तर्भवति शरत्। एवमुपनयनकालमभिधायेदानीं कर्माह–**ब्राह्मणान्भोजयेत्तं च**–त्रीन् ब्राह्मणान् भोजयेत् आशयेत्। तं च कुमारं वपनानन्तरमाशयेदिति चकारेणानुषज्यते। **पर्युप्तशिरसमलङ्कृतमानयन्ति**–परि सर्वत उप्तं मुण्डितं शिरो यस्य स पर्युप्तशिरास्तम् अलङ्कृतं यथासम्भवरत्नसुवर्णनिर्मितैः कुण्डलाद्यलङ्कारैः आनयन्ति आचार्यपुरुषाः आचार्यसमीपम्। आचार्यलक्षणं **यमेनोक्तम्**। "सत्यवाग्धृतिमान्दक्षः सर्वभूतदयापरः। आस्तिको वेदा निरतः शुचिराचार्य उच्यते॥ वेदाध्ययनसम्पन्नो वृत्तिमान्विजितेन्द्रियः। न याजयेद्वृत्तिहीनं वृणुयाच्च न तं गुरुम्॥" इति। **पश्चादग्नेरवस्थाप्य ब्रह्मचर्यमागामिति वाचयति**-तत आचार्यो माणवकम् अग्नेः पश्चिमतः आत्मनो दक्षिणतः अवस्थाप्य अवस्थितं कृत्वा ब्रह्मचर्यमागामिति ब्रूहीति प्रैषमुक्त्वा माणवकं ब्रह्मचर्यमागामिति वाचयति-**ब्रह्मचार्यसानीति च**–ब्रह्मचार्यसानीत्याचार्यो माणवकं प्रेषयति प्रेषितश्च माणवकः ब्रह्मचार्यसानीति वदेत्। **अथैनं वासः परिधापयति येनेन्द्राय बृहस्पतिरित्यादि वर्चसे**–इत्यन्तम्। अथ वाचनानन्तरमेनं कुमारम् आचार्यो वक्ष्यमाणलक्षणं शाणादिवासः परिधापयति परिहितं कारयति **येनेन्द्राये**त्यादिमन्त्रं पठित्वा। **मेखलां बध्नीते**–ततो मेखलमौञ्ज्यादिकां वक्ष्यमाणलक्षणां बध्नीते कटिप्रदेशे त्रिवृतां प्रवरसङ्ख्याग्रन्थियुतां प्रादक्षिण्येन परिवेष्टयति **इयं दुरुक्त**मित्यादिना **मेखलेय**मित्यन्तेन मन्त्रेण माणवकपठितेन। **युवा सुवासा** इत्यादि **देवयन्त** इत्यन्तेन वा मन्त्रेण मन्त्ररहितं तूष्णीं वा मेखलां बध्नीते। अत्र यद्यपि सूत्रकारेण यज्ञोपवीतधारणं न सूत्रितम् तथापि "एकवस्त्राः प्राचीनावीतिनः" इति प्रेतोदकदाने प्राचीनावीतित्वविधानात् "दण्डाजिनोपवीतानि मेखलां चैव धारयेत्" इति **याज्ञवल्क्येन** ब्रह्मचारिण उपवीतधारणस्मरणात्। तथा– सदोपवीतिना भाव्यं सदा बद्धशिखेन च। विशिखो व्युपवीतश्च

यत्करोति न तत्कृतम्'' इति **छन्दोगपरिशिष्टे कात्यायनेन** सामान्यतः सर्वाश्रमिणां सदा यज्ञोपवीतधारणस्मरणाच्च । यज्ञोपवीतधारणं तावदुपनयनप्रभृति प्राप्तम् । तच्च कुत्र कर्तव्यमित्यवसरापेक्षायामौचित्यान्मेखलाबन्धनानन्तरं युज्यत ।एतदेव **कर्कोपाध्यायवासुदेवदीक्षितरेणुदीक्षितप्रभृतयः** स्वस्वग्रन्थे यज्ञोपवीतधारणमन्त्रावसरे लिखितवन्तः। तच्च ''सर्वकर्माङ्गत्वान्मन्त्रवद्युज्यते'' इति मन्त्रमपि शाखान्तरीयं लिखितवन्तः । **यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्—आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेज इति**—माणवकपठितेन मन्त्रेण उपवीतं परिधापयति आचामयति च । अथ तूष्णीमैणेयमजिनमुत्तरीयं करोति ''मित्रस्य चक्षुः'' इति मन्त्रेणेत्यन्ते **कर्काचार्यैर**जिनधारणमेव नोक्तम् । **दण्डं प्रयच्छति तं प्रतिगृह्णाति यो मे दण्डः परापतदिति**—आचार्यो माणवकाय वक्ष्यमाणलक्षणं दण्डं प्रयच्छति तूष्णीम् । माणवकश्च तं दण्डं **यो मे दण्ड** इत्यादिना **ब्रह्मवर्चस** इत्यन्तेन मन्त्रेण प्रतिगृह्णाति । **दीक्षावदेके दीर्घसत्रमुपैतीति वचनात्**—एके आचार्या दीक्षावत् दीक्षायां यथा दण्डप्रदानं सोमे तथेच्छन्ति तत्र **उच्छ्रयस्व वनस्पते** इत्यादिना **यज्ञस्योदृच** इत्यन्तेन मन्त्रेण यजमानो दण्डम् उच्छ्रयति तद्वदत्र ब्रह्मचारी । केन हेतुना दीर्घसत्रं वा एष उपैति यो ब्रह्मचर्यमुपैतीत्यारभ्य ब्रह्मचर्यस्य दीर्घसत्रसम्पत्प्रतिपादनात् । **अथास्याद्भिरञ्जलिनाऽञ्जलिं पूरयत्यापोहिष्ठेति तिसृभिः**—अथ दण्डप्रदानानन्तरमाचार्यः। अस्य माणवकस्याञ्जलिं स्वकीयाञ्जलिस्थाभिरद्भिः **आपोहिष्ठेत्यादिकाभिस्तिसृभिर्ऋग्भिः** पूरयति । **अथैनꣳ सूर्यमुदीक्षयति तच्चक्षुरिति**—अथाञ्जलिपूरणानन्तरमेनं माणवकं सूर्यमुदीक्षस्वेत्येवं प्रेष्य सूर्यमादित्यमुदीक्षयति अवलोकनं कारयति, स च प्रेषितः **तच्चक्षुरित्यादिना भूयश्च शरदः शतादित्यन्तेन** मन्त्रेण सूर्यमुदीक्षते । **अथास्य दक्षिणाꣳसमधि हृदयमालभते मम व्रते त इति**—अथ सूर्यदर्शनानन्तरमाचार्योऽस्य माणवकस्य दक्षिणांसमधि दक्षिणस्कन्धस्योपरि स्वं दक्षिणहस्तं नीत्वा हृदयं वक्षः **मम व्रते त** इत्यादिना **बृहस्पतिष्ट्वा नियुनक्तु मह्य**मित्यन्तेन मन्त्रेण आलभते स्पृशति । **अथास्य दक्षिणं हस्तं गृहीत्वाऽऽह को नामासीति**—अथ हृदयालम्भनानन्तरमाचार्योऽस्य माणवकस्य स्वकीयेन दक्षिणहस्तेन दक्षिणहस्तं गृहीत्वा धृत्वा को नामासीत्याह—ब्रवीति। **असावहंभो इति प्रत्याह**—एवं पृष्टो माणवकः असौ अमुकशर्माऽहं भो इति प्रत्याह—प्रतिवचनं दद्यात्। **अथैनमाह कस्य ब्रह्मचार्यसीति भवत इत्युच्यमान इन्द्रस्य ब्रह्मचार्यस्याग्निराचार्यस्तवाहमाचार्यस्तवासाविति**—अथ प्रतिवचनानन्तरमाचार्य एनं माणवकं कस्य ब्रह्मचार्यसीत्याह—पृच्छति, भवत इति माणवकेनोच्यमाने इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तव अमुकशर्मन्निति पठति। **अथैनं भूतेभ्यः परिददाति**—अथानन्तरमेनं कुमारमाचार्यः भूतेभ्यः प्रजापतिप्रभृतिभ्यः परिरक्षितुं ददाति प्रयच्छति । तत्र मन्त्रः **प्रजापतये त्वेत्यादि अरिष्ट्या** इत्यन्तः ॥ २ ॥

गदा० । अथ उपनयनमाह—**अष्टवर्षं ब्राह्मणमुपनयेत्**—प्रसवानन्तरमष्टौ वर्षाण्यतीतानि यस्य बालकस्यासौ अष्टवर्षः तमष्टवर्षं ब्राह्मणमुपनयेत् । उपनयनसंस्कारेण संस्कुर्यात् । आचार्यस्य उप समीपे माणवकस्य नयनमुपनयनशब्देनोच्यते । उपनयनं च विधिना आचार्यसमीपनयनम् । अग्निसमीपनयनं वा । '' सावित्रिवाचनं वाऽन्यदङ्गम् '' इति **स्मृत्यर्थसारे** । उपनेतृक्रममाह—वृद्धगर्गः--'' पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः । उपायनेऽधिकारी स्यात्पूर्वाभावे परः परः ॥'' तथा--''पितैवोपनयेत्पुत्रं तदभावे पितुः पिता । तदभावे पितुर्भ्राता तदभावे तु सोदरः॥''पितेति विप्रपरं, न क्षत्रियवैश्ययोः । तयोस्तु पुरोहित एव उपनयनस्य दृष्टार्थत्वात् । तयोस्त्वध्यापनेऽनधिकारात् । **गर्भाष्टमे वा**-अथवा ब्राह्मणं गर्भसहिताष्टवार्षिकमुपनयेत् । गर्भाष्टमेष्विति पाठो **हरिहरभर्तृयज्ञभाष्ये** । एकादशवर्षं राजन्यम्—एकादशवर्षाण्यतीतानि यस्यासावेकादशवर्षस्तं राजन्यं क्षत्रियमुपनयेत् । जन्मतो

द्वादशे वर्षे इत्यर्थः । **द्वादशवर्षे वैश्यम्**–द्वादश वर्षाण्यतीतानि यस्यासौ तथा तं वैश्यं वर्णंतृतीयमुपनयेत् । जन्म-
तत्रयोदशे वर्षे इत्यर्थः । **यथामङ्गलं वा सर्वेषाम्**–अथवा सर्वेषामेव वर्णानां ब्राह्मणक्षत्रियविशां यथामङ्गलं
शास्त्रान्तरविहितकालान्तरे उपनयनं भवति । अत्राश्वलायनः–"गर्भाष्टमेऽष्टमे वाऽब्दे पञ्चमे सप्तमेऽपि वा । द्विजत्वं
प्राप्नुयाद्विप्रो वर्षे त्वेकादशे नृपः ॥" **आपस्तम्बः**–"गर्भाष्टमेषु ब्राह्मणमुपनयीत" इति । बहुवचनं गर्भषष्ठस-
प्तमयोः प्राप्त्यर्थम्" इति **सुदर्शनभाष्ये** । **आपस्तम्बः** । **अथ काम्यानि** । "सप्तमे ब्रह्मवर्चसकाममष्टमे आयुष्कामं,
नवमे तेजस्कामं, दशमेऽन्नाद्यकाममेकादश इन्द्रियकामं, द्वादशे पशुकाममुपनयेत्" **मनुः**–"ब्रह्मवर्चसकामस्य
कार्यं विप्रस्य पञ्चमे । राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे" । **विष्णुः**–"षष्ठे तु धनकामस्य
विद्याकामस्य सप्तमे । अष्टमे सर्वकामस्य नवमे कान्तिमिच्छतः" **नृसिंहः**–"उत्तरायणगे सूर्ये
कर्तव्यं ह्यौपनायनम् ।" **श्रुतिः**–"वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यम् ।" मासविषये **ज्योतिषे**–
"माघादिषु च मासेषु मौञ्जी पञ्चसु शस्यते ।" **गर्गः**–"विप्रं वसन्ते क्षितिपं निदाघे वैश्यं घनान्ते व्रतिनं
विदध्यात् । माघादिशुक्लान्तिकपञ्चमासाः साधारणा वा सकलद्विजानाम् ।" **बृहस्पतिः**–"शुक्लपक्षः शुभः प्रोक्तः
कृष्णश्चान्त्यत्रिकं विना।" **वृत्तशते** । "न जन्मधिष्ण्ये न च जन्ममासे न जन्मकालीनदिने विदध्यात् । ज्येष्ठे न मासि
प्रथमस्य सूनोस्तथा सुताया अपि मङ्गलानि ।" **बृहस्पतिः**–"मिथुने संस्थिते भानौ ज्येष्ठमासो न दोषकृत्" ।
राजमार्तण्डः–"जातं दिनं दूषयते **वसिष्ठो** ह्यष्टौ च **गर्गो** नियतं दशात्रिः । जातस्य पक्ष किल भागुरिश्च शेषाः
प्रशस्ताः खलु जन्ममासि ।" "जन्ममासे तिथौ भे च विपरीतदले साति । कार्यं मङ्गलमित्याहुर्**गर्गभार्गवशौनकाः** ॥
जन्ममासनिषेधेऽपि दिनानि दश वर्जयेत् । आरभ्य जन्मदिवसाच्छुभाः स्युस्तिथयोऽपरे ॥" **बृहस्पतिः**–"झषचा-
पकुलीरस्थो जीवोऽप्यशुभगोचरः । अतिशोभनतां दद्याद्विवाहोपनयादिषु ॥" **कारिकायाम्**–"द्वादशाष्टमबन्धुस्थे
मनसाऽपि न चिन्तयेत् ।" **ग्रन्थान्तरे**–"शुद्धिर्नैव गुरोर्यस्य वर्षे प्राप्तेऽष्टमे यदि । चैत्रे मीनगते भानौ तस्योपन-
यनं शुभम् ।" **कारिकायाम्**–"अतीव दुष्टे सुरराजपूज्ये सिंहस्थिते वा द्विजपुङ्गवानाम् । व्रतस्य बन्धः खलु
मासि चैत्रे कृतश्चिरायुः शुभसौख्यदः स्यात् ।" एतदष्टवर्षविषयम् । **ब्राह्मनक्षत्राणि मदनपारिजाते**–
"हस्तत्रये दैत्यरिपुत्रये च शक्रेन्दुपुष्याश्विनिरेवतीषु । वारेषु शुक्रार्कबृहस्पतीनां हितानुबन्धी द्विजमौञ्जिबन्धः ।"
राजमार्तण्डस्तु पुनर्वसुं ब्राह्मणस्य निषेधति–"पुनर्वसौ कृतो विप्रः पुनः संस्कारमर्हति" इति । तिथयस्तत्रैवोक्ताः ।
"तृतीयैकादशी ग्राह्या पञ्चमी दशमी तथा । द्वितीयायां च मेधावी भवेदर्थबलान्वितः ॥ रिक्तायामर्थहानिः स्यात्पौ-
र्णमास्यां तथैव च । प्रतिपद्यापि चाष्टम्यां कुलबुद्धिविनाशकृत्" **कारिकायाम्**–"अनध्याये चतुर्थ्यां च कृष्णपक्षे
विशेषतः । अपराह्णे चोपनीतः पुनः संस्कारमर्हति ॥ नान्दीश्राद्धे कृते चेत्स्यादनध्यायस्त्वकालिकः । तदोपनयनं
कार्यं वेदारम्भं न कारयेत्" **लल्लः**–"व्रतेऽह्नि पूर्वसन्ध्यायां वारिदो यदि गर्जति । तद्दिने स्यादनध्यायो व्रतं तत्र
विवर्जयेत्" **ज्योतिर्निबन्धे**–"नान्दीश्राद्धं कृतं चेत्स्यादनध्यायस्त्वकालिकः । तदोपनयनं कार्य्यं वेदारम्भ न
कारयेत्" **मदनरत्ने नारदः**–"विनर्तुना वसन्तेन कृष्णपक्षे गलग्रहे।अपराह्णे चोपनीतः पुनः संस्कारमर्हति॥" वसन्ते
गलग्रहो न दोषायेत्यर्थः।अपराह्णस्त्रेधाविभक्तदिनतृतीयांश इत्युक्तं तत्रैव।शब्दसामर्थ्याद्द्वेधाविभक्त इति युक्तम्। **नारदः**-
"कृष्णपक्षे चतुर्थी च सप्तम्यादि दिनत्रयम् । त्रयोदशीचतुष्कं च अष्टावेते गलग्रहाः ॥" **राजमार्त्तण्डः**–"आर-
म्भानन्तरं यत्र प्रत्यारम्भो न सिद्ध्यति । गर्गादिमुनयः सर्वे तमेवाहुर्गलग्रहम् ॥" **ज्योतिर्निबन्धे**–"अष्टकासु च
सर्वासु युगमन्वन्तरादिषु । अनध्यायं प्रकुर्वीत तथा सोपपदास्वपि ।" सोपपदास्तु **स्मृत्यर्थसारे** उक्ताः–"सिता
ज्येष्ठे द्वितीया च आश्विने दशमी सिता । चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः ॥" **चण्डेश्वरः**–"वेदव्रतो-
पनयने स्वाध्यायाध्ययने तथा । न दोषो यजुषां सोपपदास्वध्ययनेऽपि च।" प्रदोषदिनमपि च वर्ज्यम् । तत्स्वरूपमुक्तं
गोभिलेन–"षष्ठी च द्वादशी चैव अर्द्धरात्रोननाडिका । प्रदोषमिह कुर्वीत तृतीया तूनयामिका" इति । **ज्योति-
र्निबन्धे व्यासः**–"या चैत्रवैशाखसिता तृतीया माघस्य सप्तम्यथ फाल्गुनस्य । कृष्णे तृतीयोपनये प्रशस्ताः प्रोक्ता
भरद्वाजमुनीन्द्रमुख्यैः ॥" यत्तु **बृहद्गार्ग्यवचनम्** । "अनध्यायं प्रकुर्वीत यस्तु नैमित्तिको भवेत् । सप्तमी माघशुक्ले तु
तृतीया चाक्षया तथा ॥ बुधत्रयेन्दुवाराश्च शस्तानि व्रतबन्धने ।" इति प्रायश्चित्तार्थोपनयनपरम् । तथाच **निर्णया-
मृते कालादर्शे** च । "स्वाध्यायवियुजो घस्राः कृष्णप्रातिपदादयः । प्रायश्चित्तनिमित्ते तु मेखलाबन्धने मताः" इति ।
ज्योतिर्निबन्धे नारदः–"शाखाधिपतिवारश्च शाखाधिपबलं तथा । शाखाधिपतिलग्नं च दुर्लभं त्रितयं व्रते ॥" **संग्रहे**-

"ऋगथर्वसामयजुषामाधिपा गुरुसौम्यभौमसिताः । जीवो विप्राणां क्षत्रियस्य चोष्णगुर्विश्नां चन्द्रः" इति । **गर्गः**—"ग्रहे रवीन्द्वोरवनिप्रकम्पे केतूद्गमोल्कापतनादिदोषे । व्रते दशाहानि वदन्ति तज्ज्ञास्त्रयोदशाहानि वदन्ति केचित् ।" सङ्कटे तु **चण्डेश्वरः**—"दाहे दिशां चैव धराप्रकम्पे वज्रप्रपातेऽथ विदारणे च । केतौ तथोल्कांशुकणप्रपाते त्र्यहं न कुर्याद्व्रतमङ्गलानि" अनध्यायास्तु वातेऽमावस्यायामित्यत्र द्रष्टव्याः । कालश्चोक्तः । इदानीं कर्माह—**ब्राह्मणान् भोजयेत्तं च**—उपनेता आभ्युदयिकब्राह्मणव्यतिरिक्तान् त्रीन् ब्राह्मणान् भोजयेदाशयेत् तं च कुमारं भोजयेत् । चशब्दो भोजनक्रियानुकर्षणार्थः । **पर्युप्तशिरसमलङ्कृतमानयन्ति**—परिपूर्वस्य वपतेः कृतसम्प्रसारणस्यैतद्रूपम् । परि सर्वत उप्तं मुण्डितं शिरो यस्य स पर्युप्तशिराः तं पर्युप्तशिरसम्, अलङ्कृतं स्रङ्मालादिना भूषितम् । आनयन्ति ये पूर्वं तेनाचार्येणोपनीतास्ते एनमाचार्यसमीपमानयन्ति । इदमानयनं चाध्ययनार्थम् । अतस्तदभावाच्छूद्रस्यानधिकारः । शूद्रस्य प्रतिषेधो भवत्यध्ययनं प्रति । श्रवणे त्रपुजतुभ्यां श्रोत्रपूरणम् । उच्चारणे जिह्वाच्छेदः । धारणे शरीरभेद इति । वपनं च भोजनात्पूर्वमेव कार्यम् । नहीदानीं तदुपदेशो भूतकालनिर्देशात् । **पश्चादग्नेरवस्थाप्य ब्रह्मचर्यमागामिति वाचयति**—आनयनानन्तरमाचार्योऽग्नेः पश्चात्स्वस्य च दक्षिणतः कुमारमवस्थाप्यावस्थितं कृत्वा ब्रह्मचर्यमागामिति ब्रूहीत्येवं वाचयति, ततो माणवकः प्राङ्मुखास्तिष्ठन्नेव ब्रह्मचर्यमागामिति वदति । मन्त्रार्थः । ब्रह्मचर्यं प्रति अहमागामागतोऽस्मि । ब्रह्म वेदस्तच्चरणम् । **ब्रह्मचार्यसानीति च**—तत आचार्यः । ब्रह्मचार्यसानीति ब्रूहीति वाचयति । चशब्दान्माणवकश्च प्राङ्मुखस्तथैव तिष्ठन् ब्रह्मचार्यसानीति ब्रूयात् । मन्त्रार्थः । ब्रह्मकर्म चरतीति एवं शीलो ब्रह्मचारी अहमसानि भवामि । **अथैनं वासः परिधापयति येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतम् । तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चस इति** । अथाचार्य एनं कुमारं वासोऽहतं परिधापयति **येनेन्द्राये**ति मन्त्रेण । वासांसि च शाणक्षौमाविकानि ब्राह्मणक्षत्रियविशां यथासङ्ख्यं ज्ञेयानि । "वासांसि शाणक्षौमाविकानि" इति वक्ष्यमाणत्वात् । मन्त्रार्थः । हे कुमार येन विधिना इन्द्राय संस्कर्तुं बृहस्पतिः सुराचार्यो वासः पर्यदधात् परिधापितवान् । किम्भूतममृतम् अहतं, तेन विधिना त्वा त्वां माणवकं परिदधामि परिधापयामि । उभयत्रान्तर्भूतो णिच् ज्ञेयः, परिधापयतीति सूत्रितत्वात् । यद्वा-इन्द्राय पर्यदधात् । इन्द्रे अव्यवच्छिन्नं स्थापितवान् । तथा त्वा त्वां लक्ष्यीकृत्य परिदधामि त्वयि अव्यवच्छेदेन धारयामीति । किमर्थम् । दीर्घायुत्वाय तव चिरजीवनाय । आयुशब्द उकारान्तोऽप्यस्ति । बलाय देहशक्तये । वर्चसे इन्द्रियशक्तये ऐश्वर्याय वेति । **मेखलां बध्नीत इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात् प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयमिति । युवा सुवासाः परिवीत आगात्स उ श्रेयान् भवति जायमानः तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त इति वा तूष्णीं वा**—तत आचार्यो माणवककट्यां मेखलां रशनां बध्नीते "इयं दुरुक्तम्" इति मन्त्रेण । अथवा "युवा सुवासाः" इति मन्त्रेण । अथवा तूष्णीं बध्नीते । आचार्यस्यैव मन्त्रपाठः । अत्रैवं बन्धनम् । आचार्यस्त्रिगुणां मेखलामादाय बटोः कटिप्रदेशे प्रादक्षिण्येन त्रिर्वेष्टयति । तृतीये वेष्टने ग्रन्थयस्त्रयः पञ्च सप्त वा कार्याः । तदुक्तम्—"त्रिवृता मेखला कार्या त्रिवारं स्यात्समावृता । तद्ग्रन्थयस्त्रयः कार्याः पञ्च वा सप्त वा पुनः ॥" अत्र प्रवरसङ्ख्यया नियमः । "त्र्यार्षेयस्य ग्रन्थित्रयम् । पञ्चार्षेयस्य पञ्च । सप्तार्षेयस्य सप्त" इति **गर्गपद्धतौ** वृद्धाचारोऽप्येवमेव । "आचार्यकर्तृकं मेखलाबन्धनं कुमारस्य मन्त्रपाठः" इति **वासुदेवमुरारिमिश्रजयरामहरिहराः** । अत्र **मुरारिमिश्रै**रबुद्ध्वैव पुरुषयोगिमन्त्रसंस्कारयोस्त्यागे सामर्थ्यादिति हेतूपन्यासार्थं प्रदर्शितम् । नहि करणमन्त्रेऽयं न्यायः प्रवर्तते । आचार्यकर्तृको ह्ययं पदार्थः । मन्त्रपाठस्तु लिङ्गवशेन माणवककर्तृकः स्यादिति चेत् तन्न, प्रधानभूतश्च पदार्थः, गुणभूतश्च मन्त्रः । अतः पदार्थाङ्गत्वेन मन्त्रोऽपि पदार्थकर्त्रा पठनीयः । मन्त्रेऽपि च लक्षणया माणवकाभिधानमित्यदोषः । तथाच श्रुतिः—"यां वै कां च यज्ञऋत्विज आशिषमाशासते यजमानस्यैव सा" इति । **कारिकायाम्** "बध्नीयात्त्रिगुणां श्लक्ष्णामियं दुरुक्तमुचरन् । आचार्यस्यैव मन्त्रोऽयं न बटोरात्मनेपदात् ॥ अस्मिन्नवसरे समाचाराद्यज्ञोपवीताजिने भवतः" इति **भर्तृयज्ञ**व्यतिरिक्तवासुदेवादिसर्वग्रन्थेषु **कर्काचार्यै**स्तूपवीतमेव लिखितम् । तत्र चाविरोधादुपवीते शाखान्तरीयो मन्त्रो ग्राह्यः । **यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोप-**

वर्ति बलमस्तु तेज इति–"आजिनस्योत्तरीयिकरणं तूष्णीं मन्त्रपाठेन वा" इति **वासुदेवः**। **मित्रस्य चक्षुर्द्धरुणं बलीयस्तेजो यशस्वि स्थविरꣳ समिद्धम । अनाहनस्यं वसनं जरिष्णुः परीदं वाज्यजिनं दधेऽहमिति–**मन्त्रेणाजिनधारणमिति **कारिकायां गर्गपद्धतौ** च। यज्ञोपवीतलक्षणं **स्मृत्यर्थसारे–**"कार्पासक्षौमगोबालशाणवल्कतृणादिकम् । यथासम्भवतो धार्यमुपवीतं द्विजातिभिः ॥ शुचौ देशे शुचिः सूत्रं संहताङ्गुलिमूलके । आवेष्ट्य षण्णवत्या तत्त्रिगुणीकृत्य यत्नतः ॥ अब्लिङ्गकैस्त्रिभिः सम्यक् प्रक्षाल्योर्द्धवृतं तु तत् । अप्रदिक्षणमावृत्तं सावित्र्या त्रिगुणीकृतम् ॥ अधः प्रदक्षिणावृत्तं समं स्यान्नवसूत्रकम् । त्रिरावेष्ट्य दृढं बद्ध्वा हरिब्रह्मेश्वरान्नमेत्" ॥"यज्ञोपवीतं परमम्"इति मन्त्रेण धारयेत् । "सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकम् । सावित्र्या दशकृत्वोऽद्भिर्मन्त्रिताभिस्तदुक्षयेत् ॥ विच्छिन्नं वाऽप्यधो यातं भुक्त्वा निर्मितमुत्सृजेत् । पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम् ॥ तद्धार्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितम् । स्तनादूर्ध्वमधो नाभेर्न धार्यं तत् कथंचन ॥ ब्रह्मचारिण एकं स्यात्स्नातस्य द्वे बहूनि वा । तृतीयमुत्तरीयं वा वस्त्राभावे तदिष्यते ॥ ब्रह्मसूत्रे तु सव्येंऽसे स्थिते यज्ञोपवीतिता । प्राचीनावीतिताऽसव्ये कण्ठस्थे हि निवीतिता ॥ वस्त्रं यज्ञोपवीतार्थं त्रिवृत्सूत्रं च कर्मसु । कुशमुञ्जबालतन्तुरज्ज्वा वा सर्वजातिषु ॥" **कात्यायनः–**"सदोपवीतिना भाव्यं सदा बद्धशिखेन तु । विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्" "यज्ञोपवीतं द्विजत्वाचिह्नार्थम्" इति **प्रयोगरत्ने**। कृष्णाजिनधारणं प्रावरणार्थम् । तच्च । "त्र्यङ्गुलं तु बहिर्लोम यद्वा स्याच्चतुरङ्गुलम् । अजिनं धारयेद्विप्रश्चतुर्विंशाष्टषोडशैः ।" इति **प्रयोगरत्ने**। रशनाश्च मौञ्ज्यादिकाः । "मौञ्जी रशना ब्राह्मणस्य, धनुर्ज्या राजन्यस्य, मौर्वी वैश्यस्य" इति वक्ष्यमाणत्वात् । अजिनान्यप्यैणेयादीनि । इयं दुरुक्तमित्यस्यार्थः । इयमितीदंशब्द आद्यन्तयोर्वाक्यालङ्कारार्थः । इयं मेखला सामगात् आगता । किंकुर्वती दुरुक्तं दुष्टं भाषितमसत्याप्रियादिकं परितः सर्वतः भूतं, भविष्यच्च बाधमाना निराकुर्वाणा, वर्णं वर्णत्वं, पवित्रं शुद्धं, पुनती सत्कुर्वती, मे मम प्राणापानाभ्यां मरुद्भ्यां तयोर्बलं सामर्थ्यम् आदधाना स्थापयन्ती स्वसा स्वसृवत् हिता देवी दीप्तिमती सुभगा सौभाग्यदा । "युवा सुवासाः" इत्यस्यायमर्थः । यौति गुणानेकीकरोतीति युवा, सुवासाः शोभनवस्त्रः अहतं शोभनमुच्यते, परिवीतः वस्त्रपुष्पमालादिभिः समन्ततो वेष्टितः आगात् आगतः उ वितर्के । श्रेयान् स यदि जायमानः उत्पाद्यमानः श्रेयान् शुद्धः स्यात् । धीरासः स्थिरप्रज्ञाः, कवयः वेदवेदार्थप्रवक्तारः क्रान्तदर्शनाः, स्वाध्यः शोभनचित्तवृत्तयः । तं च उन्नयन्ति उत्कर्षं गमयन्ति । किं कुर्वन्तः मनसा मनोवृत्त्या देवयन्तः वेदार्थं ज्ञापयन्तः । यज्ञोपवीतमन्त्रार्थः । हे आचार्य इदं ब्रह्मसूत्रमहं प्रतिमुञ्च प्रतिमुञ्चामि । प्रतिपूर्वो मुञ्चतिर्बन्धनार्थः । पुरुषव्यत्ययश्छान्दसः । किम्भूतं यज्ञोपवीतं यज्ञेन प्रजापतिना यज्ञाय वेदोक्तकर्माधिकारायेति वा, उपवीतम् उपरि स्कन्धदेशे वर्ति परिहितं परमं पर आत्मा मीयते जायते तेन वाक्योपदेशाधिकारत्वात्, पवित्रं शोधकं, प्रजापतेर्ब्रह्मणः सहजं सहोत्पन्नं स्वभावसिद्धं वा पुरस्तात्प्राग्भवम्, अत इदमायुषे हितम् आयुष्यम् अस्तु, अग्र्यं मुख्यम् । अनुपहतं शुभ्रं निर्मलम्, बलं धर्मसामर्थ्यदम्, तेजः प्रभावप्रदम् । यद्यपि सूत्रकृता यज्ञोपवीतं नोक्तम्, तथापि "उपवीतिन" इति परिभाषणात् "सदा यज्ञोपवीतिना भाव्यम्" इति परिशिष्टाच्च ग्राह्यम् ॥ कालश्चानुक्तोऽपि स्मृत्यन्तरादयमेव । उपवीतिन इत्यस्यायमर्थः । सर्वे उपवीतिनः सव्यस्कन्धस्थितयज्ञोपवीतधारिणः कर्म कुर्वन्तीति शेषः । "उद्धृते दक्षिणे पाणावुपवीत्युच्यते बुधैः" इति स्मरणात् । यज्ञोपवीती देवकर्माणि करोति । **दण्डं प्रयच्छति तं प्रतिगृह्णाति यो मे दण्डः परापतद्वैहायसोऽधिभूम्याम् । तमहं पुनराददं आयुषे ब्रह्मणे ब्रह्मवर्चसायेति–**तत आचार्यो माणवकाय तूष्णीं दण्डं प्रयच्छति समर्पयति । माणवकश्च दक्षिणहस्तेन दण्डं प्रतिगृह्णाति'यो मे दण्डः'इति मन्त्रेण । दण्डाश्च पालाशबैल्वौदुम्बरा ब्राह्मणक्षत्रियविशां यथासङ्ख्यं ज्ञेयाः । अथवा पालाशादयः सर्वेषां वर्णानाम् । "पालाशो ब्राह्मणस्य दण्डो, बैल्वो राजन्यस्यौदुम्बरो वैश्यस्य, सर्वे वा सर्वेषाम्" इति वक्ष्यमाणत्वात् । मानं च शास्त्रान्तरीयं ग्राह्यम् । "केशसम्मितो ब्राह्मणस्य दण्डः, ललाटसम्मितः क्षत्रियस्य, घ्राणसम्मितो वैश्यस्य" इति । मन्त्रार्थः । हे आचार्य यो दण्डः मे मह्यं परापतत् अभिमुखमागतः, वैहायसः आकाशे प्रसृतः, अधिभूम्यां भूमेरुपरि वर्तमानः, तं दण्डमहमाददे गृह्णामि । पुनर्ग्रहणात्सोमदीक्षायां यो दण्डो ग्राह्यस्तमप्याददं इत्याशंसनम् । किमर्थम् । आयुषे जीवनाय, ब्रह्मणे वेदग्रहणाय, ब्रह्मवर्चसाय याजनाध्यापनोत्कर्षतेजसे । **दीक्षावदेके दीर्घसत्रमुपैतीति वचनात्–**एके आचार्या दीक्षावत्सोमयागदीक्षायां यथा तूष्णीं प्रतिगृह्योच्छ्रयस्वेत्युच्छ्रयणं विहितं

तद्वदत्रापीच्छन्ति । कुतः “ दीर्घसत्रं वा एष उपैति यो ब्रह्मचर्यमुपैत् ” इति वचनात् । दण्डप्रतिग्रहणसामान्याद्दीर्घसत्रताऽस्योक्ता । यद्येवं न दीक्षावत्प्रतिग्रहणं, स्मरणाभावात् । या चात्र “ दीर्घसत्रसंस्तुतिः सा दीर्घकालसामान्यात् ” इति **भर्तृयज्ञकर्कजयरामाः**। “दीक्षावद्वा दण्डग्रहणम्” इति **वासुदेवकारिकाकारहरिहराः** । **अथास्याद्भिरञ्जलिनाऽञ्जलिं पूरयत्यापोहिष्ठेति तिसृभिः**–अथाचार्योऽस्य कुमारस्याञ्जलिं स्वेनाञ्जलिना अप आदाय ताभिरद्भिः पूरयत्यापो हि ष्ठेति तिसृभिर्ऋग्भिः । **अथैनꣳ सूर्यमुदीक्षयति तच्चक्षुरिति**--अथाचार्य एनं कुमारं सूर्यमुदीक्षयति सूर्यं दर्शयति “तच्चक्षुः” इति मन्त्रेण । उदीक्षयतीति कारितत्वात्सूर्यमुदीक्षस्वेति प्रैष आचार्यस्य । **अथास्य दक्षिणाꣳसमधि हृदयमालभते मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति**–अथाचार्योऽस्य कुमारस्य दक्षिणांसमधि दक्षिणस्कन्धस्योपरि स्वीयं दक्षिणहस्तं नीत्वा हृदयं वक्षः आलभते स्पृशति । “ मम व्रते ते” इति मन्त्रेण । व्याख्यातश्चायं विवाहप्रकरणे । **अथास्य दक्षिणꣳ हस्तं गृहीत्वाऽऽह को नामासीति**–अथाचार्योऽस्य कुमारस्य दक्षिणं हस्तं स्वदक्षिणहस्तेन गृहीत्वा को नामासीत्याह–ब्रवीति । **असावहं भो३ इति प्रत्याह**–एवमाचार्येण पृष्टः कुमार आचार्यं प्रत्याह–असाविति सर्वनामस्थाने आत्मनो नामग्रहणम् । अमुकोऽहं भो इति । **अथैनमाह कस्य ब्रह्मचार्यसीति**–अथैनं कुमारं प्रति आचार्य आह—कस्य ब्रह्मचार्यसीति । **भवत इत्युच्यमान इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासामिति**–भवत इति आचार्यं प्रति कुमारेणोच्यमाने आचार्य इन्द्रस्य ब्रह्मचार्यसीत्यमुं मन्त्रं पठति । असावित्यस्य स्थाने आमन्त्रणाविभक्तियुक्तं कुमारनामग्रहणं कार्यम् । स्वनाम प्रथमान्तमित्यपरे । उभयथा मन्त्रार्थोपपत्तेः । “स्मृत्यन्तरान्निर्णयः” इति **भर्तृयज्ञ**भाष्ये । मन्त्रार्थस्तु । “इदि परमैश्वर्ये” इन्द्रस्य प्रजापतेर्ब्रह्मचारी त्वमासि । तव चाग्निराचार्यः प्रथमः द्वितीयश्चाहं तव, हे असौ अमुकशर्मन् ब्रह्मचारिन् । **अथैनं भूतेभ्यः परिददाति प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा भूतेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्टया इति**–अथाचार्य एनं कुमारं भूतेभ्यः प्रजापतिप्रभृतिभ्यः परि परितोऽरिष्ट्यै रक्षायै प्रयच्छति । “प्रजापतये त्वा परिददामि” इत्यनेन मन्त्रेण । “अथैनं भूतेभ्यः परिददाति प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददामि” इति श्रुतत्वात् । मन्त्रार्थः सुगमः । हे ब्रह्मचारिन् प्रजापतये स्रष्ट्रे त्वा त्वां परिददामि समर्पयामि विश्वेभ्यो भूतेभ्यः विश्वानि भूतानि पृथिव्यादीनि पञ्च तेभ्यः सर्वेभ्यो भूतेभ्यो देवविशेषेभ्य इत्यपौनरुक्त्यम् । किमर्थम् । अरिष्ट्यै अहिंसायै ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति–श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे द्वितीया कण्डिका ॥ २ ॥

विश्व०–अष्टवर्षं ब्राह्मणमुपनयेत्–अष्टौ वर्षाणि उत्पन्नानि यस्यासौ अष्टवर्षः । अष्टम इत्यर्थः । **गर्भाष्टमेषु वा**–जन्मतः पञ्चमषष्ठसप्तमेष्वित्यर्थः । “गर्भाष्टमेऽष्टमे वाब्दे” इत्युक्तेः । “ ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे, राज्ञो बलार्थिनः षष्ठे, वैश्यस्येहार्थिनोऽष्टमे” इति । **एका...जन्य**–उपनयेदित्यनुषङ्गः । **द्वाद...वैश्यम्**–अत्राप्युपनयेदित्यनुषङ्गः । **यथा...वैषाम्**–अनेन स्मृत्यन्तरोक्तः समय उपलक्ष्यते। अन्येऽपि शाखान्तरीयाः आपस्तम्बाद्युक्ताः समया बोद्धव्याः । केचित्तु शास्त्रीयो यस्य कुले यो पक्ष आदृतः स कुलाचार इत्याहुः । अपरे स्वशास्त्रीयमपीत्याहुः । इदानीं कर्तव्यतामाह–**ब्राह्म...त्तश्च**–मातृपूजाभ्युदयिके विधाय त्रीन् ब्राह्मणान् भोजयेत् । तं च संस्कार्यं कुमारम् **पर्यु...यन्ति**–भोजनोत्तरमलंबहिःशालायां उपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधाय भोजनात्प्राक् शिरसः मुण्डनं शिखावर्जं कारयित्वा आज्याहुतिकृत्याचार्यसमीपमानयन्ति । केचित्तु तेनैवाचार्येण ये उपनीतास्ते आनयन्तीत्याहुः । **पश्चा...नीति च**–अग्ने पश्चिमत आत्मनो दक्षिणतः माणवकमवस्थितं कृत्वा **ब्रह्मचर्यमागामिति**मात्रोक्तेर्ब्रह्मासनादिबर्हिस्तरणान्ते ब्रूहीति आचार्येणोक्ते, माणवको ब्रह्मचर्यमागामिति वदेत् । ततः **ब्रह्मचार्यसानी**त्याचार्योक्ते ब्रह्मचार्यसानीति ब्रह्मचारी वदेत् । **अथै...र्चसा**–इति आचार्यः एनं वटुं वस्त्रं **येनेन्द्राये**ति मन्त्रेण परिधापयति। मन्त्रान्वयस्तु–हे वटो येन प्रकारेण इन्द्राय इन्द्रं संस्कर्तुं बृहस्पतिः सुराचार्यो वासः पर्यदधात् परिधापितवान् । कीदृशम् । अमृतमहतं तेन प्रकारेण त्वा त्वां बटुं परिदधामि परिधापयामि । अथवा इन्द्राय पर्यदधात् इन्द्रे स्थापितवान् । तथा त्वां परिदधामि अव्यवच्छेदेन स्थापयामि। किमर्थम्, दीर्घायुत्वाय चिरजीवनाय । बलाय शारीरशक्त्यै । वर्चसे ब्रह्मचर्यतेजसे ऐश्वर्याय वा । अङ्गिरा बृहती बृहस्पतिः परिधापने । परिधापनं च कटिवेष्टनं बहिर्वासवत् । **मेख...लेयमिति**–मौञ्जी त्रिवृता तां मेखलां बध्नीते । यथापिग्रन्थि कुर्यात् । कथं च इयं दुरुक्तमिति मन्त्रेण [illegible]–दुरुक्तं दुरुक्तं परितो बाधमाना अपसारयन्ती मेखला पवित्रं वर्णं

ब्राह्मणादित्रयं पुनती पवित्रयन्ती आगात् आगता । पुनश्च प्राणापानयोः सामर्थ्यं स्थापयन्ती अत एव नः स्वसा भगिनी दानादिगुणयुक्ता सौभाग्यदा । अहो दर्शनीयाऽहो दर्शनीयेतिवदाद्यन्तयोरभ्यासः । वामदेवस्त्रिष्टुप् मेखलां तद्बन्धने। **युवा... तूष्णीं वा युवा सुवासा–**इति मन्त्रेण वा तूष्णीं वा पक्षत्रयान्यतरपक्षेण मेखलां बध्नीत इत्यर्थः। अन्वयस्तु—अभ्यासेन गुणान् यौतीति मिश्रयतीति युवा शोभनवस्त्रः अलंकरणैः परिवीतः आगतः । उ वितर्के । उत्पद्यमानः स श्रेष्ठः स्यात् । तं बटुं पण्डिताः क्रान्तदर्शिनः स्वाध्यः शोभनचित्ताः मनोव्यापारैर्वेदार्थं बोधयन्तः उत्कर्षं प्रापयन्ति । आङ्गिरा बृहती बृहस्पतिः । बद्धमेखलस्य बटोर्यज्ञोपवीतपरिधानम्, शाखान्तरीयो मन्त्रः--"**यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः । यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि इति**–मन्त्रार्थः—ब्रह्मसूत्रं क्रत्वर्थं सृष्टमसि अत एव बटो क्रतोर्यज्ञोपवीतेन त्वां बध्नामि । कीदृशं यज्ञस्य उपवीतं परमं परः आत्मा मीयते येन पावनं यद्वा असाधारणं पावनं पूर्वमेव ब्रह्मणोत्पत्तिसमानसमयोत्पत्तिकम्, अत एव श्रेष्ठमायुर्मयि कीर्त्यपि कीर्त्यन्वितं स्वच्छं स्थापय। त्वमेव बलाधायकं तेजसः आधायकं च भव। ऐणेयमजिनमुपवीतानन्तरं धारयाति । तत्र मन्त्रः–**मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविर ꣳसमिद्धम् । अनाहनस्यं वसनं जरिष्णुःपरीदं वाज्यजिनं दधेऽहम्** इति । एतच्चाजिनधारणं यज्ञोपवीतपरिधानानन्तरमाचम्य । **दण्डं प्रयच्छति–**वक्ष्यमाणलक्षणं दण्डं **माणवकायाचार्यः**–प्रयच्छति।**तं प्रति...सायेति**–माणवकश्चाचार्यहस्तात्तं दण्डं प्रतिगृह्णातियो **मे दण्ड** इति मन्त्रेण । **दीक्षावदेके**–"मुखसंमितमौदुम्बरं दण्डं प्रयच्छति"इति **कात्यायनो**क्तप्रकारेण दण्डादानं प्रतिग्रहणं च माणवकस्य। तत्र हेतुमाह—**दीर्घ...नात्**–"दीर्घसत्रं वा एष उपैति यो ब्रह्मचर्यमुपैति"इत्यादिवाक्यादित्यर्थः।**अथा... स्त्रभिः**–आचार्यः स्वाञ्जलिना जल**मापोहिष्ठे**ति तिसृभिर्माणवकाञ्जलौ प्रक्षिपतीत्यर्थः। **अथैनꣳ...क्षुरिति**–सूर्यमुदीक्षस्वेति आचार्यस्य बटुं प्रति प्रैषः । स च **तच्चक्षुरिति** सूर्यमीक्षते। **अथास्य...मह्यमिति**–बटोर्दक्षिणांसस्योपरि स्वदक्षिणहस्तं नीत्वा बटोर्हृदयमालभ्य **मम व्रते** इति मन्त्रं पठेदित्यर्थः । **अथा...प्रत्याह**–अमुकगोत्रः अमुकशर्मा अहं भो ३ इति कुमारः । स्वनामाचार्यं प्रति कथयतीत्यर्थः । **अथैन...सीति**—एनं बटुमाचार्यः कस्य ब्रह्मचार्यसीत्योहत्यर्थः । **भवत इत्युच्यमाने** कुमारेणेति शेषः । **इन्द्र....साविति**–असौ अमुकगोत्रामुकप्रवराऽमुकशर्मन्निति अहमाचार्यस्तवेत्यन्तं पाठित्वा पठेदित्यर्थः। **अथैनं... रिष्टया इति**–अनेन मन्त्रेण माणवकं भूतेभ्यः परिददाति ।। इति द्वितीया कण्डिका॥ २ ॥

प्रदक्षिणमग्निं परीत्योपविशाति ॥ १ ॥ अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्तेऽथैनꣳ सꣳशास्ति ब्रह्मचार्यस्यपोशान कर्म कुरु मा दिवा सुषुप्था वाचं यच्छ समिधमाधेह्यपोशानेति ॥ २ ॥ अथाऽस्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय ॥ ३ ॥ दक्षिणतस्तिष्ठ आसीनाय वैके ॥ ४ ॥ पच्छोऽर्द्धर्चशः सर्वां च तृतीयेन सहानुवर्तयन् ॥ ५ ॥ संवत्सरे षण्मास्ये चतुर्विꣳशत्यहे द्वादशाहे षडहे त्र्यहे वा ॥ ६॥ सद्यस्त्वेव गायत्रीं ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मण इति श्रुतेः ॥ ७ ॥ त्रिष्टुभꣳ राजन्यस्य ॥ ८ ॥ जगती वैश्यस्य ॥ ९ ॥ सर्वेषां वा गायत्रीम् ॥ १० ॥ ३ ॥ * ॥

कर्कः–प्रदक्षिणमग्निं परीत्योपविशाति कुमारः । अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्तेऽथैनꣳसꣳशास्ति–आचार्यः कुमारं ब्रह्मचार्यसीत्येवमादिभिः प्रैषवाक्यैः । ब्रह्मचार्यसीत्युक्ते भवामीति प्रत्याह–कुमारः । अपोशानेत्युक्ते आशानीति प्रत्याह कुमारः । कर्म कुर्वित्युक्ते करवाणीति प्रत्याह–कुमारः । मा दिवा सुषुप्थाः इत्युक्ते न स्वपानीति। वाचं यच्छेत्युक्ते यच्छामीति । समिधमाधेहीत्युक्ते आदधामीति । अपोशानेत्युक्ते अशानीति कुमारः । एतदनुशासनम् । अथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय गुरुं समीक्षमाणाय कुमाराय । उपसदनं च पादोपसङ्ग्रहणपूर्वकम् । सवितृदेवत्यां गायत्रीछन्दस्कां सावित्रीम् । तस्मादेतां

गायत्रीमेव सावित्रीमनुब्रूयात् इति वचनात् । दक्षिणतस्तिष्ठत आसीनाय वैके—एके आचार्याः सावित्रीमन्वाहुः । एकीयशब्दाद्विकल्पः । पच्छोऽर्द्धर्चशः सर्वां च तृतीयेन सहानुवर्तयन्—पच्छ इति पादं पादं पुनरर्द्धमर्द्धं तृतीयेन सर्वां सहानुवर्तयन् । संवत्सरे षण्मास्ये चतुर्विꣳशत्यहे द्वादशाहे षडहे त्र्यहे वा—सावित्र्युच्यते । एवमेव हि श्रूयत इति । सद्यस्त्वेव गायत्रीं ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मण इति श्रुतेः—आग्नेयो ब्रह्मणः सद्यो वा अग्निर्जायते तस्मात्सद्य एव ब्राह्मणायानुब्रूयादिति । इतरेषां त्विच्छया कालः । त्रिष्टुभꣳ राजन्यस्य सावित्रीमनुब्रूयात् । जगतीं वैश्यस्य । सावित्रीमनुब्रूयात् । सर्वेषां वा गायत्रीमनुब्रूयात् । वाशब्दो विकल्पार्थः ॥ ३ ॥*॥

जय०—एवं वस्त्रादिना संस्कृत अग्निप्रदक्षिणं कृत्वा पश्चादग्नेराचार्यस्योत्तरत उपविशति कुमारः । अन्वारब्धे ब्रह्मणा आचार्य आघारादिस्विष्टकृदन्ताश्चतुर्दशाहुतीर्हुत्वा संस्रवप्राशनान्ते ब्रह्मचार्यसीत्येवमादिभिः प्रैषवाक्यैरेनं कुमारमनुशास्ति शिक्षयति । तत्र ब्रह्मचार्यसीत्युक्ते, असानीत्याह कुमारः। आपोऽशानेत्युक्ते अश्नानीति । कर्म कुरु इत्युक्ते करवाणीति । मा दिवा सुषुप्था इत्युक्ते, न स्वपानीति । वाचं यच्छेत्युक्ते, यच्छानि । समिधमाधेहीत्युक्ते, आदधानीति । पुनरपोऽशानेत्युक्ते, अश्नानीत्येतदनुशासनम् । समीक्षमाणाय गुरुं समीक्षितश्च तेनैव । उपसदनं च पादोपसङ्ग्रहणपूर्वकम् । सावित्रीं सवितृदेवत्यां गायत्रीच्छन्दस्कामृचम् । तस्मादेतां गायत्रीमेव सावित्रीमनुब्रूयादिति श्रवणात् । एके आचार्या अग्नेर्दक्षिणतस्तिष्ठते स्थिताय आसीनाय वा सावित्रीमन्वाहुः । एकीयशब्दाद्विकल्पः। कथमन्वाहुः । पच्छः प्रथमं पादं पादं, ततोऽर्द्धर्चशः अर्द्धर्चमर्द्धर्चम् , ततस्तृतीयेन सर्वां सह बटुना सममनुवर्तयन् पठन् । संवत्सर इति सावित्रीप्रदानस्यैते कालविकल्पाः । ब्राह्मणाय तु सद्यो ब्रूयात् । श्रूयते च **सद्यस्त्वेवेति** । आग्नेयो वै ब्राह्मणः सद्यो वा अग्निर्जायते । तस्मात्सद्य एव ब्राह्मणायानुब्रूयात् । इतरेषां त्विच्छया विकल्पः । त्रिष्टुभं सावित्रीमनुब्रूयात् । जगतीं सावित्रीमनुब्रूयात् । तत्र तत्सवितुरिति विश्वामित्रः। प्रतिष्ठा गायत्री सविता होमानन्तरमाहवनीयेक्षणजपे० । क्षत्रियाय तु **देवसवितरिति** बृहस्पतिस्त्रिष्टुप् सविता वाजपेयाज्यहोमे० । वैश्यस्य च **विश्वारूपाणि प्रतिमुञ्चत**—इति प्रजापतिर्जगती सविता उषासम्भरणे रुक्मपाशप्रतिमोके० । **सर्वेषां गायत्रीं वेति**—विकल्पः । अत्रेत्यग्नावेव न त्ववसरे पाठादेव तत्प्राप्तेः ॥ ३ ॥ * ॥

हरि०—**प्रदक्षिणमग्निं परीत्योपविशति**—एवं वस्त्रदानादिभिराचार्येण संस्कृतो माणवक अग्निं प्रदक्षिणं यथा भवति तथा परीत्य परिक्रम्य पश्चादग्नेराचार्यस्योत्तरत उपविशति आस्ते । **अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्ते**—ततो ब्रह्मणाऽन्वारब्ध आचार्यः आघारादिस्विष्टकृदन्ताश्चतुर्दशाहुतीर्हुत्वा संस्रवप्रशानान्ते । अत्र पुनरन्वारम्भानुवादश्चतुर्दशाहुतिहोमव्यतिरिक्तहोमप्रतिषेधार्थः । **अथैनꣳ सꣳ शास्ति ब्रह्मचार्यस्यपोशान कर्म कुरु मा दिवा सुषुप्था वाचं यच्छ समिधमाधेह्यपोऽशानेति**—अथानन्तरमाचार्यः एनं माणवकं संशास्ति शिक्षयति । कथं ब्रह्मचारी आसि, असानीति माणवकेन प्रत्युक्तः । अपः अशान पिब इति । अशानीति प्रत्युक्तः । कर्म स्नानादिकं स्ववर्णाश्रमविहितं कुरु विधेहि, करवाणीति प्रत्युक्तः। मा दिवा दिवसे सुषुप्थाः स्वाप्सीरिति, न स्वपानीति प्रत्युक्तः । वाचं गिरं यच्छ नियमयेति, यच्छानीति प्रत्युक्तः । समिधं वक्ष्यमाणप्रकारेण आधेहि अग्नौ प्रक्षिपेति, आदधानीति प्रत्युक्तः । अपोऽशानेति पूर्ववत् । **अथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय दक्षिणतस्तिष्ठत आसीनाय वैके । पच्छोऽर्द्धर्चशः सर्वां च तृतीयेन सहानुवर्तयन्**—अथ शासनानन्तरमस्मै ब्रह्मचारिणे

सावित्रीं सवितृदेवत्यां गायत्रीच्छन्दस्कां विश्वामित्रदृष्टाम् ऋचमन्वाह–उपदिशति । कथम्भूताय प्रत्यङ्मुखाय पश्चिमाभिमुखाय । पुनः कथम्भूताय उपविष्टाय च अग्नेरुत्तरस्यां दिशि तथा उपसन्नाय पादोपसङ्ग्रहणादिना भजमानाय । तथा समीक्षमाणाय सम्यक् आचार्यमवलोकयते । तथा आचार्येण सम्यगवलोकिताय । पक्षान्तरमाह–दक्षिणतः अग्नेर्दक्षिणस्यां दिशि तिष्ठते ऊर्द्ध्वाय ऊर्द्ध्वीभूताय वा । आसीनाय उपविष्टाय इत्येके आचार्याः सावित्रीप्रदानं मन्यन्ते । कथमन्वाह-पच्छः पादं पादम्, अर्द्धर्चशः तदनु अर्द्धर्चमर्द्धर्चम् , तदनु च सर्वां तृतीयेन वारेण सह मिलित्वा आवर्तयन् पठन् । **संवत्सरे षण्मास्ये चतुर्विꣳशत्यहे द्वादशाहे षडहे त्र्यहे वा । सद्यस्त्वेव गायत्रीं ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मण इति श्रुतेः । त्रिष्टुभꣳ राजन्यस्य जगतीं वैश्यस्य सर्वेषां वा गायत्रीम्**–सावित्रीप्रदानस्य कालं विकल्पेनाह–संवत्सरे उपनयनमारभ्य पूर्णे वर्षे षण्मास्ये षडेव मासाः षण्मास्यं, स्वार्थे तद्धितश्छान्दसो वृद्धिलोपः, “छन्दोवत्सूत्राणि भवन्ति” इति वचनात्। तस्मिन् षण्मास्ये, चतुर्विंशत्यहे चतुर्विंशत्या अहोभिरुपलक्षितः कालः चतुर्विंशत्यहः तस्मिन् , द्वादशाहे द्वादशभिरहोभिरुपलक्षितः कालो द्वादशाहः तस्मिन्, षडहे षड्भिरहोभिरुपलक्षितः कालस्त्र्यहः तस्मिन्, वाशब्दः सर्वेषु संवत्सरादिषु सम्बध्यते । एते कालविकल्पाः आचार्यस्य शुश्रूषादिशिष्यगुणतारतम्यापेक्षाः । एवं सामान्येन सावित्रीप्रदानस्य कालविकल्पानभिधायाधुना ब्राह्मणस्य विशेषमाह–तुशब्दः पक्षव्यावृत्तौ । ब्राह्मणस्य नैते कालविकल्पाः किन्तु क्षत्त्रियवैश्ययोः । सद्य एव गायत्रीं ब्राह्मणायानुब्रूयात् कथयेत् । कुतः “आग्नेयो वै ब्राह्मणः” इति श्रुतेः । “आग्नेयो अग्निदैवत्यः ब्राह्मणः” इति वेदवचनात् ! त्रिष्टुभꣳ राजन्यस्य, जगतीं वैश्यस्य, सर्वेषां वा गायत्रीं,राजन्यस्य क्षत्रियस्य त्रिष्टुभं त्रिष्टुप् छन्दो यस्याः सा त्रिष्टुप् तां त्रिष्टुभं सावित्रीम्, जगती छन्दो यस्याः ऋचः सा जगती तां जगतीं सावित्रीं, वैश्यस्य विशः सावित्रीमनुब्रूयादित्यनुषज्यते । सर्वेषां वा गायत्रीं,यद्वा–सर्वेषां ब्राह्मणक्षत्त्रियविशां गायत्रीमेव गायत्रीछन्दस्कामेव सावित्रीं सवितृदेवताकां **तत्सवितुरिति** सकलवेदशाखाम्नातां ऋचमनुब्रूयात् ॥ ३ ॥

गदा०–**प्रदक्षिणमग्निं परीत्योपविशति**–परिदानानन्तरं कुमारोऽग्निं प्रदक्षिणं यथा स्यात्तथा परीत्य परिक्रमणं कृत्वाऽग्नेरुत्तरत उपविशति । “ पश्चादग्नेराचार्यस्योत्तरत उपविशति ” इति **जयरामहरिहरौ** । “ पश्चादग्नेरुपवेशनम् ” इति **भर्तृयज्ञकारिकाकारौ** । “ आचार्यस्य दक्षिणतः” इति **गर्गपद्धतौ** । “आचार्यस्योत्तरतः” इति **वासुदेवः** । **अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्तेऽथैनꣳसꣳ शास्ति ब्रह्मचार्यस्यपोऽशान कर्म कुरु मा दिवा सुषुप्था वाचं यच्छ समिधमाधेह्यपोऽशानेति**–तत आचार्यो ब्रह्मणाऽन्वारब्ध आघारादिस्विष्टकृदन्तास्चतुर्दशाज्याहुतीर्हुत्वा संस्रवप्राशनान्ते ब्रह्मचार्यसीत्येवमादिभिः सप्तप्रैषवाक्यैरेनं कुमारमनुशास्ति शिक्षयति । अत्र ब्रह्मोपवेशनादि दक्षिणादानान्तं कर्म कृत्वाऽनुशासनं कार्यम् । तच्चैवम् । ब्रह्मचार्यसीत्याचार्य आह । भवानीति ब्रह्मचारी प्रत्याह । अपोऽशानेत्याचा० । अशानीति ब्र० । कर्म कुर्वित्याचा० । करवाणीति ब्र० । मा दिवा सुषुप्था इत्याचा० । न स्वपानीति ब्र० । वाचं यच्छेत्याचा० । यच्छानीति ब्र० । समिधमाधेहीत्याचा० आदधानीति ब्र० । अपोऽशानेत्याचा० । अशानीति ब्र० । ब्रह्मचार्यसीत्यादिप्रैषाणामयमर्थः । ब्रह्म कर्म चरतीत्येवंशीलो ब्रह्मचारी असि भवसि । अपः अशान पिब । कर्म स्नानादिकं स्ववर्णाश्रमविहितं कुरु विधेहि । दिवसे मा स्वाप्सीः । स्मृत्युक्तकाले वाचं गिरं यच्छ नियमय । समिधं वक्ष्यमाणप्रकारेण आधेहि अग्नौ सर्वदा प्रक्षिप । प्रथममाचमनमशिष्यन् द्वितीयं चाशित्वा। “अशिष्यन्नाचामेदाशित्वाऽऽचामेत्” इति श्रुतेः । कर्मकरणमविशेषोपदिष्टमप्याचार्याय। ‘आचार्याय कर्म करोतीति श्रुतत्वात्’ इति **भर्तृयज्ञः**। सावित्र्युपदेशमाह-**अथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय**-अथाचार्योऽस्मै ब्रह्मचारिणे सावित्रीं सवितृदेवताकां गायत्रीछन्दस्कां तत्सवितुरित्यृचमन्वाहोपादिशति।किम्भूताय प्रत्यङ्मुखाय पश्चिमाभिमुखाय।पुनः किंलक्षणाय उपविष्टाय आसीनाय । क इत्यपेक्षायामुत्तरतोऽग्नेः अग्नेरुत्तरस्यां दिशि । उपसन्नाय पादोपग्रहणादिना भजमानाय ।

पुनः किम्भूताय गुरुं समीक्षमाणाय । पुनः किम्भूताय समीक्षिताय गुरुणा सम्यगवलोकिताय । श्रुतिः ।“ तस्मादेतां गायत्रीमेव सावित्रीमनुब्रूयात्” इति । **मदनपारिजाते शातातपः**–“तत्सवितुर्वरेण्यमिति सावित्रीं ब्राह्मणस्य” इति । **दक्षिणतस्तिष्ठत आसीनाय वैके**–एके आचार्या अग्नेर्दक्षिणतो दक्षिणस्यां दिशि तिष्ठते स्थिताय ऊर्ध्वीभूताय ब्रह्मचारिणे आसीनायोपविष्टाय वा सावित्रीप्रदानमाहुः।“अथ हैके दक्षिणतस्तिष्ठते वाऽऽसीनाय वाऽन्वाहुः”इति श्रुतत्वात् । एकग्रहणाद्विकल्पः । **पच्छोऽर्द्धर्चशः सर्वां च तृतीयेन सहानुवर्तयन्**–सावित्रीप्रदानेऽयं प्रकारः । प्रथमं तावत्पच्छः पादं पादम् । ततोऽर्द्धर्चशः अर्द्धर्चम् अर्द्धर्चम् । ततस्तृतीयेन वारेण सह बटुना सर्वां च सावित्रीमनुवर्तयन् आवर्तयन् पठेत् । अत्राह–**मदनपारिजाते लौगाक्षिः**–“ॐभूर्भुवः स्वरित्युक्त्वा तत्सवितुरिति सावित्रीं त्रिरन्वाह पच्छोऽर्द्धर्चशः सर्वामन्ततः” इति । “तां वै पच्छोऽन्वाहेत्युपक्रम्य अथार्द्धर्चश अथ कृत्स्नाम्” इति श्रुतेः । सावित्रीप्रदानस्य कालविकल्पानाह–**संवत्सरे षण्मास्ये चतुर्विꣳशत्यहे द्वादशाहे वा षडहे त्र्यहे वा**–उपनयनदिनमारभ्य संवत्सरे पूर्णे वा षण्मास्ये मासषट्के वा चतुर्विंशत्यहे वा द्वादशाहे वा षडहे वा त्र्यहे वा सावित्रीमनुब्रूयादाचार्यः । “तां ह स्मै तां पुरा संवत्सरेऽन्वाहुरित्युपक्रम्य अथ षट्सु मासेष्वथ चतुर्विंशत्यहे अथ द्वादशाहे अथ षडहे अथ त्र्यहे” इति श्रुतत्वात् । क्षत्रियवैश्ययोरेते कालविकल्पाः, ब्राह्मणस्य तु वक्ष्यमाणत्वात् । एते कालविकल्पा आचार्यशुश्रूषादिशिष्यगुणतारतम्यापेक्षा इति **हरिहरः** । षण्मास्ये इति षडेव मासाः षण्मास्यं, स्वार्थे तद्धितश्छान्दसश्च वृद्धिलोपः । “छन्दोवत्सूत्राणि भवन्ति” इति वचनात् । ब्राह्मणस्य कालमाह–**सद्यस्त्वेव गायत्रीं ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मण इति श्रुतेः**–तु पुनः ब्राह्मणाय सद्य एव गायत्रीमनुब्रूयात् उपदिशेत्, कुतः । **आग्नेयो वै ब्राह्मण इति श्रुतेः**–आग्नेयः अग्निदेवत्य इति । अतोऽस्मै सद्य एवोपदेशो युक्तः।“आग्नेयो वै ब्राह्मणः सद्यो वा अग्निर्जायते तस्मात्सद्य एव ब्राह्मणायानुब्रूयात्”इति श्रुतेः। **त्रिष्टुभꣳ राजन्यस्य**–त्रिष्टुप् छन्दो यस्याः सा त्रिष्टुप् तां सावित्रीं त्रिष्टुभं देवसवितारित्यादिकां राजन्यस्य क्षत्रियस्यानुब्रूयात् । **पारिजाते** । देवसवितरिति राजन्यस्येति । तꣳसवितुरिति **भर्तृयज्ञेनोदाहृता** । **जगतीं वैश्यस्य** । जगतीछन्दस्कां सावित्रीं “विश्वा रूपाणि प्रतिमुञ्चत”इत्यृचं वैश्यस्यानुब्रूयात् । जगती छन्दो यस्याः सा जगती ताम् । ‘युञ्जते मन’इति **भर्तृयज्ञभाष्ये** । विश्वारूपाणीति वैश्यस्येति **पारिजाते** ।“ सर्वेषां वा गायत्रीम्”गायत्री छन्दो यस्याः सा गायत्री तां सावित्रीं सर्वेषां ब्राह्मणक्षत्रियाविशां **तत्सवितुरित्यृचमनुब्रूयात्** । वाशब्दो विकल्पार्थः । इति श्रीत्रिरग्निचित्सम्राट्स्थपतिश्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे तृतीया कण्डिका ।। ३ ।। ।। * ।।

विश्व०–प्रदक्षि...शति—आचार्यस्य दक्षिणतो बटुरिति शेषः । तत उपयमनकुशादानादि पर्युक्षणान्तमाचार्यस्य कृत्यम् । **अन्व...नान्ते**–कुशहस्तेन बटुनान्वारब्धः आघारावाज्यभागौ महासर्वप्रायश्चित्तं प्रायश्चित्तꣳ स्विष्टकृच्चेत्येता आज्याहुतीर्हुत्वा संस्रवप्राशनादिदक्षिणादानान्ते क्रियाकलापे जात इत्यर्थः । **अथैनꣳसꣳ शास्ति**–बटुमाचार्यः । किमत आह—**ब्रह्मचा...शानेति**–बटुश्च असानि, अश्नानि, करवाणि, न दिवा स्वपानि, यच्छानि, आदधानि, अश्नानि, इति प्रत्याचार्यवचनं ब्रूयात्। प्रणवेन वा प्रत्युत्तरयति । ततो बर्हिर्होमः, प्रणीताविमोकः, कर्मापवर्गसमित्प्रक्षेपः, उत्सर्जनं ब्रह्मणः, उपयमनकुशानामग्नौ प्रक्षेपः । ततो दश ब्राह्मणान्संकल्प्य भोजयेत् । एवं बर्हिर्होमादिब्राह्मणभोजनान्तां कर्मसमाप्तिं विदध्यात्। **इत्युपनयनम्** । इदानीं सावित्रव्रतादेशमाह—**अथास्मै...न्वाह**—अस्मै बटवे आचार्यः । कीदृशाय बटवे सावित्रव्रतादेश इत्याकाङ्क्षायामाह—**उत्त...ताय**–उपलिप्त उद्धतावोक्षितेऽग्निस्थापनादि बर्हिस्तरणान्तमुत्तरतोऽग्नेरित्युक्तेः । नचोपस्थितवह्नेः परित्यागे बीजाभावात्तस्यैवोत्तरत इति वाच्यम्, समाप्तिव्रतादेशादौ वह्निरक्षाविधायकविधेरभावात्तदुपशमे प्रायश्चित्ताद्युपायानुपदेशाच्च वह्न्यन्तरोपस्थितेरावश्यकत्वात् । तेन बर्हिस्तरणान्ते आचार्येण कृते सति ब्रह्मचारी दक्षिणहस्तेनोदकमादायाग्निं प्रति वदेत्। क्षत्रियाद्युपदेशसमयस्य नानात्वेऽप्याग्नेयो वै ब्राह्मण इत्यादिविधिना ब्राह्मणायोपदेशस्य तात्कालिकत्वसमर्थनात्तथैव प्रयोगो लिख्यते । “अग्ने व्रतपते व्रतं चरिष्यामि सावित्रं सद्यः कालं तच्छकेयं तन्मे राध्यताम्” इति व्रतं गृहीत्वोपविश्याचार्यं कुशैरन्वारभेत सर्वास्वाहुतिषु सर्वेषु ब्रह्मचर्यव्रतेषु च । तत आचार्य उपयमनकुशादानाद्याज्यभागान्तं कुर्यात्। एतदेव व्रतादेशनविसर्गेष्वित्युक्तेः पृथिव्या अग्नय इत्याद्याहुतिचतुष्टयं प्रतिवेदमेवं षोडश, प्रजापतये इत्यादि सप्त, महाव्याहृत्यादिस्विष्टकृदन्ताश्चतुर्दश । एताः सर्वेषु व्रतादेशेषु विसर्गेषु च सप्तत्रिंशदाहुतयः । ततः संस्रवप्राशनादिदक्षिणादानान्तम् । सौकर्यार्थं प्रयोगोऽपि लिखितः । ततो ब्रह्मचारिणे सावित्रीप्रदानम् । अग्नेरुत्तरभागे पश्चिमाभिमुखायासीनाय आचार्यमीक्षमाणाय आचार्येणेक्षिताय दक्षिणोत्तराभ्यां कराभ्यां गुरोर्दक्षिणोत्तरयोश्चरणयोः कृतग्रहः उपसन्नः

तस्मै । मतान्तरमुत्थापयति **दक्षि...य वैके**-अग्नेर्दक्षिणतास्तिष्ठते आसीनाय वा ब्रह्मचारिणे एके आचार्याः सावित्रीमन्वाहेत्याहुः । कथमत आह—**पच्छो...र्तयन्**-पच्छः पादशः । ऋषिदैवतंच्छन्दांसि स्मृत्वा त्रिकेणैव जपः कार्य इत्यादिश्रुतत्वात्प्रणवव्याहृतिपूर्वकसावित्र्युपदेशः । तद्यथा । ॐ **भूर्भुवः स्वः तत्सवितुर्वरेण्य**मित्याचार्याच्छ्रुत्वा ब्रह्मचारी वदेत् । पुनर्**भर्गो देवस्य धीमही**त्याचार्यादाकर्ण्य ब्रह्मचारी वदेत् । ततो **धियो यो नः प्रचोदयादि**त्याचार्यानन्तरं ब्रह्मचारी । अयं पच्छः प्रयोगः । एवमर्धर्चप्रयोगः । ततः सर्वां सावित्रीमाचार्यमनु ब्रह्मचारी ब्रूयात्, अस्यां च तृतीयायामावृत्तावाचार्यहस्ताधानाद् ब्रह्मचारिणि गर्भीभूतं ब्रह्मवर्चसं प्रादुरभूत् । तेन स्वर्गी उत्पन्न इतिवत् “सविशेषणे हि” इति न्यायेन द्वितीयं माणवकस्य जन्मेत्युच्यते । गर्भीभूतस्य च तात्कालिकं जन्मानुचितमित्याशङ्कायाह-**संव...त्सरे वा**-सावित्रीमन्वाहेति शेषः । वाशब्दो विकल्पार्थः । इदानीं ब्राह्मणस्य गर्भजन्मनोःसमानकालीनत्वं समर्थयति—**सद्य...यात्**-तुशब्दः पूर्वोक्तपक्षाणां ब्राह्मणव्यतिरिक्तविषयतामाह । तत्र हेतुमाह-**आग्ने...श्रुतेः त्रिष्टु...न्यस्य**-सावित्रीमन्वाहेति शेषः । वृहस्पतिदृष्टामाज्यहोमे वाजपेये विनियुक्तां सवितृदेवत्यां त्रिष्टुप्छन्दस्कां **देवसवित**रित्यादिकां क्षत्रियमाणवकायान्वाहेत्यर्थः । **जग...त्यस्य**-अत्रापि सावित्रीमन्वाहेति शेषः । कीदृशीं रुक्मपाश--प्रतिमोचने विनियुक्तां जगतीच्छन्दस्कां सवितृदेवत्यां **विश्वा रूपाणी**त्येतामृचं वैश्यमाणवकायान्वाहेत्यर्थः। **सर्वे...यत्रीम्**-त्रयाणामपि वर्णानां तत्सवितुरित्यादिकां गायत्रीमेव प्रब्रूयात् । वाशब्दो विकल्पार्थः ॥ ३ ॥

सौकर्याय **पदार्थक्रमो** लिख्यते—अशेषं सावित्र्याः प्रभावं ब्रह्मचारिणे ज्ञापयित्वा प्राङ्मुखं माणवकमुपवेश्य सावित्र्या संध्यावन्दनाग्निपरिचरणं त्र्यायुषान्तं कारयति । सर्वेषां मन्त्राणां स्थाने सावित्र्येवेति विशेषः । अग्निपरिचरणं वक्ष्यते । ततोऽभिवादनम्। अमुकसगोत्रः अमुकप्रवरोऽमुकशर्माऽहं भो आचार्य अभिवादयामि । एवं सर्वेषां वृद्धानामभिवादने प्रयोगः । मात्रादीनां चाभिवादनम् । ततः पात्रं गृहीत्वा भिक्षाप्रार्थनं—“भवति भिक्षां देहि” इति । तिस्रोऽप्रत्याख्यायिन्यः षड्वा दशापरिमिता वा गुर्वर्थं याचेत । भिक्षां भो ३ निवेदयामीत्याचार्याय निवेदयेत् । सुभिक्षां भो ३ प्रतिगृह्णामीत्याचार्यः प्रतिगृह्णीयात् । ततो ब्रह्मचारी वारद्वयमाचम्य स्थाने उपविशति । आचार्यः वर्हिर्होमादिब्राह्मणभोजनान्तं समापयेद् व्रतोदशम् । पुनराचार्य उपलिप्त उद्धतावोक्षितेऽग्निस्थापनं सावित्रव्रतविसर्गार्थं ब्रह्मासनास्तरणादिवर्हिस्तरणान्तं पूर्ववत् । उत्थाय चुलुकेनोदकमादायाग्निं प्रति वदेत् । “अग्ने व्रतपते व्रतमचारिषं सावित्रं सद्यःकालं तदशकं तन्मेऽराधि ।” आचार्यः सावित्र्युपदेशसंध्यावन्दनाग्निकार्यवर्जमुपयमनकुशादानादिब्राह्मणभोजनान्तं पूर्ववत्करोति । ततो दण्डमेखलोपवीतान्**यप्स्वन्त**रिति प्रत्यृचं जले क्षिपेत् । दधिघृतशर्कराणां **नमो वरुणाये**ति प्राशनम् । पुनरुपलेपनादिवर्हिस्तरणान्तमाग्नेयव्रतार्थमाचार्य आचरेत् । मेखलायज्ञोपवीतदण्डान् पूर्ववदुपाददीत । उदकं गृहीत्वाग्निं प्रति ब्रूयात् । “अग्ने व्रतपते व्रतं चरिष्याम्याग्नेयं सांवत्सरिकं तच्छकेयं तन्मे राध्यताम्” । ततः स्थान उपविश्याचार्यमन्वारभेत । तत उपयमनकुशादानादिदक्षिणादानान्तम् । सप्तत्रिंशदाहुतयः पूर्ववत् । ततो ब्रह्मचारी मध्याह्नसंध्यावन्दनं करोति । तत्र **विधिः**—“अथाचम्य कुशैर्युक्ते आसने समुपस्थितः । करसंपुटकं कृत्वा सन्ध्यां नित्यं समाचरेत्॥” **संकल्पः**-शास्त्रोक्तफलावाप्तये माध्याह्निकीं संध्योपास्तिमहं करिष्ये । “इत्थं कृत्वा तु संकल्पं कुशानादाय पाणिना । नद्यां नद्युत्थतोयैस्तु गृहे वामकरे स्थितैः॥ त्रिभिर्व्याहृतिमन्त्रैस्तु प्रत्येकं मिलितैश्च तैः। गायत्र्या च ततः कुर्यादभिषेकं तु तज्जलैः॥” ततः **आवाहनम्** “सावित्रीं त्र्यक्षरां शुक्लां शुक्लवस्त्रां त्रिलोचनाम् । शूलहस्तां वृषारूढां रुद्राणीं रुद्रदेवताम्॥ यजुर्वेदकृतोत्सङ्गां जटामुकुटमण्डिताम् । वरदां त्र्यक्षरां साक्षाद्देवीमावाहयाम्यहम् ॥ ” त्र्यक्षरां प्रणवात्मिकाम् । “ततो भूर्भुवःस्वरिति गायत्र्या च शिखां स्पृशेत् । उपवीती बद्धशिखः समाचम्य यथागमम् ॥ पवित्रपाणिः--सोऽङ्कार नारायणमनुस्मरेत् । अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥” “ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ॥” “दर्भेण सोदकेनैव दद्यादासनमात्मनः । पृथ्वि त्वया धृता लोका-देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् । ओङ्कारस्य ऋषिर्ब्रह्मा देवोऽग्निस्तस्य कथ्यते ॥ गायत्री च भवेच्छन्दो नियोगः सर्वकर्मसु । त्रिमात्रस्तु प्रयोक्तव्य आरम्भे सर्वकर्मणाम् ॥ व्याहृतीनां च सर्वेषामार्षं चैव प्रजापतिः । गायत्र्युष्णिगनुष्टुप् च बृहती त्रिष्टुबेव च ॥ पङ्क्तिश्च जगती चैव छन्दांस्येतानि सप्त वै । अग्निर्वायुस्तथा सूर्यो बृहस्पतिरपांपतिः ॥ इन्द्रश्च विश्वेदेवाश्च देवताः समुदाहृताः । प्राणस्यायमने चैव विनियोग उदाहृतः ॥ एतास्तु व्याहृतीः सप्त यः स्मरेत्प्राणसंयमे । उपासितं भवेत्तेन विश्वं भुवनसप्तकम् ॥ भूर्लोकं पादयोर्न्यस्य भुवर्लोकं च जानुनोः। स्वर्लोकं गुह्यदेशे तु नाभिदेशे महस्तथा॥ जनलोकं च हृदये कण्ठदेशे तपस्तथा । भ्रुवोर्ललाटसंधौ च सत्यलोकं प्रतिष्ठितम् ॥ सविता देवता यस्या मुखमग्निस्त्रयात्मकम् । विश्वामित्र ऋषिश्छन्दो गायत्री सा विशिष्यते ॥ जपहोमोपनयने विनियोगो विशिष्यते । भूर्विन्यस्य हृदये भुवः शिरसि विन्यसेत् ॥ स्वरितीदं शिखायां च गायत्र्याः प्रथमं पदम् । विन्यसेत्कवचे धीमान् द्वितीयं नेत्रयोर्न्यसेत् ॥ तृतीयेनास्त्रविन्यास एष न्यासोऽघनाशनः ।” ॐ **भूः पादयोः** ।

भुवः जानुनोः । स्वः गुह्ये । महः नाभौ । जनः हृदये । तपः कण्ठे । सत्यं भूललाटसंधौ । भूः हृदयाय नमः । भुवः शिरसे स्वाहा । स्वः शिखायै वषट् । तत्सवितुर्वरेण्यं कवचाय हुम् । भर्गो देवस्य धीमहि नेत्रत्रयाय वौषट् । धियो यो नः प्रचोदयात् अस्त्राय फट् । शिरोन्यासः । ॐ आपो गुह्ये । ज्योतिश्चक्षुषी । रसो मुखम् । अमृतं जानुनी । ब्रह्म हृदये । भूः पादयोः । भुवः नाभौ । स्वर्ललाटे । ॐकारं मूर्ध्नि । एवम् ऋष्यादिकं स्मृत्वा न्यासं कृत्वा करौ संपुटीकृत्य मध्याह्नसंध्यां सावित्रीं रुद्राणीं रुद्रदेवतामाह्वयामि । "आगच्छ वरदे देवि त्र्यक्षरे रुद्रवादिनि । सावित्रि छन्दसां माता रुद्रयोने नमोऽस्तु ते ॥" ततो भूर्भुवः स्वरित्यपोऽभिमन्त्र्य शिरसः प्रदक्षिणं परिक्षिपेत् । **अथप्राणायामः** । **याज्ञवल्क्यः**—"सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह।त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते॥"स्मृत्यन्तरे-"दक्षिणे श्वासमाहृत्य वामे चैव विसर्जयेत्।अनेन विधिना चैव प्राणायामो विधीयते॥अनामिका कनिष्ठा तु अङ्गुष्ठस्तु तृतीयकः। नासिकायां निरुन्धीत तर्जनीमध्यमामृते॥अङ्गुष्ठेन पुटं ग्राह्यं नासाया दक्षिणं पुनः । कनिष्ठानामिकाभ्यां तु वामं प्राणस्य संग्रहे॥आदानरोधमुत्सर्गं वायोस्त्रिस्त्रिः समभ्यसेत् । ब्रह्माणं केशवं शम्भुं ध्यायेदेताननुक्रमात् ॥ रक्तं प्रजापतिं ध्यायेद्विष्णुं नीलोत्पलप्रभम् । शंकरं त्र्यम्बकं श्वेतं ध्यायन्मुच्येत बन्धनात् । षोडशाक्षरकं ब्रह्म गायत्र्यास्तु शिरः स्मृतम् । सशिरा चैव गायत्री यैर्विप्रैरवधारिता ॥ तेजः संबन्धनिर्मुक्ताः परं ब्रह्म विशन्ति ते । आपोज्योतिरित्येष मन्त्रो वै तैत्तिरीयके ॥ अस्य-प्रजापतेरार्षं छन्दोहीनं यजुर्यतः ।"ब्रह्माग्निवायुसूर्याश्च देवताः प्राणायामे विनियोगः । "प्राणायामत्रयं कार्यं संध्यासु च तिसृष्वपि । नित्ये देवार्चने होमे संध्यायां श्राद्धकर्मणि ॥ स्नाने दाने तथा ध्याने प्राणायामास्त्रयः स्मृताः । प्राणस्यायमनं कृत्वा आचामेत्प्रयतोऽपि सन् । **आपः पुनन्त्वि**त्याचमनमन्त्रः । अस्य नारायण ऋषिः आपो देवता अनुष्टुप् छन्दः आचमने विनियोगः। "आपः पुनन्तु पृथ्वीं पृथ्वी पूता पुनातु माम् । पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूतं पुनातु माम् । यदुच्छिष्टमभोज्यं वा यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापो असतां च प्रतिग्रहः स्वाहा" **शौनकः**—"सायमग्निश्चमेत्युक्त्वा प्रातः सूर्येत्यपः पिबेत् । आपः पुनन्तु मध्याह्ने एतैश्चाचमनं चरेत् ॥" ततो द्विराचमनम् । अथ **मार्जनम्** । **ब्रह्मण्डपुराणे**—"नद्यां तीर्थे ह्रदे वाथ भाजने मृन्मयेऽथवा । औदुम्बरेऽथ सौवर्णे राजते दारवे जलम् । कृत्वाथ वामहस्तेन संध्योपास्तिं समाचरेत् । आपोहिष्ठेति तिसृभिर्ऋग्भिस्तु प्रयतः शुचिः ॥ नवप्रणवयुक्ताभिर्जलं शिरसि निक्षिपेत् ।" प्रतिपादं प्रणवान्वयान्नवप्रणवता । पक्षान्तरमपि—"ऋगन्ते मार्जनं कुर्यात्पादान्ते वा समाहितः । आपोहिष्ठेत्यृचा कार्यं मार्जनं तु कुशोदकैः ॥ तच्च मार्जनजलं प्रणवव्याहृतिपूर्विकया गायत्र्या स्पृशेत् । **बौधायनः**—"दत्त्वा चाभिमुखं तोयं मूर्ध्नि ब्रह्ममुखेन तु । आपोहिष्ठेतिसूक्तेन दर्भैर्मार्जनमाचरेत् ॥ यस्य क्षयायेति जलं सकुशं प्रक्षिपेत्त्वधः ।" **आपो हिष्ठेति** तिसृणां सिन्धुद्वीपं ऋषिः आपो देवता जलादानक्षेपयोर्विनियोगः । **द्रुपदादिवेति** प्रजापत्याश्विसरस्वत्य ऋषयः । आपो देवता । अनुष्टुप् छन्दः अञ्जलिप्रक्षेपे विनियोगः । **ऋतं च सत्यं चे**त्यघमर्षण ऋषिः । भाववृत्तिर्देवता अनुष्टुप्छन्दः प्रक्षेपे विनियोगः। "ॐऋतं च सत्यं चा०मथो स्वः ।" **कात्यायनः**--द्रुपदा नाम गायत्री यजुर्वेदे प्रतिष्ठिता । सकृदेव जपात्तस्या ब्रह्महत्यां व्यपोहति ॥ ऋतं चेति पटन्त्यस्मात्पापमामरणान्तिकम् । मनोवाक्कायजं सर्वं मर्षयेदघमर्षणम् ॥" आपः पचतीत्यनेन गायत्रीशिरसा चाघमर्षणम् । ॐ आपः पचति भूतानि गुहायां पुरुषोत्तमः। त्वं ब्रह्म त्वं यज्ञस्त्वं विष्णुस्त्वं रुद्रस्त्वं वषट्कारः ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् । अथ **सूर्यार्घः**—प्रणवेन व्याहृत्या गायत्र्या चाञ्जलिनाम्बुमिश्राणि पुष्पाणि सूर्याभिमुखस्तिष्ठन् क्षिपेत् एकमञ्जलिम् । **कात्यायनः**--"उत्थायार्कं प्रति प्रोहेत्त्रिकेणाञ्जलिंसंभ्मसः" **व्यासः**--"कराभ्यां तोयमादाय गायत्र्या चाभिमन्त्रितम् । आदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वं संध्ययोः क्षिपेत् ॥ मध्याह्ने तु सकृदेव क्षेपणीयं द्विजातिभिः ।" तेनाञ्जलिमित्येकवचनं मध्याह्नविषयम् । **अथ सूर्योपस्थानम्**—ऊर्ध्ववाहुः सूर्यमुदीक्षन्**नुद्वयमुदुत्यं चित्रं तच्चक्षु**रिति । **उद्वयं** प्रस्कण्व ऋषिः सूर्यो देवता अनुष्टुप्छन्दः । **उदुत्यं** प्रस्कण्व ऋषिः । सूर्यो देवता। गायत्री छन्दः । **चित्रंदेवानां** कुश ऋषिः । सूर्यो देवता । अनुष्टुप् छन्दः । **तच्चक्षु**रिति वसिष्ठऋषिः सूर्यो देवता । परोष्णिक् छन्दः चतुर्णामपि सूर्योपस्थाने विनियोगः । **उद्वयं**०—उपस्थानम् । अथ जपः । **तेजोऽसीति** परमेष्ठी, आज्यं,गायत्री आवाहने । तुरीयस्य विमल ऋषिः,परमात्मा देवता, गायत्री छन्दः उपस्थाने विनियोगः । ततो गायत्रीजपः । **प्रणवन्यासः**। अकारं नाभौ । उकारं हृदये। मकारं मूर्ध्नि । महाव्याहृतित्रयन्यासः । भूः अङ्गुष्ठयोः। भुवस्तर्जनिकाद्वये । ज्येष्ठाङ्गुलिद्वये धीमान् स्वःपदं विनियोजयेत् । भूः हृदये । भुवः शिरसि । स्वः शिखायाम् । तत्सवि०ण्यं कवचे । भर्गोदे०हि नेत्रयोः । धियो०त् दिग्विदिक्षु । अथ **वर्णन्यासः**। तकारं पादाङ्गुष्ठयोः । सकारं गुल्फयोः । विकारं जङ्घयोः । तुकारं जान्वोः। वकारमूर्वोः । रेकारं गुदे । णिकारं लिङ्गे । यकारं कट्याम्। भकारं नाभौ । गोकारमुदरे। देकारं स्तनयोः । वकारं हृदि । स्यकारं कण्ठे । धीकारं मुखे । मकारं तालुदेशे । हिकारं नासिकाग्रे । धिकारं नेत्रयोः । योकारं भ्रुवोः । द्वितीयं योकारं ललाटे । नकारं प्राङ्मुखे । प्रकारं दक्षिणे मुखे । चोकारं पश्चिमे मुखे । दकारमुत्तरे मुखे । याकारं मूर्ध्नि । व्यञ्जनतकारं सर्वतः। **पदन्यासः**—तत शिरसि । सवितुः भ्रूमध्ये । वरेण्यं नेत्रयोः। भर्गः वक्त्रे । देवस्य कण्ठे । धीमहि हृदये । धियः नाभौ । यः गुह्ये । नः जान्वोः । प्रचोदयात् पादयोः । ओंकारं चिन्तयेत्सर्वाङ्गे पादाङ्गुष्ठद्वये

द्विजः । सकारं गुह्यदेशे तु विकारं जङ्घयोर्न्यसेत् ॥ विद्धि तुकारं जान्वोस्तु वकारं चोरुदेशतः । रेकारं विन्यसेद्गुह्ये णिकारं वृषणे न्यसेत् । कटिदेशे तु यकारं भकारं नाभिमण्डले । गोंकारं जठरे योगी देकारं स्तनयोर्न्यसेत् । वकारं हृदये न्यस्य स्यकारं कण्ठदेशतः । धीकारं तु मुखे विद्यान्मकारं तालुदेशतः । हिकारं नासिकाग्रे तु धिकारं नयनद्वये । भ्रुवोर्मध्ये योकारं ललाटे तु द्वितीयकम् । पूर्वानने नकारं च प्रकारं दक्षिणानने । उत्तरास्ये च चोकारं दकारं पश्चिमानने । विन्यसेन्मूर्ध्नि याकारं सर्वव्यापिनमीश्वरम् ” तथा **पदन्यासः**—“शिरोभ्रूमध्यनयनवक्त्रकण्ठेषु वै क्रमात् । हृन्नाभिगुह्यजानूनां पादयोश्च क्रमान्न्यसेत् । त्रिकेणैव जपः कार्यो जपयज्ञप्रसिद्धये । प्रणवव्याहृतियुतां स्वाहान्तां होमकर्मणि ” त्रिको नाम प्रणवो व्याहृतयस्तिस्रो गायत्री चेति । एवकारस्तु प्रकारान्तरनिषेधाय । अथ **जपसंख्या**—“ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत् । वानप्रस्थो यतिश्चैव द्विसहस्राधिकं जपेत् ॥ ” जपानन्तरं **विश्वतश्चक्षु**रिति विश्वकर्मा भौवन ऋषिः विश्वकर्मा देवता उपस्थाने विनियोगः । विश्वतश्चक्षुरित्युपस्थानं, ततः प्रदक्षिणा । **देवा गातुविद** इति मनसस्पतिर्वातो विराट् गायत्री विसर्जने । देवागातु० वातेधाः । गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदासि नहि पद्यसे । नमस्ते तुरीयाय दर्शताय पदाय परो रजसे सावदों ३ विसर्जनम् । अनेन जपेन रुद्ररूपी सूर्यः प्रीयतामित्युक्त्वा भूर्भुवःस्वरिति हस्तगृहीतमुदकं क्षिपेत् । **संध्याप्रार्थनम्**—“यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् । तत्सर्वं क्षम्यतां देवि क (श्य) पिप्रिय (नि) वासिनि ॥” ततः **संध्याविसर्जनम्**—“उत्तरे शिखरे जाता भूम्यां पर्वतवासिनि । ब्रह्मणा समनुज्ञाता गच्छ देवि यथासुखम्” इत्युदकप्रक्षेपः । इति **मध्याह्नसंध्या**॥ अथ सायंप्रातःसंध्ययोर्विशेषः-“उपात्तदुरितक्षयार्थं ब्रह्मावाप्त्यै सायंसंध्योपासनमहं करिष्ये” इति संकल्पः । “वृद्धां सरस्वतीं कृष्णां पीतवस्त्रां चतुर्भुजाम् । शङ्खचक्रगदाशार्ङ्गपद्महस्तां गरुडवाहिनीम् । वदर्याश्रमवासां तां वनमालाविभूषिताम् । वैष्णवीं त्र्यक्षरां शान्तां देवीमावाहयाम्यहम् ॥ प्रातःसंध्या तु गायत्री सावित्री मध्यमा स्मृता । या भवेत्पश्चिमा संध्या सा च देवी सरस्वती ॥ आगच्छ वरदे देवि त्र्यक्षरे विष्णुवादिनि । सरस्वाति छन्दसां मातर्विष्णुयोने नमोऽस्तु ते॥”ततः प्राणायामादि । **अग्निश्चमे**ति नारायण ऋषिः अग्निर्देवता प्रकृतिश्छन्दः आचमने विनियोगः । “अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां, यदह्ना पापमकार्षं, मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना, अहस्तदवलुम्पतु, यत्किंच दुरितं मयि, इदमहं माममृतयोनौ, सत्ये ज्योतिषि जुहोमि स्वाहा ।” ततो द्विराचमनादि । **इमं मे वरुणे**ति चतसृभिरुपस्थानम् । **देवलः**—“मित्रस्य चर्षणी तिस्रो वसवस्त्वेति चोदये । इमं मेति चतुष्केण सायं कुर्यादुपस्थितिम् ” अथवा माध्याह्निकमेवोपस्थानम् । **व्यासः**—“संध्यात्रयेऽप्येकमेव उपस्थानं प्रचक्षते । अथोद्वयसथोदुत्यं चित्रं तच्चक्षुरित्यपि । तिष्ठेद्दिवाकरं प्रातः सायं मध्याह्न एव च ।” केचित्तूद्वयमित्याद्युपस्थानं सायं प्रातःसंध्ययोरुक्तोपस्थानानन्तरं भवतीत्याहुः । “सायंसंध्याङ्गभूतेन गायत्र्यास्तु जपेन च । यथासंख्येन जाप्येन विष्णुर्मे प्रीयतामिति ।” विशेषश्च संकल्पावाहनाचमनोपस्थाननिवेदनेषु । इति **सायंसंध्या** ॥ प्रातःसंध्यायां तु विशेषः—उपात्तदुरितक्षयार्थं ब्रह्मावाप्त्यै प्रातःसंध्योपासनमहं करिष्ये । **सूर्यश्चमे**ति नारायण ऋषिः सूर्यो देवता अनुष्टुप् छन्दः आचमने विनियोगः । सूर्यश्च मा मन्युश्च मन्युपतयश्च० सूर्ये ज्योतिषि जुहोमि स्वाहा । **मित्रस्य चर्षणी धृत** इति तिसृभि**र्वसवस्त्वेति** चोपस्थानम् । अथवा मध्याह्नसंध्यावत् समुच्चितं वा । अनेन गायत्रीजपेन प्रातःसंध्याङ्गभूतेन ब्रह्मस्वरूपी सविता देवता प्रीयताम् । शेषं मध्याह्नसंध्यावत् इति **प्रातःसंध्या** । अथ संक्षेपतः **संध्यावन्दनविधिः**—आचमन**मिदं विष्णु**रिति मार्जनं, प्राणायामः, आचमनं, पात्रे उदकं गृहीत्वा ॐकारेण सावित्र्या **आपोहिष्ठे**ति तिसृभिश्च मार्जनं, **द्रुपदादिवे**त्याद्यघमर्षणम्, ॐकारेण व्याहृत्या सावित्र्या च सूर्यार्घः । **उद्वयमुदुत्यं चित्रं तच्चक्षु**रित्युपस्थानं, ततो यथाशक्ति गायत्रीजपः । जपनिवेदनम् । इति **माध्याह्नसंध्या** । एवं सायंप्रातःसंध्ययोरप्यूहनीयः संक्षेपः । आग्नेयव्रतस्थवटोर्व्रतस्य संध्यावन्दनकर्तव्यताधीनत्वात्संध्यावन्दनं व्यलेखि । इति तृतीया कण्डिका ॥ ३ ॥

अत्र समिदाधानम् ॥ १ ॥ पाणिनाऽग्निं परिसमूहति अग्ने सुश्रवः सुश्रवसं मा कुरु यथा त्वमग्ने सुश्रवः सुश्रवा अस्येवं माᳬ सुश्रवः सौश्रवसं कुरु यथा त्वमग्ने देवानां यज्ञस्य निधिपा अस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासमिति ॥ २ ॥ प्रदक्षिणमग्निं पर्युक्ष्योत्ति+ष्ठन्त्समिधमादधाति अग्नये समिधम*हार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन०

+ पर्युक्ष्योत्थायेत्यपि बहुसम्मतः पाठः ।

* माहार्षमित्यपि पाठः ।

समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासꣳ स्वाहेति ॥३॥ एवं द्वितीयां तथा तृतीयाम् ॥ ४ ॥ एषा त इति वा समुच्चयो वा ॥ ५ ॥ पूर्ववत्परिसमूहनपर्युक्षणे ॥ ६ ॥ पाणी प्रतप्य मुखं विमृष्टे तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि व्वर्चोदा अग्नेऽसि व्वर्चो मे देहि । अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॥ ७ ॥ मेधां मे देवी सरस्वती आदधातु मेधामश्विनौ देवावाधत्तां पुष्करस्रजाविति ॥ ८ ॥ (अङ्गान्यालभ्य जपत्यङ्गानि च म आप्यायन्तां वाक्प्राणश्चक्षुः श्रोत्रं यशो बलमिति त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेꣳसे हृदि च त्र्यायुषमिति प्रतिमन्त्रम्) ॥ ४ ॥ ॥ * ॥

कर्कः—**अत्र समिदाधानम्**—अत्रावसर इति केचित् तन्न, पाठादेव तत्प्राप्तेः । तेनात्रशब्दोऽग्निपरो द्रष्टव्यः । **पाणिनाऽग्निं परिसमूहति अग्ने सुश्रवः सुश्रवसं मा कुरु यथा त्वमग्ने सुश्रवः सुश्रवा असीति**—एवमादिभिर्मन्त्रैः प्रतिमन्त्रं परिसमूहनं च सन्धुक्षणम् । पाणिनेत्येकवचनमेकत्वनियमार्थम् । उभाभ्यामपि सन्धुक्षणप्रसिद्धिरस्ति । **प्रदक्षिणमग्निं पर्युक्ष्योत्तिष्ठन्त्समिधमादधाति**—अग्निं पर्युक्ष्य तिष्ठन् समिधमादधाति । **अग्नये समिधमहार्षमिति**—स्वाहाकारान्तेन । **एवं द्वितीयां तथा तृतीयाम्**—समिधमादधाति । **एषात इति वा**—मन्त्रेण समिदाधानम् । **समुच्चयो वा**—द्वयोरपि मन्त्रयोः । **पूर्ववत्परिसमूहनपर्युक्षणे**—अग्नेः कर्तव्ये । **पाणी प्रतप्य मुखं विमृष्टे तनूपा अग्नेऽसीति**—वाक्यभेदाच्च प्रतिवाक्यं पाणी प्रतप्य मुखविमार्जनम् । **मेधां मे देवः सविता मेधां मे देवी सरस्वती**—इत्यनयोरादधात्वित्यध्याहारः साकाङ्क्षत्वात् । अत्र प्रसिद्ध्या त्र्यायुषकरणानन्तरं गोत्रनामपूर्वकं वैश्वानरादीनामभिवादनम् । त्र्यायुषकरणमनुक्तमपि सूत्रकारेण ॥ ४ ॥ * ॥

जय०—तत्समिदाधानं कथं कर्तव्यमित्यपेक्षायामाह—**पाणिनेति**—तत्रैकवचनमेकत्वनियमार्थम् । उभाभ्यामपि दृश्यते सन्धुक्षणम् । तच्च समूहनशब्देनाभिधीयते । तत्केन मन्त्रेण भवतीति मन्त्रो वक्ष्यते । **अग्ने सुश्रवः**—इत्यादिभिः पञ्चमन्त्रैः । अथ मन्त्रार्थः । तत्र प्रजापतिर्यजुः अग्निः तत्समिन्धने० । हे अग्ने हे सुश्रवः शोभनकीर्ते मा मां सुश्रवसं सुकीर्तिं कुरु । किञ्च हे अग्ने सुश्रवः यथा येन गुणेन त्वं सुश्रवा असि । एवंगुणाधानेन मा मां सुश्रवःसौश्रवसम् सुश्रवाश्चासौ सौश्रवसश्च तम् । तत्र सुश्रवाः बटुः स्वयम् । सुश्रवा गुरुस्तस्यायं सौश्रवसः ममाचार्यमपि सुश्रवसं कृत्वा तदीयत्वेन मां सौश्रवसं कुर्वित्यर्थः । किञ्च हे अग्ने यथा त्वं दीव्यन्ति प्रकाशयन्त इति देवा अङ्गानि इन्द्रादयो वा यज्ञस्य चाङ्गिनो वेदस्य विष्णोर्वा निधिपाः निधीनां मन्त्राणामधिष्ठानमसि । एवमहं वेदस्य स्वाङ्गस्य मनुष्याणां च तदध्येतृणां निधिपाः वेदस्य निधिरविकरणम् । मनुष्याणां पालकश्च भूयासमिति । प्रदक्षिणं पर्युक्ष्य समिधमादधाति अग्नौ प्रक्षिपति । **अग्नये समिधमित्यादि स्वाहान्तेन**—मन्त्रेण । अस्यार्थः । तत्र प्रजापतिराकृतिः समित् तदाधाने० । हे देवा इमां समिधमग्नये अग्न्यर्थम् अहार्षम् आहृतवानस्मि । किम्भूताय । बृहते परिपूर्णाय जातवेदसे जातं वेदो धनं यस्मात्तस्मै समिन्धे दीप्ये । अनिराकरिष्णुः गुरूपदिष्टधर्माद्यविस्मरणशीलः ब्रह्मवर्चसी याजनादितेजोयुक्तः । शिष्टं स्पष्टम् । **एवं द्वितीयां**—समिधमादधाति । **तथा तृतीयाम्** । **एषा त इति वा**

समिदाधाने मन्त्रः । **समुच्चयो वा**–उभयोः । **परिसमूहनपर्युक्षणे** प्राग्वत् अग्नेः कर्तव्ये । पाणी अग्नौ प्रतप्य ताभ्यां स्वं मुखं विमृष्टे मार्जयति । **तनूपाः**प्रभृतिभिः सप्तभिर्मन्त्रवाक्यैर्वाक्यभेदात् प्रतिवाक्यं पाण्योः प्रतपनं मुखविमार्जनं च । तनूपा इत्येतस्य स्वशाखीयत्वात्प्रतीकग्रहणे प्राप्ते मन्त्रवाक्यचतुष्टयस्योपयोगात्सर्वपाठः । तत्र **तनूपा अग्नेऽसी**त्यादयः स्पष्टाः । तत्र प्रजापतिर्यजुः अग्निराहवनीयोपस्थाने० । मेधामित्यस्यार्थः । तत्र प्रजापतिरनुष्टुप् लिङ्गोक्ता मुखविमार्जने० । देवो द्युतिमान् सविता सूर्यो मे मह्यं मेधां धारणावतीं बुद्धिम्, तथा देवी दीप्यमाना सरस्वती मेधां साकाङ्क्षत्वादुभयोरादधात्वित्यध्याहारः । तथा देवौ कान्तौ अश्विनौ दस्रौ मे मह्यम् मेधाम् आधत्ताम् सम्पादयताम् । एतानि सप्त वाक्यानि । अत्राङ्गालम्भनत्र्यायुषकरणाभिवादनानि ग्रन्थकारानुक्तान्यप्याचारतोऽनुष्ठेयानि अविरोधात् । तत्राभिवादनं गोत्रनामोच्चारपूर्वकम् पादोपसंग्रहोऽग्न्यादीनाम , अङ्गालम्भत्र्यायुषयोर्मन्त्रौ सूत्रकारान्तरप्रदर्शितौ ग्राह्यौ । तद्यथा–**अङ्गान्यालभ्य जपत्यङ्गानि च म अप्यायन्ताम् वाक् प्राणश्चक्षुः श्रोत्रं यशोबलमिति त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेंऽसे हृदि च त्र्यायुषमिति प्रतिमन्त्रम्** । तत्र वाक् च म अप्यायतामिति क्रियाविपरिणामं कुर्यात् । अस्यार्थः सुगमः । तत्र प्रजापतिर्यजुर्लिङ्गोक्ता अङ्गाप्यायायने० । त्र्यायुषमिति नारायण उष्णिक् लिङ्गोक्ता भस्मतिलके० ॥ ४ ॥ * ॥

हरि०–**अत्र समिदाधानम्**–अत्र सावित्रीप्रदानोत्तरकाले समिधामाधानं प्रक्षेपो ब्रह्मचारिणो भवति । अत्राग्नाविति भाष्यकारः । अत्रावसरम्य पाठादेव सिद्धेः । **पाणिनाऽग्निं परिसमूहति**–पाणिना दक्षिणहस्तेन अग्निं प्रकृतहोमाधिकरणं परिसमूहति सन्धुक्षयति । इन्धनप्रक्षेपेण वक्ष्यमाणैः पञ्चभिर्मन्त्रैः यथा–**अग्ने सुश्रवसं सुश्रवः मा कुरु** १ । **यथा त्वमग्ने सुश्रवः सुश्रवा असि** २ **एवं माꣳसुश्रवःसौश्रवसं कुरु** ३ **यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि** ४ **एवमहं मनुष्याणां वेदस्य निधिपो भूयासम्** ५ । केचित्परिसमूहने त्रीन्मन्त्रान् मन्यन्ते । तद्यथा-अग्ने सुश्रव इत्यारभ्य **सुश्रवसं मा कुरु** इत्येकम् । यथात्वमग्ने इत्यारभ्य **सौश्रवसं कुरु** इत्येवं द्वितीयम् । **यथा त्वमग्ने देवानामि**त्यादि भूयासमित्यन्तं तृतीयमिति । **प्रदक्षिणमग्निं पर्युक्ष्योत्थाय समिधमादधात्यग्नये समिधामेति**–ततः प्रदक्षिणं यथा भवति तथाऽग्निं पर्युक्ष्य दक्षिणहस्तगृहीतेनोदकेन परिषिच्य उत्थाय ऊर्द्ध्वीभूय प्राङ्मुखास्तिष्ठन् समिधं समिध्यते दीप्यते अग्निरनयेति समित् तां समिधम् आदधाति प्रक्षिपति । समिल्लक्षणं **छन्दोगपरिशिष्टे**–"नाङ्गुष्ठादधिका कार्या समित्स्थूलतया क्वचित् । नवियुक्ता त्वचा चैव न सकीटा च पाटिता ॥ प्रादेशान्नाधिका न्यूना न तथा स्याद्द्विशाखिका । न सपर्णा च निर्वीर्या होमेषु न विजानता" **ब्रह्मपुराणे**–" पालाशाश्वत्थन्यग्रोधप्लक्षवैकङ्कतोद्भवाः । अश्वत्थोदुम्बरौ बिल्वश्चन्दनः सरलस्तथा । शालश्च देवदारुश्च खादिरश्चोते याज्ञिकाः ।" **मरीचिः**–" विशीर्णा विदला ह्रस्वा वक्राः ससुषिराः कृशाः । दीर्घाः स्थूला घुणैर्जुष्टाः कर्मसिद्धिविनाशिकाः" अस्य पूर्वश्लोकः । " प्रागग्राः समिधो देयास्ताश्च काम्येष्वपाटिताः । काम्येषु च सवल्कार्द्रा विपरीता जिघांसतः ॥" इति । केन मन्त्रेण **अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासꣳ स्वाहे**त्यनेन मन्त्रेण । **एवं द्वितीयां तथा तृतीयामेषात इति वा समुच्चयो वा**–एवमनेनैव मन्त्रेण द्वितीयां समिधमादधाति, तथा तेनैव मन्त्रेण तृतीयाम् । मन्त्रविकल्पमाह–**एषा ते अग्ने समिदि**त्यादि **आचप्यासिषीमही**त्यन्तेन वा मन्त्रेण । अथवा **अग्नये समिधमित्येषा त** इति द्वयोर्मन्त्रयोः

समिदाधाने समुच्चयः ऐक्यम् । ततश्च मन्त्रद्वयान्ते समित्प्रक्षेपः । इति त्रयो मन्त्रविकल्पाः । **पूर्ववत्परिसमूहनपर्युक्षणे**—पूर्ववत् "अग्ने सुश्रव" इत्यादिभिः पञ्चभिर्मन्त्रैः परिसमूहनं पर्युक्षणमपि पूर्ववत्कुर्यात् । **पाणी प्रतप्य मुखं विमृष्टे तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि अग्ने यन्मे तन्वा ऊनं तन्म आपृण मेधां मे देवः सविता आदधातु मेधां मे देवी सरस्वती आदधातु मेधामश्विनौ देवावाधत्तां पुष्करस्रजाविति**—पाणी हस्तौ प्रतप्य तूष्णीमग्नौ तापयित्वा **तनूपा अग्नेऽसी**त्यादिभिः सप्तभिर्मन्त्रैः प्रतिमन्त्रं पाणिभ्यां मुखं विमृष्टे । ललाटादिचिबुकान्तं प्रोञ्छति । तत्र मेधां मे देवः सविता, मेधां देवी सरस्वती अनयोरादधात्वित्यध्याहारः । **अङ्गान्यालभ्य जपत्यङ्गानि च म आप्यायन्तां वाक्प्राणश्चक्षुः श्रोत्रं यशोबलमिति**—" अङ्गानि च मे " इत्यनेन मन्त्रेण शिरःप्रभृतीनि पादान्तानि अङ्गान्यालभते । एवं वाक् इत्यनेन मुखं, प्राण इत्यनेन नासिके युगपत् , चक्षुरित्यनेन चक्षुषी युगपत्, श्रोत्रमित्यनेन श्रवणे, मन्त्रावृत्त्या यशोबलमित्यस्य पाठमात्रम् । **त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेंऽसे हृदि च त्र्यायुषमिति प्रतिमन्त्रम्**—तिलकानि करोति । त्र्यायुषमि त्येतैश्चतुर्भिर्मन्त्रपादैः अनामिकागृहीतेन भस्मना ललाटे ग्रीवायां दक्षिणेंऽसे हृदये प्रतिपादं त्र्यायुषाणि कुरुते । अत्र त्र्यायुषकरणं सूत्रकारानुक्तमपि प्रसिद्धत्वात् शिष्टपरम्पराचरितत्वात्क्रियते । ततो ब्रह्मचारी सन्ध्यामुपास्याग्निकार्यं कृत्वा गुरूपसङ्ग्रहणं, वृद्धतरेष्वभिवादनम् , वृद्धेषु नमस्कारं कुर्यात्पर्यायेण । अत्र स्मृत्यन्तरोक्तमभिवादनं लिख्यते । " ततोऽभिवादयेद्वृद्धानसावहमिति ब्रुवन् " इति याज्ञवल्क्यादिस्मृतिप्रणीतस्याभिवादनप्रयोगो यथा—उपसङ्ग्रहणं नाम अमुकगोत्रोऽमुकेत्येतावत्प्रवरः अमुकशर्माऽहं भो ३ श्रीहरिहरशर्मन् त्वामभिवादये इत्युक्त्वा कर्णौ स्पृष्ट्वा दक्षिणोत्तरपाणिभ्यां दक्षिणपाणिना गुरोर्दक्षिणं पादं सव्येन सव्यं गृहीत्वा शिरोऽवनमनम् । अभिवादने पादग्रहणं नास्ति पादस्पर्शनं कार्यम् । आयुष्मान् भव सौम्यामुकशर्मा३न् इति प्लुतान्तमुक्त्वा अमुकशर्मन्निति प्रत्यभिवादः कार्य्यः । आयुष्मान् भव सौम्येति प्रत्यभिवादः । अत्र गुरवो—माता, स्तन्यदात्री च, पिता, पितामहः, प्रपितामहः, मातामहः, अन्नदाता, भयत्राता, आचार्यश्चोपनेता च, मन्त्रविद्योपदेष्टा च तेषां पत्न्यश्चोपसङ्ग्राह्याः । एतेन समावृत्तेन च । बाले समवयस्के वाऽध्यापके गुरुवच्चरेत् । मातुलाश्च पितृव्याश्च श्वशुराश्च यवीयांसोऽपि प्रत्युत्थायाभिवाद्याः । उपाध्यायाः, ऋत्विजो, ज्येष्ठभ्रातरश्च, सर्वेषां पत्न्यश्च, एवं मातृष्वसा सवर्णा, पितृष्वसा च, सवर्णा भ्रातृभार्या च, नित्यमभिवाद्याः । "विप्रोष्य तूपसङ्ग्राह्या ज्ञातिसम्बन्धियोषितः । विप्रोष्य विप्रं कुशलं पृच्छेन्नृपमनामयम् ॥ वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च । न वाच्यो दीक्षितो नाम्ना यवीयानपि सर्वथा ॥ पूज्यैस्तमभिभाषेत भो भवन् कर्मनामाभिः । परपत्नीमसम्बन्धां भगिनीं चेति भाषयेत् ।" त्रिवर्षपूर्वः श्रोत्रियोऽभिवाद्यः । अत्रिवर्षाः सम्बन्धिनश्च । स्वल्पेनापि स्वयोनिजः । अन्ये च ज्ञानवृद्धाः सदाचाराश्चाभिवाद्याः । "उदक्यां सूतकां नारीं भर्तृघ्नीं गर्भपातिनीम् । पाषण्डं पतितं व्रात्यं महापातकिनं शठम् ॥ नास्तिकं कितवं स्तेनं कृतघ्नं नाभिवादयेत् । मत्तं प्रमत्तमुन्मत्तं धावन्तमशुचिं नरम् ॥ वमन्तं जृम्भमाणं च कुर्वन्तं दन्तधावनम् । अभ्यक्तं शिरसि स्नानं कुर्वन्तं नाभिवादयेत् " इति शातातपः । बृहस्पतिस्तु—"जपयज्ञजलस्थं च समित्पुष्पकुशानलान् । उदपात्रार्घ्यभैक्षान्नं वहन्तं नाभिवादयेत् ॥ अभिवाद्य द्विजश्चैतानहोरात्रेण शुध्यति ।" क्षत्रियवैश्याभिवादने विप्रस्यैवम् । शूद्राभिवादने त्रिरात्रम् । कार्यं तु राजकादिषु "चाण्डालादिषु चान्द्रं स्यादिति सङ्ग्रहकृत्स्मृतम्" । जमदग्निः—"देवताप्रतिमां दृष्ट्वा यतिं चैव त्रिदण्डिनम् । नमस्कारं न कुर्याच्चेदुपवासेन शुध्यति ॥ सर्वे वाऽपि नमस्कार्याः सर्वावस्थासु सर्वदा । अभिवादे नमस्कारे तथा प्रत्यभिवादने ॥ आशीर्वाच्या नमस्कार्यैर्नयस्त्यस्तु पुनर्नमेत् । स्त्रियो नमस्या वृद्धाश्च वयसा पत्युरेव ताः" ॥ ४ ॥

गदा०—उपनयनाङ्गभूतं समिदाधानमाह—**अत्र समिदाधानम्**—अत्रास्मिन् प्रकृतेऽग्नौ समिदाधानं समिधां तिसृणां प्रक्षेपो ब्रह्मचारिकर्तृको भवति । अत्रावसरे इति केचित् तन्न पाठादेवतत्सिद्धेः । अत्रशब्दोऽग्निपरो द्रष्टव्यः । समिदाधानस्येतिकर्तव्यतामाह—**पाणिनाऽग्निं परिसमूहत्यग्ने सुश्रवः सुश्रवसं मा कुरु यथा त्वमग्ने सुश्रवः सुश्रवा अस्येवं माᳪं सुश्रवः सौश्रवसं कुरु यथा त्वमग्ने देवानां यज्ञस्य निधिपा अस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासमिति**—ब्रह्मचारी पाणिना दक्षिणहस्तेनाग्निं प्रकृतम् उपनयनाङ्गहोमाधिकरणं परिसमूहति शुष्कगोमयखण्डादीन्धनप्रक्षेपेण सन्धुक्षयति । "अग्ने सुश्रवः सुश्रवसं माकुरु" इत्यादिभिः पञ्चमन्त्रैः । **कारिकायां** विशेषः—"प्रतिमन्त्रं त्रिभिः काष्ठैरग्नेसुश्रव आदिभिः । **अग्ने सुश्रव इत्येकं यथा** त्वं स्याद्द्वितीयकम् ॥ **यथात्वमग्नेदेवानां** मन्त्रेणापि तृतीयकम् । कृत्वा पर्युक्षणं वह्नेरुत्थाय समिदाहुतिः" इति । पाणिनेत्येकवचनमेकत्वनियमार्थम् । उभाभ्यामपि दृश्यते सन्धुक्षणम् । मन्त्रार्थः । हे अग्ने हे सुश्रवः शोभनकीर्ते मा मां सुश्रवसं शोभनकीर्तिं कुरु। किंच हे अग्ने सुश्रवः सौश्रवसम् । सुश्रवाश्च सौश्रवसश्च तम्। तत्र सुश्रवाः स्वयम् सुश्रवा गुरुस्तस्यायं सौश्रवसः ममाचार्यमपि सुश्रवसं कृत्वा तदीयत्वेन मां सौश्रवसं कुर्वित्यर्थः । किंच हे अग्ने यथा त्वं देवानाम् इन्द्रादीनां मध्ये यस्य च क्रतोर्निधिं हविर्द्रव्यम् पासि रक्षसि । एवमहं मनुष्याणां मध्ये वेदस्य श्रुतेर्निधिरधिकरणं भूयासं भवेयम् । **प्रदक्षिणमग्निं पर्युक्ष्योत्थाय समिधमादधात्यग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासᳪं स्वाहेति**—ततो ब्रह्मचारी प्रदक्षिणं यथा स्यात्तथा सन्धुक्षितमग्निं दक्षिणहस्तगृहीतेनोदकेन परिषिच्योत्थाय प्राङ्मुखस्तिष्ठन् समिधामादधाति अग्नौ प्रक्षिपति, **अग्नये समिधमित्यादि स्वाहाकारान्तेन** मन्त्रेण । समिध्यते दीप्यते अग्निरनयेति समित् । तल्लक्षणं चास्माभिः "समिधोऽभ्याधाय पर्युक्ष्य जुहुयात्" इति सूत्रार्थे उक्तम् । ननु "तिष्ठन्समिधः सर्वत्र" इति श्रौतसूत्रे उक्तत्वादुत्थायेति ग्रहणं व्यर्थम् । सत्यम् । नायं होमः समिदाधानमित्येतत्सूचनार्थमुत्थायेति ग्रहणमित्यदोषः । अतोऽत्र त्यागाभावः । यद्वा—"इहोत्थायेति ग्रहणमन्यत्र स्मार्ते परिसंख्यार्थम्" इति **कारिकायाम्** । **प्रयोगरत्ने** तु त्यागो लिखितः । मन्त्रार्थः । हे देवाः इमां समिधमग्नये अग्न्यर्थमाहार्षम् आहृतवानस्मि । किम्भूताय बृहते महते । जातान् जातान् वेत्ति इति जातवेदास्तस्मै । यथा येन प्रकारेण समिधा अनया दीप्यमानया त्वं हे अग्ने समिध्यसे दीप्यसे । एवमहमायुषा जीवनेन, मेधयाऽतीतादिधारणवत्या बुद्ध्या, वर्चसा तेजसा प्रजया पुत्रादिभिः, पशुभिः गवादिभिः, ब्रह्मवर्चसेन तेजसा कृताध्ययनसम्पत्त्या एतैरहं समिन्धे । समृद्धो भवामि । आचार्यविषयं फलमप्याशंसते । जीवपुत्रो दीर्घायुरपत्यो ममाचार्यो भवतु । जीवन्तः पुत्रा यस्य । मेधावी अहमसानि भवामि । अनिराकरिष्णुर्गुरूपदिष्टधर्माद्यविस्मरणशीलः । यशस्वी । तेजस्वी । ब्रह्मवर्चसी । अन्नादः अन्नमत्तीत्यन्नादः भूयासम् भवेयम् । स्वाहा सुहुतमस्तु । **एवं द्वितीयां तथा तृतीयामिति**—एवमनेनैव मन्त्रेण द्वितीयां समिधमादधाति । तथैवानेन मन्त्रेण तृतीयां समिधम् आदधाति । तिस्रः समिध आदधात्यग्नये समिधमाहार्षमित्युच्यमाने मन्त्रान्ते युगपत्तिसृणामाधानं प्राप्नोति, तन्निवृत्त्यर्थमेवं **द्वितीयां तथा तृतीयामिति** सूत्रणा । **एषा त इति वा**—अथवा "एषा ते अग्ने समित्तया" इति मन्त्रेण समिदाधानम् । अत्रापि मन्त्रावृत्तिः । **समुच्चयो वा**—अथवा "अग्नये समिधम्, एषा ते" इति च द्वयोर्मन्त्रयोः समुच्चयैक्यं समिदाधाने स्यात् । अत्रापि प्रतिसमिदाधानं मन्त्रयोरावृत्तिः । **पूर्ववत्परिसमूहनपर्युक्षणे**—परिसमूहनम् "अग्ने सुश्रवः" इत्यादिना सन्धुक्षणम् । पर्युक्षणम् अग्नेः सर्वतो जलासेकः । परिसमूहनपर्युक्षणे पूर्ववत् प्राग्वदग्नेः कर्तव्ये । **पाणी प्रतप्य मुखं विमृष्टे तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि । अग्ने यन्मे तन्वा ऊनं तन्म आपृण । मेधां मे देवः सविता मेधां मे देवी सरस्वती मेधामश्विनौ देवावाधत्तां पुष्करस्रजाविति**—पर्युक्षणानन्तरं ब्रह्मचारी पाणी उभौ हस्तौ प्रतप्य तूष्णीमग्नौ तापयित्वा "तनूपा अग्नेऽसि" इति सप्तभिर्मन्त्रवाक्यैर्मुखं विमृष्टे पाणिभ्यां मार्जयति । वाक्यभेदाच्च प्रतिवाक्यं पाण्योः प्रतपनं मुखविमार्जनं च । तनूपा इत्येतस्य स्वशाखीयत्वात्प्रतीकग्रहणे प्राप्ते मन्त्रवाक्यचतुष्टयस्योपयोगात्सर्वपाठः । "मेधां मे देवः सविता, मेधां मे देवी सरस्वती" इति त्वनयोर्मन्त्रयोरादधात्वित्यध्याहारः । साकाङ्क्षत्वात् । मन्त्रार्थः । "तनूपा अग्नेऽसि" इत्यादयः

स्पष्टाः । मेधामित्यस्यार्थः देवो द्युतिमान् सविता सूर्यो मे मह्यं मेधां धारणावतीं बुद्धिं तथा देवी दीप्यमाना सरस्वती आदधातु । तथा अश्विनौ देवौ मे मह्यं मेधां आधत्ताम् सम्पादयेताम्, पुष्करस्रजौ पद्ममालाधारिणौ । अत्राङ्गालम्भनत्र्यायुषकरणाभिवादनानि गृह्यकारानुक्तान्यप्याचारतोऽनुष्ठेयानि । तत्राभिवादनं गोत्रनामोच्चारपूर्वकं पादोपसंग्रहः, अङ्गालम्भनत्र्यायुषकरणयोः सूत्रकारान्तरप्रदर्शितौ मन्त्रौ ग्राह्यौ । तद्यथा--**अङ्गान्यालभ्य जपत्यङ्गानि च म आप्यायन्तां वाक् प्राणश्चक्षुः श्रोत्रं यशो बलमिति त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेऽंसे हृदि च त्र्यायुषमिति प्रतिमन्त्रम्** । तत्र वाक् च म आप्यायतामिति क्रियाविपरिणामं कुर्यात् । अथाभिवादने प्रकारः । तत्र **याज्ञवल्क्यः**–"ततोऽभिवादयेद्वृद्धानसावहमिति ब्रुवन् । " ततोऽग्निकार्यादनन्तरामित्यर्थः । **ब्रह्मपुराणे**—"उत्थाय मातापितरौ पूर्वमेवाभिवादयेत् । आचार्यश्च ततो नित्यमभिवाद्यो विजानता ॥ " **मनुः**-" लौकिकं वैदिकं चापि तथाऽऽध्यात्मिकमेव वा । आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् ॥ अभिवादात्परं विप्रो ज्यायांसमभिवादयेत् । असौ नामाऽहमस्मीति स्वं नाम परिकीर्तयेत् ॥ " विप्रेति द्विजोपलक्षणम् । आपस्तम्बः–" स्वदक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोऽभिवादयेत् । उरःसमं राजन्यो, मध्यसमं वैश्यो, नीचैः शूद्रः प्राञ्जलिः" **मनुः**–" भोशब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने । नाम्नां स्वरूपभावो हि भोशब्द ऋषिभिः स्मृतः ॥ आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने । अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः॥" अकारश्चास्य नाम्नोऽन्त इत्यस्यायमर्थः । अस्याभिवादकस्य नाम्नोऽन्ते योऽयमकारः अकार इति स्वरमात्रोपलक्षणम् । सर्वेषां नाम्नामाकारान्तत्वनियमाभावात् । स एवान्त्यस्वरः पूर्वाक्षरः पूर्वाणि नामगतान्यक्षराणि यस्य स तथोक्तः । एवंविधः प्लुतो वाच्यो न पुनरन्य एवाकारो नाम्नोऽन्ते वाच्य इति । तथाच **वशिष्ठः**–" आमन्त्रिते स्वरोऽन्त्योऽस्य प्लुवते " इति । आमन्त्रिते कर्तव्ये अभिवादकनाम्नोऽन्ते यः स्वरः स प्लुवते । त्रिमात्रो भवतीत्यर्थः । ततश्चाभिवादनप्रत्यभिवादनयोरेवं प्रयोगो भवति । आभिवादये चैत्रनामाऽहमस्मि भो इति । आयुष्मान् भव सौम्य विष्णुशर्मा ३ न् इति । क्षत्त्रियवैश्ययोस्तु वर्मगुप्तशब्दप्रयोग इति **मदनपारिजाते** । "आत्मनाम गुरोर्नाम नामातिकृपणस्य च । आयुष्कामो न गृह्णीयाज्ज्येष्ठपुत्रकलत्रयोः" इत्यादिनिषेधस्तु अभिवादनस्थलव्यतिरिक्तविषय इति विज्ञेयम् । अभिवादनं च हस्तद्वयेन कार्यम् । अन्यथाकरणे विष्णुना दोषसङ्कीर्तनात् । "जन्मप्रभृति यत्किञ्चिच्चेतसा धर्ममाचरेत् । सर्वं तन्निष्फलं याति एकहस्ताभिवादनात् ॥" एतदपि विद्वद्विषयम् । यतः स एवाह–"अजाकर्णेन विदुषो मूर्खाणामेकपाणिना" इति । अजाकर्णेन श्रोत्रसमौ करौ कृत्वा पुनः सम्पुटितेन करद्वयेनेत्यर्थः । अजाकर्णौ सम्पुटितौ यथा तथैव सम्पुटितं करद्वयमपीत्यजाकर्णौ । **मनुः**–"यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् । नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः॥" **यमः**–"अभिवादे तु यो विप्र आशिषं न प्रयच्छति । श्मशाने जायते वृक्षः कङ्कगृध्रोपसेवितः ॥" **शातातपः**–"पाखण्डं पतितं व्रात्यं महापातकिनं शठम् । सोपानत्कं कृतघ्नं च नाभिवादेत्कदाचन ॥ धावन्तं च प्रमत्तं च मूत्रोत्सर्गकृतं तथा । भुञ्जानमाचमनार्हं च नास्तिकं नाभिवादयेत् ॥ वमन्तं जृम्भमाणं च कुर्वन्तं दन्तधावनम् । अभ्यक्तशिरसं चैव स्नातं नैवाभिवादयेत् ॥" **बृहस्पतिः**–"जपयज्ञगणस्थं च समित्पुष्पकुशानलान् । उदपात्रार्घभैक्षान्नहस्तं तं नाभिवादयेत् ॥ उदक्यां सूतिकां नारीं भर्तृघ्नीं ब्रह्मघातिनीम् । अभिवाद्य द्विजो मोहादहोरात्रेण शुद्ध्यति ॥" **जमदग्निः**–"देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदण्डिनम् । नमस्कारं न कुर्याच्चेत्प्रायश्चित्ती भवेन्नरः ॥ " **मनुः**–" आभिवादनशीलस्य नित्य वृद्धोपसेविनः । चत्वारि तस्य वर्द्धन्ते आयुः प्रज्ञा यशो बलम् ॥" एतच्चाभिवादनमधिकवयसामेव कार्यम् । तथाच **मनुः**--"ज्यायांसमभिवादयेत्" इति । **स्मृत्यर्थसारे** । गुरवः–"माता स्तन्यधात्री च पिता पितामहादयो मातामहश्चान्नदाता भयत्राताऽऽचार्यश्चोपनेता च । मन्त्रविद्योपदेष्टा च तेषां पत्न्यश्चोपसंग्राह्याः । " समावृत्तेन च । "बाले समवयस्के चाध्यापके गुरुवच्चरेत् ।" मातुलाश्च पितृव्याश्च श्वशुराश्च यवीयांसोऽपि प्रत्युत्थायाभिवाद्याः । उपाध्याय ऋत्विजो ज्येष्ठा भ्रातरश्च सर्वेषां पत्न्यश्चैवम् । मातृष्वसा च सवर्णा भ्रातृभार्या च नित्यमभिवाद्या । "विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः । विप्रोष्य विप्रं कुशलं पृच्छेन्नृपमनामयम् ॥ वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च । न वाच्यो दीक्षितो नाम्ना यवीयानपि सर्वथा ॥ पूज्यैस्तमभिभाषेत भोभवत्कर्मनामभिः" । इति श्रीत्रिरग्निचित्सम्राट्स्थपति–श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे चतुर्थी कण्डिका ॥ ४ ॥ * ॥

(**विश्व०–अत्र समिदाधानम्**–अस्मिन्नवसरे मध्याह्नसंध्योत्तरमित्यर्थः । ये त्वधिकरणार्थत्वमाहुस्तन्न, अग्नौ समिद्धोमस्य विशेषविध्यन्तराबाधात् । वक्ष्यमाणसमिदाधानं बटुना कर्तव्यमिति शेषः । **पाणि...हति**—इतस्ततः पतितानङ्गारान् हस्तेन स्थण्डिलमध्यस्थान्करोतीत्यर्थः । अपरे तु इन्धनप्रक्षेपस्यान्यत्र महाभारतादौ प्रतीयमानत्वाद्दक्षिणेन पाणिना संधुक्षणप्रक्षेपमाहुः । कथमित्यत आह **अग्ने...यासमिति अग्ने सुश्रव**इत्यादिपञ्चमन्त्रैः प्रतिमन्त्रं संधुक्षणप्रक्षेपः । अपरे तु पञ्चमन्त्रान्ते सकृदेव संधुक्षणप्रक्षेपमिच्छन्ति । **प्रदक्षि...स्वाहेति**–"प्रदक्षिणमग्निं यथा स्यात्तथाग्निं पर्युक्ष्य उत्थाय समिधमग्नौ प्रक्षिपत्यग्नये समिधमहार्षम्" इत्यादिस्वाहान्तेन मन्त्रेण । **एवं...तीयाम्**–एवं द्विरपरं समिदाधानम् **एषा...ति वा**–मन्त्रेणेति शेषः । वाशब्दो विकल्पार्थः । **समुच्चयो वा अग्नये एषा त** इत्येतयोः । **पूर्व...क्षणे**—उपविश्य परिसमूहनं पयुक्षणं च प्राग्वत् । **पाणी...मृष्टे**—हस्तावग्नौ सताप्य ताभ्यां मुखं मार्जयन्ति । मन्त्रैर्वा तूष्णीं वेत्यत आह–**तनू...स्रजाविति**–सवितृदेवताके सरस्वतीदेवताके चादधात्वित्यध्याहारः साकाङ्क्षत्वात् । केचित्त्वध्याहारं विनैव तादृशं मन्त्रमाहुः । **तनूपा** इति प्रतपनं पाण्योः, **तन्वं म** इति मुखविमार्जनम् । एवं व्यत्यासेन पुनर्द्वाभ्याम् ।**अग्ने यन्म**इत्यग्निमीक्षमाणो जपति·**देवावाधत्ताम्**इमित्यन्तेन । पुष्करस्रजाविति ललाटं स्पृशेत् । शिष्टाचारप्राप्ताः केचन पदार्था लिख्यन्ते–अङ्गानि च म आप्यायन्तामिति सर्वाङ्गान्यालभ्य जपति।**वाक्प्राणश्चक्षुः श्रोत्रं यशो बलम्**इति यथालिङ्गं वागादिस्पर्शनम् । **त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेऽंसे हृदि च त्र्यायुषम्**इति प्रतिमन्त्रम् । त्रिपुण्ड्रं सव्येऽंसे तूष्णीम् । **शिवो नामासी**ति जपः । **सदसस्पति**मिति चतुर्भिर्मेधाप्रार्थनम् । प्रदक्षिणं मेखलाग्रन्थिस्पर्शनम् । ततोऽभिवादयेद्वृद्धानसावहमिति **यज्ञवल्क्यो**क्तप्रकारेणाग्निवरुणाचार्यपित्रादिसकलवृद्धाभिवादनम् ॥ इति चतुर्थी कण्डिका)॥ ४ ॥

अत्र भिक्षाचर्यचरणम् ॥ १॥ भवत्पूर्वां ब्राह्मणो भिक्षेत ॥ २ ॥ भवन्मध्यां राजन्यः ॥ ३ ॥ भवदन्त्यां वैश्यः ॥ ४ ॥ तिस्रोऽप्रत्याख्यायिन्यः ॥ ५॥ षड् द्वादशापरिमिता वा ॥ ६॥ मातरं प्रथमामेके ॥ ७ ॥ आचार्याय भैक्षं निवेदयित्वा वाग्यतोऽहःशेषं तिष्ठेदित्येके ॥ ८ ॥ अहिंसन्नरण्यात्समिध आहृत्य तस्मिन्नग्नौ पूर्ववदाधाय वाचं विसृजते ॥ ९ ॥ अधःशाय्यक्षारालवणाशी स्यात् ॥ १० ॥ दण्डधारणमग्निपरिचरणं गुरुशुश्रूषा भिक्षाचर्या ॥ ११ ॥ मधुमांसमज्जनोपर्यासनस्त्रीगमनानृतादत्तादानानि वर्जयेत् ॥ १२ ॥ अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत् ॥ १३ ॥ द्वादश द्वादश वा प्रतिवेदम् ॥ १४ ॥ यावद्ग्रहणं वा ॥ १५ ॥ वासांसि शाणक्षौमाविकानि ॥ १६ ॥ ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य॥ १७ ॥ रौरवं राजन्यस्य ॥ १८ ॥ आजं गव्यं वा वैश्यस्य॥१९॥सर्वेषां वा गव्यमसति प्रधानत्वात्॥२०॥ मौञ्जी रशना ब्राह्मणस्य ॥ २१ ॥ धनुर्ज्या राजन्यस्य॥ २२ ॥ मौर्वी वैश्यस्य ॥ २३ ॥ मुञ्जाभावे कुशाश्मन्तकबल्वजानाम् ॥ २४ ॥ पालाशो ब्राह्मणस्य दण्डः ॥ २५ ॥ बैल्वो राजन्यस्य ॥ २६ ॥ औदुम्बरो वैश्यस्य ॥२७॥ (केशसम्मितो ब्राह्मणस्य ललाटसम्मितः क्षत्रियस्य घ्राणसम्मितो वैश्यस्य) सर्वे वा सर्वेषाम् ॥ २८ ॥ आचार्येणाहूत उत्थाय प्रतिशृणुयात् ॥ २९ ॥ शयानं चेदासीन आसीनं चेत्तिष्ठँस्तिष्ठन्तं चेदभिक्रामन्नभिक्रामन्तं चेदभिधावन् ॥ ३० ॥ स एवं वर्तमानोऽमुत्राद्य वसत्यमुत्राद्य वसतीति तस्य स्नातकस्य कीर्तिर्भवति ॥ ३१ ॥ त्रयः स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति ॥ ३२ ॥ समाप्य वेदमसमाप्य व्रतं यः समावर्तते स विद्यास्नातकः ॥ ३३ ॥ समाप्य व्रतमसमाप्य

वेदं यः समावर्तते स व्रतस्नातकः ॥३४॥ उभयꣳ समाप्य यः समावर्तते स विद्याव्रतस्नातक इति ॥ ३५ ॥ आषोडशाद्वर्षाद् ब्राह्मणस्य*नातीतः कालो भवति ॥ ३६ ॥ आद्वाविꣳशाद्राजन्यस्य ॥३७॥ आचतुर्विꣳशाद्वैश्यस्य ॥ ३८ ॥ अत ऊर्द्ध्वं पतितसावित्रीका भवन्ति ॥ ३९ ॥ नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः ॥ ४० ॥ कालातिक्रमे नियतवत् ॥ ४१ ॥ त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनं च ॥ ४२॥ तेषाꣳ संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन्व्यवहार्या भवन्तीति वचनात् ॥ ४३ ॥ ॥ ५ ॥

कर्कः—अत्र **भिक्षाचर्यचरणम्**—कर्तव्यमिति सूत्रशेषः। अत्रेतिशब्दोऽवसरार्थः। **भवत्पूर्वां ब्राह्मणो भिक्षेत भवन्मध्याꣳ राजन्यो भवदन्त्यां वैश्यः। तिस्रोऽप्रत्याख्यायिन्यः**—भिक्षेत। यत्र प्रत्याख्यानं न क्रियते। **षट् द्वादशापरिमिता वेति**विकल्पः। **मातरं प्रथमामेके**—भिक्षन्ते। अयं च प्रथमाहर्धर्मः। **आचार्याय भैक्षं निवेदयित्वा वाग्यतोऽहःशेषं तिष्ठेदित्येके**—आचार्याय भिक्षानिवेदनं कृत्वा वाग्यतोऽहःशेषमासीत नवेति विकल्पः। **अहिꣳसन्नरण्यात्समिध आहृत्य तस्मिन्नग्नौ पूर्ववदाधाय वाचं विसृजते**—अहिंसन्निति स्वयं भग्नाः समिधः तस्मिन्नग्नौ पूर्ववदाधानं कृत्वा वाग्विसर्गं करोति यदि वाग्यमो गृहीतः॥ **अधःशाय्याक्षारालवणाशी स्याद्दण्डधारणमग्निपरिचरणं गुरुशुश्रूषा भिक्षाचर्या**—एतानि कर्तव्यानि। दण्डधारणं सर्वदा। अग्निपरिचरणं सायंप्रातः। "उभयकालमग्निं परिचरेत्" इति स्मृत्यन्तरात्। गुरुशुश्रूषा स्वाध्यायानुरोधेन। भिक्षाचर्या स्थित्यर्था। **मधुमाꣳसमज्जनोपर्यासनस्त्रीगमनानृतादत्तादानानि वर्जयेत्।** मज्जनं ह्रदेदेवतीर्थस्नानं प्रतिषिध्यते। उद्धृतोदकेन न वार्यते। उपर्यासनम् आसनस्योपरि मसूरिकादि। स्त्रीगमनं स्त्रीणां मध्येऽवस्थानम्। वक्ष्यति हि ब्रह्मचर्यमुपरिष्टात्। अनृतम्, अदत्तादानं चेति प्रतिषिद्धमेव। **अष्टाचत्वारिꣳशद्वर्षाणि वेदब्रह्मचर्यं चरेत्।** अस्मिन्पक्षे चतुर्णामपि वेदानामेक एव व्रतादेशः, सर्वा वेदाहुतयो हूयन्ते। **द्वादश द्वादश वा प्रतिवेदम्**—ब्रह्मचर्यचरणम्। अत्र यथास्वं वेदाहुतयः। **यावद्ग्रहणं वा**—वेदस्य वेदयोर्वेदानां वा ब्रह्मचर्यचरणम्। **वासाꣳसि शाणक्षौमाविकानि ब्रह्मचारिणां भवन्ति। ऐणेयमजिनमुत ब्राह्मणस्य**—ऐणेयं हारिणं चर्म, तद्ब्राह्मणस्योत्तरीयं भवति। **रौरवꣳ राजन्यस्य**—रुरुर्नाम आरण्यः सत्त्वविशेषः, तदीयं राजन्यस्य भवति। **आजं गव्यं वा वैश्यस्य**—उत्तरीयं भवति। **सर्वेषां वा गव्यमसति प्रधानत्वात्**-असति यथाचोदिते चर्मणि सर्वेषां वा गव्यं भवति। कुत एतत्। पुरुषप्रधानत्वात् गव्यस्य चर्मणः। पुरुषप्रधानं हि गव्यं चर्म श्रुतौ पठ्यते—"तेऽवच्छाय पुरुषं गव्येतां त्वचमदधुः" इति। **मौञ्जी रशना ब्राह्मणस्य**—भवति। **धनुर्ज्या राजन्यस्य**—ज्याशब्देन गुणोऽभिधीयते। **मौर्वी वैश्यस्य**—मुरुरिति तृणविशेषः। **मुञ्जाभावे कुशाश्मन्तकबल्वजानाम्**—सम्बन्धिनी रशना भवति। **पालाशो ब्राह्मणस्य दण्डः**—भवति। **बैल्वो राजन्यस्य। औदुम्बरो वैश्यस्य। सर्वे वा सर्वेषाम्**—सर्वेषामनियमेन भवन्ति। **आचार्येणाहूत उत्थाय प्रतिशृणुयात्**-आचार्येणासीन आहूत आसनादुत्थाय प्रतिशृणुयात्। **शयानं चेदासीनः**-

शयानं चेदाहूयते आसीनः प्रतिशृणयात् । आसीनं चेत्तिष्ठन्–प्रतिशृणुयात् । तिष्ठन्तं चेदभिक्रामन् अभिक्रामन्तं चेदभिधावन् । अस्यार्थवादोऽयम् । स एवं वर्तमानोऽमुत्राद्य वसत्यमुत्राद्य वसतीति तस्य स्नातकस्य कीर्तिर्भवति । त्रयः स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति । समाप्य वेदमसमाप्य व्रतं यः समावर्तते स विद्यास्नातकः–उच्यते । समाप्य व्रतमसमाप्य वेदं यः समावर्तते स व्रतस्नातकः । उभयमं समाप्य यः समावर्तते स विद्याव्रतस्नातक इति । आषोडशाद्वर्षाद्ब्राह्मणस्य नातीतः कालो भवति–अर्वाक् षोडशवर्षाद्ब्राह्मणस्य नातीत एवोपनयनस्य कालः।आद्वाविंशाद्राजन्यस्य–नातीतः कालो भवति । आचतुर्विंशाद्वैश्यस्य-नातीतः कालो भवति।अत ऊर्ध्वं पतितसावित्रीका भवन्ति-अतश्च नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः । कालातिक्रमे नियतवत्–कालव्यतिक्रमे सति यन्नियतेषु विहितं श्रौतेषु अनाम्नातं नैमित्तिकेषु यद्विहितं स्मार्तं तदेव भवति । तच्च प्रतिमहाव्याहृति सर्वाभिश्चतुर्थं सर्वप्रायश्चित्तमिति । कालव्यतिक्रमादन्यत्रापि श्रेषे उत्पन्ने एतदेव भवति नैमित्तिकान्तराविधानात् । त्रिपुरुषं पतितसावित्रीकाणामपत्येऽसंस्कारो नाध्यापनं च तेषां संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन्–संस्कारमिच्छन्व्रात्यस्तोमेनेष्ट्वा आद्रियेत अधीयीत च । व्यवहार्या भवन्तीति वचनात् ॥ ५ ॥ ॥ * ॥

जय०–अत्रेति–अवसरे भिक्षाचर्यं भिक्षावृत्तिः तस्य चरणमनुष्ठानं कर्तव्यमिति शेषः । कथम्, **भवत्पूर्वामिति**–भवच्छब्दः सम्बुद्ध्यर्थः, हे भवन् हे भवति वेत्येवमुक्तः पूर्वो यस्यां ताम्, ब्राह्मणो भिक्षेत भिक्षां देहीति याचेत । काः या अप्रत्याख्यायिन्यस्ताः तिस्र इत्यादौ पूर्वत्रापूर्त्तावुत्तरः पक्षः । एके "प्रथमां भिक्षां मातरमेव भिक्षेत" इति इच्छन्ति । अयं च प्रथमाहर्धर्मः। आचार्याय भिक्षानिवेदनं नित्यम् । अहःशेषं वाग्यतो मौनी तिष्ठेत् आसीत, फलातिशयार्थम् । एकीयशब्दाद्विकल्पः । अहिंसन् अभञ्जयन् स्वयंभग्नाः समिध आहृत्य तस्मिन्नुपनयनहोमाधिकरणेऽग्नौ पूर्ववदाधानं कृत्वा वाग्विसर्गो वाक्संयमपक्षे । अधःशयनादीनि कार्याणि । तत्र दण्डधारणं, समिदाधानं सर्वदा । अग्निपरिचर्या च सायम्प्रातः, "उभयकालमग्निं परिचरेत्" इति श्रवणात् । गुरुशुश्रूषणं च स्वाध्यायानुरोधेन । भिक्षाचर्या च स्थित्यर्थम् । **मध्वादीनि** च वर्जयेत् । तत्र **मज्जनं**–ह्रददेवतीर्थस्नानं प्रतिषिध्यते । नतूद्धृतोदकस्नानं वर्ज्यते । **उपर्यासनं चा**सनोपर्यासनं मसूरिकादि । स्त्रीणां मध्ये गमनमवस्थानम् । ब्रह्मचर्यस्याग्रे वक्ष्यमाणत्वात् । **अनृतमदत्तादानं च** प्रसिद्धम । अष्टाचत्वारिंशत्पक्षे चतुर्णामपि वेदानामेक एव व्रतादेशः । सर्ववेदाहुतिहोमश्च । **द्वादश द्वादशेति, प्रतिवेदं**–ब्रह्मचर्यचरणम् । तत्र यथास्वं वेदाहुतयः । **यावद्ग्रहणं वा**–वेदस्य वेदयोर्वेदानां ब्रह्मचर्यचरणम् । **वासांसि**–च यथाक्रमं शाणादीनि भवन्ति-**ऐणेयम्**–एण्याश्चर्म । **रौरवम्**–रुरोश्चित्रमृगस्य चर्म । **आजम्**–अजस्य । **गव्यं**–गोः । **सर्वेषां**-वर्णानामुदिते चर्मण्यसति गव्यं चर्म भवति । कुतः पुरुषप्रधानत्वाद् गव्यस्य चर्मणः । पुरुषप्रधानत्वं चास्य श्रुतिराह"–तेऽवच्छाय पुरुषं गव्येतां त्वचमदधुः" इति । **मौञ्जी**–मुञ्जमयी रशना मेखला । ज्या प्रत्यञ्चा मुरुरिति तृणविशेषः । तन्मयी **मौर्वी**–मुञ्जादीनामभावे कुशादीनां सम्बन्धी रशना क्रमेण भवति । अत्राचार्येणासूत्रितमपि दण्डमानमुपयुक्तत्वादविरोधित्वाच्छाखान्तरीयं ग्राह्यम् । तच्च **केशसम्मितो ब्राह्मणस्य ललाटसम्मितः क्षत्रियस्य घ्राणसम्मितो वैश्य-**

स्येति–दण्डं प्रक्रम्योक्तम् । यद्यपि **श्रुत्या**–"मुखमसम्मितो भवत्येतावत्" इत्यादिकया
ब्राह्मणमधिकृत्य मुखसम्मितत्वमुक्तम्, तच्छ्रौतदण्डविषयम् । मुखसम्मितमौदुम्बरं दण्डं प्रयच्छ-
ती:यौदुम्बरमभिधायात्र पालाशस्य विधानात् । **सर्वे वा**–दण्डाः सर्वेषामनियमेन भवन्ति ।
आचार्येणासीनः सन्नाहूतस्तदा आसनादुत्थाय प्रतिशृणुयात् । **शयानं चेदा**ह्वयति तदाऽऽसीनः प्रति-
शृणुयात् । **एवमासीनं चेत्तिष्ठन्**-प्रतिशृणुयात् । **तिष्ठन्तं चेदभिक्रामन्**–अभिमुखं गच्छन्।
अभिक्रामन्तं चेद्धावन् । अस्यार्थवादः **स एवमिति** । अमुत्र वसतिश्च स्तुतिपरा । तस्य च कीर्तिर्भवतीति
च । स्नातकस्य त्रैविध्यमाह-**विद्यास्नातक**-इति । तदेव विवृणोति । **समाप्य वेद**मित्यादिना ।
उच्यत इति सर्वत्राध्याहारः । **आषोडशात्**–अर्वाक् षोडशाद्वर्षाद् ब्राह्मणस्यानतीतः अनतिक्रान्त
उपनयनस्य कालो भवति । आद्वाविंशादाचतुर्विंशाच्च क्षत्रियविशोरनतीतः । अतः परं **पतित-**
सावित्रीका भवन्त्येते । ततश्च नैनान् व्रात्यान् अकृतव्रात्यस्तोमप्रायश्चित्तान् । प्रायश्चित्ताचरणान-
न्तरं तेषामुपनयनाद्यधिकार इत्यर्थः। **कालातिक्रमे**-गर्भाधानादिनियतकालानां कर्मणां नियतकालव्यतिक्रमे
सति प्रायश्चितं नियतवत् नित्यवत् । नियते श्रौतकल्पे नैमित्तिकेषु यद्विहितं स्मार्त्तं तदेवानादिष्टं भवति ।
तच्च अविज्ञाते प्रतिमहाव्याहृति सर्वाभिश्चतुर्थं९ सर्वप्रायश्चित्तं वेत्यस्यैवातिदेशो नतूपदेशो **गृह्यकारस्य** ।
एवमन्यत्रापि अंशे जाते एतदेव भवति नैमित्तिकान्तरानभिधानात् । **त्रिपुरुषमि**त्येषां त्रयाणामपत्ये
चतुर्थे पुरुषे कृतप्रायश्चित्ते केवलमुपनयनाख्यः संस्कारो नाध्यापनादिः । तेषां त्रिपुरुषं पतितसावित्री-
काणां मध्ये य आत्मनः संस्कारमिच्छति स व्रात्यस्तोमेनेष्ट्वा काममधीयीत । कुतः–**अधीयीरन् व्यव-**
हार्या इत्यादेः ॥ ९ ॥ ॥ * ॥

हरि०–**अत्र भिक्षाचर्यचरणम्**–अत्रावसरे भिक्षाचर्यानुष्ठानम् । तद्यथा । **भवत्पूर्वां ब्राह्मणो**
भिक्षेत भवन्मध्यां॰ राजन्यो भवदन्त्यां वैश्यः–भवत्पूर्वां भवच्छब्दः पूर्वो यस्याः सा भवत्पूर्वा
तां भिक्षां ब्राह्मणः द्विजोत्तमः भिक्षेत याचेत । तथैव भवच्छब्दो मध्ये यस्याः सा भवन्मध्या तां
राजन्यः क्षत्रियः भिक्षेतेत्यनुषङ्गः । तथाऽन्ते भवोऽन्त्यः भवच्छब्दो यस्याः सा भवदन्त्या तां वैश्यः
तृतीयो वर्णः भिक्षां भिक्षेतेत्यनुवर्तते । **तिस्रोऽप्रत्याख्यायिन्यः षड् द्वादशापरिमिता वा मातरं**
प्रथमामेके-भिक्षेर्द्धातोर्द्विकर्मत्वात् द्वितीयं कर्माह-तिस्रः स्त्रियो भिक्षां भिक्षेत । कथम्भूताः अप्रत्या-
ख्यायिन्यः प्रत्याख्यातुं निराकर्तुं शीलं यासां ताः प्रत्याख्यायिन्यः,न प्रत्याख्यायिन्यः अप्रत्याख्यायिन्यः,
ताः अप्रत्याख्यायिनीः । अत्र द्वितीयार्थे प्रथमा, भिक्षेतेति कर्तृप्रत्ययान्तस्याख्यातस्य कर्मकारकापेक्ष-
त्वात् । षड् द्वादशापरिमिता वा । षट् वा स्त्रियो द्वादश वा अपरिमिता वा असङ्ख्याता वा भिक्षे-
तेति सर्वत्रानुषङ्गः । एते भिक्षाविकल्पाः आहारपर्याप्त्यपेक्षया । एके आचार्याः मातरं जननीं प्रथमां
भिक्षेतेत्याहुः । अयं च "प्रथमाहर्धर्मः" इति **भाष्यकारोक्तेः** । **आचार्याय भैक्षं निवेदयित्वा**
वाग्यतोऽहःशेषं तिष्ठेदित्येके–आचार्याय गुरवे भैक्षं लब्धां भिक्षां निवेदयित्वा निवेद्य इयं भिक्षा
मया लब्धेति समर्प्य वाग्यतो मौनी अहःशेषं भिक्षानिवेदनोत्तरतो यावदस्तमयं तिष्ठेन्नोपविशेन्न च
शयीत । रागत इत्येके सूत्रकारा वर्णयन्ति । वयं तु आनियमं मन्यामहे । ततश्च विकल्पः । अहिंं॰
सन्नरण्यात्समिध आहृत्य तस्मिन्नग्नौ पूर्ववदाधाय वाचं विसृजते–आहिंसन् अच्छिन्दन् स्वय-
म्भग्ना इत्यर्थः । अरण्यात् न ग्रामात् समिधः पूर्वोक्तलक्षणा आहृत्य आनीय तस्मिन्नग्नौ यत्र
उपनयनाङ्गहोमः कृतस्तस्मिन् पूर्ववत्परिसमूहनादि त्र्यायुषकरणान्तं यावत् आधाय हुत्वा वाचं विसृ-
जते मौनं त्यजति वाग्यमपक्षे । **अधःशाय्यक्षारालवणाशी स्याद्दण्डधारणमग्निपरिचरणं गुरुशु-**

श्रूषा भिक्षाचर्या मधुमाᳬंसमज्जनोपर्यासनस्त्रीगमनानृतादत्तादानानि वर्जयेत्—अत ऊर्ध्वं ब्रह्मचारिणो यमनियमानाह—अधः शयितुं शीलमस्य असावधःशायी स्यात्। तथा अक्षारम् अलवणं चाश्नातीत्येवंशीलोऽक्षारालवणाशी भवेत्। दण्डधारणम्। दण्डस्य स्ववर्णविहितस्य धारणं कुर्यात्। दण्डाजिनोपवीतानि मेखलां चैव धारयेत्। इत्येतदुपलक्षणत्वेन सदा चिह्नरूपं कुर्यात्। अग्नेः परिचरणं सायम्प्रातः परिसमूहनपूर्वं त्र्यायुषकरणान्तेन समिदाधानम्। गुरुशुश्रूषा गुरोः शुश्रूषा परिचर्या तां कुर्यात्। भिक्षार्थं चर्या भिक्षाचर्या भैक्षचरणमिति यावत्। मधु क्षौद्रं, मांसं पललं, मज्जनं नद्यादावाप्लवनम्, स्नानं तूद्धृतोदकेन। उपरि खट्वादौ आसनमुपवेशनम्। आसनस्योपरि मसूरिकाद्यासनं च। स्त्रीगमनं स्त्रीणां मध्येऽवस्थानम्। अभिगमनस्योपरि वक्ष्यमाणत्वात्। अनृतम् असत्यवदनम्। अदत्तानां परद्रव्याणामादानं ग्रहणम्, स्तेयमित्यर्थः। एतानि मध्वादीनि वर्जयेत्। **अष्टाचत्वारिᳬंशद्वर्षाणि वेदब्रह्मचर्यं चरेत्**—अष्टाभिरधिकानि चत्वारिंशत् अष्टाचत्वारिंशत् तानि अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं वेदग्रहणार्थं ब्रह्मचर्यमुक्तलक्षणं चरेत् अनुतिष्ठेत्। अस्मिन्पक्षे चतुर्णामपि वेदानामेक एव व्रतादेशः सर्ववेदाहुतिहोमश्च। **द्वादश द्वादश वा प्रतिवेदम्। यावद्ग्रहणं वा**—अनुकल्पमाह—तावदशक्तौ द्वादश द्वादश वर्षाणि प्रतिवेदं वेदे वेदे ब्रह्मचर्यं चरेदित्यनुवर्तते। तत्राप्यशक्तौ यावद्ग्रहणं यावद्वेदस्य वेदयोर्वेदानां वा ग्रहणम् आचार्यात्पाठतोऽर्थतश्च स्वीकरणम, तावद्वा ब्रह्मचर्यं चरेत्। वर्णव्यवस्थया वासःप्रभृतीनि व्यवस्थितान्याह—**वासाᳬंसि शाणक्षौमाविकानि**—ब्राह्मणक्षत्रियविशां ब्रह्मचारिणां यथासंख्यं शाणक्षौमाविकानि वस्त्राणि परिधेयानि भवन्ति। तत्र शणमयं शाणम्, क्षौमं क्षुमा अतसी तद्विकारमयं क्षौमम्, अवेर्मेषस्य विकार आविकम् ऊर्णामयमित्यर्थः। **ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य**—एणी हरिणी तस्या इदं ऐणेयमजिनं कृत्तिरुत्तरीयं भवति ब्राह्मणस्य ब्रह्मचारिणः! **रौरवᳬं राजन्यस्य**—रुरुर्मृगविशेषः। चित्रमृग इति प्रसिद्धः। तस्येदमाजिनं रौरवं राजन्यस्य क्षत्रियस्योत्तरीयं भवति। **आजं गव्यं वा वैश्यस्य**—अजस्य वस्तस्येदम् आजम् अजिनम् कृत्तिः वैश्यस्य उत्तरीयं भवति। अथवा गव्यं गोः इदं गव्यमजिनं वैश्यस्य उत्तरीयं भवति। **सर्वेषां वा गव्यमसति प्रधानत्वात्**—पक्षान्तरमाह—सर्वेषां ब्राह्मणक्षत्रियविशां गव्यमजिनं वा उत्तरीयं भवति। कदा असति मुख्ये अविद्यमाने, कुतः प्रधानत्वात्। गव्यं हि अजिनानां प्रधानम्, ऐणेयाद्यजिनप्रकृतीनामेण्यादीनां गोः प्राधान्यं यतः। यद्वा गव्यस्य चर्मणः पुरुषसम्बन्धित्वेन प्रधानत्वात्। तथाच श्रुतिः-"तेऽवच्छाय पुरुषं. गव्येतां त्वचमदधुः" इति। **मौञ्जी रशना ब्राह्मणस्य धनुर्ज्या राजन्यस्य मौर्वी वैश्यस्य मुञ्जाभावे कुशाश्मन्तकबल्वजानाम्**—मौञ्जी मुञ्जं तृणविशेषस्तन्मयी मौञ्जो रशना मेखला ब्राह्मणस्य ब्रह्मचारिणो भवति। धनुर्ज्या चापस्य ज्या गुणः रशना राजन्यस्य ब्रह्मचारिणः। मौर्वीति तृणविशेषस्तन्मयी रशना वैश्यस्य भवति। मुञ्जस्याभावे अलाभे ब्राह्मणस्य कुशानां कुशमयी रशना भवति। धनुर्ज्याऽभावे क्षत्रियस्य अश्मन्तकमयी भवति। मौर्व्या अभावे वाल्वजी वैश्यस्य। मुञ्जाभावशब्दोऽत्र धनुर्ज्यामौर्व्यभावोपलक्षणार्थः। **पालाशो ब्राह्मणस्य दण्डो बैल्वो राजन्यस्यौदुम्बरो वैश्यस्य**—पालाशः पलाशवृक्षोद्भवः ब्राह्मणस्य ब्रह्मचारिणो दण्डो भवति। बैल्वः विल्ववृक्षोद्भवः क्षत्रियस्य। औदुम्बरः उदुम्बरवृक्षोद्भवो वैश्यस्य। **केशसम्मितो ब्राह्मणस्य ललाटसम्मितः क्षत्रियस्य घ्राणसम्मितो वैश्यस्य**—स च केशसम्मितः। पादादिकेशमूलावधिप्रमाणकः ब्राह्मणस्य। क्षत्रियस्य ललाटसम्मितःललाटावधिपरिमाणः भ्रूमध्यावधिरित्यर्थः। वैश्यस्य ब्रह्मचारिणः पादादिरोष्ठावधिको दण्डः। **सर्वे वा सर्वेषाम्**—यद्वा सर्वेषां ब्राह्मणक्षत्रियविशां ब्रह्मचारिणां सर्वे पालाशबैल्वौदुम्बरा अनियमेन दण्डा भवन्ति। नियमोऽत्र नास्ति। मुख्यालाभे यथालाभमुपादयम्। **आचार्येणाहूत उत्थाय प्रतिशृणुयात्** आचार्येण गुरुणा आहूत आकारित उत्थाय ऊर्द्ध्वीभूय प्रतिशृणुयात् प्रतिवचन दद्यात् ब्रह्मचारी। **शयानं**

चेदासीनः—चेद्यदि शयानं स्वपन्तं ब्रह्मचारिणं गुरुराह्वयति, तदा आसीनः उपविष्टः सन् प्रतिवचनं
दद्यात् । **आसीनं चेत्तिष्ठन्**—आसीनमुपविष्टं चेदाह्वयति तदा तिष्ठन्नुत्थितः । **तिष्ठन्तं चेदभि-**
क्रामन्—यदि तिष्ठन्तमुत्थितमाह्वयति तदा अभिक्रामन् गुरुमभिमुखं गच्छन् प्रतिशृणुयात् । **अभिक्रा-**
मन्तं चेदभिधावन्—अभिक्रामन्तमभिमुखमागच्छन्तमाचार्यः ब्रह्मचारिणं यदि आह्वयति तदा स ब्रह्म-
चारी अभिधावन् अभिमुखं धावन्सन् प्रतिशृणुयात् । **स एवं वर्तमानोऽमुत्राद्य वसत्यमुत्राद्य**
वसतीति—स ब्रह्मचारी एवमुक्तेन मार्गेण ब्रह्मचर्ये वर्तमानस्तिष्ठन् अमुत्र स्वर्गे अद्य इहैव स्थितः सन्
वसति तिष्ठति । द्विरुक्तिः स्तुत्यर्था । **तस्य स्नातकस्य कीर्तिर्भवति**—तस्य ब्रह्मचारिणः स्नातकस्य
समावृत्तस्य कीर्तिर्यशो भवति इति यथोक्तधर्मानुष्ठातुर्ब्रह्मचारिणः फलकथनम् । **त्रयः स्नातका**
भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति—त्रयस्त्रिप्रकाराः स्नातका भवन्ति ।
कथम् एको विद्यास्नातकः । अपरो व्रतस्नातकः । अन्यो विद्याव्रतस्नातकः । एतेषां लक्षणमाह—
समाप्य वेदमसमाप्य व्रतं यः समावर्तते स विद्यास्नातकः । समाप्य व्रतमसमाप्य वेदं यः
समावर्तते स व्रतस्नातकः । उभयꣳ समाप्य यः समावर्त्तते स विद्याव्रतस्नातक इति—
समाप्य समाप्तिं पाठतोऽर्थतश्चावसानं नीत्वा वेदं वेदस्य मन्त्रब्राह्मणात्मिकामेकां शाखां यः समा-
वर्त्तते स्नाति स ब्रह्मचारी विद्यास्नातको भवति । एवं समाप्य व्रतं द्वादशवर्षादिकं ब्रह्मचर्यमसमाप्य
असम्पूर्णमधीत्य वेदमेकां शाखां यो ब्रह्मचारी समावर्तते स्नानं करोति स व्रतस्नातको भवति ।
उभयं वेदं ब्रह्मचर्यं च समाप्य अन्तं नीत्वा यः स्नाति स विद्याव्रतस्नातको भवति ।
आषोडशाद्वर्षाद्ब्राह्मणस्य नातीतः कालो भवति । आद्वाविꣳशाद्राजन्यस्याचतुर्विꣳशा-
द्वैश्यस्य—उपनयनकालस्य परमावधिमाह आषोडशात्षोडशाद्वर्षात्प्राक् ब्राह्मणस्य विप्रस्य
अनतीतः न अतीतः उपनयनस्य कालः समयो भवति । आद्वाविंशात् द्वाविंशाद्वर्षात्पूर्वं क्षत्रि-
यस्य । आचतुर्विंशात् चतुर्विंशाद्वर्षादर्वाक् वैश्यस्योपनयनस्य कालः, अनतीतो भवतीति सर्वत्र सम्ब-
ध्यते । **अत ऊर्ध्वं पतितसावित्रीका भवन्ति**—अतः पञ्चदशात्, एकविंशात् , त्रयोविंशाद्वर्षादूर्ध्वम्
अनुपनीता ब्राह्मणक्षत्रियवैश्याः यथासङ्ख्यं पतितसावित्रीका भवन्ति । पतिता स्खलिता अधिकाराभा-
वान्निवृत्ता सावित्री गायत्री येभ्यस्ते पतितसावित्रीका भवन्ति सम्पद्यन्ते । **नैनानुपनयेयुर्नाध्यापयेयुर्न**
याजयेयुर्नैभिर्व्यवहरेयुः—एनान् पतितसावित्रीकान् न उपनयेयुः उपनयनसंस्कारेण न संस्कुर्युः ।
शिष्टाः केश्चिदतिक्रान्तनिषधैरुपनीतानपि न अध्यापयेयुः न वेदं पाठयेयुः तथा न याजयेयुः । कैश्चिद-
तिक्रान्तनिषेधैर्वेदमध्यापितानपि न याजयेयुः न यज्ञं कारयेयुः । एभिः पतितसावित्रीकैरनुपनी-
तैरुपनीतैर्वा सह न व्यवहरेयुः । स्नानासनशयनभोजनविवाहादिभिः कर्मभिर्न व्यवहारं कुर्युः । **काला-**
तिक्रमे नियतवत्—गर्भाधानादीनि उपनयनान्तानि कर्माणि नियतकालान्यभिहितानि । यदि दैवात्पुरु-
षापराधाद्वा दोषाद्वा तेषां नियतस्य कालस्य अतिक्रमो भवति, तदा किं कर्तव्यमिति सन्देहे निर्णयमाह—
कालातिक्रमे यस्य संस्कारकर्मणः शास्त्रेण नियमितो यः कालः तस्यातिक्रमे लङ्घने नियतवत् नित्यवत्
नित्ये श्रौतकल्पे नित्येषु यद्विहितं तद्वत् अनादिष्टं प्रायश्चित्तं भवति । ततः कृतप्रायश्चित्तस्यातिक्रान्तकाले
संस्कारकर्मण्यधिकारः सम्पद्यते । अनादिष्टप्रायश्चित्तेतिकर्तव्यता च प्रयोगे वक्ष्यते । अत्र कालातिक्रम
इत्युपलक्षणम् । अतोऽन्येषामपि कर्मणां नाशे इदमनादिष्टमेव सर्वप्रायश्चित्तम् । **गृह्यकारेण**
प्रायश्चित्तान्तरस्यानुपदिष्टत्वात् । किन्तु श्रौतानामतिदेशे प्राप्ते अविज्ञाते प्रतिमहाव्याहृति सर्वाभिश्चतुर्थं
सर्वप्रायश्चित्तं चेत्यस्यैव कालातिक्रमे नियतवदित्यनेनातिदेशः कृतो नतूपदेशः कृतो **गृह्यकारेण** ।
तत्राविज्ञातमप्रत्यक्षश्रुतिमूलं किमिदमार्ग्वेदिकं, याजुर्वेदिकं सामवेदिकं चेत्यनिश्चितं स्मार्तं कर्म
तस्य भ्रेषे श्रौतकल्पे व्याहृतिचतुष्टयं पञ्चवारुणहोमं प्रायश्चित्तमुद्दिष्टमत्र **गृह्यसूत्रे**, गृह्योक्तकर्मणामपि

स्मार्तत्वात् । तद्भ्रेषे तस्यैवातिदेशो युक्तः । न पुनः प्रत्यक्षवेदमूलकर्मभ्रेषोपदिष्टानाम् । इदानीं पतितसावित्रीकविषये संस्कारप्रतिप्रसवमाह—**त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनं च** त्रिपुरुषं त्रीन् पुरुषान् यावत् ये पतितसावित्रीकाः पितृपुत्रपौत्रास्तेषामपत्ये पुत्रे संस्कारः उपनयनं भवति न पुनश्चतुर्थादीनाम् । तेषां च उपनीतानामपि अध्यापनं न भवति, निषिद्धस्य न पुनरनुज्ञापनं प्रतिप्रसव इति । उपनयनस्यैव प्रतिप्रसवात् । **तेषाꣳ संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्यवहार्या भवन्तीति वचनाम्**—तेषां पतितसावित्रीकाणां मध्ये यः संस्कारेप्सुः आत्मानं संस्कारयितुकामः स व्रात्यस्तोमेन यज्ञविशेषेण इष्ट्वा व्रात्यस्तोमं यज्ञं कृत्वा व्यवहार्यो भवति । अधीयीत चेति शेषः । उपनयनादिसंस्कारयोग्यो भवति । तस्मात्कामसिच्छया व्रात्यस्तोमेनेष्ट्वा अधीयीरन् वेदं पठेयुः व्यवहार्याः लोके शिष्टानामध्यापनादिषु कर्मसु योग्या भवन्तीतिवचनात् श्रुतेः संस्कार्यत्वप्रसङ्गात् । स्मृत्यन्तरोक्ता अपि संस्कार्या लिख्यन्ते । “ षण्ढान्धबधिरस्तब्धजडगद्गदपङ्गुषु । कुब्जवामनरोगार्त्तशुष्काङ्गिविकलाङ्गिषु ॥ मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये । ध्वस्तपुंस्त्वेऽपि चैतेषु संस्काराः स्युर्यथोचिताः ” “ मूकोन्मत्तौ न संस्कार्यौ ” इत्येके । कर्मस्वनधिकारात्पातित्यं नास्ति । तदपत्यं तु संस्कार्यम् । “ ब्राह्मण्यां ब्राह्मणेनोत्पन्नो ब्राह्मण एव” इति स्मृतेः । अन्ये तु तावपि संस्कार्यावित्याहुः । होमं तावदाचार्यः करोति । उपनयनं विधिना आचार्यसमीपानयनमग्निसमीपानयनं वा सावित्रीवाचनं वा । अन्यदङ्गं यथाशक्ति कार्यम् । विवाहश्च कन्यास्वीकारोऽन्यदङ्गमिति । “ औरसक्षेत्रजाश्चैषां संस्कार्या भागहारिणः । औरसः पुत्रिकापुत्रः क्षेत्रजो गूढजस्तथा ॥ कानीनश्च पुनर्भूजो दत्तः क्रीतश्च कृत्रिमः । दत्तात्मा च सहोढश्च त्वपविद्धसुतस्ततः ॥ पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः । एते द्वादशपुत्राश्च संस्कार्याः स्युर्द्विजातयः ॥ ” “केचिदाहुर्द्विजैर्जातौ संस्कार्यौ कुण्डगोलकौ । अमृते च मृते पत्यौ जारजौ कुण्डगोलकौ ॥” **शङ्खलिखितौ**—“नोन्मत्तमूकान् संस्कुर्यात् ।” **विष्णुः**—“नापरीक्षितं याजयेत् । नाध्यापयेन्नोपनयेत् ” । **आपस्तम्बः**—“ शूद्राणामदुष्टकर्मणामुपनयनम् । ” एतच्च रथकारविषयम्, तस्य तु मातामहीद्वारकं शूद्रत्वम् । अदुष्टकर्मणां “मद्यपानरहितानाम्” इति **कल्पतरुकारः**—इति सूत्रार्थः ॥ ५ ॥

अथोपनयनप्रयोगः । तत्र ब्राह्मणस्याष्टवार्षिकस्य, गर्भाष्टवार्षिकस्य वा, क्षत्रियस्यैकादशवार्षिकस्य, वैश्यस्य द्वादशवार्षिकस्योपनयनं कुर्यात् । यथामङ्गलं वा सर्वेषामुपनयनम् । अथोदगयने शुक्लपक्षे पुण्येऽहनि मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कुर्यात् । कुमारस्य वपनं कारयित्वा, ब्राह्मणत्रयं भोजयित्वा कुमारं च भोजयित्वा, बहिःशालायां पञ्च भूसंस्कारान् विधाय लौकिकाग्निं स्थापयित्वा पर्युप्तशिरसमलङ्कृतं कुमारमाचार्यपुरुषा आचार्यसमीपमानयन्ति । तत आचार्य आनीतं कुमारं पश्चादग्नेः स्वस्य दक्षिणेऽवस्थाप्य ब्रह्मचर्यमागामिति ब्रूहीति कुमारं प्रति वदति । ब्रह्मचर्यमागामिति कुमारः प्रतिब्रूयात् । ब्रह्मचार्यसानीति ब्रूहीत्याचार्येणोक्ते ब्रह्मचार्यसानीति माणवको ब्रूयात् । अथाचार्यो माणवकं “ येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतम् । तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे” इत्यनेन मन्त्रेण यथोक्तं वासः परिधापयति । तत आचार्यो माणवकस्य कटिप्रदेशे मेख*लां बध्नाति । “ इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात् । प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयम्” इति मन्त्रं पठितवतः । “ युवा सुवासाः परिवीत आगात्स उ श्रेयान् भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः” इति वा मन्त्रम् । तूष्णीं मन्त्रवर्जं वा । ततः “ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रति-

---

* “मेखला सप्तहस्ता स्यादाजिनं तु द्विहस्तकम् । बहिर्लोम त्र्यङ्गुलं वा खण्डैकं वा त्रिखण्डकम् ॥ त्रिवृता मेखला कार्या त्रिवारं स्यात्समावृता । तद्ग्रन्थयस्त्रयः कार्याः पञ्च वा सप्त वा पुनः ।” **मनुः**—“मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला । त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥” अत्र प्रवरसंख्यानियम इति वृद्धाः ॥

मुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः" इति मन्त्रं पठितवतो माणवकस्य दक्षिणबाहुमुद्धृत्य वामस्कन्धे यज्ञोपवीतं निवेशयति । यज्ञोपवीतलक्षणं तु छन्दोगपरिशिष्टे—"त्रिवृदूर्ध्ववृतं कार्यं तन्तुत्रयमधोवृतम् । त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते " । वामावर्तं त्रिगुणं कृत्वा प्रदक्षिणावृत्तं नवगुणं विधाय तदेव त्रिसरं कृत्वा ग्रन्थिमेकं विदध्यात् । यथा—"पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम् । तद्धार्यमुपवीतं स्यान्नातिलम्बं नचोच्छ्रितम् ॥ वामस्कन्धे धृते नाभिहृत्पृष्ठवंशयोर्धृतम् । " यथा कटिपर्यन्तं प्राप्नोति तावत्परिमाणं कर्त्तव्यमित्यर्थः । "कार्पासक्षौमगोबालशाणवल्कतृणादिकम् । सदा सम्भवतो धार्यमुपवीतं द्विजातिभिः ॥ १ ॥ शुचौ देशे शुचिः सूत्रं संहताङ्गुलिमूलके । आवेष्ट्य षण्णवत्या तत् त्रिगुणीकृत्य यत्नतः ॥ २ ॥ अविलङ्गकैस्त्रिभिः सम्यक् प्रक्षाल्योर्ध्ववृतं च तत् । अप्रदक्षिणमावृत्तं सावित्र्या त्रिगुणीकृतम् ॥ ३ ॥ अधःप्रदक्षिणावृत्तं समं स्यान्नवसूत्रकम् । त्रिरावेष्ट्य दृढं बद्ध्वा हरिब्रह्मेश्वरान्नमेत् ॥ ४ ॥ यज्ञोपवीतं परममिति मन्त्रेण धारयेत् । सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकम् ॥ ५ ॥ सावित्र्या दशकृत्वोऽद्भिर्मन्त्रिताभिस्तदुक्षयेत् । विच्छिन्नं वाऽप्यधोयातं भुक्त्वा निर्मितमुत्सृजेत् ॥ ६ ॥ स्तनादूर्ध्वमधो नाभेर्न धार्यं तत्कथञ्चन । ब्रह्मचारिण एकं स्यात्स्नातस्य द्वे बहूनि वा ॥ ७ ॥ तृतीयमुत्तरीयं वा वस्त्राभावे तदिष्यते । ब्रह्मसूत्रे तु सव्येंऽसे स्थिते यज्ञोपवीतिता ॥ ८ ॥ प्राचीनावीतिताऽसव्ये कण्ठस्थे तु निवीतिता । वस्त्रं यज्ञोपवीतार्थं त्रिवृत्सूत्रं च कर्मसु ॥ ९ ॥ कुशमुञ्जवल्वजतन्तुरज्ज्वा वा सर्वजातिषु । ततस्तथैव तूष्णीं माणवकस्य यथोक्तमजिनमुत्तरीयं कारयति । तत आचार्यो माणवकाय दण्डं ददाति । माणवकश्च " यो मे दण्डः परापतद्वैहायसोऽधिभूम्याम् । तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसाय" इत्यनेन मन्त्रेण तं प्रतिगृह्णाति । दीक्षावद्वा दण्डं ददाति प्रतिगृह्णात्युच्छ्रयति च । अथाचार्यः स्वकीयमञ्जलिं जलेन पूरयित्वा तेन जलेनाञ्जलिस्थेन माणवकस्याञ्जलिं पूरयति आपोहिष्ठेति त्र्यृचेन । ततो गुरुर्माणवकं प्रेषयति सूर्यमुदीक्षस्वेति । माणवकश्च प्रेषितस्तच्चक्षुरिति मन्त्रेण सूर्यमुदीक्षते । अथाचार्यो माणवकस्य दक्षिणांसस्योपरि स्वं दक्षिणं हस्तं नीत्वा हृदयमालभते "मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु।मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम्" इति मन्त्रेण । अथाचार्योऽस्य माणवकस्य दक्षिणं हस्तं साङ्गुष्ठं गृहीत्वा को नामासीत्याह । एवं पृष्टः कुमारः अमुकशर्माऽहं भो इति प्रत्याह । पुनराचार्यो माणवकं पृच्छति कस्य ब्रह्मचार्यसीति। भवत इति माणवकेनोच्यमाने इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवामुकशर्मन्नित्याचार्यः पठेत् । अथैनं कुमारं भूतेभ्यः परिददात्याचार्यः "प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्यै" इत्यनेन मन्त्रेण । अथ कुमारः अग्निं प्रदक्षिणीकृत्य आचार्यस्योत्तरत उपविशति । आचार्यश्च ब्रह्मोपवेशनादिपर्युक्षणान्तं कृत्वा आघाराद्याः स्विष्टकृदन्ताश्चतुर्दशाज्याहुतीर्ब्रह्मान्वारब्धो हुत्वा हुतशेषं प्राश्य पूर्णपात्रं वरं वा ब्रह्मणे दद्यात् । अथानन्तरमेनं ब्रह्मचारिणं संशास्ति कथं ब्रह्मचार्यसीत्याचार्यो वदति, भवानीति ब्रह्मचारी। अपोऽशानेत्याचार्यः । अशानीति ब्रह्मचारी । कर्म कुर्वित्याचार्यः । करवाणीति ब्रह्मचारी । मा दिवा सुषुप्था इत्याचार्यः । न स्वपानीति ब्रह्मचारी । वाचं यच्छेत्याचार्यः । यच्छानीति ब्रह्मचारी । समिधमाधेहीत्याचार्यः । आदधानीति ब्रह्मचारी । अपोऽशानेत्याचार्यः । अशानीति ब्रह्मचारी । अथास्मै एवं शासिताय ब्रह्मचारिणे आचार्यः सावित्रीमन्वाह । कीदृशाय उत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टाय पादोपसङ्ग्रहपूर्वकमुपसन्नाय आचार्यं समीक्षमाणाय स्वयमप्याचार्येण समीक्षिताय । कथमन्वाह—ॐकारव्याहृतिपूर्वकं प्रथमं पच्छः एकैकं पादं, तथा द्वितीयमर्द्धर्चशः, तथैव तृतीयं, सर्वां स्वयं च ब्रह्मचारिणा सह पठन् । केषांचित्पक्षे दक्षिणतोऽग्नेस्तिष्ठते आसीनाय वा आचार्य उक्तप्रकारेण सावित्रीमन्वाह । "संवत्सरे वा षण्मास्ये चतुर्विंशत्यहे वा द्वादशाहे वा षडहे वा त्र्यहे वा" काले क्षत्रियवैश्ययोर्ब्रह्मचारिणोराचार्यः सावित्रीं ब्रूयात् । ब्राह्मणाय तु सद्य एव गायत्रीं गायत्रीछन्दस्कां सावित्रीं सवितृदैवत्याम् ऋचं विश्वामित्रदृष्टां

सायमग्निहोत्रहोमानन्तरं गार्हपत्याग्न्युपस्थाने विनियुक्तां तत्सवितुरिति सर्ववेदशाखाम्नातां ब्रह्मदृष्टगायत्रीछन्दस्कां परमात्मदेवतां वेदारम्भादिविनियुक्तां सप्रणवां प्रजापतिदृष्टाग्निवायुसूर्यदैवतगायत्र्युष्णिगनुष्टुप्छन्दस्काग्न्याधानविनियुक्तभूर्भुवःस्वरितिमहाव्याहृतिपूर्विकां ब्राह्मणाय ब्रह्मचारिणे आचार्योऽनुब्रूयात्। क्षत्रियाय त्रिष्टुप्छन्दस्कां बृहस्पतिदृष्टां सवितृदैवत्यां देवसवितुरित्यादिकां वाजपेये आज्यहोमे विनियुक्तां, तथा वैश्याय प्रजापतिदृष्टां जगतीछन्दस्कां सवितृदेवत्यां रुक्मपाशप्रतिमोचने उषासम्भरणे विनियुक्तां "विश्वा रूपाणि प्रतिमुञ्चत" इत्येतामृचं ब्रूयात्। सर्वेषां वा ब्राह्मणक्षत्रिविशां गायत्रीमेव गायत्रीछन्दस्कां सावित्रीमुक्तलक्षणां ब्रूयात्। अत्रावसरे ब्रह्मचारी समिदाधानं करोति। तत्र पूर्वं दक्षिणहस्तेन "अग्ने सुश्रवः सुश्रवसं मा कुरु। यथा त्वमग्ने सुश्रवः सुश्रवा असि एवं माꣳ सुश्रवः सौश्रवसं कुरु। यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि एवमहं मनुष्याणां वेदस्य निधिपो भूयासम्" इत्येतैः पञ्चभिर्मन्त्रैः प्रतिमन्त्रम् इन्धनप्रक्षेपणाग्निं सन्धुक्षयति। हस्ताभ्यां वा सन्धुक्षणप्रसिद्धिरस्ति। ततोऽग्निं प्रदाक्षिणं दक्षिणहस्तेनाद्भिः पर्युक्ष्योत्थाय तिष्ठन् "अग्नये समिधमाहार्षं बृहते जातवेदसे। यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासꣳ स्वाहा" इत्यनेन मन्त्रेण उक्तलक्षणामेकां समिधमग्नावाधायानेनैव द्वितीयां तथैव तृतीयां चाधत्ते। "एषा ते अग्ने समित्" इत्यादिना वा मन्त्रेण। "अग्नये समिधमाहार्षम्" इति, "एषा ते अग्ने समित्" इत्येताभ्यां समुच्चिताभ्यां मन्त्राभ्यां वा एकैकशस्तिस्रः समिध आदधाति। तत उपविश्य पूर्ववदग्ने सुश्रव इत्यादिभिरग्निं सन्धुक्ष्य पर्य्युक्ष्य च तूष्णीं पाणी प्रतप्य, "तनूपा अग्नेऽसि तन्वं मे पाहि। आयुर्दा अग्नेऽस्यायुर्मे देहि। वर्चोदा अग्नेऽसि वर्चो मे देहि। अग्ने यन्मे तन्वा ऊनं तन्म आपृण। मेधां मे देवः सविता आदधातु मेधां मे देवी सरस्वती आदधातु मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ" इति सप्तभिर्मन्त्रैः प्रतिमन्त्रं मुखं विमार्ष्टि। अत्र शिष्टाचारप्राप्ताः केचन पदार्था लिख्यन्ते। ततः "अङ्गानि च म आप्यायन्ताम्" इत्यनेन शिरःप्रभृति पादान्तं सर्वाङ्गमालभते। "वाक् च म आप्यायताम्" इति मुखम्। "प्राणश्च म आप्यायताम्" इति नासारन्ध्रे युगपत्। "चक्षुश्च म आप्यायताम्" इति चक्षुषी युगपत्। "श्रोत्रं च म आप्यायताम्" इति दक्षिणं श्रोत्रम्। ततोऽनेनैव मन्त्रेण वामम्, "यशो बलं च म आप्यायताम्" इति मन्त्रं पठेत्। ततोऽनामिकया अग्नेर्भस्म गृहीत्वा ललाटे, ग्रीवायां, दक्षिणेंऽसे, हृदि, चतुर्षु स्थानेषु "त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम्" इति चतुर्भिर्मन्त्रैः प्रतिमन्त्रं त्र्यायुषाणि कुरुते। अत्र स्मृत्यन्तरोक्तमभिवादनं लिख्यते। "ततोऽभिवादयेद्वृद्धानसावहमिति ब्रुवन्" इति याज्ञवल्क्यादिस्मृतिप्रणीतस्याभिवादनस्य प्रयोगो यथा—वत्सगोत्रो भार्गवच्यावनाप्नवानौर्वजामदग्न्येति पञ्चप्रवरः श्रीधरशर्माऽहं भो३ श्रीहरिहरशर्मन् त्वामभिवादये इत्युक्त्वाऽभिवाद्य गुर्वादिकं ब्रह्मचारी अभिवादयेत्। अभिवाद्यश्च गुर्वादिः आयुष्मान् भव सौम्य श्रीधरशर्मन् भो३ इति प्रत्यभिवादयेत्। अयमभिवादनप्रयोगो गृहस्थस्यापि। अत्र वृद्धानिति वचनात् कनिष्ठाभिवादने नाधिकारः। वृद्धाश्च त्रिविधाः विद्यातपोवयोभिः। अत्र समये ब्रह्मचारी भैक्षं चरति! तद्यथा-भवति भिक्षां देहीति ब्राह्मणः। भिक्षां भवति देहीति राजन्यः। भिक्षां देहि भवतीति वैश्यश्च भिक्षां भिक्षेत। अत्र भिक्षायाचनवाक्ये भवतीति स्त्रीसम्बोधनपदात् स्त्रियो भिक्षेतेति प्राप्तम्। ताश्च कीदृशीः कति च इत्यपेक्षायामुच्यते। याः प्रत्याख्यानं न कुर्वन्ति ताः भिक्षेत। कति तिस्रः, षड्वा द्वादश वा, द्वादशभ्योऽधिका वा। मातरं वा प्रथमां भिक्षेतेत्यन्वयः। एवं भिक्षां भिक्षित्वा ब्रह्मचारी गुरवे भैक्षं निवेद्य अहश्शेषं वाग्यतस्तिष्ठेत् वा आसीत वेत्यनियमः। तत उपास्तमयं सन्ध्यावन्दनपूर्वकं स्वयं प्रशीर्णाः पूर्वोक्तलक्षणाः समिधः पूर्ववत् उक्तप्रकारेण तस्मिन्नेवाग्नौ आधाय वाचं विसृजत इति **तद्दिनकृत्यम्**। अथ **तद्दिनमारभ्यासमावर्तनात्कर्तव्यमुच्यते**। भूमौ शयनम्। अक्षारालवणाशनम्। दण्डधारणम्। अग्निपरिचरणम्। गुरुशुश्रूषा। भिक्षाचर्या। सायम्प्रातर्भोजनार्थं

भोजनसन्निधाने वारद्वयं वा भैक्षचरणम्, अनिन्द्ये ब्राह्मणगृहे भैक्षं गुर्वाज्ञया याचित्वा भोजनविना भुञ्जानः मधुमांसमज्जनोपर्यासनस्त्रीगमनानृतादत्तादानानि वर्जयेत् । **स्मृत्यन्तरे** तु–"मधुमांसाञ्जनोच्छिष्टमुक्तस्त्रीप्राणिहिंसनम् । भास्करालोकनाश्लीलपरिवादादि वर्जयेत्" । आदिशव्देन पर्युषितताम्बूलदन्तधावनावसक्थिकादिवास्वापच्छत्रपादुकागन्धमाल्योद्वर्तनानुलेपनजलक्रीडाद्यूतनृत्यगीतवाद्यालापादीन्यन्यान्यपि वर्जनीयानि स्मृतानि । तथा–" कार्या भिक्षा सदा धार्यं कौपीनं कटिसूत्रकम् । कौपीनमहतं धार्यं दण्डं वा वस्त्रपार्श्वयुक्।। यज्ञोपवीतमजिनं मौञ्जीं दण्डं च धारयेत्। नष्टे भ्रष्टे नवं मन्त्रात् धृत्वा भ्रष्टं जले क्षिपेत्" । अष्टाचत्वारिंशद्वर्षाणीत्यादि व्यवहार्या भवन्तीति वचनात् इत्यन्तं सूत्रमुक्तार्थम्। "कालातिक्रमे नियतवत्" इत्यस्यार्थः उक्तः। इतिकर्तव्यताऽत्र लिख्यते। पूर्णाहुतिवदाज्यं संस्कृत्य अनादिष्टप्रायश्चित्तहोमं कुर्यात् । पूर्णाहुतिर्यथा–**कात्यायनसूत्रे**–"पूर्णाहुतिं जुहोति निरुप्याज्यं गार्हपत्येऽधिश्रित्य स्रुक्स्रुवं च सम्मृज्योद्वास्योत्पूयावेक्ष्य गृहीत्वाऽन्वारब्ध एवꣳ सर्वत्र" । अत्रैवं **प्रयोगः** । यदाऽऽवसथिकस्यानादिष्टं प्राप्नोति तदाऽग्निः सम्भृत एव । यदि च निरग्निस्तदा शुद्धायां भूमौ पञ्चभूसंस्कारान्कृत्वा लौकिकमग्निं स्थापयित्वा स्थाल्यामाज्यं तूष्णीं निरुप्याग्नावधिश्रित्य स्रुवं दर्भैः सम्मृज्याज्यमुद्वास्य कुशतरुणाभ्यामुत्पूयावेक्ष्य स्रुवेणादायोपरि समिधं निधायोत्थाय स्रुवं सव्यहस्ते कृत्वा दक्षिणेनाग्नौ तिष्ठन् समिधमाधायोपविश्य दक्षिणं जान्वाच्य ॐ भूः स्वाहेति स्रुवस्थेनाज्येनैकामाहुतिं हुत्वा भुवः स्वाहा स्वः स्वाहा भूर्भुवः स्वः स्वाहेति चतस्रः "त्वं नो अग्न" इत्यादिभिः पञ्च स्रुवेणावदायाज्याहुतीर्जुहोति । इदं नवाहुतिहोमात्मकं कर्म यत्र यत्र प्रायश्चित्तानादेशः कर्मणां नियतकलातिक्रमो वा तत्र तत्रानादिष्टसञ्ज्ञकं प्रायश्चित्तं वेदितव्यम् । यदा तु कस्मिंश्चित्स्थालीपाकादिकर्मप्रयोगे वर्तमाने अनादिष्टप्रायश्चित्तमापद्येत तदा तत्कर्माङ्गभूत एवाग्नौ तत्कृत्वाऽनादिष्टं हुत्वा उपरितनं प्रयोगं कुर्यात् । " यदा तु बहूनि निमित्तानि भवन्ति तदा प्रतिनिमित्तं नैमित्तिकमावर्तते" इति न्यायात् यावन्ति निमित्तानि तावत्कृत्वः प्रायश्चित्तमावर्तते यथोक्तम् । **इत्युपनयनपद्धतिः** । अत्र "वेदब्रह्मचर्यं चरेत्" इत्यनेन वेदाध्ययनाङ्गतया ब्रह्मचर्याचरणमुक्तम्, वेदाध्ययनारम्भस्य काल इतिकर्तव्यता च नोक्ता । केवलं समावर्तनकर्म **सूत्रकारेणारब्धं,वेदꣳ समाप्य स्नायादिति** । तत्र वेदस्यारम्भं विना समाप्तिः कर्तुमशक्येति उपनयनानन्तरमेव वेदारम्भस्य समय इत्यवगम्यते । इतिकर्तव्यता च पुनरेतदेव व्रतादेशनविसर्गेष्विति उपाकर्महोमातिदेशाद्व्रतादेशने वेदारम्भे प्राप्नोति । अतश्च " उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् । वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत्" इति गुरोरुपनयनानन्तरं वेदाध्यापनविधानाच्च उपनयनोत्तरकालं पुण्येऽहनि मातृपूजापूर्वकं वेदारम्भनिमित्तमाभ्युदयिकं श्राद्धमाचार्यो विधाय, पञ्चभूसंस्कारपूर्वकं लौकिकाग्निं स्थापयित्वा, ब्रह्मचारिणमाहूय अग्नेः पश्चात् स्वस्योत्तरत उपवेश्य ब्रह्मोपवेशनाद्याज्यभागान्तं कृत्वा यदि ऋग्वेदमारभते तदा पृथिव्यै स्वाहा अग्नये स्वाहेति द्वे आज्याहुती हुत्वा, ब्रह्मणे छन्दोभ्य इत्याद्या नवाहुतीर्हुत्वा शेषं समापयेत् । यदि यजुर्वेदं तदाऽऽज्यभागानन्तरम् अन्तरिक्षाय स्वाहा वायवे स्वाहेति विशेषः । यदि सामवेदं तदाऽऽज्यभागान्ते दिवे स्वाहा सूर्याय स्वाहेति विशेषः । यदाऽथर्ववेदं तदाऽऽज्यभागान्ते दिग्भ्यः स्वाहा, चन्द्रमसे स्वाहेति विशेषः । यद्येकदा सर्ववेदारम्भस्तदाऽऽज्यभागानन्तरं क्रमेण प्रतिवेदं वेदाहुतिद्वयं हुत्वा, ब्रह्मणे छन्दोभ्य इत्याहुतिद्वयं च हुत्वा प्रजापतय इत्याद्याः सप्त तन्त्रेण जुहुयात् । अनन्तरं महाव्याहृत्यादिस्विष्टकृदन्ता दशाहुतीर्हुत्वा प्राशनं विधाय पूर्णपात्रवरयोरन्यतरं ब्रह्मणे दत्त्वा ब्रह्मचारिणे यथाविधि वेदमध्यापयितुमारभते । इति **व्रतादेशप्रयोगः** ॥ ५ ॥ * ॥

गदा०–अत्र भिक्षाचर्यचरणम्-अत्रास्मिन्काले भिक्षाचर्यचरणं कर्तव्यमित्यर्थः । अत्र विशेषो मनुस्मृतौ– " प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम् । प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि " । "एतत्त्रितयं भिक्षाङ्ग"

इति **पारिजाते** । **कारिकायामप्येवम्** । **भवत्पूर्वां ब्राह्मणो भिक्षेत भवन्मध्याꣳराजन्यो भवदन्त्यां वैश्यः**-भवच्छब्दः पूर्वो यस्याः सा भवत्पूर्वा तां भवत्पूर्वां ब्राह्मणो वर्णोत्तमो भिक्षेत याचेत । एवं भवच्छब्दो मध्ये यस्याः सा भवन्मध्या तां भिक्षां राजन्यः क्षत्रियो भिक्षेत।तथा भवच्छब्दोऽन्त्यो यस्याः सा भवदन्त्या तां वैश्यो वर्णतृतीयो भिक्षेत । अयमर्थः। सगौरवसम्बोधनार्थं भवत्पदमादिमध्यावसानेषु ब्राह्मणादिभिः क्रमेण कार्यम् तच्च सम्बुद्ध्यन्तम् । तिस्र इति सूत्रसामर्थ्यात्स्त्रीप्रत्ययवच्च तत्पदं भवति । तत्रायं प्रयोगः । भवति भिक्षां देहीति ब्राह्मणः । भिक्षां भवति देहीति क्षत्रियः । भिक्षां देहि भवतीति वैश्यः । **तिस्रोऽप्रत्याख्यायिन्यः**—तिस्रः स्त्रियो भिक्षां भिक्षेत । किम्भूता अप्रत्याख्यायिन्यः। अत्र द्वितियार्थे प्रथमा। भिक्षेतेति कर्तृप्रत्ययान्तस्याख्यातस्य कर्मकारकापेक्षित्वात् । प्रत्याख्यातुं निराकर्तुं शीलं यासां ताः न प्रत्याख्यायिन्यः अप्रत्याख्यायिन्यः । याः स्त्रियो निराकरणं न कुर्वन्ति ता भिक्षणीया इत्यर्थः । **शौनकेन** विशेषो दर्शितः—“अप्रत्याख्यायिनमग्रे भिक्षेताप्रत्याख्यायिनीं वा” इति । **याज्ञवल्क्यः**—“ ब्राह्मणेषु चरेद्भैक्षमनिन्द्येष्वात्मवृत्तये ” इति । भैक्षं प्राप्तुं चरेदित्यर्थः । आत्मवृत्तये स्वशरीरयात्रार्थं नाधिकम् । “ब्राह्मणेषु चरेत् ” इत्येतद्ब्राह्मणविषयम् । अत एव **व्यासः**—“ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्षमन्वहम् । सजातीयगृहेष्वेव सार्ववर्णिकमेव वा” इति । सर्वशब्दः प्रकृतवर्णत्रयपरः । **षट् द्वादशापरिमिता वा**—षड्वा स्त्रियः । द्वादश वा स्त्रियः । अपरिमिता असङ्ख्याता वा भिक्षेतेत्यर्थः । **मातरं प्रथमामेके**—एके आचार्या मातरं स्वजननीं प्रथमां भिक्षेतेत्याहुः । अयं च “प्रथमाहर्द्धर्मः” इति **कर्कः** । **आचार्याय भैक्षं निवेदयित्वा वाग्यतोऽहःशेषं तिष्ठेदित्येके**—ततो ब्रह्मचारी भिक्षां भिक्षित्वा आचार्याय उपनयनकर्त्रे भैक्षं भिक्षां लब्धां निवेदयित्वा निवेदनं कृत्वा इयं भिक्षा लब्धेति, वाग्यतः संयमितवाक् अहःशेषं तिष्ठेत् । इतः प्रभृति यावदस्तमयमासीतेति एके वदन्ति । न वेत्यन्ये । अतो विकल्पः । **अहिꣳसन्नरण्यात्समिध आहृत्य तस्मिन्नग्नौ पूर्ववदाधाय वाचं विसृजते**—ब्रह्मचारी अहिंसन् अच्छिन्दन् हिंसामकुर्वन् अरण्याद्वनात्समिध आहृत्य आनीय तस्मिन् यस्मिन्नुपनयनहोमः कृतस्तस्मिन्नग्नौ पूर्ववत्पाणिनाऽग्निं परिसमूहतीति पूर्वोक्तरीत्याऽऽधाय समिदाधानं कृत्वा वाचं विसृजते यदि वाग्यमो गृहीतस्तदा तस्मिन्काले विसृजते । **अधःशाय्यक्षारालवणाशी स्याद्दण्डधारणमग्निपरिचरणं गुरुशुश्रूषा भिक्षाचर्या**—अधःशायी स्यात् । अक्षारालवणाशी भवेत् । दण्डधारणं सर्वदा कार्यम् । अग्नेः परिचरणम् । समिदाधान परिसमूहनादि सायम्प्रातः । “उभयकालमग्निं परिचरेत्” इति स्मृत्यन्तरात् । गुरुशुश्रूषा च प्रत्यहं कर्तव्या स्वाध्यायानुरोधेन । भिक्षाचर्या भिक्षाचरणं स्थित्यर्थम् । **मधुमाꣳसमज्जनोपर्यासनस्त्रीगमनानृतादत्तादानानि वर्जयेत्**—मधु प्रसिद्धम्, मांसं च । मज्जनं गङ्गादौ स्नानं प्रतिषिध्यते । उद्धृतोदकेन तु कार्यमेव । उपर्यासनमासनस्योपरि मसूरिकाद्यासनं निधायोपवेशनम् । स्त्रीगमनं स्त्रीणां मध्येऽवस्थानम्, अभिगमनस्योपरि वक्ष्यमाणत्वात् । अनृतम् असत्यभाषणम् । अदत्तादानं परद्रव्याणामदत्तानां स्वयं ग्रहणम् । एतानि ब्रह्मचारी वर्जयेन्न कुर्यात् । **अष्टाचत्वारिꣳशद्वर्षाणि वेदब्रह्मचर्यं चरेत्**-अष्टाभिरधिकानि चत्वारिंशदष्टाचत्वारिंशत् तान्यष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत् चतुर्णां वेदानां ग्रहणार्थम् एकमेव ब्रह्मचर्यव्रतं कुर्यात् । अस्मिन्पक्षे चतुर्णामपि वेदानामेक एव व्रतादेशः । सर्वाश्च वेदाहुतयो हूयन्ते । **द्वादश द्वादश वा प्रतिवेदम्**—अथवा प्रतिवेदं द्वादशद्वादशवर्षपर्यन्तं ब्रह्मचर्यं चरेत् । अयमर्थः । एकं वेदं समाप्य समावर्तनं कृत्वा पुनर्द्वितीयवेदग्रहणं यावत् ब्रह्मचर्यं चरित्वा स्नात्वैवं वेदान्तरेऽपि ब्रह्मचर्यं चरेत् । **यावद्ग्रहणं वा**-यद्वा यावद्वेदस्य वेदयोर्वेदानां पाठतोऽर्थतश्च स्वकिरणं तावत् ब्रह्मचर्यं चरेत् । अथ वर्णक्रमेण परिधानवस्त्राण्याह—**वासाꣳसि शाणक्षौमाविकानि**—ब्राह्मणक्षत्रियविशां त्रयाणां ब्रह्मचारिणां शाणक्षौमाविकानि वासांसि वस्त्राणि यथासङ्ख्यं परिधानार्थं भवन्ति । शाणं शणमयम् । क्षौमं क्षुमा अतसी तद्विकारमयम् । आविकम् अवेर्मेषस्य विकार आविकम्, मेषरोमनिर्मितम् । **गौतमः**—“सर्वेषां कार्पासं वाऽविकृतम्” इति । **वासिष्ठः**—“शुक्लमहतं वासो ब्राह्मणस्य, माञ्जिष्ठं क्षामं च क्षत्रियस्य, पीतं कौशेयं वैश्यस्य” इति । **कारिकायामप्येवम्** । ‘कौशेयं पटविशेषः’ इति **पारिजाते** । **ऐणेयमाजिनमुत्तरीयं ब्राह्मणस्य**—एणी हरिणी तस्या इदमैणेयं चर्म उत्तरीयं ब्राह्मणस्य ब्रह्मचारिणो भवति । अत्र **कारिकायां प्रयोगरत्ने** च विशेषः । “तत् त्र्यङ्गुलं बहिर्लोम यद्वा स्याच्चतुरङ्गुलम् । एकखण्डं त्रिखण्डं वा धार्यं तदुपवीतवत्” इति । **रौरवꣳराजन्यस्य**—राजन्यस्य क्षत्रियस्य ब्रह्मचारिणो रुरुनामाऽरण्यसत्त्वविशेषस्तदीयं चर्म

उत्तरीयं भवति । **आजं गव्यं वा वैश्यस्य**–अजस्येदं चर्म आजं, यद्वा गव्यं गोरिदं चर्म गव्यं वैश्यस्योत्तरीयं
भवति । **सर्वेषां वा गव्यमसति प्रधानत्वात्**–असति यथोदिते चर्मणि सर्वेषां वर्णानां वा गव्यं चर्म भवति ।
कुत एतत् पुरुषप्रधानत्वात् गव्यस्य चर्मणः । पुरुषप्रधानं हि गव्यं चर्म श्रूयते–"ते अवस्थाय पुरुषं गव्ये तां त्वचमदधुः"
इति । ते देवाः पुरुषत्वचमवस्थाय उत्कृत्य एतां त्वचं गावि अदधुः धृतवन्त इति श्रुत्यर्थः। **मौञ्जी रशना ब्राह्मणस्य**–
मुञ्जः शरस्तन्मयी मौञ्जी मेखला ब्राह्मणस्य ब्रह्मचारिणो भवति । **धनुर्ज्या राजन्यस्य**–धनुषश्चापस्य ज्या गुणः
मेखला क्षत्रियस्य ब्रह्मचारिणो भवति । सामर्थ्याच्च स्नायुमयी वेणुमयी वा । इयं च त्रिवृन्न कार्या ज्यात्व-
विनाशप्रसङ्गात् । **मौर्वी वैश्यस्य**–मुररिति तृणविशेषस्तन्मयी मौर्वी मेखला वैश्यस्य ब्रह्मचारिणो भवति ।
मुञ्जाभावे कुशाश्मन्तकवल्वजानाम्–मुञ्जाभावे ब्राह्मणस्य कुशाश्मन्तकवल्वजानां सम्बन्धिनी रशना भवति ।
" कुशमयी वा अश्मन्तकाख्यतृणमयी वाल्वजी वा भवति" इति **भर्तृयज्ञ**व्याख्याने लभ्यते । "मुञ्जाभावशब्दोऽत्र
धनुर्ज्यामौर्व्यभावोपलक्षणार्थः " इति **रेणुगर्गहरिहराः** । "मुञ्जाद्यभावे वर्णक्रमेण कुशाद्या ग्राह्याः " इति
मदनपारिजाते । **पालाशो ब्राह्मणस्य दण्डः**–ब्राह्मणस्य ब्रह्मचारिणः पालाशो दण्डो भवति । **बैल्वो**
राजन्यस्य--बैल्वः बिल्ववृक्षोद्भवो दण्डः क्षत्रियस्य ब्रह्मचारिणो भवति । **औदुम्बरो वैश्यस्य**--वैश्यस्य ब्रह्मचा-
रिण उदुम्बरवृक्षोद्भवो दण्डो भवति । अत्राचार्येणानुक्तमपि दण्डमानमुपयुक्तत्वादविरोधित्वाच्छाखान्तरीयं ग्राह्यम् ।
तच्च **केशसम्मितो ब्राह्मणस्य दण्डो ललाटसम्मितः क्षत्रियस्य घ्राणसम्मितो वैश्यस्येति**--दण्डं
प्रक्रम्योक्तमिति **जयराम**भाष्ये । इदं च सूत्रं सूत्रत्वेन **हरिहर**भाष्ये तिष्ठति । **भर्तृयज्ञकर्का**दिग्रन्थेषु नोपलभ्यते ।
अतः क्षिप्तमेतदित्याभाति । **सर्वे वा सर्वेषाम्**–अथवा सर्वे पालाशादयो दण्डाः सर्वेषां ब्राह्मणक्षत्रियविशामनियमेन
भवन्ति । न प्रतिवर्णं जातिव्यवस्था भवति । **आचार्येणाहूत उत्थाय प्रतिशृणुयात्**–आचार्येणोपनयनकर्त्रा आहूत
आकारितो ब्रह्मचारी आसनादुत्थाय प्रतिशृणुयात् प्रतिवचनं दद्यात् । **शयानं चेदासीनः**–चेद्यादि आचार्यः शयानं
स्वपन्तं ब्रह्मचारिणमाह्वयति तदा स आसीन उपविष्टः सन् प्रतिवचनं दद्यात् । **आसीनं चेत्तिष्ठन्**–चेद्यद्यासीनमु-
पविष्टं ब्रह्मचारिणमाकारयत्याचार्यस्तदा स ब्रह्मचारी तिष्ठन् प्रतिवचनं दद्यात् । **तिष्ठन्तं चेदभिक्रामन्**–चेद्यदि
तिष्ठन्तं ब्रह्मचारिणमाह्वयति तदाऽभिक्रामन्नाचार्याभिमुखं व्रजन्प्रतिवचनं कुर्यात् । **अभिक्रामन्तं चेदभिधावन्**–
चेद्यादि अऽभिक्रामन्तं ब्रह्मचारिणमाकारयति तदा ब्रह्मचारी अभिधावन् आचार्याभिमुखं धावन् प्रतिवचनं दद्यात् ।
अस्यार्थवादमाह । **स एवं वर्तमानोऽमुत्राद्य वसतीत्यमुत्राद्य वसतीति**-स ब्रह्मचारी एवं पूर्वोक्तब्रह्मचर्यधर्मेण
वर्तमानः अमुत्र स्वर्लोके अद्य इहैव स्थितः सन् वसति तिष्ठति। द्विरुक्तिः प्रशंसार्था । **तस्य स्नातकस्य कीर्त्तिर्भवति**-
येनैवं ब्रह्मचर्यानुष्ठानं कृतं तस्य स्नातकस्य समावृत्तस्य कीर्त्तिर्यशो भवति । यथोक्तधर्मकर्त्तुः फलं चैतत् । स्नातक-
लक्षणमाह-**त्रयः स्नातका भवन्ति**–त्रयः त्रिविधाः स्नातका भवन्ति । **विद्यास्नातको व्रतस्नातको विद्याव्रतस्ना-**
तक इति–त्रिविधाः स्नातका इत्युक्तम् । तत्रैको विद्यास्नातकः । द्वितीयो व्रतस्नातकः । तृतीयो विद्याव्रतस्नातक
इति । **समाप्य वेदमसमाप्य व्रतं यः समावर्तते स विद्यास्नातकः**–समाप्य वेदं पाठतोऽर्थतश्च वेदं वेदस्य
मन्त्रब्राह्मणात्मिकामेकां शाखाम् । असमाप्य व्रतं द्वादशवार्षिकं ब्रह्मचर्यमसमाप्य यः समावर्तते स्नाति स विद्या-
स्नातक इत्युच्यते । **समाप्य व्रतमसमाप्य वेदं यः समावर्तते स व्रतस्नातकः**–व्रतं ब्रह्मचर्यं द्वादशवार्षिकं
समाप्य वेदमसमाप्य सम्पूर्णमनधीत्य यः समावर्तते स व्रतस्नातक इत्युच्यते । एवं च व्रतस्नातकस्य विवाहोत्तर-
कालमध्ययनसमापनं वेदार्थज्ञानं चेति मन्तव्यम् । **उभयं समाप्य यः समावर्तते स विद्याव्रतस्नातकः**–उभयं
वेदं ब्रह्मचर्यं च समाप्य यः स्नाति स विद्याव्रतस्नातक इत्युच्यते । लक्षणप्रयोजनं च "स्नातकानेके" इत्यादिषु
ज्ञेयम् । उपनयनकालस्य परमावधिमाह–**आषोडशाद्वर्षाद्ब्राह्मणस्यानतीतः कालो भवति**–अर्वाक् षोडशाद्वर्षा-
द्ब्राह्मणस्यानतीतः न अतिक्रान्त एवोपनयनस्य कालो भवति । **आद्वाविंशाद्राजन्यस्य**–अर्वाक् द्वाविंशाद्वर्षात्क्ष-
त्रियस्यानतीत एवोपनयनकालो भवति । **आचतुर्विंशाद्वैश्यस्य**–अर्वाक् चतुर्विंशाद्वर्षाद्वैश्यस्यानतीत एवोपनय-
नस्य कालो भवति । **अत ऊर्ध्वं पतितसावित्रीका भवन्ति**–अत उक्तकालादूर्ध्वमनुपनीता ब्राह्मणादयः पतितसा-
वित्रीका भवन्ति सम्पद्यन्ते, अधिकाराभावात् । पतिता स्खलिता सावित्री येभ्यस्ते पतितसावित्रीकाः । **नैनानुपनये-**
युर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः । एनान् पतितसावित्रीकान् । नोपनयेयुरशास्त्रज्ञाः । अज्ञानादुपनी-
तानपि नाध्यापयेयुः । एव[illegible]पिनापि न याजयेयुः यज्ञं न कारयेयुः । एभिः सह भोजनादिभिः कर्मभिर्व्यवहारमपि

न कुर्युः । सन्ति गर्भाधानादीनि नियतकालानि कर्माणि तेषु कालातिक्रमे प्रायश्चित्तमाह—**कालातिक्रमे नियतवत्**—गर्भाधानादिनियतकालानां कर्मणां नियतकालव्यतिक्रमे सति प्रायश्चित्तं नियतवत् नित्यवत् नियते श्रौतकल्पे नैमित्तिकेषु यद्विहितं स्मार्ते तदेवानादिष्टं भवति । तच्चाविज्ञाते प्रतिमहाव्याहृतिभिः सर्वाभिश्चतुर्थं सर्वप्रायश्चित्तं चेति । कालव्यतिक्रमादन्यत्रापि यज्ञोपवीतिना बद्धशिखेन पवित्रपाणिना बद्धकच्छेन प्रदक्षिणमाचान्तेन शुचिना स्नातेन कर्म कर्तव्यमित्यादिस्मृत्यन्तरविहितेऽपि भ्रेषे उत्पन्ने एतदेव भवति । नैमित्तिकान्तराविधानात् । "आवसथ्याग्निसाध्यलौकिकाग्निसाध्यानग्निसाध्यकर्मसु चतुर्गृहीतान्येतानि सर्वत्र" इति **प्रायश्चित्त**सूत्रे उक्तत्वादत्र चतुर्गृहीतं गृहीत्वा होमः कार्यः । चतुर्गृहीतं च स्रुगभावे न सम्भवत्यतः स्रुगुत्पाद्येति **रामवाजपेयिभिः** प्रायश्चित्ते उक्तम् । सा च होमसम्बन्धाद्वैकङ्कती भवति । स्रुवस्तु खादिर एव । "स्रुवेण प्रायश्चित्तहोमः" इति **हरिहरः** । तदयुक्तम् । अत्र "श्रौतातिदेशो नियतवत्" इति भगवता कृतः । तत्र चतुर्गृहीतं विहितं तदत्रापि प्राप्नोत्येव । चतुर्ग्रहणं च स्रुच्येव सम्भवति, अतः स्रुक् प्राप्ता केन निवार्यते । किञ्च पूर्णाहुतिधर्मोऽपि **हरिहरै**रङ्गीकृतस्तत्र पठितां स्रुक् स्वयं कुतो नाङ्गीकृतेति । यदि गृह्योक्तेतिकर्तव्यताऽङ्गीकृता स्यात्ततः स्यात्स्रुवेण होमः । सा नाङ्गीकृतेत्यलमतिप्रसङ्गेन । **कारिकायाम्**—"मुख्यकाले नरैः कर्म कर्तुं यदि न शक्यते । गौणकालेऽपि कर्तव्यं तदनादिष्टपूर्वकम् ॥" इदं प्रायश्चित्तं त्वनादिष्टम् । यत्र विशिष्टप्रायश्चित्तं स्मर्यते तत्र नैतद्भूयते किन्तु तदेव तत्र भवति । यथा "सर्वकर्ममध्ये तु क्षुत आचमनं स्मृतम् ।" तथा "अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे । मार्जारमूषकस्पर्शे आक्रुष्टे क्रोधसम्भवे । निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नपः स्पृशेत्" इति **रामवाजपेयिनः** । **त्रिपुरुषं पतितसावित्रीकाणामपत्ये संस्कारो नाध्यापनं च**—त्रीन्पुरुषान् यावत् ये पतितसावित्रीकाः पितृपुत्रपौत्रास्तेषामपत्ये चतुर्थे पुरुषेऽसंस्कार उपनयनसंस्कारो न भवति । अध्यापनं च न भवति । अत्र **हरिहर**भाष्यं मृग्यम् । **तेषाꣳ संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन् व्यवहार्या भवन्तीति वचनात्**—तेषां पितृपुत्रपौत्राणां त्रयाणां पतितसावित्रीकाणां मध्ये यः संस्कारेप्सुः आत्मानं संस्कारयितुकामः स व्रात्यस्तोमेन यज्ञेनेष्ट्वा व्रात्यस्तोमं कृत्वा व्यवहार्यो भवति । काममिच्छया व्रात्यस्तोमेनेष्ट्वा अधीयीरन् वेदं पठेयुः, व्यवहार्याः शिष्टानामध्यापनादिकर्मसु योग्या भवन्तीति वचनाच्छ्रुतेः । अथ षण्ढमूकादीनां विशेषः **प्रयोगपारिजाते**—"ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति श्रुतिः । तस्माच्च षण्ढबधिरकुब्जवामनपङ्गुषु ॥ जडगद्गदरोगार्तशुष्काङ्गविकलाङ्गिषु । मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये । ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम् ॥ मत्तोन्मत्तौ न संस्कार्याविति केचित्प्रचक्षते । कर्मस्वनाधिकाराच्च पातित्यं नास्ति चैतयोः ॥ तदपत्यं च संस्कार्यमपरे त्वाहुरन्यथा । संस्कारमन्त्रहोमादीन् करोत्याचार्य एव तु ॥ उपनेयांश्च विधिवदाचार्यः स्वसमीपतः । आनीयाग्निसमीपं वा सावित्रीं स्पृश्य वा जपेत् ॥ कन्यास्वकिरणादन्यत्सर्वं विप्रेण कारयेत् । एवमेव द्विजैर्जातौ संस्कार्यौ कुण्डगोलकौ" इति । **स्मृत्यर्थसारेऽप्येवम्** । **आपस्तम्बः**—"शूद्राणामदुष्टकर्मणामुपनयनम्" । इदं च रथकारस्योपनयनम् । तस्य च मातामहीद्वारकं शूद्रत्वम् । अदुष्टकर्मणां मद्यपानादिरहितानामिति ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति—श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृतौ गृह्यसूत्रभाष्ये द्वितीयकाण्डे पञ्चमी कण्डिका ॥ ५ ॥ ॥ * ॥

अथ **पदार्थक्रमः** । शुक्लपक्षे द्वितीयादिस्वाध्यायतिथिषु, नानध्याये न नैमित्तिकानध्याये, पूर्वाह्णे शुभमुहूर्ते शुभचन्द्रादौ गुरुशुक्रयोर्बाल्यवार्द्धकास्तराहित्यादौ ज्योतिर्विज्ञोक्ते शुभे काले उपनयनं कार्यम् । तत्राधिकारसिद्धये प्रायश्चित्तमाह—**वृद्धविष्णुः**—"कृच्छ्रत्रयं चोपनेता त्रीन्कृच्छ्रांश्च बटुश्चरेत् । आचार्यो द्वादशसाहस्रं गायत्रीं च जपेत्तथा ॥ नान्दीश्राद्धे कृते चेत्स्यादनध्यायस्त्वकालिकः । तदोपनयनं कार्यं वेदारम्भं न कारयेत् ॥" उक्ते काले उपनिनीषुः पिता पूर्वेद्युर्बटोः परिधानार्थं शुक्लमीषद्धौतं नवं सदशं परेणाधृतं वस्त्रमुत्तरीयार्थं चाजिनं यज्ञोपवीतं मेखलामव्रणमृजुं सौम्यदर्शनं दण्डं कौपीनं भिक्षाभाजनं च सम्पाद्य, स्वस्योपनेतृत्वाधिकारसिद्धये कृच्छ्रत्रयं, द्वादशसाहस्रं गायत्रीं च जप्त्वा, कुमारेणापि कामचारकामवादकामभक्षणादिदोषापनोदनार्थं कृच्छ्रत्रयं कारयित्वा स्वस्तिवाचनाङ्कुरार्पणग्रहयज्ञनान्दीश्राद्धानि सङ्कल्पपूर्वकं कृत्वा मण्डपप्रतिष्ठां कुर्यात् । तत्र सङ्कल्पः । अस्य कुमारस्योपनयने ग्रहानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये । ग्रहयज्ञं समाप्य देशकालौ स्मृत्वाऽस्य कुमारस्य द्विजत्वसिद्धिद्वारा वेदाध्ययनाधिकारार्थं श्व उपनयनं करिष्ये । तदङ्गभूतमद्य गणपतिपूजनपूर्वकं स्वस्तिवाचनपूर्वकं नान्दीश्राद्धं मण्डपप्रतिष्ठां कुलदेवतादिस्थापनं च करिष्ये । उपनयनेन सह चौलकरणपक्षे तदपि सङ्कल्पे कीर्तयेत् ।

तन्त्रेण च स्वस्तिवाचनग्रहयज्ञनान्दीश्राद्धादीनि कुर्यात् ।अथापरेद्युः कृतनित्यक्रियः कुमारस्य वपनं कारयित्वा, ब्राह्मणत्रयं भोजयित्वा कुमारं च भोजयित्वा, बहिःशालायां पञ्चभूसंस्कारपूर्वकं लौकिकाग्निं स्थापयेत् । ततो **वैकल्पिकावधारणम्** । तूष्णीं मेखलाबन्धनम् । दण्डः पालाशः । आसीनाय गायत्रीप्रदानम् ।“एषा ते”इति सामिदाधानम्। मातृपूर्वकमपरिमिताश्च भिक्षणीयाः । न वाग्यतोऽहःशेषं तिष्ठेदिति पक्षः । तत आचार्योपनीताः पुरुषाः कृतमङ्गलस्नानं स्रङ्माल्याद्यैरलङ्कृतं बटुमाचार्यसमीपमानयन्ति । तत आचार्यो बटुमग्नेः पश्चादवस्थाप्य ब्रह्मचर्यमागामिति ब्रूहीति वदति । ब्रह्मचर्यमागामिति ब्रह्मचारी ब्रूयात् । ततो ब्रह्मचार्यसानीति ब्रूहीत्याचार्यो वदति । ब्रह्मचार्यसानीति ब्रूयात् । ततः कुमारमाचार्यो वासः परिधापयति **येनेन्द्रायेति** । तत आचार्यः कुमारस्य कटिदेशे “ इयं दुरुक्तम् ” इति मन्त्रेण मेखलां बध्नाति “ युवा सुवासाः ” इति वा बन्धनम् । तूष्णीं वा । ततो बटुः **यज्ञोपवीतमिति** मन्त्रं पठित्वा दक्षिणबाहुमुद्धृत्य वामस्कन्धे यज्ञोपवीतं निवेशयति । ततो बटुः “मित्रस्य चक्षुः” इत्यजिनमुत्तरीयं गृह्णाति । तत आचार्यो दण्डं माणवकाय प्रयच्छति । माणवको “यो मे दण्डः” इति दण्डं प्रतिगृह्णाति । अथाचार्यः स्वाञ्जलिना बटोरञ्जलिमाद्भिः पूरयत्या**पोहिष्ठे**ति तिसृभिः । सूर्यमुदीक्षस्वेत्याचार्य आह । ततो **बटुस्तच्चक्षु**रिति सूर्यं पश्यति । तत आचार्यो माणवकस्य दक्षिणांसस्योपरि हस्तं नीत्वा हृदयमालभते **मम व्रते ते** इति । तत आचार्यो माणवकस्य दक्षिणं हस्तं गृहीत्वाऽऽह—को नामाऽसीति । अमुकः अहं भो ३ इति बटुः प्रत्याह । ततो गुरुर्बटुं प्रति कस्य ब्रह्मचर्यसीति वदति । भवत इति बटुराह । तदैवाचार्य “इन्द्रस्य ब्रह्मचार्यसि” इति मन्त्रं ब्रूयात् । तवामुकब्रह्मचारीति प्रयोगो मन्त्रान्ते । अथैनमाचार्यो रक्षायै भूतेभ्यः परिददाति **प्रजापतये त्वेति** । ततो बटुरग्निं प्रदक्षिणीकृत्याचार्यस्योत्तरत उपविशति । ततो गुरुर्ब्रह्मोपवेशनादिदक्षिणादानान्तं चूडाकरणवत् कर्म कृत्वा कुमारस्यानुशासनं करोति । तच्चैवं ब्रह्मचार्यसीत्याचार्य आह । भवानीति ब्रह्मचारी प्रत्याह । अपोऽशानेत्याचार्य आह । अशानीति ब्रह्मचारी प्रत्याह । कर्म कुर्वित्या० । करवाणीति ब्र० । मा दिवा सुषुप्था इत्या० । न स्वपानीति ब्र० । वाचं यच्छेत्या० । यच्छानीति ब्र० । समिधमाधेहीत्या० । आदधानीति ब्र० । अपोऽशानेत्या०। अशानीति ब्र० । अथाचार्यो ब्रह्मचारिणेऽग्नेरुत्तरतः प्रत्यङ्मुखोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय सावित्रीं ब्रूयात् । तत्रैवम् । प्रणवव्याहृतिपूर्वकं प्रथममेकैकं पादम् । तथा द्वितीयमर्द्धर्चशस्तथैव तृतीयं सर्वां स्वयं च बटुना सह पठेत् । दक्षिणत आसीनाय वा सावित्रीप्रदानम् । ततो ब्रह्मचारी समिदाधानं करोति । तत्र पूर्वमग्नेः सन्धुक्षणम्। पञ्चमन्त्रैरिन्धनप्रक्षेपणम् । “अग्ने सुश्रवः” इति प्रथमम् । “यथा त्वमग्ने” इति द्वितीयम् । “एवं माऽसम्” इति तृतीयम् । “यथा त्वमग्ने देवानाम् ” इति चतुर्थम् । “एवमहं मनुष्याणाम् ” इति पञ्चमम् । प्रदक्षिणमग्निमुदकेन पर्युक्ष्योत्थाय समिधम् “अग्नये समिधम् ” इत्यग्नौ प्रक्षिपति । एवं द्वितीयाम् । तथैव तृतीयाम् । “ एषा ते” इति वा मन्त्रेण समिधामाधानम् । अथवा द्वाभ्यामपि समिधामाधानम् । पुनः पञ्चभिर्मन्त्रैरग्नेः सन्धुक्षणं पूर्ववत् । अग्नेः पर्युक्षणम् । ततस्तूष्णीं पाणी प्रतप्य “तनूपा अग्नेऽसि तन्वं मे पाहि ” इति मुखं विमार्ष्टि । ततो द्वितीयवारं पाणी प्रतप्य “ आयुर्दा अग्नेऽस्यायुर्मे देहि ” इति मुखं विमार्ष्टि । एवं तूष्णीं पाणी प्रतप्य “ वर्चोदा अग्नेऽसि वर्चो मे देहि । अग्ने यन्मे तन्वा ऊनं तन्म आपृण । मेधां मे देवः सविता आदधातु । मेधां मे देवी सरस्वती आदधातु । मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ ; ” अथाचारतोऽनुष्ठेयाः पदार्थाः । “ अङ्गानि च म आप्यायन्ताम् ” इति शिरःप्रभृति पादान्तं सर्वाङ्गान्यालभते । “ वाक् च म आप्यायताम् ” इति मुखालम्भनम् । “ प्राणश्च म आप्यायताम् ” इति नासिकयोरालम्भनम् । “ चक्षुश्च म आप्यायताम् ” इति नेत्रयोरालम्भनम् । “ श्रोत्रं च म आप्यायताम् ” इति दक्षिणकर्णमालभ्यानेनैव मन्त्रेण वामालम्भनम् । “यशो बलं च म आप्यायताम्”इति जपः । ततो भस्मना ललाटे तिलकं “त्र्यायुषं जमदग्नेः”इति । ततो-“कश्यपस्य त्र्यायुषम्” इति ग्रीवायाम् । “यद्देवेषु त्र्यायुषम् ”इति दक्षिणेंऽसे।“तन्नो अस्तु त्र्यायुषम्”इति हृदि । अभिवादनम् । तत्रैवं प्रयोगः । माण्डव्यसगोत्रः भार्गवच्यावनाप्नवानौर्वजामदग्न्येतिपञ्चप्रवरोऽभिवादयेऽमुकनामाऽहमस्मि ३ । **कारिकायाम्**--“पद्माकारौ करौ कृत्वा पादोपग्रहणं गुरोः । उत्तानाभ्यां तु पाणिभ्यामिति पैठीनसेर्वचः ॥” आयुष्मान् भव सौम्य विष्णुशर्म३न् इत्याचार्यस्य प्रत्यभिवादनम् । ततो वृद्धाभिवादनम् । अथ **भिक्षाचर्यचरणम्** । तत्र ब्रह्मचारी पात्रं गृहीत्वा भवति भिक्षां देहीत्येवं भिक्षां याचेत । तिस्रोऽप्रत्याख्यायिन्यः षट् द्वादशापरिमिता वा । ततो भिक्षामाचार्याय निवेदयेत् । अत्र “मध्याह्नसन्ध्यां कुर्यात्” इति **प्रयोगपारिजाते** । नेति

कृष्णभट्टीकारः । ततो भैक्ष्यं भुङ्क्ष्वेति गुरुणाऽनुज्ञातो भोजनं कुर्यात्।इतः प्रभृति सूर्यास्तमयं यावद्वाग्यतो वा भवेत् । ततः सायंसन्ध्यावन्दनपूर्वकमग्निपरिचरणं पाणिनाऽग्निं परिसमूहतीत्याद्यभिवादनान्तं पूर्ववत् । उपनयनाग्निस्त्रिरात्रं धार्यः । "त्र्यहमेतमग्निं धारयति" **इत्यापस्तम्बोक्तेः** । "यावद्धुतमग्निरक्षणम्" इति **गर्गपद्धतौ** । **इत्युपनयने पदार्थक्रमः** । एष प्रयोगः स्वस्वकाले कृतपूर्वसंस्कारस्य । असंस्कृतस्य तु विशेष उच्यते । आचार्य उपनयनात्पूर्वाहे बटुना सह मङ्गलस्नातः प्राणानायम्य तिथ्यादि सङ्कीर्त्य मम कुमारस्य गर्भाधानपुंसवनसीमन्तजातकर्मनामकरणनिष्क्रमणान्नप्राशनचौलकर्मान्तानां संस्काराणां कालातिपत्तिदोषनिवृत्तिद्वारा परमेश्वरप्रीत्यर्थं प्रायश्चित्तहोमं करिष्य इति सङ्कल्प्य, पञ्चभूसंस्कारपूर्वकमग्निं लौकिकं स्थापयित्वा, स्थाल्यामाज्यं निरुप्याग्नावधिश्रित्य स्रुवं दर्भैः सम्मृज्याज्यमुद्वास्य कुशतृणाभ्यामुत्पूयावेक्ष्य स्रुवेणादाय समित्प्रक्षेपं कृत्वा नवाहुतीर्जुहोति । भूः स्वाहा १ भुवः० २ स्वः० ३ भूर्भुवः स्वः० ४ । त्वन्नो अग्ने० ५ । सत्वन्नो अग्ने० ६ । अयाश्चाग्ने० ७ । ये ते शतं० ८ । उदुत्तमं० ९ । इति नवाहुतिहोमात्मकं प्रायश्चित्तं कृत्वा चौलातिरिक्तसंस्काराणां प्रमादादकरणे प्रत्येकं पादकृच्छ्रं, चौलाकरणेऽर्द्धकृच्छ्रं, बुद्धिपूर्वं चौलातिरिक्ताकरणे प्रत्येकमर्द्धकृच्छ्रं, चौलाकरणे कृच्छ्रं बटुना कारयेत् । अशक्तौ तत्प्रत्याम्नायत्वेन गोदानतिलाहुतिसहस्रदशसहस्रगायत्रीजपद्वादशविप्रभुक्त्यादिष्वेकं प्रायश्चित्तं कारयित्वाऽतीतजातकर्मादीनि कृत्वा पूर्वोक्तोपनयनतन्त्रं सर्वमाचरेत् । उपनीत्या सह चौलकरणे पूर्वेद्युः संस्कारद्वयं सङ्कीर्त्य, युगपत्स्वास्तिवाचनग्रहयज्ञनान्दीश्राद्धानि कृत्वा, परेद्युर्मङ्गलस्नानविप्रत्रयभुक्त्यादिवरदानान्तं पूर्वोक्तं चौलप्रयोगं सर्वं कृत्वा पुनस्तिथ्याद्युल्लिख्य कुमारस्य वपनाद्युपनयनं सर्वं कार्यम् । अत्र **शौनकः**—"आरभ्याधानमाचौलात्कालेऽतीते तु कर्मणाम् । व्याहृत्याज्यं सुसंस्कृत्य हुत्वा कर्म यथाक्रमम् । एतेष्वेकैकलोपे तु पादकृच्छ्रं समाचरेत् । चूडाया अर्द्धकृच्छ्रं स्यादापदीत्येवमीरितम् ॥ अनापदि तु सर्वत्र द्विगुणं द्विगुणं चरेत् ।" **कात्यायनः**—"लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विधीयते । प्रायश्चित्ते कृते पश्चाल्लुप्तं कर्म समाचरेत् ॥" **स्मृत्यर्थसारे** चैवम् । **आश्वलायनकारिकायां** तु "प्रायश्चित्ते कृतेऽतीतं कर्म कृताकृतम्" इत्युक्तम् । "प्रायाश्चित्ते कृते पश्चादतीतमपि कर्म वै । कार्यमित्येक आचार्या नेत्यन्ये तु विपश्चितः" इति।**मण्डनस्तु**--"कालातीतेषु सर्वेषु प्राप्तवत्स्वपरेषु च । कालातीतानि कृत्वैव विदध्यादुत्तराणि तु ॥" इत्युक्तम् । तत्र सर्वेषां तन्त्रेण नान्दीश्राद्धं कुर्यात् । देशकालकर्त्रैक्यात् । अथ **ब्रह्मचारिधर्माः** । अधः शयनम् । अक्षारालवणाशनम् । दण्डधारणम् । अरण्यात्स्वयं प्रशीर्णानां समिधामाहृतिः । कालत्रये सन्ध्योपासनम् । परिसमूहनादि यथोक्तमग्निपरिचरणं, सायंप्रातःसन्ध्योपस्तेरूर्द्ध्वम् । गुरुशुश्रूषया स्थातव्यम् । भोजनार्थं वारद्वयं सायं प्रातश्च भिक्षाचरणम् । भैक्षाशनं लौहे मृन्मये पर्णादौ वा कार्यम् । मधुमांसयोरभक्षणम् । उन्मज्जनं न कार्यम् । उद्धृतोदकेन स्नानम् । आसनस्योपरि मसूरिकां स्थापयित्वा नोपाविशेत् । स्त्रीणां मध्ये नावस्थानम् । नानृतवदनम् । नादत्तादानम् । अन्येऽपि स्मृत्यन्तरोक्ता नियमाः । **याज्ञवल्क्यः**—" मधुमांसाञ्जनोच्छिष्टं शुक्लस्त्रीप्राणिहिंसनम् । भास्करालोकनाश्लीलपरिवादादि वर्जयेत् ॥" शुक्तं परुषं वचः पर्युषितान्नं च । **मनुः**—"अभ्यङ्गमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम् ।" वर्जयेदिति प्रकृतम् । **पारिजाते कौर्मे**—"नादर्शं चैव वीक्षेत नाचरेद्दन्तधावनम् । गुरूच्छिष्टं भेषजार्थं प्रयुञ्जीत न कामतः ॥" एतन्निषिद्धमध्वादिविषयम् । अन्यस्य गुरूच्छिष्टस्य सर्वदा प्राप्तेः । **वसिष्ठः**—"स चेद्व्याधीयीत कामं गुरोरुच्छिष्टशेषमौषधार्थं सर्वं प्राश्नीयात्" इति । ज्येष्ठभ्रातुरित्यपि ज्ञेयम् । **तथाऽऽपस्तम्बः**—"पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यम्" इति । **स्मृत्यन्तरे**—"गुरुवद्गुरुपुत्रः स्यादन्यत्रोच्छिष्टभोजनात् ।" **प्रचेताः**—"ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् । यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥" **यमः**—"मेखलामजिनं दण्डमुपवीतं च नित्यशः । कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत् ॥" अथ ब्रह्मचारिव्रतलोपे प्रायाश्चित्तम् । तत्र **बौधायनः**—अत्र शौचाचमनसन्ध्यावन्दनदर्भभिक्षाऽग्निकार्यराहित्यशूद्रादिस्पर्शनकौपीनकटिसूत्रयज्ञोपवीतमेखलादण्डाजिनत्यागदिवास्वापच्छत्रधारणपादुकाऽध्यारोहणमालाधारणोद्वर्त्तनानुलेपनाञ्जनजलक्रीडाद्यूतनृत्यगीतवाद्याद्यभिरतिपाखण्डादिसम्भाषणपर्युषितभोजनादिब्रह्मचारिव्रतलोपजसकलदोषपरिहारार्थं ब्रह्मचारी कृच्छ्रत्रयं चरेन्महाव्याहृतिहोमं च कुर्यात् । तद्यथा--लौकिकाग्निं प्रतिष्ठाप्य ब्रह्मवरणाद्याज्यभागान्तं कृत्वा प्रथमं व्यस्तसमस्तव्याहृतिभिश्चतस्र आज्याहुतीर्हुत्वा ४ भूरग्नये च पृथिव्यै च महते च स्वाहा ५ भुवो वायवे चान्तरिक्षाय च महते च स्वा० ६ सुवरादित्याय च दिवे च महते च स्वा० ७ भूर्भुवः सुवः चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वा० ८ पाहि नो अग्न एनसे स्वा० ९ पाहि नो अग्ने विश्ववेदसे स्वा० १० यज्ञं पाहि विभा-

वसो स्वा० ११ सर्वं पाहि शतक्रतो स्वा० १२ पुनरूर्जा निवर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाह्यंहसः स्वाहा १३ सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि स्वाहा १४ पुनर्व्याहृतिभिर्हुत्वा स्विष्टकृदादिवरदानान्तं शेषं समापयेत् इति ।एतदल्पधर्मलोपे प्रायश्चित्तम् । बहुधर्मलोपे तु प्रायश्चित्तविशेष ऋग्विधाने **शौनकेनोक्तः** । "त बोधिया जपेन्मन्त्रं लक्षं चैव शिवालये । ब्रह्मचारी स्वधर्मं च न्यूनं चेत्पूर्णमेव तत्" इति । "महानाम्न्यादिव्रतेषु लुप्तेषु तारतम्येन त्रीन् षट् द्वादश वा कृच्छ्रान् कृत्वा पुनर्व्रतं प्रारभेत" इति **स्मृत्यर्थसारे**। तथा सन्ध्याऽग्निकार्यलोपे स्नात्वाऽष्टसहस्रं जपः । भिक्षालोपेऽष्टशतम् । अभ्यासे द्विगुणं पुनः संस्कारश्चेत्युक्तम् । इति **ब्रह्मचारिव्रतलोपे प्रायश्चित्तम्** । अथ **पुनरुपनयनम्** । तत्र **मनुः**–" अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च । पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥" **चान्द्रिकायां बौधायनः**– "सिन्धुसौवीरसौराष्ट्रान् तथा प्रत्यन्तवासिनः । अङ्गवङ्गकलिङ्गाँश्च गत्वा संस्कारमर्हति" ॥ **हेमाद्रौ पाद्मे**–"प्रेतशय्याप्रतिग्राही पुनः संस्कारमर्हति ।" **वृद्धमनुः**–"जीवन् यादि समागच्छेद्घृतकुम्भे निमज्ज्य च । उद्धृत्य स्थापयित्वाऽस्य जातकर्मादि कारयेत् ॥" इति । **मिताक्षरायां पराशरः**–" यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः । अनाशकनिवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति ॥ स चरेत् त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि च । जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात् ॥ " **शातातपः**—" लशुनं गृञ्जनं जग्ध्वा पलाण्डुं च तथा शुनम् । उष्ट्रमानुषकेभाश्वरासभीक्षीरभोजनात् ॥ उपायनं पुनः कुर्यात्तप्तकृच्छ्रं चरेन्मुहुः । " **अपरार्कादिसर्वग्रन्थेषु** पित्रादिव्यतिरेकेणं ब्रह्मचारिणः प्रेतकर्मकरणे पुनरुपनयनमित्युक्तम् । **त्रिस्थलीसेतौ**–" कर्मनाशाजलस्पर्शात्करतोयाविलङ्घनात् । गण्डकीबाहुतरणात्पुनः संस्कारमर्हति ॥" **पराशरः**—'आजिनं मेखला दण्डो भैक्ष्यचर्या व्रतानि च । निवर्तन्ते द्विजातीनां पुनःसंस्कारकर्माणि।'य एकं वेदमधीत्यान्यवेदमध्येतुमिच्छति तस्य पुनरुपनयनमिति **हरदत्तः**।नेत्यन्ये। "सर्वेभ्यो वै वेदेभ्यः सावित्र्यनूच्यते" इत्या**पस्तम्ब**वचनात्।**यमः**–"पुराकल्पेषु नारीणां मौञ्जीबन्धनमिष्यते। अध्यापनं च वेदानां सावित्रीवाचनं तथा॥" इदं च युगान्तरविषयम् । इति **पुनरुपनयनम्**।त्रुटितानां मेखलादीनां प्रतिपत्तिमाह **मनुः**–"मेखलामजिनं दण्डमुपवीतं कमण्डलुम् । अप्सु प्रास्य विनष्टानि गृहीत्वाऽन्यानि मन्त्रवत् ।" अथ **गर्गमते पदार्थक्रमः** । श्राद्धम् । वपनम् । विप्रभोजनम् । बटोरपि । अग्निस्थापनम् । अलंकृतस्यानयनम् । पश्चादग्नेरवस्थापनम् । ततो ब्रह्मासनादिबर्हिःस्तरणान्तं कर्म । ततो ब्रह्मचर्यमागामिति वचनम् । ब्रह्मचार्यसानीति च । वासः परिधापयति । मेखलाबन्धनम् । बटोर्मन्त्रपाठः । मन्त्रेण यज्ञोपवीतपरिधानम् । तत आचमनम् । उत्तरीयधारणं मन्त्रेण । दण्डप्रतिग्रहः । दीक्षावद्धा । अञ्जलिनाऽञ्जलिपूरणमद्भिः । प्रैषपूर्वकं सूर्यावेक्षणम् । हृदयालम्भनम् । दक्षिणहस्तग्रहणादि भूतेभ्यः परिदानान्तम् । ततो हस्तविसर्गः । ततः प्रदक्षिणं परिक्रम्योपवेशनम् । तत आचार्यस्योपयमनादानादिपर्युक्षणान्तम् । आचार्यस्यान्वारम्भो माणवककर्तृकः । तत्र आघाराद्याश्चतुर्दशाहुतयः । संस्रवप्राशनादि दक्षिणादानान्तम् । ततो ब्रह्मचारिशासनं ब्रह्मचार्यसीत्यादि पूर्ववत् । ततो बर्हिर्होमादि ब्राह्मणभोजनान्तम् । अथ **सावित्रव्रतादेशः** । तत्रोपलेपनादिबर्हिःस्तरणान्तम् । ततः कुमार उत्थाय हस्तेनोदकं गृहीत्वाऽग्निमुखो भूत्वा "अग्ने व्रतपते व्रतं चरिष्यामि सावित्रं सद्यःकालं तच्छकेयं तन्मे राध्यताम्"इति व्रतग्रहण करोति। ततो ब्रह्मचारिण उपवेशनम् । ब्रह्मचारिण आचार्यस्यान्वारम्भः सर्वाहुतिषु । तत उपयमनादानादि आज्यभागान्तम् । ततो वेदाहुतयः षोडश । प्रतिवेदं चतस्रश्चतस्रः । एवं षोडश । ततः " प्रजापतये देवेभ्यः " इत्याद्याः सप्त । ततो महाव्याहृत्यादिस्विष्टकृदन्ता दश । आज्यभागाद्या एताः सप्तत्रिंशदाहुतयो व्रतानामादेशे विसर्गे च होतव्याः । ततः संस्रवप्राशनादि ब्रह्मणे दक्षिणादानान्तम् । ततः अथास्मै सावित्रीमन्वाहेत्यादि यथोक्तं सावित्रीप्रदानम् । ततो माणवकस्य गोत्रनाम**तत्सवितुरित्यनेन** मन्त्रेण सन्ध्योपासनम् । सन्ध्योपासनान्ते तत्सवितुरित्यनेनैवाग्निपरिचरणम् । तदन्ते गोत्रनामग्रहणपूर्वकं सर्वेषामभिवादनम्। ततो भिक्षाचर्यचरणम् । भिक्षानिवेदनम् भिक्षां भो इत्येवम्।आचार्यस्तु भिक्षां भो इत्येवं भिक्षां स्वीकुर्यात् । ततो ब्रह्मचारी शुचिर्भूत्वा स्वासने उपविशति । ततो बर्हिर्होमादिविप्रभुक्त्यन्तम् । अथानन्तरं सावित्रव्रतवत् सन्ध्योपासनाग्निपरिचरणम् । तत उपलेपनादिबर्हिःस्तरणान्तम् । तत उत्थाय हस्तेनोदकं गृहीत्वाऽग्निमभिमुखो भूत्वा "अग्ने व्रतपते व्रतमचारिषं सावित्रं सद्यःफलं तदशकं तन्मेऽराधि" इति मन्त्रेण सावित्रव्रतोत्सर्गं करोति । उपयमनकुशादानादि पर्युक्षणान्तम् । अन्वारम्भः । आघा-

सवाज्यभागौ । वेदाहुतयः षोडश । प्रजापतय इत्याद्याः सप्त । महाव्याहृत्यादिस्विष्टकृदन्ता दश । एव सप्तत्रिंशदाहुतयः । प्राशनादिविप्रभुक्त्यन्तं पूर्ववत् । सावित्रव्रतादेशे ब्रह्मणे दक्षिणादानान्ते सावित्र्या सन्ध्यावन्दनमग्निपरिचरणं च यत्कृतं व्रतोत्सर्गे तदभावः । ततः **अप्स्वन्त**रिति दण्डस्याप्सु प्रक्षेपः । "वातो वा" इति मेखलाया अ० । "वातरꣳहा भव" इति यज्ञोपवीतस्या० । "नमो वरुणाय" इति कुमारस्य दधिघृतशर्कराणां प्रत्येकं प्राशनम् । इति **सावित्रव्रतोत्सर्गः** । **अथाग्नेयव्रतम्** । तत्रोपलेपनादिबर्हिःस्तरणान्तम् । ततो ब्रह्मचारिणो मेखलाबन्धनम् । यज्ञोपवीतधारणम् । दण्डसमर्पणं ग्रहणं च । मेखलादिषु पूर्वोक्ता एव मन्त्राः । व्रतग्रहणं पूर्ववत् । **अग्ने व्रतपत** इति । आग्नेयं सांवत्सरिकम् तच्छ०राध्यतामिति । आग्नेयं यथाकालं **तच्छके०ध्यत**ामितीदानीं प्रयोगं कुर्वन्ति । ततः स्वस्थाने उपवेशनम् । आचार्यान्वारम्भः । उपयमनादानादिपर्युक्षणान्तम् । आघाराद्याः स्विष्टकृदन्ताः सप्तत्रिंशदाहुतयोऽत्रापि होतव्याः । ततः प्राशनादिब्राह्मणभोजनान्तम् । ततः स्मृत्युक्तं माध्याह्निकं सन्ध्योपासनम् । ततोऽग्नेः पश्चादुपविश्य पाणिनाऽग्निं परिसमूहतीत्यादि त्र्यायुषकरणान्तं यथोक्तम् । तत्र विशेषः । गात्रालम्भने **कर्क**मतेऽध्याहारः । "अङ्गानि च म आप्यायन्ताम्" इति **गर्गपद्धतौ** । त्र्यायुषकरणान्ते **शिवो नाम**ेति जपः । यदि बटुर्मेधाकामः स्यात्तदा **सदसस्पतिम**िति त्र्यृचेन मेधां याचते । श्रीकामश्चे**दिमम्मे** इति श्रियं या० । ततो मेखलास्थान्प्रवरान्प्रदक्षिणोपचारेण स्पृष्ट्वाऽमुकसगोत्रोऽमुकशर्म्माऽहं भो वैश्वानर अभिवादयामि । एवं वरुणाचार्यवृद्धानाम् । भिक्षाचार्यच० गुरवे नि० । अनुज्ञातस्तां स्वीकृत्य मातृहस्ते समर्पयति । बर्हिर्होमादिविप्रभुक्त्यन्तम् । **इत्युपनये पदार्थाः** । ततः सन्ध्याकालेऽञ्जलिप्रक्षेपान्ते सूर्योपस्थानं वारुणीभिर्ऋग्भि**रिमम्मे** इत्यादिभिः । **मित्रःसꣳसृज्ये**त्यादिभिः प्रातः । **उद्वय**मित्यादिभिर्मध्याह्ने । ततो दण्डं गृहीत्वाऽग्निपरिचरणम् । मध्याह्ने सायाह्ने च सन्ध्योपासनान्ते प्रत्यहमग्निपरिच० एके । प्रातरप्यग्निपरिचरणमिच्छन्ति । ततो वाग्विसर्गः । पूर्वोक्ता एव **ब्रह्मचारिधर्मा** ज्ञेयाः । सन्ध्योपासनादीनि स्वस्वकाले कार्याणि । तेषां कालातिक्रमे कर्मणां भ्रेषे प्रायश्चित्तमुच्यते । परिसमूहनादि कृत्वाऽ**न्वग्नि**रिति मन्त्रेणाग्नेराहरणम् । **पृष्टो दिवी**ति स्थापनम् । **ताꣳसवितुस्तत्सवितुर्विश्वानि देवे**त्यादिभिः सावित्रमन्त्रैस्त्रिभिः प्रज्वालनम् । नात्र ब्रह्मोपवेशनादि । पूर्णाहुतिवदाज्यं संस्कृत्यानादिष्टं कार्यम् । अथाग्नेयव्रतस्थितो ब्रह्मचारी **समिधाऽग्निं दुवस्यते**त्येवमाद्याग्नेयवेदविभागं संवत्सरपर्यन्तं पठित्वा व्रतमुत्सृजाति । संवत्सरे पूर्णे आग्नेयव्रतविसर्गः । तत्र परिसमूहनादिविप्रभुक्त्यन्तमाग्नेयव्रतादेशवत् भवति । एतावान्विशेषः । यस्मिन्काले आग्नेयव्रतग्रहणं कृतं तस्मिन्सन्ध्यावन्दनम् । अग्निपरिच० । आग्नेयव्रतविसर्गः । " अग्ने व्रतपते व्रतमचारिषं सांवत्सरिकं तदशकं तन्मेऽराधि " इति मन्त्रेण । ततोऽनन्तरमामभिक्षानिवृत्तिः । दण्डादीनामप्सु प्रक्षेपः । व्रतादौ ग्रहणं तेषाम् । इत्याग्नेयव्रतविसर्गः । अथ **शुक्रियव्रतादेशः** । तत्रोपलेपनादि बर्हिःस्तरणान्तं कृत्वा मेखलायज्ञोपवीतदण्डानां धारणपूर्वकं व्रतग्रहणम् । **अग्ने० मि** शुक्रियं सांवत्सरिकं **तच्छकेय**मिति विशेषः । तत उपयमनादिविप्रभुक्त्यन्तमाग्नेयव्रतादेशवत् । शुक्रियवेदव्रतस्थित **ऋचं वाचम**ित्यादिशुक्रियवेदविभागं पठति संवत्सरं यावत् । उत्तमेऽहनि अपराह्णकालान्ते निशामुखे त्रिगुणेन पटेन एकस्यां दिशि बद्धेन नाभिमात्रं यावन्माणवकस्य प्रच्छादनं मूर्धानमारभ्य ग्रन्थेः शिरस उपरिकरणम् । ततः सावित्र्या वेदशिरसा **हिरण्मयेन पात्रेण**ेति मन्त्रैरवगुण्ठनम् । एवं प्रच्छादितो ब्रह्मचारी सूर्योदयं यावत्तिष्ठति । रात्रौ ग्रामे वा गोष्ठे वा देवायतने वाऽधःशयनम् । रात्रौ गृहे यदि स्थितिस्तदा व्युष्टायां रात्रौ ग्रामाद्बहिर्गमनम् । ततोऽवगुण्ठनीयाविसर्गः । ततोऽ**दृश्रमस्य उदुत्यम् चित्रं देवाना**मुदितेऽर्के जपः । ततो व्रतस्थाने माणवकमानीय शुक्रियव्रतस्य विसर्गः । तत्र परिसमूहनादिबर्हिःस्तरणान्तम् । ततः प्राकृतं सन्ध्योपासनम् । अग्निस्वीकरणम् । ततः "अग्ने व्रत० मचारिषं शुक्रियं सांवत्सरिकं तद० धि"इति मन्त्रेणोत्सर्गः । उपयमनादानादिब्राह्मणभोजनान्तम् । ततस्ताम्रपात्रे उदकप्रक्षेपः । **द्यौः शान्ति**रिति शान्तिकरणम् । शान्तिपात्रमवगुण्ठनीयवस्त्रं च गुरवे दद्यात् । ततो**ऽप्स्वन्तरमृत**मित्यादिभिः पूर्ववत्प्रत्यृचं दण्डमेखलायज्ञोपवीतानामप्सु प्रक्षेपः । दधिघृतशर्कराणां **नमो वरुणा**येति प्रतिमन्त्रं प्राशनम् । ततो वपनम् । व्रतग्रहणस्यादौ सर्वत्र शुक्रियादिषु मेखलायज्ञोपवीतदण्डानां धारणम् । **अथौपनिषदं व्रतम्** । उपलेपनादिबर्हिःस्तरणान्तम् । ततः **"अग्ने व्रत० औपनिषदं सांवत्सरिकं तच्छके० राध्यताम्"** इति व्रतग्रहणम् । तत उपयमनादानादिविप्रभुक्त्यन्तम् । औपनिषदे व्रते स्थितो **"द्वयाह प्रजापत्या"** इत्याद्यौपनिषदवेदविभागं संवत्सरं यावत्पठाति । तत उत्तमेऽहनि निशामुखे अवगुण्ठनीयवस्त्रेणाच्छादनादि । उदिते

अदृश्रमस्य उदुत्यम् चित्रं देवानामिति जपान्तं शुक्रियवत् । ततो व्रतस्थाने माणवकमानीय व्रतविसर्गः । तत्र परिसमूहनादि बर्हिःस्तरणान्तं कृत्वा पूर्ववत्सन्ध्योपासनमग्निपरिचरणं च । ततः “ अग्ने० व्रतमचारिषमौपनिषदं सांवत्सरिकं तद० तन्मेऽराधि ” इति व्रतविसर्गः । तत उपयमनादानादिविप्रभुक्त्यन्तम् । ताम्रे: उदकप्रक्षेपः । **द्यौः शान्तिरि**ति शान्तिकरणम्, भाजनवस्त्रयोराचार्याय दानम् । दण्डादीनामप्सु प्रासनम् । दध्यादीनां प्राशनम् ।इत्यौ**पनिषदं व्रतम्** । अथ **शौलभव्रतादेशः** । तत्र परिसमूहनादिविप्रभुक्त्यन्तमौपनिषद्व्रतादेशवत् । व्रतग्रहणे **शौलभं सांवत्सरिकमि**ति प्रयोगः । शौलभिनीनामृचां पाठो व्रते स्थितस्य । अत्राप्युत्तमेऽहानि निशामुखे पटेन प्रच्छादनादि उदिते जपान्तं पूर्ववत् । ततो व्रतस्थाने माणवकमानीय व्रतविसर्गः । तत्रैवं परिसमूहनादि बर्हिःस्तरणान्तम् । ततः सन्ध्योपासनादि । ततो व्रतविसर्गः । “ अग्ने० रिषं शौलभं सांवत्सरिकं तद०धि ” इति मन्त्रः । तत उपयमनादानादि ब्राह्मणभोजनान्तम् । तत उदकं पात्रे कृत्वा **द्यौः शान्तिरि**ति शान्तिकरणम् । पात्रवस्त्रयोर्गुरवे दानम् । दण्डादीनामप्सु प्रक्षेपः । दधिमधुशर्कराणां **नमो वरुणाये**ति प्रत्यृचं प्राशनम् । ततो वपनम् । इति **शौलभम्** । अथ **गोदानव्रतादेशः** । तत्र परिसमूहनादिविप्रभुक्त्यन्तम् । व्रतग्रहणस्यादौ मेखलायज्ञोपवीतदण्डानां धारणम्, **गोदानं सांवत्सरिकमि**ति मन्त्रे विशेषः । अस्मिन्व्रते अवगुण्ठन्यादीनामभावः । “त्रिष्ववगुण्ठनंशुक्रियादिषु” इति सूत्रणात् । ततः संवत्सरे पूर्णे गोदानव्रतविसर्गः । तत्र परिसमूहनादि बर्हिःस्तरणान्तम् । ततः सन्ध्योपासनादि । “अग्ने०रिषं गोदानं सांवत्सरिकं त०धि” इति मन्त्रेणोत्सर्गः । उपयमनादानादि विप्रभुक्त्यन्तं पूर्ववत् । अत्रास्मिन्विसर्गे दण्डमेखलायज्ञोपवीतानामप्सु प्रक्षेपाभावः । आचार्याय गोमिथुनदानम् । समाप्तानि व्रतानि । इति गर्गमते उपनयने पदार्थक्रमो व्रतानि च । इमानि च व्रतानि प्रक्षिप्तसूत्रे पठितानि कर्कमतानुसारिभिरप्यनुष्ठेयानि स्मृत्यन्तरे केषाञ्चित् चत्वारिंशत्संस्कारेषु पाठात् । इति श्रीत्रिरग्निचित्सम्राट्स्थपति–श्रीवामनात्मजदीक्षितगदाधरकृते उपनयने पदार्थक्रमः ॥

अथ वेदारम्भे **पदार्थक्रमः** । तत्र **स्मृतौ**–“उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् । वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥” **कारिकायाम्**–“अप्रसुप्ते हरौ स स्यान्नानध्याये शुभेऽहनि । नास्तङ्गते जीवसिते बाले वृद्धे मलिम्लुचे ॥ षष्ठीं रिक्तां शनिं सोमं भौमं हित्वोत्तरोडुषु । मृगादिपञ्चधिष्ण्येषु मूलाश्विन्योः करत्रये । पूर्वासु तिसृपूपेन्द्रभत्रये केन्द्रगैः शुभैः ॥” तत्र मातृपूजापूर्वकमाभ्युदयिकं श्राद्धम् । देशकालौ स्मृत्वा यजुर्वेदव्रतादेशं करिष्य इति सङ्कल्पः । ततः पञ्चभूसंस्कारपूर्वकं लौकिकाग्निस्थापनम् । ब्रह्मोपवेशनाद्याज्यभागान्तम् । ततः स्थाल्याज्येनैव जुहोति । अन्तरिक्षाय स्वाहा वायवे० २ ब्रह्मणे० ३ छन्दोभ्यः० ४ प्रजापतये० ५ देवेभ्यः० ६ ऋषिभ्यः० ७ श्रद्धायै० ८ मेधायै० ९ सदसस्पतये० १० अनुमतये० ११ ततो भूराद्याः स्विष्टकृदन्ताः । ततः प्राशनादिदक्षिणादानान्तम् । ततो विघ्नेशं सरस्वतीं हरिं लक्ष्मीं स्वविद्यां च पूजयेत् । यदि ऋग्वेदारम्भस्तदाऽऽज्यभागान्ते पृथिव्यै स्वाहा अग्नये स्वाहेति च हुत्वा ब्रह्मणे स्वाहेत्यादि समानम् । यदि सामवेदारम्भस्तदाऽऽज्यभागान्ते दिवे स्वा० सूर्याय स्वाहेति हुत्वा ब्रह्मणे स्वाहेत्यादि पूर्ववत् । यद्यथर्ववेदारम्भस्तदाऽऽज्यभागान्ते दिग्भ्यः स्वा० चन्द्रमसे स्वाहेति हुत्वा ब्रह्मणे स्वाहेत्यादि यथोक्तम् । यद्येकदा सर्ववेदारम्भस्तदैवम् । आज्यभागान्ते वेदारम्भक्रमेण प्रतिवेदं वेदाहुतिद्वयं हुत्वा ब्रह्मणे छन्दोभ्य इत्याहुतिद्वयं हुत्वा प्रजापतय इत्याद्याः सप्त तन्त्रेण जुहुयात् । ततो महाव्याहृत्यादि समानम् । **कारिकायाम्**–“तत्र प्रत्यङ्मुखायोपविष्टायाननमीक्षिते । वेदारम्भमनुब्रूयाद्यथाशास्त्रमतन्द्रितः” **मनुः**–“ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा । व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः ॥ सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥ ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्वदा । प्राञ्जलिः पर्युपासीत पवित्रैश्चैव पावितः ॥ प्राणायामैस्त्रिभिः पूतस्तत ओंकारमर्हति ॥ ओंकारं व्याहृतीस्तिस्रः सपूर्वां त्रिपदां ततः । उक्त्वाऽऽरभेत वृत्तान्तमन्वहं गौतमोऽब्रवीत् ॥” त्रिपदा गायत्री ॥ **मनुः**–“अध्येष्यमाणश्च गुरुर्नित्यकालमतन्द्रितः । अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारभेत् ॥” **दक्षः**–“द्वितीये तु तथा भागे वेदाभ्यासो विधीयते । वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ॥ तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ।” **याज्ञवल्क्यः**–“हस्तौ सुसंयतौ धार्यौ जानुभ्यामुपरि स्थितौ ।” तथा–“हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् । ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥” **पराशरः**–“ज्ञातव्यः सर्वदैवार्थो वेदानां कर्मसिद्धये । पाठमात्रमधीती च पङ्के गौरिव सीदति ॥” **व्यासः**–“वेदस्याध्ययनं पूर्वं धर्मशास्त्रस्य चैव हि । अजानतोऽर्थं तद्व्यर्थं तुषाणां कण्डनं यथा ॥” **मनुः**–“यो-

ऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥" **यमः**–"य इमां पृथिवीं सर्वां सर्वरत्नोपशोभिताम् । दद्याच्छास्त्रं च शिष्येभ्यस्तच्च तच्च द्वयं समम् ॥ न निन्दां ताडने कुर्यात्पुत्रं शिष्यं च ताडयेत् । अधोभागे शरीरस्य नोत्तमाङ्गे न वक्षसि ॥ अतोऽन्यथा हि प्रहरन् न्याययुक्तो भवेन्नरः ॥"न्याययुक्तो दण्डयुक्त इत्यर्थः । अत्र माणवकं कुलपरम्परागतं वेदमध्यापयेत् । तस्यैवाध्येतव्यत्वानियमात् । **वसिष्ठः**--"पारम्पर्यागतो येषां वेदः सपरिबृंहणः । तच्छाखं कर्म कुर्वीत तच्छाखाध्ययनं तथा ॥ अधीत्य शाखामात्मीयामन्यशाखां ततः पठेत् । स्वशाखां यः परित्यज्य अन्यशाखामुपासते ॥ शाखारण्डः स विज्ञेयः सर्वकर्मबहिष्कृतः" इति । इति **वेदारम्भः** ॥ ५ ॥ * ॥

विश्व०–**अत्र...रणम्**–अत्रावसरे अभिवादनानन्तरं भिक्षाप्रार्थना तस्याश्चरणमनुष्ठानं कर्तव्यमिति शेषः । **भवत्पूर्वां...वैश्यः**—इति त्रिसूत्री । "भिक्षेत" इति द्वयोरनुषङ्गः । भवच्छब्दः संबुद्ध्यर्थः पूज्यताद्योतकः । ब्राह्मणक्षत्रियवैश्यैर्यथाक्रममादिमध्यावसानेषु भवच्छब्दोपलक्षिता वृत्त्यर्थं सिद्धान्नादिप्रार्थना कर्तव्या । कतिसंख्याकाः कीदृश्यश्च प्रार्थनीया इत्यत आह–**तिस्रो...यिन्यः**—प्रत्याख्यानं प्रार्थितानिषेधः । अत्रापूर्तौ पक्षान्तराण्याह—**षड् द्वा...मेके**—इति चतुःसूत्री । याच्ञायां दातुः स्नेहस्याभ्यर्हितत्वद्योतनार्थं **मातर**मित्युक्तम् । **आचा...यित्वा**—आचार्याभावे स्वजनन्यै भिक्षानिवेदनम् । भिक्षां निवेद्याचार्याज्ञया भुक्त्वा वा कर्मणः प्रतिपत्तिं कुर्यादिति शेषः । बर्हिर्होमः, प्राशनं, मार्जनम्, पवित्रप्रतिपत्तिः, व्यस्तसमस्तव्याहृतिहोमानन्तरं **त्वन्न** इत्यादिपञ्चाहुतयः सर्वप्रायश्चित्तसंज्ञकाः । एवं नवाहुतयः । प्रणीताविमोकः, ब्राह्मणभोजनसंकल्प एकस्य ॥ कर्मापवर्गाः समिधः । उत्सर्जनं ब्रह्मणः, उपयमनकुशानामग्नौ प्रक्षेपः । उपनयनान्तर्गताग्नेयव्रतादेशसाङ्गतासिद्ध्यर्थमिति संकल्प्य "ब्राह्मणान्भोजयेद्दश" इति परिशिष्टाद्दशब्राह्मणभोजनसंकल्पः । इदानीमाग्नेयव्रतस्य संवत्सरसाध्यत्वेन ब्रह्मचारिकर्तव्यान्नियमान्सूत्रकृत्सूत्रयाति–**वाग्य...त्येके**–आत्मनोऽहःसाध्यां ब्रह्मचर्याश्रमकर्तव्यतामवसायोपसंध्यं वाग्यतो भवेदित्यर्थः । **अहि॰...जते**–तस्मिन्निति तच्छब्दस्य पूर्वप्रक्रान्तपरामर्शित्वाद्व्रतं यावत्कालं तावत्कालं व्रतादेशाग्निरक्षा कर्तव्या । "पूर्ववत्" इत्यनेन पूर्वकण्डिकाप्रतिपादिता पाणिनाऽग्निं परिसमूहतीत्याद्याभिवादनान्ता समस्तेतिकर्तव्यताऽतिदिश्यते । तां कृत्वा पूर्वनियमितां वाचं विसृजते । समिदाधानस्य प्राधान्यं द्योतयितुं वृक्षादिकमपीडयन्समिधमाहृत्याधायेत्युक्तं जातावेकवचनम् । सायंकाले संध्यावन्दनं पूर्वोक्तविधिना । सायंकाले **इमं मे** इति चतसृभिर्वारुणीभिरुपस्थानम्, प्रात**र्मित्रः सं॰ सृज्य मित्रस्य चर्षणीधृतः मित्रैतां त उषां परिददाम्यभित्या एषा मा भेदी**त्येतावदेव प्रातरुपस्थान**माचायम**ते । **अध...स्यात्**–क्षारं गुडादि । **दण्ड...येत्**–अग्निपरिचरणं मध्याह्ने सायंकाले च । प्रतिसंध्यमग्निचरणं तेन प्रातःसमये भवतीत्याहुः । यत्तु माध्याह्निकं नेति तन्न, अनाहिताग्नेर्न्यस्तंब्रह्मस्यापि[1] माध्याह्निकपरिचर्यायाः पातित्याधायकतया नित्यत्वात् गुरुशुश्रूषणं मनोवाक्कायकर्मभिः । आत्मनस्तृप्त्यर्थं भिक्षा आचार्यार्थमपि । स्नानकालेऽमज्जतः स्नानम् । आसनोपर्यासनं न स्थापयेत् । अदत्तं न गृह्णीयात् । स्पष्टमन्यत् । **अष्टा...चरेत्**–विभागमाह–**द्वाद...वेदं याव...णं वा**–सूत्रयोर्ब्रह्मचर्यं चरेदित्यनुकर्षः । अध्ययनसमयमनुरुणाद्धि ब्रह्मचर्यामिति सूत्रणार्थः । '**वासा...कानि**' ब्राह्मणक्षत्रियाविशामिति शेषः । **ऐणे...णस्य**–ऐणेयमेण्याश्चर्म । **रौर...न्यस्य** रुरोश्चित्रमृगस्य चर्म । **आजं...श्यस्य**–आजमजस्य । गव्यं गोः । **सर्वे...प्रधानत्वात्**–गव्यस्य चर्मणः । पौरुषी त्वग्गावि देवैराहिता । तेन गोत्वचः आजिनं सर्वेषां प्रधानमित्यर्थः । **मौञ्जी...णस्य**–मुञ्जमयी रशना मेखला । **धनु...यस्य**—ज्या प्रत्यञ्चा । **मौर्वी वैश्यस्य**–मुरुस्तृणविशेषः ॥ **मुञ्जा...जानां**–यथाक्रमं मेखला भवन्तीत्यर्थः । **पाला...स्यौदुम्बरो वैश्यस्य**–त्रिसूत्री स्पष्टार्था । यथाक्रमं मानमाह–**केश...दण्डः**—केशसंमितः केशमूलसंमितः । ललाटसंमित इत्यर्थः । अन्यथा सर्ववपनादिपक्षो बाध्येतेत्यभिप्रायः । **लला...यस्य**—ललाटावधिः घ्राणसंमित इत्यर्थः । **घ्राण...श्यस्य**—घ्राणावधिः मुखसंमित इत्यर्थः । **सर्वे वा सर्वेषां**–वाशब्दः पक्षान्तरे । सर्वे दण्डाः सर्वेषां ब्राह्मणादीनामनियमेन भवन्तीत्यर्थः । **आचा...यात्**–ब्रह्मचारी आचार्याय प्रतिवाचं दद्यात् । **शया...सीनः**—आचार्यः स्वपन्तं चेदाह्वयति तदोपाविष्टः प्रतिवाचं दद्यात् । एवमुत्तरसूत्रान्वयः । **आसी...धावन्**–त्रिसूत्री निगदव्याख्याता । उक्तकर्तव्यतारतस्य फलमाह–**स एवं...तीति**—अद्य ब्रह्मचर्यकाले एवमुक्तकर्तव्यतायां वर्तमानः अमुत्र ब्रह्मलोके वसति तिष्ठति । द्विरुक्तिर्भूयोऽर्थप्रतिपादिका । अहो दर्शनीयाहोदर्शनीयेतिवत् । आग्नेयव्रते तिष्ठता ब्रह्मचारिणा **समिधाऽग्नि**मित्येवमाद्याग्नेयो वेदविभागः पठनीयः । संवत्सरे पूर्णे आग्नेयव्रतविसर्गः । परिसमूहनादि बर्हिःस्तरणान्तम् । हस्तेनोदकमादाय "अग्ने व्रतपते व्रतमचारिषम् (आग्नेयं) सांवत्सरिकं तदशकं तन्मेऽराधि" । ततः उपयमनकुशादानादि ब्राह्मणभोजनान्तं व्रतादेशवत् । आमभिक्षानिवृत्तिर्विशेषः ॥ ततः **शुक्रियव्रतादेशः**–परिसमूहनाद्युपयमनप्रक्षेपान्तमाग्नेयव्रतादेशवत् । प्रयोगे विशेषः—

---

[1] "**न्यस्तब्रह्मस्य**" इति । "अच्प्रत्यन्ववपूर्वात्सामलोम्नः १।५।४।७५ ।" इति सूत्रे "आजिति योगविभागादन्यत्रापि" इति **भट्टोजिदीक्षितसिद्धान्तात्** पद्मनाभः इत्यादिवद्यमपि साधुः ।

“अग्ने व्रतपते व्रतं चरिष्यामि शुक्रियं सांवत्सरिकं तच्छकेयं तन्मे राध्यताम्”। शुक्रियव्रतस्थेन **ऋचं वाचमि**त्यादि शुक्रियो
वेदविभागोऽध्येतव्यः। संवत्सरस्योत्तमेऽह्नि त्रिगुणपटैकदेशे ग्रन्थिं कृत्वा ब्रह्मचारिणः शिरस उपरि ग्रन्थिं कृत्वा नाभिं तेन
पटेनाच्छादयीत ।“तत्सवितुर्हिरण्मयेन पात्रेण”इति च । हिरण्मयेनेत्यस्याः वेदशिरस्त्वम्। एतच्चाच्छादनमपराह्णान्ते कर्तव्यं
ततः सूर्योदयपर्यन्तं वाग्यतो भवेत् । ग्रामे गोष्ठे देवतायतने वा भूमौ शयनम् । अभ्युषितायां रात्रौ ग्रामाद्बहिर्गत्वाऽवगुण्ठनं
विसृजेत् । **अदृश्रमस्योदुत्यं चित्रं देवानां** त्र्यृचमुदितेऽर्के जपेत् । उदकं ताम्रे प्राक्षिप्य **द्यौः शान्ति**रिति शान्तिकरणम्।
ततोऽवगुण्ठनशान्तिभाजने गुरवे दद्यात् । ततः **शुक्रियविसर्गः** । परिसमूहनाद्युपयमनप्रक्षेपान्तं प्रयोगे विशेषः । “अग्ने
व्रतपते व्रतमचारिषं शुक्रियं सांवत्सरिकं तदशकं तन्मेऽराधि”। शुक्रियादित्रये व्रतादेशविसर्गयोस्त्रिगुणपटावगुण्ठनवेष्टनं गुरवे
दानान्तम् । ततो दण्डमेखलोपवीतान्यप्सु प्रक्षिपे**दप्स्वन्त**रिति प्रत्यृचम्।दधिघृतशर्कराणां प्राशनं **नमो वरुणा**येति । ततो
वपनम् । पुनर्व्रतार्थं मेखलोपवीतदण्डानां समन्त्रकः पूर्ववत्प्रतिग्रहः । एतच्च मेखलादित्रयप्रतियोगिकत्यागाङ्गीकारावाग्नेया-
दिव्रतचतुष्टयेऽपि भवति॥तत उपनिषद्व्रतादेशे परिसमूहनादिब्राह्मणभोजनान्ते विशेषः-“अग्ने व्रतपते व्रतं चरिष्याम्यौपनिषदं
सांवत्सरिकं तच्छकेयं तन्मे राध्यताम्”।औपनिषदव्रतस्थेन **द्व्याहप्राजापत्ये**त्याद्युपनिषद्भागोऽध्येतव्यः। संवत्सरस्योत्तमे-
ऽह्न्यवगुण्ठनदानान्तं पूर्ववत् । व्रतविसर्गः। प्रयोगे विशेषः-“अग्ने व्रतपतेव्रतमचारिषमौपनिषदं सांवत्सरिकं तदशकं तन्मेऽरा-
धि”। अत्राप्यवगुण्ठनदानानन्तरं दण्डादित्रितयत्यागाङ्गीकारौ व्रतोद्देशेन॥**ततः शौलभव्रतादेशः** । परिसमूहनादिब्राह्मण-
भोजनान्तम् । मन्त्रे विशेषः।“अग्ने व्रतपते व्रतं चरिष्यामि शौलभं सांवत्सरिकं तच्छकेयं तन्मे राध्यताम्”। संवत्सरस्योत्तमे-
ऽहनि अवगुण्ठनदानान्तं ततो वपनम् ।दण्डादिविमोचनादित्रिमधुरप्राशनादि । व्रतोद्देशेन पूर्ववद्दण्डादिप्रतिग्रहः । **शौलभ-**
व्रतविसर्गः।परिसमूहनादि ब्राह्मणभोजनान्तम्।मन्त्रे विशेषः-“अग्ने व्रतपते व्रतमचारिषं शौलभं सांवत्सरिकं तदशकं तन्मे-
ऽराधि। अत्राप्यवगुण्ठनादि पूर्ववत् । अवगुण्ठनाभावे शौलभिन्यः कण्डिका ब्रह्मचारिणे श्रावयेत्।**आब्रह्मन्** १। **उदीरताम्**
२ । **आनोभद्राः** ३ । **आशुःशिशानः** ४ । **इमानुकमि**त्येताः-शौलभिन्यः ५॥ ततो गोदानादेशः । परिसमूहनादि ।
व्रतोद्देश्यकं मेखलाद्युपादानं सर्वं पूर्ववत् । गोदानं सांवत्सरिके संवत्सरे पूर्णे पुण्येऽह्नि गोदानविसर्गः पूर्ववत् दण्डादीनामप्सु
प्रक्षेपाभावः । सौकर्याय व्रतकर्तव्यतालेखनम् । **तस्य स्ना...वति**—वेदाध्ययनव्रतकर्तव्यतान्यतरसमुदायेतस्य स्नातकस्य
कीर्त्तिर्भवति । तस्यैव प्रकारभेदविजृम्भितान्भेदानाह-**त्रय...भवन्ति**-कथमत आह-**विद्या...तक इति**-किंस्वरूपो
विद्यास्नातक इत्यत आह-**समा...तकः**-वेदाध्ययनपरित्यागेन व्रतकर्तव्यतामादाय व्रतस्नातकं लक्षयति-**समा...तकः**-
एतेन स्वाध्यायाध्ययनगोचराद्यप्रवृत्तेरेव व्रतादेशतां मन्यमाना हृच्छून्यतया निर्लज्जतया च सूत्रकृतैवापहस्तिता इत्यवधेयम्।
ब्रह्मचर्यमेव व्रतं न च समावर्तनप्राक्कालिकब्रह्मचर्यप्रतियोगिकविसर्गस्य गगनकमलकल्पत्वात् ।**न च** मेखलादिधार-
णाधिकारकाले ब्रह्मचर्यपरित्यागः शास्त्रप्रसिद्धः । न च समावर्तनमेव व्रतविसर्ग इति वाच्यम्, “गुरवे तु वरं दत्त्वा” इत्यादि-
धर्मशास्त्रे व्यस्तयोः समुच्चितयोर्वा वेदाध्ययनव्रतानुष्ठानयोः समाप्त्युत्तरकालं समावर्तनाधिकारात् । अतिस्पष्टं समाप्य व्रत-
मित्यादिना तथैव सूत्रणात्**पारस्कराभिधैः कत्यायन**चरणैः । समावर्तनस्यैकत्वच्च। न च व्रतादेशोऽप्येक एवेति वाच्यम्,
“एतदेव व्रतादेशनविसर्गेषु” इति वक्ष्यमाणसूत्रकारेणैव व्रतादेशानां विसर्गाणां च बहुवचनेन बाहुल्यप्रतिपादनात । न च
बहुत्वमविवक्षितमिति वाच्यम् । स्थालीपाकानामित्यादावविवक्षापत्तेः वेदव्रतानि वेत्यत्रापि बहुत्वश्रवणात् ।न च तदप्यविव-
क्षितमेव । एवं च बहुवचनमात्रस्यैवाविवक्षितत्वे “बहुषु बहुवचनम्” इत्यस्य **पाणिनीय**प्रणयनस्याप्यानर्थक्यापत्तेरिति
दिक् । **उभ....तक इति**—उभयं वेदं व्रतानि चेत्यर्थः । **आपो...वति**—अर्वाक् षोडशाद्वर्षाद्द्विजस्यानातिक्रान्तः
कालो भवति । **आद्वा....न्यस्य आ च....श्यस्य**—अनतीतः कालो भवतीति शेषः सूत्रयोः । **अत....वन्ति**-पति-
ता सावित्री येभ्यः सवितृदेवताकमन्त्रोपदेशानधिकारः । **नैना...युः**—चतुःसूत्री निगदव्याख्याता । **काला...वत्**-नियते
श्रौते यदनादिष्टं तद्वत् तादृशम् अविज्ञाते प्रतिमहाव्याहृति सर्वाभिश्चतुर्थं सर्वप्रायश्चित्तं चेत्येतदाहुतिनवकं भवतीति शेषः।
तथाहि भूसंस्काराः, **अन्वग्नि**रित्यग्नेराहरणं,**पृष्टो दिवी**ति स्थापनम्, **ताँ सवितुः, तत्सवितुः,विश्वानि देव सवि-**
तरिति प्रज्वालनं,परिस्तरणम्,पात्रासादनं, पवित्रे आज्यस्थालीम्, आज्यं, संमार्गकुशाः, उपयमनकुशाः,स्रुवः।निरुप्याज्यम-
धिश्रित्य पर्यग्नि कुर्यात्।स्रुवं प्रतप्य संमृज्य लौकिकोदकेनाभ्युक्ष्य पुनः प्रतप्य निदध्यात् । आज्यमुद्वास्य पवित्राभ्यामुत्पूया-
वेक्ष्य कुशोपग्रहौ दक्षिणं जान्वाच्य जुहुयात् । तिस्रो महाव्याहृतयः सर्वाभिश्चतुर्थी सर्वप्रायश्चित्तं च । इदमग्नये,इदं वायवे,
इदं सूर्याय, इदं प्रजापतये, इदमग्नीवरुणाभ्याम्, इदमग्नये अयसे, इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः
वर्केभ्यः, इदं वरुणायादितये । एतच्चाग्नेयव्रतस्थस्य बटोः। शुक्रियव्रतस्थस्य तु “संध्याकाले व्यतिक्रान्ते जपं कुर्यात्पुनर्मनः।
ऋचं वाचं त्र्यृचं जप्त्वा कालदोषैर्न लिप्यते ॥” अन्यदपि “आदित्योऽभ्युदियाद्यस्य संध्योपास्तिमकुर्वतः । स्नात्वा प्राणां
त्रिरायम्य गायत्र्यष्टशतं जपेत् ॥” केचित्तु **कालातिक्रमे नियतवत्** इत्यनेन गर्भाधानादिसकलकर्मकालातिक्रमे
श्रौतानादिष्टातिदेश इत्याहुः । **त्रिपु...स्कारः**—सावित्र्यनधिकारसंपन्नहतसंतापानामपत्यसंस्कारः पुनः प्रसूयते । स किं-
यदूरमत आह—**त्रिपुरुषमिति** । ननु चतुर्थाद्यपत्यस्य संस्कार्यताऽनेन प्रतिपाद्यत इति तन्न, त्रिपुरुषमित्यस्य व्यर्थता-

पत्तेः । न च त्रिपुरुषमसंस्कार्यताप्रतिपत्त्यर्थमिदमिति वाच्यम्, पुरुषत्रयमनुवृत्तस्यैनसो बलवत्त्वेन निवर्तयितुमशक्यत्वात् । संस्कारांशं प्रतिप्रसूयाध्यापनांशं निषेधति -**नाध्यापनं च तेषामिति** । पुनस्तत्प्रतिप्रसवमाह-**संस्का...यीरन्**-तेषां मध्ये यः संस्कारेप्सुः आत्मनः संस्कारेच्छावान् स व्रात्यस्तोमेन यज्ञेनेष्ट्वा व्रात्यस्तोमं कृत्वा तत्पुत्रपौत्रादयः कामं यथेष्टमधीयीरन् अध्ययनं कुर्युः।कुतः-**व्यव...नात्**-श्रौतवचनादित्यर्थः । यद्वा काममिच्छयाऽध्ययनस्य व्रायस्तोमेनेष्ट्वा व्रात्यस्तोमानुष्ठानं च सावित्रीपाताहितां व्रात्यतामपनेतुम् । इति पञ्चमी कण्डिका ॥ ५ ॥ ॥ * ॥

समावर्तनसंस्कार

वेदꣳ समाप्य स्नायात् ॥ १ ॥ ब्रह्मचर्यं वाऽष्टाचत्वारिꣳशकम् ॥ २ ॥ द्वादशकेऽप्येके ॥ ३ ॥ गुरुणाऽनुज्ञातः ॥ ४ ॥ विधिर्विधेयस्तर्कश्च वेदः ॥ ५ ॥ षडङ्गमेके ॥ ६ ॥ न कल्पमात्रे ॥ ७ ॥ कामं तु याज्ञिकस्य ॥ ८ ॥ उपसङ्गृह्य गुरुꣳ समिधोऽभ्याधाय परिश्रितस्योत्तरतः कुशेषु प्रागग्रेषु पुरस्तात्स्थित्वाऽष्टानामुदकुम्भानाम् ॥ ९ ॥ ये अप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहास्खलो विरुजस्तनूदूषुरिन्द्रिय*हा तान्विजहामि यो रोचनस्तामिह गृह्णामीत्येकस्मादपो गृहीत्वा ॥ १० ॥ तेनाभिषिञ्चते । तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसायेति ॥ ११ ॥ येन श्रियमकृणुतां येनावमृशताꣳ सुराम् । येनाक्ष्यावभ्यषिञ्चतां यद्वां तदश्विना यश इति ॥ १२ ॥ आपो हि ष्ठेति च प्रत्यृचम् ॥ १३ ॥ त्रिभिस्तूष्णीमितरैः ॥ १४ ॥ उदुत्तममिति मेखलामुन्मुच्य दण्डं निधाय वासोऽन्यत्परिधायादित्यमुपतिष्ठते ॥ १५ ॥ उद्यन्भ्राजभृ*ष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थादृशसनिरसि दशसनिं मा कुर्वाविदन्मा गमय । उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवा यावभिरस्थाच्छतसनिरसि शतसनिं मा कुर्वाविदन्मा गमय । उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायं यावभिरस्थात्सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मा गमयेति ॥ १६ ॥ दधि तिलान्वा प्राश्य जटालोमन*खानि सꣳहृत्यौदुम्बरेण दन्तान्धावेत । अन्नाद्याय व्यूहध्वꣳ सोमो राजाऽयमागमत् । स मे मुखं प्रमार्क्ष्यते यशसा च भगेन चेति ॥ १७ ॥ उत्साद्य पुनः स्नात्वाऽनुलेपनं नासिकयोर्मुखस्य चोपगृह्णीते प्राणापानौ मे तर्पय चक्षुर्मे तर्पय श्रोत्रं मे तर्पयेति ॥ १८ ॥ पितरः शुन्धध्वमिति पाण्योरवनेजनं दक्षिणा निषिच्यानुलिप्य जपेत् । सुचक्षा अहमक्षी*भ्यां भूयासꣳ सुवर्चा मुखेन । सुश्रुत्कर्णाभ्यां भूयासमिति ॥ १९ ॥ अहतं वासो धौतं वाऽमैत्रेणाच्छादयीत । परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि । शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्य इति ॥ २० ॥ अथोत्तरीयम् ।

---

* दूपिरिन्द्रियहा अतितान्सृजामि इति जयरामसंमतः पाठः । * भ्राजभ्रांष्टिरिति भ्राजभृष्टिरिति च पाठान्तरम् । * नखान् इत्यपि पाठः । * ई च द्विवचने ।७।१।७७। अस्थ्यादीनामित्येव । अक्षीभ्यान्ते नासिकाभ्याम् इति वैदिकप्रक्रियायाम् ।

यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती । यशो भगश्च मा विन्दद्यशो मा प्रतिपद्यतामिति ॥ २१ ॥ एकं चेत्पूर्वस्योत्तरवर्गेण प्रच्छादयीत ॥ २२ ॥ सुमनसः प्रतिगृह्णाति । या आहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय । ता अहं प्रतिगृह्णामि यशसा च भगेन चेति ॥ २३ ॥ अथाववध्नीते । यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु । तेन सङ्ग्रथिताः सुमनस आबध्नामि यशो मयीति ॥ २४ ॥ उष्णीषेण शिरो वेष्टयते । युवा सुवासा इति ॥ २५ ॥ अलङ्करणमसि भूयोऽलङ्करणं भूयादिति कर्णवेष्टकौ ॥ २६ ॥ वृत्रस्येत्यङ्क्तेऽक्षिणी ॥ २७ ॥ रोचिष्णुरसीत्यात्मानमादर्शे प्रेक्षते ॥ २८ ॥ छत्रं प्रतिगृह्णाति । बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो माऽन्तर्धेहीति ॥ २९ ॥ प्रतिष्ठेस्थो विश्वतो मापातमित्युपानहौ प्रतिमुञ्चते ॥ ३० ॥ विश्वाभ्यो मानाष्ट्राभ्यस्परिपाहि सर्वत इति वैणवं दण्डमादत्ते ॥ ३१ ॥ दन्तप्रक्षालनादीनि नित्यमपि वासश्छत्रोपानहश्चापूर्वाणि चेन्मन्त्रः ॥ ३२ ॥ * ॥ ६ ॥

कर्कः— वेदꣳ समाप्य स्नायात् । ब्रह्मचर्यं वाऽष्टाचत्वारिꣳशकम् एवं हि श्रूयते वेदमधीत्य स्नायादिति । ब्रह्मचर्यं वेति वर्षे विकल्पः । द्वादशकेऽप्येके–स्नानमिच्छन्ति । **गुरुणाऽनुज्ञातः**–स्नायादित्यनुवर्तते । गुर्वनुज्ञा च कर्माङ्गतया, न स्नानस्य कालान्तरमेतत् । वेदशब्देन किमभिधीयत इत्यत आह–**विधिर्विधेयस्तर्कश्च वेदः**–विधिर्विधायकं ब्राह्मणम् । विधेया मन्त्राः । तर्कशब्देनार्थवादोऽभिधीयते । तर्क्यते ह्यनेन सन्दिग्धोऽर्थः । यथा–“अक्ताः शर्करा उपदधाति तेजो वै घृतम्” इति । अञ्जनं च तैलवसादिनाऽपि सम्भवति । तत्र तेजो वै घृतमिति घृतसंस्तवात् तर्क्यते घृताक्ता इति । तेन “विध्यर्थवादमन्त्रा वेदशब्देनाभिधीयन्ते” इत्युक्तम् । **षडङ्गमेके**–“शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम्” इति षड्भिरङ्गैरुपेतमेक आचार्या वेदमिच्छन्ति । एतस्मिन्हि अधिगते स्नानार्हो भवति । स्नानशब्देन द्वितीयाश्रमप्रतिपत्तिरुच्यते । तदनुष्ठानयोग्यता च षडङ्गेऽप्यधिगते वेदे भवति । अत एवोक्तम् । **न कल्पमात्रे**–कल्पशब्देन च ग्रन्थमात्रमभिधीयते । न ग्रन्थमात्रेऽधिगते स्नायीत । न ह्येतावता तदनुष्ठानयोग्यता भवति । तस्मादर्थतो ग्रन्थतश्चाधिगम्य स्नानमिति । **कामं तु याज्ञिकस्य**–यज्ञं वेदेति याज्ञिकः । तस्य कामं स्नानं भवति । षडङ्गमर्थतोऽनधिगम्यापि । **उपसंगृह्य गुरुꣳ समिधोऽभ्याधायेत्यत आरभ्य यद्वां तदश्विना यश** इत्येवमन्तं सूत्रम् । उपसंगृह्य गुरुमिति गुरोः पादोपसंग्रहणं कृत्वा समिधोऽभ्याधायेति अग्निपरिचरणं कृत्वेत्यर्थः । अतश्च पूर्वं वेदाहुतिहोमः । एतदेव व्रतादेशनविसर्गेष्वित्युक्तम् । ननु च समिदाधानस्य पश्चात्कस्माद्वेदाहुतयो न भवन्ति । एवं च सूत्रानन्तर्यमनुगृहीतं भवति । न चेह वेदाहुतीनां क्रमान्तरविधानमस्ति । उपसंगृह्य गुरुꣳ समिधोऽभ्याधायेति च पाठानुग्रहः । नैतदेवम् । वेदाहुतीनां समिदाधानमेव पश्चाद्भवति । एवं हि श्रूयते–“स यामुपयन्त्समिधमादधाति सा प्रायणीया याꣳ स्नास्यन्सोदयनीया” इति । स्नानं चाष्टभिरुदकुम्भैः समिदाधानसमनन्तरमेव भवति । उत्तरतः परिश्रितस्याष्टानामुदकुम्भानां पुरस्तात् स्थित्वा कुशेषु प्रागग्रेषु “येऽप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यः” इत्यनेन मन्त्रेण एकस्मादुद-

CC-0. In Public Domain. Kritikant Sharma Najafgarh Delhi Collection

कुम्भादपो गृहीत्वा तेनाभिषिञ्चते “तेन मामभिषिञ्चामि” इत्यनेन मन्त्रेण । अथ द्वितीयेन “येन श्रियमकृणुताम्” इत्यनेन मन्त्रेण। **आपो हिष्ठेति च प्रत्यृचं**–त्रिभिरुदकुम्भैरभिषिञ्चति। तूष्णीमितरैरुदकुम्भैरभिषेकः। **उदुत्तममिति मेखलामुन्मुच्य दण्डं निधाय वासोऽन्यत्परिधायादित्यमुपतिष्ठते**–उद्यन्भ्राजभृष्णुरित्यनेन मन्त्रेण । **दधि तिलान्वा प्राश्य जटालोमनखान्संहृत्यौदुम्बरेण दन्तान्धावेत–अन्नाद्याय व्यूहध्वमिति** अनेन मन्त्रेण। दधितिलयोरन्यतरप्राशनं कृत्वा जटालोमनखानां संहारं च औदुम्बरेण दन्तान्प्रक्षालयेदन्नाद्याय व्यूहध्वमित्यनेन मन्त्रेण। **उत्साद्य पुनः स्नात्वाऽनुलेपनं नासिकयोर्मुखस्य चोपगृह्णीते प्राणापानौ मे तर्पयेति**-उत्सादनम् अङ्गोद्वर्तनं कृत्वा पुनः स्नात्वाऽनुलेपनं नासिकयोर्मुखस्य चोपगृह्णीते प्राणापानौ मे तर्पयेत्यनेन मन्त्रेण। **पितरः शुन्धध्वमिति पाण्योरवनेजनं दक्षिणानुषिच्यानुलिप्य जपेत्सुचक्षा अहमक्षीभ्यामिति। अहतं वासो धौतं वाऽमौत्रेणाच्छादयीत परिधास्यै०**इत्यनेन मन्त्रेण। **अथोत्तरीयं यशसा मा द्यावापृथिवी०** इत्यनेन मन्त्रेणाच्छादयीत। **एकं चेत्पूर्वस्योत्तरवर्गेण प्रच्छादयीत**–एकं चेद्वासो भवति तस्यैवोत्तरवर्गेण प्रच्छादयीत। तत्रापि मन्त्रो भवति। क्रियान्तरत्वात्। **सुमनसः प्रतिगृह्णाति या आहरज्जमदग्निः०** इत्यनेन मन्त्रेण। **अथावबध्नीते यद्यशोऽप्सरसामिन्द्रः०** इत्यनेन मन्त्रेण। **उष्णीषेण शिरो वेष्टयते युवा सुवासा इति** अनेन मन्त्रेण। **अलङ्करणमसि भूयोऽलङ्करणं भूयादिति कर्णवेष्टकौ**–आबध्नाति। वृत्रस्येत्यनेन मन्त्रेणाङ्क्ते आक्षिणी। **रोचिष्णुरसी**त्यनेन मन्त्रेणात्मानमादर्शे प्रेक्षते। **छत्रं प्रतिगृह्णाति बृहस्पतेश्छादिरसि०** इत्यनेन मन्त्रेण। **प्रतिष्ठेस्थोविश्वतो मापातमित्युपानहौ प्रतिमुञ्चते**–युगपत् शक्यत्वाद् द्विवचनान्तत्वाच्च मन्त्रस्य। **विश्वाभ्यो मेति वैणवं दण्डमादत्ते दन्तप्रक्षालनादीनि नित्यमपि**–मन्त्रवन्ति भवन्तीति सूत्रशेषः। **वासश्छत्रोपानहश्चापूर्वाणि चेन्मन्त्रः**-वासआदिषु नवेष्वेव मन्त्रो भवति ॥ ६ ॥ ॥ * ॥

जय०–**वेदम**धीत्य **स्नायादि**ति **ब्रह्मचर्य**वेति वर्षे विकल्पः। **द्वादशके** व्रते एके स्नानमिच्छन्ति। **गुरुणाऽनुज्ञातः**–सर्वत्र स्नायादित्यनुवर्त्तते। गुर्वनुज्ञा च कर्मान्तरं न तु स्नानकालान्तरमेतत्। वेदशब्देन किं तदाह–**विधिर्विधेयस्तर्कश्च वेद** इति। विधिर्विधायकं ब्राह्मणम्, विधेया मन्त्राः। तर्क्यते ह्यनेन सन्दिग्धोऽर्थ इति तर्कोऽर्थवादः। यथा–“अक्ताः शर्करा उपदधाति तेजो वै घृतम्” इति। अञ्जनं च तैलवसादिना च सम्भवति। तत्र “तेजो वै घृतम्” इति घृतसंस्तवात्तर्क्यते घृताक्ता इति। तेन विध्यर्थवादमन्त्रा वेद इत्युक्तम्। **षडङ्ग**–“शिक्षा कल्पो व्याकरणं निरुक्त छन्दो ज्योतिषम्”इति। षड्भिरङ्गैरुपेतं वेदमधीत्य स्नायादित्येके। स्नानं च द्वितीयाश्रमप्रतिपत्तिः। तदनुष्ठानयोग्यता च षडङ्गे वेदेऽधिगते भवति। अत एवोच्यते न **कल्पमात्र** इति। नच कल्पमात्रे ग्रन्थमात्रेऽधिगते। स्नानार्हो भवति। तस्माद् ग्रन्थतोऽर्थतश्चाधिगम्य स्नायात्। काममिच्छया। यज्ञं वेदेति याज्ञिकस्तस्येच्छया स्नानं भवति। षडङ्गमर्थतोऽनधिगम्यापि। किं कृत्वा **उपसंगृह्य**–गुरुं गुरोः पादोपग्रहणं कृत्वा। **समिधोऽभ्याधाया**ग्निपरिचरणं कृत्वा, इतश्च पूर्वं वेदाहुतिहोमः। एतदेव व्रतादेशनविसर्गेष्वित्युक्तत्वात्। ननु समिदाधानस्य पश्चाद्वेदाहुतयः कुतो न भवन्ति क्रमान्तरानभिधानात्। उपसंगृह्य गुरुं० समिधोऽभ्याधायेति पाठानुग्रहापत्तेश्च। नैवम्। यतो वेदाहुतीनां पश्चादेव समिदाधानं ततश्च स्नानमिति। “स यामुपयन्स-

मिधमादधाति सा प्रायणीया याऽऽस्नास्यन्त्सोदयनीया” इति **श्रुतेः** । तस्मात्समिदाधानस्नानयोरव्यवहितकालत्वोपपादनाद्वेदाहुतीनां च स्नानाङ्गत्वातिदेशाच्च समिदाधानात्पूर्वं वेदाहुतिहोम इत्युक्तम् । स्नानं चाष्टभिरुदकुम्भैः । क्रमेण परिश्रितस्य वस्त्रादिना परिवेष्टितसमावर्तनस्थानस्थितस्याग्नेरुत्तरपार्श्वे स्थापितानामष्टानामुदकुम्भानामुदक्संस्थानां पुरस्तात्पूर्वस्यां दिशि आस्तीर्णेषु कुशेषु स्थित्वा प्रथमादुदकमादाय गृहीत्वा आत्मानमभिषिञ्चत इत्यग्रिमेणान्वयः । अष्टाभ्य उदकुम्भेभ्योऽपां ग्रहणे एक एव मन्त्रो **येऽप्स्वन्तरग्नय** इति । अभिषेचने तु भिद्यते । तत्र ग्रहणमन्त्रव्याख्या । तत्र येऽप्स्वन्तरित्यस्य प्रजापतिरग्निर्गायत्री आपो जलादाने० । हे अग्नयः ये भवन्त इह एतेषु उदकुम्भेषु वर्तमाने जले प्रविष्टाः । **कथम्** । अन्तः मध्ये कारणत्वेनेत्यर्थः । “अग्नेरापः” इति श्रुतेः । तत्र ये गोह्यादयो विमङ्गलाः अतितान्सृजामि । अतिसर्जनं प्रक्षेपः विजहामीत्यर्थः । यश्च रोचनः सुमङ्गलस्तमनेन जलेन सह गृह्णामि । मङ्गलायोपपादयामि । के तेऽग्नयस्तानाह—गृह्णाति संवृणोति प्राणिजालमिति गोह्यः । उपगोह्योऽङ्गतापनः । मयून् विकृतमुखान् कृत्वा स्यति अन्तं नयतीति मयूषः । मनस उत्साहं हन्तीति मनोहा । अस्खलः अप्रतीकार्यः । विरुजः विविधतया रुजति पीडयतीति विरुजः । तनूः शरीरावयवान् दूषयति विकृतान्करोतीति तनूदूषिः । इन्द्रियाणि हन्तीतीन्द्रियहा । एतानष्टौ विहायैकं रोचनं गृह्णामीति वाक्यार्थः । तथा च **वृद्धमनुः**—“गोह्यादयोऽग्नयो ह्यष्टावमेध्यास्त्वशुभावहाः । शुभकृद्रोचनस्त्वेको मेध्यो दीप्तिकरः परः” इति । अथाभिषेकमन्त्रव्याख्या । तेन मामिति द्वयोः प्रजापतिर्यजुरापोऽभिषेके० । तेन अभीष्टेन जलेनाहं मन्त्रलिङ्गात् आत्मानमभिषिञ्चामि । प्रयोजनमाह—श्रियै धर्मादिवृद्धये । यशसे कीर्त्यै । ब्रह्मणे वेदार्थम् । ब्रह्मवर्चसाय यागाध्यापनोत्कर्षजतेजसे । पुनर्**येऽप्स्वन्तरिति** द्वितीयादुदकुम्भादपो गृहीत्वा **येन श्रियमिति** मन्त्रेणाभिषिञ्चते । अस्यार्थः । हे अश्विनौ येन जलप्रभावेण भवन्तौ सुराणां श्रियं सम्पदं शोभां वा अकृणुतां कृतवन्तौ श्रियास्तोयत उत्पन्नत्वात् । येन च सुराममृतम् अवमृशतां प्राप्तवन्तौ । अटोऽदर्शनं छान्दसम् । येन जलेनाक्ष्यौ उदमन्योरक्षिणी अभ्यषिञ्चताम् अभिषिक्तवन्तौ । वां युवयोर्यदेवम्भूतं यशस्तत् एतज्जलाभिषेकेण ममाप्यस्त्विति शेषः । साकाङ्क्षत्वात् । तृतीयादित्रयात् **आपोहिष्ठादि**त्यृचेन यथाक्रममभिषेकः । इतरैस्त्रिभिरुदकुम्भजलैस्तूष्णमभिषेकः । **उदुत्तममिति** मन्त्रेण मेखलामुन्मुच्य ऊर्ध्वकण्ठदेशेनावतार्य दण्डं निधाय भूमौ स्थापयित्वा । अनेनावसरप्राप्तं दण्डाजिनयोर्निधानं लक्ष्यते तूष्णीम् । वस्त्रान्तरं धृत्वा सूर्यमुपतिष्ठते । अथोपस्थानमन्त्रव्याख्या । उद्यन्निति मन्त्रत्रयस्य प्रजापतिः शक्करी सविता उपस्थाने० । हे सूर्य यतो भवान् प्रातःसवने यावभिर्गमनशीलैर्ऋष्यादिसकलगणैश्च सनिः सेविता सेवितो वाऽस्थात्तिष्ठति तद्वत् । किम्भूतः । उद्यन् उद्गच्छन् । भ्राजभृष्टिः स्वप्रभयाऽन्यतेजोह्रासकः । आविदन् सर्वं शुभाशुभं जानन् । किञ्च यथा च त्वं प्रातःसवने दशसनिः दशसङ्ख्याकानां गवादीनां सनिर्दाताऽसि । “षणु दाने” अतो मामपि दशसनिं दशगुणदक्षिणादिदातारं कुरु । मा माम् वेदनं सर्वज्ञत्वं च गमय प्रापय । एवमुत्तरत्रापि व्याख्येयम् । एवं स्तुत्वा दधितिलयोरन्यतरं प्राश्य जटालोमनखानि च संहृत्य अपनीय औदुम्बरेण काष्ठेन दन्तान्धावेत शोधयेत् **अन्नाद्यायेति** मन्त्रेण । अस्यार्थः । तत्राथर्वणोऽनुष्टुप् वनस्पतिर्दन्तधावने० । हे दन्ताः यूयम् अन्नाद्याय अन्नादनाय व्यूहध्वम् आत्मशुद्ध्यर्थमेकपङ्क्तिनिविष्टा भवत । यतोऽयं राजा सोमश्चन्द्रः काष्ठरूपेणागमत् आगतः स एव सोमो मे मम मुखं प्रमाक्ष्यते शोधयिष्यति । केन यशसा सत्कीर्त्या भगेन षड्विधैश्वर्येणेति दन्तधावनस्य नित्यकाम्यत्वादुभयफलसम्बन्धः । उत्साद्य अङ्गोद्वर्तनेन मलमपसार्य पुनः स्नात्वा मलस्नानं कृत्वा अनुलेपनमुपगृह्णीते आदत्ते **प्राणापानौ मे** इति मन्त्रेण । अस्यार्थः । तत्र प्रजापतिर्यजुः प्राणापानौ चन्दनानुलेपे० । भो उपलेपनविशेषतो मे मम प्राणापानौ वायू तर्पय प्रीणय ।

तथा मे चक्षुः चक्षुरिन्द्रियम्, तथा मे श्रोत्रं श्रवणेन्द्रियं च तर्पय। **पितरः शुन्धध्व**मित्येतेन मन्त्रेण पाण्योरवनेजनं क्षालनोदकम्, दक्षिणाग्रहणात्प्राचीनावीती भूत्वा दद्यात् । शुन्धध्वं शोधनं दक्षिणापदं लुप्तसप्तम्यन्तम्, तेन दक्षिणस्यां दिशि निषिच्य क्षिप्त्वा चन्दनेनात्मानमनुलिप्य जपेत् **सुचक्षा अह**मिति मन्त्रम्। अस्यार्थः । तत्र प्रजापतिर्यजुः सविता नेत्राभिमन्त्रणे० । हे सवितः अहमक्षीभ्यां नेत्राभ्यां कृत्वा सुचक्षाः सुदर्शनो भूयासम् । तथा मुखेन सुवर्चाः सुतेजाः भूयासमिति पूर्वत्र सम्बन्धः । तथा कर्णाभ्यां सुश्रुत् सुश्रवणो भूयासं भवेयम् । अहतं नवीनं सदशम् अनुपहतं वा तत्रापि; अमौत्रेण मौत्रो रजकस्तद्व्यतिरिक्तेन धौतं वा आच्छादयीत परिदधीत। **परिधास्यै** इति मन्त्रेण । अस्यार्थः । तदादिद्वयोराथर्वणो यजुर्लिङ्गोक्ता वासःपरिधाने० । हे वासोदेवते परिधास्यै अनेकशुभवस्त्रपरिधानाय, तथा यशोधास्यै कीर्त्याधानाय, तथा दीर्घायुत्वाय निर्दुष्टजीवनाय च इदं वासः संव्ययिष्ये परिधास्ये । किम्भूतः वासोदेवतानुग्रहेण जरदष्टिः आयुःपरिपाकवान् । पुरूचीः पुरुभिर्बहुभिः पुत्रधनादिभिरूचः संयोगोऽस्ति यस्य सः । "ऊच समवाये" । किम्भूतं वासः रायस्पोषं रायो धनादिसमृद्धेः पोषं पोषणं पुष्टिकरमित्यर्थः । किञ्चैतत्सम्बन्धेनाहं शतं शरदो वर्षाणि जीवामि । अथोत्तरीयं वास आच्छादयतीत्यनुषङ्गः, **यशसा मे**ति मन्त्रेण । अस्यार्थः । हे वासोदेवते द्यावापृथिवी द्यावाभूमी यशसा युक्तौ मां मामविन्दत् विन्दतां प्राप्नुतामिति यावत् ।"विदॢ लाभे" धातुः । विभक्तिवचनव्यत्ययेनाऽन्वयः । तथा इन्द्राबृहस्पती अपि यशसा युक्तौ माम् अविन्दत् । तथा भगः सूर्योऽपि यशसा युक्तो मामविन्दत् । तच्चैतैः सम्पादितं यशो मा मां प्रतिपद्यतां मयि सर्वदा तिष्ठत्वित्यर्थः । यद्वा तद्यशो मा प्रतिपद्यताम् । प्रतिरत्रापार्थः। मत्तो माऽपयात्वित्यर्थः । एकं चेत्तत्रापि परिधानमन्त्रं पठित्वा वस्त्रार्द्धं परिधाय द्विराचम्य उत्तरार्द्धं गृहीत्वा उत्तरीयमन्त्रं पठित्वोत्तरीयं कृत्वा पुनर्द्विराचामेदित्यर्थः । एतन्मन्त्रद्वयं स्वकर्तृकपरिधाने बोद्धव्यम् । परकर्तृके तु परिधापने **येनेन्द्राये**ति मन्त्रान्तरमित्यविरोधः । सुमनसः पुष्पाणि **या आहर**दिति मन्त्रेण । अस्यार्थः । तत्र द्वयोर्भरद्वाजोऽनुष्टुप् सुमनसो देवता क्रमेण पुष्पादानबन्धनयोर्वि०। याः सुमनसः पुष्पाणि जमदग्निः प्रजापतिः श्रद्धाद्यर्थमाहरत् आददे । ताः सुमनसो यशसा कीर्त्या भगेनैश्वर्येण च सहाहं प्रतिगृह्णामि श्रद्धाद्यर्थम् । तत्र श्रद्धा धर्मादरः । मेधा धारणाशक्तिः । कामोऽभिलाषपूर्तिः । इन्द्रियं तत्पाटवम् । अथेति सुमनसां ग्रहणनन्तरं तानि स्वशिरस्यवबध्नाति **यद्यशोऽप्सरसा**मिति मन्त्रेण । अस्यार्थः । हे सुमनसः इन्द्रो देवः अप्सरसाम् उर्वश्यादीनां कुसुमावबन्धनेन यद्यशः सर्वजनप्रियत्वं चकार कृतवान् । तेन यशसा संग्रथिताः युष्मानाबध्नामि चूडायाम् । किम्भूतं यशः विपुलं विशालम् । पृथु सन्ततं दीर्घम् । तद्यशो मयि विषये तिष्ठत्विति शेषः । उष्णीषेण शिरोवेष्टनवस्त्रेण शिरो वेष्टयते **युवा सुवासा** इति मन्त्रेण । व्याख्यातश्चायं मेखलाबन्धनप्रसङ्गे । कर्णवेष्टकौ कुण्डले कर्णयोरामुञ्चति **अलङ्करणमसी**ति मन्त्रेण । अस्यार्थः । तत्र प्रजापतिर्यजुरग्निः कर्णालङ्करणे० । हे कुण्डलदेवते त्वम् अलङ्करणम् अलङ्कारशोभाऽसि अतस्त्वयाऽलंकृतस्य मम भूयो बहु वारं वारं वा अलंकरणं भूयादस्तु । **वृत्रस्य कनीनकासि** इत्यादिनां **चक्षुर्मे देही**त्यन्तेन मन्त्रेणाङ्क्तेऽक्षिणी। तत्र प्रजापतिर्गायत्री अञ्जनं तत्करणे०। **रोचिष्णुरसी**त्येतावता मन्त्रेणादर्शे दर्पणे मुखं प्रेक्षते । तत्र सूर्यो यजुरादर्शो मुखनिरीक्षणे०। छत्रं प्रतिगृह्णाति । **बृहस्पतेरि**ति मन्त्रेण । अस्यार्थः । तत्र गौतमो, गायत्री,छत्रं तद्ग्रहणे० । हे छत्र त्वं बृहस्पतेः पितामहस्य छदिः धर्मादिनिवर्तकोऽसि प्रथमम् । अतः पाप्मनो निषिद्धाचरणान्मामन्तर्द्धेहि व्यवहितं कुरु, तेजसः प्रतापात् यशसश्च सकाशान्माऽन्तर्द्धेहि मा व्यवहितं कुरु तद्युक्तं कुर्वित्यर्थः । **प्रतिष्ठे स्थ** इति मन्त्रणोपानहौ पादयोः प्रतिमुञ्चते परिधत्ते, युगपत् उभयत्वात् द्विवचनान्तत्वाच्च मन्त्रस्य ।

अस्यार्थः । तत्र प्रजापतिर्यजुर्द्धर्मं उपानद्ग्रहणे० । हे उपानहौ तद्देवते युवां प्रतिष्ठे स्थितिहेतू स्थः भवथः । अतो विश्वतः सर्वस्मात्परिभवान्मा मां पातं रक्षतम् । **विश्वाभ्य** इति मन्त्रेण वैणवं दण्डमादत्ते । अस्यार्थः । तत्र याज्ञवल्क्यो यजुर्दण्डस्तद्ग्रहणे० । हे दण्ड विश्वाभ्यः सर्वाभ्यः नाष्ट्राभ्यो राक्षसादिभ्यः सर्वतः सर्वावस्थासु मा मां परिपाहि सर्वभावेन रक्ष । **दन्तप्रक्षालनादीनि**—तत्साधनानि प्राप्य **नित्यमपि**—नित्यमेव मन्त्रो भवति । अपि एवार्थे । वासःप्रभृतिष्वपूर्वेष्वेव मन्त्रः ॥ ६ ॥ ॥ * ॥

हरि०—**वेदꣳ समाप्य स्नायाद्ब्रह्मचर्यं वाऽष्टाचत्वारिꣳशकम्**—वेदं मन्त्रब्राह्मणात्मकं समाप्य सम्यक् पाठतोऽर्थतश्च अन्तं नीत्वा स्नायात् वक्ष्यमाणेन विधिना स्नानं कुर्यात् । अथवा ब्रह्मचर्यव्रतम् अष्टाचत्वारिꣳशकम् अष्टाचत्वारिंशद्वर्षं निर्वर्त्य समाप्य अवसानं प्रापय्य गुरुणाऽनुमतः स्नायादिति गतेन सम्बन्धः । **द्वादशकेऽप्येके गुरुणाऽनुज्ञातः**—एके सूत्रकाराः द्वादशकेऽपि द्वादशवर्षसमाप्येऽपि व्रते चरिते स्नायादिति मन्यन्ते । तत्रापि गुरुणाऽनुज्ञातः । अत्रासूत्रितमपि उभयं वेदं व्रतं च समाप्य वा स्नायादित्यनुषज्यते । यतः पूर्वं स्नातकस्य त्रैविध्यमुक्तम् । **विधिर्विधेयस्तर्कश्च वेदः**—वेदं समाप्येत्युक्तम् , तत्र कियान् वेद इत्यपेक्षायामाह—विधिर्विधीयते इति विधिः "अग्निम् आदधीत, अग्निहोत्रं जुहुयात्, ज्योतिःष्टोमेन स्वर्गकामो यजेत" इत्यादि विधायकं ब्राह्मणवाक्यम् । विधेयः विधीयते विनियुज्यते ब्राह्मणवाक्येन कर्माङ्गत्वेनेति विधेयो मन्त्रः इषेत्वाऽऽदिः । [विधिर्विधेयस्तर्कश्च वेदः यदत्रैतस्मिन्दर्शने सति समस्तवैदिकसंहारात्मिका मीमांसाऽपि वेदशब्दवाच्या भवतीत्यादिना तर्कपदं मीमांसापरमङ्गीकृत्य वार्तिककारिताया मीमांसाया अपि वेदत्वमुक्तम् , तद्विध्यादित्रयस्य वेदत्वप्रतिपादनार्थेयं स्मृतिरिति षडङ्गवेदत्वस्मृतितुल्यन्यायतया पूर्वपक्षसंयताभ्युपगमेनैव तद्दृष्टान्तेन कल्पसूत्राणां छन्दस्त्वाभावमुपपादयितुम् । न त्वेवमेव स्मृतिव्याख्यानं सम्मतम्, अध्येतॄणां मीमांसायां वेदशब्दाप्रसिद्धेः । न चाध्येतृप्रसिद्धिनिरपेक्षैवेयं स्मृतिर्विध्यादित्रयस्य वेदत्वं प्रतिपादयतीति वाच्यम्, तथा सति तन्नैरपेक्ष्येण स्मृतिमात्रपर्यालोचने तत्स्वारस्येन विध्युद्देशमात्रस्यैव वेदत्वापत्तावर्थवादादीनामवेदत्वापत्तेः,विधेयत्वसाम्निहोत्रन्यायविस्तरयोरपि वेदत्वापत्तेश्च । अथाध्येतृप्रसिद्ध्यनुरोधेन विधिविधेयशब्दयोर्ब्राह्मणमन्त्रपरत्वान्नाव्याप्त्यतिव्याप्ती तर्हि स्मृतेरध्येतृप्रसिद्धिसापेक्षत्वापत्तौ कथं तर्कतदप्रसिद्धवेदत्वप्रतिपादनपरता । न च तदंशे स्वातन्त्र्यम्, अपेक्षानपेक्षाविध्यनुवादकृतवैरूप्यापत्तेः। न्यायविस्तरातिप्रसङ्गानिवृत्तेश्च, व्यवहारानुप्रविष्टपदार्थनिर्णये तद्विरोधेन शास्त्रस्यासामर्थ्याच्च । तस्मादध्येतृप्रसिद्धस्यैव मन्त्रब्राह्मणात्मकस्य वेदस्य कश्चिद्विधिनाऽङ्गविधायकः कश्चिन्मन्त्रात्मको विधेयः कश्चित्स एष नेति नेति त्रैयम्बकाः पुरोडाशा इत्यादिवत् त्रैविध्यमनयैवोच्यत इति तात्त्विकोऽर्थः । अतः षडङ्गा एव वेदस्मृतिरपि परमतोपन्यासात्पूर्वपक्षस्मृतिरेवेत्यलम्] । "तर्कोऽर्थवादः" इति **कर्कोपाध्यायः** । यथा "अक्ताः शर्करा उपदधाति" इति विधिः श्रूयते । तत्राञ्जनसाधनं घृतम् , तैलं, वसा च तन्मध्ये केनाक्ता इति संशये तेजो वै घृतमिति अर्थवादात् घृतेनाक्ता इति निर्णीयते, अतस्तर्कोऽर्थवादः । "तर्को मीमांसा" इति **कल्पतरुकारः** । चकारान्नामधेयभागसङ्ग्रहः । यतो वेदो विध्यर्थवादमन्त्रनामधेयभेदैश्चतुर्धा मीमांसकैर्विचार्यते । यथा अग्निहोत्राघारौ यागभेदौ । उद्भिद्बलभिदिति नामधेयानि । **षडङ्गमेके**—एके सूत्रकाराः षडङ्गं वेदं समाप्य स्नायादित्याहुः । षट् शिक्षा, कल्पो, व्याकरणं, निरुक्तं, ज्योतिषं, छन्दांसि अङ्गानि यस्य वेदस्य स षडङ्गः तं षडङ्गम् । **न कल्पमात्रे**—कल्पमात्रे ग्रन्थमात्रे मन्त्रे वा ब्राह्मणे वा अधीते न स्नानमिच्छन्ति । कल्पमात्राध्ययनस्य अनुष्ठानायोग्यत्वात् । यतः—**"अथातोऽधिकारः अथातो धर्मजिज्ञासा अथातो ब्रह्मजिज्ञासा"** इत्यादिभिरधिकारसूत्रैः अधीत

[ ] एतवान् ग्रन्थो मुद्रितपुस्तक एवोपलब्धः ।

सकलवेदस्याग्निहोत्रादिकर्मस्वधिकार इत्याचार्यैर्वर्ण्यते । कामं तु याज्ञिकस्य–तुशब्दः पक्षव्यावृत्तौ । काममिच्छया याज्ञिकस्य आध्वर्यवादियज्ञविद्याकर्मकुशलस्य स्नानमिच्छन्ति । अयमर्थः । मन्त्रब्राह्मणात्मकं वेदमधीत्य अवबुध्य च स्नायादित्येकः पक्षः । साङ्गं वेदमधीत्यावबुध्य च स्नायादित्यपरः । ग्रन्थमात्रमप्यधीत्य यज्ञविद्यां चाभ्यस्य स्नायादिति तृतीयः । यज्ञविद्याविरहेण ग्रन्थमात्रे अधीते न स्नायादिति निषेधः । यतो वेदाध्ययनं वेदविहिताग्निहोत्रादिकर्माद्यनुष्ठानप्रयोजनम् ।

उपसङ्गृह्य गुरुꣳ समिधोऽभ्याधाय परिश्रितस्योत्तरतः कुशेषु प्रागग्रेषु पुरस्तात्स्थित्वाऽष्टानामुदकुम्भानां येऽप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहाऽस्खलो विरुजस्तनूदूषिरिन्द्रियहा अतितान्सृजामि यो रोचनस्तमिह गृह्णामीत्येकस्मादपो गृहीत्वा तेनाभिषिञ्चते–स्नायादित्युक्तम्, तत्र कथं स्नायादित्यपेक्षिते आह–उपसङ्गृह्य उपसङ्ग्रहणविधिना प्रणम्य कं गुरुमाचार्यम्, समिधः पूर्वोक्तलक्षणास्तिस्रः परिसमूहनादिन्त्र्यायुषकरणान्तेन विधिना आचार्यनिर्वर्तितसमावर्तनाङ्गहोमेऽग्नौ आधाय प्रक्षिप्य । अत्र **समिधोऽभ्याधायेत्युक्तम्** । तत्समिदाधानं किं वेदाहुत्यादिसमावर्तनहोमात्पूर्वमुत पश्चात्, वेदाहुतिहोमः कुतः प्राप्त इति चेत् । एतदेव व्रतादेशनविसर्गेष्वित्यतिदेशात् । तर्हि पूर्वं भवतु । “ उपसङ्गृह्य गुरुꣳ समिधोऽभ्याधाय” इति पाठात् समिदाधानानन्तरं वेदाहुतीनामवसर इति गम्यते । नैतदेवम् । श्रुत्या हि वेदाहुतीनामवसरः समिदाधानात्पूर्वं, समिदाधानं च स्नानात्पूर्वमिति क्रमस्य ज्ञापितत्वात् । कथं “ स यामुपयन् समिधमादधाति सा प्रायणीया याꣳ स्नास्यन्त्सोदयनीया” इति **श्रुतेः** । तस्मात्समावर्तनहोमान्ते उपसङ्ग्रहणादि । परिश्रितस्य परिवेष्टितस्य सर्वतः प्रच्छादितस्य समावर्तनाङ्गहोमसाधनाग्निस्थापनप्रदेशस्योत्तरतः उत्तरस्मिन् भागे कुशेषु प्रागग्रेषु प्राक्कूलेषु आस्तीर्णेषु, क्व पुरस्तात्प्राच्यां दिशि, केषाम् अष्टानामुदकुम्भानां दक्षिणोत्तरायतानाम् अष्टसङ्ख्याकानाम् अमलजलपूर्णानाम् आम्रादिशुभपल्लवमुखानां स्थित्वा स्थितिं कृत्वा ऊर्ध्वीभूयेत्यर्थः । **येऽप्स्वन्तरग्नय** इत्यादिना मन्त्रेण **तमिह गृह्णामीत्यन्तेन** एकस्मात् “प्रथमातिक्रमे कारणाभावात्” इति न्यायेन प्रथमात् “ प्राञ्च्युदञ्चि च कर्माणि ” इत्यनेन न्यायेन दक्षिणस्य प्रथमत्वम् । अपः जलं दक्षिणहस्तेन गृहीत्वा तेन जलेन अभिषिञ्चति अभ्युक्षति आत्मानं शिरस्तः स्नानकर्ता । तत्र मन्त्रः । **तेन मामभिषिञ्चामि** इत्यादि **ब्रह्मवर्चसायेत्यन्तः**।

येन श्रियमकृणुतां येनावमृशताꣳसुराम् । येनाक्ष्यावभ्यषिञ्चतां यद्वां तदश्विना यश इत्यापोहिष्ठेति च प्रत्यृचं त्रिभिस्तूष्णीमितरैः–एवम् एकोदकुम्भजलसाध्यं स्नानमभिधाय इतरसप्तोदकुम्भजलस्नानमात्रे मन्त्रविशेषाभिधानात् **येऽप्स्वन्तरग्नय** इत्ययमेव सर्वोदकुम्भजलग्रहणे साधारणो मन्त्र इति प्रतीयते । ततः सर्वेभ्यो द्वितीयादिकुम्भेभ्यः प्रत्येकं **येऽप्स्वन्त**रिति मन्त्रेण जलमादाय वक्ष्यमाणैर्मन्त्रैर्यथाक्रममभिषिञ्चते । तद्यथा **येन श्रियमिति** द्वितीयम्, **आपोहिष्ठेति** तृतीयम्, **यो वः शिवतम** इति चतुर्थम्, **तस्मा अरमिति** पञ्चमम् । तूष्णीमितराणि त्रीणि स्नानानि ।

उदुत्तममिति मेखलामुन्मुच्य दण्डं निधाय वासोऽन्यत्परिधायादित्यमुपतिष्ठते उद्यन्भ्राजभृष्णुरित्यादि उदुत्तममिति मन्त्रेण मेखलां रशनामुन्मुच्य उच्छब्दसामर्थ्यात् शिरोमार्गेण निस्सार्य निधाय तां च भूमौ निक्षिप्य अन्यद्वस्त्रं परिधाय आदित्यं सूर्यम् **उद्यन्भ्राजभृष्णुरित्यादिभिर्मन्त्रैः** उपतिष्ठते स्तौति ।

दधि तिलान्वा प्राश्य जटालोमनखानि सꣳहृत्यौदुम्बरेण दन्तान् धावेतान्नाद्याय व्यूहध्वमिति–ततो दधितिलानामन्यतरं प्राश्य अशित्वा, जटाश्च लोमानि च नखानि च जटालोमनखानि तानि संहृत्य संहार्य वापयित्वेत्यर्थः । अत्र संहृत्येति णिचो लोपश्छान्दसः, स्वयं संहर्तुमशक्यत्वात् । औदुम्बरेण द्वादशाङ्गुलसम्मितेन कनिष्ठिकाग्रवत्स्थूलेन उदुम्बरकाष्ठेन । **अन्नाद्याय व्यूहध्वमिति** मन्त्रेण दन्तान् धावेत प्रक्षालयेद्ब्राह्मणः । दशाङ्गुलेन राजन्यः । अष्टाङ्गुलेन वैश्य इति विशेषः ।

अत्र जटालोमनखवपननिमित्तादुत्तरत्र पुनः स्नात्वेति पुनःशब्दसामर्थ्याच्च स्नानमापद्यते, अतो वपनानन्तरं स्नानाचमने विधाय दन्तान्प्रक्षालयेदिति सिद्धम्। **उत्साद्य पुनः स्नात्वाऽनुलेपनं नासिकयोर्मुखस्य चोपगृह्णीते प्राणापानौ म इति**–उत्साद्य सुगन्धिना द्रव्येण शरीरमुद्वर्त्य पुनर्भूयः स्नात्वा शिरःप्रभृतीन्यङ्गानि प्रक्षाल्य अनुलेपनं चन्दनादि मुखस्य नासिकयोश्च उपगृह्णीते । मुखं नासिकां च अनुलिम्पति । **प्राणापानौ मे तर्पये**त्यादिना **श्रोत्रं मे तर्पये**त्यन्तेन मन्त्रेण । **पितरः शुन्धध्वमिति पाण्योरवनेजनं दक्षिणानिषिच्यानुलिप्य जपेत्सुचक्षा अहमक्षीभ्यामिति**–ततः पाण्योरवनेजनं हस्तयोः प्रक्षालनमुदकं **पितरः शुन्धध्व**मित्यनेन मन्त्रेण प्राचीनावीती दक्षिणाभिमुखो भूत्वा दक्षिणस्यां दिशि निषिच्य प्रक्षिप्य, यज्ञोपवीती भूत्वा, पितृकर्मकरणनिमित्तकम् उदकस्पर्शं विधाय, चन्दनादिना सुगन्धिद्रव्येण गात्राण्यनुलिप्य **सुचक्षा अहमक्षीभ्या**मित्यादि भूयासमित्यन्तं मन्त्रं जपेत्। **अहतं वासो धौतं वाऽमौत्रेणाच्छादयीत परिधास्या**–इति। ततः अहतं नवं सदशं पवित्रं वासः वसनम् आच्छादयीत परिदधीत । तदलाभे अमौत्रेण अरजकेण धौतं क्षालितं **परिधास्या** इत्यादिना **अभिसंव्ययिष्य** इत्यन्तेन मन्त्रेण । **अथोत्तरीयं यशसा मेति**–अथ अन्तरीयपरिधानानन्तरं तादृशमेवोत्तरीयं वासो **यशसा मे**त्यादि **यशो मा प्रतिपद्यता**मित्यन्तेन मन्त्रेण आच्छादयीतेति गतेनाख्यातेन सम्बन्धः । **एकं चेत्पूर्वस्योत्तरवर्गेण प्रच्छादयीत**–चेद्यदि एकमेव वासो भवति तदा पूर्वस्यैव परिधानीयस्य वासस उत्तरवर्गेण उत्तरभागेन प्रच्छादयीत । **यशसा मे**ति मन्त्रेणोत्तरीयं कुर्यादित्यर्थः । **सुमनसः प्रतिगृह्णाति या आहरदिति**–सुमनसः पुष्पाणि प्रतिगृह्णाति अन्येन दत्तान्यादत्ते **या आहरज्जमदग्नि**रित्यादि **यशसा च भगेन** चेत्यन्तेन मन्त्रेण । **अथावबध्नीते यद्यश इति**–अथ ताः प्रतिगृह्य अवबध्नीते शिरसि बध्नाति **यद्यशोऽप्सरसा**मित्यादि **यशो मयी**त्यन्तेन मन्त्रेण। **उष्णीषेण शिरो वेष्टयते युवा सुवासा इति**–उष्णीषेण पूर्वोक्तलक्षणेन तृतीयेन वाससा शिरो मूर्द्धानं वेष्टयते **युवा सुवासा** इत्यादिकया **देवयन्त** इत्येतयर्चा। **अलङ्करणमसि भूयोऽलङ्करणं भूयादिति कर्णवेष्टकौ**–अलङ्करणमसीति मन्त्रेण दक्षिणोत्तरयोः कर्णयोर्वेष्टकौ भूषणे प्रतिमन्त्रं प्रतिमुञ्चते परिधत्ते । **वृत्रस्येत्यङ्क्तेऽक्षिणी**-वृत्रस्येत्यादिना **चक्षुर्मे देही**त्यन्तेन मन्त्रेण यथाक्रमं दक्षिणवामे मन्त्रावृत्त्याऽक्षिणी अङ्क्ते सौवीराञ्जनेन संस्करोति।**रोचिष्णुरसीत्यात्मानमादर्शे प्रेक्षते**–रोचिष्णुरसीत्यनेन मन्त्रेण आत्मानं मुखप्रभृति शरीरम् आदर्शे दर्पणे प्रेक्षते पश्यति- **छत्रं प्रतिगृह्णाति बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो माऽन्तर्द्धेहीति**–छत्रम् आतपत्रं, **बृहस्पतेश्छदिरसी**त्यादिना **यशसो माऽन्तर्धेही**त्यन्तेन मन्त्रेण प्रतिगृह्णाति प्रतिग्रहशब्दसामर्थ्यात् अन्यत आदत्ते । **प्रतिष्ठे स्थो विश्वतो मा पातमित्युपानहौ प्रतिमुञ्चते**–उपानहौ पादत्राणे प्रतिमुञ्चते परिधत्ते “ प्रतिष्ठे स्थो विश्वतो मा पातम्” इत्यनेन मन्त्रेण परिधत्ते । मन्त्रस्य द्विवचनान्तत्वात् परिधातुं शक्यत्वाच्च युगपत्पादयोः प्रतिमुञ्चते । प्रतिष्ठे इति द्विवचनम् स्थ इति च । **विश्वाभ्यो मा नाष्ट्राभ्यस्परिपाहि सर्वत इति वैणवं दण्डमादत्ते**–विश्वाभ्यो मेत्यादि सर्वत इत्यन्तेन मन्त्रेण वैणवं वंशमयं दण्डं यष्टिमादत्ते गृह्णाति, तच्चोक्तन्यायेन पूर्वदण्डं त्यक्त्वैव । इदमभिषेकप्रभृति दण्डग्रहणान्तं कर्मजातं स्नानकर्ता करोति नाचार्यः। **दन्तप्रक्षालनादीनि नित्यमपि वासश्छत्रोपानहश्चापूर्वाणि चेन्मन्त्रः**–दन्तप्रक्षालनमादौ येषां पुष्पादानादीनां तानि दन्तप्रक्षालनादीनि नित्यमपि सर्वदा मन्त्रवन्ति स्नातकस्य भवन्ति। वाससी च छत्रं च उपानहौ च वासश्छत्रोपानहः, चकाराद्दण्डोऽपि । एतानि चेद्यदि अपूर्वाणि नूतनानि ध्रियन्ते गृह्यन्ते तदा मन्त्रो भवति तद्ग्रहणे ॥ ६॥ ॥*॥

गदा०– वेदꣳ समाप्य स्नायात्–स्नानशब्देन समावर्तनसंस्कार उच्यते । वेदं मन्त्रब्राह्मणात्मकं समाप्य सम्यक् पठतोऽर्थतश्चान्तं नीत्वा स्नायाद्वक्ष्यमाणविधिना स्नानं कुर्यात् । **ब्रह्मचर्यं वाऽष्टाचत्वारिꣳशकम्**–अथवा ब्रह्मचर्यं व्रतम् अष्टाचत्वारिंशकम् अष्टाचत्वारिंशद्वर्षं निर्वर्त्य समाप्य अवसानं प्रापय्य गुरुणाऽनुज्ञातः स्नायादिति सम्बन्धः । **मीमांसकास्तु**–"अष्टाचत्वारिंशकं व्रतं समाप्य अवसानं कुर्यात्" इति पक्षं नाङ्गीकुर्वन्ति । "जातपुत्रः कृष्णकेशोऽग्नीनादधीत" इत्याधानश्रुतिविरोधात् । न च विकल्पः अतुल्यत्वात् । प्रत्यक्षमेकं श्रुतिवचनम् । कल्प्यमपरम् । "कल्प्यप्रत्यक्षयोः प्रत्यक्षं बलवत्" इति **भर्तृयज्ञ**भाष्ये । **द्वादशकेऽप्येके**–द्वादशवार्षिके व्रते समाप्तेऽप्येके स्नानमिच्छन्ति । अन्ये तु वेदव्रतसमाप्त्युत्तरं स्नानमिच्छन्ति । **गुरुणाऽनुज्ञातः**–स्नायादिति शेषः । गुर्वनुज्ञा च समावर्तनकर्माङ्गं न तु स्नानकालान्तरमेतत् । वेदꣳ समाप्य स्नायादित्युक्तम्, तत्र वेदशब्देन किमुच्यते इत्यत आह–**विधिर्विधेयस्तर्कश्च वेदः**–विधत्त इति विधीयत इति वा विधिः । "दर्शपूर्णमासाभ्यां यजेत, अग्निहोत्रं जुहुयात्" इत्यादिविधायकं ब्राह्मणवाक्यम् । विधीयते विनियुज्यते ब्राह्मणवाक्येन कर्माङ्गत्वेनेति विधेयो मन्त्रः **इषेत्वादिः** । तर्कशब्देनार्थवादोऽभिधीयते । तर्क्यते ह्यनेन सन्दिग्धोऽर्थः । यथा "अक्ताः शर्करा उपदधाति तेजो वै घृतम्" इति । अञ्जनं तैलवसादिनाऽपि सम्भवति । तत्र तेजो वै घृतमिति घृतसंस्तवात् तर्क्यते घृताक्ता इति । तेन विद्ध्यर्थवादमन्त्रा वेदशब्देनाभिधीयन्त इत्युक्तम् । तर्कः "कल्पसूत्रम्" इति **भर्तृयज्ञः** । "तर्को मीमांसा" इति **कल्पतरुः** । चशब्दान्नामधेयभागसङ्ग्रह इति **हरिहरः** । **षडङ्गमेके**-शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दो, ज्योतिषम् इति षड्भिरङ्गैरुपेतमेक आचार्या वेदमिच्छन्ति । तमधीत्य स्नायादित्यन्वयः । स्नानं च द्वितीयाश्रमप्रतिपत्तिः । तदनुष्ठानयोग्यता च षडङ्गे वेदेऽधिगते भवति । अत एवोच्यते--**न कल्पमात्रे**–कल्पशब्देन च ग्रन्थमात्रमभिधीयते । कल्पमात्रे ग्रन्थमात्रे मन्त्रे वा ब्राह्मणे वा अधीते न स्नानमिच्छन्ति । न हि ग्रन्थमात्राध्ययनेन कर्मानुष्ठानयोग्यता भवति । तस्मादर्थतो ग्रन्थतश्चाधिगम्य स्नानमिति । **कामं तु याज्ञिकस्य**–यज्ञं वेदेति याज्ञिकः । तुशब्देन ग्रन्थमात्राधीतस्याध्वर्यवादियज्ञविद्याकुशलस्य षडङ्गमर्थतोऽनधिगम्यापि काममिच्छया स्नानं भवति । तेनायमर्थः । मन्त्रब्राह्मणात्मकं वेदमधीत्यावबुध्य च स्नायादित्येकः पक्षः । साङ्गं वेदमधीत्यावबुध्य च स्नायादिति द्वितीयः पक्षः । ग्रन्थमात्रमधीत्य यज्ञविद्यां चाभ्यस्य स्नायादिति तृतीयः पक्षः । स्नायादित्युक्तम्, तत्र कथं स्नायादित्यपेक्षायामाह—**उपसङ्गृह्य गुरुꣳ समिधोऽभ्याधाय परिश्रितस्योत्तरतः कुशेषु प्रागग्रेषु पुरस्तात्स्थित्वाऽष्टानामुदकुम्भानां येऽप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहाऽस्खलो विरुजस्तनूदूपुरिन्द्रियहा तान्विजहामि यो रोचनस्तमिह गृह्णामीत्येकस्मादपो गृहीत्वा तेनाभिषिञ्चते तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसायेति**–उपसङ्गृह्य गुरु गुरोः पादोपग्रहणं कृत्वा समिधोऽभ्याधायाग्निपरिचरणं कृत्वा । इतश्च पूर्वं वेदाहुतिहोमः । एतदेव व्रतादेशनविसर्गेष्वित्युक्तत्वात् । ननु समिदाधानस्य पश्चाद्वेदाहुतयः कुतो न भवन्ति । क्रमान्तरानभिधानात् । उपसङ्गृह्य गुरुꣳ समिधोऽभ्याधायेति पाठानुग्रहापत्तेश्च । मैवम् । यतो वेदाहुतीनां पश्चादेव समिदाधानम्, ततश्च स्नानमिति श्रूयते--" स यामुपयन्त्समिधमादधाति सा प्रायणीया याꣳ स्नास्यन्त्सोदयनीया" इति । तस्मात्समिदाधानस्नानयोरव्यवहितकालत्वोपपादनाद्वेदाहुतीनां च स्नानाङ्गत्वातिदेशाच्च समिदाधानात्पूर्वं वेदाहुतिहोम इत्युक्तम् । स्नानं चाष्टभिरुदकुम्भैः क्रमेण । परिश्रितस्य वस्त्रादिना वेष्टितसमावर्तनस्थानास्थितस्याग्नेरुत्तरपार्श्वे स्थापितानामष्टानामुदकुम्भानां दक्षिणोत्तरायतानां पुरस्तात्पूर्वस्यां दिशि आस्तीर्णेषु कुशेषु ब्रह्मचारी स्थित्वा ऊर्द्ध्वीभूय **येऽप्स्वन्तरग्नय** इति मन्त्रेण प्रथमादुदकुम्भादपो गृहीत्वा **तेन मामभिषिञ्चामीति** मन्त्रेणात्मानमभिषिञ्चति । मन्त्रार्थः । येऽग्नयो गोह्यादयोऽप्सु अन्तर्मध्ये प्रविष्टाः स्थिताः इन्द्रियहान्ता अष्टौ तान् अमेध्यत्वादमङ्गल्यत्वादेताभ्योऽद्भ्यः सकाशात् अग्नीन् विजहामि पृथक् करोमि त्यजामि । यश्च रोचनोऽग्निर्मेध्यत्वान्मङ्गल्यत्वात् प्रीतिकारित्वाच्च तमिहाप्सु विषये गृह्णामि स्वीकरोमि यतः अद्भ्योऽग्निरुत्पद्यते संव्रियते आच्छाद्यत इति गोह्यः । उपगोह्यः अङ्गतापकः । मयूषो जन्तुहिंसकः । मनस उत्साहं हन्तीति मनोहा । अस्खलः प्रध्वंसी अजीर्णकृत् । विविधतया रुजति पीडयतीति विरुजः । तनूं शरीरं दूषयति विकृतिं नयति इति तनूदूपुः । इन्द्रियाणि हन्तीति इन्द्रियहा । अभिषेकमन्त्रार्थः । तेनोदकेन माम् इममात्मानमभिषिञ्चामि । किमर्थम् । श्रियै संपत्त्यर्थम् । यशसे कीर्त्यै । ब्रह्मणे ब्रह्मवर्चसाय यागाध्यापनोत्कृष्टतेजसे । **येन श्रियमकृणुतां येनावमृशताꣳसुरां येनाक्ष्यावभ्यषिञ्चतां यद्वां तदश्विना यश इत्यापोहिष्ठेति च**

प्रत्यृचं त्रिभिस्तूष्णीमितरैः–अथास्य उदकुम्भेभ्योऽपां ग्रहणं एक एव मन्त्रो **येऽप्स्वन्तरग्नय** इति । आभिषेचने
तु भिद्यते तद्यथा। **येन श्रियमिति** द्वितीयम्। **आपो हिष्ठेति** तृतीयम्। **यो वः शिवतम** इति चतुर्थम्। **तस्मा अरङ्गे-**
ति पञ्चमम् । ततस्तूष्णीं त्रिभिरितरैरुदकुम्भैरभिषेकः । मन्त्रार्थः। हे अश्विनौ येन जलप्रभावेण भवन्तौ सुराणां श्रियं
सम्पदं शोभां वा अकृणुतां कृतवन्तौ । येन च सुराणाममृतम् अवमृशतां प्राप्तवन्तौ । अटोऽदर्शनं छान्दसम् । येन
बलेनक्ष्यौ उपमन्योरक्षिणी अभ्यषिञ्चताम् अभिषिक्तवन्तौ । वां युवयोर्यदेवंभूतं यशस्तत् एतज्जलाभिषेकेण ममाप्यास्त्विति
शेषः । **उदुत्तममिति मेखलामुन्मुच्य दण्डं निधाय वासोऽन्यत्परिधायादित्यमुपतिष्ठत उद्यन्भ्राजभृष्णु-**
रिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मा गमयोद्यन्भ्राजभृष्णुरिन्द्रो
मरुद्भिरस्थाद्दिवा यावभिरस्थाच्छतसनिरसि शतसनिं मा कुर्वाविदन्मा गमयोद्यन्भ्राजभृष्णुरिन्द्रो मरु-
द्भिरस्थात्सायं यावभिरस्थात्सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मा गमयेति–तत **उदुत्तममिति**
मन्त्रेण मेखलां रशनामुन्मुच्य ऊर्ध्वं शिरोमार्गेण निस्सार्य तां च भूमौ निक्षिप्य वासोऽन्यत्परिधाय वस्त्रान्तरं परि-
हितं कृत्वा **उद्यन्भ्राजभृष्णुरिति** मन्त्रेण सूर्यमुपतिष्ठते । मेखलानिधानोत्तरं दण्डाजिनयोर्निधानम् । तूष्णीमिति **जय-**
रामकारिकाकारौ । मन्त्रार्थः । हे सूर्य यतो भवान् प्रातःसवने यावभिर्गमनशीलैर्ऋष्यादिसप्तकगणैः सेवितो-
ऽस्थात् तिष्ठति,यथेन्द्रो मरुद्भिरस्थात् तिष्ठति तद्वत्। किम्भूतः उद्यन् उद्गच्छन् भ्राजभृष्णुः स्वप्रभयाऽन्यतेजउद्भासकः।
आविदन् सर्वं शुभाशुभं जानन्। किञ्च यथा च त्वं प्रातःसवने दशसनिः दशसङ्ख्याकानां गवादीनां सनिर्दाता ।
“षणु दाने”।अतो मामपि दशसनिं दशगुणदक्षिणादिदातारं कुरु । मा मां विदन् वेदयन् ज्ञापयन् गमय प्रापय प्रति-
ष्ठामिति शेषः । एवमुत्तरत्रापि व्याख्येयम् । **दधि तिलान्वा प्राश्य जटालोमनखानि सꣳहृत्यौदुम्बरेण दन्ता-**
न्धावेतान्नाद्याय व्यूहध्वꣳ सोमो राजाऽयमागमत् स मे मुखं प्रमार्क्ष्यते यशसा च भगेन चेति–ततो
दधितिलयोरन्यतरं आशयित्वा जटाश्च लोमानि च नखानि च जटालोमनखानि तानि संहृत्यापनीय वापयित्वा ।
संहृत्येत्यत्र णिचो लोपश्छान्दसः । स्वयं संहर्तुमशक्यत्वात् । औदुम्बरेण दन्तान्धावेत औदुम्बरेण काष्ठेन दन्तान्
शोधयेत् **अन्नाद्यायेति** मन्त्रेण । हे दन्ताः यूयम् अन्नाद्याय अन्नादनाय व्यूहध्वं निर्मला भवत । यतोऽयं राजा
सोमश्चन्द्रः काष्ठरूपेणागमत् आगतः । अतः स एव सोमो मे मम मुखं प्रमार्क्ष्यते शोधयिष्यति । केन यशसा
सत्कीर्त्या भगेन भाग्येन च । “दन्तधावनस्य नित्यकाम्यत्वादुभयफलसम्बन्धः” इति **मुरारिः** । **उत्साद्य पुनः**
स्नात्वाऽनुलेपनं नासिकयोर्मुखस्य चोपगृह्णीते प्राणापानौ मे तर्पय चक्षुर्मे तर्पय श्रोत्रं मे
तर्पयेति–उत्साद्य अङ्गोद्वर्त्तनेन मलमपसार्य पुनः स्नात्वा मलापकर्षणस्नानोत्तरं पुनः स्नानं कृत्वाऽनुलेपनं
चन्दनादि नासिकयोर्मुखस्य चोपगृह्णीते आदत्ते **प्राणापानौ मे** इति मन्त्रेण । “मुखनासिके चानुलिम्पति” इति
हरिहरः । पाण्योरवनेजनं निषिच्येति वक्ष्यमाणत्वात् अत्र पाणिभ्यामनुलेपनग्रहणम् । मन्त्रार्थः । हे उपलेपनाधिदे-
वते मे मम प्राणापानौ वायू तर्पय प्रीणय । तथा मे चक्षुरिन्द्रियम् । तथा मे श्रोत्रं श्रवणेन्द्रियं च तर्पय ॥ **पितरः**
शुन्धध्वमिति पाण्योरवनेजनं [1]**दक्षिणा निषिच्यानुलिप्य जपेत्** । **सुचक्षा अहमक्षीभ्यां भूयासꣳ सुवर्चा**
मुखेन । सुश्रुत्कर्णाभ्यां भूयासमिति–प्राचीनावीती दक्षिणाभिमुखो भूत्वा **पितरः शुन्धध्वमित्येतावता** मन्त्रेण
पाण्योरवनेजनं हस्तयोः प्रक्षालनोदकं दक्षिणा निषिच्य दक्षिणस्यां दिशि निषिच्य प्रक्षिप्य यज्ञोपवीती भूत्वा पितृक-
र्मत्वादुदकं स्पृष्ट्वा चन्दनेनात्मानमनुलिप्य **सुचक्षा अहमिति** मन्त्रं जपेत् । अत्र दक्षिणापदं लुप्तसप्तम्यन्तम् ।
मन्त्रार्थः । हे सवितः अहमक्षीभ्यां नेत्राभ्यां कृत्वा सुचक्षाः सुदर्शनो भूयासम् भवेयम् । तथा मुखेन सुवर्चाः
सुतेजाः भूयासमिति पूर्वत्र सम्बन्धः । तथा कर्णाभ्यां सुश्रुत् सुश्रवणो भूयासम् । **अहतं वासो धौतं वाऽमौ-**
त्रेणाच्छादयीत परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि शरदः
पुरूची रायस्पोषमभिसंव्ययिष्य इति–अहतं नवीनं सदशं वासः वसनम् अथवाऽमौत्रेण अरजकेन
धौतं वास आच्छादयीत **परिधास्या** इति मन्त्रेण । मन्त्रार्थः । हे वासोदेवते परिधास्यै अनेकशुभ-
वस्त्रपरिधानाय । तथा यशोधास्यै स्तुत्यै । दीर्घायुत्वाय दीर्घजीवनाय च । इदं वासः संव्ययिष्ये परिधास्ये ।

---

[1] **दक्षिणेति** । दक्षिणस्यां दिशीत्यर्थे “दक्षिणादाच् ५।३।३६” इत्याच् प्रत्ययः । अत्र पाणिनिसूत्रस्य जागरूक-
त्वेन गदाधरोक्तं व्याख्यानं कथंचिदसमम् ।

किम्भूतः । वासोदेवतानुग्रहेण जरदष्टिरस्मि–वृद्धत्वव्याप्यायुर्भवामि । पुरूचीः पुम्भिर्बहुभिः पुत्रधनादिभिश्च संयोगोऽस्ति यस्य सः । "ऊच समवाये"। किम्भूतं वासः रायस्पोषं धनादिपोषणं पुष्टिकरम् । किंच एतत्सम्बन्धेनाहं शतं शरदो वर्षाणि जीवामि । **अथोत्तरीयं यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती यशो भगश्च माऽविन्दद्यशो मा प्रतिपद्यतामिति**–अथ परिधानानन्तरमाचम्य **यशसा मे**ति मन्त्रेण अहतमेव वास उत्तरीयम् । आच्छादयीतेति सम्बन्धः । मन्त्रार्थः । हे वासोदेवते द्यावापृथिवी द्यावाभूमी यशसा युक्तौ मा माम् अविन्दत् विन्दताम् प्राप्नुतामिति यावत् । "विद्लृ लाभे" धातुः । विभक्तिवचनव्यत्ययेनान्वयः । तथा इन्द्राबृहस्पती आपि यशसा युक्तौ मा अविन्दत् । तथा भगः सूर्योऽपि यशसा अविन्दत् । तच्चैतैः सम्पादितं यशो मा मां प्रतिपद्यतां मयि सर्वदा तिष्ठत्वित्यर्थः । **एकं चेत्पूर्वस्योत्तरवर्गेण प्रच्छादयीत**–चेद्यादि एकं वासो भवति द्वितीयं न भवति तदा पूर्वस्य परिधानीयस्यैव वाससः उत्तरवर्गेण उत्तरभागेन प्रच्छादयीत उत्तरीयं कुर्यात् । तत्रापि **यशसा मे**ति मन्त्रो भवति, क्रियान्तरत्वात् । अत्रैवम् । पूर्वं वस्त्रार्द्धं समन्त्रकं परिधाय द्विराचम्य उत्तरार्द्धं गृहीत्वा उत्तरीयं मन्त्रं पठित्वोत्तरीयं कृत्वा पुनर्द्विराचामेत् । **सुमनसः प्रतिगृह्णाति या आहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय । ता अहं प्रतिगृह्णामि यशसा च भगेन चेति**–सुमनसः पुष्पाणि । प्रतीत्युपसर्गसामर्थ्यात् गुरुणा समर्पिताः सुमनसः प्रतिगृह्णाति **या आहर**दिति मन्त्रेण । याः सुमनसः पुष्पाणि जमदग्निः प्रजापतिः श्रद्धाद्यर्थमाहरत् आददे । ताः सुमनसो यशसा कीर्त्या भगेनैश्वर्येण च सहाहं प्रतिगृह्णामि श्रद्धाद्यर्थम् । तत्र श्रद्धा धर्म्मादरः । मेधा धारणाशक्तिः । कामोऽभिलाषपूर्तिः । इन्द्रियं तत्पाटवम् । **अथावबध्नीते यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु । तेन संग्रथिताः सुमनस आवध्नामि यशो मयीति**–ताः प्रतिगृह्य स्वशिरसि बध्नाति **यद्यशोऽप्सरसा**मिति मन्त्रेण । मन्त्रार्थः । हे सुमनसः इन्द्रो देवः अप्सरसामुर्वश्यादीनां कुसुमाववन्धेन यद्यशः सर्वजनप्रियत्वं चकार कृतवान्, तेन यशसा संग्रथिताः युष्मान् आबध्नामि चूडायाम् । किम्भूतं यशः विपुलं विशालम् । एषु सन्ततं दीर्घं तद्यशो मयि विषये तिष्ठत्वित्यर्थः । **उष्णीषेण शिरो वेष्टयते युवा सुवासा इति**–उष्णीषेण शिरोवेष्टनवस्त्रेण शिरो वेष्टयते **युवा सुवासा** इति मन्त्रेण । व्याख्यातश्चायमुपनयने । **अलङ्करणमसि भूयोऽलङ्करणं भूयादिति कर्णवेष्टकौ**–कर्णवेष्टकौ कुण्डले दक्षिणसव्यकर्णयोरामुञ्चति **अलङ्करणमसी**ति मन्त्रावृत्त्या । मन्त्रार्थः । हे कुण्डलदेवते त्वमलङ्करणम् अलङ्कारशोभाऽसि । अतस्त्वयाऽलङ्कृतस्य मम भूयो बहुवारमलङ्करणं भूयात् अस्तु । **वृत्रस्येत्यङ्क्तेऽक्षिणी**–वृत्रस्येत्यादि **चक्षुर्मे देही**त्यन्तेन मन्त्रेण कज्जलेन अक्षिणी अङ्क्ते संस्करोति । "सौवीराञ्जनेन" इति **हरिहरः** । अत्र च सव्यं नेत्रमङ्क्त्वा ततो दक्षिणाञ्जनं मन्त्रावृत्त्या । तथा च दीक्षाप्रकरणे लिङ्गम् "सव्यं वा अग्रे मानुषः" इति । **कारिकायाम्**–"वृत्रस्येत्यक्षिणी अङ्क्तेऽभ्यञ्जनेनाभिनासिकम् । सव्यं प्रथममित्येव श्रूयते बह्वृचश्रुतौ" । **हरिहरेण** दक्षिणाञ्जनं पूर्वमुक्तं तदाशयं न विद्मः । **रोचिष्णुरसीत्यात्मानमादर्शे प्रेक्षते**–आत्मानं सर्वं देहमादर्शे दर्पणे प्रेक्षते पश्यति **रोचिष्णुरसी**त्येतावता मन्त्रेण । मन्त्रार्थः । रोचिष्णुः प्रकाशकः । **छत्रं प्रतिगृह्णाति बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्द्धेहि तेजसो यशसो माऽन्तर्द्धेहीति**–उपसर्गसामर्थ्याद्गुरुणा दत्तं छत्रमातपत्रं **बृहस्पतेश्छदिरसी**ति मन्त्रेण प्रतिगृह्णाति । मन्त्रार्थः । हे छत्र त्वं बृहस्पतेः पितामहस्य छदिर्घर्मादिनिवर्तकोऽसि प्रथमम्, अतः पाप्मनो निषिद्धाचरणान्माम् अन्तर्द्धेहि अन्तर्हितं कुरु । तेजसश्च सकाशान्माऽन्तर्द्धेहि मा व्यवहितं कुरु तद्युक्तं कुर्वित्यर्थः । **प्रतिष्ठे स्थो विश्वतो मा पातमित्युपानहौ प्रतिमुञ्चते**--**प्रतिष्ठे स्थ** इति मन्त्रेण उपानहौ पादत्राणे पादयोः प्रतिमुञ्चते परिधत्ते युगपत् । शक्यत्वात् द्विवचनान्तत्वाच्च । मन्त्रार्थः । हे उपानहौ देवते युवां प्रतिष्ठे स्थितिहेतू स्थः भवथः । अतो विश्वतः सर्वस्मात्परिभवात् मा मां पातं रक्षतम् ॥ **विश्वाभ्यो मा नाष्ट्राभ्यस्परिपाहि सर्वत इति वैणवं दण्डमादत्ते**–**विश्वाभ्य** इति मन्त्रेण वैणवं वंशमयं दण्डं यष्टिमादत्ते । अत्राभिषेकादि दण्डधारणान्तं कर्म स्नानकर्तुर्न त्वाचार्यस्य । मन्त्रार्थः । हे दण्ड विश्वाभ्यः सर्वाभ्यः नाष्ट्राभ्यो राक्षसादिभ्यः सर्वावस्थासु मा मां परिपाहि सर्वभावेन रक्ष । **दन्तप्रक्षालनादीनि नित्यमपि वासश्छत्रोपानहश्चापूर्वाणि चेन्मन्त्रः**–दन्तप्रक्षालनमादौ येषां पुष्पादीनां तानि दन्तप्रक्षालनादीनि तत्साधनानि प्राप्य नित्यमपि नित्यमेव मन्त्रो भवति । आपि एवार्थे । वाससी च छत्रं च उपानहौ च वासश्छत्रोपानहः । चकाराद्दण्डोऽपि । एतानि वासआदीनि चेद्यदि नवीनानि ध्रियन्ते तदैव मन्त्रो भवति न सर्वदा ॥ * ॥ इति श्रीसम्राट्स्थपतिमहायाज्ञिकश्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे षष्ठी कण्डिका ॥ ६ ॥

अथ **पदार्थक्रमः** । **सुरेश्वरः**—"भौमभानुजयोर्वारे नक्षत्रे च व्रतोदिते । ताराचन्द्रविशुद्धे च स्यात्समावर्तनक्रिया ॥" इति । एतच्च ब्रह्मचारिव्रतलोपे प्रायश्चित्तं कृत्वा कार्यम् । तदाह **बौधायनः**—"शौचसन्ध्यादर्भभिक्षाऽग्निकार्यैराहित्यकौपीनोपवीतमेखलादण्डाजिनाधारणदिवास्वापच्छत्रपादुकास्रग्विधारणोद्वर्तनानुलेपनाञ्जनद्यूतनृत्यगीतवाद्याद्यभिरतो ब्रह्मचारी कृच्छ्रत्रयं चरेत्" इति । ब्रह्मचारी गुरुमर्थदानेन सम्पूज्य तेनानुज्ञातो ज्योतिश्शास्त्रोक्ते शुभे काले आचार्यगृहे समावर्तनं नाम कर्म कुर्यात् । ब्रह्मचारी कृतनित्यक्रियः कृतप्रातरग्निकार्यश्च । तत आचार्यः प्राणानायम्य देशकालौ स्मृत्वा अस्य ब्रह्मचारिणो गृहस्थाद्याश्रमान्तरप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं समावर्तनाख्यं कर्माहं करिष्ये इतिं सङ्कल्प्य तदङ्गभूतं निर्विघ्नार्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धं चाहं करिष्ये । श्राद्धादि समाप्य । तत आचार्यम् अहं स्नास्ये इत्युक्ते, स्नाहीति प्रत्यनुज्ञा गुरोः । ततः पादोपसंग्रहणं गुरोः । ततः परिश्रिते पञ्च भूसंस्कारान्कृत्वा लौकिकाग्नेः स्थापनम् । वैकल्पिकावधारणे विशेषः । दधिप्राशनम् । अमैत्रधौतवस्त्रम् । ततो ब्रह्मवरणाद्याज्यभागान्ते विशेषः । उपकल्पनीयेषु समिन्धनकाष्ठानि समिधः । पर्युक्षणार्थमुदकम् । हरितकुशाः । अष्टौ उदकुम्भाः । औदुम्बरं द्वादशाङ्गुलं दन्तकाष्ठं ब्राह्मणस्य । दशाङ्गुलं राजन्यस्य । अष्टाङ्गुलं वैश्यस्य । दधि । नापितः । स्नानार्थमुदकम् । उद्वर्तनद्रव्यम् । चन्दनम् । अहते वाससी । **प्रयोगरत्न**मते यज्ञोपवीते, पुष्पाणि, उष्णीषम्, कर्णालङ्कारौ, अञ्जनम् , आदर्शः, नूतनं छत्रम्, उपानहौ, वैणवो दण्डः । ततः पवित्रकरणाद्याज्यभागान्तं कुर्यात् । अन्तारिक्षाय स्वाहा । वायवे स्वाहा । ब्रह्मणे स्वाहा । छन्दोभ्यः स्वाहा । प्रजापतये स्वाहा । देवेभ्यः स्वाहा । ऋषिभ्यः स्वाहा । श्रद्धायै स्वाहा । मेधायै स्वाहा । सदसस्पतये स्वाहा । अनुमतये स्वाहा । लिङ्गोक्तास्त्यागाः । यदि ऋग्वेदमधीत्य स्नाति तदा पृथिव्यै स्वाहा, अग्नये स्वाहेत्याहुतिद्वयं हुत्वा **ब्रह्मणे छन्दोभ्य** इत्यारभ्या**नुमत्य**न्ता नवाहुतीर्जुहोति । एवं सामवेदे **दिवे सूर्या**येत्याहुतिद्वयं हुत्वा **ब्रह्मणे** इत्याद्या नवाहुतीर्जुहोति । एवमथर्ववेदेऽपि "दिग्भ्यश्चन्द्रमसे" इत्याहुतिद्वयं हुत्वा "ब्रह्मणे छन्दोभ्यः" इत्याद्या जुहोति । यदि वेदचतुष्टयमधीत्य स्नानं करोति तदा आज्यभागानन्तरं प्रतिवेदं वेदाहुतिद्वयं हुत्वा "ब्रह्मणे छन्दोभ्यः" इत्याज्याहुतीः पुनः पुनर्जुहोति । ततः **प्रजापतय** इत्यारभ्या**नुमत्य**न्ताः सप्ताहुतीस्तन्त्रेण जुहोति । एवं वेदद्वयत्रयाध्ययनेऽपि योज्यम् । ततो भूराद्या नवाहुतयः । ततः स्विष्टकृद्धोमः । ततः प्राशनादिप्रणीताविमोकान्तम् । ततो ब्रह्मचारी उपसंग्रहणपूर्वकं गुरुं नमस्कृत्य परिसमूहनादि त्र्यायुषकरणान्तं समिदाधानं तस्मिन्नेवाग्नौ कुर्यात् । तत आचार्यः पुरुषैः परिश्रितस्योत्तरभागे स्थापितानां दक्षिणोत्तरायतानामष्टानाममलजलपूर्णानामुदकुम्भानां पूर्वभागे आस्तृतेषु प्रागग्रेषु कुशेषु उदङ्मुखः स्थित्वा **येऽप्स्वन्त**रिति मन्त्रेण प्रथमकलशादुदकं गृहीत्वा तेनोदकेन स्वकीयशिरसोऽभिषेक**स्तेन मामि**ति मन्त्रेण । एवमेव द्वितीयादिभ्य उदकुम्भेभ्यो **येऽप्स्वन्त**रित्यनेनैवैकैकस्माजलमादाय वक्ष्यमाणैर्मन्त्रैरभिषेकः । **येन श्रियमि**ति द्वितीयः । **आपो हि ष्ठे**ति तृतीयः । **यो व** इति चतुर्थः । **तस्मा** इति पञ्चमः । ततस्तूष्णीं त्रिवारमभिषेकः । तत **उदुत्तम**मिति मेखलां शिरोमार्गेण निस्सार्य भूमौ प्रक्षेपः । ततः कृष्णाजिनदण्डयोस्त्यागः । वासोऽन्यत्परिधायादित्योपस्थान**मुद्यन्भ्राजभृष्णु**रिति । ततो दधिप्राशनम् । तिलानां वा । जटालोमनखानां निकृन्तनम्, स्नानम्, औदुम्बरकाष्ठेन दन्तधावन**मन्नाद्याये**ति । ततः सुगन्धिद्रव्येणोद्वर्तनम् । स्नानम् । चन्दनाद्यनुलेपनं गृहीत्वा मुखनासिकयोरुपग्रहणं **प्राणापाना**विति । ततोऽपसव्येन दक्षिणामुखेन पाण्योरवनेजनजलस्य दक्षिणस्यां दिशि निषेकः **पितरः शुन्धध्व**मिति । ततः सव्येनोदकालम्भः । ततश्चन्दनेनात्मानमनुलिप्य **सुचक्षा अह**मिति जपः । अहतवाससः परिधानम्, **परिधास्या**—इति । अरजकधौतस्य वा । द्विराचमनम् । "धारयेद्वैणवीं यष्टिं सोदकं च कमण्डलुम् । यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले ॥" इति मनूक्तत्वादत्रोपवीतद्वयधारणमिति **हरिहरः, प्रयोगरत्नकारश्च** । तत उत्तरीयवाससो धारणं, **यशसा मे**ति एकं चेत्पूर्वस्यैवोत्तरभागेनोत्तरीयधारणम् । **या आहरज्जमदग्नि**रिति सुमनःप्रतिग्रहः । ततः शिरसि पुष्पबन्धनं **यद्यशोऽप्सरसे**ति । उष्णीषेण शिरोवेष्टनं **युवा सुवासा** इति । **अलङ्करणमसी**ति कुण्डलधारणम् । मन्त्रावृत्त्या दक्षिणकर्णे वामकर्णे च । **वृत्रस्ये**त्याक्षिणी अङ्क्ते । प्रथमं वामम् । ततो दक्षिणमनेनैव मन्त्रेण । **रोचिष्णुरसी**त्यनेनात्मन आदर्शे प्रेक्षणम् । **बृहस्पते**रिति छत्रप्रतिग्रहणम् । **प्रतिष्ठे स्थ** इत्युपानहौ प्रतिमुञ्चते पादयोर्युगपत् । ततो **विश्वाभ्य** इति दण्डादानम् । अभिषेकादि दण्डादानान्तं स्नानकर्ता करोति नाचार्यः । समावर्तनोत्तरं पूर्वमृतानां त्रिरात्रमाशौचं कार्यम् । "आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् ।

समाप्ते तूदकं दत्त्वा त्रिरात्रमशुचिर्भवेत् ॥” इत्युक्तेः । “आदिष्टी ब्रह्मचारी” इति **विज्ञानेश्वरः** । ब्रह्मचर्ये यदि कश्चिन्न मृतस्तदा त्रिरात्रमध्ये विवाहः कार्योऽन्यथा नेति सिध्यति । जनने तु सत्यपि न त्रिरात्रम् । तत्रातिक्रान्ताशौचाभावात्, “उदकं दत्त्वा” इति वचनाच्चेति दिक् । ततो मधुपर्कः । इति **समावर्तने पदार्थक्रमः** । अत्र गर्गमते होमो नास्ति, अन्यत्तुल्यम् ॥ * ॥ ६ ॥ * ॥

विश्व०-इदानीं क्रमप्राप्तं **समावर्तन**माह-**‘वेदꣳ...यात्**-पक्षान्तरमाह-**ब्रह्म...शकम्**-ब्रह्मचर्यपदमाग्नेयादिव्रतपरं वेदं व्रतानि वेत्युक्तेः । कीदृशं तदत आह-**अष्टाचत्वारिꣳशकमिति**-अष्टाचत्वारिꣳशद्वर्षावच्छिन्नमित्यर्थः। अत्रापि स्नायादित्यनुषङ्गः । वेदव्रतयोः संकुचिताध्ययनाचरणपक्षमतमाह-**द्वा...के**-द्वादशवर्षावच्छिन्नं वेदाध्ययनं व्रतानुष्ठानं चेत्यर्थः । एतन्मते “एकमेव वेदमधीत्य स्नायात्” इत्यवधेयम् । कथं स्नायादत आह-**‘गुरुणाऽनुज्ञातः**—आज्ञाप्रार्थनं च गुरवे वरदानानन्तरं “वरं दत्त्वा स्नायीत” इत्युक्तेः । एतच्च स्नानाधिकारिविशेषणं सति गुरौ । वेदं समाप्येति प्रागुक्तम्, स च वेदपदवाच्यः क इत्यत आह-**विधि...वेदः**-यजेतेत्यादिविधायको विधिः, विधेयाः विधिविनियोज्याः मन्त्राः, तर्को न्यायमीमांसे,अर्थवाद इति केचित्, चकारान्नामधेयांशसंग्रहः । लक्ष्यमाह-**वेद इति** । यद्वा गुर्वनुज्ञाकारमाह-**विधिर्विधेयस्तर्कश्च वेद इति**—विधीयत इति विधिर्यागेन यजेतेत्यादिविधायकवाक्यार्थ इति यावत्स विधेयः कृतिसाध्यक्रियाविषयत्वं लम्भनीय इत्यर्थः । तर्कश्चेत्यत्र विधेय इत्यर्थानुकर्षणार्थश्चकारः । तर्कस्य च प्रमाणसाचिव्येनैव विधायकत्वाद्विध्यर्थविरोधे तर्कसहकृतविध्यर्थस्य विधेयत्वमित्यर्थः । यथा समित्समिध्यमानवह्निप्रैषे शब्दार्थाध्याहारसंदेहे वरणप्रागभावावच्छिन्नसमये यदि पदार्थगोचरपदसङ्केतः स्यात्तदा पदाध्याहारः स्यात्स च नास्तीत्यतो न पदाध्याहार इति तर्कस्याहार्यादर्थाध्याहार इत्यर्थः । नन्वेवं बार्हस्पत्यसूत्रे क्षणभङ्गाद्यर्थसमर्पकतत्साहाय्यादप्यर्थनिर्णयः स्यादत आह—**वेद** इति । वेदपदसमभिव्याहाराद्वेदसंबन्धी तर्को लभ्यते, तथा च विध्यर्थविरोधे वैदिकतर्कसहकृतवेदादर्थनिर्णय इत्यर्थः। मन्त्रब्राह्मणात्मकं वेदं पाठतोऽर्थतश्च समाप्य स्नायादित्युक्तम् । इदानीं शिक्षादिषडङ्गोपेतं वेदमधीत्य वेदार्थं च ज्ञात्वा स्नायादिति मतमुपन्यस्यति-**षडङ्गमेके**—ननु श्रुतिस्मृत्यर्थानुष्ठानकामिकार्यं स्नानं कल्पसूत्राध्ययनात्सिध्यतीति क्रत्वनुष्ठानकामी कल्पमात्रमधीत्य स्नास्यतीत्याशङ्क्य निषेधति-**न कल्पमात्रे । कामं तु याज्ञिकस्य**-तु पुनः याज्ञिकस्य कामं तदापि कल्पमात्रे अधीते न स्नानाधिकार इत्यर्थः । कथं स्नायादित्यत आह-**उप...गुरुं**-वैश्वदेवपूर्वमाभ्युदयिकं श्राद्धं समाप्याऽभिलषितं वरं गुरवे दत्त्वोपसंगृह्य । उपसंग्रहणं तु दक्षिणोत्तरकराभ्यां गुरोर्दक्षिणोत्तरौ चरणौ स्पृष्ट्वा शिरसा चरणयोः स्पर्शनम्। कर्माकाङ्क्षायामुक्त **गुरुमिति** । ततः स्नास्यामीति गुरोरनुज्ञाप्रार्थनम्। गुरुणाऽनुज्ञात इत्युक्तेः स्नाहीति गुरोरनुज्ञादानम्।**समि...धाय**-ततः पाणिनाऽग्निं परिसमूहतीत्यारभ्य मेधामाश्विनौ देवावाधत्तां पुष्करस्रजावित्यन्तं समग्रकण्डिकोक्तम् अग्निपरिचरणम् । एतच्च समावर्तनमुपक्रम्य विधीयमानत्वात्समावर्तनाङ्गं तेन ब्रह्मचर्यकालिकाग्निपरिचर्यातः पृथक् सामिधामाधानस्य प्राधान्यं द्योतयितुं **समिधोऽभ्याधाये**त्युक्तम् । अनेन च वेदाध्ययनव्रतानुष्ठानोपेता ब्रह्मचर्यपरिसमाप्तिः ।“याꣳस्नास्यन्त्सोदयनीथा”इति श्रुतेः **परि...सायेति**—अग्नेः कटवस्त्रादिना वेष्टनेनाऽप्सु दीक्षावत्परिश्रितकरणम् । तस्योत्तरतः प्रागास्तृतेषु कुशेषु स्थित्वा धात्वर्थस्य गतिनिवृत्त्यर्थस्य गतिनिवृत्त्यर्थतया तिष्ठतः स्थितिर्लभ्यते । ऐन्द्र्याग्नेय्यादिषु ईशानीपर्यन्तं प्रादक्षिण्येन स्थापितानामष्टानामुदकुम्भानां मध्ये स्वापेक्षया पुरस्तात्प्राच्यां वर्तमानादेकस्मादुदकुम्भा**द्येऽप्स्वन्तरग्नयः प्रविष्टा** इत्यारभ्य **यो रोचनस्तमिह गृह्णामी**त्यन्तेन मन्त्रेण । प्राक्पदशक्यस्य ससंबन्धिकतया दिगन्तरस्थपदार्थनिरूप्यतया प्रागादीशानान्तासु दिक्षु प्रादक्षिण्येन कलशस्थापनं लभ्यते । न चैवं सत्येकपदव्येत्यस्य व्यर्थतेति वाच्यम्, तस्य स्वरूपोपस्थापनतात्पर्यकत्वात् । अन्यथैकनिरूप्यानामनेकेषां प्रागादिव्यवहारानापादकतापत्तेरिति प्रतीमः । **येन....यश इति**-पुन**र्येऽप्स्वन्तरग्न** इत्याग्नेय्यां स्थिताद् द्वितीयादुदकुम्भादुदकं गृहीत्वा **येन श्रियमकृणुतां यश** इत्यन्तेन मन्त्रेण पूर्ववदात्मानं बटुरभिषिञ्चते । **आपोहिष्ठेति प्रत्यृचं त्रिभिः**—ततः याम्यनैर्ऋत्यवारुणीदिक्स्थैस्त्रिभिः कलशैः कलशस्थजलैः **आपोहिष्ठा योवस्तस्मा अरङ्गमिति** त्रिभिर्ऋग्भि**र्येऽप्स्वन्तरग्नय** इति जलमादायात्मानमभिषिञ्चते । **तूष्णीमितरैः**-इतरैर्वायव्यां कौबेर्यामीशान्यां च स्थितैस्तत्रस्थजलैस्तूष्णीमाभिषेकः । जलादानमभिषेकश्च तूष्णीमितरकलशस्थजलाद्भवतीत्यर्थः । **उदु...ष्ठते**—उन्मुच्य ऊर्ध्वं कण्ठदेशमानीय शिरोमार्गेण **उदुत्तममिति** मन्त्रेण मेखलां निःसार्य निधाय भूमौ स्थापयित्वा । अस्मिन्नवसरे दण्डाजिनयोर्निधानं तूष्णीम् । ततः आदित्यमुपातिष्ठते । अन्यवाससा कटिं संवेष्ट्य । उपस्थानमन्त्रानाह-**उद्य...मयेति**.। **दधि...वेत**--ततः सूर्योपस्थानानन्तरं दधितिलयोरेकं प्राश्याचम्य जटालोमनखानि च वापयित्वा स्मृतिशुद्धो भूत्वाऽऽचम्य “आयुर्बलं यशो वर्चः प्रजां पशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पते ॥” इति औदुम्बरं दन्तधावनमादाय **अन्नाद्याये**ति मन्त्रेण दन्तान् शोधयेत् । दन्तधावनमन्त्रमाह-**अन्ना...येति** । [illegible] सुगन्धिना द्रव्येण शरीरमु-

CC-0. In Public Domain Kirtikant Shastri Najafgarh Delhi Collection

द्वर्त्यं पुनः भूयः स्नात्वा वारद्वयमाचम्य चन्दनादि पाषाणघृष्टमनुलेपनं नासिकयोर्मुखस्य च समीपे उपग्रहणं "प्राणापानौ मे तर्पय श्रोत्रं मे तर्पय" इत्यन्तेन । केचित्तु उपग्रहणं लेपनमाहुः । **पित...समिति**–पाण्योः करयोरवनेजनमुदकं प्राचीनावीती दक्षिणामुखो भूत्वा दक्षिणस्यां दिशि निषिच्य तदेव निषिक्तं भूजलं स्वगात्रेऽनुलिप्य जपेत्किमत उक्तं **सुचक्षा अहमक्षीभ्यामि**त्यारभ्य **सुश्रुत्कर्णाभ्यां भूयास**मित्यन्तमन्त्रं यज्ञोपवीती भूत्वा । **आह...यिष्यइति**—अहतं नवं सदशम् । अथवा धौतं मौत्रो रजकः तयद्व्यतिरिक्तेन । आच्छादयीत **परिधास्या** इत्यारभ्य **संव्यायिष्य** इत्यन्तेन मन्त्रेण । आचमनद्वयम् । '**अथोता...मिति**' अन्तरीयपरिधानानन्तरं **यशसा** मेति **प्रतिपद्यता**मित्यन्तेन मन्त्रेणाच्छादयीतेति प्राक्सूत्रादनुवर्तनीयम् । तत आचमनम् । **एकं...यीत**–उत्तरीयाभावेऽयं विधिः । आचमनम् । **सुम...चेति**–सुमनसः पुष्पाणि प्रतिग्रहविधानादन्यस्य दातृता लभ्यते । **या आहरज्जमदग्निरिति भगेन** चेत्यन्तेन मन्त्रेण । **अथा...यीति**–अथ सुमनसां ग्रहणानन्तरं तानि स्वशिरसि बध्नाति **यद्यशोऽप्सरसा**मिति मन्त्रेण । **उष्णी...युवा सुवासा इति**—पूर्वोक्तमन्त्रेणोष्णीषेण शिरोवेष्टनेन वस्त्रेण शिरः मूर्द्धानं वेष्टयते । **अलं...ष्टकौ**—कर्णौ श्रोत्रे वेष्टयन्ते याभ्यां तौ सौवर्णौ **अलंकरणमसी**ति मन्त्रेण प्रतिमुञ्चते कर्णयोः मन्त्रावृत्तिः । **वृत्र...क्षिणी**—**वृत्रस्यासी**ति मन्त्रेण नेत्रे सौवीराञ्जनेन लौकिकेन वा कज्जलेन अङ्क्ते मन्त्रावृत्त्या अञ्जयति दक्षिणोत्तरे । **रोचि...क्षते**–आत्मानं मुखप्रभृतिशरीरं दर्पणे **रोचिष्णुरसी**ति पश्यति। **छत्रं...हीति**–छत्रप्रतिग्रहणं **बृहस्पते** इति । **प्रति...चते**-युगपत्परिधातुं शक्यत्वान्नावर्तते मन्त्रः । **विश्वा...दत्ते**–अस्मिन्नवसरे गृहीतदण्डे शम्बलं बद्ध्वा व्रजेत् विवाहाद्यङ्गीकार्यगृहे समानीयते समाचारात् । **दन्त...मपि**–मन्त्रवद्भवन्तीति सूत्रशेषः । **वास...मन्त्रः**–सकृत्परिगृहीतेषु मन्त्राभावः । इति षष्ठी कण्डिका ॥ ६ ॥

स्नातकस्य नियमानि

✓**स्नातस्य यमान्वक्ष्यामः ॥ १ ॥ कामादितरः ॥ २ ॥ नृत्यगीतवादित्राणि न कुर्यान्न च गच्छेत् ॥ ३ ॥ कामं तु गीतं गायति वैव गीते वा रमत इति श्रुतेर्ह्यपरम् ॥ ४ ॥ क्षेमे नक्तं ग्रामान्तरं न गच्छेन्न च धावेत् ॥ ५ ॥ उदपानावेक्षणवृक्षारोहणफलप्रपतनसन्धिसर्पणविवृतस्नानाविषमलङ्घनशुक्तवदनसन्ध्यादित्यप्रेक्षणभैक्षणानि न कुर्यात् न हवै स्नात्वा भिक्षेतापहवै स्नात्वा भिक्षां जयतीति श्रुतेः ॥ ६ ॥ वर्षत्यप्रावृतो व्रजेत् अयं मे वज्रः पाप्मानमपहनदिति ॥ ७ ॥ अप्स्वात्मानं नावेक्षेत ॥ ८ ॥ अजातलोम्नीं विपुंसीं षण्ढं च नोपहसेत् ॥ ९ ॥ गर्भिणीं विजन्येति ब्रूयात् ॥१०॥ सकुलमिति नकुलम् ॥११॥ भगालमिति कपालम् ॥१२॥ मणिधनुरितीन्द्रधनुः ॥१३॥ गां धयन्तीं परस्मै नाचक्षीत ॥१४॥ उर्वरायामनन्तर्हितायां भूमावुत्सर्पंस्तिष्ठन्न मूत्रपुरीषे कुर्यात् ॥ १५ ॥ स्वयं प्रशीर्णेन काष्ठेन गुदं प्रमृजीत ॥ १६ ॥ विकृतं वासो नाच्छादयीत ॥ १७ ॥ दृढव्रतो वधत्रः स्यात् सर्वत आत्मानं गोपायेत् सर्वेषां मित्रमिव (शुक्रियमध्येष्यमाणः) ॥ १८ ॥ ॥ ७ ॥ ॥ * ॥**

कर्कः–**स्नातस्य यमान्वक्ष्यामः**–प्रतिज्ञासूत्रम् । **कामादितरः**–इतरः शूद्रोऽभिधीयते स हि स्नातको न भवति । एवं च सति इच्छया शूद्रस्यापि यमेषु अधिकारो भवति । **नृत्यगीतवादित्राणि न कुर्यान्न च गच्छेत्** । नृत्यादीनि क्रियमाणानि प्रति । **कामं तु गीतम्**–कुर्यात् गच्छेच्च । कर्मण्यौपयिकत्वाद्गीतस्य दृश्यते हि क्वचित्कर्मविशेषे गानम् । "ब्राह्मणोऽन्यो गायति राजन्योऽन्यः" इति । न चाक्रियमाणं शक्यते गातुमिति । **गायति वैव गीते वा रमत इति श्रुतेर्ह्यपरम्**–वचनमस्ति । अपरग्रहणाच्च पूर्वं न्यायप्राप्तमभिहितम् । **क्षेमे नक्तं ग्रामान्तरं न गच्छेत्**–अक्षेमे तु नक्तमपि गच्छेत् । **न च धावेत्**

क्षेम एवेति वर्तते । **उदपानावेक्षणवृक्षारोहणफलप्रपतनसन्धिसर्पणविवृतस्नानविषमलङ्घनशुक्तवदनसन्ध्यादित्यप्रेक्षणभैक्षणानि न कुर्यात्** । उदपानशब्देन कूपोऽभिधीयते । सन्धिशब्देन कुद्वारम् । विवृतस्नानशब्देन नग्नस्नानमुच्यते । विषमलङ्घनं प्रसिद्धमेव । शुक्तवदनमश्लीलवदनम् । सन्ध्यादित्यप्रेक्षणं प्रसिद्धमवे । एतानि न कुर्यात् । भैक्षणप्रतिषेधस्य वाक्यमुदाह्रियते—**न ह वै स्नात्वा भिक्षेतापह वै स्नात्वा भिक्षां जयतीति श्रुतेः**-अत्र यो दृष्टार्थविषयः प्रतिषेधस्तत्र दृष्टार्थत्वादेवाकरणे प्राप्ते प्रतिषेधविधानसामर्थ्याददृष्टार्थत्वमनुमीयते। **वर्षत्यप्रावृतो व्रजेदयं मे वज्रः पाप्मानमपहनदित्यनेन मन्त्रेण । अप्स्वात्मानं नावेक्षेत अजातलोम्नीं विपुंसीं षण्ढं च नोपहसेत्**—अजातानि लोमानि यस्याः सेयमजातलोम्नी ताम् । विपुंसी या पुमांसं विकरोति कूर्चादिना। षण्ढः प्रसिद्ध एव । एतानि नोपहसेत् । उपहासशब्देनाभिगम उच्यते । न गच्छेदेतानि प्रति । **गर्भिणीं विजन्येति ब्रूयात्**—न गर्भिणीमिति। **सकुलमिति नकुलम्। भगालमिति कपालम्। मणिधनुरितीन्द्रधनुः । गां धयन्तीं परस्मै नाचक्षीत**—धयन्तीमित्युक्ते धीयमानां नाचक्षीत। तस्या हि प्रतिषेधः स्मृत्यन्तरेऽपि । **उर्वरायामनन्तर्हितायां भूमावुत्सर्पंस्तिष्ठन्न मूत्रपुरीषे कुर्यात्**—उर्वरा सस्यवती भूमिः तस्यां मूत्रपुरीषे न कुर्यात्। अनन्तर्हितायां च तृणादिना मूत्रपुरीषे न कुर्यात्। उत्सर्पंस्तिष्ठँश्च न कुर्यादिति वर्तते । **स्वयं प्रशीर्णेन काष्ठेन गुदं प्रमृजीत । विकृतं वासो नाच्छादयीत**—विकृतं नील्यादिना। न कषायप्रतिषेधः । कषायरक्तं प्रशस्यत एवेति । **दृढव्रतो वधत्रः स्यात्**—यद्व्रतमङ्गीकृतं मयैतत्कर्तव्यमिति तत्र दृढव्रतः स्यान्न चञ्चलः । **सर्वेषां मित्रमिव**—संव्यवहरेत् मैत्रो हि ब्राह्मण उच्यते ॥ ७ ॥ * ॥

जय०-स्नातस्य यमान्वक्ष्यामः—इत्यधिकारसूत्रम् । तेषु स्नातकोऽधिक्रियते । कामादिच्छातः । इतरः स्नानसम्बन्धशून्यः शूद्रोऽपि । तानाह—**नृत्येति** । काममिच्छया ब्राह्मणो गीतं कुर्याद्गच्छेच्च कर्मण्युपयोगाद्गीतस्य । तद्यथा—"ब्राह्मणोऽन्यो गायति राजन्योऽन्यः" इति । "गायति वैव गीते वा रमते" इति ह्यपरं वचनमस्ति । अपरग्रहणात् पूर्वं न्यायप्राप्तमिति गम्यते । क्षेमे सति नक्तं रात्रौ । अक्षेमे पुनर्नक्तमपि गच्छेत् । **न च धावेत्**—क्षेम इति वर्तते।अक्षेमे तु धावेदपि । उदपानशब्देन कूपोऽभिधीयते । वृक्षारोहणं प्रसिद्धम् । फलानां प्रपतनं त्रोटनम् ।सन्धिः कुद्वारं तत्र सर्पणं गमनम् । विवृतस्नानं नग्नस्नानम् । विषमलङ्घनम्, प्रसिद्धमेव । शुक्तवदनमश्लीलभाषणम् । सन्ध्यादित्यप्रेक्षणं प्रसिद्धमेव । भिक्षणं सिद्धान्नस्यैव । तस्य च विप्रत्वेनावश्यकत्वात् । तत्प्रतिषेधे श्रुतिमाह—**न ह वै स्नात्वेति**—यतः स्नात्वा भिक्षां जयति अपाकरोति । **अपहैव**-इति निपातसमुदायो निश्चयार्थः । अत्र यो दृष्टार्थविषयः प्रतिषेधस्तस्य दृष्टार्थत्वादेवाकरणे प्राप्ते प्रतिषेधसामर्थ्याददृष्टार्थताऽप्यनुमीयते । अप्रावृतश्छत्रादिना वर्षति **व्रजेदयं मे वज्र** इति मन्त्रं जपेत् । अस्यार्थः । तत्र प्रजापतिर्जगती वज्रो वृष्टिजपे० । अयं रविरश्मिसंस्कृतो जलकणरूपो वज्रो मे मम पाप्मानम् अपहनत् अपहन्तु । अयं चातपवृष्टिविषय इत्येके । आत्मानं स्वम् । अजातलोम्नीं समयेऽप्यनुत्पन्नलोम्नीम् । विपुंसीं कूर्चादिना पुरुषाकृतिं स्त्रियम् । षण्ढं च प्रसिद्धमेव । एतानि नोपहसेन्नाभिगच्छेत् । उपहासशब्देनाभिगमनमुच्यते । गर्भिणीं गुर्विणीं विजन्येति ब्रूयान्न गार्भिणीमिति । एवमुत्तरत्रापि । गां धयन्तीं स्वयमेव वत्सेन वा धीयमानाम् ।जलादि पिबन्तीं वा ।उर्वरा सस्यवती भूमिस्तस्याम्,तथाऽनन्तारितायां तृणादिना । तथोत्सर्पन् तिष्ठंश्च मूत्रपुरीषे न कुर्यादिति सर्वत्र सम्बध्यते । मूत्रपुरीषसन्निधानाद् गुदस्यैव

मार्जनम् । विकृतं च नील्यादिना । न तु कषायादिना । तत्तु प्रशस्यते । दृढं व्रतं संकल्पो यस्य स दृढव्रतः । यथा वधात् घातादात्मानं परं वा त्रायते स वधत्रः स्यात् तथा सर्वेषां मित्रमिव विश्वासास्पदं च स्यात् । मैत्रो हि ब्राह्मण उच्यते । एते च निषेधा विवाहावधिकाः । अन्येषां पृथग्वक्ष्यमाणत्वात् ॥ ७ ॥ * ॥

हरि०—**स्नातस्य यमान्वक्ष्यामः**—स्नातस्य ब्रह्मचर्यात् समावृत्तस्य द्विजातेः यमान् व्रतानि वक्ष्यामः कथयिष्यामहे । **कामादितरः**—कामात् इच्छया इतरः द्विजातेरन्यः शूद्र इति यावत्, यमेषु अस्नातकोऽपि अधिक्रियते । **नृत्यगीतवादित्राणि न च कुर्यान्न गच्छेत्**-नृत्यं लास्यादिभेदाभिन्नम्। गीतं षड्जादिस्वरैर्ध्रुवादिरूपकविशेषैर्निबद्धम् । वादित्रं तन्त्र्यादिभेदेन चतुर्विधम् । नृत्यं च गीतं च वादित्रं च नृत्यगीतवादित्राणि तानि स्वयं न कुर्यात् न च गच्छेत् । नृत्यादीनि अन्यैरपि क्रियमाणानि न गच्छेत् द्रष्टुं श्रोतुम्, चकारः करोतेर्गच्छतिक्रियासमुच्चयार्थः । **कामं तु गीतं गायती वैव गीते वा रमत इति श्रुतेर्हि**—अत्र गीते प्रतिप्रसवमाह—तु पुनः कामम् इच्छया, गीतं गानं स्वयं कुर्यात्, परैः क्रियमाणं च गच्छेच्छ्रोतुम् । कुतः हि यस्मात् गायति स्वयं गानं करोति, गीते वा अन्यैः क्रियमाणे गाने वा रमते रतिं प्राप्नोति इति श्रुतिर्वेदवचनम् । कः यः सर्वः कृत्स्नो मन्यते आत्मानं सुखिनं सम्पूर्णं मन्यते, स स्वयं गायति गीतं च शृणोति । अपरम्—अपरमपि गायेत गीतं च शृणुयात् । इत्येतदर्थज्ञापकं वेदे लिङ्गमस्ति । यथाऽश्वमेधे श्रूयते—**दिवा ब्राह्मणो गायाति नक्तꣳ राजन्यः** इति । अनेन ब्राह्मणराजन्ययोः स्वयं गानेऽधिकारोऽस्तीति ज्ञायते । तथा तौ च अश्वमेधयाजिनं यजमानं राजन्यं श्रावयितुं गायतः । तेन श्रवणेऽप्यधिकारो गम्यते । **क्षेमे नक्तं ग्रामान्तरं न गच्छेत्**-क्षेमे सति आपदभावे सति नक्तं रात्रौ ग्रामान्तरम् अन्यं ग्रामं न गच्छेत्, अक्षेमे तु गच्छेत् । **न च धावेत्**-क्षेमे सतीत्यनुषज्यते । न च धावेत् शीघ्रं न गच्छेत् । **उदपानावेक्षणवृक्षारोहणफलप्रपतनसन्धिसर्पणविवृतस्नानविषमलङ्घनशुक्तवदनसन्ध्यादित्यप्रेक्षणभिक्षणानि न कुर्यात्**—उदपानस्य कूपस्यावेक्षणम् उपरि स्थित्वा अधोमुखीभूयावलोकनम् । वृक्षस्य आरोहणम् उपरि गमनम् । फलानाम् आम्रादीनां प्रपतनं त्रोटनम् । सन्धौ सन्ध्यासमये सर्पणम् अध्वगमनम्, सन्धिना अपमार्गेण वा सर्पणम् । विवृतेन नग्नेन स्नानम् । विषमस्य पर्वतगर्तादलङ्घनमतिक्रमणम् । शुक्तस्य अश्लीलस्य वदनं भाषणम् । अश्लीलं तु त्रिविधं लज्जाकरम्, दुःखकरम्, अमङ्गलसूचकं च । सन्ध्यासु आदित्यस्य सूर्यमण्डलस्य रागतः प्रेक्षणं दर्शनम्, उपरक्तस्य वारिप्रातिबिम्बितस्य च । "नोपरक्तं न वारिस्थम्" इति **मनुस्मृतेः** । "नेक्षेतादित्यमुद्यन्तं नास्तं यान्तं कदाचन । नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम्" इति **स्मृतेः** । भिक्षणं भिक्षाचर्या । एतानि उदपानावेक्षणादीनि भिक्षणान्तानि वर्जयेत् । **न हवै स्नात्वा भिक्षेताप हवै स्नात्वा भिक्षां जयतीति श्रुतेः**--भिक्षणप्रतिषेधे श्रुतिं प्रमाणत्वेनावतारयति—स्नात्वा समावर्त्य न भिक्षेत, यतः स्नात्वा भिक्षाम् अपजयति अपाकरोति । हवै इति निपातसमुदायो निश्चयार्थः । इति वेदवचनात् । **वर्षत्यप्रावृतो व्रजेदयं मे वज्रः पाप्मानमपहनादिति**—देवे वर्षति अप्रावृतः अनाच्छादितो व्रजेत गच्छेत् "अयं मे वज्रः" इत्यनेन मन्त्रेण । **अप्स्वात्मानं नावेक्षेत**—अप्सु जले आत्मानं स्वमुखं नावेक्षेत न पश्येत् । **अजातलोम्नीं विपुꣳसीꣳषण्ढं च नोपहसेत्**-समयेऽपि न जातानि लोमानि यस्याः सा अजातलोम्नी, ताम् अजातलोम्नीं नोपहसेत्, न च गच्छेत्, विपुंसीं च पुरुषाकारां स्त्रियं कूर्चादिविकारेण नोपहसेदित्यनुवर्तते । षण्ढं नपुंसकं नोपहसेदित्यनुवर्तते । **गर्भिणीं विजन्येति ब्रूयात्**—गर्भिणीम् अन्तर्वत्नीं विजन्या इति नाम ब्रूयात् वदेत् । **सकुलमिति नकुलं भगालमिति कपालं मणिधनुरितीन्द्रधनुर्गां धयन्तीं परस्मै नाचक्षीत**—सकुलमिति नकुलं

ब्रूयात् । कपालं कर्परं भगालमिति ब्रूयात् । इन्द्रधनुः मणिधनुरिति ब्रूयात् । **परस्य गां सुरभिं धयन्तीं** वत्सं पाययन्तीं परस्मै अन्यस्मै स्वामिने नाचक्षीत न कथयेत् । **उर्वरायामनन्तर्हितायां भूमावुत्सर्पंस्तिष्ठन्न मूत्रपुरीष कुर्यात्**–उर्वरायां सस्यवत्यां भूमौ पृथिव्यां केवलायां तृणैरनन्तर्हितायां मूत्रपुरीषे मूत्रस्य पुरीषस्य वा उत्सर्गं न कुर्यात् । किञ्च तिष्ठन् ऊर्ध्वः न कुर्यात् । तथा उत्सर्पन् उत्प्लवमानः सन् न कुर्यात् । **स्वयं प्रशीर्णेन काष्ठेन गुदं प्रमृजीत**-स्वयमात्मनः प्रयत्नं विना प्रशीर्णेन स्वयं छिन्नेन पतितेन काष्ठेन दारुशकलेन अयज्ञियेन प्रमृजीत प्रोञ्छेत् । पुरीषोत्सर्गसन्निधानात् गुदमित्यध्याहारः । **विकृतं वासो नाच्छादयीत**–विकृतं मञ्जिष्ठादिरागेण विकारमापादितं वासो वस्त्रं न परिदधीत । " नील्यादिना रक्तं विकृतं निषिध्यते, कषायरक्तं तु न निषिध्यते, किन्तु प्रशस्यते" इति भाष्यकारः । **दृढव्रतो वधत्रः स्यात् सर्वत आत्मानं गोपायेत् सर्वेषां मित्रमिव**–दृढं स्थिरं व्रतं प्रारब्धं कर्म यस्य स दृढव्रतः स्यात् भवेत् । किञ्च वधात् घातात् त्रायते रक्षतीति वधत्रः स्यात् । किञ्च सर्वेषां स्वेषां परेषां च मित्रमिव सखेव सुहृदिव हितकारी स्यादित्यर्थः । " मैत्रो ब्राह्मण उच्यते " इति स्मरणात् । अत्र यो दृष्टार्थविषयः प्रतिषेधः तत्र दृष्टार्थादेव निवृत्तिप्राप्तौ प्रतिषेधसामर्थ्याददृष्टमप्यनुमीयते । अत एव प्रायश्चित्तस्मरणम् । "स्नातकव्रतलोपे तु एकरात्रमभोजनम्" इति स्मरणात् ॥ ७ ॥ * ॥

गदा०--**स्नातस्य यमान्वक्ष्यामः**–स्नातस्य ब्रह्मचर्यात्समावृत्तस्य त्रैवर्णिकस्य यमान् नियमान् वक्ष्यामः । अधिकारसूत्रमेतत् । तेषु स्नातकोऽधिक्रियते । **कामादितरः**–कामादिच्छातः इतरः स्नानसम्बन्धशून्यः शूद्रोऽभिधीयते । स हि स्नातको न भवति । एवं सतीच्छया शूद्रस्यापि यमेष्वधिकारो भवति । तानाह--**नृत्यगीतवादित्राणि न कुर्यान्न च गच्छेत्**--नृत्यं च गीतं च वादित्रं च नृत्यगीतवादित्राणि तानि स्वयं न कुर्यात्, न च गच्छेत् नृत्यादीनि अन्यैः क्रियमाणानि द्रष्टुं श्रोतुं वा न व्रजेत् । **कामं तु गीतम्**–तु पुनः काममिच्छया गीतं गानं स्वयं कुर्यात् । अन्यैः क्रियमाणं श्रोतुं गच्छेच्च । कर्मण्यौपयिकत्वाद्गीतस्य । दृश्यते हि अश्वमेधे गानम्-" ब्राह्मणोऽन्यो गायति राजन्योऽन्यः " इति । न चाक्रियमाणं शक्यते गातुमिति । **गायति वैव गीते वा रमत इतिं ह्यपरम्**–अपरम् उषासम्भरणकाण्डे वचनमस्ति—" तस्माद्धैतद्यः सर्वः कृत्स्नो मन्यते गायति वैव गीते वा रमते " इति । अपरग्रहणाच्च पूर्वं न्यायप्राप्तमभिहितम् । एवं च यत्रापि पुनर्वचनेन देवताग्रे नृत्यगीतादिकं विहितं तत्रापि ब्राह्मणादिभिः कार्यमेव । विहिते निषेधाप्रवृत्तेः । **क्षेमे नक्तं ग्रामान्तरं न गच्छेत्**–क्षेमे आपदभावे सति नक्तं रात्रौ ग्रामान्तरमन्यं ग्रामं न गच्छेत् । अक्षेमे तु नक्तमपि गच्छेत् । **न च धावेत्**--क्षेम इत्यनुवर्तते । क्षेमे सति न च धावेत् शीघ्रं न गच्छेत् । **उदपानावेक्षणवृक्षारोहणफलप्रपतनसन्धिसर्पणविवृतस्नानाविषमलङ्घनशुक्तवदनसन्ध्यादित्यप्रेक्षणभिक्षणानि न कुर्यात्**-उदपानस्य कूपस्यावेक्षणम् उपरि स्थित्वा अधोमुखीभूयावलोकनम् । आम्रादिवृक्षस्यारोहणम् उपरि गमनम् । फलानामाम्रादीनां प्रपतनं त्रोटनम् । सन्धौ सन्ध्यासमये सर्पणमध्वगमनम् । सन्धिः कुद्वारं वा तत्र सर्पणं सर्पगर्तादिलक्षणम् । विवृतेन नग्नेन स्नानम् । विषमस्य पर्वतगर्तादेर्लङ्घनमतिक्रमणम् । शुक्तवदनमश्लीलभाषणम् । सन्ध्यादित्यप्रेक्षणं सन्ध्यासु सूर्यावेक्षणम् । " नेक्षेतादित्यमुद्यन्तं नास्तं यान्तं कदाचन । नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् " इति स्मृतेः । भिक्षणं सिद्धान्नस्यैव । उदपानावेक्षणादीनि वर्जयेत् । तत्र भैक्षणप्रतिषेधे प्रत्यक्षमेव वचनमस्तीत्याह–**न हवै स्नात्वा भिक्षेताप हवै स्नात्वा भिक्षां जयतीति श्रुतेः**–स्नात्वा समावर्त्य न भिक्षेत । यतः स्नात्वा भिक्षाम् अपजयति अपाकरोति । हवै इति निपातसमुदायो निश्चयार्थः । अत्र यो दृष्टार्थविषयः प्रतिषेधस्तत्र दृष्टार्थत्वादेवाकरणे प्राप्ते प्रतिषेधविधानसामर्थ्याददृष्टार्थताऽप्यनुमीयते । **वर्षत्यप्रावृतो व्रजेदयं मे वज्रः पाप्मानमपहनादिति**-पर्जन्ये वर्षति अप्रावृत अनाच्छादित एव व्रजेत् गच्छेत् " अयं मे वज्रः" इति मन्त्रेण । मन्त्रार्थः । जलकणरूपो वज्रो मम पाप्मानम् अपहनत् अपहन्तु । **अप्स्वात्मानं नावेक्षेत**–अप्सु जले आत्मानं स्वशरीरं न पश्येत् । **अजातलोम्नीं विपुंस्सीं षण्ढं च नोपहसेत्**–समयेऽप्यनुत्पन्नलोम्नीम्, । अजातानि लोमानि यस्याः सेयमजातलोम्नी ताम् । विपुंसीं कूर्चादिना पुरुषाकृतिं स्त्रियम् । षण्ढः प्रसिद्ध एव । एतानि नोपहसेत् नाभिगच्छेत् । उपहासशब्देनाभिगमनमुच्यते । **गर्भिणीं विजन्येति ब्रूयात्सकुल-**

मिति नकुलं भगालमिति कपालं मणिधनुरितीन्द्रधनुर्गां धयन्तीं परस्मै नाचक्षीत**—गर्भिणीं विजन्येति ब्रूयात्
गर्भिणीं गुर्विणीं विजन्येति पर्यायशब्देन वदेत् न गर्भिणीमिति। उत्तरत्राप्येवमेव योज्यम्। सकुलमिति नकुलं सकुलमिति
नकुलं ब्रूयात्। भगालमिति कपालं भगालमिति कपालं कर्परं ब्रूयात्। मणिधनुरितीन्द्रधनुः मणिधनुरिति इन्द्रधनुर्ब्रूयात्।
गां धयन्तीं परस्मै नाचक्षीत। परस्य गां सुरभिं धयन्तीं वत्सं पाययन्तीम् अन्यस्मै परस्मै स्वामिने वा नाचक्षीत न
कथयेत्। **उर्वरायामनन्तर्हितायां भूमावुत्सर्पंस्तिष्ठन्न मूत्रपुरीषे कुर्यात्**—उर्वरायां सस्यवत्यां भूमौ तृणैरनन्त-
र्हितायां केवलायां च मूत्रस्य पुरीषस्य वा उत्सर्गं न कुर्यात्। किञ्च तिष्ठन् ऊर्ध्वः सन् न कुर्यात्। तथोत्सर्पन् उत्प्ल-
वमानः सन्न कुर्यात्। **स्वयं प्रशीर्णेन काष्ठेन गुदं प्रमृजीत**—आत्मनः प्रयत्नमन्तरेण स्वयमेव प्रशीर्णेन छिन्नेन
दारुशकलेन गुदं प्रमृजीत प्रोञ्छेत् परिमार्जयेत्। ततः शौचं कुर्यात्। **विकृतं वासो नाच्छादयीत**—विकृतं नील्या-
दिना विकारमापादितं वस्त्रं न परिदधीत। अत्र न कषायप्रतिषेधः। "कषायरक्तं तु प्रशस्यते" इति भाष्य-
काराः। **दृढव्रतो वधत्रः स्यात्**—दृढं व्रतं सङ्कल्पो यस्य स दृढव्रतः स्यात् भवेत्। तथा वधात् घातादा-
त्मानं परं च त्रायते रक्षतीति वधत्रः स्यात्। **सर्वत आत्मानं गोपायेत् सर्वेषां मित्रमिव**—सर्वेषां स्वेषां परेषां च
मित्रमिव सखेव सर्वेषु सुहृदिव हितकारी भवेत्। "मैत्रो ब्राह्मण उच्यते" इति स्मृतेः॥ इति
श्रीत्रिरग्निचित्सम्राट्स्थपति-महायाज्ञिकश्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे सप्तमी कण्डिका॥७॥

विश्व०-स्नात...क्ष्यामः-प्रतिज्ञासूत्रम्। **कामादितरः**-कामात् इच्छात इतरः शुक्रियव्रतस्थो ब्रह्मचारी।
केचित्तु इतरपदार्थं शूद्रमाहुः। **नृत्य...परम्**,-अपरं श्रौतं वचनमस्ति—"ब्राह्मणौ वीणागाथिनौ संवत्सरं गायतः, राज-
न्यो ऽन्यः" इत्यादि। **क्षेमे...गच्छेत्**-अक्षेमे तु गच्छेदिति। **न च धावेत्**-क्षेम एवेत्यनुवर्तते। **उद...र्यात्**-उदपानमु-
दकाधारः। अपरे कूपमाहुः। न चोदकाधारतायामप्स्वात्मानं नावेक्षेतेति पौनरुक्त्यापत्तिः निषेधभूयस्त्वप्रतिपत्त्यर्थ-
त्वात्। "अभ्यासे भूयांसमर्थं मन्यन्ते" इति न्यायादित्याहुः। प्रपतनं त्रोटनम्, संधिः कुद्वारं तत्र सर्पणं गमनम्।
विवृतस्नानं नग्नस्नानम्। शुक्तवदनमश्लीलभाषणम्, सिद्धान्नभिक्षणम्, अस्मिन्नर्थे श्रुतिं प्रमाणयति। **नह...श्रुतेः-वर्ष...दिति**-
अप्रावृतो वस्त्रादिना। **अप्स्वा...सेत्**—न जातानि लोमानि यस्याः तां, विपुंस्त्रीं पुरुषं विषयीकुर्वाणां पुरुषाकृतिं
श्मश्रुयुक्तां, षण्ढो नपुंसकः। उपहासोऽत्राभिगमनम्। **गर्भि...यात्**—न गर्भिणीमिति ब्रूयात्। **सकु...नकुलं**—
नकुलं ब्रूयादित्यर्थः। एवमत्राद्यमुद्देश्यमुत्तरं विधेयम् **भगा...क्षीत**—धयन्तीमात्मनो वत्सं पाययन्तीं स्वयं वा जला-
दिकं पिबन्तीम्। **उर्व...र्यात्**-उर्वरायां सस्यवत्यां तथा तृणाद्यनन्तरितायां भूमौ पृथिव्याम्। उत्सर्पन्नित्यस्यैव विव-
रणं तिष्ठन्। **स्वयं...र्येण**-काष्ठेन गुदं प्रमृजीत। गुदमित्यध्याहारः इति केचित्। स्वयं प्रशीर्णमयत्नपतितम्। **विकृ...**
यीत-नील्यादिना विकारमापादितं, माञ्जिष्ठादिनाऽपि विकृतं निषिध्यते शुद्धस्यैव परिधानादित्यन्ये॥ **दृढ...स्यात्**-
आरब्धं वैधं न त्याज्यं वधो घातः तस्मात् त्रायत इति वधत्रः स्यात् रक्षेत्। **सर्व...मिव**-स्वपरेषां हितकारी स्यादि-
त्यर्थः। उक्तनियमातिक्रमे एकरात्रमभोजनम्॥ इति सप्तमी कण्डिका॥ ७॥ *॥

तिस्रो रात्रीर्व्रतं चरेत्॥ १॥ अमांस्याश्यमृण्मयपायी[1]॥ २॥ स्त्रीशूद्र-
शवकृष्णशकुनिशुनां चादर्शनमसम्भाषा च तैः॥ ३॥ शवशूद्रसूतका-
न्नानि च नाद्यात्॥ ४॥ मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यात्सूर्याच्चात्मानं
नान्तर्दधीत॥ ५॥ तप्तेनोदकार्थान्कुर्वीत॥६॥ अवज्योत्य रात्रौ भोज-
नम्॥७॥ सत्यवदनमेव वा॥ ८॥ दीक्षितोऽप्यातपादीनि कुर्यात्प्रव-
र्ग्यवाँश्चेत्॥ ९॥ ८॥ *॥

कर्कः-**तिस्रो रात्रीर्व्रतं चरेत्**-स्नातस्यातो रात्रित्रयं व्रतचर्योच्यते। **अमांस्याश्यमृ-**
ण्मयपायी-भवतीति शेषः। **स्त्रीशूद्रशवकृष्णशकुनिशुनां चादर्शनम्**-कृष्णशकुनिः
काकः। एषामदर्शनम्। **असम्भाषा च तैः**-तैः स्त्र्यादिभिर्यस्य येन यादृक् सम्भाषणम्,
तादृक् प्रतिषिध्यते। **शवशूद्रसूतकान्नानि च नाद्यात्**-शवान्नं क्रीत्वा लब्ध्वा वा यद-
द्यते तत्प्रतिषेधः। शूद्रान्नं भोज्यान्नस्यापि नापितादेः प्रतिषिध्यते। सूतकान्नमवाक् दशा-

---

* [1] आर्षत्वादत्र णत्वम्।

हात्प्रसवे सति। **मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यात्**-मूत्रादेरातपे करणप्रतिषेधः। **सूर्याच्चात्मानं नान्तर्दधीत**-छत्रादिना । **तप्तेनोदकार्थान् कुर्वीत**-उदकेन। **अवज्योत्य रात्रौ भोजनम्**-कर्तव्यम्, प्रदीपोल्कादिनाऽन्यतरेण। **सत्यवदनमेव वा**-कर्तव्यम्। नाधस्तना नियमाः। **दीक्षितोऽप्यातपादीनि कुर्यात्प्रवर्ग्यवाँश्चेत्**-यदि प्रवर्ग्यवान्दीक्षितस्ततोऽत्र मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यादित्येवमादीनि करोति ॥ ८ ॥ ॥ * ॥

जय०-**तिस्र**-इति स्नातस्य सतस्त्रिरात्रं व्रतचर्योच्यते । अमांसाश्यादिः स्यादिति शेषः । स्त्र्यादीनां पञ्चानामदर्शनं कार्यम् । कृष्णशकुनिः काकः। तैः स्त्र्यादिभिर्यस्य येन यादृक् सम्भाषणं प्राप्तं तादृङ्निषिध्यते । शवादीनामन्नं च नाद्यात् । तत्र शवान्नं क्रीत्वा लब्ध्वा वा यदद्यते तत्प्रतिषेधः । शूद्रान्नं भोज्यान्नस्यापि शूद्रस्य नापितादेरन्नम् । सूतकान्नं दशाहादर्वाक् प्रसवे सति । आतपे मूत्रादित्रयं न कुर्यात् । अन्तर्द्धानं च छत्रादिना। तप्तेनोदकेन । **अवज्योत्य**-दीपोल्काद्यन्यतरेण । **सत्यवदनमेव वा**-कुर्यान्नाधस्तनान्नियमान् । **दीक्षितः**-सोमार्थं स्वीकृतदीक्षः, स यदि **प्रवर्ग्यवान्**-प्रवर्ग्यो महावीरस्तद्वान् । तर्हि आतपादीनि आतपाधिकरणकानि मूत्राद्यवज्योत्य भोजनान्तानि व्रतानि कुर्यात् । सत्यवदनमेव वा कुर्यात् ॥८॥

हरि०-**तिस्रो रात्रीर्व्रतं चरेत्**-एवं स्नातकस्य समावर्तनप्रभृति यावद्गार्हस्थ्यं कर्तव्यत्वेन वर्जनीयत्वेन च नृत्यगीतादीन्यभिधाय, अधुना तस्यैव समावर्तनदिनमारभ्य त्रिरात्रव्रतचर्यामाह-तिस्रः त्रिसङ्ख्या रात्रीः अहोरात्राणि व्रतं वक्ष्यमाणं चरेत् अनुतिष्ठेत् । **अमांसाश्यमृण्मयपायी**-मांसमश्नातीत्येवंशीलो मांसाशी तद्विपरीतः अमांसाशी, मृण्मयेन मृदादिनिर्मितेन पात्रेण पिबतीति मृण्मयपायी तद्विपरीतः अमृण्मयपायी स्यादिति शेषः । **स्त्रीशूद्रशवकृष्णशकुनिशुनां चादर्शनमसम्भाषा च तैः**-स्त्री नारी, शूद्रश्चतुर्थो वर्णः, शवो मृतशरीरं, कृष्णशकुनिः काकः, श्वा कुक्कुरः । एतेषामदर्शनमवलोकनाभावः । तैः स्त्रीशूद्रादिभिश्च सह असम्भाषा न सम्भाषा असम्भाषा अवचनव्यवहारः । **शवशूद्रसूतकान्नानि च नाद्यात्**-नाद्यात् न भक्षयेत्, कानि शवो मृतकः तस्मिन् जाते सति क्रीत्वा लब्ध्वा वा यत् ज्ञातिभिरद्यते । शूद्रस्य अवरवर्णस्य नापितादेर्भोज्यान्नस्यापि यदन्नं तच्छूद्रान्नम् । सूतके प्रसवाशौचे सति यत् ज्ञातीनामन्नं तत्सूतकान्नं, तानि शवशूद्रसूतकान्नानि, चकारः स्त्र्याद्यदर्शनादिसमुच्चयार्थः । **मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यात्**-मूत्रं च पुरीषं च मूत्रपुरीषे आतपे घर्मे न कुर्यात् नोत्सृजेत् । तथा ष्ठीवनं च थूत्कृत्य मुखाल्लालादिनिस्रावं न कुर्यादातपे । **सूर्याच्चात्मानं नान्तर्दधीत**-सूर्यादादित्यादात्मानं स्वं छत्रादिना अन्तर्हितं न कुर्यात् । **तप्तेनोदकार्थान् कुर्वीत**-तप्तेन जलेन उदकार्थान् उदकसाध्याः शौचाचमनादिकाः क्रियाः कुर्वीत विदध्यात् । **अवज्योत्य रात्रौ भोजनम्**-रात्रौ निशि अवज्योत्य दीपं प्रज्वाल्य भोजनम् अशनं कुर्वीत । **सत्यवदनमेव वा**-वा यद्वा सत्यवदनमेव सत्यवाक्योच्चारणमेव कुर्यात्, न अधस्तनानि अमांसाशनादीनि । **दीक्षितोऽप्यातपादीनि कुर्यात्प्रवर्ग्यवाँश्चेत्**-चेद्यदि दीक्षितः सोमयागार्थं स्वीकृतदीक्षः, प्रवर्ग्यवान् प्रवर्ग्यो महावीरः अस्यास्तीति प्रवर्ग्यवान् । तदा आतपादीनि आतपे मूत्रपुरीषोत्सर्गष्ठीवनादीनि अवज्योत्य रात्रिभोजनान्तानि कुर्यात् वा सत्यवदनमेव । अत्र **सूत्रकारेण** यावन्ति स्नातकव्रतान्युक्तानि न तावन्त्येवानुतिष्ठेत्, अपि तु मन्वादिस्मृतिप्रणीतान्यपि । इति सूत्रार्थः ॥ ८ ॥

अथ **प्रयोगः** । वेदमुक्तलक्षणं व्रतं च उभयं वा समाप्य गुर्वनुज्ञातो ब्रह्मचारी स्नायात् । तत्र आचार्यो मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा ब्रह्मचारिणा भो आचार्य अहं स्नास्ये इत्यनुज्ञादानं प्रार्थितः स्नाहीत्यनुज्ञां दत्त्वा ब्रह्मचारिणे परिश्रित्य पञ्च भूसंस्कारान् कृत्वा लौकिकाग्निं विधाय ब्रह्मोपवेशनाद्याज्यभागान्तं कर्म निर्वर्त्य वेदारम्भवत् वेदाहुतिहोमं विधाय महाव्याहृत्यादि स्विष्टकृदन्तं च कृत्वा

संस्रवं प्राश्य पूर्णपात्रवरयोरन्यतरं ब्रह्मणे दक्षिणां दद्यात् । तद्यथा—तत्राज्यभागान्तं कृत्वा यदि ऋग्वेदमधीत्य स्नानं करोति तदा पृथिव्यै स्वाहा, अग्नये स्वाहेति द्वे आज्याहुती हुत्वा “ ब्रह्मणे छन्दोभ्यः” इत्याद्या नवाज्याहुतीर्हुत्वा, यदि यजुर्वेदं तदाऽऽज्यभागानन्तरम् अन्तरिक्षाय स्वाहा, वायवे स्वाहेति द्वे आज्याहुती हुत्वा, “ ब्रह्मणे छन्दोभ्यः”इत्याद्या नवाहुतीर्हुत्वा यदि सामवेदं तदाऽऽज्यभागान्ते“दिवे स्वाहा, सूर्याय स्वाहा”इति हुत्वा,“ब्रह्मणे छन्दोभ्यः”इत्यारभ्यानुमत्यन्ता नवाहुतीर्जुहोति । यदाऽथर्ववेदं तदाऽऽज्यभागान्ते “दिग्भ्यः स्वाहा, चन्द्रमसे स्वाहा”इति आहुतिद्वयं हुत्वा,“ब्रह्मणे” इत्याद्याः जुहोति । यद्येकदा वेदचतुष्टयमधीत्य स्नानं करोति तदाऽऽज्यभागानन्तरं प्रतिवेदं वेदाहुतिद्वयं हुत्वा “ ब्रह्मणे छन्दोभ्यः ” इत्याहुतिद्वयं च हुत्वा , “प्रजापतये” इत्याद्याः प्रजापतये, देवेभ्यः, ऋषिभ्यः, श्रद्धायै, मेधायै, सदसस्पतये, अनुमतय इति सप्त मन्त्रेण जुहुयात् । एवं वेदद्वयत्रयाध्ययनेऽपि योज्यम् । अनन्तरं महाव्याहृत्यादिस्विष्टकृदन्ता दशाहुतीर्हुत्वा प्राशनं विधाय दक्षिणादानान्तं कुर्यात्। अथ ब्रह्मचारी उपसंग्रहणपूर्वकं गुरुं नमस्कृत्य परिसमूहनादि त्र्यायुषकरणान्तं तस्मिन्नग्नौ समिदाधानं कुर्यात् । तत आचार्यपुरुषैः परिश्रितस्योत्तरभागे स्थापितानां, दक्षिणोत्तरायतानामष्टानां जलपूर्णकलशानां पूर्वभागे आस्तृतेषु प्रागग्रेषु कुशेषु उदङ्मुखः स्थित्वा “ येऽप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहाऽस्खलो विरुजस्तनूदूषिरिन्द्रियहाऽतितान्सृजामि यो रोचनस्तमिह गृह्णामि”इति मन्त्रेण प्रथमकलशाद्दक्षिणचुलुकेन उदकमादाय “ तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय” इति मन्त्रेणात्मानमभिषिञ्चते । एवमेव द्वितीयादिभ्यः सप्तभ्य उदकुम्भेभ्यः “ येऽप्स्वन्तरग्नयः ” इत्यनेनैव मन्त्रेण एकैकस्माज्जलमादाय “ येन श्रियमकृणुतां येनावमृशताꣳसुरां येनाक्ष्यावभ्यषिञ्चतां यद्वां तदश्विना यशः” इति,“आपो हि ष्ठा मयोभुवः” “यो वः शिवतमो रसः”“तस्मा अरङ्गमाम वः” इत्येतैश्चतुर्भिर्मन्त्रैः प्रतिमन्त्रमात्मानमभिषिच्य त्रिस्तूष्णीमभिषिञ्चते । तत उदुत्तममिति मन्त्रेण मेखलां शिरोमार्गेण निःसार्य तां मेखलां भूमौ निधाय अन्यद्वासः परिधायाचम्य आदित्यमुपतिष्ठते “ उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मा गमयोद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवायावभिरस्थाच्छतसनिरासि शतसनिं मा कुर्वाविदन्मा गमयोद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायंयावभिरस्थात्सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मा गमय” इत्यादित्योपस्थानमन्त्रः । ततो दधि वा तिलान्वा दक्षिणहस्तमध्यगतेन सोमतीर्थेन प्राश्य जटालोमनखानि वापयित्वा स्नात्वाऽऽचम्योक्तलक्षणेनौदुम्बरकाष्ठेन “अन्नाद्याय व्यूहध्वꣳसोमो राजाऽयमागमत् । स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च” इत्यनेन मन्त्रेण दन्तान् क्षालयित्वाऽऽचम्य सुगन्धिद्रव्यमिश्रितेन यवादिचूर्णेन तैलसन्नीतेन शरीरमुद्वर्त्य पुनः सशिरस्कं स्नात्वाऽऽचम्य चन्दनाद्यनुलेपनं पाणिभ्यां गृहीत्वा मुखं नासिकां च “प्राणापानौ मे तर्पय चक्षुर्मे तर्पय श्रोत्रं मे तर्पय” इत्यनेन मन्त्रेणानुलिम्पेत् । ततः पाणी प्रक्षाल्य तदुदकमञ्जलिनाऽऽदायापसव्यं कृत्वा दक्षिणामुखो भूत्वा दाक्षिणस्यां दिशि पितरः शुन्धध्वमित्यनेन मन्त्रेण भूमौ निषिञ्चेत्पितृतीर्थेन । अथ यज्ञोपवीती भूत्वोदकमुपस्पृश्य चन्दनादिना “ सुचक्षा अहमक्षीभ्यां भूयासꣳसुवर्चा मुखेन । सुश्रुत्कर्णाभ्यां भूयासम् ” इति मन्त्रेण आत्मानमनुलिप्य “ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि । शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये”इति मन्त्रेण अहतं धौतं वा यथालाभं वासः परिधाय “धारयेद्वैणवीं यष्टिं सोदकं च कमण्डलुम् । यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले” इति मनुना ब्रह्मचर्ये प्राप्तस्य यज्ञोपवीतधारणस्य स्नातकस्य पुनर्विधानात् द्वितीययज्ञोपवीतधारणं प्राप्तं तच्च पूर्वे धृते सति न सम्भवति अतस्तदुत्तार्य जले प्रक्षिप्यापरं नवम् उक्तलक्षणमुपवीतद्वयं यज्ञोपवीतमित्यादिना मन्त्रेण परिधाय । यज्ञोपवीतस्यैकदेशविनाशे यातयामत्वम् , अतो न तस्य नवेन संयोगः , यज्ञोपवीतस्यैकदेशविनाशेऽपि मन्त्रादिकसंस्कारस्य विनष्टत्वात् । ततः “ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती । यशो भगश्च माऽविन्दद्यशो मा प्रतिपद्यताम् ” इति मन्त्रेण उत्तरीयं वास आच्छाद्य द्विती-

यवस्त्रालाभे पूर्वस्यैवोत्तरवर्गेण अनेनैवोत्तरीयं वासः परिधत्ते । "या आहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय । ता अहं प्रतिगृह्णामि यशसा च भगेन च" इति मन्त्रेण पुष्पाणि अन्यतः प्रतिगृह्य "यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु । तेन संग्रथिताः सुमनस आबध्नामि यशो मयि" इति मन्त्रेण शिरसि बद्ध्वा । "युवा सुवासाः" इत्यनयर्चा उष्णीषेण शिरो वेष्टयित्वा "अलङ्करणमसि भूयोऽलङ्करणं भूयात्" इति मन्त्रेण दक्षिणे कर्णे कुण्डलं कृत्वा तेनैव वामकर्णे परिधाय "वृत्रस्य कनीनकासि चक्षुर्दा असि चक्षुर्मे देहि" इति मन्त्रेण दक्षिणमक्षि सौवीराञ्जनेनाङ्क्त्वा तेनैव वाममङ्क्ते । "रोचिष्णुरसि" इत्यादर्शे मुखं विलोक्य । "बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्द्धेहि तेजसो यशसो माऽन्तर्द्धेहि" इत्यनेनान्यस्माच्छत्रं प्रतिगृह्य "प्रतिष्ठे स्थो विश्वतो मा पातम्" इत्युपानहौ युगपत्पादयोः प्रतिमुच्य "विश्वाभ्यो मा नाष्ट्राभ्यस्परिपाहि सर्वतः" इति वैणवं दण्डमादत्ते पूर्वदण्डं त्यक्त्वा । अत्र मातृपूजादि ब्रह्मणे दक्षिणादानान्तं आचार्यकृत्यम् । कलशाभिषेकादि दण्डग्रहणान्तं स्नानकर्तुः । वासश्छत्रोपानद्ग्रहणव्यतिरिक्तानि दन्तप्रक्षालनादीनि मन्त्रवन्ति सदा भवन्ति । वासःप्रभृतीनि तु नूतनान्येव । तत आचार्यः स्नातकस्य नियमान् श्रावयेत् त्रिरात्रव्रतानि च । स्नातकश्च तानि यथोक्तानि कुर्यादिति समावर्तनम् ॥ ८ ॥ ॥ * ॥

गदा० । स्नातस्य समावर्तनप्रभृति यावद्गार्हस्थ्यं धर्मानभिधायाधुना तस्यैव समावर्तनदिनमारभ्य त्रिरात्रं व्रतमाह—**तिस्रो रात्रीर्व्रतं चरेत्**—वक्ष्यमाणं व्रतं, तिस्रः त्रिसंख्याः रात्रीः अहोरात्राणि चरेदनुतिष्ठेत् । **अमांसाश्यमृण्मयपायी**—मांसमश्नातीत्येवंशीलो मांसाशी, न मांसाशी अमांसाशी । मृण्मयेन मृत्पात्रेण पिबतीत्येवंशीलो मृण्मयपायी, न मृण्मयपायी अमृण्मयपायी स्यादिति शेषः । **स्त्रीशूद्रशवकृष्णशकुनिशुनां चादर्शनमसम्भाषा च तैः**—स्त्री नारी । शूद्रोऽन्त्यवर्णः । शवः मृतशरीरम् । कृष्णशकुनिः काकः । श्वा कुक्कुरः । एतेषामदर्शनं भवेत् । एतैः स्त्र्यादिभिः सहासम्भाषणं च अवचनव्यवहारः । अत्र यस्य येन यादृक् सम्भाषणं प्राप्तं तादृङ् निषिध्यते । **शवशूद्रसूतकान्नानि च नाद्यात्**—मरणानन्तरं क्रीत्वा लब्ध्वा वा ज्ञातिभिर्यदद्यते तच्छवान्नम् । शूद्रस्य भोज्यान्नस्य नापितादेरन्नं शूद्रान्नम् । प्रसवे सति अर्वाग् दशाहात् यत् ज्ञातीनामन्नं तत्सूतकान्नम् । एतानि नाद्यान्न भक्षयेत् । **मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यात्**—मूत्रं च पुरीषं च मूत्रपुरीषे । ष्ठीवनं थूत्कृत्य मुखाज्जलादित्यजनम् । एतत्त्रयम् आतपे घर्मे न कुर्यान्नोत्सृजेत् । **सूर्याच्चात्मानं नान्तर्दधीत**—सूर्यादादित्यादात्मानं स्वं छत्रादिना अन्तर्हितं न कुर्यात् । **तप्तेनोदकार्थान्कुर्वीत**—तप्तेन जलेनोदकार्थान् उदकसाध्याः शौचाचमनादिकाः क्रियाः कार्याः । **अवज्योत्य रात्रौ भोजनम्**—रात्रौ अवज्योत्य दीपोल्काद्यन्यतरेण प्रकाशं कृत्वा भोजनं कुर्यात् । **सत्यवदनमेव वा**—अथवा सत्यभाषणमेव कुर्यात् नाधस्तननियमान् । **दीक्षितोऽप्यातपादीनि कुर्यात्प्रवर्ग्यवांश्चेत्**—चेद्यदि दीक्षितः सोमयागार्थं स्वीकृतदीक्षः प्रवर्ग्यवान् प्रवर्ग्यः सोमयागाङ्गकर्मविशेषः सोऽस्यास्तीति तथा । तदाऽऽतपादीनि मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यादित्यादीनि करोति ॥ इति श्रीत्रिराग्निचित्सम्राट्स्थपति–महायाज्ञिक-श्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे अष्टमी कण्डिका ॥ ८ ॥ * ॥

विश्व०—प्रवर्ग्यकालिकनियमानाह—**तिस्रो...पायी**—भवतीति शेषः । **स्त्री...र्शनम्**—कृष्णशकुनिः काकः । एषां पञ्चानामदर्शनं कार्यम् । **असं...तैः**—स्त्रीशूद्रादिभिः सह न संभाषा असंभाषा । दर्शननिषेधे सम्भाषणनिषेधस्य प्राप्तत्वेऽपि पुनः संभाषणं निषेधयन् दैवाद्दर्शने पुनस्तदुद्देशेन वार्तादिकथने दोषाधिक्यप्रदर्शनार्थं संभाषणनिषेधः । **शव...द्यात्**—भोज्यान्नस्यापि दासादेरन्नं प्रवर्ग्यकाले प्रतिषिध्यते । **मूत्र...र्यात्**—ष्ठीवनं मुखोच्छिष्टं मूत्रादित्रयं घर्मे न कुर्यात् । **सूर्या...धीत**—छत्रादिनेति शेषः । **तप्ते...र्वीत**—उष्णजलेन शौचाचमनं कुर्यात् । **अव...जनं**—प्रदीपोल्कादिना भोज्यान्नादौ तेजःसंयोगं संपाद्य भुञ्जीतेत्यर्थः । **सत्य...वा**—वाशब्दः पूर्वोक्तनिरासार्थः । सत्यवदनमेव कुर्यात् नाधस्तनान् नियमान् । **दीक्षि...श्चेत्**—एवार्थोऽपिशब्दः । प्रवर्ग्यशून्ये प्रथमयज्ञादावश्रोत्रियस्य प्रसक्तिं निराकरोति—**प्रवर्ग्यवांश्चे**दिति । नन्वेवं दीक्षितमात्रकर्तृकत्वे चिरकालं क्रियमाणप्रवर्ग्यादौ रात्रिविशेषणं तिस्रःपदं व्यर्थमसंगतोक्तिश्चेति चेत् उच्यते—तिस्रःपदस्य प्रवर्ग्याधिकरणसकलसमयोपलक्षकत्वात् । ब्रह्मचर्यगार्हस्थ्यादिधर्माक्रान्तनियमोपन्यासप्रसक्त्या दीक्षितनियमोपन्यासस्यापि नासंगतत्वमित्याहुः । अपरे त्वमुमेवास्वरसं हृदि कृत्वा कृतसमावर्तनस्याप्यमी नियमास्त्रिरात्रं भवन्तीत्याहुः ॥ इत्यष्टमी कण्डिका ॥ ८ ॥ ॥ * ॥

अथातः पञ्च महायज्ञाः ॥ १ ॥ वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारै-
र्जुहुयाद्ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतय इति ॥ २ ॥ भूतगृ-
ह्येभ्यो मणिके त्रीन् पर्जन्यायाद्भ्यः पृथिव्यै ॥ ३ ॥ धात्रे विधात्रे च
द्वार्ययोः ॥ ४ ॥ प्रतिदिशं वायवे दिशां च ॥ ५ ॥ मध्ये त्रीन्ब्रह्मणेऽन्तरि-
क्षाय सूर्याय ॥ ६ ॥ विश्वेभ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यस्तेषामुत्तरतः
॥ ७ ॥ उषसे भूतानां च पतये परम् ॥ ८ ॥ पितृभ्यः स्वधा नम इति
दक्षिणतः ॥ ९ ॥ पात्रं निर्णिज्योत्तरापरस्यां दिशि निनयेद्यक्ष्मैतत्त
इति ॥ १० ॥ उद्धृत्याग्रं ब्राह्मणायावनेज्य दद्याद्धन्त त इति ॥ ११ ॥
यथार्हं भिक्षुकानतिथींश्च सम्भजेरन् ॥ १२ ॥ बालज्येष्ठा गृह्या यथार्ह-
मश्नीयुः ॥१३॥ पश्चाद् गृहपतिः पत्नी च॥१४॥ पूर्वो वा गृहपतिः। तस्मा-
दु स्वादिष्टं गृहपतिः पूर्वोऽतिथिभ्योऽश्नीयादिति श्रुतेः ॥ १५ ॥ अहरहः
स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठाद्देवेभ्यः पितृभ्यो मनुष्येभ्यश्चो-
दपात्रात् ॥ १६ ॥ ९ ॥ * ॥

कर्कः–अथातः पञ्च महायज्ञाः–व्याख्यास्यन्त इति सूत्रशेषः। महायज्ञा इति च
कर्मनामधेयम्। तत्रैको देवयज्ञो ब्रह्मणे स्वाहेत्येवमादयो होमाः। मणिके त्रीनित्येवमादि-
भूतयज्ञः। पितृभ्यः स्वधा नम इति पितृयज्ञः। हन्तकारोऽतिथिपूजादिर्नृयज्ञः। पञ्चग्रहणाच्च
पञ्चमो ब्रह्मयज्ञः । वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयात्–विश्वे देवा देवता
अस्येति वैश्वदेवमन्नम्। ते च देवपितृमनुष्यादयः। कथमेषां देवतात्वमिति चेत्। येन स्मृता-
वेषां दानं विहितम्। येभ्यो दत्त्वा शेषभुजा गृहपतिना भवितव्यम्। तस्माद्वैश्वदेवमन्नं यद-
हरहः पच्यते तत आदाय पर्युक्ष्य स्वाहाकारैर्जुहुयात्। पर्युक्ष्य ग्रहणात् च कुशकण्डिकोक्ते-
तिकर्त्तव्यताव्युदासः । स्वाहाकारैर्जुहुयादिति जुहोति तत्स्वाहाकारैः। शेषे नमस्काराः।
आचरन्ति हि बलिकर्मणि नमस्कारान्। यद्वा स्वाहाकारैर्जुहुयादिति संस्रवव्युदासार्थम्।
ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतय इति–एते पञ्च होमाः। भूतगृह्ये-
भ्यः–भूतानि च तानि गृह्याणि च भूतगृह्याणि तेभ्यो ददाति। तान्याह–मणिके त्रीन्
पर्जन्यायाद्भ्यः पृथिव्यै। ददातीति शेषः। धात्रे विधात्रे च द्वार्ययोः-ददाति। प्रति-
दिशं वायवे–ददाति। दिशां च–यत्सम्बन्धि दानं तत्प्रतिदिशम्, ततश्चैतत्सिद्धं भवति।
प्राच्यै दिशे नम इत्येवमादि। मध्ये त्रीन्ब्रह्मणेऽन्तरिक्षाय सूर्याय–मध्ये च प्रतिदिशं
यत् दत्तं तन्मध्ये। विश्वेभ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यस्तेषामुत्तरतः–आनन्तर्यात्
त्रयाणाम्। उषसे भूतानां च पतये परम्–परमिति तयोरप्युत्तरतः। पितृभ्यः स्वधा
नम इति दक्षिणतः–तेषामेव त्रयाणां पित्र्यत्वाच्चात्र दक्षिणामुखः प्राचीनावीती भवति।
नमस्कारश्चात्र प्रदर्शित आचार्येण स सर्वबलिहरणेषु प्रत्येतव्यः। समाचारादित्युक्तमेव।
पात्रं निर्णिज्योत्तरापरस्यां दिशि निनयेद्यक्ष्मैतत्त इति–अनेन मन्त्रेण निर्णेजनमित्य-
ध्याहारः। उत्तरा परा च दिक् त्रयाणामेव। उद्धृत्याग्रं ब्राह्मणायावनेज्य दद्याद्धन्त
त इति–तत एव वैश्वदेवादन्नादुद्धृत्यान्नं ब्राह्मणायावनेज्य दद्याद्धन्त त इत्यनेन मन्त्रेण।
हन्तकाराच्च पूर्वं ब्रह्मयज्ञस्यावसरः। नृयज्ञो हि हन्तकारादिरास्वापात्। राज्ञावपि ह्यतिथिपूजा

स्मर्यते । अतिथिं प्रकृत्य "नास्यानश्नन् गृहे वसेत्" इति । तस्माद् ब्रह्मयज्ञोऽनिर्दिष्टकालोऽपि नृयज्ञात्पूर्व एव । **यथार्हं भिक्षुकानतिथींश्च सम्भजेरन्**—यथार्हमिति उपकुर्वाणकब्रह्मचारिणोऽक्षारालवणं च इतरेषां भिक्षुकाणां यद्यस्योचितमिति । **बालज्येष्ठा गृह्या यथार्हमश्नीयुः**—यद्यस्यार्हमिति । **पश्चाद् गृहपतिः पत्नी च**—अश्नीतः । **पूर्वो वा गृहपतिः**—पत्न्या अश्नाति । एवं हि श्रूयते—**तस्माद् स्वादिष्टं गृहपतिः पूर्वोऽतिथिभ्योऽश्नीयादिति**—तस्मात्स्वाद्वन्नाद्यादिष्टतमं तद् गृहपतिरश्नाति । अतिथिभ्योऽशितेभ्यः पूर्वं पत्न्या इति । **अहरहः स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठाद्देवेभ्यः**—देवयज्ञोऽयमाकाष्ठादप्यहरहः कार्यः । **पितृभ्यो मनुष्येभ्यश्चोदपात्रात्**—पितृयज्ञो मनुष्ययज्ञश्च उदपात्रादप्यहरहः कर्त्तव्यः । एवं पञ्चमहायज्ञक्रिया अहरहरेवेति गम्यत इति ॥ ९ ॥ * ॥

जय०—अथातः पञ्च महायज्ञाः—व्याख्यास्यन्त इति सूत्रशेषः । महायज्ञा इति कर्मणो नामधेयम् । तत्रैको देवयज्ञो "ब्रह्मणे स्वाहा" इत्येवमादिना होमरूपः । "मणिके त्रीन्" इत्येवमादिबलिरूपो भूतयज्ञः । "पितृभ्यः स्वधा नमः" इति पितृयज्ञः । हन्तकारातिथिपूजादिरूपो नृयज्ञः । पञ्चग्रहणात् पञ्चमो ब्रह्मयज्ञः । वैश्वदेवं विश्वे सर्वे देवमनुष्यादयो देवा देवता अस्येति ततोऽन्नात् । एषां देवतात्वं श्रूयते । देवादिभ्यो दत्त्वा शेषभुजा गृहपतिना भाव्यमिति । तस्माद्वैश्वदेवमन्नं यदहरहः पच्यते तत आदाय पर्युक्ष्य स्वाहाकारैर्जुहुयात् । पर्युक्षणग्रहणसामर्थ्यात्कुशकण्डिकोक्तेतिकर्तव्यताव्युदासः । "स्वाहाकारैः" इति यज्जुहोति तत्स्वाहाकारैरेव । शेषे नमस्काराः । यद्वा—**स्वाहाकारैर्जुहुयादि**ति संस्रवव्युदासार्थम् । "ब्रह्मणे स्वाहा" इत्येवं पञ्च होमाः । **भूतगृह्येभ्यः**—भूतानि च तानि गृह्याणि च । तेभ्यो ददातीति शेषः सर्वत्र पूरणीयः । तानि च स्थानविभागेनाह—**मणिके त्रीनि**त्यादि । **धात्रे विधात्रे चे**ति द्वार्ये द्वारशाखे दक्षिणोत्तरे तयोः । वायवे प्रतिदिशं ददाति । **दिशां च** यद्दानं तदपि प्रतिदिशमेवेति दिशां नाममन्त्रैः । ततश्च प्राच्यै दिशे नम इत्यादि सिद्ध्यति । मध्ये दिग्बलिचतुष्टयस्यैव आनन्तर्यात् । **विश्वेभ्य** इति तेषां मध्यबलीनामानन्तर्याद्बहुत्वोपदेशाच्च । **उषसे**—इति **परं**—तयोरप्युत्तरतः आनन्तर्यात् । **पितृभ्य** इति ब्रह्मादिबलित्रयस्य दक्षिणतः पित्र्यत्वाच्चात्र दक्षिणामुखः प्राचीनावीती च भवेत् । नमस्कारश्चात्र यः प्रदर्शितः स सर्वबलिषु प्रत्येतव्यः । तत्पात्रं निर्णिज्य प्रक्षाल्य दिग्बलीनामुत्तरापरस्यां वायव्यां दिशि **यक्ष्मैतत्ते** इति मन्त्रेण निर्णेजनमित्यध्याहृत्य निनयेत् । **उद्धृत्याग्रं**—षोडशग्रासमात्रं चतुर्ग्रासमात्रं वाऽन्नं वैश्वदेवादन्नादुद्धृत्यावनेजनजलं दत्त्वा ब्राह्मणायैव दद्याद्**धन्त त** इति मन्त्रेण । हन्तकाराच्च पूर्वं ब्रह्मयज्ञावसरः । नृयज्ञो हि हन्तकारादिरास्वापात् । रात्रावपि ह्यतिथिपूजा । अतिथिं प्रकृत्य स्मर्यते "नास्यानश्नन् गृहे वसेत्" इति । तस्मादनिर्दिष्टकालोऽपि ब्रह्मयज्ञो नृयज्ञात्पूर्वमेव । **यथार्हमि**त्युपकुर्वाणस्य ब्रह्मचारिणोऽक्षारालवणे । इतरेषां भिक्षुकाणां यद्यस्योचितमिति । **बालज्येष्ठा**-बालपूर्वी यथार्हं यद्यस्यार्हमेवमश्नीयुः । ततो जायापती अश्नीतः । **पूर्वो वा**—पत्न्या **गृहपतिर**श्नाति । श्रूयते च **तस्मादिति** । अस्यार्थः । तस्मात्स्वाद्वन्नाद्यद्यदिष्टमिष्टतमं तत्तद्गृहपतिरश्नाति । कदा **अतिथिभ्यो**ऽशितेभ्योऽनन्तरम् । पूर्वं च पत्न्याः । उ एवार्थे । **अहरहः**—प्रतिदिनं देवयज्ञ आकाष्ठादप्यहरहः कार्यः । पितृयज्ञो मनुष्ययज्ञश्च **आ उदपात्रादु**दकेनाप्यहरहः कार्यः । एवं पञ्चमहायज्ञक्रिया अहरहरेवेति गम्यते ॥ ९ ॥ * ॥

हरि०—अथातः पञ्च महायज्ञाः—अथ समावर्तनानन्तरं कृतविवाहस्य पञ्चमहायज्ञेष्वधिकारः अतो हेतोः पञ्चसंख्याका महायज्ञा महायज्ञसंख्याकाः कर्मविशेषाः पञ्चमहायज्ञा व्याख्यास्यन्ते ।

CC-0. In Public Domain. [illegible] Sharma Najafgarh Delhi Collection

तत्र पञ्चसु "ब्रह्मणे स्वाहा" इत्येवमादिहोमात्मकः पूर्वो देवयज्ञः। ततो "मणिके त्रीन्" इत्येवमादिब-
लिरूपो भूतयज्ञः। ततः "पितृभ्यः स्वधा नमः" इति बलिदानं पितृयज्ञः। हन्तकारातिथिपूजादिको
मनुष्ययज्ञः। पञ्चमो ब्रह्मयज्ञः। एते पञ्च महायज्ञा अहरहः कर्तव्याः स्नातकेन। कथमित्यपक्षाया-
माह—**वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयात्**—विश्वे सर्वे देवा देवता अस्येति वैश्वदेवमन्नं तस्मात्।
के ते देवभूतपितृमनुष्यादयः। स्मृतिषु तेभ्यः अदत्त्वा भोजननिषेधात्। तेभ्यो दत्त्वा गृहपतेः शेषभु-
जित्वविधानात्। तस्माद्यदन्नम् अहरहः शालाग्नौ लौकिकेऽग्नौ वा यथाधिकारं पच्यते तद्वैश्वदेवमन्नम्।
तस्मादुद्धृत्य पात्रान्तरे कृत्वा पर्युक्ष्य आवसथ्यस्य पर्युक्षणं कृत्वा स्वाहाकारैः सह वक्ष्यमाणैर्मन्त्रैर्जुहु-
यात्। अत्र पर्युक्षणोपदेशः कुशकण्डिकेतिकर्तव्यतानिरासार्थः। जुहोतिषु स्वाहाकारोपदेशश्च बल्या-
दिभ्यो निवृत्त्यर्थः संस्रवव्युदासार्थो वा। बलिदानं तु नमस्कारेणैव कुर्यात्। "पितृभ्यः स्वधा नमः" इत्य-
त्राचार्येण बलिदाने नमस्कारस्य दर्शितत्वात्। **ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतय इति**—
एते पञ्च होमाः) **भूतगृह्येभ्यः**—भूतानि च तानि गृह्याणि च भूतगृह्याणि तेभ्यो भूतगृह्येभ्यः होमा-
नन्तरं दद्यादिति शेषः। कथम्। **मणिके त्रीन् पर्जन्यायाद्भ्यः पृथिव्यै**—मणिकसमीपे, सामीप्यस-
प्तमीयम्। त्रीन् बलीन् दद्यादिति शेषः। कथं पर्जन्याय नमः, अद्भ्यो नमः, पृथिव्यै नम इति। **धात्रे विधात्रे
च द्वार्ययोः**—द्वारशाखयोर्दक्षिणोत्तरयोर्यथाक्रमं "धात्रे नमो विधात्रे नमः" इति द्वौ बली दद्यात्। **प्रतिदिशं
वायवे दिशां च**—प्रतिदिशं दिशं दिशं प्रति "वायवे नमः" इति एकैकं बलिं दद्यात्। दिशां च दिग्भ्यश्च
प्रतिदिशं "प्राच्यै दिशे नमः" इत्येवमादितत्तल्लिङ्गोल्लेखेनैकैकं बलिं दद्यात्। **मध्ये त्रीन् ब्रह्मणेऽन्तरि-
क्षाय सूर्याय**—मध्ये प्रतिदिशं दत्तानां बलीनामन्तराले त्रीन्बलीन्दद्यात्। कथं ब्रह्मणे नमः, अन्तरि-
क्षाय नमः, सूर्याय नम इति। **विश्वेभ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यस्तेषामुत्तरतः**—तेषां ब्रह्मा-
दीनां त्रयाणां बलीनामुत्तरतः उत्तरप्रदेशे विश्वेभ्यो देवेभ्यो नमः, विश्वेभ्यो भूतेभ्यो नम इति द्वौ
बली दद्यात्। **उषसे भूतानां च पतये परम्**—परं तयोरुत्तरत उषसे नमः, भूतानां पतये नम इति
बलिद्वयं दद्यात्। केचित्तु विश्वेभ्यश्च भूतेभ्यः, भूतानां च पतये इत्यत्र चकारं मन्त्रान्तर्गतमाहुः।
पितृभ्यः स्वधा नम इति दक्षिणतः—एषामेव ब्रह्मादिबलीनां दक्षिणतः दक्षिणप्रदेशे पितृकर्मत्वात्प्रा-
चीनावीती दक्षिणामुखः "पितृभ्यः स्वधा नमः" इति मन्त्रेणैकं बलिं पात्रावशिष्टेनान्नेन दद्यात्।
पात्रं निर्णिज्योत्तरापरस्यां दिशि निनयेद्यक्ष्मैतत्त इति—उद्धरणपात्रं निर्णिज्य प्रक्षाल्य, निर्णेजन-
जलं तेषामेव ब्रह्मादिबलीनाम् उत्तरापरस्यां वायव्यां दिशि निनयेत् उत्सृजेत्। कथं "यक्ष्मैतत्ते
निर्णेजनं नमः" इति मन्त्रेण। **उद्धृत्याग्रं ब्राह्मणायावनेज्य दद्याद्धन्त त इति**— वैश्वदेवादन्नादु-
द्धृत्य अवदाय अग्रं षोडशग्रासपरिमितं ग्रासचतुष्टयपर्याप्तं वा अन्नं ब्राह्मणाय विप्राय, न क्षत्रियवै-
श्याभ्याम्, अवनेज्य अवनेजनं दत्त्वा "हन्त ते" इत्यनेन मन्त्रेण दद्यात्। अत्र "पञ्च महायज्ञाः"
इत्युपक्रम्य चतुर्णां क्रमेणानुष्ठानमुक्तम्। पञ्चमस्य ब्रह्मयज्ञस्य "पञ्च महायज्ञाः" इत्यनेनानुष्ठानस्य
वक्तुमुपक्रान्तत्वात् तदनुष्ठानं सावसरं वक्तव्यं तच्च नोक्तम्। अतो विचार्यते, ब्रह्मयज्ञस्य स्मृत्यन्तरे
त्रयः काला उक्ताः। यथाऽऽह—**कात्यायनः**। "यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञस्तु स स्मृतः। स चार्वाक्
तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः॥ वैश्वदेवावसाने वा नान्यत्रेत्यनिमित्तकात्" इति। स्नानविधावपि
उपविशेद्दर्भेषु दर्भपाणिः स्वाध्यायं च यथाशक्त्यादावारभ्य वेदमिति, तेनापक्रान्तस्यापि ब्रह्मयज्ञविधेः
तर्पणात्प्रागुक्तत्वात्। अत्र तस्याकथनमदोषः सः अत्र यदि क्रियते तदा तेनैव विधिना कर्तव्यः। तत्र
चेत्कृतस्तदाऽत्र न कर्तव्यः। विकल्पेन हि कालाः स्मर्यन्ते, अतो न समुच्चयः। किंच "न हन्तातिं न
होमं च स्वाध्यायं पितृतर्पणम्। नैकः श्राद्धद्वयं कुर्यात्समानेऽहनि कुत्रचित्॥" इत्यनेनात्रापि समु-
च्चयनिषेधात्। "तस्मात्प्रातर्होमानन्तरं वा तर्पणात्पूर्वं वा वैश्वदेवान्ते वा सकृद् ब्रह्मयज्ञं कुर्यात्" इति
सिद्धम्। एतावदवशिष्यते। यदा वैश्वदेवावसाने क्रियते तदा कोऽवसरः। चतुर्णामन्त इति चेत् न,

हन्तकारादेर्नृयज्ञस्य रात्रावपि स्मरणात् । " नास्यानश्नन् गृहे वसेत् " इत्यादिना । तस्मादनिर्दिष्टकालेऽपि ब्रह्मयज्ञो मनुष्ययज्ञात्पूर्वं कर्तव्यः । **यथार्हं भिक्षुकानतिथींश्च सम्भजेरन्**—यथार्हं यो यदर्हति तदनतिक्रम्य यथार्हं तद्यथा भवति तथा भिक्षुकान् परिव्राजकब्रह्मचारिप्रभृतीन् । तत्र उपकुर्वाणकब्रह्मचारिणामक्षारालवणम् । इतरेषां च यथोचितम् । अतिथींश्च अध्वनीनान् श्रोत्रियादीन् सम्भजेरन् भिक्षाभोजनादिदानेन तोषयेरन् गृहमेधिनः । **बालज्येष्ठा गृह्या यथार्हमश्नीयुः**—बालो ज्येष्ठः प्रथमो येषां गृह्याणां ते बालज्येष्ठाः, गृह्याः गृहे भवाः पुत्रादयः, ते यथार्हं यथायोग्यम् अश्नीयुः भुञ्जीरन् । **पश्चाद् गृहपतिः पत्नी च**—पश्चाद् गृह्येषु पूर्वमाशितेषु सत्सु पश्चाद् गृहपतिः गृहस्वामी पत्नी च तद्भार्या अश्नीयाताम् । **पूर्वो वा गृहपतिः**— वा अथवा गृहपतिः स्वामी पत्न्याः पूर्वमश्नीयात् । कुतः **तस्माद्‌ स्वादिष्टं गृहपतिः पूर्वोऽतिथिभ्योऽश्नीयादिति श्रुतेः**—तस्मादन्नात् यदिष्टं तदन्नं गृहपतिः पत्न्याः पूर्वः अतिथिभ्यः आशितेभ्यः इति श्रुतेर्वेदवचनात्—**अहरहः स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठाद्देवेभ्यः पितृभ्यो मनुष्येभ्यश्चोदपात्रात्** । अहरहः प्रतिदिनं देवेभ्यः अन्नेन स्वाहा कुर्यात् । देवतोद्देशेनान्नं जुहुयात् । अन्नाभावे केनचिद्द्रव्येण काष्ठपर्यन्तेनापि पितृभ्यः स्वधा कुर्यादन्नेन, तदभावे येन केनचिद्द्रव्येणोदपात्रपर्यन्तेन । एवं मनुष्येभ्यो हन्तकारम् । एवं पञ्चमहायज्ञानां अहरहर्नित्यत्वेनेतिकर्तव्यताऽवगम्यते इति सूत्रार्थः ॥ ९ ॥

अथ **पद्धतिः** । ततः पञ्चमहायज्ञनिमित्तं मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा वैश्वदेवार्थं पाकं विधाय समुद्धृत्याभिघार्य पश्चादग्नेः प्राङ्मुख उपविश्य दक्षिणं जान्वाच्य मणिकोदकेनाग्निं पर्युक्ष्य हस्तेन द्वादशपर्वपूरकमोदनमादाय ब्रह्मणे स्वाहा इदं ब्रह्मणे० । प्रजापतये स्वाहा इदं प्रजापतये० । गृह्याभ्यः स्वाहा इदं गृह्याभ्यो० । कश्यपाय स्वाहा इदं कश्यपाय० । अनुमतये स्वाहा इदमनुमतये० इति **देवयज्ञः** । इति पञ्चाहुतीर्हुत्वा . " मणिके त्रीन् " मणिकसमीपे प्राक्संस्थमुदक्संस्थं वा हुतशेषेणान्नेन बलित्रयं दद्यात् । तद्यथा पर्जन्याय नमः इदं पर्जन्याय० । अद्भ्यो नमः इदमद्भ्यो० । पृथिव्यै नमः इदं पृथिव्यै० इति दद्यात् । ततो द्वारशाखयोर्दक्षिणोत्तरयोर्यथाक्रमं धात्रे नमः इदं धात्रे०, विधात्रे नमः इदं विधात्रे० इति द्वौ बली दत्त्वा प्रतिदिशं " वायवे नमः " इत्यनेनैव चतसृषु दिक्षु चतुरो बलीन् दद्यात् । इदं वायवे न मम इति त्यागः । दिशां च प्राच्यै दिशे नमः, दक्षिणायै दिशे नमः, प्रतीच्यै दिशे नमः, उदीच्यै दिशे नमः इति प्रतिदिशं दत्तानां वायुबलीनां पुरस्तादुदग्वा बलीन् दद्यात् । इदं प्राच्यै दिशे, इदं दक्षिणायै इत्यादि दिग्भ्यश्च बलीन् दद्यात् । दत्तानां वायुबलीनामन्तराले ब्रह्मणे नमः इदं ब्रह्मणे०, अन्तरिक्षाय नमः इदमन्तरिक्षाय०, सूर्याय नमः इदं सूर्यायेति प्राक्संस्थं बलित्रयं दद्यात् । ततो ब्रह्मादीनां बलित्रयाणामुत्तरप्रदेशे विश्वेभ्यो देवेभ्यो नमः इदं विश्वेभ्यो देवेभ्यो०, विश्वेभ्यो भूतेभ्यो नमः इदं विश्वेभ्यो भूतेभ्य इति द्वौ बली दद्यात् । तयोरुत्तरतः उषसे नमः इदमुषसे० । भूतानां पतये नमः इदं भूतानां पतये० इति द्वौ बली दद्यात् । इति **भूतयज्ञः** । ततो ब्रह्मादीनां बलीनां दक्षिणप्रदेशे प्राचीनावीती दक्षिणामुखः " पितृभ्यः स्वधा नमः " इति मन्त्रेणैकं बलिं पात्रावशिष्टान्नेन दद्यात् । इति **पितृयज्ञः** ॥ तत्पात्रं प्रक्षाल्य निर्णेजनजलं ब्रह्मादिबलीनां वायव्यायां दिश्युत्सृजेत् । "यक्ष्मैतत्ते निर्णेजनं नमः" इदं यक्ष्मणे० । ततः काकादिबलीन् बहिर्दद्यात् । तद्यथा—" ऐन्द्रवारुणवायव्याः सौम्या वै नैर्ऋतास्तथा । वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयाऽर्पितम् ॥" इदं वायसेभ्यः । "द्वौ श्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ । ताभ्यां पिण्डं प्रदास्यामि स्यातामेतावहिंसकौ" इदं श्वभ्याम् । "देवा मनुष्याः पशवो वयांसि सिद्धाश्च यक्षोरगदैत्यसंघाः । प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति मया प्रदत्तम् ॥" इदं देवादिभ्यः । "पिपीलिकाः कीटपतङ्गकाद्या बुभुक्षिताः कर्मनिबन्धबद्धाः । तृप्त्यर्थमन्नं हि मया प्रदत्तं तेषामिदं ते मुदिता भवन्तु ॥" इदं पिपीलिका-

दिभ्यः। पादौ प्रक्षाल्याचम्य अतिथिप्राप्तौ तत्पादप्रक्षालनपूर्वकं गन्धमाल्यादिभिरभ्यर्च्य अन्नं परिवेष्य "हन्त तेऽन्नमिदं मनुष्याय" इति सङ्कल्प्य तमाशयेत्। तदभावे षोडशग्रासपरिमितं चतुर्ग्रासपरिमितं वा अन्नं पात्रे कृत्वा निवीती भूत्वोदङ्मुख उपविष्टो "हन्त तेऽन्नमिदं मनुष्याय" इति सङ्कल्प्य कस्मैचिद्ब्राह्मणाय दद्यात् मनुष्ययज्ञसिद्धये। ततो नित्यश्राद्धं कुर्यात्। तद्यथा—स्वागतवचनेन षट् ब्राह्मणान् द्वौ वा एकं वाऽभ्यर्च्य पादौ प्रक्षाल्य आचम्य गृहं प्रवेश्य कुशान्तर्हितेष्वासनेषूदङ्मुखानुपवेशयेत्। ततः स्वयमाचम्य प्राङ्मुख उपविश्य श्रीवासुदेवं संस्मृत्य सावित्रीं पठित्वा अद्येहेत्यादिदेशकालौ स्मृत्वा प्राचीनावीती दक्षिणामुखः सव्यं जान्वाच्य अमुकगोत्राणामस्मत्पितृपितामहप्रपितामहानाम् अमुकामुकशर्मणां तथा अमुकगोत्राणाम् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम् अमुकामुकशर्मणां नित्यश्राद्धमहं करिष्ये इति प्रतिज्ञाय नित्यश्राद्धं कुर्यात्। ततो यथाऽर्हं भिक्षुकादिभ्योऽन्नं संविभज्य बालज्येष्ठाश्च गृह्या यथायोग्यमश्नीयुः। ततो जायापती अश्नीतः। पूर्वो वा गृहपतिः पत्नीतः अतिथ्यादीनाशयित्वाऽश्नीयादिति॥ इति **पद्धतिः**॥ ९॥

गदा०—अथातः पञ्च महायज्ञाः—व्याख्यास्यन्त इति सूत्रशेषः। महायज्ञा इति कर्मनामधेयम्। तत्रैको देवयज्ञो "ब्रह्मणे स्वाहा" इत्येवमादिहोमरूपः। "मणिके त्रीन्" इत्येवमादिबलिरूपो भूतयज्ञः। "पितृभ्यः स्वधा नमः" इति बलिदानं पितृयज्ञः। हन्तकारातिथिपूजनादिरूपो मनुष्ययज्ञः। पञ्चग्रहणात्पञ्चमो ब्रह्मयज्ञः। एते पञ्च महायज्ञा अहरहः कर्तव्याः नित्यत्वात्। यत्पुनरेषां फलश्रवणं तदेषां पावनत्वख्यापनार्थं न काम्यत्वप्रतिपादनाय। एषामनुष्ठानप्रकारमाह—**वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयात्**—विश्वे सर्वे देवा देवता यस्येति वैश्वदेवमन्नम्। ते च देवपितृमनुष्यादयः। कथमेषां देवतात्वमिति चेत्। येन स्मृतावेषां दानं विहितम्। एभ्यो दत्त्वा शेषभुजा गृहपतिना भवितव्यम्। तस्माद्वैश्वदेवमन्नं यदहरहः पच्यते शालाग्नौ तत आदायाग्निं पर्युक्ष्य स्वाहाकारैः सह वक्ष्यमाणैर्मन्त्रैर्जुहुयात्। पर्युक्ष्यग्रहणाच्च कुशकण्डिकोक्तेतिकर्तव्यताव्युदासः। स्वाहाकारैरिति यज्जुहोति तत्स्वाहाकारैः। शेषे नमस्काराः। आचरन्ति हि बलिकर्मणि नमस्कारान्। यद्वा स्वाहाकारग्रहणं संस्रवव्युदासार्थम्। **ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतय इति**—एतैर्मन्त्रैः पञ्चाहुतीर्जुहोति। **भूतगृह्येभ्यः**—भूतानि च गृह्याणि च तेभ्यो बलीन्ददाति। तान्याह—**मणिके त्रीन्पर्जन्यायाद्भ्यः पृथिव्यै**—मणिके मणिकसमीपे, सामीप्ये सप्तमीयम्। त्रीन् बलीन् दद्यात् "पर्जन्याय नमः। अद्भ्यो नमः। पृथिव्यै नमः" इति मन्त्रैः। त्रीनिति ग्रहणं "भूतगृह्येभ्यः" इति चतुर्थबलिहरणनिवृत्त्यर्थम्। केचित्तु "भूतगृह्येभ्यः" इत्येवं समन्त्रकं चतुर्थं बलिहरणमिच्छन्ति। **धात्रे विधात्रे च द्वार्ययोः**—द्वार्ययोर्द्वारशाखयोर्मध्ये धात्रे विधात्रे इति द्वौ बली ददाति। **प्रतिदिशं वायवे दिशां च**—दिशं दिशं प्रति "वायवे नमः" इत्येकैकं बलिं दद्यात्। दिशां च यद्दानं तदपि प्रतिदिशं स्वस्वनाममन्त्रैर्ददाति। ततश्च "प्राच्यै दिशे नमः" इत्यादि सिद्ध्यति। **मध्ये त्रीन् ब्रह्मणेऽन्तरिक्षाय सूर्याय**—प्रतिदिशं दत्तबलीनां मध्येऽन्तराले "ब्रह्मणे नमः" इत्यादित्रीन्बलीन्दद्यात्। **विश्वेभ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यस्तेषामुत्तरतः**—आनन्तर्यात्तेषां त्रयाणां बलीनामुत्तरप्रदेशे "विश्वेभ्यो देवेभ्यो, विश्वेभ्यो भूतेभ्यो नमः" इति द्वौ बली दद्यात्। "विश्वेभ्यश्च भूतेभ्यो, भूतानां च पतय इत्युभयत्र चकारः पठनीयः" इति गर्गः। **उषसे भूतानां च पतये परम्**—परमिति तयोरप्युत्तरतः। "उषसे नमः, भूतानां पतये नमः" इति द्वौ बली दद्यात्। **पितृभ्यः स्वधा नम इति दक्षिणतः**—तेषामेव ब्रह्मादिबलीनां त्रयाणां दक्षिणतः दक्षिणप्रदेशे "पितृभ्यः स्वधा नमः" इति मन्त्रेणैकं बलिं दद्यात्। पित्र्यत्वाच्चात्र दक्षिणामुखः प्राचीनावीती भवति। नमस्कारश्चात्र प्रदर्शित आचार्येण, स सर्वत्र बलिहरणेषु प्रत्येतव्यः। समाचारादित्युक्तमेतत्। **पात्रं निर्णिज्योत्तरापरस्यां दिशि निनयेद्यक्ष्मैतत्त इति**—पात्रम् उद्धरणपात्रं निर्णिज्य प्रक्षाल्य तदुदकं ब्रह्मादिबलित्रयाणामेवोत्तरापरस्यां वायव्यायां दिशि निनयेत् "यक्ष्मैतत्ते" इति मन्त्रेण। अत्र निर्णेजनमित्यध्याहारः। "बलिहरणे मध्याद्देशाः शालाया ग्राह्याः" इति भर्तृयज्ञः। **उद्धृत्याग्रं ब्राह्मणायावनेज्य दद्याद्धन्त त इति**—तत एव वैश्वदेवादन्नादुद्धृत्याग्रम् अन्नं षोडशग्रासपरिमितं ग्रासचतुष्टयपरिमितं वा ब्राह्मणायावनेज्यावनेजनजलं दत्त्वा "हन्त ते" इति मन्त्रेण दद्यात्। हन्तकाराच्च पूर्वं ब्रह्मयज्ञस्यावसरः। नृयज्ञो हि हन्तकारादिरास्वापात्। रात्रावपि ह्यतिथिपूजा स्मर्यते। अतिथिं प्रकृत्य "नास्यानश्नन् गृहे वसेत्" इति। तस्माद्ब्रह्मयज्ञो-

ऽनिर्दिष्टकालोऽपि नृयज्ञात्पूर्व एवेति **कर्काचार्याः** । अतो नित्यस्नानसूत्रस्यार्षेयत्वे मूलं मृग्यम् । "प्रातर्होमानन्तरं वा तर्पणात्पूर्वं वा वैश्वदेवावसाने वा ब्रह्मयज्ञः" इति **हरिहरः**।**कात्यायनः**—"यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञस्तु स स्मृतः। स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ॥ वैश्वदेवावसाने वा नान्यत्रेति निमित्तकात्।" स चैकस्मिन्नहनि सकृदेव कार्यः । तदाह—"न हन्तातिं न होमं च स्वाध्यायं पितृतर्पणम् । नैकः श्राद्धद्वयं कुर्यात्समानेऽहनि कुत्रचित्" इति ॥ **यथाऽर्हं भिक्षुकानतिथींश्च सम्भजेरन्**-यथाऽर्हं यो यदन्नमर्हति तदनतिक्रम्य यथाऽर्हं तत् यथा भवति तथा भिक्षुकान् परिव्राजकान् ब्रह्मचारिप्रभृतीन् । तत्र भिक्षुकान् मधुमांसवर्जितम् । एवमितरेषां यथोचितम् अतिथींश्च अध्वनीनान् श्रोत्रियादीन् सम्भजेरन् भिक्षाभोजनादिदानेन तोषयेरन् गृहमेधिनः । **बालज्येष्ठा गृह्या यथाऽर्हमश्नीयुः**—बालो ज्येष्ठः प्रथमो येषां ते बालज्येष्ठाः ते च ते गृह्या गृहे भवाः पुत्रपौत्रादयः यथायोग्यमश्नीयुर्भुंञ्जीरन् । **पश्चाद् गृहपतिः पत्नी च**—गृह्याणामशनोर्द्ध्वं गृहपतिर्गृहस्वामी पत्नी तत्स्त्री अश्नीतः । **पूर्वो वा गृहपतिस्तस्मादु स्वादिष्ठं गृहपतिः पूर्वोऽतिथिभ्योऽश्नीयादिति श्रुतेः**—गृहपतिर्वा पत्न्याः पूर्वम् अश्नीयात् । न युगपत् । कुतः "तस्मादु स्वादिष्ठमिति" श्रुतेः । अस्यार्थः । तस्मात् स्वात् अन्नात् यदिष्टं तद् गृहपतिरश्नाति अतिथिभ्योऽशितेभ्यः पूर्वं पत्न्या इति । **अहरहः स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठाद्देवेभ्यः**—देवयज्ञोऽयमहरहः कार्यः । स्वाहा कुर्याद्देवेभ्योऽन्नेन जुहुयात् । अन्नाभावे केनचिद्द्रव्येण काष्ठपर्यन्तेनापि कार्यः । **पितृभ्यो मनुष्येभ्यश्चोदपात्रात्**—पितृयज्ञो मनुष्ययज्ञश्च आ उदपात्रादप्यहरहः कार्यः । एवं पञ्चमहायज्ञक्रिया अहरहरेवोति गम्यते ॥ इति श्रीत्रिराग्निचित्सम्राट्स्थपति—महायाज्ञिकश्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे नवमी कण्डिका ॥ ९ ॥ * ॥

अथ **पदार्थक्रमः** । तत्र प्रथमप्रयोगे वैश्वदेवं विनैव मातृपूजापूर्वकं सदैव आभ्युदयिकं श्राद्धम् । **कारिकायाम्**-"अह्नोऽष्टधा विभक्तस्य चतुर्थे स्नानमाचरेत् । पञ्चमे पञ्च यज्ञाः स्युर्भोजनं च तदुत्तरम् ॥ अह्नोऽष्टधा विभक्तस्य विभागे पञ्चमे स्मृतः । कुतश्चित्कारणान्मुख्यकालाभावात्तदन्यथा॥" इति।तत्रावसथ्योल्मुकं महानसे कृत्वा तत्र वैश्वदेवार्थं पाकं विधाय महानसादङ्गारानाहृत्यावसथ्ये निधाय ततः पाकादन्नमुद्धृत्याभिघार्य अग्नेरुत्तरतः प्राङ्मुख उपविश्य मणिकोदकेनाग्निं पर्युक्ष्य दक्षिणं जान्वाच्य हस्तेन द्वादशपर्वपूरकमोदनमादाय जुहुयात् "ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम। ॐ गृह्याभ्यः स्वाहा इदं गृह्याभ्यो न मम। ॐ कश्यपाय स्वाहा इदं कश्यपाय न मम ।ॐ अनुमतये स्वाहा इदमनुमतये०।" इति **देवयज्ञः** । ततो मणिकसमीपे हुतशेषेणान्नेन बलित्रयमुदक्संस्थं दद्यात् । पर्जन्याय नमः इदं पर्जन्याय न० । अद्भ्योः नमः इदमद्भ्यो न० । पृथिव्यै नमः इदं पृथिव्यै न मम ।" ततो द्वार्ययोः शाखयोर्मध्ये प्राक्संस्थं बलिद्वयं दद्यात्।"धात्रे नमः इदं धात्र न मम । विधात्रे नमः इदं विधात्रे न०।" ततो "वायवे नमः" इत्यनेनैव मन्त्रेण पुरस्तादारभ्य प्रातिदिशं प्रदक्षिणं बलिचतुष्टयं दद्यात्।इदं वायवे न ममेति सर्वत्र । ततः प्रागादिचतसृषु दिक्षु दत्तानां वायुबलीनां पुरस्तादुदग्वा चतुरो बलीन् दद्यात् ।"प्राच्यै दिशे नमः इदं प्राच्यै दिशे न मम । दक्षिणायै दिशे नमः इदं दक्षिणायै दिशे न० । प्रतीच्यै दिशे नमः इदं प्रतीच्यै दिशे न० । उदीच्यै दिशे नमः इदमुदीच्यै दिशे न मम ।" ततो वायुबलीनामन्तराले प्राक्संस्थं बलित्रयं दद्यात् ।"ब्रह्मणे नमः इदं ब्रह्मणे० अन्तरिक्षाय नमः इदमन्तारिक्षाय न० सूर्याय नमः इदं सूर्याय न मम ।" तत एतेषामुत्तरतो बलिद्वयं दद्यात् । "विश्वेभ्यो देवेभ्यो नमः इदं विश्वेभ्यो देवेभ्यो० । विश्वेभ्यो भूतेभ्यो नमः इदं विश्वेभ्यो भूतेभ्यो न०।" तयोश्चोत्तरतो बलिद्वयं दद्यात् । "उषसे नमः इदमुषसे न मम । भूतानां पतये नमः इदं भूतानां पतये० ।" इति **भूतयज्ञः** । अथ **पितृयज्ञः** । तत्र प्राचीनावीती भूत्वा दक्षिणामुखः सव्यं जान्वाच्य ब्रह्मादिबलित्रयस्य दाक्षिणप्रदेशे पितृतीर्थेन " पितृभ्यः स्वधा नमः " इति बलिं दद्यात् । इति **पितृयज्ञः**। ततस्तत्पात्रं प्रक्षाल्य निर्णेजनजलं सव्येनैव ब्रह्मादिबलितो वायव्यायां दिशि **यक्ष्मैतत्ते निर्णेजनमिति** निनयेत् । "इदं यक्ष्मणे न मम।" ततः काकादिबलीन् बाहिर्दद्यात्। तद्यथा—"सुरभिर्वैष्णवी माता नित्यं विष्णुपदे स्थिता। गोग्रासस्तु मया दत्तः सुरभे प्रतिगृह्यताम्—" इदं सुरभ्यै न मम ।"ऐन्द्रवारुणवायव्याः सौम्या वै निर्ऋतास्तथा । वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयाऽर्पितम् ॥" इदं वायसेभ्यो न मम॥"द्वौ श्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ । ताभ्यां पिण्डं प्रदास्यामि स्यातामेतावहिंसकौ ॥" इदं श्वभ्यां न मम ॥ "देवा मनुष्याः पशवो वयांसि सिद्धाश्च यक्षोरगदैत्य-

संघाः । प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति मया प्रदत्तम् ॥” इदं देवादिभ्यो न मम । “पिपीलिकाः कीटपतङ्गकाद्या बुभुक्षिताः कर्मनिबन्धबद्धाः । तृप्त्यर्थमन्नं हि मया प्रदत्तं तेषामिदं ते मुदिता भवन्तु ॥” इदं पिपीलिकादिभ्यो न मम । पादौ पक्षाल्याचामेत् । अथ **ब्रह्मयज्ञः** । तत्रासनोपरि न्यस्तप्रागग्रदर्भेषु प्राङ्मुख उपविष्टः पवित्रपाणिरन्यान्दर्भान्पाणिभ्यामादाय प्रणवव्याहृतिपूर्वां गायत्रीमाम्नायस्वरेणाधीत्य इषे त्वेत्यादिवेदमारभ्य यथाशक्ति कण्डिकाऽध्यायशो वा संहितां पठित्वा ब्राह्मणं पठेत् । ब्राह्मणं च ब्राह्मणशो वा पठेत् । ॐ स्वस्तीत्यन्ते वदेत् । एवं संहितां समाप्य ब्राह्मणमादावारभ्य समापयेत् । तच्च समाप्य द्विवेदाध्यायी चेद् द्वितीयवेदम् । एवं क्रमेणादावारभ्य समापयेत् । एवमेव तृतीयवेदम् । चतुर्थवेदम् । एवमेवेतिहासपुराणादीन्यपि पठित्वा आदावारभ्य क्रमेण समापनीयानि । जपयज्ञप्रसिद्धये प्रत्यहं चाध्यात्मिकीं विद्यामुपनिषदमपि क्रमेण ब्रह्मयज्ञान्ते पृथक् पठेत् । एवमेव **गीता**दिपाठः । “जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत्” इति **याज्ञवल्क्येन** पृथग्विधानात् । अमावास्यादिष्वनध्यायेष्वपि ब्रह्मयज्ञो भवत्येव । “अहरहः स्वाध्यायमधीते” इति **श्रुतेः** । **कारिकायां** विशेषः—“बद्धाञ्जलिर्दर्भपाणिः प्राङ्मुखस्तु कुशासनः । वामाङ्घ्रिमुन्नतं कृत्वा दक्षिणं तु तथा करम् ॥ दक्षिणे जानुनि करोत्यञ्जलिं तमृषेर्मतात् । प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तिस्र एव तु ॥ गायत्रीं चानुपूर्व्येण विज्ञेयं ब्रह्मणो मुखम् । ॐ स्वस्ति ब्रह्मयज्ञान्ते प्रोक्त्वा दर्भान् क्षिपेदुदक् ॥ वेदादिकमुपक्रम्य यावद्वेदसमापनम् । आध्यात्मिकाऽथवा विद्या ऋग्यजुः साम एव च ॥”इति **ब्रह्मयज्ञः** । ततो वैश्वदेवादन्नादुद्धृत्य षोडशग्रासपरिमितमन्नमुदकपूर्वकं ब्राह्मणाय दद्यादिति । मन्त्रः । “इदमन्नं सनकादिमनुष्येभ्यो हन्त ते” इति । अत्र निरग्नेर्नित्यश्राद्धम् । तदुक्तम्—“कृतस्वात्पितृयज्ञस्य साग्नेः श्राद्धं न विद्यते । नित्यं पित्र्येण बलिना निरग्नेस्तत्तु विद्यते ॥ बलेरभावात्पित्र्यस्य शिष्टाल्पकबलिः स्मृतः । प्रदीपचण्डिकादौ तु स्मृतिः सम्यगुदाहृता ॥” तथा—“नित्यश्राद्धं निरग्नेः स्यात्साग्नेः पित्र्यो बलिः स्मृतः । कात्यायनीयवाक्येन विकल्पः प्रतिभाति हि ॥ श्राद्धं वा पितृयज्ञः स्यात्पित्र्यो बलिरथापि वा । साग्निकः पितृयज्ञान्तं बलिकर्म समाचरेत् ॥ अनग्निर्हुतशेषं तु काके दद्यादिति स्मृतिः ।”तच्चैवं बहिर्बलेर्निवेशनान्ते सोदकमन्नं भूमौ चाण्डालवायसादिभ्यो निक्षिपेत् । मन्त्रास्तु प्रागुक्ताः । **मनुः**—“शुनां च पतितानां च श्वपचां पापरोगिणाम् । वायसानां कृमीणां च शनकैर्निक्षिपेद्भुवि ॥” पितृयज्ञोत्तरं ब्रह्मयज्ञकरणपक्षे तु काकादिबलिदानं ब्रह्मयज्ञोत्तरं द्रष्टव्यम् । अथ **नित्यश्राद्धे विशेषः** । **हेमाद्रौ**--“एकमप्याशयेद्विप्रं षण्णामप्यन्वहं गृही ।” अपीत्यनुकल्पः । **प्रचेताः**—“नामन्त्रणं न होमं च नाह्वानं न विसर्जनम् । न पिण्डदानं विकिरं न दद्यादत्र दक्षिणाम् ॥” अत्र निर्दिश्य भोजयित्वा किञ्चिद्दत्त्वा विसर्जयेदिति तेनैवोक्तेर्दक्षिणाविकल्पः । यत्तु **काशीखण्डे**-“नित्यश्राद्धं देवहीनं नियमादिविवर्जितम् । दक्षिणारहितं चैव दातृभोक्तृव्रतोज्झितम् ॥” इति तद्विप्राभावपरम् । **भविष्ये**-“आवाहनं स्वधाकारं पिण्डाग्नौकरणादिकम् । ब्रह्मचर्यादिनियमा विश्वेदेवा न चैव हि ॥ दातॄणामथ भोक्तॄणां नियमो न च विद्यते ।” एतद्दिवाऽसम्भवे रात्रावपि कार्यम् । तथा **बृहन्नारदीये**-“दिवोदितानि कर्माणि प्रमादादकृतानि चेत् । यामिन्याः प्रहरं यावत्तावत्सर्वाणि कारयेत् ॥” इति **नित्यश्राद्धम्** । अथ **वैश्वदेवनिर्णयः** । “अकृते वैश्वदेवे तु भिक्षुके गृहमागते । उद्धृत्य वैश्वदेवार्थं भिक्षुकं तु विसर्जयेत् ॥ वैश्वदेवाकृतेः पाप शक्तो भिक्षुर्व्यपोहितुम् ।” साग्नेः सर्वत्र श्राद्धादौ वैश्वदेवः । “पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः । पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥ पित्रर्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च । वैश्वदेवं न पित्रर्थं न दार्शं वैश्वदेविकम्” इति **लौगाक्षिस्मृतेः** ॥ अत्र “साग्निक आहिताग्निः” इति **हेमाद्रिः** । **कात्यायनानां** तु सर्वार्थमेक एव पाकः “वैश्वदेवादन्नात्” इति सूत्रणात् । अन्येषां तु पृथक् । “श्राद्धात्प्रागेव कुर्वीत वैश्वदेवं तु साग्निकः । एकादशाहिकं मुक्त्वा तत्र चान्ते विधीयते ॥” इति **हेमाद्रावुक्तेः** । तत्रैव **परिशिष्टे**—“सम्प्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथैव च । अग्रतो वश्वदेवः स्यात्पश्चादेकादशेऽहनि ॥” स्मार्त्ताग्निमतां तद्रहितानां वाऽग्नौकरणोत्तरं विकिरोत्तरं वा होममात्रं पृथक्पाकेन । भूतयज्ञादि तु श्राद्धान्त एव । अत्र मूलं **हेमाद्रिचन्द्रिकादौ** स्पष्टम् । “सर्वेषां श्राद्धान्ते वा तत्पाकेन वैश्वदेवनित्यश्राद्धादीनि” इति तृतीयः ॥ “श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं ततः । कुर्याद्भिक्षां ततो दद्याद्धन्तकारादिकं तथा” इति **पैठीनसिस्मृतेः** । ततः श्राद्धशेषात् । “श्राद्धाह्नि श्राद्धशेषेण वैश्वदेवं समाचरेत्” इति **चतुर्विंशतिमता**च्च । एवं वैश्वदेवस्य कालत्रयस्य **आशाऽर्के** **शाङ्खायनेन परिशिष्ट**मुदाहृत्यैव [illegible]—“आदौ वृद्धौ क्षये चान्ते दर्शे मध्ये महालये । एकोद्दिष्टे निवृत्ते तु

वैश्वदेवो विधीयते ॥" इति।"बहुस्मृत्युक्तत्वात्सर्वेषां श्राद्धान्त एव" इति **मेधातिथिस्मृतिरत्नावल्यादयो** बहवः । बह्वृचां "श्राद्धान्त एव"इति **बोपदेवः**। मध्यपक्षस्त्वन्यशाखापर इति स एवाह । **हेमाद्रिस्तु** वृद्धावप्यन्त एव वैश्वदेवमाह । **कातीयानां** तु स्मार्तश्रौताग्निमतामादावेव । अन्येषामन्ते । **तैत्तिरीयाणां** तु साग्नीनां सर्वत्रादौ । "पञ्चयज्ञाँश्च अन्ते च" इति **सुदर्शनभाष्ये** । **मार्कण्डेयः**--"ततो नित्यक्रियां कुर्याद्भोजयेच्च ततोऽतिथीन् । ततस्तदन्नं भुञ्जीत सह भृत्यादिभिर्नरः॥" ततः श्राद्धशेषात्, नित्यक्रियां नित्यश्राद्धम्। तत्र "पृथक्पाकेन नैत्यकम्" इति तेनैवोक्तेः पाकैक्ये विकल्पः।अथ पक्वाभावे **स्मृत्यर्थसारे** विशेषः–"पक्वाभावे प्रवासे वा तण्डुलानोषधीस्तु वा । पयो दधि घृतं वाऽपि कन्दमूलफलादि वा ॥ योजयेद्देवयज्ञादौ जलं वाऽप्सु जलं पतेत् । इदं स्रुवेण होतव्यं पाणिना कठिनं हविः॥" इति ।"स्नातको ब्रह्मचारी वा पृथक्पाकेन वैश्वदेवं कुर्यात् । स्त्री बालश्च कारयेत्" इति **स्मृत्यर्थसारे** । तत्रैव–"होमाग्रदानरहितं भोक्तव्यं न कथंचन । अविभक्तेषु संसृष्टेष्वेकेनापि कृतं तु यत् ॥ देवयज्ञादि सर्वार्थं लौकिकाग्नौ कृतं यदि । इक्षूनपः फलं मूलं ताम्बूलं पय औषधम्॥भक्षयित्वाऽपि कर्तव्याः स्नानदानादिकाः क्रियाः ॥" इति । अथ **निराग्निकस्य** विशेषः।तत्र याज्ञिकाः–पठन्ति । अथातो धर्मजिज्ञासा-केशान्तादूर्ध्वमपत्नीकः उत्सन्नाग्निरनाग्निको वा, प्रवासी वा, ब्रह्मचारी वाऽन्वग्निरिति ग्रामादाग्निमाहृत्य **पृष्टो दिवी**त्यधिष्ठाप्य त्रिभिश्च सावित्रैः प्रज्वाल्य **ताꣳसवितुस्तत्सवितुर्विश्वानि देव सवितारि**ति पूर्ववदक्षतैर्हुत्वा पाकं पचेत् । तत्र वैश्वदेवो " ब्रह्मणे, प्रजापतये,गृह्याभ्यः, कश्यपायानुमतये, विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृते इत्युपस्पृश्य पूर्ववद्बालिकर्मणैवं कृते न वृथापाको भवति न वृथापाकं पचेन्न वृथा पाकमश्नीयादत्र पिण्डपितृयज्ञः पक्षाद्याग्रयणानि कुर्यात् " इति । **गर्गमते** वैश्वदेवे विशेषः–पञ्चाहुतीनामुत्तरं स्विष्टकृद्धोमः । भूतयज्ञे पूर्वं "भूतगृह्येभ्यो नमः " इति बलिं दत्त्वा पर्जन्यादिभ्यो दानम् । विश्वेभ्यश्च भूतेभ्यो भूतानां च पतय इति मन्त्रद्वये चकारपाठः ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति–महायाज्ञिकश्रीवामनात्मजगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे पञ्चमहायज्ञ**पदार्थक्रमः** ॥ ९ ॥ * ॥

विश्व०-प्रसक्तानुप्रसक्त्या गर्भाधानादीन् विवाहाधिकारसंपादकान् समावर्तनान्तान्संस्कारान्सूत्रयित्वेदानीं कृतावसथ्यस्य प्रत्यहमभ्यस्यमानान्पञ्चसंख्याकान्महायज्ञान्वक्तुमुपक्रमते-**अथा...यज्ञाः**—वक्ष्यन्त इति सूत्रशेषः । तत्रादौ देवयज्ञं सूत्रयति-**वैश्व...यात्**-तत्र विश्वे देवा देवता अस्येति वैश्वदेवं तस्मात् तस्यैकदेशात् कृतावसथ्यः आवसथ्यादिने एव मणिकावधानानन्तरं मातृपूजाभ्युदयिके प्रथमवैश्वदेवारम्भे कृत्वा वैश्वदेवार्थं पाकं कृत्वा तदेकदेशमादाय घृतेनाभिघार्य प्राङ्मुख उपविश्य दक्षिणं जान्वाच्य पर्युक्ष्य हस्तेन जुहुयात् । पर्युक्ष्येत्यनेनेतरपरिभाषितशास्त्रार्थनिरासः । जुहुयादित्यनेनैव स्वाहाकारप्राप्तौ पुनस्तदुल्लेखः संस्रवव्युदासार्थः। **ब्रह्म...य इति**–स्विष्टकृद्धोमार्थमितिशब्दोपादानम्। "ब्रह्मणे स्वाहा इदं ब्रह्मणे" एवमुत्तराहुतिषु। अग्नये स्विष्टकृत इति स्विष्टकृद्धोमानन्तरमुदकस्पर्शः। भूतयज्ञमाह–**भूत...थिव्यै**—दद्यादिति शेषः । पर्जन्यादीनां मणिकोपलक्षितभूप्रदेशाधारतोक्तेरग्रे च प्रागादौ बलिदानस्य वक्ष्यमाणत्वात्तन्निरूपणायावध्यपेक्षायां प्रागादिनिरूपकावधित्वेन मध्ये भूतगृह्येभ्यो बलिदानमित्यवसीयते । न च पर्जन्यादीनामेव भूतगृह्यतेति वाच्यम्, पर्जन्यपदार्थान्तर्गततत्तद्दिगवस्थितवाय्वादीनां च पृथग्देवतात्वानापत्तेः । तथा च यथाऽधिकरणभेदाद्देवत्वं भिद्यते तथा नामभेदादपि देवत्वभेदः । न च पर्जन्याद्युद्देश्यकद्रव्यत्यागेनैव भूतगृह्योद्देश्यकद्रव्यत्यागस्य जातत्वात्किमर्थं पृथक् तद्दानमिति वाच्यम्, भवन्मते पर्जन्यादेर्भूतगृह्यपदवाच्यतया भूतगृह्योद्देश्यकदानस्यैव पर्जन्योद्देश्यकदानतया किमर्थं पर्जन्याद्युद्देश्यकानेकबलिदानं गौरवात्, ब्रह्मादीनां भूतगृह्यतायां नियामकाभावाच्चेति न किंचिदेतत् । मणिक इति सामीप्यसप्तमी, मणिकसमीपे प्राक्संस्थं बलित्रयं दद्यात् । बलिदानं चान्ते उदकमासिच्य सोदकमर्धाहुतिप्रमाणम् । तद्यथा–गृहमध्ये भूतगृह्येभ्यो नमः इदं भूतगृह्येभ्यः । मणिकसमीपे पर्जन्याय नमः इदं पर्जन्याय । अद्भ्यो नमः इदमद्भ्यः । पृथिव्यै नमः इदं पृथिव्यै । एतद्बलित्रयं प्राक्संस्थम् । **धात्रे...र्ययोः**–द्वार्यें द्वारशाखे दक्षिणोत्तरे यदि प्राग्द्वारं, दक्षिणद्वारं चेत्प्रत्यक्पूर्वे तयोः । तद्यथा–धात्रे नमः इदं धात्रे, विधात्रे नमः इदं विधात्रे । **प्रति...शां च**—मध्ये दत्ताद्भूतगृह्यबलेः, दिशं दिशं प्रति इति प्रतिदिशं वायवे दिशां च । चकारः प्रतिदिशमित्यस्यानुकर्षणार्थः । तथा च यस्यां वायवे दत्तं तस्यै दिशे दत्त्वा दिगन्तरे वायवे दिशे च दद्यादित्यर्थः । तद्यथा–वायवे नमः प्राच्यै दिशे नमः । मध्यबलेः प्राच्यामिदं वायवे इदं प्राच्यै । एवं सर्वत्र । मध्यबलेर्दक्षिणस्यां गत्वा वायवे नमः दक्षिणस्यै दिशे नमः । एवं प्रतीच्यां वायवे नमः प्रतीच्यै दिशे नमः । ततः उदीच्यां वायवे नमः उदीच्यै दिशे नमः । ततो मध्यबलेः प्राच्यां वायवे दत्तादुत्तरतः पुनर्वायवे नम इति बलिं दत्त्वा त्यागं विधायोर्ध्वं निरीक्षमाण ऊर्ध्वायै दिशे नम इति तिष्ठन्बलिद्वयं दद्यात् । तत उपविश्याधस्तादवलोकयन्वायवे नमः, अवाच्यै

दिशे नम इति बलिद्वयं दद्यात् । **मध्ये...र्याय**-मध्यबलेरुत्तरतः प्राक्संस्थं ब्रह्मणे नमः, अन्तरिक्षाय नमः, सूर्याय
नम इति बलित्रयं दद्यात् । **विश्वे...त्तरः**-तेषां ब्रह्मादिबलीनामुत्तरस्यां विश्वेभ्यो देवेभ्यो नमः, विश्वेभ्यो भूतेभ्यो
नमः इति बली दद्यात् । **उष...परं**—चकारात्तयोरुत्तरे उषसे नमः, भूतानां पतये नमः । **पितृ...णतः**-ब्रह्मा-
दिबलित्रयस्य दक्षिणतः अपसव्यं कृत्वा सव्यं जान्वाच्य पितृतीर्थेन "पितृभ्यः स्वधा नमः" इति बलिं दद्यात् । उद-
कस्पर्शः । अयं चैकबलिदानात्मा पितृयज्ञः **पारस्करमते** । अन्ये तु षट्दैवतं नित्यश्राद्धं पितृयज्ञमाहुः । **पा...तत**
इति-वायव्यकोणे । अध्वर्युपक्षे "यजमानस्य पितृभ्यः" इति कीर्तनम् । प्राच्यादिनिरूपकता चाग्नेरित्याहुः ।
उद्धृ...त इति-अग्रं षोडशग्रासमितं चतुर्ग्रासं वा अशक्तौ, शक्तौ तु तृप्तिपर्याप्तं वैश्वदेवादन्नादुद्धृत्योपवीतं
कण्ठे कृत्वा मनुष्यतीर्थेन तदन्नमुदकपूर्वं ब्राह्मणहस्ते दद्यात् **हन्त त** इति । अयं **नृयज्ञः** । पितृयज्ञस्य श्राद्ध-
रूपत्वे पितृमातामहादिषट्कोद्देशेन चन्दनाद्यर्चितमुदङ्मुखोपविष्टं भोजयेत् । केचित्तु पञ्चमहायज्ञसाङ्गतार्थं ब्राह्मणं भोज-
येदित्याहुः । ततः काकादिबलिः । तद्यथा—"ऐन्द्रवारुणवायव्या याम्या वै नैर्ऋतास्तथा । वायसाः प्रतिगृह्णन्तु
भूम्यां पिण्डं मयाऽर्पितम् ॥" इदं वायसेभ्यः । "श्वानौ द्वौ श्यामशबलौ वैवस्वतकुलोद्भवौ । ताभ्यां पिण्डं
प्रदास्यामि स्यातामेतावहिंसकौ ॥" इदं श्वभ्यः । "देवा मनुष्याः पशवो वयांसि सिद्धाश्च यक्षोरगदैत्यसंघाः । प्रेताः
पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति मया प्रदत्तम् " इदं देवादिभ्यः । "पिपीलिकाः कीटपतङ्गकाद्या बुभु-
क्षिताः कर्मनिबन्धबद्धाः । तृप्त्यर्थमन्नं हि मया प्रदत्तं तेषामिदं ते मुदिता भवन्तु ॥" इदं पिपीलिकादिभ्यः । इति
बहिर्बलिदानम् । तर्पणात्प्राक् ब्रह्मयज्ञश्चेन्न कृतः तदानीं कर्तव्यः । केचित्तु पितृनृयज्ञात्पूर्वं ब्रह्मयज्ञ इत्याहुः ।
तथा च **श्रुतिः**—"यज्ञश्रुतिजपः प्रोक्तो ब्रह्मयज्ञस्तु स स्मृतः । स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः । वैश्वदे-
वावसाने वा नान्यत्रेत्यनिमित्तकः" इति । **यथा...रन्**—ब्रह्मचारिसंन्यासिप्रभृतीनां शास्त्रनिषिद्धं मध्वादि तदन्यद्यस्य
यद्विहितं तत्तस्यार्हम् । अर्हमुचितमनतिक्रम्येति यथार्हं भिक्षुकान् "अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः" इत्यादि-
शास्त्रोक्तानतिथींश्च यथार्हं संभजेरन्निति । **बाल...त्नी च**-गृहपतेः पश्चात् पत्नी अश्नीयादिति शेषः । **पूर्वो वा गृह-**
पतिः—एतच्चानुपस्थिताऽतिथिविषयम् । तथा चातिथीनामनुपस्थितिकाले गृहपतौ संजातभोजने सत्कारपूर्वं तेषु यथाशक्ति
भुक्तवत्सु पश्चात्पत्नी भुञ्जीतेत्यर्थः । अस्मिन्नर्थे श्रुतिं प्रमाणयति—**तस्मा...श्रुतेः**—तथा चाऽन्नस्वादु यावता समयेन
नोपहन्यते तावत्समयमतिथिं प्रतीक्षेतेत्यर्थः । केचित्तु "पूर्वोऽतिथिभ्यः" इत्यत्रातिथिभ्योऽशितेभ्यः पूर्वं पत्न्या इत्य-
न्वयमाहुः । तन्मते पश्चात्सूत्रे दम्पत्योः सहभोजनमापाद्य "पूर्वो वा" इत्युत्तरसूत्रे पत्न्यपेक्षया गृहपतेः प्राग्भोजनमापाद्यत-
इति न पौनरुक्त्यम् । अध्याहारेणान्वयस्य क्लिष्टत्वात्तत्त्वतः पौनरुक्त्यानपायश्चेति द्रष्टव्यम्—**अह...वेभ्यः**-देवेभ्यः
प्रत्यहमाकाष्ठात्स्वाहा कुर्यात् । कदा अन्नाभावे । पितृयज्ञमनुष्ययज्ञयोरन्नाभावे का गतिरित्याह । **पितृ...पात्रात्**-
नृपितृयज्ञौ उदपात्रेणाप्यहरहः कर्तव्यावित्यर्थः ॥ इति पञ्च महायज्ञाः ॥ ९ ॥ * ॥

उपाकर्म

अथातोऽध्यायोपाकर्म ॥ १ ॥ ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां
पौर्णमास्याᳪ श्रावणस्य पञ्चमीᳪ हस्तेन वा ॥ २ ॥ आज्यभागाविष्ट्वा-
ऽऽज्याहुतीर्जुहोति ॥ ३ ॥ पृथिव्या अग्नय इत्यृग्वेदे ॥ ४॥ अन्तरिक्षाय
वायव इति यजुर्वेदे ॥ ५ ॥ दिवे सूर्यायेति सामवेदे ॥ ६ ॥ दिग्भ्यश्च-
न्द्रमस इत्यथर्ववेदे ॥ ७ ॥ ब्रह्मणे छन्दोभ्यश्चेति सर्वत्र ॥ ८ ॥ प्रजापतये
देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतयेऽनुमतय इति च ॥ ९ ॥
एतदेव व्रतादेशनविसर्गेषु ॥ १० ॥ सदसस्पतिमित्यक्षतधानास्त्रिः ॥११॥
सर्वेऽनुपठेयुः ॥ १२ ॥ हुत्वा हुत्वौदुम्बर्यस्तिस्रस्तिस्रः समिध आदध्यु-
रार्द्राः सपलाशा घृताक्ताः सावित्र्या ॥ १३ ॥ ब्रह्मचारिणश्च पूर्वकल्पेन
॥ १४ ॥ शन्नो भवन्त्वित्यक्षतधाना अखादन्तः प्राश्नीयुः ॥ १५ ॥ दधि-
क्राव्ण इति दधि भक्षयेयुः ॥ १६ ॥ स यावन्तं गणमिच्छेत्तावतस्तिला-
नाकर्षफलकेन जुहुयात्सावित्र्या शुक्रज्योतिरित्यनुवाकेन वा ॥ १७ ॥
प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टेभ्य ॐकारमुक्त्वा त्रिश्च सावित्रीमध्या-
यादीन्प्रब्रूयात् ॥१८॥ ऋषिमुखानि बह्वृचानाम् ॥१९॥ पर्वाणि छन्दो-

गानाम् ॥ २० ॥ सूक्तान्यथर्वणानाम् ॥ २१ ॥ सर्वे जपन्ति सह नोऽस्तु सह नोऽवतु सह न इदं वीर्यवदस्तु ब्रह्म । इन्द्रस्तद्वेद येन यथा न विद्विषामह इति ॥ २२ ॥ त्रिरात्रं नाधीयीरन् ॥ २३ ॥ लोमनखानामनिकृन्तनम् ॥ २४ ॥ एके प्रागुत्सर्गात् ॥ २५ ॥ १० ॥ * ॥

कर्कः–अथातोऽध्यायोपाकर्म–व्याख्यास्यत इति शेषः । अध्ययनमध्यायस्तस्योपाकरणम् । एवं हि स्मरन्ति–"छन्दांस्युपकृत्वाऽधीयीत" । एवं सति अध्ययनप्रवृत्तस्यैतद्भवति, अत एवाग्निमतोऽध्यापमं भवति । न ह्यनग्निमान् शक्नोत्याग्निसाध्यं कर्म कर्तुमिति । ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्याम्–श्रावण्यां हि पौर्णमास्यां श्रवण एव प्रायशो भवति ओषधीनां प्रादुर्भावश्च । तदेतदुभयं तस्या एव विशेषणम् । श्रावणस्य पञ्चमीं हस्तेन वा–तत्रापि प्रायशो हस्त एव भवति । अतः कालद्वयस्योपाकरणकर्मणो विकल्पोऽयम्। अपरे तु कालचतुष्टयं वर्णयन्ति। आज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति। पृथिव्या अग्नय इति ऋग्वेदे–अधीयमाने जुहोति । अन्तरिक्षाय वायव इति यजुर्वेदे। दिवे सूर्यायेति सामवेदे। दिग्भ्यश्चन्द्रमस इत्यथर्ववेदे। ब्रह्मणे छन्दोभ्यश्चेति सर्वत्र । प्रजापतये देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतये अनुमतये च–चशब्दादेतदपि सर्वत्र । पृथग्योगकरणं किमर्थम् । चतुर्णामपि वेदानां तन्त्रेणोपाकरणकर्मणि "ब्रह्मणे छन्दोभ्यश्च" इति प्रतिवेदमावर्तते । "प्रजापतये देवेभ्यः" इत्येवमादि तन्त्रेण यथा स्यादिति पृथग्योगकरणम् । एतदेव व्रतादेशनविसर्गेषु–एतदेव व्रतादेशे विसर्गे चाज्याहुतिकर्म भवति । सदसस्पतिमित्यक्षतधानास्त्रिः सर्वेऽनुपठेयुर्हुत्वा हुत्वौदुम्बर्यस्तिस्रस्तिस्रः समिध आदध्युरार्द्राः सपलाशा घृताक्ताः सावित्र्या–सदसस्पतिमित्यनेन मन्त्रेण आचार्योऽक्षतधाना जुहोति । सर्वे च सह पठन्ति मन्त्रम् । हुत्वा हुत्वौदुम्बर्यस्तिस्रः समिध आदध्युः सावित्र्या । समिदाधानं च भेदेन न यौगपद्येन । ब्रह्मचारिणश्च पूर्वकल्पेन–इति दृष्टत्वात् । तत्र हि समिदाधानं प्रकृत्योक्तम्–"एवं द्वितीयां तथा तृतीयाम्" इति । शन्नो भवन्त्वित्यक्षतधाना अखादन्तः प्राश्नीयुः–शन्नो भवन्त्वित्यनेन मन्त्रेण अक्षतधाना यवानां धाना अनवखण्डयन्तः प्राश्नीयुः । दधिक्राव्ण इति दधि भक्षयेयुः । सर्वे इति बहुवचनोपदेशात् । स यावन्तं गणमिच्छेत्तावतस्तिलानाकर्षफलकेन जुहुयात्सावित्र्या–स इत्याचार्योऽभिधीयते । यावन्तं शिष्यगणमिच्छेत्तावतस्तिलानाकर्षफलकेन जुहुयात्सावित्र्या । शुक्रज्योतिरित्यनुवाकेन वा–वाशब्दो विकल्पार्थः । अतो धानाभिः स्विष्टकृत् । तासां च श्रपणानुपदेशात्तद्भूतानामेवोपादानम् । प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टेभ्य ॐकारमुक्त्वा त्रिश्च सावित्रीमध्यायादीन्प्रब्रूयात्–मन्त्रब्राह्मणयोः । ऋषिमुखानि बह्वृचानां पर्वाणि छन्दोगानां सूक्तान्यथर्वणानाम्–प्रब्रूयादित्यनुवर्तते । सर्वे जपन्ति सह नोऽस्त्विति–अमुं मन्त्रम् । त्रिरात्रं नाधीयीरन् । लोमनखानामनिकृन्तनम्–त्रिरात्रमेव । एके प्रागुत्सर्गात्–लोमनखानामनिकृन्तनमिच्छन्ति, उत्सर्गश्चार्द्धषष्ठान् मासानधीत्योत्सृजेयुरित्येवम् ॥ १० ॥ * ॥

जय०--अथातोऽध्यायोपाकर्म—व्याख्यास्यत इति सूत्रशेषः । अध्यायोऽध्ययनम् । तस्योपाकर्म पौषस्य रोहिण्यां मध्यमाष्टकायां वा एकपाक्षिकोत्सृष्टस्यार्द्धषष्ठानर्द्धसप्तमान्वा मासान् शुक्लपक्षे वेदान्, कृष्णपक्षेऽङ्गानीत्येवमधीत्य ततः सर्वथोत्सृष्टस्य पुनरुपाकरणं स्वीकरणमिति यावत् । एवं च सत्यध्यापनप्रवृत्तस्यैव तद्भवति । अत एवाग्निमतोऽध्यापनं भवति । न ह्यनग्निमाञ्छक्नोत्यग्निसाध्यं कर्म कर्तुमिति । **ओषधीनामिति** । **श्रावण्यां पौर्णमास्यां**—श्रवण एव प्रायः, ओषधीप्रादुर्भावश्च । तदेतदुभयं तस्या एव विशेषणम् । एवं पञ्चम्यामपि । तत्रापि प्रायशो हस्त एव भवति । अत उपाकर्मकालद्वयस्यायं विकल्पः । अपरे तु कालचतुष्टयमाहुः । आज्यभागादीनि अधीयान एव जुहोति । ऋग्वेदे अधीयमाने । एवमग्रेऽपि व्याख्येयम् । "प्रजापतये" इत्यादि चशब्दात्सर्वत्र । तस्य तु पृथग्योगकरणं चतुर्णामपि वेदानां तन्त्रेणोपाकरणे **ब्रह्मणे, छन्दोभ्यश्चे**त्याहुतिद्वयं प्रतिवेदमावर्तते । **प्रजापतये देवेभ्यः** इत्येवमादि तन्त्रेण यथा स्यादिति । **एतदेव** आज्याहुतिकमेव कर्म व्रतविसर्गे, व्रतादेशे चापि भवति । **सदसस्पतिमि**ति मन्त्रेणाचार्योऽक्षतधानास्त्रिर्जुहोति । **सर्वे**—शिष्या अनु सहैवानुवर्तमाना उपांशु मन्त्रं त्रिः पठेयुः । किं कृत्वा, **हुत्वा हुत्वौ**दुम्बरीः **तिस्रस्तिस्रः समिध आदध्युः सावित्र्या**-एकैकामक्षतधानाहुतिम् । समिदाधानं च भेदेन न तु यौगपद्येन । ब्रह्मचारिणश्च शिष्यस्य पूर्वकल्पेन प्रागुपदिष्टविधानेन समिदाधानमन्त्रेणेत्यर्थः । तत्रैव हि प्रकृत्योक्तम्—"एवं द्वितीयां तथा तृतीयाम्" इति । **शन्नो भवन्त्विति** मन्त्रेणा**क्षतधानाः**—अक्षतानां यवानां धानाः भर्जितकणान् दन्तैरनवखण्डयन्तः अचर्वयन्तः प्राश्नीयुः सर्वे । **दधिक्राव्ण इति दधि भक्षयेयुः**-सर्वे बहुत्वोपदेशात् । **स** आचार्यो **यावन्तं** शिष्याणां **गण**मिच्छे**त्तावतस्तिलान् आकर्षफलकेनौ**दुम्बरेण बाहुमात्रेण सर्पाकृतिना **जुहुयात् सावित्र्या शुक्रज्योतिरित्यनुवाकेन वा** । वाशब्दो विकल्पार्थः । ततो धानाभ्यः स्विष्टकृत्, तासां च श्रपणानुपदेशात् श्रितानामेवोपादानम् । **प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टेभ्य ॐकारमुक्त्वा त्रिश्च सावित्रीमध्यायादीन् प्रब्रूयात्**—मन्त्रब्राह्मणयोः । **ऋषिमुखानि बह्वृचानां पर्वाणि छन्दोगानां सूक्तान्यथर्वणानाम्**—प्रब्रूयादित्यनुवर्तते । **सर्वे जपन्ति सह नोऽस्त्वि**त्यमुं मन्त्रम् । अस्यार्थः । तत्र प्रजापतिर्यजुर्ब्रह्मदैवतं जपे० । **इदं ब्रह्म** साङ्गोऽयं वेदः अध्ययनार्थं सह सहभावं प्राप्तानां समवेतानां नोऽस्माकमस्मद्वृद्धये सुस्थिरं भवतु । ततश्च सह मिलितान्नोऽस्मान् अवतु अपायाद्रक्षतु । तथाऽत्र मिलितानां नोऽस्माकमनध्यायाध्ययनशूद्रादिश्रावणादिना उपहतमपीदं ब्रह्म **वीर्यवदस्तु**-अयातयाममस्तु । किञ्च **इन्द्रः**—प्रजापतिः अन्तर्यामी **तत् यथा** यथावत् **वेद** वेदयतु । **येन** ब्रह्मवेदनेन वयं न कञ्चन **विद्विषामहे** द्विष्मः । अनिकृन्तनमपि **त्रिरात्रम् एके—उत्सर्गा**दर्द्धषष्ठानित्युक्तसर्वोत्सर्गात्**प्राक्** लोमनखानामनिकृन्तनमिच्छन्ति ॥ १० ॥ * ॥

हरि०—**अथातोऽध्यायोपाकर्म**—अथ पञ्चमहायज्ञानन्तरम् अध्यायस्य उत्सृष्टस्य अध्ययनस्य उपाकर्म उपाकरणं व्याख्यास्यत इति शेषः । तच्चाग्निमतोऽध्यापनप्रवृत्तस्यैव भवति । "छन्दाँस्युपाकृत्याधीयीत" इति वचनात् । उपाकरणस्य चावसथ्याग्निसाध्यत्वात् निरग्नेर्नाधिकारः । तथा च छन्दोगपरिशिष्टे **कात्यायनः**—"न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम् । स्वगर्भसंस्कृतार्थश्च यावन्नासौ प्रजायते" इति । स्वेन आत्मना आहितः आधानसंस्कृतोऽग्निः स्वः तस्मिन् स्वे अग्नौ अन्यस्य सम्बन्धी संस्कारको होमः अन्यहोमो न स्यात् न भवेत् । किं पर्युदस्य एकां समिदाहुतिं समिधामाहुतिः समिदाहुतिः तां मुक्त्वा वर्जयित्वा । सा च समिदाहुतिः उपाकर्मणि आचार्यस्याग्नौ शिष्यकर्तृका भवति तेनावसथ्याग्नावुपाकर्म भवतीति गम्यते । अतः अध्यापयतोऽपि निरग्नेः साग्नेरपि अनध्यापयतो नाधिकारः । यत्तु लोके ब्रह्मचारिणं पुरस्कृत्य उपाकर्म प्रवर्तते लौकिकेऽप्यग्नौ

तस्याचारं विहाय मूलं न दृश्यते । **ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्याम्**–ओषधीनामपामार्गादीनां प्रादुर्भावे उत्पत्तौ सत्यां श्रवणेन युक्तायां श्रावण्यां पौर्णमास्यां श्रावणस्य शुक्लपञ्चदश्याम् । अत्र ओषधीप्रादुर्भावः, श्रवणश्च पौर्णमास्या एव विशेषणम् । तत्र तयोः प्रायशः सम्भवात् । एवं च सति पौर्णमास्या एव प्राधान्यम् । तस्माद्विशेषणाभावेऽपि पौर्णमास्यां भवति । **श्रावणस्य पञ्चमीं् हस्तेन वा**–ओषधिप्रादुर्भावस्तु सर्वत्रापेक्षितः श्रावणमासस्य पञ्चमीं हस्तेन युक्तां वा प्राप्य भवति तत्रापि प्रायेण हस्तो भवति । अतः श्रावणी पूर्णिमा श्रावणपञ्चमी वा विशिष्टा अविशिष्टा वा उपाकर्मणः कालः । अन्ये तु कालचतुष्टयमाहुः । कथं श्रवणेन वा, श्रावण्यां पौर्णमास्यां वा, श्रावणस्य पञ्चमीं वा, हस्तेन वा भवति ॥ ओषधिप्रादुर्भावस्तु सर्वत्रापेक्षितः । ओषधिप्रादुर्भावे सति श्रवणेन इत्यादि । **आज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति पृथिव्या अग्नय इत्यृग्वेदे अन्तरिक्षाय वायव इति यजुर्वेदे दिवे सूर्यायेति सामवेदे दिग्भ्यश्चन्द्रमस इत्यथर्ववेदे ब्रह्मणे छन्दोभ्यश्चेति सर्वत्र प्रजापतये देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतयेऽनुमतय इति च**–आज्यभागाविष्ट्वा आज्यभागहोमानन्तरम् आज्याहुतीर्जुहोति। तत्र **ऋग्वेदे** अधीयमाने "पृथिव्यै, अग्नये" इति द्वे आहुती जुहोति । **यजुर्वेदे** अधीयमाने "अन्तरिक्षाय, वायवे" इति द्वे । **सामवेदे** अधीयमाने "दिवे, सूर्याय" इति द्वे । **अथर्ववेदे** अधीयमाने "दिग्भ्यश्चन्द्रमसे" इति द्वे "ब्रह्मणे छन्दोभ्यश्च" इति द्वे आहुती सर्वत्र प्रतिवेदमावर्त्तयेत् । सर्वेषु वेदेषु अधीयमानेषु एकतमे वा तथा "प्रजापतये" इत्यादिकाश्च सप्त । चशब्दात्सर्वत्र । एवमेकैकशो वेदाध्ययनोपाकरणपक्षे । यदा पुनश्चतुर्णामपि वेदानां तन्त्रेणोपाकरणकर्म तदा "ब्रह्मणे छन्दोभ्यश्च" इति प्रतिवेदमाहुतिद्वयमावर्त्तयेत् । "प्रजापतये देवेभ्यः" इत्याद्यास्तन्त्रेणैव योगविभागसामर्थ्यात् । **एतदेव व्रतादेशनविसर्गेषु**–एतत् उपाकर्मणि विहितं **पृथिव्या** इत्यादि **अनुमतये** इत्यन्तं होमकर्म । व्रतादेशनं वेदारम्भः; विसर्गः समावर्तनम्, व्रतादेशनानि च विसर्गश्च व्रतादेशनविसर्गास्तेषु भवति । **सदसस्पतिमित्यक्षतधानास्त्रिः सर्वेऽनुपठेयुर्हुत्वा हुत्वौदुम्बर्यस्तिस्रस्तिस्रः समिध आदध्युरार्द्राः सपलाशा घृताक्ताः सावित्र्या**–सदसस्पतिमित्यनेन मन्त्रेण अक्षताश्च धानाश्च अक्षतधानाः ता आचार्यो जुहोति त्रिस्त्रिवारम् । सर्वे च शिष्या एतं मन्त्रम् अनु सह पठेयुः । तथा हुत्वा हुत्वा एकैकामाहुतिं दत्त्वा औदुम्बर्यः उदुम्बरवृक्षोद्भवास्तिस्रस्तिस्र आर्द्राः सरसाः, सपलाशाः पत्रसहिताः, घृताक्ता आज्यलिप्ताः समिधः सर्वे आचार्यप्रमुखाः शिष्या आदध्युः अग्नौ सावित्र्या प्रसिद्धया प्रक्षिपेयुः भेदेन, न तु युगपत् । **ब्रह्मचारिणश्च पूर्वकल्पेन**–तत्र ये ब्रह्मचारिणः शिष्यास्ते पूर्वकल्पेन समिदाधानोक्तमन्त्रेण आदध्युः । अत्र तिस्रस्तिस्र इति वीप्सा न समिद्विषया किन्तु आधातृपुरुषविषया, तेन प्रत्याहुतिम् एकैकामादध्युः । **शं नो भवन्त्वित्यक्षतधाना अखादन्तः प्राश्नीयुः**–**शं नो भवन्तु वाजिन** इत्यनयर्चा अक्षतधाना अखादन्तः दन्तैरनवखण्डयन्तः प्राश्नीयुः भक्षयेयुः । **दधिक्राव्ण इति दधि भक्षयेयुः**–दधिक्राव्णो अकारिषमित्यृचा दधि भक्षयेयुः । **स यावन्तं गणमिच्छेत्तावतस्तिलानाकर्षफलकेन जुहुयात् सावित्र्या शुक्रज्योतिरित्यनुवाकेन वा**–स आचार्यो यावन्तं यावत्संख्याकं शिष्याणां गणं समूहमिच्छेत् तावत्संख्याकान् तिलान् आकर्षफलकेन औदुम्बर्येण बाहुमात्रेण सर्पाकृतिना सावित्र्या सवितृदेवतया गायत्रच्छन्दस्कया प्रसिद्धया जुहुयात् । यद्वा शुक्रज्योतिरित्यनुवाकेन जुहुयात् । गुणफलमेतत् । अतो धानाभ्यः स्विष्टकृते हुत्वमहाव्याहृत्यादिनवाहुतीर्हुत्वा । **प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टेभ्य ॐकारमुक्त्वा त्रिश्च सावित्रीमध्यायादीन् प्रब्रूयादृषिमुखानि बह्वृचानां पर्वाणि छन्दोगानां् सूक्तान्यथर्वणानाम्**–"संस्रव प्राशनानन्तरं प्रत्यङ्मुखेभ्य आसीनेभ्यः शिष्येभ्यः [illegible] उपविष्ट ॐकारं प्रणव-

मुक्त्वा उच्चार्य **तत्सवितुरित्यादिकां** च सावित्रीं निरुक्त्वा मन्त्रब्राह्मणयोः अध्यायानामादीन्
प्रब्रूयात् अध्यापयेत् " इति **यजुर्वेदोपाकरणे। ऋग्वेदोपाकरणे** तु " ऋषिमुखानि मण्डलादीन्
प्रब्रूयात् बह्वृचानां शिष्याणाम् "। "छन्दोगानां सामगानां शिष्याणां सामवेदोपाकरणे पर्वाणि पर्व-
णामादीन् प्रब्रूयात्" । " अथर्वणानां शिष्याणाम् अथर्ववेदोपाकरणे सूक्तानि सूक्तादीन् प्रब्रूयात् "।
**सर्वे जपन्ति सह नोऽस्तु सह नोऽवतु सह न इदं वीर्यवदस्तु ब्रह्म। इन्द्रस्तद्वेद येन यथा न
विद्विषामह इति**–सर्वे आचार्यः शिष्याश्च **सह** नोऽस्त्वित्यमुं मन्त्रं जपन्ति। **त्रिरात्रं नाधीयीरन्
लोमनखानामनिकृन्तनमेके प्रागुत्सर्गात्**–उपाकर्मानन्तरं त्रिरात्रं नाधीयीरन् अध्ययनं न कुर्युः।
त्रिरात्रमेव लोम्नां नखानां च अनिकृन्तनम् अच्छेदनम् । एके आचार्याः लोमनखानामनिकृन्तनं प्रागु-
त्सर्गात् उत्सर्गकर्मतः अर्वाक् इच्छन्ति । उत्सर्गश्च अर्द्धषष्ठान्मासानधीत्योत्सृजेयुरित्येवं वक्ष्यमाण
इति सूत्रार्थः ॥ १० ॥

अथ **पद्धतिः**। श्रावण्यां पौर्णमास्यां श्रवणयुक्तायामयुक्तायां वा श्रावणस्य शुक्लपञ्चम्यां
हस्तयुक्तायामयुक्तायां वा उपाकर्म अध्यायोपाकर्म भवति, तच्च अध्यापनं कुर्वतः औपासनिकस्य
न त्वन्यस्य। तत्र प्रथमप्रयोगविहितमातृपूजापूर्वकं श्राद्धम् आचार्य आवसथ्याग्नौ ब्रह्मोपवेशनाद्याज्य
भागान्ते विशेषमनुतिष्ठेत् । तण्डुलस्थाने अक्षतधाना आसादयेत् प्रोक्षणकाले प्रोक्षेच्च । तथोपक-
ल्पयति । औदुम्बरीः समिधः, दधि, आकर्षफलकं, तिलान् , भक्षार्थं धानाः । तत आज्यभागान्ते
वेदाहुत्यादीनामनुमत्यन्तानां वेदारम्भवद्धोमं विदध्यात्। एकदा सर्ववेदोपाकरणे प्रतिवेदं स्वस्वाहुति-
द्वयं हुत्वा हुत्वा ब्रह्मणे छन्दोभ्य इत्याहुतिद्वयं पुनः पुनर्जुहुयात्। **प्राजापत्याद्या अनुमत्यन्ताः** सप्ता-
हुतीस्तन्त्रेण। अथ **सदसस्पतिमित्यनयर्चा** तत आसादिताभिरक्षतधानाभिः स्रुवेणैकामाहुतिम् आचार्यो
जुहोति इदं सदसस्पतये०। शिष्या अपि मन्त्रमनु पठन्ति । तत आचार्यः शिष्याश्च सर्वे औदुम्बरी-
मार्द्रां सपलाशां घृताक्ताम् एकैकां समिधं **तत्सवितुरित्यादिकया** सावित्र्या अग्नावादध्युः । ब्रह्मचा-
रिणश्च शिष्या अग्निकार्यमन्त्रेण तथैव समिधमादध्युः। एवं द्विरपरं धानाहोमं विधाय एकैकां समिध-
मादध्युः। तत आचार्यः शिष्याश्च उपकल्पितधानाभ्यस्तिस्रस्तिस्रोऽक्षतधाना दन्तैरनवखण्डयन्तो भक्षयेयुः
शन्नो भवन्तु वाजिनः इत्यनयर्चा। तत आचम्य ततो **दधिक्राव्णो अकारिषमित्यनयर्चा** दधि
भक्षयेयुः । तत आचमनानन्तरम् आचार्यो यावन्तं शिष्यगणं कामयेत तावतस्तिलानाकर्षफलकेनादाय
सावित्र्या जुहुयात्। इदं सावित्रे०। **शुक्रज्योतिरित्यनेनानुवाकेन** वा तिलान् जुहुयात्। तत्रेदं मरुद्भ्य
इति त्यागः । ततो हुतशेषधानाभ्यः स्विष्टकृते हुत्वा **महाव्याहृत्यादि प्राजापत्यान्ता** नवाहुतीर्हुत्वा
संस्रवप्राशनं, ब्रह्मणे दक्षिणादानं यथोक्तं कुर्यात्। ततः प्रत्यङ्मुखोपविष्टेभ्यः शिष्येभ्यः प्राङ्मुख
आचार्य उपविष्ट ॐकारमुक्त्वा त्रिवारं च सावित्रीमुक्त्वा **इषे त्वा कृष्णोऽसीत्येवं** मन्त्रस्य अध्या-
यानामादीन् प्रतीकान् ब्रूयात्। तथा च " व्रतमुपैष्यन् स वै कपालान्येवान्यतर उपदधाति" इत्येवं
च ब्राह्मणस्य। ऋग्वेदानां " मण्डलादीन् " छन्दोगानां "पर्वादीन्" अथर्वणानां "सूक्तादीन्"
प्रब्रूयात्। ततः सर्वे आचार्यः शिष्याश्च जपन्ति " सह नोऽस्तु सह नोऽवतु सह न इदं वीर्यवदस्तु
ब्रह्म। इन्द्रस्तद्वेद येन यथा न विद्विषामहे " इति अमुं मन्त्रम्। तदनन्तरं त्रिरात्रमनध्यायं कुर्युः।
यतः–" अनध्यायेष्वध्ययने प्रज्ञामायुः प्रजां श्रियम्। ब्रह्मवीर्यं बलं तेजो निकृन्तति यमः स्वयम् ॥
मन्त्रवीर्यक्षयभयादिन्द्रो वज्रेण हन्ति च । ब्रह्मराक्षसतां चैति नरकश्च भवेद्ध्रुवम् "। लोमनखानां
निकृन्तनं न कारयेयुः त्रिरात्रमेव । प्रागुत्सर्गाद्वा लोमनखनिकृन्तनं वर्जयेयुः । अतो मन्त्र-
ब्राह्मणयोः शुक्लकृष्णपक्षे उत्सर्जनं यावत् निरन्तरं मन्त्रं ब्राह्मणं च अधीयीरन् आचार्येण अध्याप्यमानाः
शिष्याः। **इत्युपाकर्म** ॥ १० ॥ * ॥

गदा०–अथातोऽध्यायोपाकर्म–व्याख्यास्यत इति सूत्रशेषः । अधीयत इत्यध्यायो वेदः, तस्योपाकर्म उपाकरणम् उपक्रमः । एवं हि **मन्वादयः** स्मरन्ति–"श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि । युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्द्धपञ्चमान् " इति । अर्द्धेन सह पञ्चमान् । एवं सत्यध्ययनप्रवृत्तस्यैतद्भवति । अत एवाग्निमतोऽध्यापनं भवति । न ह्यनग्निमान् शक्नोत्यग्निसाध्यं कर्म कर्तुमिति । " निरग्नेरप्येतदुपाकर्म लौकिकाग्नौ भवति" इति **गर्गः** । न चैतत्**कर्का**दिसम्मतम् । " अध्यायोपाकर्म्म " इति वक्ष्यमाणस्य विधिपूर्वकस्य स्वाध्यायप्रारम्भकर्मणो नामधेयम् । "पौषस्य रोहिण्यां मध्यमाष्टकायां वा पाक्षिकोत्सृष्टस्यार्द्धषष्ठानर्द्धसप्तमासान् शुक्लपक्षे वेदाः, कृष्णपक्षेऽङ्गानि इत्येवमधीत्य ततः सर्वथोत्सृष्टस्य पुनरुपाकरणं स्वीकरणम् " इति **जयरामो हरिहरश्च** । अपरे तु श्रावण्यां पौर्णमास्यामुपाकृत्यार्द्धषण्मासानधीत्योत्सर्गं वदन्ति । ततश्च तेषां मते उपाकृतानां वेदानामुत्सर्गः । **मिताक्षरादिधर्मशास्त्रनिबन्धे**ष्वप्येवम् । **हरिहरजयराम**भाष्ययोरुत्सृष्टस्योपाकरणम् । **ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्याम्**–एतदुपाकर्म अपामार्गाद्योषधीनां प्रादुर्भावे उत्पत्तौ सति श्रवणेन युक्तायां पौर्णमास्यां श्रावणशुक्लपञ्चदश्यां कुर्यात् । श्रावण्यां हि पौर्णमास्यां श्रवण एव प्रायशो भवति ओषधिप्रादुर्भावश्च । " तदेतदुभयं तस्या एव विशेषणम् । अत्र पौर्णमास्या एव प्राधान्यात् । विशेषणाभावेऽपि तत्पौर्णमास्यां भवति" इति **हरिहररेणुकौ** । अपरे तु श्रवणयुक्तपौर्णमास्यभावे हस्तयुक्तपञ्चम्यां कार्यमित्याहुः । यदि ग्रहणं संक्रान्तिर्वा पर्वणि भवति दा पञ्चम्यामुपाकरणम् । तदुक्तं **स्मृतिमहार्णवे**–" संक्रान्तिर्ग्रहणं वाऽपि यदि पर्वणि जायते । तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते ।" तथाच–"संक्रान्तिर्ग्रहणं वाऽपि पौर्णमास्यां यदा भवेत् । उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः ॥" **मदनरत्ने**ऽपि–"यदि स्याच्छ्रावणं पर्व ग्रहसंक्रान्तिदूषितम् । स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य तु ॥" तत्रापि **प्रयोगपारिजाते वृद्धमनुकात्यायनौ**–"अर्द्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं तदा । उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत् ॥" इति ॥ अत्र **प्रयोगपारिजाते**–" वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ । उपाकर्म न कर्तव्यं सिंहयुक्ते तदिष्यते ॥" इति वचनं देशान्तरविषयम् । " नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके । कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे ॥" इति **बृहस्पति**वचनात् । **पराशरमाधवीये**ऽप्येवम् । सामगानां सिंहस्थे रवावुक्तेस्तद्विषय इदं पुरोडाशचतुर्द्धाकरणवदुपसंह्रियत इति त्वन्ये । एतच्च शुक्रास्तादावपि कार्यम् । "उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम्" इत्युक्तेः । पर्वणि ग्रहणे सति पूर्वं त्रिरात्रादिवेधाभाव उक्तः **प्रयोगपारिजाते**–"नित्ये नैमित्तिके जप्ये होमयज्ञक्रियासु च । उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते ॥" इति । प्रथमारम्भस्तु न भवति । तत्रैव **कश्यपः**–"गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्द्धकेऽपि वा । तथाऽधिमाससंक्रान्तौ मलमासादिषु द्विजः ॥ प्रथमोपाकृतिर्न स्यात्कृतं कर्म विनाशकृत् ।" इति । एतच्च पूर्वाह्णे कार्यम् । तथा च **प्रचेतो**वचः–"भवेदुपाकृतिः पार्णमास्यां पूर्वाह्ण एव तु" इति । **दीपिका**ऽपि–"अस्य तु विधेः पूर्वाह्णकालः स्मृतः" इति । यत्तु "अध्यायानामुपाकर्म कुर्यात्कालेऽपराह्णके । पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुः ॥ " इति **गोभिल**वचस्तत्**सामग**विषयम् । तेषामपराह्णस्योक्तत्वात् । तेन **वाजसनेयिभिः** पूर्वाह्णव्यापिनी तिथिर्ग्राह्या । "दिनद्वये पूर्वाह्णव्याप्तौ एकदेशस्पर्शे वा **तैत्तिरीय**व्यतिरिक्तानां पूर्वैव" इति **हेमाद्रिः** । **मदनपारिजाते**ऽपि–"पूर्वविद्धायां श्रावण्यां वाजसनेयिनामुपाकर्म" इत्युक्तम् । **मदनरत्ने** तु–"पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः ।" इति **बह्वृचपरिशिष्टे तैत्तिरीयक**पदम् अनुवादत्वात्तस्य च प्राप्त्यधीनत्वात्, प्राप्तेश्च यजुर्वेदिमात्रपरत्वात्सर्वयजुर्वेद्युपलक्षणार्थमित्युक्तम् । तथैवा**नन्तभट्टीये**ऽपि । **कारिकायां** तु–"पूर्णिमा प्रतिपद्युक्ता तत्रोपाकर्मणः क्रिया । उक्तोऽर्थोऽयं प्रसङ्गेन भविष्योत्तरसञ्ज्ञके ॥" वस्तुतस्तु **हेमाद्रि**मतमेव युक्तम् । **पराशरमाधवीये**–"श्रावणी पौर्णमासी तु सङ्गवात्परतो यदि । तदैवौदयिकी ग्राह्या नान्यदौदयिकी भवेत् ॥" **कालादर्शे**ऽपि–"श्रावण्यां प्रौष्ठपद्यां वा प्रतिपत्षण्मुहूर्तकैः । विद्धा स्याच्छन्दसां तत्रोपाकर्मोत्सर्जनं भवेत् ॥" **प्रयोगपारिजाते**–"उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते । धारणाध्ययनाङ्गत्वात् गृहिणां ब्रह्मचारिणाम् ॥ उत्सर्जनं च वेदानामुपाकर्म तथैव च । अकृत्वा वेदजप्येन फलं नाप्नोति मानवः ॥" **श्रावणस्य पञ्चमीं हस्तेन वा**–श्रावणस्य शुक्लपञ्चमीं हस्तेन युक्तां प्राप्य वा भवति । तत्रापि प्रायशो हस्त एव भवति । अतः कालद्वयस्योपाकरणकर्मणो विकल्पोऽयम् । **भर्तृयज्ञास्तु** कालचतुष्टयं वर्णयन्ति । **वासुदेवदीक्षिता** अपि । **आज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति** । **पृथिव्या अग्नय** इति

ऋग्वेदे अन्तरिक्षाय वायव इति यजुर्वेदे दिवे सूर्यायेति सामवेदे दिग्भ्यश्चन्द्रमस इति अथर्ववेदे ब्रह्मणे छन्दोभ्यश्चेति सर्वत्र प्रजापतये देवेभ्यः ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतयेऽनुमतय इति च–आज्याभागानन्तरमाज्याहुतीर्जुहोति ऋग्वेदे अधीयमाने पृथिव्यै स्वाहा अग्नये स्वाहेति द्वे आहुती जुहोति । अन्तारिक्षाय वायवे इति द्वे यजुर्वेदे अधी० । दिवे सूर्यायेति द्वे सामवेदे अधी० । दिग्भ्यश्चन्द्रमस इति द्वे अथर्ववेदे अधी० । सर्वेषु वेदेष्वधीयमानेषु ब्रह्मणे छन्दोभ्यश्चेति द्वे आहुती सर्वत्र प्रतिवेदमावर्त्तयेत् । चशब्दात्प्रजापतय इत्यादिकाश्च सप्त सर्वत्र । पृथग्योगकरणं चतुर्णामपि वेदानां तन्त्रेणोपाकरणे ब्रह्मणे, छन्दोभ्यश्चेत्याहुतिद्वयं प्रतिवेदमावर्तनीयम् । "प्रजापतये" इत्येवमाद्यास्तन्त्रेणैव योगविभागसामर्थ्यात् । **एतदेव व्रतादेशनविसर्गेषु**–एतदेव आज्याहुतिनवकमेव कर्म व्रतादेशेषु वेदारम्भव्रतेषु विसर्गे समावर्त्तने च, व्रतादेशनानि च विसर्गश्च व्रतादेशनविसर्गास्तेषु भवति । **सदसस्पतिमित्यक्षतधानास्त्रिः सर्वेऽनुपठेयुर्हुत्वा हुत्वौदुम्बर्य्यस्तिस्रस्तिस्रः समिध आदध्युरार्द्राः सपलाशा घृताक्ताः सावित्र्या**–धानानां च श्रपणानुपदेशात्सिद्धानामेवोपादानम् । अक्षताश्च ता धानाश्च अक्षतधानास्ताः सदसस्पतिमिति मन्त्रेण आचार्यस्त्रिर्जुहोति । सर्वे शिष्या अनु सहैवानुवर्तमानाः **सदसस्पतिमिति** मन्त्रं त्रिः पठेयुः । किं कृत्वा हुत्वा हुत्वा एकैकामक्षतधानाहुतिम् उदुम्बरवृक्षोद्भवास्तिस्रस्तिस्र आर्द्राः पत्रसहिताः घृतलिप्ताः सामिध आचार्यसहिताः शिष्याः सावित्र्या **तत्सवितुरिति** मन्त्रेणादध्युरग्नौ प्रक्षिपेयुः । न यौगपद्येन । "औदुम्बरीस्तिस्र इति पाठः" इति **हरिहरजयरामौ** । "औदुम्बर्यः" इति तु **कर्कभर्तृयज्ञाः** । "तिस्रस्तिस्र इति वीप्सा आधातृपुरुषविषया न समिद्विषया" इति **हरिहरः** । अतश्च प्रत्याहुति एकैकामेवादध्युः । **ब्रह्मचारिणश्च पूर्वकल्पेन**–तत्र ये ब्रह्मचारिणः शिष्यास्ते पूर्वकल्पेन प्रागुपदिष्टाग्निपरिचरणसमिदाधानमन्त्रेणादध्युः । **शं नो भवन्त्वित्यक्षतधाना अखादन्तः प्राश्नीयुः**–**शं नो भवन्तु वाजिनं** इति मन्त्रेण अक्षतधाना यवानधाना अनवखण्डयन्तः दन्तैरचर्वयन्तः प्राश्नीयुः सर्वे आचार्यसहिताः, बहुवचनोपदेशात् । **दधिक्राव्ण इति दधि भक्षयेयुः**–सर्वे । **स यावन्तं गणमिच्छेत्तावतस्तिलानाकर्षफलकेन जुहुयात्सावित्र्या शुक्रज्योतिरित्यनुवाकेन वा**–स आचार्यो यावन्तं यावत्संख्याकं शिष्याणां गणं समूहमिच्छेत्तावतस्तावत्संख्याकान् तिलान् आकर्षफलकेन औदुम्बरेण बाहुप्रमाणेन सर्पाकृतिना **तत्सवितुरित्यनया** जुहुयात् । **शुक्रज्योतिरित्यनुवाकेन** वा जुहुयात् । ततो धानाभिः स्विष्टकृत् । "कृष विलेखने" धातुस्तस्यैतद्रूपम् । आ समन्तात्कृष्टं फलं यस्य तत् । अथवा आकर्षयतीत्याकर्षः फलमेव फलकं तेन जुहुयात् । तच्च "वैकङ्कतम्" इति **कारिकायाम्** । **प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टेभ्यः शिष्येभ्यः ॐकारमुक्त्वा त्रिश्च सावित्रीमध्यायादीन् प्रब्रूयादृषिमुखानि बह्वृचानां पर्वाणि छन्दोगाना ँ सूक्तान्यथर्वणानाम्**–संस्रवभक्षणान्ते स्वयं प्राङ्मुखः प्रत्यङ्मुखोपविष्टेभ्यः शिष्येभ्यो यजुर्वेदोपाकरणे ॐकारमुक्त्वा उच्चार्य **तत्सवितुरिति** सावित्रीं त्रिरुक्त्वा मन्त्रब्राह्मणयोरध्यायादीन् प्रब्रूयात् अध्यापयेत् । **बह्वृचानां** शिष्याणाम् ऋग्वेदोपाकरणे ऋषिमुखानि मण्डलादीनि प्रब्रूयात् । **छन्दोगानां** शिष्याणां सामवेदोपाकरणे पर्वाणि पर्वणामादीन्प्रब्रूयात् । **अथर्वणानां** शिष्याणामथर्ववेदोपाकरणे सूक्तानि सूक्तादीन् । **सर्वे जपन्ति सह नोऽस्तु सह नोऽवतु सह न इदं वीर्यवदस्तु ब्रह्म । इन्द्रस्तद्वेद येन यथा न विद्विषामह इति**–आचार्यसहिताः सर्वे शिष्याः **सह नोऽस्त्विति** मन्त्रं जपन्ति । मन्त्रार्थः । इदं ब्रह्म साङ्गोऽयं वेदः । अध्ययनार्थं सहभावं प्राप्तानां समवेतानां नोऽस्माकम् अस्मद्धृदये अस्तु स्थिरं भवतु । ततश्च सह मिलितान्नोऽस्मानवतु पायात् रक्षतु । तथाऽत्र मिलितानां नोऽस्माकम् अनध्यायादावध्ययने शूद्रादिश्रवणादिना उपहतमपि इदं ब्रह्म वीर्यवत् अयातयाममस्तु । इन्द्रः प्रजापतिः तत् यथावत् वेद वेदयतु । येन वेदनेन परस्परं न विद्विषामहे न द्विष्मः । **त्रिरात्रं नाधीयीरन् लोमनखानामनिकृन्तनम्**--उपाकर्मोत्तरं त्रिरात्रं नाधीयीरन् सर्वे अध्ययनं न कुर्युः । लोम्नां नखानां च छेदनं त्रिरात्रं न कुर्युः । **एके प्रागुत्सर्गात्**--एके आचार्याः प्रागुत्सर्गाल्लोमनखानामनिकृन्तनमिच्छन्ति । उत्सर्गश्चार्द्धषण्मासानधीत्योत्सृजेयुरिति वक्ष्यते ॥इति श्रीत्रिरग्निचित्सम्राट्स्थपति–महायाज्ञिकश्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे दशमी कण्डिका ॥ १० ॥ * ॥

अथ पदार्थक्रमः । तत्र प्रथमप्रयोगे आचार्येण मातृपूजापूर्वकं नान्दीश्राद्धं कार्यम् । **कारिकायाम्**–"ततो नान्दीमुखं श्राद्धं मातृपूजनपूर्वकम् । गुरोस्तदात्मसंस्कारान् शिष्याणां परार्थतः ॥" आचार्यस्यावसथ्याग्नौ कर्म ।

ब्रह्मोपवेशनाद्याज्यभागान्ते विशेषः । तण्डुलस्थाने अक्षतधानानामासादनम् । प्रोक्षणं च । उपकल्पनीयानि । औदुम्बर्यः समिधः । दधि । आकर्षफलकम् । तिलाः । भक्ष्यार्थं धानाः । आज्यभागान्ते वेदाहुतीनामनुमत्यन्तानां होमो वेदारम्भवत् । एकदा सर्ववेदोपाकरणं चेत्प्रतिवेदमाहुतिद्वयं हुत्वा "ब्रह्मणे, छन्दोभ्यः" इत्याहुतिद्वयं पुनः पुनर्होतव्यम् । प्रजापत्याद्या **अनुमत्यन्ताः** सप्ताहुतयस्तन्त्रेण । ततः **सदसस्पतिमित्यनयर्चा**ऽक्षतधानाहोमः । **सदसस्पतिमिति** मन्त्रं शिष्या अपि अनुपठेयुः । तत आचार्यः शिष्याश्च सर्वे औदुम्बरीस्तिस्रस्तिस्रः समिधः आर्द्राः घृताक्ता आदध्यु**स्तत्सवितुरित्यनयर्चा** । ये तु ब्रह्मचारिणः शिष्यास्तेषामग्निकार्यमन्त्रेणैव समिदाधानं भवति । एवं द्विरपरं धानाहोमः। समिदाधानं च। तत आचार्यः शिष्याश्च तिस्रस्तिस्रोऽक्षतधाना अनवखण्डयन्तः प्राश्नीयुः **शं नो भवन्त्वित्यनयर्चा** । ततः सर्वेषां **दधिक्राव्ण** इत्यृचा दधिभक्षणम् । आचमनं च । ततो यावन्तं शिष्यगणमिच्छेदाचार्यस्तावतस्तिलानाकर्षफलकेन जुहुयात्सावित्र्या । इदं सवित्रे० । **शुक्रज्योतिरित्यनुवाकेन** वा । ततो धानाभिः स्विष्टकृत् । ततो नवाहुतयः । ततः संस्रवप्राशनम् । मार्जनं पवित्रप्रतिपत्तिः । दक्षिणादानं ब्रह्मणे । प्रणीताविमोकः । ततः प्रत्यङ्मुखेभ्य उपविष्टेभ्यः शिष्येभ्यः प्राङ्मुख आचार्य ओँकारमुक्त्वा त्रिश्च सावित्रीमुक्त्वा इषे त्वेत्याद्यध्यायादीन्प्रब्रूयात् । बह्वृचादीनां यथोक्तम्। **सह नोऽस्त्विति** मन्त्रपाठ आचार्यसहितानां शिष्याणाम्। ततस्त्रिरात्रमनध्यायः। लोमनखानामनिकृन्तनं च त्रिरात्रमेव । प्रागुत्सर्गाद्वा लोमनखानामनिकृन्तनम् । ततः परं मन्त्रब्राह्मणयोरध्ययनं प्रागध्यायोत्सर्गात् । इत्युपाकर्मणि **पदार्थक्रमः** । ततो वैश्वदेवः । अत्र रक्षाबन्धनमुक्तं **हेमाद्रौ**–"ततोऽपराह्णसमये रक्षापोटलिकां शुभाम् । कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितैः" इति इदं भद्रायां न कार्यम् । "भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा । श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी" इति **संग्रहवचनात्** । भद्रासत्त्वे तु रात्रावपि तदन्ते कुर्यादिति **निर्णयामृते** । तत्र मन्त्रः । "येन बद्धो बली राजा दानवेन्द्रो महाबलः । तेन त्वामपि बध्नामि रक्षे मा चल मा चल ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः । कर्तव्यो रक्षिकाचारो द्विजान्सम्पूज्य शक्तितः ॥" इति ॥ १० ॥

विश्व०-अथातोऽध्यायोपाकर्म–अध्ययनमध्यायः तस्योपाकर्म अङ्गीकरणं वक्ष्यत इति सूत्रशेषः । एतच्च कृतावसथ्यस्याध्यापनप्रवृत्तस्य भवति । अपरे तु "अध्यापनप्रवृत्तस्य निरग्नेरपि लौकिकेऽग्नौ भवति" इत्याहुः । कथं स्यादत आह । **ओष...मास्यां**–कर्तव्यताधारसमयविशेषणमोषधीनां प्रादुर्भावः। पौर्णमास्यां संभाव्यमानत्वाच्छ्रवणोक्तिः । इयं च श्रावणी षण्मुहूर्तावच्छिन्नौदयिकी ग्राह्या, औदयिकी चेद्धीना स्यात् तदा चतुर्दशीमिश्रिता ग्राह्या । पक्षान्तरमाह–**श्राव...स्तेन वा**–अत्रापि हस्तनक्षत्रं संभाव्यते । अतश्च द्वेधा विकल्पः । केचित्तु पौर्णमासीपञ्चमीश्रवणहस्तान्यादाय चतुर्धा विकल्पमाहुः । कर्तव्यतामाह–**आज्य...इति च**–तत्र प्रथमप्रयोगे मातृपूजाभ्युदयिके विधायोत्सर्गोपाकर्मणोः सामानाधिकरण्यस्य न्याय्यत्वादावसथ्यमादाय शिष्यैः परिवृत उत्सर्गस्थानमुदकान्तं गत्वा जपान्ते पञ्चभूसंस्कारपूर्वकमग्निं स्थापयित्वा ब्रह्मासनास्तरणादिपरिभाषां निर्वर्त्याज्यभागाविष्ट्वा पृथिव्या अग्नय इत्याद्याहुतीर्जुहोतीत्यन्वयः । ब्रह्मणे स्वाहा, छन्दोभ्यः स्वाहेत्येतदाहुतिद्वयं प्रतिवेदोद्देश्यकाहुतिद्वयहोमानन्तरं सर्वत्र वेदाहुतिष्वावर्तते । अनुमतये चेत्यत्र चकारात् आज्यभागाविष्ट्वाऽनुमतिपर्यन्तं पृथिव्यादिसकलदेवतोद्देश्यकाज्याहुतीर्जुहोतीत्यन्वयः । आसादने ग्राम्यसिद्धा अक्षतधानाः, प्रतिशिष्यमौदुम्बर्यस्तिस्रस्तिस्रः समिधः सपलाशाः, दधि, तिलाः । आज्यभागानन्तरं पृथिव्यै स्वाहा इदं पृथिव्यै । अग्नये स्वाहा इदमग्नये । ब्रह्मणे स्वाहा इदं ब्रह्मणे । छन्दोभ्यः स्वाहा इदं छन्दोभ्यः । अन्तरिक्षाय स्वाहा, इदमन्तरिक्षाय । वायवे स्वाहा इदं वायवे । ब्रह्मणे स्वाहा इदं ब्रह्मणे । छन्दोभ्यः स्वाहा इदं छन्दोभ्यः । दिवे स्वाहा इदं दिवे । सूर्याय स्वाहा इदं सूर्याय । ब्रह्मणे० इदं ब्रह्मणे । छन्दोभ्यः स्वा० इदं छन्दोभ्यः । दिग्भ्यः स्वा० इदं दिग्भ्यः । चन्द्रमसे स्वाहा इदं चन्द्रमसे । ब्रह्मणे० इदं ब्र० । छन्दोभ्यः स्वाहा इदं छन्दोभ्यः । प्रजापतये० इदं प्रजापतये० । देवेभ्यः स्वा० इदं देवेभ्यः । ऋषिभ्यः स्वाहा इदमृषिभ्यः । श्रद्धायै स्वाहा इदं श्रद्धायै । मेधायै स्वाहा इदं मेधायै । सदसस्पतये० इदं स० । अनुमतये० इदम० । **एत...गेषु**–एतदेव आज्यभागाद्यनुमतये स्वाहेत्यन्तं कर्म, व्रतादेशाः सावित्राग्नेयशुक्रियादयः विसर्गाश्च तेषामेव तेषु भवतीत्यन्वयः । अन्यदपि नित्यं महाव्याहृत्यादिस्विष्टकृदन्तमाहुतिदशकम् । एवं सर्वत्र व्रतादेशविसर्गादौ सप्तत्रिंशदाहुतयो भवन्ति । **सद...कल्पेन–सदसस्पतिमिति** अक्षतधानाः लौकिकाग्निभृष्टान् यवान् वारत्रयमाचार्यो जुहोति। आचार्येण मन्त्रे पठ्यमाने सर्वे शिष्याः **सदसस्पतिमिति** मन्त्रमनुपठेयुः । यथा आचार्यो धानाः जुहोति तथा शिष्यास्तिस्रस्तिस्रः समिध आदध्युः । किं कृत्वा हुत्वा हुत्वा–किंभूताः आर्द्राः । पुनः कीदृशाः सपलाशाः पलशानि पत्राणि तैः सहिताः । पुनः घृताक्ताः । पुनः कीदृशाः औदुम्बर्यः उदुम्बरवृक्षोद्भवाः । केन मन्त्रेण समिधामाधानमत उक्तं **सावित्र्या तत्सवितुरित्यादिकया**।

ब्रह्मचारिणां विशेषमाह—**पूर्वकल्पेनेति** । पूर्वोक्तः कल्पः पक्षः **अग्नये समिधमाहार्ष**मित्यादिप्रत्यहीयमन्त्रेणेत्यर्थः । तथा च पूर्वमाचार्यस्य धानाहोमः । शिष्याणां धानाहोममन्त्रपाठानन्तरं समन्त्रकः समिद्धोमः । एवं द्विरपरम् आचार्यस्य शिष्याणां च व्यत्यासेन । एवमेकैकस्य शिष्यस्य प्रतिवारं तिसृभिः समिद्भिर्नव समिधः संपद्यन्ते । केचित्तु एकस्यां क्रियायामेकः एकां समिधं प्राक्षिपेत् । तेनैकैकस्य तिस्रः समिधो भवन्तीत्याहुः। **शन्नो...श्नीयु—शन्नोः भवन्त्विति**मन्त्रेण अक्षतानां यवानां धाना भर्जितकणान् दन्तैरनवखण्डयन्तः अचर्वयन्तः प्राश्नीयुः सर्वे । **दधि...येयुः**—सर्वे । आचमनद्वयम् । **स या...यात्**—स आचार्यो यावन्तं शिष्यगणमिच्छेत् तावतस्तिलान् आकर्षफलकेन औदुम्बरेण सर्पाकृतिना बाहुमात्रेण जुहुयात् । **सावि...न वा**—सावित्र्या होमपक्षे इदं सवित्र इति त्यागः । अनुवाकेन होमपक्षे सप्तर्चोऽनुवाकः । त्यागस्तु इदं शुक्रज्योतिषे चित्रज्योतिषे सत्यज्योतिषे ज्योतिष्मते शुक्राय ऋतपायात्यꣳहाय १ । ईदृशे अन्यादृशे सदृशे प्रतिसदृशे मिताय संमिताय सरभसे २ । ऋताय सत्याय ध्रुवाय धरुणाय धर्त्रे विधर्त्रे विधारयाय ३ । ऋतजिते सत्यजिते सेनजिते सुषेणाय अन्तिमित्राय दूरेअमित्राय (गणाय) ४ । ईदृक्षसे एतादृक्षसे सदृक्षसे प्रतिसदृक्षसे मितेभ्यः संमितेभ्यः सरभसे मरुद्भ्यः ५ । स्वतवसे प्रघासिने सान्तपनाय गृहमेधिने क्रीडिने शाकिने उज्जेषिणे ६ । इदमिन्द्राय दैवीभ्यो विड्भ्यो मरुद्भ्यो (मानुषीभ्यः)७ । **प्राशनान्ते**—ततो महाव्याहृत्यादिप्राजापत्यान्तं चतुर्थीकर्म चरुवद्धानानां भक्षणोपघातादाज्येन स्विष्टकृत् । प्राशनं, मार्जनं, पवित्रप्रतिपत्तिः, ब्रह्मणे पूर्णपात्रदानम्, सर्वप्रायश्चित्तहोमः एतावत्प्राशनान्तं तस्मिन्। **प्रत्य...यात्**—शिष्येभ्यः प्रत्यङ्मुखेभ्यः प्राङ्मुख आचार्यः प्रणवपूर्विकां सावित्रीं त्रिवारमुक्त्वा मन्त्रब्राह्मणयोरध्यायादीन्प्रब्रूयादित्यर्थः । **ऋषि...र्वणानां**—प्रब्रूयात् । ऋषिमुखानि बह्वृचानां पर्वाणि छन्दोगानाꣳ सूक्तान्यथर्वणानां प्रब्रूयादित्यनुवृत्तिः । **सर्वे...मह इति**—सर्वे आचार्यशिष्याः । जपानन्तरं बर्हिर्होमः, प्रणीताविमोकः, कर्मापवर्गाः समिधः, उत्सर्जनं ब्रह्मणः, उपयमनकुशानामग्नौ प्रक्षेपः, ब्राह्मणभोजनसंकल्पः, आवसथ्यस्य गृहं प्रत्याहरणं, वैश्वदेवः । **त्रिरा...गीते**—अनिकृन्तनमपि त्रिरात्रम् । एके आचार्याः पौषस्य रोहिण्यामित्यादिवक्ष्यमाणोत्सर्गात् उपाकर्मणश्च प्राक् पूर्वं त्रिरात्रमनिकृन्तनानध्ययने । अपरे तु उत्सर्गादिति ल्यब्लोपे पञ्चमी । ततश्चोत्सर्गाहमारभ्य प्रागुत्तरं च त्रिरात्रमनिकृन्तनानध्ययने भवत इत्याहुः ॥ इति दशमी कण्डिका ॥ १० ॥ ॥ * ॥

अनध्याया:

वातेऽमावास्याया ँ सर्वानध्यायः ॥ १ ॥ श्राद्धाशने चोल्कावस्फूर्जद्भूमिचलनाग्न्युत्पाते * ष्वृतुसन्धिषु चाकालम् ॥ २ ॥ उत्सृष्टेष्वभ्रदर्शने सर्वरूपे च त्रिरात्रं त्रिसन्ध्यं वा ॥ ३ ॥ भुक्त्वाऽऽर्द्रपाणिरुदके निशाया ँ सन्धिवेलयोरन्तः शवे ग्रामे*ऽन्तर्दिवाकीर्त्ये ॥ ४ ॥ धावतोऽभिशस्तपतितदर्शनाश्चर्याभ्युदयेषु च तत्कालम् ॥ ५ ॥ नीहारे वादित्रशब्द आर्तस्वने ग्रामान्ते श्मशाने श्वगर्दभोलूकशृगालसामशब्देषु शिष्टाचरिते च तत्कालम् ॥ ६ ॥ गुरौ प्रेतेऽपोऽभ्यवेयाद्दशरात्रं चोपरमेत् ॥ ७ ॥ सतानूनप्त्रिणि सब्रह्मचारिणि च त्रिरात्रम् ॥ ८ ॥ एकरात्रमर्द्धसब्रह्मचारिणि ॥ ९ ॥ अर्द्धषष्ठान्मासानधीत्योत्सृजेयुः ॥ १० ॥ अर्द्धसप्तमान्वा ॥ ११ ॥ अथेमामृचं जपन्ति उभा कवी युवा यो नो धर्मः परापतत् । परिसख्यस्य धर्मिणो विसख्यानि विसृजामह इति ॥ १२ ॥ त्रिरात्रꣳ सहोष्य विप्रतिष्ठेरन् ॥ १३ ॥ ॥ ११ ॥

कर्कः—**वातेऽमावास्यायामिति सर्वानध्यायः**—वातस्य सर्वदा विद्यमानत्वात् अतिशयितो गृह्यते । सर्वशब्दाच्चाङ्गानामपि न छन्दसामेव । अपरे तु वर्णयन्ति यद्यदुपाध्यायसकाशाद् गृह्यते शिक्ष्यते लिप्याद्यपि तत्सर्वग्रहणेन गृह्यते । शिल्पिनामपि ह्यनध्यायप्रसिद्धिरस्ति । अनध्यायश्च प्रकृतत्वाद् गुरुमुखाद्यच्छिक्ष्यते तत्रैव भवति न गुणनेऽपीति । अपरे तु सर्वविषयतामिच्छन्ति ॥ **श्राद्धाशने चोल्कावस्फूर्जद्भूमिचलनाग्न्युत्पातेष्वृतुसन्धिषु चाकालम्**—आकालिका एते अनध्यायाः । यस्मिन्काले ये आपतिताः द्विती-

---

* "उत्पात ऋतुसन्धिषु" इत्यपि पाठः । * यामे यामान्त्ररित्यपि क्वचित्सूत्रमूलपुस्तकेषु । तच्चिन्त्यम् ॥ दिवाकीर्तिरिति कर्कसम्मतः पाठः ।

येऽहनि तावन्तं कालं यावत् । अपरे श्राद्धाशने वर्णयन्ति । यावत् श्राद्धाशनं न जीर्यते तावदिति । ऋतुसन्धिरप्यकालोऽनध्यायः । सन्धिश्चोच्यते एकस्य ऋतोरन्तः । अपरश्च यावन्न प्रवर्तेत तत्राकालिकताऽनुपपत्तिः । तस्मात्पूर्वस्य ऋतोर्याऽन्त्या रात्रिरपरस्य यदाद्यमहः स सन्धिरित्युच्यते । तत्र नाधीयीत । **उत्सृष्टेषु**–छन्दःसु । उत्सर्गश्चार्द्धषष्ठान् मासानधीत्योत्सृजेयुरर्द्धसप्तमान्वेति । तत्रानध्यायः । **अभ्रदर्शने सर्वरूपे च त्रिरात्रं त्रिसन्ध्यं वा**–अभ्रदर्शनमतिशयिकं गृह्यते, सर्वकालमभ्राणि सन्त्येव । सर्वरूपं च स्तनितविद्युद्वृष्ट्यादि । तत्र त्रिरात्रं त्रिसन्ध्यं वा नाधीयीतेति विकल्पः । अपरे व्यवस्थितं विकल्पमिच्छन्ति । अभ्रदर्शने त्रिसन्ध्यं सर्वरूपे च त्रिरात्रम् । **भुक्त्वाऽऽर्द्रपाणिर्नाधीयीत** । तथा उदके । **न निशायाम्** । निशाशब्देनार्द्धरात्रमुच्यते **स्मृत्यन्तरात्** । **अहोरात्रस्य सन्धिवेलयोः** । **अन्तःशवे ग्रामे** ग्राममध्ये यावच्छवो भवति तावन्नाधीयीत । ग्रामेऽन्तः ग्राममध्ये नाधीयीत । अपरे तु वर्णयन्ति । **अन्तर्दिवाकीर्त्तिरनध्ययनम्** । दिवाकीर्तिर्यद्दिवा कीर्त्यते तत् ग्राममध्ये न पठनीयम् । अन्ये दिवाकीर्तिं चण्डालमभिवदन्ति तद्दर्शने नाधीयीत । तथा च **स्मृत्यन्तरम्**–"दिवाकीर्तिमुदक्यां च स्पृष्ट्वा स्नानं समाचरेत् ॥" **धावतोऽभिशस्तपतितदर्शनाश्चर्याभ्युदयेषु च तत्कालम्**–नाधीयीत । **नीहारे वादित्रशब्द आर्त्तस्वने ग्रामान्ते श्मशाने श्वगर्दभोलूकशृगालसामशब्देषु शिष्टाचरिते च तत्कालम्**–एते तात्कालिकाः । **गुरौ प्रेतेऽपोऽभ्यवेयाद्दशरात्रं चोपरमेत्**–अपोऽभ्यवायेनोदकक्रिया लक्ष्यते । तद्दशरात्रं चानध्ययनं भवति । **सतानूनप्त्रिणि सब्रह्मचारिणि च त्रिरात्रम्**–सह तानूनप्त्रं येन स्पृष्टं स सतानूनप्त्री । समाने ब्रह्मणि यश्चरति स सब्रह्मचारी । **एकरात्रमसब्रह्मचारिणि**–अनध्यायः । **अर्द्धषष्ठान्मासानधीत्योत्सृजेयुः**–उपाकृतानि छन्दाँसि । **अर्द्धसप्तमान्वा**–अधीत्योत्सृजेयुः । ततश्च विकल्पोऽयम् । उत्सर्गश्च छन्दसाम् । अङ्गानि पुनरधीयीतैव । **अथेमामृचं जपन्त्युभा कवी युवेति**–जपन्ति च सहाचार्येण शिष्याः । **त्रिरात्रꣳ सहोष्य विप्रतिष्ठेरन्**–अत्र त्रिरात्रं सहवासनियमः । विप्रतिष्ठा विद्यत एव ॥ ११ ॥ * ॥

जय०–वातस्य सर्वदा विद्यमानत्वादतिशयितोऽत्र गृह्यते । सर्वशब्दादङ्गानां छन्दसामपि तदहरनध्यायः । यद्यदुपाध्यायाद् गृह्यते शिल्पाद्यपि तत्सर्वग्रहणेन गृह्यत इति शिल्पिनामप्यनध्यायप्रसिद्धिरस्ति । अनध्यायश्च गुरुमुखाच्छिक्षितस्यानध्ययनम् । सर्वविषयमित्यन्ये मन्यन्ते । श्राद्धाशने स्वीकृते तथोल्काद्युत्पातेऽपि सर्वानध्याय इत्यनुवर्तते । किं यावत् । **आकालम्**–आकालिका एतेऽनध्यायाः । यावत्कालमुत्पातस्तत्कालपर्यन्तम् । **श्राद्धाशने**–अजीर्ण इत्यपरे यावच्छ्राद्धेऽशितं न जीर्यते तावदिति वर्णयन्ति । **उल्का**–अलातम् । **अवस्फूर्जत्**–विद्योतमाना विद्युत् । भूमेश्चलनं कम्पः । एषामुत्पातेऽभिभवे । **ऋतुसन्धिषु चाकालमन**ध्यायः । ऋतुसन्धिश्चैकस्य ऋतोरन्तः अपरश्च यावन्न प्रवर्तते तत्राकालिकताऽनुपपत्तिः । तस्मात्पूर्वस्य ऋतोर्या अन्तिमा रात्रिरपरस्य च यदाद्यमहः स ऋतुसन्धिरत्रानध्यायः । एवं च सति प्रतिपद्यनध्यायः स्यात् तत्र तु विद्यमानत्वात् द्वितीयायामित्यपरे । **उत्सृष्टेषु**–छन्दस्सु । उत्सर्गोऽर्द्धषष्ठान् मासानधीत्योत्सृजेयुरर्द्धसप्तमान्वेति । एषु **त्रिरात्रम्** । अभ्रदर्शनमत्रातिशयितं गृह्यते । सर्वरूपं च स्तनितविद्युद्वृष्ट्यादिसंघातस्तत्रापि त्रिरात्रमनध्यायः । **त्रिसन्ध्यं** वेति विकल्पः । "अभ्रदर्शने त्रिरात्रं, सर्वरूपे च त्रिसन्ध्यम्" इति व्यवस्थाविकल्प इत्यरे । **भुक्त्वाऽऽर्द्रपाणिर्ना**धीयीत । तथा उदकादौ

स्थितः । निशाशब्देन तन्मध्यमप्रहरो गृह्यते **स्मृत्यन्तरात्** । **सन्धिवेलयोः**—अहोरात्रस्य। **अन्तः-**
शवे ग्रामे—ग्राममध्ये यावच्छवो भवति तावन्नाधीयीरन् । **अन्तः** ग्राममध्य एवेदानीम् । अपरे त्वन्यथा
वर्णयन्ति । **अन्तर्दिवाकीर्त्ये**ऽनध्ययनम् । दिवाकीर्तिश्चाण्डालः, ग्रामे च तस्य दर्शने नाधीयीत ।
यद्दिवैव कीर्त्यते तद्दिवाकीर्त्यं प्रवर्ग्यादि तद् ग्रामे न पठितव्यम् । तथा च **स्मृत्यन्तरम्**—"दिवाकी-
र्तिमुदक्यां च स्पृष्ट्वा स्नानं समाचरेत्" इति । **धावतो**ऽनध्यायः । अभिशस्तो मिथ्याऽभिशप्तः, पतितो
ब्रह्महत्यादिना । तयोर्दर्शने । तथा आश्चर्ये अद्भुतदर्शने । अभ्युदयः पुत्रजन्मादि । एषु **तत्कालं** याव-
न्निमित्तम् । नीहारादिषु च **तत्कालम्** । ग्रामस्यान्ते सीम्नि । श्वादीनां शब्दे श्रूयमाणे । **शिष्टाचरि-**
ते च आगमे तत्कालम् । **गुरौ प्रेते अपोऽभ्यवेयात्**—उदकक्रियां कुर्यात् । **दशरात्रं चोपर-**
मेद्ध्ययनात् । तानूनप्त्रं सोमयागे दीक्षितस्य ऋत्विजां वाऽऽज्यालम्भनम्, सह तानूनप्त्रं स्पृष्टं
येन स सतानूनप्त्री तस्मिन् । तथा समाने ब्रह्मणि यश्चरति स सब्रह्मचारी सहाध्यायी तस्मिंश्च प्रेते त्रिरात्र-
मुपरमेत् । **असब्रह्मचारिणि** त्वेकरात्रम् । अर्द्धषष्ठानिति पौषस्य रोहिण्यां मध्यमायां चाष्टकायाम् ।
उत्सृष्टान्यपि अर्द्धः षष्ठो येषु तान् सार्द्धपञ्चमासान् **अधीत्योत्सृजेयुः** तदुत्सर्गं कुर्युः । **अर्द्धसप्त-**
मान्वेति विकल्पः । उत्सर्गश्चात्र छन्दसामङ्गानां च । आचार्येण सह शिष्या **उभा कवी** इतीमामृचं
जपन्ति । तदर्थः । तत्र परमेष्ठी अनुष्टुप् अश्विनौ जपे० । हे अश्विनौ युवा युवासुभा उभौ यतः कवी क्रान्त-
दर्शनौ । युवा युवानौ च, वचनव्यत्ययः । किञ्च युष्मत्सम्पादितो यो धर्मः नोऽस्माकं धर्मिणः परिसख्यस्य
सुमित्रभावस्य परापतत् रक्षणार्थमागतः तेन धर्मेण विसख्यानि विद्वेषादीनि विषमाध्ययनादीनि वा वयं
विसृजामहे त्यजामहे। किम्भूतस्य सख्यस्य धर्मिणः उपकारादिधर्मवतः परस्परमनुकूलस्येत्यर्थः । **त्रिरात्र-**
मिति—अत्र त्रिरात्रं सहवासनियमः । विप्रतिष्ठाऽनुवर्तत एव विद्यत एव ॥ ११ ॥ * ॥

हरि०—त्रिरात्रं नाधीयीरन् इत्यनध्यायप्रसङ्गादनध्यायानाह—**वातेऽमावास्यायामिति सर्वा-**
नध्यायः—वाते वायौ प्रचण्डे वाति सति । वातमात्रस्य सर्वदा विद्यमानत्वात् नानध्यायनिमित्तता ।
अमावास्यायां दर्शे च सर्वानध्यायः सर्वत्र वेदेषु वेदाङ्गेषु चानध्यायः अध्ययननिवृत्तिः सर्वानध्यायः ।
मन्तान्तरे तु यद् गुरुमुखाच्छिक्ष्यते शिल्पश्रमादि; तत्राप्यनध्यायः । यतः शिल्पिनः स्थपत्यादयः
श्रमिणो मल्लादयः अनध्यायं मन्यमाना दृश्यन्ते । अतो यत्किञ्चिदुपाध्यायादधीयते श्रूयते वा शिक्ष्यते
वा तत्र सर्वत्रानध्यायः । स चानध्यायः गुरोः सकाशात् अनधीताध्ययने अध्यापकधर्मप्रकरणात्, न
गुणनेऽपि । केचित्तु सर्वशब्दस्य गुणनादिविषयतां मन्यन्ते, तन्मतेनापूर्वाध्ययनं न चाधीतस्याभ्यसन-
मपि । **श्राद्धाशने चोल्कावस्फूर्जद्भूमिचलनाग्न्युत्पातेष्वृतुसन्धिषु चाकालम्**—न केवलममावा-
स्यायाम्, अपि तु श्राद्धाशने च श्राद्धान्नस्य भोजने अशने भक्षणे च, उल्का ज्वालाकृतिः पतन्ती
तारका । अवस्फूर्जन्ती विद्योतमाना विद्युत् । भूमिः पृथिवी तस्याश्चलनं कम्पः भूमिचलनम् । अग्निः
प्रसिद्धः । उल्का च अवस्फूर्जच्च भूमिचलनं च अग्निश्च उल्कावस्फूर्जद्भूमिचलनाग्नयः तेषामुत्पातः उत्पतनं
तस्मिन् । ऋतुसन्धिषु ऋतूनां सन्धयः अन्तरालानि ऋतुसन्धयः तेषु सर्वानध्याय इत्यनुवर्तते । किं यावत्
आकालं यस्मिन्काले यस्य निमित्तस्य उल्कादेरापतनम् अपरदिने तावत्कालपर्यन्तम् आकालम् । केचित्तु
श्राद्धाशने यावदन्नं जीर्यते तावदनध्यायमाहुः । ऋतुसन्धिशब्देन एकस्य ऋतोः अपरस्य यावदप्रवृत्तिः
स काल उच्यते तत्राकालिकता नोपपद्यते। ततश्च पूर्वस्यर्तोः अन्त्या रात्रिः उत्तरस्य आद्यमहः तावानन-
ध्यायः। **उत्सृष्टेष्वभ्रदर्शने सर्वरूपे च त्रिरात्रं त्रिसन्ध्यं वा**—उत्सृष्टेषु छन्दःसु वक्ष्यमाणेन पुनर्विधिना
छन्दसामुत्सर्गे कृते अनध्यायः । अभ्रस्य मेघस्य अतिशायितस्य दर्शने आविर्भावे, विद्युदभ्रवायुवृष्टिग-
र्जितानां युगपत्प्रवृत्तिः सर्वरूपं तस्मिन् सर्वरूपे च त्रिरात्रं त्रीण्यहोरात्राणि वा, त्रिसन्ध्यं सन्ध्यात्रय-

मनध्याय इति चकारेणानुगृह्यते । अन्येषां पक्षे "अभ्रदर्शने त्रिसन्ध्यं, सर्वरूपे त्रिरात्रम्" इति व्यवस्थितो विकल्पः । **भुक्त्वाऽऽर्द्रपाणिरुदके निशायाम्**–भुक्त्वाऽशित्वा यावदार्द्रपाणिस्तावदनध्याय इत्यनुषङ्गः। उदके यावत्तिष्ठति तावत्। निशायां महानिशायां "महानिशा च विज्ञेया मध्यस्थं प्रहरद्वयम्" इति स्मरणात् "रात्रेः पूर्वोत्तरौ यामौ वेदाभ्यासेन तौ नयेत्" इति वचनेन रात्रेः पूर्वचतुर्थयामयोर्वेदाभ्यासविधानात् द्वितीयतृतीयप्रहरयोः पारिशेषादनध्याय इत्यर्थान्महानिशा लभ्यते । **सन्धिवेलयोः**–अहोरात्रयोः सन्धिवेले तयोः सन्ध्याकालयोरित्यर्थः । **अन्तःशवे ग्रामे**–अन्तर्मध्ये शवः मृतशरीरं यस्य सः तस्मिन् ग्रामे तावदनध्यायः । **अन्तर्दिवाकीर्त्ये**–दिवाऽह्नि कीर्त्यं पठनीयं यत् प्रवर्ग्यादि तद्दिवाकीर्त्यं तस्मिन् दिवाकीर्त्ये विषये अन्तर्ग्राममध्ये अनध्यायः । पक्षान्तरे तु अन्तः सन्निहितो दिवाकीर्तिश्चण्डालो यत्र सोऽन्तर्दिवाकीर्त्यो देशः; तत्रानध्यायः । **धावतोऽभिशस्तपतितदर्शनाश्चर्याभ्युदयेषु च तत्कालम्**–धावतः शीघ्रं गच्छतः अभिशस्तः ब्रह्महत्यादिपापेनाभियुक्तः पतितो ब्रह्महत्यादिना पापेन। अभिशस्तश्च पतितश्च अभिशस्तपतितौ तयोर्दर्शनम् । आश्चर्यमद्भुतम् । अभ्युदयः पुत्रजन्मविवाहादि । एतेषु धावनादिनिमित्तेषु तत्कालं यावन्निमित्तं तावत्कालमनध्यायः । **नीहारे वादित्रशब्द आर्तस्वने ग्रामान्ते श्मशाने श्वगर्दभोलूकशृगालसामशब्देषु शिष्टाचरितेषु च तत्कालम्**–नीहारे धूमरिकायां, वादित्राणां मृदङ्गादीनां शब्दे, आर्तस्य दुःखितस्य स्वने शब्दे, ग्रामस्यान्ते सीम्नि, श्मशाने प्रेतभूमौ, श्वा च गर्दभश्च उलूकश्च शृगालश्च साम च श्वगर्दभोलूकशृगालसामानि तेषां शब्दे श्रूयमाणे शिष्टाचरिते च शिष्टस्य श्रोत्रियस्य आचरिते आगमने तत्कालं यावत् तन्निमित्तं तावत्कालमनध्यायः । **गुरौ प्रेतेऽपोऽभ्यवेयाद्दशरात्रं चोपरमेत्**–गुरौ आचार्ये, प्रेते मृते अपो जलम् अभ्यवेयात् प्रविशेत् स्नानपूर्वकमुदकदानाय। दशरात्रं दशाहानि अध्ययनादुपरमेत् । **सतानूनप्त्रिणि सब्रह्मचारिणि च त्रिरात्रम्**–तानूनप्त्रं नाम सोमयागे ऋत्विजां दीक्षितस्य च आज्याभिमर्शनलक्षणं कर्म, समानं तानूनप्त्रं यस्यास्तीति स सतानूनप्त्री तस्मिन् सतानूनप्त्रिणि प्रेते । समाने तुल्ये ब्रह्मणि वेदे चरति स सब्रह्मचारी, तस्मिन् सब्रह्मचारिणि सहाध्यायिनि समानाचार्ये प्रेते त्रिरात्रमनध्यायः । **एकरात्रमसब्रह्मचारिणि**–न सब्रह्मचारी असब्रह्मचारी तस्मिन् असब्रह्मचारिणि भिन्नाचार्ये सहाध्यायिनि प्रेते एकरात्रमनध्यायः । **अर्द्धषष्ठान्मासानधीत्योत्सृजेयुः**–अर्द्धः षष्ठो मासो येषां मासानां ते अर्द्धषष्ठा मासाः तान् मासानधीत्य पठित्वा उत्सृजेयुः । पूर्वं श्रावण्यादौ उपाकृतानि छन्दांसि । **अर्द्धसप्तमान्वा**–अर्द्धः सप्तमो येषां ते अर्द्धसप्तमाः तान् अर्द्धसप्तमान् मासान् वा अधीत्य छन्दांसि उत्सृजेयुरिति पूर्वोक्तेन सम्बन्धः । अत्र छन्दसामुत्सर्गोपदेशात् अङ्गाध्ययनमनुज्ञायते । **अथेमामृचं जपन्ति उभा कवी युवा इति**–आचार्येण सह शिष्याः **उभा कवी युवा** इतीमामृचं जपन्ति–"उभा कवी युवा यो नो धर्मः परापतत् । परिसख्यानि धर्मिणो विसख्यानि विसृजामहे" इति इमामृचं जपन्ति ।**त्रिरात्रꣳ सहोष्य विप्रतिष्ठेरन्**–त्रिरात्रं सह एकत्र उषित्वा विप्रतिष्ठेरन् विप्रवासं कुर्युः विशेषेण प्रवासं कुर्युरिति सूत्रार्थः ॥ ११ ॥ * ॥

गदा०–**वातेऽमावास्यायाꣳसर्वानध्यायः**–वाते वायौ प्रचण्डे सति, वातस्य सर्वदा विद्यमानत्वादतिशयितोऽत्र ग्राह्यः। सर्वशब्दाच्चाङ्गानामपि न छन्दसामेव । यद्यदुपाध्यायसकाशाद् गृह्यते शिल्पाद्यपि तत्सर्वग्रहणेन गृह्यते। शिल्पिनामपि हि अनध्यायप्रसिद्धिरस्ति । अनध्यायश्च प्रकृतत्वाद् गुरुमुखाद्यच्छिक्ष्यते तत्रैव भवति न गुणनेऽपीति । अपरे तु सर्वविषयतामिच्छन्ति । **श्राद्धाशने चोल्कावस्फूर्जद्भूमिचलनाग्न्युत्पातेष्वृतुसन्धिषु चाकालम्**–आकालिका एते अनध्यायाः । आकालं यस्मिन्काले उल्कादेरापतनम् अपरदिने तावत्कालपर्यन्तम् श्राद्धाशने श्राद्धान्नभोजने, श्राद्धान्ने जीर्णे इत्यपरे । उल्का ज्वालाकृतिः पतन्ती तारका । अवस्फूर्जत् विद्योतमाना विद्युत् । भूमिचलनं भूमेः कम्पः । अग्निर्ग्रामदाहः । एषामुत्पात उत्पतनम् तस्मिन् । ऋतुसन्धिशब्देन एकस्य ऋतोरन्तः

अपरस्य यावदप्रवृत्तिः स काल उच्यते । तत्र चाकालिकता नोपपद्यते । ततश्च पूर्वस्यान्तोऽन्त्या रात्रिः उत्तरस्याद्यम-
हस्तावाननध्यायः । **उत्सृष्टेष्वभ्रदर्शने सर्वरूपे च त्रिरात्रं त्रिसन्ध्यं वा**—उत्सृष्टेषु छन्दःसु वेदानामुत्सर्गे कृते ।
अभ्रदर्शनमत्रातिशयितं गृह्यते सर्वकालमभ्रस्य विद्यमानत्वात् । विद्युदभ्रवायुवृष्टिगार्जितानां युगपत्प्रवृत्तिः सर्वरूपम् ।
तत्रापि त्रिरात्रमनध्यायः । त्रिसन्ध्यं वेति विकल्पः । अभ्रदर्शने त्रिरात्रं, सर्वरूपे च त्रिसन्ध्यमिति व्यवस्थितवि-
कल्प इत्यन्ये । **भुक्त्वाऽऽर्द्रपाणिरुदके निशायां सन्धिवेलयोरन्तःशवे ग्रामेऽन्तर्दिवाकीर्त्ये**—भुक्त्वा याव-
दार्द्रपाणिस्तावन्नाधीयीत । तथोदके यावत्तिष्ठति तावत्, निशायाम् " स्मृत्यन्तरान्निशाशब्देनार्द्धरात्रमुच्यते " इति
कर्कः । " महानिशा च विज्ञेया मध्यस्थं प्रहरद्वयम् " इति स्मरणात् । "रात्रेः पूर्वोत्तरौ यामौ वेदाभ्यासेन तौ
नयेत्" इति वचनेन रात्रेः पूर्वचतुर्थयामयोर्वेदाभ्यासविधानाद् द्वितीयतृतीययोः परिशेषादनध्याय इति **हरिहरः** ।
सन्धिवेलयोः अहोरात्रयोः सन्ध्याकालयोः । अन्तःशवे ग्रामे ग्राममध्ये यावच्छवं मृतशरीरं भवति तावन्नाधीयीत ।
अन्तर्दिवाकीर्त्ये, दिवा आह्नि कीर्त्यं पठनीयं यत् प्रवर्ग्यादि तद्दिवाकीर्त्यं तस्मिन्विषये ग्रामे अनध्यायः तद् ग्राममध्ये
न पठनीयम्।सूत्रयोजनायां ग्रामपदं काकाक्षिगोलकन्यायेनोभयत्र योजनीयम् । ग्रामेऽन्तर्दिवाकीर्त्ये इति।अन्ये तु अन्तः
सन्निहितो दिवाकीर्तिश्चाण्डालो यत्र सोऽन्तर्दिवाकीर्त्यो देशस्तत्रानध्यायः।**धावतोऽभिशस्तपतितदर्शनाश्चर्याभ्युदयेषु**
च तत्कालम्—धावतः शीघ्रं गच्छतः । अभिशस्तो ब्रह्महत्यादिपापेनाभियुक्तः,पतितो ब्रह्महत्यादिपापेन।अभिशस्तपति-
तयोर्दर्शनम् । आश्चर्यमद्भुतमिन्द्रजालादि । अभ्युदयः पुत्रजन्मविवाहादि । एषु धावनादिनिमित्तेषु तत्कालं याव-
न्निमित्तं तावत्कालमनध्यायः । **नीहारे वादित्रशब्दे आर्तस्वने ग्रामान्ते श्मशाने श्वगर्दभोलूकशृगालसाम-**
शब्दे शिष्टाचरिते च—नीहारे धूमरिकायाम् । वादित्राणां मृदङ्गादीनां शब्दे । आर्तस्य दुःखितस्य स्वने शब्दे ।
ग्रामस्यान्ते सीम्नि । श्मशाने मृतकदाहभूमौ । श्वा च गर्दभश्च उलूकश्च शृगालश्च साम च श्वगर्दभोलूकशृगालसा-
मानि तेषां शब्दे श्रूयमाणे । शिष्टाचरिते च शिष्टस्य श्रोत्रियस्याचरिते आगमने, चकारात् तत्कालं यावन्निमित्तमन-
ध्यायः । **गुरौ प्रेतेऽपोऽभ्यवेयाद्दशरात्रं चोपरमेत्**—गुरौ आचार्ये प्रेते मृते अप उदकम् अभ्यवेयात् प्रविशेत्,
स्नानपूर्वकमुदकदानाय । दशरात्रं दशाहानि स्वाध्यायादध्ययनादुपरमेत् । **सतानूनप्त्रिणि सब्रह्मचारिणि च**
त्रिरात्रम्—"तानूनप्त्रं ध्रौवं व्रतप्रदाने गृह्णात्यापतय इति, द्विश्च स्थाल्याः स्रुवेण तानूनप्त्रमेतद्दक्षिणस्यां वेदिश्रोणौ
निधायावमृशन्त्यृत्विजो यजमानश्चानाधृष्टम्" इति **ज्योतिष्टोमे** विहितम् । सह तानूनप्त्रम् आज्यं येन स्पृष्टं स
सतानूनप्त्री तस्मिन् सतानूनप्त्रिणि प्रेते । समाने तुल्ये ब्रह्मणि वेदे चरतीति सब्रह्मचारी तस्मिन् सब्रह्मचारिणि
सहाध्यायिनि समानाचार्ये च प्रेते त्रिरात्रं स्वाध्यायादुपरमेत् । **एकरात्रमसब्रह्मचारिणि**—न सब्रह्मचारी
तस्मिन् भिन्नाचार्ये प्रेते एकरात्रमनध्यायः । **अर्धषष्ठान्मासानधीत्योत्सृजेयुः**—अर्द्धः षष्ठो मासो येषां
ते अर्द्धषष्ठाः मासास्तानर्द्धषष्ठान्मासानधीत्य पठित्वोत्सृजेयुः । पूर्वमुपाकृतानि स्वीकृतानि छन्दांसि उत्सृजेयुः ।
उत्सर्गश्छन्दसामेव । अङ्गानि पुनरधीयीत । **अर्धसप्तमासान्वा**—अधीत्योत्सृजेयुरिति शेषः । अर्द्धः सप्तमो मासो
येषु ते अर्द्धसप्तमासाः । **अथेमामृचं जपन्त्युभा कवी युवा यो नो धर्मः परापतत् । परिसख्यस्य धर्मिणो**
विसख्यानि विसृजामहे इति—उत्सर्गानन्तरमाचार्येण सह शिष्या **उभा कवी** इतीमामृचं जपन्ति उच्चार-
यन्ति । मन्त्रार्थः । हे आश्विनौ युवाम् उभा उभौ यतः कवी क्रान्तदर्शनौ । युवा युवानौ । युष्मत्सम्पादितो धर्मो
नोऽस्माकं परिसख्यस्य सुमित्रभावस्य परापतत् रक्षणार्थमागतः । तेन धर्मेण विसख्यानि विद्वेषादीनि विषमाध्ययना-
दीनि वा विसृजामहे त्यजाम । किम्भूतस्य सख्यस्य धर्मिणः उपकारादिधर्मवतः परस्परमनुकूलस्येत्यर्थः । **त्रिरात्रं**
सहोष्य विप्रतिष्ठेरन्—अत्र त्रिरात्रं सह एकस्मिन् गृहे आचार्यसहिताः शिष्या निवासं कृत्वा विप्रतिष्ठेरन् विविधं
प्रवासं कुर्युः । त्रिरात्रं सहवासनियमः । विप्रतिष्ठात्र विद्यत एव ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति—महायाज्ञिक-
श्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे एकादशी कण्डिका ॥ ११ ॥ * ॥

विश्व०—-अनध्यायानाह—**वातेऽमावास्यायामिति—सर्वानध्यायः**—प्रचण्डे वाते, अन्यथा तस्य साधारणस्य
सार्वकालिकत्वात् । सर्वपदमङ्गादिपरम् । शिल्पिनामपीत्यन्ये । अपरे तु गुर्वधीनपदार्थमात्रगोचरानध्ययनमाहुः । " स्वाधी-
नतां प्रापितस्याप्यनभ्यसनम् " इति केचित् । "व्यस्तयोर्वातामावास्ययोरध्ययननिषेधप्रयोजकत्वे समुदितयोर्विहितश्राद्धा-
दिव्यतिरिक्तकर्तव्यतामात्रनिषेधकता " इति नव्याः । **श्राद्धाशने च**—श्राद्धाशनादिनेऽनध्याय इत्यर्थः । **उल्का...**
कालं—यस्मिन्काले उल्काद्युत्पात आपतति अपरादिनेऽपि तत्कालपर्यन्तम् । उल्का अलातम्, अवस्फूर्त विद्युत्, चलनं

क्रिया। उत्पातः अनिष्टत्वसूचको ग्रहविशेषः । ऋतुसंधिश्च धर्मशास्त्रेषु ऋतुसंधित्वेन प्रसिद्धमहोरात्रम्। पूर्वऋतोरन्त्या रात्रिः अपरस्यर्तोराद्यमहरित्यन्ये । **उत्सृ...संध्यं वा**—उत्सृष्टेषु छन्दःसु त्रिरात्रम् । अभ्रदर्शनमहरभ्रदर्शनम् । सर्वरूपता च स्तनितविद्युद्वृष्ट्यादिसंघातः । तस्मिन्निमित्ते त्रिरात्रं त्रिसंध्यं वेति विकल्पः । "अभ्रदर्शने त्रिसंध्यं संघाते च त्रिरात्रम्" इति व्यवस्थितं विकल्पमन्ये । **भुक्त्वाऽऽर्द्रपाणिः**—नाधीयीतेति शेषः । **उदके निशायां**—निशायाः मध्यमौ प्रहरौ । अर्द्धरात्रमित्यन्ये । **संधिवेलयोः**—अहोरात्रस्य । **अन्तःशवे ग्रामेऽन्तः**—अन्तर्मध्ये शवो यस्य तस्मिन्नन्तर्मध्ये नाधीयीत । यावद् ग्राममध्ये शवस्तावदन्तर्नाध्ययनामित्यर्थः । **दिवाकीर्त्ये**—दिवाकीर्तिश्चाण्डालः तद्ग्रामे नाधीयीत । केचित्पूर्वसूत्रस्थमन्तःपदमस्मिन्सूत्रे योजयन्ति । अन्तर्दिवाकीर्त्ये चाण्डाले ग्राममध्ये सत्यनध्यायः। दिवैव कीर्त्यत इति दिवाकीर्त्यं प्रवर्ग्यं ग्राममध्ये तस्मिञ्जायमाने तस्मिन्ग्रामेऽनध्यायमाहुः । केचित्तु दिवाकीर्तेश्चाण्डालस्य दर्शनं दिवाकीर्त्यं तास्मिन्सत्यनध्यायमाहुः । **धावतो...त्कालम्**—अभिशस्तो मिथ्याभिशस्तः, पतितो ब्रह्महत्यादिना । तयोर्दर्शने तथा आश्चर्यमद्भुतदर्शनम् । अभ्युदयः पुत्रजन्मादिः । एषु तत्कालं यावन्निमित्तम् । **नीहा...तेषु च**—ग्रामस्यान्ते सीम्नि श्वादीनां शब्दे श्रूयमाणे । आचारितमागमनमेषु । तत्कालमित्यनुषङ्गार्थश्चकारः । **गुरौ...मेत्**—अपोऽभ्यवेयात् प्रेतोदकक्रियां कुर्यात् । अध्ययनादुपरमेच्च दशरात्रम् । **सता...रात्रम्**—तानूनप्त्रमाज्यविशेषः । सह तानूनप्त्रमाज्यं गृहीतं स्पृष्टं वा येनासौ सतानूनप्त्री तस्मिन्, तथा सब्रह्मचारिणि समानाचार्योपनीते त्रिरात्रमध्ययनादुपरमेत् । **एक...रिणि**—अध्ययनमात्रं सह कुर्वाणे । **अर्द्ध...जेयुः**—अर्द्धः षष्ठो येषु तान्सार्द्धपञ्चमानित्यर्थः । एतच्च श्रावण्यामुपाकर्मपक्षे। मासवृद्धिरभ्युपेत्याह—**अर्द्धसप्तमान्वा**—अर्द्धः सप्तमो येषां, वाशब्दोऽवधारणे । छन्दसामुत्सर्गादङ्गाध्ययनम् । यद्वा माघाष्टकाया मध्यमत्वविवक्षयाऽर्धसप्तमान्वेत्युक्तम् । आस्मिन्पक्षे वाशब्दो विकल्पार्थ इत्येके । **अथेमा...मह इति**—अथ उत्सर्गानन्तरमिमामुभा **कवी युवा...हे**—इती मामाचार्यः शिष्याश्च ऋचं जपन्तीत्यर्थः । **त्रिरा...रन्**—अत्र त्रिरात्रे सहवासनियमे विप्रवासांशोऽनुवादः । अतश्च सति प्रयोजने विप्रतिष्ठेरन् प्रवासं कुर्युः । इत्येकादशी कण्डिका ॥ ११ ॥ ॥ * ॥ उत्सर्गविधिः

✓**पौषस्य रोहिण्यां मध्यमायां वाऽष्टकायामध्यायानुत्सृजेरन् ॥ १ ॥ उदकान्तं गत्वाऽद्भिर्देवाँश्छन्दाᳬंसि वेदानृषीन्पुराणाचार्यान् गन्धर्वानितराचार्यान्संवत्सरं च सावयवं पितॄनाचार्यान्स्वाँश्च तर्पयेयुः ॥ २ ॥ सावित्रीं चतुरनुद्रुत्य विरताः स्म इति प्रब्रूयुः ॥ ३ ॥ क्षपणं प्रवचनं च पूर्ववत् ॥ ४ ॥ १२ ॥ * ॥ * ॥**

कर्कः—**पौषस्य रोहिण्यां मध्यमायां वाऽष्टकायामध्यायानुत्सृजेरन्**—पौषमासे रोहिणीषु मध्यमाऽष्टकाऽपि पौष एव तत्राध्यायोत्सर्गः । **उदकान्तं गत्वाऽद्भिर्देवाँश्छन्दाᳬंसीत्यत** आरभ्य **स्वाँश्च तर्पयेयुरित्येवमन्तं** सूत्रम् । **उदकान्तं गत्वा** उदकान्ते गमनेन च स्नानमुपलक्ष्यते । ततोऽद्भिर्देवाँस्तर्पयेयुराचार्यसहिताः शिष्याः देवास्तृप्यन्तु, छन्दांसि तृप्यन्त्वित्येवमादि । **सावित्रीं चतुरनुद्रुत्य विरताः स्म इति प्रब्रूयुः** ॥ **क्षपणं प्रवचनं च पूर्ववत्**—पूर्वशब्देनोपाकर्मकालो लक्ष्यते । तद्वत्क्षपणं भवति प्रवचनं चाध्यायादीनाम् ॥ १२ ॥ * ॥

जय०—पौषमासि रोहिणीषु । मध्यमाऽष्टकाऽपि पौष एव तत्राध्यायोत्सर्गः । कृष्णपक्षेषु सार्द्धपञ्चमासान् । उत्सर्गप्रकारमाह—**उदकान्तं गत्वेति** । उदकान्तगमनेन च स्नानमुपलक्ष्यते । **ततोऽद्भिर्देवांस्तर्पयेयुरा**चार्यसहिताः शिष्याः । देवास्तृप्यन्ताम्, छन्दांसि तृप्यन्तामित्येवमाद्याचार्यान्तान् सन्तर्प्य अपसव्यं प्राचीनावीतिन आचार्यसहिता दक्षिणामुखाः स्वांश्च पित्रादीनविद्यमानानेव तर्पयेयुः । **सावित्रीं चतुरनुद्रुत्य** पठित्वा **विरताः स्म** इतीमं मन्त्रं **प्रब्रूयुः** उक्त्वोत्सर्गं कुर्युरित्यर्थः । विरामश्च स्वाध्यायादोपाकर्म । ततः **क्षपणम्**—अनध्यायो लोमनखानामनिकृन्तयं च । प्रवचनं चाध्यायादीनां पूर्ववत् उपाकर्मवत् । ततस्त्रिरात्रानन्तरं शुक्लपक्षेषु छन्दाँस्यधीयीरन् कृष्णपक्षेष्वङ्गानि । ततोऽर्द्धषष्ठान्मासानेवमेवाधीत्य सर्वथोत्सृज्य उपाकृत्य वाऽधीयीतेति सिद्धम् ॥ १२ ॥ * ॥

---

१ उत्पतति अकस्मादापतति च । प्राणिनां शुभाशुभसूचकमहाभूतविकारभूकम्पादिः । इत्यमरव्याख्यायां भरतोक्तिः ।

CC-0. In Public Domain. [illegible] Delhi Collection

हरि०—**पौषस्य रोहिण्यां मध्यमायां वाऽष्टकायामध्यायानुत्सृजेरन्**—पौषमासस्य रोहिणीनक्षत्रे मध्यमायां पौष्या ऊर्द्ध्वाष्टकायाम् अष्टम्यां वा अध्यायान्स्वाध्यायानुत्सृजेरन् पूर्वमुपाकृतान्, पुनरुपाकरणं यावन्नाधीयीरन्नित्यथः।**उदकान्तं गत्वाऽद्भिर्देवांश्छन्दांꣳसि वेदानृषीन् पुराणाचार्यान्गन्धर्वानितराचार्यान् संवत्सरं च सावयवं पितॄनाचार्यान्स्वांश्च तर्पयेयुः**—कथमुत्सृजेरन्नित्यपेक्षायामुच्यते।उदकान्तं नद्याद्युदकसमीपं गत्वा,उदकसमीपगमनात् स्नानं लक्ष्यते।ननु"मासद्वयं श्रवणादि सर्वा नद्यो रजस्वलाः । तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः"इति **छन्दोगपरिशिष्टे** नदीस्नानस्य निषेधात् कथं नद्याद्युच्यते? सत्यम्।"उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च।चन्द्रसूर्योपरागे च रजोदोषो न विद्यते ॥" इत्यपवादवचनात् न दोषः । ततो यथाविधि स्नात्वा माध्याह्निकं कर्म "देवा गातुविदः" इत्येतत्प्राक् निर्वर्त्य सप्तर्षिपूजावंशानुपठनानन्तरं देवास्तृप्यन्तां छन्दांसि तृप्यन्तामित्येवमाचार्यान्तान् यज्ञोपवीतिनस्तर्पयेयुः आचार्यसहिताः शिष्याः । ततः प्राचीनावीतिनो दक्षिणामुखा नामगोत्रोच्चारणपूर्वकं स्वांश्च पितृपितामहप्रपितामहान् तर्पयेयुः । अनन्तरं स्नानवस्त्रं निष्पीड्याचम्य "देवा गातुविदः" इत्यनयर्चा समापयेयुः । **सावित्रीं चतुरनुद्रुत्य विरताः स्म इति प्रब्रूयुः**—ततः सावित्रीं तत्सवितुरित्यादिकां चतुरनुद्रुत्य पठित्वा विरताः स्म इत्याचार्यप्रमुखाः शिष्याः सर्वेऽनुब्रूयुः । **क्षपणं प्रवचनं च पूर्ववत्**—क्षपणम् अनध्ययनं लोमनखानामनिकृन्तनं च । प्रवचनम् अध्यायादीनां पठनं पूर्ववत् उपाकरणकालवत् । ततस्त्रिरात्रानन्तरं शुक्लपक्षेषु छन्दांस्यधीयीरन् कृष्णपक्षेष्वङ्गानि । ततः पुनरर्द्धषष्ठानर्द्धसप्तमासान्वाऽधीत्य एवमेवोत्सर्गं विधाय **उभा कवी युवे**त्यादिकाम् ऋचं जपित्वा त्रिरात्रमेकरात्रं वाऽवस्थाय यथेष्टं विप्रतिष्ठेरन् पृथक् पृथक् गच्छेयुः । ततः पुनरुपाकरणकाले उत्सृष्टान् वेदानुपाकृत्य अध्ययनं यावदुत्सर्गमिति सूत्रार्थः ॥ १२ ॥

गदा०—**पौषस्य रोहिण्यां मध्यमायां वाऽष्टकायामध्यायानुत्सृजेरन्**—पौषमासस्य रोहिण्यां रोहिणीनक्षत्रे। मध्यमायामष्टकायाम् । पौष्याः ऊर्द्ध्वमष्टम्यां वा अध्यायान् वेदान् उत्सृजेरन् पूर्वमुपाकृतान् पुनरुपाकरणं यावन्नाधीयीरन् । उत्सर्गप्रकारमाह—**उदकान्तं गत्वाऽद्भिर्देवाँश्छन्दांꣳसि वेदानृषीन्पुराणाचार्यान्गन्धर्वानितराचार्यान्संवत्सरं च सावयवं पितॄनाचार्यान् स्वाँश्च तर्पयेयुः**—नद्याद्युदकान्तम् उदकसमीपं गत्वा तत्र स्नात्वाऽद्भिर्देवादींस्तर्पयेयुराचार्यसहिताः शिष्याः । उदकान्तगमनेन च स्नानं लक्ष्यते । अत्र नदीरजोदोषो न भवति । तदुक्तम्—"उपाकर्माणि चोत्सर्गे प्रेतस्नाने तथैव च । चन्द्रसूर्योपरागे च रजोदोषो न विद्यते" । **सावित्रीं चतुरनुद्रुत्य विरताः स्म इति प्रब्रूयुः**—तर्पणस्यान्ते आचार्यसहिताः सर्वे शिष्याः सावित्रीं तत्सवितुरित्यृचं चतुरनुद्रुत्य पठित्वा विरताः स्म इति मन्त्रं ब्रूयुः । **क्षपणं प्रवचनं च पूर्ववत्**—ततः क्षपणम् अनध्ययनं लोमनखानामनिकृन्तनं च । प्रवचनं चाध्यायादीनां पठनं पूर्ववत् उपाकर्मकालवत् । ततस्त्रिरात्रानन्तरं शुक्लपक्षेषु छन्दांस्यधीयीरन् कृष्णपक्षेष्वङ्गानि । ततोऽर्द्धषष्ठान्मासानर्द्धसप्तमान्वा मासानेवमेवाधीत्य सर्वत उत्सृज्य उपाकृत्य चाधीयीतेति सिद्धम् ॥ इति श्रीत्रिराग्निचित्सम्राट्स्थपति—महायाज्ञिकश्रीवामनात्मजदीक्षितगदाधरेकृतगृह्यसूत्रभाष्ये द्वितीयकाण्डे द्वादशी कण्डिका ॥ १२ ॥ * ॥

अथ **पदार्थक्रमः** । पौषस्य रोहिण्यां मध्यमाष्टकायां वा पौषस्यैवाध्यायोत्सर्गः । तत्र मातृपूजापूर्वकमाभ्युदयिकं श्राद्धम् । उदकान्तगमनम् । स्नात्वाऽद्भिर्देवादितर्पणम् । देवास्तृप्यन्तु । छन्दांसि तृप्यन्तु । वेदास्तृप्यन्तु ऋषयस्तृप्यन्तु । पुराणाचार्यास्तृप्यन्तु। गन्धर्वास्तृप्यन्तु। इतराचार्यास्तृप्यन्तु। संवत्सरः सावयवस्तृप्यतु। पितरस्तृप्यन्तु। आचार्यास्तृप्यन्तु । नामगोत्रोच्चारणपूर्वकं स्वाँश्च पित्रादींस्तर्पयेयुः । जीवत्पितृकाणां तु पितामहादितर्पणम् । ततस्तत्सवितुरित्यस्याः सावित्र्याश्चतुरनुद्रवणम् । विरताः स्म इति सकृत् ब्रूयुः । उपाकर्मवदध्यायादीनां पठनम् । त्रिरात्रमनध्यायः । लोमनखानामनिकृन्तनं च त्रिरात्रम् । ततस्त्रिरात्रादूर्द्ध्वं शुक्लपक्षेषु छन्दांसि अधीयीरन्, कृष्णपक्षेष्वङ्गानि । ततः पुनरर्द्धषष्ठमासानधीत्यार्द्धसप्तमासान्वाऽधीत्य एवमेवोत्सर्गं विधाय उभा कवीत्यादिकामृचं जपित्वा त्रिरात्रमेकत्रावस्थाय पश्चाद्यथेष्टं पृथक् गच्छेयुः । ततः पुनरुपाकरणकाले उत्सृष्टान्वेदानुपाकृत्याध्ययनं यावदुत्सर्गम् । **वृद्धाचारकारिकायां** विशेषः—" पौषस्य रोहिण्यामृक्षे वाऽष्टकां प्राप्य मध्यमाम् । उदकान्तं समासाद्य

वेदस्योत्सर्जनं बहिः ॥ स्नातव्यं विधिवत्तत्र स्थापयेदृष्यरुन्धती । प्रवराँश्च ततो धीमान् कुर्यात्तेषां प्रतिष्ठितिम् ॥ इमावेवेति यजुषा नामान्येषां विनिर्दिशेत् । अद्भिस्तान् स्थापयेत्तत्र सप्तऋषय इत्यृचा ॥ अर्घस्तेभ्यः प्रदातव्यः पूजनं चन्दनादिभिः । नैवेद्यैर्विविधैः पूज्या वेदस्य हितमिच्छता । ऋषीणां प्रीतये दद्यादुपवीतान्यनेकशः । प्रणम्य च मुनीन् भक्त्या पश्चात्तर्पणमाचरेत् ॥ देवाश्छन्दांसि वेदाश्च ऋषयश्च सनातनाः ॥ '' तथा—"पुराणाचार्यान्गन्धर्वानितराचार्याँस्तथैव च । अहोरात्राण्यर्द्धमासा मासा ऋतव एव च ॥ संवत्सरोऽवयवैः सार्द्धमयं पुरश्च पञ्चभिः । मन्त्रैर्द्वाभ्यां मूर्द्धेति माछन्दस्तिस्र एव च ॥ एवं षोडशभिर्मन्त्रैः सप्तऋषय इत्येकया । चतुर्भिस्तर्पयेद्द्वंशैरिमावेवेत्यनेन च ॥ सावित्रीं पाठयेच्छिष्यान् चतुष्कृत्वो गुरुः स्वयम् । विरताः स्मोति पठेयुस्ते प्रणवं योजयेत्कविः ॥ सावित्रीं त्रिः समुच्चार्य अध्यायाँश्च प्रपाठकान् । शतस्थानान्यनुस्मृत्य कण्डिकाश्च तथाऽन्तिमाः ॥ अन्तिमाः फक्किका ब्रूयादग्निमीळे पुरोहितम् । इषे त्वेत्यग्न आयाहि शन्नो देवीरभिष्टये । सह नोऽस्त्विति मन्त्रं च पश्चादुभाकवीति च" इति ॥ इति **पदार्थक्रमः** ॥ १२ ॥

(**विश्व०**–पूर्वमर्द्धषष्ठानर्द्धसप्तमान्वा मासानधीत्योत्सृजेयुरित्युक्तम्, स चोत्सर्गः कथमित्यपेक्षायां ससमयं तद्विधिमाह–**पौष...जेरन्**॥मध्यमाष्टका पौष्यनन्तरकृष्णाष्टमी । अपरे तु पौषीमाघ्युत्तरकृष्णाष्टम्योरुपादानमाहुः । कथमत आह–**उद... येयुः**—"उदकान्तं गत्वा" इत्यनेन स्नानविधिर्लक्ष्यते । स च वस्त्रनिष्पीडनात् प्रागग्रे तर्पणस्य करिष्यमाणत्वात्, ततश्च तर्पणकुशान् ऋषितर्पणार्थं संरक्ष्य नित्यतर्पणानन्तरं प्रवरारुन्धतीसहितान्सप्तर्षीन्संस्थाप्य प्रतिष्ठां कृत्वे**मावेवे**त्यालभ्य ए.तर्घ्य इत्युपचारैः पूजयित्वा तत्प्रीत्यर्थं द्विजेभ्य उपवीतानि दत्त्वा ऋषिभ्यो नत्वा प्राक् स्थापितान्कुशानादायाद्भिर्देवादींस्तर्पयेयुरित्यन्वयः । तद्यथा—देवास्तृप्यन्तां, छन्दांसि तृप्यन्ताम्, ऋषयः सनातनास्तृप्यन्तां, पुराणाचार्यास्तृप्यन्तां, गन्धर्वास्तृप्यन्ताम्, इतराचार्यास्तृप्यन्ताम्, अहोरात्राणि तृप्यन्ताम्, अर्द्धमासास्तृप्यन्ताम्, मासास्तृप्यन्ताम्, ऋतवस्तृप्यन्ताम, संवत्सरः सावयवस्तृप्यतु । तत आचार्यपितॄन् तर्पयेत् । अमुकसगोत्राः आचार्यपितरः अमुकशर्माणस्तृप्यध्वम् । अपसव्येनाञ्जलित्रयम् । एवं पितामहप्रपितामहयोस्तर्पणमाचार्यस्य । अत्रैकवचनान्त एव तर्पणे प्रयोग इत्याचार्यः । ततोऽमुकगोत्राः पितरः अमुकशर्माणस्तृप्यध्वमिति स्वपितृतर्पणम् । एवं पितामहप्रपितामहयोः । अत्राप्येकवचनान्त एव प्रयोग इत्याचार्याः । ततो मण्डनकारिकान्ते आवापः । 'अयं पुरो भुवः' ५ । 'मूर्द्धा वयः' २ । 'मा छन्दः' ३ । 'एवश्छन्दः' १६ 'सप्त ऋषयः' १ । चत्वारो वंशाः । इमावेव गोतमभरद्वाजौ १ । **सावि...ब्रूयुः**–अत्र प्राङ्मुख आचार्यः । प्रत्यङ्मुख इतरे ।**क्षपणं**–त्रिरात्रमनध्यायो लोमनखानामकर्तनं चेत्यर्थः। **प्रवचनं च**-**इषे त्वा, कृष्णोऽसि, व्रतमुपैष्यन्, स वै कपालानी**त्येवमादिअध्यायशतप्रपाठकान्त्यकण्डिकान्त्यफक्किकादिकीर्तनम् । कथमत आह **पूर्ववत्**–अध्यायोपाकर्मवत् । अत्रापि प्रथमप्रयोगे मातृश्राद्धम् । **उभा कवी**त्येषा ऋक् उत्सर्गमन्त्रः । उदकसमीपे उत्सर्गः । त्रिरात्रमुत्सर्गानन्तरं तर्पणमित्यन्ये । ततस्त्रिरात्रानन्तरं शुक्लपक्षेषु वेदाध्ययनं कृष्णपक्षेष्वङ्गानीति संप्रदायः । पूर्ववदित्यनेनात्रापि "त्रिरात्र ꣳ सहोष्य विप्रतिष्ठेरन्" इति)॥ इति द्वादशी कण्डिका ॥ १२ ॥

पुण्याहे लाङ्गलयोजनम् । ज्येष्ठया वेन्द्रदैवत्यम् ॥ १ ॥ इन्द्रं पर्जन्यमश्विनौ मरुत उदलाकाश्यप ꣳ स्वातिकारी ꣳ सीतामनुमतिं च दध्ना तण्डुलैर्गन्धैरक्षतैरिष्ट्वाऽनडुहो मधुघृते प्राशयेत् ॥ २ ॥ सीरा युञ्जन्तीति योजयेत् ॥ ३ ॥ शुन ꣳ सुफाला इति कृषेत् फालं वा लभेत ॥ ४ ॥ न वाऽग्न्युपदेशाद्वपनानुषङ्गाच्च ॥ ५ ॥ अग्र्यमभिषिच्याऽकृष्टं तदा कृषेयुः ॥ ६ ॥ स्थालीपाकस्य पूर्ववद्देवता यजेदुभयोर्व्रीहियवयोः प्रवपन्सीतायज्ञं च ॥ ७ ॥ ततो ब्राह्मणभोजनम् ॥ ८ ॥ १३ ॥ * ॥

कर्कः–पुण्याहे लाङ्गलयोजनम्--प्रथमं कृषिप्रवृत्तस्यैतद्भवति । पुण्याहग्रहणमापूर्यमाणपक्षोदगयनाद्यनादरार्थम् । लाङ्गलयोजनं हलयोजनमित्यर्थः। ज्येष्ठया वेन्द्रदैवत्यम्-ज्येष्ठया वेति हेतौ तृतीया । अपुण्याहेऽपि ज्येष्ठया भवति लाङ्गलयोजनम् । कुत एतत् । इन्द्रदैवत्यं ज्येष्ठानक्षत्रम् इन्द्रायत्ता च कृषिरिति । इन्द्रं पर्जन्यमश्विनौ मरुत उदलाकाश्यप ꣳ स्वातिकारी ꣳ सीतामनुमतिं च दध्ना तण्डुलैर्गन्धैरक्षतैरिष्ट्वा-

इन्द्रादिदेवताविशेषान् दध्यादिभिरिष्ट्वा । इष्ट्वेत्यनेन नमस्कारान्तैरेभिर्मन्त्रैर्बलिहरणमिन्द्राय नम इत्येवमादिभिः । **अनडुहो मधुघृते प्राशयेत् । सीरा युञ्जन्तीति योजयेत् । शुनꣳ सुफाला इति कृषेत् । फालं वा लभेत**–कुत एतत् । लिङ्गाच्च मन्त्रयोः । **न वाऽग्न्युपदेशात्**--न चैतौ मन्त्रौ विनियोक्तव्यौ, किं कारणम् , अग्नौ ह्येतावुपादिष्टौ । न चाग्निप्रकरणपठितयोरिहोपदेशो नातिदेशः । किंच–**वपनानुषङ्गाच्च**–वपनेऽपि तन्मन्त्राणामनुषङ्गः प्राप्नोति । न चै तदिष्यते । **अग्र्यमभिषिच्याकृष्टं तदा कृषेयुः**--योऽग्र्यो वल्लभो बलीवर्दस्तस्य चाभिषेको घुर्घुरमालादिना अनेन प्रकारेणाकृष्टं कृषेयुः । **स्थालीपाकस्य पूर्ववद्देवता यजेदुभयोर्व्रीहियवयोः प्रवपन्सीतायज्ञे च** । ततो ब्राह्मणभोजनम् ॥ १३ ॥ * ॥

जय०–पुण्याहग्रहणं चापूर्यमाणपक्षोदगयनाद्यनादरार्थम् । **लाङ्गलं**–हलं तस्य **योजन**मनुसन्धानम् । तच्च प्रथमकृषिप्रवृत्तस्य भवति । **जेष्ठया वे**ति हेतौ तृतीया । अतोऽपुण्याहेऽपि ज्येष्ठया तद्वति लाङ्गलयोजनम् । कुत एतत् । **इन्द्रदैवत्यं** हि ज्येष्ठानक्षत्रम् । इन्द्रायत्ता च कृषिरिति । इन्द्रादिदेवताविशेषान्दध्यादिभिरिष्ट्वा । इष्टिश्च नमस्कारान्तैरिन्द्राय नम इत्यादिमन्त्रैर्बलिहरणम् । ततोऽनडुहो मधुघृते प्राशयेत् । अनडुहश्चतुःप्रभृतीन् । योजनं च लाङ्गले बलीवर्दयोः **सीरा युञ्जन्ती**ति मन्त्रेण । तत्र बुधो गायत्री सीरायोजने० । **शुनमि**ति मन्त्रेण भूमिं **कृषेत्** । **फालं** हलं **वा लभेते**ति विकल्पो मन्त्रलिङ्गात् । तत्र कुमारहारीतस्त्रिष्टुप् सीताकर्षणे० । **न वा**–एतौ मन्त्रौ न वा विनियोक्तव्यौ । कुतः–**अग्न्युपदेशात्** । यत एतावग्नावुपदिष्टौ । न चाग्निप्रकरणपठितयोरिहोपदेशो न वाऽतिदेशः । किंच **वपनानुषङ्गाच्च**–वपनेऽपि च तन्मन्त्राणामनुषङ्गः प्राप्नोति । न चैतदिष्यते । अग्र्यस्य श्रेष्ठस्य बलीवर्दस्याभिषेको घर्घरमालादिनाऽलङ्कारः । एवंप्रकारेणाऽकृष्टं भूभागं कृषेयुः । **तदा**–एतत्प्रवृत्तिकाले । इदमपरं कर्मान्तरम् । **स्थालीपाकस्ये**त्यवयवलक्षणा षष्ठी । **पूर्ववल्ला**ङ्गलयोजनोक्तदेवता इन्द्रमित्याद्या **यजेत्**–किं कुर्वन् **व्रीहियवयोः प्रवपन्**–पूर्ववत् **सीतायज्ञे च**–वक्ष्यमाणे । अत्र च स्थालीपाकस्य श्रपणानुपदेशात्सिद्धस्योपादानमिति ॥ १३ ॥ * ॥

(**हरि०**–**पुण्याहे लाङ्गलयोजनम्**–प्रथमं कृषिप्रवृत्तस्यैतत्कर्मोच्यते । पुण्याहे उदगयनशुक्लप-
क्षादिव्युदासने चन्द्रतारानुकूले दिवसे लाङ्गलस्य हलस्य योजनं प्रवर्त्तनम् । **ज्येष्ठया वेन्द्रदैवत्यम्**–
पक्षान्तरमाह-यद्वा-अपुण्याहेऽपि ज्येष्ठया नक्षत्रेण युते लाङ्गलयोजनम्, कुतः इन्द्रदेवत्या ज्येष्ठा, यतः
इन्द्रायत्ता च कृषिरिति । एतच्च मातृपूजाभ्युदयिकश्राद्धपूर्वकम् । **इन्द्रं पर्जन्यमश्विनौ मरुत उद्दला-
काश्यपꣳ स्वातिकारीꣳ सीतामनुमतिं च दध्ना तण्डुलैर्गन्धैरक्षतैरिष्ट्वाऽनडुहो मधुघृते प्राशयेत्**–
तत्र इन्द्रादीननुमत्यन्तान् अष्टौ देवताविशेषान् दध्ना तण्डुलैर्गन्धैरक्षतैश्च, अक्षताः यवाः, इष्ट्वा नमो-
ऽन्तैर्नाममन्त्रैर्बलिहरणेन सम्पूज्य अनडुहो वृषभान्, मधुघृते मिलिते प्राशयेत् । तद्यथा–दधितण्डुल-
गन्धाक्षतान् पात्रे कृत्वा शुचिराचान्तः प्राङ्मुख उपविश्य कृषिक्षेत्रैकदेशे गोमयोपलिप्ते हस्तेन गृहीत्वा–
इन्द्राय नमः, पर्जन्याय नमः, अश्विभ्यां नमः, मरुद्भ्यो नमः,उद्दलाकाश्यपाय नमः, स्वातिकार्यै नमः,
सीतायै नमः, अनुमत्यै नमः । यथामन्त्रं त्यागाः । इदमादिका नमोरहिताः । इत्यष्टौ बलीन् प्राक्-
संस्थान् दत्त्वा ततो बलीवर्दान् मधुघृते पात्रे कृत्वा तूष्णीं प्रत्येकं प्राशयेत् लेहयेत् । **सीरा युञ्जन्तीति
योजयेच्छुनꣳसुफाला इति कृषेत् फालं वा लभेत्**-सीरा युञ्जन्तीत्यनयर्चा वृषभौ हले योज-

येद्दक्षिणोत्तरक्रमेण **शुनꣳसुफाला** इत्यनयर्चा भूमिं कृषेत्। यद्वा—**शुनꣳसुफाला** इति फालमभिमृशेत् उभयालिङ्गत्वान्मन्त्रस्य । **न वाऽग्न्युपदेशात्**—न वा एतौ योजने कर्षणे च मन्त्रौ भवतः । कुतः अग्नौ अग्निचयने एतयोरुपदेशात् । न च अग्निप्रकरणे आम्नातयोरत्रोपदेशः न वाऽतिदेशः । **वपनानुषङ्गाच्च**—इतोऽपि मन्त्रौ न भवतः अग्निप्रकरणे बीजवपने ये मन्त्रा **या ओषधीरि**त्याद्या विनियुक्तास्तेषामप्यत्रानुषङ्गः स्यात् । यदि लिङ्गमात्रेणोपदेशातिदेशाभावेऽपि विनियुज्यते तदा वपनमन्त्रा अपि तल्लिङ्गत्वाद्विनियोजनीया भवेयुः । न चैतदिष्यते । **अग्र्यमभिषिच्याऽकृष्टं तदाकृषेयुः**—अग्र्यं श्रेष्ठं बलीवर्दम् अभिषिच्य गन्धमाल्यादिभिर्भूषयित्वा अकृष्टं अविलिखितं यत्तत्क्षेत्रमाकृषेयुः विलिखेयुः । अथ साग्निकस्य कृषिकर्माणि विशेषमाह—**स्थालीपाकस्य पूर्ववद्देवता यजेदुभयोर्व्रीहियवयोः प्रवपन् सीतायज्ञे च**—स्थालीपाकस्य चरोः पूर्ववल्लाङ्गलयोजनोक्तदेवता इन्द्रादिकाः यजेत् किं कुर्वन् प्रवपन् सीराम् उप्तिं कुर्वन्, कयोः व्रीहियवयोः व्रीहियवयोर्वपनकाले। अत्र स्थालीपाकस्य श्रपणोपदेशाभावात् सिद्धस्योपादानम् । **ततो ब्राह्मणभोजनम्**—इति लाङ्गलयोजनम्। इति सूत्रार्थः)॥ १३ ॥

अथ **प्रयोगः** । तत्र प्रथमप्रयोगे मातृपूजाभ्युदयिकानन्तरम् आवसथ्याग्नौ ब्रह्मोपवेशनादिप्राशनान्ते तण्डुलस्थाने पूर्वसिद्धं स्थालीपाकमासाद्य प्रोक्षणकाले प्रोक्षेत । तत आज्यभागानन्तरं स्थालीपाकेन लाङ्गलयोजनदेवताभ्यो जुहुयात् । तद्यथा—इन्द्राय स्वाहा इदमिन्द्राय० । तथा पर्जन्याय स्वाहा इदं पर्जन्याय० । अश्विभ्याꣳ स्वाहा इदमश्विभ्यां० । मरुद्भ्यः स्वाहा इदं मरुभ्द्यो० । उदलाकाश्यपाय स्वाहा इदमुदलाकाश्यपाय० । स्वातिकार्यै स्वाहा इदं स्वातिकार्यै० । सीतायै स्वाहा इदं सीतायै० । अनुमत्यै स्वाहा इदमनुमत्यै० । ततोऽग्नये स्विष्टकृते स्वाहेति हुत्वा आज्येन नवाहुतीश्च हुत्वा प्राशनब्रह्मणेदक्षिणादानब्राह्मणभोजनानि कुर्यात् । इति **व्रीहियववपनकर्म** । सीतायज्ञे च "एता एव देवताः स्थालीपाकेन यजेत्" इत्यतिदेशः ॥ १३ ॥ * ॥

गदा०—**पुण्याहे लाङ्गलयोजनम्**—यस्य कृषिकर्मण्यधिकारस्तस्येदमुच्यते । पुण्याहे उदगयने शुक्लपक्षे चन्द्राद्यनुकूलदिने लाङ्गलस्य हलस्य योजनं प्रवर्तनं भवति । प्रथमकृषिप्रवृत्तस्यैतत्कर्म भवति । "उदगयने आपूर्यमाणपक्षे पुण्याहे" इत्यनेनैव प्राप्तत्वादत्र पुण्याहग्रहणमग्रिमसूत्रे अपुण्याहत्वद्योतनार्थम् । पक्षान्तरमाह—"**ज्येष्ठया वेन्द्रदैवत्यम्**—अथवा अपुण्याहेऽपि ज्येष्ठया नक्षत्रेण युते दिने लाङ्गलयोजनं भवति । प्रथमकृषिप्रवृत्तस्यैतत्कर्म भवति । उदगयन इन्द्रदैवत्यं ज्येष्ठानक्षत्रं यतः इन्द्राधीनं च कृषिकर्म वृष्टिनिमित्तत्वात् । ज्येष्ठया वेति हेतौ तृतीया । "ज्येष्ठायामिन्द्रदैवत्यं वा" इति भर्तृयज्ञपाठः ॥ **इन्द्रं पर्जन्यमश्विनौ मरुत उदलाकाश्यपꣳ स्वातिकारीꣳ सीतामनुमतिं च दध्ना तण्डुलैर्गन्धैरक्षतैरिष्ट्वाऽनडुहो मधुघृते प्राशयेत्**—यागशब्देन देवतोद्देशेन बल्युपहार उच्यते । इन्द्रादिदेवताविशेषान् दध्ना तण्डुलैर्गन्धैरक्षतैर्यवैश्चेष्ट्वा नमोऽन्तैर्नाममन्त्रैर्बलिहरणेन सम्पूज्य अनडुहो बलीवर्दान्, मधुघृते पात्रे कृत्वा तूष्णीं प्रत्येकं प्राशयेत् ॥ **सीरा युञ्जन्तीति योजयेच्छुनꣳ सुफाला इति कृषेत्फालं वा लभेत**—यागानन्तरं सीरा युञ्जन्तीत्यनेन मन्त्रेण वृषभौ हले योजयेद्दक्षिणोत्तरक्रमेण । ततः शुनꣳ सुफाला इति भूमिं कृषेत् । अथवा शुनꣳ सुफाला इति फालं हलमुखमायसमभिमृशेत् । उभयलिङ्गत्वान्मन्त्रस्य । **न वाऽग्न्युपदेशात्**—न चैतौ मन्त्रौ विनियोक्तव्यौ । किं कारणम् । अग्निचयने एतावुपदिष्टौ । न चाग्निप्रकरणपठितयोरिहोपदेशो नातिदेशः । किं च **वपनानुषङ्गाच्च**—अग्निचयनप्रकरणे अन्नवपने ये मन्त्रा **या ओषधीरि**त्यादयो विनियुक्तास्तत्रामप्यनुषङ्गः प्राप्नोति । यदि लिङ्गमात्रेण विनियोगः स्यात् । न चैतदिष्यते । **अग्र्यमभिषिच्याऽकृष्टं तदाकृषेयुः**—अग्र्यं वल्लभं बलीवर्दमभिषिच्य घुर्घुरमालादिना भूषयित्वा अकृष्टमविलिखितं यत्क्षेत्रं तत् आकृषेयुः । **स्थालीपाकस्य पूर्ववद्देवता यजेदुभयोर्व्रीहियवयोः प्रवपन्सीतायज्ञे च । ततो ब्राह्मणभोजनम्**—इदमपरं कर्मान्तरम् । स्थालीपाकस्य श्रपणानुपदेशादत्र सिद्धस्यैव ग्रहणम् । स्थालीपाकस्य चरोः पूर्ववल्लाङ्गलयोजनोक्ता देवता इन्द्रादिका यजेत् । किं कुर्वन् प्रवपन् उप्तिं कुर्वन् । कयोः व्रीहियवयोर्वपनकाले । ततो ब्राह्मणस्य

भोजनं कार्यम् ॥ इति श्रीत्रिराग्नीचित्सम्राट्स्थपति–महायाज्ञिकश्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे त्रयोदशी कण्डिका ॥ १३ ॥ * ॥

अथ **पदार्थक्रमः** । "पुण्याहे लाङ्गलयोजनम्" । उदगयनाद्यभावेऽपि ज्येष्ठानक्षत्रे वा मातृपूजापूर्वकमाभ्युदयिकश्राद्धम् । ततो दध्याद्यादाय लाङ्गलयोजनदेशे गमनम् । तत्र स्थण्डिलानुलेपनम् । तत्र दधितण्डुलगन्धाक्षतमिश्रितैरिन्द्रादिभ्यो बलिहरणं हस्तेनैव । इन्द्राय नमः, पर्जन्याय नमः, आश्विभ्यां नमः, मरुद्भ्यो नमः, उदलाकाश्यपाय नमः, स्वातिकार्यै नमः, सीतायै नमः, अनुमत्यै नमः । यथादैवतं त्यागाः । "अनडुहो मधुघृते प्राशयेत्" । ततः प्रथमबलीवर्दस्य मण्डनम् । ततोऽकृष्टे देशे कर्षणम् । ततो ब्राह्मणभोजनम् । अथ व्रीहियवयोर्वपनकाले मातृपूजापूर्वकमाभ्युदयिकं कृत्वाऽऽवसथ्येऽग्नौ कर्म भवति । तत्र ब्रह्मोपवेशनादिप्राशनान्ते विशेषः । तण्डुलस्थाने सिद्धस्य चरोरासादनम् प्रोक्षणं च । आज्यभागान्ते स्थालीपाकेन लाङ्गलयोजनदेवताभ्यो होमः । इन्द्राय स्वाहा, पर्जन्याय स्वाहा, अश्विभ्यां स्वाहा, मरुद्भ्यः स्वाहा, उदलाकाश्यपाय स्वाहा, स्वातिकार्यै स्वाहा, सीतायै स्वाहा, अनुमत्यै स्वाहा । यथादैवतं त्यागाः । ततश्चरुणा स्विष्टकृत् । ततो भूरादयो नवाहुतयः । संस्रवप्राशनम् । मार्जनम् । पवित्रप्रतिपत्तिः । दक्षिणादानम् । प्रणीताविमोकः ॥ १३ ॥ * ॥

विश्व०–पुण्या…जनं–पुण्याहपदं शुक्लपक्षाद्ययनादरार्थं, तच्च न संभवति, गौण्या मुख्यया वा तस्य तत्रावृत्तेः । लाङ्गलं हलं ज्योतिःशास्त्रादिपरिगृहीते उत्तमेऽह्नि हलयोजनं कुर्यादिति शेषः । पक्षान्तरमाह—**ज्येष्ठ…वत्यं**—हेतुत्वं तृतीयार्थः । यतः ज्येष्ठानक्षत्रमिन्द्रदेवताकं कृषेश्चेन्द्राधीनत्वात्तेन ज्येष्ठायां लाङ्गलयोजने न तथा पुण्याहापेक्षा । प्रथमलालङ्गयोजनप्रवृत्तस्य भवति । अत्रापि मातृपूजाभ्युदयिके भवतः । **इन्द्रं…येत्**–इन्द्रादीननुमत्यन्तान् । दध्ना तण्डुलैर्गन्धैरक्षतैरेकीकृतैरिष्ट्वा बलिदानेनेति शेषः । बलिदानं प्राक्संस्थमुदग्वा । प्राङ्च्युदञ्चीति परिभाषितत्वात् । बलिदानं चोपलिप्तायां क्षेत्रसंनिहितभुवि । ततो दधितण्डुलगन्धाक्षतान् दक्षिणहस्तेनादाय इन्द्राय नमः, पर्जन्याय नमः, अश्विभ्यां नमः, मरुद्भ्यो नमः, उदलाकाश्यपाय नमः, स्वातिकार्यै नमः, सीतायै नमः, अनुमत्यै नमः अष्टौ बलीन् दद्यात् । ततो मधुघृते पात्रे कृत्वा बलीवर्दाभ्यां प्राशयेत् लेहयोदित्यर्थः । **सीरा…येत्**–लाङ्गल इति शेषः । **शुन…भेत**–फालः कर्षणसाधनं लौहं, कर्षणस्पर्शयोर्विकल्पार्थौ वाशब्दः । इदानीं मन्त्रयोर्निषेधमाह—**न वा…गाञ्च**–वाशब्दः पूर्वपक्षव्यावृत्तौ । एतौ मन्त्रौ न भवतः किंतु तूष्णीमेव योजनकर्षणादि भवेत् । तत्र हेतुमाह–**अग्न्युपदेशात्**–अग्निः चयनं तत्र मन्त्रयोरुपदेशात्प्रकृते न भवतः । न च वाच्यमतिदेशः, अन्येषामपि धान्यादिवपनमन्त्राणां चयनोपादिष्टानां **या ओषधी**रित्यादीनामतिदेशापत्तेरित्याह–**वपनानुषङ्गाच्चेति** । **अग्र्य—षेयुः**–अग्र्यं श्रेष्ठबलीवर्दमभिषिच्य घण्टादिनाऽलंकृत्य अकृष्टमविलिखितं भूभागं तदा कृषेयुः विलिखेयुः लाङ्गलयोजनेन भूमिं वपनयोग्यां संपादयेत् । इदानीं वपनकर्तव्यतामाह—**स्थाली…पन्**—मातृपूजाभ्युदयिके विधाय परिसमूहनाद्युपयमनप्रक्षेपान्ते विशेषः । ग्रहणे इन्द्राय पर्जन्याय, अश्विभ्याम्, मरुद्भ्यः, उदलाकाश्यपाय, स्वातिकार्यै, सीतायै, अनुमत्यै, जुष्टं गृह्णामि । प्रोक्षणे त्वाशब्दोऽधिकः । आज्यभागानन्तरं स्थालीपाकस्य चरोः पूर्ववत् लाङ्गलयोजनोक्तदेवताः इन्द्रादिकाः यजेत् । किं कुर्वन् । प्रवपन् उप्तिं कुर्वन् । कयोः व्रीहियवयोरित्यन्वयः । **इन्द्राय स्वाहे**त्यादि अनुमत्यन्तं स्विष्टकृद्धोमादि ब्राह्मणभोजनान्तं, तदनन्तरं वैश्वदेवः । **सीतायज्ञे च**–सिद्धेषु व्रीहिषु यवेषु च सीतायज्ञो भवति । स च वक्ष्यते । तत्रापीन्द्रादयोऽनुमत्यन्ता लाङ्गलयोजनदेवता होमकर्मणा बलिदानेन च यष्टव्या इत्यतिदिश्यते इत्यर्थः । **ततो…जनं**––दश पञ्च वा **परिशिष्टात्** । एतच्च प्रवपनं व्रीह्यादीनां लौकिकाग्नौ भवतीत्यवसीयते । अन्ये तु निरग्नेरेव लौकिकाग्नौ कृतावसथ्यस्यावसथ्ये भवतीत्याहुः । इति त्रयोदशी कण्डिका ॥ १३ ॥ ॥ * ॥

अथातः श्रवणाकर्म ॥ १ ॥ ४ श्रावण्यां पौर्णमास्याम् ॥ २ ॥ स्थालीपाकꣳ श्रपयित्वाऽक्षतधानाश्चैककपालं पुरोडाशं धानानां भूयसीः पिष्ट्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोति ॥ ३ ॥ अप श्वेतपदा जहि पूर्वेण चापरेण च । सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धवैः स्वाहा ॥ ४ ॥ न वै श्वेतस्याध्याचारेऽहिर्ददर्श कंचन । श्वेताय वैदर्व्याय नमः स्वाहेति ॥ ५ ॥ स्थालीपाकस्य जुहोति विष्णवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्चेति ॥ ६ ॥ धानावन्तमिति धानानाम् ॥ ७ ॥ घृता-

क्तान्सक्तून्सर्पेभ्यो जुहोति ॥ ८ ॥ आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपतये स्वाहा श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपतये स्वाहाऽभिभूःसौर्य्यदिव्यानाꣳ सर्प्पाणामधिपतये स्वाहेति ॥ ९ ॥ सर्वहुतमेककपालं ध्रुवाय भौमाय स्वाहेति ॥ १० ॥ प्राशनान्ते सक्तूनामेकदेशꣳ शूर्पे न्युप्योपनिष्क्रम्य बहिःशालायाः स्थण्डिलमुपलिप्योल्कायां ध्रियमाणायां माऽन्तरागमतेत्युक्त्वा वाग्यतः सर्पानवनेजयति ॥११॥ आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपतेऽवनेनिक्ष्व श्वेतवायवान्तरिक्षाणाꣳ सपार्णामधिपतेऽवनेनिक्ष्वाभिभूःसौर्यदिव्यानाꣳ सर्पाणामधिपतेऽवनेनिक्ष्वेति ॥१२॥ यथाऽवनिक्तं दर्व्योपघातꣳ सक्तून्सर्पेभ्यो बलिꣳ हरति ॥ १३ ॥ आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपत एष ते बलिः श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपत एष ते बलिरभिभूःसौर्यदिव्यानाꣳसर्पाणामधिपत एष ते बलिरिति ॥ १४ ॥ अवनेज्य पूर्ववत्कङ्कतैः प्रलिखति ॥ १५ ॥ आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपते प्रलिखस्व श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपते प्रलिखस्वाभिभूःसौर्यदिव्यानाꣳ सर्पाणामधिपते प्रलिखस्वेति ॥ १६ ॥ अञ्जनानुलेपनꣳ स्रजश्चाञ्जस्वानुलिम्पस्व स्रजोऽपि नह्यस्वेति ॥ १७ ॥ सक्तुशेषꣳ स्थण्डिले न्युप्योदपात्रेणोपनिनीयोपतिष्ठते नमोऽस्तु सर्पेभ्य इति तिसृभिः ॥ १८ ॥ स यावत्कामयेत न सर्पा अभ्युपेयुरिति तावत्सन्ततयोदधारया निवेशनं त्रिः परिषिञ्चन्परीयादपश्वेतपदा जहीति द्वाभ्याम्॥१९॥ दर्वीशूर्पं प्रक्षाल्य प्रतप्य प्रयच्छति ॥ २० ॥ द्वारदेशे मार्जयन्त आपो हि ष्ठेति तिसृभिः ॥ २१ ॥ अनुगुप्तमेतꣳ सक्तुशेषं निधाय ततोऽस्तमितेऽस्तमितेऽग्निं परिचर्य दर्व्योपघातꣳ सक्तून्सर्पेभ्यो बलिꣳ हरेदाग्रहायण्याः ॥ २२ ॥ तꣳ हरन्तं नान्तरेण गच्छेयुः ॥ २३ ॥ दर्व्याऽऽचमनं प्रक्षाल्य निदधाति ॥ २४ ॥ धानाः प्राशनन्त्यसꣳस्यूताः ॥ २५ ॥ ततो ब्राह्मणभोजनम् ॥ २६ ॥ १४ ॥

कर्कः—अथातः श्रवणाकर्म-व्याख्यास्यत इति सूत्रशेषः। श्रावण्यां पौर्णमास्याम्कर्तव्यम्। स्थालीपाकꣳ श्रपयित्वाऽक्षतधानाश्चैककपालं पुरोडाशम्—तद् भूतोपादानं मा भूदिति श्रपयित्वेत्युच्यते। भर्जनैककपालयोरपि प्रोक्षणं भवति। अर्थवत्प्रोक्ष्येत्यविशेषोपदेशात्। धानानां भूयसीः पिष्ट्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोति अप श्वेतपदा जहीति द्वाभ्यां मन्त्राभ्याम्। स्थालीपाकस्य जुहोति विष्णवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्च—इति चतस्र आहुतयः। धानावन्तमिति धानानाम्—एकाहुतिं जुहोति। घृताक्तान्सक्तून्सर्पेभ्यो जुहोति। आग्नेयपाण्डुपार्थिवानामिति—एतैस्त्रिभिर्मन्त्रैस्तिस्र आहुतयः। सर्वहुतमेककपालम्—पुरोडाशम्। ध्रुवाय भौमाय स्वाहेति—ततः स्थालीपाकधानासक्तुभ्यः स्विष्टकृत्। प्राश-

नान्ते सक्तूनामेकदेशꣳ शूर्पे न्युप्योपनिष्क्रम्य बहिःशालायां स्थण्डिलमुपलिप्योल्कायां ध्रियमाणायां माऽन्तरागमतेत्युक्त्वा वाग्यतः सर्पानवनेजयत्याग्नेयपाण्डुपार्थिवानामिति–एभिर्मन्त्रैः। शेषं निगदव्याख्यातम् । यथाऽवनिक्तं दर्व्योपघातꣳ सक्तून्सर्पेभ्यो बलिꣳ हरति आग्नेयपाण्डुपार्थिवानामिति--एभिर्मन्त्रैः यथाऽवनिक्तमिति। येषु देशेष्ववनेजनं कृतं तत्र तत्र बलिहरणम् । दर्व्योपघातमिति दर्व्योपहत्योपहत्येत्यर्थः। उपपूर्वो हन्तिर्ग्रहणार्थः । अथ स्रुवेणोपहत्याज्यमिति। अवनेज्य पूर्ववत्कङ्कतैः प्रलिखत्याग्नेयपाण्डुपार्थिवानामिति--प्रतिमन्त्रं प्रतिबलिहरणं प्रलेखः। अञ्जनानुलेपनꣳ स्रजश्चाञ्जस्वानुलिम्पस्व स्रजोऽपि नह्यस्वेति–एभिर्मन्त्रैः प्रतिमन्त्रं यथालिङ्गं प्रतिबलिहरणं ददाति । सक्तुशेषꣳ स्थण्डिले न्युप्योदपात्रेणोपनिनीयोपतिष्ठते नमोऽस्तु सर्पेभ्य इति तिसृभिः ऋग्भिः–सक्तुशेषं तु यत् शूर्पे न्युप्योपनीतम् । स यावत्कामयेत न सर्पा अभ्यपेयुरिति तावत्सन्ततयोदधारया निवेशनं त्रिः परिषिञ्चन्परीयादपश्वेतपदा जहीति द्वाभ्याम्–मन्त्राभ्याम् । दर्वीशूर्पं प्रक्षाल्य प्रतप्य प्रयच्छति–उल्काधारस्य । प्रतपनं चोल्कायामेव सन्निधानात्। द्वारप्रदेशे मार्जयन्ते आपो हिष्ठेति तिसृभिः–ऋग्भिः । बहुवचनोपदेशाद्ब्रह्मयजमानोल्काधाराश्च । अनुगुप्तमेतꣳ सक्तुशेषं निधाय ततोऽस्तमितेऽस्तमितेऽग्निं परिचर्य दर्व्योपघातꣳ सक्तून्सर्पेभ्यो बलिꣳ हरेदाग्रहायण्यातत इति सक्तुभ्यो दर्व्योपहत्योपहत्यास्तमितेऽस्तमितेऽग्निपरिचरणं कृत्वा बलिं हरेदाग्रहायणीं यावत् । तावद्बलिहरणम् । अवनेजनदानप्रत्यवनेजनैः । तꣳ हरन्तं नान्तरेण गच्छेयुः–अन्तरागमनप्रतिषेधश्च बलिहरणकर्तुरावसथ्यस्य । दर्व्याऽऽचमनं प्रक्षाल्य निदधाति–प्रत्यहम् । धानाः प्राश्नन्त्यसꣳस्यूताः–अनवखण्डयन्तः । ततो ब्राह्मणभोजनम्–इत्युक्तार्थमेव ॥ १४ ॥ * ॥

जय०–**अथातः श्रवणाकर्म**–वक्ष्यत इति सूत्रशेषः । तच्छ्रावण्यामेव **पौर्णमास्यां**–भवति । कथमित्यत आह–**स्थालीपाक**मिति। तद्भूतोपादानं मा भूदिति **श्रपयित्वे**त्युक्तिः। भर्जनाक्षीनामपि प्रोक्षणम्। "अर्थवत्प्रोक्ष्य" इत्यविशेषोपदेशात् । **धानानां** मध्ये **भूयसीः**–बह्वीर्धानाः, **पिष्ट्वा**–सक्तुत्वमापाद्य, **आज्याहुती**–द्वे हुत्वा वक्ष्यमाणमन्त्राभ्याम् । **अपश्वेते**त्यादि मन्त्रद्वयं सर्पभयनिवारकम्। तदर्थः । तत्र द्वयोः प्रजापतिरनुष्टुब्गायत्र्यौ सर्प आज्यहोमे० । हे श्वेतपद गूढपद त्वम् **इमाः**–मदीयाः **प्रजा राजबान्धवै**र्वासुकिप्रभृतिभिस्तथा वारुणैर्वरुणसम्बन्धिभिश्च सर्पयूथैः सह **जाहि**–त्यज । पूर्वपददीर्घश्छान्दसः । हित्वा च अप इतः स्थानादप अपगच्छ । किम्भूताः प्रजाः । **सप्त** सपिण्डसगोत्रसोदकत्वभेदेन सप्तसप्तपुरुषसम्बन्धाः । सप्तकुलजा वा । तद्यथा "पिता माता च भार्या च दुहिता भगिनी तथा। पितृष्वसा मातृष्वसा सप्तगोत्राण्यमूनि वै॥" इति। सर्वाश्च सकलाश्च सेवकपश्वादिरूपाः । कथं **पूर्वेण**–पुरतः । **अथापरेण**–पश्चात् । पूर्वोत्तराः प्रजा इति वा । वारुण्यादिभिः सह तुभ्यं सुहुतमस्तु । १ । एतदेवोत्तरमन्त्रेण द्रढयति--**न वा** इति । न वै इति शब्दद्वयं अतिनिश्चयार्थकम् । **श्वेतस्य**–श्वेतपदस्य, **अध्याचारे**–आधिपत्ये अधिकृतप्रदेशे वा **अहिः**–कश्चिदपि सर्पः, कंचन जनं न **ददर्श**–पापदृष्ट्या मा पश्यत्वित्यर्थः । तदर्थं **श्वेताय**–शुद्धाय

प्रसन्नाय वा नमस्कारयुक्तं स्वाहा सुहुतमस्तु । किम्भूताय **दर्व्याय**–दर्वीकराय दीर्घफणायेत्यर्थः । यद्वा–**वैदर्व्याय**–विदर्वापत्याय, तदा वैशब्द एक एव । सर्पगमनमार्गे श्वेतरेखाया दृश्यमानत्वात् तस्य श्वेतपदत्वम् । मदीयनमस्कारयुजा सुहुतेन प्रीतोऽस्माकं सर्पभयं निवर्तयेति वाक्यार्थः । **स्थालीपाकस्य जुहोति विष्णवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्चेति**–चतस्र आहुतीः । **धानावन्तमिति**–मन्त्रेण धानानामेकामाहुतिं जुहोति । तत्र घृताक्तसक्तुहोमे मन्त्रभेदेनाहुतित्रयम् । तदाह–**आग्नेयपाण्ड्विति** । तदर्थः । तत्र त्रयाणां परमेष्ठी यजुः सर्पाधिपतयः सर्पयागे सर्पसक्तुहोमे० । आग्नेयाः अग्निदेवत्याः । पाण्डवः पाण्डुसञ्ज्ञसर्पजातीयाः । पार्थिवाः पृथिव्यां विहारिणः तेषां **सर्पाणामधिपतये**--शेषाय वासुकये वा स्वाहा सुहुतमस्तु । तथा श्वेताः श्वेतजातीयाः, वायवाः वायुदेवत्या इति यावत् अन्तरिक्षाः अन्तरिक्षविहारिणः तेषा**मधिपतये**– इति प्राग्वत् ॥ २ ॥ तथा अभिभवन्ति सर्वानित्यभिभुवः । सौर्याः सूर्यदेवत्याः । दिव्याः द्युविहाराः । अत्र सर्वत्र द्वन्द्वसमासः, तेषाम् । अभिभूरित्यत्र विसर्गश्छान्दसः ॥ ३ ॥ अवनेजनबलिहरणप्रत्यवनेजनकङ्कतप्रलेखनाञ्जनानुलेपनस्रजश्चाप्येवमेव व्याख्येयाः । **सर्वहुतं** चापरिशेषितं सकलमित्यर्थः । तत्र चैकाऽऽहुतिः । **सर्वहुतमेककपालं** पुरोडाशं **ध्रुवाय भौमाय स्वाहेति** जुहोति । ततः स्थालीपाकस्य धानासक्तुभ्यः स्विष्टकृद्धोमः । **प्राशनान्ते सक्तूनामेकदेशं शूर्पे न्युप्य** प्रक्षिप्य ब्रह्मोल्काधाराभ्यां सह शालाया बहिः निष्क्रमणम् । **उपनिष्क्रम्य बहिः शालायां स्थण्डिलमुपलिप्य**–स्वयमेव । उल्का च लौकिकाग्निसम्भूता, अन्तरागमनं च यजमानशालाग्न्योरेव । **माऽन्तरागमतेति** प्रैषमुक्त्वा **वाग्यतः**–स्थण्डिले, **सर्पानवनेजयति आग्नेयादिभिर्मन्त्रैः** प्रतिमन्त्रम् । शेषं निगदव्याख्यातम् । **यथाऽवनिक्त**मिति यत्र यत्र देशेऽवनेजनं कृतं तत्र तत्र बलिहरणम् । दर्व्योपघातं दर्व्योपहत्येत्यर्थः। उपपूर्वो हन्तिश्च ग्रहणार्थः । अथ स्रुवेणोपहत्याज्यमिति च प्रलेखनं च क्रमेण प्रतिमन्त्रम् । बलिकण्डूयनं **कङ्कतै**रतानि च वैकङ्कतीयानि प्रादेशमात्राण्येतानि काष्ठानि भवन्ति । अञ्जनादीनि च प्रतिमन्त्रं यथालिङ्गं प्रतिबलिहरणं ददाति । सक्तुशेषं च शूर्पे उपनीतं स्थण्डिले न्युप्य स्रुवेण क्षिप्त्वा, **उपनिनीय**–आप्लाव्य, उपस्थानं **नमोऽस्तु सर्पेभ्य इति तिसृभिर्ऋग्भिः** । तत्र तिसृणां प्रजापतिरनुष्टुप् सर्पस्तदुपस्थाने० । **स यावत्कामयेत**–एतावन्तं देशं **न सर्पा अभ्युपेयुरिति** । **निवेशनं** गृहं प्रति तावन्तं गृहदेशं सन्ततयोदकधारया भूभागं **त्रिः परिषिञ्चन् परीयात्**–परिक्रामेत् । **अपश्वेतपदा जही**ति द्वाभ्यां पूर्वोक्तमन्त्राभ्याम् । सक्तून्मन्त्रेण परिगमनं द्विस्तूष्णीम् । **दर्वीशूर्पं प्रक्षाल्य प्रतप्य प्रयच्छति**–उल्काधाराय । प्रतपनं चोल्कायामेव सन्निधानात् । **द्वारदेशे**-स्थित्वा, आत्मानम् **अद्भिः मार्जयन्ते आपो हि ष्ठेति तिसृभिर्ऋग्भिः**–बहुवचनोपदेशात् । अनेन ब्रह्मयजमानोल्काधाराश्च । **एतं** प्रकृतम् **अनुगुप्तमेतꣳ सक्तुशेषं निधाय ततोऽस्तमितेऽस्तमितेऽग्निं परिचर्य दर्व्योपघातꣳ सक्तून्सर्पेभ्यो बलिꣳ हरेदाग्रहायण्याः**–आग्रहायणीं यावत् । बलिहरणं चावनेजनदानप्रत्यवनेजनैः । **तꣳ हरन्तं नान्तरेण गच्छेयुः**--अन्तरागमनप्रतिषेधश्च बलिहरणकर्तुरावसथ्यस्य च । **दर्व्याऽऽचमनं** मुखं **प्रक्षाल्य निदधाति**–प्रत्यहम् । दर्वीग्रहणान्न शूर्पस्य प्रक्षालनम् । **धानाः प्राश्नन्त्यसꣳस्यूताः**–अनवखण्डयन्त इत्यर्थः । ततः एकं ब्राह्मणं कर्माङ्गं भोजयेत् ॥ १४ ॥ ॥ * ॥

हरि०–**अथातः श्रवणाकर्म**–अथेदानीमावसथ्याग्निसाध्यकर्मणां प्रकृतत्वात् श्रवणाकर्मोच्यत इति शेषः । **श्रावण्यां पौर्णमास्याम्**–तच्च श्रावणमासस्य शुक्लपञ्चदश्यां कर्तव्यम् । **स्थालीपाकꣳ श्रपयित्वाऽक्षतधानाश्चैककपालं पुरोडाशम्**--स्थालीपाकं चरुम्, अक्षतधानाः अक्षतानां सतुषाणां यवानां धानाः अक्षतधानाः, ताश्च श्रपयित्वा एककपालमेकस्मिन्कपाले श्रप्यत इत्येककपालं ते पुरोडाशं श्रपयित्वेत्यनुषज्यते । अन्यथा तद्भूतोपादानं स्यात् । अतश्च धानापुरोडाशयोः श्रपणोपदेशात् भर्जनकपालयोरपि आसादनप्रोक्षणे भवतः । अर्थवता प्रोक्षणमविशेषेणोपदिश्यते । **धानानां भूयसीः पिष्ट्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोत्यप श्वेतपदा जहि पूर्वेण चापरेण च । सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धवैः स्वाहा । न वै श्वेतस्याध्याचारेऽहिर्ददर्श कञ्चन । श्वेताय वैदर्व्याय नमः स्वाहेति**--धानानां भर्जितानां यवानां मध्ये भूयसीः बह्वीः पिष्ट्वा सक्तुत्वमापाद्य आज्यभागौ हुत्वा **अपश्वेतपदाजहि न वै श्वेतस्याद्ध्याचार**-इति द्वाभ्यां मन्त्राभ्यां द्वे आज्याहुती जुहोति । **स्थालीपाकस्य जुहोति विष्णवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्चेति**--अनन्तरं स्थालीपाकस्य चरोश्चतस्र आहुतीर्जुहोति । यथा "विष्णवे स्वाहा" इत्येवमादिभिश्चतुर्भिर्मन्त्रैः । **धानावन्तमिति धानानाम्**–धानावन्तं करम्भिणमित्यनयर्चा धानानामेकामाहुतिं जुहोति । **घृताक्तान्सक्तून्सर्पेभ्यो जुहोत्याग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपतये स्वाहा । श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपतये स्वाहा । अभिभूःसौर्यदिव्यानाꣳ सर्पाणामधिपतये स्वाहेति**--घृतेन आज्येन अक्ताः अभिघारिताः घृताक्ताः, तान् सक्तून् सर्पेभ्य **आग्नेयपाण्डुपार्थिवे**त्यादिभिर्मन्त्रैः प्रतिमन्त्रमेकैकामेव तिस्र आहुतीर्जुहोति । **सर्वहुतमेककपालं ध्रुवाय भौमाय स्वाहेति**–तत एककपालं पुरोडाशं सर्वहुतं यथा भवति तथा "ध्रुवाय, भौमाय स्वाहा" इत्यनेन मन्त्रेण जुहोति । ततः स्थालीपाकधानासक्तुभ्यः स्विष्टकृद्धोमः । **प्राशनान्ते सक्तूनामेकदेशꣳ शूर्पे न्युप्योपनिष्क्रम्य बहिः शालायां स्थण्डिलमुलिप्यप्योल्कायां ध्रियमाणायां माऽन्तरा गमतेत्युक्त्वा वाग्यतः सर्पानवनेजयत्याग्नेयेति**-प्राशनान्ते संस्रवप्राशनानन्तरं, सक्तूनामेकदेशं बलित्रयपर्याप्तं, शूर्पे शरेषिकावंशान्यतममये इच्छापरिमाणे, न्युप्य कृत्वा, उपनिष्क्रम्य शालायाः सकाशान्निर्गत्य, बहिरङ्गणे, स्थण्डिलं भूमिं, स्वयमेव गोमयेनोपलिप्य । अत्र सर्पानवनेजयतीत्यस्याः क्रियाया उपलेपनक्रियायाश्चैककर्तृकत्वेन पूर्वकालिकस्योपलेपनस्य ल्यबन्तत्वम् । "समानकर्तृकयोः पूर्वकाले" इति पाणिनिना क्त्वो ल्यपः स्मरणात् । तेनात्र स्थण्डिलस्य स्वयं पूर्वमुपलेपनम् । उल्कायां ध्रियमाणायां ज्वलति काष्ठेऽन्येन ध्रियमाणे, माऽन्तरा गमत आवसथ्यस्य मम चान्तराले मा गच्छत इत्युक्त्वा अभिधाय, वाग्यतो मौनी, सर्पान् **आग्नेय-श्वेत-अभिभू**रित्यादिभिस्त्रिभिर्मन्त्रैर**वनेनिक्ष्वे**त्येतदन्तैः प्राक्संस्थानवनेजयति अवनिक्तान् शुचीन् करोति । **यथाऽवनिक्तं दर्व्योपघातꣳ सक्तून्सर्पेभ्यो बलिꣳ हरत्याग्नेयेत्यादि अधिपत एष ते बलिरिति**--यथाऽवनिक्तं येषु देशेषु अवनेजनं कृतं यथाऽवनिक्तम् अवनिक्तमनतिक्रम्येत्यर्थः । दर्व्या प्रादेशमात्रया द्व्यङ्गुष्ठपर्वविस्तीर्णया पालाशाद्यन्यतमयज्ञियवृक्षोद्भवया, उपघातम् उपहत्योपहत्य गृहीत्वा, **आग्नेये**त्यादिभिस्त्रिभिर्मन्त्रै**रेष ते बलि**रित्येतदन्तैः प्रतिमन्त्रं सर्पेभ्यो बलिं हरति ददाति । उपाघातमिति णमुल्प्रत्ययान्तः, उपपूर्वो हन्तिर्ग्रहणार्थः । अथ स्रुवेणोपहत्याज्यमिति यावत् । **अवनेज्य पूर्ववत्कङ्कतैः प्रलिखत्याग्नेये**त्यादि **प्रलिखस्वे**त्यन्तम् अवनेज्य अवनेजनं दत्त्वा कथं पूर्ववत्कङ्कतैर्वै प्रादेशमात्रैस्त्रिभिरेकतोदन्तैः समुच्चितैराग्नेयेत्यादिभिस्त्रिभिर्मन्त्रैः **प्रलिखस्वे**त्यन्तैर्यथासङ्ख्य प्रतिबलि प्रलिखाति कण्डूयति । **अञ्जनानुलेपनꣳ स्रजश्चाञ्जस्वानुलिम्पस्व स्रजोऽपि नह्यस्वेति**--अञ्जनं कज्जलं लौकिकदीपजं त्रैककुदं सौवीरमिति प्रसिद्धं वा । अनुलेपनं सुरभि चन्दनादि, स्रजः

पुष्पमालाः, **आग्नेये**त्यादिभिस्त्रिभिर्मन्त्रैरञ्जस्व, अनुलिम्पस्व, **स्रजोऽपि नह्यस्वे**त्यन्तैः प्रतिमन्त्रं प्रतिबलिहरणमेकैकं यथाक्रमं ददाति । **सक्तुशेषꣳ स्थण्डिले न्युप्योदपात्रेणोपनिनीयोपतिष्ठते नमोऽस्तु सर्पेभ्य इति तिसृभिः**—सक्तुशेषं यच्छूर्पे न्युप्यानीतं बल्यर्थं बलिदानायोपलिप्तैकदेशे न्युप्य शूर्पेणैव क्षिप्त्वा, उदपात्रेण जलपात्रेण, उपनिनीय प्रवाह्य, **नमोऽस्तु सर्पेभ्य** इति तिसृभिर्ऋग्भिः सर्पानुपतिष्ठते । बल्यभिमुखस्तिष्ठन् प्राङ्मुखस्तिष्ठन् सर्पानुपतिष्ठते स्तौति । **स यावत्कामयेत न सर्पा अभ्युपेयुरिति तावत्सन्ततयोदधारया निवेशनं त्रिः परिषिञ्चन्परीयादप श्वेतपदा जहीति द्वाभ्याम्**—स गृहपतिः यावत् यावन्तं देशं सर्पाः नागाः नाभ्युपेयुर्न सञ्चरेयुरिति कामयेत इच्छेत् तावत् तावन्तं देशं, सन्ततया अनवच्छिन्नया, उदधारया सलिलधारया, निवेशनं गृहं, परिषिञ्चन् त्रिः परीयात् त्रीन्वारान् गृहस्य समन्तात्प्रादक्षिण्येन परिक्रम्य गच्छेत् । कथम् **अप श्वेतपदा जहीति** द्वाभ्यां मन्त्राभ्याम्। **दर्वीशूर्पं प्रक्षाल्य प्रतप्य प्रयच्छति**--दर्वीं पूर्वोक्तां शूर्पं च प्रक्षाल्य क्षालयित्वा, प्रतप्य सकृत्तापयित्वा, सन्निधानादुल्कायामेव प्रयच्छति ददाति उल्काधाराय सन्निधानादेव । **द्वारदेशे मार्जयन्त आपो हि ष्ठेति तिसृभिः**—द्वारदेशे शालायाः द्वारे **आपो हि ष्ठेति** तिसृभिर्ऋग्भिः मार्जयन्ते । बहुवचनोपदेशात् ब्रह्मयजमानोल्काधाराः मार्जयन्ते अद्भिरात्मानमभिषिञ्चन्ति। **अनुगुप्तमेतꣳ सक्तुशेषं निधाय ततोऽस्तमितेऽस्तमितेऽग्निं परिचर्य दर्व्योपघातꣳ सक्तून्सर्पेभ्यो बलिꣳ हरेदाग्रहायण्याः**--एतं प्रकृतं, सक्तुशेषं होमावशिष्टान् सक्तून् , अनुगुप्तं सुरक्षितं यथा भवति तथा, निधाय स्थापयित्वा, ततस्तस्मात् श्रवणाकर्मकालात् प्रभृति, अस्तमिते सूर्ये, प्रतिदिनमग्निमावसथ्यं, परिचर्य सायंहोमेन आराध्य, दर्व्योपघातं शूर्पे न्युप्तान् सक्तून्सर्पेभ्य उक्तप्रकारेणैव बलिं हरति । किमवधि आग्रहायण्याः आग्रहायणीं पौर्णमासीं यावत् । अथवा आग्रहायणीशब्देन तत्कालावधिकमाग्रहायणीकर्म लक्ष्यते, तत्र हि बलीनामुत्सर्गस्य वक्ष्यमाणत्वात् । **भाष्यकारस्तु**—“ तत इति तेभ्यः सक्तुभ्यः, दर्व्योपहृत्योपहृत्यास्तमितेऽस्तमिते अग्निपरिचरणं कृत्वा बलिं हरेदाग्रहायणीं यावत् ” इत्याह स्म । बलिहरणं च अवनेजनदानप्रत्यवनेजनैः कङ्कतविलेखनान्तैरेव। **तꣳ हरन्तं नान्तरेण गच्छेयुः**-तं गृहपतिं,बलीन् हरन्तम् आवसथ्याग्निम् अन्तरेण मध्ये,न गच्छेयुः प्राणिनः, ततः श्वादयोऽपि निवार्याः। **दर्व्याऽऽचमनं प्रक्षाल्य निदधाति**—दर्व्या आचमनं मुखं प्रक्षाल्य निदधाति स्थापयाति, प्रत्यहं दर्वीमुखप्रक्षालनोपदेशात् शूर्पप्रक्षालनाभावः । **धानाः प्राश्नन्त्यसꣳस्यूताः**—धानाः भर्जितान् यवान् प्राश्नन्ति भक्षयन्ति । बहुवचनोपदेशात् ब्रह्मयजमानोल्काधाराः । कथम्भूताः धानाः असꣳस्यूताः दन्तैरलग्ना अचर्वयन्त इत्यर्थः ॥ **ततो ब्राह्मणभोजनम्**—इति सूत्रार्थः ॥ १४ ॥

अथ **प्रयोगः** । तत्र श्रावण्यां पूर्णिमायां श्रवणाकर्म । तस्य प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं विधायावसथ्याग्नौ कर्म कुर्यात् । तद्यथा—ब्रह्मोपवेशनादिप्राशनान्ते अयं विशेषः । चरुस्थाल्यनन्तरं भर्जनकर्परम् , तत एकं कपालम् , तथा तण्डुलानन्तरं यवान् , ततस्तण्डुलपिष्टान्यासादयेत् । प्रोक्षणकाले यथासादितं प्रोक्षेत् उपकल्पितं च दृषदुपले, शूर्पोल्के, उदपात्रदर्व्यौ, कङ्कतत्रयम्, अञ्जनम् , अनुलेपनम् , स्रजश्चेति । ततः पवित्रकरणादिप्रोक्षणीनिधानान्ते चरुदेशस्योत्तरतो भर्जनमाधिश्रित्य तदुत्तरतः कपालमुपधाय आज्यं निरुप्य चरुपात्रे प्रणीतोदकासेचनपूर्वकं तण्डुलप्रक्षेपं कृत्वा प्रणीतोदकेन पिष्टं सम्पूय पुरोडाशं कृत्वा ब्रह्मद्वारा आज्यमधिश्रित्य, स्वयं चरुमन्येन भर्जने यवान् अपरेणैककपाले पुरोडाशमधिश्रित्य पुरोडाशं प्रथयित्वा,यावत्कपालं सर्वेषां पर्यग्निकरणं कुर्यात्। ततः स्रुवं संस्कृत्याज्यमुद्वास्य चरुं चोद्वास्याज्यस्योत्तरतः, स्थापयित्वा, धाना उद्वास्य चरोरुत्तरतो निधाय, पुरोडाशमुद्वास्य, धानानामुत्तरतः स्थापयेत् । तत आज्योत्पवनावेक्षणप्रोक्षण्युत्पवनानि कृत्वा

धानानां भूयसीर्धाना दृषदुपलाभ्यां पिष्ट्वा, अल्पाः पृथक् स्थापयित्वा, घृतेन सक्तून् अक्त्वा, उपयमनकुशादानाद्याज्यभागान्तं कर्म कुर्यात् । तत आज्येन "अप श्वेतपदा जहि पूर्वेण चापरेण च । सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धवैः स्वाहा" इति । "इदं श्वेतपदे" इति त्यागं विधाय । "न वै श्वेतस्याद्ध्याचारेऽहिर्ददर्श कञ्चन । श्वेताय वैदर्व्याय नमः स्वाहा" इति मन्त्रेण द्वितीयामाहुतिं हुत्वा "इदं श्वेताय वैदर्व्याय" इति त्यक्त्वा स्थालीपाकेन चतस्र आहुतीर्जुहोति । तद्यथा-विष्णवे स्वाहा इदं विष्णवे० । श्रवणाय स्वाहा इदं श्रवणाय० । श्रावण्यै पौर्णमास्यै स्वाहा इदं श्रावण्यै पौर्णमास्यै० । वर्षाभ्यः स्वाहा इदं वर्षाभ्यो० इति । अथ **धानावन्तं करम्भिणम्**इत्यृचा धानानामेकाहुतिं हुत्वा "इदमिन्द्राय०" इति त्यक्त्वा सक्तूनामाहुतित्रितयं जुहुयात् । तद्यथा—"आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपतये स्वाहा" । इदंशब्दयुक्तः स्वाहाकाररहितोऽयं मन्त्र एव त्यागः । त्रिषु । "श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपतये स्वाहा । अभिभूःसौर्यदिव्यानाꣳ सर्पाणामधिपतये स्वाहा ।" ततो "ध्रुवाय भौमाय स्वाहा" इति सर्वं पुरोडाशं स्रुवे कृत्वा जुहुयात् । "इदं ध्रुवाय भौमाय" इति त्यक्त्वा चरुधानासक्तुभ्य उत्तरतः किञ्चित्किञ्चिदादाय स्विष्टकृतं विधाय महाव्याहृतिहोमं, संस्रवप्राशनम्, ब्रह्मणे दक्षिणादानान्तं कुर्यात् । अथ हुतशेषसक्तूनामेकदेशꣳ शूर्पे प्रक्षिप्योदपात्रं दर्वीकङ्कतत्रयाञ्जनानुलेपनस्रजश्च । शालाया बहिर्निष्क्रम्य ब्रह्मणा उल्काधारेण च सह स्वाङ्गणे हस्तमात्रं स्थण्डिलं स्वयमुपलिप्य लौकिकाग्न्युल्कायां ध्रियमाणायां "माऽन्तरा गमत" इति प्रैषमुच्चार्य वाग्यतः स्थण्डिले उदपात्रमादायाग्नय इत्यादिना **अधिपतेऽवनेनिक्ष्वे**त्यन्तेन मन्त्रेण एकत्रावनेजनार्थं जलं दत्त्वा **श्वेतवायवे**त्यादिना **अधिपतेऽवनेनिक्ष्वे**त्यन्तेन द्वितीयम्, **अभिभूःसौर्ये**त्यादिना तथैव तृतीयं सर्पानवनेजयति। ततोऽवनेजनस्थानेषु अवनेजनक्रमेण एतैरेव मन्त्रैरेष **ते बलिरि**त्यन्तैस्त्रिभिः प्रतिमन्त्रं बलिं हरति । ततः पूर्ववदवनेज्य कङ्कतत्रयेण **प्रलिखस्वे**त्यन्तैरेतैरेव मन्त्रैः प्रतिबलि प्रतिमन्त्रं प्रलिखति । ततोऽङ्क्ष्वेत्यन्तैरुक्तमन्त्रैः प्रतिबलि प्रतिमन्त्रमञ्जनं ददाति तथैव "अनुलिम्पस्व" इत्यनुलेपनम् । एवमेव "स्रजोऽपि नह्यस्व" इति पुष्पमालां दत्त्वा सक्तुशेषं स्थण्डिले क्षिप्त्वा उदपात्रजलेन प्रसंप्लाव्य **नमोऽस्तु सर्पेभ्य** इत्यादिभिस्तिसृभिर्ऋग्भिस्तिष्ठन् सर्पानुपतिष्ठते । ततः स गृहपतिरेतावन्तं देशं सर्पा न प्रविशेयुरिति यावन्तं कामयेत तावन्तं देशं सन्ततोदकधारया त्रिः परिषिञ्चन् गृहं परीयात् **अपश्वेतपदा** जहीति पूर्वोक्तमन्त्राभ्यां सकृत्, द्विस्तूष्णीम् । ततो दर्वीं शूर्पं च प्रक्षाल्योल्कायां सकृत्प्रतप्योल्काधाराय प्रयच्छति । अथ शालाद्वारि **आपो हि ष्ठे**ति त्र्यृचेन ब्रह्मयजमानोल्काधारा मार्जयन्ते जलेनात्मानम् । ततो धानाः प्राश्नन्ति ब्रह्मयजमानोल्काधारा अनवखण्डयन्तः । "ततो ब्राह्मणभोजनम् ।" एतावच्छ्रवणाकर्म । अथ प्रत्यहं **बलिहरणप्रयोगः** । सक्तुशेषं सुगुप्ते भाण्डे स्थापयित्वा ततोऽस्तमिते सूर्ये कृतसायंहोमः शूर्पे सक्तुदर्वीकङ्कतत्रयं निधायोदपात्रं गृहीत्वा सोल्काधारः शालाया बहिरुपलेपनादि परिलेखनान्तं बलिहरणमनुदिनं पूर्ववत्कुर्यात् आग्रहायणीं यावत् । माऽन्तरा गमतेति प्रैषाभावेऽपि कश्चिदन्तरा न गच्छेत् दर्वीमुखमेव प्रक्षालयेदिति ।

इत्यहरहर्बलिदानविधिः ॥ १४ ॥

गदा०—**अथातः श्रवणाकर्म**—श्रवणाकर्मेति वक्ष्यमाणस्य कर्मणो नामधेयम् । व्याख्यास्यत इति सूत्रशेषः । **श्रावण्यां पौर्णमास्याम्**—तत्कर्म श्रावणशुक्लपञ्चदश्यां भवति । अस्य कर्मणो गौणकालो न भवति । तदुक्तं **कारिकायाम्**—"श्रावण्यामेव तत्कार्यमभावाद्गौणकालतः । परिसंख्योक्तितः सूत्रकारस्यान्यस्मृतेर्बलात्" । "यावज्जीवं पाकयज्ञानुष्ठानं सकृद्वा" इति तत्रैवोक्तम् । "वचनात्सूत्रकारस्य सकृदस्य क्रिया भवेत् । एवमेवोत्तरेषां स्यादावृत्तिर्वा स्मृतेर्बलात् ॥ सकृत्करणमिच्छन्ति तत्रावृत्तिः सतां मतात् ॥" तथा—"यावज्जीवं पाकयज्ञैर्यजेत्संवत्सरेण च ॥" इति । **स्थालीपाकꣳ श्रपयित्वाऽक्षतधानाश्चैककपालं पुरोडाशम्**—स्थालीपाकं चरुं श्रपयित्वा अक्षतानां सतुषयवानां धानाः अक्षतधानास्ताश्च श्रपयित्वा एकस्मिन् कपाले श्रप्यत इत्येककपालस्तं च पुरोडाशं

श्रपयित्वा, चरुधानापुरोडाशानां सिद्धानामुपादानं मा भूदिति श्रपयित्वेति ग्रहणम् । भर्जनैककपालयोरप्यासादनप्रोक्षणे भवतः । "अर्थवदासाद्यार्थवत्प्रोक्ष्य" इत्यविशेषोपदेशात् । पुरोडाशस्य श्रपणमात्रोपदेशात्पेषणानुपदेशाच्च लौकिकपिष्टानामासादनम् । **धानानां भूयसीः पिष्ट्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोत्यप श्वेतपदा जहि पूर्वेण चापरेण च । सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धवैः स्वाहा । न वै श्वेतस्याध्याचारेऽहिर्ददर्श कंचन । श्वेताय वैदर्व्याय नमः स्वाहेति**—धानानां मध्ये भूयसीर्बह्वीर्धानाः पिष्ट्वा पेषणेन सक्तुत्वं सम्पाद्याज्यभागौ हुत्वा आज्येनाहुती द्वे जुहोत्यप श्वेतपदा जहीति द्वाभ्यां मन्त्राभ्याम् । तत्र **अप श्वेतपदा जहीति** प्रथमाम्, **न वै श्वेतस्येति** द्वितीयाम् । मन्त्रार्थः । हे श्वेतपद त्वमिमा मदीयाः प्रजाः मम निवासभूमेः पूर्वेण भागेन अपरेण च पश्चाद्भागेन च जहि स्वजातिजनितमालिन्यधर्मात् परित्यज । अस्मात् स्थानाच्च स्थानान्तरं व्रज । किम्भूताः प्रजाः सप्त च सपिण्डसगोत्रसोदकत्वभेदेन सप्तसप्तपुरुषसम्बन्धाः, सप्त कुलजा वा । तद्यथा "पिता माता च भार्या च दुहिता भगिनी तथा । पितृष्वसा मातृष्वसा सप्त गोत्राण्यमूनि वै" इति । वारुणैर्वरुणायत्तैर्नागैर्मदीयाः प्रजाः परित्यज । सर्वाः सेवकपश्वादिरूपाः राजबान्धवैर्नागैः राजा तक्षको वासुकिः शेषो वा तस्य ये बान्धवास्तैः सह त्यज । एतैः सह सदा तुभ्यं सुहुतमस्तु हविःसम्पादनमस्तु ॥ १ ॥ पूर्वोक्तमेव. द्रढयति । वै निश्चयेन श्वेतस्य नागस्याध्याचारे आधिपत्ये अहिः सर्पजातीयः कंचन लोकं प्राणिजातीयं न पश्यति स्म पापदृष्ट्या । अनेन कर्मणा स्थानत्यागात् तदर्थं श्वेताय शुद्धाय नागाय नमस्कारपूर्वकं सुहुतमस्तु । किम्भूताय नागाय वैदर्व्याय विदर्वापत्याय । **स्थालीपाकस्य जुहोति विष्णवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्चेति**—ततो "विष्णवे स्वाहा" इत्येवमादिभिश्चतुर्भिर्मन्त्रैः स्थालीपाकस्य चरोश्चतस्र आहुतीर्जुहोति । **धानावन्तमिति धानानाम्**—ततो **धानावन्तं करम्भिणमित्यनयर्चा** स्रुवेण धानानामेकाहुतिं जुहोति । **घृताक्तान् सक्तून् सर्पेभ्यो जुहोत्याग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपतये स्वाहा । श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपतये स्वाहा । अभिभूःसौर्यदिव्यानाꣳ सर्पाणामधिपतये स्वाहेति**—घृतेनाक्तान् अभिघारितान् सक्तून् सर्पेभ्यो मन्त्रोक्तेभ्य **आग्नेयपाण्डुपार्थिवानामिति** त्रिभिर्मन्त्रैस्तिस्र आहुतीर्जुहोति । मन्त्रार्थः । आग्नेयाः अग्निदेवत्याः, पाण्डवाः पाण्डुजातीयाः, पार्थिवा पृथिवीविहारिणः तेषां सर्पाणामधिपतये शेषाय वासुकये वा स्वाहा सुहुतमस्तु ॥ १ ॥ श्वेताः श्वेतजातीयाः वायवाः वायुदेवत्या इति यावत् । आन्तरिक्षा अन्तरिक्षविहारास्तेषामाधिपतय इति प्राग्वत् ॥ २ ॥ तथा अभिभवन्ति सर्वानित्यभिभुवः, सौर्याः सूर्यदेवत्याः, दिव्या दिवि विहारास्तेषाम् । अभिभूरिति विसर्गश्छान्दसः ॥ ३ ॥ **सर्वहुतमेककपालं ध्रुवाय भौमाय स्वाहेति**—सक्तुहोमोत्तरमेककपालं पुरोडाशं सर्वहुतं सम्पूर्णं हुतं यथा भवति तथा "ध्रुवाय भौमाय स्वाहा" इत्यनेन मन्त्रेण जुहोति । ततः स्विष्टकृद्धोमः स्थालीपाकधानासक्तुभ्यः । "सर्वहुत एककपालः" इति परिभाषितत्वादत्रावाच्यं सर्वहुतमेककपालमिति । वाच्यं वा "पाकयज्ञेष्ववत्तस्यासर्वहोमः" इति सूत्रेण संस्रवनिधानं प्राप्तं तद्व्युदासार्थम् । **प्राशनान्ते सक्तूनामेकदेशꣳ शूर्पे न्युप्योपनिष्क्रम्य बहिः शालायाः स्थण्डिलमुपलिप्योल्कायां ध्रियमाणायां माऽन्तरा गमतेत्युक्त्वा वाग्यतः सर्पानवनेजयत्याग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपतेऽवनेनिक्ष्व । श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपतेऽवनेनिक्ष्व । अभिभूःसौर्यदिव्यानाꣳ सर्पाणामधिपतेऽवनेनिक्ष्वेति**—संस्रवप्राशनान्ते पूर्वकृतसक्तूनामेकदेशं बलित्रयपर्याप्तं नडवेणुशरेषीकान्यतममये शूर्पे न्युप्य कृत्वा उपनिष्क्रम्य शालायाः सकाशान्निर्गत्य बाहिः प्राङ्गणे स्थण्डिलभूमिं गोमयेनोपलिप्योल्कायां ध्रियमाणायां ज्वलत्काष्ठे अन्यने ध्रियमाणे "माऽन्तरा गमत" इत्यभिधाय वाग्यतः **आग्नेयपाण्डुपार्थिवानामिति** त्रिभिर्मन्त्रैः सर्पान् प्राक्संस्थान् अवनेजयाति भूमावुदकप्रक्षेपेणावनिक्तान् शुचीन् करोति । माऽन्तरा गमत आवसथ्यस्य मम चान्तराले मा गच्छतेत्यर्थः । अत्र शूर्पं चर्मतन्तुबद्धमपि ग्राह्यमेव शूर्पस्वरूपस्य तथा प्रसिद्धत्वात् । उल्का च लौकिकाग्निना कार्या । "विषये लौकिकमुपयुक्तत्वात्" इति कात्यायनोक्तेः । **यथाऽवनिक्तं दर्व्योपघातꣳ सक्तून् सर्पेभ्यो बलिꣳ हरत्याग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपत एष ते बलिः श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपत एष ते बलिः । अभिभूःसौर्यदिव्यानाꣳ सर्पाणामधिपत एष ते बलिरिति**—येषु देशेषु अवनेजनं कृतं तदनतिक्रम्य यथाऽवनिक्तं दर्व्या प्रसिद्धया उपघातम् उपहत्योपहत्य गृहीत्वा आग्नेयेत्यादिभिर्मन्त्रैः प्रतिमन्त्रं सर्पेभ्यो बलिं हरति ददाति । उपपूर्वो हन्तिर्ग्रहणार्थः ।

अथ स्रुवेणोपहत्याज्यामितिवत् । **अवनेज्य पूर्ववत्कङ्कतैः प्रलिखत्याग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपते प्रलिखस्व श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपते प्रलिखस्वाभिभूःसौर्यदिव्यानाꣳ सर्पाणामधिपते प्रलिखस्वेति**—तत **आग्नेये**त्यादिमन्त्रैः पूर्ववदवनेजनं कृत्वा कङ्कतैस्त्रिभिर्वैकङ्कतीयैः प्रादेशप्रमाणैरेकतोदन्तैः समुच्चितैराग्नेयेत्यादित्रिभिर्मन्त्रैर्यथासंख्यं दत्तबलिं प्रलिखाति कण्डूयति । **अञ्जनानुलेपनꣳ स्रजश्चाञ्जस्वानुलिम्पस्व स्रजोऽपि नह्यस्वेति**—अञ्जनं सौवीराञ्जनम्, लौकिकदीपजं कज्जलं वा । अनुलेपनं चन्दनादि । स्रजः पुष्पमालाः । **आग्नेये**त्यादित्रिभिर्मन्त्रैः"अञ्जस्वानुलिम्पस्व स्रजोऽपि नह्यस्व" इत्यन्तैः प्रतिमन्त्रं प्रतिबलि यथाक्रममेकैकं ददाति । **सक्तुशेषꣳ स्थण्डिले न्युप्योदपात्रेणोपनिनीयोपतिष्ठते नमोऽस्तु सर्पेभ्य इति तिसृभिः**—सक्तुशेषं बल्यर्थं यत्पूर्वं शूर्पे कृत्वा आनीतं बलिदानावशिष्टं तत्स्थण्डिले उपलिप्तायां भूमौ शूर्पेणैव न्युप्य प्रक्षिप्योदपात्रेणोपनिनीय आप्लाव्य **नमोऽस्तु सर्पेभ्य** इति तिसृभिर्ऋग्भिर्बलिमुपतिष्ठते । बलिसमीपे तिष्ठन् मन्त्रं पठतीत्यर्थः । **स यावत्कामयेत न सर्पा अभ्युपेयुरिति तावत्सन्ततयोदधारया निवेशनं त्रिः परिषिञ्चन् परीयादप श्वेतपदा जहीति द्वाभ्याम्**—स यजमानो यावत् यावन्तं देशं सर्पा नाभ्युपेयुर्नागच्छेयुरिति कामयेत इच्छेत् तावत् तावन्तं देशं भूभागं सन्ततया अनवच्छिन्नया जलधारया निवेशनं गृहम् **अपश्वेतपदा जहीति** पूर्वोक्ताभ्यां मन्त्राभ्यां परिषिञ्चन् त्रिः परीयात् । त्रीन्वारान् गृहस्य परितः प्रादक्षिण्येन गच्छेत् । सकृन्मन्त्रेण परिगमनम् । द्विस्तूष्णीम् । तत इतरथावृत्तिः । कर्त्रन्तरस्यानुपदेशात्स्वयङ्कर्तृकाणि स्मार्तानि कर्माणि, तत्र स इत्युच्यमाने तस्यैव प्राप्नुवन्ति । काम्येषु तु पुनर्ग्रहणं नियमार्थम् । काम्यं नियमेन स्वयं कर्तव्यम् । यत्त्वकामसंयुक्तं कालनिमित्ते चोद्यते तदागते काले अवश्यं कर्तव्यम् । "असन्निहिते च यजमाने अन्येनापि कारयितव्यम्" इति भर्तृयज्ञाः । **दर्वीशूर्पे प्रक्षाल्य प्रतप्य प्रयच्छति**—यया बलिदानं कृतं तां दर्वीं शूर्पं च प्रक्षाल्य प्रतप्य, सन्निधानादुल्कायामेव सकृत्तापयित्वा प्रयच्छति उल्काधाराय सन्निधानात् । **द्वारदेशे मार्जयन्त आपो हि ष्ठेति तिसृभिः**—ऋग्भिः बहुवचनाद्ब्रह्मयजमानोल्काधाराः शालाया द्वारे **आपो हि ष्ठे**ति तिसृभिर्ऋग्भिर्मार्जयन्ते अद्भिरात्मानमभिषिञ्चन्ति । **अनुगुप्तमेतꣳ सक्तुशेषं निधाय ततोऽस्तमितेऽस्तमितेऽग्निं परिचर्य दर्व्योपघातꣳ सक्तून्सर्पेभ्यो बलिꣳ हरेदाग्रहायण्याः**—एतं प्रकृतं सक्तुशेषम् अनुगुप्तं सुगुप्तं यथा भवति तथा स्थापयित्वा ततस्तेभ्यः सक्तुभ्योऽस्तमितेऽस्तमिते सूर्ये प्रत्यहम् अक्षतहोमानन्तरं दर्व्योपघातं दर्व्योपहत्योपहत्य सक्तून्सर्पेभ्यो बलिं हरेदाग्रहायणीं पौर्णमासीं यावत् । **तꣳ हरन्तं नान्तरेण गच्छेयुः**—तमावसथ्याग्निम्, बलिं हरन्तं यजमानं चान्तरा मध्ये न गच्छेयुर्लोकाः । श्वादयोऽपि निवार्याः । **दर्व्याऽऽचमनं प्रक्षाल्य निदधाति**—ततो दर्व्या आचमनं मुखं प्रक्षाल्य निदधाति प्रतिदिनम् । अत्र न शूर्पप्रक्षालनमनुक्तत्वात् । **धानाः प्राश्नन्त्यसꣳस्यूताः**—श्रावण्यां पौर्णमास्यां संस्थिते श्रवणाकर्मणि धाना अश्नन्ति दन्तैरचर्वयन्तो ब्रह्मयजमानोल्काधाराः । **ततो ब्राह्मणभोजनम्**—इति श्रीत्रिरग्निचित्सम्राट्स्थपति—महायाज्ञिकश्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे चतुर्दशी कण्डिका ॥ १४ ॥ * ॥

अथ पदार्थक्रमः । तत्र प्रथमप्रयोगे मातृपूजापूर्वकं नान्दीमुखं श्राद्धं कृत्वा आवसथ्ये कर्म कार्यम् । ब्रह्मोपवेशनादिदक्षिणादानान्ते विशेषः । चरुपात्रानन्तरं भर्जनखर्परस्यासादनम् । तत एककपालम् । तण्डुलानन्तरं यवानामासादनम् । ततः पिष्टानाम् । प्रोक्षणं च यथासादितानाम् । उपकल्पनीयानि । दृषदुपले । शूर्पम् । उल्का । उदपात्रम् । दर्वी । कङ्कतत्रयम् । अञ्जनम् । अनुलेपनम् । स्रजश्चेति ।" उल्काधारकः । मार्जनीयोदकम् । धानाः प्राशनार्था लौकिका इति त्रयमधिकमुपकल्पनीयम्" इति **रेणुकः** । ततः पवित्रकरणादिप्रोक्षणीनिधानान्ते चरुदेशस्योत्तरतो भर्जनखर्पराधिश्रयणम् । अत्र "सव्याशून्येऽङ्गारकरणम्" इति **रेणुकः** । भर्जनस्योत्तरत एककपालेपधानम् । आज्यनिर्वापः । चरुपात्रे तण्डुलप्रक्षेपः । प्रणीतोदकेन पिष्टसंयवनम् । ब्रह्मण आज्याधिश्रयणम् । तदुत्तरतश्चरोरधिश्रयणं यजमानस्य । चरोरुत्तरतः खर्परे यवाधिश्रयणमुल्काधारस्य । कपाले पुरोडाशमधिश्रित्यैककपालं प्रथयेदितरः । सर्वेषां पर्यग्निकरणम् । स्रुवसंस्कारः । तत आज्यादीनामुद्वासनमुदक्संस्थम् । आज्योत्पवनम् । अवेक्षणम् । प्रोक्षण्युत्पवनम् । धानानां भूयसीः पिष्ट्वा अल्पानां स्थापनम् । आज्येन सक्तूनामञ्जनम् । तत उपयमनकुशादानाद्याज्यभागान्ते आज्याहुतिद्वयं कुर्यात् । तत्र अप श्वेतपदेति प्रथमाम् । इदं श्वेतपदे० । न वै श्वेतस्येति द्वितियाम् । इदं श्वेतपदाय वैदर्व्याय० । ततः स्थाली[illegible] । विष्णवे स्वाहा० । श्रवणाय स्वाहा० ;

श्रावण्यै पौर्णमास्यै० । वर्षाभ्यः० । इदं विष्णवे न ममेत्यादित्यागः । **धानावन्तमित्यृचा** धानानामेकाऽऽहुतिः । इन्द्राय स्वाहा इदमिन्द्राय न० । ततः सक्तूनामाहुतित्रयं जुहुयात् । "आग्नेयपाण्डुपार्थिवानाम्" इति प्रथमाम् । "श्वेतवायवान्तरिक्षाणाम्" इति द्वितीयाम् । "अभिभूः" इति तृतीयाम् । यथा मन्त्रान्ते त्यागाः । स्वाहाकारवर्जिता इदंशब्दादयः । ततो "ध्रुवाय भौमाय स्वाहा" इति पुरोडाशं सकलं जुहोति । इदं ध्रुवाय भौमाय० । ततश्चरुधानासक्तुभ्य उत्तरतः स्विष्टकृत् । ततो नवाहुतयः । संस्रवप्राशनादिदक्षिणादानान्तम् । सक्तुशेषैकदेशस्य शूर्पे प्रक्षेपः । शालाया बहिर्निष्क्रमणम् । बहिरेव स्थण्डिलोपलेपनम् । तत उल्काधारणम् । "माऽन्तरा गमत" इति प्रैषः । वाग्यतः स्थण्डिले सपानवनेजयाति "आग्नेयपाण्डुपार्थिवाना ९ सपार्णामाधिपतेऽवनेनिक्ष्व" इति त्रिभिर्मन्त्रैः प्रतिमन्त्रम् । ततोऽवनेजनस्थानेष्ववनेजनक्रमेणैतैरेव मन्त्रैरेष **ते बलिरित्यन्तै**स्त्रिभिः प्रतिमन्त्रं बलिं हराति । अत्र "यथादैवतं त्यागाः" इति **गर्गः** । नेत्यपरे । "नाञ्जनादौ त्यागः" इति **रेणुकः** । ततः पूर्ववत्पुनरवनेजनम् । एतैरेव मन्त्रैः **प्रलिखस्वेत्यन्तैः** कङ्कतत्रयेण प्रतिबलि प्रतिमन्त्रं प्रलिखति । ततोऽञ्जस्वेत्यन्तैरुक्तमन्त्रैः प्रतिबलि प्रतिमन्त्रमञ्जनं ददाति । तथैव "अनुलिम्पस्व" इत्यनुलेपनदानम् । "स्रजोऽपि नह्यस्व" इत्यन्तैः पुष्पमालादानम् । ततः सक्तुशेषं स्थण्डिले न्युप्योदपात्रनिनयनं सक्तुशेषस्योपरि । **नमोऽस्तु सर्पेभ्यः** इति तिसृभिरुपस्थानम् । स यावन्तं कामयेत "एतावन्तं देशं न सर्पा अभ्युपेयुः" इति तावन्तं गृहदेशमुदधारया सन्ततया त्रिः परिषिञ्चन्परीयादप **श्वेतपदा जहीति** द्वाभ्याम् । अत्र "स्वाहाकारो न" इति **गर्गरेणुकौ** । सकृन्मन्त्रेण परिगमनम् । द्विस्तूष्णीम् । ततः "इतरथावृत्तिः" इति **रेणुकः** । दर्वीं शूर्पं च प्रक्षाल्योल्कायां प्रतप्योल्काधाराय प्रयच्छति । ततो जलेन मार्जनं द्वारदेशे **आपो हि ष्ठे**ति तिसृभिर्ब्रह्मयजमानोल्काधाराणाम् । ततो धानानां प्राशनं तेषामेव । ततो ब्राह्मणभोजनम् । सक्तुशेषस्थापनं सुगुप्ते भाण्डे । ततोऽस्तमिते अक्षतहोमानन्तरमुल्काधारणादिबलिहरणकङ्कतपरिलेखान्तं पूर्ववत् । "माऽन्तरा गमत" इति प्रैषाभावेऽपि नान्तरा गमनम् । दर्वीमुखप्रक्षालनम् । "शूर्पदर्व्योः प्रक्षालनम्" इति **वासुदेवरेणुकौ** । एवमन्वहं बलिहरणमाग्रहायणीं यावत् । इति **पदार्थक्रमः** । अथ **गर्गमते** विशेषः । पात्रासादने—**चरुस्थाली** । आज्यानन्तरं यवाः । तण्डुलाः । पिष्टम् । कर्परिका । कपालम् । बर्हिः । दर्वी । उल्का । उल्काधारश्च । शूर्पम् । कङ्कतास्त्रयः । अञ्जनम् । अनुलेपनम् स्रजश्च । उदकम् । दृषदुपले । वरश्च । ततः स्फ्योपहितमोषधिकरणम् । ततो ग्रहणम् । विष्णवे, श्रवणाय, श्रावण्यै, पौर्णमास्यै, वर्षाभ्यो जुहोति । तण्डुलानां ग्रहणम् । "इन्द्राय जुष्टं गृह्णामि" इति यवानाम् । "ध्रुवाय भौमाय जु०" पिष्टस्य ग्रहणम् । प्रोक्षणे त्वाधिकः । प्रोक्षणीनिधानान्ते भर्जनाधिश्रयणादिपर्यग्निकरणान्ते स्रुवप्रतपनादिबर्हिःस्तरणान्तम् । "धाना उद्वास्याल्पानां पेषणं कृत्वा चर्वादीनामुद्वासनमिति **गर्गमतम्**" इति **तत्पद्धतौ** । स्तरणान्ते आज्योद्वासनादिधानोद्वासनान्तम् । अल्पानां धानानां पृथक्करणम् । भूयिष्ठानां पेषणम् । ततः सर्वेषामभिघारणम् । बर्हिष्यासादनं च । तत उपयमनादानाद्याज्यभागान्तम् । ततः स्विष्टकृदादि दर्वीं शूर्पं च प्रक्षाल्य प्रतप्य प्रदानान्तं समानम् । बलिहरणादौ सक्तुहोमवद्यथोद्देशत्यागाः । "परिषेचनमन्त्रयोः स्वाहाकारवर्जितयोरुच्चारणम्" इति **गर्गपद्धतौ** । मार्जनं यजमानपत्न्युल्काधाराणाम् । सक्तूनां स्थापनम् । ततो धानाप्राशनं स्वामिब्रह्मोल्काधाराणाम् । ततो बर्हिर्होमादिब्राह्मणभोजनान्तम् । ततोऽस्तमिते उल्काधारणादिपरिलेखान्तं पूर्ववत् । यथोक्ता एव त्यागाः । एवं प्रत्यहमाग्रहायणीं यावत् ।" इति **गर्गमते** । **कारिकायां** विशेषः । श्रवणाकर्माकरणे—"श्रवणाकर्म लुप्तं चेत्कथंचित्सूतकादिना । आग्रहायणिकं कर्म बलिवर्जमशेषतः ॥ अकृत्वाऽन्यतमं यज्ञं पञ्चानामधिकरतः । उपवासेन शुद्ध्यन्ति पाकसंस्थां तथैव च ॥ पाकसंस्थासु लुप्तासु श्रवणाकर्म आदितः । प्राजापत्यं चरेत्कृच्छ्रं वचनात्तु प्रजापतेः ॥ स्वयं होमाश्च यावन्तो न कृताश्चेत्प्रमादतः । तावतोऽपि बलींश्चायं हरेत्तदहरेव तु ॥ एकैकं परिलेखान्तमेकमेवोदपावकम् । प्रक्षालनं तदन्ते स्याच्छूर्पदर्व्योर्भवेदिति" ॥१४॥

विश्व०-अथा...कर्म-समयमाह-**श्राव...स्यामिति**-नान्यदेत्यर्थः । कथं स्यादत आह-**स्थाली...डाशं**—पदार्थक्रमोऽयम् । परिसमूहनादि । आज्यस्थालीमासाद्य चरुस्थाली, संमार्गकुशाः, उपयमनकुशाः, समिधः, स्रुवः, आज्यम्, यवाः, तण्डुलाः, पिष्टं, कर्परिका, एककपालं, बर्हिः, दर्वी, उल्काधारश्च, शूर्पं, कङ्कतास्त्रयः, अञ्जनम्, अनुलेपनं, स्रजश्च, उदकं, दृषदुपले, वरश्च, स्फ्योपहितमोषधिकरणं, तण्डुलानां ग्रहणं, विष्णवे, श्रवणाय, श्रावण्यै, पौर्णमास्यै, वर्षाभ्यो जुष्टं गृह्णामि । यवानां ग्रहणम्, इन्द्राय जुष्टं गृह्णामि । पिष्टस्य ग्रहणं, ध्रुवाय भौमाय जुष्टं गृह्णामि । सर्वत्र प्रोक्षणे त्वाशब्दोऽधिकः । चरोरधिश्रयणं, कर्परिकैककपालयोश्चाधिश्रयणं, कर्परिकायां यवाः, एककपाले पुरोडाशः, [illegible]नां युगपदधिश्रयणम् । ततः

पर्यग्निकरणं सर्वेषाम् । अर्द्धश्र्टते सुप्रवतपनादि वर्हिःस्तरणान्तम्। अन्वयस्तु अक्षतानां यवानां धानाः । अक्षतेषु यवा मुख्या इत्युक्तत्वात्।"श्रपयित्वा"इति काकाक्षिन्यायादन्वितं भवति । चकारस्तु एककपालमित्यत्र श्रपयित्वेत्यनुकर्षणार्थः।**धाना...होति**-ततो घृताक्तानामुद्वासनं धानानां कृत्वा तेषां भूयसीः वह्वीः पिष्ट्वा सक्तुत्वमापाद्य ततश्चरुपुरोडाशयोः श्र्टताभिघारणोद्वासने कृत्वोद्वासितानां चरुधानासक्तुपुरोडाशानां प्राणदानानन्तरं वर्हिषि निधायोपयमनकुशादानाद्याज्यभागाविष्ट्वा वक्ष्यमाणमन्त्राभ्यां द्वे आज्याहुती जुहोतीत्यर्थः।तदेव सर्पापसर्पकं मन्त्रद्वयमाह-**अप...स्वाहेति**-इदं श्वेतपदे। इदं श्वेताय वैदर्व्यायेति त्यागः ।**स्थाली...श्चेति**–"विष्णवे स्वाहा"इत्यादिचतस्र आहुतयः।"इदं विष्णवे"इत्यादि यथादैवतं त्यागाः। विष्ण्वादिदेवताभ्यः स्थालीपाकाऽवयवमादाय जुहोतीत्यर्थः । **धाना...नानाम्**–धानानामेकामाहुतिं **धानावन्तमि**ति मन्त्रेण जुहोतीत्यनुषङ्गः । इदमिन्द्राय इति त्यागः । **घृताक्ता...स्वाहेति**–घृतेन अक्ताः तान् सक्तून् सर्पेभ्यः **आग्नेये**त्यादिभिस्त्रिभिर्मन्त्रैः प्रतिमन्त्रं तिस्र आहुतीर्जुहोति। इदंपूर्वः स्वाहाशून्यो मन्त्र एव त्यागः । **सर्व...स्वाहेति**–सर्वहुतं यथा स्यात्तथैककपालं जुहोति, केन मन्त्रेणेत्यत उक्तं **ध्रुवाय भौमाय स्वाहेति**–"इदं ध्रुवाय भौमाय" । ततश्चरुधानासक्तुभ्यः स्विष्टकृत्।अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते । **प्राश...न्युप्य**–ततो महाव्याहृत्यादिदक्षिणादानान्तं । **सक्तूनाम्** इत्युपलक्षणं, दर्वी, कङ्कताः, अञ्जनानुलेपनं, स्रजश्चेति । सक्त्वैकदेशश्च बलित्रयपर्याप्तः । शूर्पे शरेषीकावंशान्यतममये, न्युप्य स्थाप्येत्यर्थः । **उपनि...निक्ष्वेति**–उदकं,लौकिकाग्निदीप्ता उल्का तस्याः ग्रहीतारं चाहूयोपनिष्क्रम्योल्कायां ध्रियमाणायां "माऽन्तरा गमत" इत्यन्यान् प्रत्युक्त्वा । अन्तरालं च यजमानावसथ्ययोः। **वाग्यतः सर्पा**नित्यादि निगदव्याख्यातम् । अवनेजनं प्राक्संस्थम्।**यथा...बलिरिति**–होमवत्त्यागाः । अवनिक्तमनतिक्रम्य दर्व्या प्रादेशमितया,उपघातमित्युपपूर्वस्य हन्तेर्ग्रहणार्थता,स्रुवेणोपहत्याज्यमितिवत्।**अव...खस्वेति**–कङ्कतानि प्रादेशमात्राणि त्रीणि वैकङ्कतानि। तैः क्रमेण प्रलेखनं, कण्डूयनेन रेखाकरणम्।**अञ्ज...ह्यस्वेति**–अन्जनं त्रैककुदं लौकिकं वा, अनुलेपनं चन्दनं,स्रजः सुरभिपुष्पमालाः ।**आग्नेये**त्यादीभिः त्रिभिर्मन्त्रैः, 'अञ्जस्वानुलिम्पस्व स्रजोऽपि नह्यस्व' इत्यन्तैः प्रतिमन्त्रं प्रतिवल्येकैकं ददाति क्रमेण । **सक्तु...द्वाभ्यां**—मन्त्राभ्यां स्वाहाकाररहिताभ्यां परिषिञ्चन् त्रिःपरीयात्सकृन्मन्त्रेण,द्विस्तूष्णीम्। **दर्वी...च्छति**–प्रतपनमुल्कायां सांनिधानात्।दानं चोल्काधाराय । **द्वार...स्टाभिः**-मार्जयन्ते इति बहुत्वसामर्थ्यात्पत्नीयजमानोल्काधाराः । **अनु...धाय**–अनुगुप्तं सुरक्षितं संस्थाप्य वर्हिर्होमादि ब्राह्मणभोजनान्तं समापयेत् । **ततो...यण्याः**--ततः श्रवणाकर्मानन्तरम्"सक्तुभ्यः" इति **कर्कोपाध्यायाः** । अग्निमावसथ्यम् । आग्रहायण्यवधि नित्यत्वसूचनार्थोऽभ्यासः, कर्मोपलक्षणकमाग्रहायणीपदम् । **तं...च्छेयुः**-आवसथ्यबलिदानस्थलयोरन्तरेण अन्ये न गच्छेयुः। **दर्व्या...धाति**-भूमाविति शेषः। आद्यबलिदानविहितदानापवादः । किंतु भूमौ निदध्यात् प्रात्यहिकबलिदाने दर्वीं शूर्पं च । आचमनं मुखम् । बलिदानं च प्रैषावनेजनाद्युक्तप्रकारेण शूर्पदर्व्योर्भूनिधानान्तम् । अभ्यस्यमानमाग्रहायणीयसमयावधि श्रवणाकर्माङ्गबलिदानमभिधायेदानीं प्रकृतमाह–**धाना...स्यूताः**-असंस्यूताः दन्तैरस्पृष्टाः । **ततो...जनम्**–बलिदानसमाप्त्यग्रे, समाप्ते कर्मणि दश पञ्च वा ब्राह्मणान् भोजयेदित्यर्थः । श्रावण्यां श्रवणाकर्म पूर्वाह्णे प्राग्वैश्वदेवात् । तदनन्तरं वैश्वदेवः ॥ इति चतुर्दशी कण्डिका ॥ १४ ॥ ॥ * ॥

१६६३ **प्रौष्ठपद्यामिन्द्रयज्ञः ॥ १ ॥ पायसमैन्द्रं श्रपयित्वाऽपूपांश्चापूपैः स्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोतीन्द्रायेन्द्राण्या अजायैकपदेऽहिर्बुध्न्याय प्रौष्ठपदाभ्यश्चेति ॥२॥ प्राशनान्ते मरुद्भ्यो बलिं हरत्यहुतादो मरुत इति श्रुतेः ॥ ३ ॥ आश्वत्थेषु पलाशेषु मरुतोऽश्वत्थे तस्थुरिति वचनात् ॥ ४ ॥ शुक्रज्योतिरिति प्रतिमन्त्रम् ॥ ५ ॥ विमुखेन च ॥ ६ ॥ मनसा ॥ ७ ॥ नामान्येषामेतानीति श्रुतेः ॥ ८ ॥ इन्द्रं दैवीरिति जपति ॥ ९ ॥ ततो ब्राह्मणभोजनम् ॥ १० ॥ १५ ॥**

कर्कः– **प्रौष्ठपद्यामिन्द्रयज्ञः**–इन्द्रयज्ञ इति कर्मणो नामधेयम् । प्रौष्ठपदी च भाद्रपदी पौर्णमासी । **पायसमैन्द्रं श्रपयित्वाऽपूपांश्च**–ऐन्द्रग्रहणात् "इन्द्राय स्वाहा" इति होमो लभ्यते । इह च पयस उपसर्जनार्थतया अपां क्षीरस्य च प्रणयनं क्रियते । **अपूपैः स्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति इन्द्रायेन्द्राण्यै**–इत्येवमाद्याः । अपूपैः स्तरणमग्नेः । आज्याहुत्यन्ते "इन्द्राय स्वाहा" इति पायसेन होमः। ततः स्विष्टकृदादि । **प्राशनान्ते मरुद्भ्यो बलिं हरत्याश्वत्थेषु पलाशेषु**–कुत एतत् । **मरुतोऽश्वत्थे**

तस्थुरिति वचनात् । शुक्रज्योतिरिति—एभिर्मन्त्रैर्नमस्कारान्तैः प्रतिमन्त्रम् । विमुखेन च । मनसा—बलिहरणम् । विमुखश्च उग्रश्च भीमश्चेत्यध्येतॄणां प्रसिद्धः । नामान्येषामेतानीति श्रुतेः—एषां मरुतामेतानि नामानि श्रूयन्ते । इन्द्रं दैवीरिति जपति । ततो ब्राह्मणभोजनम् ॥ १५ ॥ * ॥

जय०—इन्द्रयज्ञः—इति कर्मणो नामधेयम्।प्रौष्ठपदी भाद्रपदपौर्णमासी।ऐन्द्रग्रहणात् "इन्द्राय स्वाहा" इति एकाहुतिको होमो लभ्यते । इह च पयस उपसर्जनार्थतया अपां क्षीरस्य च प्रणयनं क्रियते ।**अपूपैः स्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति इन्द्राय इन्द्राण्यै**-इत्येवमाद्याः पञ्च । अपूपैः स्तरणमग्नेः।आज्याहुत्यन्ते " इन्द्राय स्वाहा" इति पायसेनैकाहुतिहोमः ।ततः स्विष्टकृदादि ।**प्राशनान्ते मरुद्भ्यो बलिं हरति—अहुतादो मरुत** इति **श्रुतेः।आश्वत्थेषु पलाशेषु**-कुत एतत् । यतोऽश्वत्थे **तस्थुरिति वचनात्** । **शुक्रज्योति**रित्येतैर्मन्त्रैर्नमस्कारान्तैः **प्रतिमन्त्रं विमुखेन च मनसा**—बलिहरणम् । विमुखश्च **उग्रश्च भीमश्चे**त्यध्येतॄणां प्रसिद्धः । **नामान्येषामेतानीति श्रुतेः**—एषां मरुताम् एतानि **शुक्रज्योतिरि**त्यादीनि नामानि श्रूयन्ते । **इन्द्रं दैवीरिति जपति**—बलिहरणान्ते । **ततो ब्राह्मणभोजनम्** ॥ १५ ॥ ॥ * ॥

हरि०—**प्रौष्ठपद्यामिन्द्रयज्ञः**—प्रौष्ठपदी भाद्रपदी प्रकरणात् पौर्णमासी । तस्याम् इन्द्रयज्ञनामधेयं कर्म भवति औपासनाग्नौ । **पायसमैन्द्रꣳ श्रपयित्वाऽपूपांश्च**—पायसं पयसा सिद्धं चरुम्, ऐन्द्रम् इन्द्रदेवत्यं, श्रपयित्वा यथाविधि पक्त्वा, अपूपांश्च श्रपयित्वा तांश्च चतुरः प्रतिदिशं संस्तरणार्थम् । ऐन्द्रमित्यनेन देवतातद्धितेन ".इन्द्राय स्वाहा" इति होमलक्षणा । उपरि होमस्य मन्त्रान्तरस्य चानुक्तत्वात् । अत्र पायसश्रपणोपदेशात् पयश्च प्रणीयते। **अपूपैः स्तीर्त्वाऽऽज्यभागाविष्ट्वाज्याहुतीर्जुहोतीन्द्रायेन्द्राण्या अजायैकपदेऽहिर्बुध्न्याय प्रौष्ठपदाभ्यश्चेति**—अपूपैः प्रतिदिशमग्निं स्तीर्त्वा परिस्तीर्य आज्यभागौ हुत्वा **इन्द्राये**त्यादिभिः **स्वाहान्तैः** पञ्चभिर्मन्त्रैः प्रतिमन्त्रं पञ्चाज्याहुतीर्जुहोति। अत्रानुक्तोऽपि पायसेन " इन्द्राय स्वाहा " इत्येकाहुतिहोमः । अन्यथा पायसश्रपणमदृष्टार्थं स्यात् । **प्राशनान्ते मरुभ्यो बलिꣳ हरत्यहुतादो मरुत इति श्रुतेः**—ततः स्विष्टकृदादिप्राशनान्ते मरुद्भ्य एकोनपञ्चाशत्संख्येभ्यो देवताभ्यो बलिं ददाति। ननु मरुतां देवतात्वे सति कथं होमसम्बन्धरहितत्वं बलिदानार्हत्वं च । शृणु—**अहुतादो मरुत** इति श्रुतेः--अहुतमदन्तीत्यहुतादः मरुतो देवा इति श्रुतेः वेदवचनात् ।**आश्वत्थेषु पलाशेषु मरुतोऽश्वत्थे तस्थुरिति वचनात्**—मरुद्भ्यो बलिꣳ हरतीत्युक्तम्। तस्याधिकरणमुच्यते, अश्वत्थस्य इमानि आश्वत्थानि तेषु पिप्पलोद्भवेषु पत्रेषु बलिं हरतीति शेषः । ननु बलिहरणं भूमौ अन्यत्र दृश्यते इह कस्मादश्वत्थपत्रेष्विति शङ्कायामाह—**मरुतः शुक्रज्योति**प्रभृतयो यस्मात् अश्वत्थे तस्थुः स्थितवन्त इति वचनात् श्रुतेः । **शुक्रज्योतिरीति प्रतिमन्त्रं विमुखेन च मनसा नामान्येषामेतानीति श्रुतेः**—मन्त्रापेक्षायामाह—**शुक्रज्योतिरि**त्येवमादिभिर्मन्त्रैर्नमस्कारान्तैः प्रतिमन्त्रं विमुखेन च **उग्रश्च भीमश्चे**त्येवमादिना अध्येतृप्रसिद्धेन, मनसा मनोव्यापारेण बलिं हरतीति शेषः । कुत एभिर्मन्त्रैर्बलिहरणम् । एषां मरुतामेतानि **शुक्रज्योतिश्च चित्रज्योतिश्चे**त्येवमादीनि **विक्षिप** इत्यन्तानि नामानि इति श्रुतेः वेदवचनात् । **इन्द्रं दैवीरिति जपति**—बलिहरणान्ते **इन्द्रं दैवी**रित्येतामृचं जपति । **ततो ब्राह्मणभोजनम्** ॥ इति सूत्रार्थः ॥ १५ ॥

अथ **प्रयोगः**—भाद्रपदपौर्णमास्यां प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं विधायावसथ्याग्नौ इन्द्रयज्ञाख्यं कर्म कुर्यात् । तत्र ब्रह्मोपवेशनादिप्राशनान्ते विशेषः । सक्षीरं प्रणयनम् ।मूलदेशे पयः इतरत्र

जलं प्रक्षिप्य प्रणयेत् । उपकल्पनीयानि—तण्डुलपिष्टम्, सप्ताश्वत्थपर्णानि । तत आज्यनिर्वापानन्तरं प्रणीताभ्यः क्षीरमुत्सिच्य चरुपात्रे तण्डुलान्प्रक्षिप्य प्रणीतोदकेन पिष्टं सम्पूय चतुरोऽपूपान्निर्मायाज्यमधिश्रित्य तदुत्तरतश्चरुं,तदुत्तरतः कर्परे चतुरोऽपूपान् अधिश्रयति।आसादनक्रमेणोद्वासनादि।तत उपयमनकुशादानात् पूर्वमपूपैरग्नेः पुरस्तात् दक्षिणतः पश्चिमत उत्तरतश्च एकैकेन परिस्तरणं कृत्वा आज्यभागान्ते पञ्चाज्याहुतीर्जुहोति । इन्द्राय स्वाहा इदमिन्द्राय० । इन्द्राण्यै स्वाहा इदमिन्द्राण्यै० । अजायैकपदे स्वाहा इदमजायैकपदे०। अहिर्बुध्न्याय स्वाहा इदमहिर्बुध्न्याय०। प्रौष्ठपदाभ्यः स्वाहा इदं प्रौष्ठपदाभ्यो०। ततः पायसेन "इन्द्राय स्वाहा" इत्येकामाहुतिं हुत्वा "इदमिन्द्राय" इति त्यक्त्वा पायसेनैव स्विष्टकृद्धोमं विधाय महाव्याहृत्यादिहोमसंस्रवप्राशनदक्षिणादानानि कुर्यात् । अथाग्नेरुत्तरतः प्राक्संस्थानि प्रागग्राणि सप्ताश्वत्थपत्राणि निधाय तेषु मरुद्भ्यो बलीन् हरति पायसशेषं स्रुवेणादायादाय **शुक्रज्योतिरि**त्येवमादिभिः षड्भिर्मन्त्रैर्नमस्कारान्तैरुग्रश्च **भीमश्चे**त्येतेनैव सप्तमेन च मनसोच्चारितेन च प्रतिमन्त्रं सप्तसु पत्रेषु यथाक्रमम् । स्पष्टार्थं प्रयोग उच्यते त्यागश्च । **शुक्रज्योतिश्चे**त्यारभ्य **ऋतपाश्चात्यꣳहा** नमः इदं शुक्रज्योतिषे, चित्रज्योतिषे, सत्यज्योतिषे, ज्योतिष्मते, शुक्राय, ऋतपसेऽत्यꣳहसे च० । **ईदृङ्चान्यादृङ्चे**त्यादि **सभरा** नमः इदमीदृशे, अन्यादृशे, सदृशे, प्रतिसदृशे, मिताय, सम्मिताय,. सभरसे च० । **ऋतश्चे**त्यादि **विधारयो** नमः इदमृताय, सत्याय, ध्रुवाय, धरुणाय, धर्त्रे, विधर्त्रे, विधारयाय च० । **ऋतजिच्चे**त्यारभ्य **गणो** नमः इदमृतजिते, सत्यजिते, सेनजिते, सुषेणाय, अन्तिमित्राय, दूरेअमित्राय, गणाय च० । **ईदृक्षास** इत्यारभ्य **यज्ञे अस्मिन्नमः** इदमीदृक्षेभ्यः, एतादृक्षेभ्यः, सदृक्षेभ्यः, प्रतिसदृक्षेभ्यो, मितेभ्यः, सम्मितेभ्यः, सभरेभ्यो, मरुद्भ्यश्च० । **स्वतवाँश्चे**त्यादि **उज्जेषी** नमः इदं स्वतवसे, प्रघासिने, सान्तपनाय, गृहमेधिने, क्रीडिने शाकिने, उज्जेषिणे च० । **उग्रश्चे**त्यारभ्य **विक्षिपः स्वाहा** नमः मनसा । इदमुग्राय, भीमाय, ध्वान्ताय, धुनये, सासह्वते, अभियुग्वने, विक्षिपाय चेत्यपि मनसा ॥ तत **इन्द्रं दैवीरि**त्येतामृचं जपति यजमानः । ततो ब्राह्मणभोजनमिति ॥ १५ ॥ * ॥

गदा० । **प्रौष्ठपद्यामिन्द्रयज्ञः**—इन्द्रयज्ञ इति कर्मणो नामधेयम् । प्रौष्ठपदी च भाद्रपदी पौर्णमासी तस्यामेतत्कर्मावसथ्येऽग्नौ भवति । **पायसमैन्द्रꣳ श्रपयित्वाऽपूपाँश्च**—पायसं पयसि पक्वं चरुम्, ऐन्द्रम् इन्द्रदेवत्यम्, यथाविधि श्रपयित्वा अपूपाँश्च चतुरः श्रपयित्वा । ऐन्द्रग्रहणात् "इन्द्राय स्वाहा" इति होमो लभ्यते । अत्रापां क्षीरस्य च प्रणयनं कार्यम् । **अपूपैः स्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोतीन्द्रायेन्द्राण्या अजायैकपदेऽहिर्बुध्न्याय प्रौष्ठपदाभ्यश्च**—अग्नेः प्रतिदिशमपूपैः स्तीर्त्वा प्रदक्षिणं परिस्तीर्य आज्यभागानन्तरमिन्द्रायेत्यादिभिः **स्वाहाकारान्तैः** पञ्चमन्त्रैः प्रतिमन्त्रं पञ्चाज्याहुतीर्जुहोति । आज्याहुत्यन्ते "इन्द्राय स्वाहा" इति पायसेन होमः । ततः स्विष्टकृदादि । **प्राशनान्ते मरुद्भ्यो बलिꣳ हरत्यहुतादो मरुत इति श्रुतेराश्वत्थेषु पलाशेषु मरुतोऽश्वत्थे तस्थुरिति वचनात्**—संस्रवप्राशनान्ते मरुद्भ्यो देवताभ्यो बलिं ददाति । ननु होमासम्बन्धे कथमेषां देवतात्वं बलिकर्मार्हत्वं च । उच्यते, **अहुतादो मरुत** इति श्रुतेः । अहुतमदन्तीत्यहुतादो मरुत इति श्रुतेः । अत एव बलिदानमेव न तु होमः। तच्चाश्वत्थेषु पत्रेषु कार्यम् । कुतः यस्मान्मरुत अश्वत्थे तस्थुः स्थितवन्तः । अत एवाश्वत्थपत्राणां सदैव चाञ्चल्यम् । अश्वत्थस्येमानि आश्वत्थानि पर्णानि तेषु बलिं हरतीत्यर्थः । **शुक्रज्योतिरिति प्रतिमन्त्रम्**—यद्बलिहरणं तच्छुक्रज्योतिरित्येवमादिभिः षड्भिर्मन्त्रैर्नमस्कारान्तैः प्रतिमन्त्रं कार्यम् । **विमुखेन च मनसा नामान्येषामेतानीति श्रुतेः**—चकाराद्बलिहरणं विमुखेन उग्रश्च भीमश्चेत्यध्येतृप्रसिद्धेन मन्त्रेण मनसोच्चारितेन । एतैर्मन्त्रैरिति । कुतः नामान्येषामेतानीति श्रुतेः । एषां मरुतामेतानि·शुक्रज्योतिरित्यादीनि नामानि श्रूयन्ते । **इन्द्रं दैवीरिति जपति**—बलिहरणानन्तरमिन्द्रं दैवीरित्येतामृचं जपति ॥ **ततो ब्राह्मणभोजनम्**—इति श्रीत्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे पञ्चदशी कण्डिका ॥ १५ ॥ * ॥

अथ **पदार्थक्रमः** । प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धम् । ब्रह्मोपवेशनादिदक्षिणादानान्ते विशेषः । सक्षीरं प्रणयनम् । उपकल्पनीयानि । यवपिष्टम् । व्रीहिपिष्टं वा । सप्ताश्वत्थपत्राणि । पोतकम् । कर्परमपूपार्थम् । निरुप्याज्यं प्रणीताभ्यः पोतकेन क्षीरं गृहीत्वा चरुपात्रे कृत्वा तण्डुलप्रक्षेपः । प्रणीतोदकेन पिष्टसंयवनम् । "लौकिकेन" इति रेणुकः । आज्याधिश्रयणम् । ततश्चतुर्णामपूपानामधिश्रयणम् । उपयमनादानात्पूर्वमग्नेरपूपैः स्तरणम् । पुरस्तात्प्रथमं प्रदक्षिणम् । आज्यभागान्ते पञ्चाज्याहुतयः । इन्द्राय स्वा० इ० । इन्द्राण्यै स्वा० इ० । अजायैकपदे० इ० । अहिर्बुध्न्याय० इ० । प्रौष्ठपदाभ्यः० इ० । सुगमास्त्यागाः । ततः पायसेन इन्द्राय स्वाहा इदमिन्द्राय० । ततो नवाहुतयः स्विष्टकृच्च । संस्रवप्राशनम् । मार्जनम् । पवित्रप्रतिपत्तिः । प्रणीताविमोकः । दक्षिणादानम् । प्राक्संस्थान्युदक्संस्थानि वा सप्ताश्वत्थपत्राणि कृत्वा तेषु मरुद्भ्यो बलिहरणम् । पायसशेषेणैव स्रुवेण **शुक्रज्योतिरि**ति षड्भि**रुग्रश्चे**त्यनेन सप्तमेन च प्रतिमन्त्रम् । **शुक्रज्योति०** नमः । इदं शुक्रज्योतिषे, चित्रज्योतिषे, सत्यज्योतिषे, ज्योतिष्मते, शुक्राय, ऋतपसेऽत्यꣳहसे च न मम ॥१॥ **ईदृङ्चान्यादृङ् च० रा** नमः । इदमीदृशेऽन्यादृशे, सदृशे, प्रतिसदृशे, मिताय, सम्मिताय, सभरसे च न० ॥ २ ॥ **ऋतश्च० रयो** नमः । इदमृताय, सत्याय, ध्रुवाय, धरुणाय, धर्त्रे, विधर्त्रे, विधारयाय च न० ॥ ३ ॥ **ऋतजिच्च० गणो** नमः । इदमृतजिते, सत्यजिते, सेनजिते, सुषेणायान्तिमित्राय, दूरेअमित्राय, गणाय च न० ॥ ४ ॥ **ईदृक्षास० अस्मि**नमः । इदमीदृक्षेभ्यः, एतादृक्षेभ्यः, सदृक्षेभ्यः, प्रतिसदृक्षेभ्यो, मितेभ्यः, सम्मितेभ्यः, सभरेभ्यो न० ॥ ५ ॥ **स्वतवाँश्च० ज्जेषी** नमः । इदं स्वतवसे, प्रघासिने, सान्तपनाय, गृहमेधिने, क्रीडिने, शाकिने, उज्जेषिणे च० ॥ ॥ ६ ॥ **उग्रश्च भीमश्च०** पः स्वाहा नमः मनसा । इदमुग्राय, भीमाय, ध्वान्ताय, धुनये, सासह्वते, अभियुग्वने, विक्षिपाय चेत्यपि मनसा ॥ ७ ॥ **इन्द्रं दैवीरि**त्यस्याः कण्डिकाया जपः । ततो विप्रभुक्तिः । मुख्यकालाभावे गौणेऽप्येतत्कार्यम् । "अभावान्मुख्यकालस्य गौणकालेऽपि शस्यते" इति **कारिकोक्तेः** । **गर्गमते** ग्रहणे इन्द्राय जुष्टम् । प्रोक्षणे त्वाधिकः । **इन्द्रं दैवीरि**त्यस्याः कण्डिकाया जपान्ते बर्हिर्होमादिब्राह्मणतर्पणान्तम् । ततो वैश्वदेवः । अन्यत्समानम् । इति **पदार्थक्रमः** ॥ १५ ॥ * ॥

विश्व०–प्रौष्ठप...यज्ञः—प्रौष्ठपदी भाद्रपदपौर्णमासी, इन्द्रयज्ञ इति कर्मनामधेयम् । अत्रापि पूर्वं मातृपूजाऽऽभ्युदयिके । इन्द्रपदादिन्द्रायैकाहुतिहोमो लक्ष्यते । **पाय...होति** । परिसमूहनाद्याज्यभागाविष्ट्वा पञ्चाज्याहुतीः **इन्द्रा...भ्यश्चेति**—इन्द्राय स्वाहा इदमिन्द्रायेत्यादि यथादेवतं त्यागाः । इन्द्राण्यै स्वाहा । अजायैकपदे स्वाहा । अहिर्बुध्न्याय स्वाहा । प्रौष्ठपदाभ्यः स्वाहा । ततः स्थालीपाकेन इन्द्राय स्वाहा इदमिन्द्राय । अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते । महाव्याहृतिहोमादिदक्षिणादानान्तम् । **मरु...रति**–ननु कथं होमाभाव इत्यत आह–**अहु...श्रुतेः**—अहुतमदन्तीत्यहुतादः । बलिदानेनैवाऽदन्तीत्यर्थः । के त इत्युक्तं–**मरुत इति** ।**आश्व...शेषु**–बलीन्दद्यादिति शेषः । अन्यत्र भूमौ दृष्टत्वात्कथमत्रैवमत आह–**मरु...नात्–शुक्र....मन्त्रं**–नमस्कारान्तैर्मन्त्रैः प्राक्संस्थमुदग्वा बलिदानम् । **विमुखेन**–मुखव्यापाररहितेन । पुनः **मनसा**–मनोव्यापारसाहितेन बलिं दद्यादिति शेषः । कुत एभिर्मन्त्रैरत आह—**नामा...श्रुतेः**–एषां मरुतामेतानि नामानि **शुक्रज्योतिश्चे**त्येवमादीनि । **इन्द्रं...पति**–ततो बर्हिर्होमादि ब्राह्मणभोजनान्तम् । तदनन्तरं वैश्वदेवः । इति पञ्चदशी कण्डिका ॥ १५ ॥ ॥ * ॥

पृषातका:(आश्वयुजो कर्म)

आश्वयुज्यां पृषातकाः ॥ १ ॥ पायसमैन्द्रꣳ श्रपयित्वा दधिमधुघृतमिश्रं जुहोतीन्द्रायेन्द्राण्या अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदे चेति ॥२॥ प्राशनान्ते दधिपृषातकमञ्जलिना जुहोति ऊनं मे पूर्यतां पूर्णं मे मा व्यगात्स्वाहेति ॥ ३ ॥ दधिमधुघृतमिश्रममात्या अवेक्षन्त आयात्विन्द्र इत्यनुवाकेन ॥ ४ ॥ मातृभिर्वत्सान्सꣳसृज्य ताꣳ रात्रिमाग्रहायणीं च ॥ ५ ॥ ततो ब्राह्मणभोजनम् ॥ ६ ॥ १६ ॥ * ॥

कर्कः–आश्वयुज्यां पृषातकाः–पृषातका इति कर्मणो नामधेयम् । तच्चाश्वयुज्यां पौर्णमास्यां भवति ॥ **पायसमैन्द्रꣳ श्रपयित्वा दधिमधुघृतमिश्रं जुहोति** । **इन्द्रायेन्द्राण्या**–इत्येवमाद्याः पञ्चाहुतयः । ततः स्विष्टकृदादि । **प्राशनान्ते दधिपृषातक**-

मञ्जलिना जुहोत्यूनं मे पूर्यतामिति-एतेन मन्त्रेण । दधिपृषातकशब्देन पृषदाज्यमभिधीयते । **दधिमधुघृतमिश्रममात्या अवेक्षन्त आयात्विन्द्र इत्यनुवाकेन**-दधिमधुघृतमिश्रः पायसः । अमात्या यजमानगृह्याः । **मातृभिर्वत्सान्सꣳसृज्य ताꣳ रात्रिम्**-तस्यां रात्रौ मातृभिर्वत्साः संसृष्टा एव वसन्ति । अधिकारमुपजीवन्नाह-**आग्रहायणीं च रात्रिं**-वत्ससंसर्गः । **ततो ब्राह्मणभोजनम्** ॥ १६ ॥ * ॥

जय०-पृषातकाः-इति कर्मणो नामधेयम् । तदाश्वयुज्यां पौर्णमास्यां भवति । **पायसमैन्द्रꣳ श्रपयित्वा दधिमधुघृतमिश्रं जुहोति इन्द्राय इन्द्राण्यै** इत्येवमाद्याः पञ्चाहुतयः । ततः स्विष्टकृदादि । **प्राशनान्ते दधिपृषातकमञ्जलिना जुहोत्यूनं मे पूर्यताम्**-इत्यनेन मन्त्रेण । अस्यार्थः । तत्र गार्ग्यो, गायत्री, प्रजापतिः, पृषदाज्यहोमे० । अत्र देवतालिङ्गाभावात् "आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते । मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः" इति **छन्दोगपरिशिष्ट**-परिभाषितत्वादग्निरेवात्र देवता तस्य प्रजापतित्वश्रवणात् । हे अग्ने अनेन पृषदाज्यहोमेन मे मम यदूनं तत्पूर्यताम् पूर्णं त्वया क्रियताम् । यच्च **पूर्णं मे** मम **तन्मा व्यगात्**-विपरीतभावम् अपूर्णतां मा गच्छतु । दधिपृषातकशब्देन पृषदाज्यमभिधीयते । **आयात्विन्द्र इत्यनुवाकेन**-दधिमधुघृतमिश्रः पायसः, चरुशेषम् अमात्या यजमानगृह्या अवेक्षन्ते । तस्यां रात्रौ मातृभिर्वत्सान्संसृज्य-एवं सति अधिकारमुपजीवन्नाह-**आग्रहायणीं च रात्रिं**-वत्ससंसर्गः । **ततो ब्राह्मणभोजनम्** ॥ * ॥ १६ ॥

हरि०-आश्वयुज्यां पृषातकाः-(पृषातका इतिसञ्ज्ञकं कर्म भवति । तच्च आश्वयुज्यां पौर्णिमायां भवति । **पायसमैन्द्रꣳ श्रपयित्वा दधिमधुघृतमिश्रं जुहोति**- त्र ऐन्द्रम् इन्द्रदेवत्यम् । पायसं चरुं, संसाध्य दधिमधुघृतैर्मिश्रं कृत्वा आवसथ्याग्नौ जुहोति । केभ्य इत्याह-**इन्द्रायेन्द्राण्या अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदे चेति**-इन्द्रायेत्यादिभिः पञ्चभिर्मन्त्रैः स्वाहाकारान्तैः प्रतिमन्त्रं पञ्चाहुतीर्जुहोति । यथामन्त्रं त्यागः । **प्राशनान्ते दधिपृषातकमञ्जलिना जुहोत्यूनं मे पूर्य्यतां पूर्णं मे मा व्यगास्वाहेति**-ततः स्विष्टकृत्प्रभृति प्राशनान्ते पृषातकं पृषदाज्यमञ्जलिना ऊनं मे इत्यादिना मन्त्रेण जुहोति । पृषदाज्यं घृते दधिप्रक्षेपाद्भवति । दुग्धेनापि तत्सम्भवाद्दधिग्रहणम्, **दधिमधुघृतमिश्रममात्या अवेक्षन्त आयात्विन्द्र इत्यनुवाकेन**-ततो दधिमधुघृतमिश्रं हुतशषं पायसम्, अमात्या अमा च गृहम्, तत्र भवा अमात्या यजमानस्य गृह्याः भ्रातृपुत्रादयः अवेक्षन्ते **आयात्विन्द्रो वस उपन** इत्यारभ्य **यूयं पात स्वस्तिभिः सदा न** इत्यन्तेन अनुवाकेनावेक्षन्ते पश्यन्ति । **मातृभिर्वत्सान् सꣳसृज्य ताꣳ रात्रिम्**-ताम् आश्वयुजीसम्बन्धिनीं रात्रिं वत्सान् तर्णकान् मातृभिर्जननीभिर्धेनुभिः संसृज्य संसृष्टान् कृत्वा, तां रात्रिमिति " कालाध्वनोरत्यन्तसंयोगे " इत्युपपदविभक्तिर्द्वितीया, तेन सन्ध्यायां वत्सान् संसृज्य सकलां रात्रिं न बध्नीयात् । **आग्रहायणीं च**-न केवलं तामेव रात्रिं वत्ससंसर्गः आग्रहायणीं च मार्गशीर्षसम्बन्धिनीमपि रात्रिम् । **ततो ब्राह्मणभोजनम्**-इति सूत्रार्थः)॥ १६ ॥ * ॥

अथ **प्रयोगः** । तत्र आश्वयुज्यां पौर्णमास्यां पृषातकाख्यं कर्म भवति । तद्यथा प्रथमप्रयोगे मातृपूजाभ्युदयिकपूर्वकम् आवसथ्याग्नौ ब्रह्मोपवेशनादिप्राशनान्ते विशेषः । सक्षीराः प्रणीताः प्रणयेत् दधिमधुनी उपकल्पयेत् प्रणीताः क्षीरेण पायसं श्रपयेत् । तत उपयमनकुशादानादर्वाक् पायसे दधिमधुघृतानि आवपेत् । आज्यभागानन्तरं दधिमधुघृतामिश्रेण पायसेन इन्द्राय स्वाहा इदमिन्द्राय० । इन्द्राण्यै स्वाहा इदमिन्द्राण्यै० । अश्विभ्याꣳ स्वाहा इदमश्विभ्यां ० । आश्वयुज्यै पौर्णमास्यै स्वाहा

इदमाश्वयुज्यै पौर्णमास्यै० । शरदे स्वाहा इदं शरदे० । एवं पञ्चाहुतीर्हुत्वा तत एव पायसात् स्विष्टकृते हुत्वा महाव्याहृत्यादिदक्षिणादानान्ते स्थाल्यामाज्यं दधि आसिच्य पृषदाज्यं कृत्वा अञ्जलिनाऽऽदाय "ऊनं मे पूर्यतां पूर्णं मे मा व्यगात्स्वाहा" इति मन्त्रेणैकामाहुतिं जुहोति इदमग्नये० । **ऊनं मे पूर्यतामित्यस्य** होमस्य का देवतेत्यत्र सन्देहः । देवतात्वं तद्धितचतुर्थीमन्त्रलिङ्गवाक्यप्रकरणैः प्रतीयते । अत्र तु दधिपृषातकमञ्जलिना जुहोतीति होमविधिपरे वाक्ये पृषातकं द्रव्यमात्रं श्रूयते । न तद्धितो न चतुर्थी वा । मन्त्रेऽपि न देवताप्रकाशकं लिङ्गमस्ति । न च वाक्यम् । ततः प्रकरणमवशिष्यते, तच्च ऐन्द्रं, पायसमैन्द्रꣳ श्रपयित्वेति तद्धितात् अस्य यज्ञस्येन्द्रो देवतेति । तर्हि किं प्राकरणिकत्वात् अस्य होमस्य इन्द्रो देवता । ततः "आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते । मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः" इति **छन्दोगपरिशिष्ट**परिभाषातः प्रजापतिः । तत्र वाक्यप्रकरणयोर्वाक्यस्य बलीयस्त्वात् प्रकरणबाधः । तेनेह प्रजापतिरेव देवता । **वासुदेवदीक्षितास्तु** स्वपद्धतावग्नय इति लिखितवन्तः, तत्कुत इति न ज्ञायते । ततो दधिमधुघृतमिश्रं हुतशेषं पायसम् अमात्याः पुत्रादयः **आयात्विन्द्र** इत्यनुवाकेन **यूयं पात स्वस्तिभिः सदा न** इत्यन्तेन अवेक्षन्ते । "ततो ब्राह्मणभोजनम्" कृतैतत्कर्माङ्गतया ब्राह्मणमेकं भोजयिष्ये ॥१६॥ * ॥

गदा०—आश्वयुज्यां पृषातकाः—पृषातका इति वक्ष्यमाणकर्मणो नामधेयम् । तच्चावसथ्ये आश्वयुज्यां पौर्णमास्यां भवति । आश्वयुजी आश्विनी पूर्णिमा । **पायसमैन्द्रꣳ श्रपयित्वा दधिमधुघृतमिश्रं जुहोतीन्द्रायेन्द्राण्या अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदे चेति**—ऐन्द्रम् इन्द्रदेवत्यं, पायसं पयसि शृतं चरुं, श्रपयित्वा यथाविधि पक्त्वा, दधिमधुघृतैर्मिश्रितं पायसं चरुम् **इन्द्राये**त्यादिभिः पञ्चमन्त्रैः प्रतिमन्त्रं पञ्चाहुतीर्जुहोति । **प्राशनान्ते दधिपृषातकमञ्जलिना जुहोत्यूनं मे पूर्यतां पूर्णं मे मा व्यगात्स्वाहेति**—संस्रवप्राशनान्ते दधिपृषातकं दध्ना मिश्रितं स्थाल्याज्यमञ्जलिना जुहोति **ऊनं मे पूर्यतामिति** मन्त्रेण । दधिपृषातकशब्दः पृषदाज्यवाची । अत्राग्निर्देवतेति **गर्गवासुदेवजयरामकारिकाकाराः** ।"आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते । मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः" इति **छन्दोगपरिशिष्ट**परिभाषावचनाद्वाक्येन प्राकरणिकीमिन्द्रदेवतां बाधयित्वा "प्रजापतिर्देवता" इति **हरिहरः** । तच्चिन्त्यम् । अनादिष्टदेवतालिङ्गेष्वपि मन्त्रेषु देवतापेक्षायां सत्यां किं यत्किञ्चिद्देवतान्तरं परिकल्प्यताम् उत प्रकृतैव गृह्यतामिति । तत्र प्रकृतपरिग्रहो न्याय्यः सन्निधानात् । अप्रकृतोपादाने पुनरसन्निधानात् सन्देह इति । तथा च **नैरुक्ताः**—"येऽनादिष्टदेवता मन्त्रास्तेषु देवतोपपरीक्षा । यद्देवतः सयज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्ति" इति । तत्रापि मुख्यत्वादिन्द्र एव । अयमर्थो दर्शितः **कर्केणा**पि "पिष्टलेपाञ्जुहोति" इति सूत्रे । मन्त्रार्थः । हे इन्द्र मे मम यदूनं तदनेन होमेन पूर्यतां पूर्णं क्रियताम् । यच्च पूर्णं तन्मा व्यगात् विपरीतभावम् अपूर्णतां मा गच्छतु। **दधिमधुघृतमिश्रममात्या अवेक्षन्त आयात्विन्द्र इत्यनुवाकेन**—अमा गृहम्, तत्र भवा अमात्या यजमानगृह्या भ्रातृपुत्रादयः दधिमधुघृतैर्मिश्रितं चरुशेषं **आयात्विन्द्र** इत्यनुवाकेन **स्वस्तिभिः सदा न** इत्यन्तेनावेक्षन्ते विलोकयन्ति । **मातृभिर्वत्सान्सꣳसृज्य ताꣳरात्रिम्**—वत्सान् धेनुभिः संसृज्य संसृष्टान् कृत्वा तस्यां रात्रौ संसृष्टा एव वसन्ति । तामिति "कालाध्वनोरत्यन्तसंयोगे" इत्युपपदविभक्तिद्वितीया । तेन सम्पूर्णां रात्रिं वसन्ति । अधिकारमुपजीवन्नाह—**आग्रहायणीं च**—आग्रहायणीं मार्गशीर्षसम्बन्धिनीं रात्रिं संसृष्टा एव वत्सा वसन्ति ।**ततो ब्राह्मणभोजनम्**॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति—महायाज्ञिकश्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितियकाण्डे षोडशी कण्डिका समाप्ता ॥ १६ ॥ * ॥

विश्व०—आश्व...तकाः—कर्मनामधेयं पृषातका इति तदाश्वयुज्यां पौर्णमास्यां भवति । कर्तव्यतामाह—**पाय...चेति**—मातृपूजाऽऽभ्युदयिके कृत्वा ब्रह्मासनास्तरणाद्याज्यभागान्ते विशेषः । आसादने दक्षिणायाः प्राग्दधिमधुघृतानामासादनं पयसश्च । चरुग्रहणे इन्द्राय जुष्टं गृह्णामि । प्रोक्षणे त्वाशब्दः । आज्यभागानन्तरं पायसं स्थालीपाकं दधिमधुघृतैर्मिश्रयेत् । तादृशं काभ्यो जुहोतीत्यत उक्तम्—**इन्द्रायेन्द्राण्या** इत्यादि । तद्यथा—स्थालीपाकैकदेशहोमः । इन्द्राय स्वाहा इदमिन्द्राय । इन्द्राण्यै स्वाहा । इदमिन्द्राण्यै । अश्विभ्याꣳस्वाहा । इदमश्विभ्याम् । आश्वयुज्यै पौर्णमास्यै स्वाहा । इदमाश्वयुज्यै पौर्णमास्ये । शरदे स्वाहा ।इदं शरदे । अग्नये स्विष्टकृते स्वा०इदमग्नये स्विष्टकृते । **प्राश...त्स्वाहेति**—पृषातकं पृष-

द्वितीयकाण्डस्थगदाधरभाष्यस्य षोडशकण्डिकायाः समाप्त्यनन्तरं चतुरशीत्यधिकद्विशत- (२८४) पत्रस्थावशिष्टगदाधरपदार्थक्रमोऽयं बोध्यः ।

अथ पदार्थक्रमः। प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदायिकं श्राद्धम्। ब्रह्मोपवेशनादिदक्षिणादानान्ते विशेषः। सक्षीरं प्रणयनम्। दधिमधुनोरुपकल्पनम्। प्रणीताक्षीरमुत्सिच्य पायसश्रपणम्। प्रागुपयमनादानात्पायसे दधिमधुघृतावपनम्। आज्यभागान्ते दधिमधुघृतमिश्रेण पायसेन पञ्चाहुतयः। इन्द्राय स्वाहा०। इन्द्राण्यै०। अश्विभ्याᳫं स्वाहा। आश्वयुज्यै पौर्णमास्यै०। शरदे०। यथामन्त्रं त्यागाः। ततः पायसादेव स्विष्टकृत्। ततो महाव्याहृत्यादिनवाहुतयः। संस्रवप्राशनादिदक्षिणान्तम्। ततः स्थाल्याज्ये दध्यासिच्य तत्पृषदाज्यमञ्जलिना जुहोति ऊनं मे पूर्यतामिति इदमिन्द्राय०। ततो दधिमधुघृतमिश्रं चरुशेषं यजमानगृह्याः पुत्रादयोऽवेक्षन्ते **आयात्विन्द्र** इत्यनुवाकेन **यूयं पात स्वस्तिभिः सदा न** इत्यन्तेन मन्त्रेण। ततो ब्राह्मणभोजनम्। रात्रौ वत्ससंसर्गः। गौणकालेऽपीदं कार्यम्। "पृषातकमिदं कर्म गौणकालेऽपि शस्यते" इति कारिकोक्तेः। गर्गमते विशेषः। ब्रह्मासनाद्याज्यभागान्ते बर्हिःसादनानन्तरं दधिमधुघृतानामासादनम्। पयश्च। ग्रहणे इन्द्राय जुष्टं गृह्णामि। इन्द्रायेन्द्राण्यै अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदे जुष्टमिति केचित्। आज्यभागान्ते पायसे दध्याद्यावपनम्। स्विष्टकृदन्ते पृषदाज्यहोमः। इदमग्नय इति त्यागः। ततो महाव्याहृत्यादिदक्षिणान्तम्। ततो गृह्याणां चर्ववेक्षणम्। ततो बर्हिर्होमादिविप्रभुक्त्यन्तम्। ततो वैश्वदेवः। रात्रौ वत्ससंसर्ग इति ॥ १६ ॥ * ॥ ॥ * ॥ ॥ * ॥

दाज्यं, दधिपदात्पयः । तथाच पयसा मिश्रितं पृषदाज्यं संहताङ्गुलिनाऽञ्जलिना मनुष्यतीर्थेन जुहोति, **ऊनं मे पूर्यता-**
ंमिति मन्त्रेण । "इदमग्नये" इति त्यागः । ततो महाव्याहृत्यादिदक्षिणादानान्तम् । "प्राशनान्ते" इत्यस्य सूत्रावयव-
स्याचार्यमते उत्तरसूत्रसंबन्धात् । यन्मते यथाश्रुतं तन्मते दक्षिणादानान्ते दधिपृषातकहोमः । **दधि,..वाकेन-**
ततो दक्षिणादानान्ते दधिमधुघृतानां चरौ प्रक्षेपः । तैर्मिश्रितं चरुममात्याः यजमानगृह्याः पुत्रादयः **आयात्विन्द्र** इत्य-
नुवाकेन **यूयं पात स्वस्तिभिः. सदा न** इत्यन्तेन अवेक्षन्ते । अनुवाकान्ते अवेक्षणं मन्त्रान्तैः कर्मादिरित्युक्तेः । ततो
बर्हिर्होमादिब्राह्मणभोजनान्तम् । तदनन्तरं वैश्वदेवः । **मातृ...रात्रिं**–पृषातकाकर्ता तामाश्वयुजीं पौर्णमासीं रात्रीमभि-
व्याप्य वत्सानात्मनो मातृभिः संसृज्य स्थातव्यम् । **आग्र....णीं च**—आग्रहायण्यां चेत्कर्म कृतं तदा तस्या-
मपि रात्रौ मातृभिर्वत्सान् संसृजेदित्यर्थः । अयं च वत्ससंसर्गः कर्माङ्गम् । **ततो...जनं**—समाप्ते कर्मणि प्रातरित्यर्थः ।

इति षोडशी काण्डिका ॥ १६ ॥ ॥ * ॥

अथ सीतायज्ञः ॥ १॥ व्रीहियवानां यत्र यत्र यजेत तन्मयꣳ स्थाली-
पाकꣳ श्रपयेत् ॥ २ ॥ कामादीजानोऽन्यत्रापि व्रीहियवयोरेवान्यतरꣳ
स्थालीपाकꣳ श्रपयेत् ॥३ ॥ न पूर्वचोदितत्वात्सन्देहः ॥ ४ ॥ असम्भवा-
द्विनिवृत्तिः ॥ ५॥ क्षेत्रस्य पुरस्तादुत्तरतो वा शुचौ देशे कृष्टे फलानुपरो-
धेन ॥ ६ ॥ ग्रामे वोभयसम्प्रयोगादविरोधात् ॥७॥ यत्र श्रपयिष्यन्नुप-
लिप्त उद्धृतावोक्षितेऽग्निमुपसमाधाय तन्मिश्रैर्दर्भैः स्तीर्त्वाऽऽज्यभागा-
विष्ट्वाऽऽज्याहुतीर्जुहोति ॥ ८ ॥ पृथिवी द्यौः प्रदिशो दिशो यस्मै द्युभि-
रावृताः । तमिहेन्द्रमुपह्वये शिवा नः सन्तु हेतयः स्वाहा । यन्मे किञ्चि-
दुपेप्सितमस्मिन्कर्मणि वृत्रहन् । तन्मे सर्वꣳ समृध्यतां जीवतः शरदः
शतꣳ स्वाहा । सम्पत्तिर्भूतिर्भूमिर्वृष्टिर्ज्यैष्ठ्यꣳ श्रैष्ठ्यꣳ श्रीः प्रजामिहावतु
स्वाहा । यस्या भावे वैदिकलौकिकानां भूतिर्भवति कर्मणाम् । इन्द्रप-
त्नीमुपह्वये सीताꣳ सा मे त्वनपायिनी भूयात्कर्मणि कर्मणि स्वाहा ॥
अश्वावती गोमती सूनृतावती बिभर्ति या प्राणभृतो अतन्द्रिता । खल-
मालिनीमुर्वरामस्मिन्कर्मण्युपह्वये ध्रुवाꣳ सा मे त्वनपायिनी भूया-
त्स्वाहेति ॥ ९ ॥ स्थालीपाकस्य जुहोति सीतायै यजायै शमायै भूत्या
इति ॥ १० ॥ मन्त्रवत्प्रदानमेकेषाम् ॥ ११ ॥ स्वाहाकारप्रदाना इति
श्रुतेर्विनिवृत्तिः ॥ १२ ॥ स्तरणशेषकुशेषु सीतागोप्तृभ्यो बलिꣳ हरति
पुरस्ताद्ये त आसते सुधन्वानो निषङ्गिणः । ते त्वा पुरस्ताद्गोपायन्त्व-
प्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति
॥ १३ ॥ अथ दक्षिणतोऽनिमिषा वर्मिण आसते । ते त्वा दक्षिणतो-
गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरा-
मीममिति ॥ १४ ॥ अथ पश्चात् आभुवः प्रभुवो भूतिर्भूमिः पार्ष्णिः शुन-
ङ्कुरिः । ते त्वा पश्चाद्गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं
बलिमेभ्यो हरामीममिति ॥ १५ ॥ अथोत्तरतो भीमा वायुसमा जवे । ते
त्वोत्तरतः क्षेत्रे खले गृहेऽध्वनि गोपायन्त्वप्रमत्ता अनपायिनो नम एषां
करोम्यहं बलिमेभ्यो हरामीममिति ॥ १६ ॥ प्रकृतादन्यस्मादाज्यशे-
षेण च पूर्ववद्बलिकर्म ॥ १७ ॥ स्त्रियश्चोपयजेरन्नाचरितत्वात् ॥ १८ ॥

सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत्सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत् ॥ १९ ॥ १७ ॥

कर्कः–**अथ सीतायज्ञः**–व्याख्यास्यत इति सूत्रशेषः । स चायं कृष्यादिप्रवृत्तस्यैव भवति । **व्रीहियवानां यत्र यत्र यजेत तन्मयꣳ स्थालीपाकꣳ श्रपयेत्**–व्रीहिकाले व्रीहीन् यवकाले यवान् । **कामादीजानोऽन्यत्रापि व्रीहियवयोरेवान्यतरꣳ स्थालीपाकꣳ श्रपयेत्**–ततोऽन्यत्रापि यागं कुर्वन्पक्षादिप्रभृतिषु व्रीहियवयोरेवान्यतरमिच्छया स्थालीपाकं श्रपयेत् । न पूर्वचोदितत्वात्सन्देहः । नैवात्र सन्देहः, पूर्वं चोदितमेवैतत् । "व्रीहीन् यवान्वा हविषी' इति । अतो न वक्तव्यमेतत् । **असम्भवाद्विनिवृत्तिः**--यावस्य चरोरसम्भवाद्विनिवृत्तिरधस्तनस्यं शास्त्रान्तरस्य तेन पुनरारम्भः। अनवस्रावितान्तरोष्मपाकविशदविषयासिद्धे तण्डुलपाके चरुशब्दस्य प्रयोगप्रत्ययादिति । **क्षेत्रस्य पुरस्तादुत्तरतो वा शुचौ देशे कृष्टे फलानुपरोधेन**–कर्तव्यः । **ग्रामे वोभयसम्प्रयोगात्**–ग्रामे वा कर्त्तव्यम् । उभयं हि सम्प्रयोक्तुं शक्यते । फलानुपरोधः कृष्टं च । न चात्र विरोधः । अतो वाशब्दो विकल्पार्थः । **यत्र श्रपयिष्यन्नुपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधाय तन्मिश्रैर्दर्भैः स्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति**–उपलेपनोद्धतावोक्षितग्रहणं कृष्टेऽपि यथा स्यादिति तन्मिश्रैर्दर्भैः स्तरणं कर्तव्यम् । व्रीहिकाले व्रीहिसस्यमिश्रैर्यवकाले यवसस्यमिश्रैः स्तरणम् । आज्यभागोत्तरकालमाज्याहुतीर्जुहोति । **पृथिवी द्यौः प्रदिशो दिश** इत्यादि **स्थालीपाकस्य जुहोतीत्यन्तम्** । स्थालीपाकस्येत्यवयवलक्षणा षष्ठी । **सीतायै यजायै शमायै भूत्यै इति** । **मन्त्रवत्प्रदानमेकेषाम्**–एकेषामाचार्याणां मतं मन्त्रवदेव प्रदानं भवति न स्वाहाकारेण । **स्वाहाकारप्रदाना इति श्रुतेः**–श्रुतौ तु स्वाहाकारप्रदानता । वषट्कारेण वा स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयत इति । न चात्र वषट्कारः प्रवर्तते । याज्यापुरोऽनुवाक्यत्वे हि वषट्कारस्य श्रवणम् । तस्मात्स्वाहाकारोऽप्यत्र भवति । **विनिवृत्तिरधस्तनस्य** पक्षस्य मन्त्रवत्प्रदानमित्यस्य । अस्मिन्नवसरे लाङ्गलयोजनदेवताभ्यस्तद्भूतोपादानान्नेन स्थालीपाकेन होमः । स्थालीपाकहोमाधिकारात् । ततः स्विष्टकृदादि । **स्तरणशेषकुशेषु सीतागोप्तृभ्यो बलिꣳ हरति** । **पुरस्ताद्ये त आसते०**–इत्येवमादिभिर्मन्त्रैः । स्तरणे ये शेषभावं गतास्त एव कुशास्तेषु बलिं हरति । **पुरस्ताद्ये त आसत** इत्येवमादिभिर्मन्त्रैः । **अथ दक्षिणतोऽनिमिषा वर्मिण आसते०**–इत्यनेन मन्त्रेण । **अथ पश्चादाभुवः प्रभुवः०** इत्यनेन मन्त्रेण । **अथोत्तरतो भीमा वायुसमा जवे०**–इत्यनेन मन्त्रेण । **प्रकृतादन्यस्मादाज्यशेषेण च पूर्ववद्बलिकर्म**--कर्तव्यम् । **स्त्रियश्चोपयजेरन्नाचरितत्वात्**–स्त्रियश्च बलिकर्म कुर्युः । कुत एतत् आचरितत्वात् आचरन्ति हि स्त्रियो बलिकर्म। **सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत्सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत्** ॥१७॥ इति श्रीकर्कोपाध्यायकृतौ गृह्यभाष्ये द्वितीयं काण्डं समाप्तम् ॥ २॥

जय०-**अथ सीतायज्ञः**–व्याख्यास्यत इति सूत्रशेषः । स चायं कृष्यभिप्रवृत्तस्यैव साग्नेर्भवति । यत्र यत्रापि **व्रीहियवयोरेवान्यतरꣳ स्थालीपाकꣳ श्रपयेत्** व्रीहिकाले व्रैहेयम् । यवकाले

यावम् । अतोऽन्यत्रापि यागं कुर्वन् पक्षादिप्रभृतिषु व्रीहियवयोरेवान्यतरमिच्छया स्थालीपाक श्रपयेत् । नैवात्र सन्देहः । **पूर्वचोदितत्वात्**–“ व्रीहीन् यवान्वा हविषी” इति **श्रौते**षूक्तत्वात् **व्रीहियवयोरिति । असम्भवादिति**–यावस्य चरोरसम्भवा**द्विनिवृत्तिर**धस्तनसूत्रस्य, तेन पुनरयमारम्भः । यद्वा ननु यावस्य चरोर्विनिवृत्तिदर्शनात्कथमेकतरं श्रपयेत् तत्राह–असम्भवादिति । यावस्य चरोर्विनिवृत्तिः सा चासम्भवात् न तु शास्त्रतः, असम्भवश्चानवस्नावितान्तरोष्मपाकविशदसिद्धे तण्डुलपाके चरुशब्दप्रयोगदर्शनात् । **क्षेत्रस्य पुरस्तात्**–पूर्वस्यां दिशि । **कृष्टे**–फालेन विलिखिते, **फलानुपरोधेन**–सस्याविनाशेन विधिना कार्यः । **ग्रामे वा**–कर्तव्यः । **उभयसम्प्रयोगात्**–उभयं हि फलानुपरोधः कृष्टं च सम्प्रयोक्तुं शक्यम् । न चात्र विरोधः । एकतरोपादानेऽपरस्य बाधापत्तेः । तन्मिश्रे व्रीहिकाले विकल्पस्य विद्यमानत्वात् अत्रापि कृष्ट एव उपलेपनादिग्रहणं कृष्टेऽपि च यथा स्यादिति । तन्मिश्रे व्रीहिकाले व्रीहिशष्पमिश्रैः, यवकाले यवशष्पमिश्रैः स्तरणम् । **आज्याहुतीः पृथिवी**त्यादिपञ्चभिर्मन्त्रैः क्रमेण पञ्च । अथ मन्त्रार्थः । तत्र पञ्चानां प्रजापतिः,आद्ययोरनुष्टुप्, तृतीयादिषु प्रतिष्ठापङ्क्तिजगत्यः, लिङ्गोक्ता, आज्यहोमे०। पृथिव्यादिदेवता यस्मै इन्द्राय इन्द्रमुपासितुं स्थिताः। प्रदिशो विदिशः । किम्भूताः द्युभिः कान्तिभिरावृताः पूर्णाः । तमिन्द्रमिह सीतायज्ञे, उपह्वये उपह्वानं करोमि । उपहूतस्येन्द्रस्य हेतयो वज्राद्यायुधानि शिवाः कल्याणकारिण्यः सन्तु, तस्मै च स्वाहा सुहुतमस्तु ॥ १ ॥ द्वितीयस्यार्थः । हे वृत्रहन् अस्मिन्कर्मणि सीतायज्ञे, यत्किञ्चिन्मे ममोपेप्सितं प्राप्तुमिष्टं, तत्सर्वं शतं शरदो वत्सरान् जीवतः, समृध्यतां समृद्धिं प्राप्नुताम् । “ तुभ्यं स्वाहा ” इति समानं सर्वत्र ॥ २ ॥ तृतीयस्यार्थः । प्रजापतिः, प्रतिष्ठा, लिङ्गोक्ता, आज्यहोमे० । सम्पत्तिर्धनाद्युपचयः । भूतिरैश्वर्यम् । भूमिराश्रयः । वृष्टिरभीष्टवर्षणम् । ज्येष्टतादिना ज्येष्ठत्वम् । श्रैष्ठ्यं सर्वोपकारित्वम् । श्रीयते सेव्यते सर्वैरिति श्रीः, लाङ्गलपद्धतेः प्रतिष्ठासम्पत्त्यादिगणः इह प्राप्तः सन् मदीयां प्रजां पुत्रादिकमवतु रक्षतु । इन्द्रो वा एतैर्युक्तां प्रजामवत्विति ॥ ३ ॥ चतुर्थस्यार्थः । यस्याः सीतायाः सद्भावे वैदिकलौकिकानां श्रौतस्मार्तकर्मणां भूतिः सम्पत्तिर्भवति । तामिन्द्रपत्नीं सीतामुपह्वये सा सीता मे मम अन्नपायिनी अदनीयादिवृद्धिकारिणी कर्मणि कर्मणि प्रतिकर्म तु विशेषात् भूयात् भवतु इति । तस्यै स्वाहा ॥ ४ ॥ तामेव विशिनष्टि । अश्वावती अश्वाः विद्यन्ते यस्यां साऽश्ववती । सैवाश्वावती । दीर्घश्छान्दसः । गावो विद्यन्ते यस्यां सा गोमती । सूनृतं मधुरवाक्यं तिष्ठति यस्यां सा सूनृतवती सैव सूनृतावती । प्राणभृतोऽशेषजीवान् बिभर्ति पुष्णाति । अतन्द्रिता आलस्यरहिता सती । खलमालिनी खले धान्यराशिस्थाने मालते शोभते इति खलमालिनी ताम् उर्वरां सर्वसस्याढ्याम् । ध्रुवां स्थिरां तां सीताम् अस्मिन्कर्मण्युपह्वये। सा मे अनपायिनी दुःखध्वंसिनी । तु विशेषात् भूयात्स्वाहेति । स्थालीपाकस्येत्यत्रावयव लक्षणा षष्ठी । **सीतायै, यजायै, शमायै, भूत्यै इति**–चतस्र आहुतीर्जुहोति । एकेषामाचार्याणां मते मन्त्रवत्प्रदानं भवति यथामन्त्रं होमो न तु स्वाहाकारेण । कुतः **स्वाहाकारप्रदाना इति श्रुतेः** । श्रुतौ जुहोतीनां स्वाहाकारप्रदानता श्रूयते । इदं तु स्मार्तं कर्म । ननु “वषट्कारेण वा स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते” इति सामान्योक्तेरत्रापि प्रवर्ततामिति चेत् । न चात्र वषट्कारप्रवृत्तिः । याज्यापुरोऽनुवाक्यावत्त्वे हि वषट्कारश्रवणम् । तत्सहपाठात्स्वाहारोऽप्यत्र न प्रवर्तते । तत्र **विनिवृत्तिः**–मन्त्रवत्प्रदानपक्षस्य निरासः । कुतः । स्मार्तेऽपि कर्मणि स्वाहाकारप्रदानत्वस्य विधानात् । तद्यथा **छन्दोगपरिशिष्टे कात्यायनः**–“स्वाहाकारवषट्कारनमस्कारा दिवौकसाम् । हन्तकारो मनुष्याणां स्वधाकारः स्वधाभुजाम्” इति । अत्रावसरे सीतायज्ञे चेति सूत्रातिदिष्टाभ्यो लाङ्गलयोजनदेवताभ्य इन्द्रादिभ्यस्तद्गतोपादानात्तेन स्थालीपाकेन होमः स्थालीपाकहोमाधिकारात् । ततश्च-

स्विष्टकृदादि । **स्तरणशेषकूर्चेषु सीतागोप्तृभ्यो बलिꣳहरति पुरस्ताद्ये त आसते** इत्येवमादिभिर्मन्त्रैः प्रतिमन्त्रम् । स्तरणे शेषभावं गतास्त एव कूर्चास्तेषु बलिहरणम् । अथ मन्त्रार्थः । तत्र चतुर्णां परमेष्ठी यजुः लिङ्गोक्ता बलिहरणे० । हे सीते ये देवाः सुधन्वानः शोभनधनुष्मन्तः, निषङ्गिणः सतूणीराः, ते तव पुरस्तात्पूर्वभागे आसते तिष्ठन्ति ते त्वा त्वां पुरस्तात्प्राच्यां दिशि गोपायन्तु रक्षन्तु । "गुपूधूपविच्छिपणिपनिभ्य आयः "इत्यायप्रत्ययः । किम्भूताः अप्रमत्ता सावधानाः । अनपायिनः कष्टहराः। अहं चैषां देवानां देवेभ्यो नमस्करोमि । बलिं चेममेभ्यो हरामि इति । अथ एवं दक्षिणतस्तव दक्षिणपार्श्वे ये अनिमिषाः निमेषमकुर्वाणाः वर्मिणः सन्नद्धाः । शेषं समानम् । अथैवं पश्चात्पश्चिमायां दिशि । आभुवः आसमन्ताद्भवाः प्रभुवः प्रकृष्टेन भवाः । तानेवाह—**भूतिर्भूमिः पार्ष्णिः शुनङ्कुरिरि**त्येवंनामानः । शेषं समानम् । अथैवमुत्तरतः उत्तरपार्श्वे भीमाः भीषणाः । जवे वेगे वायुना समास्तुल्याः । **क्षेत्रे खले गृहे अध्वनि**—वा वर्तमानं त्वा त्वां गोपायन्तु । शेषं समानम् । एवं मन्त्रलिङ्गाच्चतसृषु दिक्षु बलिदानम् । **प्रकृता**त्प्रधानदेवतासम्बन्धिनो व्रैह्याद्यावाद्वा स्थालीपाकादन्यो यः सिद्धः पाकश्चरुस्तस्मात् । **स्थाल्येनाज्यशेषेण च पूर्ववत्**—लाङ्गलयोजनवत्, इन्द्रं पर्जन्यमित्यादिभ्यो बलिहरणम् ॥ **स्त्रियश्चाचरितत्वा**दाचाराद्बलिकर्म कुर्युः । **सꣳस्थिते कर्मणि ब्राह्मणान् भोजयेत् २ ॥ १७ ॥** इत्याचार्यबलभद्रसुतजयरामकृते सज्जनवल्लभे गृह्यभाष्ये द्वितीयकाण्डविवरणम् ॥ २ ॥

हरि०—**अथ सीतायज्ञः**—अथेदानीं सीतायज्ञकर्म व्याख्यास्यत इति शेषः । तत्र कृषिप्रवृत्त औपासनिकोऽधिक्रियते । **व्रीहियवानां यत्र यत्र यजेत तन्मयꣳ स्थालीपाकꣳ श्रपयेत्**—तत्र सीतायज्ञे, व्रीहयश्च यवाश्च व्रीहियवास्तन्मध्ये यत्र यत्र यस्मिन् यस्मिन् व्रीहिकाले यवकाले वा यजेत सीतायज्ञेन तत्र तत्र तन्मयं व्रीहिमयं व्रीहिकाले, यवमयं यवकाले, स्थालीपाकं चरुं श्रपयेत् । **कामादीजानोऽन्यत्रापि व्रीहियवयोरेवान्यतरꣳ स्थालीपाकꣳ श्रपयेत्**—कामात् इच्छातः, अन्यत्रापि पक्षादिप्रभृतिषु, ईजानो यागं कुर्वन्, व्रीहियवयोरेवान्यतरं स्थालीपाकं श्रपयेत् । **न पूर्वचोदितत्वात्सन्देहः**—अत्र व्रीहियवयोरन्यतरस्य यागमात्रसाधनद्रव्यत्वे न सन्देहः । कुतः पूर्वचोदितत्वात् पूर्वोपदिष्टत्वात् । कुत्रेति चेत् "व्रीहीन् यवान्वा हविषी" इत्यत्र कल्पे । अतो न सन्देहः । **असम्भवाद्विनिवृत्तिः**—ननु यावस्य चरोर्विनिवृत्तिर्दृश्यते कथमन्यतरं स्थालीपाकं श्रपयेदिति चेत् उच्यते, यावचरोर्या विनिवृत्तिः सा असम्भवात् न शास्त्रात्, अतो नायमसम्भवविनिवृत्तस्य यावस्य चरोः प्रतिप्रसवः । यतः सामान्यशास्त्रविहितम्, क्वचिच्छास्त्रान्तरेण प्रतिषिद्धम, पुनर्विधीयमानं हि प्रतिप्रसवमुच्यते । इदं त्वसम्भवात्प्रतिषिद्धम् । कथमसम्भव इति चेत् अनवस्राविताान्तरोष्मपक्वे ईषदसिद्धे तण्डुलपाके चरुशब्दप्रयोगप्रत्ययात् । अतो वाचनिको यावस्थालीपाको यत्र तत्र गुलिकाभिः सम्पाद्यते यत्र पुनर्विकल्पः तत्रासम्भवाद्विनिवृत्तिरीति । **क्षेत्रस्य पुरस्तादुत्तरतो वा शुचौ देशे कृष्टे फलानुपरोधेन**—क्षेत्रस्य सस्यवतः, पुरस्तात् पूर्वस्यां दिशि उत्तरतो वा उदीच्यां वा, शुचौ अमेध्यद्रव्यरहिते देशे, कृष्टे फालेन विलिखिते, फलस्य सस्यस्य अनुपरोधः अबाधः फलानुपरोधस्तेन फलानुपरोधेन सीतायज्ञः कर्तव्यः । **ग्रामे वोभयसम्प्रयोगात्**—यद्वा । ग्रामे कर्तव्यः कुतः उभयसम्प्रयोगात् । उभयं क्षेत्रम्, ग्रामश्च सम्प्रयोक्तुमधिकरणतया सम्बोद्धुं शक्यते फलानुपरोधेन कृष्टत्वेन वा । पुरस्तादुत्तरतो वा शुचौ देशे कृष्टे इति ग्रामस्यापि विशेषणत्वेन सम्बध्यते अविरोधात् । ननु क्षेत्रग्रामयोः एकतरोपादानेन अन्यतरस्य बाधः प्रसज्येत ततो विरोध इति चेत् न । **अविरोधात्**—न विरोधः अविरोधस्तस्मादविरोधात् । विकल्पादेकतरोपादाने न दोषः । व्यवस्था-

सम्भवे हि अष्टदोषदुष्टोऽपि विकल्प आश्रीयते न्यायविद्भिः । **यत्र श्रपयिष्यन्नुपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधाय तन्मिश्रैर्दर्भैः स्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति**–यत्र क्षेत्रे ग्रामे वा चरुं श्रपयिष्यन् भवति श्रपयितुमिच्छा भवति, तत्र उपलिप्ते गोमयोदकेन, उद्धते स्फ्येनोल्लिखिते, अवोक्षिते मणिकोदकेन सिक्ते, अग्निमावसथ्यं स्थापयित्वा । अत्र पुनरुपलेपनाद्युपदेशः कृष्टेऽपि प्राप्त्यर्थः । न पुनःपरिसमूहनोद्धरणनिवृत्त्यर्थः । तन्मिश्रैर्दर्भैः स्तीर्त्वा तैर्व्रीहिभिर्यवैर्वा मिश्रा मिलिता दर्भास्तैस्तान्मिश्रैर्दर्भैरग्निं स्तीर्त्वा परिस्तीर्य आज्यभागयागानन्तरं वक्ष्यमाणमन्त्रैः **पृथिवी द्यौरित्यादिभिः** पञ्चभिर्मन्त्रैः क्रमेण पञ्चाज्याहुतीर्जुहोति । **स्थालीपाकस्य जुहोति सीतायै यजायै शमायै भूत्यै इति । मन्त्रवत्प्रदानमेकेषाम्**–स्थालीपाकस्येत्यवयवलक्षणा षष्ठी । तस्य सीताद्याभ्यश्चतसृभ्यो देवताभ्यश्चतस्र आहुतीः क्रमेण तन्नामभिरेव चतुर्थ्यन्तैः स्वाहाकारान्तैश्च जुहोति । एकेषामाचार्याणां मते मन्त्रवदेव प्रदानं होमः न स्वाहाकारः । किं कारणम् । **स्वाहाकारप्रदाना इति श्रुतेः**–स्वाहाकारेण प्रदानं येषु ते स्वाहाकारप्रदानाः जुहोतयः इति श्रुतेः, श्रुतौ श्रौतकर्मणि स्वाहाकारप्रदानत्वम्, इदं तु स्मार्तं कर्म । "वषट्कारेण वा स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते" इति सामान्यवचनात् गार्ह्येऽपि प्रवर्ततामिति चेत्, न चात्र वषट्कारस्य प्रवृत्तिः, किमिति याज्यापुरोऽनुवाक्यत्वे वषट्कारस्य श्रवणात् । तेन सहपाठाच्च स्वाहाकारोऽप्यत्र निवर्तते । **विनिवृत्तिः**–मन्त्रवत्प्रदानमित्येतस्य पक्षस्य विनिवृत्तिः निरासः अप्रवृत्तिरिति यावत् । कुतः स्मार्तेऽपि कर्मणि स्मृतिकारैः स्वाहाकारस्य विधानात् । तत् यथा **छन्दोगपरिशिष्टे कात्यायनः**–" स्वाहाकारवषट्कारनमस्कारा दिवौकसाम् । हन्तकारो मनुष्याणां स्वधाकारः स्वधाभुजाम्" इति । अथ सीतायज्ञ इत्यनेन सूत्रेणातिदिष्टाभ्यो लाङ्गलयोजनदेवताभ्यः तद्भूतोपात्तस्थालीपाकेनास्मिन्नवसरे जुहुयात् । कुतः ततः स्थालीपाकहोमाधिकारात् । ततः स्विष्टकृदादि । **स्तरणशेषकुशेषु सीतागोप्तृभ्यो बलिँ हरति पुरस्ताद्ये त आसत**–इत्यादि । तत्र **पुरस्ताद्य** इत्यादिभिश्चतुर्भिर्मन्त्रैः स्तरणे शेषभावमुपसर्जनत्वं गताः प्राप्ताः त एव कुशास्तेषु स्तरणशेषकुशेषु बलिं हरति, केभ्यः सीतागोप्तृभ्यः, सीता लाङ्गलपद्धतिः, ताः गोपायन्ति पालयन्ति ये ते सीतागोप्तारस्तेभ्यः सीतागोप्तृभ्यः । स्तरणशेषकूर्चाः प्राच्यादिषु चतसृषु दिक्षु यथालिङ्गम् । **प्रकृतादन्यस्मादाज्यशेषेण च पूर्ववद्बलिकर्म**–प्रकृतात्प्रधानदेवतासम्बन्धिनो व्रैह्याद्यावाद्वा स्थालीपाकात् अन्यो यः सिद्धोपात्तश्चरुस्तस्मात् स्थाल्येनाज्यशेषेण च पूर्ववत् लाङ्गलयोजनवत् बलिकर्म इन्द्रपर्जन्यादिभ्यो बलिहरणं कर्तव्यम् । **स्त्रियश्चोपयजेरन्नाचरितत्वात्**–स्त्रियश्च भार्यादिकाः उपयजेरन् बलिकर्मणा ताभ्यः एवं देवताभ्यः पूजां कुर्युः । कुत एतत् आचरितत्वात् प्राचीनाभिः स्त्रीभिर्बलिकर्मणः कृतत्वात् । **सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत् सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत्**–संस्थिते समाप्ते सीतायज्ञाख्ये कर्मणि ब्राह्मणान् विप्रान् त्रिप्रभृतीन् भोजयेत् आशयेद्भक्ष्यभोज्यादिभिः । द्विरुक्तिरत्र काण्डसमाप्तिनिबन्धना । इति सूत्रार्थः ॥ १७ ॥

अथ **प्रयोगः** । अथ सीतायज्ञः–कृषिं कुर्वतः साग्नेः व्रीहिनिष्पत्तिकाले यवनिष्पत्तिकाले च भवति । तत्र प्रथमप्रयोगे मातृपूजाभ्युदयिके भवतः । अनन्तरं क्षेत्रस्य पूर्वत उत्तरतो वा कृष्टे शुचौ देशे यत्र सस्यानि न नश्यन्ति तत्रेदं कर्म कुर्यात् । यद्वा ग्रामे पूर्वत उत्तरतो वा शुचिदेशस्य कर्षणं विधाय तत्र कर्त्तव्यम् । एवं देशद्वयान्यतरे देशे पञ्च भूसंस्कारान् कृत्वा औपासनाग्निमुपसमाधाय ब्रह्मोपवेशनादि कुर्यात् । तत्र विशेषः व्रीहिकाले व्रीहिसस्यमिश्रैर्दर्भैरग्निं परिस्तृणाति, यवकाले यवसस्यमिश्रैः । तत्र व्रीहिकाले व्रीहिमयम् एकमेव चरुं, यवकाले यवमयं श्रपयति । अपरं स्थालीपाकं सिद्धमेवासादयति तण्डुलानन्तरमुपकल्पयति बलिपटलकम् बलिपट-

लकमिति शूर्पादिकं वैणवं पात्रं कुल्माषौदनयुक्तमुच्यते । तण्डुलानन्तरं सिद्धं चरुं प्रोक्षति । आज्यभागानन्तरं पश्चाज्याहुतीर्जुहोति । तद्यथा–"पृथिवी द्यौः प्रदिशो दिशो यस्मै द्युभिरावृताः । तामिहेन्द्रमुपह्वये शिवा नः सन्तु हेतयः स्वाहा" इदमिन्द्राय० । "यन्मे किंचिदुपेप्सितमस्मिन्कर्मणि वृत्रहन् । तन्मे सर्वꣳ समृध्यतां जीवतः शरदः शत स्वाहा" इदमिन्द्राय० । "सम्पत्तिर्भूतिर्भूमिर्वृष्टिर्ज्यैष्ठ्यꣳ श्रैष्ठ्यꣳ श्रीः प्रजामिहावतु स्वाहा" इदमिन्द्राय० । "यस्या भावे वैदिकलौकिकानां भूतिर्भवति कर्मणाम् । इन्द्रपत्नीमुपह्वये सीताꣳ सा मे त्वन्नपायिनी भूयात्कर्मणि कर्मणि स्वाहा" इदमिन्द्रपत्न्यै० । "अश्वावती गोमती सूनृतावती बिभर्त्ति या प्राणभृतो अतन्द्रिता । खलमालिनीमुर्वरामस्मिन्कर्मण्युपह्वये ध्रुवाꣳ सा मे त्वनपायिनी भूयात्स्वाहा" इदं सीतायै० । अथ प्रकृतस्य स्थालीपाकस्य चतस्र आहुतीर्जुहोति । यथा सीतायै स्वाहा इदं सीतायै० । यजायै स्वाहा इदं यजायै० । शमायै स्वाहा इदं शमायै० । भूत्यै स्वाहा इदं भूत्यै० । अथ सिद्धेन स्थालीपाकेन लाङ्गलयोजनदेवताभ्योऽष्टाहुतीर्जुहोति । यथा–इन्द्राय स्वाहा इदमिन्द्राय० । पर्जन्याय स्वाहा इदं पर्जन्याय० । अश्विभ्याꣳ स्वाहा इदमश्विभ्यां० । मरुद्भ्यः स्वाहा इदं मरुद्भ्यो० । उदलाकाश्यपाय स्वाहा इदमुदलाकाश्यपाय० । स्वातिकार्यै स्वाहा इदं स्वातिकार्यै० । सीतायै स्वाहा इदं सीतायै० । अनुमत्यै स्वाहा इदमनुमत्यै० । यथादैवतं त्यागः । प्रकृतात् सिद्धान्नचरोः स्विष्टकृत् । ततो महाव्याहृत्यादि ब्रह्मणे दक्षिणादानान्तं कृत्वा क्षेत्रस्य पुरस्तादारभ्य प्रतिदिशं स्तरणशेषकुशतृणान्यास्तीर्य तेषु मुख्येन चरुणा यथास्तरणं वक्ष्यमाणमन्त्रैर्बलीन् हरति । यथा "पुरस्ताद्ये त आसते सुधन्वानो निषङ्गिणः । ते त्वा पुरस्ताद्गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीमम्" इति पुरस्ताद्बलिहरणमन्त्रः । इदं सुधन्वभ्यो निषङ्गिभ्यो० । "अथ दक्षिणतोऽनिमिषा वर्मिण आसते । ते त्वा दक्षिणतो गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीमम्" इति दक्षिणतो बलिहरणमन्त्रः । इदमनिमिषेभ्यो वर्मिभ्यो० । "अथ पश्चादाभुवः प्रभुवो भूतिर्भूमिः पार्ष्णिः शुनङ्कुरिः । ते त्वा पश्चाद्गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीमम्" इति पश्चिमतो बलिहरणमन्त्रः । इदमाभूभ्यः, प्रभूभ्यो, भूत्यै, भूम्यै, पार्ष्ण्यै, शुनङ्कुर्यै० । "अथोत्तरतो भीमा वायुसमा जवे । ते त्वोत्तरतः क्षेत्रे खले गृहेऽध्वनि गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीमम्" इति उत्तरतो बलिहरणमन्त्रः । इदं भीमेभ्यो वायुसमाजवेभ्यो० । अथ सिद्धचरुशेषं स्थाल्येनाज्यशेषेण सन्नीय तेनेन्द्रादिभ्योऽनुमत्यन्तेभ्यो लाङ्गलयोजनदेवताभ्यो बलीन् हरति । ततो बलिपटलकेन स्त्रियश्चेन्द्रादिभ्यो हलयोजनदेवताभ्यः अन्येभ्यश्च वृद्धव्यवहारासिद्धेभ्यः क्षेत्रपालादिभ्यो बलिदानं कुर्युः । ततो ब्राह्मणान् भोजयेत् ॥ १७ ॥

इत्यग्निहोत्रिहरिहरविरचितायां पारस्करगृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ
द्वितीयः काण्डः समाप्तः ॥ २ ॥ ॥ * ॥

गदा०–**अथ सीतायज्ञः**–व्याख्यास्यत इति सूत्रशेषः । सीतायज्ञ इति कर्मनाम । स चायं कृषिप्रवृत्तस्य साग्नेर्भवति । **व्रीहियवानां यत्र यत्र यजेत तन्मयꣳ स्थालीपाकꣳ श्रपयेत्**–व्रीहयश्च यवाश्च व्रीहियवाः, तेषां मध्ये यत्र यत्र यस्मिन् यस्मिन्काले व्रीहिकाले यवकाले वा सीतायज्ञेन यजेत तत्र तन्मयं व्रीहिकाले व्रीहिमयं, यवकाले यवमयं, स्थालीपाकं चरुं श्रपयेत् । **कामादीजानोऽन्यत्रापि व्रीहियवयोरेवान्यतरꣳ स्थालीपाकꣳ श्रपयेत्**–कामादिच्छया, अतोऽन्यत्रापि ईजानो यागं कुर्वन् पक्षादिप्रभृतिषु व्रीहियवयोरेवान्यतरं स्थालीपाकं श्रपयेत् । **न पूर्वचोदितत्वात्सन्देहः**–व्रीहियवयोरन्यतरस्य यागसाधनत्वे नैव सन्देहः । कुतः–परिभाषासूत्रे "व्रीहीन् यवान्वा हविषी" इति पूर्वं चोदितत्वात् पूर्वमुपदिष्टत्वात् । अतोऽर्थादपि च व्रीहिभिर्यवैर्वा यागः प्राप्नोतीति न वक्तव्यमेतत् । ननु यावस्य चरोर्विनिवृत्तिदर्शनात्कथमन्यतरं चरुं श्रपयेत्तत्राह–**असम्भवाद्विनिवृत्तिः**–

यावस्य चरोरसम्भवाद्विनिवृत्तिरधस्तनस्य शास्त्रान्तरस्य, तेन यवानां स्थालीपाकं कुर्यादिति पुनरारम्भः । असम्भवश्चानवस्रावितान्तरोष्मपाकविशदविषयसिद्धे तण्डुलपाके चरुशब्दस्य प्रयोगप्रत्ययात् । अतः सर्वत्र स्थालीपाको व्रीहीणामेव । **क्षेत्रस्य पुरस्तादुत्तरतो वा शुचौ देशे कृष्टे फलानुपरोधेन**—सस्ययुक्तस्य क्षेत्रस्य पूर्वस्यां दिशि उदीच्यां वा, अमेध्यरहिते देशे, कृष्टे सीरेण विलिखिते, फलस्य सस्यस्यानुपरोधेन अबाधेनोक्ते देशे सीतायज्ञः कार्यः । **ग्रामे वोभयसम्प्रयोगात् अविरोधात्**—अथवा सीतायज्ञो ग्रामे वा कार्यः । उभयं हि सम्प्रयोक्तुं शक्यते । कुतः—फलानुपरोधः, कृष्टं च । न चात्र विरोधः । अतो वाशब्दो विकल्पार्थः । **यत्र श्रपयिष्यन्नुपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधाय तन्मिश्रैर्दर्भैः स्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति । पृथिवी द्यौः प्रदिशो दिशो यस्मै द्युभिरावृताः । तमिहेन्द्रमुपह्वये शिवा नः सन्तु हेतयः स्वाहा । यन्मे किञ्चिदुपेप्सितमस्मिन्कर्मणि वृत्रहन् । तन्मे सर्वꣳ समृध्यतां जीवतः शरदः शतꣳ स्वाहा । सम्पत्तिर्भूतिर्भूमिर्वृष्टिर्ज्यैष्ठ्यꣳ श्रैष्ठ्यꣳ श्रीः प्रजामिहावतु स्वाहा । यस्या भावे वैदिकलौकिकानां भूतिर्भवति कर्मणाम् । इन्द्रपत्नीमुपह्वये सीताꣳ सा मे त्वनपायिनी भूयात्कर्मणि कर्मणि स्वाहा । अश्वावती गोमती सूनृतावती बिभर्ति या प्राणभृतो अतन्द्रिता । खलमालिनीमुर्वरामस्मिन्कर्मण्युपह्वये ध्रुवाꣳ सा मे त्वनपायिनी स्वाहेति**—यत्र क्षेत्रे ग्रामे वा चरुं श्रपयिष्यन् भवति तत्रोपलिप्ते, उद्धते उल्लिखिते, अवोक्षिते जलेनाभ्युक्षिते देशेऽग्निमावसथ्यमुपसमाधाय स्थापयित्वा तन्मिश्रैर्दर्भैर्व्रीहिकाले व्रीहिसस्यमिश्रैर्यवकाले यवसस्यमिश्रैर्दर्भैरग्निं परिस्तीर्याज्यभागयागानन्तरमाज्येन पञ्चाहुतीर्जुहोति **पृथिवी द्यौरित्यादिभिः** पञ्चमन्त्रैः प्रतिमन्त्रम् । उपलेपनोद्धतावोक्षितग्रहणं कृष्टेऽपि पञ्चसंस्कारप्रज्ञप्त्यर्थम् । नेतरपरिसंख्यार्थम् । मन्त्रार्थः । पृथिव्यादिदेवता यस्मै इन्द्राय इन्द्रमुपासितुं स्थिताः । प्रदिशः दिशश्च । किम्भूताः । द्युभिः कान्तिभिरावृताः पूर्णाः । तमिन्द्रम् इह यज्ञे उपह्वये समीपमाह्वये । इन्द्रस्य हेतयो वज्राद्यायुधानि शिवाः कल्याणकारिण्यः सन्तु । तस्मै च सुहुतमस्तु ॥ १ ॥ हे वृत्रहन् अस्मिन्कर्मणि सीतायज्ञे यत्किञ्चिन्मे ममोपेप्सितम् इष्टम्, तत्सर्वं मे मम समृध्यतां सम्पद्यताम् । किम्भूतस्य शतं शरदो वत्सरान् जीवतः । "तुभ्यं स्वाहा" इति सर्वत्र समानम् ॥ २ ॥ सम्पत्तिर्धनाद्युपचयः । भूतिरैश्वर्यम् । भूमिराश्रयः । वृष्टिरभीष्टस्य । ज्यैष्ठ्यं ज्येष्ठत्वम् । श्रैष्ठ्यं श्रेष्ठत्वम् । श्रीः प्रतिष्ठासम्पत्त्यादिगणः । इह यज्ञे प्रीतः सन् मदीयां प्रजां पुत्रादिवर्गमवतु रक्षतु । इन्द्रो वा एतैर्युक्तां प्रजामवत्विति ॥ ३ ॥ यस्याः सीतायाः सहभावे वैदिकलौकिकानां श्रौतस्मार्तानां कर्मणां भूतिः सम्पत्तिर्भवति । तामिन्द्रपत्नीं सीतामुपह्वये । सा सीता मे मम अन्नपायिनी अदनीयादिवृद्धिकर्त्री कर्मणि कर्मणि प्रतिकर्म भूयात् भवतु । तस्यै स्वाहा ॥ ४ ॥ तामेव विशिनष्टि—अश्वावती अश्वादिसम्पत्तिकर्त्री । एवं गोमत्यादौ । सूनृता मधुरवाक् । अतन्द्रिता सावधाना सती या प्राणभृतो जीवान् बिभर्ति पुष्णाति । किम्भूता । खलमालिनी धान्यराशिमती । उर्वरा सर्वसस्यानां सम्पत् । तां ध्रुवां स्थिराम् अस्मिन्कर्मण्युपह्वये । उपहूता च सा मे मम अनपायिनी दुःखध्वंसिनी भवतु । तस्यै स्वाहा ॥ ५ ॥ **स्थालीपाकस्य जुहोति सीतायै यजायै शमायै भूत्या इति**—सीताया इति चतुर्भिर्मन्त्रैः प्रतिमन्त्रं स्थालीपाकेन चतस्र आहुतीर्जुहोति । अवयवलक्षणा षष्ठी स्थालीपाकस्येति । **मन्त्रवत्प्रदानमेकेषाम् । स्वाहाकारप्रदाना इति श्रुतेः**—एकेषामाचार्याणां मते मन्त्रवत्प्रदानम् । यथामन्त्रं होमो न तु स्वाहाकारेण । कुतः स्वाहाकारप्रदाना इति श्रुतेः । श्रुतौ हि जुहोतीनां स्वाहाकारप्रदानता श्रूयते । इदं तु स्मार्तं कर्म । ननु "वषट्कारेण वा, स्वाहाकारेण वा देवेभ्योऽन्नं प्रदीयते" इति सामान्येनोक्तेरत्रापि तत्प्रवर्ततामिति चेत्, न चात्र वषट्कारप्रवृत्तिः । याज्यापुरोऽनुवाक्यत्वे च वषट्कारश्रवणम् । तत्सहपाठात्स्वाहाकारोऽप्यत्र न प्रवर्तते । **विनिवृत्तिः**—पूर्वोक्तपक्षस्य मन्त्रवत्प्रदानमित्यस्य विनिवृत्तिर्निरासः । स्मार्तेऽपि कर्मणि "स्वाहाकारवषट्कारनमस्कारा दिवौकसाम् । हन्तकारो मनुष्याणां स्वधाकारः स्वधाभुजाम्" इति **कात्यायनस्मृतौ** विधानात् । सीतायज्ञे चेत्यतिदेशादस्मिन्नवसरे लाङ्गलयोजनदेवताभ्यः तद्भूतोपात्तेन स्थालीपाकेन होमः । स्थालीपाकहोमाधिकारात् । ततः स्विष्टकृदादि । **स्तरणशेषकूर्चेषु सीतागोप्तृभ्यो बलिꣳ हरति पुरस्ताद्ये त आसते सुधन्वानो निषङ्गिणः । ते त्वा पुरस्ताद्गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति**—अग्नेः परिस्तरणे ये कुशा व्रीहिसस्यमिश्रा यवसस्यमिश्रा वा शेषभावमङ्गभावं प्राप्तास्त एव कूर्चाः आसनानि तेषु बलिं हरति । सीतागोप्तृभ्यः सीता लाङ्गलपद्धतीर्ये गोपायन्ति पालयन्ति ते सीतागोप्तारस्तेभ्यः । तत्र पुरस्तात्प्राच्यां ये त आसत इति

मन्त्रेण । मन्त्रार्थः । हे सीते ये देवाः सुधन्वानः शोभनधनुष्मन्तः निषङ्गिणः सतूणीराः ते तव पुरस्तात् आसते तिष्ठन्ति ते त्वां पुरस्तात्प्राच्यां दिशि गोपायन्तु रक्षन्तु । किम्भूताः अप्रमत्ताः सावधानाः । अनपायिनः कष्टहराः । अहं चैषां नमस्करोमि । बलिमेवमेभ्यो हरामि ददामि । **अथ दक्षिणतोऽनिमिषा वर्मिण आसते । ते त्वा दक्षिणतो गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति**—अथ पुरस्ताद्बल्यनन्तरमग्नेर्दक्षिणपार्श्वे कूर्चेषु बलिं हरति **अनिमिषा** इति मन्त्रेण । मन्त्रार्थः । ये आनिमिषाः निमेषरहिताः, वर्मिणः सन्नद्धाः, शेषं पूर्ववत् । **अथ पश्चादाभुवः प्रभुवो भूतिर्भूमिः पार्ष्णिः शुनङ्कुरिः । ते त्वा पश्चाद् गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति**—अथाग्नेः पश्चिमायां दिशि **आभुव** इति बलिं ददाति । मन्त्रार्थः । आ समन्ताद्भवाः । तानेवाह—भूतिर्भूमिः पार्ष्णिः शुनङ्कुरिरित्येवंनामानः । शेषं व्याख्यातम् । **अथोत्तरतो भीमा वायुसमा जवे । ते त्वोत्तरतः क्षेत्रे खले गृहेऽध्वनि गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति**—अथोत्तरपार्श्वे बलिं ददाति । **भीमा** इति मन्त्रेण । मन्त्रार्थः । भीमाः भीषणाः । जवे वेगे वायुना समास्तुल्याः क्षेत्रे खले गृहे अध्वनि वा वर्तमानं त्वा त्वां गोपायन्तु, शेषं समानम् । **प्रकृतादन्यस्मादाज्यशेषेण च पूर्ववद्बलिकर्म**—प्रकृतात्प्रधानयागदेवतासम्बन्धिनः स्थालीपाकादन्यो यः सिद्धो गृहीतश्चरुस्तस्मात्स्थाल्याज्येनाज्यशेषेण च पूर्ववत् इन्द्रपर्जन्यादिभ्यो लाङ्गलयोजनदेवताभ्यो बलिहरणं कार्यम् । **स्त्रियश्चोपयजेरन्नाचरितत्वात्**—ततः स्त्रियो भार्यादिका उपयजेरन् बलिहरणं कुर्युः इन्द्रादिभ्योऽन्येभ्यश्च क्षेत्रपालादिदेवताभ्यो वृद्धव्यवहारेण । कुतः आचरितत्वात् । प्राचीनाभिः कृतत्वात् बलिकर्मणः । **सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत्सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत्**—समाप्ते स्त्रीकर्तृकबल्यनन्तरं त्रीन्ब्राह्मणान्भोजयेत् । द्विरभ्यासः काण्डसमाप्तिसूचनार्थः ॥ १७ ॥ * ॥ इति श्रीत्रिराग्निचित्सम्राट्स्थपति—महायाज्ञिकश्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डं सम्पूर्णम् ॥ २ ॥ * ॥

अथ **पदार्थक्रमः** । प्रथमप्रयोगे मातृश्राद्धम् । उक्ते देशे आवसथ्याग्नेः स्थापनम् । ब्रह्मोपवेशनादिदक्षिणान्ते विशेषः । सस्यमिश्रैर्दर्भैरग्नेः परिस्तरणम् । एकश्चरुः श्रप्यते । अपरः सिद्ध एव तण्डुलानन्तरमासादनीयः । उपकल्पनीयानि । बलिपटलकम् । शूर्पादि वैणवं पात्रं कुल्माषौदनयुक्तं बलिपटलकमित्युच्यते । तण्डुलोत्तर सिद्धचरोः प्रोक्षणम् । आज्यभागान्ते पञ्चाहुतयः । **पृथिवी द्यौ०** इदमिन्द्राय० ॥ १ ॥ **यन्मे०** इदमिन्द्राय० ॥ २ ॥ **सम्पत्ति०** इदमिन्द्राय० ॥ ३ ॥ **यस्या भावे०** इदमिन्द्रपत्न्यै० ॥ ४ ॥ **अश्वावती०** इदं सीतायै० ॥ ५ ॥ प्रकृतचरुणा आहुतिचतुष्टयम् । सीतायै स्वाहा० । यजायै स्वाहा० । शमायै० । भूत्यै० ॥ ६ ॥ एव त्यागाः । ततः सिद्धचरुणा लाङ्गलयोजनदेवताभ्यो होमः । इन्द्राय स्वाहा० १। पर्जन्याय० २। अश्विभ्याꣳ० ३। मरुद्भ्यः० ४। उदलाकाश्यपाय० ५। स्वातिकार्यै० ६। सीतायै० ७। अनुमत्यै स्वाहा० ८। स्विष्टकृदुभयोः । महाव्याहृत्यादिदक्षिणान्तम् । प्रतिदिशं प्रदक्षिणम् । पुरस्तात्प्रथमं ये त इति प्रतिमन्त्रं बलिचतुष्टयदानम् । त्यागाः । इदं सुधन्वभ्यो निषङ्गिभ्यो० १। इदमनिमिषेभ्यो वर्मिभ्यो० २। इदमाभूभ्यः, प्रभूभ्यो, भूत्यै, भूम्यै, पार्ष्ण्यै, शुनङ्कुर्यै० ३। इदं भीमाभ्यो वायुसमाजवेभ्यो० ४। चरोराज्यस्य च मिश्रणम् । तेन लाङ्गलयोजनदेवताभ्य इन्द्रादिभ्योऽनुमत्यन्तेभ्यो बलिहरणम् । ततो बलिपटलकेन स्त्रियश्च बलिहरणं कुर्युः, इन्द्रादिभ्योऽन्येभ्यश्च क्षेत्रपालादिदेवताभ्यो वृद्धाचारेण । ततो ब्राह्मणत्रयभोजनम् ॥ १७ ॥ * ॥ इति श्रीत्रिराग्निचित्सम्राट्स्थपति—महायाज्ञिकश्रीवामनात्मजदीक्षितगदाधरकृते गृह्यसूत्रभाष्ये द्वितीयकाण्डे सीतायज्ञे **पदार्थक्रमः** ॥ * ॥ समाप्तं चेदं द्वितीयकाण्डम् ॥ २ ॥ * ॥

विश्व०—अथ सीतायज्ञः—उच्यत इति सूत्रशेषः । स चायं कृषिं कुर्वतः कृतावसथ्यस्य भवति । **व्रीहि....पयेत्**—अभ्यस्तेन यत्रपदेन कालदेशरूपे अधिकरणे यत्र काले व्रीहियवयोरुत्पत्तिर्यत्र देशे चासौ यज्ञः तत्र तन्मयं व्रीहिकाले व्रीहिमयं यवकाले यवमयम् । **कामा....येत्**—कामात् इच्छातः अन्यत्रापि उक्तरूपदेशकालौ विहाय सीतायज्ञेन ईजानः । व्रीहियवयोरित्यत्रैवकारेण द्रव्यान्तरे साधनत्वव्यवच्छेदः । ननु प्राक्सूत्रादेव तल्लाभाद्व्यर्थोऽस्यारम्भ इत्याह—**न पूर्वचोदितत्वात्** इति । नन्वेतदारम्भो घटते । आसन्नसमयोत्पन्नयोर्व्रीहियवयोः साधनत्वावगमात्समयान्तरे च तदभावादासन्नसमयोत्पत्तिकद्रव्यान्तरसाधनत्वावगमसंदेहः । कुतः समयान्तरे व्रीहियवयोरसम्भवादनुत्पत्तेरित्याह—**संदेहोऽसम्भवात्**—इति । "विनिवृत्तिः

विशेषेण कामिकार्यताबोधकसूत्रे तयोरुपादानमहिम्ना संदेहनिवृत्तिरित्यर्थः । केचित्तु कामिकर्त्तव्यताबोधकसूत्रार्थमन्यथा
प्रोचुः।अन्यत्र पक्षादिप्रभृतिषु कामाद्व्रीहियवयोरित्य न्वयः। न पूर्वचोदितत्वात्संदेहः। नात्र संदेहः। यतः पूर्वचोदितमेवैतत् पूर्वं
"व्रीहीन्यवान्वा हविषी" इति परिभाषासूत्रे । अतो न वक्तव्यमेतद् व्रीहियवयोरेवेति । **असं...वृत्तिः**–यावस्य चरोरसं-
भवाद्विनिवृत्तिः । न तु शास्त्रात् । असंभवश्चानवस्रावितान्तरोष्मपाकविशदसिद्धे तण्डुलपाके चरुशब्दप्रयोगदर्शनात् । **क्षेत्र...**
धेन–शुचौ पवित्रे कृष्टे फालेन विलिखिते । फलस्य सस्यस्य उपरोधः बाधः । न उपरोधः अनुपरोधः, तेन क्षेत्रात्प्रागुदीच्यां
वा सीतायज्ञः शुचौ कृष्टे कर्तव्यः । **ग्रामे...गात्**—वाशब्दः पूर्वोक्तपक्षव्यावृत्तौ । यः कामात्करोति तेन ग्रामे एव
कर्त्तव्यः । कुतः उभयथा संप्रयोगात् कृषिं कुर्वतः क्षेत्रे इतरस्य ग्राम इति । कैश्चित्तु ग्रामे.वेत्येतत्पक्षान्तरमुपन्यस्तम् ।
उभयं ग्रामः क्षेत्रं च, अधिकरणतया संप्रयोक्तुं संबद्धुं शक्यम् । तन्मते कृषिं कुर्वत एव साग्नेरत्राधिकारः। **अविरोधात्**–
व्यवस्थिताधिकरणानुष्ठानपक्षे विकल्पपक्षेऽप्यन्यतरोपादानं न विरोधः स्यादित्यर्थः । **यत्र श्र...जुहोति**—"पुनर्भूसंस्का-
रोक्तिः कृष्टेऽपि प्राप्त्यर्था" इति **कर्कोपाध्यायाः** । निरग्नेरप्यधिकारं सूचयितुं लौकिकाग्निप्राप्त्यर्थेत्यन्ये । साग्नेरेषामा-
धिक्यं संभारवदित्यपरे । अग्निस्थापनाद्याज्यभागान्ते विशेषः । तन्मिश्रैर्दर्भैर्व्रीहिकाले व्रीहिमिश्रैः, यवकाले यवमिश्रैर्दर्भैरग्नेः
परिस्तरणम् । अपरः अप्रकृतः सिद्धस्थालीपाक आसाद्यः । तण्डुलानन्तरमुपकल्पनीयवलिपटलकं च । ग्रहणे सीतायै यजायै
शमायै भूत्यै जुष्टं, प्रोक्षणे त्वा । आज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोतीत्युक्तं ता आह–'**पृथिवी...यः स्वाहा**–इदमिन्द्राय ।
यन्मे...शतꣳ स्वाहा–इदमिन्द्राय । **सम्पत्ति...वतु स्वाहा**–इदमिन्द्राय । **यस्या....णि स्वाहा**–इदमिन्द्रपत्न्यै ।
अश्वा....यात्स्वाहेति–इदं ध्रुवायै । इतिशब्दः आज्याहुतिसमाप्त्यर्थः। **स्थाली....त्या–इति** चतस्रः आहुतीः स्थाली-
पाकस्य । सीतायै स्वाहा इदं सीतायै इत्यादि । ततः सिद्धपाकेन लाङ्गलयोजनदेवताभ्यः अष्टावाहुतयः । इन्द्राय स्वाहा
इदमिन्द्राय । पर्जन्याय स्वाहा इदं पर्जन्याय । अश्विभ्यां स्वाहा इदमश्विभ्याम् । मरुद्भ्यः स्वाहा इदं मरुद्भ्यः। उदलाकाश्यपाय
स्वाहा इदमुदलाकाश्यपाय। स्वातिकार्यै स्वाहा इदं० । सीतायै स्वाहा इदं१। अनुमत्यै स्वाहा इदमनुमत्यै। प्रकृताऽप्रकृतयोरुभयोः
स्विष्टकृत् । अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते। एताश्च देवताः सीतायज्ञे चेत्यातिदेशादत्र प्रधानचरुहोमानन्तरं तद्धोमः
प्रधानचरुवलिदानानन्तरं वलिदानं च । **मन्त्र....केषां**–एकेषां मते मन्त्रवत् स्वाहाकाररहितं प्रदानं देवतोद्देश्यकं प्रदानम्,
तत्र हेतुमाह–**स्वाहा....श्रुतेः**–"वषट्कारेण वा स्वाहाकारेण वा" इत्यादौ वषट्कारसहभावः प्रतीयते, प्रकृते च वषट्का-
रव्यतिरेकस्य स्वसहभूतस्वाहाव्यतिरेकव्याप्तत्वान्मन्त्रवत्प्रदानमिति प्राप्ते आह—**विनिवृत्तिः**–मन्त्रवत्प्रदानस्येति शेषः ।
"उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतयः" इत्युक्तत्वात्पक्षादिप्रभृतीनां जुहोतित्वात्स्वाहाकारेण होम इत्यर्थः । महाव्याहृ-
त्यादिदक्षिणादानान्तं स्विष्टकृदन्ते । **स्तर....रति**–स्तरणावशिष्टकुशान् क्षेत्रस्य प्रतिदिशमास्तीर्य तेषु सीतागोप्तृभ्यो
वलिदानं संस्कृतेन च प्रकृतचरुणा । **पुरस्ता.....मीमांसेति** । **प्रकृ...र्ववत्**–लाङ्गलयोजनवत् प्राक्संस्थमुदक्संस्थं वा
वलिकर्म वलिदानम् । तद्यथा–इन्द्राय नमः, पर्जन्याय नमः, अश्विभ्यां नमः, मरुद्भ्यो नमः, उदलाकाश्यपाय नमः, स्वाति-
कार्यै नमः, सीतायै नमः, अनुमत्यै नमः, यथादेवतं त्यागाः । **स्त्रि....त्वात्**–वृद्धाः स्त्रियो गृह्याः इन्द्रादीन् वलिपटलकेनो-
पयेजरन् । बलिपटलकं च वैणवपात्राधिकरणकं कुल्माषोदनम् । कुत आचरितत्वात् । प्राचीनस्त्रीभिर्लाङ्गलयोजनदेवताभ्य
इन्द्रादिभ्यो वलिदानस्याचारितत्वादित्यर्थः । ततः संस्रवप्राशनाद्युपयमनप्रक्षेपान्तम् । **सꣳस्थि....येत्**–दश ब्राह्मणान्
भोजयेत् "दश" इति **परिशिष्टात्** । काण्डसमाप्तिसूचिका द्विरुक्तिः । ततो वैश्वदेवः ॥ १७ ॥

इति श्रीपण्डितनृसिंहात्मजपण्डितविश्वनाथकृतायां गृह्यसूत्रव्याख्यायां द्वितीयकाण्डम् ॥ २ ॥

इति भाष्यपञ्चकभूषितपारस्करगृह्यसूत्रस्य द्वितीयं काण्डं समाप्तम् ।

श्रीः ।

पारस्करगृह्यसूत्रम् ।

(कर्क-जयराम-हरिहर-विश्वनाथविरचित-)
भाष्यचतुष्टयभूषितम् ।

(२६५)

तृतीयं काण्डम् ।

अनाहिताग्नेर्नवप्राशनम् ॥ १ ॥ नवꣳ स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोति । शतायुधाय शतवीर्याय शतोतये अभिमातिषाहे । शतं यो नः शरदोऽजीजानिन्द्रो नेषदति दुरितानि विश्वा स्वाहा ॥ ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति । तेषां योऽज्यानिमजीजिमावहात्तस्मै नो देवाः परिधत्तेह सर्वे स्वाहेति ॥ २ ॥ स्थालीपाकस्याग्रयणदेवताभ्यो हुत्वा जुहोति स्विष्टकृते च स्विष्टमग्ने अभि तत् पृणीहि विश्वाँश्च देवः पृतना अविष्यत् । सुगं तु पन्थां प्रदिशन्न एहि ज्योतिष्मद्धेह्यजरन्न आयुः स्वाहेति ॥ ३ ॥ अथ प्राश्नाति । अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः । भद्रान्नः श्रेयः समनैष्ट देवास्त्वयाऽवशेन समशीमहि त्वा । स नो मयोऽभूः पितो आविशस्व शन्तोकाय तनुवे स्योन इति ॥ ४ ॥ अन्नपतीयया वा ॥ ५ ॥ अथ यवानामेतमुत्यं मधुना संयुतम् ॥ यवꣳ सरस्वत्या अधिवनाय चकृषुः । इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इति ॥ ६ ॥ ततो ब्राह्मणभोजनम् ॥ ७ ॥ ॥ १ ॥

कर्कः—अनाहिताग्नेर्नवप्राशनम्—व्याख्यास्यत इति सूत्रशेषः । अनाहिताग्निरवैतानिकः । नवप्राशनमिति कर्मणो नामधेयम् । अन्वर्थसञ्ज्ञाकरणाच्च कृत्वैतत् नवं प्राश्यते नाकृत्वा । न चैतदाग्रयणशब्दवाच्यम्, अतः पौर्णमास्याममावास्यायामिति नियमो न भवति । औचित्याच्छरद्वसन्तौ तु भवतः । नवꣳ स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोति शतायुधायेति—द्वे प्रतिमन्त्रम् । स्थालीपाकस्याग्रयणदेवताभ्यो हुत्वा जुहोति स्विष्टकृते च स्विष्टमग्ने—इति । अतश्च स्विष्टकृद्धोमस्य पूर्वं पश्चाच्च स्विष्टमग्ने इत्याज्याहुतिहोमः । ततो महाव्याहृत्यादि । अथ प्राश्नाति अग्निः प्रथमः प्राश्नात्विति—अनेन मन्त्रेण । यत्र हुतशेषप्राशनं तत्रायं गुणविधिः । अन्नपतीयया वा—प्राशनं कर्त्तव्यम् । अन्नपतिशब्दो यस्यां विद्यते सेयमन्नपतीया छप्रत्ययं ह्यत्र स्मरन्ति । अत्र यवानां प्राशने मन्त्रमाह—एतमुत्यमिति । ततो ब्राह्मणभोजनम् ॥ १ ॥ * ॥

जय०–अनाहिताग्नेर्नवप्राशनम्–वक्ष्यत इति सूत्रशेषः। अनाहिताग्निरवैतानिक औपासनिक इति पर्यायः। तस्य नवप्राशनमिति कर्मणो नामधेयम् । अन्वर्थसञ्ज्ञाकरणात् कृत्वैतत् नवमन्नं प्राश्यते नाकृत्वा । नन्वत्र किं नवमात्रं प्रतिषिद्धम्, उत कतिपयानीत्याशङ्क्य श्यामाकव्रीहियवानामेव नियमो नान्येषाम् । यथाह **गृह्यसंग्रहकारः**–" नवयज्ञाधिकारस्थाः श्यामाका व्रीहयो यवाः । नाश्नीयात्तानहुत्वैवमन्येष्वनियमः स्मृतः ।। ऐक्षवः सर्वशुङ्गाश्च नीवाराश्चणकास्तिलाः । अकृताग्रयणोऽश्नीयान्नैषामुक्ता हविर्गुणाः" इति । यत्तु श्रूयते नवमात्रप्रतिषेधस्तदाहिताग्निविषयः । शरद्वसन्तयोरेव तद्भवति औचित्यात् । न चात्र पौर्णमास्यादिकालनियमः । अनाग्रयणत्वात् । **नवꣳ स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वा आज्याहुती**–द्वे, **शतायुधायेति** द्वाभ्यां मन्त्राभ्यां प्रतिमन्त्रम् । अथ मन्त्रार्थः । तत्र द्वयोः प्रजापतिस्त्रिष्टुप् आद्यस्येन्द्रोऽपरस्य विश्वेदेवा आज्यहोमे० । स इन्द्रः नोऽस्मान् शतं शरदो वर्षाणि अजीजान् जीवयतु । यद्वा नोऽस्मभ्यं धान्यं जनयतु, तत्र न इति तन्त्रम्। तेन नोऽस्माकं दुरितानि दुर्व्यसनानि पापानि वा विश्वा विश्वानि सर्वाणि अतिनेषत् अतिनेष्यति । तस्मै स्वाहा सुहुतमस्तु । किम्भूताय शतायुधाय शतमपरिमितान्यायुधानि यस्य तस्मै । तथा शतवीर्याय अपरिमितशक्तये। तथा शतोतये अनन्तलीलाय । तथा अभिमातिषाहे अभिमातयः अरातयः तान्सहते जयतीत्यभिमातिषाट् तस्मै । हे सर्वे देवाः ये चत्वारः पथयः पन्थानः देवपितृमनुष्यसर्पाणां मार्गाः देवयाना देवनं क्रीडां सम्पादयन्तः देवादिभिर्गम्यमाना वां । अन्तरा द्यावापृथिवी । द्यावापृथिव्योर्मध्यस्थाः । पृथ्वीशब्देनात्र पृथ्वीतलं लक्ष्यते । वियन्ति वियत्तुल्याः । अतिनिर्मला इत्यर्थः । यद्वा विविधत्वं यन्ति भिन्नत्वेनेत्यर्थः । तेषां चतुर्णां पथां मध्ये यः पन्था अजीजिम् अजेयत्वं परैरनभिभवनमिति यावत् । आवहात् आवहेत् प्रापयेत् । तस्मै पथे नोऽस्मान् परिधत्त परिदत्त समर्पयतेत्यर्थः। तं पन्थानम् अस्मा न् प्रापयतेत्यर्थः । इह अस्मिन्कर्मणि कृते सति अनेन कर्मणा प्रतोषं प्राप्येत्यर्थः। किम्भूतामजीजिम्। अज्यानिं ज्यानिर्ग्लानिः हानिर्वा, तद्रहिताम्। क्षेमेणाभीष्टपदप्राप्तिहेतुमित्यर्थः। युष्मभ्यं स्वाहेत्युक्तार्थम् । ततश्च स्थालीपाकेनाग्रयणदेवताभ्य इन्द्राग्नी, विश्वेदेवा, द्यावापृथिवी इत्येताभ्यो हुत्वा जुहोत्याज्याहुतिं **स्विष्टमग्न** इति वक्ष्यमाणमन्त्रेण । **स्विष्टकृते चेति** स्थालीपाकात्स्विष्टकृद्धोमं विधाय चकारात्पुनरप्याज्याहुतिं **स्विष्टमग्न** इत्यनेनैव मन्त्रेण पूर्ववज्जुहोति **स्विष्टमग्न** इति मन्त्रण स्विष्टकृद्धोमस्योभयत आज्याहुती भवत इत्यर्थः । स्विष्टमग्न इत्यस्यार्थः । तत्र प्रजापतिर्विराडग्निराज्यहोमे० । हे अग्ने प्रजापते यत् स्विष्टं स्विष्टकृते हुतं तत् अभि अभितः उभयत आदावन्ते च पृणीहि पूर्णं कुरु । देवः प्रकाशात्मा भवान् विश्वान् सकलपरिवारयुतान् अस्मान् अविष्यत् अवतु। किम्भूतान् । पृतनाः सेनाः तद्वत्परिचारकानित्यर्थः । यद्वा-पृतना इति पञ्चम्यर्थे प्रथमा । तेन पृतनाभ्यः शत्रुसेनाभ्योऽस्मानवत्विति । किंच नोऽस्माकं सुगं सुगम्यम् अर्चिरादिरूपं पन्थां पन्थानं प्रदिशन् ददद्देव एहि आगच्छ । नु एवार्थे । किंच नोऽस्मभ्यं ज्योतिष्मत् प्रकाशयुक्तं कीर्तियुक्तमित्यर्थः । अजरं जरा रोगाद्युपद्रवः तद्रहितमायुर्द्धेहि चिन्तय । आशंसेत्यर्थः । यद्वा--ध्येहि धेहि देहीत्यर्थः । तदा यकारोऽनर्थकः । तुभ्यं स्वाहेति । अथ महाव्याहृतिहोमानन्तरं प्राश्नाति संस्रवम्, **अग्निः प्रथम** इत्यादि **तन्मे स्योनः** इत्यन्तेन ऋग्द्वयात्मकेन मन्त्रेण । अस्यार्थः । तत्र प्रजापतिः, क्रमेणानुष्टुप्त्रिष्टुभौ, जाठरोऽग्निः संस्रवप्राशने विनियोगः । इदं हविरग्निर्जाठरः प्रथमो मुख्यः अश्नातु भुनक्तु । स एवाग्निः हि यतः यथा यादृशं पावनं पोषणं चेदं हविर्वेद जानाति । अतोऽस्मभ्यमोषधीर्ग्राम्या आरण्याश्च शिवाः सुखकरीः कृणोतु करोतु । किम्भूतः विश्वचर्षणिः सर्वधान्याधिपः। हे देवाः इन्द्रादयः यूयं नोऽस्मान् प्रति श्रेयः एवं नवान्नप्राशनभवमारोग्यं समनैष्ट सम्यक् प्रापयत । किम्भूतात् भद्रान् भन्दनीयान् युष्मत्प्रसादेन नवान्नप्राशनार्हान् ।

किंच हे पितो अन्नव्रीहे वयं त्वत्प्रसादप्राप्तसामर्थ्यास्त्वा त्वां समशीमहि सम्यक् संस्कृतमेव अशीमहि अश्नाम । केन साधनेन त्वया अनुग्राहकेण । त्वत्प्रसाद एव तत्र कारणमित्यर्थः । किम्भूतेन त्वया अवशेन पाथेयेन शम्बलेनेत्यर्थः । किञ्च हे पितो अन्न स त्वमस्माभिरेवं विधिना प्राशितः सन् नोऽस्मान् आविशस्व बलादिहेतुत्वेनास्मत्कुक्षिं प्रविशस्व । किंच मयोऽभूः मयः सुखं तद्रूपोऽभूः भव । तथा शं कल्याणाय । शमित्यव्ययम् । तथा तोकाय अपत्याय । तथा तनुवे शरीरावयवपालनाय । स्योनः परिणामेन सुखकरः सेवनीयो वा अभूर्भव । यत्र च हुतशेषप्राशनं तत्रायं गुणविधिः । **अन्नपतीयया वा–अन्नपतेऽन्नस्य नो देही**त्यनयर्चा वा प्राशनं कार्यम् । अन्नपतिशब्दो विद्यते यस्यां सेयमन्नपतीया छप्रत्ययमत्र स्मरन्ति । तत्र परमेष्ठी, बृहती, लिङ्गोक्ता, समिदाहुतौ० । याद‍ृच्छिकोऽयं विकल्पः । अपरे त्वाहुः–वाशब्दश्चकारार्थे, अतः समुच्चय इति । अथ यवानां प्राशने मन्त्रविशेषः उच्यते–**एतमिति** । तत्र प्रजापतिर्जगती इन्द्रो यवान्नप्राशने० । उ एवार्थे । एतम् एतत् प्रत्यक्षम्, त्यं त्यत् परोक्षम् अन्नम् । "यु मिश्रणामिश्रणयोः" यौति लीयतेऽस्मिन्निति यवः परमात्मा, तत्प्राप्तिसाधनत्वादयमपि यवः, तं यवं मरुतो देवविशेषाः । सरस्वत्याः–सर इत्युदकनाम, तद्वत्याः नद्याः अधिवनाय उपरि वनेषु केदारेषु चकृषुः कृष्टवन्तः । यद्वा–सरोऽस्यामस्तीति सरस्वती पृथिवी, तस्या अधि उपरि वनाय सम्भजनाय । "वन सम्भक्तौ" । पञ्चमहायज्ञाद्यर्थमित्यर्थः । किम्भूतं मधुना मधुरसेन संयुक्तं संसक्तम् । अथवा एतं त्वम्पदार्थं जीवम् । त्यम् तत्पदार्थं परं ब्रह्म, तत् यवं मिश्रीभूतमेकत्वमापन्नं कर्मभूमौ वनाय अतन्निरसनाय चकृषुः आकृष्टवन्तः उपाददुरित्यर्थः । तत्साधनत्वेन प्रथममिदमपि कर्म चक्रुरिति विवक्षितम् । तत्किमित्यत आह–यत इन्द्रः शतक्रतुः अतः सीरस्य लाङ्गलस्य पतिरासीत् बभूव । मरुतश्च कीनाशाः कृषीवलाः कर्षका इत्यर्थः । सुदानवः शोभनस्य भोगादेर्दानवः दातारः आसन् बभूवुः । तदनेन यवोत्पत्तिः प्रशस्यते ॥ १ ॥ * ॥

हरि०–**अनाहिताग्नेर्नवप्राशनम्**–अनाहिताग्निरावसथिकः, तस्य नवान्नप्राशनाख्यं कर्म व्याख्यास्यत इति सूत्रशेषः । नवप्राशनमिति सञ्ज्ञाऽन्वर्था, ततश्चैतत्कृत्वा नवं प्राश्यते नाकृत्वा । अत्र किं नवमात्रनिषेधः, उत कतिपयानामित्यपेक्षिते **गृह्यसंग्रहकारः**–"नवयज्ञाधिकारस्थाः श्यामाका व्रीहयो यवाः । नाश्नीयात्तानहुत्वैवमन्येष्वनियमः स्मृतः ॥ ऐक्षवः सर्वशुङ्गाश्च नीवाराश्चणकास्तिलाः । अकृताग्रयणोऽश्नीयात्तेषां नोक्ता हविर्गुणाः" इति । न चास्याग्रयणशब्दवाच्यता । तेन पौर्णमास्याममावस्यायामिति नियमो नास्ति । व्रीहियवपाकोचितत्वात् शरद्वसन्तावाद्रियेते । **नवꣳ स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुती जुहोति । शतायुधायेति**–नवं शरदि नूतनं व्रीहिमयं, वसन्ते नूतनं यवमयं स्थालीपाकं चरुं पक्त्वाऽऽज्यभागयोरन्ते **शतायुधायेति ये चत्वार** इत्येताभ्यां प्रतिमन्त्रं द्वे आज्याहुती जुहोति । **स्थालीपाकस्याग्रयणदेवताभ्यो हुत्वा जुहोति स्विष्टकृते च स्विष्टमग्न इति**–अथ स्थालीपाकस्य आग्रयणदेवताभ्य इन्द्राग्नी, विश्वेदेवाः द्यावापृथिवी इत्येताभ्यः प्रत्येकमेकैकामाहुतिं हुत्वा **स्विष्टमग्न** इत्यनेन मन्त्रेण स्विष्टकृद्धोमात्पूर्वं चकारात् पश्चाच्चाज्याहुतिं जुहोति । मध्ये स्थालीपाकेन सौविष्टकृतम् । ततो महाव्याहृत्यादिप्राजापत्यान्ते । **अथ प्राश्नात्यग्निः प्रथम इति**–अनेन संस्रवं प्राश्नाति । अत्र हुतशेषप्राशने गुणविधिरयं मन्त्रेण । **अन्नपतीयया वा**–अन्नपतिरिति अन्नं पतिर्देवता यस्याः सा अन्नपतीया ऋक् तया अन्नपतीयया ऋचा **अन्नपतेऽन्नस्ये**त्यादिकया वा विकल्पेन प्राश्नाति । यद्वा अन्नपतिशब्दो यस्यामृचि अस्ति साऽन्नपतीया । **अथ यवानामेतमुत्यमिति**–अथ व्रीहिप्राशनमन्त्राभिधानानन्तरं यवानां प्राशने

मन्त्रमाह **एतमुत्यामित्यादि सुदानव** इत्यन्तं मन्त्रम् ।(यवप्राशने **पैठीनसिः** । " अग्निमेवोपासीत नान्यैदवतम् । अग्निर्भूम्यामिति विज्ञायते न प्रवसेत् यदि प्रवसेदुक्तमुपस्थानं यजमानस्य प्राशितमग्नौ जुहुयात् । नवेष्टयामेवौपासनिकस्य ।'') **ततो ब्राह्मणभोजनम्** । इति सूत्रार्थः ॥ १ ॥

अथ **प्रयोगः** । तत्र शरदि वसन्ते च अनाहिताग्नेर्नवप्राशनं कर्म भवति । तत्र प्रथमप्रयोगे मातृपूजाऽऽभ्युदयिके विदध्यात् । आवसथ्याग्नौ ब्रह्मोपवेशनादिप्राशनान्ते विशेषः । नवस्थालीपाकं श्रपयित्वा आज्यभागानन्तरमाज्याहुतिद्वयं जुहोति । तद्यथा—"शतायुधाय शतवीर्याय शतोतये अभिमातिषाहे । शतं यो नः शरदोऽजीजानिन्द्रो नेषदति दुरितानि विश्वा स्वाहा " इदमिन्द्राय०"ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति । तेषां योऽज्यानिमजीजिमावहात्तस्मै नो देवाः परिधत्तेह सर्वे स्वाहा" इदꣳ सर्वेभ्यो देवेभ्यो० । इन्द्राग्नी, विश्वेदेवाः द्यावापृथिवी स्थालीपाकेनाग्रयणदेवताः । इन्द्राग्निभ्याꣳ स्वाहा इदमिन्द्राग्निभ्यां० । उपांशु । विश्वेभ्यो देवेभ्यः स्वाहा इदं विश्वेभ्यो देवेभ्यो० । उपांशु । द्यावापृथिवीभ्याꣳ स्वाहा इदं द्यावापृथिवीभ्यां० । इति तिस्र आहुतीर्हुत्वा " स्विष्टमग्ने अभितत् प्रणीहि विश्वाँश्च देवः पृतना अविष्यत् । सुगं नु पन्थां प्रदिशन्न एहि ज्योतिष्मद्धयेह्यजरन्न आयुः स्वाहा" इत्यनेन मन्त्रेण आज्याहुतिं जुहोति । " इदमग्नये " इति त्यागः । ततः स्थालीपाकात् " अग्नये स्विष्टकृते स्वाहा " इति हुत्वा त्यक्त्वा च पुनः **स्विष्टमग्न** इत्यादिनाऽऽज्याहुतिं जुहोति । " इदमग्नये " इति त्यागः । ततो महाव्याहृत्यादि प्राजापत्यहोमान्तं कृत्वा । " अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः । भद्रान्नः श्रेयः समनैष्ट देवास्त्वयाऽवशेन समशीमहि त्वा । स नो मयोऽभूः पितो आविशस्व शं तोकाय तनुवे स्योनः" इत्यनेन मन्त्रेण संस्रवं प्राश्नाति । **अन्नपतेऽन्नस्य नो देही**त्यनयर्चा वा प्राश्नाति । यवान्नप्राशने तु " एतमुत्यं मधुना संयुतम् । यवꣳ सरस्वत्या अधिवनाय चकृषुः इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानवः " इत्यनेन यवसंस्रवं प्राश्नाति । ततो ब्राह्मणभोजनमिति ॥ १ ॥ ॥ * ॥

विश्व०-अना....शनम्-न आहिता अग्नयो गार्हपत्यादयो येनासौ कृतावसथ्यः । तस्य नवस्यासन्नसमयोत्पन्नस्य प्राशनं प्रोच्यत इति सूत्रशेषः । तच्च शरद्वसन्तयोः—"यस्मिन्नाग्रयणं कुर्याद्दतौ तदनुसंभवम् । धान्यं तन्नवमित्याहुरर्वात्पक्वं पुरातनम् ॥ प्रावृट्कालात्परं पक्वं शरदाग्रयणे नवम् । ऊर्ध्वं वसन्तान्निष्पन्नं वसन्ताग्रयणे नवम् ॥ व्रीहियागस्य याः काले पक्वा व्रैहेण संस्कृताः । शेषा यावेन यागेन यदि यागात्पुरा क्वचित् ॥ ओषधिं भक्षयेत्कांचित्तत्र वैश्वानरः स्मृतः" । तथा च "व्रीह्युत्पत्तिसमानकालोत्पन्नौषधिभक्षणाधिकारो व्रीह्याग्रयणेन।यवोत्पत्तिसमानसमयोत्पन्नौषधिभक्षणाधिकारो यवाग्रयणेन" इति **श्रीअनन्तयाज्ञिकाः**। तथा—"मनुष्यैरुपजीव्यानां पशुभिश्च यथायथम् । तृणगुल्मलतापुष्पपत्रादेरप्यभक्षणम्" **याज्ञिक**मते तन्मते प्रियङ्गुकोद्रवादेरप्यभक्षणम्। एवं चाग्रयणमकृत्वा नवान्नमग्नौ न होतव्यम् । ब्राह्मणेभ्योऽपि न देयम् । **आथर्वणे** होमनिषेधात् । तथाहि—"अथ योऽहुत्वा नवान्नं प्राश्नीयादग्नौ वा गमयेत्का तत्र प्रायश्चित्तिः सोऽग्नये व्रतपतये चरुं निर्वपेत्' इति । ब्राह्मणेभ्यो दाननिषेधः । **श्राद्धकल्पे**—अयं च दम्पत्योः समो निषेधः । केचित्तु व्रीहियवयोरेव यागसाधनतया तयोरेव भक्षणं निषिद्धमाहुः । "यागो न क्रियते यैस्तु गोधूमैर्माषकोद्रवैः । तेषामिह भवेदेतत्प्राशनं केचिदब्रुवन् ॥ नवशब्दस्य सामर्थ्यात्सामान्येन मतं त्विदम् । वाक्यशेषाविरोधाच्च यदेतन्न मतं मम ॥ आसन्नो यजमानश्च देवानामेष पठ्यते । तस्मादन्नमदन्त्यस्य यवव्रीह्यादिकं मखे॥ तस्मात्तदेव वर्ज्यं स्यादन्यत्कामं तु भक्षयेत्" इति । अस्यातिक्रमेऽग्नये वैश्वानराय चरुर्भवति । अत्रापि प्रथमप्रयोगे मातृपूजाऽऽभ्युदयिके भवतः । अन्वारम्भणीयदेवताकश्चरुश्च भवति । अनुष्ठानं च व्रीहेः शरदन्तर्गतपौर्णमास्यमावास्यायां, यावस्य तु वसन्तान्तर्गतायामिति । अग्न्योत्पन्नयोर्व्रीहियवयोर्होमहेतुत्वायतनत्वे अप्याग्रयणपदवाच्यता नास्तीत्येतद्रिक्तं वचः । अनाग्रयणस्य च पर्वाननुष्ठानमेतदपि बाललालनम् । "न विपक्षे क्रियाः स्युः समभिव्याहारात्" इत्येतस्य साधारण्यादिति । कथं कुर्यादत आह—**नव...वें स्वाहेति**-प्रथमप्रयोगे मातृपूजाऽऽभ्युदयिके कृत्वा पूर्ववदन्वारम्भणीयेष्टिदेवताकं चरुं हुत्वा पर्वादिने पुण्येऽह्नि वा व्रीहियवयोरन्यतरेण स्थालीपाकं परिभाषोक्तविधिना श्रपयित्वा पक्त्वाऽऽज्यभगानन्तरं **शतायुधाये**ति द्वाभ्यां मन्त्राभ्यां द्वे आज्याहुती जुहोति तत्र विशेषः । इन्द्राग्निभ्यां, विश्वेभ्यो देवेभ्यो, द्यावापृथिवीभ्यां जुष्टमिति ग्रहणे । प्रोक्षणे त्वाशब्दोऽधिकः । इदमिन्द्रा-

येत्याद्यायाः । इदं सर्वेभ्यो देवेभ्य इति द्वितीयस्याः । **स्थाली...यु: स्वाहेति-शतायुधाये**त्येतदाहुतिद्वयानन्तरं **स्थालीपाकेन** आग्रयणस्य देवता इन्द्राग्नी,विश्वेदेवा, द्यावापृथिव्यः ताभ्यः इन्द्राग्निभ्यां स्वाहा इदमिन्द्राग्निभ्याम्। विश्वेभ्यो देवेभ्यः स्वाहा इदं विश्वेभ्यो देवेभ्यः । द्यावापृथिवीभ्याꣳ स्वाहा इदं द्यावापृथिवीभ्याम । एवं ताभ्यो हुत्वा **स्विष्टमग्न** इति मन्त्रेणाज्याहुतिं जुहोति, ततः स्थालीपाकात्स्विष्टकृते स्वाहेति हुत्वा त्यक्त्वा पुनः **स्विष्टमग्न** इति मन्त्रेणाज्याहुतिं चकाराज्जुहोतीत्यर्थः । स्विष्टकृद्धोमस्योभयत आज्याहुती भवत इत्यर्थः । **अथप्रा...यया वा**—ततो महाव्याहृत्यादि-प्राजापत्यान्ते नवाहुत्यनन्तरं संस्रवं **प्राश्नात्यग्निः प्रथमः प्राश्नात्वि**ति ऋग्भ्यां मन्त्रेण **शन्तोकाय तनुवे स्योन** इत्यन्तेन । वा अथवा अन्नपतिशब्दो विद्यते यस्यां सेयमन्नपतीया तया **अन्नपतेऽन्नस्य नो** देहीत्यनयर्चा । प्राशनं संस्रवस्य । **अथ य...नव इति**—यवाग्रयणे तु **एतमुत्यं मधुना संयुत**मिति मन्त्रेण **सुदानव** इत्यन्तेन यवानां संस्रवं प्राश्नातीत्यर्थः । श्यामाकाग्रयणे तु तूष्णीं प्राशनम् । "सोमाय जुष्टं गृह्णामि" इति ग्रहणे । प्रोक्षणे त्वाशब्दः । "सोमाय स्वाहा" इति स्थालीपाकहोमः । यथादेवतं त्यागः । अन्यद्व्रीह्याग्रयणवत् । केचित्तु आज्यभागोत्तरमाज्याहुतिद्वयं स्विष्टकृद्धोमात्प्रागुत्तरमाज्याहुतिद्वयमेवमाहुतिचतुष्टयं नेच्छान्ति । **ततो ब्राह्मणभोजनम्**—बर्हिर्होमादिकर्मापवर्गान्ते दश पञ्च वा ब्राह्मणान्भोजयेदित्यर्थः । ततो वैश्वदेवः ॥ इति तृतीयकाण्डस्य प्रथमा कण्डिका ॥ १ ॥ * ॥

मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म ॥ १ ॥ स्थालीपाकꣳ श्रपयित्वा श्रवणावदाज्याहुती हुत्वाऽपरा जुहोति । यां जनाः प्रतिनन्दन्ति रात्रीन्धेनुमिवायतीम् । संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा । संवत्सरस्य प्रतिमा या ताꣳ रात्रीमुपास्महे । प्रजाꣳ सुवीर्यां कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा । संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय कृणुते बृहन्नमः । तेषां वयꣳ सुमतौ यज्ञियानां ज्योग्जीता अहताः स्याम स्वाहा । ग्रीष्मो हेमन्त उत नो वसन्तः शिवा वर्षा अभया शरन्नः । तेषामृतूनाꣳ शतशारदानां निवात एषामभये वसेम स्वाहेति ॥ २ ॥ स्थालीपाकस्य जुहोति । सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्यै हेमन्ताय चेति ॥ ३ ॥ प्राशनान्ते सक्तुशेषꣳ शूर्पे न्युप्योपनिष्क्रमणप्रभृत्यामार्जनात् ॥ ४ ॥ मार्जनान्त उत्सृष्टो बलिरित्याह ॥ ५ ॥ पश्चादग्नेः स्रस्तरमास्तीर्याऽहतं च वास आप्लुता अहतवाससः प्रत्यवरोहन्ति दक्षिणतः स्वामी जायोत्तरा यथाकनिष्ठमुत्तरतः ॥ ६ ॥ दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रꣳ शमीशाखासीतालोष्ठाश्मनो निधायाग्निमीक्षमाणो जपति । अयमग्निर्वीरतमोऽयं भगवत्तमः सहस्रसातमः ॥ सुवीर्योऽयꣳ श्रैष्ठ्ये दधातु नाविति ॥ ७ ॥ पश्चादग्नेः प्राञ्चमञ्जलिं करोति ॥ ८ ॥ दैवीं नावमिति तिसृभिः स्रस्तरमारोहन्ति ॥ ९ ॥ ब्रह्माणमामन्त्रयते ब्रह्मन्प्रत्यवरोहामेति ॥ १० ॥ ब्रह्मानुज्ञाताः प्रत्यवरोहन्ति आयुष्कीर्तिर्यशो बलमन्नाद्यं प्रजामिति ॥ ११ ॥ उपेता जपन्ति । सुहेमन्तः सुवसन्तः सुग्रीष्मः प्रतिधीयतान्नः ॥ शिवा नो वर्षाः सन्तु शरदः सन्तु नः शिवा इति ॥ १२ ॥ स्योना पृथिवि नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशन्ति ॥ १३ ॥ उपोद्युतिष्ठन्ति उदायुषा स्वायुषोत्पर्जन्यस्य वृष्ट्या पृथिव्याः सप्तधामभिरिति ॥ १४ ॥ एवं द्विरपरं ब्रह्मानुज्ञाताः ॥ १५ ॥ अधः शयीरंश्चतुरो मासान्यथेष्टं वा ॥ १६ ॥ ॥ २ ॥ ॥ * ॥

कर्कः—मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म-कर्तव्यमिति शेषः । स्थालीपाकꣳ श्रपयित्वा श्रवणावदाज्याहुती हुत्वाऽपरा जुहोति-श्रवणाकर्मवदाज्याहुतिद्वयं हुत्वा ततोऽपरा जुहोति । यां जनाः प्रतिनन्दन्ति-एवमाद्याः । स्थालीपाकस्य जुहोति सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्यै हेमन्ताय चेति-ततः स्विष्टकृदादि । प्राशनान्ते सक्तुशेषꣳ शूर्पे न्युप्योपनिष्क्रमणप्रभृत्यामार्जनात्-श्रवणाकर्मवत्कर्म भवति । मार्जनान्त उत्सृष्टो बलिरित्येवमाह-परिसमाप्तमाग्रहायणीकर्म । इदमन्यत्कर्मान्तरम् । पश्चादग्नेः स्रस्तरमास्तीर्याहतं च वास आप्लुता अहतवाससः प्रत्यवरोहन्ति-अग्निमपरेण तृणैः स्रस्तरमास्तीर्य तदुपर्यहतं च वासः आप्लुताः स्नाता अहतवाससोऽनुस्रस्तरं प्रत्यवरोहन्ति । तेषां च प्रत्यवरोहतां दक्षिणतः स्वामी भवति । जाया चोत्तरा यथाकनिष्ठमुत्तरतोऽपत्यानि । दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रꣳ शमीशाखासीतालोष्ठाश्मनो निधायाग्निमीक्षमाणो जपति अयमग्निर्वीरतमोऽयमिति-गृहपतिः । पश्चादग्नेः प्राञ्चमञ्जलिं करोति । दैवीं नावमिति तिसृभिः स्रस्तरमारोहन्ति-साम्प्रतम् । तत्र । ब्रह्माणमामन्त्रयते ब्रह्मन्प्रत्यवरोहामेति-प्रत्यवरोहध्वमिति । ब्रह्मानुज्ञाताः प्रत्यवरोहन्ति-स्रस्तरम् । आयुष्कीर्त्तिर्यशो बलमिति-अनेन मन्त्रेण । उपेता जपन्ति सुहेमन्त इति-ये उपेतास्ते जपन्ति सुहेमन्त इत्यमुं मन्त्रम् । स्योना पृथिवि नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशन्ति-स्रस्तरम् । उपोत्थितिष्ठन्त्युदायुषा स्वायुषेति-अनेन मन्त्रेण स्रस्तरात् । एवं द्विरपरं ब्रह्मानुज्ञाताः स्रस्तरमारोहन्ति । अधः शयीरꣳश्चतुरो मासान्यथेष्टं वा ॥ २ ॥ * ॥

जय०— मार्गशीर्ष्यां शुक्लपञ्चदश्याम्, आग्रहायणीकर्म कर्तव्यमिति सूत्रशेषः । तत्कथम् । **स्थालीपाकमिति**— स्थालीपाकश्रपणमाज्यभागहोमोपलक्षणम् । तेनाज्यभागानन्तरम् आज्येन "अपश्वेतपदा, न वै श्वेतस्य" इति मन्त्राभ्यामाहुतिद्वयं श्रवणाकर्मणि यथा तथाऽत्रापि हुत्वा अपराश्चतस्रो जुहोति । "यां जनाः" इत्येवमादि वक्ष्यमाणमन्त्रैः प्रतिमन्त्रम् । अथ मन्त्रार्थः । तत्र **यां जना** इति द्वयोः प्रजापतिरनुष्टुप् रात्रिराज्यहोमे० । तत्र धेनुरूपेण तावद्रात्रिः प्रस्तूयते । यां रात्रीम् आयतीम् आगच्छन्तीम् जनाः सन्तः प्रतिनन्दन्ति प्रजाप्यायनदात्रीत्वेनादृत्य हृष्टाः समर्द्धयन्ति । वनादागच्छन्तीं धेनुमिव । या च रात्री संवत्सरस्य प्रजापतेः पत्नी यज्ञसंयोगभाग्योषा । "पत्युर्नो यज्ञसंयोगे" इति स्मरणात् । "संवत्सरो वै यज्ञः" इति **श्रुतेः** । धेनुपक्षे संवत्सरस्य पत्नीत्वं प्रजापालयित्रीत्वेन । स्वाहेत्युक्तार्थम् । सा रात्रिर्नोऽस्माकं सुमङ्गली शोभनकल्याणकर्त्री अस्तु भूयात् ॥ १ ॥ या रात्री संवत्सरस्य प्रतिमा आकृतिर्जायेति यावत् । "अर्द्धो वा एष आत्मनो यज्जाया" इति **श्रुतेः** । अहोरात्रे हि संवत्सरस्य शरीरम्, तद्भावभावात् । तां रात्रीमुपास्महे आराधयामः । तत्फलमाह—प्रजां पुत्रादिरूपाम् । सुवीर्यां शोभनैश्वर्याम् । दीर्घमखण्डितमायुश्च व्यश्नवै प्राप्नवानि । स्वाहेत्युक्तार्थम् ॥ २ ॥ **संवत्सरायेति**—द्वयोर्विराट्ऋषिः त्रिष्टुप् प्रथमस्य संवत्सरादिपञ्चदेवता द्वितीयस्यार्तव आज्यहोमे० । हे स्तोतारः भवन्तो याभ्यः संवत्सरादिसञ्ज्ञिकाभ्यः कालविशेषदेवताभ्यो बृहत् महत् यथा तथा नमः नमस्कारं कृणुते कुरुते हविः समर्पयन्तीत्यर्थः । तासां च प्रसादात्सुमतौ शोभ-

नबुद्धौ वर्तमाना वयं ज्योक् चिरं जीताः दोषाणां दुष्टानां च जेतारः अहताः अनुपहताः स्याम भवेमेति प्रार्थना । किम्भूतानां यज्ञियानां यज्ञार्हाणाम् ॥ ३ ॥ ग्रीष्मो हेमन्तः । उत अप्यर्थे । वसन्तोऽपि । नोऽस्माकं शिवाः कल्याणकृतो भवन्तु । तथा वर्षाः शिवाः सन्तु । शरच्च नोऽस्माकमभया नीरुक् अस्तु । ग्रीष्मादय ऋतवो वृषादिमासद्वयभुजः कालावयवाः । तेषां ग्रीष्माद्यधिष्ठातॄणां प्रसादात् वयम् एषां संवत्सरादीनां निवाते अनर्दितप्रदेशे आश्रये वा अभये निर्भये वसेम तिष्ठामेत्यपि प्रार्थना। किम्भूतानां शतशारदानां वर्षशतसम्बन्धिनाम् ॥ ४ ततः स्थालीपाकस्यावयवेन सोमादिभ्यश्चतुर्भ्यो नाममन्त्रैः प्रतिमन्त्रम् । ततः स्विष्टकृद्धोमः । **प्राशनान्ते सक्तुशेषं शूर्पे न्युप्य**—संस्थाप्य निष्क्रमणप्रभृति सक्तुभ्यो बलिदानविधिः सर्वोऽप्यामार्जनात् श्रवणाकर्मवद्भवति । मार्जनान्ते उत्सृष्टो बलिरित्येवमाह यजमानः । **समाप्तमिदमाग्रहायणीकर्म** । अथान्यत्कर्मान्तरम् । तत्राग्निमपरेण तृणैः स्रस्तरमास्तीर्य । तदुपर्यहतं च वास आस्तीर्य । आप्लुताः स्नाताः अहतवाससश्च सन्तः स्रस्तरं प्रत्यवरोहन्ति आरोहन्ति । तेषां च प्रत्यवरोहतां दक्षिणतः स्वामी यजमानः । जाया च पत्नी तदुत्तरतः । तदुत्तरतो यथाकनिष्ठमपत्यानि भवन्ति । उदपात्रादिनिधानं त्वदृष्टार्थम् । आदावग्निं पश्यन् गृहपतिर्जप**त्ययमग्निरि**त्यमुं मन्त्रम् । अस्यार्थः । तत्र प्रजापतिरनुष्टुप् अग्निस्तदुपस्थाने० । अयमावसथ्याग्निर्वीरतमः अचिन्त्यशक्तिः, भगवत्तमः ऐश्वर्यादिषड्गुणाश्रयोऽयम्, सहस्रं सहन्ते ददतीति सहस्रसाहः तेषु तमः नानार्थप्रदमुख्यः । सुवीर्यः शोभनमेव वीर्यं यस्य सोऽयं नौ आवां जायापती सपरिकरौ श्रैष्ठ्ये श्रेष्ठ कर्मणि दधातु स्थापयतु । ततोऽग्नेः पश्चाद्भागे स्थित्वा प्राञ्चं प्रागग्रम् अञ्जलिं करोति **दैवीं नावमि**त्यादितिसृभिर्ऋग्भिः । तासां क्रमेण प्रजापत्यश्विसरस्वत्य ऋषयः गायत्री छन्दः, अदितिर्द्यौर्मित्रावरुणौ च उपस्थाने० । एवमञ्जलिं विधाय आरोहन्ति सर्वे । तत्र विधानमाह—यजमानो **ब्रह्माणमामन्त्रयते ब्रह्मन्प्रत्यवरोहामेति**—मन्त्रेण पृच्छति । प्रत्यवरोहध्वमिति ब्रह्मणाऽनुज्ञाताः स्रस्तरमवरोहन्ति **आयुष्कीर्त्तिं यशो बलमन्नाद्यं प्रजामिति**— मन्त्रेण । तत्र आसुरी गायत्री लिङ्गोक्ता आरोहणे० । आयुरादि आरोहेम लभेमेति प्रार्थना । उपेता उपनीता जपन्ति **सुहेमन्त** इत्यमुं मन्त्रम् । तस्यार्थः । तत्राश्वलायनः पङ्क्तिर्ऋतवो जपे० । नोऽस्माकं सुशोभनो हेमन्तः प्रतिधीयतां सम्पद्यताम् । शिष्टं स्पष्टम् । **स्योना पृथिवी**ति दध्यङ्ङाथर्वणः गायत्री, पृथिवी शान्तिकरणे० । अनेन स्रस्तरे स्वपन्ति । तत उप युगपत् उदुतिष्ठन्ति । उः पादपूरणः । उत्तिष्ठन्ति **उदायुषे**ति मन्त्रेण । अस्यार्थः । तत्र गौतमो, गायत्री, अग्निरुत्थाने० । उदायुषा दीर्घायुषा । तथा त्वायुषा शोभनजीवितेन । उत् उत्कृष्टस्य पर्जन्यस्य वृष्ट्या । पृथिव्याः सप्तभिर्धामभिः श्रेष्ठस्थानैः सह भवामेति प्रार्थना । एवम् एवमेव समन्त्रकं द्विरपरं ब्रह्मानुज्ञाताः स्रस्तरारोहादि कुर्युः ॥ २ ॥ * ॥

हरि०—मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म—मार्गशीर्ष्याम् आग्रहायण्यां पौर्णमास्यामाग्रहायणीसञ्ज्ञं कर्म भवति । **स्थालीपाकꣳ श्रपयित्वा श्रवणावदाज्याहुती हुत्वाऽपरा जुहोति यां जनाः**—इत्यादि । तत्र चरुं श्रपयित्वा श्रवणाकर्मणि यथा द्वे आज्याहुती जुहोति तथाऽत्र **अप श्वेतपदा** जहीति द्वाभ्यां मन्त्राभ्यां हुत्वा ततोऽनन्तरमपराः **यां जना** इत्यादिभिश्चतस्र आज्याहुतीर्जुहोति । **स्थालीपाकस्य जुहोति सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्यै हेमन्ताय चेति**—ततः स्थालीपाकेन **सोमाये**त्यादिभिश्चतुर्भिर्मन्त्रैः स्वाहान्तैश्चतस्र आज्याहुतीर्जुहोति इति । चकारः समुच्चयार्थः । **प्राशनान्ते सक्तुशेषꣳ शूर्पे न्युप्योपनिष्क्रमणप्रभृत्यामार्जनात्**—ततः स्विष्टकृत्प्रभृति । प्राशनान्ते बलिहरणार्थं सक्तुशेषं शूर्पे कृत्वा उपनिष्क्रमणादि आमार्जनात् द्वारदेशे मार्जनं

यावत् श्रवणाकर्मवत्कुर्यात् । **मार्जनान्त उत्सृष्टो बलिरित्याह**—मार्जनस्यान्ते अवसाने उत्सृष्टो बलिरिति वचनं ब्रूयात् । **एतावदाग्रहायणीकर्म** । अथान्यत्कर्माभिधीयते । **पश्चादग्नेः स्रस्तरमास्तीर्याहतं च वास आप्लुता अहतवाससः प्रत्यवरोहन्ति**—पश्चादग्नेरावसथ्यस्य पश्चिमप्रदेशे स्रस्तरं प्रागग्रैः कुशैः स्रस्तरमास्तीर्य विरचय्य । तच्चास्तरणमग्निशालातो गृहान्तरे युज्यते । अग्निशालायां ह्यौपवसथ्यरात्रिमन्तरेण शयनप्रतिषेधात् । अहतं च वसनं सकृत्प्रक्षालितं वस्त्रं तदुपरि आस्तीर्येति सम्बन्धः । आप्लुताः स्नाताः, अहते नवे सदशे सकृत्प्रक्षालिते प्रत्येकं वाससी येषां ते अहतवाससः स्वामिप्रभृतयः प्रत्यवरोहन्ति स्रस्तरं निविशन्ते । **दक्षिणतः स्वामी जायोत्तरा यथाकनिष्ठमुत्तरतः**—कथं प्रत्यवरोहन्ति सर्वेषां दक्षिणतः स्वामी गृहपतिर्भवति, तस्योत्तरा जाया पत्नी, तस्या उत्तरतः अपत्यानीति शेषः । कथं यथाकनिष्ठं यो यस्मात् कनिष्ठः स तदुत्तरत इति । **दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रꣳ शमीशाखासीतालोष्ठाश्मनो निधायाग्निमीक्षमाणो जपत्ययमग्निर्वीरतम इति**—तत्र स्वामी स्रस्तरं प्रत्यवरोक्ष्यन् दक्षिणतोऽग्नेर्ब्रह्माणं यथाविध्युपवेश्य उत्तरत उदपात्रं जलपूर्णभाजनम्, शमीवृक्षस्य शाखां, सीतां, लोष्ठं हलपद्धतिभवमृच्छकलम्, अश्मानं प्रस्तरं निधाय स्थापयित्वा अग्निमीक्षमाणः आवसथ्यं पश्यन्, "अयमग्निर्वीरतमः" इत्येतं मन्त्रं जपति॥ **पश्चादग्नेः प्राञ्चमञ्जलिं करोति दैवीं नावमिति तिसृभिः**—अग्नेः पश्चिमतः स्थित्वा प्रागग्रमञ्जलिं करसम्पुटं विदधाति दैवीं नावमित्यारभ्य **मध्वा रजाꣳसि सुक्रतू** इत्यन्ताभिस्तिसृभिर्ऋग्भिः । **स्रस्तरमारोहन्ति ब्रह्माणमामन्त्रयते ब्रह्मन्प्रत्यवरोहामेति**—स्रस्तरं यथोक्तमारोहन्ति साम्प्रतं स्वामिप्रभृतयः पूर्वं य त्प्रत्यवरोहन्तीत्युक्तं तद्विधानार्थमिदम्।तत्र स्वामी ब्रह्माणमामन्त्रयते पृच्छाति। कथं, ब्रह्मन् प्रत्यवरोहामेति वाक्येन । **ब्रह्मानुज्ञाताः प्रत्यवरोहन्त्यायुष्कीर्तिर्यशो बलमन्नाद्यं प्रजामिति**—प्रत्यवरोहध्वमिति वाक्येन ब्रह्मणाऽनुज्ञाताः प्रसूताः प्रत्यवरोहन्ति स्रस्तरमधितिष्ठन्ति आयुष्कीर्तिरित्यादिमन्त्रेण । अत्र स्त्रीणामपि मन्त्रपाठः । **उपेता जपन्ति सुहेमन्तः सुवसन्त०** इत्यादिकम् । तत्र ये उपेता उपनीतास्ते स्रस्तरमारुह्य **सुहेमन्त** इत्यादिकं मन्त्रं जपन्ति । **स्योना पृथिवि नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशन्ति**—स्रस्तरमारुह्य **स्योना पृथिवी**त्यनेन मन्त्रेण स्वामीजायापत्यानि प्राक् पूर्वस्यां दिशि शिरो येषां ते प्राक्शिरसः दक्षिणपार्श्वैः उदङ्मुखाः संविशन्ति स्वपन्ति शेरते स्रस्तरोपरीत्यर्थः । **उपोदुत्तिष्ठन्त्युदायुषा स्वायुषोत्पर्जन्यस्य पृथिव्याः सप्तधामभिरिति**—उप स्रस्तरसमीपे उदुतिष्ठन्ति उत्थाय उत्तिष्ठन्तीत्यर्थः । उपपदमनर्थकम् । **उदायुषा स्वायुषोत्पर्जन्यस्ये**त्यादिमन्त्रेण स्रस्तरात् । **एवं द्विरपरं ब्रह्मानुज्ञाताः**—एवमुक्तप्रकारेण **ब्रह्मन्प्रत्यवरोहाम**ेत्यारभ्य उत्थानपर्यन्तं ब्रह्मानुज्ञाताः सन्तो द्विरपरम् अपरमन्यत्स्रस्तरमारोहन्ति संविशन्ति उत्तिष्ठन्ति च । **अधः शयीरꣳश्चतुरो मासान्यथेष्टं वा**—अत ऊर्द्ध्वं चतुरो मासान्पौषादीन् अधः खट्वां व्युदस्य भूमौ शयीरन् गृहपतिप्रमुखाः । यथेष्टं वा अथवा इष्टमनतिक्रम्य यथेष्टं यथाकामम् अधो वा खट्वायां वा शयीरन्निति विकल्पः । इति सूत्रार्थः ॥ २ ॥

अथ **पद्धतिः** । मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म भवति । तत्र प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकश्राद्धं विधाय आवसथ्याग्नौ ब्रह्मोपवेशनादिप्राशनान्ते विशेषः । शूर्पम्, सक्तून्, उल्काम्, उदपात्रम्, दर्वीकङ्कतत्रयम्, अञ्जनम्, अनुलेपनम्, स्रजश्चेत्युपकल्पः । तत आज्यभागानन्तरमपश्वेतपदा जहीत्याज्याहुतिद्वयं श्रवणाकर्मवद्धुत्वा अपराश्चतस्र आज्याहुतीर्जुहोति वक्ष्यमाणैश्चतुर्भिर्मन्त्रैः प्रतिमन्त्रम् । तद्यथा—"यां जनाः प्रतिनन्दन्ति रात्रीं धेनुमिवायतीम् । संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा" इदं रात्र्यै ॥ १ ॥ 'संवत्सरस्य प्रतिमा या ताꣳ रात्रीमुपास्महे ।

प्रजाꣳ सुवीर्यां कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा'' इदꣳ रात्र्यै० ॥ २ ॥ "संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय कृणुते बृहन्नमः । तेषां वयꣳ सुमतौ यज्ञियानां ज्योग्जीता अहताः स्याम स्वाहा'' । इदं संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय च० ॥ ३ ॥ "ग्रीष्मो हेमन्त उत नो वसन्तः शिवा वर्षा अभया शरन्नः । तेषामृतूनाꣳ शतशारदानां निवात एषामभये वसेम स्वाहा'' इदं ग्रीष्माय, हेमन्ताय, वसन्ताय, वर्षाभ्यः, शरदे च० ॥ ४ ॥ ततः स्थालीपाकेन चतस्र आहुतीर्जुहोति । तद्यथा--सोमाय स्वाहा इदं सोमाय० । मृगशिरसे स्वाहा इदं मृगशिरसे० । मार्गशीर्ष्यै पौर्णमास्यै स्वाहा इदं मार्गशीर्ष्यै पौर्णमास्यै० । हेमन्ताय स्वाहा इदं हेमन्ताय० । ततः स्थालीपाकेन स्विष्टकृतं हुत्वा महाव्याहृत्यादिदक्षिणादानान्ते सक्तुशेषं शूर्पे न्युप्योपनिष्क्रमणप्रभृतिमार्जनपर्यन्तं श्रवणाकर्मवत्कृत्वा मार्जनान्ते उत्सृष्टो बलिरित्युच्चैर्ब्रूयात् । ततस्तां रात्रीं वत्सान् स्वमातृभिस्सह संसृजेत् । इत्याग्रहायणीकर्म । अथ **स्रस्तरारोहणम्** । तत्र प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकश्राद्धं विधाय स्रस्तरास्तरणप्रदेशगृहे सर्वमावसथ्याग्निं नीत्वा पञ्चभूसंस्कारपूर्वकं स्थापयित्वा अग्नेः पश्चिमायां दिशि कुशैः स्रस्तरास्तरणं कुर्यात् । स्रस्तरास्तरणमग्निशालाया गृहान्तरे युज्यते । अग्निशालायामौपवसथ्यरात्रिमन्तरेण शयननिषेधात् । तस्योपरि नूतनं सकृत्प्रक्षालितमुदक्दशं वासः संस्तरेत् । अग्निं दक्षिणेन ब्रह्माणमुपवेश्य, उत्तरत उदपात्रं, शमीशाखाम्, सीतालोष्ठम्, अश्मानं च निधाय स्रस्तरपश्चिमतः स्वामी स्थित्वा तमुत्तरेण पत्नी, तामुत्तरेणापत्यानि यथाकनिष्ठम् । तत्र गृहपतिरग्निमीक्षमाणो जपति " अयमग्निर्वीरतमोऽयं भगवत्तमः सहस्रसातमः । सुवीर्योऽयꣳ श्रैष्ठ्ये दधातु नाविति '' एतं मन्त्रम् । ततः पश्चादग्नेः प्राञ्चमञ्जलिं करोति । **दैवीं नावꣳ स्वरित्रामनागसमित्यादिमध्वा रजाꣳसि सुक्रतू** इत्यन्ताभिस्तिसृभिर्ऋग्भिः । ततो ब्रह्मन् प्रत्यवरोहामेति ब्रह्माणमामन्त्र्य प्रत्यवरोहध्वमिति ब्रह्मणा प्रत्यनुज्ञाताः सर्वे स्नाताः अहतवाससः "आयुष्कीर्तिर्यशो बलमन्नाद्यं प्रजाम्'' इत्यनेन मन्त्रेण स्रस्तरमारोहन्त्यधितिष्ठन्ति स्त्रियोऽपि मन्त्रेण । तमारुह्य तेषु ये उपनीतास्ते "सुहेमन्तः सुवसन्तः सुग्रीष्मः प्रतिधीयतान्नः । शिवा नो वर्षाः सन्तु शरदः सन्तु शिवाः'' इत्यमुं मन्त्रं जपन्ति । अथ **स्योना पृथिवी**त्यनयर्चा स्वामिप्रभृतयः स्त्रिय उपनीता अनुपनीताश्च सर्वे यथोक्तक्रमेण दक्षिणपार्श्वैः प्राक्शिरसः संविशन्ति स्वपन्ति । तत **उदायुषा स्वायुषोत्पर्जन्यस्य वृष्ट्या पृथिव्याः सप्तधामभिरि**त्यनेन मन्त्रेणोत्तिष्ठन्ति सर्वे । ततः स्रस्तरादुत्तीर्य ब्रह्मानुमन्त्रणप्रत्यवरोहणोपतजपसंवेशनोत्थानानि वारद्वयमेव कुर्युः । तत आरभ्य चतुरो मासान् सर्वेऽधः शयीरन् कामतो वा शय्यायाम् । पुनरावसथ्यं पञ्चभूसंस्कारपूर्वकं स्वस्थाने स्थापयेत् । इति **स्रस्तरारोहणम्** । " मुख्यकाले यदावश्यं कर्म कर्तुं न शक्यते । गौणकालेऽपि कर्तव्यं गौणोऽप्यत्रेदृशो भवेत् ॥ १ ॥ आसायमाहुतेः कालात्कालोऽस्ति प्रातराहुतेः । प्रातराहुतिकालात्प्राक् कालः स्यात् सायमाहुतेः ॥ २ ॥ पौर्णमासस्य कालोऽस्ति पुरा दर्शस्य कालतः । पौर्णमासस्य कालात्प्राक् दर्शकालोऽपि विद्यते ॥ ३ ॥ वैश्वदेवस्य कालोऽस्ति प्राक् प्रघासविधानतः । प्रघासानां च कालः स्यात्साकमेधीयकालतः ॥ ४ ॥ स्यात्साकमेधकालोऽप्याशुनासीरीयकालतः । शुनासीरीयकालोऽपि आवैश्वदेवकालतः ॥ ५ ॥ श्यामाकैर्व्रीहिभिश्चैव यवैरन्योऽन्यकालतः । प्राग्यष्टुं युज्यतेऽवश्यं नत्वत्राग्रयणात्परः ॥ ६ ॥ दक्षिणायनकाले वा पश्विज्या चोत्तरायणे । अन्योऽन्यकालतः पूर्वं यष्टुं युक्ते उभे अपि ॥ ७ ॥ एवमागामियागीयमुख्यकालादधस्तनः । स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मणः ॥ ८ ॥ यद्वाऽऽगामिक्रियामुख्यकालस्याप्यन्तरालवत् । गौणेष्वेतेषु कालेषु कर्म चोदितमाचरेत् । प्रायश्चित्तप्रकरणे प्रोक्तां निष्कृतिमाचरेत् ॥ १० ॥ प्रायश्चित्तमकृत्वाऽपि गौणकाले समाचरेत् । नित्येष्टिमग्निहोत्रं च भारद्वाजीयभाष्यतः ॥ ११ ॥ मुख्यकाले हि मुख्यं चेत्साधनं नैव लभ्यते । तत्कालद्रव्ययोः कस्य मुख्यत्वं गौणताऽपि वा ॥ १२ ॥ मुख्यकालमुपाश्रित्य गौणमप्यस्तु

साधनम् । न मुख्यद्रव्यलोभेन गौणकालप्रतीक्षणम् ॥ १३ ॥ एकपक्षगतौ यावान् होमसङ्घो विपद्यते। पक्षहोमविधानान्तं हुत्वा तन्तुमतीं यजेत् ॥ १४ ॥ ॥ २ ॥ ॥ * ॥

विश्व०—**मार्ग...णीकर्म**—कर्तव्यमिति शेषः । **स्थाली... होति**—अत्रापि मातृपूजाऽऽभ्युदयिके कृत्वा ब्रह्मासनास्तरणादिपरिभाषोक्तविधिना स्थालीपाकं पक्त्वा । तत्र विशेषः । पात्रासादनानन्तरं सक्तुशेषस्यासादनम्, उल्काधारश्च, उदपात्रं, दर्वी, कङ्कतत्रयम्, अञ्जनानुलेपनम्, स्रजश्च । स्थालीपाकग्रहणे सोमाय, मृगशिरसे, मार्गशीर्ष्यै पौर्णमास्यै, हेमन्ताय जुष्टं गृह्णामि । प्रोक्षणे त्वाशब्दः । ततः श्रावणाकर्मवदाज्यभागानन्तरम् **अप श्वेतपदा, नवै श्वेतस्येति** मन्त्राभ्यामाज्याहुती हुत्वाऽपराश्चतस्र आज्याहुतीर्जुहोति । तासां मन्त्रानाह—**यां जना...सेम स्वाहेति**—इदं रात्र्यै ॥ २ ॥ इदं संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय ॥ ३ ॥ इदं ग्रीष्माय हेमन्ताय, वसन्ताय, वर्षाभ्यः, शरदे ॥ ४ ॥ **स्थाली...चेति**—स्वाहान्तैरेभिश्चतुर्थ्यन्तैः प्रतिमन्त्रं होमः । त्यागास्तु "इदं सोमाय" इत्यादि यथादैवतम् । **प्राश...जनात्**—ततः स्विष्टकृदादिदक्षिणादानान्ते सक्तुशेषं शूर्पे प्रक्षिप्य "उपनिष्क्रम्य बहिःशालायाः स्थण्डिलमुपलिप्य" इत्यादि "द्वारदेशे मार्जयन्त आपो हि ष्ठेति तिसृभिः" इत्यन्तं श्रवणाकर्मवत् । "स यावत्कामयेत न सर्पा अभ्युपेयुरिति तावत्सन्ततयोदधारया निवेशनं त्रिः परिषिञ्चन्परीयात्" इत्येतद्वर्जम् । **मार्ज...त्याह**—तत उत्सृष्टो बलिरिति प्रैषमुच्चार्य बर्हिर्होमादिब्राह्मणभोजनान्तम् । तदनन्तरं वैश्वदेवः । "आग्रहायणीं च" इति सूत्रादस्तमिते वत्ससंसर्गः । **इत्याग्रहायणीकर्म** ॥ ॥ स्रस्तरारोहमाह **पश्चा...वासः**—आस्तीर्येत्यनुषङ्गार्थश्चकारः। तत्र मातृपूजाऽऽभ्युदयिके कृत्वा सायमग्निं परिचर्याग्नेः प्रतीच्यां कौशं स्रस्तरं प्रागुदगग्रं वाऽऽस्तीर्य तदुपरि अहतं वासश्च तथैवास्तीर्येत्यर्थः। वैश्वदेवात्प्राक् । आरोहणं च दम्पत्योः गर्भरूपाणां च। कीदृशा इत्यत आह **आप्लु...रतः**—आप्लुताः कृतस्नानाः स्नानं चाद्भिः । "सकृद्धौतं नवं श्वेतं सदशं यन्न धारितम् । अहतं तद्विजानीयात्सर्वकर्मसु पावनम्" । यत्तु "अहतं यन्त्रनिर्मुक्तमुक्तं वासः स्वयंभुवा" इति । "शस्तं स्यात्तद्विवाहादौ तावत्कालं न सर्वदा" इति । तेन सकृद्धौताद्युक्तलक्षणे अहते वाससी येषां ते तादृशाः। उत्तरत इत्यनेन प्रत्यवरोहन्तीत्यस्यान्वयः । किं कृत्वा प्रत्यवरोहन्तीत्यत आह—**दक्षि...धाय**—इति । अनुज्ञादानस्य चेतनसाध्यतां प्रतीत्यैत**द्दक्षिणतो ब्रह्माणमुपवेश्येत्येतत्**सूत्रितम् । दक्षिणत्वं चाग्न्यपेक्षया । उत्तरत्वमपि । उदपात्राद्यदृष्टार्थम् । **अयमग्नि...तुनाविति**—जपश्च स्वामिनः । **पश्चा...सृभिः**—अग्नेः पश्चाद्भागे संहताभ्यां हस्ताभ्यां प्रागग्रमञ्जलिं करोति **दैवीं नावमिति** तिसृभिरर्द्धकण्डिकाभिः **स्वस्तय** इत्यन्ताभिः, तेन सार्द्धैककण्डिकयाऽञ्जलिं करोतीत्यर्थः । **स्रस्तरमारोहन्ति**—कथमत आह—**ब्रह्मा...बलमिति** प्रत्यवरोहध्वमित्यनुज्ञादानम् । मन्त्रपाठश्च दम्पत्योरुपनीतकुमाराणां च **उपे...शिवा इति आयुष्कीर्तिमिति** मन्त्रेणारूढाः संजातोपनयना यजमानपुत्राः **सुहेमन्त** इत्यादिमन्त्रं जपन्ति । **स्योना...शन्ति**—संविशन्ति स्वपन्ति । कीदृशाः प्राक् पूर्वं शिरो येषां ते । स्वामित उत्तरस्यां जाया, ततो यथाकनिष्ठमुत्तरतोऽपत्यानि स्वपन्ति । पुनः कथं, दक्षिणपार्श्वैः। उत्तराभिमुखा इत्यर्थः । **स्योना पृथिवि नो भवेति** मन्त्रेण संहितास्थेन । अत्रापि दम्पत्योरुपनीतानां च मन्त्रपाठः। पत्नीव्यतिरिक्तस्त्रीणां मन्त्राभावः। **उपो...मभिरिति**—तत **उदायुषेति** मन्त्रेण युगपत् उत्तिष्ठन्ति । स्रस्तरोपविष्टा उत्थानेनावरोहन्तीत्यर्थः । **एवं...ज्ञाताः**—एवमुक्तप्रकारेण **ब्रह्मन्प्रत्यवरोहामे**त्यारभ्य प्रत्यवरोहध्वमित्यनुज्ञाता **उदायुषे**त्युत्थानान्तं द्विर्वारमपरं स्रस्तरारोहणमवरोहणान्तं कर्म कुर्वन्ति । **अधः...सान्**—चैत्रीपौर्णमासीपर्यन्तम् अधः खट्वां व्युदस्य, **यथेष्टं वा**—शयीरन्नित्यनुषङ्गः। वाशब्दो विकल्पार्थः । तदनन्तरं वैश्वदेवः । इति **स्रस्तरारोहः** ॥ इति तृतीयकाण्डस्य द्वितीया कण्डिका ॥ २ ॥ ॥ * ॥

ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टकाः ॥ १ ॥ ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्येति ॥ २ ॥ अपूपमाꣳसशाकैर्यथासंख्यम् ॥ ३ ॥ प्रथमाऽष्टका पक्षाष्टम्याम् ॥ ४ ॥ स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति ॥ त्रिꣳशत्स्वसार उपयन्ति निष्कृतꣳ समानं केतुं प्रतिमुञ्चमानाः । ऋतूँस्तन्वते कवयः प्रजानतीर्मध्ये छन्दसः परियन्ति भास्वतीः स्वाहा । ज्योतिष्मती प्रतिमुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि । विपश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे स्वाहा । एकाऽष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् । तेन दस्यू-

न्व्यसहन्त देवा हन्ताऽसुराणामभवच्छचीभिः स्वाहा ॥ अनानुजामनुजां मामकर्त्त सत्यं वदन्त्यन्विच्छ एतत् । भूयासमस्य सुमतौ यथा यूयमन्यावो अन्यामति मा प्रयुक्त स्वाहा । अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधम् । भूयासमस्य सुमतौ यथा यूयमन्यावो अन्यामति मा प्रयुक्त स्वाहा । पञ्च व्युष्टीरनु पञ्चदोहा गां पञ्चनाम्नीमृतवोऽनुपञ्च । पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरधिलोकमेकꣳ स्वाहा ॥ ऋतस्य गर्भः प्रथमा व्यूषिष्यपामेका महिमानं बिभर्त्ति । सूर्यस्यैका चरति निष्कृतेषु घर्मस्यैका सवितैकांनियच्छतु स्वाहा ॥ या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे । सा नः पयस्वती धुक्ष्वोत्तरामुत्तराꣳ समाꣳ स्वाहा ॥ शुक्रऋषभा नभसा ज्योतिषाऽगाद्विश्वरूपा शबली अग्निकेतुः । समानमर्थꣳ स्वपस्यमाना बिभ्रती जरामजर उष आगाः स्वाहा ॥ ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानाम् । एका सती बहुधोषो व्यौच्छत्साऽजीर्णा त्वं जरयसि सर्वमन्यत्स्वाहेति ॥ ५ ॥ स्थालीपाकस्य जुहोति शान्ता पृथिवी शिवमन्तरिक्षꣳ शं नो द्यौरभयं कृणोतु । शं नो दिशः प्रदिश आदिशो नोऽहोरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा । आपो मरीचीः परिपान्तु सर्वतो धाता समुद्रो अपहन्तु पापम् । भूतं भविष्यदकृन्तद्विश्वमस्तु मे ब्रह्माभिगुप्तः सुरक्षितः स्याꣳ स्वाहा ॥ विश्वे आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतश्च सन्तु । ऊर्जं प्रजाममृतं दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु नः स्वाहेति ॥ ६ ॥ अष्टकायै स्वाहेति ॥ ७ ॥ मध्यमा गवा ॥ ८ ॥ तस्यै वपां जुहोति वह वपां जातवेदः पितृभ्य इति ॥ ९ ॥ श्वोऽन्वष्टकासु सर्वासां पार्श्वसक्थिसव्याभ्यां परिवृते पिण्डपितृयज्ञवत् ॥ १० ॥ स्त्रीभ्यश्चोपसेचनं च कर्षूषु सुरया तर्पणेन चाञ्जनानुलेपनꣳ स्रजश्च ॥ ११ ॥ आचार्यायान्तेवासिभ्यश्चानपत्येभ्य इच्छन् ॥ १२ ॥ मध्या वर्षे च तुरीया शाकाष्टका ॥ १३ ॥ ॥ ३ ॥

कर्कः—ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टकाः—भवन्तीति सूत्रशेषः । संस्कारश्चायं स्मर्यते गौतमादिभिः । सकृत्करणं चास्याभ्यासाश्रवणात् । अष्टकास्तिस्रो भवन्ति । ता आह—ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्येति—वक्ष्याति च “ मध्या वर्षे च तुरीयाऽष्टका ” इति । ताद्धितान्तेन निर्देशात्प्रत्यष्टकं तद्देवत्यो होमो यथा स्यादिति । इदानीं तत्साधनभूतं द्रव्यमाह—अपूपमाꣳ सशाकैर्यथासंख्यम्—अपूपा मण्डकाः । मांसं “ मध्यमा गवा ” इति वक्ष्याति । शाकं कालशाकम् । अष्टकाद्वये । प्रथमाष्टका पक्षाष्टम्याम्—आग्रहायणीसमनन्तरं पक्षाष्टम्यां भवतीति शेषः । स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति त्रिꣳशत्स्वसार उपयन्तीति—एवमादिभिर्मन्त्रैः प्रतिमन्त्रम् । स्थालीपाकस्य जुहोति शान्ता पृथिवीति—एवमादिभिर्मन्त्रैः प्रतिमन्त्रं चतस्रः । ततोऽपूपेन “इन्द्राय स्वाहा” इत्येकाहुतिः । उभयोः सकाशात्स्विष्टकृदादि ।

मध्यमा गवा–मध्यमाऽष्टका पौषस्य कृष्णाष्टम्याम्, सा च गवा भवति । तस्याश्च कल्प उपरिष्टाद्वक्ष्यति । **तस्यै वपां जुहोति** । वह वपां जातवेदः इति–अनेन मन्त्रेण । पुनरवदानहोमो “ विश्वेभ्यो देवेभ्यः स्वाहा ” इति । **श्वोऽन्वष्टकासु सर्वासां पार्श्वसक्थिसव्याभ्यां परिवृते पिण्डपितृयज्ञवत्**–श्वस्तनेऽहनि सर्वास्वष्टकासु पार्श्वसक्थिसव्ययोर्मांसमादाय परिवृते पिण्डपितृयज्ञवत्कर्म भवति । इयांस्तु विशेषः । **स्त्रीभ्यश्च**–ददाति । **उपसेचनं च कर्षूषु सुरया**–अयं च स्त्रीपिण्डसन्निधौ अवटेषु सुरयोपसेचनम् । **तर्पणेन च तर्पयेत्** । तर्पणशब्देन सक्तवोऽभिधीयन्ते । **अञ्जनानुलेपनं स्रजश्च**–स्त्रीपिण्डेषु ददाति । **आचार्यायान्तेवासिभ्यश्चानपत्येभ्य इच्छन्**–ददाति । **मध्या वर्षे च तुरीया शाकाष्टका**–भवतीति शेषः ॥ ३ ॥

जय०–अष्टकाः–भवन्तीति शेषः । संस्कारश्चायं स्मर्यते **गौतमा**दिभिः । सकृत्करणं चास्य, अभ्यासस्याश्रवणात् । ता आह–**ऐन्द्री**त्यादि । वक्ष्यति च“ मध्या वर्षे च तुरीया शाकाष्टका”इति चतुर्थ्या निर्देशम् । तद्धितान्तेन निर्देशः प्रत्यष्टकं तद्देवत्यो होमो यथा स्यादिति । इदानीं तत्साधनभूतं द्रव्यमाह–**अपूपमे**ति–अपूपो मण्डकः। मांसं “मध्यमा गवा” इति वक्ष्यति। शाकं कालशाकम् । अष्टकाद्वये । **प्रथमाऽष्टका** आग्रहायणीसमनन्तरपक्षाष्टम्यां भवतीति शेषः । आज्यभागौ हुत्वेत्यवसरज्ञापनम् । तत्राज्याहुतिषूक्तमन्त्राणां **त्रिंशदि**त्यादिदशानां प्रजापतिस्त्रिष्टुप् अष्टम्याम् अनुष्टुप् लिङ्गोक्ता आज्यहोमे० । अष्टकायास्तदधिष्ठात्रीदेवतायास्त्रिंशत्तिथयः स्वसारो भगिन्यः । ताश्चाष्टकाया उप समीपं यन्ति गच्छन्ति हविर्भागग्रहणाय । मुख्यत्वादष्टकायास्तद्द्वारा ता अपि प्राप्नुवन्तीत्यर्थः । किम्भूताः । निष्कृतं शुद्धम्, समानं तुल्यम्, केतुं चिह्नं चन्द्रादिरूपं, प्रतिमुञ्चमानाः धारयन्त्यः । ऋतून् हेमन्तादीन् ; तन्वते सम्भूय विस्तारयन्ति । पुनः किम्भूताः । कवयः क्रान्तदर्शनाः । प्रजानतीः पूर्वकालस्वरूपं जानानाः । छादनात् व्यापकत्वाच्छन्दो वत्सरः, तस्य मध्ये परियन्ति आवर्त्तन्ते । कीदृश्यः भास्वतीः दीप्तिमत्यः । ताभ्यः स्वाहा सुहुतमस्त्विति सर्वत्र समानम् ॥ १ ॥ या रात्री ज्योतिष्मती आप्यायनद्वारा ओजआदिकर्त्री नक्षत्रप्रचुरा वा । देवी देवतारूपा संसारचक्रे क्रीडन्तीति वा। नभ आकाशं प्रतिमुञ्चते आवृणोति। एतेन स्वरूपं व्याख्यातम् । सूर्यस्य व्रतानि दिवसोचितकर्माण्यप्यावृणोति न प्रवर्तन्त इत्यर्थः । यस्यां रात्र्यां पशवो गवादयः अस्या मातुः पृथिव्या उपस्थे उपरिस्थितं वस्तु विशेषेण पश्यन्ति । “द्यौः पिता । पृथिवी माता”इति **श्रुतेः**। किम्भूताः पशवः । नानारूपाः बिडालाद्यनेकभेदभिन्नाः । जायमाना उत्पद्यमाना अपि । जन्मदिनमारभ्येत्यर्थः॥२॥एकाऽष्टका चतुर्थी या वर्षासु प्रसिद्धा सा तप्यमाना तपसा शास्त्रविहितधर्मेण । गर्भं श्रेयःप्राप्त्युपायविशेषरूपम् । इन्द्रं परमैश्वर्ययुक्तम् । महिमानं महान्तम् अप्रतिहतमित्यर्थः । जजान जनितवती । तेन गर्भेण देवा इन्द्राद्या दस्यून्प्रतिपक्षान् व्यसहन्त पराजितवन्तः । यद्वा तान् विशेषेण स्वप्रहारम् असहन्त असह्यायन्त । अन्तर्भूतोऽत्र णिच् बोद्धव्यः । यश्च गर्भः शचीभिः स्वनुष्ठितकर्मभिः असुराणामपकारिणां शत्रूणां हन्ता हिंसकोऽभवत् अभूत् । शचीति कर्मणो नामधेयं गणे पठ्यते ॥ ३ ॥ या माघ्याः पौर्णमास्या उपरिष्टादष्टका तत्राष्टमी ज्येष्ठया सम्बध्यते । साऽप्येकाऽष्टकेत्याचक्षते । अथाष्टका स्वभगिनीः प्रत्याह–हे रात्र्यः यूयमात्मगुणैः कृत्वा अनुजां कनीयसीमपि माम् अनानुजाम् न अनुजा अननुजा ताम् अनानुजाम् । दीर्घश्छान्दसः। ज्येष्ठाम् । अकर्त कृतवत्यः । अहं च सत्यं युष्मत्कृतमपकारं यथार्थं वदन्ती कीर्त्तयन्ती सती [illegible] शिरसि धारये । यथाऽस्य यजमानस्य सुमतौ

CC-0. In Public Domain. Kritikant Sharma Najafgarh Delhi Collection

शोभनमतिप्रदाने भूयासं भवेयम् । तथा यूयमप्येवंविधा भवथ । किन्तु युष्मान्प्रति ब्रवीमि । वो युष्माकं मध्ये अन्या रात्रयः अन्यां रात्रीम् अति अतिक्रम्य मा प्रयुक्त प्रतिपक्षा भूत्वा यजमानकार्यं मा विच्छेदयन्तु । मिथोऽनुरागिण्यो भूत्वा यजमानकार्यं संसाधयन्त्वित्यर्थः ॥४॥ अभूदित्यादिना पुनस्ताः प्रत्याह—हे भगिन्यः मम सुमतौ शोभननिष्ठायां वर्तमानोऽयं यजमानः विश्ववेदाः सर्वधनोऽभूत् भवतु । विश्वानि सर्वाणि वेदांसि ज्ञानानि धनानि वा यस्य सः । किञ्च प्रतिष्ठां सम्यक् स्थितिम् उत्कर्षं वा आष्ट अश्नुताम् । गाधं चाभिलाषजातम् अर्थम् अविदत् विन्दतु । हिशब्द एवार्थे । भूयासमित्याद्युक्तार्थम् ॥ ५ ॥ याः पञ्च रात्रीः व्युष्टीः उषसोऽनुगताः । तत्स्वरूपमाह—पञ्च दोहाः यजमानस्याधिकारादिरूपा दोहा दोह्या यासां ताः । तथा गां संवत्सरात्मिकाम् । पञ्चनाम्नीं संवत्सरपरिवत्सरेदावत्सरेद्वत्सरवत्सराख्याम् । अथवा "नन्दा भद्रा च सुरभी सुशीला सुमनास्तथा" इति **शिवधर्मे** प्रतिपादितनाम्नीम् । यस्याः पञ्च ऋतवोऽनुगता वत्साः । किंच दिशः पूर्वाद्या ऊर्ध्वान्ताः पञ्चदशेन स्तोमेन क्लृप्ताः समर्थीकृताः । समानमूर्ध्नीः समानस्तुल्यो मूर्द्धा मस्तको यासां ताः । मूर्द्धा चादित्यः । एकम् अविलोकम् लोकस्य पृथिव्याख्यस्य अधि उपरि द्वितीयान्तानुपाकर्तुं प्रथमान्ताः पदार्थाः कर्मार्थं क्लृप्ताः । ताभ्यः स्वाहेत्युक्तार्थम् ॥ ६ ॥ या रात्रिः ऋतस्य यज्ञस्य सत्यस्य वा ब्रह्मणो वा गर्भ आश्रयः कारणं वा । प्रथमा आद्या । सायम्प्रातरित्यादिप्रथमत्वनिर्देशात् । व्यूषिषी अन्धकारमपनयन्ती । एका कृष्णा । अपां जलानाम्, महिमानं महत्त्वं चन्द्रादिरूपं, बिभर्त्ति धारयति पुष्णाति वा । या चैका सूर्यस्य रवेः निष्कृतेषु निम्नेषु अस्तमयेषु चरति व्यवहरति । एका च शुक्ला घर्मस्य आतपस्य निष्कृतेषु चरति । तामेकां सविता नियच्छतु सुखदात्रीं करोतु । अष्टकाविशेषणं वा सर्वम् ॥७॥ सैवाष्टका रात्रिर्वैनुरूपेण स्तूयतेऽनुष्टुभा । या प्रथमा अष्टका रात्रिः व्यौच्छत् विपाशितवती । 'उच्छी विपाशे' । सा रात्रिः यमे नियमे कृते सति धर्मराजे वा । धेनुः पयस्विनी गौरभवत् अभूत् । श्राद्धादिरूपहविःसम्पादनद्वारा यमस्याप्यभीष्टं प्रादादित्यर्थः । सा नोऽस्माकं पयस्विनी अभीष्टदात्री भूत्वा उत्तरामुत्तराम् उत्तरोत्तरां समां वर्षं यावज्जीवम् अस्माकं पुत्रपशुग्रामधनादिकामान् धुक्ष्व पूरयत्वित्यर्थः । पुरुषव्यत्ययश्छान्दसः ॥ ८ ॥ या रात्रिः शुक्रा शोचिष्मती ऋषभा वर्षणशीला श्रेष्ठा वा । नभसा नभसि स्थितेन ज्योतिषा सहागात् आगता । अतो विश्वरूपा नानारूपा । तदेवाह—शबली कर्बुरा शुक्लकृष्णारुणवर्णभेदेन । अग्निकेतुः होमार्थमुद्धृतोऽग्निः केतुः प्रकाशकः चिह्नं तिलको वा यस्याः सा । अग्निर्मन्दप्रकाश उषःकाले सूर्यतेजःसम्भेदाद्वा भवति । समानं तुल्यम्, अर्थं प्रयोजनं, शोभनतया अपस्वमाना सम्पादयन्ती । उषःकाले पुण्यकर्माणि क्रियन्त इति यजमाने जरां निर्दुष्टदीर्घजीवनं बिभ्रती धारयन्ती । हे अजरे उषः त्वमागाः आगताऽसि । अजरे इति विशेषणं सर्वदैकरूपत्वात् । यजमानविशेषणं वा ॥९॥ अथोषोरूपाया रात्रेः स्तुतिद्वारेण स्वरूपनिरूपणमाह—इयमुषा आगात् आगता । किम्भूता ऋतूनां वसन्तादिषण्णां प्रथमा मुख्या पत्नी पालयित्री। उषःकालादृतोः प्रवृत्तिर्भवतीति प्रथमत्वम्। पत्नी भार्या वा। ऋतुभिः सह सन्धानात् । अह्नां वासराणां नेत्री प्रापयित्री । उषसो दिनानामाविर्भावात् । तथा प्रजानां जनित्री सवित्री । निद्रापगमेन जागरणधर्मत्वात् । एकैव सती बहुधा प्रकारेण व्यौच्छत् प्राकाशत । अनेन कर्तृधर्मत्वात् या एवंरूपा सा त्वं स्वयमजीर्णा सती अन्यत्सर्वं प्राणिजातं जरयसि वयोविहीनं करोषि यातायाताभ्याम्, वयसोऽपचयाद्वा । अथवा रविरश्मिकदम्बप्रसारेण स्वयं जीर्णा सती अन्यत्सर्वं निमेषादि संवत्सरान्तकालावयवजातं जरयसि अपनयसि । तथा च **यास्कः**— "रात्रेर्जरयिता जारः सूर्यः" इति । ततः स्थालीपाकेन **शान्ता पृथिवी**त्यादिना मन्त्रचतुष्टयेन चतस्र आहुतयः क्रमेण । अथ मन्त्रार्थः ।

तत्र त्रयाणां प्रजापतिः, पङ्क्तिर्लिङ्गोक्ता, होमे० । शान्ता सुखस्वरूपा पृथिवी नोऽस्माकम् अभयं कृणोतु करोतु । तथा शिवं मङ्गलमन्तारिक्षम्, तथा शं सुखरूपा द्यौरपि कृणोतु । तथा दिशः प्राच्याद्याः प्रदिशोऽवान्तरदिशः आदिशः सर्वा नोऽस्माकं शं कृण्वन्तु । हे अहोरात्रे युवां शं कृणुतं कुरुतम् । एषां प्रसादाद्दीर्घमायुर्व्यश्नवै प्राप्नुयाम् ॥ १ ॥ आपो जलानि । मरीचीः मरीचयः । मे मम देहगेहादि सर्वं परिपान्तु रक्षन्तु । धाता अपां धारयिता समुद्रः सिन्धुः । मे इति पदं तन्त्रम्, अतः सर्वत्र सम्बध्यते । तेन मे मम पापं वृजिनम् अपहन्तु दूरीकृत्य नाशयतु । कीदृशं पापम्, तदेव प्रपञ्चयति— भूतं व्यतीतम्, भविष्यदागामि तत् विश्वं सर्वं पापम्, अकृन्तत् छिनत्त्विति यावत् ।“ कृती छेदने ” । यद्वा— भूतं दक्षादिषु व्यतीतम्, भविष्यच्च तेष्वेव वर्तमानम्, अभीष्टं धनादिनिकरं विश्वं सर्वमकृन्तत् अनवच्छिन्नं करोतु । तत एतैरनुगृहीतस्य मे ब्रह्म वेदः अभिगुप्तः शूद्रश्रवणादिनाऽनुपहतोऽस्तु । ततोऽभिगुप्तेन वेदेनाहं सुरक्षितः धर्मानुष्ठाने निष्प्रत्यूहः स्यां भवेयम । सर्वैर्वा सुरक्षितः ॥ २ ॥ विश्वेदेवास्त्रयोदश । आदित्या द्वादश । वसवोऽष्टौ । रुद्रा एकादश । मरुतो देवविशेषा एकोनपञ्चाशत् । एते नोऽस्माकं गोप्तारो रक्षितारः सन्तु भवन्तु । परमेष्ठी प्रजापतिश्च मयि ऊर्जमन्नं प्राणबलं वा । प्रजां पुत्रादिरूपाम् । अमृतम् अमरणधर्मत्वम, परमानन्दं वा । तथा दीर्घमायुश्चिरञ्जीवितं च दधातु सुस्थितं करोतु॥३॥“अष्टकायै स्वाहा” इति चतुर्थीमाहुतिं हुत्वाऽपूपेन “इन्द्राय स्वाहा” इत्येकामाहुतिं हुत्वोभयोः स्विष्टकृत् । इति **प्रथमाऽष्टका** ॥ मध्यमाऽष्टका पौषस्य कृष्णाष्टम्याम् । सा च गवा गोपशुना भवति तस्याश्च कल्पमुपरिष्टाद्वक्ष्यति । तस्यै वपां नाभिस्थचर्मविशेषं जुहोति **वह वपामि**ति मन्त्रेण । तस्यार्थः । तत्रादित्यस्त्रिष्टुप्,जातवेदाः, वपाहोमे०। वह प्रापय । शेषं स्पष्टम् । पुनरवदानहोमो “विश्वेभ्यो देवेभ्यः स्वाहा” इत्येकाहुतिकः । वैश्वदेवीति संशब्दनात् । श्वः सर्वासामष्टकानां श्वस्तनेऽहनि अन्वष्टकासु पार्श्वसक्थिसव्ययोर्मांसमादाय परिवृते सर्वत आच्छादिते आवसथ्यागारे पिंडपितृयज्ञवत्कर्म भवति । इयाँस्तु विशेषः।**स्त्रीभ्यश्च**—स्त्रीभ्यश्चापि पिण्डान्ददाति । कर्षूषु स्त्रीपिण्डसमीपखातगर्तेषु सुरया विहितमद्येन तर्पणेन च तर्पणहेतुभिः सक्तुभिरुपसेचनं स्त्रीपिण्डेषु । अञ्जनानुलेपनस्रजश्च ददाति । आचार्याय तथाऽन्तेवासिभ्यः शिष्येभ्योऽनपत्येभ्य इच्छया ददाति **मध्या वर्षे च तुरीया शाकाष्टका**—भवतीति शेषः ॥ ३ ॥ * ॥

हरि०—**ऊर्ध्वमाग्रहायण्यास्तिस्रोऽष्टकाः**—ऊर्ध्वमुपरि आग्रहायण्याः मार्गशीर्ष्याः पूर्णमायाः तिस्रः अष्टकाः त्रीणि अष्टकाख्यानि कर्माणि भवन्ति । तानि च सकृत् संस्कारकर्मत्वात् । कुतः संस्कारकर्मतेति चेत्, सुमन्तुगौतमादिभिः—“ अष्टकाः पार्वणश्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति पाकयज्ञसंस्थाः ” इत्यादिना अष्टकादीनां संस्कारत्वेन स्मरणात् । ननु संस्कारकर्मणामपि पञ्चमहायज्ञपार्वणस्थालीपाकपार्वणश्राद्धानां कुतोऽसकृत्करणम् ;अभ्यासश्रवणात् । तथा हि— “ अहरहः स्वाहा कुर्यादाकाष्ठात् ” इत्यादिना पञ्चमहायज्ञादीनाम् “ मासि मासि वोशनम्” इति श्राद्धस्य “पक्षादिषु” इति बहुवचनात् स्थालीपाकस्य । न तथाऽष्टकानामभ्यासः श्रूयते, येन ताः पुनःपुनरनुष्ठीयेरन् । एवं च सति चत्वारिंशत्संस्कारकर्मणां मध्ये येषामभ्यासः श्रूयते तान्यसकृद्भवन्ति इतराणि तु सकृदिति निर्णयः । **ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्येत्यपूपमांसशाकैर्यथासंख्यम्**—एवमष्टकाकर्माणि कर्तव्यत्वेनाभिधाय तत्र च द्रव्यदेवतापेक्षायां द्रव्याणि देवताश्चाभिधत्ते । तत्र प्रथमा ऐन्द्री इन्द्रो देवता अस्या इति ऐन्द्री इन्द्रदेवत्येत्यर्थः । द्वितीया वैश्वदेवी विश्वेदेवा देवता अस्या इति वैश्वदेवी विश्वेदेवदेवत्येत्यर्थः । तृतीया प्राजापत्या प्रजापतिर्देवता अस्या इति

प्राजापत्या प्रजापतिदेवत्येति यावत् । चतुर्थी पित्र्या पितरो देवता अस्या इति पित्र्या पितृदेवत्येत्यर्थः । अपूपश्च मांसं च शाकश्च अपूपमांसशाकास्तैः अपूपमांसशाकैः यथासङ्ख्यं यस्याः या यथा सङ्ख्या तामनतिक्रम्य यथासङ्ख्यं यजेतेत्यध्याहारः । एतदुक्तं भवति प्रथमायामपूपेनेन्द्रं यजेत, द्वितीयायां "मध्यमा गवा" इति वक्ष्यमाणत्वात् गोमांसेन विश्वान् देवान्, तृतीयायां शाकेन प्रजापतिमिति । अत्र तिस्र उपक्रम्य पित्र्येत्यनेन चतुर्थ्या अभिधानमयुक्तमिति चेत् न, उपक्रान्तानां तिसृणां देवताभिधानावसरे चतुर्थ्या अपि देवताया आचार्यस्य बुद्धिस्थत्वात् तदभिधानान्न दोषः । अत्राष्टकाशब्दः कर्मवचनोऽपि कालोपलक्षकः । यथा-वार्त्रघ्नी पौर्णमासी, वृधन्वती अमावास्येत्यत्र कर्माभिधायकौ पौर्णमास्यमावास्याशब्दौ कालस्याप्युपलक्षकौ । अन्यथा " आग्रहायण्या ऊर्ध्वं तिस्रोऽष्टकाः " इत्यनेन प्रतिपद्येवाष्टकाकर्मप्राप्तिः स्यात् । तस्मादष्टकाशब्देन अष्टम्युपलक्ष्यते । तथा च श्रुतिः ।"द्वादश पौर्णमास्यो द्वादशाष्टका द्वादशामावास्याः" इति । आश्वलायनस्मृतिश्च । " हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः " इति । एवमष्टकाकर्मसु द्रव्यदेवते अभिधायेदानीमुद्देशक्रमेण तदितिकर्तव्यतामाह-**प्रथमाऽष्टका पक्षाष्टम्याꣳ स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति त्रिꣳशत्स्वसारः**-इत्यादि । प्रथमा आद्या अष्टका अष्टकाख्यं कर्म भवतीति शेषः । कदा पक्षाष्टम्याम् । अत्र सौरादिभेदेन मासानामनेकत्वादष्टम्योऽप्यनेका इति किम्माससम्बन्धिन्यामष्टम्यामष्टकानामधेयं कर्मेति सन्देहापत्तौ पक्षाष्टम्यामित्याह। पक्षेऽपरपक्षे पौर्णमास्या ऊर्ध्वमिति वचनसामर्थ्यात्, पक्षाष्टमी कृष्णाष्टमी न पुनः सौरसावननाक्षत्रमाससम्बन्धिनी तेषां शुक्लकृष्णपक्षत्वाभावात्, तस्यां पक्षाष्टम्याम् । कथं, स्थालीपाकं चरुं श्रपयित्वा उक्तविधिना संसाध्य, आज्यभागौ आहुतिविशेषौ हुत्वा दशाज्याहुतीः त्रिꣳशत्स्वसारः इत्यादिभिर्दशभिर्मन्त्रैः प्रतिमन्त्रं जुहोति । **स्थालीपाकस्य जुहोति शान्ता पृथिवीत्यादि** । स्थालीपाकस्य चरोर्जुहोति शान्ता पृथिवीत्यादिभिश्चतुर्भिर्मन्त्रैश्चतस्र आहुतीर्जुहोति प्रतिमन्त्रम् । अत्र ऐन्द्री प्रथमाऽष्टकेति प्राधान्यमिन्द्रस्योक्तम् । अपूपेत्यनेन हविषः । यागावसरश्च नोक्तः सूत्रकृता, अतः सन्देहः कुत्र क्रियतामिति । किं तावत्प्राप्तम्, साधनत्वात्प्रधानत्वादाज्यभागानन्तरं क्रियतामिति । न, तत्र "आज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति" इति सूत्रकृताऽऽज्याहुतिविधानात् । तर्हि तदन्तेऽस्तु । न, तत्रापि "स्थालीपाकस्य जुहोति" इत्याज्यहोमानन्तरं स्थालीपाकहोमविधानात् । तस्मादनन्तरमेव युज्यते । तत अपूपेन "इन्द्राय स्वाहा" इत्येकामाहुतिं जुहुयात् । एवमुत्तरत्रापि । एवं प्रथमाष्टकेतिकर्तव्यतामनुविधायाधुना इयमेवोत्तरास्वप्यष्टकास्वितिकर्तव्यता इत्यभिप्रेत्य एतासां विशेषमात्रमनुविधत्ते--**मध्यमा गवेत्यादिभिर्मन्त्रैः**। मध्यमा तिसृणां द्वितीयेत्यर्थः । सा च गवा गोपशुना कर्तव्या इति सूत्रशेषः । अत्राचार्येण यद्यपि गोपशुरुक्तस्तथापि "अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु" इति स्मरणात्। तथा-"देवरेण सुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः । दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च॥ समुद्रयानस्वीकारः कमण्डलुविधारणम् । महाप्रस्थानगमनं गोपशुश्च सुराग्रहः॥अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः । असवर्णासु कन्यासु विवाहश्च द्विजातिषु ॥ वृत्तस्वाध्यायसापेक्षमघसङ्कोचनं तथा । अस्थिसञ्चयनादूर्ध्वमङ्गस्पर्शनमेव च । प्रायश्चित्ताभिधानं च विप्राणां मरणान्तिकम् । संसर्गदोषः पापेषु मधुपर्के पशोर्वधः ॥ दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः । शामित्रं चैव विप्राणां सोमविक्रयणं तथा॥ दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ । कलौ युगे त्विमान्धर्मान् वर्ज्यानाहुर्मनीषिणः॥" इति स्मरणात् गोपशोरस्वर्ग्यत्वाल्लोकविद्विष्टत्वात्कलौ विशेषतो वर्जनीयत्वाच्च न गवालम्भः कर्तव्यः । किन्तु अनिषिद्धपश्वन्तरेणावश्यकर्तव्याष्टकादिकर्म निर्वर्त्तनीयम् । **तस्यै वपां जुहोति वह वपां जातवेदः पितृभ्य**-इति । तस्यै इति षष्ठीस्थाने चतुर्थी । तस्याः गोर्वपां वह वपामित्यनेन मन्त्रेण जुहोति, पुनर्विश्वेभ्यो देवेभ्यः स्वाहेत्यवदानानि जुहोति । शेषं पशुकल्पे "पशुश्चेदाम्नाय"इत्यादिना

उपरिष्टाद्वक्ष्यति । " रूपं कालोऽनुनिर्वापः श्रवणं देवता तथा । आदौ ये विधृताः पक्षास्त इमे सर्वदा स्मृताः " इत्येतस्य संहितासु अदर्शनात् । समूलत्वे त्वनुनिर्वापादिसमाभिव्याहारेण श्रौतमात्रविषयत्वात् । वस्तुतस्तु "नान्यस्य तन्त्र प्रततेऽन्यस्य तंत्रं प्रतीयते" इति प्रायिकम् । **सान्तपनीयाधिकरणे**ऽन्यतन्त्रमध्येऽग्निहोत्रदर्शनात् । **श्वोऽन्वष्टकासु सर्वासां पार्श्वसक्थिसव्याभ्यां परिवृते पिण्डपितृयज्ञवत्**—श्वः अष्टम्यामुत्तरेद्युः, अन्वष्टकासु अष्टका अनु पश्चाद्भवन्तीत्यन्वष्टकाः तासु, सर्वासां चतसृणामष्टकानां कर्म भवतीति शेषः । केन द्रव्येणेत्यत आह—पार्श्वसक्थिसव्याभ्याम् । पार्श्वं च सक्थि च पार्श्वसक्थिनी ते च सव्ये च पार्श्वसक्थिसव्ये ताभ्यां पार्श्वसक्थिसव्याभ्याम् । अत्र तुल्याधिकरणविशेषणीभूतस्य सव्यशब्दस्योत्तरपदत्वं छान्दसम् । परिवृते सर्वतः प्रच्छादिते आवसथ्याग्निसदने । इतिकर्तव्यतापेक्षायामाह—पिण्डपितृयज्ञवत् । "अपराह्णे पिण्डपितृयज्ञः" इत्याद्युक्तपिण्डपितृयज्ञविधिना । **स्त्रीभ्यश्च**—"पिण्डपितृयज्ञवत्" इत्यनेन पितृपितामहप्रपितामहानामेव पिण्डदानं प्राप्तं ततोऽधिकमुच्यते स्त्रीभ्यः मातृपितामहीप्रपितामहीभ्यः पिण्डान्दद्यादिति चकारेण समुच्चीयते । अत्र सामान्योऽपि स्त्रीशब्दः पित्रादिसन्निधानात् मात्रादिपरोऽवसीयते अवगम्यते । **उपसेचनं च कर्षूषु सुरया तर्पणेन चाञ्जनानुलेपनँ स्रजश्च**—न केवलं स्त्रीभ्यः पिण्डान्दद्यात् किन्तु उपसेचनं च कुर्यात् । कया सुरया मद्येन, कासु कर्षूषु अवटेषु न केवलं सुरया तर्पणेन च तर्पयत्यनेनेति तर्पणसाधनं सक्त्वादि तेन । चकार उपसेचनक्रियासमुच्चयार्थः " करणाधिकरणयोश्च " इति ल्युडन्तोऽत्र तर्पणशब्दः । त्रैककुदं सौवीराञ्जनमिति प्रसिद्धं, तदलाभे लौकिकं कज्जलम्, अनुलेपनं सुगन्धिद्रव्यं चन्दनादि, स्रजः अप्रतिषिद्धसुरभिपुष्पमालाः । चकारो दद्यादिति क्रियासमुच्चयार्थः । **आचार्यायान्तेवासिभ्यश्चानपत्येभ्य इच्छन्**—यदि कामयेत तदा आचार्याय अन्तेवासिभ्यश्च शिष्येभ्यः पिण्डान् दद्यात् । यदि ते अनपत्याः स्युः । **मध्या वर्षे च तुरीया शाकाष्टका**—एवमष्टकात्रयं सामान्यतो विशेषतश्चानुविधाय पित्र्येत्युद्देशक्रमप्राप्तां विशेषतश्चतुर्थीमष्टकामाह—मध्या मध्ये, वर्षे वृष्टिकाले, प्रौष्ठपद्या ऊर्ध्वमष्टमीत्यर्थः । तुरीया चतुर्थी, शाकाष्टका शाकेन कालशाकाख्येन निर्वर्त्या अष्टका शाकाष्टका । इति सूत्रार्थः ॥ ३ ॥

अथाष्टकाकर्मपद्धतिः । तत्र मार्गशीर्ष्या ऊर्ध्वं कृष्णाष्टम्यां मातृपूजापूर्वाभ्युदयिकश्राद्धं विधाय आवसथ्याग्नौ कर्म कुर्यात् । केषाञ्चिन्मते अष्टकाकर्मसु आभ्युदयिकं नास्ति । "नाष्टकासु भवेच्छ्राद्धम्" इति वचनात् । तत्र ब्रह्मोपवेशनादिप्राशनान्ते विशेषः । तण्डुलानन्तरं पूर्वमौपासनाग्निसिद्धस्यैवापूपस्यासादनम्, प्रोक्षणं च प्रोक्षणकाले । तत्राज्यभागान्तं कर्म कृत्वा **त्रिँशत्स्वसार** इत्येवमाद्या दशाहुतीर्हुत्वा स्थालीपाकेन **शान्ता पृथिवी**त्यादिभिश्चतुर्भिर्मन्त्रैश्चतस्र आहुतीर्हुत्वा अपूपादिन्द्राय स्वाहेत्येकामाहुतिं दत्त्वा स्थालीपाकादपूपाच्च स्विष्टकृते जुहोति । तद्यथा--आज्यभागानन्तरं "त्रिँशत्स्वसार उपयन्ति निष्कृतँ समानं केतुं प्रतिमुञ्चमानाः । ऋतूँस्तन्वते कवयः प्रजानतीर्मध्ये छन्दसः परियन्ति भास्वतीः स्वाहा" इदं स्वसृभ्यो० ॥ १ ॥ "ज्योतिष्मती प्रतिमुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि । विपश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे स्वाहा" इदँ रात्र्यै० ॥ २ ॥ "एकाऽष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् । तेन दस्यून्व्यसहन्त देवा हन्ताऽसुराणामभवच्छचीभिः स्वाहा" इदमष्टकायै० ॥ ३ ॥ "अनानुजामनुजां मामकर्त्त सत्यं वदन्त्यन्विच्छ एतत् । भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति माँ प्रयुक्त स्वाहा" इदँ रात्रीभ्यो० ॥ ४ ॥ "अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधम् । भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त स्वाहा" इदँ रात्रीभ्यो० ॥ ५॥ "पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च । पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरधि लोकमेकँ स्वाहा" । इदँ रात्रीभ्यो० ॥ ६ ॥ "ऋतस्य गर्भः प्रथमा व्यूषिष्यपामेका महिमानं बिभर्ति । सूर्यस्यैका चरति निष्कृतेषु घर्मस्यैका सवितैकां नियच्छतु

स्वाहा'' इदꣳ रात्र्यै० ॥ ७ ॥ "या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे । सा नः पयस्वती धुक्ष्वोत्तरामुत्तराꣳ समाꣳ स्वाहा'' इदꣳ रात्र्यै० ॥ ८ ॥ "शुक्रऋषभा नभसा ज्योतिषाऽऽगाद्विश्वरूपा शबलीरग्निकेतुः । समानमर्थꣳ स्वपस्यमाना बिभ्रती जरामजर उष आगाः स्वाहा'' इदꣳ रात्र्यै० ॥ ९ ॥ "ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानाम् । एका सती बहुधोषो व्यौच्छत्सा जीर्णा त्वं जरयसि सर्वमन्यत्स्वाहा'' इदꣳ रात्र्यै० ॥ १० ॥ अथ स्थालीपाकेनाहुतीश्चतस्रः शान्ता पृथिवीत्यादिभिश्चतुर्भिर्मन्त्रैर्जुहोति प्रतिमन्त्रम् । तद्यथा—" शान्ता पृथिवी शिवमन्तरिक्षꣳ शं नो द्यौरभयं कृणोतु । शं नो दिशः प्रदिश आदिशो नोऽहोरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा'' इदं पृथिव्यै, अन्तरिक्षाय, दिवे, दिग्भ्यः, प्रदिग्भ्यः, अदिग्भ्यो, अहोरात्राभ्यां च० । "आपो मरीचीः परिपान्तु सर्वतो धाता समुद्रो अपहन्तु पापम् । भूतं भविष्यदकृन्ताद्विश्वमस्तु मे ब्रह्माभिगुप्तः सुरक्षितः स्याꣳ स्वाहा'' इदमद्भ्यः, मरीचिभ्यः, धात्रे, समुद्राय, ब्रह्मणे च० । "विश्वे आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतश्च सन्तु । ऊर्जं प्रजाममृतं दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु नः स्वाहा'' इदं विश्वेभ्यः, आदित्येभ्यः, वसुभ्यः, देवेभ्यः, रुद्रेभ्यः, मरुद्भ्यः, प्रजापतये, परमेष्ठिने च० । अष्टकायै स्वाहा इदमष्टकायै० । अथ अपूपादेकाऽऽहुतिः । इन्द्राय स्वाहा इदमिन्द्राय० । स्थालीपाकादपूपाच्च स्विष्टकृत् । ततो महाव्याहृत्यादिप्राजापत्यान्तं होमं विधाय प्राशनादि समापयेत् । श्वोऽन्वष्टकाकर्मावसथ्याग्नावेव । तत्र नित्यवैश्वदेवानन्तरमपराह्णे प्राचीनावीती नीवीबन्धनं कृत्वा दक्षिणामुखः परिवृतेऽग्निसमीपे अग्नेरुत्तरत उपविश्य आग्नेयादिदक्षिणान्तमप्रदक्षिणमग्निं दक्षिणाग्रैः कुशैः परिस्तीर्य अग्नेः पश्चिमतो दक्षिणसंस्थानि पात्राण्येकैकश आसादयति । तद्यथा—स्रुचं, चरुस्थालीं वा, स्रुक्पक्षे तु स्रुगनन्तरं चरुस्थालीमुदकम्, आज्यम्, मेक्षणम्, स्फ्यम्, उदपात्रम्, सकृदाच्छिन्नानि, क्रीतयोर्लब्धयोर्वा छागस्य पार्श्वसक्थ्योर्मांसम्, सुराम्, सक्तून्, अञ्जनम्, अनुलेपनम्, स्रजः, सूत्राणि च । ततः पार्श्वसक्थ्योर्मांसं श्लक्ष्णम् अणुशश्छित्त्वा प्रक्षिप्तासादितोदकायां चरुस्थाल्यां प्रक्षिप्याग्नावधिश्रित्याप्रदक्षिणं मेक्षणेन चालयित्वा शृतमांसमासादितेन घृतेनाभिघार्य दक्षिणत उद्वास्य पूर्वेणाग्निमानीयोत्तरतः स्थापयेत् । ततः सव्यं जान्वाच्य मेक्षणेन मांसमादाय अग्नये कव्यवाहनाय स्वाहेत्येकामाहुतिं हुत्वा, इदमग्नये कव्यवाहनायेति त्यागं विधाय, पुनर्मेक्षणेन मांसमादाय सोमाय पितृमते स्वाहेति द्वितीयामाहुतिं हुत्वा, इदं सोमाय पितृमत इति त्यागं विधाय, मेक्षणमग्नौ प्रास्याग्नेर्दक्षिणतः पश्चाद्वा दक्षिणामुख उपविश्य सव्यं जान्वाच्य भूमिमुपलिप्य तत्र स्फ्येन "अपहता असुरा रक्षाꣳसि वेदिषदः'' इति मन्त्रेण लेखां दक्षिणसंस्थामुल्लिख्य तथैव द्वितीयाम् उदकमुपस्पृश्य ये रूपाणीत्युल्मुकं प्रथमलेखाग्रे निधाय तथैव द्वितीयलेखाग्रे, उदकमुपस्पृश्य उदकपात्रमादाय प्रथमलेखायां पितृतीर्थेनामुकसगोत्रास्मत्पितरमुकशर्मन्नवनेनिक्ष्वेत्येवं पितामहप्रपितामहयोरवनेजनं दत्त्वा द्वितीयलेखायामेवमेवाऽमुकसगोत्रेऽस्मन्मातरमुकि देवि अवनेनिक्ष्वेत्येवं पितामहीप्रपितामह्योरवनेजनं दत्त्वा सकृदुपमूललूनानि दक्षिणाग्राणि बर्हींषि लेखयोरास्तीर्य तत्रावनेजनक्रमेणामुकसगोत्रास्मत्पितरमुकशर्मन्नेतत्ते मांसं स्वधा नम इति मांसपिण्डं दत्त्वा, पितामहप्रपितामहयोश्चैवं प्रदायापरलेखायाममुकसगोत्रेऽस्मन्मातरमुकि देवि एतत्ते मांसं स्वधा नम इति मांसपिण्डं दत्त्वा, पितामहीप्रपितामह्योरप्येवं पिण्डद्वयं प्रदाय, प्रतिपिण्डदानम् इदं पित्रे, इदं पितामहाय, इदं प्रपितामहाय, इदं मात्रे, इदं पितामह्यै, इदं प्रपितामह्यै इति त्यागान् विधाय इच्छया स्त्रीपिण्डसमीपेऽवनेजनसकृदाच्छिन्नास्तरणपूर्वकमनपत्याभ्य आचार्यायान्तेवासिभ्यश्च यथाक्रमं मांसपिण्डान् दद्यात् । चकारादन्येभ्योऽपि सपिण्डादिभ्यो दद्यात् । स्त्रीपिण्डसन्निधौ अवटत्रयं खात्वा तेषु अमुकसगोत्रेऽमुकि देवि सुरां पिबेत्येकत्रावटे सुरां प्रासिच्य तथैव पितामहीप्रपितामहीरितरयोरवटयोरासिच्य सक्तूनादायामुकसगोत्रेऽमुकि देवि तृप्यस्वेति मातृप्रभृतिभ्यः सक्तून्प्रत्यवटं प्रक्षिप्य ततस्तथैवाञ्जस्वेति मातृप्रभृतिभ्योऽञ्जनं दत्त्वा, अनुलिम्पस्वेत्यनुलेपनं च दत्त्वा, स्रजोऽपिनह्यस्वेति स्रजो दत्त्वा, अत्र पितर इत्यर्द्धर्चं जपित्वा पराङ-

धृत्य वायुं धारयन् आतमनात् उदङ्मुख आसित्वा तेनैवावृत्याऽमीमदन्तेत्यर्द्धर्चं जपित्वा पूर्ववदवनेज्य नीवीं विस्रस्य, **नमो व** इति प्रतिमन्त्रमञ्जलिं करोति । **गृहान्न** इत्याशिषं प्रार्थ्य, एतद्व इति प्रतिपिण्डं सूत्राणि दत्त्वा, ऊर्जमिति पिण्डेष्वपो निषिच्य पिण्डानुत्थाप्य उषायामवधायावघ्राय सकृदाच्छिन्नान्यग्नौ प्रास्योल्मुकं प्रक्षिप्योदकं स्पृष्ट्वाऽऽचम्य आन्वष्टक्यं श्राद्धं कुर्यात्। उषा ताम्रमयी मृन्मयी वा। "शिल्पिभ्यः स्थपतिभ्यश्च आददीत मतीः सदा" । उषा–मांससान्नाय्योषा चयनोषा पशूषा पिण्डपितृयज्ञोषा। इति **प्रथमाऽष्टका**। पौष्या ऊर्ध्वं कृष्णाष्टम्यां द्वितीयाऽष्टका वैश्वदेवी। तत्र प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा आवसथ्याग्नौ कर्म कुर्यात्। तत्र ब्रह्मोपवेशनम्, प्रणीताप्रणयनम्, परिस्तरणं च विधाय पात्राण्यासादयेत्। पवित्रच्छेदनानि, पवित्रे द्वे, प्रोक्षणीपात्रम्, आज्यस्थाली, द्वे चरुस्थाल्यौ, संमार्गकुशाः, उपयमनकुशाः, समिधः, स्रुवः, आज्यम्, काश्मर्यमय्यौ हस्तमात्र्यौ वपाश्रपण्यौ, शाखाविशाखे, अष्टका, चरुतण्डुलाः, हस्तमात्रं वारणम्, शूलम्, पशुश्रपणार्थमुषा ताम्रमयी मृन्मयी वा, पाशुकचरुतण्डुलाश्चेत्येतानि । अथोपकल्पनीयान्युपकल्पयन्ति। प्लक्षशाखा पलाशशाखा त्रिहस्तप्रमाणा। व्याममात्री कौशी। त्रिगुणरशना। उपाकरणतृणम्। एकं दर्भतरुणम्। द्विगुणरशना कौशी व्याममात्री। पशुश्छागः। पान्नेजनी। उदकपूर्णा स्थाली। असिः शस्त्रम्। हिरण्यशकलानि षट्। पृषदाज्यार्थं दधि चेति। ततः पवित्रकरणादिप्रोक्षणान्ते विशेषः। " विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि" इति पाशुकचरुतण्डुलानां प्रोक्षणम्। आज्यनिर्वापानन्तरमष्टकाचरुपात्रे तण्डुलान् प्रक्षिप्य पाशुकचरुपात्रे तण्डुलप्रक्षेपं कुर्यात्। ततो ब्रह्माऽऽज्यं, स्वयमष्टकाचरुम्, अन्यः पत्नी वा पाशुकचरुं युगपदग्नौ उदक्संस्थमधिश्रयन्ति। ततः पर्यग्निकरणादि प्रोक्षण्युत्पवनान्तं यजमान एव कुर्यात्। अथाग्नेः पश्चाद्दक्षिणत आरभ्य उदक्संस्थाः प्रागग्राः कुशास्तरणोपरि प्लक्षशाखा आस्तीर्याग्नेः प्रादक्षिण्येन पुरस्ताद्गत्वा पलाशशाखामग्निकुण्डलग्नामुदङ्मुख उपविष्टः वितस्तिमात्रं निखाय त्रिगुणरशनामादाय प्रादक्षिण्येन पलाशशाखां त्रिर्वेष्टयति। अथोपाकरणतृणेन "विश्वेभ्यो देवेभ्य उपाकरोमि" इति पशुमुपाकरोति शरीरे स्पृशति। ततो द्विगुणरशनया शृङ्गमध्ये तूष्णीं दक्षिणकर्णाधस्ताद्बध्नाति। ततो " विश्वेभ्यो देवेभ्यो नियुनज्मि" इति पलाशशाखायां पशुं नियुनक्ति। ततः प्रोक्षणीरादाय "ब्रह्मन्हविः प्रोक्षिष्यामि" इति ब्रह्माणमामन्त्र्य ॐ प्रोक्षेति ब्रह्मणाऽनुज्ञातो "विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि" इति पशुं प्रोक्ष्य प्रोक्षणीजलं पशोरास्ये कृत्वा शेषं पशोरधस्तादुपोक्षति सिञ्चति। अथ यथागतमागत्य स्वासने उपविश्योपयमनकुशानादाय समिधोऽभ्यादाय पर्युक्ष्य ब्रह्मणाऽन्वारब्ध आघारौ हुत्वा आज्यलिप्तेन स्रुवेण ललाटे अंसयोः श्रोण्योश्च पशुं समनक्ति अञ्जनं करोति। ततोऽसिमादाय स्रुवेणैव संयोज्याऽसिस्रुवाग्राभ्यां पशोर्ललाटमुपस्पृशति। ततोऽग्नेरुल्मुकमादायोत्थाय प्रदक्षिणं परिगच्छन् पशुम्, आज्यम्, शाखामग्निं त्रिः पर्यग्नि कृत्वोल्मुकमग्नौ प्रास्य तावत्प्राति परीत्याप्रादक्षिण्येनागत्य आस्तृततृणद्वयमादाय पशुं शिरस उन्मुच्य कण्ठे बद्ध्वा पलाशशाखात उन्मुच्य रशनया वामकरेण धृत्वा दक्षिणेन वपाश्रपणीभ्यामन्वारब्धमुदङ् नयति। तत्रैकं तृणं भूमौ धृत्वा तस्मिन्प्रत्यक्शिरसं प्राक्शिरसं वा उदक्पादं पशुं निपात्य स्वासने उपविशति यजमानः। अपरः कश्चिन्मुखं संगृह्य सञ्ज्ञपयति। सञ्ज्ञप्यमाने यजमानः पूर्णाहुतिवदाज्यं संस्कृत्य स्वाहा देवेभ्य इत्येकामाहुतिं हुत्वा, इदं देवेभ्य इति त्यक्त्वा, सञ्ज्ञप्ते देवेभ्यः स्वाहेति तेनैवाज्येन द्वितीयामाहुतिं हुत्वा, इदं देवेभ्य इति त्यक्त्वा, अपराः पञ्चाहुतीस्तूष्णीं जुहोति इदं प्रजापतये इति त्यागः पञ्चसु। तत उत्थाय पशुं मोचयित्वा वपाश्रपणीभ्यां नियोजनीं त्यजति। ततः पान्नेजनीमादाय पशोः प्राणान्स्वयमेव शुन्धति। तद्यथा–पान्नेजनीजलमादाय मुखं, दक्षिणोत्तरे नासिके, दक्षिणोत्तरे चक्षुषी, दक्षिणोत्तरौ कर्णौ, नाभिम्, मेढ्रम्, पायुमेकीकृत्य पादांश्च क्रमेण शुन्धति। शेषं पशोः पश्चान्निषिञ्चति। तत पशुमुत्तानं कृत्वा नाभ्यग्रे उदगग्रं तृणं निधायासिधारया तृणमभिनिधाय छिनत्ति। अथ द्विधाभूतस्य

तृणस्य मूलमादाय उभयतो लोहितेनाङ्क्त्वा निरस्य वपामुत्खिदति । ततो वपाश्रपण्यावादाय प्रोर्णौति, ततश्छिनात्ति वपां तां च प्रक्षाल्याग्नेरुत्तरतः स्थित्वा प्रतप्य शाखाग्न्योरन्तरेणाहृत्याग्नेर्दक्षिणतः स्थित्वा वपां श्रपयति । श्रप्यमाणां च स्रुवेणाज्यं गृहीत्वाऽभिघार्य प्रत्याहृत्य ब्रह्माणं प्रदक्षिणीकृत्य स्वासने उपविश्य स्रुवेणाज्यं गृहीत्वा वपायां प्राणदानं कृत्वा प्लक्षशाखायामासाद्यालभते । ततो ब्रह्मान्वारब्ध आज्यभागौ हुत्वा **त्रिंशत्स्वसार** इति दशाहुतीरनन्वारब्धो हुत्वा, अष्टकाचरुणा **शान्ता पृथिवी**त्यादिचतुर्भिर्मन्त्रैश्चतस्र आहुतीर्हुत्वा, वपाहोमाय वामहस्तस्थे स्रुवे आज्यमुपस्तीर्य हिरण्यशकलमवधाय वपां द्विधाऽवदाय गृहीत्वा पुनर्हिरण्यशकलमवधाय द्विरभिघार्य "वह वप जातवेदः पितृभ्यः" इति प्राचीनावीतिनो दक्षिणामुखस्य वपाहोमः । "इदं पितृभ्यः" इति त्यागः । "इदं जातवेदसे" इति वा त्यक्त्वा यज्ञोपवीती भूत्वोदकं स्पृष्ट्वा वपाश्रपण्यौ विपर्यस्ते अग्नौ प्रास्य पशुं विशास्ति । तद्यथा–हृदयम्, जिह्वाम्, क्रोडम्, सव्यबाहुम्, पार्श्वे, यकृत, वृक्कौ, गुदमध्यम्, दक्षिणश्रोणिमिति सर्वावदानपक्षे । दक्षिणबाहुम्, गुदतृतीयानिष्टम्, सव्यश्रोणिमिति त्र्यङ्गानि, स्विष्टकृद्द्रव्याणि यदा त्रीणि तदा हृदयम्, जिह्वाम्, क्रोडमिति त्रीणि । पञ्चावदानपक्षे-हृदयम्, जिह्वाम्, क्रोडम्, सव्यबाहुम्, पार्श्वे इति पञ्चावद्यति खण्डयति । तस्मिन्पक्षे शेषान् स्विष्टकृतेऽवद्यति । ततोऽवदानानि प्रक्षाल्य शूलेन हृदयं प्रतप्य उषामग्नावधिश्रित्य अवदानानि प्रक्षिपति स्वल्पमुदकं च । ततस्त्रिः प्रच्युते हृदयमुपरि कृत्वा पृषदाज्येन हृदयमभिघार्येतराण्यवदानानि त्र्यङ्गवर्जितानि आज्येनाभिघारयति । अथोषामुद्वास्यावदानान्युद्धृत्य कस्मिँश्चित्पात्रे हृदयादिक्रमेण उदक्संस्थानि निधाय स्रुवेणाज्यमादाय हृदयादीनां त्र्यङ्गवर्जितानां क्रमेण प्राणदानं कृत्वा शाखाग्न्योरन्तरेणाहृत्य प्लक्षशाखासु हृदयादिक्रमेणोदक्संस्थान्यासादयति । ततस्त्र्यङ्गवर्जितान्यालभते । अथ प्रधानहोमार्थं स्रुवेणाज्यमुपस्तीर्य हिरण्यशकलमवधाय । हृदयादिभ्यः क्रमेण द्विर्द्विरवदाय स्रुवे क्षिप्त्वा स्थालीपाकाच्च सकृदवदायोपरि क्षिप्त्वा तदुपरि हिरण्यशकलं दत्त्वा सकृदभिघार्य "विश्वेभ्यो देवेभ्यः स्वाहा" इति जुहुयात् । इदं "विश्वेभ्यो देवेभ्यः" इति त्यक्त्वा स्विष्टकृदर्थं स्रुवमुपस्तीर्य हिरण्यशकलं दत्त्वा त्र्यङ्गेभ्यो द्विर्द्विरवदाय स्रुवे कृत्वा चरुद्वयाच्च सकृत्सकृदवदाय हिरण्यशकलमवधाय द्विर्द्विरभिघार्य अग्नये स्विष्टकृते स्वाह इति जुहुयात्, इदमग्नये स्विष्टकृते इति त्यागः । असर्वावदानपक्षे प्रधानावदानशेषात् स्विष्टकृद्धोम इति विशेषः । ततो महाव्याहृत्यादिप्राजापत्यान्ता नवाज्याहुतीर्हुत्वा ब्रह्मान्वारब्धो हुत्वा संस्रवं प्राश्य ब्रह्मणे पश्वङ्गं दक्षिणां दद्यात् । ततः स्मृत्यन्तरोक्तं पञ्चविंशतिब्राह्मणभोजनं च दद्यात् । अस्यैव पशोः सव्यपार्श्वसक्थिभ्यामपरादिनेऽन्वष्टकाकर्म पूर्ववत् । माघ्या ऊर्ध्वं कृष्णाष्टम्यां तृतीयाऽष्टका प्राजापत्या । सा यथा प्रथमाऽष्टका । तत्र अपूपस्थाने कालशाकचरुं तदग्निसिद्धमेवासादनकाले आसाद्य प्रोक्षणकाले प्रोक्षयेत् । ततोऽपूपयागस्थाने "प्रजापतये स्वाहा" इति कालशाकं जुहुयात् । शेषं समानम् । कालशाकालाभे वास्तुकम् । अन्येद्युः पूर्ववदन्वष्टकाकर्मेति । प्रौष्ठपद्या ऊर्ध्वं कृष्णाष्टम्यां चतुर्थी पित्र्या शाकाष्टका । सा च प्रथमाष्टकावत् । एतावान् विशेषः । चरुस्थालीद्वयं तण्डुलानन्तरं कालशाकमासादयेत् । कालशाकचरुसम्बद्धमासादनादि होमान्तं कर्म प्राचीनावीती दक्षिणामुखः कुर्यात् । अन्यद्यज्ञोपवीती पूर्वाभिमुखः कालशाकचरुसम्बद्धं कर्म कृत्वोदकमुपस्पृशेत् । अपूपहोमस्थाने "पितृभ्यः स्वाहा" इति शाकचरोरेकामाहुतिं जुहुयात् । प्रातरन्वष्टकाकर्म पूर्ववदिति ॥ ३ ॥ * ॥

विश्व०—**ऊर्ध्वं···ष्टकाः**–भवन्तीति शेषः । विद्यमानत्वेऽपि चतुर्थ्यास्त्रिषु कृष्णपक्षेषु क्रमेणानुष्ठीयमानत्वात्तिस्र इत्युक्तम् । यद्वा–स्वतन्त्रेच्छस्य नियोगपर्यनुयोगानर्हत्वात्तिस्र इत्युक्तिः । अष्टकेति कर्मनामधेयं, तच्च पञ्चमहायज्ञपक्षादिवदावृत्तिकर्म संस्कारकर्मत्वात् । न चाभ्यासाश्रवणान्न तथेति वाच्यं, **शाङ्खायन**सूत्रे–"न त्वेव" इत्येवकारतुशब्दाभ्यामष्टकाप्रतियोगिकावृत्तेर्नियमितत्वात् । न च शाखान्तरीयत्वात्तदकिंचित्करमिति वाच्यम्, उपवीतपरिधानमन्त्रादेरपि शाखान्तरीयत्वादकिंचित्करतापत्तेरित्यलम् । अत्रापि मातृपूजाऽऽभ्युदयिके प्रथमप्रयोगे भवतः । केचिन्नेच्छन्ति । आरम्भश्च "ऊर्ध्वमाग्रहायण्याः" इति सूत्रणान्मार्गशिरःकृष्णाष्टम्यामेव । तेन तत्र शरीरसमयाद्यशुद्धिप्रयुक्ताऽनारम्भेऽष्टकान्तरकाले तच्छुद्धावपि तदनारम्भ इत्यवसीयते । समयमुक्त्वा तासां द्रव्यदेवते आह–**ऐन्द्री···संख्यम**–पित्र्या चतुर्थी तां वक्ष्यति । अपूपो मण्डकः,

मांसं "मध्यमा गवा" इति वक्ष्यति, शाकं कालशाकम्। यथासंख्यं पित्र्यां विहाय यथाक्रमं द्रव्यदेवतासंबन्धः। देवतानिरूपणं चतुर्थ्यां कृतम्। द्रव्यसमयौ वक्ष्येते। **प्रथमा...होति**–आग्रहायण्यनन्तरमासदलपक्षस्याष्टम्यां प्रथमाऽष्टका भवतीत्यर्थः। कथमत आह–**स्थालीपाकꣳ श्रपयिऽऽत्वाज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति**। तत्र विशेषः। पात्रासादने–कर्परिका, चरुस्थाली, पिष्टं, तण्डुलाः, अपूपग्रहणे–इन्द्राय जुष्टं [पिष्टमयापूपः]। चरुग्रहणे–पृथिव्यै, अन्तरिक्षाय, दिवे, दिग्भ्यः, प्रदिग्भ्यः, आदिभ्यः, अहोरात्राभ्याम्, अद्भ्यः, मरीचिभ्यः, धात्रे, समुद्राय, ब्रह्मणे, विश्वेभ्यो देवेभ्यः, आदित्येभ्यः, वसुभ्यः, देवेभ्यः, रुद्रेभ्यः, मरुद्भ्यः, प्रजापतये, परमेष्ठिने, अष्टकायै जुष्टं गृह्णामि। प्रोक्षणे त्वाशब्दः। आज्याधिश्रयणानन्तरं कर्परिकामधिश्रित्य तत्रापूपं संस्थाप्य चरुमधिश्रित्य पर्यग्निकरणादि। शेषं परिभाषावत्। तत आज्यभागानन्तरं दशाज्याहुतीर्वक्ष्यमाणैर्मन्त्रैर्जुहोतीत्यर्थः। तानाह–**त्रिꣳश...मन्यत्स्वाहेति**–त्यागास्तु। इदं त्रिꣳशत्स्वसृभ्यः १। इदं रात्र्यै २। त्रिषु इदमष्टकायै ३—५। पञ्चसु इदं रात्र्यै ६—१०। आद्याष्टकाया इन्द्रदेवताकत्वादिन्द्राय स्वाहेत्यपूपहोमः। इदमिन्द्राय। केचित्तु स्थालीपाकहोमानन्तरमपूपहोममाहुः। **स्थाली...कायै स्वाहेति**–**शान्ता पृथिवी**त्यादिचतुर्भिर्मन्त्रैश्चतस्र आहुतीः स्थालीपाकस्य जुहोतीत्यर्थः। त्यागास्तु इदं पृथिव्यै, अन्तरिक्षाय, दिवे, दिग्भ्यः, प्रदिग्भ्यः, आदिग्भ्यः, अहोरात्राभ्यां च ॥१॥ इदमद्भ्यः, मरीचिभ्यः, धात्रे, समुद्राय, ब्रह्मणे च॥२॥ इदं विश्वेभ्यो देवेभ्यः, आदित्येभ्यः, वसुभ्यः देवेभ्यः, रुद्रेभ्यः, मरुद्भ्यः, प्रजापतये (परमेष्ठिने) च। इदमष्टकायै ॥३॥ उभयोः स्विष्टकृत्। महाव्याहृत्यादिब्राह्मणभोजनान्तं, ततो वैश्वदेवः। इच्छयाऽष्टकाश्राद्धं केचिन्नेच्छन्ति (?)॥ इति **प्रथमाऽष्टका**। क्रमेण मध्यमाकर्तव्यतामाह–**मध्यमागवा**–कर्तव्यतां वक्ष्यति "पशुश्चेदाप्लाव्य" इत्यादिना। "गोपशुश्च सुराग्रहः" इति गोपशोर्निषिद्धत्वात्कलौ छागः। तदभावे चरुः। **तस्यै...तृभ्य इति**–चतुर्थी षष्ठ्यर्थे, तस्या इत्यर्थः। वपावदानात्प्रागुपरिष्टाच्च हिरण्यशकलोपस्तराभ्यां पञ्चावत्तता संपाद्या। होमश्चाऽपसव्येन, सव्यं जान्वाच्य पितृतीर्थेन **वह वपा**मित्यस्य पैतृकत्वात्। पशोः कर्त्तव्यतां वदिष्यति। चरुपक्षे "विश्वेभ्यो देवेभ्यः स्वाहा" इत्यपूपवच्चरुहोमः। इदं विश्वेभ्यो देवेभ्यः। ततः द्वितीयस्थालीपाकहोमादि। अन्यत्सर्वं प्रथमाष्टकावत्। श्रप्यमाणस्य मण्डमुद्धृत्य स्रुवेणापसव्येन वपाहोमः। इदं पितृभ्यः। **श्वोऽन्व...वत्**–सर्वासामष्टकानां श्वः उत्तरेद्युः। तदर्थमाह–अन्वष्टकासु अष्टकायाः पश्चात्क्रियमाणाः अन्वष्टकाः तासु। पार्श्वं च सक्थि च पार्श्वसक्थिनी ते च ते सव्ये च पार्श्वसक्थिसव्ये ताभ्यामन्वष्टकाख्या क्रिया कर्तव्येत्यर्थः। कुत्रेत्यत आह–परिवृते आवसथ्यगृहे सर्वत आच्छादिते। कथं स्यादत आह–पिण्डपितृयज्ञवत्। पदार्थक्रमश्चायम्। अपराह्णे परिवृतस्थस्याग्नेः वैश्वदेवानन्तरं परिस्तरणं, ततोऽपसव्येन नीवीबन्धनम्। होमवर्जमपसव्येन दाक्षिणाभिमुखेन। पात्रासादने स्रुग्वा। असिना पार्श्वसक्थ्नोः मांसानि च्छित्त्वा आसादयेत्। सुरादिपञ्चकम्। चरुपक्षे तण्डुलाः। चरुग्रहणवत् मांसग्रहणश्रपणादि। कण्डननिष्पवनादि न भवति। तेनोलूखलादेरासादनाभावो मांसपक्षे। अन्यत्सर्वं पिण्डपितृयज्ञवदित्यनेनादिष्टपिण्डपितृयज्ञवदतिदिष्टम्। विशेषमाह **स्त्रीभ्यश्च**—मातृपितामहीप्रपितामहीभ्यः पित्रादिभ्यः पिण्डदानानन्तरं, पिण्डदानसमुच्चयार्थश्चकारः। **उप...न च**–न केवलं स्त्रीभ्यः पिण्डदानमपितु कर्षूषु सुरया तर्पणेन चोपसेचनम्। काण्डहरीतकीगुडरसेन च सुरा। तर्पणं सक्तुभिः। स्त्रीपिण्डेभ्यः पश्चात्कर्षवः, दैर्घ्ये प्रादेशमिताः चतुर्भिरङ्गुलैर्विस्तृताः। अङ्गुलखाता। तेषु सुरायाः सक्तूनां चासेकः। प्राक्सूत्रसंप्रदानसमुच्चयार्थ आद्यश्चकारः। सुरासक्त्वोः समुच्चयार्थो द्वितीयश्चकारः। प्रयोगस्तु–गोत्रे मातः अमुकिदेवि सुरां पिबस्व। मातृद्वयं चेत् पिबेथां, बह्वयश्चेत्पिबध्वमिति दक्षिणसंस्थं प्रत्यवटप्रक्षेपे प्रयोगः। एवं तृप्यस्व तृप्येथां तृप्यध्वमिति प्रत्यवटं मातृपितामहीप्रपितामहीभ्यः सक्तून् क्षिपेत्। **अञ्ज...जश्च**–स्त्रीपिण्डेषु प्रतिपिण्डमञ्जनं सौवीराञ्जनमभावे लौकिकम्। अनुलेपनं चन्दनादि। स्रजः पितृप्रियपुष्पमालाः। चकारः दद्यादिति क्रियासमुच्चयार्थः। प्रयोगस्तु—गोत्रे मातः अमुकिदेविदे अञ्जस्व, अञ्जेथाम्, अञ्जध्वम्। एवं पितामहीप्रपितामहीभ्याम्। अनुलिम्पस्व, अनुलिम्पेथाम्, अनुलिम्पध्वम्। स्रजोऽपिनह्यस्व, स्रजोऽपिनह्येथाम्, स्रजोऽपिनह्यध्वम्। **अत्र पितर** इत्यादि उल्मुकप्रक्षेपान्तं पिण्डपितृयज्ञवत्। **आचा...इच्छन्**–कुर्यादिति शेषः। आचार्यादिभ्यो मात्रादिभ्यः पिण्डदानानन्तरमवटखननात्प्राक्पिण्डदानं ध्येयम्। अनुकम्प्याऽनुक्तसमुच्चयार्थश्चकारः। तृतीया कालशाकेन। प्रजापतये जुष्टम्। प्रजापतये स्वाहेति प्रधानहोमः। शेषं प्रथमाष्टकावत्। एवं मार्गशिरःपौषमाघकृष्णाष्टमीषु क्रमेण तिस्रः अष्टका भवन्तीत्युक्तम्। यद्यपि चतुर्थ्यां अपि देवता उक्ता तथापि "मध्यमा गवा" इत्युक्तेर्द्वयोर्मध्यमत्वप्रसक्तिव्युदासाय चतुर्थीं पृथक्सूत्रयाति। **मध्या...ष्टका**–वर्षे संवत्सरे चैत्रादिरूपे फाल्गुनान्ते। मध्या संवत्सरमध्ये भाद्रपदापरपक्षेऽष्टम्यां तुरीया चतुर्थी कालशाकेनाष्टका शाकाष्टका कर्तव्येति शेषः। केचित्तु वर्षे वृष्टिकाले मध्या वृष्टिकालमध्यवर्तिनीत्याहुः। तन्मते व्याख्यानभेदेऽपि व्याख्येयाऽभेद इति द्रष्टव्यम्। तृतीयायाः शाकसाधनत्वदाढर्याय चतुर्थ्यां शाकसाधनत्वोक्तिः स्वतन्त्रस्य नियोगपर्यनुयोगानर्हत्वादिति। अत्रापि कालशाकचरोरपसव्येन ग्रहणप्रोक्षणादि। पितृभ्यो जुष्टमिति। दशाज्याहुतिहोमानन्तरमपसव्येन "पितृभ्य

स्वाहा ” इति कालशाकचरुहोमः । इदं पितृभ्यः । अन्यत्सर्वं प्रथमाष्टकावत् । एवं चतस्र अष्टका अन्वष्टकाश्चोक्ताः । तासु द्रव्यदेवताव्यतिरिक्तविशेषाभावो मांसाभावे । अष्टकानन्तरमन्वष्टकाश्राद्धं सर्वत्र । इति तृतीयकाण्डस्य तृतीया कण्डिका ॥ ३ ॥

२६६ अथातः शालाकर्म ॥ १ ॥ पुण्याहे शालां कारयेत् ॥ २ ॥ तस्या अवटमभिजुहोत्यच्युताय भौमाय स्वाहेति ॥ ३ ॥ स्तम्भमुच्छ्रयति इमामुच्छ्रयामि भुवनस्य नाभिं वसोर्धारां प्रतरणीं वसूनाम् । इहैव ध्रुवान्निमिनोमि शालां क्षेमे तिष्ठतु घृतमुक्षमाणा । अश्वावती गोमती सूनृतावत्युच्छ्रयस्व महते सौभगाय । आ त्वा शिशुराक्रन्दत्वा गावो धेनवो वाश्यमानाः । आ त्वा कुमारस्तरुण आ वत्सो जगदैः सह । आ त्वा परिस्रुतः कुम्भ आ दध्नः कलशैरुपक्षेमस्य पत्नी बृहती सुवासा रयिन्नो धेहि सुभगे सुवीर्यम् । अश्वावद्गोमदूर्जस्वत् पर्णं वनस्पतेरिव । अभि नः पूर्य्यताꣳ रयिरिदमनुश्रेयो वसान इति चतुरः प्रपद्यते ॥ ४ ॥ अभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकꣳ श्रपयित्वा निष्क्रम्य द्वारसमीपे स्थित्वा ब्रह्माणमामन्त्रयते ब्रह्मन् प्रविशामीति ॥ ५ ॥ ब्रह्मानुज्ञातः प्रविशत्यृ[*]तं प्रपद्ये शिवं प्रपद्य इति ॥ ६ ॥ आज्यꣳ संस्कृत्येह रतिरित्याज्याहुती हुत्वाऽपरा जुहोति । वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवा नः । यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ॥ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ॥ वास्तोष्पते शग्मया सꣳसदा ते सक्षीमहि रण्वया गातुमत्या । पाहि क्षेम उत योगे वरन्नो यूयं पात स्वस्तिभिः सदा नः स्वाहा । अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि नः स्वाहेति ॥ ७ ॥ स्थालीपाकस्य जुहोति । अग्निमिन्द्रं बृहस्पतिं विश्वान्देवानुपह्वये सरस्वतीं च वाजीं च वास्तु मे दत्त वाजिनः स्वाहा ॥ सर्पदेवजनान्सर्वान् हिमवन्तꣳ सुद[+]र्शनम् । वसूंश्च रुद्रानादित्यानीशानं जगदैः सह । एतान्त्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा । पूर्वाह्णमपराह्णं चोभौ मध्यन्दिना सह । प्रदोषमर्द्धरात्रं च व्युष्टां देवीं महापथाम् । एतान्त्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ॥ कर्तारं च विकर्तारं विश्वकर्माणमोषधींश्च वनस्पतीन् । एतान्त्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ॥ धातारं च विधातारं निधीनां च पतिꣳ सह । एतान्त्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ॥ स्योनꣳ शिवमिदं वास्तु दत्तं

---

[*] ऋचामिति पाठान्तरम् ।
[+] नगेश्वरमिति पाठान्तरम् ।

ब्रह्मप्रजापती । सर्वाश्च देवताः स्वाहेति ॥ ८ ॥ प्राशनान्ते काꣳस्ये सम्भारानोप्यौदुम्बरपलाशानि ससुराणि शाद्वलं गोमयं दधि मधु घृतं कुशान्यवांश्चासनोपस्थानेषु प्रोक्षेत् ॥ ९ ॥ पूर्वे सन्धावभिमृशति । श्रीश्च त्वा यशश्च पूर्वे सन्धौ गोपायेतामिति ॥ १० ॥ दक्षिणे सन्धावभिमृशति । यज्ञश्च त्वा दक्षिणा च दक्षिणे सन्धौ गोपायेतामिति ॥ ११ ॥ पश्चिमे सन्धावभिमृशति । अन्नं च त्वा ब्राह्म*णाश्च पश्चिमे सन्धौ गोपायेतामिति ॥ १२ ॥ उत्तरे सन्धावभिमृशति । ऊर्क् च त्वा सूनृता चोत्तरे सन्धौ गोपायेतामिति ॥ १३ ॥ निष्क्रम्य दिश उपतिष्ठते । केता च मा सुकेता च पुरस्ताद्गोपायेतामित्यग्निर्वै केताऽऽदित्यः सुकेता तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पुरस्ताद्गोपायेतामिति ॥ १४ ॥ अथ दक्षिणतो गोपायमानं च मा रक्षमाणा च दक्षिणतो गोपायेतामित्यहर्वै गोपायमानꣳ रात्री रक्षमाणा ते प्रपद्ये ताभ्यां नमोऽस्तु ते मा दक्षिणतो गोपायेतामिति ॥ १५ ॥ अथ पश्चात् दीदिविश्च मा जागृविश्च पश्चाद्गोपायेतामित्यन्नं वै दीदिविः प्राणो जागृविस्तौ प्रपद्ये ताभ्यान्नमोऽस्तु तौ मा पश्चाद्गोपायेतामिति ॥१६॥ अथोत्तरतोऽस्वप्नश्च माऽनवद्राणश्चोत्तरतो गोपायेतामिति चन्द्रमा वा अस्वप्नो वायुरनवद्राणस्तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मोत्तरतो गोपायेतामिति ॥ १७ ॥ निष्ठितां प्रपद्यते धर्मस्थूणा राजꣳ श्रीस्तूपमहोरात्रे द्वारफलके । इन्द्रस्य गृहा वसुमन्तो वरूथिनस्तानहं प्रपद्ये सह प्रजया पशुभिः सह । यन्मे किञ्चिदस्त्युपहूतः सर्वगणसखायसाधुसंवृतः । तान्त्वा शालेऽरिष्टवीरा गृहान्नः सन्तु सर्वत इति ॥ १८ ॥ ततो ब्राह्मणभोजनम् ॥ १९ ॥ ४ ॥ * ॥

कर्कः—अथातः शालाकर्म—व्याख्यास्यते इति सूत्रशेषः । शालाशब्देन गृहमभिधीयते । पुण्याहे शालां कारयेत्—पुण्याहग्रहणमुदगयनापूर्यमाणपक्षयोरनादरार्थम् । तस्या अवटमभिजुहोत्यच्युताय भौमाय स्वाहेति—तस्याः शालायाः यो योऽवटस्तं तमभिजुहोति । अवटसंस्कारत्वात्प्रत्यवटं होमः । चत्वारो ह्यवटा मूलस्तम्भानां प्रसिद्धा इति स्तम्भशालायाम् । धवलगृहे चतुर्षु कोणशिलास्थानेषु होमः, स्तम्भस्थानीयत्वाच्छिलानाम् । स्तम्भमुच्छ्रयतीमामुच्छ्रयामीति । एभिर्मन्त्रैः पूयताꣳ रयिरिदमनुश्रेयो वसानः—इत्येवमन्तैः । इति चतुरः—एवं चतुरः स्तम्भानुच्छ्रयति । इतरगृहे तु शिलान्यास एतैर्मन्त्रैः । अभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकꣳ श्रपयित्वा निष्क्रम्य—बहिर्निष्क्रमणं तु प्रोक्षण्युत्पवनीयोपयमनकुशादानात्पूर्वं भवति । द्वारसमीपे स्थित्वा ब्रह्माणमामन्त्रयते ब्रह्मन्प्रविशामीति—शालायामभ्यन्तरतोऽग्निमुपसमाधाय ब्रह्मोपवेशनं चोदपात्रावसरविधित्सया । प्रणीतानां ह्यधिकमेतत् । स्थालीपाकꣳ श्रपयित्वा निष्क्रम्य

---

* ब्राह्मणश्चेति पाठान्तरम् ॥

द्वारसमीपे स्थित्वा ब्रह्मन्प्रविशामीति ब्रह्माणमामन्त्रयते । **ब्रह्मानुज्ञातः प्रविशत्यृचं प्रपद्ये**–इत्यनेन मन्त्रेण । **आज्यठं संस्कृत्येह रतिरित्याज्याहुती हुत्वाऽपरा जुहोति । वास्तोष्पते प्रतिजानीहि०**–इत्येभिर्मन्त्रैः प्रातिमन्त्रम् । आज्यं संस्कृत्येत्यवसरविधित्सया आज्याहुतीनामुच्यते । तत आघारादि । **स्थालीपाकस्य जुहोत्यग्निमिन्द्रमिति**–एवमादिभिर्मन्त्रैः प्रातिमन्त्रम् । ततः स्विष्टकृदादि । **प्राशनान्ते काꣳस्ये सम्भारानोप्यौदुम्बरपलाशानि ससुराणि शाद्वलं गोमयं दधि मधु घृतं कुशान् यवांश्चासनोपस्थानेषु प्रोक्षेत्**–प्राशनोत्तरकालं कांस्ये भाजने सम्भारानावपेत् । औदुम्बरपत्राणि ससुराणि सक्षीराणि । सह सुरयेत्यपरे । शाद्वलं दूर्वा, गोमयं दधि मधु घृतं कुशान्यवांश्च तैरासनोपस्थानेषु प्रोक्षणं करोति । आसनानि जयन्ती नागदन्तकादिस्थानानि । उपस्थानानि देवतास्थानानि तानि च वास्तुशास्त्रे ज्ञेयानि । **पूर्वे सन्धावभिमृशति श्रीश्च त्वा यशश्चेति**–अनेन मन्त्रेण । सन्धिशब्देन कुडयोऽभिधीयते । **दक्षिणे सन्धावभिमृशति यज्ञश्च त्वा दक्षिणा चेति**–अनेन मन्त्रेण । **पश्चिमे सन्धावभिमृशत्यन्नं च त्वा ब्राह्मणाश्चेति**–अनेन मन्त्रेण । **उत्तरे सन्धावभिमृशत्यूर्कं च त्वा सूनृता चेति**–अनेन मन्त्रेण । **निष्क्रम्य दिश उपतिष्ठते केता च मा सुकेता च**–इत्येभिर्मन्त्रैः । निगदव्याख्यातमेतत् । **निष्ठितां प्रपद्यते धर्मस्थूणा राजमिति**–अनेन मन्त्रेण । निष्ठितां परिसमाप्तां शालां प्रविशत्यनेन मन्त्रेण । **ततो ब्राह्मणभोजनम्** ॥ ४ ॥

जय०–अथातः शालाकर्म–वक्ष्यत इति सूत्रशेषः । शाला गृहमित्यनर्थान्तरम् । सा च पुण्याहे कार्या । पुण्याहग्रहणं चोदगयनापूर्यमाणपक्षयोरनादरार्थम् । तस्याः शालायाः यो योऽवटस्तं तमभिजुहोति । अवटसंस्कारत्वात्प्रत्यवटं होमः । **स्तम्भशालायां**–चत्वारोऽवटा मूलस्तम्भानाम् । धवलगृहे तु चतुर्षु कोणशिलास्थानेषु होमः । स्तम्भस्थानीयत्वाच्छिलानाम् । तत्र होममन्त्रः **अच्युताये**ति अस्यार्थः । तत्र प्रजापपिरनुष्टुप् इन्द्रोऽवटहोमे० । अच्युताय अप्रच्युतस्वरूपाय । भौमाय भूनागायेति । **इमामुच्छ्रयामी**त्येवमादिमन्त्राणां विश्वामित्रः क्रमेण त्रिष्टुप्पङ्क्तिजगत्यनुष्टुभः स्तम्भोच्छ्रयणे० । इमां स्थूणां शालाधाररूपाम् उच्छ्रयामि उत्थापयामि । किम्भूताम् । भुवनस्य भूर्लोकस्य भुवनैकदेशवर्तिनो गृहस्य वा नाभिम् आधारम् वसोर्द्धाराम् वसुनो धनस्य धारां स्रुतिं धरित्रीं वा । वसूनां गोमहिष्यश्वस्वर्णरत्नादिविविधधनानां प्रतरणीं प्लावनीं प्रसारिणीमिति यावत् । इहैव अत्रैव स्थूणायां, शालां गृहं, निमिनोमि स्थापयामि । कीदृशीं शालाम् । ध्रुवां स्थिराम् ॥ इयं च शाला क्षेमे निरुपद्रवे प्रदेशे, घृतं सुखम् उक्षमाणा सिञ्चन्ती अस्मान्प्रापयन्ती तिष्ठतु स्थिता भवतु । हे शाले त्वम् अश्वावती अश्वयुक्ता । गोमती गोयुक्ता । सूनृतावती प्रियसत्यवाक्यवती । उच्छ्रयस्व उत्थिता भव । किमर्थम् । महते सौभगाय भाग्योदयाय । हे शाले त्वा त्वाम् अधिष्ठाय शिशुराक्रन्दतु बालकः क्रीडोत्थहासशब्दं करोतु । जातावेकवचनम् । अथवा बालाः क्रीडार्थं परस्परमाह्वयन्तु । तथा धेनवः प्रसूताः गावोऽप्रसूताश्च वाश्यमानाः आक्रन्दन्तु इति क्रियां विपरिणमय्य सम्बन्धः । आ त्वा त्वामाश्रित्य तरुणः समर्थः कुमारो बटुः आक्रन्दतु वेदघोषं करोतु । एवं वत्सः स्तनन्धयः स्तनपानार्थमाक्रन्दतु मातरमाह्वयतु जगदैरनुगैः रक्षकैः सह । तथा परिस्रुतः उत्सिञ्चत्, कुम्भो दध्नः कलशोऽन्यैश्च दध्यादिकलशैः सह उप मत्समीपं पूर्णशब्दं करोतु । एतैर्युक्ता भवेत्यर्थः ।

पुनरपि तां स्तुत्वा प्रार्थयते–**क्षेमस्ये**ति । हे शाले सुभगे सुन्दरि सुसमृद्धे वा त्वं नोऽस्मभ्यं रयिं धनं धेहि देहि । अस्मासु धारयेति वा । किंविशिष्टा त्वम् । क्षेमस्य रक्षणस्य पत्नी स्वामिनी । बृहती स्वरूपेण गुणैश्च महती । सुवासाः शोभनवस्त्रादिसमृद्धा शोभनवसतिर्वा । किंच नोऽस्मभ्यं सुवीर्यं शोभनां शक्तिं पुष्कलप्रजाहेतुं वा धेहि । रयिविशेषणं वा । दानादिसुशक्तियुक्तं धनं देहीत्यर्थः । किंच भो शाले नोऽस्मान् अभि अभितः अस्मासु सर्वभावेन रयिं धनं पूर्यतां पूर्णं क्रियताम्, धनेनास्मान्पूरयेत्यर्थः । किंविशिष्टा रयिः । अश्वावत् अश्ववती । गोमत् गोमती । ऊर्जस्वत् रसवती विस्तृता वा । वनस्पतेः पर्णमिव । यथा वनस्पतेः पर्णानि वसन्तादौ पूर्यन्ते तथा । एकत्वमत्र जात्या । यद्वा–अश्वावदित्यादीनि पर्णविशेषणानि । अश्वावत् अश्वव्यवहारयोग्यमित्यादि । इदं स्थानं वसानः अधिवसन् अहं पूर्यतां पूर्यै पूर्णो भवानीत्यर्थः । अधिवसाने मयि रयिं पूर्यतामिति वा ॥ १ ॥ इतिशब्द उभयत्र सम्बध्यते तन्त्रत्वात् । इति चतुरः । एवं चतुरः स्तम्भानुच्छ्रयति । इतरगृहे तु शिलान्यास एवैतेन मन्त्रेण । ब्रह्मोपवेशनग्रहणं तूदपात्रावसरज्ञापनार्थम् । प्रणीताभ्योऽधिकमेतत् । प्रविशेति ब्रह्मानुज्ञातः प्रविशति **ऋतामि**ति मन्त्रेण । तदर्थः सुगमः । तत्र परमेष्ठी, यजुः, शाला, तत्प्रवेशे० । ऋतं सत्यभूतं त्वां प्रपद्ये प्राप्नोमि । एवं शिवं कल्याणरूपं त्वां प्रपद्ये । **आज्यं संस्कृत्ये**त्यवसरविधानार्थमाज्याहुतीनाम् । तत आघारादि । अपराश्चतस्रो **वास्तोष्पते** इत्यादिचतुर्भिर्मन्त्रैः । तदर्थः । तत्र **वास्तोष्पते** इत्यादिचतसृणां वशिष्ठस्त्रिष्टुप् इन्द्रो नवशालायामाज्यहोमे० । "वसतेर्निवासकर्म" इति **निरुक्ताद्वा**स्तुर्गृहम् । तस्य वास्तोः पते स्वामिन् इन्द्र । वास्तोष्पतिर्गोष्पतिरितीन्द्रपर्यायः । अस्मान् रक्षितुं प्रतिजानीहि प्रतिज्ञां कुरु । ऊरीकुर्वित्यर्थः । कथम्, स्वावेशः सुष्ठु प्रवेशो नोऽस्माकं भवा भव । दीर्घश्छान्दसः । अस्मानुत्तमान्विधाय प्रवेशयेत्यर्थः । किंच अनमीवः अमीवं पापं रोगो वा तद्विरोधी । किंच यत्किञ्चिद्वयं त्वा त्वाम् ईमहे प्रार्थयामहे तद्वस्तुजातं प्रापय्य नोऽस्मान् जुषस्व प्रीणयस्व प्रीयस्वेति वा । प्रार्थयमानानस्मान्प्रीणयित्वा त्वमपि प्रीतो भवेत्यर्थः । किंच नोऽस्माकं द्विपदे मनुष्यवर्गाय शं सुमङ्गलवरूपो भव । चतुष्पदे पशुवर्गाय शं सुखस्वरूपो भव । स्वाहाकारो मन्त्रावसानज्ञापनार्थः प्रदर्शितः सर्वत्र ॥ १ ॥ हे वास्तोष्पते त्वं नोऽस्माकं प्रतरणः आपन्निस्तारकः एधि भव । किम्भूतानाम्, गोभिर्गवादिभिर्द्विशफैः अश्वेभिरश्वादिभिरेकशफैर्युक्तानाम् । किंच हे इन्द्र परमेश्वर गयस्फानः प्राणवर्द्धकश्चैधि । प्राणा वै गया इति श्रुतेः । किंच ते तव सख्ये मैत्र्यां सति, वयमजरासः अक्षीणसम्पदः स्याम भूयास्म । पुत्रान्प्रति पितेव वर्तमानस्त्वं नोऽस्मान्प्रति जुषस्व प्रीतो भव ॥ २ ॥ हे वास्तोष्पते तव शग्मया सुखरूपया । शिवं शग्ममिति सुखनामनी । संसदा सभया सक्षीमहि सम्बध्येमहि वयम्, "षच समवाये" । किम्भूतया रण्वया । शास्त्रीयं रणनम् उपन्यासं कुर्वाणा रण्वा तया । गातुमत्या यज्ञवत्या त्रयीप्रधानया वा । त्वं च नोऽस्मान् योगे अलब्धलाभे उत अपि क्षेमे लब्धरक्षणे निमित्ते वरं यथा स्यात्तथा पाहि रक्ष । हे इन्द्रानुचराः यूयं नोऽस्मान्स्वस्तिभिः अभीष्टफलैः सदा पात आप्याय्य रक्षत ॥ ३ ॥ हे वास्तोष्पते इन्द्र त्वम् अमीवहा पापरोगपीडादिनाशको यतः । अतो नोऽस्माकं सखा इहामुत्र बन्धुरेधि भव । किं कुर्वन् । विश्वा विश्वानि ब्रह्मादिस्तम्बपर्यन्तानि रूपाणि शरीराण्याविशन् प्रविशन् सर्वशरीरिरूपेणास्मासु अनुकूलो भवेत्यर्थः । किम्भूतः सुशेवः शोभनसुखहेतुः ॥ ४ ॥ **अग्निमिन्द्रमि**त्यादिषण्णां विश्वामित्रोऽनुष्टुप् लिङ्गोक्ता होमे० । अहमग्न्यादीन्देवान् हविर्ग्रहणाय उपह्वये त्वत्समीपमाह्वयामि । न केवलमेतान् । सरस्वतीं वाचम् । वाजीम् अन्नमयीं सीतां च । हे अग्न्यादयो देवा यूयमागत्य मे मह्यं वास्तु गृहं दत्त दद्धम् मदायत्तं कुरुतेत्यर्थः । किम्भूताः वाजिन अन्नवन्तः वेगवन्तो वा । अनेनोत्तरमन्त्रा अपि व्याकृताः । विशेषास्तूच्यन्ते । एतान्सर्पादीनुपह्वये इत्यनुषङ्गः । उपहूय च तान्प्रपद्ये शरणं स्मव्रजेऽहम् । जगदैरनुचरैः सह वर्तमानान् । तत्र व्युषं उषसम्, देवीं द्योतनात्मिकाम् । महापथाम् अनेकमार्गाम्

बहुसुखामित्यर्थः । इदं वास्तु स्योनं सुखसेव्यं सुखरूपत्वात्, शिवं कल्याणरूपम्, शान्तं वा वास्तु गृहं मह्यम्, हे ब्रह्मप्रजापती वेदब्रह्माणौ युवां दत्तं प्रयच्छतम् । हे सर्वा देवताः यूयमपि, चकाराद्दत्तेति क्रियाविपरिणामः । स्वाहेति प्रागुक्तम् । कांस्ये कांस्यपात्रे सम्भारान् उदुम्बरस्येत्यौदुम्बरपलाशादीन् ओप्य संस्थाप्य । तत्रौदुम्बरपत्राणि ससुराणि क्षीरेण सुरया वा पृक्तानि । तैरुपहारैश्चासनानि गजदन्तादिनिर्मितानि उपस्थानानि देवतायतनादीनि च प्रोक्षेत् । आसनान्युपस्थानानि च वास्तुशास्त्रप्रसिद्धानि शालाभवान्येव । पूर्वसन्धौ कुड्यादौ अभिमृशति स्पृशति **श्रीश्च त्वेति** मन्त्रेण । तस्यार्थः । तदादिचतुर्णां प्रजापतिर्यजुर्लिङ्गोक्ताः स्पर्शने० । हे शाले त्वा त्वां पूर्वे सन्धौ श्रीर्लक्ष्मीः यशः कीर्त्तिश्च गोपयेतां रक्षताम् । एवमुत्तरत्रापि व्याख्येयम् । ऊर्क् तेजः प्राणनम् । सूनृता शोभनवाक् । निष्क्रम्य गृहाद्बहिर्निर्गत्य दिश उपतिष्ठते स्तौति **केता च मे**त्यादिभिर्मन्त्रैः प्रतिमन्त्रम् । तदर्थः सुगमः । तत्र चतुर्णां प्रजापतिस्त्रिष्टुप् लिङ्गोक्ता उपस्थाने० । गोपायेतामित्येतत्पदावृत्तिर्गोपनस्याभीष्टत्वेनात्यादरसूचनार्था । निष्ठितां निष्पन्नां प्रपद्यते प्रविशति **धर्मस्थूणाराजम्**मिति मन्त्राभ्याम् । तदर्थः । तत्र द्वयोर्ब्रह्मा, जगतीबृहत्यौ, लिङ्गोक्ता, प्रवेशने० । धर्मस्थूणाराजं धर्मयुक्तं स्थूणाराजं महतीं स्थूणाम् । श्रीस्तूपं लक्ष्मीस्वरूपम् । चलदण्डिकारूपस्त्रीयुक्तम् । अगारे हि स्तूपो बध्यते । स्तूप इत्यरुषाभिधानम् । अहोरात्रे तद्देवते द्वारफलके द्वारकपाटे लोकालोकरूपत्वात् । इन्द्रस्य इमे गृहाः इन्द्रदेवतात्वात् वसुमन्तः धनिनः, वरूथिनः रक्षकाः, बहुप्रजासो वा । तानेतानहं प्रपद्ये अधिवसामि । प्रजया पुत्रादिरूपया सह पशुभिर्गोमहिष्यादिभिश्च सह । यत्किञ्चिन्मे मम वस्त्वस्ति तेन सह वास्तोष्पतिनोपहूतः सन् हे शाले त्वा त्वां याचे । किम्, नोऽस्मान् गृहान् गृहस्थान्प्राप्य सर्वे देवा इमे गृहा वा अरिष्टवीराः अरिष्टा निराधिव्याधयो वीराः पुत्रादयो येभ्यस्तथा सन्तु सर्वतः सर्वभावेन । किम्भूतोऽहं सर्वगणसखायसाधुसंवृतः सर्वैर्गणैः परिवारैः सखायैर्मित्रसमूहैः साधुतया अन्यैः साधुभिर्वा संवृत आश्रितः । तत इत्युक्तार्थम् ॥ ४ ॥ * ॥

हरि०—अथातः शालाकर्म— थान्वष्टकाकर्मानन्तरं यत आवसथ्याधानादीनि कर्माणि शालाग्निसाध्यान्यनुविहितानि शालाकरणं च नोक्तम्, अतो हेतोः शालाकर्म शालाया गृहस्य क्रिया व्याख्यास्यत इति सूत्रशेषः । तद्यथा—**पुण्याहे शालां कारयेत्**—पुण्यं शुभं मलमासबालवृद्धास्तमितगुरुशुक्रगुर्वादित्यसिंहस्थगुरुक्षयमासदिनत्र्यहक्रूरग्रहाक्रान्तभुक्तभोग्यनक्षत्रादिदोषरहितं ज्योतिःशास्त्रादिनोक्तगृहारम्भविहितमासपक्षतिथिवारनक्षत्रयोगकरणमुहूर्तचन्द्रताराबललग्नादिगुणान्वितमहः पुण्याहं तस्मिन्पुण्याहे शालां गृहं कारयेत् निर्मापयेत् । पुनः पुण्याहग्रहणं तूदगयनशुक्लपक्षयोरनियमार्थम् । शालां कारयेदित्युक्तम् । तच्च शालाकरणं देशमन्तरेण न सम्भवति इति सामान्यतो देशे प्राप्ते "यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत् । विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥" इति वचनात् पारस्कराचार्येणानुक्तमपि***गोभिलगृह्यसूत्रो**क्तदेशविशेषमविरोधादपेक्षितत्वाच्चात्र लिखामः । तद्यथा—

---

* श्रीः । गृहभूमिनिर्णायकं यावदुपयुक्तं **गोभिलगृह्यसूत्रं तद्भाष्यं च** । सूत्रम्—**अवसानं जोषयेत** । टी०—अवस्यन्ति निवसन्त्यस्मिन्नित्यवसानम् आवासः । गृहार्थं भूस्थानमत्राभिप्रेतम् । ननु गृहमेवेति कुतः । सममित्येवमादीनां विशेषणानाम् एवमर्थत्वात् । तत्रावसानं प्राग्द्वारं यशस्कामो बलकामः कुर्वीतेति च परस्तान्निर्देशात् । जोषयेत ।"जुषी प्रीतिसेवनयोः"। सेवेत परिगृह्णीयादित्यर्थः । कीदृशमित्यत आह—सू०—**समं लोमशमविभ्रंशि** । टी०—समम् अनिम्नोन्नतम् । लोमशं सतृणम् ।"तृणानि भूमेर्लोमानि" इति वचनात् । यद्वा लोमानीव यत्र मृदूनि तृणानि तल्लोमशम् । अविभ्रंशि।यत्र कृतस्य वेश्मनो नदीतीरतडागभदवृत्तपातमार्गादिभ्यो विभ्रंशो विनाशो न स्यात्तदिदमविभ्रंशि स्थानम्।जोषयेतेति सर्वत्रानुषज्यते । सू०—**प्राच्य उदीच्यो वा यत्रापः प्रवर्त्तेरन्**।टी०प्राच्यः प्राङ्मुखाः उदीच्यो वा उदङ्मुखाः वा यत्र यस्मिन् स्थाने आपः प्रवर्त्तेरन् गच्छेयुः। स चायमिच्छाविकल्पः। सू०—**अक्षीरिण्योऽकण्टका अकटुका यत्रौ**—

कीदृशे देशे शालां कारयेत् । समे लोमशे अविभ्रंशिनि प्राचीनप्रवणे उदक्प्रवणे वा अक्षीराकण्टकाकटुकौषधिवितते विप्रस्य गौरपांसौ, क्षत्रियस्य लोहितपांसौ, वैश्यस्य कृष्णपांसौ, वास्तुशास्त्रमते वैश्यस्य पीतपांसौ, शूद्रस्य कृष्णपांसौ,स्थिराघाते,एकवर्णे,अशुष्के,अनूषरे,अमरौ । मरुर्निर्जलो देशः । अकिलिने ब्रह्मवर्चसकामस्य, दर्भयुक्ते बलकामस्य, बृहत्तृणयुते पशुकामस्य, मृदुतृणयुते शादासम्मिते मण्डलद्वीपसम्मिते वा । स्वयं खातश्च भवति वा । यशस्कामस्य बलकामस्य च प्राग्द्वारां, पुत्रपशुकामस्योदग्द्वारां, सर्वकामस्य दक्षिणद्वारां न प्रत्यग्द्वारां मुख्यद्वारसम्मुखात् द्वाररहिताम् । पूर्वादितः प्रदक्षिणक्रमेणाश्वत्थप्लक्षवटौदुम्बरवृक्षवर्जितां कारयेत् । " भवनस्य पूर्वादौ वटौदुम्बराश्वत्थप्लक्षाः सार्वकामिकाः

षधयः स्युः । टी०-क्षीरिण्यः क्षीरवत्यः । न क्षीरिण्यः अक्षीरिण्यः अर्कादिभ्योऽन्याः । अकण्टकाः कण्टकरहिताः ।
वर्बुरादिभ्योऽन्याः । अकटुकाः कटुगुणरहिताः निम्बादिभ्योऽन्याः । यत्रौषधयः स्युर्भवेयुः । सू०-**गौरपा॑ꣳसु ब्राह्म-**
णस्य । टी०-गौराः गौरवर्णाः पांसवो रेणवः यस्मिन्नवसाने तद्गौरपांस्ववसानम् । तद्ब्राह्मणस्य भवति । उत्तरसूत्रयोरप्येव-
मेव विग्रहः । सू०-**लोहितपा॑ꣳसु क्षत्रियस्य । कृष्णपा॑ꣳसु वैश्यस्य । स्थिराघातमेकवर्णमशुष्कमनूषरमम-**
रुपरिहितमकिलिनम् । टी०-मुद्गरादिभिरपि यदाहन्यमानं न विदीर्यते तत् स्थिराघातम् । एकवर्णमभिन्नवर्णम् । यत्रो-
त्पद्यमाना एवौषधयो न शुष्येयुस्तदिदमशुष्कम् । ऊषरमिरिणम्, यत्रोप्तं न प्ररोहति । न ऊषरम् अनूषरम् । मरुशब्देनोदकर-
हितः प्रदेश उच्यते । यत्र दूरमपि खनद्भिः किंचिदेवोदकमुपलभ्यते । उक्तं च "द्वीपमुन्नतमाख्यातं शादा चैवाष्टकाः स्मृताः।
किलिनं सज्जलं प्रोक्तं दूरखातोदको मरुः ॥" तया मरुभूम्या यत्परिहितं सर्वतो वेष्टितं स्थानं तन्मरुपरिहितं, न मरुपरिहितं
अमरुपरिहितम् । किलिनं प्रत्यासन्नोदकत्वादुदकक्लिन्नमुच्यते । उक्तं च--'किलिनं सज्जलं प्रोक्तम्' इति । सू०-**दर्भसम्मितं**
ब्रह्मवर्चसकामस्य । टी०-दर्भसम्मितं दर्भसंयुक्तम् ब्रह्मवर्चसं व्याख्यातं तत्कामस्य । सू०-**बृहत्तृणैर्बलकामस्य** ।
टी०-बलं भरं भवति विभर्त्तेः तत्कामस्य । बृहत्तृणैर्वीरणादिभिः । सम्मितमिति वर्तते । सू०-**मृदुतृणैः पशुका-**
मस्य । टी०-संमितमिति वर्त्तते । सू०--**शादासम्मितं मण्डलं द्वीपसंमितं वा** । टी०-शादा इष्टका । देशान्तर-
प्रसिद्धेः । उक्तं च-"शादा चैवेष्टकाः स्मृताः"इति । तया संमितं तदाकृति । चतुरस्रमित्यर्थः । कथं नाम स्थानस्य परिवृत्त-
मपि चतुरस्रं कार्यमिति मण्डलं परिमण्डलम्, वर्त्तुलमित्यर्थः । द्वीपशब्देनोन्नतमभिधीयते । "द्वीपमुन्नतमाख्यातम्" इति वच-
नात् । मण्डलं च तत् द्वीपं च मण्डलद्वीपम् । तत्संमितं वा । तदाकृति वा । कथं नाम । उन्नतस्य सतः परिवृतिः परिमण्डला
कार्या चतुरस्रा वेति । सू०-**यत्र वा श्वभ्राः स्वयं खाताः सर्वतोऽभिमुखाः स्युः** । टी०-यत्र वा यस्मिन्स्थाने,
श्वभ्राः अवटाः, स्वयं खाताः स्वयमुत्पन्नाः, सर्वतः सर्वासु दिक्षु । अभिमुखाः इतरेतराभिमुखेनावस्थिताः स्युः भवेयुः । सू०-
तत्रावसानं प्राग्द्वारं यशस्कामो बलकामः कुर्वीत । टी०-तत्र तस्मिन्नेवंगुणविशिष्टे स्थाने अवसानं गृहम् । अय-
मवसानशब्दो गृहवचनः । कुतः पुनरवसानग्रहणात् । "अनुद्वारं च गृहद्वारम्" इति गृहशब्दश्रुतेश्च । प्राग्द्वारं प्राङ्मुखद्वारं
यशस्कामो बलकामः कुर्वीत । कामशब्दाभ्यासादन्यतरकामो नोभयकामः । यद्युभयमभिप्रेतं स्यात् तथा सति यशो-
बलकाम इत्यवक्ष्यत् । तस्माद्यशस्कामो बलकामो वेति द्रष्टव्यम् । सू०-**उदग्द्वारं पुत्रपशुकामः** । टी०-अवसानं
कुर्वीतेति वर्त्तते । सू०-**दक्षिणाद्वार॑ꣳ सर्वकामः** । टी०-दक्षिणाद्वारे वास्तुनि यद्यत्कामयते तत्तद्भवतीति दर्शयति ।
सू०-**न प्रत्यग्द्वारं कुर्वीत** । टी०-ऋज्वर्थम् । सू०-**अनुद्वारं च गृहद्वारम्** । टी०-न कुर्वीतेति वर्त्तते ।
अनु पश्चात् द्वारम् अनुद्वारम्, तादृशं गृहद्वारं न कुर्वीतेति । द्विद्वारमित्यर्थः । अथवा द्वारम् अनु गृहद्वारं न कुर्वीत ।
कथं नाम । अन्यगृहद्वाराऽभिमुखं गृहद्वारं न कुर्वीतेत्यर्थः । तथा च वास्तुविद्भिरुक्तम्-" द्वारगवाक्षस्तम्भैः कर्दमाभि-
स्त्यन्तकोणवेधैश्च । नेष्टं वास्तुद्वारं विद्धमनाक्रान्तमायौ च ।" तथा च गृहद्वारं न कुर्वीत । सू०-**यथा न संलोकी**
स्यात् । टी०-यथा येन प्रकारेणायं वास्तुनि संध्योपासनहोमार्चनभोजनादिक्रियाप्रवृत्तौ वहिर्वर्त्तिनां चाण्डालपतितादीनां
संलोकी आलोकनगम्यो न स्यात् न भवेत् । अन्ये तु यथा न संलोकि स्यादिति पठन्ति । तत्रार्थः । यथा गृहमध्ये धनधान्या-
दिकं बालसुवासिनीस्नुषादिकं च वहिर्जनस्य संलोकि आलोकनगम्यं न स्यादिति । किमुक्तं भवति । स्वावृतद्वारं वेश्म
कर्त्तव्यमिति । तस्य च वेश्मनो न परिवृतस्यापि । सू०-**वर्जयेत्पूर्वतोऽश्वत्थं प्लक्षं दक्षिणतस्तथा । न्यग्रोधमप-**
राद्देशादुत्तराच्चाप्युदुम्बरम् ॥ टी०-अश्वत्थादयः प्रसिद्धाः । एतैरेतासु दिक्ष्ववस्थितैः किं भवतीत्यत आह-सू०
अश्वत्थादग्निभयं ब्रूयात् प्लक्षाद्ब्रूयात्प्रमायुकान् । न्यग्रोधाच्छस्त्रसंपीडामक्षामयमुदुम्बरात् ॥ टी०-
प्रमायुकान् नष्टायुषः । अक्षामयोऽक्षिरोगः ऋज्वन्यत् ॥ सू०-**आदित्यदेवतोऽश्वत्थः प्लक्षो वै यमदेवतः ।**
न्यग्रोधो वारुणो वृक्षः प्राजापत्य उदुम्बरः ॥ टी०-देवतानिर्देश उत्तरार्थः । ऋज्वन्यत् ॥

विपरीतास्त्वसिद्धिदाः'' इति **मत्स्यपुराणे** । तथा–" कण्टकी क्षीरवृक्षश्च आसन्नः सफलो द्रुमः । भार्याहानिं प्रजाहानिं कुर्वन्ति क्रमशस्तथा ॥ न च्छिन्द्याद्यदि तानन्यानन्तरे स्थापयेच्छुभान् । पुन्नागाशोकबकुलशमीतिलकचम्पकान् ॥ दाडिमी पिप्पली द्राक्षा तथा कुसुममण्डपम् । " " जम्बीरपूगपनसद्रुममञ्जरीभिर्जातीसरोजशतपत्रिकमल्लिकाभिः । पुन्नागनारिकेलकदलीदलपाटलाभिर्युक्तं तदत्र भवनं श्रियमातनोति ॥''**तस्या अवटमभिजुहोत्यच्युताय भौमाय स्वाहेति**–तस्याः शालाया अवटं स्तम्भारोपणार्थं खातम् अभिमुखेन जुहोति,"अच्युताय भौमाय स्वाहा''इति मन्त्रेण।अत्रावटमित्येकवचनम् अन्येषां त्रयाणामुपलक्षणार्थम्, संस्कार्यत्वाविशेषात् "गृहं सम्मार्ष्टि '' इतिवदेकवचनम् । अवटाश्चत्वारः कुत इति चेत् धवलगृहस्य स्तम्भशालारूपस्य च चतुर्षु कोणेषु चत्वारो मूलस्तम्भा भवन्ति, ते च शिलामुच्छ्रीयन्ते शिलाश्चावटेष्विति चत्वारः । अतश्चतुर्षु कोणेषु आग्नेयादिषु चत्वारोऽवटा भवन्ति, तेष्वेवाज्येन होमः । **स्तम्भमुच्छ्रयतीमामुच्छ्रयामीति**–स्तम्भमुच्छ्रयति उत्थापयति अवटे मिनोतीत्यर्थः । केन मन्त्रेण **इमामुच्छ्रयामीत्यादिना श्रेयो वसान** इत्यन्तेन मन्त्रेण चतुरः । ततोऽनेनैव मन्त्रेण नैर्ऋत्याद्यवटेषु चतुरः स्तम्भानुच्छ्रयति । इतरगृहे तु चतुर्षु कोणेषु शिलान्यास एव भवति अनेनैव मन्त्रेण । **प्रपद्यते**–ततः शालां प्रपद्यते प्रविशति । **अभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकꣳ श्रपयित्वा निष्क्रम्य द्वारसमीपे स्थित्वा ब्रह्माणमामन्त्रयते ब्रह्मन्प्रविशामीति**–अभ्यन्तरतः अर्द्धनिष्पन्नायाः शालाया मध्ये अग्निमावसथ्यमुपसमाधाय पञ्चभूसंस्कारपूर्वकं स्थापयित्वा दक्षिणतः अग्नेर्दक्षिणपार्श्वे ब्रह्माणमुपवेश्य, उत्तरतः अग्नेरुत्तरप्रदेशे उदपात्रं जलपूर्णं ताम्रादिभाजनं प्रतिष्ठाप्य निधाय । अत्र पुनर्ब्रह्मोपवेशनमुदपात्रप्रतिष्ठापनावसरविज्ञापनार्थम् । स्थालीपाकं चरुं श्रपयित्वा यथाविधि पक्त्वा ब्रह्माणं प्रथममृत्विजमामन्त्रयते सम्बोधयति । कथं, ब्रह्मन्प्रविशामीति । **ब्रह्मानुज्ञातः प्रविशत्यृचं प्रपद्ये शिवं प्रपद्य इति**–तत आमन्त्रितेन ब्रह्मणा प्रविशस्वेत्यनुज्ञातः प्रसूतः प्रविशति, **ऋचं प्रपद्ये शिवं प्रपद्य** इति मन्त्रेण शालां प्रपद्यते । **आज्यꣳ संस्कृत्येह रतिरित्याज्याहुती हुत्वाऽपरा जुहोति वास्तोष्पते** इत्यादि–अत्र प्राप्तमप्याज्यसंस्कारविधानमाघारादर्वाक् **इहरतिरिति** आज्यस्य होमप्राप्त्यर्थम् । आज्यसंस्कारानन्तरं पर्युक्षणान्ते **इह रतिरित्यादिना इह स्वधृतिः स्वाहे**त्यन्तेन मन्त्रेणैकाम्, **उपसृजमित्यादिना सुदीधरत्स्वाहे**त्यन्तेन मन्त्रेण द्वितीयामाहुतिं हुत्वा **वास्तोष्पत** इति चतसृभिर्ऋग्भिरपराश्चतस्र आज्याहुतीर्जुहोति।तत आघारावाज्यभागौ हुत्वा **स्थालीपाकस्य जुहोति अग्निमिन्द्रमित्यादि**–ततः स्थालीपाकस्य चरोरग्निमिन्द्रमित्यादिभिः षड्भिर्मन्त्रैः प्रतिमन्त्रं मन्त्राहुतीर्जुहोति । **प्राशनान्ते काꣳस्ये सम्भारानोप्यौदुम्बरपलाशानि ससुराणि शाद्वलं दधि मधु घृतं कुशान्यवाँश्चासनोपस्थानेषु प्रोक्षेत्**–ततः स्विष्टकृदादिसंस्रवप्राशनान्ते कांस्ये कांस्यमये पात्रे, सम्भारान् वक्ष्यमाणानोप्य कृत्वा औदुम्बरपत्राणि ससुराणि सक्षीराणि शाद्वलं दूर्वागोमयम् अरोगिण्या गोः शकृत्, दधि, मधु, घृतं, यवान् निगदव्याख्यातान्, आसनानि च उपस्थानानि च आसनोपस्थानानि वास्तुशास्त्रोपदिष्टानि तेषु प्रोक्षेत् उदुम्बरपलाशादिसम्भारैस्तान्यभिषिञ्चेदित्यर्थः । तत्रासनानि नागदन्तादिमयस्थानानि उपस्थानानि देवतास्थानानि । **पूर्वे सन्धावभिमृशति श्रीश्च त्वेति**–ततः शालायाः पूर्वे सन्धौ अभिमृशति पूर्वसन्धिप्रदेशमालभते **श्रीश्च त्वेति** मन्त्रेण । एवं दक्षिणे सन्धौ **यज्ञस्य त्वेति** मन्त्रेण । तथैव पश्चिमे सन्धौ **अन्नं च त्वेति** । तद्वदुत्तरे सन्धौ **ऊर्क् च त्वेति** । **निष्क्रम्य दिश उपतिष्ठते**–एवं शालायाः पूर्वादिसन्धीनभिमृश्य बहिर्निष्क्रम्य दिशः प्राचीप्रमुखाश्चतस्रः **केता च मा सुकेता च**त्यादिभिश्चतुर्भिर्मन्त्रैः प्रदक्षिणक्रमेण प्रतिमन्त्र-

मुपतिष्ठते स्तौति । निष्ठितां प्रपद्यते धर्मस्थूणेति–निष्ठितां निर्मितां सम्पूर्णामिति यावत् । प्रपद्यते प्रविशति धर्मस्थूणेत्यादिना सन्तु सर्वत इत्यन्तेन मन्त्रेण । ततो ब्राह्मणभोजनम्–इति सूत्रार्थः ।। ४ ॥

अथ **प्रयोगः**। अथ शालाकर्मोच्यते । तत्र पुण्याहे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा पूर्णाहुतिवदाज्यं संस्कृत्य स्तम्भस्थानावटेषु चतुर्षु प्रत्यवटमाग्नेयकोणादारभ्य "अच्युताय भौमाय स्वाहा" इत्यनेन मन्त्रेणैकैकामाज्याहुतिं जुहुयात् । "इदमच्युताय भौमाय" इति प्रत्याहुति त्यागः । अथ होमक्रमेणावटेषु तूष्णीं शिलाः स्थापयित्वा तदुपरि "इमामुच्छ्रयामि भुवनस्य नाभिं वसोर्द्धारां प्रतरणीं वसूनाम् । इहैव ध्रुवां निमिनोमि शालां क्षेमे तिष्ठतु घृतमुक्षमाणा । अश्वावती गोमती सूनृतावत्युच्छ्रयस्व महते सौभगाय । आ त्वा शिशुराक्रन्दत्वा गावो धेनवो वाश्यमानाः। आ त्वा कुमारस्तरुण आ वत्सो जगदैः सह । आ त्वा परिस्रुतः कुम्भ आ दध्नः कलशैरुप । क्षेमस्य पत्नी बृहती सुवासा रयिं नो धेहि सुभगे सुवीर्यम् । अश्वावद्गोमदूर्जस्वत्पर्णं वनस्पतेरिव । अभि नः पूर्यताꣳ रयिरिदमनुश्रेयो वसानः" इत्यनेन मन्त्रेण होमक्रमेणैव चतुर्षु अवटेषु चतुरः स्तम्भानुच्छ्रयति मिनोति । स्तम्भाभावेऽनेनैव मन्त्रेण प्रत्यवटं शिलां स्थापयेत् । अर्द्धनिष्पन्नायां शालायां तन्मध्यप्रदेशे पञ्चभूसंस्कारपूर्वकमावसथ्याग्निं स्थापयित्वा ब्रह्माणमुपवेश्याग्नेरुत्तरत उदपात्रं प्रतिष्ठाप्य प्रणीताप्रणयनं विधाय कुशकण्डिकापूर्वकं चरुं श्रपयित्वा प्रोक्षण्युत्पवनान्ते बहिर्निष्क्रम्य द्वारसमीपे गृहाभिमुखं स्थित्वा ब्रह्मन्प्रविशामीति ब्रह्माणमामन्त्र्य प्रविशस्वेति ब्रह्मणाऽनुज्ञात "ऋतं प्रपद्ये शिवं प्रपद्ये" इति मन्त्रेण शालां प्रविशेत् । अथ स्वासने उपविश्य उपयमनकुशानादाय समिदाधानपर्युक्षणानि कृत्वा "इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा" इत्येकामाज्याहुतिं जुहुयात्, "इदमग्नये" इति त्यागं विधाय, "उपसृजं धरुणं मात्रे धरुणो मातरं धयन् । रायस्पोषमस्मासु दीधरत्स्वाहा" इति मन्त्रेण द्वितीयामाज्याहुतिं जुहोति, "इदमग्नये" इति त्यक्त्वा अपराश्चतस्र आज्याहुतीर्जुहोति । "वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवा नः । यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे स्वाहा" इत्येकाम्, इदं वास्तोष्पतये० । "वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति तं नो जुषस्व स्वाहा" इति द्वितीयाम्, इदं वास्तोष्पतये० । "वास्तोष्पते शग्मया सꣳसदा ते सक्षमिहि रण्वया गातुमत्या । पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः स्वाहा" इति तृतीयाम्, इदं वास्तोष्पतये० । "अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि नः स्वाहा" इत्यनेन चतुर्थीं जुहुयात् । इदं वास्तोष्पतय इति चतसृषु त्यागः । तत आघारावाज्यभागौ हुत्वा चरुणा अग्निमिन्द्रमित्यादिभिः षड्भिर्मन्त्रैः षडाहुतीर्जुहुयात् । तद्यथा–" अग्निमिन्द्रं बृहस्पतिं विश्वान्देवानुपह्वये । सरस्वतीं च वाजीं च वास्तु मे दत्त वाजिनः स्वाहा " इति प्रथमा । इदमग्नये, इन्द्राय, बृहस्पतये, विश्वेभ्यो देवेभ्यः, सरस्वत्यै, वाज्यै च० । "सर्पदेवजनान् सर्वान् हिमवन्तꣳ सुदर्शनम् । वसूꣳश्च रुद्रानादित्यानीशानं जगदैः सह । एतान्त्सर्वान्प्रदद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा" इति द्वितीयाम् । इदं सर्पदेवजनेभ्यो हिमवते, सुदर्शनाय, वसुभ्यः, रुद्रेभ्यः, आदित्येभ्यः, ईशानाय, जगदेभ्यश्च० । " पूर्वाह्णमपराह्णं चोभौ मध्यन्दिना सह । प्रदोषमर्द्धरात्रं च व्युष्टां देवीं महापथाम् । एतान्त्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा " इति तृतीयाम् । इदं पूर्वाह्णाय, अपराह्णाय, मध्यन्दिनाय, प्रदोषाय, अर्द्धरात्राय, व्युष्टायै देव्यै, महापथायै च० । " कर्तारं च विकर्तारं विश्वकर्माणमोषधीश्च वनस्पतीन् । एतान्त्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा " इति चतुर्थीम् । इदं कर्त्रे, विकर्त्रे, विश्वकर्मणे, ओषधिभ्यो, वनस्पतिभ्यश्च० । " धातारं च विधातारं निधीनां च पतिꣳ सह । एतान्त्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा" इति पञ्चमीम् । इदं धात्रे, विधात्रे, निधीनां पतये च० । " स्योनꣳ शिवमिदं वास्तु मे दत्तं ब्रह्मप्रजापती । सर्वाश्च देवताः स्वाहा" इति षष्ठीम् । इदं ब्रह्मणे, प्रजापतये, सर्वाभ्यो देव-

ताभ्यश्च० । ततः स्थालीपाकेन स्विष्टकृतं हुत्वा महाव्याहृत्यादिप्राजापत्यान्ता नवाहुतीर्हुत्वा संस्रवान् प्राश्य ब्रह्मणे दक्षिणां दत्त्वा कांस्यपात्रेऽनुपहते सक्षीराण्यौदुम्बरपर्णानि दूर्वागोमयदधिमधुघृतकुशयवांश्च सम्भारान्कृत्वा आसनानि नागदन्तस्थानानि उपस्थानानि च देवतास्थानानि प्रोक्षेत्, तै पत्रादिसम्भारैः । अथ पूर्वे सन्धौ, "श्रीश्च त्वा यशश्च पूर्वे सन्धौ गोपायेताम्" इति मन्त्रेणाभिमर्शनं करोति । ततो दक्षिणे सन्धौ, "यज्ञस्य त्वा दक्षिणा च दक्षिणे सन्धौ गोपायेताम्" इति । अथानन्तरं पश्चिमे सन्धौ, "अन्नं च त्वा ब्राह्मणश्च पश्चिमे सन्धौ गोपायेताम्" इति । अथोत्तरे सन्धौ, "ऊर्क् च त्वा सूनृता चोत्तरे सन्धौ गोपायेताम्" इति । अथ गृहान्निष्क्रम्य वक्ष्यमाणमन्त्रैर्यथालिङ्गं दिश उपतिष्ठते । "केता च मा सुकेता च पुरस्ताद्गोपायेतामित्यग्निर्वै केताऽऽदित्यः सुकेता तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पुरस्ताद्गोपायेताम्"इति मन्त्रेण प्राचीं दिशमुपस्थाय, अथ दक्षिणतः, "गोपायमानं च मा रक्षमाणा च दक्षिणतो गोपायेतामित्यहर्वै गोपामान ँ रात्री रक्षमाणा ते प्रपद्ये ताभ्यां नमोऽस्तु ते मा दक्षिणतो गोपायेताम्"इति दक्षिणां दिशमुपस्थाय, अथ पश्चात् "दीदिविश्च मा जागृविश्च पश्चाद्गोपायेतामित्यन्नं वै दीदिविः प्राणो जागृविस्तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पश्चाद्गोपायेताम्"इति मन्त्रेण पश्चिमामुपस्थाय, अथोत्तरतः, " अस्वप्नश्च माऽनवद्राणश्चोत्तरतो गोपायेतामिति चन्द्रमा वा अस्वप्नो वायुरनवद्राणस्तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मोत्तरतो गोपायेताम् " इति मन्त्रेणोत्तरामुपतिष्ठते । ततः समाप्तायां शालायां ज्योतिर्विदुपदिष्टे पुण्येऽहनि "प्रवेशे नववेश्मनः " इति वचनान्मातृपूजाऽऽभ्युदयिकश्राद्धे विधाय ब्राह्मणैः कृतस्वस्त्ययनो मङ्गलतूर्यगीतशान्तिपाठेन सजलकलशब्राह्मणपुरःसरः शुक्लमाल्यानुलेपनस्तादृशसकलपुत्रपौत्रकलत्रादिसमेतः सुशकुनसूचिताभ्युदयस्तोरणाढ्यां शालां द्वारेण प्रविशति । "धर्मस्थूणाराज ँ श्रीस्तूपमहोरात्रे द्वारफलके इन्द्रस्य गृहा वसुमन्तो वरूथिनस्तानहं प्रपद्ये सह प्रजया पशुभिः सह । यन्मे किञ्चिदस्त्युपहूतः सर्वगणसखायसाधुसंवृतः तां त्वा शालेऽरिष्टवीरा गृहान्नः सन्तु सर्वतः" इत्यनेन प्रविशेत् । ततो ब्राह्मणभोजनम् । इति **शालाकर्म**॥४॥

विश्व०-अथातः शालाकर्म-वक्ष्यत इति सूत्रशेषः । **पुण्या...येत्**-शिल्पिभिरिति शेषः । अत्रापि मातृपूजाऽऽभ्युदयिके । **तस्या...हेति**-पूर्णाहुतिवदाज्यं संस्कृत्य **देवस्य त्वे**त्यभ्रिमादाय शालाया आग्नेयनैर्ऋत्यवायव्यैशानेषु क्रमेणो**दमह ँ रक्षसामि**त्यवटान्खात्वा प्राचः पांशून्प्रक्षिप्य परिस्तरणपूर्वकं प्रत्यवटं स्रुवेणाभिजुहोति । मन्त्रमाह-**अच्युताय भौमाय स्वाहे**ति । इदमच्युताय, भौमायेति त्यागः । **स्तम्भ...सानइति**-**इमामुच्छ्रयामी**त्यादिना **श्रेयो वसान** इत्यन्तेनाग्नेयकोणावटे स्तम्भमुच्छ्रयति । उच्छ्रितं यथा स्यात्तथा मूलांशं स्तम्भस्य क्षिपतीत्यर्थः । स्तम्भाभावे शिलाविन्यासः । **चतुरः**-मन्त्रा इत्यर्थः । चतुर्णामेकमन्त्रता । तथा चानेनैव मन्त्रेण नैर्ऋत्यवायव्यैशान्यावटेषु त्रींन्स्तम्भानुच्छ्रयति । प्रत्यवटं स्तम्भोच्छ्रयणे मन्त्रावृत्तिः । यथा-"चतुरः" इति पृथक्सूत्रं, प्राक्सूत्रे मन्त्रकरणकस्तम्भोच्छ्रयणमुक्तम्, कियत्संख्यास्त इत्याकाङ्क्षायामेतत् । **प्रपद्यते**—प्रविशति । शालायामिति शेषः । **अभ्य...पद्य इति**-ब्रह्मासनमास्तीर्येत्येतन्मात्रमपवादितुं **दक्षिणतो ब्रह्माणमुपवेश्ये**त्युक्तम् । उदपात्रस्थापननिरुक्तिश्च प्रणीताप्रणयनप्राक्कालिकप्रणीततरोदपात्रस्थापनार्था । नव्यत्वाच्छालायां प्रागावसथ्यस्यासत्त्वादग्निस्थापनोक्तिः । क्रमश्च पदार्थानाम् । पात्रासादनादौ कांस्ये संभारः । सक्षीराण्यौदुम्बरपत्राणि, दूर्वाः, पल्लवाः, गोमयं, दधि, मधु, घृतं, कुशाः, यवाः, आज्यस्थालीद्वयम् । ग्रहणे-अग्नये, इन्द्राय, बृहस्पतये, विश्वेभ्यो देवेभ्यः, सरस्वत्यै, वाजिभ्य, सर्पदेवजनेभ्यः, हिमवते, वसुभ्यः, रुद्रेभ्यः, आदित्येभ्यः, ईशानाय, जगदेभ्यः, पूर्वाह्णायापराह्णाय, मध्यन्दिनाय, प्रदोषाय, अर्द्धरात्राय, व्युष्ट्यै, देव्यै, महापथायै, कर्त्रे, विकर्त्रे, विश्वकर्मणे, ओषधीभ्यः, वनस्पतिभ्यः, धात्रे, विधात्रे, निधीनां पतये, ब्रह्मणे, प्रजापतये, सर्वाभ्यो देवताभ्यो जुष्टं गृह्णामि । प्रोक्षणे त्वाशब्दः । प्रकृताज्यस्थाल्यामाज्यनिर्वापः । अन्यत्सर्वं प्रकृतिवत् । एवं स्थालीपाक ँ श्रपयित्वाभिघार्योद्वास्य शालाया बहिर्निष्क्रम्य द्वारसमीपे स्थित्वा ब्रह्माणं विलोकयन् प्रार्थयते ब्रह्मन्प्रविशामीति, प्रविशस्वेत्यनुज्ञातो ब्रह्मणा 'ऋतं प्रपद्ये, शिवं प्रपद्ये' इति प्रविशति । ततः प्राणदानादिपर्युक्षणान्ते-**आज्य ँ...धि नः स्वाहेति**—ततः द्वितीयायामाज्यस्थाल्यां निरुप्याज्यमधिश्रित्येत्यादि पूर्णाहुतिवदाज्यं संस्कृत्येह **रतिरुपसृजन्नि**ति द्वाभ्यां कण्डिकाभ्यां द्वे आज्याहुती हुत्वा "इदमग्नये"इति त्यक्त्वा"इदं पशुभ्यः" इति वा । ततो **वास्तोष्पत** इति चतसृभिर्ऋग्भिरपराश्चतस्र आहुतीः प्रत्यृचं जुहोतीत्यर्थः । इदं वास्तोष्पतये इति चतसृषु त्यागः । ततो द्वितीयाज्येनाघारयोराज्यभागयोश्च होमः । **स्थाली...[illegible]**—एभिः षड्भिर्मन्त्रैः प्रतिमन्त्रं स्थालीपाकेन षडाहुतीर्जुहोति । त्यागास्तु—

इदमग्नये, इन्द्राय, वृहस्पतये, विश्वेभ्यो देवेभ्यः, सरस्वत्यै, वाजिभ्यश्च॥१॥ इदं सर्पदेवजनेभ्यो, हिमवते वसुभ्यः, रुद्रेभ्यः, आदित्येभ्यः, ईशानाय, जगदेभ्यश्च ॥ २ ॥ इदं पूर्वाह्णाय, अपराह्णाय, मध्यंदिनाय, प्रदोषाय, अर्द्धरात्राय, व्युष्टयै,देव्यै, महापथायै च ॥ ३ ॥ इदं कर्त्रे, विकर्त्रे, विश्वकर्मणे, ओषधीभ्यः, वनस्पतिभ्यश्च ॥ ४ ॥ इदं धात्रे, विधात्रे, निधीनां पतये च ॥५॥ इदं ब्रह्मणे, प्रजापतये, सर्वाभ्यो देवताभ्यः ॥६॥ **प्राश...प्रोक्षेत्**–स्विष्टकृद्धोमादिदक्षिणादानान्तं प्राशनान्तं तस्मिन् संजाते कांस्ये पात्रे, सुरा, क्षीरं,शाद्वलं, दूर्वा, पल्लवाः, आस्यते येषु रम्येषु तानि मञ्चकपीठादीनि आसनानि उपस्थीयते सुखाद्यर्थे येषु तुलारासादीनि आसनानि, उपस्थानानि च मञ्चकदोलादीनि । तेषु प्रोक्षेत् तेषां प्रोक्षणं कुर्यादित्यर्थः । **पूर्वे...यैतामिति**—पूर्वा प्राची तस्यां वर्तमानो यो दिगन्तरसंधिः तस्मिन्नाग्नेयकोण इत्यर्थः । न चैशानकोणः कुतो नेति वाच्यम्, उत्तरसूत्रे दक्षिणदिक्संधेः सूत्रणात्प्रादक्षिण्याव्यवधानयोश्च न्याय्यत्वात् । **दक्षिणे...येतामिति**—संधिपदव्याख्या पूर्ववत् । अन्यत्स्पष्टम् । **निष्क...मेतामिति**—निगदव्याख्याता चतुःसूत्री । **निष्ठि...वंत इति**—निष्ठितां निष्पन्नां प्रपद्यते प्रविशति धर्मस्थूणाराजमिति मन्त्राभ्यां, प्रवेशनं च सहिरण्यस्य पूर्णोदकुम्भसहितस्य पुण्याहे वेदघोषादिब्राह्मणाशीर्वादपुरस्सरं गृहपतेः । ततः ब्राह्मणेभ्यो दक्षिणां दत्त्वा स्वस्तिवाच्याशिषः प्रतिगृह्य वर्द्धिष्ण्वादि ब्राह्मणभोजनान्तम् । **ततो...जनम्**—कर्मापवर्गे एकस्मै भोजनं दत्त्वा पुनः कर्मसाद्गुण्यार्थं दश पञ्च वा विप्रान्भोजयेत् ॥ इति तृतीयकाण्डस्य चतुर्थी कण्डिका ॥ ४ ॥

अथातो मणिकावधानम् ॥ १ ॥ उत्तरपूर्वस्यां दिशि यूपवदवटं खात्वा कुशानास्तीर्याक्षतानरिष्टकाँ (सुमनसः कपर्दिकान्) श्चान्यानि चाभिमङ्गलानि तस्मिन् मिनोति, मणिकं समुद्रोऽसीति ॥ २ ॥ अप आसिञ्चति । आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं विभृथामृतं च । रायश्च स्थ स्वपत्यस्य पत्नी सरस्वती तद् गृणते वयोऽधादिति ॥३ ॥ आपो हिष्ठेति च तिसृभिः ॥ ४ ॥ ततो ब्राह्मणभोजनम् ॥ ५ ॥ ॥ ५ ॥

कर्कः–अथातो मणिकावधानं–व्याख्यास्यत इति शेषः । मणिकशब्देनालिञ्जरोऽभिधीयते तस्यावधानं स्थापनम् । उत्तरपूर्वस्यां दिशि यूपवदवटं खात्वा तस्मिन्कुशानास्तीर्याक्षतानरिष्टकांश्चान्यानि चाभिमङ्गलानि तस्मिन्मिनोति मणिकं समुद्रोऽसीति–शालायामेवोत्तरपूर्वस्यां दिशि यूपवदवटं खात्वा तस्मिन्कुशानास्तीर्य अक्षतानरिष्टकांश्चान्यानि चाभिमङ्गलानि ऋद्धिवृद्ध्यादीनि तस्मिन्मिनोति मणिकं समुद्रोऽसीत्यनेन मन्त्रेण शम्भूरित्येवमन्तेन । एवमन्तता कथं ज्ञायते । वक्ष्यति ह्युपरिष्टान्मयोभूरित्यनुवाकशेषेणेति । अप आसिञ्चत्यापो रेवतीः–इत्यनेन मन्त्रेण । आपो हि ष्ठेति च तिसृभिः–अप आसिञ्चति । ततो ब्राह्मणभोजनम् ॥ ५ ॥

जय०– अथ मणिकस्य अलिञ्जरस्यावधानं स्थापनम् । वक्ष्यत इति सूत्रशेषः । अग्नेरुत्तरपूर्वस्यामीशान्यां दिशि । **यूपवदिति–देवस्य** त्वेत्यभ्र्यादानम् । **आददे नारी**त्यवटखननम् । तत्र कुशास्तरणम् । अक्षतादीनां च प्रक्षेपः । तत्र मङ्गलानि ऋद्धिवृद्ध्यादीनि । तस्मिन्नवटे मणिकं मिनोति स्थापयति । **समुद्रोऽसी**त्यादिना **शम्भू**रित्यन्तेन मन्त्रेण । एतदन्तता "मयोभूरित्यनुवाकशेषेण" इति वक्ष्यमाणत्वात् **आपो रेवती**रिति मन्त्रेण **आपो हि ष्ठे**त्यादितिसृभिश्चापस्तत्रासिञ्चति प्रक्षिपति । तस्यार्थः । **आपो रेवती**रिति परमेष्ठी, त्रिष्टुप्, आपोऽपामासेचने० । हे आपः यूयं रेवतीः धनवत्यः हि यस्मात् इत्थं वस्वः वसुनो धनस्य क्षयथा निवासभूताः स्थ भवथ । किंच भद्रं श्रेष्ठं क्रतुं यज्ञं बिभृथ धारयथ । अमृतं रसं ब्रह्म वा फलं वा बिभृथ धारयथ । किंच रायो धनस्य स्वपत्यस्य शोभनापत्यस्य पत्नीः स्वामिन्यो यूयम्, तद्दातुं समर्था इत्यर्थः । तत् युष्मत्स्वरूपं गृणते स्तुवते सरस्वती देवी, वयः आयुरधात् दधातु ददात्वित्यर्थः ॥ ९ ॥

(हरि०—**अथातो मणिकावधानम्**—अथ शालाकर्मानन्तरं यतः शालायां मणिकेन भवितव्यमतो मणिकावधानं वक्ष्यत इति सूत्रशेषः । **उत्तरपूर्वस्यां दिशि यूपवदवटं खात्वा कुशानास्तीर्याक्षतानरिष्टकाँश्चान्यानि चाभिमङ्गलानि तस्मिन्मिनोति मणिकठ्ठ समुद्रोऽसीति**—तत्र शालाया उत्तरपूर्वस्यामैशान्यां दिशि यूपवत् अभ्र्यादानपरिलेखनपूर्वकमवटं मणिकबुध्नावस्थानपर्यन्तं गर्त्तं खात्वा निखाय ततः प्राचः पांसूनपोह्यावटस्योपरि प्रागग्रान् दीर्घान् कुशानास्तीर्य स्तृत्वा अक्षतान्यवान् अरिष्टकफलानि अन्यानि च सुमङ्गलानि ऋद्धिवृद्धिसिद्धार्थकादीनि तान्यथास्तीर्य्योप्य, चकारः समुच्चयार्थः । तस्मिन्नवटे मणिकम् उदकधानीं मिनोति स्थापयति **समुद्रोऽसि नभस्वानार्द्रदानुः शम्भूरित्येतावता** मन्त्रेण । **अप आसिञ्चत्यापो रेवतीरिति** । तस्मिन्मणिके अप अशूद्राहृतनद्याद्युदकमासिञ्चति प्रक्षिपति **आपो रेवतीरिति** मन्त्रेण । **आपो हि ष्ठेति च तिसृभिः**—**आपो हि ष्ठा मयोभुव** इत्यादिभिस्तिसृभिर्ऋग्भिः पुनर्मणिके सकृदप आसिञ्चति । **ततो ब्राह्मणभोजनम्**—इति सूत्रार्थः ॥ ५ ॥)

अथ **पद्धतिः**—ततो मणिकावधाननिमित्तमातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा अग्नेरीशानप्रदेशे "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आददे नार्यसि" इति मन्त्रेणाभ्रिमादाय "इदमहꣳ रक्षसां ग्रीवा अपि कृन्तामि" इत्यवटं भाण्डानुमानं परिलिख्य उदकं स्पृष्ट्वा, गर्त्तं खात्वा, प्राचः पांसूनपास्य, कुशानास्तीर्य, अक्षतानरिष्टकान् ऋद्धिवृद्धिहरिद्रादूर्वासितसर्षपादिमङ्गलद्रव्यं निक्षिप्य तदुपरि "समुद्रोऽसि नभस्वानार्द्रदानुः शम्भूः" इत्येतावता मन्त्रेण मणिकमवटे निधाय ततः "आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च । रायश्च स्थ स्वपत्यस्य पत्नी सरस्वती तद् गृणते वयोऽधात्" इत्यनेन मन्त्रेण । तथा **आपो हि ष्ठा मयोभुव** इत्यादित्र्यृचेन च सकृन्मणिके अप आसिञ्चति । ततो ब्राह्मणमेकं भोजयेत् । इति **मणिकावधानम्** ॥ ६ ॥

विश्व०—अथातो मणिकावधानम्—वक्ष्यते इति सूत्रशेषः । मणिकः शरावाकृतिरुदपात्रम् । एतच्चावसथ्याधानानन्तरं तद्दिन एव भवति । प्रात्यहिकहोमसाधनीभूतपञ्चमहायज्ञपाकपर्युक्षणादेर्मणिकोदकसाध्यत्वात् । ऋषेः स्वातन्त्र्यादिह सूत्रणम् । अत्रादौ मातृपूजापूर्वकमाभ्युदयिकं श्राद्धमग्नौकरणसहितम् । अत ऊर्ध्वमपि क्रियमाणसर्वाभ्युदयिकश्राद्धेऽग्नौकरणं भवति । तद्धोमश्चावसथ्ये सव्येन दैवत्वाद्धोमस्य । होमशेषस्य पितृपात्रे पिण्डे च प्रक्षेपः **श्राद्धकल्पात्** । अपरे तु "अग्न्यभावे तु विप्रस्य" इत्यादिवाक्यानुरोधान्निरग्नेरप्यग्नौकरणमिच्छन्ति । **आचार्य**मते तु सान्निध्याभावः । तथा च होमवद्गृहीताग्नेरेव विप्रकराद्यधिकरणानि र्देशः । न च सूत्रात्तदर्थसिद्धेर्वाक्यानर्थक्यम् । एवकारस्याधिकरणान्तरनिषेधकत्वात् । कथं कर्त्तव्यमत आह**उत्त...खात्वा**—ऐशान्यामग्नेः । यूपवदनेन **देवस्य** त्वेत्यभ्रिमादायावटं परिलिखतीदमहमिति । उदकस्पर्शः । प्राचपांसूद्वापः । **कुशा...लानि**—कुशान्प्रागग्रानुदगग्रान्वाऽऽस्तीर्यावटे । अक्षतान्यवान् अरिष्टकफलानि अन्यानि अभिमङ्गलानि ऋद्धिवृद्धिकारीणि । कपर्दकान् पुष्पाणि सर्वौषधीदूर्वाशमीपत्रसर्षपादीनि अवटे प्राक्षिप्येत्यर्थकश्चकारः । **तस्मि...द्रोऽसीति**—तस्मिन्नवटे मणिकं मिनोति स्थापयति **समुद्रोऽसी**त्यारभ्य **शंभू**रित्यन्तेन मन्त्रेण । भ्वन्तता च "मयोभूरित्यनुवाकशेषेण" इति वक्ष्यमाणत्वात् । **अप...योऽधादिति**—मणिक इति शेषः । **आपो...सृभिः**—माणिके अप आसिञ्चतीति समुच्चयार्थश्चकारः । **ततो...जनम्**—पञ्च ब्राह्मणान् भोजयेदित्यर्थः । पात्रजलादेर्भङ्गशोषादौ समन्त्रकं तत्तदावर्तते । ब्राह्मणभोजनं त्वग्नेः पुनराधाने । इति तृतीयकाण्डस्य पञ्चमी कण्डिका ॥ ५ ॥

✓

अथातः शीर्षरोगभेषजम् ॥१॥ पाणी प्रक्षाल्य भ्रुवौ विमार्ष्टि ॥२॥ चक्षुर्भ्यांꣳ श्रोत्राभ्यां गोदानाच्चुबुकादधि । यक्ष्मꣳ शीर्षण्यꣳ रराटाद्विवृहामीममिति । अर्द्दं चेदवभेदक विरूपाक्ष श्वेतपक्ष महायशः । अथो चित्रपक्ष शिरो माऽस्याभितापीद्दिति ॥ ३ ॥ क्षेम्यो ह्येव भवति ॥ ४ ॥ ६ ॥

CC0. In Public Domain. Kritikant Sharma Najafgarh Delhi Collection

कर्कः–अथातः शीर्षरोगभेषजम्–व्याख्यास्यते । पाणी प्रक्षाल्य भ्रुवौ विमार्ष्टि–पाणिभ्यामेव, चक्षुर्भ्यामित्यनेन मन्त्रेण । अर्द्धं चेत् शीर्षरोगेण गृह्यते । अवभेद इत्यनेन मन्त्रेण भ्रूविमार्जनम् । एवं च कृते क्षेम्य एव भवति ॥ ६ ॥

जय०–अथातः शिरोरोगस्य भेषजं निवर्तकम् । वक्ष्यत इति सूत्रशेषः । प्रक्षालिताभ्यां पाणिभ्यां सव्यासव्याभ्यां भ्रुवोः सव्यासव्ययोर्यथाक्रमं मार्जनं युगपत् **चक्षुर्भ्यामि**ति मन्त्रेण । तस्यार्थः । तत्र परमेष्ठी, अनुष्टुप्, वायुरपाकरणे० । चक्षुराद्यङ्गेभ्यः अधि सकाशादिमं यक्ष्मं रोगविशेषम् , शीर्षणि भवं शीर्षण्यं विवृहामि पृथक्करोमि निराकरोमीत्यर्थः । तत्र गोदानं शिरोदेशः । छुबुकं चिबुकम् । रराटं ललाटम् । अर्द्धं चेच्छीर्षं रोगेण गृह्यते तदाऽपि पाणी प्रक्षाल्य पीडितभ्रूपार्श्ववर्तिना हस्तेन तद्भ्रूमार्जनम् **अवभेदके**ति मन्त्रेण । तस्यार्थः । तत्र प्रजापतिरनुष्टुप्, विरूपाक्षः, अपाकरणे० । अव अवाचीनं कृत्वाऽङ्गं भेदयति विदारयति इति हे अवभेदक । विरूपे विकृते अक्षिणी यस्मादिति हे विरूपाक्ष । श्वेतपक्षेत्यादीन्यन्वर्थसम्बोधनानि । भो एवम्भूत शिरोरोग अस्य रोगिणः शिरः मा ताप्सीत् । त्वत्प्रसादात् तापयुक्तं मा भूत् यद्वा भवानस्य शिरो मा सन्तापयत्विति । इत्येवं कृते हि निश्चितं क्षेम्यः क्षेमार्होऽयं भवति । एतेनार्द्धशीर्षरोगस्वरूपं प्रतिपादितम् ॥ ६ ॥ ॥ * ॥

हरि०–अथातः शीर्षरोगभेषजम्–अथ मणिकावधानानन्तरं यतः शिरोरोगवान् किञ्चित्कर्म
कर्तुं न शक्नोति अतो हेतोः शीर्षणि मूर्द्धनि रोगस्तस्य भेषजं प्रतीकारः, वक्ष्यत इति सूत्रशेषः ।
पाणी प्रक्षाल्य भ्रुवौ विमार्ष्टि, चक्षुर्भ्यांꣳ श्रोत्राभ्यां गोदानाच्छुबुकादधि । यक्ष्मꣳशीर्षण्य-
ꣳरराटाद्विवृहामीममिति–यदि स्वस्य परस्य वा पीडा भवति तत्र पाणी स्वकीयौ हस्तौ प्रक्षाल्य
अद्भिरवनेज्य भ्रुवौ युगपत् ताभ्यां पाणिभ्यां विमार्ष्टि प्रोक्षति । अन्यस्य वा स्वयं करोति **चक्षुर्भ्या-**
मित्यादि विवृहामीममित्यन्तेन मन्त्रेण । **अर्द्धं चेदवभेदक विरूपाक्ष श्वेतपक्ष महायशः । अथो**
चित्रपक्ष शिरो मास्याभिताप्सीदिति–अर्द्धं चेत् शीर्षं व्यथते तदा पूर्ववत्पाणी प्रक्षाल्य दक्षिणेन
पाणिना यदि शिरसो दक्षिणभागे रुक् तर्हि दक्षिणाम्, वामे वामाम् **अवभेदके**त्यादिना **मास्याभि-**
ताप्सीदित्यन्तेन मन्त्रेणैकां भ्रुवं विमार्ष्टि । **क्षेम्यो ह्येव भवति**–हि ततः क्षेम्यः शिरोरोगरहित
एवासौ भवतीति ॥ ६ ॥

दक्षिणोत्तरौ पाणी प्रक्षाल्य
विश्व०–अथा...षजम्–वक्ष्यत इति सूत्रशेषः । कथमत आह–**पाणी...ममिति**–
ताभ्यां दक्षिणोत्तरे भ्रुवौ यथाक्रमं विमार्ष्टि **चक्षुर्भ्यामिति** मन्त्रेण युगपत् । एतच्च स्वपरसाधारणम् । **अर्द्धं...प्सी**
दिति–अर्द्धं चेच्छीर्षं रोगेण पीडयेत् तदा पूर्ववत्पाणी प्रक्षाल्य पीडितभ्रूपार्श्ववर्तिना हस्तेन तदभ्रूप्रोञ्छनम् **अवभेदके**ति
मन्त्रेण । **क्षेम्यो ह्येव भवति** क्षेम्यः शिरोरोगराहितः । इति तृतीयकाण्डस्य षष्ठी कण्डिका ॥ ६ ॥

उतूलपरिमेहः ॥ १ ॥ स्वपतो जीवविषाणे स्वं मूत्रमासिच्याप*सलवि त्रिः परिषिञ्चन्परीयात् । परि त्वा गिरेरहं परि मातुः परि स्वसुः । परि पित्रोश्च भ्रातॄश्च सख्येभ्यो विसृजाम्यहम् । उतूल परिमीढोऽसि परिमीढः क्व गमिष्यसीति ॥ २ ॥ स यदि भ्रम्याद्दावाग्निमुपसमाधाय घृताक्तानि कुशेण्ड्वानि जुहुयात् । परि त्वा ह्वलनो ह्वल निर्वृत्तेन्द्रवीरुधः ॥ इन्द्रपाशेन सित्वा मह्यं मुक्त्वाऽथान्यमानयेदिति ॥ ३ ॥ क्षेम्यो ह्येव भवति ॥ ४ ॥ ७ ॥

---

* अपसलमैवेति पाठान्तरम् ।

कर्कः–उत्तूलपरिमेहः–उतूलो दास उच्यते । तस्य भ्रमणशीलस्य वशीकरणाय परिमेहः परिषेकः क्रियते । स्वपतो जीवविषाणे स्वं मूत्रमासिच्यापसलमेव त्रिः परिषिञ्चन् परीयादिति–परि त्वा गिरेरहम् इत्यनेन मन्त्रेण । स्वपतो दासस्य जीवतः पशोर्विषाणे स्वं मूत्रमासिच्यापसव्यं तमेव त्रिः परिषिञ्चन्परीयात् परि त्वा गिरेरित्यनेन मन्त्रेण । स यदि भ्रम्याद्दावाग्निमुपसमाधाय घृताक्तानि कुशेण्ड्वानि जुहुयात्–स यदि पुनर्भ्रम्यादेव ततो दावाग्निमुपसमाधाय आगन्तुकत्वाच्चतुर्दशाहुतिकान्ते घृताक्तानि कुशेण्ड्वानि जुहुयात्–परि त्वा ह्वलनो ह्वलमित्यनेन मन्त्रेण । एवं कृते क्षेम्य एव भवति ॥ ७ ॥

जय०– उतूलो विवशो दासः, तस्य परिमेहो वशीकरणायाभिषेकः । वक्ष्यत इति सूत्रशेषः । स्वपतो दासस्योपचारः । जीवतः पशोर्विषाणे शृङ्गे स्वं मूत्रमासिच्य तेनैव दासम् अपसलवि अप्रदक्षिणं परिषिञ्चन् त्रिवारं परीयात्परिभ्रमेत् **परि त्वेति** मन्त्रेण । तस्यार्थः । तत्र प्रजापतिरनुष्टुप्, वायुः, सेचने० । भो उतूल त्वा त्वां गिरेः पर्वतादपि परि आकृष्य विशिष्टतया सृजामि मय्यनुरक्तं करोमि मात्रादिभ्यश्च । तत्र भगिनीभ्रात्रोर्मातापित्रोश्चेति षष्ठ्यौ पञ्चम्यर्थे । परिशब्दावृत्तिर्मन्त्रशक्तिदार्ढ्याय, सख्येभ्यः सखिभावमापन्नेभ्योऽपि । परिमीढः मन्त्रशक्त्या सेचनरूपैः पाशैर्बद्ध इत्यर्थः । शिष्टं स्पष्टम् । एवं परिमीढोऽपि पुनर्यदि भ्रम्यात्तदोपायान्तरमाह–दावाग्निमुपस्थाप्य आगन्तुत्वाच्चतुर्दशाहुत्यन्ते घृताक्तानि कुशेण्ड्वानि कुशकुण्डलानि त्रीणि जुहुयात् **परि त्वा ह्वलन** इति मन्त्रेण । तस्यार्थः । तत्र परमेष्ठी, अनुष्टुप्, इन्द्रो होमे० । भो ह्वल चञ्चल इन्द्रस्य ईश्वरस्य वीरुधः पाशात् सेवकः स्वामिभक्तः स्यादित्येवंरूपात् परि समन्ततो निर्वृत्त निर्गत्य स्थितः, अथ अतः त्वा त्वां ह्वलनो ज्वलनोऽयमग्निरिन्द्रपाशेन तेनैव सित्वा बद्ध्वा अन्यं तव मनसि स्थितम् अनर्थकारिभूतविशेषं मुक्त्वा मोचयित्वा मह्यं मामाश्रयितुम् आनयेत् आनयतु । मदायत्तं करोत्वित्यर्थः । यद्वा ह्वलनिर्वायुः । वृत्ता वर्त्तिता रक्षिता इन्द्रवीरुधो वेदा येन सः । सशब्दस्य वाय्वात्मकत्वात् एवम्भूतो वायुश्चेति योज्यम् । तत्पक्षे त्वेति दासविशेषणमुपक्रान्तत्वात् । शेषं समानम् ॥ ७ ॥

(**हरि०**–उतूलपरिमेहः–उतूलस्य दुर्विनीतस्य दासस्य परि समन्तात् मेहः सेचनं वशीकरणाभिषेक इति यावत्, कर्म्म कथ्यते । तद्यथा स्वपतो जीवविषाणे स्वं मूत्रमासिच्यापसलवि त्रिः परिषिञ्चन्परीयात् परि त्वा गिरेरहं परि मातुः परि स्वसुः । परि पित्रोश्च भ्रात्रोश्च सखिभ्यो विसृजाम्यहम् । उतूल परिमीढोऽसि परिमीढः क्व गमिष्यसीति–यदा स दासः स्वपिति तदा गवादेः पशोः जीवतो विषाणे शृङ्गे स्वं मूत्रमासिच्य सिक्त्वा तस्य स्वपतो दासस्य अपसलविः अप्रादक्षिण्येन विषाणस्थं मूत्रं परि समन्तात्सिञ्चन् उक्षन् त्रिः त्रीन् वरान् परीयात् परिभ्रमेत् परि त्वा गिरेरित्यादि क्व गमिष्यसीत्यन्तेन मन्त्रेण । स यदि भ्रम्याद्दावाग्निमुपसमाधाय घृताक्तानि कुशेण्ड्वानि जुहुयात् परि त्वा ह्वलनो ह्वल निर्वृत्तेन्द्रवीरुधः । इन्द्रपाशेन सित्वा मह्यं मुक्त्वाऽथान्यमानयेदिति–स दासो यदि अस्मिन्कर्मणि कृतेऽपि भ्रम्यात् स्वेच्छया विचरेत् तदा तद्वश्यार्थमिदं कर्मान्तरं कुर्यात् । तद्यथा–पञ्चभूसंस्कारपूर्वकं दावाग्निं वनदहनं स्थापयित्वा ब्रह्मोपवेशनादिपर्युक्षणान्ते आघारावाज्यभागौ महाव्याहृतिसर्वप्रायश्चित्तप्राजापत्यस्विष्टकृदन्ताश्चतुर्दशाहुतीर्हुत्वा कुशेण्ड्वानि कुशानामिण्ड्वानि कुण्डलाकाराणि घृताक्तानि त्रीणि परि त्वेत्यादिना अथान्यमानयेदियन्तेन मन्त्रेण सकृदेव जुहुयात् । [illegible] । ततः संस्रवप्राशनादि ब्रह्मणेदक्षिणादानान्तं

कर्म कुर्यात् । क्षेम्यो ह्येव भवति—अस्मिन्कर्मणि कृते हि स्फुटं क्षेम्यः वश्य एव दासो भवति सम्पद्यते । इत्युतूलदासवश्यकर्म ॥ ७ ॥ ॥ * ॥

विश्व०—उतूलपरिमेहः—उतूलः दुर्विनीतो दासः । तस्य परिमेहः वशीकरणं वक्ष्यत इति सूत्रशेषः । स्वपतो...ष्यसीति—स्वपतः दासस्य वक्ष्यमाणः परिषेकः । कथं कुर्यादत आह—जीवविषाणे जीवतः छागस्य विषाणे दक्षिणे [वामे] स्वं मूत्रमासिच्य तेन मूत्रेण दासमपसलवि अप्रदक्षिणं परिषिञ्चन् त्रिः वारत्रयं परीयात्परिभ्रमेत्परि त्वेति मन्त्रेण । उदकस्पर्शं वारत्रयमितरथाऽऽवृत्तिः । स यदि...येदिति—एवं परिमीढोऽपि स दासादिर्यदि भ्रान्तः स्यात्तदोपायान्तरमाह—उपलिप्त उद्धतावोक्षिते दावाग्निमुपसमाधाय ब्रह्मासनास्तरणादिचतुर्दशाहुत्यन्ते कुशेण्ड्वानि कुशकुण्डलानि त्रीणि घृतेनाक्तानि परि त्वा ह्वलन इति मन्त्रेण स्रुवेण जुहुयात् । ततः संस्रवप्राशनादि ब्राह्मणभोजनान्तम् । क्षेम्यो ह्येव भवति—वश्योऽभ्रान्तश्च भवतीत्यर्थः । इति तृतीयकाण्डस्य सप्तमी कण्डिका ॥ ७ ॥ ॥ * ॥

शूलगवः ॥ १ ॥ स्वर्ग्यः पशव्यः पुत्र्यो धन्यो यशस्य आयुष्यः ॥ २ ॥ औपासनमरण्यꣳ हृत्वा वितानꣳ साधयित्वा रौद्रं पशुमालभेत ॥ ३ ॥ साण्डम् ॥ ४ ॥ गौर्वा शब्दात् ॥ ५ ॥ वपाꣳ श्रपयित्वा स्थालीपाकमवदानानि च रुद्राय वपामन्तरिक्षाय वसाꣳ स्थालीपाकमिश्राण्यवदानानि जुहोत्यग्नये रुद्राय शर्वाय पशुपतय उग्रायाशनये भवाय महादेवायेशानायेति च ॥ ६ ॥ वनस्पतिस्विष्टकृदन्ते ॥ ७ ॥ ८ ॥ दिग्व्याघारणम् ॥ ९ ॥ व्याघारणान्ते पत्नीः संयाजयन्तीन्द्राण्यै रुद्राण्यै शर्वाण्यै भवान्या अग्निं गृहपतिमिति ॥ १० ॥ लोहितं पालाशेषु कूर्चेषु रुद्राय सेनाभ्यो बलिꣳ हरति यास्ते रुद्र पुरस्तात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमो यास्ते रुद्र दक्षिणतः सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमो यास्ते रुद्र पश्चात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमो यास्ते रुद्रोत्तरतः सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमो यास्ते रुद्रोपरिष्टात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमो यास्ते रुद्राधस्तात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नम इति ॥ ११ ॥ ऊवध्यं लोहितलिप्तमग्नौ प्रास्यत्यधो वा निखनति ॥ १२ ॥ अनुवातं पशुमवस्थाप्य रुद्रैरुपतिष्ठते प्रथमोत्तमाभ्यां वाऽनुवाकाभ्याम् ॥ १३ ॥ नैतस्य पशोर्ग्राममꣳ हरन्ति ॥ १४ ॥ एतेनैव गोयज्ञो व्याख्यातः ॥ १५ ॥ पायसेनानर्थलुप्तः ॥ १६ ॥ तस्य तुल्यवया गौर्दक्षिणा ॥ १७ ॥ ८ ॥

कर्कः—शूलगवः । स्वर्ग्यः पशव्यः पुत्र्यो धन्यो यशस्य आयुष्यः—शूलगवाख्यं कर्म स्वर्गादिभिः कामैः पर्यायेण सम्बध्यते, नहि युगपत्सर्वकामानामुत्पत्तिसम्भवः । तत्कर्माभिधानायाह—औपासनमरण्यꣳ हृत्वा वितानꣳ साधयित्वा रौद्रं पशुमालभेत साण्डम्—औपासनमग्निमरण्यं नीत्वा विहरणं कृत्वा रुद्रदेवत्यं पशुमालभेत साण्डम् । साण्डशब्देनानपुंसक उच्यते, तस्य चान्वयाच्छागपरिहरणप्राप्तौ—गौर्वा शब्दादित्याह । गौरेव स्यान्न च्छागः । कुत एतत् । “शूलगवः” इति शब्दादेव । वपाꣳ श्रपयित्वा स्थालीपाकमवदानानि च—विहतश्रपणपरिप्राप्तौ सत्यां सहश्रपणार्थोऽयमारम्भः । विहतं श्रपणं कथमिति चेच्चोदकपरिप्राप्त्याऽऽज्यासाद-

---

१ केचित्तु वनस्पतिः ॥ ७ ॥ इति पृथक्कुर्वन्ति ॥

नोत्तरकालमन्येषां पशूनां शाखानिखननं हि प्राप्तम् । उत्तराघारान्ते च पशुसमञ्जनादि वपादीनां विहृतमेव श्रपणं प्राप्तम्, अतो वचनात्सहश्रपणमुच्यते । **रुद्राय वपामन्तरिक्षाय वसाम्**—जुहोतीति शेषः । **स्थालीपाकमिश्राण्यवदानानि जुहोत्यग्नये रुद्राय शर्वाय पशुपतय उग्रायाशनये भवाय महादेवायेशानाय**—इत्येभिर्मन्त्रैः । ततो वनस्पतिहोमः, स च यथा दृष्टः पृषदाज्येन । **स्विष्टकृदन्ते दिग्व्याघारणं**—कर्तव्यमिति शेषः । तच्च वसया, यथा—अग्नीषोमीये दृष्टम् । **व्याघारणान्ते पत्नीः संयाजयन्तीन्द्राण्यै रुद्राण्यै शर्वाण्यै भवान्या अग्निं गृहपतिम्**—एत एव मन्त्राः । अपराग्नौ पत्नीसंयाजहोमः । तथैव दृष्टत्वात् । ततो महाव्याहृत्यादि । **लोहितं पालाशेषु कूर्चेषु रुद्राय सेनाभ्यो बलिꣳ हरति । यास्ते रुद्र पुरस्तात्सेना०**—इत्येवमादिभिर्मन्त्रैः । **ऊवध्यं लोहितलिप्तमग्नौ प्रास्यत्यधो वा निखनति । अनुवातं पशुमवस्थाप्य रुद्रैरुपतिष्ठते**—अनुवातमिति न प्रतिवातम् । **प्रथमोत्तमाभ्यां वाऽनुवाकाभ्याम्**—उपतिष्ठते । वाशब्दो विकल्पार्थः । **नैतस्य पशोर्ग्राममꣳ हरन्ति**—मांसमिति । **एतेनैव गोयज्ञो व्याख्यातः । पायसेन**—असौ भवति । **अनर्थलुप्तः**—पायसमात्रसाधकत्वे पाशुको योऽर्थस्तेनालुप्तो भवति । एतदुक्तं भवति । पायसेन देवतामात्रेज्येति । **तस्य तुल्यवया गौर्दक्षिणा** ॥ ८ ॥ * ॥

जय०--**शूलगव** इति कर्मनामधेयम् । स्वर्ग्य इति स्वर्गादिकामैः पर्यायेण सम्बध्यते । न हि युगपत्सर्वकामोत्पत्तिसम्भवः । वक्ष्यत इति सूत्रशेषः । औपासनम् आवसथ्याग्निम् अरण्यं नीत्वा तत्र वितानं साधयित्वा आवसथ्याग्नेराहवनीयदक्षिणाग्न्योरुद्धरणं कृत्वा रुद्रदेवत्यं पशुं साण्डमनपुंसकमालभेत । तस्य चान्वयाच्छागस्य प्राप्तौ गौर्वा । वाशब्द एवार्थे । गौरेव न च्छागः । कुतः शब्दाच्छूलगव इति वचनात् । **वपां श्रपयित्वे**ति विहृतश्रपणे प्राप्ते सहश्रपणार्थोऽयमारम्भः । विहृतश्रपणं कथमिति चेत् चोदकपरिप्राप्त्याऽऽज्यासादनोत्तरकालमन्येषां पशूनां शाखानिखननं प्राप्तम्, उत्तराघारान्ते च पशुसमञ्जनादि । वपादीनां विहृते शामित्राग्नाववदानानां वपायाश्चाहवनीय एव श्रपणं प्राप्तम् । अतोऽत्र वचनात्सहश्रपणमुच्यते । **रुद्राये**त्यादौ जुहोतीति शेषः । अवदानानि चरुमिश्राण्यग्न्यादीशानान्तेभ्यो जुहोत्येभिरेव नाममन्त्रैः । ततो वनस्पतिहोमः पृषदाज्येन तेनैव दृष्टत्वात् । ततः स्विष्टकृते हुत्वा दिशां व्याघारणं कर्तव्यमिति सूत्रशेषः । तच्च वसया भवति । **यथाऽग्नीषोमीये** पत्नीसंयाजा अप्येतैर्नाममन्त्रैरपराग्नौ । तत्र दृष्टत्वात् । ततः प्राशनान्ते पशुना तुल्यवयस्कं गां दत्त्वा लोहितं पशो रक्तं पालाशेषु पलाशपत्रेषु कूर्चेषु च कुशासनेषु बलित्वेन ददाति **यास्ते रुद्रे**त्यादिषड्भिर्मन्त्रैः प्रतिमन्त्रम् । तदर्थः सुगमः । ते तुभ्यं चेति योज्यम् । तत्र षण्णां परमेष्ठी, यजुः, रुद्रो, बलिहरणे० । ऊवध्यं पुरीषाधानं पोटीति प्रसिद्धम्, आहवनीये प्रक्षिपति अनुवातं वाताभिमुखं पशुमवशिष्टं पशुशरीरम् । रुद्रैः रुद्राध्यायाम्नातमन्त्रैः स्तौति । प्रथमोत्तमौ आद्यन्तौ ताभ्यां वा । पशोरत्र मांसमिति शेषः । एतेनैव विधानेन गोयज्ञः कर्मविशेषः । असौ च पायसेन चरुणा अनर्थलुप्तश्च भवति । पायसेन शूलगवदेवतामात्रेज्येत्यर्थः । तस्य शूलगवपशोर्वयसा तुल्यवया गौर्दक्षिणा देया ॥ ८ ॥

हरि०—**शूलगवः—स्वर्ग्यः पशव्यः पुत्र्यो धन्यो यशस्य आयुष्यः**—अथ स्वर्गादिकामस्य शूलगवाख्यं कर्म यागविशेषमत्रविधास्यन्नाह—शूलगव इति । स च स्वर्ग्यः स्वर्गाय हितः, पशव्यः

पशुभ्यो हितः, पुत्र्यः पुत्रेभ्यो हितः,धन्यः धनाय हितः,यशस्यः यशसे हितः, आयुष्यः आयुषे हितः। अयमर्थः। यदा यजमानः स्वर्गपशुपुत्रधनयशआयुषामन्यतमकामो भवति तदाऽनेन शूलगवाख्येन यागेन यजेत। अनेककामानां युगपदुत्पत्त्यसम्भवात्। **औपासनमरण्यꣳ हृत्वा वितानꣳ साधयित्वा रौद्रं पशुमालभेत साण्डम्**--औपासनमावसथ्याग्निम् अरण्यमटवीं नीत्वा तत्र वितानं त्रेताग्निविन्यासं साधयित्वा शुल्वोक्तप्रकारेण विरचय्य, रौद्रं रुद्रो देवता अस्येति रौद्रं, तं पशुं छागम् आलभेत सञ्ज्ञपयति। कथम्भूतं साण्डम् अण्डाभ्यां सह वर्तत इति साण्डस्तम् अनपुंसकमित्यर्थः। **गौर्वा शब्दात्**--वाशब्दः पक्षव्यावृत्तौ। नैव छागः पशू रौद्रः अपि तु साण्डो गौः, कुतः, शब्दात् शूलगव इत्येतस्माच्छब्दात्। **वपाꣳ श्रपयित्वा स्थालीपाकमवदानानि च रुद्राय वपामन्तरिक्षाय वसाꣳ स्थालीपाकमिश्राण्यवदनानि जुहोति अग्नये रुद्राय शर्वाय पशुपतय उग्रायाशनये भवाय महादेवायेशानायेति**—वपां पक्त्वा स्थालीपाकमवदानानि च हृदयादीनि सहैव श्रपयित्वा। ननु पशुतन्त्रे विहृत्य शामित्रेऽग्नाववदानश्रपणं वपाश्रपणं चाहवनीये दृष्टम्। अत्र तन्मा भूदिति सहश्रपणमुच्यते स्थालीपाकमवदनानि चेति। तत्र रुद्राय वपां जुहोति, अन्तरिक्षाय वसां जुहोति, अत्र जुहोतीत्युभयत्राध्याहारः। स्थालीपाकमिश्राण्यवदानानि। अवदानहोमावसरे हृदयादीन्यवदानानि स्थालीपाकेन चरुणा संयुतानि जुहोति नवकृत्वः अग्नये स्वाहेत्येवमादिभिर्नवभिर्मन्त्रैः प्रतिमन्त्रमग्नौ प्रक्षिपति। कथम्। अग्नये स्वाहा १। रुद्राय स्वाहा २। शर्वाय स्वाहा ३। पशुपतये स्वाहा ४। उग्राय स्वाहा ५। अशनये स्वाहा ६। भवाय स्वाहा ७। महादेवाय स्वाहा ८। ईशानाय स्वाहा ॥ ९ ॥ यथामन्त्रं त्यागाः। **वनस्पतिस्विष्टकृदन्ते दिग्व्याघारणम्**—वनस्पतिश्च स्विष्टकृच्च वनस्पतिस्विष्टकृतौ तयोरन्तः वनस्पतिस्विष्टकृदन्तः तस्मिन् दिशां व्याघारणं कर्तव्यमिति। सूत्रशेषः। तत्तु व्याघारणं वसयैव भवति। तत्र वनस्पतिहोमः स्विष्टकृद्धोमादर्वाक् पृषदाज्येन भवति, पशौ तथा दृष्टत्वात्। स्विष्टकृद्धोमश्च सर्वावदानपक्षे त्र्यङ्गेभ्यः असर्वावदानपक्षे तेभ्य एवावशिष्टेभ्यः। अत्र सूत्रे व्याघारणमेव निबद्धम्, तत्र द्रव्यदेवतापेक्षायां सर्वपशुप्रकृतिभूताग्नीषोमीये दर्शनात् वसाद्रव्यं दिशो देवता व्याघारणधर्मतया लभ्यते। **व्याघारणान्ते पत्नीः संयाजयन्तीन्द्राण्यै रुद्राण्यै शर्वाण्यै भवान्या अग्निं गृहपतिमिति**—व्याघारणं दिशामभिघारणं तस्यान्ते अवसाने पत्नीः पञ्च वक्ष्यमाणाः संयाजयन्ति जाघन्या पश्चनङ्गे। कथम्, इन्द्राण्यै रुद्राण्यै इत्यादिपञ्चभिर्मन्त्रैः स्वाहाकारान्तैः प्रतिमन्त्रम्। **लोहितं पालाशेषु कूर्चेषु रुद्राय सेनाभ्यो बलिꣳ हरति यास्ते रुद्रेत्यादि**—ततो महाव्याहृत्यादि, लोहितं तस्यैव पशो रुधिरं पालाशेषु पलाशपत्रेषु कूर्चेषु आसनेषु प्राक्संस्थेषु उदक्संस्थेषु वा, रुद्रायसेनाभ्यः रुद्रायदेवतायै सेना रुद्रायसेनाः अलुक्समासः ताभ्यो बलिमुपहारं हरति ददाति **यास्त** इत्यादिभिः षड्भिर्मन्त्रैः षट्सु पालाशकूर्चेषु प्रतिमन्त्रमेकैकम्। **ऊवध्यं लोहितलिप्तमग्नौ प्रास्यत्यधो वा निखनाति**—ऊवध्यं पुरीषाधानं, पोटीति प्रसिद्धम्। लोहितेन रक्तेन लिप्तं संसृष्टं लोहितलिप्तमग्नौ आहवनीये प्रास्यति प्रक्षिपति अधो भूमौ वा निखनाति निदधाति। **अनुवातं पशुमवस्थाप्य रुद्रैरुपतिष्ठते प्रथमोत्तमाभ्यां वाऽनुवाकाभ्याम्**—अनुवातं वातमनु लक्षीकृत्य वाताभिमुखमित्यर्थः। पशुमवशिष्टं पशुशरीरमवस्थाप्य निधाय रुद्रैर्**नमस्त** इत्यध्यायाम्नातै रुद्रमन्त्रैरुपतिष्ठते स्तौति। यद्वा—प्रथमोत्तमाभ्यामनुवाकाभ्यां मन्त्रससमुदायाभ्याम्। तत्र प्रथमोऽनुवाको **नमस्त** इत्यारभ्य षोडशर्चः, उत्तमोऽन्तिमः द्रापे अन्धसस्पत इत्यारभ्य विंशतिकण्डिकात्मकः। **नैतस्य पशोर्ग्रामꣳ हरन्ति**—एतस्य रौद्रस्य पशोर्मांसं ग्रामं न हरन्ति ग्रामं प्रति न नयन्ति याज्ञिकाः, किन्तु अरण्य एवोत्सृजन्ति। **एतेनैव गोयज्ञो व्याख्यातः**—एतेनैव शूलगवेनैव यज्ञेन गोयज्ञो गोयज्ञनामधेयो यागो व्याख्यातः कथितः। तत्र द्रव्यविशेषमाह--**पायसेनानर्थलुप्तः**--पायसेन पयसा [illegible] अनर्थलुप्तः शूलगवप्रधानदेवताहोमलोप-

रहितः । **तस्य तुल्यवया गौर्दक्षिणा**—तस्य शूलगवपशोर्वयसा तुल्यं समं वयो जन्मातिक्रान्तकालं यस्य गोः स तुल्यवया गौः गापुङ्गवः, दक्षिणा परिक्रयद्रव्यं ब्रह्मणे देयमिति सूत्रार्थः ॥ ८ ॥

अथ **प्रयोगः** । स्वर्गपशुपुत्रधनयशआयुष्कामानां शूलगवपशुबन्धो विहितः, तत्र मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा औपासनाग्निमादायारण्यं गच्छेत् । तत्र शुचौ देशे गार्हपत्यायतनं सप्तविंशत्यङ्गुलं वृत्तं विधाय तन्मध्यनिखातशङ्कोरष्टौ एकादश द्वादश वा स्वकीयपदानि प्राचीं दिशं गत्वा तदन्ते शङ्कुं निखाय तयोः शङ्कोरुभयतःस्पाशीं रज्जुं प्रसार्याहवनीयायतनं रचयेत् । तद्यथा—“यावत्प्रमाणा रज्जुः स्यात्तावानेवागमो भवेत् । आगमार्द्धे च शङ्कुः स्यात्तदर्द्धे च निरञ्छनम्” इति शुल्ववचनानुसारेण । अत्रायं रचनाप्रकारः । पूर्वस्माच्छङ्कोर्द्वादशाङ्गुष्ठपर्वपरिमितं देशं पूर्वतः पश्चिमतश्च परित्यज्य तत्र शङ्कुद्वयं निखाय चतुर्विंशत्यङ्गुलां रज्जुं परिमाय तावतीमेवाधिकां गृहीत्वा उभयतःपाशवतीं कृत्वा तस्या रज्जोरागमार्द्धे शङ्कुस्थानं सूत्रादिनाऽङ्कयित्वा अपरागमार्द्धे निरञ्छनम् । आकर्षणसूत्रगुणमोप्य पूर्वार्द्धापरार्द्धान्तयोः शङ्कोः तस्या रज्जोः पाशद्वयं निक्षिप्य निरञ्छनेन गुणेन दक्षिणत आकृष्य शङ्कुस्थाने शङ्कुं निखनेत् । ततस्तामेव रज्जुमुत्तरतो नीत्वा तथैवाकृष्य शङ्कुस्थान अपरं शङ्कुं निखनेत् । अथ रज्जोः पाशौ परिवर्त्त्य पूर्ववन्निरञ्छनगुणेन दक्षिणत आकृष्य शङ्कुस्थाने शङ्कुं निखाय पुनस्तामेव रज्जुमुत्तरतो नीत्वा तथैवाकृष्य शङ्कुस्थाने शङ्कुं निखनेत् । एवं चतुरस्रं चतुर्विंशत्यङ्गुलायामविस्तारमाहवनीयायतनं सम्पद्यते । ततो गार्हपत्याहवनीयान्तरालसम्मितां रज्जुमागमय्य तां च षड्गुणां सप्तगुणां वा विधाय षष्ठांशं सप्तमं वा तत्राधिकं निक्षिप्य प्रसार्य त्रिगुणीकृत्य अपरवितृतीये शङ्कुस्थानज्ञानार्थमङ्कयित्वा गार्हपत्याहवनीयमध्यगतयोः शङ्कोः पाशौ प्रतिमुच्य गार्हपत्यायतनाद्दक्षिणत आकृष्य अपरवितृतीयाङ्के शङ्कुं निखाय तस्मिन् शङ्कौ अन्यरज्जुपाशं प्रतिमुच्य षोडशाङ्गुलानि परिमाय वृत्तं मण्डलं विरचय्य तन्मध्यमशङ्कोश्चत्वार्यङ्गुलान्युत्तरतः परित्यज्य तत्र पूर्वापरायतां मण्डलसम्मितां रज्जुं निपात्य रेखामुल्लिखेत् । एवं धनुराकृति दक्षिणाग्न्यायतनं सम्पद्यते । तथा तामेव रज्जुं परिवर्त्याहवनीयादुत्तरतो वितृतीयेनाकृष्य वितृतीयस्थाने उत्करं कुर्यात् । एवं वितानं साधयित्वा तेषु पञ्चभूसंस्कारान्कृत्वा गार्हपत्यायतने औपासनाग्निं संस्थाप्य मृन्मयेन पात्रेण गार्हपत्यैकदेशमादायाहवनीयायतने आहवनीयं प्रणयेत् । एवमेव गार्हपत्याद्दक्षिणाग्निखरे दक्षिणाग्निम् आहवनीयस्य दक्षिणतो ब्रह्मासनमास्तीर्य शूलगवेन रौद्रेण पशुनाऽहं यक्ष्ये।तत्र मे त्वं ब्रह्मा भवेति सुब्राह्मणं प्रार्थ्य,भवामीति तेनोक्ते,आसने तमुपवेश्य उत्तरतः प्रणीताः प्रणीय पवित्रच्छेदनानि, पवित्रे, प्रोक्षणीपात्रम्, वज्रम्, अन्तर्द्धानतृणं चेत्येतानि पञ्च आसादयेत् । ततः रज्जुम, शङ्कुम्, शम्याम, अभ्रिम्, पुरीषाहरणम्, उदकम्, सिकताः,आच्छादनवस्त्रामित्यष्टौ उपकल्पयेत् । ततः पवित्रे कृत्वा प्रोक्षणीः संस्कृत्य वज्रमन्तर्द्धानतृणं च प्रोक्ष्य प्रोक्षणीं निधाय वज्रमादाय वेदिं मिमीते स्फ्येन । आहवनीयस्य दक्षिणतः प्राचीं त्र्यरत्निं, पश्चिमतश्चतुररत्निम्, उत्तरतस्त्र्यरत्निं, पूर्वतश्च त्र्यरत्निम् इति एवं परिमितां वेदिं त्रिभिः कुशैः परिसमुह्य उत्तरतो वज्रेणोत्करं परिलिख्य तदन्तिके वज्रं निधाय तदुपरि वेदितृणं कृत्वा सतृणं वज्रमादाय दक्षिणहस्तेन सव्ये पाणावाधाय दक्षिणेनालभ्य तेन वज्रेण पृथिवीमात्मानं वा संस्पृशन् वेद्यामुदगग्रं तृणं निधाय तदुपरि तेन प्रहृत्य तदग्रेण पुरीषमादाय वेदिं प्रेक्ष्य पुरीषमुत्करे कृत्वा पुनस्तथैव प्रहृत्य पुरीषमादाय वेदिं प्रेक्ष्यामुं पुरीषमुत्करे करोति, एवमेव द्वितीयं करोति,पुरीषकरणान्ते दक्षिणोत्तराभ्यां पाणिभ्यामुत्करेऽभिन्यासं करोति।ततस्तृतीयं प्रहरणादि तथैव चतुर्थं कृत्वा ब्रह्मन् पूर्वं परिग्रहं परिग्रहीष्यामीत्यामन्त्रितेन ब्रह्मणा परिगृहाणेत्यनुज्ञातः स्फ्येन वेदिं दक्षिणतः प्राचीं परिगृह्य पश्चिमत उदीचीम् उत्तरतः प्राचीं परिगृह्णाति । अथ वेद्यां प्राचीस्तिस्रो लेखा उल्लिख्य अनामिकाङ्गुष्ठाभ्यां दक्षिणाप्रभृतिभ्यो लेखाभ्यः पृथक् पृथक् पुरीषमादायोत्कप्रक्षिप्य क्रमेण लेखाः सम्मृशति । तत्रैते वेदिकार्यविधयः स्फ्यकर्तृका मन्त्ररहिताश्च, ऋत्विगन्तरा

भावात्समाम्नायाभावाच्च । अथाहवनीयस्य पुरस्तादुत्तरवेदिस्थाने पञ्च भूसंस्कारान्कृत्वा पूर्वार्द्धे शङ्कुं
निखाय द्वात्रिंशदङ्गुलां शम्यामादाय चतुरस्रामुत्तरवेदिं शम्यामात्रीं मिमीते, ततस्तथैव शम्यया
उत्तरवेदेरुत्तरतश्चात्वालं मिमीते । तद्यथा पश्चादुदीचीं शम्यां निपात्य स्फ्येन तावतीं लेखामुल्लिख्य
तथैव पुरस्तादुदीचीं दक्षिणतः प्राचीम् उत्तरतः प्राचीं शम्यां निपात्य लेखामुल्लिखेत् । एवं चतुरस्र-
शम्याप्रमाणं चात्वालं सम्पद्यते । ततश्चात्वालमध्ये स्फ्याग्रेण प्रहृत्य पुरीषमादायोत्तरवेदौ शङ्कुसमीपे
प्रक्षिप्याभिन्यासं विधाय पुनरेवं द्विरपरं प्रहृत्य पुरीषमादायोत्तरवेदौ प्रक्षेपमभिन्यासं च
कृत्वा चतुर्थवेलायामभ्र्या चात्वालं खात्वा यावता पुरीषेण शम्यामात्री उत्तरवेदिरूर्द्ध्वा पूर्यते
तावत्पुरीषं पुरीषाहरणेन चात्वालादादाय प्रक्षिपेत् , एवमुत्तरवेदिं रचयित्वा मध्ये प्रादेशमात्रीं चतु-
रस्रां नाभिं कृत्वा प्रोक्षणीभिः प्रोक्ष्य सिकतामुपकीर्य वाससाऽऽच्छादयति । अथ गार्हपत्ये पूर्णाहुतिवदाज्यं
संस्कृत्य पञ्चगृहीतं गृहीत्वा आज्यप्रोक्षण्या आहवनीये सोपयमनीकाधिशृते इध्मस्थाग्नीनुद्यम्य उत्तर-
वेदिसमीपं गत्वा पुरस्तात्पश्चाद्दक्षिणत उत्तरतश्चोत्तरवेदिं प्रोक्षणीभिः प्रोक्ष्य प्रोक्षणीशेषमुत्तरवेदेराग्ने-
यकोणसमीपे बहिर्वेदीं निनीय पञ्चगृहीतेनाज्येन नाभिं व्याघारयति कोणे हिरण्यं पश्यन् । यथा
पूर्ववद्दक्षिणस्यां स्रक्त्याम् आघार्योत्तरापरस्यां ततो दक्षिणापरस्यां ततः पूर्वोत्तरस्यां मध्ये चाभिघार्य्य
शेषमाज्यं स्रुवे उद्यम्योर्द्ध्वमुत्क्षिपति । ततो नाभिं पौतुदारवैः परिधिभिः परिदधाति । तद्यथा—प्रथम-
मुदगग्रेण पश्चिमतः, ततः प्रागग्रेण दक्षिणतः, ततः प्रागग्रेणोत्तरतः । ततो नाभिमध्ये गुग्गुलसुगन्धितेः
जनं वृष्णेस्तुकाः शीर्षण्याः तदभावेऽन्या निदधाति । तदुपरि उपयमनीगतमग्निं स्थापयति, उपयमनीं
च तत्समीपे निवपति चात्वाले वा, प्रणीयमानमग्निं ब्रह्माऽनुगच्छति । ततो यजमानः प्रणीता उत्तर-
वेदेरुत्तरेण कुशासने प्रणीयाहवनीयं परिस्तीर्य गार्हपत्यं च पात्राण्यासादयति।आज्यस्थाली,सम्मार्गकुशाः,
सन्नहनावच्छादनानि, परिधयः, उपयमनकुशाः, समिधः, स्रुवः, आज्यम्, वपाश्रपण्यौ, चरुस्थाली
शूलम्, उखा, तण्डुलाः, दक्षिणार्थं तुल्यवया गौश्चेति । अथोपकल्पनीयान्युपकल्पयति । बर्हिः,
प्लक्षशाखा, पलाशशाखा, त्रिगुणरशना, उपाकरणतृणम् , द्विगुणरशना , गोपशुः, असिः, पात्रेजनीः,
दधि, हिरण्यशकलानि, षट् पलाशपत्राणि चेति । तत आसादनक्रमेण पात्राणि प्रोक्षति । "रुद्राय
त्वा जुष्टं प्रोक्षामि" इति तण्डुलान् प्रोक्षति । आज्यस्थाल्यामाज्यं निरुप्य गार्हपत्येऽधिश्रित्य पर्यग्नि
कुर्यात् । ततो वेदिं मध्यसंगृहीतामभ्र्या खात्वा ब्रह्मन्नुत्तरं परिग्रहं परिग्रहीष्यामीति ब्रह्माणमा-
मन्त्र्य परिगृहाणेति ब्रह्मणाऽनुज्ञातः पूर्ववत्स्फ्येन दक्षिणपश्चिमोत्तरतो वेदिं परिगृह्यानुमार्ष्टि । आहवनी-
यमपरेण प्रोक्षणीरासाद्य प्रणीतोदकेन पाणी अवनिज्य प्रणीतानां पश्चिमतः प्रागग्रं स्फ्यं निधाय
तदुपरि इध्माबर्हिषी आसादयति । ततः स्रुवं प्रतप्य सम्मृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यात् । आज्य
मुद्वास्य प्रोक्षणीनामपरेण कृत्वोत्पूयावेक्ष्य प्रोक्षणीरुत्पूय वेदिं प्रोक्ष्य बर्हिश्च प्रोक्ष्य प्रोक्षण्येकदेशेन
बर्हिर्मूलानि सिक्त्वा बर्हिर्विस्रंस्य सन्नहनं च विस्रंस्य दक्षिणस्यां वेदिश्रोणौ निधाय सन्नहनावच्छा-
दनैरवच्छाद्य वेदिं स्तृणाति । तद्यथा—बर्हिःपुलकं त्रिधा विभज्य प्रथमं भागं दक्षिणेनोत्थाप्याङ्के कृत्वा
द्वितीयं भागं दक्षिणेनोत्थाप्याङ्के कृत्वा तृतीयभागं दक्षिणेनोत्थापितं सव्येन संगृह्याङ्कस्थितं प्रथमभागं दक्षि-
णेनादाय वेद्यां स्तृणात्युदक्संस्थम् , तथैव द्वितीयं भागं दक्षिणेनोत्थाप्याङ्के कृत्वा सव्ये स्थितं दक्षिणेनादा-
याङ्कगतं सव्येन संगृह्य पूर्वस्तृतबर्हिर्मूलानि द्वितीयबर्हिर्भागाग्रेणाच्छादयन् स्तृत्वा तृतीयभागं दक्षिणे-
नादाय स्फ्योपग्रहेण तथैव स्तृणाति पश्चादपवर्गम्, तत उपरि प्लक्षशाखाः स्तृणाति । अथाहवनीयं कल्प-
यति।ततो मध्यमदक्षिणोत्तरान्परिधीन् आहवनीये परिदधाति, आहवनीयमवेक्ष्य अग्रेणाहवनीयं परीत्य
पलाशशाखां निखनति, तां त्रिगुणरशनया त्रिः परिव्ययति, तत्र शकलमुपगूहति,रुद्राय त्वोपाकरोमी-
त्युपाकरणतृणेन पशुमुपाकरोति । ततो द्विगुणरशनया अन्तराशृङ्गं पशुं बद्ध्वा "रुद्राय नियुनज्मि"
इति शाखायां नियुनक्ति । अथ"रुद्राय त्वा जुष्टं प्रोक्षामि" इति पशुं प्रोक्षणीभिः प्रोक्ष्य शेषमास्ये उप-
गृह्याधस्तादुपोक्षति । तत उपयमनकुशानादाय समिधोऽभ्याधाय प्रोक्षणीभिः पर्य्युक्ष्य पूर्वाघारमाघार्य
उत्तराघारान्ते स्रुवाग्रेण ललाटांसश्रोणिषु पशुं समनक्ति । ततः स्रुवाग्राक्ताभ्यां स्वर्वसिभ्यां पशोर्ललाट-

मुपस्पृशति । स्वरुमवगुह्य असिम् एकतो घृतेनाभ्यज्य निदध्यात् । अथ चात्वालस्योत्तरतः स्फ्येन शामित्राय परिलिख्य आहवनीयस्योल्मुकेन पश्चाज्यशामित्रदेशशाखाचात्वालाहवनीयान् पर्यग्नि कुर्यात्त्रिः । पुनरुल्मुकमाहवनीये प्रक्षिप्य तावत्प्रतिगच्छेत् पुनराहवनीयादुल्मुकमादाय पशुं कण्ठे बद्ध्वा वपाश्रपणीभ्यामन्वारभ्य उदङ् नयेत् । तत्र वेदितृणद्वयमादाय शामित्रे उल्मुकं निधाय शामित्रस्य पश्चादेकं तृणमास्तीर्य तत्र पशुं प्राक्शिरसम्, प्रत्यक्शिरसम्, उदक्शिरसम्, उदक्पादं वा निपात्य अवाश्यमानं मुखं संगृह्य तमनेन शामित्रेण सञ्ज्ञपयाति, सत्यन्यस्मिन्पुरुषे शमितरि यजमान आहवनीयं प्रत्येत्य पूर्णाहुतिवदाज्यं संस्कृत्य "स्वाहा देवेभ्यः" इत्येकामाज्याहुतिमाहवनीये हुत्वा सञ्ज्ञप्ते पशौ "देवेभ्यः स्वाहा" इति तेनैवाज्येनापरां हुत्वा तूष्णीमपराः पञ्च जुहोति । अथ वपाश्रपणीभ्यां नियोजनीं चात्वाले प्रास्य पान्नेजनीभिः पशोः प्राणशोधनं स्वयमेव करोति । तद्यथा—मुखं, नासिके, चक्षुषी द्वे, कर्णौ द्वौ, नाभिं, मेढ्रं, पायुं संहृत्य पादान् एकैकं पान्नेजनीजलेन स्पृशति, शेषेण शिरःप्रभृति कर्णपर्यन्तं पुनस्तथैवाप्याय्य ततोऽङ्गानि निषिच्य शेषं पशोः पश्चाद्भागे निषिञ्चति । तत उत्तानं पशुं कृत्वा नाभ्यग्रे तृणं निधाय घृताभ्यक्तासिधारयाऽभिनिधाय सतृणां त्वचं छित्त्वा तृणमूलमुभयतो लोहितेनाङ्क्त्वा तृणं भूमौ निरस्य तदुपरि स्वयं पादौ कृत्वा पुनरागत्योपविश्य वपामुत्खिद्य वपाश्रपणीभ्यां प्रोर्णूय छित्त्वाऽऽज्येनाभिघार्य प्रक्षाल्य पशुं विशास्ति । हृदयादीनि सर्वाणि त्रीणि वा पञ्च वा यथाकाममवदानान्यवदाय जाघनीं चावद्य श्वभ्रे ऊवध्यमवधाय लोहितं चावधाय चरौ तण्डुलानोप्य वपां शामित्रे प्रतप्य आहवनीयस्योत्तरतः स्थित्वा आहवनीये च प्रतप्य शाखाग्न्योरन्तरेणाहृत्य दक्षिणतः स्थित्वा स्रुवेणाज्येनाभिघारयन् श्रपयति गार्हपत्ये स्थालीपाकम् । शामित्रे हृदयाद्यवदानानि प्रतप्य तत्र हृदयं शूले चरुं पर्यग्नि कृत्वा वपामभिघारयति, अथ त्रिः प्रच्युते पशोर्हृदयमुपरि कृत्वा पृषदाज्येन हृदयमभिघार्य इतराण्यवदानान्याज्येन सर्वाणि च त्र्यङ्गवर्जमभिघार्य स्थालीपाकमुद्वास्य उखां च वपाया अङ्गानां च प्राणदानं कृत्वा वपादीनि क्रमेणासाद्य अङ्गानि शाखाग्न्योरन्तरेणाहृत्य वेद्यामासाद्य वपामवदानानि चालभ्य ब्रह्मणाऽन्वारब्ध आज्यभागौ हुत्वा वपाहोमार्थं स्रुवे आज्यमुपस्तीर्य हिरण्यशकलमवधाय वपां गृहीत्वा पुनर्हिरण्यशकलं दत्त्वा द्विरभिघार्य रुद्राय स्वाहेति वपां जुहोति, वपाश्रपण्यौ विपर्यस्ते चाग्नौ प्रास्यति, तत उखातो वसां गृहीत्वा अन्तरिक्षाय स्वाहेति जुहुयात् । अथावदानहोमार्थं स्रुवे आज्यमुपस्तीर्य हिरण्यशकलमवधाय हृदयाद्यङ्गेभ्यः प्रत्येकं द्विर्द्विरवदाय स्रुवे क्षिप्त्वा स्थालीपाकाच्च सकृदवदाय क्षिप्त्वा उपरि हिरण्यशकलं दत्त्वा सकृदभिघार्य असर्वाणि चेत् क्षताभ्यङ्गं कृत्वा "अग्नये स्वाहा" इति जुहोति । एवं पुनः स्रुवे उपस्तरणहिरण्यशकलावधानद्विर्द्विःप्रधानावदानग्रहणसकृत्स्थालीपाकावदानीहिरण्यशकलावधानाभिघारणानि कृत्वा अग्नये, रुद्राय, शर्वाय, पशुपतये, उग्राय, अशनये, भवाय, महादेवाय, ईशानायेत्येतैर्नाममन्त्रैः स्वाहाकारान्तैरेकैकस्मै जुहोति । एवमग्न्यादयो नवप्रधानहोमाः सम्पद्यन्ते । ततः पृषदाज्येन "वनस्पतये स्वाहा" इति होमं विधाय स्विष्टकृद्धोमार्थं स्रुवमुपस्तीर्य हिरण्यशकलं दत्त्वा सर्वावदानपक्षे त्र्यङ्गेभ्यो द्विर्द्विरवदाय असर्वावदानपक्षे तेभ्य एव प्रधानार्थेभ्यो द्विर्द्विरवदाय सकृच्चरोरवदाय हिरण्यशकलमवधाय द्विर्द्विरभिघार्य "अग्नये स्विष्टकृते स्वाहा" इत्यग्नेरुत्तरप्रदेशे जुहुयात् । यथामन्त्रं सर्वत्र त्यागाः । ततः स्रुवेण वसां गृहीत्वा आहवनीयस्य पुरस्ताद्दिशः स्वाहा इदं दिग्भ्यः । दक्षिणतः प्रदिशः स्वाहा इदं प्रदिग्भ्यः । पश्चिमत आदिशः स्वाहा इदमादिग्भ्यः । उत्तरतो विदिशः स्वाहा इदं विदिग्भ्यः । मध्यत उद्दिशः स्वाहा इदमुद्दिग्भ्यः । पूर्वार्द्धे दिग्भ्यः स्वाहा इदं दिग्भ्यः । ततो जाघनीं गृहीत्वा गार्हपत्यं प्रत्येत्य जाघन्याः स्रुवेणावदायावदाय इन्द्राण्यै स्वाहा इदमिन्द्राण्यै । रुद्राण्यै स्वाहा इदं रुद्राण्यै। शर्वाण्यै स्वाहा इदं शर्वाण्यै । भवान्यै स्वाहा इदं भवान्यै । अग्नये गृहपतये स्वाहा इदमग्नये गृहपतये । एताः पञ्च पत्नीसंयाजाहुतीर्जुहुयात् । तत आहवनीये महाव्याहृत्यादिप्राजापत्यान्ता नवाहुतीर्हुत्वा संस्रवं प्राश्य शूलगवपशुना तुल्य

वयसं वृषं ब्रह्मणे दक्षिणां दद्यात्। ततः पलाशपत्रेषु षट् प्राक्संस्थेषु 'उदक्संस्थेषु वा पशुलोहितेन "यास्ते रुद्र पुरस्तात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमः।यास्ते रुद्र दक्षिणतः सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमः। यास्ते रुद्र पश्चात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमः । यास्ते रुद्रोत्तरतः सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमः।यास्ते रुद्रोपरिष्टात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमः। यास्ते रुद्राधस्तात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमः ।" इदं रुद्राय, सेनाभ्य इति सर्वबलिषु त्यागाः । ऊवध्यस्य लोहितलिप्तस्याग्नौ प्रक्षेपणमधस्तान्निखननं वा कृत्वा अनुवातं पशुमवस्थाप्य रुद्राध्यायेन **नमस्त** इत्यादिना, अस्य प्रथमोत्तमाभ्यामनुवाकाभ्यां वा रुद्रानुपस्थाय उदकमुपस्पृशेत् । एतस्य पशोर्मांसं ग्रामं नानयेत् । इति समाप्तः **शूलगवः** । अथ **गोयज्ञपद्धतिः** । तत्र विंहितमातृपूजाऽऽभ्युदयिकश्राद्धः, स्वर्गपशुपुत्रधनयशआयुष्यफलानामन्यतमफलकाम औपासनमरण्यं नीत्वा तत्र परिसमूहनादिभिः संस्कृतायां भूमौ स्थापयेत् । तत्र ब्रह्मोपवेशनान्ते विशेषः । सक्षीरं प्रणयनं कृत्वा पायसं श्रपयित्वा आज्यभागाविष्ट्वा शूलगवदेवताभ्यः अग्निरुद्रशर्वपशुपत्युग्राशनिभवमहादेवेशानेभ्यः स्वाहाकारान्तैर्नामभिश्चतुर्थ्यन्तैर्नवभिर्मन्त्रैः पायसेन प्रत्येकं जुहुयात् । ततः पायसादेव स्विष्टकृते हुत्वा महाव्याहृत्यादिप्राजापत्यहोमान्ते संस्रवं प्राश्य पूर्णपात्रवरयोरन्यतरं ब्रह्मणे दद्यात् । इति **गोयज्ञपद्धतिः** ॥ ८ ॥ * ॥

विश्व०—शूल···आयुष्यः—स्वर्ग्यः स्वर्गाय हितः । एवं पशुभ्यो हितः । धनाय हितः । यशसे हितः ।
आयुषे हितः। तथा च स्वर्गादेरुपायः शूलगव इत्यर्थः । विचित्रकार्यस्यानेकसामग्रीनियम्यत्वात्प्रत्यभिलाषं शूलगवावृत्तिः।
यत्तु तन्त्रोत्पत्तिर्बाध्यत इति तन्न, समानकालिकानेकसामग्रीवशादनेककार्य्याणामपि समानसमयोत्पत्तिकत्वात् । अत्रापि
प्रतिप्रयोगं मातृपूजाऽऽभ्युदयिके भवतः । अत्रापि कथं क्व वा स्यादत आह—**औपा···शब्दात्**—आवसथ्यमरण्ये नीत्वा
तत्र दर्शपौर्णमासेष्टिवद्गार्हपत्यादिखरसाधनम् । गार्हपत्ये पञ्चभूसंस्कारपूर्वकमावसथ्यस्थापनं, तत आहवनीये दक्षिणाग्नौ च
पञ्च भूसंस्कारान्कृत्वा तयोरुद्धरणम् । आहवनीयं दक्षिणेन ब्रह्मासनास्तरणं, प्रणीताप्रणयनं, पात्रासादनं, पवित्रच्छेदनानि
त्रीणि, पवित्रे द्वे, प्रोक्षणीपात्रम्, अन्तर्द्धानतृणं, वज्रः, शम्या च, रज्जुशङ्कुमुद्गरादि उत्तरवेदिसाधनं, पुरीषाहरणपात्रम्,
उदकम् , सिकताः, आच्छादनकुशाः, ततः पवित्रे कृत्वा प्रोक्षणीः संस्कृत्य वज्रान्तर्द्धानतृणशम्यानां प्रोक्षणम् । ततो गार्ह-
पत्याग्रे प्रोक्षणीनिधानम् । ततो वेदिमानं पशुवत् । चतुररत्निः पश्चात्तिर्यक् षडरत्निर्मध्ये प्राची त्र्यरत्निः पुरस्तात्तिर्यक् ।
अत्र साधनोपायभूतश्लोकः—" द्व्यरत्नी लक्षणं कुर्यादर्द्धे सार्द्धत्रये तथा । अर्द्धेऽरत्नौ ततः सार्द्धे वेदिः स्यात्पाशुकी शुभा॥"
[अयं पाशाऽविपर्यासेन साधनोपायः ।] प्रकारान्तरमपि—" नवारत्निमिता रज्जुर्लक्षिता षट्स्वतः परम् । अर्द्धेऽर्द्धे त्रिषु
पाशः स्यात्पशुवेदेः प्रसाधनम् " इति । संग्रहसाधनानि दर्शपौर्णमासवेदिवत् , अत्र सर्वं मन्त्ररहितं कर्त्तव्यम् । वेदिपरिस-
मूहनम् उत्करकरणं सतृणवज्रादानादि सतृणपुरीषस्योत्करे प्रक्षेपान्तं, पूर्वपरिग्रहः, वेद्यां त्रिरुल्लेखनं, हरणं संमर्शनम् ।
अत्र स्वकर्तृकमेव सर्वम् । ततः शम्यां स्फ्यं चादाय पूर्वोक्तसंचरं परित्यज्य चात्वालमानादि उत्तरवेदिच्छादनान्तं पशु-
वत् **कात्यायनो**क्तं तूष्णीम् । ततः गार्हपत्ये पूर्णाहुतिवदाज्यं संस्कृत्य पञ्चगृहीताद्याग्निप्रणयनमुपयमन्युपनिवपनान्तं
तूष्णीं **कात्यायनो**क्तम् । प्रणीयमानेऽग्नौ ब्रह्मासनमनुनेतव्यम्, प्रणीताऽपि उत्तरवेदिकाहवनीयादुत्तरतः स्थाप्या । तत
आहवनीयगार्हपत्ययोः परिस्तरणम् । पात्रासादनम् । आज्यस्थाली, प्रोक्षणीपात्रम्, अभ्रिः, अन्यैरवच्छादनकुशाः, संमार्ग-
कुशाः, परिधयः, उपयमनकुशाः, समिधः, स्रुवः, आज्यं, वपाश्रपण्यौ, चरुस्थाली, साण्डो वृषभः, उखा, तण्डुलाः, दक्षि-
णार्थे तुल्यवया गौः, बर्हिः, प्लक्षशाखा, पलाशशाखा, त्रिगुणरशना, उपाकरणतृणं, द्विगुणरशना,शासः, पान्नेजनीः, दधि,
हिरण्यशकलानि, पलाशपत्राणि षट् । आज्यनिर्वापः । रौद्रस्य पशोर्विहितत्वाद्गोपशोश्च कलौ निषेधाच्चरुकर्तव्यताश्रयणे
त्वाज्यनिर्वापानन्तरं चरुग्रहणं रुद्राय जुष्टं गृह्णामीति । प्रोक्षणे त्वाशब्दः । ततः पर्यग्निकरणम् , ततोऽभ्र्या खननोत्तरपरि-
ग्रहादिवपाश्रपणान्तं पशुपक्षे । चरुप क्षे तु मण्डेन वपाहोमः । हिरण्याभावे घृतम् । अन्ये पशुधर्मा न भवन्ति ।स्मार्त्तपशु-
धर्मान्वक्ष्यति । **वपार्थं श्रपयित्वा स्थालीपाकमवदानानि च**—स्थालीपाकावदानेषु श्रपणानुकर्षणार्थश्चकारः ।
स्थालीपाकश्च पशुपुरोडाशस्थानापन्नः । होमानन्तरं तद्ग्रहणम् अग्नये, रुद्राय, शर्वाय, पशुपतये, उग्राय, अशनये,
भवाय, महादेवाय, ईशानाय जुष्टं गृह्णामि । प्रोक्षणे त्वाशब्दः । न च समानदेवताकत्वात्पशुपुरोडाशयो रौद्र एव
स्थालीपाक इति वाच्यम्, देवताभ्य इति **शाङ्खायन**सौत्रबहुत्वसामर्थ्यादशेषदेवताकीर्त्तनस्य स्थालीपाकेषु न्याय्यत्वात् ।
कलौ पशोरनादरणे रौद्रश्चरुः । आज्यनिर्वापानन्तरं तद्ग्रहणम् । प्रोक्षणं च । श्रवणं गार्हपत्ये । तत उपयमनकुशादानादि
उत्तराघारानन्तरं पशुसमञ्जनम्, तदनु शामित्रोल्लेखनम् । आहवनीयोल्मुकेन त्रिः पर्यग्निकरणम् । इतरथावृत्तिः ।

उल्मुकस्याहवनीये प्रक्षेपः । ततः पुनः सव्येनोल्मुकदाय केनचिन्नीयमानस्य पेशोर्वपाश्रपणीभ्यामन्वारम्भः । शामित्रेऽग्निनिधानम्, तृणास्तरणादि, वपामुत्खिद्य प्रक्षाल्य पशुविशसनम् । हृदयाऽद्यवदानग्रहणम् , त्रीणि पञ्च वा । वपायाः शामित्रे प्रतपनादि । अन्तरा शाखाग्न्योराहरणम् । उखायां शामित्रे रौद्रपशुश्रपणम् । शूले प्रतृद्य हृदयश्रपणम् । पर्यग्निकरणं चरोः । त्रिः प्रच्युते हृदयमुपरि कुर्यात् । पृषदाज्येन हृदयाभिघारः, अन्येषामाज्येन । चरुं वपामङ्गान्युद्वास्य शाखाग्न्योरन्तरा समानयेत् । प्राणदानं कृत्वा वेद्यामासादनम् । आलम्भनम् । ततः आज्यभागौ । **रुद्रा...वसां**–जुहुयादिति शेषः । **कात्यायनो**क्तप्रकारेण वपावदानम् । रुद्राय स्वाहेति वपाहोमः इदं रुद्राय । अन्तरिक्षाय स्वाहेति वसाहोमः । इदमन्तरिक्षायेति त्यागः । **स्थाली...नायेति**–चरुमिश्रितपश्ववदानहोमः आदौ स्रुवमभिघार्य प्रतिमांसं द्विर्द्विरवदानम् । स्थालीपाकस्य सकृत् । पुनरभिघारणम् । वपावद्धिरण्यम् । नवाहुतयः । प्रयोगः । अग्नये स्वाहा इदमग्नये । रुद्राय स्वाहा इदं रुद्राय । सर्वाय स्वाहा इदं शर्वाय । पशुपतये स्वाहा इदं पशुपतये । उग्राय स्वाहा इदमुग्राय । अशनये स्वाहा इदमशनये । भवाय स्वाहा इदं भवाय । महादेवाय स्वाहा इदं महादेवाय । ईशानाय स्वाहा इदमीशानाय । **वन...रणं**—पृषदाज्येन वनस्पतये स्वाहा इदं वनस्पतये । अङ्गेभ्यः स्थालीपाकाच्च स्विष्टकृत् । अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते । एवं वनस्पतिहोमस्विष्टकृद्धोमयोरन्ते दिग्व्याघारणं वसया । दिशः स्वाहा इदं दिग्भ्यः । प्रदिशः स्वाहा इदं प्रादिग्भ्यः । आदिशः स्वाहा इदमादिग्भ्यः । विदिशः स्वाहा इदं विदिग्भ्यः । उद्दिशः स्वाहा इदमुद्दिग्भ्यः । दिशः स्वाहा इदं दिग्भ्यः । षडाहुतयः प्रागाद्यारभ्य प्रादक्षिण्येन चतस्रः । अन्ते द्वे मध्ये पूर्वार्द्धे च । एवं षट् । **व्याघा...तिमिति**–दिग्भ्यः स्वाहेत्यादिव्याघारणान्ते जाघन्या गार्हपत्ये पत्नीसंयाजाः पञ्च चतुरवत्तेन । तद्यथा—इन्द्राण्यै स्वाहा इदमिन्द्राण्यै । रुद्राण्यै स्वाहा इदं रुद्राण्यै।शर्वाण्यै स्वाहा इदं शर्वाण्यै । भवान्यै स्वाहा इदं भवान्यै । अग्नये गृहपतये स्वाहा इदमग्नये गृहपतये । नात्र संस्रवः। ततो महाव्याहृत्यादिप्राजापत्यान्ता नवाहुतीराहवनीये होतव्याः । ततः संस्रवप्राशनादिदक्षिणादानान्तम् । **लोहि···रति**–रुद्रदेवताभ्यः सेनाभ्यः रुद्रसेनाभ्यः । रुधिरेण बलिदानविधानाद्विशसनकाले तद्रक्षणम् । पालाशपत्रनिर्मितेषु पात्रेषु कुशेषु च यथालिङ्गं प्रादक्षिण्येन प्रतिदिशं बलिहरणम् । बलिद्वयमुत्तरतः प्राक्संस्थमथवा प्राक्पश्चात् । बलिदानमन्त्रानाह–**यास्ते···नम इति**–कुशानास्तीर्य तत्र पलाशेषु बलिदानं **यास्ते रुद्र पुरस्तात्सेना** इति प्रतिमन्त्रम् । इदं रुद्रेभ्यः पुस्तात्सेनाधिपत्येभ्यः । इदं रुद्रेभ्यो दक्षिणतः सेनाधिपत्येभ्यः । इदं रुद्रेभ्यः पश्चिमतः सेनाधिपत्येभ्यः। इदं रुद्रेभ्य उत्तरतः सेना०। इदम् उपरिष्टात्सेनाधिपत्येभ्यः । इदं रुद्रेभ्योऽधस्तात्सेनाधिपत्येभ्यः बर्हिर्होमादिब्राह्मणभोजनान्तम् । **ऊव···नति**–अग्नौ आहवनीये । **अनु···काभ्याम्**–अनुवातं वायुम् अनु लक्षीकृत्य पशुमवशिष्टं पशुशरीरम् । रुद्रैः रुद्राध्यायाम्नातमन्त्रैः उपतिष्ठते स्तौति । पक्षान्तरमाह—**प्रथमेति** । प्रथमोत्तमौ आद्यन्तौ ताभ्यां,प्रथमः षोडशर्चः। **द्रापेऽअन्धस** इत्यारभ्य विंशतिकण्डिकात्मक उत्तमः।**नैतस्य पशोर्ग्रामꣳहरन्ति**–एतस्य पशोर्मांसं ग्रामं प्रति नाहरन्तीत्यर्थः । तत आचम्य गार्हपत्यमादाय गृहमागत्यावसथ्यखरे स्थापयेदिति शूलगवः । **एते···स्यातः**–एतेनैव शूलगवकर्तव्यताकलापेन गोयज्ञः मधुपर्कार्चनादौ क्रियमाणः । तस्यापीतिकर्तव्यताकलाप उक्त इत्यर्थः । विशेषमाह–**पाय···लुप्तः**–अत्रापि मातृपूजाऽऽभ्युदयिके । परिसमूहनाद्याज्यभागान्ते विशेषः । आसादेन तण्डुलानन्तरं पयः । चरुग्रहणप्रोक्षणे अग्न्यादीशानान्तेन । आज्यभागान्ते शूलगवदेवताभ्यो होमः पूर्ववत् । स्विष्टकृदादिब्राह्मणभोजनान्तं पूर्ववत् । तदनन्तरं वैश्वदेवः । शूलगवेऽत्रापि शूलगवदेवताहोमातिरिक्ता निरर्थिकाऽइतिकर्तव्यता लुप्यत इत्यर्थः । **तस्य...क्षीणा**—आलभ्यमानपशोर्वयसा तुल्यवया गौर्दक्षिणा देया । एवमाचार्यादौ गृहागते आसनमाहार्येत्यादि कुरुतेत्येवमन्तं कृत्वा परिसमूहनाद्याज्यासादनान्ते वपाश्रपण्यौ, शूलम्, उखा, स्थाली, तण्डुलाः, प्लक्षशाखा, त्रिगुणरशना, उपाकरणतृणं, द्विगुणरशना, गोपशुः, त्रिगुणरशना, पात्रेजनीः,असिः, हिरण्यशकलानि, दधि, बर्हिः, संस्रवपात्रं, दक्षिणार्थे तुल्यवया गौः, शूलगवदेवताभ्यश्चरुग्रहणम् । पवित्रकरणादि । बर्हिस्तरणानन्तरं प्लक्षशाखास्तरणम् । शाखानिखननादिप्रधानहोमान्तं शूलगववत् । आचार्यार्चने बार्हस्पत्यः पशुः।आज्यभागानन्तरं बृहस्पतये स्वाहेति वपाहोमः, स्थालीपाकमिश्राङ्गहोमः बृहस्षतये स्वाहेति । वनस्पतिहोमादि ब्राह्मणभोजनान्तम् । विवाहे प्राजापत्यः पशुः । एवं सर्वत्र पशुषु देवतामात्रे विशेषः । इति ततीयकाण्डस्य अष्टमी कण्डिका ॥ ८ ॥ * ॥

अथ वृषोत्सर्गः ॥ १ ॥ गोयज्ञेन व्याख्यातः ॥ २ ॥ कार्त्तिक्यां पौर्णमास्याꣳ रेवत्यां वाऽऽश्वयुजस्य ॥ ३ ॥ मध्ये गवाꣳ सुसमिद्धमग्निं कृत्वाऽऽज्यꣳ संस्कृत्येह रतिरिति षट् जुहोति प्रतिमन्त्रम् ॥ ४ ॥ पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः । पूषा वाजꣳ सनोतु नः स्वाहा इति पौष्णस्य जुहोति ॥ ५ ॥ रुद्रान् जपित्वैकवर्णं द्विवर्णं वा यो

वा यूथं छादयति यं वा यूथं छादयेद्रोहितो वैव स्यात्सर्वाङ्गैरुपेतो जीववत्सायाः पयस्विन्याः पुत्रो यूथे च रूपस्वित्तमः स्यात्तमलंकृत्य यूथे मुख्याश्चतस्रो वत्सतर्यस्ताश्चालंकृत्य एतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण । मा नः साप्तजनुषाऽसुभगा रायस्पोषेण समिषा मदेमेत्येतयैवोत्सृजेरन् ॥ ६ ॥ नभ्यस्थमभिमन्त्रयते मयोभूरित्यनुवाकशेषेण ॥ ७ ॥ सर्वासां पयसि पायसᳫ श्रपयित्वा ब्राह्मणान्भोजयेत् ॥ ८ ॥ पशुमप्येके कुर्वन्ति ॥ ९ ॥ तस्य मूलगवेन कल्पो व्याख्यातः ॥ १० ॥ ॥ ९ ॥ ॥ * ॥

कर्कः—अथ वृषोत्सर्गः—व्याख्यास्यत इति सूत्रशेषः । गोयज्ञेन व्याख्यातः—एतदुक्तं भवति पायसेन शूलगवदेवताभ्यो होमः । कार्त्तिक्यां पौर्णमास्यां रेवत्यां वाऽऽश्वयुज्यां पौर्णमास्यामेव कर्त्तव्यः । वाशब्दो विकल्पार्थः । मध्ये गवाᳫ सुसमिद्धमग्निं कृत्वाऽऽज्यᳫ संस्कृत्येह रतिरिति षट् जुहोति प्रतिमन्त्रम्—आज्यं संस्कृत्येति ग्रहणं प्रागाघारहोमादप्याहुतयो यथा स्युरिति । तत आघारादि, पुनः पायसेन शूलगवदेवताभ्यो होमः । पूषा गा अन्वेतु न इति पौष्णस्य जुहोति—तस्य च श्रपणानुपदेशात्तद्धृतस्योपादानम् । तत उभयोः सकाशात्स्विष्टकृत् व्याहृत्यादि च । ततो रुद्रान् जपित्वैकवर्णं द्विवर्णं वा—वृषमुत्सृजेत् । यो वा यूथं छादयति यं वा यूथं छादयेत्—यो नाम महत्त्वेन गोयूथं छादयति यो वा तेनैव छाद्यते । लघुरित्यर्थः । रोहितो वैव स्यात्—रोहित एव वा भवति । यथोक्तो वेति विकल्पः । सर्वाङ्गैरुपेतः—अन्यूनाङ्ग इत्यर्थः । जीववत्सायाः पयस्विन्याः पुत्रो भवेत् । यूथे च रूपस्वित्तमः स्यात्तमलंकृत्य—स्रङ्मालादिभिः पतिं वो ददामीत्येतमुत्सृजेत् । नभ्यस्थमभिमन्त्रयते मयोभूरित्यनुवाकशेषेण—वत्सतरीणां मध्यस्थो नभ्यस्थ इत्युच्यते । इदमन्यत्कर्मान्तरमधुनोच्यते । सर्वासां पयसि पायसᳫ श्रपयित्वा ब्राह्मणान्भोजयेत् पशुमप्येके कुर्वन्ति । तस्य शूलगवेन कल्पो व्याख्यातः—शूलगववत्सर्वं कर्तव्यमित्यर्थः ॥ ९ ॥ * ॥

जय०— **अथ वृषोत्सर्गः**—कर्मविशेषः । वक्ष्यत इति सूत्रशेषः । व्याख्यात इति पायसेन शूलगवदेवताहोमः कथितः । स च कार्त्तिक्याम् आश्वयुज्यां वा पौर्णमास्यां भवति । **रेवत्याम्**िति तद्विशेषणं फलातिशयार्थम् । **आज्यं संस्कृत्ये**ति ग्रहणमाघारहोमादपि प्रागाज्याहुतयः स्युरिति । तत आघारावाज्यभागौ हुत्वा पायसेन शूलगवदेवताहोमः । ततः **पूषा गा** इत्येकाऽऽहुतिः पिष्टचरोः । स च श्रपणानुपदेशात्सिद्ध एवासाद्यते । अथ मन्त्रार्थः । तत्र परमेष्ठी, गायत्री, संख्याऽनुपदेशात् । पूषा, पिष्टहोमे० । पूषा सूर्यो नोऽस्माकं गाः धेनूरिन्द्रियाणि च अन्वेतु अनुगृह्णातु । अर्वतः अश्वान् प्राणान् वा रक्षतु । वाजमन्नं सनोतु ददातु । पूषाशब्दावृत्तिरादरार्था । ततः पायसपौष्णाभ्यां स्विष्टकृते हुत्वा, प्राशनान्ते रुद्रान् रुद्रमन्त्रान् जपित्वा यो वा महत्त्वेन यूथाच्छादकः तेनैव वा लघुत्वेन च्छाद्यते। रोहितः लोहित एव स्याद्वा । यथोक्तो वेति विकल्पः । सर्वाङ्गैरुपेत इत्यन्यूनाधिकाङ्ग इत्यर्थः । जीववत्सायाः पुत्र इत्यादिगुणो यः स्यात्तमलंकृत्य स्रगादिभिः । यूथे प्रधानाश्चतस्रो वत्सतरीरलंकृत्योत्सृजेत् एतमिति मन्त्रेण । तस्यार्थः । तत्र प्रजापतिस्त्रिष्टुप्, गावः,

उत्सर्गे० । भो वत्सतर्यः एतं वृषं पतिं भर्तारं वो युष्मभ्यं ददामि । तेनानेन प्रियेण सह क्रीडन्त्यो यूयं चरथ चरत स्वच्छन्दं विहरतेति यावत् । तृणानि खादतेति वा । नोऽस्माकं स्थाने साप्तजनुषा सप्तजन्मसम्बद्धेन पत्या सह असुभगा मा भवतेति शेषः । वयमपि युष्मत्प्रसादाद्रायस्पोषेण धनादिपुष्ट्या सम्यग्भवेन इषा अन्नेन च मदेम तृप्याम । एतया ऋचा वत्सं वत्सतरीश्चोत्सृजेरन् । नभ्यस्थं वत्सतरीमध्यस्थम् । इदं कर्मान्तरम् । **सर्वासाम्** इति यावत्यः स्वीया गावस्तावतीनाम् । एके पशुं पायसप्राशनं च कुर्वन्ति । तस्य कल्पो व्याख्यातः शूलगववत्सर्वं कर्तव्यमित्यर्थः ॥ ९ ॥ ❋ ॥

हरि०—**अथ वृषोत्सर्गः**—अथ शूलगवानन्तरं वृषोत्सर्गः वृषस्य वक्ष्यमाणस्योत्सर्गं उत्सर्जनं वक्ष्यत इति सूत्रशेषः । स च कामाधिकारात्फलस्य वाऽनभिधानात् किं विश्वजिन्न्यायेन स्वर्गफलः कल्प्यते, उत पूर्वोक्तशूलगवानन्तराभिधानात्तत्फल इति सन्देहः । तत्र विश्वजिन्न्यायस्य सर्वथाऽश्रुतफलकर्मविषयत्वान्नात्र प्रवृत्तिः । कुतः सन्निधिश्रुतस्य शूलगवफलस्य स्वर्गादेरत्रान्वययोग्यत्वात्, तस्मादयमपि पशुः स्वर्गपशुपुत्रधनयशआयुष्कामस्यैवेत्यभिप्रेत्याह— **गोयज्ञेन व्याख्यातः**—स च गोयज्ञेन गवा रौद्रेण पशुना यज्ञः गोयज्ञस्तेन व्याख्यातः।गोयज्ञसाध्यफलेतिकर्तव्यतावानित्यर्थः । ततश्चास्मिन्नपि स्वर्गपशुपुत्रधनयशआयुष्कामस्याधिकारः । स कदा कर्तव्य इत्यपेक्षायामाह— **कार्त्तिक्यां पौर्णमास्याꣳ रेवत्यां वाऽऽश्वयुजस्य**—कार्त्तिक्यां पूर्णिमायाम्, आश्विनस्य रेवत्यां रेवतीनक्षत्रे वा कर्तव्य इति सूत्रशेषः । शास्त्रान्तरे तु "चैत्र्यामाश्वयुज्यां वा" इति कालान्तरमुक्तम् । **मध्ये गवाꣳ सुसमिद्धमग्निं कृत्वाऽऽज्यꣳ संस्कृत्येह रतिरिति षड् जुहोति प्रतिमन्त्रम्**—मध्ये गवां गोष्ठे पञ्चभूसंस्कारपूर्वकमावसथ्याग्निं सुसमिद्धं प्रज्वलितं कृत्वा आज्यं संस्कृत्य पर्युक्षणान्ते इह रतिरित्यादिभिः षड्भिर्मन्त्रैः प्रतिमन्त्रं षडाज्याहुतीर्जुहोति । अत्र मध्ये गवामिति देशविशेषनियमानुविधानात् देशान्तरस्येह यागानङ्गत्वम् । **पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः । पूषा वाजꣳ सनोतु न इति पौष्णस्य जुहोति**—पौष्णस्य पूषा देवता अस्येति पौष्णस्तस्य चरोः पूषा गा इत्यादिमन्त्रेण सकृज्जुहोति होमसंख्यानभिधानात् तस्य च श्रपणानुपदेशात् सिद्ध एवोपादीयते । अयं पौष्णश्चरुः पिष्टमयो भवति । कुतः "तस्माद्यं पूष्णे चरुं कुर्वन्ति प्रपिष्टानामेव कुर्वन्ति" इति श्रुतेः । **रुद्रान् जपित्वैकवर्णं द्विवर्णं वा यो वा यूथं छादयति यं वा यूथं छादयेद्रोहितो वैव स्यात्सर्वाङ्गैरुपेतो जीववत्सायाः पयस्विन्याः पुत्रो यूथे च रूपस्वित्तमः स्यात्तमलंकृत्य यूथे मुख्याश्चतस्रो वत्सतर्यस्ताश्चालंकृत्यैतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण । मा नः साप्तजनुषाऽसुभगा रायस्पोषेण समिषा मदेमेत्येतयैवोत्सृजेरन्**—रुद्रान्नमस्त इत्यध्यायाम्नातान् जपित्वा(सप्तजन्म)जपधर्मेण पठित्वा, अत्र शूलगवातिदेशप्राप्तोऽपि रुद्रजपविधिः प्रथमोत्तमानुवाकजपविकल्पनिवृत्त्यर्थः जपावसरज्ञापनार्थो वा । तन्न । अपूर्व एवायम्, जप्यत्वेनाप्राप्तत्वात् । प्रकृतौ हि रुद्राणां पशूपस्थाने करणत्वेन विहितत्वात् । एक एव शुक्लादिवर्णो रूपं यस्य स एकवर्णः तम् । अथवा द्वौ वर्णौ यस्य स द्विवर्णः तं वृषम् । एवं वर्णविशेषनियममभिधायाधुना वृषस्य परिमाणविशेषनियममाह—यो वृषो यूथं कृत्स्नं वर्गं छादयति स्वपरिमाणेनाधःकरोति तं वा, यं वृषं यूथं वर्गश्छादयेत् अधःकुर्यात् तं वा यूथादधिकपरिमाणं वा न्यूनपरिमाणं वेत्यर्थः । रोहितो लोहित एव वा यः स्यात्, एवकारेण लोहितस्य एकवर्णद्विवर्णाभ्यां प्राशस्त्यमुच्यते,पुनः कीदृक्, सर्वैरङ्गैरुपेतः समन्वितः न पुनर्हीनाङ्गोऽधिकाङ्गो वा,तथा जीवाः प्राणवन्तो वत्साः प्रसूतिर्यस्याः सा जीववत्सा तस्या गोः पुत्रः । तथा पयः क्षीरं बहुलं विद्यते यस्याः सा पयस्विनी तस्या गोः पुत्रः । तथा यूथे वर्गविषये रूपमस्यास्तीति रूपस्वी अतिशयेन रूपस्वित्तमः वृषः स्यात्, तमुक्तगुण-

विशिष्टं वृषमलंकृत्य वस्त्रमाल्यानुलेपहेमपट्टिकाग्रैवेयकघण्टादिभिर्वृषोचितभूषणैर्भूषयित्वा न केवलं वृषमात्रम्, ताश्च वत्सतरीरप्यलंकृत्य, कीदृशीः याः यूथे स्ववर्गे मुख्याः गुणैः श्रेष्ठा वत्सतर्यः, कति चतस्रः चतुःसंख्योपेतास्ताः, **एतं युवानमित्येतयर्चा** उत्सृजेरन् त्यजेयुः । **नभ्यस्थमभिमन्त्रयते मयोभूरित्यनुवाकशेषेण**—नभ्यस्थं वत्सतरीणां मध्ये तिष्ठन्तमभिमन्त्रयते आभिमुख्येन मन्त्रैः स्तौति । केन **मयोभूरभि मा वाहि स्वाहेत्यारभ्य स्वर्णसूर्यः** स्वाहेत्यन्तेनानुवाकशेषेणेति वृषोत्सर्गसूत्रार्थः । अथ पायसप्राशनं नाम कर्मान्तरम् । **सर्वासां पयसि पायसꣳ श्रपयित्वा ब्राह्मणान्भोजयेत्**—यस्य यावन्त्यो गावः दोग्ध्र्यः सन्ति स तासां सर्वासां पयसि दुग्धे पायसं परमान्नं श्रपयित्वा पक्त्वा ब्राह्मणान् त्रिप्रभृतीन् यथाशक्ति भोजयेत् तर्पयेत् । **पशुमप्येके कुर्वन्ति । तस्य शूलगवेन कल्पो व्याख्यातः**—एके आचार्याः पशुमपि छागं च कुर्वन्ति आलभन्ते उक्तविधिना पायसश्रपणपूर्वकं ब्राह्मणान् भोजयन्ति च, तस्य पशोः शूलगवेन शूलगवाख्येन कर्मणा कल्पः इतिकर्तव्यताकलापो व्याख्यातः कथितः । इति सूत्रार्थः ॥ ९ ॥

अथ **पद्धतिः** । तत्र स्वर्गादीनामन्यतमफलप्राप्तिकामः कार्त्तिक्यां पौर्णमास्याम्, आश्वयुजस्य रेवत्यां वा शाखान्तराच्चैत्र्यामाश्वयुज्यां वा मातृपूजापूर्वकमाभ्युदयिकश्राद्धं कृत्वा गोष्ठे गत्वा गवां मध्ये पञ्च भूसंस्कारान् कृत्वा आवसथ्याग्निं स्थापयेत् । प्रणीताप्रणयनकाले प्रणीतापात्रमध्ये पिष्टादिना अन्तर्द्धानं विधाय मूलदेशे पयः इतरत्र जलं प्रक्षिप्य प्रणयेत् । तण्डुलानन्तरं पौष्णं पिष्टमयं चरुं सिद्धमेवासादयेत् । प्रणीतेन पयसा पायसं श्रपयेत्, पर्युक्षणान्ते सुसमिद्धेऽग्नौ "इह रतिः स्वाहा १ । इह रमध्वꣳ स्वाहा २ । इह धृतिः स्वाहा ३ । इह स्वधृतिः स्वाहा ४। उपसृजन्धरुणं मात्रे धरुणो मातरं धयन्स्वाहा ५ । रायस्पोषमस्मासु दीधरत्स्वाहा ६ । इदमग्नये इति षट्सु त्यागाः । एवं षडाहुतीर्हुत्वा आज्यभागान्ते पायसेन शूलगवदेवताभ्योऽग्न्यादिभ्य ईशानान्ताभ्यो नवाहुतीः प्रत्येकं हुत्वा पिष्टचरोः **पूषा गा अन्वेतु न** इत्यादिना **सनोतु न** इत्यन्तेन स्वाहाकारयुतेन मन्त्रेणैकामाहुतिं हुत्वा "इदं पूष्णे" इति त्यागं विधाय पायसपौष्णाभ्यां स्विष्टकृते हुत्वा महाव्याहृत्यादिहोमसंस्रवप्राशनान्ते पूर्णपात्रवरयोरन्यतरं ब्रह्मणे दक्षिणां दद्यात् । अथ **नमस्ते रुद्र मन्यव** इत्यारभ्यासमाप्ते रुद्राञ्जपित्वा एकवर्णादिगुणविशिष्टं वृषभं चतसृभिर्वत्सतरीभिः सहितं वस्त्रमाल्यानुलेपहेमालंकारादिभिरलंकृत्य **एतं युवानमि**त्याद्या समिषामदेमेत्यन्तया ऋचा उत्सृजेरन् । ततो वत्सतरीमध्ये स्वं वृषभं **मयोभूरभि मा वाहि स्वाहेत्यारभ्य स्वर्णसूर्यः स्वाहे**त्यन्तेनानुवाकशेषेणाभिमन्त्रयते । इति **वृषोत्सर्गः** । अत्र यत्प्रेतकृत्यं तदन्योक्तं लिख्यते । तत्र प्रेतपित्रादिगतनानाविधसमुचितस्वर्गादिफलकामस्य स्वगतपुण्यातिशयाशोकमोक्षगतिकामस्य वाऽधिकारः । तत्र प्रथमसंवत्सराभ्यन्तरे कृतसपिण्डीकरणस्याकृतसपिण्डीकरणस्य च मातृस्थापनपूजनाभ्युदयिकश्राद्धानि न भवन्ति । सूतकान्तं द्वितीयमहरेवास्य परं वृषोत्सर्गस्य कालो न कार्त्तिक्यादिः प्रथमसंवत्सरे काम्यकर्माभ्युदयिकयोरनधिकारात् । कुतः "'तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते" इति वचनात् । सूतकान्ते द्वितीयेऽहनि इति यद्वचनं तत्, तथैव काम्यं यत्कर्म'इति वचनं बाधित्वैव प्रवर्तते अनन्यविषयत्वात् । कार्त्तिक्यादिवचनं तु संवत्सरोत्तरकालिककार्त्तिक्यादौ सङ्कोच्यम्, अन्यथा बाधसापेक्षत्वाभ्यां वैषम्यापत्तेः । ततश्च संवत्सरानन्तरं कार्त्तिक्यादिकाले पित्रादिगतनानाविधतृप्त्यादिकामेन क्रियमाणो वृषोत्सर्गो मातृस्थापनपूजनश्राद्धपूर्वक एव कर्तव्यः । तस्य च कार्त्तिकीचैत्र्याश्वयुजीरेवत्यः कालाः । अथ **फलश्रुतिः**—"उत्सृष्टो वृषभो यस्मिन् पिबत्यथ जलाशये । शृङ्गेणोल्लिखते भूमिं यत्र क्वचन दर्पितः ॥ पितॄणामन्नपानं तत् तत्प्रभूत्युपतिष्ठते । वृषोत्सर्गादृते नान्यत्पुण्यमस्ति महीतले ॥" तथा—" वृषभस्य तु शब्देन पितरः सपितामहाः । आवर्त-

माना दृश्यन्ते स्वर्गलोके न संशयः॥ जले प्रक्षिप्य लाङ्गूलं तोयं यद्धरते वृषः। दशवर्षसहस्राणि पितरस्तेन तर्पिताः॥ कूलात्समुद्धृता यावच्छृङ्गे तिष्ठति मृत्तिका। भक्ष्यभोज्यमयैः शैलैः पितरस्तन तर्पिताः॥ गवां मध्ये यदा चैष वृषभः क्रीडते तु यत्। अप्सरौघसहस्रेण क्रीडन्ति पितरस्ततः॥लाङ्गूलमुद्यमं यावत् तोयेषु क्रीडते तु सः। अप्सरोगणसङ्घैश्च क्रीडन्ति पितरः सदा॥ सहस्ररत्नपात्रेण कनकेन यथाविधि। तृप्तिः स्याद्या पितॄणां वै सा वृषेण समोच्यते॥" एतानि चार्थवादफलानि समुच्चितान्येव कामनाविषयः। अथ **वृषस्वरूपम्**—"जीववत्सायाः पयस्विन्याः पुत्रो मुखपुच्छपादेषु सर्वशुक्लो नीलो लोहितो वा वृषः।" तथा—"उन्नतस्कन्धककुद ऋजुलाङ्गूलभूषणः। महाकटितटस्कन्धो वैडूर्यमणिलोचनः॥ प्रवालगर्भशृङ्गाग्रः सुदीर्घऋजुबालधिः। नवाष्टदशसंख्यैस्तु तीक्ष्णाग्रैर्दशनैः शुभैः॥ मल्लिकाख्यश्च मोक्तव्यस्तथा वर्णेन ताम्रकः। कपिलो वृषभः श्रेष्ठो ब्राह्मणस्य प्रशस्यते॥ श्वेतो रक्तश्च कृष्णश्च गौरः पाटल एव च।" तथा—"पृथुकर्णो महास्कन्धः सूक्ष्मरोमा च यो भवेत्। रक्ताक्षः कपिलो यश्च रक्तशृङ्गगलस्तथा। श्वेतोदरः कृष्णपृष्ठो ब्राह्मणस्य प्रशस्यते॥ स्निग्धवर्णेन रक्तेन क्षत्रियस्य प्रशस्यते। काञ्चनाभेन वैश्यस्य कृष्णः शूद्रस्य शस्यते॥ यस्य प्रागायते शृङ्गे स्वमुखाभिमुखे सदा। सर्वेषामेव वर्णानां स वै सर्वार्थसाधकः॥" तथा—"मार्जरपादः कपिलस्तथा कपिलपिङ्गलः। श्वेतो मार्जारपादः स्यात्तथा मणिनिभेक्षणः॥" तथा—गौरतित्तिरिकृष्णातित्तिरिसन्निभौ। तथा आकर्णमूलात् श्वेतं यस्य मुखं स नान्दीमुखः। विशेषतो रक्तवर्णः। तथा यस्य जठरं श्वेतवर्णं पृष्ठं च स समुद्रनामा अतसीवर्णो जघन्यः। तथा—"भूमौ कर्षति लाङ्गूलं पुनश्च स्थूलबालधिः। पुरस्तादुन्नतो नीलः स श्रेयान्वृषभः स्मृतः॥" तथा—" रक्तशृङ्गाग्रनयनः श्वेतदन्तोदरस्तथा। प्रवालसदृशास्येन वृषो धन्यतरः स्मृतः॥" एते सर्वे धनधान्यविवर्द्धनाः। तथा—" चरणाग्रमुखं पुच्छं यस्य श्वेतानि गोपतेः। लाक्षारससवर्णश्च तं नीलमिति निर्दिशेत्॥" तथा—" लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः। श्वेतः खुरविषाणाभ्यां स वृषो नील उच्यते" तथा नीलाधिकारे—" एवं वृषं लक्षणसम्प्रयुक्तं गृहोद्भवं क्रीतमथापि राजन्। मुक्त्वा न शोचेन्मरणं महात्मा मोक्षे मतिं चाहमतो विधास्ये" इति। गाथाऽपि तदर्थेयम्। " एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्। यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत्।" अथ **वर्जनीया वृषाः**—"कृष्णताल्वोष्ठदशना रूक्षशृङ्गशफाश्च ये। असक्तदन्ता ह्रस्वाश्च व्याघ्रभस्मनिभाश्च ये॥ ध्वाङ्क्षगृध्रसवर्णाश्च तथा मूषकसन्निभाः। कुब्जाः काणाश्च खञ्जाश्च केकराक्षास्तथैव च॥ अत्यन्तश्वेतपादाश्च उद्भ्रान्तनयनास्तथा। नैते वृषाः प्रमोक्तव्या गृहे धार्याः कथञ्चन॥"उपादेयश्च वृषस्त्रिहायणः।तथा वत्सतर्योऽपि त्रिहायण्य एव।अथ स्नात आचान्तः प्रेतपुत्रादिरन्यो वा होता ब्रह्मा च,तत्रान्यपक्षे"ॐ अद्यामुकमासिकामुकतिथौ पित्रादिगतस्वर्गकामो वृषोत्सर्गमहं करिष्ये"इति प्रतिज्ञाय"अद्य कर्तव्ये वृषोत्सर्गहोमकर्मणि भवान्मया निमन्त्रितः" "तथैव होमकर्मणि कृताकृतावेक्षकत्वेन मया भवान्निमन्त्रित" इति वस्त्रचन्दनताम्बूलादिभिः होतृब्रह्माणौ वृणुयात्। ततः स्वयं गवां मध्ये गोष्ठे पञ्च भूसंस्कारान्कृत्वा आवसथ्याग्निं स्थापयेत्। होतृब्रह्मप्रणीतानामासनदानम्। ब्रह्माणमुपवेश्य प्रणीतासु क्षीरोदकप्रणयनम्। उदकमात्रप्रणयनमिति केचित्। आज्यं, तण्डुलाः, पौष्णः पिष्टमयः सिद्ध एव चरुः। होतुर्वस्त्रयुगं सुवर्णकांस्यादिदक्षिणा च। ब्रह्मणः पूर्णपात्रं वरो वा दक्षिणा। प्रोक्षण्युदकेन पात्रप्रोक्षणम्, पवित्रस्य च प्रणीतासु निधानम्, प्रणीतेन पयसा यथाविधि पायसचरुश्रपणम्, उद्वासनादि, प्रोक्षण्युदकेन पर्युक्षणान्तमाज्येन इह रतिरित्याद्याः षडाहुतयः, इदमग्नय इति षट् त्यागाः। तत आघारावाज्यभागौ, ततः पायसेनाग्नये इत्यादीशानान्तः शूलगवदेवताभ्यो होमः। ततः पिष्टचरुणा "पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः। पूषा वाजꣳ सनोतु नः स्वाहा" इत्यकाऽऽहुतिः पूष्णे। ततः पायसपिष्टचरुभ्यां स्विष्टकृद्धोमः। ततो भूराद्या नवाहुतयः, संस्रवप्राशनम्। दक्षिणान्ते रुद्रान् जपित्वा एकस्मिन्पार्श्वे चक्रेणापरस्मिन् शूलेन वृषमङ्कयित्वा वत्सतरीं वृषं च हिरण्यवर्णेति चतसृभिः

CC0. In Public Domain. Kritikant Sharma Najafgarh Delhi Collection

शन्नो देवीरिति च स्नापयित्वा लोहघण्टिकानूपुरकनकपट्टादिभिः पश्चाप्यलंकृत्य वृषभस्य दक्षिणे कर्णे जपेत् । 'वृषो हि भगवान्धर्मश्चतुष्पादः प्रकीर्तितः । वृणोमि तमहं भक्त्या स मां रक्षतु सर्वतः " इति । तत उत्सर्गः । ॐ अद्यामुकमासिकामुकतिथौ० एतं युवानं पतिमित्यादिना समिषा मदेमेत्यन्तेनैव । पारस्करेण "एतयैवोत्सृजेरन्" इति एवकारेणान्यनिषेधात् । तथा च ऋगर्थः । हे वत्सतर्यो वो युष्माकं एतं वृषं युवानं तरुणं, पतिं भर्तारं ददामि त्यजामीत्यर्थः । हे वत्सतर्यो यूयमपि न मयोपयोक्तव्याः, किन्तु तथा त्यक्ताः सत्य उपवनेषु अनेन प्रियेण पत्या सह क्रीडन्तीः क्रीडन्त्यः चरथ स्वच्छन्दं भ्रमत चरत तृणानि खादतेति वा । " चर गतिभक्षणयोः " । नोऽस्माकं गृहेषु साप्तजनुषा सप्तजन्मपर्यन्तं असुभगा मा चरत, किञ्च युष्मत्प्रसादाद्वयं रायस्पोषेण धनपुष्ट्या, इषा अन्नेन च सम्मदेम सम्यक् तृप्येम, इत्याशंसा । तदुक्तम्—" ततः प्रमुदितास्तेन वृषभेण समन्विताः । वनेषु गावः क्रीडन्ति वृषोत्सर्गप्रसिद्धिषु ॥" ततो वत्सतरीनभ्यस्थमभिमन्त्रयते मयोभूरित्यनुवाकशेषेण । ततो यवतिलयुतं जलं पित्रादिभ्यः पितृतीर्थेन दद्यादनेन मन्त्रेण । " स्वधा पितृभ्यो मातृभ्यो बन्धुभ्यश्चापि तृप्तये । मातृपक्षाश्च ये केचिद्ये चान्ये पितृपक्षजाः ॥गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः । ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः ॥ वृषोत्सर्गेण ते सर्वे लभन्तां तृप्तिमुत्तमाम् । दद्यादनेन मन्त्रेण तिलाक्षतयुतं जलम ।उत्सृष्टान्नोपयुञ्जीत स्वामी चान्योऽपि मानवः" इति । ननु यथा वापीकूपतडागादावुत्सर्गे कृते परस्मिंश्च स्वीकारिते निरिष्टिके तज्जलगोचरतया सर्वेषामौपादानिकं स्वत्वं भवति, तथेहापि त्यक्तानां वृषादीनां केनचिदप्यस्वीकृतानां निरिष्टिकानामौपादानिकं स्वत्वं कुतो न भवतीत्याह—"नैवाज्यं न च तत्क्षीरं पातव्यं केनचित्क्वचित् । न वाह्योऽसौ वृषश्चैषामृते गोमूत्रगोमये" इति । ततश्च यथेष्टविनियोगनिषेधान्मतिस्तोकत्वे न किञ्चिदप्युपादानं कार्यम् । ननु औपादानिकस्वत्वानन्तरं विक्रीय कपर्दिकादानमप्यस्त्विति चेन्न, न वाह्य इत्यस्य विनियोगमात्रोपलक्षणत्वात् विक्रयस्यापि यथेष्टविनियोगरूपत्वात्, किन्तु गोपशुविक्रयस्य निषेधश्रुतेः कथं तदर्थमुपादानम् । उल्लङ्घितमर्यादो विक्रयं करोत्विति चेत् तस्योच्छृङ्खलत्वेन हेयत्वात् । शास्त्राण्यनधिकृत्य शास्त्राप्रवृत्तेः, सङ्कल्पविरोधाच्च । तर्ह्यनेन प्रियेण वनेष्वनवच्छिन्नकालं चरथेति सङ्कल्पो न तु परोपेतं गोबलीवर्दरूपं मुञ्चतामिति । वाप्यादौ तु सर्वभूतानि स्नानपानावगाहनादि यथेष्टमिह कुर्वन्त्वित्येतावानेव सङ्कल्पः । यदि तु वत्सतरीणामपत्यानि केनचिदुपादाय दोह्यन्ते तदाऽस्य न दोषः । तत्पर्यन्त मेव दोहनवाहननिषेधवाक्यस्य तात्पर्यात् भवेद्वचनमिति न्यायाच्च । अथ पायसप्राशनं नाम कर्मान्तरं प्रकरणैक्यात्स्वर्गाद्यन्यतमकामस्याभिधीयते । तत्र कालविशेषानभिधानात्प्रकृतोत्सर्गकाल एव गृह्यते । ततश्च वृषोत्सर्गविहितकार्त्तिक्याद्यन्यतमसमये मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वाऽऽवसथ्याग्नौ स्वकीयानां सर्वासां गवां दोग्ध्रीणां पय आदाय तत्र पयसि तण्डुलान्प्रक्षिप्य पायसं श्रपयित्वा त्रिप्रभृतीन् यथाशक्ति यथासम्भवं ब्राह्मणान्भोजयेत् । अथवा शूलगवविधिना छागं पशुं च कुर्यादिति पायसप्राशनम् । एष वृषोत्सर्गविधिः स्वर्गादिकामस्यौपासनाग्नौ साग्नेर्भवति । यः पुनः प्रेतगतस्वर्गादिफलसाधनभूतो ब्राह्मणादीनां वर्णानामेकादशत्रयोदशषोडशैकत्रिंशत्तमेष्वस्ति वृषोत्सर्गः स्मृत्यन्तरे विहितः, तत्रापि द्विजातीनां साग्निनिरग्नीनां काण्वमाध्यन्दिनशाखानुसारिणां लौकिकाग्निनाऽनेनैव विधानेन कर्तव्यो मातृपूजाऽऽभ्युदयिकश्राद्धं विना । प्रेतसपिण्डानां प्रथमेऽब्दे काम्याभ्युदयिकयोर्निषेधात् । शूद्रस्य तु मन्त्रवर्जं क्रियामात्रम् । निरग्नीनां तु स्वर्गादिकामानां कार्त्तिक्याद्यन्यतमकाले लौकिकाग्नौ कर्तव्यो भवतीति विशेषः । अत्र केचिदाहुः । " एकादशेऽह्नि सम्प्राप्ते यस्य नोत्सृज्यते वृषः । प्रेतत्वं हि स्थिरं तस्य दत्तैः श्राद्धशतैरपि " इत्यादिस्मृतिवचनात्, क्षत्रियवैश्यशूद्रैरप्येकादशेऽह्न्येव आशौचमध्ये नियतकालिकत्वात् वृषोत्सर्गः कर्तव्य इति । तदयुक्तम् । अत्र प्रकरणे एकादशाहादिशब्दा आशौच-

सूतकान्तकालोपलक्षकाः । अन्यथा “ अहन्येकादशे नाम ” तथा–“ आनन्त्यात्कुलधर्माणामायुषश्च परिक्षयात् । अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते ” इत्यादिभिर्वचनैर्नामकरणसापिण्डनादिक्रिया क्षत्रियादीनामशुद्धावेवापद्येत । न तदिष्यते । “ शुचिना कर्म कर्तव्यम् ” इति कर्माधिकारे शुद्धेरपेक्षितत्वात्, सा च शुद्धिः क्षत्रियादीनां त्रयोदशे षोडशे एकत्रिंशत्तमे दिने भवति । तस्मादेकादशाहादिशब्दाः सूतकान्तमुपलक्षयन्ति ॥ १ ॥ ॥ * ॥

विश्व०—गोयज्ञातिदिष्टशूलगवधर्मातिदेशार्थमाह–**अथ वृषोत्सर्गः**–उच्यत इति शेषः। अत्रापि स्वर्गपुत्रपशुधनायुष्कीर्त्तिकामानामधिकारः। **गोय...ख्यातः**–पायसेनाऽग्नये, रुद्रायेत्यादिशूलगवदेवतोद्देश्यकहोमो भवतीत्यर्थः। समयमाह–**कार्त्ति...जस्य**–कार्त्तिक्यां पौर्णमास्यामाश्वयुजस्य वा पौर्णमास्यां भवतीत्यर्थः । रेवत्यामित्याश्वयुज्यां फलातिशयार्थम् । अत्रादौ मातृपूजाऽऽभ्युदयिके । **मध्ये...कृत्वा**–गोपदं विशेषणम् । उपलक्षणमित्यन्ये । सुसमिद्धामित्येतद्भूसंस्कारनिवृत्त्यर्थम् , भूसंस्कारा भवन्तीत्यन्ये । अयं च वृषोत्सर्गः मृतस्य सूतकान्ते प्रेतत्वनिवृत्तये आवश्यकः । स च साग्नेर्दाहदिनादेकादशाहे । निरग्नेस्तु मरणदिनात् । तत्रादौ विष्णुपूजनतत्तर्पणे । तत्र प्रयोगः––विधिवत्स्नात्वा प्राणानायम्य देशकालौ संकीर्त्यामुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं वृषोत्सर्गयोग्यताप्राप्त्यर्थं विष्णोः पूजनपूर्वकं तर्पणमहं करिष्ये इति संकल्प्य “कार्यं पुरुषसूक्तेन मन्त्रैर्वा वैष्णवैरपि। दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरन्॥अनादिनिधनो देवः शङ्खचक्रगदाधरः। अव्ययः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव॥”अनेनामुकप्रेतस्य प्रेतत्वनिवृत्तिरस्तु। वृषोत्सर्गयोग्यताप्राप्तिरस्तु। इति विष्णुतर्पणम् । अथ **वृषोत्सर्गः** । तत्र देशकालावुच्चार्याऽमुकप्रेतस्य प्रेतत्वानिवृत्त्यर्थमेकादशाहादियोग्यताप्राप्त्यर्थं वृषोत्सर्गं करिष्य इति संकल्प्य मध्ये गवां संस्कृतप्रदेशे सुसमिद्धमग्निं कृत्वा ईशाने रुद्रकलशस्थापनम् । ततोऽग्नेर्दिग्विदिक्ष्वष्टौ कलशान् स्थापयेत् । ततस्तेषां प्रतिष्ठा। ततो दक्षिणतो ब्रह्मासनमास्तीर्येत्यादि सक्षीरं प्रणीताप्रणयनम् । चरुग्रहणे अग्नये, रुद्राय, शर्वाय, पशुपतये, उग्राय, अशनये, भवाय, महादेवाय, ईशानाय, जुष्टं गृह्णामीति । ततः पूष्णे जुष्टं गृह्णामीति पिष्टग्रहणम् । **आचार्य**मते तु पौष्णश्चरुराद्यः । पायसश्चरुर्द्वितीयः । “विपरीतमेतत्” इति देवयाज्ञिकाः । अन्येऽपि । **आज्य...जुहोति**–प्रतिमन्त्रम् । ततः पर्युक्षणान्ते पुनराज्यं संस्कृत्य **इह रति**रिति षड् जुहोति । आघारहोमात्प्रागाज्याहुतिप्रशस्त्यर्थमाज्यसंस्कारोक्तिः । इह रतिः स्वाहा । इह रमध्वं स्वाहा । इह धृतिः स्वाहा । इह स्वधृतिः स्वाहा । इदं पशुभ्य इति त्यागाः । “इह रतिः पशुदैवतम्” इत्युक्तेः । “उपसृजं धरुणं मात्रे धरुणो मातरं धयन्स्वाहा । रायस्पोषमस्मासु दिधरत्स्वाहा” । इदमग्नय इति त्यागौ । “उपसृजन्नुष्णिगाग्नेयी” इत्युक्तेः । तत आघारावाज्यभागौ । ततः पायसचरुहोमः । अग्नये स्वाहा । रुद्राय स्वाहा । शर्वाय स्वाहा । पशुपतये स्वाहा । उग्राय स्वाहा । अग्नये स्वाहा । भवाय स्वाहा । महादेवाय स्वाहा । ईशानाय स्वाहा । इदंपूर्वकाः स्वाहाशून्या मन्त्रा एव त्यागाः । प्रत्याहुत्युदकस्पर्शः । ततः **पूषा...होति–सनोतु न** इत्यनन्तरं स्वाहाकारप्रयोगः । इदं पूष्णे इति त्यागः । ततः पायसपौष्णाभ्यां स्विष्टकृते हुत्वा त्यक्त्वा च रुद्राञ्जपित्वा ततः रुद्रं जपित्वा रुद्रकलशे रुद्रमावाह्य गन्धमाल्यादिभिः संपूज्य **नमस्त** इत्यादिरुद्राध्यायं जपित्वेत्यर्थः । ततः पुराणप्रसिद्धिस्थापिताऽष्टकलशार्द्धेन वृषस्य स्नपनम् । चतुर्भिः कलशैश्चतसृणां वत्सतरीणां स्नपनम् । एकैव चेद्वत्सतरी तदा चतुर्भिस्तस्या एव स्नपनम् । एते च कलशस्थापनस्नपने **गरुडपुराणा**दालोच्ये। कीदृशस्य वृषस्योत्सर्ग इत्यपेक्षायामाह–**एक...स्यात्**–यः वृषः महत्त्वलघुत्वाद्यूथस्य छादको वा छायो वा रोहितः आरक्तः एकद्विवर्णादिविकल्पः । तमलंकृत्य स्रगादिभिः, सौवर्णश्रृङ्गादिभिरित्यन्ये । **यूथे...कृत्य**–स्त्रीधार्यवस्त्रमाल्यादिभिः । सुवर्णश्रृङ्गादिभिरित्यन्ये । अस्मिन्नवसरे ग्राह्यं वैवाहिकं होममिच्छन्त्येके । ततो वृषवत्सतरीभिः अग्नेः प्रदक्षिणं कारयित्वा वत्सतरीणां मध्ये वृषं संस्थाप्य “अयं गावो मया दत्तः सर्वासां पतिरुत्तमः । तुभ्यं चैता मया दत्ताः पत्न्यः सर्वा मनोरमाः ॥” इत्युक्त्वाऽयस्कारमाहूय वामे चक्रम्, दक्षिणे त्रिशूलं कारयेत् । एवं तप्तायसेन अङ्कयित्वा रुद्रकलशस्थोदकेन तं स्नपयेत् । या काचित्पुत्रकामा सा वृषस्याऽधस्तात्स्नानं करोति काम्ये वृषोत्सर्गे । ततः पुनर्वृषं संपूज्याऽद्येत्यादिदेशकालौ स्मृत्वा काम्ये कामनोल्लेखः, नित्ये तु प्रेतस्य प्रेतत्वनिवृत्तय इत्युल्लिख्य पुच्छमादायाऽमुं वृषं रुद्रदैवतं यथाशक्त्यलंकृतं गन्धाद्यर्चितमुत्सृजामीति संकल्प्य पुच्छे पुरुषसूक्तेन प्रेतनाम्ना च तर्पणम् , काम्ये तु तर्पणं पौराणिकैर्मन्त्रैर्गयाशीर्षवद्दक्षिणखुरे पिण्डदानं च । **एतं...जरन्**–एतं युवानमिति सव्येन हस्तेन पुच्छमादाय दक्षिणहस्तेन सहिरण्याः सतिलाः सकुशाः अप आदायामुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थमेकादशाहश्राद्धयोग्यताप्राप्त्यर्थमुत्सृजामि इत्युक्त्वा सहिरण्यं सतिलमुदकं भूमौ क्षिपेत् । **नभ्य...षेण**–समीपस्थो नभ्यस्थः तं मयोभूरित्यारभ्य **सूर्यः स्वाहे**त्यन्तेनाभिमन्त्रणम् । ततः–“ धर्मस्त्वं वृषरूपेण ब्रह्मणा निर्मितः पुरा । तवोत्सर्गादिमं प्रेत समुद्धर भवार्णवात् ॥ मातृपक्षाश्च ये केचिद्ये चान्ये पितृपक्षतः । गुरुश्वशुरबन्धूनां कुले येषां समुद्भवः ॥ प्रेतभावं

समापन्ना ये चान्ये श्राद्धवर्जिताः । वृषोत्सर्गेण ते सर्वे लभन्तां तृप्तिमुत्तमाम्॥" इति वृषप्रार्थना । ततो दक्षिणस्कन्धेन वृषस्येशानीं दिशं प्रति प्रेरणम्, यथेष्टं पर्यटेति मन्त्रेण । ततः स्विष्टकृद्धोमादिब्राह्मणभोजनान्तम् । अनन्तरं वैश्वदेवः। इदानीं पाकयज्ञान्तरमाह–**सर्वा···येत्**–यावत्यः स्वीया गावः तावतीनां सर्वासामित्यर्थः । अस्य प्राशितपदवाच्यत्वात्पञ्चमहायज्ञादि पाकान्तरेण कार्यम् । **पशुमप्येके कुर्वन्ति**–उक्तविधिना पायसेन ब्राह्मणभोजनानन्तरं पशुं चैके कुर्वन्तीत्यर्थः । अस्य पाकयज्ञस्योत्तराङ्गपशुः वैकल्पिकः । तन्मते क्रियाबाहुल्यात्फलबाहुल्यम् । केचित्तु पशोः प्रधानत्वेऽपि नियतसमयकर्तव्यत्वं दाक्षायणयज्ञवदित्याहुः । स कथं स्यादत आह–**तस्य···ख्यातः**–तस्य पशोः कल्पः कर्त्तव्यताकलापः । इति तृतीयकाण्डस्य नवमी कण्डिका ॥ ९ ॥ ॥ * ॥

अथोदककर्म ॥ १ ॥ अद्विवर्षे प्रेते मातापित्रोराशौचम् ॥ २ ॥ शौचमेवेतरेषाम् ॥ ३ ॥ एकरात्रं त्रिरात्रं वा ॥ ४ ॥ शरीरमदग्ध्वा निखनन्ति ॥ ५ ॥ अन्तःसूतके चेदोत्थानादाशौचꣳ सूतकवत् ॥ ६ ॥ नात्रोदककर्म ॥ ७ ॥ द्विवर्षप्रभृति प्रेतमाश्मशानात्सर्वेऽनुगच्छेयुः ॥ ८ ॥ यमगाथां गायन्तो यमसूक्तं च जपन्त इत्येके ॥ ९ ॥ यद्युपेतो भूमिजोषणादिसमानमाहिताग्नेरोदकान्तस्य गमनात् ॥ १० ॥ शालाग्निना दहन्त्येनमाहितश्चेत् ॥ ११ ॥ तूष्णीं ग्रामाग्निनेतरम् ॥ १२ ॥ संयुक्तं मैथुनं वोदकं याचेरन्नुदकं करिष्यामह इति ॥ १३ ॥ कुरुध्वं मा चैवं पुनरित्यशतवर्षे प्रेते ॥ १४ ॥ कुरुध्वमित्येवेतरस्मिन् ॥ १५ ॥ सर्वे ज्ञातयोऽपोऽभ्यवयन्त्यासप्तमात्पुरुषाद्दशमाद्वा ॥ १६ ॥ समानग्रामवासे यावत्सम्बन्धमनुस्मरेयुः ॥ १७ ॥ एकवस्त्राः प्राचीनावीतिनः ॥ १८ ॥ सव्यस्यानामिकयाऽपनोद्याप नः शोशुचदघमिति ॥ १९ ॥ दक्षिणामुखा निमज्जन्ति ॥ २० ॥ प्रेतायोदकꣳ सकृत्प्रसिञ्चन्त्यञ्जलिनाऽसावेतत्त उदकमिति ॥ २१ ॥ उत्तीर्णाञ्छुचौ देशे शाद्वलवत्युपविष्टाँस्तत्रैतानपवदेयुः ॥ २२ ॥ अनवेक्षमाणा ग्राममायान्ति रीतीभूताः कनिष्ठपूर्वाः ॥ २३ ॥ निवेशनद्वारे पिचुमन्दपत्राणि विदश्याचम्योदकमग्निं गोमयं गौरसर्षपांस्तैलमालभ्याश्मानमाक्रम्य प्रविशन्ति ॥ २४ ॥ त्रिरात्रं ब्रह्मचारिणोऽधःशायिनो न किञ्चन कर्म कुर्युर्न प्रकुर्वीरन् ॥ २५ ॥ क्रीत्वा लब्ध्वा वा दिवैवान्नमश्नीयुरमाꣳसम् ॥ २६ ॥ प्रेताय पिण्डं दत्त्वाऽवनेजनदानप्रत्यवनेजनेषु नामग्राहम् ॥ २७ ॥ मृन्मये ताꣳ रात्रीं क्षीरोदके विहायसि निदध्युः प्रेतात्र स्नाहीति ॥ २८ ॥ त्रिरात्रꣳ शावमाशौचम् ॥ २९ ॥ दशरात्रमित्येके ॥ ३० ॥ न स्वाध्यायमधीयिरन् ॥ ३१ ॥ नित्यानि निवर्तेरन्वैतानवर्जम् ॥ ३२ ॥ शालाग्नौ चैके ॥ ३३ ॥ अन्य एतानि कुर्युः ॥ ३४ ॥ प्रेतस्पर्शिनो ग्रामं न प्रविशेयुरानक्षत्रदर्शनात् ॥ ३५ ॥ रात्रौ चेदादित्यस्य ॥ ३६ ॥ प्रवेशनादि समानमितरैः ॥ ३७ ॥ पक्षं द्वौ वाऽऽशौचम् ॥ ३८ ॥ आचार्ये चैवम् ॥ ३९ ॥ मातामहयोश्च ॥ ४० ॥ स्त्रीणां चाप्रत्तानाम् ॥ ४१ ॥ प्रत्तानामितरे कुर्वीरन् ॥ ४२ ॥ ताश्च तेषाम् ॥ ४३ ॥ प्रोषितश्चेत्प्रेयाच्छ्रवणप्रभृति कृतो-

दकाः कालशेषमासीरन् ॥ ४४ ॥ अतीतश्चेदेकरात्रं त्रिरात्रं वा ॥ ४५ ॥ अथ कामोदकान्यृत्विक्श्वशुरसखिसम्बन्धिमातुलभागिनेयानाम् ॥ ४६ ॥ प्रत्तानां च ॥ ४७ ॥ एकादश्यामयुग्मान्ब्राह्मणान्भोजयित्वा मांसवत् ॥ ४८ ॥ प्रेतायोद्दिश्य गामप्येके घ्नन्ति ॥ ४९ ॥ पिण्डकरणे प्रथमः पितॄणां प्रेतः स्यात्पुत्रवाँश्चेत् ॥ ५० ॥ निवर्तेत चतुर्थः ॥ ५१ ॥ संवत्सरं पृथगेके ॥ ५२ ॥ न्यायस्तु न चतुर्थः पिण्डो भवतीति श्रुतेः ॥ ५३ ॥ अहरहरन्नमस्मै ब्राह्मणायोदकुम्भं च दद्यात् ॥ ५४ ॥ पिण्डमप्येके निपृणन्ति ॥ ५५ ॥ ॥ १० ॥ * ॥

कर्कः–अथोदककर्म–व्याख्यास्यत इति सूत्रशेषः । उदककर्मग्रहणेन च आशौचादियमनियमयोरुपलक्षणम् । सर्वमेतदत्र व्याख्यास्यत इति । अद्विवर्षे प्रेते मातापित्रोराशौच॰ शौचमेवेतरेषामेकरात्रं त्रिरात्रं वा–“नेतरेषां सपिण्डानाम्” इति गृह्यकारमतमेतत् । स्मृत्यन्तरे तु सर्वसपिण्डविषयत्वेनैव तदभिहितम् । “ ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः । अलंकृत्य शुचौ भूमावस्थिसञ्चयनादृते ॥ नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया । अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेव तु ॥” एतत्तु सर्वसापिण्डविषयत्वेनाभिहितम् । ते ह्याशौचार्हा इति अस्थिसञ्चयनाभावानुवाद एव । न हि निखनने सति तत्सम्भवति, अपिच सञ्चयनं वैतानिकस्यैव विहितम् । तेनेतरस्य उपदेशातिदेशयोरभावादप्राप्तिरेव । तत्रैकरात्रविधानमपि । “ नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता । निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते ॥” वयोऽवस्थाविशेषेण चैतद् व्यवस्थानं द्रष्टव्यम् । तथा चाह–“दन्तजातेऽनुजाते च कृतचूडे च संस्थिते । अशुद्धा बान्धवाः सर्वे सूतके च तथोच्यते ॥ ” दन्तजननमवधित्वेन धर्मं सूत्रकार आह । एवं च सति प्राक् दन्तजातान्नैशिक्यशुद्धिः, ऊर्ध्वं तु त्रिरात्रमिति । अन्यदपि सद्यःशौचमाम्नातम् । “बाले प्रेते च संन्यासे सद्यःशौचं विधीयते ” इति । एतच्च प्राङ्नामकरणाद् द्रष्टव्यम् । नामकरणं ह्यवधित्वेन दर्शयति–“नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया । जातदन्तस्य वा कुर्युर्नाम्नि वाऽपि कृते सति” इति नामकरणमवधित्वेनाभिहितम् । अतस्ततः प्राक् सद्यःशौचम् । दन्तजननात्प्राक् नैशिक्यशुद्धिः । ऊर्ध्वं तु त्रिरात्रमिति । कृतचूडस्यापि प्रागुपनयनात् त्रिरात्रम् । तत्किमर्थम्, द्वित्रिरात्रग्रहणं कृतचूडस्य ऊनाद्विवार्षिकस्य च । यदूनाद्विवार्षिकस्य त्रिरात्रग्रहणं तदग्निदाहोदकदानयोर्विकल्पेन । ऊर्ध्वं तु नियम इति । कुत एतदिति चेत् । येनैवमाह–“द्विवर्षप्रभृति प्रेतमाश्मशानात्सर्वेऽनुगच्छेयुः ” इति । एतच्च पुंविषयम् । येन स्त्रीविषयमन्यद्वचनान्तरम् । “ स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बान्धवाः । यथोक्तेनैव कल्पेन शुध्यन्ति तु सनाभयः ” इति, तदर्थम् । तथा–“अप्रौढायां तु कन्यायां सद्यःशौचं विधीयते ।” अप्रौढा चाकृतचूडोच्यते । तथा “अहस्त्वदत्तकन्यासु” इति वयोऽवस्थाविशेषेण च सर्ववर्णविषयमाशौचम् । न ह्यत्र वर्णविशेषोऽवस्थातुं शक्यते इति शरीरमदग्ध्वा निखनन्ति–ऊनाद्विवार्षिकं प्रेतम् । गृह्यकारमतमेतत् । मानवे तु विकल्पेन दाहोऽपि भवतीत्युक्तमेव । अन्तःसूतके चेदोत्थानादाशौचं सूतकवत्–अन्तः–

सूतके चेदिति । अन्तःसूतके चेत्पुनः सूतकमापद्यते । आ उत्थानादशुद्धिः । पूर्वस्यैव सूतकाशौचस्य उत्थानेनोत्तरस्य शुद्धिः । अन्तःशावाशौचं च सूतकवद् द्रष्टव्यम् । यदुक्तं भवति अन्तः शावाशौचे चेत् शावाशौचान्तरमापतति तस्यापि पूर्वेणैव शुद्धिः । तथा च गौतमाचार्यः—"तच्चेदन्तः पुनरापतेत शेषेण शुद्ध्येरन्" इति । तच्छब्देन च समानजातीयग्रहणात्सूतकोपनिपातं, न तु विजातीयं । तच्छब्दोपादानसामर्थ्यात् । शङ्खोऽपि चाह—"अथ चेदन्तरा म्रियेत जायेत वा शिष्टैरेव दिवसैः शुद्ध्येत । अहःशेषे सति द्वाभ्याम्, प्रभाते तिसृभिः" इति वर्णयन्ति । मरणस्योपक्रान्तत्वात् । अन्तःसूतके चेद्बालस्य मरणमापद्येत । आ उत्थानादाशौचं सूतकवद्भवति मा भूद्बालत्वात्सद्यःशौचमिति । **नात्रोदककर्म**—अत्रशब्देन ऊनद्विवार्षिकस्य ग्रहणम् । तस्योदककर्म न भवति । उदकदानप्रतिषेधाच्च दाहोऽपि न भवति । सन्नियोगो ह्यनयोः । स्मृत्यन्तरेऽपि—"नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया" इति । **द्विवर्षप्रभृति प्रेतमा श्मशानात्सर्वेऽनुगच्छेयुः**—सर्वशब्दः सपिण्डविषयः । सर्वेऽनुगच्छेयुरिति । **यमगाथां गायन्तो यमसूक्तं च जपन्त इत्येके**—गाथा छन्दोविशेषः । यमसूक्तं तु प्रसिद्धमेव । **यद्युपेतो भूमिजोषणादिसमानमाहिताग्नेरोदकान्तस्य गमनात्**—यद्युपनीतः प्रेतो भवति ततो भूमिजोषणाद्याहिताग्निविधानेन तुल्यम् । आ उदकान्तस्य गमनात् । **शालाग्निना दहन्त्येनमाहितश्चेत्**—एनं प्रेतं शालाग्निनाऽऽवसथ्येन दहन्ति यद्यसावाहितः । **तूष्णीं ग्रामाग्निनेतरम्**—इतरमकृतावसथ्यं ग्रामाग्निना तूष्णीं दहन्ति । तूष्णीमिति च मन्त्रनिवृत्त्यर्थम् । **संयुक्तं मैथुनं चोदकं याचेरन्नुदकं करिष्यामह इति**—संयुक्तः प्रसिद्ध एव । मैथुनस्यैकदेशे शालके प्रसिद्धः । तमुदकं याचन्ते उदकं करिष्यामह इत्यनेन मन्त्रेण । **कुरुध्वं मा चैवं पुनरित्यशतवर्षे प्रेते**—पृष्टः प्रतिवचनं कुरुध्वं मा चैवं पुनरित्यशतवर्षे प्रेते । **कुरुध्वमेवेतरस्मिन्**—शतवर्षप्रभृति कुरुध्वमिति प्रतिवचनम् । **सर्वे ज्ञातयोऽपोऽभ्यवयन्त्या सप्तमात्पुरुषाद्दशमाद्वा**—ज्ञातयः सपिण्डा समानोदकाश्च सर्व एवापोऽभ्यवयन्ति । **समानग्रामवासे यावत् सम्बन्धमनुस्मरेयुः**—समानग्रामवासे तु यावदपि सम्बन्धः स्मर्यते अमुष्मिन्नन्वये सम्बन्ध्यामह इति तावन्तोऽभ्यवेयुः । **एकवस्त्राः प्राचीनावीतिनः सव्यस्यानामिकयाऽपनोद्याप नः शोशुचदघमिति दक्षिणामुखा निमज्जन्ति**—तूष्णीमेव, अपनोदने मन्त्रः । **प्रेतायोदकं सकृत्प्रसिञ्चन्त्यञ्जलिनाऽसावेतत्त उदकमिति**—असावेतत्त इत्यनेन मन्त्रेण । **उत्तीर्णान् शुचौ देशे शाद्वलवत्युपविष्टाँस्तत्रैतानपवदेयुः**—उदकादुत्तीर्णान्सतः शाद्वलवति प्रदेश उपविष्टानपवदेयुरन्ये लोकयात्रिकाः । प्रेतगुणव्याख्यानेनापवादः । **अनवेक्षमाणा ग्राममायान्ति रीतीभूताः कनिष्ठपूर्वाः**—पश्चादनवलोकयन्तः पङ्क्तिव्यवस्थानेन कनिष्ठमग्रतः कृत्वा ग्राममागच्छन्ति । **निवेशनद्वारे पिचुमन्दपत्राणि विदश्याचम्योदकमग्निं गोमयं गौरसर्षपाँस्तैलमालभ्याश्मानमाक्रम्य प्रविशन्ति**—निवेशनस्य गृहफलिकस्य द्वारे पिचुमन्दस्य निम्बस्य पत्राणि विदश्य दन्तैः खण्डयित्वा तत आचम्य उदकादीन्यालभ्याश्मानमाक्रम्य प्रविशन्ति । **त्रिरात्रं ब्रह्मचारिणोऽधःशायिनो न किञ्चन कर्म**

कुर्वन्ति—न कारयन्तीत्यर्थः । **क्रीत्वा लब्ध्वा वा दिवाऽश्नीयुरमाꣳसं प्रेताय पिण्डं दत्त्वाऽवनेजनदानप्रत्यवनेजनेषु नामग्राहम्**—दिवाग्रहणं रात्रिप्रतिषेधार्थम्, त्रिरात्रमयं धर्मः, अवनेजनदानप्रत्यवनेजनेषु नामग्राहं गृहीत्वा नामेत्यर्थः । अमांसं पिण्डं दत्त्वा ततो भोजनम् । **मृन्मये ताꣳ रात्रीं क्षीरोदके विहायसि निदध्युः प्रेतात्र स्नाहीति**—मृन्मये पात्रे तामेवैकां रात्रीं क्षीरोदके कृत्वा विहायसि आकाशे निदध्युः, प्रेतात्र स्नाहीत्यनेन मन्त्रेण । **त्रिरात्रꣳ शावाशौचं दशरात्रमेके**—एके च दशरात्रम्, एके च त्रिरात्रम्, एके च एकरात्रं शावाशौचमिच्छन्ति । एवं हि स्मृत्यन्तरे—“दशाहं शावमाशौचं सपिण्डेषु विधीयते । अर्वाक् सञ्चयनादस्थ्नां त्र्यहमेकाहमेव वा ॥” एतच्चोपनयनप्रभृतिषु द्रष्टव्यम् । पूर्वं हि वयोऽवस्थाविशेषेणाभिहितम् । व्यवस्थया च विकल्पोऽयं वृत्तस्वाध्यायापेक्षया । वृत्तानिमित्तानि चाध्यापनं तदर्थज्ञानानुष्ठानानि । तत्रैकगुणसंयोगेऽर्वाक् सञ्चयनादाशौचम् । गुणद्वययोगात्त्र्यहः । गुणत्रययोगे एकाह इति । अपरे एकीयशब्दात्सद्यःशौचमिच्छन्ति । यदा गुणत्रययोगो भवति वृत्तिसङ्कोचश्च त्र्यहैकाहिको वेति तदा सद्यःशौचं भवति । स्मृत्यन्तरात् । **न स्वाध्यायमधीयीरन्**—येषां यावदाशौचं प्रातिस्विकाश्चैतेऽशौचकल्पाः । न सूतकाशौचवत् सर्वेषां सहेति । तत्र हि—“जननेऽप्येवमेव स्यान्मातापित्रोस्तु सूतकम् । सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः” इति । अपरे दशाहस्यैवातिदेशो न चतुरहत्र्यहैकाहानाम् । कुत एतत् । सञ्चयनकल्पेन व्यवधानात्, अपिच सर्वकल्पातिदेशे सति मातुरप्येकाहेन शुद्धिः प्राप्नोति । तच्च नेष्यते । येन पितुस्त्र्यहमाशौचविधानं “बैजिकादभिसम्बन्धादनुरुन्ध्यादघं त्र्यहम्” इत्यनेन पितुस्त्र्यहेन शुद्धिर्मातुश्चैकाहेनेति विरोधः । कथं, “रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते” इति । तस्मादपि दशाहस्यैवातिदेशः । शावं चानपेक्ष्यैवमेव स्यादिति, एवं सति जननेऽप्येवमेव स्यादिति सपिण्डानां दशाहः । “मातापित्रोश्च सूतकम्” इत्यनेन मातापित्रोर्दशाहः । “सूतकं मातुरेव स्यात्” इत्यनेन मातुरेव दशाहः । अत्र पक्षत्रितये व्यवस्था युक्तरूपा भवति । सपिण्डानां निर्गुणत्वेन दशाहः । वृत्तवत्त्वे पुनः सति मातापित्रोरेव दशाहः । पितुरपि वृत्तवत्त्वे मातुरेव दशाहो भवति । अस्मिँश्च पक्षे बैजिकादभिसम्बन्धादित्यनेन पितुस्त्र्यहनियम इति व्यवस्था न्याय्या । शावाशौचेऽपि दशाहादीनां व्यवस्थैव न्याय्येति । यत्पुनरुक्तम् “उपस्पृश्य पिता शुचिः” इति तत्प्रचेतसो वचनादग्निहोत्रार्थमेव न संव्यवहारार्थम् । तेन सूतकाशौचे पक्षत्रयश्रवणात्तत्र नैवं व्यवस्था युक्तेति । शावे पुनर्वृत्तापेक्षया प्रातिस्विकैव शुद्धिरिति । **नित्यानि निवर्त्तेरन्वैतानवर्जम्**—नित्यानि कर्माणि निवर्तन्ते वैतानिकानि वर्जयित्वा । वैतानिकानि अग्निहोत्रादीनि । **शालाग्नौ चैके**—एके आचार्याः शालाग्निकानां निवृत्तिमिच्छन्ति । एके नेति । यदा वा निवृत्तिस्तदाऽन्य एतानि कुर्युर्न स्वयमिति । **प्रेतस्पर्शिनो ग्रामं न प्रविशेयुरा नक्षत्रदर्शनात्**—प्रेतस्पर्शिनः सपिण्डाः ग्रामं न प्रविशन्ति नक्षत्रदर्शनादर्वाक् । **रात्रौ चेदादित्यस्य**—रात्रौ चेत्प्रेतः स्यात् आदित्यदर्शनादर्वाक् न प्रविशेयुः । **प्रवेशनादि समानमितरैः**—सपिण्डैः प्रवेशनादि तुल्यं भवति । **पक्षं द्वौ वाऽऽशौचम्**—प्रेतस्पार्शिनामिति केचित् । तत्पुनरनुपपन्नम् । नाहि प्रेतस्पर्शनमात्रेणेयन्तं कालमाशौचं युक्तम् । तस्माद्वर्णान्तर-

विषयमेवैतत् । पक्षं वैश्यस्य, द्वौ शूद्रस्य । वाशब्दाद् द्वादशाहानि क्षत्रियस्य । तथा च स्मृत्यन्तरम्—"शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन क्षत्रियः । वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति" । **आचार्ये चैवम्**—आचार्ये प्रेते एवमेवोदकदानादि कर्तव्यम् । **मातामहयोश्च**—चशब्दादेवमेवेति । द्विवचनं मातामह्यपेक्षायाम् । **स्त्रीणां चाप्रत्तानाम्**—एषैवेतिकर्तव्यता कार्या । **प्रत्तानामितरे कुर्वीरन् ताश्च तेषामिति**—इतरशब्देन येभ्यः प्रत्तास्ते उच्यन्ते, ता अपि च तेषां कुर्वन्ति । **प्रोषितश्चेत्प्रेयाच्छ्रवणप्रभृति कृतोदकाः कालशेषमासीरन्**—अथ यदि प्रोषितश्चेत्प्रेयात् श्रवणकालप्रभृति कृतोदकाः सन्तः आशौचकालशेषमासीरन् । **अतीतश्चेदेकरात्रं त्रिरात्रं वा**—आशौचकालातिक्रमणे सति एकरात्रम्, त्रिरात्रं वा । तथा च स्मृत्यन्तरम्—"अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् । संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्ध्यति"। एकरात्रं तु स्मृत्यन्तरात् । अन्याऽपि स्मृतिः—"संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्ध्यति" । **अथ कामोदकान्यृत्विक्श्वशुरसखिसम्बन्धिमातुलभागिनेयानाम्**—एषामिच्छयोदकदानम् । **प्रत्तानां च**—स्त्रीणामिच्छयेति । **एकादश्यामयुग्मान्ब्राह्मणान्भोजयित्वा मांसवत् । प्रेतायोद्दिश्य गामप्येके घ्नन्ति**—एकादशेऽहनि अयुग्मान् ब्राह्मणान् भोजयित्वेति श्राद्धमभिधीयते । तच्च मांसवत् कार्यम् । मांसं च प्रेतायोद्दिश्य । गामप्येके घ्नन्ति । एके आचार्याः प्रेतोद्देशेन गां मारयन्ति । प्रेतोद्देशवचनात् शाखापशुरयम् । तमालभ्य तन्मांसेन श्राद्धं कुर्वन्ति । तच्चोपरिष्टाद्वक्ष्यति । नद्यन्तरे नावं कारयेन्न वेति । **पिण्डकरणे प्रथमः पितॄणां प्रेतः स्यात्पुत्रवाँश्चेत्**—एतदेव पिण्डकरणमापतितम् । अत्र च पितॄणां प्रथमः प्रेतो भवति तत्प्रभृति तद्दानमित्यर्थः । स यदि पुत्रवान्भवति ततस्तत्प्रभृति दानमधिकृतविषयमिति । अधिकृतपुत्रेण च पुत्रवत्त्वम्, एतदधिकारश्चाग्निमत्त्वे सति, तेनाग्निमतः पुत्रस्य पार्वणमेव भवति । तच्च सपिण्डीकरणानन्तरम् । एकोद्दिष्टं त्वनधिकृतविषयमिति । सपिण्डीकरणे च पितृप्रभृतित्रिभ्यो दानम् । **निवर्तेत चतुर्थः**—चतुर्थस्य निवृत्तिः । "त्रिषु पिण्डः प्रवर्तते" इति श्रुतेः । **संवत्सरं पृथगेके**—एके आचार्याः संवत्सरं पृथगेकस्यैव पिण्डदानमिच्छन्ति । किं कारणम् । येन संवत्सरे सपिण्डीकरणमिति स्मर्यते । न चासपिण्डीकृतस्येतरैः सह दानं युज्यते । अन्वर्थसञ्ज्ञा ह्येषा सपिण्डीकरणमिति । सह पिण्डक्रिया सपिण्डीकरणम् । तेन संवत्सरं यावत्पितुः प्रेतस्य पृथक् पिण्डदानमिच्छन्त्येके । एवं च संवत्सरे सपिण्डीकरणस्मृतिरनुगृहीता भवति । एवं प्राप्त आह—**न्यायस्तु**—तुशब्दः पक्षव्यावृत्तौ, नैतदेवम् । संवत्सरं यावत्पृथग्दानमिति, येन संवत्सरस्मृत्यनुग्रहन्यायेनैतत्परिकल्प्यते तत्र विरोधः । न च श्रुतिविरोधे न्यायो युक्तः । **न चतुर्थः पिण्डो भवतीति हि**—श्रुतिविरोधः । पृथक्त्वे क्रियमाणे चतुर्णां पिण्डनिर्वपणाधिकारो भवति पृथक् प्रेतस्यामावास्यायां चाधिकृतस्य पार्वणमिति श्रुतिविरोधः । तेनाधिकृतपुत्रस्यैकोद्दिष्टं न भवत्येव । अनधिकृतस्य तु संवत्सरादूर्ध्वमेकोद्दिष्टम् । **अहरहरन्नमस्मै ब्राह्मणायोदकुम्भं च दद्यात्**—संवत्सरं द्विजे । एतदेव च तस्य भवति । न पिण्डनिर्वपणमिति । त्रिभ्यो दानप्रसङ्गात् । यच्च प्रेतस्य स्मर्यते—"मृतेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ॥ " एतच्च सपिण्डीकरणात्प्रागेको-

द्दिष्टम् । ऊर्ध्वं च पार्वणमिति । यथा च मनुः—“असपिण्डक्रियाकर्म द्विजातेः संस्थितस्य तु । अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु निर्वपेत्” इति । यावत्सपिण्डता न क्रियते तावदेव तत्कर्म । तथा चाह—“सहपिण्डक्रियायां तु कृतायामस्य धर्मतः । अनयैवावृता कार्यं पिण्डनिर्वपणं सुतैः” इति । सपिण्डक्रियोत्तरकालमनयैव सहपिण्डक्रियया कार्यम्, पिण्डनिर्वपणं सुतैः । केचित्त्वधस्तनश्लोकोपात्तमावृतमनयैवावृतेति अनेनानुवर्तयन्ति । तत्पुनरनुपपन्नार्थमुपरितनश्लोकारम्भसामर्थ्यात् । अनारब्धेऽपि हि तस्मिन्नेकोद्दिष्टं लभ्यत एव द्विजातेः संस्थितस्य “अदैवं भोजयेच्छ्राद्धम्” इत्यनेन । अधस्तनश्लोके च विशेषणार्थं वाक्यप्रसङ्गः । असपिण्डक्रियाकर्मेति । द्विजातेः संस्थितस्येत्येवमादिनैव पादत्रयेणार्थस्य सिद्धत्वात् । यत्पुनरुच्यते अत ऊर्ध्वं वर्षे वर्षे प्रेतायान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यादित्येकत्वविशिष्टस्याभिधानादेकत्वविशिष्टस्यैव दानमिति । तन्न, नह्यत्रैकत्वमुपादीयमानविशेषणं येन विवक्षितप्रेतोद्देशेन दानविधानम् । तस्मादविवक्षैकत्वस्य, यथा स्मृत्यन्तरेऽभिहितं तथैव देयमिति । “प्रेतायोद्दिश्य गामप्येके घ्नन्ति” इति शाखापश्वभिधानम् । तेन प्रसङ्गेन यावन्तोऽर्घ्याः पश्वादयस्तत्कर्मव्याचिख्यासया इदमभिधीयते ॥ १० ॥

जय०—अथोदककर्म वक्ष्यत इति सूत्रशेषः । उदककर्मग्रहणं चाशौचादियमनियमोपलक्षणार्थम् । अद्विवर्षे ऊनद्विवर्षे प्रेते मृते मातापित्रोरेकरात्रं त्रिरात्रं वा, एतत्तु गृह्यकारमतम् । स्मृत्यन्तरे तु सर्वसपिण्डविषयत्वेनाभिहितम् । तद्यथा—“ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः । अलंकृत्य शुचौ भूमावस्थिसञ्चयनादृते ॥ नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया । अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेव तु” इति । अस्थिसञ्चयनाभावोऽनुवाद एव । नहि खनने तत्सम्भवः । अपिच संचयनं वैतानिकस्यैव विहितम्, न त्वन्यस्य । उपदेशातिदेशयोरभावात् । एकरात्रादिविधानमपि अकृतकृतचूलत्वेन व्यवस्थापनीयम् “नृणामकृतचूलानामशुद्धिर्नैशिकी स्मृता । निर्वृत्तचूलकानां तु त्रिरात्राच्छुद्धिरिष्यते” इति वचनात् । तथा दन्तजननमप्यवधित्वेनाभिहितम्—“दन्तजातेऽनुजाते च कृतचूडे च संस्थिते । अशुद्धा बान्धवाः सर्वे सूतके च तथोच्यते ॥” इति वचनात् । एवं च सति प्राग्दन्तजननान्नैशिक्यशुद्धिः । ऊर्ध्वं तु त्रिरात्रमपि । अन्यदपि सद्यःशौचमाम्नातम् । “बाले प्रेते च सन्न्यस्ते सद्यःशौचं विधीयते” इति । एतत्प्राङ् नामकरणाद् द्रष्टव्यम् । यतः “नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया । जातदन्तस्य वा कार्या नाम्नि वाऽपि कृते सति ॥” नामकरणमवधित्वेनाभिहितम् । अतो नामकरणात्प्राक् सद्यःशौचम् । तत ऊर्ध्वं दन्तजननात्प्राङ् नैशिक्यशुद्धिः । तत ऊर्ध्वं प्रागुपनयनात्त्रिरात्रम् । अत्र च कृतचूडस्यापि प्रागुपनयनात्त्रिरात्रमेव । तर्हि किमर्थं द्विस्त्रिरात्रग्रहणं कृतचूडस्याद्विवार्षिकस्य चेति । तत्राह—यदूनद्विवार्षिकस्य त्रिरात्रग्रहणं तदग्निदाहोदकदानयोर्विकल्पेन । ऊर्ध्वं तु नियमेनेति । कुत एतत् । येनैवं वक्ष्यति “द्विवर्षप्रभृति प्रेतमा श्मशानात्सर्वेऽनुगच्छेयुः” इति । एतच्च पुरुषविषयम्, स्त्रीविषयस्याप्यवचनान्तरस्य सद्भावात् । तदाह—“स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बान्धवाः । यथोक्तेनैव कल्पेन शुध्यन्ति तु सनाभयः” इति । संस्कारश्चात्र वाग्दानम् । तथा—“अप्रौढायां तु कन्यायां सद्यःशौचं विधीयते” इति । अप्रौढा चात्राकृतचूडोच्यते । तथा—“अहस्त्वदत्तकन्यासु” इति । एतदुक्तं भवति । अकृतचूडासु स्त्रीषु सद्यःशौचम् । चूडाकरणादूर्ध्वं वाग्दानात्प्रागेकाहः । तत उपरि विवाहात्प्राक् त्रिरात्रमिति । एतच्च वयोऽवस्थाविशेषेण

सर्ववर्णसाधारणमवसेयम् । न चात्र वर्णविशेषोऽवसातुं शक्यत इति । "ऊनद्विवार्षिकस्य शरीरमदग्ध्वा निखनन्ति" इति **गृह्यकार**मतम् । **मनुना** तु विकल्पेन दाहोऽभिहितः । तेनात्रापि विकल्पोऽवसेय इति। अत्राशौचशब्देन वर्णाश्रमविहितकर्मानुष्ठानसङ्कोचावस्थोच्यते । तत्रापि विशेषो वृत्तस्वाध्यायापेक्षवृत्तिसङ्कोचनिमित्तो व्याख्यास्यते । अन्तःसूतके सूतकमध्ये चेत्सूतकान्तरमापद्येत तदा उत्थानात् आ पूर्वोत्थानपर्यन्तमशुद्धिः । पूर्वस्यैव सूतकाशौचस्योत्थानेनोत्तरस्यापि शुद्धिरित्यर्थः । आशौचं शावं सूतकवद् द्रष्टव्यम् । पूर्वशावशुद्ध्योत्तरशावस्यापि शुद्धिरित्यर्थः । तथाऽऽह **गौतमः**–"तच्चेदन्तः पुनरापतेत्तच्छेषेण शुद्ध्येरन्" इति । तच्छब्देनात्र समानजातीयं गृह्यते । सूतकोपनिपाते तु विजातीयेऽपि । तच्छब्दोपादानसामर्थ्यात् । **शङ्खश्च**–"अथ चेदन्तरा म्रियेत जायेत वा शिष्टैरेव दिनैः शुध्येताहःशेषे सति द्वाभ्यां प्रभाते तिसृभिः" इति। अपरे त्वन्यथा वर्णयन्ति । मरणस्योपक्रान्तत्वात् । अन्तःसूतके चेद्बालस्य मरणमापद्येत तदा आ सूतकस्योत्थानादाशौचं सूतकवद्भवति। मा भूद्बालत्वात्सद्यःशौचमिति ।अत्र ऊनद्विवर्षे उदककर्म उदकदानं न भवति। उदकदानप्रतिषेधाद्दाहोऽपि निरस्तः, सन्नियोगित्वात्। सन्नियोगो ह्यनयोः **स्मृत्यन्तरे**ऽभिहितः–' 'नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया" इति । सर्वं इति सर्वशब्दः सपिण्डविषयः । तेन ते सर्वेऽनुगच्छेयुः । श्मशानग्रहणाद्दाहमपि च कुर्युः । यमगाथां छन्दोविशेषम् । यमसूक्तं तु प्रसिद्धमेव । यदि उपेतः उपनीतः प्रेतः स्यात्तदा भूमिजोषणादि आ उदकान्तस्य गमनात्सर्वमाहिताग्निविधानेन तुल्यं कार्यम् । शालाग्निना आवसथ्येन एनं प्रेतं दहन्ति यद्यसौ प्रेत आहितः कृतावसथ्याधानः । इतरमकृतावसथ्यं ग्रामाग्निना लौकिकेनाग्निना तूष्णीं मन्त्रं विनैव दहन्ति । संयुक्तः सम्बन्धादिना । मिथुनस्यैकदेशलक्षणया मिथुनशब्दवाच्यायाः पत्न्याः भ्राता शालक इत्यर्थः, तं वा उदकम् उदकदानाज्ञां प्रार्थयेरन् । **उदकं करिष्यामहे** इति मन्त्रेण । पृष्टप्रतिवचनं कुरुध्वं मा चैवं पुनरिति । इतरः शतवर्षप्रभृतिकः तस्मिन्प्रेते कुरुध्वमित्येव प्रतिवचनम् । ज्ञातयः सपिण्डा आ सप्तमात्पुरुषात् समानोदकाश्चा दशमात्ते सर्व एव अपोऽभ्यवयन्ति जलं प्रविशन्ति । समानग्रामे एकत्र वासे यावत्सम्बन्धं स्मर्यते अमुष्मिन् वयं सम्बध्यामह इति तावन्तोऽपोऽभ्यवेयुः । **अप नः शोशुचदघम्**इत्यघापनोदनमन्त्रः । **असावेतत्त** इति मन्त्रेण जलाञ्जलिदानम् । असौस्थाने प्रेतनामादेशः । उदकादुत्तीर्णान् सतः शाद्वलं हरिततृणम्, तद्वति प्रदेशे उपविष्टानपरे लोकयात्रिका अपवदेयुः प्रेतगुणानुख्यापनेन तच्छोकमपाकुर्युः । अनवेक्षमाणाः पश्चादनवलोकयन्तः । रीतीभूताः पङ्क्तिव्यवस्थाः कनिष्ठमग्रतः कृत्वा ग्राममागच्छन्ति । निवेशनं गृहं तस्य द्वारि पिचुमन्दस्य निम्बस्य पत्राणि विदश्य दन्तैः खण्डयित्वाऽऽचम्योदकादीन्यालभ्याश्मानमाक्रम्य गृहं प्रविशन्ति। त्रिरात्रं ब्रह्मचारिणो भवन्ति । अधः आस्तृतभूशायिनश्च । न च किञ्चित्कर्म स्वयं कुर्वन्ति,न चान्यान्प्रकुर्व्रन्ति कारयन्तीत्यर्थः । दिवाग्रहणं त्रिरात्रप्रतिषेधार्थम् । पिण्डदानं चावनेजनदानप्रत्यवनेजनेषु नामग्राहं नाम गृहीत्वेत्यर्थः । भोजनं च पिण्डदानसमनन्तरम् । मृन्मये पात्रे तामेकां रात्रिं क्षीरोदके व्यवहिते निधाय तत्पात्रमाकाशे स्थापयेयुः "**प्रेतात्र स्नाहि**" इत्येतावता मन्त्रेण । त्रिरात्रमित्यादावेकरात्रमपीच्छन्ति एके–"दशाहं शावमाशौचं सपिण्डेषु विधीयते । अर्वाक् सञ्चयनादस्थ्नां त्र्यहमेकाहमेव च ॥"इति **स्मृतेः** । एतच्चोपनयनप्रभृति द्रष्टव्यम् । वयोऽवस्थाविशेषेण हि पूर्वमभिहितम् । व्यवस्थया च विकल्पोऽयं वृत्तस्वाध्यायापेक्षः । वृत्तनिमित्तानि चाध्ययनतदर्थज्ञानानुष्ठानानि । तत्रैकगुणसंयोगेऽर्वाक् सञ्चयनाद्दशाहमाशौचम् । गुणद्वययोगे द्व्यहम् । गुणत्रययोगे एकाहमिति । अपरे त्वेकीयशब्दात्सद्यःशौचमिच्छन्ति । यदा गुणत्रययोगो भवति वृत्तिसङ्कोचश्च त्र्याहिक ऐकाहिको वा भवति तदा सद्यःशौचमिति **स्मृत्यन्तरम्**। एते चाशौचविकल्पाः प्रातिस्विकाः । न तु येषां यावदाशौचं ते तावत्स्वाध्यायं वेदं न पठेयुः, न च पाठयेयुः ।

सूतकाशौचवत्सर्वेषां सहेति । तत्र हि "जननेऽप्येवमेव स्यान्मातापित्रोस्तु सूतकम् । सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ॥" इत्यनेन दशाहस्यातिदेशो न चतुरहत्र्यहैकाहानाम् । कुत एतत् । सञ्चयनकल्पेन व्यवधानात् । अपिच सर्वकल्पातिदेशे मातुरप्येकाहेन शुद्धिः प्राप्नोति । तच्च नेष्यते । येन "बैजिकादभिसम्बन्धादनुरुन्ध्यादघं त्र्यहम्" इति पितुस्त्र्यहेण शुद्धिर्मातुश्चैकाहेनेति विरोधः । कथम् । "रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते" इति । तस्मादपि दशाहस्यैवातिदेशः । शावं वाऽनपेक्ष्यैवमेव स्यादिति व्याख्येयम् । एवं च सति जननेऽप्येवमेव स्यादिति सपिण्डानां दशाहम् । मातापित्रोश्च सूतकमिति तयोश्च दशाहम् । सूतकं मातुरेव स्यादिति मातुश्च दशाहम् । अत्र पक्षत्रयेऽपि व्यवस्था युक्तरूपा भवति । तामाह--सपिण्डानां निर्गुणत्वे दशाहम् । वृत्तवत्त्वेऽपि पित्रोश्च दशाहम् । पितुरप्यतिवृत्तवत्त्वे मातुरेव दशाहं भवतीति । अस्मिँश्च पक्षे "बैजिकादभिसम्बन्धादनुरुन्ध्यादघं त्र्यहम्" इति पितुस्त्र्यहनियम इति व्यवस्था न्याय्या । शावाशौचेऽपि दशाहादीनां व्यवस्था च न्याय्येति । यत्पुनरुक्तम् "उपस्पृश्य पिता शुचिः" इति तदग्निहोत्रार्थं न तु व्यवहारार्थम् । तेन सूतकाशौचे पक्षत्रयस्याश्रवणात्तत्र नैवं व्यवस्था युक्तेति । शावे पुनर्वृत्ताद्यपेक्षया प्रातिस्विकैव शुद्धिरिति । नित्यानि स्मार्तानि कर्माणि निवर्त्तेरन् । वैतानान्यग्निहोत्रादीनि वर्जयित्वा । एके आचार्याः शालाग्नौ कर्मनिवृत्तिमिच्छन्ति, एके नेति विकल्पः । यदा चानिवृत्तिस्तदाऽन्य एतानि कुर्युर्न स्वयम् । प्रेतस्पर्शिनः सपिण्डा ग्रामं न प्रविशेयुर्नक्षत्रदर्शनादर्वाक् दिवामरणे । रात्रौ चेत्प्रेतः स्यात्तदाऽऽदित्यस्य दर्शनादर्वाक् न प्रविशेयुः । इतरैरसपिण्डैस्तुल्यं प्रवेशनादि भवति । पक्षं, द्वौ पक्षौ वेति प्रेतस्पर्शिनामाशौचमिति केचित् । तन्न, न हि प्रेतस्पर्शनमात्रेणैवेयन्तं कालमाशौचस्य युक्तत्वम् । तस्माद्वर्णान्तरविषयमेवैतत् । पक्षं वैश्यस्य । द्वौ पक्षौ शूद्रस्य । वाशब्दात् द्वादशाहानि क्षत्त्रियस्य । "शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः । वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥" इति वचनात् । आचार्ये च प्रेते एवमेवोदकदानादि कर्म भवति । मातामहीमातामहयोश्च चकारादेवमेव । स्त्रीणां चादत्तानामेवमेवेतिकर्तव्यता भवति । प्रत्तानामितरे येभ्यो दत्तास्ते कुर्वीरन् । ता अपि तेषां कुर्वीरन् । अथ यदि प्रोषितः प्रेयान्म्रियेत तदा तच्छ्रवणकालप्रभृति कृतोदकाः सन्त आशौचकालशेषमाशौचविधानेनासीरन् । आशौचकालोऽतीतश्चेदेकरात्रं, त्रिरात्रम् । वाशब्दात्सद्यःशौचमपि । "अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् । संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्ध्यति ॥" इति वचनात् । एकरात्रं तु "अयने समतिक्रान्ते त्वेकाहाच्छुद्धिरिष्यते" इति **स्मृत्यन्तरात्** । ऋत्विगादीनामिच्छयोदकदानम् । प्रत्तानां च स्त्रीणामिच्छयैव । एकादश्यामेकादशेऽहनि अयुग्मान् त्रिप्रभृतीन् ब्राह्मणान्भोजयेदिति श्राद्धोपलक्षणम् । तच्च श्राद्धं मांसवत्कार्यम् । मांसं च प्रेतोद्देशेनैके आचार्या गां घ्नन्ति आलभन्ते प्रेतोद्देशवचनात्तदीयम् । शाखापशुरयम् । तमालभ्य तन्मांसेन श्राद्धं कुर्वीत । तच्चोपरिष्टाद्वक्ष्यति नद्यन्तरे नावं कारयेन्न वेति । एतदेव पिण्डकरणमापतितम् । तत्र च पितॄणां प्रथमः प्रेतो भवति तत्प्रभृति दानम् । स यदि पुत्रवान्भवति तदा अधिकृतविषयमेतत् । अधिकृतपुत्रेण पुत्रवत्त्वम् । एतदधिकारश्चाग्निमत्त्वे सति भवति । तेनाग्निमतः पुत्रस्य पार्वणमेव । तच्च सपिण्डीकरणानन्तरम् । एकोद्दिष्टं त्वनधिकृतविषयमिति । सपिण्डीकरणे च कृते पितृप्रभृति त्रिभ्यो दानम्, चतुर्थस्य तु निवृत्तिः । "त्रिषु पिण्डः प्रवर्तते" इति **स्मृतेः** । संवत्सरमेके आचार्याः पृथगेकस्यैव पिण्डदानमिच्छन्ति । कुत एतत् । यतः संवत्सरे सपिण्डीकरणं स्मर्यते, न चासपिण्डीकृतस्येतरैः सह पिण्डदानं युज्यत इति । अन्वर्थसञ्ज्ञा ह्येषा यत्सपिण्डीकरणमिति । सहपिण्डक्रिया सपिण्डीकरणम् । तेन संवत्सरं यावत्पितुः प्रेतस्य पृथक् पिण्डदानमिच्छन्त्येके । एवं च संवत्सरसपिण्डीकरणस्मृतिरनुगृहीता भवति । एवं प्राप्त आह-**न्यायस्तु**-[illegible]तुरब्दः पक्षस्यावृत्तौ । नैतदेवं संवत्सरं यावत्पृथग् दानमिति । येन

संवत्सरस्मृत्यनुग्रहन्यायेनैतत्परिकल्प्यते तच्च विरुद्धम्। न च श्रुतिविरोधे न्यायो युक्तः । कोऽसौ विरोधः । न चतुर्थः पिण्डो भवतीति श्रुतेः । पृथक् क्रियमाणे चतुर्णां पिण्डनिर्वपणाधिकारो भवति । पृथक् प्रेतस्य । अमावास्यायां चाधिकृतस्य पार्वणमिति श्रुतिविरोधः । तेनाधिकृतस्य पुत्रस्यैकोद्दिष्टं न भवत्येव । अनधिकृतस्य तु संवत्सरादूर्ध्वमेकोद्दिष्टमिति । अस्मै प्रेतायार्थे ब्राह्मणायान्नं प्रत्यहं दद्यात्संवत्सरम् । कुम्भं च दद्यात् । एके आचार्याः पिण्डनिर्वपणमपीच्छन्ति । एतच्चानधिकृतविषयम् । अधिकृतस्य तु पार्वणमेव भवति नैकः पिण्ड इति। यच्च संवत्सरे सपिण्डीकरणस्मरणं तदूर्ध्वं संवत्सरान्नास्त्येवेति परिज्ञापयितुं प्रागपि भवति। सपिण्डीकरणं प्रकृत्य **सूत्रकार** आह "यदा वा वृद्धिरापद्यते" इति। वृद्धौ ह्याभ्युदयिकं कार्यम् । तच्चासपिण्डीकृतस्य न भवति । अतः संवत्सरात्प्रागपि भवत्यनधिकृतस्य। तथा च **स्मृत्यन्तरम्**—"अर्वाक् संवत्सराद्यस्य सपिण्डीकरणं भवेत्। तस्याप्यन्नं सोदकुम्भं दद्यात्संवत्सरं द्विजः" इति। एतदेव च तस्य भवति न पिंडनिर्वपणमिति । त्रिभ्यो दानप्रसङ्गात् । अधिकृतपुत्रस्य तु द्वादशाह एवेत्युक्तमेव । यच्च प्रेतस्य स्मर्यते—"मृतेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि" इति । तदेतत्सपिण्डीकरणात्प्रागेकोद्दिष्टम् । ऊर्ध्वं तु पार्वणमेव । तथा च **मनुः**—"असपिण्डक्रिया कर्म द्विजातेः संस्थितस्य च। अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु निर्वपेत्" इति । यावत्सपिण्डता न क्रियते तावदेव तत्कर्तव्यमिति । तथा चाह—"सहपिण्डक्रियायां तु कृतायामन्यधर्मतः । अनयैवावृता कार्यं पिण्डनिर्वपणं सुतैः ॥" इति । सपिण्डक्रियोत्तरकलमनयैव पिण्डक्रियया पिण्डनिर्वपणं सुतैः कार्यम् । केचित्तु अधस्तनश्लोकोपात्तमावृतमनयैवावृतेत्यनेनानुवर्तयन्ति । तत्पुनरनुपपन्नार्थम् । उपरितनश्लोकारम्भसामर्थ्यात् । अनारब्धेऽपि तस्मिन्नेकोद्दिष्टं लभ्यत एव, " द्विजातेः संस्थितस्य च। अदैवं भोजयेच्छ्राद्धम् " इत्यनेन । अधस्तनश्लोके च विशेषणार्थे वाक्यप्रसङ्गः । सहपिण्डक्रियाकर्मेति द्विजातेः संस्थितस्येत्येवमादिनैव पादत्रयेणार्थस्य सिद्धत्वात् । यत्पुनरुच्यते अत ऊर्ध्वं वर्षे वर्षे प्रेतायान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यादिति, तदेकत्वविशिष्टस्याभिधानादेकत्वविशिष्टस्य भवति । तन्न, नह्यत्रैकत्वमुपादीयमानं विशेषणम् । येन प्रेतोद्देशेन दानविधानमेव विवक्ष्यते । तस्मादविवक्षैकत्वस्य । यथा स्मृत्यन्तरेऽभिहितं तथैव देयमिति ॥ १० ॥ ॥ * ॥

हरि०—**अथोदककर्म**—अथ पुरुषसंस्कारकर्म, क्रमप्राप्तमुदककर्म उदकेन जलेन कर्म क्रिया अञ्जलिदानमित्यर्थः । वक्ष्यत इति सूत्रशेषः । उपलक्षणमेतत् । येनाशौचादियमनियमा अपि वक्ष्यन्ते । **अद्विवर्षे प्रेते मातापित्रोराशौचꣳ शौचमेवेतरेषामेकरात्रं त्रिरात्रं वा**—द्वे वर्षे वयो यस्य स द्विवर्षः, न द्विवर्षः अद्विवर्षस्तस्मिन् प्रेते प्रकर्षेण इतो गतः प्रेतो मृतः तस्मिन्निमित्ते, माता च पिता च मातापितरौ तयोर्मातापित्रोराशौचमशुद्धिः वर्णाश्रमविहितकर्मानुष्ठानसंकोचावस्थेति यावत् । इतरेषां मातापितृभ्यामन्येषां शौचमेव नाशुद्धिः । पित्रोः कियन्तं कालमाशौचम् एकरात्रम् एकमहोरात्रम् । अथवा त्रिरात्रम् । अयं विकल्पः प्रेतस्याकृतकृतचूडत्वेन व्यवस्थितः । इतरेषां सद्यःशौचमिति **गृह्यकारस्यैव** मतम् । **स्मृत्यन्तरे** तु तेषामप्याशौचस्य विहितत्वात् "आ दन्तजननात्सद्यः" इत्यादिना। यच्च पुंस उपनयनात्प्राक् स्त्रियाश्च विवाहात्प्राक् वयोऽवस्थाविशेषेण सद्यएकरात्रत्रिरात्रादिकमाशौचमुक्तम्, तत्सर्ववर्णसाधारणम् । विशेषावगमस्याशक्यत्वात् । **शरीरमदग्ध्वा निखनन्ति**—ऊनद्विवर्षस्य प्रेतस्य शरीरं कुणपमदग्ध्वा अग्निदाहमकृत्वा निखनन्ति गर्ते प्रक्षिपन्ति । **अन्तःसूतके चेदोत्थानादाशौचꣳ सूतकवत्**—चेद्यदि अन्तःसूतके सूतकस्य जननिमित्ताशौचस्य अन्तर्मध्ये ओत्थानात् उत्थानं सूतकान्तं यावत् आशौचं जननाशौचान्तरमापतति तदा सूतकवत् पूर्वसूतकशेषेणैवोत्तरस्य शुद्धिः ।

यद्वा–अन्तर्मध्ये सूतके सूतकान्तरे जाते ओत्थानात् शुद्धिः । आशौचं मरणाशौचं सूतकवत् । मरणाशौचमध्ये मरणाशौचे जाते पूर्वशेषेणोत्तरस्य शुद्धिरित्यर्थः । एतच्च सपिण्डविषयम् । मातापित्रोस्तु विशेषः । मातरि पूर्वमृतायां यद्याशौचमध्ये पिता म्रियेत तदा पितृमरणनिमित्ताशौचान्ते शुद्धिः । यदा पुनः पितरि मृते माता म्रियेत तदा पितृमरणनिमित्ताशौचान्तात्पक्षिण्यन्ते द्वादशप्रहरान्ते शुद्धिः । किंच यदि सूतके रात्रिमात्रावशिष्टे सूतकान्तरमापद्येत शावे वा रात्रिमात्रावशिष्टे शावान्तरमापद्येत तदा द्व्यहमधिकं वर्द्धते । यदि पुनर्याममात्रावशिष्टे सूतके शावे वा सूतकं शावं वा सजातीयमापतति तदा त्र्यहमधिकं वर्द्धते । तथा च **स्मृतिः**–"मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता । न पूर्वशेषाच्छुद्धिः स्यान्मातुः कुर्याच्च पक्षिणीम् ॥ रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहात्" इति । अन्ये तु इदं सूत्रमन्यथा व्याचक्षते । अन्तःसूतके चेद्यदि बालस्य मरणमापद्यते तदा आ उत्थानादाशौचमशुद्धिः सूतकवद्भवति न त्वाशौचनिवृत्तिः । बालमरणनिमित्ताशौचस्याल्पकालिकत्वेन बहुकालिकजनननिमित्ताशौचशोधनासमर्थत्वात्, यतः समानजातीयस्य समानकालिकस्यैव पूर्वोत्पन्नस्य अन्तराऽऽपतितस्य वा शोधकत्वम् । **नात्रोदककर्म**–अत्र ऊनद्विवार्षिके प्रेते उदककर्म उदकाञ्जलिदानं न भवति । **द्विवर्षप्रभृति प्रेतमा श्मशानात्सर्वेऽनुगच्छेयुर्यमगाथां गायन्तो यमसूक्तं च जपन्त इत्येके**–द्विवर्षः द्विवर्षवयस्कः तत्प्रभृतिस्तदादिर्यः प्रेतः तम् आ श्मशानात् श्मशानावधि सर्वे सपिण्डा अनुगच्छेयुः पश्चाद्व्रजेयुः। श्मशानानुगमनविधानात् दाह उपलक्ष्यते । श्मशानशब्देन हि प्रेतदाहभूमिरुच्यते । तस्माद्दाहमपि कुर्युः, दाहसन्नियोगशिष्टमुदकं च दद्युः । एके आचार्याः यमगाथां यमदेवत्यायामृचि गीतं साम गायन्तः पठन्तः, तथा यमसूक्तं यमदेवत्यानामृचां समुदायं सूक्तशब्दवाच्यं जपन्तोऽनुगच्छेयुरित्याहुः । **यद्युपेतो भूमिजोषणादिसमानमाहिताग्नेरोदकान्तस्य गमनात्**–यदि उपेतः उपनीतः प्रेतः स्यात् गृह्योक्तसंस्कारेषु तस्याधिकारात् वैतानिकस्य च मन्त्रब्राह्मणकल्पसूत्रेषु पृथक् संस्काराम्नानात् तदा भूमिजोषणादिकर्म समं तुल्यं, केन आहिताग्नेः कर्मणा, यथा आहिताग्नेः औपासनिकस्य भवति, किम्पर्यन्तम् आ उदकान्तस्य उदकसमीपस्य गमनात्, एतदुक्तं भवतिःयद्युपनीतः प्रेतो भवति तदाऽस्याहिताग्नेर्भूमिजोषणादि उदकाञ्जलिदानपर्यन्तं कर्म यथा भवति तथैव कुर्यादिति । **शालाग्निना दहन्त्येनमाहितश्चेत्**–चेद्यद्यसौ प्रेत आहितः कृतावसथ्याधानः स्यात् तदैनं प्रेतं शालाग्निना औपासनेन दहन्ति पुत्रादयः । **तूष्णीं ग्रामाग्निनेतरम्**–तूष्णीं मन्त्रवर्जं ग्रामाग्निना लौकिकेन पावकेन इतरमकृतावसथ्याधानं दहन्तीत्यनुषङ्गः । **संयुक्तं मैथुनं वोदकं याचेरन्नुदकं करिष्यामह इति**–संयुक्तं केनचित् यौनेन सम्बन्धेन सम्बद्धम् । मैथुनः मिथुनस्यैकदेशलक्षणया मैथुनशब्दवाच्याया भार्यायाः भ्राता श्याल इत्यर्थः, तं वोदकं जलं याचेरन् प्रार्थयेरन् **उदकं करिष्यामह** इत्यनेन मन्त्रेण । **कुरुध्वं मा चैवं पुनरित्यशतवर्षे प्रेते**–एवं पृष्टः संयुक्तः श्यालो वा प्रतिब्रूयात् । किम्, कुरुध्वं मा चैत्रं पुनरिति । क अशतवर्षे प्रेते शतवर्षेभ्योऽर्वाक् मृते सति । **कुरुध्वमित्येवेतरस्मिन्**–इतरः शतवर्षप्रभृतिः तस्मिन्मृते कुरुध्वमित्येव एतावदेव प्रतिब्रूयात्, न मा चैवं पुनरिति । **सर्वे ज्ञातयोऽपोऽभ्यवयन्त्या सप्तमात्पुरुषाद्दशमाद्वा**–ज्ञातयः सपिण्डाः समानोदकाश्च सर्व एव अपोऽभ्यवयन्ति स्नानार्थं नद्यादेर्जलं प्रविशन्ति, किं यावत् आ सप्तमात्पुरुषात् सप्तमं पुरुषमभिव्याप्य यावन्तः सपिण्डाः, दशमाद्वा दशमं पुरुषमभिव्याप्य वा यावन्तः समानोदकाश्च तावन्त इत्यर्थः । **समानग्रामवासे यावत्सम्बन्धमनुस्मरेयुः**—समाने एकस्मिन् ग्रामे वासः अवस्थानं समानग्रामवासः तस्मिन् सति यावत्सम्बन्धं यदवधि सम्बन्धः सापिण्ड्यं समानोदकत्वं वा सगोत्रत्वं वा अनुस्मरेयुः अस्मिन्पुरुषे वयं सम्बन्ध्यामहे इति जानीयुः तावन्तः अपोऽभ्यवयन्ति इति सम्बन्धः । **एकवस्त्राः प्राचीनावीतिनः सव्यानामिकयाऽपनोद्याप नः शोशुचदघमिति दक्षिणामुखा निमज्जन्ति**–कथमित्यपेक्षायामाह–

एकं परिधानीयमेव वस्त्रं येषां ते एकवस्त्राः । तथा प्राचीनावीतिनः प्राचीनावीतं विद्यते येषां ते प्राचीनावीतिनः कृतापसव्या इत्यर्थः । तथाभूताः सन्तः सव्यस्य वामस्य पाणेरनामिकया उपकानिष्ठिकया जलमपनोद्य **अप नः शोशुचदघमि**त्येतावता मन्त्रेणापसार्य दाक्षिणामुखाः याम्यदिगभिमुखा निमज्जन्ति युगपत्सकृत्स्नान्ति । **प्रेतायोदकꣳ सकृत्प्रसिञ्चन्त्यञ्जलिनाऽसावेतत्त उदकमिति**—प्रेताय मृताय उदकं जलं सकृदेकवारम् अञ्जलिना प्रसिञ्चन्ति शुद्धायां भूमौ प्रक्षिपन्ति। कथम् असौ अमुकप्रेत एतत्ते उदकमित्यनेन मन्त्रप्रयोगेण । **उत्तीर्णाञ्छुचौ देशे शाद्वलवत्युपविष्टाँस्तत्रैतानपवदेयुः**——उत्तीर्णान् जलाद्बहिर्निर्गतान् शुचौ देशे मूत्रपुरीषभस्मतुषाङ्गाराख्याद्यशुचिद्रव्यरहिते देशे भूभागे, पुनः कीदृशे शाद्वलवति शाद्वलं हरिततृणम् अस्ति यस्मिन्निति शाद्वलवान् तस्मिन् शाद्वलवति उपविष्टानासीनान् तत्र तदा अन्ये लोकयात्रिकाः सुहृदः एतान् प्रेतस्य पुत्रादीन् अपवदेयुः प्रेतगुणानुकथनेनेतिहासपुराणादिविचित्रकथाभिः संसारासारताख्यापनेन तान् शोकरहितान् कुर्युः । **अनवेक्षमाणा ग्राममायान्ति रीतीभूताः कनिष्ठपूर्वाः**—अनवेक्षमाणाः पश्चादनवलोकयन्तः, रीतीभूताः श्रेणीभूता पङ्क्तीभूताः, कनिष्ठपूर्वाः कनिष्ठो लघीयान् पूर्वः अग्रिमो येषां ते स्वस्वकनिष्ठानुसारिण इत्यर्थः । ग्राममायान्ति आगच्छन्ति । **निवेशनद्वारे पिचुमन्दपत्राणि विदश्याचम्योदकमग्निं गोमयं गौरसर्षपाँस्तैलमालभ्याश्मानमाक्रम्य प्रविशन्ति**-निवेशनस्य प्रेतपतिकस्य गृहस्य द्वारे, पिचुमन्दस्य निम्बस्य पत्राणि छदान् विदश्य दन्तैरवखण्डय, आचम्य स्मार्त्ताचमनं विधाय उदकं जलम्, अग्निम्, द्वारिघृतम्, तथा गोमयमार्द्रम्, सर्षपान् गौरान्, तैलं तिलसम्भवम् एतानि प्रत्येकमालभ्य स्पृष्ट्वा अश्मानं प्रस्तरमाक्रम्य पादेनालभ्य प्रविशन्ति गृहम्। **त्रिरात्रं ब्रह्मचारिणोऽधःशायिनो न किञ्चन कर्म कुर्युर्न प्रकुर्वीरन्**—त्रीण्यहोरात्राणि यावद्ब्रह्मचारिणः अकृतस्त्रीप्रसङ्गाः, अधः खट्वाव्यतिरेकेण शेरत इत्येवंशीला अधःशायिनः, किञ्चन किमपि कर्म गृहव्यापारादि लौकिकं स्वयं न कुर्युः, न प्रकुर्वीरन्, अन्यैरपि न कारयेयुः । अन्तर्भूतोऽत्र णिच् ज्ञेयः । **क्रीत्वा लब्ध्वा वा दिवैवान्नमश्नीयुरमाꣳसं प्रेताय पिण्डं दत्त्वाऽवनेजनदानप्रत्यवनेजनेषु नामग्राहम्**—क्रीत्वा मूल्येनान्नं गृहीत्वा लब्ध्वा वा अयाचितमन्यतः प्राप्य, दिवैव दिवसे एव न रात्रौ, अश्नीयुः भुञ्जीरन् । किम्भूतम् अमांसं मांसवर्जितम्, किं कृत्वा प्रेताय पिण्डम् अवयवपूरकं दत्त्वा, कथं नामग्राहं प्रेतस्य नाम गृहीत्वा, कुत्र अवनेजनदानप्रत्यवनेजननेषु अवनेजनं च दानं च प्रत्यवनेजनं च अवनेजनदानप्रत्यवनेजनानि तेषु त्रिरात्रमयं धर्मः । **मृन्मये ताꣳ रात्रीं क्षीरोदके विहायसि निदध्युः प्रेतात्र स्नाहीति**—मृन्मये शरावादौ पात्रे कृत्वा तां यस्मिन्दिने प्रेतोऽभूत् तत्सम्बन्धिनीं रात्रीं क्षीरं च उदकं च क्षीरोदके दुग्धपानीये पात्रैकवचनसामर्थ्यादेकीकृते विहायसि आकाशे निदध्युः स्थापयेयुः । कथं प्रेतात्र स्नाहीत्यनेन मन्त्रेण । **विज्ञानेश्वराचार्यास्तु** द्रव्यद्वयनिधानसामर्थ्यात् द्वयोः पात्रयोर्भेदेन निधानं मन्यन्ते, मन्त्रं चोहाति प्रेतात्र स्नाहि पिब चेदमिति । **त्रिरात्रꣳ शावमाशौचं दशरात्रमित्येके**—एवं प्रेतस्य मरणदिने पुत्रादीनां कृत्यमभिधायाशौचकालनिणयार्थमाह—त्रिरात्रं त्रीण्यहोरात्राणि, “कालाध्वनोरत्यन्तसंयोगे” इत्युपपदविभक्तिर्द्वितीया, तेन सन्ततमाशौचम् अशुचित्वम् । एके आचार्या मन्वादय उपनयनप्रभृति दशाहं दशाहोरात्राणि मन्यन्ते । अत्र प्रकरणे अहःशब्दो रात्रिशब्दश्च अहोरात्रोपलक्षणपरः । एके त्रिरात्रम, एके दशरात्रं चेति व्यवस्थितं वृत्तस्वाध्यायापेक्षया । यथाऽऽह—“एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः।त्र्यहात्केवलवेदस्तु निर्गुणो दशभिर्दिनैः” इति । एतदपि वृत्तिसङ्कोचे व्यवस्थापकम् । तद्यथा—यदा त्र्यहैकोऽश्वस्तनिको वा स्वाध्यायाग्निसम्पन्नो भवति तदा तस्य वृत्तिसम्पादनाय सद्यःशौचं भवति । यदा तु कुशूलकुम्भीधान्यः केवलस्वाध्याय-

सम्पन्नश्च तदाऽस्य त्रिरात्रम् । यदा पुनर्दशरात्रकुटुम्बवृत्तिपर्याप्तातिरिक्तधान्यो भवति वृत्तस्वाध्यायवाँश्च तदाऽस्य दशरात्रम्, वृत्तस्वाध्यायरहितस्य वृत्तिहीनस्यापि सर्वदा दशरात्रमेव, अयं च वृत्तिसङ्कोचात् । वृत्तस्वाध्यायापेक्षया य आशौचकालसङ्कोचः स वृत्तिसम्पादनविषय एव, न पुनः कर्मान्तराधिकारसम्पादनपरः, तेन यस्याशौचिनो या आपद्भवति तदपाकरणार्थम् । वृत्तस्वाध्यायसम्पन्नस्य च आशौचसङ्कोचो नेतरेषाम्, जननाशौचेऽप्येवमेव । **न स्वाध्यायमधीयीरन्**–स्वाध्यायं वेदं नाधीयीरन् न पठेयुः, न चाध्यापयेयुः येषां यावदाशौचम् । **नित्यानि निवर्तेरन् वैतानवर्जम्**–नित्यान्यावश्यकानि सन्ध्यावन्दनादीनि निवर्तेरन् अनधिकारान्न प्रवर्तन्ते । कथम्, वैतानवर्जं वितानो गार्हपत्याहवनीयदाक्षिणाग्नीनां विस्तारस्तत्र साध्यम् अग्निहोत्रादि कर्म तद्वैतानम्, तद्वर्जयित्वाऽन्यन्निवर्तते इत्यर्थः। **शालाग्नौ चैकेऽन्य एतानि कुर्युः**–शालाग्निरावसथ्याग्निः तत्र शालाग्नौ साध्यानि सायम्प्रातर्होमस्थालीपाकादीनि तानि वर्जयित्वा नित्यानि निवर्तेरन्नित्येके आचार्याः मन्यन्ते, तस्मिन्पक्षे न स्वयं कुर्युः किन्त्वन्येन कारयेयुः। **गृह्यकार**पक्षे "न कुर्युर्न च कारयेयुः" यथाऽऽह **कात्यायनः**–" सूतके मृतके चैव स्मार्तं कर्म निवर्तते । पिण्डयज्ञं चरुं होममसगोत्रेण कारयेत् ॥ वैतानिकं स्वयं कुर्यात् तत्त्यागो न प्रशस्यते "। तथा–" स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके । श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात् " इति स्मरणात् । राहुदर्शने तु " राहोरन्यत्र सूतके" इति वचनात् यावद्राहुदर्शनं तावद्राहुदर्शननिमित्तकं स्नानतर्पणदेवतार्चनजपहोमदानादि स्मार्त्तं कर्म कुर्यात् । **प्रेतस्पर्शिनो ग्रामं न प्रविशेयुरा नक्षत्रदर्शनात्**–प्रेतस्पर्शो विद्यते येषां ते प्रेतस्पर्शिनः सपिण्डा ग्रामं न प्रविशेयुर्न गच्छेयुः, किं यावत् आ नक्षत्रदर्शनात् नक्षत्राणां दर्शनं नक्षत्रदर्शनं तस्मात् आ अवधेः । **रात्रौ चेदादित्यस्य**–चेद्यदि रात्रौ निशि प्रेतस्पर्शः स्यात्तदा आदित्यस्य सूर्यस्य दर्शनात्प्राक् न प्रविशेयुरित्यनुषङ्गः । **प्रवेशनादि समानमितरैः**–प्रवेशनमादौ यस्य निम्बपत्रादिदंशनस्य तत्प्रवेशनादि कर्म इतरैरसपिण्डैः समानं तुल्यं कार्यम् । अयमसपिण्डानां नियमः । यतोऽसपिण्डानामेव "प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि । इच्छतां तत्क्षणाच्छुद्धिः परेषां स्नानसंयमात् ॥ " इति **याज्ञवल्क्यो**क्तोरिच्छतां विकल्पः । संयमः प्राणायामः । एवं ब्राह्मणस्याशौचमभिधायेदानीमितरवर्णानामाशौचकालनिर्णयमाह– **पक्षं द्वौ वाऽऽशौचम्**–पक्षं पञ्चदशाहोरात्राणि वैश्यस्याशौचं भवति, द्वौ पक्षौ त्रिंशदहोरात्राणि शूद्रस्य, वाशब्दात् द्वादशाहोरात्राणि क्षत्रियस्याशौचम्। तथा च **स्मृत्यन्तरम्**-"शुध्येद् विप्रो दशाहेन द्वादशाहेन भूमिपः । वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति " इति । **आचार्ये चैवं मातामहयोश्च**–आचार्ये उपनयनपूर्वकं वेदाध्यापके चैवमेवोदकदानादि कर्तव्यम्, मातामही च मातामहश्च मातामहौ तयोः, द्विवचनं मातामह्यपेक्षया, चकारादेवमेवोदकदानादि सर्वं कर्तव्यम् । **स्त्रीणां चाप्रत्तानाम्**–अप्रत्तानामपरिणीतानां स्त्रीणां कन्यानां चकारादेवमेव एषैव निखननदहनोदकदानप्रभृतीतिकर्तव्यता । आशौचेऽपि विशेषो नास्ति **गृह्यकार**मते । अनभिधानात् । **स्मृत्यन्तरे** तु पुनर्दृश्यते "अहस्त्वदत्तकन्यासु" इति । एतच्च चूडाकरणानन्तरं दानात्प्राक्, कुतः, "स्त्रीणां चूडात्तथा दानात्संस्कारादप्यधः क्रमात् । सद्यःशौचमथैकाहं त्र्यहं स्यात् पितृबन्धुषु ॥" इति स्मृतेः । तस्मादपरिणीतानां स्त्रीणां चूडाकरणात्प्राक् सद्यःशौचम्, चूडाकरणादुपरि दानात्प्राक् एकाहम्, तत उपरि विवाहात्प्राक् त्र्यहमिति निर्णयः । **प्रत्तानामितरे कुर्युस्ताश्च तेषाम्**–प्रत्तानां परिणीतानां स्त्रीणामितरे भर्त्रादयो दाहादि कर्म कुर्युः, न पित्रादयः । ताश्च प्रत्ताः स्त्रियः तेषां भर्त्रादीनां यथाधिकारमुदकदानादि कर्म कुर्युः । पित्रादीनामत्र विशेषः । " दत्ता नारी पितुर्गेहे सूयते म्रियतेऽपि वा । तद्बन्धुवर्गस्त्वेकेन शुध्यते जनकस्त्रिभिः " इति वचनात् प्रत्तानामपि पितुर्बन्धूनां चाशौचापत्तिमात्रम् । **प्रोषितश्चेत्प्रेयाच्छ्रवणप्रभृति कृतोदकाः कालशेषमासीरन्**–प्रोषितः प्रवासं गतश्चेद्यदि प्रेयात्

म्रियेत तदा तत्पुत्रादयः तन्मरणश्रवणकालमारभ्य कृतं दत्तं स्नानपूर्वकमुक्तविधिना उदकं यैस्ते कृतोदकाः सन्तः, कालशेषम् आशौचसमयशेषम् आसीरन् आशौचधर्मेण वर्तेरन्नित्यर्थः । **अतीतश्चेदेकरात्रं त्रिरात्रं वा**—चेद्यदि आशौचकालोऽतीतः ततः प्रोषितमरणं च श्रुतं तदा एकरात्रमाशौचं त्रिरात्रं वा । अत्र यद्यपि सामान्येनोक्तं तथापि स्मृत्यन्तराद्विशेषोऽवगन्तव्यः । कथम् " मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी भवेत् । अहस्तु नवमादर्वाक् सद्यःशौचमतः परम् ॥ " तथा—" पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत्" इति । **अथ कामोदकान्यृत्विक्श्वशुरसखिसम्बन्धिमातुलभागिनेयानां प्रत्तानाम्**—अथ नियमेन कृत्यमभिधायाधुना कामतः कृत्यमाह—कामोदकानि कामेन इच्छया उदकानि उदकदानानि भवन्तीति सूत्रशेषः । केषाम् ऋत्विजः याजकाः, श्वशुरौ भार्यायाः मातापितरौ, सखायो मित्राणि, सम्बन्धिनो वैवाह्याः, मातुला मातृभ्रातरः, भागिनेया भगिनीपुत्राः एतेषां प्रत्तानाम् ऊढानां दुहितृभगिन्यादीनां स्त्रीणां चकारादिच्छयोदकदानम् अतोऽदाने प्रत्यवायो नास्ति । **एकादश्यामयुग्मान् ब्राह्मणान् भोजयित्वा मांसवत्प्रेतायोद्दिश्य गामप्येके घ्नन्ति**—एकादश्यामेकादशेऽहनि ब्राह्मणः कर्ता चेत् अयुग्मान् त्रिप्रभृतिविषमसंख्याकान् द्विजोत्तमान् भोजयित्वा भोजनं कारयित्वा एकोद्दिष्टश्राद्धविधिना मांसवत् मांसेन सहितं पायसौदनादि भवति । एके आचार्याः प्रेतमुद्दिश्य गामपि घ्नन्ति इति । शाखापशुविधानेन तन्मांसेन श्राद्धं कुर्वन्ति तच्छ्राद्धमग्रे वक्ष्यति "नद्यन्तरे नावं कारयेन्न वा" इति । **पिण्डकरणे प्रथमः पितॄणां प्रेतः स्यात्पुत्रवाँश्चेत्**—पिण्डानां करणं पिण्डकरणं तस्मिन् अमावास्यायां साग्नेः पुत्रस्य पिण्डपितृयज्ञे तत्र पितॄणां प्रथम आद्यः प्रेतः स्यात् तत्प्रभृति पिण्डदानमित्यर्थः। चेद्यदि स प्रेतः पुत्रवान् अधिकृतेन साग्निना पुत्रेण पुत्री भवति। अयमर्थः । साग्नेः पुत्रस्य यदि पिता म्रियेत तदा पिण्डपितृयज्ञानुष्ठानानुरोधेन द्वादशेऽहनि सपिण्डीकरणं विधाय अमावास्यायां तत्प्रभृति पिण्डपितृयज्ञे पिण्डदानं पिण्डान्वाहार्यकं च तत्प्रभृति पार्वणमेव श्राद्धं भवतीति। एकोद्दिष्टं तु निरग्निविषयम्। **निवर्तेत चतुर्थः**—सपिण्डने कृते पित्रादिभ्यस्त्रिभ्यः पिण्डादिदानं, चतुर्थः पिण्डो निवर्तेत " पिण्डास्त्रिषु" इति श्रुतेः। "त्रिषु पिण्डः प्रवर्तते" इति स्मृतेश्च। **संवत्सरं पृथगेके**—एके आचार्याः साग्नेरपि पुत्रस्य संवत्सरं यावत् पृथगेकस्यैव पितुः पिण्डदानमिच्छन्ति । " संवत्सरे सपिण्डीकरणम्" इति वचनात् । न वा असपिण्डीकृतस्येतरैः सह दानं युज्यते, सपिण्डीकरणमिति शब्दः पूर्वजैः सह सपिण्डीकरणं मेलनमिति व्युत्पत्त्या अन्वर्थः। तेन संवत्सरं यावदसपिण्डीकृतस्य पितुः प्रेतस्य पृथग्दानमिच्छन्त्येके । एवं सति " संवत्सरे सपिण्डीकरणम् " इति स्मृतेरनुग्रहः कृतो भवति, एवं प्राप्त उच्यते—**न्यायस्तु**—तुशब्देन पूर्वपक्षव्यावृत्तिः, नैतदेवम्, यत्स्मृत्यनुग्रहन्यायेनेदं परिकल्प्यते कुतः श्रुतिविरोधात्। काऽसौ श्रुतिः। **न चतुर्थः पिण्डो भवतीति श्रुतिः**—कथं श्रुतिविरोधः, शृणु, अधिकृतस्य पुत्रस्य साग्नेः पृथक् क्रियमाणे चतुर्णामपि पिण्डनिर्वपणेऽधिकारो भवति अमावास्यायां पृथक् प्रेतस्य पृथक् क्रियमाणे पार्वणं च त्रयाणामिति भवति श्रुतिविरोधः । तेनाधिकृतस्य साग्नेः पुत्रस्य सापिण्डीकरणादूर्द्ध्वमेकोद्दिष्टं नैव कर्तव्यं भवति, सपिण्डीकरणं तु द्वादशाह एव नियतम्। अनधिकृतस्य निरग्नेस्तु संवत्सरादिषु सपिण्डीकरणकालेषु कृतसपिण्डनस्यापि पितुः संवत्सरादूर्द्ध्वमपि प्रतिसंवत्सरमेकोद्दिष्टमेव। **अहरहरन्नमस्मै ब्राह्मणायोदकुम्भं च दद्यात्**—अहरहः प्रतिदिनमस्मै प्रेतायोद्दिश्य ब्राह्मणाय सम्प्रदानभूताय अन्नं भोजनपर्याप्तमुदकुम्भं च जलपूर्णघटं च संवत्सरं यावद्दद्यात् प्रयच्छेत्। **पिण्डमप्येके निपृणन्ति**—एके आचार्या अहरहः पिण्डनिर्वपणमपीच्छन्ति तच्चानधिकृतनिरग्निविषयम् , अधिकृतस्य हि साग्नेः पार्वणमेव भवति, नैकः पिण्डः, न चैतत्प्रतिदिनमन्नोदककुम्भदानं संवत्सरसपिण्डीकरणपक्ष एव "प्रागपि संवत्सरात् यदि वा वृद्धिरापद्यते" इत्यादिस्मृतिविहितकालान्तरे सपिण्डीकरणेऽपि तदूर्द्ध्वं संवत्सरं यावद्भवत्येव । यतः स्मरन्ति—

“अर्वाक् संवत्सराद्यस्य सपिण्डीकरणं भवेत् । तस्याप्यन्नं सोदकुम्भं दद्यात्संवत्सरं द्विजे॥” इति । तस्मात् साग्निना, निरग्निना च पुत्रेणाहरहरन्नोदकुम्भदानं कर्तव्यम् । पक्षे यत्पिण्डदानं तन्निरग्नेरेव, इतरस्य तु त्रिभ्यः पिण्डदानं प्रसज्येत एकपिण्डनिर्वपणनिषेधात् , तर्हि त्रिभ्योऽपि ददातु, न, प्रेतस्य हि तत् स्मर्यते–**याज्ञवल्क्यः**–“मृतेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि॥”इत्येतदेकोद्दिष्टं साग्नेः सपिण्डीकरणात्प्राक् ऊर्द्ध्वं तु पार्वणमेव।यथाऽऽह **मनुः**–“असपिण्डक्रियाकर्म द्विजातेः संस्थितस्य तु।अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु निर्वपेत्॥”तथा-“सहपिण्डक्रियायां तु कृतायामस्य धर्मतः। अनयैवावृता कार्यं पिण्डनिर्वपणं सुतैः॥”इति । **स्मृत्यन्तरं** च–“यः सपिण्डीकृतं प्रेतं पृथक् पिण्डेन योजयेत् । विधिघ्नस्तेन भवति पितृहा चोपजायते॥”इति । एतच्चौरसक्षेत्रजसाग्निपुत्रविषयम् । यतः स्मरन्ति–“**औरसक्षेत्रजौ** पुत्रौ विधिना पार्वणेन तु । दद्यातामितरे कुर्युरेकोद्दिष्टं सुता दश॥” इति। अत्राशौचप्रसङ्गाद् **स्मृत्यन्तरोक्त** आशौचापवादो लिख्यते ।“ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वताम् । सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥ कारवः शिल्पिनो वैद्या दासीदासास्तथैव च । राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्तिताः॥” इति । एतच्च यज्ञादौ आरब्ध एव, कुतः“आरब्धे सूतकं नास्ति अनारब्धे तु सूतकम्” इति वचनात् । आरम्भश्चैवम् । “आरम्भो वरणं यज्ञे सङ्कल्पो व्रतसत्रयोः । नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया” इति ॥ इति सूत्रार्थः ॥ १० ॥

अथ **पद्धतिः** । तत्र ऊनाद्विवार्षिकं प्रेतमरण्यं नीत्वा भूमौ निखनेत् । द्विवर्षप्रभृति उपनयनात्प्राक् प्रेतं श्मशानं नीयमानं सर्वे सपिण्डा यथाज्येष्ठपुरःसरं पङ्क्तीभूता अनुगच्छन्ति । पक्षे यमगाथां गायन्तो यमसूक्तं च जपन्तः । ततस्तत्र तं प्रेतं भूमिजोषणादिरहितं दग्ध्वा वक्ष्यमाणविधिना स्नात्वा उदकाञ्जलिं च दत्त्वा गृहमागता यथोक्तमाशौचमाचरेयुः । उपनयनादूर्ध्वं भूमिजोषणाद्युदकान्तगमनपर्यन्तं यथाऽऽहिताग्नेः कर्म तथैव यथासम्भवं भवति । अत्र चौपासनिकं पुत्रादिरधिकारी दुर्बलं ज्ञात्वा स्नापयित्वा शुद्धवस्त्रेणाच्छाद्य दक्षिणाशिरसं दर्भवत्यां भूमौ सन्निवेशयेत् । “पूर्वपक्षे तु रात्रौ चेन्मृत्युशङ्काऽग्निहोत्रिणः । हुतावशिष्टाः पक्षेऽस्मिन् जुहुयात्सकलाहुतीः” । दार्शं तत्र पिण्डपितृयज्ञं विना आकृष्य कुर्यान्न तु पौर्णमासं शुक्लपक्षे आकृष्य कुर्यात् । दिवा सायमाहुतिं च । तत्कर्मणोरप्रारब्धत्वात् । अथ तत्र वैतरणीं यथाशक्ति यथाश्रद्धं हिरण्यभूम्यादिकं सर्वपापक्षयार्थं दापयित्वा अथ गतासुं ज्ञात्वा घृतेनाभ्यज्य उदकेनाप्लाव्य सवस्त्रमुपवीतिनं चन्दनोक्षितसर्वाङ्गं पुष्पमालाविभूषितं मुखनासिकाचक्षुःश्रोत्ररन्ध्रेषु निक्षिप्तहिरण्यशकलं वस्त्रेणाच्छाद्य पुत्रादयो निर्हरेयुः । एतच्चावसथ्याग्निसन्निधौ गृहमरणपक्षे । यदा तु गङ्गादितीर्थेऽग्निसन्निधौ अर्द्धजले मरणं तदा तत्राप्येवं स्नपनादि हिरण्यशकलनिधानान्तं कर्म कुर्यात् । निर्हरणपक्षे तु आमपात्रे सन्तापाग्निमादायाग्निपुरःसरं प्रेतं यमगाथां गायन्तो यमसूक्तं च जपन्तः पुत्रादयः श्मशानं नयन्ति, तत्राधिकारी पुत्रादिराप्लुत्य भूमिजोषणपूर्वकं दक्षिणोत्तरायतं दारुचयं विधाय चितौ कृष्णाजिनं प्राग्ग्रीवमुत्तरलोममास्तीर्य तत्रोत्तानं दक्षिणाशिरसमेनं निपात्य दक्षिणनासारन्ध्रे,आज्यपूर्णं स्रुवं निधाय पादयोरधरारणिमुरस्युत्तरारणिं च प्रागग्रां पार्श्वयोः सव्यदक्षिणयोः शूर्पचमसौ मुसलमुलूखलं च न्युब्जमूर्वोरन्तराले तत्रैव चात्रमोविलीं च अरुदन् भयरहितो निदध्यात्, अपसव्येन वाग्यतो दक्षिणामुखः सन् अथोपविश्य सव्यं जान्वाच्यौपासनाग्निं गृहीत्वा “अस्मात्त्वमधिजातोऽसि” इत्यनयर्चा स्वाहान्तया दक्षिणतो मुखे वा शनैरग्निं दद्यात् । अनावसथिकं तु एवमेव ग्रामाग्निना सपिण्डाद्यानीतेनामन्त्रकं दहति । ततो दाहान्ते नद्याद्युदकसमीपं गत्वा समीपस्थितं योनिसम्बद्धं श्यालकं वा “उदकं करिष्यामहे” इत्यनेन मन्त्रेणोदकं याचेरन् सपिण्डादयः । एवं याचिते यदि शतवर्षादर्वाक् प्रेतो भवेत्तदा कुरुध्वं मा चैवं पुनरित्येवं प्रतिवचनं दद्यात्, अथ शतवर्षादूर्ध्वं प्रेतो भवेत्तदा कुरुध्वमित्येतावदेव, ततः सप्तपुरुषसम्बन्धिनः सपिण्डाः, दशपुरुषसम्बन्धाः समानोदकाश्चैकग्रामनिवासे यावत्स्मृतं जलं प्रविशन्ति एकवस्त्राः

प्राचीनावीतिनः सन्तः, ततः सव्यहस्तस्यानामिकाङ्गुल्या उदकमपनोद्य **अप नः शोशुचदघमि**त्येतावता मन्त्रेण दक्षिणामुखास्तूष्णीं निमज्जन्ति । ततः प्रेतमुद्दिश्यामुकसगोत्रामुकशर्मन् प्रेत एतत्त उदकमित्युच्चार्य एकैकमञ्जलिं सकृद्भूमौ प्रक्षिपन्ति । तत उदकादुत्तीर्य शुचौ देशे शाद्वलवत्युपविष्टान् सपिण्डादीनन्ये सुहृद इतिहासपुराणादिविदग्धकथाभिः संसारानित्यतां दर्शयन्तोऽपवदेयुः । तथाहि—"कृतोदकान्समुत्तीर्णान्मृदुशाद्वलसंस्थितान् । स्नातानपवदेयुस्तानितिहासैः पुरातनैः ॥ मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् । करोति यः स सम्मूढो जलबुद्बुदसन्निभे ॥ पञ्चधा सम्भृतः कायो यदि पञ्चत्वमागतः । कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ॥ गन्त्री वसुमती नाशमुदधिर्दैवतानि च । फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति ॥ श्लेष्माश्रुबान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः । अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः ॥ इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः । विदश्य निम्बपत्राणि नियता द्वारि वेश्मनः ॥ मा शोकं कुरुतानित्ये सर्वस्मिन्प्राणधारिणि । धर्मं कुरुत यत्नेन यो वः सङ्गतिमेष्यति ॥" तथा च **विष्णुः**—यदुदगयनं तदहर्देवानाम्, दक्षिणायनं रात्रिः, संवत्सरो ह्यहोरात्रं, तत्त्रिंशता मासो, द्वादश वर्ष, द्वादश वर्षशतानि दिव्यानि कलियुगम्, द्विगुणानि द्वापरम्, त्रिगुणानि त्रेतायुगम्, चतुर्गुणानि कृतयुगम्, एवं द्वादशसहस्राणि दिव्यानि चतुर्युगम्, तत्सहस्रं तु कल्पः, स च पितामहस्याहस्तावती चास्य रात्रिः । एवंविधेनाहोरात्रेण मासवर्षगणनया सर्वश्रेष्ठस्यैव ब्रह्मणो वर्षशतमायुः, एवं ब्रह्मायुषा च परिच्छिन्नः पौरुषो दिवसस्तस्यान्ते महाकल्पः, तावत्येव चास्य निशा, पौरुषाणामहोरात्राणामतीतानां सङ्ख्यैव नास्ति, न च भविष्यमाणानाम्, अनाद्यन्तत्वात्कालस्य । "एवमास्मिन्निरालम्बे काले सन्ततयायिनि । न तद्रूपं प्रपश्यामि स्थितिर्यस्य भवेद् ध्रुवा ॥ गङ्गायाः सिकता धारास्तथा वर्षति वासवे । शक्या गणयितुं लोके न व्यतीताः पितामहाः ॥ चतुदश विनश्यन्ति कल्पे कल्पे सुरेश्वराः । सर्वलोकप्रधानाश्च मनवश्च चतुर्दश ॥ बहूनीन्द्रसहस्राणि दैत्येन्द्रानियुतानि च । विनष्टानीह कालेन मनुष्याणां तु का कथा ॥ राजर्षयश्च बहवः सर्वे समुदिता गुणैः । देवर्षयश्च कालेन सर्वे ते निधनं गताः ॥ ये समर्था जगत्त्राणे सृष्टिसंहारकारिणः । तेऽपि कालेन नीयन्ते कालो हि बलवत्तरः ॥ आक्रम्य सर्वः कालेन परलोकाय नीयते । कर्मपथ्योदनो जन्तुस्तत्र का परिदेवना ॥ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । अर्थे दुष्परिहार्येऽस्मित् नास्ति शोकसहायता ॥ शोचन्तो नोपकुर्वन्ति मृतस्येह जना यतः । अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः ॥ सुकृतं दुष्कृतं चोभे सहायौ यस्य गच्छतः । बान्धवैस्तस्य किं कार्यं शोचद्भिरथवा तथा ॥ बान्धवैर्नाम शोचद्भिः स्थितिं प्रेतो न विन्दति । अस्वस्थपातितानेष पिण्डतोयप्रदानतः ॥ अर्वाक् सपिण्डीकरणात्प्रेतो भवति वै मृतः । प्रेतलोकं गतस्यान्नं सोदकुम्भं प्रयच्छाति ॥ देवतायतनस्थाने तिर्यग्योनौ तथैव च । मनुष्येषु तथा प्रैति श्राद्धं दत्तं स्वबान्धवैः ॥ प्रेतस्य श्राद्धकर्तुश्च पृथक् श्राद्धे कृते शुभम् । तस्माच्छ्राद्धं सदा कार्यं शोकं त्यक्त्वा निरर्थकम् ॥ एतावदेव कर्तव्यं सदा प्रेतस्य बन्धुभिः । नोपकुर्यान्नरः शोचन् प्रेतस्यात्मन एव च ॥ दृष्ट्वा लोकमनानन्दं म्रियमाणांश्च बान्धवान् । धर्ममेकं सहायार्थे चरयध्वं सदा नराः ॥ मृतोऽपि बान्धवः शक्तो नानुगन्तुं मृतं नरम् । जायावर्जं हि सर्वस्य याम्यः पन्था विभिद्यते ॥ धर्म एकोऽनुयात्येनं यत्रक्वचनगामिनम् । ततोऽसारे त्रिलोकेऽस्मिन्धर्मं कुरुत मा चिरम् ॥ श्वः कार्यमद्य कुर्वीत पूर्वाह्णे वाऽपराह्णिकम् । न हि प्रतीक्षते मृत्युः कृतं वाऽस्य न वाऽकृतम् ॥ क्षेत्रापणगृहासक्तमन्यत्रगतमानसम् । वृकीवोरणमासाद्य मृत्युरादाय गच्छति ॥ न कालस्य प्रियः कश्चिदप्रियो वाऽपि विद्यते । आयुष्ये कर्मणि क्षीणे प्रसह्य हरते जनम् ॥ नाप्राप्तकालो म्रियते विद्धः शरशतैरपि । कुशाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥ नौषधानि न मन्त्राश्च न होमा न पुनर्जपाः । त्रायन्ते मृत्युनोपेतं जरया वाऽपि मानवम् । यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् । तथा पूर्वकृतं कर्म कर्तारमनुविन्दति ॥ आगामिनमनर्थं हि प्रतिष्ठानशतैरपि । न निवारयितुं शक्तस्तत्र का परिदेवना ॥" **भारते**—"यथा काष्ठं च

काष्ठं च समेयातां महोदधौ । समेत्य च व्यपेयातां तद्वद् भूतसमागमः ॥"रामायणे च–"शोचमानास्तु सस्नेहा बान्धवाः सुहृदस्तथा । पातयन्ति जनं स्वर्गादश्रुपातेन राघव ॥ श्रूयते हि नरव्याघ्र पुरा परमधार्मिकः । भूरिद्युम्नो गतः स्वर्गं राजा पुण्येन कर्मणा ॥ स पुनर्बन्धुवर्गस्य शोकव्याजन राघव । कृत्स्ने च क्षयिते धर्मे पुनः स्वर्गान्निपातितः ॥ अतः शोकाग्निना दग्धः पिता ते स्वर्गतः प्रभो । शपेत्त्वां मन्युनाऽऽविष्टस्तस्मादुत्तिष्ठ मा शुचः ॥" ततः पश्चादनवलोकयन्तः कनिष्ठानग्रतः कृत्वा पङ्क्तीभूता ग्राममायान्ति, आगम्य च गृहद्वारे स्थित्वा निम्बपत्त्राणि दन्तैरवखण्ड्याचम्योदकमग्निं,गोमयं, गौरसर्षपांस्तलं चांति क्रमेणालभ्य पादेनाश्मानमाक्रम्य गृहं प्रविशन्ति । ततः प्रभृति त्रिरात्रं यावत् जातीनां यमनियमा उच्यन्ते । ब्रह्मचर्यमधःशयनं लौकिककर्माकरणमन्येषां कुर्वित्यप्रेरणं क्रीत्वा लब्ध्वा वा दिवैव भोजनं मांसवर्जम् ,एते च नियमा ज्ञातीनां पुत्रादीनां यावदाशौचम् । अथ यस्तेषां मध्ये प्रेतक्रियाधिकारी पुत्रादिः स दशरात्रं यावत्प्रत्यहमेकैकमवयवपूरकं पिण्डं प्रेताय दद्यात् । आशौचदिनहानौ वृद्धौ वा दशैव पिण्डान् दिनानि विभज्य दद्यात् । कथममुकसगोत्रामुकशर्मन् प्रेत अवनेनिक्ष्व, ततो दर्भानास्तीर्य अमुकसगोत्रामुकशर्मन् प्रेत एष ते शिरःपूरकः पिण्डो मया दीयत इति पिण्डं दत्त्वा पूर्ववत्पुनरवनेजनं दत्त्वा ततोऽनुलेपनं, ततो पुष्पधूपदीपशीतलतोयोर्णातन्तुदानं पिण्डे स्मृत्यन्तरोक्तमपि कुर्यात् । अथ यस्मिन्नहोरात्रे स मृतो भवति तस्यां रात्रौ मृन्मये पात्रे क्षीरोदके कृत्वा यष्ट्यादिकमवलम्ब्याकाशे धारयेत् "प्रेतात्र स्नाहि पिब चेदम्" इति मन्त्रेण । ततो द्वितीयादिषु प्रत्यहमनेनैव विधिना एकैकं पिण्डमवयवपूरकं दद्याद् ब्राह्मणः । क्षत्रियश्चेन्नवमेऽहनि नवमं पिण्डं दत्त्वा द्वादशेऽहनि दशमं पिण्डं दद्यात् । वैश्यश्चेत्पञ्चदशेऽहनि, शूद्रश्चेत्त्रिंशत्तमे इति विशेषः । तथैव एकैकमञ्जलिमेकैकं जलपात्रम् । वृद्धिपक्षे त्वञ्जलीनां पात्राणां च दिनसङ्ख्याया एकैकं वर्द्धयेत् । तत्र वाक्यम् । अमुकसगोत्रामुकशर्मन् प्रेतैष ते तिलतोयाञ्जलिर्मया दत्तस्तवोपातिष्ठताम् । .अमुकसगोत्र प्रेत एतत्ते तिलतोयपात्रं मया दत्तं तवोपतिष्ठताम् । सद्यःशौचपक्षे त्वेकस्मिन्दिन एव क्रमेण दशावयवपूरकान् पिण्डान् तथा पञ्चपञ्चाशत्तोयाञ्जलीन् पञ्चपञ्चाशत्तोयपात्राणि च दद्यात् । त्र्यहाशौचपक्षे तु प्रथमदिने–त्रीन् पिण्डान्, षडञ्जलीन्, षट् पात्राणि च दद्यात् । द्वितीयदिने–चतुरः पिण्डान्, द्वाविंशत्यञ्जलीन्, द्वाविंशतिपात्राणि । तृतीयदिने–पुनस्त्रीन् पिण्डान्, सप्तविंशत्यञ्जलीन्, सप्तविंशतिपात्राणि च दद्यात् । यतः स्मरन्ति–"प्रथमे दिवसे देयास्त्रयः पिण्डाः समाहितैः । द्वितीये चतुरो दद्यादस्थिसञ्चयनं तथा ॥ त्रींस्तु दद्यात्तृतीयेऽह्नि वस्त्रादि क्षालयेत्ततः" इति । केचित्तु प्रथमेऽह्नि एकं पिण्डम्, एकमञ्जलिम्, एकं पात्रम द्वितीयदिने–चतुरः पिण्डान् चतुर्दशाञ्जलीन्,चतुर्दशपात्राणि। तृतीयदिने–पञ्च पिण्डान्, चत्वारिंशदञ्जलीन्, चत्वारिंशत्पात्राणीति मन्यन्ते । एतत्प्रेतकृत्यकरणानन्तरं न पुनः स्नायात्, स्मरणाभावात् । पिण्डैरवयवपूरणम् । तथा-शिरः प्रथमेन,कर्णाक्षिनासिका द्वितीयेन, गलांसभुजवक्षांसि तृतीयेन, नाभिलिङ्गगुदानि चतुर्थेन, जानुजङ्घापादाः पञ्चमेन, सर्वमर्माणि षष्ठेन, नाडिकाः सप्तमेन, लोमान्यष्टमेन, वीर्यं नवमेन, शरीरपूर्णत्वं दशमेनेति । एतत् प्रेतनिर्हरणादिकं यतिव्यतिरिक्तानां त्रयणामाश्रमिणां कुर्यात् । यतेस्तु न किञ्चित् । तथाच **स्मृतिः**– "त्रयाणामाश्रमाणां च कुर्यादाहादिकाः क्रियाः । यतेः किञ्चिन्न कर्तव्यं न चान्येषां करोति सः" इति । तथा–" एकोद्दिष्टं जलं पिण्डमाशौचं प्रेतसत्क्रियाम् ॥ न कुर्यात्पार्वणादन्यद् ब्रह्मीभूताय भिक्षवे । अहन्येकादशे प्राप्ते पार्वणं तु विधीयते " इति । ब्रह्मचारी तु आचार्योपाध्यायपितृव्यतिरिक्तानां प्रेतानां निर्हरणादिकं न कुर्यात् । यथाऽऽह मनुः–" आदिष्टी नोदकं कुर्यादा व्रतस्य समापनात् । समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेत्" इति । तथा–" आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती । शकटान्नं न चाश्नीयान्न च तैः सह संविशेत्"इति । यदि मोहात्करोति तदा ब्रह्मचर्यव्रताच्च्यवते पुनरुपनयनेन शुध्यति । तथाऽस्थिसञ्चयनं ब्राह्मणस्य चतुर्थेऽहनि, क्षत्रियस्य पञ्चमे, वैश्यस्य षष्ठे, शूद्रस्यैकादशेऽहनि कुर्यात् । त्र्यहाशौचे द्वितीयेऽहनि सर्वेषाम्, सद्यःशौचे पुनर्दाहानन्तरमेव । तत्रास्थि-

सञ्चयननिमित्तमेकोद्दिष्टश्राद्धं विधाय पुष्पधूपदीपनैवेद्यानि सम्भृत्य “ ॐ क्रव्यादमुखेभ्यो
देवेभ्यो नमः ” इति मन्त्रेणार्घादिना पूजां कुर्यात, श्मशाने ततो “ नमः क्रव्यादमुखेभ्यो देवेभ्यः ”
इति बलिदानम । तत्र मन्त्रः । “ देवा येऽस्मिन् श्मशाने स्युर्भगवन्तः सनातनाः । तेऽस्मत्सकाशाद्
गृह्णन्तु बलिमष्टाङ्गमक्षयम ।। प्रेतस्यास्य शुभाँल्लोकान्प्रयच्छन्त्वपि शाश्वतान् । अस्माकं चायुरारोग्यं
सुखं च ददताक्षयम ” इति ।। एवं बलिं दत्त्वा विसर्ज्जयेत् । ततोऽपसव्यं कृत्वा पलाशवृन्तेनास्थीनि
परिवृत्याङ्गुष्ठकनिष्ठाभ्यामादाय पलाशपुटे धारयति । तत्र शमीशैवालं कर्दमं च धारयति । ततो
घृतेनाक्तसर्वौषधीमिश्राण्यस्थीनि दक्षिणपूर्वायतान् यवाकारान् कर्षून् खात्वा तत्र कुशानास्तीर्य हरि-
द्रया पीतवस्त्रखण्डमावृत्य तत्र वक्ष्यमाणमन्त्रेण निक्षिपेत् , “ॐ वाचा मनसा आर्तेन ब्रह्मणा त्रय्या
विद्यया पृथिव्या मक्षिकायामपाꣳ रसेन निवपाम्यसौ” इति मन्त्रेण, असौस्थाने प्रेतनामादेशः । ततः
कुम्भे तूष्णीं निधाय तं कुम्भमरण्ये वृक्षमूले वा भूमौ खात्वा धारयेत् । चितास्थितं भस्म तोये सर्व-
मेव प्रक्षिपेत, चिताभूमिं च गोमयेन विलिप्य तत्र तेनैव पूर्वोक्तबलिमन्त्रेण बलिं दद्यात् । तं च बलिं
क्षीरेणाभ्यज्य देवता विसर्जयेत् । चिताभूमिच्छादनार्थं तत्र वृक्षं पट्टकं वा कारयेत् । सभाविश्रामार्थं
काष्ठपाषाणविन्यासविशेषः । पट्टकः“पट्टहर”इति कान्यकुब्जे प्रसिद्धः,लोकाचारादेव कुड्यं वा । ततः
कदाचिदस्थिकुम्भमुत्थाप्यादाय तीर्थं गच्छेत् ।“अस्थीनि मातापितृवंशजानां नयन्ति गङ्गामपि ये कदा-
चित् । सद्बन्धवोऽस्यापि दयाभिभूतास्तेषां च तीर्थानि फलप्रदानि ।।” ततश्च गङ्गां गत्वा स्नात्व-
पञ्चगव्येनास्थीनि सिक्त्वा हिरण्यमध्वाज्यतिलैश्च संयोज्य ततो मृत्पिण्डपुटे निधाय दक्षिणां दिशं
पश्यन् नमोऽस्तु धर्मायेति वदन् जलं प्रविश्य स मे प्रीतोऽस्तु इत्यभिधाय गङ्गाम्भसि प्रक्षिप्य जला-
दुत्तीर्य सूर्यमवेक्ष्य विप्रमुख्याय यथाशक्ति दक्षिणां दद्यात् । एवं कृते प्रेतक्रियाकर्त्रोः स्वर्गः स्यात् ।
तथा चोक्तम्–“ विगाह्य गङ्गां समियाय तोयमिहास्थिराशिं सकलैश्च गव्यैः । हिरण्यमध्वाज्यतिलैस्तु
युक्तं ततस्तु मृत्पिण्डपुटे निधाय ।। यस्यां दिशि प्रेतगणोपगूढो विलोकयंस्तां सलिले क्षिपेत्तम् ।
उत्तीर्य दृष्ट्वा रविमात्मशक्त्या सुदक्षिणां मुख्यद्विजाय दद्यात् ।। एवं कृते प्रेतपुरःस्थितस्य स्वर्गे गतिः
स्याच्च महेन्द्रतुल्या ।। क्षीणेषु पुण्येष्वपतन्दिविष्ठा नैवं व्युदस्य च्यवनं द्युलोकात् ।। यावदस्थि मनु
ष्याणां गङ्गातोयेषु तिष्ठति । तावद्वर्षसहस्राणि ब्रह्मलोके महीयते ।।” तथा यमः–“गङ्गातोयेषु
यस्यास्थि प्लवते शुभकर्मणः । न तस्य पुनरावृत्तिर्ब्रह्मलोकात्कदाचन ।। गङ्गातोयेषु यस्यास्थि नीत्व
संक्षिप्यते नरैः । युगानां तु सहस्राणि तस्य स्वर्गगतिर्भवेत् ।। मातुः कुलं पितृकुलं वर्जयित्वा नरा
धमः । अस्थीन्यन्यकुलोत्थस्य नीत्वा चान्द्रायणाच्छुचिः ।।” एतच्च द्रव्यादिलोभेन नयतो न श्रेयोऽधि-
नः । अथ साग्नेः पत्नी यदि जीवद्भर्तृका म्रियत तदा केचिद्देशाचारात्क्षौरं नाहुः । अन्यो विधिः
सर्वोऽप्युक्ता भवति भर्तरि मृते यदि म्रियते तदा अरण्यन्तरं सम्पाद्य ततो निर्मन्थ्येनाग्निना पात्रै-
र्विना तां दहेत् । तदलाभे लौकिकाग्निना । एवं पश्चान्मृतस्य पुंसो भवति । अन्वारोहणं तु पृथगा-
हुतिस्तन्मुखे इति विशेषः । पात्रासादनं तु यजमानदेह एव, अथ यदि साग्नेः शवस्य दाहे क्रियमाणे
वृष्ट्याद्युपघातेनाग्निनाशेऽर्द्धदग्धदेहशेषं वृष्टौ शान्तायामर्धदग्धारणी निर्मथ्य तदलाभेऽर्द्धदग्धकाष्ठं
निर्मथ्य तदलाभे अश्वत्थादिपवित्रकाष्ठमथनोत्थेनाग्निना पुनर्दहेत । अथ प्रोषिते तु मृतेऽग्निहोत्रिणि
तदस्थीन्यानीयोक्तविधिना त्रेतया पुनर्दहेत । अस्थ्नामप्यलाभे षष्ट्यधिकत्रिशतमितपलाशवृन्तान्युच्चित्य
कृष्णसारचर्माणि पुरुषाकारेण प्रसारिते तदुपरि पुरुषाकारं प्रसार्य तत्र पलाशवृन्तानां चत्वारिंशता
शिरः, दशभिर्ग्रीवा, त्रिंशता उरः, विंशत्योदरम्, शतेन भुजद्वयम्, दशभिर्हस्ताङ्गुलीः, षड्भिर्वृषणौ,
चतुर्भिः शिश्नम, शतेनोरुद्वयम, त्रिंशता जानुनी जङ्घे च, दशभिः पादाङ्गुलीः परिकल्प्योर्णासूत्रेण
सम्यग्बद्ध्वा तेनैव मृगचर्मणा संवेष्ट्य ऊर्णासूत्रेणैव बद्ध्वा यवपिष्टजलेन सम्प्रलिप्य मन्त्रपूर्वकं पूर्व-
वत्पात्रैर्दहेत् । एवं पर्णशरे दग्धे त्रिरात्रमशुचिर्भवेत् । द्वितीयेऽह्नि तु तदस्थ्नां वृन्तरूपाणां दग्धानां
सञ्चयनम् । एवं मृतबुद्ध्या पर्णशरे दग्धे तस्य दैवात्पुनरागमने पुनराधानं कृत्वा आयुष्यार्थामिष्टिं

कुर्यात् । पर्णशरदाहानन्तरं तु तदस्थ्नां लाभेऽर्द्धदग्धकाष्ठानामलाभे त्वस्थ्नां महाजले प्रक्षेपः । बुद्धिपूर्वमात्मघातिनां तु व्यासोक्तनारायणबल्यनन्तरं संस्कारः । एवं साग्नेर्दहनदिनान्निरग्नेर्मरणदिनाद्गणना । अथैषां प्रेतदेहानां रजस्वलादिस्पर्शे मृन्मये कुम्भे पूर्णजले पञ्चगव्यं प्रक्षिप्य कृतस्नानं शवं तेनोदकेनाभिषिञ्चते । आपो हि ष्ठेत्यादिभिरब्लिङ्गैर्मन्त्रैर्वामदेव्यादिभिर्ऋग्भिस्तिसृभिरभिषिञ्चेत् । एवं सूतिकां रजस्वलां चापि एकादशे चतुर्थे वाऽहानि प्रायश्चित्तं कृत्वा पञ्चगव्येन प्रक्षाल्य वाससा संवेष्टय उक्तविधिना दहेदिति ॥ १० ॥ ॥ * ॥

विश्व०-अथोदककर्म-मृतसंस्कारकमुदकादिना कर्म पिण्डाञ्जलिदानादि । उपलक्षणमेतत् । अन्यस्यापि सूतकादेर्वक्ष्यमाणत्वात् । वक्ष्यत इति सूत्रशेषः । **अद्वि···शौचं-शौच···रेषां**-द्वे वर्षे जाते यस्यासौ द्विवर्षः, न द्विवर्षोऽद्विवर्षः तस्मिन्प्रेते मृते मातापित्रोराशौचम् अशुद्धिः । स्वाश्रमविहितानुष्ठानसंकोच इति यावत् । इतरेषां मातृपितृव्यतिरिक्तानां शौचं सद्यः स्नानमात्राच्छुद्धिरित्यर्थः । एतच्च वाजसनेयान्तर्गतशाखाध्येतॄणामेव । अन्येषां तु **स्मृत्यन्तर**विहिताशौचाधिकारः । मातापित्रोर्यदाशौचं तत्कियत्कालमत आह-**एक···वा**-एतच्चाकृतचूडकृतचूडतया यथाक्रमं बोध्यम् "आचूडान्नैशिकी" इत्युक्तेः । **शरी···नन्ति**-अद्विवर्षप्रेतस्य शरीरं कलेवरमदग्ध्वा दाहमकृत्वा निखनन्ति । अहतवस्त्राच्छादितं चन्दनपुष्पाद्यलंकृतं भूमौ गर्तं कृत्वा क्षिपन्तीत्यर्थः । **अन्तः···वत्**-चेत्सूतकमध्ये तन्नाशादर्वाक् सूतकान्तरापातस्तदा पूर्वशेषेणागन्तुकस्य शुद्धिः । तथा च **शङ्खः**-"अथ चेदन्तरा म्रियेत जायेत वा शिष्टैरेव दिनैः शुध्येताहःशेषे सति द्वाभ्यां, प्रभाते तिसृभिरिति ।" केचित्तु शावाशौचस्य जननाशौचनिवर्तकत्वेऽपि जननाशौचं न शावमपवदति । सजातीयस्यैव निवर्तकतेत्यन्ये । मातापित्रोस्तु विशेषः । पितुः सूतकं स्वसमयं व्याप्नोत्येव । पितुः सूतकमध्ये चेन्मातुः सूतकं, तदा द्वादशप्रहराः सूतकं वर्द्धते । पूर्वसूतके दिवसमात्राऽवशिष्टे दिनद्वयं विनश्यदवस्थे दिनत्रयम् । अयं च समानकालिकयोः समानजातीययोरेव शोध्यशोधकभावः । स्वल्पतरसमयसंबन्धिना प्रचुरतरसमयसंबन्ध्याशौचाशुद्धेः । अपरे तु मरणोपक्रान्तेर्जन्मानन्तरं सूतकान्तर्मरणे न तस्य स्वतन्त्रं सूतकमित्याहुः । **नात्रोदककर्म**-अत्र ऊनाद्विवर्षे तर्पणपिण्डादि न । एतच्च सहभूतदाहाभावात् । तदुक्तं-"नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया" इति । **द्विवर्ष···च्छेयुः**-सर्वे सपिण्डाः । श्मशानपदं स्वसहभूतदाहसूचकम् । दाहविधिश्च वक्ष्यते । **यम···त्येके**-"अहरहर्नीयमानो गामश्वं पुरुषं व्रजम् । वैवस्वतो न तृप्यति सुरापा इव दुर्मतिः" इति **यमगाथा** । "अपेतो यन्तु पणयः" इत्ययमध्यायो यमसूक्तम् । एके गाथादिगानमाहिताग्निविषयमाहुः । **यद्यु···नात्**-उपेतः उपनीतः आहिताग्नेः कृतावसथ्यस्य 'समानं भूमिजोषणादि दाहभूमिसंस्कारादि उदकाञ्जलिदानावधि । **शाला···हितश्चेत्**-चेच्छालाग्निराहितः । प्रसङ्गाद्दाहविधिर्लिख्यते । सायमाहुत्यां हुतायां चेन्मरणशङ्का तदा प्रातराहुतिस्तदैव । कृष्णपक्षे चेन्मरणशङ्का तदाऽवशिष्टान्होमान्पक्षहोमविधिना हुत्वा दर्शपक्षादि तदैव कुर्यात् । एवं यथासंभवमसमाप्तमारब्धं सर्पबलिदानादि समापयेत् । ततो दुर्बलावस्थं यजमानं संभावितसंनिकृष्टमरणं ज्ञात्वा पुत्रादिः गोमयेन गोमूत्रेण तीर्थोदकेन गङ्गाजलेन कुशोदकेन च स्नापयित्वा शुद्धे वाससी परिधाप्यावसथ्यसांनिधौ गोमयोपलिप्तायां भुवि दक्षिणाग्रान्कुशानास्तीर्य बहुलांस्तिलान्विकीर्य तत्र प्राक्शिरसमुदक्शिरसं वा भूमौ निवेशयेत् । काशीप्रयागादितीर्थसद्भावे मणिकर्णिकादिगङ्गादेस्तटे आवसथ्यं समानीय तत्सन्निधौ पूर्ववद्यजमाननिवेशनम् । मुखे सुवर्णकांस्यमणिविद्रुमान्यतरं निक्षिपेत् । शालग्रामशिला तुलसी च संनिधौ निधेया । गोपीचन्दनतिलकादि । कण्ठे शिरसि चोत्तमाङ्गच्छिद्रेषु च निर्माल्यतुलसीप्रक्षेपः । प्रदीपोज्ज्वालनं विष्णुपूजनं, "ॐ नमो भगवते वासुदेवाय" इति जपः । वैतरण्यादिदानम् । तत्र विधिः । वैतरणीदानपात्रभूतब्राह्मण एतत्ते पाद्यम् । एष तेऽर्घ्यः । पूजा । पादप्रक्षालनम् । ततः पात्रभूतो द्विजः आचामेत् । दानकर्त्रा पादौ प्रक्षाल्याचम्य प्राणायामान् कृत्वा वैतरणीदानाङ्गतया यथासंभवोपचारैर्विष्णोः पूजनं कार्यम् । ततो गवाद्युपहारप्रोक्षणम् । ततो देशकालौ स्मृत्वा यमद्वारस्थितवैतरणीनद्याः सुखोत्तरणकामो वैतरणीधेनुदानमहं करिष्ये इति संकल्प्य पात्रद्विजमर्घचन्दनपुष्पवस्त्रकुण्डलमुद्रिकादिभिः संपूज्य सवत्सां गां च संपूज्यार्चनविधेः परिपूर्णताऽस्त्विति संप्रार्थ्याचम्य भोजनपर्याप्तमन्नं संकल्प्य ब्राह्मणहस्ते सुप्रोक्षितानि कृत्वा प्रार्थयेत् । "यमद्वारे महाघोरे ख्याता वैतरणी नदी । तर्त्तुकामो ददाम्येतां तुभ्यं वैतरणीं तु गाम्" । ततः पुनर्देशकालावुच्चार्य अमुकसगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यममुकगोत्रोऽमुकशर्माऽहं यमद्वारस्थितवैतरणीनद्याः सुखोत्तरणार्थमिमां वैतरणीसंज्ञकां धेनुं सवत्सां विष्णुदैवतां सुवर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठां कांस्यदोहनां कृष्णवस्त्रयुगच्छन्नां सप्तधान्यपट्टवस्त्रवद्धक्षुमयोडुपोपरिस्थितां वासश्छत्रोपानत्कांस्यघटोपवीतसंयुक्तां कार्पासद्रोणस्थताम्रभाजनस्योपरिस्थितलोहदण्डहस्तहेममययमसहितां गन्धाद्यर्चितां संप्रददे । भगवान्पापहा महाविष्णुः प्रीयताम् । ततः सुवर्णं, तदशक्तौ वस्त्रयुगमं वा, सप्तधान्यानि

वा दक्षिणां दद्यात् । ततः स्तुतिः । “या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता । धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ विष्णुरूप द्विजश्रेष्ठ भूदेव पङ्क्तिपावन । सदक्षिणा मया दत्ता तुभ्यं वैतरणी च गौः ॥” ततो धेनुप्रार्थना । “धेनुके त्वं प्रतीक्षस्व यावदागमनं मम । त्वद्दानात्पावितो देवि महारौरवनाशिके ॥ धेनुके त्वं प्रतीक्षस्व यमद्वारे महाभये । उत्तितीर्षुरहं देवि वैतरण्यै नमो नमः ॥” वैतरणीदानं परिपूर्णमस्त्विति प्रार्थ्य द्विजं प्रणमेत् । 'स्वयं दानाशक्तौ पुत्रादिर्दत्त्वा तस्मै श्रेयो दद्यात् । अथाऽष्टमहादाननिमित्तं विष्णुपूजनम् । तत्राद्यं **तिलदानं**–“तिलाः श्वेतास्तिलाः कृष्णास्तिला गोमूत्रसन्निभाः । ते मे दहन्तु पापानि शरीरेण कृतानि वै ॥” इमांस्तिलान्सोमदैवतान्गन्धाद्यर्चितान् विष्णोः प्रीत्यर्थं तिलदानफलावाप्त्यर्थं वा कस्मैचिद्गोत्राय ब्राह्मणायेति । एवं सर्वेषु ॥ १ ॥ ततो **लोहदानम्**–“यस्मादायस कर्माणि तवाधीनानि नित्यशः । लाङ्गलाद्यायुधादीनि ततः शान्तिं प्रयच्छ मे” । इदं लोहमग्निदैवतम् ॥ २ ॥ ततो **हिरण्यदानं**–“हिरण्यगर्भगर्भस्त्वं हेम बीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे” इदं सुवर्णमग्निदैवतम् ॥ ३ ॥ ततः **कार्पासदानं**–“येन दत्तेन प्रीयन्ते भूर्भुवःस्वरिति क्रमात् । ब्रह्माद्या ऋषयः सर्वे शङ्कराद्या गणास्तथा ॥ इन्द्राद्या देवताः सर्वाः कर्पासेन तु तोषिताः ॥” इमं कर्पासं बृहस्पतिदैवतम् ॥ ४ ॥ **लवणदानं**–“यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना । पितॄणां च प्रियं नित्यं तस्मात्स्वर्गप्रदं भव ॥” इदं लवणं विष्णुदैवतं यमादभयप्राप्त्यर्थम् ॥ ५ ॥ ततः **सप्तधान्यदानं**–“व्रीहयो यवगोधूमा मुद्गा माषाः प्रियङ्गवः । तिलाश्च सप्तमाः प्रोक्ताः सप्तधान्यमुदाहृतम्” अथवा–“यवगोधूमधान्यानि तिलाः कङ्गुस्तथैव च । श्यामाकं चीनकं चैव सप्तधान्यमुदाहृतम् ॥ अन्नं प्रजापतिः साक्षादन्नमेव जनार्दनः । अन्नाद्भवन्ति भूतानि जगदन्नेन वर्धते ॥” इदं सप्तधान्यं प्रजापतिदैवतं यमदूतप्रीत्यर्थम् ॥ ६ ॥ ततः **भूमिदानं**–“समुद्रवसना देवी भूतधात्री च वैष्णवी । सा मे दहतु पापानि जन्मान्तरकृतान्यपि ॥” इमां भूमिं विष्णुदैवताम् ॥ ७ ॥ ततस्तिसृणां **गवां दानम्**–“ गावो ममाग्रतः सन्तु ” इति । इमास्तिस्रो गाः रुद्रदैवताः त्रिविधपापक्षयार्थम् ॥ ८ ॥ तिलादिषु सप्तदानेषु हिरण्यं दक्षिणा, हिरंण्यदाने तु रजतमिति । पृथग्दानाऽसंभवे समुदितानां संकल्पः । इमानि तिलादीन्यष्टौ महादानानि नानादैवतानि गन्धाद्यर्चितानि सदक्षिणानि तत्तद्दानफलप्राप्तये विष्णोः प्रीतये वा नानानामगोत्रेभ्य इत्यादि । “ समभ्यर्च्य हृषीकेशं पुष्पधूपादिभिस्तथा । प्रणिपातैः स्तवैः पुण्यैर्ध्यानयोगेन पूजयेत् ॥ दत्त्वा दानं च विप्रेभ्यो दीनानाथेभ्य एव च । बन्धौ कलत्रे पुत्रे च क्षेत्रधान्यधनादिषु । मित्रवर्गे च सर्वत्र ममत्वं विनिवर्तयेत् ॥” ततः सति संभवे यथाशक्ति तिलधेन्वादिदानम् । अनवरतं विष्णुस्मरणम् । ततः पुत्रादिः **पुरुषसूक्तोपनिषदा**दिकं श्रावयेत् । ततो गतप्राणं ज्ञात्वा पुनः पुत्रादेः स्नानम् । मृतशरीरं प्रक्षाल्याहते परिधानीयोत्तरीये परिधाय चन्दनेन प्रोक्ष्य पुष्पैरलंकुर्यात् । दुर्मरणं चेत्प्रायश्चित्तम् । शृङ्गिदंष्ट्रिनखिसर्पविषविद्युज्जलाग्निब्राह्मणान्त्यजचौरमारितस्य मरणे दोषशक्त्यनुसारेण विष्णुपूजनपूर्वकं त्रीन्, षड्, द्वादश, पञ्चदश वा प्राजापत्यान्विप्राज्ञया कृत्वा गवादितत्प्रत्याम्नायदानेन वा शुद्धिं संपाद्य दाहादि कुर्यात् । एवं मुमूर्षोरपि पापसंभवे तदनुरूपप्रायश्चित्तानन्तरमेव वैतरण्यादिदानाधिकारः । दाहकर्त्राऽपि स्वपापानुरूपप्रायश्चित्तानन्तरमेव दाहादि कार्यम् । लोभादिना चेत्प्रायश्चित्तं न कारयति, न वा करोति, तदा उभावपि नरकं गच्छतः । एवमूर्ध्वाधरान्यतरोच्छिष्टोभयोच्छिष्टाऽस्नाताऽस्पृश्याऽस्पृष्टस्त्रस्तरखट्वादौ मरणे शक्तिदोषानुरूपप्रायश्चित्ताचरणम् । अकृतप्रायश्चित्तस्य कृतमप्यन्तारिक्षे नश्यति ॥ प्रयोगः । अमुकदुर्मरणजनितदोषनिवृत्त्यर्थं दाहाद्यौर्ध्वदेहिकयोग्यतालाभायाऽमुकप्रायश्चित्ताचरणं करिष्ये इति । ततः आवसथ्यं स्थाल्यां कृत्वा प्रेतस्य शिरःप्रदेशनिकटे स्थापयेत् । ततः मरणस्थाने प्रेतायैकोद्दिष्टविधिना पिण्डदानम् । ब्राह्मणाभावे दर्भबटुं संस्थाप्य पादौ प्रक्षाल्य तूष्णीं प्राणानायम्याऽपसव्यं कृत्वाऽद्यामुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं दाहादियोग्यताप्राप्त्यर्थं मरणस्थाने एकोद्दिष्टविधिना श्राद्धमहं करिष्य इति संकल्प्य, ततो नीवीबन्धनं, द्वारदेशे दिक्षु च कुशतिलप्रक्षेपः । दुष्टदृष्टिनिपातादिदूषितः श्राद्धोपहारः पूतो भवत्वित्युपहारप्रोक्षणं कुर्यात् । गोत्र प्रेतैतत्ते आसनमित्यासनदानम्, आचमनम् । “ आमान्नं सघृतं गोत्र प्रेत ते उपतिष्ठताम्” इत्यामान्नसंकल्पः । अद्येत्यादि अमुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थस्याऽस्य श्राद्धस्यैकोद्दिष्टविधेर्यत्कृतमित्यादिपृच्छा । ततः पिण्डदानम् । समूलान्दक्षिणाग्रान्दर्भानास्तीर्य गोत्र प्रेतैतत्त इति पिण्डदानम्, सूत्रदानम् । ततस्तूष्णीमुदकं बटौ विप्रकरे वा दत्त्वाऽमुकसगोत्रामुकप्रेत दत्तं श्राद्धं ते उपतिष्ठतामित्यक्षय्योदकं दद्यात् । ततः सव्यं कृत्वा दक्षिणादानं, माषान्नजलसंयुक्तकुम्भदानं च । अयं कुम्भो माषान्नजलसहितः गोत्र प्रेत ते उपतिष्ठतामिति । पिण्डचालनम् । अस्योत्क्रान्तिश्राद्धस्य यन्न्यूनं यदतिरिक्तं तत्सर्वं विष्णोः प्रसादात्परिपूर्णम् । अनेन श्राद्धेन गोत्रस्य प्रेतस्य प्रेतत्वनिवृत्तिः । दाहादियोग्यताप्राप्तिः । बटुविसर्गः । श्राद्धानन्तरं शवनाम्ना मृतस्थाने पिण्डदानम् । अमुकगोत्रामुकशव एतत्त इति प्रयोगः । माषान्नसहितकुम्भदानम् । ततः द्वारदेशे पूर्ववच्छ्राद्धमेकोद्दिष्टविधिना । श्राद्धानन्तरं पान्थनाम्ना पिण्डदानम् । पान्थ एतत्त इति । समाप्य कुम्भदानं च ततः शकटादिना नीयमानं प्रेतं सर्वे सपिण्डाः अनुगच्छेयुर्यमगाथां गायन्तो, यमसूक्तं च प्रसिद्धं जपन्तः श्मशानपर्यन्तम् । ततश्चत्वरे प्रेतनाम्ना पिण्डदानम् । समाषसजलकुम्भदानम् । ततः ग्रामश्मशानयोरर्धमार्गे पूर्ववच्छ्राद्धम् । श्राद्धानन्तरं तत्रैव पुनर्भूतनाम्ना पिण्डदानम् । भूत एतत्त इति प्रयोगः । समाषकुम्भदानं च । धनिष्ठादिपञ्चकमरणे पञ्चरत्नानि मुखे मुक्त्वा **वह वपामि**त्याहुतिद्वयं दत्त्व

दाहः । रत्नपञ्चकं–“वज्रमौक्तिकवैडूर्यपुष्परागेन्द्रनीलकम्” इति । **गरुडपुराणे** तु–दर्भमयपुत्तलकचतुष्टयं कृत्वा तैः **या ते धामानि परमाणी**त्यादिशिक्षामन्त्राभिमान्त्रितैः सह दग्ध्वा सूतकान्ते पुत्रादिः शान्तिकं कुर्यात् । तत्र च तिलघृतहिरण्यभाजनोपानच्छत्रगवादेः प्रेतोद्देशेन दानम् । ततो निर्हरणानन्तरं श्मशानभूमौ दक्षिणाशिरसं शवं स्थापयेत् । ततश्चितास्थाने पूर्ववदेकोद्दिष्टं कुम्भदानं च । ततः साधकनाम्ना प्रेतनाम्ना वा पिण्डदानम् । कुम्भदानं च । तीर्थाभावे तीर्थानि ध्यायेत् । ततः प्रेतस्य केशश्मश्रुलोमानि छित्त्वा खनेत् । ततः चितास्थाने सकृत्सकृत्पञ्च भूसंस्कारान्कृत्वा ततः काष्ठादिचितिं संपाद्य तत्र दक्षिणाग्रीवमुत्तरलोमं कृष्णाजिनमास्तीर्य तस्मिन् दक्षिणाशिरसमुत्तानं प्रेतं निधाय प्रेतसंबन्धिवस्त्रं द्विधा कृत्वैकेन प्रेतशरीरमाच्छाद्य द्वितीयं भूमौ श्मशानवास्यर्थं क्षिपेत् । ततः प्रेतस्य करे प्रेतनाम्नैव पिण्डदानं, कुम्भदानं च । ततः प्रेतमाज्येनाभ्यज्य मुखे दक्षिणोत्तरनासिकाचक्षुःश्रोत्रेषु च क्रमेण सप्तहिरण्यशकलानि क्षिपेत् । ततः पात्रप्रतिपत्तिः–स्रुचं मुखे, दक्षिणनासिकायां स्रुवः, शिरसि चमसं, प्रणीताप्रणयनं पार्श्वयोः शूर्पे वृषणयोररणी । प्रोक्षणीपात्रादीनामन्तरोरुप्रक्षेपः चात्रौविलीकयोश्च । लोहानां मृन्मयानां च ब्राह्मणाय दानमप्सु वा प्रक्षेपः । ततः–“कृत्वा सुदुष्करं कर्म जानता वाऽप्यजानता । मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम् ॥ धर्माधर्मसमायुक्तं लोभमोहसमावृतम् । दहेयं सर्वगात्राणि दिव्याँल्लोकान्स गच्छतु” । ततश्चन्दनपुष्पाक्षतैरग्नेः पूजनम् । तत्र मन्त्रः । “त्वं भूतकृज्जगद्योने त्वं लोकपरिपालकः । उक्तसंस्कारकस्तस्मादेनं स्वर्गं मृतं नय” । तत आवसथ्येन चितेर्दक्षिणप्रदेशे आदीपनम् । ततो मृतस्य पुत्रो भ्राता वाऽन्यो वा ब्राह्मणः कृतावसथ्यः आवसथ्ये आज्यसंस्कारं कृत्वा स्रुवेणा**ऽस्मात्त्वमि**त्याहुतिं समिद्वर्जं जुहोति । स्रुवं दक्षिणनासिकायां निधाय स्फ्यं दक्षिणहस्ते स्थापयेत् । तत उदकपूर्णं कुम्भं स्कन्धे कृत्वा तेन प्रेतपादादारभ्याऽप्रदक्षिणां धारां दत्त्वा रोदनं कुर्यात् । सूतिका वा रजस्वला वा यदि प्रेतस्पर्शं करोति तदोदकपूर्णे कुम्भे पञ्चगव्यं प्रक्षिप्य **आपो हि ष्ठा** इत्यादिभिरभिमन्त्र्य ब्राह्मणानुज्ञया पञ्चदश प्राजापत्यान्कृत्वा तेनोदकुम्भेन शतकृत्वः स्नापयित्वा नव्येन वस्त्रेण संवेष्ट्य दहेत् । सूतिकामरणे रजस्वलामरणेऽप्येष एव विधिः । स्त्री चेत्सहगमनं कुर्यात्तदा संनिकृष्टमरणं स्वामिनं प्रति वदति । “देवैः संपादितो मह्यं पतिस्त्वं सर्वदैवतम् । त्वया सह गमिष्यामि भर्त्ता त्वं चाग्रजन्मनि” इति संकल्पः । स्नात्वा शक्त्या तिलधेन्वादिदानम् । कुङ्कुमाञ्जनमुकुराद्यैरात्मानमलंकृत्य पायसमाचारतो भुञ्जीत । “वैधव्यता न कदापि भूयात्पत्या वियोगो न ममापि चास्तु । वन्ध्यात्वमेतन्न कदापि चास्तु दौर्भाग्यमेतन्न कदापि चास्तु” एवमुक्त्वा समस्तबन्धून् विसृज्य भर्तृगतान्तःकरणा स्वगृहमक्षतैर्वर्द्धाप्य कुङ्कुमाक्तहस्ताङ्कितद्वारं कृत्वा श्मशानं प्रति नीयमानं स्वामिनमनुयाति प्रतिपदमश्वमेधफलं जानती । वडवामारुह्य वा गच्छेत् । ततः सहगमनार्थं स्नास्य इति स्नात्वा नव्यं वस्त्रं परिधायात्मानमलंकृत्य प्रतिनिधिना, स्वयं वा पिण्डदानं कृत्वाऽग्नये अर्घ्यं दद्यात् । नानाफलानि हस्ते कृत्वा “ चितिस्थो भगवानग्निर्विष्णुरूपी सनातनः । पतिसालोक्यलाभाय गृहाणार्घ्यं नमोऽस्तु ते ” इति । ततः स्तुतिः । “ त्वं ब्रह्मा त्वं च वै विष्णुस्त्वं रुद्रस्त्वं प्रजापतिः । त्वं सूर्यो वसवश्चाष्टौ परमात्मा त्वमेव हि ॥ त्वमेव कारणं विष्णो शरणं तु पतिर्मम । स्वर्गो वा ह्यपवर्गो वा यत्र यत्र गमिष्यसि ॥ तत्र तत्र ह्यहं पृष्ठे लग्नमेष्यामि मा शुचः । ब्रह्महत्यादिभिः पापैस्त्वामाकृष्ये यमालयात् । अहं ब्रह्मा तथा विष्णू रुद्रश्चैव प्रजापतिः” “आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च । एते च सर्वे मम साहसेन तुष्यन्तु देवा ऋषयश्च सर्वे” । ततः प्रदक्षिणासप्तकं कृत्वा चितां प्रविशेत् । तत्र मन्त्रः–“इदं शरीरं त्वतिमङ्गलं प्रभो दग्ध्वा कृशानो कुरु भव्यमाशु । तथैव भर्त्तुः कुरु दिव्यदेहं भर्त्तुः समीपं भगवन्व्रजामि”। “किमनया कृतं साधु भवेद्यदि तवानघ । इदं शरीरमालिङ्ग्य प्रविशामि हुताशनम्” इति संक्षेपतः **सहगमनविधिः** । “निःशेषस्तु न दग्धव्यः” इति वचनात्सशेषो दाहः । ततः सप्त सप्त प्रदक्षिणाः चिताग्नेः कुर्वन्ति प्रतिप्रदक्षिणमेकैकां समिधं क्षिपन्तः । ततः कुठारमादाय उल्मुकोपरि प्रहारसप्तकं दद्यात् । **तूष्णीं···तरम्**–ग्रामाग्निना लौकिकेनाग्निना । **अस्मात्त्वमि**ति मन्त्रं विना इतरमकृतावसथ्यम् । ततः क्रव्यादाय नम इत्यग्निमप्रदक्षिणं त्यक्त्वा कनिष्ठपूर्वाः पूर्ववद्यमगाथां गायन्तो नद्यादौ गच्छन्ति । **संयु···ह इति**–संयुक्तः संबन्धी तम् । संबन्धनिरूपकस्य नानात्वान्नियतं निरूपकमाह–**मैथुनमिति**–उत्तरदानाभिज्ञं तं श्यालकमन्यं वा पुरुषमुदकमुदकदानाज्ञाम् । कथमत आह–“**उदकं करिष्यामहे** -इति मन्त्रेण। उत्तरमाह–**कुरु···प्रेते**–अतिक्रान्तशतवर्षे तूत्तरमाह-**कुरु···स्मिन्**। **सर्वे···माद्वा**-ज्ञातय सपिण्डाः समानोदकाश्च सर्वे।सापिण्ड्यमाह आ सप्तमात्पुरुषात् । आङ् अभिव्याप्त्यर्थः।समानोदकत्वमाह–**दशमादि**ति। ते सर्वे अपः जलमभ्यवयन्ति प्रविशन्ति । **समा···रेयुः**–तथा च तद्व्यतिरेकेऽपः प्रवेशादिव्यतिरेके इत्यर्थः । **एकवस्त्राः प्राचीनावीतिनः सव्यस्थानामिकयाऽपनोद्याऽप नः शोशुचदघमिति दक्षिणामुखं निमज्जन्ति** । अनमन्तोऽसंधावमानाश्चेति शेषः । अपनोदनं तूष्णीं, निमज्जनं मन्त्रेण । अशिष्टाः सर्वमलापहं स्नानं वा कुर्वन्ति । अङ्गोद्वर्तनस्य विकल्पः । **प्रेता···त्त** इति–ततस्तटे आगत्याचम्य शिखां बद्ध्वा दक्षिणाग्रानृजून्

युग्मान् दर्भान् हस्तयोः कृत्वा सतिलपाणिभ्यामुदकमादाय दक्षिणामुखा वाग्यताः पितृतीर्थेन भूमौ पाषाणे वाऽमुकसगोत्राऽमुकप्रेतैतत्त उदकमित्येकैकमञ्जलिं प्रसिञ्चन्तीत्यर्थः । ततः **गरुडपुराणाद्** दन्तधावनं कृत्वा तत्त्यागः । "जलाञ्जलौ कृते पश्चात्कृत्वा वै दन्तधावनम् । त्यजन्ति गोत्रिणः सर्वे दिनानि नव काश्यप" इति । **उत्ती···देयुः**–उदकादुत्तीर्णान्परिहितशुष्कवस्त्रान्सकृन्निष्पीडितोदग्दशं प्रसारितस्नानवस्त्रान्पवित्रदेशे तृणवत्युपविष्टान्सुहृदः पुराणेतिहासकथाभिः संसारानित्यतां ख्यापयन्तः शोकापनोदं कुर्युरित्यर्थः । **अन···ष्ठपूर्वाः**–ततो ब्राह्मणानुज्ञया उत्थायाऽनवेक्षमाणाः पश्चादनवलोकयन्तः रीतीभूताः पङ्क्तीभूता अधोमुखाः कनिष्ठाः पूर्वा अग्रे येषां ते तादृशा· ग्रामं प्रत्यायन्ति । **निवे···शन्ति**–निवेशनं गृहं तस्य द्वारे पिचुमन्दस्य निम्बस्य त्रिप्रभृतीनि पत्राणि विदश्य दन्तैः खण्डयित्वा आचम्योदकाद्यालम्भः । तद्यथा । शमी पापं शमयत्विति शमीमालभन्ते । अश्मेव स्थिरो भूयासमित्यश्मानम् । अग्निर्नः शर्म यच्छत्वित्यग्निम् । तूष्णीमुदकं, गोमयं, गौरसर्षपांस्तैलं च, दूर्वाप्रवाला नड्वा (?) न्वृषभं च यथाक्रममालभ्य ततः पादेन पाषाणमाक्रम्य गृहं प्रविशन्तीत्यर्थः । इदानीं पुत्रादिकर्तृकान्नियमानाह-**त्रिरा···र्वीरन्**–त्रिरात्रपदं सूतकोपलक्षणं, यावत् सूतकमित्यर्थः । दानाध्ययनवर्जिताः मलिना दीनाऽधोमुखाः सर्वभोगविवर्जिताः अधःशयनोपवेशनकारिणः परस्परमसंस्पृष्टाः अङ्गसंवाहनं केशसंमार्जनं चाकुर्वन्तः शक्त्योपोषितैकरात्रा उपोषितत्रिरात्रा वा किंचन कर्म न कुर्युर्न वा कारयेयुः । उपोषणाऽशक्तिपक्षमाह–**क्रीत्वा···गृहम्**–दिवा दिनशेषे । एवकारस्तु रात्रौ भोजनयोगव्यवच्छेदार्थः । अन्नमक्षारालवणं माषान्नापूपप्रायसर्वर्जितं व्रीहियवादिकं पत्रावल्यादिषु एकवारम् अल्पं कुतश्चित्क्रयेण प्राप्तं लब्धं वा । एतेन प्रत्यहं भोजनाय परिगृहीतस्य निषेधः । मां निषेधस्योपलक्षणत्वादक्षारादिलाभः । भोजनकाले च भोज्यान्नाद्भक्तमुष्टिमादायाऽमुकगोत्रामुकप्रेतैष ते भक्तमुष्टिरिति भूमौ भक्तमुष्टिं दद्यात् अस्थिसंचयनपर्यन्तम् । महागुरौ मृते द्वादशरात्रमेते नियमाः । अत्र प्रथमतृतीयपञ्चमनवमदिनेषु सर्वे सपिण्डाः प्रथमदिनवदुदकदानं स्नानपूर्वकं कुर्वन्ति । तैः सह भोजनं चेति केचित् । प्रेतोपकारायाखण्डदीपप्रज्वालनं पुत्रादिभिः कर्तव्यम् । एतत्सर्वं कथं कार्यमत आह–**प्रेता···ग्राहम्**–अवनेजनदानप्रत्यवनेजनेषु नामग्राहं प्रेतनामग्राहं यथा स्यात्तथा प्रेताय पिण्डं दत्त्वा दिवैवाऽमांसमन्नमश्नीयुरित्यन्वयः । तत्र विधिः **गरुडपुराणे**–"दशाहं बान्धवाः सर्वे सर्वे चैवार्द्रवाससः । पिण्डं प्रतिदिनं दद्युः" इति । देवतायतने तीर्थे गृहद्वारि अरण्ये श्मशाने वा पिण्डदानम् । तत्रादौ केशश्मश्रुवपनं, नखलोम्नां निकृन्तनं च ज्येष्ठेन पुत्रेण कर्त्तव्ये कनिष्ठाः सह यान्ति । तत्राद्यदिने स्नात्वा अहते वाससी परिधाय प्रेतस्य मूर्ध्नो निष्पत्त्यर्थं क्षुत्तृषानिवृत्तये प्रेतत्वनिवृत्तये च पिण्डदानं करिष्ये इति संकल्प्य नीवीकरणं, रेखां कृत्वाऽमुकसगोत्रामुकप्रेतावनेनिक्ष्वेत्यवनेजनं समूलदक्षिणाग्रदर्भास्तरणम् । अमुकसगोत्रामुकप्रेतैतत्त इति पिण्डदानम् । प्रत्यवने···नीवीविस्रंसनम् । नीवीबन्धनं विस्रंसनं न भवति वा "नीवीं पितृणाम्" इति श्रुतेः । प्रेतस्य चापितृत्वात् । प्रतिपिण्डं सूत्रप्रक्षेपः । चन्दनपुष्पधूपदीपशीतोदकदानम् । ऊर्णातन्तुमयवस्त्रदानम् । नैवेद्यदानम् । गोत्र प्रेत इदं ते नैवेद्यं पिण्डार्चनमुपतिष्ठतामिति प्रतिदानं प्रयोगः । ततः प्रेतोद्देशेन समाषसजलकुम्भदानम् । प्रयोगस्तु–अयं कुम्भः माषान्नजलसहितः सोपवीतः गन्धाद्यार्चितः सघृतान्नसहितः कस्मैचिद्ब्राह्मणाय दास्यमानः अमुकसगोत्रामुकप्रेत ते उपतिष्ठतामिति । ततः सलिलाञ्जलिमादायामुकसगोत्रामुकप्रेतैष तोयाञ्जलिस्ते उपतिष्ठतामिति पिण्डसमीपे सतिलं तोयाञ्जलिं दद्यात् । एकतोयपात्रम् । इदं तोयपात्रं तिलपुष्पसहितं गोत्र प्रेतं ते उपतिष्ठतामिति । अथवाऽञ्जलिमात्रदानम् । अनेन पिण्डदानेन कुम्भदानेन तिलोदकदानेन वाऽमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्तिरस्तु । शीर्ष्णो निष्पत्तिरस्तु । क्षुत्तृषानिवृत्तिरस्तु । सद्गतिप्राप्तिरस्तु । ततः पिण्डमुदके प्रक्षिप्य स्नात्वा गर्ते प्रेतोद्देशेन तैलकल्कोदकानां दानम् । मासे, पक्षे, तिथौ गोत्रस्य प्रेतस्य प्रेतत्वनिवृत्तिपूर्वकश्रमापनयनार्थं गर्त्तेषु तैलकल्कोदकैः स्नापनमहं करिष्ये । गोत्र प्रेत अत्र तैलेन स्नाहि । अत्र कल्केन स्नाहि । अत्रोदकेन स्नाहि । अनेन तैलकल्कोदकदानेन गोत्रस्य प्रेतस्य प्रेतत्वनिवृत्तिरस्तु । श्रमापनयनमस्तु । एवं दशाहं कर्तव्यम् । एतच्च पिण्डदानं फलमूलपायसशाकसक्तुगुडौदनानामन्यतमेन तिलघृतमधुक्षीरामिश्रेण भूमिगर्त्ते पाषाणे स्थण्डिले वा कर्तव्यम् । ततः सचैलं कनिष्ठपूर्वाः गृहमागत्य शस्त्रपाषाणाद्युल्लङ्घ्य गृहप्रवेशः । ततः पूर्वोक्तं शक्त्यपेक्षमभोजनं भोजनं वा । **मृन्मये···त्येके**–योग्यतया पक्वे मृन्मये । निधानं च चत्वरादौ , वलभ्यां त्रिकाष्ठ्यादौ वा एकस्मिन्क्षीरं पात्रान्तरे चोदकं संस्थाप्याऽपसव्यं कृत्वा दक्षिणामुखः उपविश्य गोत्रस्य प्रेतस्य मार्गश्रमनिवृत्त्यर्थं मृन्मये क्षीरोदकयोर्निधानमहं करिष्य इति संकल्प्यामुकसगोत्र प्रेतात्र शीतोदकेन स्नाहि । अमुकसगोत्र प्रेतात्र क्षीर पिब । मार्गे श्रमनिवृत्तिरस्तु । शावमाशौचं प्राप्य तां रात्रिमित्येके । त्रिरात्रमित्यन्ये । दशरात्रमित्यपरे ॥ केचित्तु **त्रिरात्रं शावमाशौचं दशरात्रमित्येक** इत्येतत्सूत्रं पृथगेव वयोऽवस्थावृत्तस्वाध्यायाद्यपेक्षया सूतकनिर्णायकमित्याहुः । **न स्वा···रन्**–स्वाध्यायो वेदः । तस्याध्ययनं यावदाशौचं निषिध्यते । **नित्या···र्जम्**–नित्यानि संध्यावन्दनसायंप्रातर्होमादीनि । वैतानमग्निहोत्रम् । **शालाग्नौ चैके** । **एतानि कुर्युः**–विहितप्रतिषिद्धत्वाद्विकल्पः । अनुष्ठानपक्षे अन्ये कुर्युर्न स्वयमित्यर्थः ।

प्रेतस्पर्शिनो ग्रामं न प्रविशेयुरा नक्षत्रदर्शनात्–एतच्च दिवा मृतस्य । **रात्रौ चेदादित्यस्य**–आ दर्शनादित्यनुषङ्गः । एतच्च रात्रिमृतस्य । प्रवेशनादि समानमितरैः । इतरे असपिण्डाः तैः प्रेतस्पर्शिभिरिति शेषः । तैस्तुल्यं पिचुमन्दपत्रविदंशनादि पुत्रादेः । तथा च तेषामपि पुत्रादिभिः समानं गृहप्रवेशनादि भवतीत्यर्थः । प्रसङ्गाद् द्वितीयदिवसादिकृत्यं लिख्यते—द्वितीयेऽह्नि–प्रेतस्य कर्णाक्षिनासिकानिष्पत्त्यर्थं प्रथमदिवसवत्पिण्डदानं, कुम्भभोजनदानं च । द्वौ अञ्जली । द्वे तोयपात्रे, अथवाऽञ्जलित्रयं न पात्रे । तृतीयेऽह्नि– ग्रीवामुखभुजवक्षसां निष्पत्तये पिण्डदानं, कुम्भभोजनदानं च । त्रयोऽञ्जलयः, त्रीणि तोयपात्राणि । अथवा पञ्चाञ्जलय एव न पात्राणि । चतुर्थेऽह्नि–संचयनम् । तत्र विधिः–पूर्वं स्नात्वा दाहभूमावेकोद्दिष्टं श्राद्धं कृत्वा श्राद्धव्यतिरिक्तानयुग्मांस्त्रिप्रभृतीन् ब्राह्मणान् भोजयित्वा पलाशवटादिपर्णस्य वृन्तेन भस्मगुप्तान्यस्थीनि प्रकटानि कृत्वाऽङ्गुष्ठकनिष्ठिकाभ्यां तान्यस्थीनि गृहीत्वा पलाशपुटवटपुटकादौ वा प्रक्षिपति । अस्थिग्रहणक्रमः । "शिरसो, वक्षसः, पाणिभ्यां, पार्श्वाभ्यां चापि, पादतः । अप्रदक्षिणमस्थीनि गृह्णातीत्याह **गोभिलः**॥"शम्यवकाः कर्दमं च भस्मराशौ प्रक्षिपति । शमीशब्दः शाखापरः । अवकाः शैवालाः । आर्द्रा मृत्तिका कर्दमः । यक्षकर्दम इति केचित् । ततः पत्रपुटस्थान्यस्थीन्याज्येनाङ्क्त्वाऽवकाः कर्पूरागरुचन्दनकस्तूरिकाकेसरादिसुरभिद्रव्यैर्मिश्रयेत् । ततः दक्षिणपूर्वायतां कर्षूं खात्वा कुशानास्तीर्य तत्र हरिद्रया रक्तं वस्त्रखण्डमास्तीर्य **वागित्यनेन मन्त्रेण** तस्मिन्वस्त्रखण्डेऽस्थीनि प्रक्षिपेत् । ततः संचयनानन्तरं जीवतोऽस्य प्रेतस्य यदिष्टमन्नवस्त्रादि तद्विप्रेभ्यः प्रेतस्य प्रेतत्वानिवृत्तिमुद्दिश्य दद्यात् । ततः सचैलं स्नात्वा चतुर्थदिवससंबन्धिपिण्डदानं नाभिलिङ्गगुदनिष्पत्त्यर्थं कुम्भभोजनदानं च । चत्वारस्तोयाञ्जलयः । चत्वारि तोयपात्राणि । अथवा सप्ताञ्जलय एव देयाः । न पात्राणि । पञ्चमेऽह्नि ऊरुजङ्घापादनिष्पत्त्यर्थं पिण्डदानं कुम्भभोजनदानं च, पञ्च तोयाञ्जलयः, पञ्च पात्राणि, अथवा नवाञ्जलय एव न पात्राणि । षष्ठे–सर्वमर्मनिष्पत्त्यर्थं पिण्डदानं, षडञ्जलयः, पात्राणि च । अथवैकादशाञ्जलय एव न पात्राणि । सप्तमे–शिरानिष्पत्त्यर्थं पिण्डदानं, कुम्भभोजनदानं च । सप्ताञ्जलयः, तावन्ति पात्राणि च । अथवा त्रयोदशाञ्जलय एव न पात्राणि । अष्टमे–लोमदन्तानिष्पत्तये पिण्डदानं कुम्भभोजनदानं च । अष्टावञ्जलयः, तावन्ति पात्राणि च । अथवा पञ्चदशाञ्जलय एव न पात्राणि । नवमे–पूर्णशरीरानिष्पत्त्यर्थं पिण्डदानं कुम्भभोजनदानं च । नवाञ्जलयः, पात्राणि च । अथवा सप्तदशाञ्जलय एव न पात्राणि । दशमे-क्षुन्निवृत्त्यर्थं पिण्डदानं कुम्भभोजनदानं च । दशाञ्जलयः पात्राणि च, अथवैकोनविंशतिसंख्याकास्तोयाञ्जलय एव । अथवा प्रत्यहं दशदशाञ्जलय एव देयाः । प्रत्यहं गर्त्ते तैलकल्कोदकानां दानम् । अथवा दशमेऽह्नि दशगर्त्तेषु तैलकल्कोदकानां दानं न प्रत्यहम् । अत्र दशाहेष्वयुग्मदिनेषु पिण्डदानात्प्रागुत्तरं वा केचिन्नवश्राद्धमाहुः । तत्र पिण्डद्वयदानं प्रेतोद्देश्यकम् । अक्षय्योदकदानं दक्षिणादानं च । एतद्दशाहपिण्डदानमेकेन कर्त्रा एकेन द्रव्येणैकस्मिन्नेव देशे कर्त्तव्यम् । ततः सूतकनिवृत्त्यर्थं केशश्मश्रुवपनं नखलोमनिकृन्तनं च सर्वे सपिण्डाः कारयेयुः । ततः सचैलं स्नात्वा कर्मसमयपरिहितवस्त्राणि आश्रितेभ्योऽन्त्यजेभ्यो वा दद्यात् । ततस्तिलतैलसंयुक्तगौरसर्षपादिकल्केन स्नात्वा अहतवाससः प्रक्षालितशुक्लवाससो वा सुवर्णदूर्वादीनि मङ्गलानि स्पृष्ट्वा विष्णुस्मरणादिना शुद्धा भवन्ति । गृहेषु स्पृष्टानां मृन्मयादीनां पात्राणां परित्यागः । वस्त्रासनखट्वादीनां क्षालनं, गृहस्य संमार्जनलेपनादि । आबालं सचैलस्नानम् । एवं शुद्धिं संपाद्य स्वस्तिवाचनं ब्राह्मणेभ्यः कारयित्वा दानं च तेभ्य एव दद्यात् । ततोऽभ्यङ्गस्नाताभिः सुवासिनीभिराहृतजलेन पाकं कृत्वा भोजनं कुर्युः । दशाहमध्ये त्रिरात्रादूर्ध्वं दर्शपाते दर्शदिन एव सर्वं दशाहसंबन्धि पिण्डोदकदानं समापयेत् । त्रिरात्रादर्वागपि दर्शपाते समापनं केचिदाहुः । एतच्च मातापितृव्यतिरिक्तविषयम् । इति **दशाहकृत्यम्** ॥ **अथैकादशाहकृत्यम्**–तत्र साग्नेर्दाहदिनादेकादशाहे, निरग्नेस्तु मरणदिनादेकादशाहे विधिवत्स्नात्वा षोडशभिरुपचारैर्विष्णुपूजनपूर्वकं विष्णुतर्पणम् । तद्यथा–प्राणानायम्य देशकालौ स्मृत्वाऽमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं वृषोत्सर्गादियोग्यताप्राप्त्यर्थं विष्णुपूजनतर्पणे विधास्य इति संकल्प्य पूजां कृत्वा वैष्णवैर्मन्त्रैः पौराणैर्वैदिकैश्च तर्पणं कुर्यात् । "कार्यं पुरुषसूक्तेन मन्त्रैर्वा वैष्णवैरपि । दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरन्॥ अनादिनिधनो देवः शङ्खचक्रगदाधरः । अव्ययः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव"इति अनेन प्रेतस्य प्रेतत्वनिवृत्तिरस्तु । वृषोत्सर्गयोग्यताप्राप्तिरस्तु । इति विष्णुतर्पणं कृत्वा वृषोत्सर्गः । स च व्याख्यानाऽवसरे लिखितः । **अथैएकादशाहश्राद्धम्** । तत्रैकादश ब्राह्मणाः यथाशक्त्ययुग्मा वा । एको वा । एकादशाहविहितप्रेतश्राद्धे ब्राह्मणकार्यमित्यादि । विशेषस्तु निमन्त्रणे । "गतोऽसि दिव्यलोकं त्वं कृतान्तविहितात्पथः । मनसा वायुभूतेन विप्रे त्वाऽहं नियोजये ॥ पूजयिष्यामि भोगेन विप्रे त्वाऽहं नियोजये" इति निमन्त्रणम् , ततः ब्राह्मणानां श्मश्रुकर्मनखच्छेदौ कारयित्वाऽभ्यङ्गस्नानं कारयेत् । ततः सचैलं स्नात्वा तुष्टेन चेतसा स्वागतं वः इति पृष्ट्वा विप्रपादयोः पाद्यदानमर्घदानं, ब्राह्मणस्य पादप्रक्षालनमात्मनश्च । आचम्यासने ब्राह्मणमुपवेश्योपरि छत्रं प्रकल्पयेत् । **सप्तव्याधा जपोऽवसीदथेत्यन्तः** । गयागदाधरयोर्नमस्कारौ । प्रणववर्जितं प्राणायामोऽथः ब्रह्मभूर्भुवःस्वरित्यन्ताः । ततः आचम्य देशकालौ स्मृत्वाऽमुकगोत्रस्या-

ऽमुकप्रेतस्य प्रेतत्वानिर्वृत्त्यथमाद्यमासिकश्राद्धमहं करिष्य इति संकल्प्य नीवीकरणम्। **अपहता** इति दिग्विदिक्षु तिलप्रक्षेपः। ततो **यद्देवा** इति त्र्यृचेनोदकमभिमन्त्र्य दुष्टदृष्टिनिपातदूषितः श्राद्धोपहारः पूतो भवत्वित्युपहारप्रोक्षणम्। न भूरादिजपः। तूर्ष्णीं तिलविकिरणम्। गोत्र प्रेत इदं ते आसनम्, अर्घः। "तिलोऽसि प्रेतदेवत्यो गोसवो० पृक्तः प्रेताँल्लोकान्प्रीणाहि नः" इति तिलावापः। **स्मृत्यर्थसारकार**मते पितृनमःस्वधाशब्दवतो मन्त्रस्य लोपः। अतस्तन्मते तूर्ष्णीं तिलावापः। अर्घदानम्। पात्रन्युब्जीकरणाभावः। अर्चनम्। गोत्र प्रेत इदं ते चन्दनमुपतिष्ठताम्। इमानि पुष्पाणि। एष धूप एष दीपः। इदं बार्हस्पत्यं वासः, इमे वाससी इति वा। इदं वारुणं कमण्डल। इमे अङ्गिरोदैवते उपानहौ। प्राजापत्ये उपवीते। छत्रं, प्रेतसंबन्धीनि वस्त्राणि, शय्या, गादः, गृहम्, आसनं, दासी, आयुधानि, उपतिष्ठताम्, उपतिष्ठेताम् उपतिष्ठन्तामिति यथायथं प्रयोगः। श्राद्धं समाप्य पङ्क्तिमूर्द्धन्याय दद्यात्। अर्चनविधेः परिपूर्णतेति प्रार्थयेत्। आचमनं निहन्मीत्यादि तिलविकिरणम्। अद्येत्याद्यमुकप्रेतस्य प्रेतत्वानिवृत्त्यर्थमेकादशाहविहितस्याद्यश्राद्धस्यैकोद्दिष्टविधेर्यत्कृतमित्यादि। संपन्नं, पिण्डदानं, रेखा, अवनेजनं, कुशास्तरणम्। प्रेतैतत्त इति पिण्डदानं, प्रत्यवनेजनं, नीवीविस्रंसनमर्घः। तूर्ष्णीं सूत्राणां दानम्, इदं चन्दनं गोत्र प्रेत ते पिण्डार्चनमुपतिष्ठतामिति प्रतिद्रव्यं प्रयोगः। धूपः, दीपः, फलं, ताम्बूलं, नैवेद्यम्। अर्घाच्छादनचन्दनपुष्पधूपदीपनैवेद्यैः पिण्डस्यार्चनं परिपूर्णम्। अनेन पिण्डदानेन गोत्रस्य प्रेतस्य प्रेतत्वनिवृत्तिः कुम्भदानयोग्यताप्राप्तिः। आचमनम्। विप्रहस्ते जलकुशपुष्पाक्षतान् तूर्ष्णीमर्पयित्वाऽक्षय्योदकं दद्यात्। गोत्रस्य प्रेतस्य दत्तं श्राद्धमुपतिष्ठतामिति। यस्योद्दिष्टं तस्योपतिष्ठतामिति। ततः पवित्रं पिण्डस्योपरि दत्त्वाऽवनेजनजलशेषं तस्योपरि निनयेत् तूष्णीम्। ततो दक्षिणादानम्। अस्य श्राद्धस्य समृद्ध्यर्थं रजतं दक्षिणां प्रेतश्राद्धब्राह्मणाय तुभ्यं संप्रददे। ततो हिरण्यदास्युपानच्छत्रोदकुम्भवस्त्राणां दक्षिणात्वेन दानं गुणवते। अन्येभ्यो रजतदानं ताम्बूलदानं गोत्र प्रेत ते उपतिष्ठतामिति। पिण्डोत्थापनं, पात्रचालनं, संचराभ्युक्षणम्। अस्यैकादशाहविहितस्याद्यमासिकश्राद्धस्यैकोद्दिष्टविधेर्यत्कृतं यन्न कृतं तत्सर्वं विष्णोः प्रसादात्परिपूर्णम्। अनेन श्राद्धेन प्रेतस्य प्रेतत्वनिवृत्तिः। कुम्भदानयोग्यताप्राप्तिः। ततः स्नानम्। अस्य श्राद्धस्य पुराणभेदप्रयोज्यप्रकारभेदा **हेमाद्रौ** विलोक्याः। ततः रुद्रोद्देशेनैकादशब्राह्मणेभ्यो भोजनदानम्। पुनः स्नात्वा कुम्भदानम्। विष्णोः पूजनम्। ततः प्रेतोद्देशेन सान्नत्रयोदशोदकुम्भदानम्। प्रयोगः। अपसव्यं कृत्वा इमे त्रयोदशोदकुम्भाः सान्नोदकाः सयज्ञोपवीताः नानानामगोत्रेभ्यो ब्राह्मणेभ्यः दास्यमानाः गोत्र प्रेत ते उपतिष्ठन्तामिति। एभिः कुम्भदानैः गोत्रस्य प्रेतस्य प्रेतत्वनिवृत्तिः। उत्तरकर्माऽधिकारप्राप्तिः। अष्टविधपददानम्। इमानि पदानि नानादैवतानि गोत्र प्रेत ते उपतिष्ठन्तामिति। एवं सर्वत्र। अश्वरथमहिषीशय्यादानम्। अश्वः यमदेवतः। रथः विष्णुदेवतः। यमदेवता महिषी। इयं शय्या, तिलपात्रघृतपात्रे सहिरण्ये। गौः। भूमिः। तिलाः। हिरण्यम्। गन्धादिभिरर्चनं देयस्य पात्रस्य च॥ चतुर्दशोपदानानि। स्त्रीमरणे वंशपात्री। प्रयोगः। इयं वंशपात्री स्त्र्युपभोगयोग्यवस्तुयुक्ता गन्धाद्यर्चिता कस्मैचिद्ब्राह्मणाय विष्णुरूपाय तुभ्य०सं०। संवत्सरपर्यन्तं प्रत्यहं सान्नजलकुम्भदानं दीपदानं देवालयादौ। ततः ऋणधेनुदानम्। तत्र प्रयोगः। देशकालौ स्मृत्वा प्रेतस्य ऋणत्रयापाकरणाय इमामृणधेनुसंज्ञकां गां रुद्रदैवतां कस्मैचिद्ब्राह्मणायेत्यादि। ततो विष्णुपूजनम्। गृहमागत्य वैश्वदेवः कार्यः। शान्तिकरणम्। **इत्येकादशाहकर्म**॥ अथ द्वादशाहसंबन्धि कर्तव्यमुच्यते। आरब्धे वैश्वदेवे आदौ वैश्वदेवः। ततस्तीर्थे गत्वा विधिवत्स्नात्वा विष्णुं संपूज्याद्येत्यादि गोत्रस्य प्रेतस्य प्रेतत्वनिवृत्त्यर्थमूनमासिकश्राद्धं करिष्य इति संकल्प्य श्राद्धं कुर्यात्। अथवेदमूनमासिकं सप्तविंशतितमे दिनेऽष्टाविंशतितमे वैकोनत्रिंशत्तमेऽह्नि कर्तव्यं नन्दादिवर्जिते। ततो मासपूर्तौ मृताहे द्वितीयमासिकमेकादशाहवत्। ततस्तृतीये पक्षे नन्दादिवर्जिते त्रैपक्षिकं श्राद्धं कर्तव्यम्। ततस्तृतीयमासस्यादिमृताहे तृतीयमासिकम्। चतुर्थे मासे चतुर्थमासिकम्। पञ्चमे मासे पञ्चममासिकम्। षष्ठे मासे षाण्मासिकम्। ततः षष्ठे मासे एकेन दिवसेनोने, द्वाभ्यां वा दिवसाभ्यामूने, त्रिभिर्वा दिवसैरूने ऊनषाण्मासिकम्। ततः सप्तममासादौ सप्तममासिकम्। अष्टममासेऽष्टममासिकम्। नवमे नवममासिकम्। दशमे दशममासिकम्। एकादशे एकादशमासिकम्। द्वादशे द्वादशमासिकम्। अत्राप्येकेन दिनेन, द्वाभ्यां, त्रिभिर्वोने ऊनाब्दिकम्। अत्रोनमासिकत्रैपक्षिकषाण्मासिकेषु प्रतिश्राद्धं द्वादशकुम्भदानम्। अन्येष्वेकैकः कुम्भः। संवत्सरपर्यन्तं प्रत्यहमपि सान्नोदकुम्भदानं प्रेतस्य प्रेतत्वनिवृत्तिमुद्दिश्य दीपदानं च संवत्सरावधि। ततः प्रथमसंवत्सरस्यान्तिमे दिने सपिण्डीकरणम्। एतच्च संवत्सरसपिण्डीकरणपक्षे। त्रिपक्षद्वादशाहवृद्धिश्राद्धादिनिमित्तापाते तथैकादशेऽह्नि साग्नेर्दर्शपाते तद्दिन एव सपिण्डीकरणकर्तव्यताप्राप्तौ वृषोत्सर्गानन्तरमाद्यश्राद्धादि सर्वं कृत्वा सपिण्डीकरणं कृत्वा पिण्डपितृयज्ञः कार्यः। द्वादशाहादौ कर्तव्यताप्राप्तावूनमासिकादि कृत्वा सपिण्डीकरणम्। एवं वृद्धिश्राद्धादिनिमित्तापाते त्वकृतानुष्ठानपूर्विका सपिण्डीकरणकर्तव्यता। एवं चैकादशाहादौ सपिण्डनकर्तव्यतायां पृथगनुष्ठानकालासंभवादाद्यश्राद्धादीन्यूनाब्दिकान्तानि सपिण्डीकरणयोग्यतावाप्तये तन्त्रेणाहं करिष्य इति संकल्प्यैकाद्येकपिण्डकरणादपि सर्वेषां श्राद्धानां सिद्धिर्भवतीति विरुद्धविध्वंसे। अपरे तु प्रतिश्राद्धं ब्राह्मणार्घपिण्डानिच्छन्ति। उभयत्रापि मूलसद्भावाद्यथेच्छमनुष्ठानम्। श्राद्ध-

भेदाद्ब्राह्मणार्घपिण्डभेदे त्वेवं प्रयोगः । ऊनमासिकनिमित्तं प्रेतश्राद्धे ब्राह्मणकार्यं० १ । द्वितीयमासिक० २ । त्रैपक्षिक० ३ । तृतीयमासिक० ४ । चतुर्थमास० ५ । पञ्चममास० ६ । षष्ठमास० ७ । ऊनषाण्मासि० ८ । सप्तममास० ९ । अष्टममास० १० । नवममास० ११ । दशममास० १२ । एकादशमास० १३ । द्वादशमास० १४ । अधिमासश्चेत् त्रयोदशमास० १५ । तत ऊनाब्दिक० १६ । तथा चाधिमासपक्षे एकादशाहिकमाद्यश्राद्धमादाय सप्तदश श्राद्धानि भवन्ति । अधिमासाभावे षोडशव श्राद्धानि । अथवा एकादशाहिकाद्यूनाब्दिकान्तेषु प्रेतश्राद्धेषु ब्राह्मणकार्यमिति वा प्रयोगः । अथवा सर्वाण्युद्दिश्यैतानि सपिण्डीकरणयोग्यताप्राप्त्यर्थमेकतन्त्रेणाहं विधास्य इति वा प्रयोगः । अमीषां श्राद्धानामेकोद्दिष्टविधेर्यत्कृतं यन्न कृतमित्यादि । अमीषां श्राद्धानामेकोद्दिष्टविधिना कृतानां यन्न्यूनं यदतिरिक्तमित्यादि । एभिः श्राद्धैः प्रेतस्य प्रेतत्वनिवृत्तिः, क्षुत्तृषानिवृत्तिः, सपिण्डीकरणयोग्यताप्राप्तिः । ततः स्नात्वा ऐकादशाहिकोनमासिकत्रैपक्षिकोनषाण्मासिकोनसांवत्सरिकेषु विहितकुम्भदानम् । ततः संकल्पविधिना संवत्सरपर्यन्तमनुष्ठीयमानश्राद्धानां तन्त्रेणानुष्ठानम् । सर्वेषु सोदकुम्भान्नसंकल्पः प्रेतस्य प्रेतत्वनिवृत्तिं, क्षुत्तृषानिवृत्तिं चोद्दिश्य । एवं देवालयाऽन्यगारादौ प्रत्यहं दास्यमानदीपसंकल्पः । मार्गे गच्छतः प्रेतस्यान्धकारनिवृत्तिमुद्दिश्य दीपदानमासंवत्सरम् । **अथ सपिण्डीकरणम्** । । तच्चैकोद्दिष्टपार्वणात्मकं, तत्र पार्वणैकोद्दिष्टयोरिदमेव प्रथममिति नियमाभावः । प्रेतपितृपितामहप्रपितामहानां पार्वणम् । तच्चामावास्यासंबन्धिपार्वणवत् । एकोद्दिष्टं तु प्रेतैकोद्दिष्टवत् । तत्र द्वादशाहादौ गोत्रस्य प्रेतत्वनिवृत्त्यर्थं वसुरुद्रादित्यलोकप्राप्त्यर्थं च गोत्राणां प्रेतस्य पितृपितामहप्रपितामहानाममुकामुकशर्मणां वैश्वदेवपूर्वकं सैकोद्दिष्टविधिना युष्मदनुज्ञया सपिण्डीकरणश्राद्धमहं करिष्य इति प्रयोगः । आसनम् । आवाहनम् । अर्घः । वैश्वदेविके कृत्वा पित्र्ये कुर्यात् । प्रेतस्यैकमर्घपात्रं तत्पित्रादीनां त्रीणि । एवमर्घपात्राणि पूरयित्वाऽभ्यर्च्य प्रेतार्घगतचतुर्थांशेन प्रेतायार्घं दत्त्वा प्रेतपात्रं पितृपात्रे संयोजयिष्य इति पृष्ट्वा संयोजयेत्यनुज्ञातोऽवशिष्टमर्घजलं विभज्य तृतीयांशं पित्रादिपात्रेषु निनयेत् । पवित्रं त्वखण्डमेव पित्रादिपात्रे प्रतिपात्रं संचारयेत् । तत्र **ये समाना** इति मन्त्रद्वयं पठित्वाऽमुकगोत्रस्याऽमुकप्रेतस्यार्घः अमुकगोत्रस्यामुकशर्मणः पितुरर्घपात्रेण सह संसृज्यतामित्युक्त्वा पितृपात्रे संयोज्य पितामहप्रपितामहयोः पात्रे संयोजनम् । प्रतिपात्रसंयोजनानन्तरं प्रेतस्य वसुरुद्रादित्यलोकप्राप्तिं क्रमेण प्रार्थयेत् । साग्नेः पुत्रादेः प्रेतपितृविप्रपाणावग्नौकरणहोमः । पितामहप्रपितामहयोः पात्रे शेषपरिवेषणम् । पिण्डदानेऽपि श्राद्धोपक्रमेण चतुरः पिण्डान्दत्त्वा प्रेतपिण्डमर्घादिभिः संपूज्य प्रेतपिण्डं पितृपिण्डेषु संयोजयिष्य इति पृष्ट्वा संयोजयेत्यनुज्ञातः सुवर्णरजतशलाकादर्भैः प्रेतपिण्डं त्रेधा विभज्याद्यं भागमादाय **ये समाना** इति मन्त्रद्वयं पठित्वाऽमुकगोत्रस्यामुकप्रेतस्य पिण्डः अमुकगोत्रस्यामुकशर्मणः प्रेतपितुः पिण्डेन सह संयुज्यतामित्युक्त्वा संयोजनेन वर्तुलं पिण्डं निष्पाद्य प्रेतस्य वसुलोकप्राप्तिं पितृत्वप्राप्तिं च प्रार्थयेत् । अवशिष्टं प्रेतपिण्डभागद्वयमेवमेव पितामहप्रपितामहपिण्डयोः संयोजनीयम् प्रेतस्य रुद्रादित्यलोकप्राप्तिं प्रार्थयेत् । केचित्तु पिण्डस्य प्रथमांशो द्वितीयांशस्तृतीयांशः प्रयोग इच्छन्ति । ततोऽत्र **पितर** इति जपादि, पूजनानन्तरं पिण्डानभिमृश्येदं पठेत्, "एष वोऽनुगतः प्रेतः पितरस्तं दधामि वः।शिवमस्त्विह शेषाणां जायतां चिरजीवितम् ॥ समानी व आकूतिः समाना हृदयानि वः । समानमस्तु वो मनो यथा वः सुसहासति" इति । अत ऊर्ध्वं कदाचिद्भ्रान्त्याऽपि प्रेतशब्दो न वाच्यः । अक्षय्योदकदानादौ गोत्रस्य पितुरमुकशर्मणः मोक्षप्राप्त्यर्थमिमां मोक्षधेनुसंज्ञकां गां रुद्रदैवतां कस्मैचिद्ब्राह्मणायेत्यादि । ततः दक्षिणां दत्त्वा मोक्षं पितुः प्रार्थयेत् । ततो गृहे गत्वा पितृमातामहपार्वणाभ्यां श्राद्धं, तत आभ्युदयिकम् । ततः स्वस्त्ययनं, पुण्याहवाचनम् । नन्दमावास्याभ्युदयादौ यत्पार्वणमुक्तं तत्सपिण्डनं यैः सह प्रेतस्य तेषां प्रेतस्यापि भवेदत आह-**पिण्डश्चेत्**-नन्वेवं पिण्डचतुष्टयमापतितं चेत्तत्राह-**निवर्तेत चतुर्थः**-प्रेतेन पित्रा सपिण्डतां प्रापितश्चतुर्थः प्रेतप्रपितामहः स निवर्त्ततेत्यर्थः।एकादशाहादौ सपिण्डीकरणपक्षे अपकृष्य कृतानामूनमासिकादीनां स्वकाले पुनरनुष्ठानं न वेत्याशङ्क्याह-**संवत्सरं पृथगेके**-एके आचार्याः अपकृष्य कृतानां संवत्सरं यावत्पृथगनुष्ठानं मन्यन्ते । तच्च क्षयाहवद्भवति एकोद्दिष्टविधिना पार्वणविधिना वा यथाकुलाचारम् । एकादशाहे त्वपकर्षे ऊनमासिकस्याप्यपकृष्टत्वेन पुनरनुष्ठानम्, द्वादशाहादौ सपिण्डीकरणे तस्यानपकृष्टत्वेनानुष्ठानाभावः । त्रैपक्षिकादौ सपिण्डीकरणे भाविनामेव मासिकानां पुनः क्रिया न भूतानामिति । यत्तु निरग्नेरेकोद्दिष्टविधायकमेतत्सूत्रमित्याहुः । तन्न उभयत्रापि शास्त्रसद्भावात् । नन्वेवमपि पार्वणविधौ प्रेतस्येतरेषामपि सपिण्डतां प्राप्तानां कुतो न निक्षेप इत्यत आह-**न्यायस्तु न चतुर्थः पिण्डो भवतीति श्रुतेः**-तथा च पार्वणे त्रयाणामेव निक्षेपाच्चतुर्थपिण्डाभावः न्यायप्राप्त इत्यर्थः । **अहरहरन्नमस्मै ब्राह्मणायोदकुम्भं च दद्यात्**-एतद्दानावसरे लिखितम् । **पिण्डमप्येके निपृणन्ति**-अहरहरित्यनुषङ्गः । सपिण्डनक्रियायाः ऊर्ध्वं प्रेतशब्दो नोच्चार्यः । संकल्पविधिना प्रत्यहं पार्वणमिति **निर्णयामृतकारः** ॥ इति तृतीयकाण्डस्य दशमी कण्डिका ॥ १० ॥ * ॥

CC0. In Public Domain Kirtikant Sharma Nyajagmi Collection.

शाखापशुविधिः

पशुश्चेदाप्लाव्यागामग्रेणाग्नीन्परीत्य पलाशशाखां निहन्ति ॥ १ ॥ परिव्ययणोपाकरणनियोजनप्रोक्षणान्यावृता कुर्याद्यच्चान्यत् ॥ २ ॥ परिपशव्ये हुत्वा तूष्णीमपराः पञ्च ॥ ३ ॥ वपोद्धरणं चाभिघारयेद्देवतां चादिशेत् ॥ ४ ॥ उपाकरणनियोजनप्रोक्षणेषु स्थालीपाके चैवम् ॥ ५ ॥ वपाꣳ हुत्वाऽवदानान्यवद्यति ॥ ६ ॥ सर्वाणि त्रीणि पञ्च वा ॥ ७ ॥ स्थालीपाकमिश्राण्यवदानानि जुहोति ॥ ८ ॥ पश्वङ्गं दक्षिणा ॥ ९ ॥ यद्देवते तद्दैवतं यजेत्तस्मै च भागं कुर्यात्तं च ब्रूयादिममनुप्रापयेति ॥ १० ॥ नद्यन्तरे नावं कारयेन्न वा ॥ ११ ॥ ११ ॥

कर्कः-**पशुश्चेदाप्लाव्यागां**-पशुश्चेत् क्रियेत गोपशुवर्जमाप्लाव्य स्नापयित्व नियुज्यते । **अग्रेणाग्नीन्परीत्य पलाशशाखां निहन्ति**-निखनन्ति । असौ यूपकार्ये निखन्यते । अतश्चाज्यासादनोत्तरकालं निखननम् । **परिव्ययणोपाकरणनियोजनप्रोक्षणान्यावृता कुर्याद्यच्चान्यत्**-किमन्यदिति पशुसंस्कारकं नियोजनप्रोक्षणपशुसमञ्जनपर्यग्निकरणादिकं तच्च कर्त्तव्यम् । आवृच्छब्दः क्रियामात्रवाची, अतश्च तन्मन्त्रा निवर्तते । **परिपशव्ये हुत्वा तूष्णीमपराः पञ्च**-जुहोतीति सूत्रशेषः । **वपोद्धरणं चाभिघारयेत्**-उद्धृत्य वपां देवतां चातिदिशेदुपाकरणनियोजनप्रोक्षणेषूपाकरणादिषु । **स्थालीपाके चैवम्** देवतामादिशेत् । **वपाꣳ हुत्वाऽवदानान्यवद्यति । सर्वाणि त्रीणि पञ्च वा**-वपां हुत्वा अवदानग्रहणे उच्यमाने पशुपुरोडाशो निरस्तो भवति । अत आह-वपां हुत्वाऽवदानान्यवद्यति । असर्वपक्षे तत एव स्विष्टकृत् । क्षताभ्यङ्गश्च देयः । **स्थालीपाकमिश्राण्यवदानानि जुहोति**-तस्य चाज्येनैव सह श्रपणम् । **पश्वङ्गं दक्षिणा**-पूर्णपात्रं वरो वेति निवर्तते । **यद्देवते तद्दैवतं यजेत्**-यद्देवत्य ऋत्विग्विशेषस्तद्दैवत्य एव पशुरालभ्यतेऽर्घपशुषु । **तस्मै च भागं कुर्यात्तं च ब्रूयादिममनुप्रापयेति**-तस्मै ऋत्विग्विशेषाय भागं कुर्यात् । **नद्यन्तरे नावं कारयेन्न वा**-यदुक्तं "प्रेतायोद्दिश्य गामप्येके घ्नन्ति" इति तस्यैव तत्प्रदेशविधानम् । नवश्राद्धं नावमुच्यते । नद्यन्तरे नावं कारयेत् इत्यनेन नवश्राद्धार्थः पशुरुपक्रान्तः । नवश्राद्धशब्देन प्रथमैकादशाहिकं श्राद्धमुच्यते ॥ ११ ॥ * ॥

जय०-"प्रेतायोद्दिश्य गामप्येके घ्नन्ति" इति शाखापश्वभिधानम् । तत्प्रसङ्गेन यावन्तोऽर्घपशवस्तत्कर्मव्याचिख्यासयेदमभिधीयते । स्मार्तः पशुश्चेत्क्रियते तदाऽगाम् गोपशुवर्जमाप्लाव्य स्नापयित्वा नियुज्यते । कुत्रेत्यपेक्षायामाह-परीत्य प्रादक्षिण्येन गत्वा अग्रेणाग्नीन् अग्निपूर्वभागे निहन्ति निखनन्ति । सा च यूपार्थे । अतश्चाज्यासादनोत्तरकालं निखननम् । परिव्ययण त्रिगुणरशनया शाखावेष्टनम् । उपाकरणं तृणेन पशोर्नियोजनं द्विगुणरशनया शृङ्गयोर्बद्धस्य पशोः शाखायां बन्धनम् । आवृता पशुप्रकरणोक्तेतिकर्तव्यतया विना मन्त्रम् । आवृद्ग्रहणाद्यच्च पशुसंस्कारकं पशुसमञ्जनपर्यग्निकरणादि तदप्यावृता कार्यम् । परिपशव्ये सञ्ज्ञपनस्याद्यन्तयोराहुती द्वे स्वाहा देवेभ्यः, देवेभ्यः स्वाहेति हुत्वाऽपराः पञ्च जुहोतीति शेषः । उद्धृत्य वपाभिघारणम् । स्थालीपाकेऽप्येवं देवतादेशः । वपां हुत्वाऽवदानग्रहणे उच्यमाने पशुपुरोडाशो निरस्तो भवति । अत आह-**वपाꣳ हुत्वेति** । असर्वपक्षे तत एव स्विष्टकृत् । क्षताभ्यङ्गश्च देयः । **स्थाली**

पाकमिश्राणीति ग्रहणात्तस्याज्येन सह श्रपणम् । **पश्वङ्गं दक्षिणे**त्यत्र पूर्णपात्रो वरो वेति वर्तते । यद्देवत्य ऋत्विग्विशेषस्तद्देवत्यः पशुरालभ्यतेऽर्घपशुषु तस्यार्घस्य देवतैव देवता यस्य यागस्य स तद्देवत्यस्तस्मिन् । तद्दैवतं तामेव देवतां यजेदित्यर्थः । तस्मै ऋत्विग्विशेषाय । **नद्यन्तरे**—इति यदुक्तं“प्रेतायोद्दिश्य गामप्येके घ्नन्ति” इति तस्यैतत्प्रदेशविधानम । नवश्राद्धार्थं नावमुच्यते“नद्यन्तरे नावं कारयेत्” इत्यनेन नवश्राद्धार्थः पशुरुपक्रान्तः । नवश्राद्धशब्देन प्रथमैकादशाहिकश्राद्धमुच्यते ॥ ११ ॥ ॥ * ॥

हरि०—एवं तावत् “ प्रेतायोद्दिश्य गामप्येके घ्नन्ति ” इति सूत्रकृता एकादशेऽहनि प्रेतमुद्दिश्य गोपश्वालम्भोऽभिहितस्तत्प्रसङ्गादन्येऽपि यावन्तोऽर्घ्यपशवस्तत्कर्माभिधातुमिदमारभ्यते—**पशुश्चेदाप्लाव्यागामग्रेणाग्नीन्परीत्य पलाशशाखान्निहन्ति**—चेद्यदि स्मार्तः पशुः क्रियते तदा तं पशुं गोपशुवर्जमाप्लाव्य स्नापयित्वा नियुज्यात् गोपशौ आप्लावाभावः, पशुनियोजनं च यूपे श्रूयते, अस्य तु कुत्रेत्यपेक्षायामाह—अस्य अग्रेण पुरस्तात् अग्नीन् वितानपक्षे गार्हपत्यादीन् आवसथ्यपक्षे एकमग्निं परीत्य प्रादक्षिण्येन गत्वा पलाशस्य ब्रह्मवृक्षस्य शाखां निहन्ति निखनन्ति आसादनानन्तरं यूपकार्यत्वाच्छाखायाः । **परिव्ययणोपाकरणनियोजनप्रोक्षणान्यावृता कुर्याद्यच्चान्यत्**—परिव्ययणं त्रिगुणरशनया शाखायाः, उपाकरणं तृणेन पशोः स्पर्शनं, नियोजनं द्विगुणरशनया अन्तराशृङ्गबद्धस्य पशोः पलाशशाखायां बन्धनम्, प्रोक्षणं प्रोक्षणीभिरद्भिः पशोरासेचनम् । एतानि परिव्ययणोपाकरणनियोजनप्रोक्षणानि आवृता पशुप्रकरणविहितेतिकर्तव्यतया मन्त्रवर्जितया क्रियया कुर्यात् विदधीत, न केवलमेतान्येव अन्यदपि यत्पशुसंस्कारकं पशुसमञ्जनं पर्यग्निकरणादिकं तदपि तथैव कुर्यात् । **परिपशव्ये हुत्वा तूष्णीमपराः पञ्च**—पशुसञ्ज्ञपनं परि उभयतः हूयेते ये द्वे आज्याहुती स्वाहा देवेभ्यः, देवेभ्यः स्वाहेति ते परिपशव्ये ते हुत्वा तूष्णीं मन्त्रवर्जम् अपरा अन्याः पञ्च आज्याहुतीर्जुहुयात् । **वपोद्धरणं चाभिघारयेत्**—पशोर्वपाया उद्धरणं यथोक्तं कृत्वा तां वपाम् अभिघारयेत् उद्धृत्यैव । **देवतां चादिशेदुपाकरणनियोजनप्रोक्षणेषु**—उपाकरणं च नियोजनं च प्रोक्षणं च उपाकरणनियोजनप्रोक्षणानि तेषु देवतां यद्देवत्यः पशुर्भवति तां देवतामादिशेत्, अमुष्मै त्वा उपाकरोमि अमुष्मै त्वा नियुनज्मि अमुष्मै त्वा जुष्टं प्रोक्षामीति । **स्थालीपाके चैवम्**—स्थालीपाके चरौ च एवं देवतामादिशेत् । चरोरुपाकरणनियोजनाभावात्तण्डुलप्रोक्षणे अमुष्मै त्वा जुष्टं प्रोक्षामीति देवतोद्देशः । **वपां हुत्वाऽवदानान्यवद्यति सर्वाणि त्रीणि पञ्च वा**—वपां यथोक्तेन विधिना हृत्वा अवदानानि पशोः हृदयादीनि अवद्यति छिनत्ति, कति सर्वाणि—हृदयम्, जिह्वाम्, क्रोडम्, सव्यबाहुम्, पार्श्वद्वयम्, यकृत, वृक्कौ, गुदमध्यम्, दक्षिणां श्रोणिमित्येकादश प्रधानार्थानि, दक्षिणबाहुं गुदतृतीयानिष्टम्, सव्यां श्रोणिमिति त्रीणि सौविष्टकृतानि । यद्वा त्रीणि हृदयम्, जिह्वां, क्रोडम इति, अथवा पञ्च हृदयजिह्वाक्रोडसव्यबाहुदक्षिणपार्श्वानि । अत्र पञ्चावदानपक्षे त्र्यवदानपक्षे वा तेभ्य एव स्विष्टकृद्भागः । वपां हुत्वाऽवदानान्यवद्यतीति वदता सूत्रकृता पशुपुरोडाशो निरस्तः । **स्थालीपाकमिश्राण्यवदानानि जुहोति**—स्थालीपाकेन चरुणा मिश्राणि संयुक्तान्यवदानानि हृदयादीनि जुहोति स्थालीपाकस्य च मिश्रणं वचनात्सहैव पाकः । **पश्वङ्गं दक्षिणा**—पशोः अङ्गं पश्वङ्गम् । अस्य पशुबन्धस्य दक्षिणा । **यद्देवते तद्दैवतं यजेत्तस्मै च भागं कुर्यात्तं च ब्रूयादिममनुप्रापयेति**—एतदर्घ्यपशून्प्रकृत्य कर्माभिहितं, तत्र यस्यार्घ्यस्य आचार्यादेर्या देवता तद्दैवतः स पशुयागस्तस्मिँस्तद्दैवते यागं तद्दैवतम् अर्घ्यदैवतं बृहस्पत्यादिकं च यजेत् । तत्रार्घ्यदेवता, आचार्यस्य बृहस्पतिः, ब्राह्मणश्चन्द्रमाः, उद्गातुः पर्जन्यः, अग्निर्होतुः, अश्विनावध्वर्योः, विवाह्यस्य प्रजापतिः, राज्ञ इन्द्रः, प्रियस्य मित्रः, स्नातस्य विश्वेदेवा इन्द्राग्नी वेति । तस्मै चार्घ्यायाचार्यादये भागं पशोः किञ्चिदङ्गं

कुर्यात् विभजेत् । तं चार्घ्यमाचार्यादिकम् इममनुप्रापयेति ब्रूयात् । **नद्यन्तरे नावं कारयेन्न वा**–इदानीं प्रेतोद्देशेन गामप्येके घ्नन्तीति यदुक्तं तत्प्रदेशविधानार्थमाह–न नद्यन्तरे नद्या अन्तरे द्वीपे नावं नवम् एकादशाहश्राद्धं तदर्थमिमं नावं गोपशुं कारयेत् । अनुतिष्ठेत् कोऽर्थः, प्रेतोद्देशेन गोपशुमेकादशेऽह्नि नद्यन्तरे आलभेत न वा आलभेत इति सूत्रार्थः ॥ ११ ॥ ॥ *॥

विश्व०–प्रेतायोद्दिश्य गामप्येके घ्नन्तीति शाखापश्वभिधानम् । तत्प्रसङ्गेन यावन्तोऽर्घपशवस्तत्कर्तव्यताकथनायेदमभिधीयते–**पशु…न्याऽगाम्**–गोवर्जं पशुमाप्लाव्य शाखायां यूपस्थानापन्नायां नियोजनम् । चेच्छब्दो विकल्पार्थः । आप्लावनं नाम प्रक्षालनं, बन्धनादिविधानं च शूलगवे औपासनमरण्यं हृत्वेत्यादावुक्तं, तथापि शाखानिखननमत्र वक्ष्यति । तदर्थं पदार्थक्रम उच्यते । भूसंस्कारपूर्वकं वहिरावसथ्याग्निस्थापनम् । स्मार्तपात्रासादने आज्यासादनोत्तरं वपाश्रपण्यौ, शूलमुखा स्थाली, तण्डुलाः, प्लक्षशाखा, पलाशशाखा, त्रिगुणरशना, उपाकरणतृणं, द्विगुणरशना, पशुः, पान्नेजनीः, असिः, हिरण्यशकलानि, दधि, वर्हिः, संस्रवपात्रं, पञ्चङ्गं दक्षिणार्थे । ततः पवित्रकरणादि वर्हिःस्तरणान्ते प्लक्षशाखास्तरणं, पात्रासादने कृते चरुग्रहणम् । तत्राचार्ये अर्घ्ये बृहस्पतिर्देवता । ऋत्विक्षु—अग्निर्होतुः । आदित्योऽश्विनौ वाऽध्वर्योः । चन्द्रमा ब्रह्मणः । पर्जन्य उद्गातुः । आकाशः सदस्यस्य । ब्राह्मणाच्छंस्यादयो द्वादशाब्देवता इन्द्रहोत्रादश्विनाध्वर्यू इत्यादयो वा । वैवाह्यस्य प्रजापतिः । राज्ञ इन्द्रः । प्रियस्य मित्रः । स्नातकस्येन्द्राग्नी विश्वेदेवा वा, तत्तदर्थे चरुपश्वादौ देवता ज्ञेयाः । ग्रहणे जुष्टम् । त्वा प्रोक्षणे । **अग्रेणाऽग्नीन्परीत्य पलाशशाखां निहन्ति**–वेदावाज्यासादनान्ते अग्नीन्प्रादक्षिण्येन परीत्याऽग्नेः पूर्वभागे पलाशशाखां यूपकार्यार्थे निहन्ति गर्तं खात्वा तस्मिन्स्थापयन्ति । औत्तरवेदिकपशौ अग्नीनिति पदं सार्थकं योज्यम् । अनौत्तरवेदिके अग्निं परीत्येत्यूहितव्यम् । **परिव्ययणोपाकरणनियोजनप्रोक्षणान्यावृता कुर्यात्**–परिव्ययणं त्रिगुणरशनया शाखावेष्टनम् । उपाकरणं तृणेन पशोः स्पर्शनं बृहस्पतये उपाकरोमीति । नियोजनं द्विगुणरशनयाऽन्तराश्रृङ्गे बद्ध्वा बृहस्पतये नियुनज्मीति शाखायां पशुबन्धनम् । प्रोक्षणं प्रोक्षणीभिः पशोर्बृहस्पतये त्वा जुष्टं प्रोक्षामीति । एतानि सर्वाणि आवृता कुर्यात् । आवृच्छब्दः क्रियामात्रपरः, तेन पशुप्रकरणे मन्त्रा उक्तास्तद्रहित इत्यर्थः । **यच्चान्यत्**–न केवलमेते एव पदार्थाः, अन्यदपि पशुसंस्कारकं समञ्जनपर्यग्निकरणादि यत्पदार्थजातं तदपि कुर्यात् । **परिपशव्ये हुत्वा तूष्णीमपराः पञ्च**–“स्वाहा देवेभ्यः” इत्याहुतिर्मारणात्पूर्वं देवेभ्यः स्वाहा इति संज्ञप्ते पशौ । एते द्वे आहुती हुत्वा तूष्णीं पञ्चाज्याहुतिहोमः, प्रजापतिं ध्यात्वा “इदं प्रजापतये” इति पञ्चानां त्यागाः । **वपो…शेत्**–पशोरुदरं विदार्य वपोद्धरणं यथोक्तं कृत्वा यथापूर्वमभिघारयेत् । ततो **देवतां चादिशेदुपाकरणनियोजनप्रोक्षणेषु**–उपाकरणनियोजनप्रोक्षणान्युक्तानि । तेषु देवतां तु पुनः आदिशेत् । अमुष्मै त्वोपाकरोमि । अमुष्मै त्वा नियुनज्मि । अमुष्मै त्वा प्रोक्षामीत्येवम् । पूर्वमावृता कुर्यादित्युक्तम्, तत्रावृच्छब्दोऽमन्त्रवाचकत्वेनाऽङ्गीकृतस्तेन तूष्णीमेते पदार्था इति प्राप्ते देवतां चादिशेत् इत्यनेन नियुनज्मि प्रोक्षामीत्यादेशः । न केवलं पशौ । **स्थालीपाके चैवम्**–स्थालीपाके चरावप्येवम् । पशौ सहैव स्थालीपाकस्तद्दैवतः कर्तव्यः । तेन सहाऽवदानहोमो वक्ष्यते । तत्राप्येवं ग्रहणप्रोक्षणादौ देवतादेशः अमुकाय जुष्टं गृह्णामि । अमुकाय त्वा जुष्टं प्रोक्षामि । अमुष्मै स्वाहेत्यादिषु । ततो विशसनश्रपणाञ्जनशाणदानपूर्वकं पाशुकं कृत्वा तत उपयमनकुशादानादि आज्यभागान्तम् । ततो **वपाऽ…र्वाणि**–“बृहस्पतये स्वाहा” इति वपां हुत्वा अवदानानि हृदयादीन्येकादश अवद्यति, अङ्गेभ्यः पृथक्कृत्य स्वधितिना एकस्मिन्पात्रे गृह्णाति । अत्र वपाहोमोत्तरमवदानग्रहणेनान्तरा पशुपुरोडाशो निरस्तः । स्मार्ते पशौ एकदेवताकत्वात्तत्स्थानापन्नश्चरुः । **त्रीणि पञ्च वा**–अथवा नैकादश सौविष्टकृतानि । त्रीण्येवादितो ग्राह्याणि । हृदयजिह्वाक्रोडानि । अथवाऽऽदितः पञ्च हृदयजिह्वाक्रोडसव्यबाहुदक्षिणपार्श्वानि । तत्र सर्वपक्षे एकादशभ्यः प्रधानानि । सौविष्टकृतेभ्यस्त्र्यङ्गेभ्यः स्विष्टकृत् । त्रिपञ्चग्रहणपक्षे तेभ्य एव पुनः स्विष्टकृत्तदा तेषां क्षणाऽभ्यञ्जनम् । **स्थाली…होति**–अवदानेन सह स्थालीपाकश्रपणम् । पशुपुरोडाशस्थानापन्नस्य चरोः पृथग्घोमे प्राप्ते वाचनिकस्थालीपाकस्य होमः सहैव । तान्मिश्राणि सह एकीकृत्य जुहोति स्रुवेण बृहस्पतये स्वाहेति । ततो वनस्पतये इत्यादि पाशुकम् । एवं स्विष्टकृत् त्र्यङ्गेभ्यश्चरुणा सह । त्रिपञ्चपक्षे तेभ्य एव चरुणा सह स्विष्टकृद्धोम इत्यादि । **पञ्चङ्गं दक्षिणा**–अस्य पशोः अङ्गमस्य पशुबन्धस्य दक्षिणा । पञ्चङ्गमिति विशेषात् [पशुर्द्धेनुः] वरादीनां प्रतिषेधः । **वपाऽ** हुत्वा त्रीणि पञ्च सर्वाणि वाऽवद्यति सर्वाभावे शेषात् स्विष्टकृत् स्थालीपाकेन सहःप्रदानमिति स्मार्तपशुविषये **कातीयसूत्रम्** । **यद्दैवते तद्दैवतं च यजेत्**–व्यक्तिभेदेनार्घपशुदेवताः प्रोक्ताः । तेषां मध्ये यद्दैवतोऽर्घ्यः समागच्छति तद्दैवतं यजेत् बृहस्पतिपदस्थाने तत्तद्दैवतं पदं प्रयोज्यं, “देवतां चादिशेत्” इत्यत्र देवतापदमात्रे विशेषः । **तस्मै च भागं कुर्यात्**–तस्मै आचार्यदयेऽर्घ्याय किंचिदङ्गभागं कुर्यात । **तं च ब्रूयादिममनुप्रापयेति**–भागदानसमयेऽर्घ्यं प्रति ब्रूयात्“इममनु प्रापय” इति प्रैषम् । **नद्यन्तरे नावं कारयेत्**–एकादशाहप्रकरणे प्रेतायोद्दिश्य गामप्येके घ्नन्तीत्युक्तं तत्कर्म कुत्र कर्तव्य

मित्येतदर्थं नवन्तरे नदीमध्यस्थितद्वीपे नावं नवश्राद्धान्तःपातित्वेन एकादशाहश्राद्धं नावमुच्यते । तत्रार्घ्यपशुविधिना प्रेतदैवत्यं पशुं कृत्वा तन्मांसेनावशिष्टेन तच्छ्राद्धं पिण्डदानं च कर्तव्यम् । **न वा**-अथवा पशोरालम्भने विकल्पः । तदा सोऽपि तच्छ्राद्धे निरस्तः ॥ इति तृतीयकाण्डस्यैकादशी कण्डिका ॥ ११ ॥ ॥ * ॥

अथातोऽवकीर्णिप्रायश्चित्तम् ॥ १ ॥ अमावास्यायां चतुष्पथे गर्दभं पशुमालभते ॥ २ ॥ निर्ऋतिं पाकयज्ञेन यजेत ॥ ३ ॥ अप्स्ववदानहोमः ॥ ४ ॥ भूमौ पशुपुरोडाशश्रपणम् ॥ ५ ॥ तां छविं परिदधीत ॥ ६ ॥ ऊर्द्धबालामित्येके ॥ ७ ॥ संवत्सरं भिक्षाचर्यं चरेत्स्वकर्म परिकीर्तयन् ॥ ८ ॥ अथापरमाज्याहुती जुहोति । कामावकीर्णोऽस्म्यवकीर्णोऽस्मि काम कामाय स्वाहा । कामाभिद्रु*ग्धोऽस्म्यभिद्रुग्धोऽस्मि काम कामाय स्वाहेति॥९॥अथोपतिष्ठते,सम्मा सिञ्चन्तु मरुतः सामिन्द्रः सम्बृहस्पतिः । सं माऽयमग्निः सिञ्चतु प्रजया च धनेन चेति ॥ १० ॥ एतदेव प्रायश्चित्तम् ॥ ११ ॥ १२ ॥

कर्कः-तेन प्रसङ्गेन नैमित्तिकं पश्वन्तरमभिधातुमिदमाह-**अथातोऽवकीर्णिप्रायश्चित्तम्**--व्याख्यास्यत इति सूत्रशेषः । अवकीर्णी ब्रह्मचारी यः स्त्रियमुपैति सोऽनेनाधिक्रियते । **अमावास्यायां चतुष्पथे गर्दभं पशुमालभते निर्ऋतिं पाकयज्ञेन यजेत**--अन्योऽपि हाविर्यज्ञरूपोऽवकीर्णि पशुरस्ति अतः पाकयज्ञेनेत्युक्तम् । **अप्स्ववदानहोमः**--अग्न्यपवादोऽयमवदानमात्रस्य । आघारादि त्वग्नावेव । **भूमौ पशुपुरोडाशश्रपणम्**-शाखापशौ पुरोडाशाभावादिति विधानम् । तस्य चाज्येन सह संस्कारानुष्ठानम् । **तां छविं परिदधीतोर्द्ध्वबालामित्येके**-तामेव गर्दभच्छविं परिधत्त । ऊर्द्ध्वबालामित्येके । बालशब्देन पुच्छमभिधीयते । ऊर्द्ध्वबालां तिर्यग्बालां वेति विकल्पः । **संवत्सरं भिक्षाचर्यं चरेत्स्वकर्म परिकीर्तयन्**-"निरुक्तं वा एनः कनीयो भवति"इति श्रुतेः । **अथापरम्**-प्रायश्चित्तान्तरं व्याख्यास्यत इति सूत्रशेषः । **आज्याहुतीःजुहोति कामावकीर्णोऽस्म्यवकीर्णोऽस्मि काम कामाय स्वाहा।कामाभिदुग्धोऽस्म्यभिदुग्धोऽस्मि काम कामाय स्वाहा**-इत्यागन्तुत्वादाहुतिद्वयं चतुर्दशाहुतिकान्ते भवति । **अथोपतिष्ठते सं मा सिञ्चन्तु मरुतः सामिन्द्रः सम्बृहस्पतिः । सं माऽयमग्निः सिञ्चतु प्रजया च धनेन च**-इत्यनेन ॥ १२ ॥

जय०-एतत्पशुप्रसङ्गेन पश्वन्तरं नैमित्तिकमभिधातुमाह-**अथे**त्यादि । वक्ष्यत इति सूत्रशेषः । अवकीर्णी ब्रह्मचारी सन् यः स्त्रियमुपैति सोऽनेनाधिक्रियते । **पाकयज्ञेन यजेत**त्यनेनान्योऽपि हविर्यज्ञरूपोऽवकीर्णिपशुरस्तीत्युक्तम् । **अप्स्व**त्ययमग्न्यपवादोऽवदानमात्रस्य । आघारादि त्वग्नावेव । **भूमौ पश्विति**-शाखापशौ पुरोडाशाभावाद्विधानम् । तस्य चाज्येन सह संस्कारानुष्ठानम् । तामेव गर्दभस्य च्छविं त्वचं परिदधीत । ऊर्ध्वग्बालां तिर्यग्बालां वेति विकल्पः । बालशब्देन पुच्छमभिधीयते । स्वकर्म अवकीर्णित्वम् । "निरुक्तं वा एनः कनीयो भवति" इति **श्रुतेः** । **अथापरम्**-प्रायश्चित्तान्तरं वक्ष्यत इति सूत्रशेषः । आज्याहुती द्वे जुहोति । **कामावकीर्णोऽस्मि कामाभिद्रुग्धोऽस्मी**त्येताभ्यां मन्त्राभ्याम् । एते आहुती आगन्तुत्वाच्चतुर्दशाहुत्यन्ते भवतः । अथ मन्त्रार्थः । तत्र द्वयोः प्रजा-

---

* दुग्धोऽस्म्यभिदुग्धोऽस्मीत्यपि पाठः ॥

पतिरनुष्टुप् काम आज्यहोमे० । हे काम क्षोभक अहं कामेन त्वत्कृतक्षोभेण अवकीर्णः अभिभूतोऽस्मि, अतोऽवकीर्णः क्षतव्रतोऽस्मि । अतः कामाय शोधकत्वेन हविः कामयमानाय तुभ्यं स्वाहा सुहुतमस्तु । एवमभिद्रुग्धो हिंसितः, शिष्टं समानम् । अथोपस्थानमन्त्रार्थः । तत्र प्रजापतिरनुष्टुप् लिङ्गोक्ता उपस्थाने० । मरुतो देवा मा मां सम्यक् सिञ्चन्तु अभीष्टप्रदानेन समर्द्धयन्तु, प्रजया च पुत्रादिरूपया, तथा धनेन धर्मानुकूलसमृद्धया च, चकारात्सिञ्चन्तु । तथेन्द्रः सम्यक् सिञ्चत्वित्युत्तरत्रापि योज्यम् । **एतदेव प्रायश्चित्तम्**—"प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते। तपोनिश्चययुग्वृत्तं प्रायश्चित्तमितीरितम्"॥ १२॥*॥

हरि०—एवं तावन्नद्यन्तरे नावं कारयेदित्यनेन नवश्राद्धप्रयोजनपशुरुक्तस्तत्प्रसङ्गान्नैमित्तिकं पश्वन्तरं व्याख्यातुमाह—**अथातोऽवकीर्णिप्रायश्चित्तम्**—अथेदानीं यतः पशुरभिहितः अतस्तत्प्रसङ्गात् अवकीर्णिनः स्खलितब्रह्मचर्यस्य ब्रह्मचारिणः प्रायश्चित्तं शुद्धिसम्पादकं कर्म वक्ष्यत इति सूत्रशेषः । **अमावास्यायां चतुष्पथे गर्दभं पशुमालभते**—यो ब्रह्मचारी सन् स्त्रीगमनादवकीर्णी भवति स पुनः प्रायश्चित्तं चिकीर्षुरमावास्यायां कस्यांचित् कृष्णपञ्चदश्यां चतुष्पथे चत्वारः पन्थानो यत्र भूभागे स चतुष्पथः तस्मिन् देशे गर्दभं रासभं पशुमालभते सञ्ज्ञपयति । **निर्ऋतिं पाकयज्ञेन यजेत**—निर्ऋतिं देवतां पाकयज्ञेन पाकयज्ञविधानेन पशुना यजेत । अत्रावकीर्णिनो हविर्यज्ञरूपोऽन्योऽपि पशुरस्ति तेन हेतुना पाकयज्ञेन यजेतेत्युक्तम् । **अप्स्ववदानहोमः**—अप्सु जले अवदानानामेव होमः देवतोद्देशेन प्रक्षेपो भवति न त्वग्नौ अवदानग्रहणात्, आघारादीनां लौकिकाग्नावेव होमः । **भूमौ पशुपुरोडाशश्रपणम्**—भूमावेव न कपालेषु पुरोडाशस्य श्रपणं पाको भवति, शाखापशौ पुरोडाशाभावात् इहापूर्वः पुरोडाशोऽर्थाद्विधीयते तस्य च संस्कार आज्येन सह क्रियते । **तां छविं परिदधीतोर्द्ध्वबालामित्येके संवत्सरं भिक्षाचर्यं चरेत्स्वकर्म परिकीर्तयन्**—ताम् आलब्धस्य गर्दभस्य छविं कृत्तिं परिदधीत प्रोर्णुवीत आच्छादयीतेति यावत्, एके आचार्याः ताम् ऊर्द्ध्वबालाम् उपरिपुच्छाम् परिदधीतेति वर्णयन्ति, अपरे तिर्यग्बालाम् । ततश्च विकल्पः । गर्दभपश्वालम्भानन्तरं तच्छविं परिदधानः संवत्सरं यावद्भिक्षाचर्यं चरेत्, किं कुर्वन्, स्वकर्म स्वीयमवकीर्णित्वं परिकीर्तयन् सर्वतः प्रकथयन् "अहमवकीर्णी, भवति भिक्षां देहि" इत्येवमादिना । स्वकर्मपरिख्यापनं कुत इति चेत् "निरुक्तं वा एनः कनीयो भवति" इति श्रुतेः । **अथापरम्**—अथेदानीम् अपरमन्यत् प्रायश्चित्तान्तरमवकीर्णिनोऽभिधीयते तदाह—**आज्याहुती जुहोति कामावकीर्णोऽस्म्यवकीर्णोऽस्मि काम कामाय स्वाहा । कामाभिदुग्धोऽस्म्यभिदुग्धोऽस्मि काम कामाय स्वाहेति**—कामावकीर्णोऽस्मि कामाभिदुग्धोऽस्मीत्येताभ्यां मन्त्राभ्यां प्रतिमन्त्रमेकैकाम्, एवमाज्याहुती द्वे जुहोति । इदं कामायेति उभयत्र त्यागः । ते च द्वे आगन्तुत्वाच्चतुर्दशाहुत्यन्ते, "आगन्तूनामन्ते निवेशः" इति न्यायात् । **अथोपतिष्ठते सम्मा सिञ्चन्तु मरुतः समिन्द्रः सम्बृहस्पतिः । सम्माऽयमग्निः सिञ्चतु प्रजया च धनेन चेत्येतदेव प्रायश्चित्तम्**—अथ होमानन्तरमुपतिष्ठते ऊर्द्ध्वीभूय सम्मा सिञ्चन्त्वित्यादिना मन्त्रेण लिङ्गोक्ता देवताः प्रार्थयते, संवत्सरमित्यत्राप्यनुवर्तते, अतः प्रतिदिनं पञ्चभूसंस्कारपूर्वकं लौकिकाग्निं स्थापयित्वा आघारादिस्विष्टकृदन्ताश्चतुर्दशाज्याहुतीर्हुत्वा **सम्मा** **कामावकीर्णोऽस्मि कामाभिदुग्धोऽस्मी**त्येताभ्यां मन्त्राभ्यां प्रतिमन्त्रमाज्याहुतिद्वयं हुत्वा आज्याहुतिहोमा- **सिञ्चन्त्वि**ति मन्त्रेणोपतिष्ठते संवत्सरं यावत्, एतदेव यदुक्तं गर्दभपश्वालम्भनरूपम् त्मकं च तदवकीर्णिनः प्रायश्चित्तद्वयं विज्ञेयमिति सूत्रार्थः ॥ १२ ॥ ॥ * ॥

विश्व०—अथाऽर्घपशुप्रकरणोपात्तं नावश्राद्धिकं पशुमुक्त्वा अवकीर्णिप्रायश्चित्तार्थं सदैवतं द्विप्रकारकं गर्दभपशुकरणविधिमाह—**अथा''श्चित्तम्**—तत्राऽथशब्द आनन्तर्ये । पूर्वोपक्रान्तस्य पशोरुत्तरत्रेति । अतःशब्दो हेत्वर्थे । अवकी-

र्णिनः पतितप्रायश्चित्तपश्चालम्भनमन्तरोत्तरत्र कर्मस्वनाधिकारः । अतो हेतोस्तस्य प्रायश्चित्तं वक्ष्यत इति । ब्रह्मचारी सन्यः स्त्रियं गच्छति सोऽवकीर्णीत्युच्यते । तस्य प्रायश्चित्तार्थायां गर्दभेज्यायामधिकारः । स कदा कर्तव्य इत्यत आह-**अमावा…ते**-अमावास्यायां प्रायश्चित्तं पतनोत्तरकालिक्यां संनिध्यमावास्यायाम् । चतुष्पथे चत्वारः पन्थानो यत्र तस्मिन् गर्दभं गर्दभजातिसंवन्धिनं पशुमालभते पशुहननप्रकारेणाग्निस्थापनपूर्वकम् । **निर्ऋ…जेत**-तत्र तत्कर्म केन विधिना,कुत्र,कथं कर्तव्यामिति संशये निर्ऋतिदेवताकं,पाकयज्ञविधिना कर्तव्यः पूर्वोक्तप्रकारेण । न अत्र श्रौतविधिना,नाऽपि हविर्यज्ञविधिना पशुरुक्तः, श्रौते प्राशित्रावदानदर्शनात् । पाकयज्ञोक्तविधिनोच्यते । पश्चवदानहोमे पशुपुरोडाशे च निर्ऋतिर्देवता । वपाया अभावाद्वपाहोमाभावः । **अप्स्ववदानहोमः**-गर्दभस्यावदानहोम उदके कर्तव्यः । तदर्थमग्निस्थापनवेलायां तद्धर्मेण तदुत्तरत उदपात्रस्थापनमवदानहोमार्थम् । अन्यहोमः स्थापितेऽग्नौ, पशुपुरोडाशः, आघारावाज्यभागादि । **भूमौ पशुपुरोडाशश्रपणम्**-न कपालेषु । इदं स्मार्त्तपशौ विशेषविधानम्, स्मार्त्ते कर्मणि पशुपुरोडाशाभावः । तत्पुरोडाशश्रपणं भूमावेव कर्त्तव्यम् । एतावतैव सूत्रेण पूर्वोक्तः पशुः सूचितः । श्रौतविधिश्चेत्तदा तदीयैर्धर्मैः पशुर्भवति । तत्र प्राशित्रावदानं गर्दभशिश्नात् [प्रजननात्] अवदेयम् । अथ पशुसमाप्त्यनन्तरं पापक्षयाय भिक्षाटनप्रकारमाह-**तां छविं परिदधीत**-तस्यैव गर्दभस्य त्वचं परिदधीत । छविस्त्वक् । कथं परिदधीत दक्षिणेंऽसे शिरः, उत्तरेंऽसे पुच्छः, अध ऊर्द्ध्वौ पादौ । शरीरलमवालाम् । ऊर्द्ध्ववालामित्येके । परिधाने विकल्पः । उपरिवालाम् । अथवा वालशब्देन पुच्छमुच्यते । ऊर्ध्वपुच्छामधस्तनग्रीवां परिदधीत । तत्र मस्तकभागे पुच्छं, पादसमीपे ग्रीवा, दक्षिणसव्यांसयोः पादौ एवं परिधाय । **संव…यन्**-सावनसंवत्सरं यावद्गृहे गृहे स्वकर्मकथनपूर्वकं भिक्षां चरेत् अहमवकीर्णी भिक्षां देहीत्येवम् । "निरुक्तं वा एनः कनीयो भवति" इति **श्रुतेः** । "पापं क्षरति कीर्तनात्" इति **स्मृतेश्च** । एवं कृते तस्य कर्मान्तरे अधिकारः । इति स्वेच्छया वलाद्वा व्यभिचारितस्य ब्रह्मचारिणः प्रायश्चित्तमुक्त्वा प्रकारान्तरेणाहुतिद्वयरूपं प्रायश्चित्तान्तरमाह-**अथा…स्मी**त्यादि । अथ पश्वनन्तरमपरं प्रायश्चित्तं वैकल्पिकमुच्यते । अपरशब्दो विकल्पार्थे, सूत्रसामानाधिकरण्यात् । तथा च सूत्रं-"वाऽवकीर्णिनो गर्दभेज्या" इति । वाशब्दो व्यवस्थितविकल्पार्थः । संकटपतितस्य वलात् स्त्रिया इच्छया व्यभिचरितस्य स्वल्पं प्रायश्चित्तमाह । संवत्सरपर्यन्तं नित्यमग्निस्थापनं कृत्वा कुशकण्डीपूर्वकमाज्यतन्त्रेणाघारावाज्यभागौ, महाव्याहृतयः सर्वप्रायश्चित्तं, प्राजापत्यं स्विष्टकृच्चेति चतुर्दशाहुतीर्हुत्वा, ततः "कामाऽवकीर्णोऽस्मि, कामाऽभिदुग्धोऽस्मि" इत्याहुतिद्वयं हुत्वा । **अथो…त्विति**-एवं षोडशाहुतिहोमान्ते अग्निमुपतिष्ठते प्रत्यहम् । **एतदेव प्रायश्चित्तम्**-एतत्पूर्वोक्तं द्विप्रकारकमवकीर्णिप्रायश्चित्तं भवति ॥ इति तृतीयकाण्डस्य द्वादशी कण्डिका ॥ १२ ॥ * ॥

अथातः सभाप्रवेशनम् ॥ १ ॥ सभामभ्येति सभाऽऽङ्गिरासि नादिर्नामासि त्विषिर्नामासि तस्यै ते नम इति ॥ २ ॥ अथ प्रविशति सभा च मा समितिश्चोभे प्रजापतेर्दुहितरौ सचेतसौ । यो मा न विद्यादुप मा स तिष्ठेत्सचेतनो भवतु शर्ठसथे जन इति ॥ ३ ॥ पर्षदमेत्य जपेदभिभूरहमागमविराडप्रतिवाश्याः । अस्याः पर्षद ईशानः सहसा सुदुष्टरो जन इति ॥ ४ ॥ स यदि मन्येत क्रुद्धोऽयमिति तमभिमन्त्रयते, या त एषा रराटचा तनूर्म*न्योः क्रोधस्य नाशनी । तान्देवा ब्रह्मचारिणो विनयन्तु सुमेधसः ॥ द्यौरहं पृथिवी चाहं तौ ते क्रोधं नयामसि गर्भमश्वतर्यसहाऽसाविति ॥ ५ ॥ अथ यदि मन्येत द्रुग्धोऽयमिति तमभिमन्त्रयते तान्ते वाचमास्य आदत्ते हृदय आदधे यत्र यत्र निहिता वाक्तां ततस्तत आददे यदहं ब्रवीमि तत्सत्यमधरो मत्तां द्यस्वेति ॥ ६ ॥ एतदेव वशीकरणम् ॥ ७ ॥ १३ ॥ ॥ * ॥

कर्कः-अथातः सभाप्रवेशनमित्येवमादि यत्तत्सर्वं निगदव्याख्यातमेव ॥ १३ ॥

इति श्रीकर्कोपाध्यायकृतौ गृह्यसूत्रभाष्ये तृतीयकाण्डं समाप्तम् ॥ ३ ॥ * ॥

---

* 'मन्यो' इत्यपि क्वचित्पाठः ॥

जय०-सभाप्रवेशनम्-वक्ष्यत इति सूत्रशेषः । तत्र सभां प्रति अभ्येति अभिमुखं गच्छति **सभाऽऽङ्गिरसी**त्यनेन मन्त्रेण । तस्यार्थः । तत्राङ्गिराः, गायत्री, सभा, तत्प्रवेशने० । सह धर्मेण सद्भिर्वा भातीति सभा । तथा नादिर्नदनशीला नाम नाम्नाऽसि । हे आङ्गिरसि आङ्गिरोदेवते बृहस्पत्यधिष्ठिते वा त्विषिर्दीप्ता नाम नाम्ना प्रसिद्ध, असि धर्मनिरूपणात् । तस्यै उक्तगुणवत्यै ते तुभ्यं नमोऽस्तु । अथ प्रवेशनमन्त्रार्थः । तत्र प्रजापतिस्त्रिष्टुप् सभा समितिश्च प्रवेशने० । सभा च संसत्, समितिश्च सङ्गरः, ते उभे प्रजापतेर्ब्रह्मणो दुहितरौ पुत्र्यौ मा माम् अवतामिति शेषः । यत एते सचेतसौ शोभनज्ञानदात्र्यौ । अथ सभावचनं सभासदः प्रति । यः पुमान् मां न विद्यात् मद्व्यवहारं न जानीयात् स पुमान् मा माम् उपतिष्ठेत् उपासीत । ततोऽसौ शंसथे सम्भाषणाय सचेतनः सुबुद्धिः वादकुशल इत्यर्थः । भवतु मत्प्रभावादित्याशंसा । पर्षदं सभामेत्यागत्य जपे**दभिभूरहमि**ति मन्त्रम् । अस्यार्थः । तत्र प्रजापतिरनुष्टुप् पर्षत्सभोपस्थाने० । अभिभूः परेषामभिभवनशीलोऽहम् आगम् आगतोऽस्मि । किम्भूतः । अविराट् विरुद्धतया राजते स विराट् रुद्धवीर्यः, न विराट् अविराट् । तथा अप्रतिवाशी प्रतिवादिशून्यः । आः इत्यव्ययं सम्बुद्ध्यर्थम् । यद्वा अप्रतिवाश्या इति पर्षदो विशेषणम्, अप्रतिक्षेपाया अस्याः पर्षदः सभाया ईशानः स्वामी स्वासु प्रजासु दुष्टरोऽपि स मयि सुजनः अस्त्विति शेषः । दुष्टरश्चोग्रः । स साधको यदि सभेशं क्रुद्धं जानीयात्तदा तमभिमन्त्रयते क्रोधापनोदाय **या त एषे**ति मन्त्रेण । अस्यार्थः । तत्र प्रजापतिरनुष्टुप् लिङ्गोक्ता क्रोधापनयने० । हे असौ अमुकनामन् सभेश ते तव रराटं ललाटं तत्र भवा रराट्या या क्रोधस्य तनूः शरीरम्, तां देवा इन्द्राद्याः ब्रह्मचारिणश्च सनकाद्या विनयन्तु अपनयन्तु कथम्भूतस्य क्रोधस्य *मन्योर्दीप्तस्य । किम्भूता देवाः । सुमेधसः स्वबुद्ध्या क्रोधमपाकर्तुं शक्ताः। किम्भूता तनूः नाशनी चतुर्वर्गस्येत्यर्थात् । एषा ललाटत्रिवलिरूपा । मन्त्राभ्यासेनात्मनोऽप्युत्कर्षमाह—द्यौराकाशरूपोऽहमिति क्रोधावरकत्वमुक्तम् । पृथिवी च क्षितिरूपश्चाहमिति क्रोधाधारत्वेन स्वातन्त्र्यं चोक्तम् । अतस्तौ तत्स्वरूपो भूत्वा ते तव क्रोधं नयामसि मन्त्रबलेनापनयामि । कथम्, यथा—अश्वतरी गर्भपुष्टिमसहमाना अमार्गेण मुञ्चन्ती तथेति व्याख्येयम् । अथ साधको यदि मन्येतायं सभेशो द्रुग्धो द्रोहकारीति, तदा तमभिमन्त्रयते **तान्त** इति मन्त्रेण । अस्यार्थः । तत्र प्रजापतिरनुष्टुप् ईशो वशीकरणे० । हे सभेश भवान् मद्द्रोहकारिणीं वाचम् आस्ये मुखे वर्तमानाम् आदत्ते उपक्रामति । तामहं ते तव हृदय एवादधे स्थापयामि । किंच यत्र यत्र स्थाने वाक् वायुवशान्निहिता तां ततस्ततः स्थानात् आददे मद्वश्यां करोमि । किंच यदहं ब्रवीमि तत्सत्यमस्तु । त्वं च मत् मत्तः अधरो नीचः । द्य अद्य इदानीं स्व भव । अद्येत्यत्र वर्णलोपः । अधर उ इतिच्छेदः । तत्र उ इति दाढर्यार्थम् । अतिशयेन स्व भूयाः । यद्वा—तां मद्द्रोहकारिणीं वाचं तव हृदय एव अतिशयेन द्यस्व अवखण्डय । शिष्टं समानम् ।। १२ ।।

हरि०-अथातः सभाप्रवेशनम्-अथावसथ्याग्निसाध्यकर्मविधानानन्तरं साधारणानि कर्माणि अनुविधेयानि यतः, अतो हेतोः सभाप्रवेशनं कर्म वक्ष्यत इति सूत्रशेषः । **सभामभ्येति सभाऽऽङ्गिरसि नादिर्नामासि त्विषिर्नामासि तस्यै ते नम इति**-यदा द्विजः सभां गच्छति तदा सभाम् अभि आभिमुख्येन एति गच्छति । केन मन्त्रेण **सभाऽऽङ्गिरसी**त्यादिना मन्त्रेण । **अथ प्रविशति सभा च मा समितिश्चोभे प्रजापतेर्दुहितरौ सचेतसौ । यो मा न विद्यादुप मा स तिष्ठेत्सचेतनो भवतु शꣳसथे जन इति**-अथाभिमुखमेत्य **सभा च मा**

---

* हे मन्यो क्रोधयुक्त इत्यपि क्वचित्पाठः ।

समितिरित्यादिना मन्त्रेण सभां प्रविशति। **पर्षदमेत्य जपेत्। अभिभूरहमागमविराडप्रतिवाश्याः। अस्याः पर्षद ईशानः सहसा सुदुष्टरो जन इति**–पर्षदं सभाम् एत्य प्रविश्य अभिभूरहमिति मन्त्रं जपेत् । **स यदि मन्येत क्रुद्धोऽयमिति तमभिमन्त्रयते या त एषा रराट्या तनुमन्योः क्रोधस्य नाशनी । तां देवा ब्रह्मचारिणो विनयन्तु सुमेधसः । द्यौरहं पृथिवी चाहं तौ ते क्रोधं नयामसि गर्भमश्वतर्यसहाऽसाविति**–स सभां प्रविष्टः यदि चेन्मन्येत जानीयात् अयं सभापतिः क्रुद्ध इति तं क्रुद्धमभि लक्षीकृत्य क्रोधापनयनाय मन्त्रयते या त एषेत्यादिना मन्त्रेण । असाविति क्रुद्धस्य नाम। **अथ यदि मन्येत द्रुग्धोऽयमिति तमभिमन्त्रयते तान्ते वाचमास्य आदत्ते हृदय आदधे यत्र यत्र निहिता वाक् तां ततस्तत आददे यदहं ब्रवीमि तत्सत्यमधरो मत्तां धस्वेति**–अथ यदि द्रुग्धो द्रोहकर्ताऽयमिति मन्येत तर्हि तमभिमन्त्रयते तान्ते वाचमित्यादिमन्त्रेण । एतदेव अवशस्य वशीकरणम् । इति सूत्रार्थः ॥ १३ ॥ ॥ * ॥

विश्व०–**अथातः सभाप्रवेशनम्**—'उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये ' इति मत्वा सभायां प्रत्यहं गन्तव्यं भवति । तदीयविधानमाह–**सभा''रसीति**—सभामाभिमुख्येन एति गच्छति **सभाऽऽङ्गिरसीति** मन्त्रेण । **अथ प्रविशति**–" सभा च मा समितिः " । ततोऽनन्तरं ' **सभा च मा समितिश्चोभे प्रजापतेर्दुहितरौ सचेतसौ। यो मा न विद्यादुप मा स तिष्ठत्सचेतनो भवतु शंसथे जन** इति मन्त्रेण सभां प्रविशति । **पर्षदमेत्य जपेदभिभूरहमागमविराडप्रतिवाश्याः । अस्याः पर्षद ईशानः सहसा सुदुष्टरो जन इति**–सभाप्रवेशनोत्तरं सभां प्राप्याभिभूरिति मन्त्रं जपेत, पर्षत्सभा । **स यदि मन्येत क्रुद्धोऽयमिति तमभिमन्त्रयते या त एषा रराट्या तनूर्मन्योः क्रोधस्य नाशनी । तां देवा ब्रह्मचारिणो विनयन्तु सुमेधसः। द्यौरहं पृथिवी चाहं तौ ते क्रोधं नयामसि । गर्भमश्वतर्यसहाऽसाविति**–सभां प्रविष्टः सं यदि अयं सभापतिः क्रुद्धो मन्येत जानीयात् तदा तं सभापतिम् अभिमन्त्रयते **या त** इति मन्त्रेण। **अथ यदि मन्येत द्रुग्धोऽयमिति तमभिमन्त्रयते तां ते वाचमास्य आदत्ते हृदय आदधे। यत्र यत्र निहिता वाक्तां ततस्तत आददे यदहं ब्रवीमि तत्सत्यमधरो मत्तां धस्वेति**। अथ यदा सभां प्रविष्टः सः अयं सभापतिर्द्रुग्धो मन्येत जानाति अयं द्रोहकर्त्ता तं सभापतिं **तां ते वाचमिति** मन्त्रेणाभिमन्त्रयते । **एतदेव वशीकरणम्**–"अथातः सभाप्रवेशनम्" इत्यादि एतावत्पर्यन्तं सभावशीकरणविधानम् ॥ इति तृतीयकाण्डस्य त्रयोदशी कण्डिका ॥ १३ ॥

अथातो रथारोहणम् ॥ १ ॥ युङ्क्तेति रथं सम्प्रेष्य युक्त इति प्रोक्ते सा विराडित्येत्य चक्रे अभिमृशति ॥ २ ॥ रथन्तरमसीति दक्षिणम् ॥ ३ ॥ बृहदसीत्युत्तरम् ॥ ४ ॥ वामदेव्यमसीति कूबरीम् ॥ ५ ॥ हस्तेनोपस्थमभिमृशति अङ्कौ न्यङ्कावभितो रथं यौ ध्वान्तं वाताग्रमनुसञ्चरन्तम् । दूरेहेतिरिन्द्रियवान्पतत्रि ते नोऽग्नयः पप्रयः पारयन्त्विति ॥ ६ ॥ नमो माणिचरायेति दक्षिणं धुर्यंप्राजति ॥ ७ ॥ अप्राप्य देवताः प्रत्यवरोहेत्सम्प्रति ब्राह्मणान्मध्ये गा अभिक्रम्य पितॄन् ॥ ८ ॥ न स्त्रीब्रह्मचारिणौ सारथी स्याताम् ॥ ९ ॥ मुहूर्तमतीयाय जपेदिह रतिरिह रमध्वम् ॥ १० ॥ एके माऽस्त्विह रतिरिति च ॥ ११ ॥ स यदि दुर्बलो रथः स्यात्समास्थाय जपेदयं वामाश्विना रथो मा दुर्गे मा स्तरो रिषदिति ॥ १२ ॥ स यदि भ्रम्यात्स्तम्भमुपस्पृश्य भूमिं वा जपेदेष वामश्विना रथो मा दुर्गे मा स्तरो रिषदिति ॥ १३ ॥ तस्य न काचनार्त्तिर्न रिभिर्ष्टवति

॥ १४ ॥ यात्वाऽध्वानं विमुच्य रथं यवसोदके दापयेदेष उ ह वाहनस्यापह्नव इति श्रुतेः ॥ १५ ॥ १४ ॥ * ॥

जय०—**अथातो रथारोहणम्**--वक्ष्यत इति सूत्रशेषः । ततः स्वामी रथं युङ्क्तेति प्रैषेण सारथिं प्रेषयित्वा प्रेषितेन तेनैव युक्त इति निवेदिते **सा विराडि**त्येतावता मन्त्रेण रथमेत्यागत्य चक्रे रथाङ्गे हस्तेनाभिमृशति । तत्र **रथन्तरमसी**त्येतावता मन्त्रेण दक्षिणं चक्रम् । **बृहदसी**त्येतावता वामम् । अथ मन्त्रार्थः । तत्र त्रयाणां परमेष्ठी, यजूंषि, अङ्गान्यभिमर्शने० । योऽयं रथः सा विराट् अन्नदात्री देवता । रथन्तरादीनि सामानि । कूबरीं युगन्धरम् । उपस्थं नीडम् । हस्तेनेति सर्वत्र सम्बध्यते । तत्र मन्त्रः **अङ्कौ न्यङ्कावि**ति । तस्यार्थः । तत्र प्रजापतिस्त्रिष्टुप् अङ्गं तदभिमर्शने० । अङ्कौ द्वौ अङ्काख्यगणपावग्निविशेषौ । एवं न्यङ्कावपि । एवम्भूतौ यावग्नी अभितो रथं रथस्य सर्वतो रक्षकत्वेन ध्वान्तं दुर्गमं प्राप्य वातस्याग्रं मुखम् अनु अनुसृत्य सञ्चरन्तौ सम्यग्गच्छन्तौ वर्त्तेते ये चापरे दूरेहेतिः बृहज्ज्वालः, तथा इन्द्रियानुग्राहकः । इन्द्रियं चात्रेन्द्ररथः । तथा पतत्रि पक्षिकुलानुग्राहकमग्निवृन्दम् । एतेऽग्नयः नोऽस्मान्पारयन्तु निर्विघ्नेनाभीष्टं देशं प्रापयन्तु । किम्भूताः । पप्रयः अस्मन्मनोरथपूरणशीलाः । ततो दक्षिणं धुर्यं धुरि युक्तं वाहं, प्राजति प्रकर्षेणाजयति गमनाय प्रेरयति । "अज गतौ" इति धातुः । **नमो माणिचराये**ति मन्त्रेण । तस्यार्थः । तत्र प्रजापतिरुष्णिक् माणिचरः प्रेरणे० । माणिचरो रथाधिष्ठात्री देवता । तूष्णीं वामप्राजनम् । देवता अप्राप्य तद्दर्शनात्प्राक् यावच्छक्ति प्रत्यवरोहेत् रथादवतरेत् । पदातिर्भूत्वा गच्छेदित्यर्थः । सम्प्रति दृष्ट्वा ब्राह्मणान्प्रत्यवरोहेदित्यनुषङ्गः सर्वत्र । गाः प्राप्य तन्मध्यं गत्वा, पितॄनभ्यागच्छतः पित्रादिमान्यान् अभिक्रम्य प्रह्वत्वेनाभिपत्य उत्तीर्य च मुहूर्त्तम् अतीयाय अतिवाह्य जपे**दिह रतिरि**त्यमुं मन्त्रम् । तस्यार्थः । तत्र प्रजापतिर्यजुरग्निः रमणे० । हे अग्नयः यूयम् एके मुख्या इह रथे रमध्वं क्रीडध्वम्, यतो मम इह रथे रतिरस्ति अतो मा मां प्राप्य भवतामपि इह मद्रथे सुशोभना रतिरस्तु । स साधको यदि दुर्बलरथः दुर्बलो रथो यस्य स तथा स्यात्तदा तं रथमास्थाय जपे**दयं वामि**ति मन्त्रम् । तस्यार्थः । तत्र द्वयोः प्रजापतिरनुष्टुप् अश्विनौ जपे० । हे अश्विना अश्विनौ अयं वां युवयो रथः दुर्गे विषमस्थाने स्तरः हिंसकाद्धेतोर्मा मां मा रिषत् मा हिंसिष्ट । "स्तृञ्रिषौ हिंसार्थौ" । एतेनोत्तरोऽपि व्याख्यातः । स रथो यद्येवमभिमन्त्रितोऽपि भ्रम्यात् कुटिलं गच्छेत्तदा तद्ध्वजस्तम्भं भूमिं चोपस्पृश्य जपे**देष वामि**त्यमुं मन्त्रम् । अर्तिः पीडा । रिष्टिर्विघ्नः । उ निश्चये । एष घासोदकदानरूपोऽपह्नवः अपराधमार्जनम् ॥ १४ ॥ ॥ * ॥

हरि०— **अथातो रथारोहणम्**—(अथेदानीं-कार्यार्थं जिगामिषोर्द्विजस्य यतो यानमपेक्षितमतो हेतो रथारोहणाख्यं कर्म वक्ष्यत इति सूत्रशेषः ।(**युङ्क्ति रथं सम्प्रेष्य युक्त इत्युक्ते सा विराडित्येत्य चक्रे अभिमृशति। रथन्तरमसीति दक्षिणं बृहदसीत्युत्तरम्**)—तत्र युङ्क्तीति सारथिं सम्प्रेष्याज्ञाप्य ततः प्रेषितेन सारथिना युक्तो रथ इति प्रोक्ते सति सा विराडित्येतेन मन्त्रेण एत्य रथसमीपमागत्य चक्रे रथाङ्गे अभिमृशति, कथं रथन्तरमसीत्यनेन मन्त्रेण दक्षिणम्, बृहदसीत्यनेनोत्तरं चक्रम् । बृहद्रथन्तरे सामनी । **वामदेव्यमसीति कूबरीम्**—वामदेव्यमसीत्यनेन मन्त्रेण कूबरीम् ईषादण्डाग्रम् अभिमृशतीत्यनुवर्तते (**हस्तेनोपस्थमाभिमृशाति**—उपस्थं रथमध्यम्, उपवेशनस्थानमिति यावत् । अभिमृशति आलभते हस्तेनेति सर्वत्र सम्बध्यते । अत्र मन्त्रः । **अङ्कौ न्यङ्कावभितो रथं यौ ध्वान्तं वाताग्रमनुसञ्चरन्तौ । दूरेहेतिरिन्द्रियवान्पतत्रि ते नोऽग्नयः पप्रयः पारयन्त्विति ।**

नमो माणिचरायेति दक्षिणं धुर्यं प्राजति । गवां मध्ये स्थापयति–नमो माणिचरायेत्यनेन दक्षिणं धुर्यं दक्षिणधुरायां युक्तम् अश्वं वृषभं वा प्राजति प्रतोदेन प्रेरयति तूष्णीं वामम् । एवं गवां मध्ये रथं स्थापयति) **अप्राप्य देवताः प्रत्यवरोहेत्सम्प्रति ब्राह्मणान्मध्ये गा अभिक्रम्य पितॄन्**–अप्राप्य अनासाद्य दूरत एव देवता हरिहरब्रह्मादिकाः प्रत्यवरोहेत रथादवतरेत् । सम्प्रति ब्राह्मणान् विप्रान् सम्प्रति निकटे प्रत्यवरोहेत् मध्ये गाः सुरभीः प्राप्य मध्ये प्रत्यवरोहेत् । अभिक्रम्य पितॄन् पित्रादीन् मान्यान् अभिक्रम्य अभिमुखमेत्य प्रत्यवरोहेत् । **न स्त्रीब्रह्मचारिणौ सारथी स्याताम्**–स्त्री नारी, ब्रह्मचारी उपकुर्वाणको नैष्ठिकश्च, स्त्रीब्रह्मचारिणौ सारथी न भवेताम् । **मुहूर्तमतीयाय जपेदिह रतिरिह रमध्वमेके माऽस्त्विह रतिरिति च**–मुहूर्तं क्षणम् अतीयाय अत्येत्य जपेत् इह रतिरित्यादिकं मन्त्रम् । **स यदि दुर्बलरथः स्यात्तमास्थाय जपेत्**–स रथी यदि चेदध्वानं गच्छन् दुर्बलः क्षीणो रथोऽस्येति दुर्बलरथः स्याद्भवेत् तदा त रथमास्थायारुह्य वक्ष्यमाणमन्त्रं जपेत् । **अयं वामश्विना रथो मा दुर्गे मा स्तरो रिषदिति। स यदि भ्रम्यात्स्तम्भमुपस्पृश्य भूमिं वा जपेदेष वामश्विना रथो मा दुर्गे मा स्तरो रिषदिति**–स रथो यदि पुनर्भ्रम्यात् चलने कुटिलो भवेत्तदा स्तम्भं रथध्वजदण्डं भूमिं वा उपस्पृश्य जपेत् एष वामश्विना रथ इति मन्त्रम् ।(**तस्य न काचनार्तिर्न रिष्टिर्भवति**–तस्य रथिनः न काचन आर्तिः पीडा न च रिष्टिरुपसर्गो भवति य एवं दुर्बलरथ उद्भ्रान्तरथो वा जपति। **यात्वाऽध्वानं विमुच्य रथं यवसोदके दापयेदेष उ ह वाहनस्यापह्नव इति श्रुतेः**–यात्वा गत्वा अध्वानं मार्गं विमुच्य मुक्त्वा किं, रथं रथयुक्तं वाहम्, यवसं च उदकं च यवसोदके घासपानीये ते दापयेत् । अश्वेभ्यो यवसोदके दीयेतामिति भृत्यान् प्रेषयेत् । कुतः एष उ वाहनस्य अश्वादेरपह्नवः क्षमापनम् इति श्रुतेः श्रवणात्, एष कः तस्माद्येन वाहनेन धावयेत्ताद्विमुच्य ब्रूयात् पाययतैनं सुहितं कुरुतेति सूत्रार्थः)॥ १४ ॥ * ॥

'विश्व०–**अथातो रथारोहणम्**–अथानन्तर्ये । इतस्ततो गमनेच्छोः यानापेक्षा भवत्यतो हेतो रथारोहणविधि रुच्यते । **युङ्क्तेति रथं संप्रेष्य**–रथयोक्तारं सारथिनं रथपतिः सम्यक् युङ्क्तेति प्रैषं ददाति । ततः स रथं युक्त्वा । **युक्त इति प्रोक्ते सा विराडिति**–रथयोजनोत्तरं स्वामिनं सारथिना युक्त इति प्रतिप्रोक्ते स्वामी **सा विराडिति** वक्ति । **एत्य चक्रे अभिमृशति रथन्तरमसीति दक्षिणं बृहदसीत्युत्तरम्**–ततो रथसमीपमागत्य **रथन्तरमसीति** मन्त्रेण दक्षिणं चक्रमभिमृशति । ततो **बृहदसीत्युत्तरं** चक्रम् । **वामदेव्यमसीति कूबरीं**–कूबरं रथाग्रमर्थादीषाग्रमभिमृश्य **वामदेव्यमसीति** मन्त्रं जपति । **हस्तेनोपस्थमभिमृशत्यङ्कौ न्यङ्कावभितो रथं यौ ध्वान्तं वाताग्रमनुसंचरन्तम् । दूरेहेतिरिन्द्रियवान्पतत्रि ते नोऽग्नयः पप्रयः पारयन्त्विति**–चक्राभिमन्त्रणोत्तरं हस्तेनोपवेशनस्थानमभिमृशति **अङ्कौ न्यङ्काविति** मन्त्रेण । उपस्थं रथमध्यम् । **नमो माणिचरायेति दक्षिणधुर्यं प्राजति**–रथे उपवेशनानन्तरं **नमो माणी**ति मन्त्रेण दक्षिणधुरि युक्तं बलीवर्दमश्वं वा प्राजनेन कशया वा प्राजति प्रेरयति गमनाय गवां मध्ये स्थापयति रथम् । **अप्राप्य देवताः प्रत्यवरोहेत्**–गमने क्रियमाणे दूरतो देवालयदर्शने देवालयमप्राप्य रथादवतरेद्भूमौ । **संप्रति ब्राह्मणान्**–ब्राह्मणान् प्राप्य समीपे प्रत्यवरोहेत् । न दूरतः । **मध्ये गाः**–गाः सुरभीः प्राप्य गवां मध्ये रथादवतरेत् । **अभिक्रम्य पितॄन्**–पित्रादीन् वृद्धान् प्राप्य रथादवतीर्य अभिक्रम्य आभिमुख्येन गत्वा नमस्कृत्यारुह्य गच्छेदिति सर्वत्र योज्यम् । **न स्त्रीब्रह्मचारिणौ सारथिनौ स्याताम्**–स्त्रीशब्देन नारी । ब्रह्मचारी द्विविधोऽपि स्त्रीब्रह्मचारिणौ सारथ्ये कर्मणि न प्रयोज्यौ । **मुहूर्तमतीयाय जपेदिह रतिरिह रमध्वमेके माऽस्त्विह रतिरिति च**–[अभ्यवाय मुहूर्तम् अभ्यवायष्मिम्य तत इह रतिरिह रंमासु इह रतिरिह रमतामिति ?] जपेत् । ईयाय आगत्य ततस्ततः । **स यदि दुर्बलो रथः स्यात्तमास्थाय जपेदयं वामश्विना रथो मा दुर्गे मा स्तरो रिषदिति**–सः रथी दुर्बलस्थः स्यात् भवेत् अयं रथोऽध्वानं न पारयिष्यतीति एवंशीलं रथं मत्वा तं रथमास्थाय आरुह्य **अयं वामिति** मन्त्रं जपेत् । **स यदि भ्रम्याद्भ्रम्यात्स्तम्भमुपस्पृश्य भूमिं वा जपेदेष वामश्विना रथो मा दुर्गे म**

स्तरोरिषदिति–स रथः यदि भ्रम्याद्भूम्यां न्युब्जीभूतो भवेत् अथवा कुटिलो वक्रो भवेत् तदा रथस्य ध्वजस्तम्भमुपस्पृश्य कुटिले अधः पतिते भूमिमुपस्पृश्य **एष वामिति** मन्त्रं जपेत् । **तस्य न काचनार्त्तिर्न रिष्टिर्भवति**–एवं कृते तस्य रथस्वामिनः काचन आर्तिः पीडा न भवति । रिष्टिरपि न भवति । रिष्टिरुपसर्गः । **यात्वाऽध्वानं विमुच्य यवसोदके दापयेत्**–यात्वा गत्वाऽध्वानं स्थानं प्राप्य, विमुच्य रथं रथाद्बलीवर्दौ अश्वौ वा पृथक्कृत्य, यवसोदके दापयेत् यवसं च उदकं च यवसोदके दापयेत् प्रयच्छेद्भक्षाय पानाय च । यवसं तृणानि, उदकं प्रसिद्धम् । **एष उ वाहनस्वापह्नव इति श्रुतेः**–एषः वाहनस्य घासपानीयदानं श्रमापनयनम् । तस्माद्येन वाहनेन धावयेत्ताद्विमुच्य ब्रूयात्पाययतैनं सुहितं कुरुतेत्येष उ अपह्नवः इति श्रुतेः । कुरुतेति बहुत्वं बहुभृत्यविषयम् । इति ब्रूयात् सेवकान्प्रति ॥ इति तृतीयकाण्डस्य चतुर्दशी कडिका ॥ १४ ॥ * ॥

अथातो हस्त्यारोहणम् ॥ १ ॥ एत्य हस्तिनमभिमृशाति हस्तियशसमसि हास्तिवर्चसमसीति ॥ २ ॥ अथारोहतीन्द्रस्य त्वा वज्रेणाभितिष्ठामि स्वस्ति मा सम्पारयेति ॥ ३ ॥ एतेनैवाश्वारोहणं व्याख्यातम् ॥ ४ ॥ उष्ट्रमारोक्ष्यन्नभिमन्त्रयते त्वाष्ट्रोऽसि त्वष्टृदेवत्यः स्वस्ति मा सम्पारयेति ॥ ५ ॥ रासभमारोक्ष्यन्नभिमन्त्रयते शूद्रोऽसि शूद्रजन्माग्नेयो वै द्विरेताः स्वास्ति मा सम्पारयेति ॥ ६ ॥ चतुष्पथमभिमन्त्रयते नमो रुद्राय पथिषदे स्वस्ति मा सम्पारयेति ॥ ७ ॥ नदीमुत्तरिष्यन्नभिमन्त्रयते नमो रुद्रायाप्सुषदे स्वस्ति मा सम्पारयेति ॥ ८ ॥ नावमारोक्ष्यन्नभिमन्त्रयते सुनावमिति ॥९॥ उत्तरिष्यन्नभिमन्त्रयते सुत्रामाणमिति ॥ १० ॥ वनमभिमन्त्रयते नमो रुद्राय वनसदे स्वस्ति मा सम्पारयेति ॥ ११ ॥ गिरिमभिमन्त्रयते नमो रुद्राय गिरिषदे स्वस्ति मा सम्पारयेति ॥ १२ ॥ श्मशानमभिमन्त्रयते नमो रुद्राय पितृषदे स्वास्ति मा सम्पारयेति॥१३॥ गोष्ठमभिमन्त्रयते नमो रुद्राय शकृत्पिण्डसदे स्वस्ति मा सम्पारयेति ॥ १४ ॥ यत्र चान्यत्रापि नमो रुद्रायेत्येव ब्रूयाद्रुद्रो ह्येवेदꣳ सर्वमिति श्रुतेः ॥ १५ ॥ सिचाऽवधूतोऽभिमन्त्रयते सिगसि न वज्रोऽसि नमस्तेऽ अस्तु मा मा हिꣳसीरिति ॥ १६ ॥ स्तनयित्नुमभिमन्त्रयते शिवा नो वर्षाः सन्तु शिवा नः सन्तु हेतयः । शिवा नस्ताः सन्तु यास्त्वꣳ सृजासि वृत्रहन्निति॥१७॥शिवां वाश्यमानामभिमन्त्रयते शिवो नामेति ॥ १८ ॥ शकुनिं वाश्यमानमभिमन्त्रयते हिरण्यपर्ण शकुने देवानां प्रहितङ्गम । यमदूत नमस्तेऽस्तु किं त्वा काक्कारिणोऽब्रवीदिति ॥ १९ ॥ लक्षण्यं वृक्षमभिमन्त्रयते मा त्वाऽशनिर्मा परशुर्मा वातो मा राजप्रेषितो दण्डः । अङ्कुरास्ते प्ररोहन्तु निवाते त्वाभिवर्षतु । अग्निष्टे मूलं मा हिꣳसीत्स्वस्ति तेऽस्तु वनस्पते स्वास्ति मेऽस्तु वनस्पत इति ॥ २० ॥ स यदि किञ्चिल्लभेत तत्प्रतिगृह्णाति द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णात्विति साऽस्य न ददतः क्षीयते भूयसी च प्रतिगृहीता भवाति । अथ यद्योदनं लभेत तत्प्राति-

गृह्य द्यौस्त्वेति अस्य द्विः प्राश्नाति ब्रह्मा त्वाऽश्नातु ब्रह्मा त्वा प्राश्नात्विति ॥ २१ ॥ अथ यदि मन्थं लभेत तं प्रतिगृह्य द्यौस्त्वेति तस्य त्रिः प्राश्नाति ब्रह्मा त्वाऽश्नातु ब्रह्मा त्वा प्राश्नातु ब्रह्मा त्वा पिबात्विति ॥ २२ ॥ अथाऽतोऽधीत्याऽधीत्यानिराकरणम् । प्रतीकं मे विचक्षणं जिह्वा मे मधु यद्वचः कर्णाभ्यां भूरि शुश्रुवे मा त्वᳬं हार्षीः श्रुतं मयि ॥ ब्रह्मणः प्रवचनमसि ब्राह्मणः प्रतिष्ठानमसि ब्रह्मकोशोऽसि सनिरसि शान्तिरस्यनिराकरणमसि ब्रह्मकोशं मे विश । वाचा त्वा पिदधामि वाचा त्वा पिदधामीति [तिष्ठ प्रतिष्ठ] स्वरकरणकण्ठचौरसदन्त्यौष्ठ्यग्रहणधारणोच्चारणशक्तिर्मयि भवतु आप्यायन्तु मेऽङ्गानि वाक् प्राणश्चक्षुः श्रोत्रं यशो बलम् ॥ यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ॥ २३ ॥ १९ ॥

जय०–अथातो हस्त्यारोहणं–वक्ष्यत इति शेषः । हस्तिनमेत्य तं स्पृशति **हस्तियशसमसी**त्यनेन मन्त्रेण । तस्यार्थः । तत्र द्वयोर्ब्रह्मा, यजुषी, हस्तीन्द्रौ देवते, स्पर्शनारोहणयोः० । हस्तिनामैरावतत्वेन प्रसिद्धम्, तद्यश एव हस्तियशसं तद्रूपोऽसि । तथा तेषां वर्चो दीप्तिरेव हस्तिवर्चसं तद्रूपश्चासीति । अथ तमारोहति **इन्द्रस्य त्वे**ति मन्त्रेण । तस्यार्थः । इन्द्रस्य वज्रेणायुधेन सहाहमिन्द्रो भूत्वा त्वा त्वामधितिष्ठामि सर्वशत्रुजयार्थमारोहामि, त्वं च मा मां स्वस्ति कल्याणं यथा तथा पारयेत्युक्तार्थम् । एवमेवाश्वारोहणं कर्तव्यम् । तत्र मन्त्रोहः । ऊहश्च हस्तिस्थाने अश्वाभिधानम् । उष्ट्रमारोक्ष्यन् आरोढुमिच्छन् तं दृष्ट्वाऽभिमन्त्रयते **त्वाष्ट्रोऽसि** इति मन्त्रेण । एतदाद्यर्थः सुगमः । तत्र परमेष्ठी यजुरुष्ट्रस्तदारोहणे० । रासभं चाश्वतरं मन्त्रलिङ्गात् । तदर्थः । तत्र विश्वामित्रः, पङ्क्तिः, रासभस्तदारोहणे० । हे रासभ त्वं शूद्रः हीनः असि । यतः शूद्रं शोकावहं जन्म यस्य स आग्नेयः अग्निदेवत्यः अश्वाद्गर्दभ्यामुद्भूतत्वाद् द्विरेताः । चतुष्पथं गच्छंस्तमभिमन्त्रयते **नमो रुद्राये**ति मन्त्रेण । तत्र परमेष्ठी, अनुष्टुप्, रुद्रो, रक्षणे० । पथिषु सीदति तिष्ठतीति पथिषत्तस्मै । एवमुत्तरत्रापि । **सुनावमि**ति मन्त्रेण नावमारुह्यावतर्तुमिच्छन् **सुत्रामाणमि**ति मन्त्रेणावतरेत् । पितृषदे पितृवनवासिने । यत्रेत्यनुक्तप्रसङ्गेष्वपि **नमो रुद्राये**त्येव ब्रूयात् कुतः हि यत इदं सर्वं रुद्र एव इति **श्रुतेः** । एवं कृते निर्विघ्नताविध्यनुष्ठानफलं च स्यात् । सिच्छब्देन वस्त्रप्रान्तैकदेशो दशेति प्रसिद्धः, तदुत्थो वायुरमङ्गलः । तथा च **आपस्तम्ब**सूत्रम् "यदा वाऽपहतं सिचा वा शुना वा अन्नमभोज्यं स्यात्" इति । तया सिचाऽवधूतो वीजितस्तदा तामभिमन्त्रयते **सिगसी**ति मन्त्रेण । तत्र त्रयाणां प्रजापतिरनुष्टुप् लिंगोक्ता अभिमन्त्रणे० । स्तनयित्नुं मेघगर्जितं श्रुत्वाऽभिमन्त्रयते **शिवा न** इति मन्त्रेण । अस्यार्थः । हे इन्द्र शिवाः कल्याणकारिण्यो नोऽस्माकं वर्षा वृष्टयः सन्तु । तथा हेतयः ऐन्द्राण्यायुधानि शिवा नोऽस्माकं सन्तु । हे वृत्रहन् याश्च हेतीस्त्वं शत्रुषु सृजसि क्षिपसि ता अपि नः शिवाः सन्तु । शिवां शृगालीं वाश्यमानां शब्दं कुर्वाणामभिमन्त्रयते **शिवो नामे**ति मन्त्रेण । यद्यप्ययं मन्त्रः क्षुरादाने विनियुक्तस्तथापि नानाशक्तित्वादत्रापि विनियुज्यते । शकुनिं कृष्णकाकम् । अथ मन्त्रार्थः । प्रागुक्तमृष्यादि । हे हिरण्यपर्ण शीघ्रग हे शकुने देवानां प्रहितं प्रेषितं स्थानं गच्छतीति देवादिष्टं शुभाशुभं गमयतीति वा भो यमस्य दूत ते तुभ्यं नमोऽस्तु । त्वा त्वां कार्कारिण इति द्वितीयार्थे षष्ठी । कार्कारं काकजात्यनुरूपं शब्दं कुर्वन्तं प्रति यमः किमब्रवीत् । यद्वा कार्कारिणस्तव यमः स्वामी

यमस्त्वा किमब्रवीत् मा ब्रवीत्वित्यर्थः। लक्षण्यं प्रसिद्धं यत्प्रसिद्धया ग्रामस्यापि प्रसिद्धिर्भवति तं वृक्षं दृष्ट्वाऽभिमन्त्रयते **मा त्वे**ति मन्त्रेण । अस्यार्थः । तत्र प्रजापतिरनुष्टुप् वनस्पतिस्तद्रक्षणे० । हे वृक्ष त्वा त्वाम् अशनिर्वज्रो मा हिंसीत् मा नाशयतु । एवमुत्तरत्रापि योज्यम् । परशुः कुठारः, राजप्रेषितो दण्डो राजोपद्रवः अग्निश्च ते तव मूलं मा हिंसीत् । ते तवाङ्कुराश्च प्ररोहन्तु पल्लवा उद्गच्छन्तु । निवाते निर्वाते अल्पवायौ, त्वा त्वां प्राप्य देवेन्द्रोऽभिवर्षतु । ते तव स्वस्ति कल्याणमस्तु हे वनस्पते । तथा हे वनस्पते मे ममापि स्वस्त्यस्तु । स स्नातको यदि किञ्चिद् गवादिकं लभेत तत्प्रतिगृह्णाति **द्यौस्त्वे**ति मन्त्रेण, प्रतिग्रहः स्वीकारः । अस्यार्थः । तत्र प्रजापतिरुष्णिक्, दक्षिणा, स्वीकारे० । हे दक्षिणे द्यौराकाशाभिमानिनी देवता त्वा त्वां ददातु यजमानो देवरूपो भूत्वा ददात्वित्यर्थः । पृथिवी सर्वंसहा त्वा त्वां प्रतिगृह्णातु पृथिवीरूपो मानुषो भूत्वा प्रतिगृह्णात्वित्यर्थः । त्वत्पदावृत्तिर्दक्षिणायाः कर्मसाद्गुण्यकर्तृत्वख्यापनार्था । एवं संस्कृता दक्षिणा दातृप्रतिग्राहिणोः सिद्धिकरी भवति। तत्र दातुः सिद्धिरपूर्वोत्पादकत्वेन । प्रतिग्राहिणोऽपि कर्मानुष्ठानयोग्यत्वात् । “प्रतिग्रहधना विप्राः” इत्यादिवचनात् । सा एवं संस्कृता सती अस्य ददतो न क्षीयते वर्द्धत इत्यर्थः । एवं प्रतिगृहीता सती प्रतिग्रहीतुर्भूयसी प्रचुरतरा भवति, अयं च सर्वप्रतिग्रहे मन्त्रः । स्नातकस्य ओदनं भक्तम्, तस्य लब्धस्य । अवयवलक्षणा षष्ठीयम् । द्विः द्विवारं प्राश्नाति **ब्रह्मा त्वे**ति मन्त्रभेदाभ्याम् । प्रशब्देन मन्त्रभेदः । दधिदुग्धजलानामन्यतममिश्राः सक्तवो मन्थशब्देनाभिधीयन्ते । तं लभेत तदा **द्यौस्त्वे**ति मन्त्रेण प्रतिगृह्य तस्य त्रिः प्राशनम्, **ब्रह्मा त्वे**ति प्रतिमन्त्रम् । अस्यार्थः सुगमः । एवं प्रतिग्रहेण दोषाभावोऽपि भवति । दोषश्च “प्रतिग्रहेण विप्राणां ब्राह्मं तेजो विनश्यति” इति “यो न धर्मं विधिं वेद” इत्यादिवचनाद्यो दाता प्रतिग्राही वा न विधिज्ञः स स्तेनः तद्दण्डेन दण्ड्य इत्यर्थः। अथातोऽधीत्याऽधीत्य आवृत्यावृत्य अनिराकरणम् अविस्मरणं कर्म कर्तव्यम्, **प्रतीकं मे विचक्षणमि**ति मन्त्रेणाङ्गालम्भनम् । तस्यार्थः । तत्र परमेष्ठी, गायत्री, अङ्गानि, तदालम्भने०। प्रतीकं मुखं मे मम विचक्षणं विशिष्टवर्णोच्चारणसमर्थम्।अस्त्विति शेषः। मधु मधुरं यद्वचस्तद्वदत्विति शेषः। भूरि बहु बहुकालं वा शुश्रुवे शृणवानि । भो ब्रह्मन् वेदपुरुष मयि विषये यच्छ्रुतं शास्त्रं तज्ज्ञानं च त्वं मा हार्षीः मा हर । तदर्थं स्तौति। ब्रह्मणो वेदस्य प्रवचनमध्ययनं त्वमसि । ब्रह्मणः अधीतस्य वेदस्य प्रतिष्ठानं स्थितिराधार इति यावत् । ब्रह्मणस्तस्य कोशो गोपनगृहम् । सनिः सम्भजनीयम् । शान्तिरनिष्टनिवृत्तिः । अनिराकरणमप्रमादः अविस्मरणमिति यावत्। किंच मे मम ब्रह्मकोशं वेदाशयं विश प्रविश । “सर्वेषां वेदानाꣳ हृदयमेकायनम्” इति श्रुतेः । अहं च वाचा सत्यवाण्या त्वा त्वां पिदधामि गोपाये छादयामीति वा । यथा मत्तो नापैषि । आवृत्तिर्दार्ढ्यार्था । स्वरा उदात्तादयः,करणानि संवृतादीनि,कण्ठ्याः कण्ठे भवा अकुहविसर्जनीयाः, औरसाः सहकारा वर्गपञ्चमाऽन्तस्थाः, दन्त्याः लृतुलसाः, ओष्ठ्याः उपूपध्मानीयाः, तेषां ग्रहणमुपादानम्, धारणं स्थिरीकरणम् , उच्चारणं प्रयोगः, तेषु शक्तिर्मय्यस्तु । अङ्गानि गात्राणि आप्यायन्तु । तान्याह—वाक् गीः, प्राणो वायुः प्रधानभूतः, चक्षुर्नेत्रबलम्, श्रोत्रं तत्पाटवम्, यशः कीर्त्तिः, बलं शारीरम्, एतान्यङ्गानि आप्यायन्त्विति सम्बन्धः । परस्मैपदं छान्दसम् । यन्मे मया श्रुतं मीमांसादि अधीतम् ऋगादि । यद्वा । श्रुतं गुरुमुखात् अधीतम् अभ्यस्तम् अधिगतं वा तत्सर्वं मे मम मनसि हृदये तितुष्ठ तिष्ठतु स्थिरमस्तु माऽपयात्वित्यर्थः । वीप्सा ग्रन्थसमाप्त्यवद्योतनार्था ॥ १९ ॥ * ॥

क्षन्तव्यं तच्च विद्वद्भिर्यन्मया चापलं कृतम् । गृह्यभाष्यमलेखीदं दृष्ट्वा कर्कादिकौशलम् ॥ १ ॥ शोधनीयमिदं सद्भिर्मम स्वापत्यचापलम् । बाल्यप्रोत्साहितस्यात्र यदत्र स्खलितं मम ॥ २ ॥ श्रीमन्मान्त्रिक-

माधवश्रुतिसुधासिन्धोर्विगाहाप्ततद्वेद्यस्तत्कृपयाऽभवद् द्विजवरः श्रीकेशवस्तादृशः । तस्याङ्घ्रिद्वयकस्पृशा कृतमिदं कातीयसूत्रस्य सद्भाष्यं सज्जनवल्लभं सुविदुषां प्रेष्ठं शिवप्रीतये ॥ ३ ॥ आचार्यापरनामधेय इति यो दामोदरोऽभूद् द्विजो भारद्वाजसुगोत्र आत्मरतिरप्यस्यात्मजस्तादृशः । नाम्ना श्रीबलभद्र आप्तसुयशास्तत्सूनुनैतत्कृतं भाष्यं सज्जनवल्लभं जययुजा रामेण मत्यै शुभम् ॥ ४ ॥ कर्कादिद्विजवर्य्याणां दृष्ट्वा भाष्याणि भूरिशः । उपचेतुं तदुच्छिष्टं जयरामोऽलिखत्स्फुटम् ॥ ५ ॥ * ॥

इति श्रीमत्कातीयगृह्यसूत्रभाष्ये सज्जनवल्लभाख्ये जयरामकृतौ तृतीयकाण्डविवरणं समाप्तम् ॥ ३ ॥

हरि०–**अथातो हस्त्यारोहणम्**–अथ रथारोहणानन्तरं यतोऽधिकृतस्य हस्त्यारोहणमप्यपेक्षितं भवति अतो हेतोः हस्त्यारोहणं वक्ष्यत इति सूत्रशेषः । **एत्य हस्तिनमभिमृशति हस्तियशसमसि हस्तिवर्चसमसीति**–एत्य हस्तिसमीपमागत्य हस्तिनं गजम् अभिमृशति आलभते, हस्तियशसमसीति मन्त्रेण । **अथारोहतीन्द्रस्य त्वा वज्रेणाभितिष्ठामि स्वस्ति मा सम्पारयेति**–अथाभिमर्शनानन्तरम् आरोहति हस्तिनम्, इन्द्रस्य त्वेति मन्त्रेण । **एतेनैवाऽश्वारोहणं व्याख्यातम्**–एतेनैव हस्त्यारोहणेनैव अश्वारोहणं व्याख्यातं कथितम्, अतश्चाश्वसमीपं गत्वाऽश्वमभिमृशति " अश्वयशसमस्यश्ववर्चसमसि " इति मन्त्रेण । ततोऽश्वमारोहति, इन्द्रस्य त्वा वज्रेणाभितिष्ठामि स्वस्ति मा सम्पारय " इत्यनेन मन्त्रेण । **उष्ट्रमारोक्ष्यन्नभिमन्त्रयते त्वाष्ट्रोऽसि त्वष्टृदेवत्यः स्वस्ति मा सम्पारयेति**–उष्ट्रं क्रमेलकम् आरोढुमिच्छन्नभिमन्त्रयते त्वाष्ट्रोऽसीत्यादिना मन्त्रेण । **रासभमारोक्ष्यन्नभिमन्त्रयते शूद्रोऽसि शूद्रजन्माऽऽग्नेयो वै द्विरेताः स्वस्ति मा सम्पारयेति**–रासभं गर्दभमारोढुमिच्छन् शूद्रोऽसीत्यादिना मन्त्रेणाभिमन्त्रयते अभिमुखः सन् मन्त्रं पठति । रासभोऽत्राश्वतरः प्रतीयते मन्त्रलिङ्गात् । **चतुष्पथमभिमन्त्रयते नमो रुद्राय पथिषदे स्वस्ति मा सम्पारयेति**–चतुष्पथं चत्वारः पन्थानो यस्मिन्स चतुष्पथः चतुर्मार्गाभिसरणप्रदेशस्तमभिमन्त्रयते नमो रुद्राय पथिषदे इत्यादिमन्त्रेण । **नदीमुत्तरिष्यन्नभिमन्त्रयते नमो रुद्रायाप्सुषदे स्वस्ति मा सम्पारयेति**–नदीं स्रवन्तीमुत्तरिष्यन् पारं जिगमिषन् नमो रुद्रायाप्सुषद इति मन्त्रेणाभिमन्त्रयते । **नावमारोक्ष्यन्नभिमन्त्रयते सुनावमिति**–नावं तरीम् आरोढुमिच्छन् सुनावमारोहेत्यनयर्चाऽभिमन्त्रयते । **उत्तरिष्यन्नभिमन्त्रयते सुत्रामाणमिति**–उत्तरिष्यन्नुत्तर्तुं प्रत्यवरोढुमिच्छन् तामेवाभिमन्त्रयते सुत्रामाणमित्यनयर्चा । **वनमभिमन्त्रयते नमो रुद्राय वनसदे स्वस्ति मा सम्पारयेति**–वनं काननं प्रवेष्टुमिच्छन् नमो रुद्राय वनसद इत्यादिनाऽभिमन्त्रयते । **गिरिमभिमन्त्रयते नमो रुद्राय गिरिषदे स्वस्ति मा सम्पारयेति**–गिरिं पर्वतमारोढुकामोऽभिमन्त्रयते नमो रुद्राय गिरिषद इति मन्त्रेण । **श्मशानमभिमन्त्रयते नमो रुद्राय पितृषदे स्वस्ति मा सम्पारयेति**--श्मशानं प्रेतदहनभूमिं कार्यवशात्प्राप्य नमो रुद्राय पितृषदे इति मन्त्रेणाभिमन्त्रयते । **गोष्ठमभिमन्त्रयते नमो रुद्राय शकृत्पिण्डसदे स्वस्ति मा सम्पारयेति**–गोष्ठं गोवाटं, कार्यवशात्प्राप्य नमो रुद्राय शकृत्पिण्डसद इत्यादिमन्त्रेणाभिमन्त्रयते । **यत्र चान्यत्रापि नमो रुद्रायेत्येव ब्रूयाद्रुद्रो ह्येवेदꣳ सर्वमिति श्रुतेः**–यत्र च येषु अन्यत्रापि अन्येष्वपि अनुक्तकार्येषु पूर्वं नमो रुद्रायेत्येव ब्रूयात, पश्चात्तानि कर्माणि कुर्यात् । कुतः हि यतः इदं विश्वम् रुद्र एव इति श्रुतेर्वेदवचनात । **सिचाऽवधूतोऽभिमन्त्रयते सिगसि न वज्रोऽसि नमस्ते अस्तु मा मा हिꣳसीरिति**–

सिचा वस्त्रप्रान्तेनावधूतः तद्वाताहतस्तदा तां सिचमभिमन्त्रयते सिगसीत्यादिमन्त्रेण । शिवा नो वर्षाः सन्तु शिवा नः सन्तु हेतयः । शिवा नस्ताः सन्तु यास्त्वꣳ सृजसि वृत्रहन्निति—स्तनयित्नुं मेघं गर्जन्तं शिवा नो वर्षा इत्यादिना मन्त्रेणाभिमन्त्रयते । शिवां वाश्यमानामभिमन्त्रयते शिवो नामेति—शिवां शृगालीं वाश्यमानां शब्दं कुर्वाणां शिवो नामेत्यादिना मा मा हिꣳसीरित्यन्तेन मन्त्रेणाभिमन्त्रयते । शकुनिं वाश्यमानमभिमन्त्रयते हिरण्यपर्ण शकुने देवानां प्रहितङ्गम । यमदूत नमस्तेऽस्तु किन्त्वा कार्कारिणोऽब्रवीदिति—शकुनिं पक्षिणं कृष्णकाकमिति यावत् । वाश्यमानं कजन्तं हिरण्यपर्णेत्यादिमन्त्रेणाभिमन्त्रयते । लक्षण्यं वृक्षमभिमन्त्रयते मा त्वाऽशनिर्मा परशुर्मा वातो मा राजप्रेषितो दण्डः । अङ्कुरास्ते प्ररोहन्तु निवाते त्वाऽभिवर्षतु । अग्निष्टे मूलं मा हिꣳसीत् स्वस्ति तेऽस्तु वनस्पते स्वस्ति मेऽस्तु वनस्पत इति—लक्षण्यं वृक्षं मङ्गल्यं तरुम् आम्रादिकमभिमन्त्रयते मा त्वाऽशनिरित्यादिमन्त्रेण । स यदि किंचिल्लभेत तत्प्रतिगृह्णाति द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णात्विति—स द्विजः यदि चेत् किंचित् गोभूहिरण्यादिकं लभेत प्राप्नुयात् तदा द्यौस्त्वेति मन्त्रेण तत्प्रतिगृह्णाति स्वीकुरुते । साऽस्य न ददतः क्षीयते भूयसी च प्रतिगृहीता भवति—सा दक्षिणा एवंविधाय दीयमाना अस्य ददतः दातुः उपयुज्यमानाऽपि न क्षीयते न ह्रसति, प्रत्युत एवं प्रतिगृहीता सती भूयसी च उत्तरोत्तरमभिवर्धमाना भवति । अथ यद्योदनं लभेत तत्प्रतिगृह्य द्यौस्त्वेति । तस्य द्विः प्राश्नात्विति ब्रह्मा त्वाऽश्नातु ब्रह्मा त्वा प्राश्नात्विति—अथ कदाचित् ओदनं भक्तं यदि लभेत प्राप्नुयात्तदा: तत्प्रतिगृह्य आदाय द्यौस्त्वा ददात्विति मन्त्रं पठेत् । मन्त्रपाठस्तु आदानानन्तरं सर्वत्र स्वसत्तापत्तये । तस्य लब्धस्यौदनस्य द्विः द्विवारं प्राश्नाति भक्षयति । कथं ब्रह्मा त्वाऽश्नात्विति प्रथमम्, ब्रह्मा त्वा प्राश्नात्विति द्वितीयम् । स यदि मन्थं लभेत तं प्रतिगृह्य द्यौस्त्वेति तस्य त्रिः प्राश्नाति ब्रह्मा त्वाऽश्नातु ब्रह्मा त्वा प्राश्नातु, ब्रह्मा त्वा पिबत्विति । स द्विजः यदि मन्थं दधिमन्थं लभेत प्राप्नुयात्तदा तं प्रतिगृह्यादाय द्यौस्त्वा ददात्विति मन्त्रेण स्वीकृत्य तस्य दधिमन्थस्य त्रिस्त्रिवारं प्राश्नाति, कथम्, ब्रह्मा त्वाऽश्नातु इति प्रथमम्, ब्रह्मा त्वा प्राश्नात्विति द्वितीयम्, ब्रह्मा त्वा पिबत्विति तृतीयमिति त्रिभिर्मन्त्रैः । अथातोऽधीत्याधीत्यानिराकरणम्—अथेदानीं यतो द्विजानां प्रतिदिनमध्ययनं विहितम् अतः कारणात् अधीत्याधीत्य पठित्वा पठित्वा अनिराकरणम् अपरित्यागः कर्तव्यः वक्ष्यमाणनिगदेन । तद्यथा प्रतीकं मे विचक्षणं जिह्वा मे मधु यद्वचः । कर्णाभ्यां भूरि शुश्रुवे मा त्वा ꣳहार्षीः श्रुतं मयि । ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोऽसि सनिरसि शान्तिरस्यनिराकरणमसि ब्रह्मकोशं मे विश वाचा त्वाऽपिदधामि वाचा त्वा पिदधामि [तिष्ठ प्रतिष्ठ] स्वरकरणकण्ठचौरसदन्त्यौष्ठ्यग्रहणधारणोच्चारणशक्तिर्मयि भवत्वाप्यायन्तु मेऽङ्गानि वाक् प्राणश्चक्षुः श्रोत्रं यशो बलम् । यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु—अस्यार्थः । प्रतीकं मुखं मे मम विचक्षणं साधुशब्दोच्चारणसमर्थमस्त्विति सूत्रशेषः । मे मम जिह्वा यद्वचो वचनं मधु मधुरं रसवत् तद्वदत्विति शेषः । एवमभीप्सितः शेषः सर्वत्र पूरणीयः । कर्णाभ्यां भूरि बहु शुश्रुवे शृणुयाम् । मयि विषये यत् श्रुतमधीतम् पठितं वर्तते तत्त्वं मा हार्षीः माऽपनय । तथा ब्रह्मणो मयि विषये ब्रह्मणो वेदस्य प्रवचनं पाठनं व्याख्यानं वा असि भवेत्यर्थः । तथा ब्रह्मणो वेदस्य प्रतिष्ठानं प्रतिष्ठा स्थितिरित्यर्थः, असि । मयीत्यनुवर्तते । ब्रह्मकोशोऽसि ब्रह्मणः शब्दरूपस्य

कोशः गोपनगृहं गुप्तिस्थानं मयि असि । तथा सानिः समं जीवनमसि । तथा शान्तिः अनिष्टस्यं अनिष्टहेतोश्च शमनमसि । तथा निराकरणं परित्यागः, न निराकरणम् अनिराकरणम् असि । मे मम ब्रह्मकोशं हृदयं विश । " सर्वेषां वेदाना॒ँ हृदयमेकायनम् " इति श्रुतेः । वाचा गिरा त्वा त्वाम् अपिदधामि छादयामि । आवृत्तिरादरार्था । स्वरा उदात्तानुदात्तस्वरिताः, करणानि शब्दस्य उत्पत्तेरभिव्यक्तेर्वा साधनानि उरःकण्ठशिरोजिह्वामूलदन्तनासिकोष्ठतालूनीत्यष्टौ । कण्ठे भवाः कण्ठ्याः अवर्णकेवलहकारकवर्गविसर्गाः । उरसि भवा औरसाः सहकारवर्गपञ्चमान्तस्थाः, दन्तेषु भवाः दन्त्याः लृवर्णतवर्गसकाराः, ओष्ठे भवा ओष्ठ्याः उवर्णपवर्गोपध्मानीयाः । स्वराश्च करणानि च कण्ठ्याश्च औरसाश्च दन्त्याश्च ओष्ठ्याश्च स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्याः एतेषां ग्रहणम् उपादानम्, धारणं स्थिरीकरणम्, उच्चारणं प्रयोगः, ग्रहणं च धारणं च उच्चारणं च ग्रहणधारणोच्चारणानि तेषु शक्तिः स्वरादीनां धारणादिसामर्थ्यं मय्यस्तु । मे मम अङ्गानि गात्राणि आप्यायन्तु वर्द्धन्ताम् । न केवलमङ्गानि-किन्तु वाक् गीः, प्राणः प्राणवायुः सूत्रात्मा इति यावत् । चक्षुर्नयनेन्द्रियम्, श्रोत्रं श्रवणेन्द्रियम्, यशः कीर्त्तिः, बलं शारीरमोजः । एतान्यपि वागादीनि आप्यायन्त्वित्यनुषङ्गः । यन्मे मया श्रुतं मीमांसादि, अधीतम् ऋगादि तत्सर्वं मे मनसि तिष्ठतु सुस्थिरमस्तु । वीप्साऽत्रार्थभूयस्त्वप्रतिपादनपरा ग्रन्थसमाप्तिज्ञापनार्था वा ॥ इति सूत्रार्थः ॥ १५ ॥

अथ परिशिष्टोक्तं पृष्टोदिविविधानं लिख्यते—केशान्तादूर्ध्वमपत्नीक उत्सन्नाग्निरनग्निको वा प्रवासी ब्रह्मचारी वा मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कृत्वा अन्वग्निरित्यनयर्चाऽग्निमाहृत्य पञ्च भूसंस्कारान्कृत्वा **पृष्टो दिवि पृष्टो अग्निः पृथिव्यामित्यनयर्चाऽग्नेः** स्थापनम् । **तत्सवितुः ता॒ँ सवितुः विश्वानि देव सवितरित्येताभिस्तिसृभिः** सावित्रीभिः प्रज्वालनमग्नेः । अथ तस्मिन्नग्नौ सायम्प्रातर्होमपञ्चमहायज्ञपिण्डपितृयज्ञपक्षाद्याग्रयणादि कुर्यात् । मणिकावधानादि सर्वमावसथ्याधानादिवत् । अनुदिते च होमः । एवं कृते न वृथा पाको भवति । न वृथा पाकं पचेन्न वृथा पाकमश्नीयान्न वृथा पाकमश्नीयादिति ॥ १५ ॥ इत्याग्निहोत्रिश्रीहरिहरविरचितायां पारस्करगृह्यसूत्रव्याख्यानपूर्वकप्रयोगपद्धतौ तृतीयः काण्डः समाप्तः ॥ शुभं भवतु ॥ ॥ * ॥ ॥ * ॥

विश्व०—अथातो हस्त्यारोहणम्—हस्त्यारोहणेच्छायां दत्ते वा हस्तिनि विधिरुच्यते । स्वेच्छायां प्रात्यहिकं परेच्छायां कादाचित्कम् । एवमुत्तरत्रापि यथासंभवमूह्यम् । अधिकृतस्य क्षत्रियस्य स्वेच्छया । आप्तहस्तिनो ब्राह्मणस्येत्यतो हेतोरारोहणविधानम् । **एत्य हस्तिनमभिमृशति हस्तियशसमसि हस्तिवर्चसमसीति**-एत्य स्वस्थानात् हस्तिसमीपमागत्य हस्तिनमभिमृशति हस्तेन **हस्तियशसमिति** मन्त्रेण । **अथारोहतीन्द्रस्य त्वा वज्रेणाभितिष्ठामि स्वस्ति मा संपारयेति**—अथ अभिमन्त्रणानन्तरं हस्तिनमारोहति **इन्द्रस्य त्वेति** मन्त्रेण । यात्वाऽध्वानं विमुच्य यवसोदकदानं पूर्वोक्तमत्राप्युत्तरत्रापि च ज्ञेयं वाहनशब्दसाम्यात् । **एतेनैवाश्वारोहणं व्याख्यातम्**—तत्र मन्त्रे हस्तिपदस्थाने अश्वपदं प्रयोज्यम् । अभिमर्शने अश्वयशसमस्यश्ववर्चसमसीति । तत **इन्द्रस्य** त्वेत्यारोहणम् । **उष्ट्रमारोक्ष्यन्नभिमन्त्रयते त्वाष्ट्रोऽसि त्वष्टृदेवत्यः स्वस्ति मा संपारयेति**—त्वरागमनेच्छोरन्ययोः प्रतिग्रहे ब्राह्मणस्यापि आरोहणात्पूर्वं **त्वाष्ट्रोऽसीति** पठित्वा अभिमन्त्र्य आरोहेत् । **रासभमारोक्ष्यन्नभिमन्त्रयते शूद्रोऽसि शूद्रजन्माऽऽग्नेयो वै द्विरेताः स्वस्ति मा संपारयेति**—रासभो गर्दभः, तमारोढुमिच्छन् अभिमन्त्रयते **शूद्रोऽसीति** मन्त्रेण, द्विरेता इति मन्त्रगतविशेषणस्तेनाश्वतरो गम्यते । सोऽत्यन्तं सुखगामी त्वरद्गातिश्च भवतीति । **([1]पन्थानमभिमन्त्रयते नमो रुद्राय पथिषदे स्वस्ति मा संपारयेति**—ग्रामान्तरे गन्तुमिच्छन् ग्रामाद्बहिर्निःसृत्य मार्गमभिमन्त्रयते **नमो रुद्राय** पथिषदे इति मन्त्रेण । एवं मार्गे यदा चतुष्पथस्तदा विशेषः।)**चतुष्पथमभिमन्त्रयते नमो रुद्राय पथिषदे ([2]चतुष्पथसदे) स्वस्ति मा संपारयेति**—चत्वारः पन्थानो यस्मिन् स चतुष्पथः, **नमो रुद्रायेति** मन्त्रं जपेत् । **नदीमुत्तरिष्यन्नभिमन्त्रयते नमो रुद्रायाप्सुषदे स्वस्ति मा संपारयेति**-नदीं वहन्तीमुदकवतीं परपारं

---

[1] अयं कोष्ठकान्तर्गतः पाठोऽत्राधिको दृश्यते । [2] इदं वाक्यं [illegible] दृश्यते ।

गन्तुमिच्छन्**नमो रुद्राये**त्यभिमन्त्रयते । स्नानं विनैवोत्तरिष्यन्नभिमन्त्र्य परपारं गत्वा स्नानादि कर्तव्यम् । सरस्वत्यां स्नात्वा नित्यं विधायाभिमन्त्र्य परपारे गन्तव्यमिति विशेषः । **नावमारोक्ष्यन्नभिमन्त्रयते सुनावमिति**–नावं नौकां तरीं तया पूरवतीं नदीमवतरितुमिच्छन्नौकारोहणकाले नौकामभिमन्त्रयते **सुनावमिति** मन्त्रेण ॥ **उत्तरिष्यन्नभिमन्त्रयते सुत्रामाणमिति**–प्रपारं गत्वा नौकायाः सकाशात् अवरोहणं कर्तुमिच्छन् नावमाभिमन्त्रयते नौकास्थित एव **सुत्रामाण**मिति । ततोऽवतरेत् । **वनमभिमन्त्रयते नमो रुद्राय वनसदे स्वस्ति मा संपारयेति**–वनं वृक्षवीरुदाकुलितं प्रदेशं प्राप्याभिमन्त्रयते **नमो रुद्राये**ति । **गिरिमभिमन्त्रयते नमो रुद्राय गिरिषदे स्वस्ति मा संपारयेति**–गिरिं प्राप्यारोढुमिच्छन्**नमो रुद्राये**त्यभिमन्त्रयते । **श्मशानमभिमन्त्रयते नमो रुद्राय पितृषदे स्वस्ति मा संपारयेति**–श्मशानं मनुष्यदाहभूमिं प्राप्याभिमन्त्रयते **नमो रुद्राये**ति । **गोष्ठमभिमन्त्रयते नमो रुद्राय शकृत्पिण्डसदे स्वस्ति मा संपारयेति**–गोष्ठं गवां बन्धनस्थानं, ग्रामाद्बहिरेकीकरणस्थानं वा तमभिमन्त्रयते **नमो रुद्राये**ति । **यत्र चान्यत्रापि नमो रुद्रायेत्येव ब्रूयात्**–इमानि दिग्दर्शनमात्रेणोक्तानि । एतद्व्यतिरिक्तेष्वपि कर्मसु कर्मारम्भे **नमो रुद्राये**ति पूर्वं ब्रूयात् वदेत् । कुतः **रुद्रो ह्येवेदꣳसर्वमिति श्रुतेः**–इदं सर्वं पृथिव्यां पदार्थजातमात्रं तत्सर्वं रुद्र एवेति श्रुतेः । **सिचाऽवधूतोऽभिमन्त्रयते स्रिगसि न वज्रोऽसि नमस्ते अस्तु मा मा हिꣳसीरिति**–वस्त्रप्रान्तभागः सिगुच्यते । तेनावधूतः व्यजनरूपेण, अभिमन्त्रयते तं **स्रिगसी**ति । वैदिकपाठक्रमं त्यक्त्वा भाष्यव्याख्याक्रमेणाह–**स्तनयित्नुमभिमन्त्रयते शिवा नो वर्षाः सन्तु शिवा नः सन्तु विद्युतः । शिवा नस्ताः सन्तु यास्त्वꣳसृजसि वृत्रहन्निति**–स्तनयित्नुर्द्दद्द इति महच्छब्दं दर्शयति श्रुतौ, तेन स्तनयित्नुः सर्वरूपो महागर्जनशीलो मेघः । तमभिमन्त्रयते **शिवा न** इति । **शिवां वाश्यमानामभिमन्त्रयते शिवो नामेति**–शिवा वृद्धा शृगाली । तां शिवां शब्दं कुर्वाणामभिमन्त्रयते **शिवो नामासी**ति । **शकुनिं वाश्यमानमभिमन्त्रयते हिरण्यपर्ण शकुने देवानां प्रहितङ्गम । यमदूत नमस्तेऽस्तु किं त्वा कार्कारिणोऽब्रवीदिति**–शकुनिः कृष्णकाकः। तं शब्दं कुर्वन्तमभिमन्त्रयते **हिरण्यपर्ण** इति। "क्षेम्यो ह्येव भवति" एवं पूर्वोक्तेषु अभिमन्त्रणेषु यथोक्तमभिमन्त्रिते अभिमन्त्रणकर्तुः कुशलं भवति । **लक्षण्यं वृक्षमभिमन्त्रयते मा त्वाऽशनिर्मा परशुर्मा वातो मा राजप्रेषितो दण्डः। अङ्कुरास्ते प्ररोहन्तु निवाते त्वाऽभिवर्षतु । अग्निष्टे मूलं मा हिꣳसीत्स्वस्ति तेऽस्तु वनस्पते इति**–लक्षणसंपन्नं पत्रपुष्पफलवन्तमाम्रादिवृक्षमभिमन्त्रयते **मा त्वाऽशनिरि**त्यादिना । **स यदि किंचिल्लभेत तत्प्रगृह्णाति द्यौस्त्वा ददातु पृथीवी त्वा प्रतिगृह्णात्विति**–स प्रतिग्रहकर्ता किंचित् हिरण्यगोभूकन्यावस्त्रधान्यघृतादिकं लभेत तदा तत् **द्यौस्त्वे**ति मन्त्रेण प्रतिगृह्णाति । **अथ यद्योदनं लभेत**–तत्प्रतिगृह्णाति **द्यौस्त्वा गृह्णात्वि**ति । इष्टावोदनं पक्त्वा दक्षिणात्वेन ऋत्विग्भ्यो दीयते तदोदनं **द्यौस्त्वे**ति दानोत्तरं प्रतिगृह्य गृहीत्वा मन्त्रं पठेत् । लब्धस्यौदनस्य भक्षणमन्त्रं प्राशनं चाह–**तस्य द्विः प्राश्नाति ब्रह्मा त्वाऽश्नातु ब्रह्मा त्वा प्राश्नात्विति**–तस्य मन्त्रेण प्रतिगृहीतस्य वारद्वयं प्राश्नाति । कथं ब्रह्मा त्वाऽश्नात्विति प्रथमम् । ब्रह्मा त्वा प्राश्नात्विति द्वितीयवारम् । **अथ यदि मन्थं लभेत तत्प्रतिगृह्णाति द्यौस्त्वा० गृह्णात्विति**–मन्थस्तु दधिसक्तवः पित्र्येष्ट्यां लभेत, तस्यावघ्राणं वा प्राशनं वा । अथवा लौकिकेऽपि मन्थे लब्धे **द्यौस्त्वे**ति प्रतिगृह्य । **तस्य त्रिःप्राश्नाति ब्रह्मा त्वाऽश्नातु ब्रह्मा त्वा प्राऽश्नातु ब्रह्मा त्वापिबत्विति**–तस्य लब्धस्य मन्थस्य त्रिः वारत्रयं प्राश्नाति पृथङ्मन्त्रैः । ते च–"ब्रह्मा त्वाऽश्नातु, ब्रह्माऽत्वा पाश्नातु, ब्रह्मा त्वा पिबतु" इति एभिर्मन्त्रैः प्राशनं मन्थस्य । **अथातोऽधीत्याधीत्यानिराकरणम्**–अथानन्तरमध्ययनान्तरं पठित्वा प्रत्यहमनिराकरणम् । निराकरणं नाम परित्यागः । परित्यागे पुस्तकनिरपेक्षतया पठनं कर्त्तुं न शक्यते । अतो हेतोरनिराकरणमपरित्यागः । पठित्वा वक्ष्यमाणेनानिराकरणम् । **प्रतीकं मे विचक्षणं जिह्वा मे मधु यद्वचः । कर्णाभ्यां भूरि शुश्रुवे मा त्वाऽहार्षीः श्रुतं मयि । ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोऽसि सनिरसि शान्तिरस्यनिराकरणमसि ब्रह्मकोशं मे विश वाचा त्वा पिदधामि वाचा त्वा पिदधामि । [तिष्ठ प्रतिष्ठ] स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्यग्रहणधारणोच्चारणशक्तिर्मयि भवतु । आप्यायन्तु मेऽङ्गानि वाक्प्राणश्चक्षुः श्रोत्रं यशो बलम्। यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठत्विति।** अथातोऽधीत्याधीत्यानिराकरणं कर्त्तव्यमुक्तं तदनिराकरणं कृत्वा मन्त्राः पठनीयास्ते मन्त्राः **प्रतीकं मे विचक्षणमि**त्यादयः। तत्र शरीरदोषं त्यक्त्वा मुखादि मन्त्रान्तःपरिपठितं ममास्त्वित्याशीःप्रार्थनम्। एतत्सर्वं ममास्त्विति मन्त्रार्थः। तिष्ठत्विति वीप्सा काण्डसमाप्तिज्ञापनार्था । इति तृतीयकाण्डस्य पञ्चदशी कण्डिका ॥ १५ ॥

अभून्नन्दपुरे मुञ्जो नागरो गोत्रकश्यपे । लक्ष्मीधरोऽभवत्तस्मात्सूर्यदत्तस्तु तत्सुतः ॥ १ ॥
तस्मादाशाधरो जातो नारसिंहाभिधस्ततः । तत्सुतेन कृतं भाष्यं विश्वनाथेन धीमता ॥ २ ॥
पारस्करस्य गृह्यस्य पञ्चखण्डावशिष्टकम् । गरिष्ठं सर्वभाष्येषु बह्वर्थं निर्णयान्वितम् ॥ ३ ॥
महादेवजगन्नाथपुत्रपौत्रप्रपौत्रकैः । गोपनीयं निरीक्ष्यं च पठितव्यं समाहितैः ॥ ४ ॥
नारसिंहाग्रजोऽनन्तस्तस्य यो वै प्रपौत्रकः । लक्ष्मीधराऽभिधस्तम्भतीर्थात्काश्यां समागतः ॥५॥
उपहासं पुरस्कृत्य ह्रियं कृत्वा तु पृष्ठतः । भाष्यान्यन्यानि चालोक्य पञ्चखण्डान्यलीलिखत् ॥६॥
तेनैव चास्य भाष्यस्य पूर्त्तिर्जाता यथातथा । संवन्नेत्रग्रहकला १६९२ मितेऽब्दे चोत्तरायणे ।
समाप्तिमगमद्भाष्यं माघे भूते १४ सिते कुजे ॥ ७ ॥

इति श्रीमत्सर्वविशारदपण्डितश्रीनारसिंहसुतपण्डितश्रीविश्वनाथकृते
पारस्करगृह्यसूत्रव्याख्याने तृतीयं काण्डं समाप्तम् ॥ ३ ॥

इति भाष्यचतुष्टयभूषितपारस्करगृह्यसूत्रस्य
तृतीयं काण्डं समाप्तम् ।

CC0. In Public Domain Kirtikar Sharma Najafgarh Delhi Collection

श्रीः ।

पारस्करगृह्यसूत्रपरिशिष्टम् ।

अथातो वापीकूपतडागारामदेवतायतनानां प्रतिष्ठापनं व्याख्यास्यामः । तत्रोदगयन आपूर्यमाणपक्षे पुण्याहे तिथिवारनक्षत्रकरणे च गुणाऽन्विते तत्र वारुणं यवमयं चरुꣳ. श्रपयित्वाऽऽज्यभागाविष्ट्वाज्याहुतीर्जुहोति त्वं नो अग्न इमं मे वरुण तत्त्वा यामि ये ते शतमयाश्चाग्न उदुत्तममुरुꣳ हि राजा वरुणस्योत्तम्भनमग्नेरनीकमिति दशर्चꣳ हुत्वा स्थालीपाकस्य जुहोत्यग्नये स्वाहा सोमाय स्वाहा वरुणाय स्वाहा यज्ञाय स्वाहोग्राय स्वाहा भीमाय स्वाहा शतक्रतवे स्वाहा व्युष्ट्यै स्वाहा स्वर्गाय स्वाहेति यथोक्तꣳ स्विष्टकृत् प्राशनान्ते जलचराणि क्षिप्त्वाऽलंकृत्य गां तारयित्वा पुरुषसूक्तं जपन्नाचार्याय वरं दत्त्वा कर्णवेष्टकौ वासा सि धेनुर्दक्षिणा ततो ब्राह्मणभोजनम् ॥ * ॥ * ॥

दिक्षितकामदेवकृतं गृह्यपरिशिष्टकण्डिकाभाष्यं प्रयोगपद्धतिसाहितम् ।

अथातो वापीकूपतडागारामदेवतायतनानां प्रतिष्ठापनं व्याख्यास्यामः—अथशब्दो मङ्गलार्थः, आनन्तर्यस्य पाठादेव सिद्धेः । अतश्शब्दो हेत्वर्थः, यतोऽप्रतिष्ठितं वाप्यादिकमश्रेयस्करम् अतः प्रतिष्ठापनं व्याख्यास्याम इति प्रतिज्ञा शिष्यबुद्धिसमाधानार्था । तत्रोदगयन आपूर्यमाणपक्षे पुण्याहे तिथिवारनक्षत्रकरणे च गुणाऽन्विते वारुणं यवमयं चरुꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति त्वं नो अग्ने स त्वं नो अग्ने इमं मे वरुण तत्त्वा यामि ये ते शतमयाश्चाग्न उदुत्तममुरुꣳ हि राजा वरुणस्योत्तम्भनमग्नेरनीकमिति—तत्रेति तस्मिन् प्रतिष्ठापने उदगयनादिकाले यथोक्तं चरुं कुशकण्डिकोक्तप्रकारेण श्रपयित्वा आघारावाज्यभागौ हुत्वोक्तैर्दशभिर्मन्त्रैर्दशाज्याहुतीर्जुहोति । उदगयनमुत्तरायणम्, आपूर्यमाणपक्षः शुक्लपक्षः, पुण्याह इति शास्त्रान्तरोक्तकाले । तिथिवारनक्षत्रकरणानां गुणान्वितत्वं शास्त्रान्तरविहितत्वम् । तच्च किञ्चित्संक्षेपेण प्रदर्श्यते । यथा-मदनरत्नोदाहृतवह्निपुराणे—“वापीकूपतडागानां तस्मिन्काले विधिः स्मृतः । सुदिने शुभनक्षत्रे प्रतिष्ठा शुभदा स्मृता ॥ कर्कटे पुत्रलाभश्च सौख्यं तु मकरे भवेत् । मीने यशोऽर्थलाभश्च कुम्भे वसुबहूदकम् ॥ वृषे च मिथुने वृद्धिर्वृश्चिकेऽल्पजलं भवेत् । पितृतृप्तिस्तु कन्यायां तुलायां शाश्वती गतिः ॥ सिंहो मेषो धनुर्राशिं लक्ष्म्याश्च द्विज यच्छति” इति । तत्रैव भविष्योत्तरेऽपि—“तस्मिन् सलिलसम्पूर्णे कार्त्तिके च विशेषतः । तडागस्य विधिः कार्यः स्थिरनक्षत्रयोगतः ॥ मुनयः केचिदिच्छन्ति व्यतीतेऽप्युत्तरायणे । न कालनियमस्तत्र सलिलं तत्र कारणम् ॥” इति । एवमादिग्रन्थान्तरादवगन्तव्यं विस्तरभयान्न लिख्यते । चकारात् योगेऽपि गुणान्विते वैधृतिव्यतीपातादिवर्जिते इत्यर्थः । यवमयं चरुं श्रपयित्वेत्येतावतैव सिद्धे यद्वारुणग्रहणं तद्वरुणस्य प्राधान्यज्ञापनार्थम् । ततश्च तदन्तराये पुनः स्थालीपाकस्योत्पत्तिः । कृतोऽपि देवतान्तरहोमः पुनरावर्त्तनीयः । तदुक्तं छन्दोगपरिशिष्टे कात्यायनाचार्यैः—“ प्रधानस्य क्रिया यत्र साङ्गं तत्क्रियते पुनः । तदङ्गस्याक्रियायां तु नावृत्तिर्नैव तत्क्रिया ॥” इति । देवतान्तरान्तराये तु प्राक्समाप्तेरनादिष्टप्रायश्चित्तपूर्वकं स्थालीपाकात्तस्य होमः । तदलाभे त्वाज्येनैव । ऊर्द्ध्वं समाप्ते-

रतु विष्णुस्मरणमेवेति प्रयोजनम् । **श्रीमदनन्तदेवस्वामिचरणै**स्तु प्रयोजनान्तरमुक्तम् । वारुणमिति तद्धितेन वरुणस्यैव चरुदेवतात्वावगमे वक्ष्यमाणाहुतिषु यथालिङ्गमग्न्यादिशब्दैर्वरुणं ध्यात्वेदमग्नये इत्येव त्यागो बोध्यः । “ आग्नेया इति तु स्थितिः” इति नैरुक्तविधिवशेन प्रयाजेषु समिदादिशब्दैरग्निध्यानपूर्वकमिदं समिद्भ्यः इत्यादि त्यागवदिति । **दशर्चꣳ हुत्वा स्थालीपाकस्य जुहोत्यग्नये स्वाहा सोमाय स्वाहा वरुणाय स्वाहा यज्ञाय स्वाहा भीमाय स्वाहोग्राय स्वाहा शतक्रतवे स्वाहा व्युष्ट्यै स्वाहा स्वर्गाय स्वाहा**—दशर्चꣳ हुत्वेत्ययमनुवाद आहुतीनामपि मन्त्रसमसंख्यत्वप्राप्त्यर्थः । ततश्च “समं स्यादश्रुतत्वात्” इति न्यायेन एकैकेन मन्त्रेणैकैकाऽऽहुतिः । यद्वा—**वरुणस्योत्तम्भन**मित्यत्र पञ्चानामपि वाक्यानां मन्त्रैकत्वज्ञापनार्थम् । तदित्थम् । “ऋचो यजूꣳषि सामानि निगदा मन्त्राः” इति भगवता **कात्यायनाचार्येण** ऋगादीनां चतुर्णां पृथक् मन्त्रत्वमुक्तम् । ततश्च सामान्यत एका ऋक् एको मन्त्रः । एकं यजुरेकः । एकं सामैकः । एको निगदश्चैकः । तत्र तेषां वाक्यं निराकाङ्क्षं मिथः सम्बद्धमिति, तेन भगवता **जैमिनिना** च “ अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्” इति वाक्यलक्षणमप्युक्तम् । अत्र च पञ्चस्वप्याख्यातभेदेन लक्षणस्य विद्यमानत्वात्पञ्चवाक्यान्येतानि । ततश्च पञ्चैते मन्त्राः । अत एवा**नुक्रमणिकाकारेण** “ वरुणस्य पञ्च वारुणानि” इति पञ्चसङ्ख्याविशिष्टो यजुर्भेद उक्तः । एवं च सति न्यायतः करणमन्त्राणां समुच्चयाभावाद्वाचनिकोऽयं समुच्चयः “चतुर्भिरादत्ते” इतिवत् । ततश्च प्रकृते नव ऋचो नव मन्त्राः । पञ्चभिर्मिलितैर्यजुर्भिश्चैकः । एवं दशैते मन्त्राः । किंच स्मार्त्ते कर्मणि सर्वत्रोत्सर्गतः कण्डिकान्तो मन्त्र इत्याचारोऽप्यनुगृहीत एव । तथा च **गृह्यकारिकाकारः**—“गृह्यकर्मसु ये मन्त्रा ज्ञेयाः स्वाध्यायपाठतः । किंच मध्यमवृत्त्या ते न द्रुता न विलम्बिताः ” इति । ऋक्पदं तु कण्डिकापरम् । यथा—“ गौतमादीन् ऋषीन् सप्त कृत्वा दर्भमयान् पुनः । पूजयित्वा विधानेन तर्प्पयेदंचमुद्धरन् । ” इत्यत्र **बौधायनीय**वाक्ये ऋक्पदमृग्यजुरुभयसाधारण्येन कण्डिकापरमित्यङ्गक्रितमुत्सर्गकारिका**कारेण**—“मन्त्रैर्द्वाभ्यां च मूर्द्धेति, **मा छन्दस्त्रितयेन** च । **एवः** षोडशाभिर्मन्त्रैः **सप्तर्षय** इत्येकया” इत्यादिना । एवमत्रापि ज्ञेयमित्यलं विस्तरेण । स्थालीपाकस्येत्यवयवलक्षणा षष्ठी, स्थालीपाकस्यावयवं जुहोतीत्येवम् । यद्वा कर्मणि षष्ठी । **यथोक्तꣳ स्विष्टकृत्**—स्विष्टकृदादि गृह्योक्तप्रकारेण कर्तव्यमित्यर्थः **प्राशनान्ते जलचराणि क्षिप्त्वाऽलंकृत्य गां तारयित्वा पुरुषसूक्तं जपन्**—स्विष्टकृद्धोमानन्तरं भूरादिप्राजापत्यान्ता नवाहुतीर्हुत्वा संस्रवप्राशनं च कृत्वा पूर्णपात्रवरयोरन्यतरद्ब्रह्मणे दत्त्वा, जलचराणि मत्स्यादीनि, प्रत्यक्षाणि प्रतिमारूपाणि वा जलमध्ये प्रक्षिप्य सौवर्णशृङ्गाद्यलंकृतां गां **सहस्रशीर्षे**ति षोडशर्चं **पुरुषसूक्तं** त्रैस्वर्य्येण पठन् ऐशानाभिमुखीं जलेऽवगाह्य ब्राह्मणाय प्रतिपादयेत् । अत्र **मदनरत्ने मत्स्यपुराणो**क्तो विशेषः । “ जलाशयं च त्रिवृता सूत्रेण परिवेष्टयेत् । पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् ॥ ततो निक्षिप्य मकरं मत्स्यादींस्तांश्च सर्वतः । धृतां चतुर्भिर्विप्रैस्तु वेदवेदाङ्गपारगैः ॥ महानदीजलोपेतां दध्यक्षतविभूषिताम् । उत्तराभिमुखो न्युब्जां जलमध्ये तु कारयेत् आथर्वणेन साम्ना तु **पुनर्मा** मेत्यृचेति च । **आपो हि ष्ठे**ति मन्त्रेण क्षिप्त्वाऽऽगत्य च मण्डपम् ॥” इति । आथर्वणं साम **शं नो देवी**रित्यस्यामृचि गीतमिति व्याख्यातं च । **भविष्योत्तरे**ऽपि—“सामान्यं सर्वभूतेभ्यो मया दत्तमिदं जलम् ॥ रमन्तां सर्वभूतानि स्नानपानावगाहनैः ॥ एवं जलं जले क्षिप्त्वा पूजयेज्जलमातरः । तोष्याः कर्मकराः सर्वे कुद्दालानि च पूजयेत् ” इति । **बह्वृचगृह्यपरिशिष्टे** तु जलावतारितगोदानान्ते, तत उत्सर्गं कुर्यात् । देवपितृमनुष्याः प्रीयन्तामिति यश्चोत्सृजत इत्याह **शौनकः** । इत्युत्सर्ग उक्तः । मत्स्यादीनां विशेषोऽपि **मदनरत्न** एव—“ सौवर्णौ कूर्ममकरौ राजतौ मत्स्यदुन्दुभौ । ताम्रौ कुलीरमण्डूकावायस्कः शिशुमारकः ॥” दुन्दुभो [illegible] । एते स्वर्णपात्र्यां

स्थाप्या इति । **वासोयुग्मं धेनुर्दक्षिणा च**–चकारो द्रव्यसमुच्चयार्थः । वासोयुग्मं धेनुश्च दक्षिणेति यावत् । इयं च दक्षिणा आचार्यस्यैव । ततश्च तस्यापि वरणम् । ब्रह्मणस्तु पूर्णपात्रादिकैव । तथा च पाठान्तरम् । "गां तारयित्वाऽऽचार्याय वरं दत्त्वा कर्णवेष्टकौ वासाꣳसि धेनुर्दक्षिणा च" इति । यद्वा–स्मार्त्ते कर्मणि यजमानस्यैव कर्तृत्वमिति **भाष्यकारीय**सिद्धान्तत्वात् "उपदिष्टेनाऽतिदिष्टं बाध्यते" इति न्यायात् पूर्णपात्रादिकां बाधित्वैव प्रवर्त्तते "धुर्यौ दक्षिणा" इतिवत् । अत एव प्राशनान्ते जलचराणि क्षिप्त्वेत्यत्र प्राशनान्तग्रहणं प्राकृतकालविशिष्टदक्षिणाबाधार्थम् । जलचरप्रक्षेपादेरपूर्वत्वेन न्यायात् प्राशनान्त एव प्राप्तत्वात् पश्चादग्नेर्भद्रपीठ इत्यादिवत् । पाठान्तरपक्षे तु वैवाहिकवरदानवदुपद्रष्टृविषया स्वकीयाचार्यविषया वा इयमधिका अन्यैव । **ततो ब्राह्मणभोजनम्**–कर्त्तव्यमिति सूत्रशेषः । दशैकादश वाऽवश्यं भोजनीयाः । "गर्भाधानादिभिर्यज्ञैर्ब्राह्मणान् भोजयेद्दश" इति **परिशिष्टकारोक्तेः** । "ततः सहस्रं विप्राणामथवाऽष्टशतं तथा । भोजयेच्च यथाशक्त्या पञ्चाशद्वाऽथ विंशतिम्" इति **मत्स्यपुराणोक्त**वचनं तु समर्थविषयम् ॥ * ॥ इति श्रीदीक्षितकामदेवकृतं गृह्यपरिशिष्टकण्डिकाया भाष्यं समाप्तम् ॥ * ॥

अथ **प्रयोगः** । तत्र कालविशेषो **मदनरत्ने**–अनधिकालुप्तसंवत्सरे, असिंहमकरस्थगुरौ, अगुर्वादित्ये, अमलमासक्षयमासे, अलुप्तदिनद्वये पक्षे, अनवमदिनादौ, भूकम्पाशन्युल्काद्यद्भुतदोषरहिते काले, उत्तरायणे, माघफाल्गुनचैत्रवैशाखज्येष्ठाषाढान्यतममासे, रविशुद्धावयनद्वयविषुवद्वयकन्यामीनधनुरन्यतमसंक्रान्तौ, शुक्लपक्षे, द्वितीयातृतीयापञ्चमीसप्तमीदशमीत्रयोदशीपौर्णमासीनामन्यतमतिथौ, शनिमङ्गलान्यवारेषु, भरणीकृत्तिकाऽऽर्द्रापुनर्वस्वाश्लेषामघापूर्वाफाल्गुनीविशाखाव्यतिरिक्तनक्षत्रेषु, विष्कम्भातिगण्डव्याघातवज्रव्यतीपातपरिघवैधृतिव्यतिरिक्तकरणेषु यजमानस्य चन्द्रताराविशुद्धौ बुधशुक्रगुरुचन्द्रनिरीक्षित लग्ने, जलाशयोत्सर्गं कुर्यादिति । एवमुक्तकाले जलाशयस्योदगैशान्यप्राक्पश्चिमान्यतमदिशि समीपे एव प्रागुदक्प्रवणे सुसमे भूभागे पूर्वं दशहस्तादिमण्डपं विधायालंकृत्य तत्र स्वासने प्राङ्मुख उपविश्य पवित्रपाणिः स्वाचान्तः प्राणानायम्य श्रीविष्णुस्मरणपूर्वकं देशकालादिसङ्कीर्तनान्ते श्रीपरमेश्वरप्रीत्यर्थं तडागप्रतिष्ठापनमहं करिष्ये । एवमारामादिष्वप्यूहेन संकल्पं कृत्वा तदङ्गत्वेन गणपतिपूजननान्दीश्राद्धनवग्रहयज्ञांश्च करिष्ये इति पुनः सङ्कल्पक्रमेणैतानि कुर्यात् । ऋत्विग्वरणानन्तरं वा पुण्याहवाचनम् । ततो ग्रहमखाऽनन्तरं प्रधानाङ्गत्वेन पुनराचार्यस्य ब्रह्मणश्च वरणं कुर्यात् । तत्र वाक्यम् । कर्तव्यामुकजलाशयप्रतिष्ठापनेऽमुकगोत्राऽमुकशर्मन् त्वमाचार्यो भवेति । भवामीति प्रतिवचनम् । एवं ब्रह्मा भवेति । ततो यथाशक्ति तयोः पूजनं, क्रमेण प्रार्थनं च–"आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ॥ यथा चतुर्मुखो ब्रह्मा सर्ववेदविशारदः । तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥" इति ॥ सदस्यवरणं कृताकृतम् । पक्षे आचार्यवरणस्याप्यभावः । ततो वृतश्चेदाचार्यः अथवा यजमानः स्थण्डिले पञ्चभूसंस्कारपूर्वकमग्निं स्थापयित्वा वारुणं यवमयं चरुं यथाविधि श्रपयित्वा आज्यभागान्ते आज्येनैव **त्वं नो अग्न** इत्यादिभिर्दशभिर्मन्त्रैः प्रतिमन्त्रं दशाहुतीर्जुहुयात् । तद्यथा–ॐ प्रजापतये स्वाहा इदं प्रजापतये० १ । ॐ इन्द्राय स्वाहा इदमिन्द्राय० २ । ॐ अग्नये स्वाहा इदमग्नये० ३ । ॐ सोमाय स्वाहा इदं सोमाय० ४ । **त्वं नो अग्न** इति वामदेव ऋषिः, अग्नीवरुणौ देवते, त्रिष्टुप्छन्दः, आज्याहुतिहोमे वि० । "ॐ त्वं नो अग्ने० प्रमुमुग्ध्यस्मत्स्वाहा" इदमग्नीवरुणाभ्यां न मम १ । **स त्वं न** इति वामदेव ऋषिः, अग्नीवरुणौ देवते, त्रिष्टुप्छन्दः आज्याहु० । "ॐ स त्वं नो० एधि स्वाहा" इदमग्नीवरुणाभ्यां० २ । इमं म इति शुनःशेप०, वरुणो दे०, गायत्री०, आज्या० । "ॐ इमं मे० चके स्वाहा" इदं वरुणाय० ३ । तत्त्वा यामीति शुनःशेप०, वरुणो दे०,

त्रिष्टुप्०, आज्या०।"ॐ तत्त्वा यामि० प्रमोषीः स्वाहा" इदं वरुणाय० ४। **ये ते शतमिति** वामदेव० त्रिष्टुप्०, वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवताः, आज्या० । "ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो अद्य सवितोऽत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा" इदं वरुणाय, सवित्रे, विष्णवे, विश्वेभ्यो देवेभ्यो, मरुद्भ्यः, स्वर्केभ्यश्च न मम ५ । **अयाश्चाऽग्ने** इति वामदेव०, त्रिष्टुप्०, अग्निर्देवता, आज्या० । "ॐ अयाश्चाऽग्नेऽस्यनभिशस्तिपाश्च सत्यमित्त्वमया असि । अया नो यज्ञं वहास्यया नो धेहि भेषज ँ स्वाहा" इदमग्नये० ६ । अयसे इत्यधिकमिति केचित् । **उदुत्तममिति** शुनःशेप०,वरुणो दे०,त्रिष्टुप्०,आज्या० । "ॐ उदुत्तमं० स्याम स्वाहा" इदं वरुणाय न मम७ । **उरु ँ हि राजेति** शुनःशेप०, त्रिष्टुप्०, वरुणो दे०, आज्या० । "ॐ उरु ँ हि राजा० श्चित् स्वाहा" इदं वरुणाय न मम ८ । **वरुणस्योत्तम्भनमिति** पञ्चयजुषां प्रजापतिः०, वरुणो०, यजू ँषि, आज्या० । "ॐ वरुणस्योत्तम्भन० मासीद स्वाहा०"इदं वरुणाय० ९ । **अग्नेरनीकमिति** प्रजापतिः०, अग्निर्दे०, त्रिष्टुप्०, आज्या० । "ॐ अग्नेरनीक० रण्यत्स्वाहा" इदमग्नये० १०। आभिघार्य स्थालीपाकं जुहुयात् । तत्र मन्त्राः । ॐ अग्नये स्वाहा इदमग्नये० १ । ॐ सोमाय स्वाहा इदं सोमाय० २ । ॐ वरुणाय स्वाहा इदं वरुणाय० ३। ॐ यज्ञाय स्वाहा इदं यज्ञाय० ४ । ॐ भीमाय स्वाहा इदं भीमाय० ५ । ॐ उग्राय स्वाहा इदमुग्राय० ६ । ॐ शतक्रतवे स्वाहा इदं शतक्रतवे० ७ । ॐ व्युष्टयै स्वाहा इदं व्युष्टयै० ८ । ॐ स्वर्गाय स्वाहा इदं स्वर्गाय० ९ । अथ ब्रह्मणाऽन्वारब्ध ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते० १० । तत आज्येन भूरादिप्राजापत्यान्ता नवाहुतीर्जुहुयात् । तद्यथा–"ॐ भूः स्वाहा" इदमग्नये० १ । "ॐ भुवः स्वाहा" इदं वायवे० २ । "ॐ स्वः स्वाहा" इदं सूर्याय० ३ । "ॐ त्वं नो अग्ने"४। "ॐ स त्वं नो अग्ने" ५ । "ॐ अयाश्चाग्ने"६। "ॐ ये ते शतं" ७ । ""ॐ उदुत्तमं" ८ । "ॐ प्रजापतये स्वाहा" इदं प्रजापतये०९। ततः संस्रवप्राशनम् १ । पवित्राभ्यां मार्जनम् २ । पवित्रप्रतिपत्तिः ३ । प्रणीताविमोकः ४ । ब्रह्मणे पूर्णपात्रदानम् । कृतैतदुत्सर्गहोमसाङ्गतासिद्ध्यर्थमिदं पूर्णपात्रं ब्रह्मन् तुभ्यमहं सम्प्रददे । तेन श्रीकर्माङ्गदेवता प्रीयताम् । अथ शाखान्तराज्जलाशयं त्रिवृता सूत्रेण ईशानादिप्रादक्षिण्येन परिवेष्ट्य तत्र जलचराणि प्रक्षिपेत् । तत्र प्रकारविशेषो यथा **मदनरत्ने मत्स्यपुराणोक्तः** । पञ्चरत्नसमन्वितां संस्थापितमकरादिकां सौवर्णीं पात्रीं समादाय जलाशयसमीपे प्राङ्मुखास्तिष्ठन् दक्षहस्तेनैव पूर्वं मकरं प्रक्षिप्य ततः सर्वतो मत्स्यादीन् प्रक्षिपेत् । तेऽपि "सौवर्णौ कूर्ममकरौ राजतौ मत्स्यदुन्दुभौ । ताम्रौ कुलीरमण्डूकावायसः शिशुमारकः॥" इति द्रव्यविशेषतो ज्ञेयाः । ततस्तां पात्रीं गङ्गादिमहानदीजलोपेतां दध्यक्षतविभूषितां कृत्वा उत्तराभिमुखस्तिष्ठन् **आपो हि ष्ठेति** तिसृभिर्ऋग्भिर्जलमध्ये न्युब्जां कुर्यात् । **आपो हि ष्ठेति** तिसृणां सिन्धुद्वीप ऋषिः,आपो देवता,गायत्री छन्दः, पात्रीन्युब्जीकरणे विनियोगः । **ॐ आपो हि ष्ठा०च नः** इति तां न्युब्जीकुर्यात् । ततः सुवर्णशृङ्गादियथाशक्त्यलंकृतां गां पुरुषसूक्तं जपन् तारयेत् । विशेषः **पाराशरस्मृतौ**–"अरोगां वत्ससंयुक्तां सुरूपां भूषणान्विताम् । गोवत्सौ वस्त्रबद्धौ तावाग्नेय्यां दिशि संस्थितौ ॥ वायव्याभिमुखौ तत्र तारयेद्वारिमध्यतः" इति । पुरुषसूक्तस्य नारायणः पुरुष ऋषिः, जगद्बीजं पुरुषो देवता, पञ्चदशानामनुष्टुप्छन्दः षोडश्यास्त्रिष्टुप्छन्दः जले गोरवतारणे विनियोगः । **ॐ सहस्रशीर्षा० देवाः०** । ततो यजमानो नित्यतर्पणवद्देवर्षिपितृतर्पणं गोपुच्छाऽग्रे कुर्यात् । प्राङ्मुखः स्वयम् उदक्स्थितायाः पुच्छाग्रे नित्यतर्पणं कृत्वा ततो "ब्रह्माद्या देवताः सर्वे ऋषयो मुनयस्तथा । असुरा यातुधानाश्च मातरश्चण्डिकास्तथा ॥ दिक्पाला लोकपालाश्च ग्रहदेवाऽधिदेवताः । ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पिताः" । "विश्वेदेवास्तथाऽऽदित्याः साध्याश्चैव मरुद्गणाः । क्षेत्रपीठोपपीठानि नदा नद्यश्च सागराः ॥ ते स०" । "पातालनागकन्याश्च नागाश्चैव सपर्वताः । पिशाचा गुह्यकाः प्रेता गन्धर्वा गणराक्षसाः ॥ ते०" । "पृथिव्यापश्च तेजश्च वायु-

राकाशमेव च । दिवि भुव्यन्तरिक्षे च ये च पातालवासिनः ॥ ते० ” । “शिवः शिवास्तथा विष्णुः सिद्धिर्लक्ष्मीः सरस्वती । तपोवनानि भगवानव्यक्तः परमेश्वरः ॥ ते स०” । “क्षेत्रौषधिलता वृक्षा वनस्पत्यधिदेवताः । कपिलः शेषनागश्च तक्षकोऽनन्त एव च ॥ ते०” । “अन्ये जलचरा जीवा असंख्यातास्त्वनेकशः । चतुर्दश यमाश्चैव ये चाऽन्ये यमकिंकराः ॥ ते०” । “सर्वेऽपि यक्षराजानः पक्षिणः पशवश्च ये । स्वेदजोद्भिज्जजा जीवा अण्डजाश्च जरायुजाः ॥ ते०” । “ अन्येऽपि वनजीवा ये दिवा निशि विहारिणः । अजागोमहिषीरूपं ये चाऽन्ये पशवस्तथा ॥ शान्तिदाः शुभदास्ते स्युर्गोपुच्छोदकतर्पिताः । आब्रह्मस्तम्बपर्यन्तं ये चाऽन्ये गोत्रिणो मृताः ॥ ते०” । “सर्पव्याघ्रहता ये च शस्त्रघातमृताश्च ये । संस्काररहिता ये च रौरवादिषु गामिनः ॥ ते०” । वृक्षत्वं च गताः केचित् तृणगुल्मलताश्च ये । यातनासु च घोरासु जातीषु विविधासु च ॥ ते०” । नरकेषु च घोरेषु पतिताः स्वेन कर्मणा । देवत्वं मानुषत्वं वा तिर्यक्प्रेतपिशाचताम् ॥ कृमिकीटपतङ्गत्वं याता ये च स्वकर्मभिः । ते०” । “पितृवंशे० ज्ञाताज्ञाताः कुले मम । ते पिबन्तु मया दत्तं गोपुच्छस्य तिलोदकम्” । “ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः । ते० गोपुच्छस्य तिलोदकैः” । “आब्रह्मस्तं० इदमस्तु तिलोदकम्”। गोप्रार्थना ।“पञ्च गावः समुत्पन्ना मथ्यमाने महोदधौ । तासां मध्ये तु या नन्दा तस्यै देव्यै नमो नमः॥”चन्दनपुष्पैः पूजयेत् । यथा—पृष्ठे ब्रह्मणे नमः १ । गले विष्णवे नमः२। मुखे रुद्राय नमः ३ । मध्ये देवगणेभ्यो नमः ४ । रोमकूपे महर्षिभ्यो नमः ५ । पुच्छे नागेभ्यो नमः ६। खुराग्रे कुलपर्वतेभ्यो नमः ७ । मूत्रे गङ्गादिनदीभ्यो नमः ८ । नेत्रयोः शशिभास्कराभ्यां नमः ९ । “एते यस्यास्तनौ देवाः सा धेनुर्वरदाऽस्तु मे ” अथ दानम् । केचिदीशानकोणमार्गेण तां निष्कास्य ब्राह्मणाय दद्यादित्याहुः, तत्र वचनमन्वेषणीयम् ॥ “आज्यपात्रं करे कृत्वा कनकेन समन्वितम् । निक्षिप्य पुच्छं तस्मिँस्तु घृतदिग्धं प्रगृह्य च ॥ सतिलं विप्रपाणौ तु प्रागग्रं तन्निधाय च । सतिलं सकुशं चापि गृहीत्वा दानमाचरेत् ॥” ततो गोपुच्छं हस्ते गृहीत्वा कुशयवजलान्यादाय अद्येत्यादि दशपूर्वदशपरात्मीयपुरुषसहितात्मनः सम्भावितनरकोद्धरणपूर्वकम् ऐहिकसकलसमृद्धिप्राप्तिपूर्वकसवत्सगोरोमसमसंख्यवर्षस्वर्गप्राप्तिकामः इमां गां रुद्रदैवतां सुवर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठीं कांस्यदोहां मुक्तादामघण्टाचामरविभूषितां रत्नपुच्छीं सुवस्त्राच्छादितां कृतैतदुत्सर्गसाङ्गतासिद्ध्यर्थम् अमुकगोत्रायाऽमुकशाखाध्यायिनेऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे न मम इति प्रागग्रं पुच्छं विप्रहस्ते दद्यात् । ॐ स्वस्ति इति विप्रः । ततः कामस्तुतिं पठेत् कोऽदादिति मन्त्रः । गोदानसाङ्गतासिद्ध्यर्थं दक्षिणां दद्यात् ।“कूपवाप्योस्तूपरि गोस्त्रिभिर्भ्रामणम् इति” निबन्धकाराः । अथात्र सूत्रानुक्तमपि पौराणिकमुत्सर्गादिकं फलाधिक्यात्कर्त्तव्यम् । तद्यथा—यजमानः कुशाक्षतजलान्यादाय प्राङ्मुखः सन् पठेत् । “सामान्यं सर्वभूतेभ्यो मया दत्तमिदं जलम् । रमन्तां सर्वभूतानि स्नानपानावगाहनैः॥”इति जलमध्ये जलप्रक्षेपेणोत्सर्गं कुर्यात् । यद्वा-देवपितृमनुष्याः प्रीयन्तामित्युत्सर्गमन्त्रः । ततो जलाशये गङ्गोदकादितीर्थोदकानि । जलाशयं स्पृष्ट्वा पञ्च मन्त्रान् पठेत् । “कुरुक्षेत्रं गया गङ्गा प्रभासः पुष्कराणि च । एतानि पञ्च तीर्थानि तडागे निवसन्तु मे”।१। “वितस्ता कौशिकी सिन्धुः सरयूश्च सरस्वती । एतानि पञ्च०”।२। “दशार्णा मुरला सिन्धुरयावर्त्तदृषद्वती । एतानि पञ्च तीर्थानि०” । ३। “यमुना नर्मदा रेवा चन्द्रभागा च वेदिका । एतानि पञ्च० ” ४ । “ गोमती वाङ्मती शोणो गण्डकी सागरस्तथा । एतानि पञ्च० ” ॥ ५ ॥ कूपोत्सर्गपक्षे निपाने निवसन्तु मे इत्यूहः । प्रवाप्यां निवसन्त्विति च वाप्यामूहः । ततो जलमातृपूजा चन्दनपुष्पादिना । ता यथा ॐ ह्रियै नमः१। ॐ श्रियै नमः २ । ॐ शच्यै नमः ३। ॐ मेधायै नमः ४ ।ॐ विश्वायै नमः ५ । ॐ लक्ष्म्यै नमः ६ ।
इत्येतैर्मन्त्रैर्जलमातृभ्यो नम इत्यनेन वा जलमातृपूजनं कृत्वा, “ तोष्याः कर्मकराः सर्वे कुद्दालानि
च पूजयेत्” इति । ततो मण्डपमागत्य वस्त्रयुग्मं धेनुं च दक्षिणामाचार्याय दद्यात् । अत्र पाराशर-
स्मृतौ विशेषः—“अर्द्धं शतं शतं वाऽपि विंशमष्टोत्तरं शतम् । गोसहस्रं शतं वाऽपि शतार्द्धं वा प्रदी-
यते ॥ अलाभे चैव गां दद्यादेकामपि पयस्विनीम् । अरोगां वत्ससंयुक्तां सुरूपां भूषणान्विताम्” इति ।

'पाठक्रमादर्थक्रमो बलीयान्'' तथा सत्येवं ११०० वा, १५० वा, १०८ वा, १०० वा, ५० वा, २० वा, १, कृतस्यामुकजलाशयस्य प्रतिष्ठाकर्मणः साङ्गतासिद्ध्यर्थम् इदं बार्हस्पत्यं वासोयुग्मं रुद्रदैवतां धेनुं च दक्षिणामाचार्याय तुभ्यमहं सम्प्रददे न मम तेन श्रीकर्माङ्गदेवताः प्रीयन्तामिति । ततः– "शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् । सुवेषधारि त्वं यस्माद्वासः शान्तिं प्रयच्छ मे । १ ।" "धेनो त्वं पृथिवी सर्वा यस्मात्केशवसन्निभा । सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे । २ ।" इति दानमन्त्रौ पठेत् । " ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु " इत्याचार्यस्य प्रतिग्रहमन्त्रः । **पाराशरीये**–"वस्त्रयुग्मानि विप्रेभ्यश्छत्त्रिका मुद्रिकाः शुभाः । दद्याद्विप्रेभ्यः सन्तोष्य छत्त्रोपानहमेव च । सुहेमपूरुषयुतां शय्यां दद्याच्च शक्तितः" । सुहेमपूरुषो लक्ष्मीनारायणप्रतिमा । "आसनानि च शस्तानि भाजनानि निवेदयेत् । प्रसादयेद् द्विजान्भक्त्या इच्छन् पूर्त्तफलं नरः ॥ कृताञ्जलिपुटो भूत्वा विप्राणामग्रतः स्थितः ॥ ब्रूयाद्देवा भवन्तोऽत्र सर्वे विप्रवपुर्धराः । तटं यूयं तारयध्वं (मां) संसारार्णवतो द्विजाः ॥ आगता मम पुण्येन पूर्तधर्मप्रसाधकाः।" इति विप्रप्रार्थना । "ततः सहस्रं विप्राणामथवाऽष्टशतं तथा । भोजयेच्च यथाशक्ति पञ्चाशद्वाऽथ विंशतिम्॥" इति **मात्स्यवचनम्** । यद्वा "गर्भाधानादिभिर्यज्ञैर्ब्राह्मणान् भोजयेद्दश" इति **परिशिष्टकारोक्तेः** दशावरान् ब्राह्मणान् भोजयिष्ये इति सङ्कल्पः । ततस्तानविलम्बेन भोजयेत् । दीनानाथेभ्यो भूयसीं च दत्त्वा कर्म ईश्वरार्पणं कुर्यात् । कृतैतत्कर्म लक्ष्मीनारायणार्पितमस्तु । तत आचारप्राप्तं तिलकाशीर्वादादि । आरामप्रतिष्ठायां तु वृक्षाणां वस्त्रैरभावे सूत्रैर्वेष्टनम् । जलमातृकापूजास्थाने वनस्पतिभ्यो नम इति वृक्षेषु वनस्पतिपूजनम् । देवपितृमनुष्याः प्रीयन्तामित्यनेनैव पाक्षिक उत्सर्गः । कृतस्यारामप्रतिष्ठापनकर्मणः साङ्गतासिद्ध्यर्थमिति दक्षिणादानादौ प्रयोगः । गोर्भ्रमणं मध्ये । उत्तरतो निष्कासनम् । जलचरप्रक्षेपस्य जलाशयस्पर्शजपादेश्चाऽभावः । एवं देवालयप्रतिष्ठायां सूत्रादिना वेष्टनम् । आचारादुपरि ध्वजबन्धनम् । अमुकदेवायतनाय नम इति पूजनं च । कृतस्य देवायतनप्रतिष्ठाकर्मणः साङ्गतासिद्ध्यर्थमिति दक्षिणादानादौ प्रयोगः । चतुःषष्टिपदवास्तुपूजनमपीति विशेषः । अन्यत्सर्वं पूर्ववत् । यजमानस्य स्वकर्तृत्वपक्षे तु आचार्यवरणाभावः । दक्षिणादानं ब्रह्मणे पूर्णपात्रादिस्थाने । यद्वा वैवाहिकवरदानवदुपद्रष्टे । उपनयनपूर्वकवेदाध्यापकाचार्याय वा । ग्रहयज्ञस्य प्रधानेन सह समानतन्त्रता वा । तत्राज्यभागान्ते **वरुणस्योत्तम्भनमिति** कण्डिकया आज्याहुतिरेका । ततः समिद्धोमः । ततो दशर्चेन । ग्रहचरुहोमपूर्वको वरुणचरुहोमः । ततस्तिलहोमादि । एवमासादनादावपि क्रमो बोद्धव्यः । ग्रहयज्ञाङ्गत्वेन मण्डपकरणपक्षे तु शतपदवास्तुबलिदानं मण्डपप्रतिष्ठादिकमप्यधिकम् । प्रासादप्रतिष्ठायां तु मण्डपाभावपक्षेऽपि नियमेन चतुःषष्टिपदो वास्तुरित्युक्तमित्यलं ग्रन्थगौरवेण ॥ * ॥

इति श्रीमदग्निचिद्दीक्षितविश्वामित्रात्मजदीक्षितकामदेवकृता गृह्यसूत्रपरिशिष्टस्य
षष्ठकण्डिकायाः सभाष्यपद्धतिः समाप्तिमगमत् ॥ * ॥ * ॥

अथ कात्यायनाचार्यप्रणीत-परिशिष्टशौचसूत्रम् ।

अथातः शौचविधिं व्याख्यास्य दौ दूरं गत्वा दूरतरं गत्वा यज्ञोपवी-
तं शिरसि दक्षिणकर्णे वा धृत्वा तृ भिन्तर्धानं कृत्वोपविश्याहनीत्युत्त-
रतो निशायां दक्षिणत उभयोः सन्ध्ययोरुद मुखो नाग्नौ न गोसमीपे
नाप्सु नागे वृक्षमूले चतुष्पथे गवां गोष्ठे देवब्राह्मणसन्निधौ दहनभूमिं
भस्माच्छन्नं देशं फालकृष्टभूमिं च वर्ज यित्वा मूत्रपुरीषे कुर्यात् । ततः शिश्नं
गृहीत्वोत्थायाद्भिः शौचं गन्धलेपहरं विदध्यात् लिङ्गे देया सकृन्मृद्वै
त्रिवारं गुदे दशधा वामपाणावुभयोः सप्तवारं मृत्तिकां दद्यात् । करयोः
पादयोः सकृत्सकृदेव मृत्तिका देयेति शौचं गृहस्थानां द्विगुणं ब्रह्मचा-
रिणां त्रिगुणं वनस्थानां चतुर्गुणं यतीनामिति । यद्दिवा विहितं शौचं
तदर्धं निशायां भवति मार्गे चेत्तदर्धमार्त्तश्चेद्यथाशक्ति कुर्यात् ॥ १ ॥
प्रक्षालितपाणिपादः शुचौ देश उपविश्य नित्यं बद्धशिखी यज्ञोपवीती
प्रागुदङ्मुखो वा भूत्वा जान्वोर्मध्ये करौ कृत्वाऽशूद्रानीतोदकैर्द्विजा-
तयो यथाक्रमं हृत्कण्ठतालुगैराचामन्ति । न ताद्भिर्न्नोष्ठेन न विरलाङ्गु-
लिभिर्न तिष्ठन्नैव हसन्नापि फेनबुद्बुदयुतम् । ब्रह्मतीर्थेन त्रिः पिबेत् द्विः
परिमृजेत् । ब्राह्मणस्य दक्षिणहस्ते पञ्च तीर्थानि भवन्ति अङ्गुष्ठमूले
ब्रह्मतीर्थं कनिष्ठिकाङ्गुलिमूले प्राजेत्यनयर्चा तोयं सलिलमामन्त्र्याभिमुखीकृत्य
पितृतीर्थमङ्गुल्यग्रे देवतीर्थं मध्येऽग्नि जापतितीर्थं तर्जन्यङ्गुष्ठमध्यमूले
॥ २ ॥ प्रथमं यत्पिबति तेन ऋग् ब्रतीर्थमित्येतानि तीर्थानि भवन्ति
तेन यजुर्वेदं प्रीणाति तृतीयं य वेदं प्रीणाति द्वितीयं यत्पिबति
चतुर्थं यदि पिबेत्तेनाथर्ववेदेतिहा यत्पिबति तेन सामवेदं प्रीणाति
लिभ्यः स्रवति तेन नागयक्षकुबेरा सपुराणानि प्रीणाति यदङ्गु-
क्षणं पितरस्तेन प्रीणन्ति यन्मुखमुप सर्वे वेदाः प्रीणन्ति यत्पादाभ्यु-
उपस्पृशति वायुस्तेन प्रीणाति यच स्पृशत्यग्निस्तेन प्रीणाति यन्नासिके
यच्छ्रोत्रमुपस्पृशति दिशस्तेन प्री मुरुपस्पृशति सूर्यस्तेन प्रीणाति
प्रीणाति यद्धृदयमुपस्पृशति तेन प्रीणन्ति यन्नाभिमुपस्पृशति ब्रह्मा तेन
रुद्रस्तेन प्रीणाति यद्बाहू उप आत्मा प्रीणाति यच्छिर उपस्पृशति
मध्यमानामिकया मुखं तर्जन्यङ्ग स्पृशति विष्णुस्तेन प्रीणाति
चक्षुषी अनामिकाङ्गुष्ठेन श्रोत्रं काङ्गुष्ठेन नासिकां मध्यमाङ्गुष्ठेन
हृदयं सर्वाङ्गुलिभिः शिर इत्यसौ निष्ठिकाङ्गुष्ठेन नाभिं हस्तेन
इत्येवं शौचविधिं कृत्वा ब्रह्मलोके सर्वदेवमयो ब्राह्मणो देहिनामित्याह
भगवान् कात्यायनः ॥ ॥ * ॥ * ॥ मीयते ब्रह्मलोके महीयत इत्याह

इति कात्यायनप्रणीतपरि

शिष्टशौचसूत्रं समाप्तम् ॥

स्नान

अथातो नित्यस्नानं नद्यादौ मृद्गोमयकुशतिलसुमनस आहृत्योद-
कान्तं गत्वा शुचौ देशे स्थाप्य प्रक्ष‌ल्य पाणिपादं कुशोपग्रहो बद्धशिखी
यज्ञोपवीत्याचम्योरुर्ठहीति तोय‌समन्व्यावर्तयेद्ये ते शतमिति सुमि-
त्रिया न इत्यपोऽञ्जलिनाऽऽदाय दु‌र्मित्रिया इति द्वेष्यं प्रति निषिञ्चे-
त्कटिं वस्त्यूरू जङ्घे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्यो-
दकमालभेदङ्गानि मृदेदं विष्णुरिति सूर्याभिमुखो निमज्जेदापो अस्मा-
निति स्नात्वोदिदाभ्य इत्युन्मज्ज्य निमज्ज्योन्मज्ज्याचम्य गोमयेन
विलिम्पेन्मानस्तोक इति ततोऽभिषिञ्चेदिमं मे वरुणेति चतसृभिर्माप
उदुत्तमं मुञ्चन्त्ववभृथेत्यन्ते चैतन्निम‌ज्ज्योन्मज्ज्याचम्य दर्भैः पावयेदापो
हि ष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीराप इति द्वाभ्यामपो देवा
द्रुपदादिव शं नो देवीरपा ँ रसमपो देवीः पुनन्तु मेति नवभिश्चित्प-
तिर्मेत्योङ्कारेण व्याहृतिभिर्गाय‌त्र्या चादावन्ते चान्तर्जलेऽघमर्षणं
त्रिरावर्त्तयेद् द्रुपदादिवायं गौरिति वा ऋतं च प्राणायामं वा सशिरसमो-
मिति वा विष्णोर्वा स्मरणम् ॥ १ ॥

अग्निहोत्रिहरिहरविरचितं त्रिकण्डिकास्नानसूत्रव्याख्यानम् ।

श्रीगणेशाय नमः ॥ प्रणतोऽस्मि हरेरङ्घ्रिसरोरुहमादरात् । यज्जगत्पावनं पाथः प्रासोष्टामरसै-
न्धवम ॥ १ ॥ कात्यायनकृतस्नानविधेर्व्याख्यापर‌म्पराम् । विधास्ये पद्धतिं विद्वत्सदाचारद्विज-
पस्य जलाशयस्पर्शजपादेश्चाऽभावः । एवं देवालयप्र
[illegible]
प्रियाम् ॥ २ ॥

अथातो नित्यस्नानम्—अथ श्रौतस्मार्त्तक्रिया‌विधानानन्तरं यतस्ताः क्रियाः स्नानपूर्विका अतो
हेतोर्नित्यं सन्ध्योपासनपञ्चमहायज्ञादिनित्यक्रियानुष्ठा‌नाधिकारसम्पादकत्वेनावश्यकं स्नानं बहिः सर्वा-
ङ्गजलसंयोगः विधास्यते इति सूत्रशेषः । तत्स्नानं कुत्र विधेयमित्यपेक्षायामाह—नद्यादौ—ननु "मास-
द्वयं श्रावणादि सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः" इति छन्दोगपरिशिष्टे
नदीस्नाननिषेधात् कथं नद्याद्युच्यते । सत्यम् । "उपा‌कर्माणि चोत्सर्गे प्रेतस्नाने तथैव च । चन्द्रसूर्यो-
परागे च रजोदोषो न विद्यते" इत्यपवादवचनात् न दोषः । नदी आदिः प्रथमा मुख्या यस्य स्नाना-
धिकरणस्य देवखाततडागसरोगर्तह्रदप्रस्रवणादेरकृत्रिम‌जलाशयस्य स नद्यादिः, तस्मिन्नद्यादावकृत्रिमजला-
शये स्नानं कुर्यादिति यावत् । तत्र नदी—कूलद्वयान्त‌र्गतयोजनाधिकभूभागप्रवाहसलिला, लोके नदी-
शब्देन प्रसिद्धा च । देवखातो—देवनिर्मितत्वेन प्रसिद्ध ब्रह्म ह्रदः । तडागो गदालोलप्रभृतिः । सरः—
[illegible]वाहः । ह्रदोऽगाधोऽशोष्यो जलराशिरवस्थितः ।
उत्तरार्कदण्डखातादि । गर्तो—योजनभूभागपर्याप्तजलसम्भवे पञ्चमृत्पिण्डोद्धरणपूर्वकं कृत्रिमेऽपि जला-
प्रस्रवणं—पर्वतादेः स्वतः प्रवृत्तो निर्झरः । अकृत्रिमासन्नौ स्नानोपकरणपूर्वकं स्नानेतिकर्तव्यताविधान-
शये स्नायात् । एवं स्नानं तदधिकरणं चानुविधायेत्यत्र गोमयं च कुशांश्च तिलांश्च सुमनसश्च
मुपक्रमते—मृद्गोमयकुशतिलसुमनस आहृत्य—मृ शूद्रादन्येन वाऽऽहार्य तत्र मृदं शुचिदेशस्थां
मृद्गोमयकुशतिलसुमनसस्ता आहृत्य स्वयमानीय [illegible] र्जितां, गोमयम् अरोगिण्यादिगवां शकृत्,
शर्कराऽश्मादिरहिताम् आखुकृष्टवल्मीकपांसुलकर्द[illegible] आरण्यान्वा, सुमनसः पुष्पाणि सुगन्धीनि
कुशान् यवादिशुचिक्षेत्रादिसम्भवान्, तिलान् ग्राम्या[illegible] बिल्वतुलसीप्रभृतिपत्राणि च । उदकान्तं
अगन्धोग्रगन्धप्रतिषिद्धवर्जितानि शतपत्रादिकानि [illegible]म्बन्धिनः अन्तं समीपं गृहात् गत्वा
गत्वा शुचौ देशे स्थाप्य—उदकस्य पूर्वोक्तनद्यादे

तत्राप्यपद्रव्यरहिते शुचौ देशे वस्त्राद्यन्तर्हितायां भूमौ स्थाप्य मृदादीनि । अत्रासमासेऽपि ल्यप्प्रयोगश्छान्दसः, "छन्दोवत्सूत्राणि भवन्ति" इति वचनात् । **प्रक्षाल्य पाणिपादम्**—प्रक्षाल्य मृदा जलेन च प्रकर्षेण क्षालयित्वा, किं, पाणी च पादौ च पाणिपादं, "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति सूत्रेणैकवचनम् । अत्र पाण्योरभ्यर्हितत्वात् पाणिशब्दस्य पूर्वनिपातः, तेन विप्रो दक्षिणपादोपक्रमेण पादौ प्रक्षाल्य तथैव पाणी प्रक्षालयेन्न पाठक्रमेण । **कुशोपग्रहो बद्धशिखी यज्ञोपवीत्याचम्य**—"कण्ठादुत्तार्य सूत्रं तु कर्तव्यं क्षालनं द्विजैः ।" अन्यच्च **सङ्ग्रहे**—"अभ्यङ्गे चोदधिस्नाने मातापित्रोः क्षयेऽहनि । कण्ठादुत्तार्य सूत्रं तु क्षालयेत्परिशोधयेत् ॥" कुशाः त्रिप्रभृतयो दर्भस्तम्बा उपग्रहाः सव्यहस्ते धृता येन स कुशोपग्रहः । उपग्रहः पवित्रमप्युपलक्षयति । "सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रकः" इति **स्मृतेः** । तेनानन्तर्गर्भसाग्रप्रादेशमात्रदर्भदलद्वयात्मकपवित्रालंकृतदक्षिणहस्तो बहुकुशोपग्रहान्वितसव्यहस्तः सन् । बद्धा शिखा चूडाऽस्यास्तीति बद्धशिखी । यज्ञोपवीतं ब्रह्मसूत्रमस्यास्तीति यज्ञोपवीती । अत्र "सदोपवीतिना भाव्यं सदा बद्धशिखेन च" इति **कात्यायनस्मृते**र्बद्धशिखित्वयज्ञोपवीतित्वे प्राप्ते* पुनर्वचनं केशबन्धनोत्तरीयवाससोर्निवृत्त्यर्थम् । यत्तु "प्रेतस्पर्शिनां स्नाने एकवस्त्राः प्राचीनावीतिनः" इति **पारस्करगृह्य**स्मरणं न तत्स्नानान्तरे द्विवस्त्रताज्ञापकं, यतः—"अशुचिस्पर्शादिनिमित्तके स्नाने सवासा जलमाविशेत्" इत्यादिवचनैः प्रेतस्पर्शिनामपि स्नानेऽनेकवस्त्रताप्राप्तौ तत्पुनरेकवस्त्रतापरिसङ्ख्यानार्थं, न पुनः प्रेतस्नानव्यतिरिक्तस्नाने द्विवस्त्रताज्ञापकम् । यतो वक्ष्यति "निष्पीड्य वस्त्रम्" इति । **योगियाज्ञवल्क्यो**ऽपि "निष्पीडय स्नानवस्त्रं तु" इति स्नानवस्त्रस्यैकत्वं स्मरति । अतः साधूक्तं यज्ञोपवीतीति, पुनर्वचनमुत्तरीयवस्त्रव्युदासार्थमिति । तस्मान्नैमित्तिक एव स्नानेऽनेकवस्त्रता नान्यत्रेति स्थितम् । आचम्य यथाशास्त्रमाचमनं कृत्वा । **उरुꣳ हीति तोयमामन्त्र्यावर्तयेद्ये ते शतमिति**—उरुꣳ हि राजेत्यनयर्चा तोयं सलिलमामन्त्र्याभिमुखीकृत्य ये ते शतमित्येतयर्चा तत्तोयं दक्षिणहस्तेन प्रदक्षिणं सकृदावर्त्तयेत् आलोडयेत् । **सुमित्रिया न इत्यपोऽञ्जलिनाऽऽदाय दुर्मित्रिया इति द्वेष्यं प्रति निषिञ्चेत्**—सुमित्रिया न आप इति यजुषा अपो जलमञ्जलिना करद्वयपुटेनादाय उद्धृत्य दुर्मित्रियास्तस्मै सन्त्विति यजुषा द्वेष्यं शत्रुं प्रति निषिञ्चेत् । शत्रुं मनसा ध्यात्वा भूमौ प्रक्षिपेदित्यर्थः । द्वेष्याभावे कामाद्यरिषड्वर्गान्मनसाऽभिध्याय निषिञ्चेत् । **कटिं बस्त्यूरू जङ्घे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्य**—कटिर्नाभेः पृष्ठवंशस्य च समन्तात् । तस्या अधोभागो वस्तिर्गुदमेढ्रयोरन्तरालम् । ऊरू वस्तितोऽधस्ताज्जानुपर्यन्तौ । जङ्घे जानुतोऽधस्तात् गुल्फपर्यन्ते । चरणौ गुल्फतोऽधस्तात् तलमभिव्याप्य पादौ । करौ मणिबन्धादारभ्य अन्तर्बहिरङ्गुल्यग्रावधी । मृदा सव्यहस्तगृहीतया तावत्कटिं सकृदालिप्य । प्रक्षालनशब्दसामर्थ्यात् अद्भिः सकृत्प्रक्षाल्य । तथैव द्वितीयम् । तथैव तृतीयम् । कटिं क्षालयित्वा । एवमेव त्रिर्वस्तिप्रभृतीनि क्रमेणैकैकशः प्रक्षाल्य । **आचम्य नमस्योदकमालभेदङ्गानि मृदेदं विष्णुरिति**—कट्याद्यधमाङ्गप्रक्षालनसम्भवात् प्रायश्चित्तशुद्ध्यर्थमाचमनं कृत्वा उदकाय नम इत्युदकं नमस्य नत्वा **इदं विष्णु**रित्येतयर्चा दक्षिणहस्तगृहीतया मृदा मुखप्रभृतिनाभिपर्यन्तानि सव्यहस्तस्थया नाभिमारभ्य पादपर्यन्तानि अङ्गानि गात्राणि आलभेत् अनुलिम्पेत् । अत्र नमस्येति छान्दसो ल्यप् । अत्रालभेदिति परस्मैपदं छान्दसम् । "छन्दोवत्सूत्राणि भवन्ति" इति वचनात् । सूर्यस्याभिमुखो निमज्जेत् । ततः शनैर्जलाशयं प्रविश्य नाभिमात्रे स्थितः सूर्यस्याभिमुखः सन्निमज्जेत् । शिरसा जलमवगाहेत् । इदं **कात्यायन**मतम् । यत्तु "प्रावाहाभिमुखो मज्जेत्" इति **स्मृत्यन्तरं** तदन्यशाखीयविषयम् । ननु **कात्यायन**वचनं स्थावरजलमज्जनाविषयम्,

---

* बद्धशिखी यज्ञोपवीतीति स्मरणं सावधानीकरणार्थम्, केशप्रसाधनादौ विशिखत्वप्राप्तेरिति ज्ञानदीपिकायाम् ॥

स्मृत्यन्तरं तु प्रवाहजलविषयमिति व्यवस्था किं न स्यात् । मैवम् । यतः-**कात्यायनः स्नानं नद्यादावित्युपक्रम्य सूर्यस्याभिमुखो मज्जेदिति** सामान्येन स्मरति । **योगियाज्ञवल्क्योऽपि** भास्कराभिमुखो मज्जेत् इति । **षट्त्रिंशन्मते**-"प्रवाहाभिमुखो मज्जेद्बह्वृचोऽथर्वसामगाः । यजुषां चैव सर्वेषां सूर्याभिमुखमज्जनम् ॥" तस्मात्कात्यायनयोगियाज्ञवल्क्यमतानुवर्त्तिनां वाजसनेयिनां सर्वत्रोदकाशये स्नाने सूर्याभिमुखत्वम् । मज्जनप्रकारमाह-**आपो अस्मानिति स्नात्वोदिदाभ्य इत्युन्मज्ज्य निमज्ज्योन्मज्ज्याचम्य**-**आपो अस्मान्मातर** इति मन्त्रेण स्नात्वा माज्जित्वा । **उदिदाभ्य** इति मन्त्रान्ते उन्मज्ज्य उत्क्रम्य निमज्ज्य पुनः तूष्णीं स्नात्वा । उन्मज्ज्य तथैवोपक्रम्याचम्य उपस्पृश्य । **गोमयेन विलिम्पेन्मा नस्तोक इति**-दक्षिणकरगृहीतेन गोमयेन मूर्द्धप्रभृतिनाभिपर्यन्तं वामहस्तगृहीतेन नाभ्यादिपादपर्यन्तं शरीरं विलिम्पेत् । रौद्रमन्त्राभिधानादुदकं स्पृशेत् । **ततोऽभिषिञ्चेदिमं मे वरुणेति चतसृभिर्माप उदुत्तमं मुञ्चन्त्ववभृथेति**-ततोऽभिषिञ्चेदिमं मे वरुणेत्येवमादिभिः सूत्रपाठक्रमेण पठितैरष्टाभिर्मन्त्रैः प्रतिमन्त्रं मूर्द्धानमभिषिञ्चेत् । अत्र पाठादेव गोमयानुलेपनानन्तरमभिषेके प्राप्ते ततः शब्देनानुलिप्तगात्रस्यैवाभिषेक इति गम्यते । **अन्ते चैतत्**-एतदष्टर्चाभिषेचनमन्ते च भवति । सन्निधेरभिषेकोत्तरत्रानुष्ठेयस्य पावनस्यान्ते इत्यर्थः । **निमज्ज्योन्मज्ज्याचम्य दर्भैः पावयेत्**-निमज्ज्य तूष्णीं स्नात्वाऽऽचम्य स्नानानन्तरं विहितमाचमनं कृत्वा दर्भैः त्रिभिः कुशस्तम्बैर्दक्षिणहस्तोपात्तैः प्रादक्षिण्येन नाभित ऊर्ध्वं पुनर्नाभिं यावत्पावयेत् । पावनमन्त्रानाह-**आपो हि ष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीराप इति द्वाभ्यामपो देवा द्रुपदादिव शं नो देवीरपाꣳरसमपो देवीः पुनन्तु मेति नवभिश्चित्पतिर्मेत्योङ्कारेण व्याहृतिभिर्गायत्र्याऽऽदावन्ते च**-आपो हि ष्ठेत्यादिभिश्चित्पतिर्मेत्यन्तैर्मन्त्रैः पावयेदित्यन्वयः । किंच ॐकारेण प्रणवेन व्याहृतिभिस्तिसृभिः गायत्र्या च **तत्सवितुरित्येतयर्चा** पावयेत् । कुत्र, आदौ **आपो हि ष्ठेत्यादेः** पावनस्य । तथाऽन्ते च **चित्पतिर्मा पुनात्वित्यस्यावसाने** । **अन्तर्जलेऽघमर्षणं त्रिरावर्त्तयेत्**-अन्तर्जले जलस्य मध्ये निमग्नः अघमर्षणम् **ऋतं च सत्यं** चेत्येतत्सूक्तं त्रीन्वारानावर्त्तयेत् अनुच्छ्वसन् जपेत् । **द्रुपदादिवायं गौरिति वा त्र्यृचं प्राणायामं वा सशिरसमोमिति विष्णोर्वा स्मरणम्**-यद्वा द्रुपदादिवेत्यादिकामृचम् **आऽयं गौरित्यादिकां** वा त्र्यृचं प्राणायामं वा वक्ष्यमाणलक्षणम् । कथम्भूतं सशिरसं सह शिरसा वर्त्तमानम्, **आपो ज्योतिरिति** मन्त्रः शिरः । अनेन शिरोरहितोऽपि प्राणायामोऽस्तीति गम्यते । ॐ इति वाऽन्तर्जले त्रिरावर्तयेदित्यनुषङ्गः । अत्रैषां पक्षाणां शक्तिश्रद्धापेक्षया विकल्पः । उत्तमाधिकारिणं प्रत्याह-विष्णोर्वा स्मरणम् । विष्णोः परमात्मरूपेण सर्वव्यापकस्य स्मरणं ध्यानं वा कुर्यात् । इति स्नानविधेः प्रथमकण्डिकासूत्रार्थः ॥ १ ॥ ॥ * ॥

अथ **पद्धतिः**-तत्राष्टधा विभक्तस्याह्नश्चतुर्थे भागे मृदादीनि स्नानोपकरणान्याहृत्य नद्याद्युदकाशयं गत्वा तत्र तीरं प्रक्षाल्य मृद्गोमयकुशतिलसुमनसो निधाय मृद्भिरद्भिश्च पादौ हस्तौ च प्रक्षाल्य दक्षिणकरे साग्रं प्रादेशमात्रमनन्तर्गर्भं द्विपत्रं कृत्वा, वामकरे त्रिप्रभृतिबहून् कुशानुपग्रहं धृत्वा बद्धशिखी यज्ञोपवीती एकवासा आचमनं कृत्वा **उरुꣳहि राजा** इत्यादिकया **विधाश्चिदित्य**न्तया शुनःशेपदृष्टया वरुणदेवतया त्रिष्टुभा, ज्योतिष्टोमावभृथे यजमानवाचने विनियुक्तया तीर्थतोयमामन्त्र्य **ये ते शतमित्यादिकया** **स्वाहाऽन्तया** शुनःशेपदृष्टया वारुण्या त्रिष्टुभा तत्तोयमावर्त्तयेत् । **सुमित्रिया न** इति यजुषा प्रजापतिदृष्टेनाब्दैवतेन तोयमञ्जलिना गृहीत्वा, **दुर्मित्रिया** इति यजुषा प्रजापतिदृष्टेनाब्दैवतेनाञ्जलिस्थं जलं द्वेष्यं मनसा स्मृत्वा द्वेष्याभावे कामादीन्

CC0. In Public Domain. Krishkant Sharma Najafgarh Delhi Collection

स्मृत्वा निषिञ्चेत् । ततो मृदं त्रेधा विभज्य एकस्माद्भागादल्पां मृदं वामकरेणादाय कटिमनुलिप्याद्भिः प्रक्षाल्य तथैव पुनर्द्विवारं प्रक्षाल्य एवमेव वस्तिम्, ऊरू, जङ्घे, चरणौ, करौ चैकैकशः प्रक्षाल्याचम्य उदकाय नम इति तीर्थोदकं नत्वा **इदं विष्णुरि**त्यृचा मेधातिथिदृष्टया गायत्र्या वैष्णव्या, दक्षिणपाणिगृहीतया मृदा मुखतो नाभिपर्य्यन्तं, वामकरगृहीतया नाभितः पादपर्य्यन्तमङ्गान्यालिप्य शनैर्नाभिमात्रं जलं प्रविश्य सूर्याभिमुखं स्थित्वा **आपो अस्मानि**ति मन्त्रेण प्रजापतिदृष्टेनात्यष्टिच्छन्दस्केनाब्दैवतेन, दीक्षायां यजमानस्नाने विनियुक्तेन जले मज्जनम् । **उदिदाभ्य** इति मन्त्रेण तद्दैवतर्षिच्छन्दस्केनोन्मज्जनम्, पुनस्तूष्णीं निमज्ज्योन्मज्ज्याचम्य पाणिभ्यां गोमयमादाय **मानस्तोक** इत्यृचा कुत्सदृष्टया ऐकरौद्र्या जगत्या, शतरुद्रिये जर्तिल[1]होमे विनियुक्तया दक्षिणपाणिस्थेन गोमयेन मुखादिनाभ्यन्तं वामकरस्थेन नाभितोऽङ्घ्रिपर्य्यन्तं शरीरं विलिम्पेत् । **इमं मे वरुणे**त्यृचा शुनःशेपार्षेय्या गायत्र्या वारुण्या, चुलुकेन मूर्द्धानमभिषिच्य तथैव **तत्वा यामी**ति शुनःशेपदृष्टया त्रिष्टुभा वारुण्या, तथा **त्वं नः स त्वं न** इत्येताभ्यां वामदेवर्षिभ्यां त्रिष्टुब्भ्यामाग्निवारुणीभ्याम, प्रत्यृचं **मापो मौषधीर्हिꣳसीरि**त्येतावता यजुषा, प्रजापतिदृष्टेन, हृदयशूलदैवतेन, **उदुत्तमम्मि**ति शुनःशेपदृष्टया, त्रिष्टुभा, वारुण्या, **मुञ्चन्तु मे**ति [2]बन्धुदृष्टया अनुष्टुभा, ओषधिदेवतया, **अवभृथ**[3] **निचुम्पुण** इति प्रजापतिदृष्टया, यजुषा, यज्ञदेवतयाऽभिषिञ्चेत् । ततस्तूष्णीं निमज्ज्याचम्य त्रिभिर्दर्भैर्दक्षिणकरधृतैः सोदकैर्नाभिमारभ्य प्रदक्षिणं नाभिपर्यन्तं वक्ष्यमाणैः प्रणवादिभिर्मन्त्रैरात्मानं पावयेत् । तत्र प्रणवस्य ब्रह्मऋषिः, परमात्मा[4] देवता, गायत्री छन्दः, ब्रह्मारम्भविरामसर्वकर्मादिषु विनियोगः । व्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवता, दैवानि[5] गायत्र्युष्णिगायत्रीसंज्ञानि छन्दांसि [गायत्र्युष्णिगनुष्टुप्छन्दांसि], अग्न्याधाने विनियोगः । गायत्र्या विश्वामित्र ऋषिः, सविता देवता, गायत्री छन्दः, गार्हपत्यस्योपस्थाने वि० । **आपो हि ष्ठे**ति तिसृणां सिन्धुद्वीप ऋषिः, आपो देवता, गायत्री छन्दः, उषासम्भरणे पर्णकषायपक्वोदकासेके वि० । **इदमाप** इति प्रजापतिर्ऋषिः, आपो देवता, त्र्यवसाना महापङ्क्तिश्छन्दः, अन्त्यपादः पावमानः पशौ चात्वाले मार्जने वि० । **हविष्मतीरिमा** इति प्रजापतिर्ऋषिः, आपो यजमानाध्वरसूर्याश्च देवताः, अनुष्टुप्छन्दः, वसतीवरीणामपां ग्रहणे वि० । **देवीरापो अपान्नपा**दिति प्रजापतिर्ऋषिः, आपो देवता, पङ्क्तिश्छन्दः, अप्सु चतुर्गृहीताज्यहोमे वि० । **कार्षिरसी**[6]ति प्रजापतिर्ऋषिः, आज्यमापश्च देवता, अनुष्टुप्छन्दः, आज्यप्रप्लावने वि० । **आपो देवा** इति वरुण ऋषिः, आपो देवता, त्रिष्टुप्छन्दः, राजसूयेऽभिषेचनीयोषासम्भरणे वि० । **द्रुपदादिवे**ति प्रजापत्यश्विसरस्वत्य ऋषयः[7], आपो देवता, अनुष्टुप्छन्दः, वासो[8]ऽपासने विनियोगः । **शं नो देवीरि**ति दध्यङ्ङाथर्वण[9] ऋषिः, आपो देवता, गायत्री छन्दः शान्तिकरणे वि० । **अपाꣳरसमि**ति बृहस्पतिरिन्द्रश्च ऋषिः, रसो देवता, अनुष्टुप्छन्दश्चतुर्थवाज-

---

१ जर्तिलशब्देन आरण्यातिलग्रहणम्, तदेतत्**कातीयश्रौतसूत्रकर्क**भाष्ये स्पष्टम् । २ "याऽओषधीः ससीवश्शतिरनुष्टुप् ओषधिस्तुतिमाथर्वणो भिषङ् मुञ्चन्तु बन्धुर्द्वादशानारभ्याधीताः" इति **सर्वानुक्रमे महीधर**भाष्येऽप्येवम् । ३ **सर्वानुक्रम**भाष्ये **देवयाज्ञिकः** अवभृथेत्येतत् यजुर्यज्ञदेवतम्, नपुंसकनिर्देशादस्य यजुष्ट्वम् अष्टाचत्वारिंशदक्षरत्वाद्ब्राह्मी अनुष्टुप् इति । ४ नारायणोपनिषदाचारदर्शयोः अग्निर्देवतेति तदेतत् सर्वानुक्रममहीधरभाष्यविरुद्धम् । ५ **भूरि**ति दैवी गायत्री एकाक्षरत्वात्, **भुव** इति द्व्यक्षरा दैव्युष्णिक्, **स्वरि**त्येकाक्षरा दैवी गायत्री, इति देवयाज्ञिककृतसर्वानुक्रमभाष्ये स्पष्टम्, अतो ग्रन्थान्तरेषूपलभ्यमानो "गायत्र्युष्णिगनुष्टुप्छन्दांसि" इति पाठश्चिन्तनीयः । ६ कार्षिराज्यमनुष्टुप् समुद्रस्य समाप आपे, इति **सर्वानुक्रमे** । ७ अत्र कोकिलो राजपुत्र ऋषिरित्या**चाराऽऽदर्शे**, ८ अवभृथवत्स्नात्वा वासोऽपासनं **द्रुपदादिवेति**, **श्रौतसूत्रे** ।

९ अत्र सिन्धुद्वीप ऋषिरिति **नागदेवकृताचारदीपे**।

पेयग्रहणे वि० । अपोदेवीरिति सिन्धुद्वीप ऋषिरापो देवता न्यङ्कुसारणी छन्दः, उत्खातोखानिर्माणार्थं मृद्भस्मावपांसेके वि० । पुनन्तुमेति द्वयोः प्रजापत्यश्विसरस्वत्य ऋषयः, पितरो देवता, अनुष्टुप्छन्दः, सौत्रामण्यां सुराग्रहशेषप्रतिपत्तिसमनन्तरं पवित्रहिरण्यसुराभिः ऋत्विग्यजमानानामात्मपावने वि० । अग्न आयूंषीति प्रजापतिर्वैखानस ऋषिरग्निर्देवता, गायत्री छन्दः । पुनन्तुमेति प्रजापत्यश्विसरस्वत्य ऋषयः, देवजना धियो विश्वा भूतानि जातवेदाश्च देवता, अनुष्टुप्छन्दः । पवित्रेणेत्यादीनां पञ्चानां प्रजापत्यश्विसरस्वत्य ऋषयः, प्रथमाया अग्निर्देवता, गायत्री छन्दः । द्वितीयाया अग्निर्ब्रह्मा वा देवता, तृतीयपादस्य ब्रह्मैव देवता, गायत्री छन्दः । तृतीयायाः सोमो देवता, गायत्री छन्दः । चतुर्थ्याः सविता देवता, गायत्री छन्दः । पञ्चम्या विश्वेदेवा देवता, त्रिष्टुप्छन्दः । पूर्वोक्तपावने वि० । चित्पतिर्मा, वाक्पतिर्मा, देवो मेति त्रयाणां यजुषां प्रजापतिर्ऋषिर्द्वयोः प्रजापतिर्देवता, तृतीयस्य सविता देवता, दीक्षणीयायां यजमानपावने वि० । ॐकारादीनां पूर्ववत्, अत्र पावने विनियोगः । उक्तरीत्या ऋष्यादीन् स्मृत्वा ॐ पुनातु, ॐभूः पुनातु, ॐ भुवः पुनातु, ॐ स्वः पुनातु, गायत्र्यन्ते सर्वं पुनातु । तत आपो हि ष्ठेतिप्रभृतिभिर्वैश्वदेवी पुनतीत्यन्ताभिर्ऋग्भिः प्रत्यृचं पावयित्वा चित्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयमित्येवं पावयित्वा वाक्पतिर्मा पुनात्वच्छिद्रेणेत्यादि तच्छकेयमित्यन्तेन देवो मा सविता पुनात्वच्छिद्रेणेत्यादि तच्छकेयमित्यन्तेन पावयेत् । तत ॐ पुनात्विति पूर्ववत्पावयित्वा पावनकुशान् परित्यज्य पूर्ववदिमं मे वरुणेत्याद्याभिरवभृथेत्यन्ताभिरष्टाभिर्ऋग्भिरभिषिच्यान्तर्जले निमग्न ऋतं च सत्यं चेति सूक्तमघमर्षणदृष्टं भाववृत्तदैवतमानुष्टुभमश्वमेधावभृथे विनियुक्तं त्रिर्जपेत् । द्रुपदादिवेति प्रजापत्यश्विसरस्वतीदृष्टमापमानुष्टुभं, सौत्रामण्यावभृथे वासोऽपासने विनियुक्तम्, आयंगौरित्यृचं सार्पराज्ञीदृष्टामाग्नेयीं, गायत्रीं प्राणायामं वा शिरःसहितम् ॐ इति वा त्रिर्जपेत् । यद्वा-परमात्मानमव्ययं विष्णुं स्मरेत् । ततस्तद्विष्णोरित्येतया मेधातिथिदृष्टया वैष्णव्या गायत्र्या, चषालोद्वीक्षणे विनियुक्तया त्रिः स्नात्वाऽऽचम्य निर्गच्छेत्, इति स्नानप्रयोगपद्धतिः ॥ १ ॥

उत्तीर्य धौते वाससी परिधाय मृदोरूकरौ प्रक्षाल्याचम्य त्रिरायम्यासून् पुष्पाण्यम्बुमिश्राण्यूर्द्ध्वं क्षिप्त्वोर्ध्वबाहुः सूर्यमुदीक्षन्नुद्वयमुदुत्यं चित्रं तच्चक्षुरिति गायत्र्या च यथाशक्ति विभ्राडित्यनुवाकपुरुषसूक्तशिवसंकल्पमण्डलब्राह्मणैरित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेत् दर्भेषु दर्भपाणिः स्वाध्यायं च यथाशक्त्यादावारभ्य वेदम् ॥ २ ॥ ॥ * ॥

हरि०—ततः किं कुर्यादित्याह—उत्तीर्य धौते वाससी परिधाय—"एकपङ्क्त्युपविष्टानां भोजनेन पृथक् पृथक् । यद्येको लभते नीलीं सर्वे तेऽशुचयः स्मृताः ॥ यस्य पट्टे शुचौ तन्तुर्नीलीरक्तो हि दृश्यते । त्रिरात्रोपोषणं देयं शेषाश्चैकोपवासिनः ॥":एवमुक्तविधिना स्नात्वा उत्तीर्य जलाद्बहिर्निष्क्रम्य धौते अरजकप्रक्षालिते सदशे शुष्के शुक्ले अनग्निदग्धे अच्छिद्रे अस्यूते अमलिने गैरिकादिरागेणाविकृते कार्पासवाससी अन्तरीयोत्तरीये द्वे वस्त्रे परिधाय धृत्वा । अत्र यथादेशाचारं परिधानस्य विन्यासविशेषः प्रान्तद्वयगोपनेन । धौताभावे शाणक्षौमाविककुतपानामन्यतमे अभ्युक्षिते । द्वितीयवस्त्राभावे तृतीयमुपवीतं, योगपट्टं वा, कुशरज्जुं वा, सूत्रं वा, परिधानीयस्योत्तरार्धं वा उत्तरीयं कुर्यात् ।

---

१ अग्न आयूंषीतीमां तृतीयामृचं गायत्रीमग्निर्देवता,वैखानसः प्रजापतिर्ऋषिरपश्यत,इति सर्वानुक्रमभाष्ये तत्पद्धतौ च।

मृदोरू करौ प्रक्षाल्याचम्य--मृदा उदकेन च ऊरू पाणी च क्रमेण प्रक्षाल्याचम्य प्राङ्मुख उदङ्मुखो वा उपविश्य कुशपवित्रोपग्रहपाणिर्ब्राह्मतीर्थेन त्रिरप आचम्य सोदकेनाङ्गुष्ठमूलेन द्विर्मुखं प्रमृज्य,सर्वाङ्गुलीभिरोष्ठौ स्पृष्ट्वा,तर्जन्यङ्गुष्ठाभ्यां दक्षिणोत्तरे नासारन्ध्रे,अनामिकाङ्गुष्ठाभ्यां दक्षिणोत्तरे अक्षिणी, ताभ्यामेव दक्षिणोत्तरौ कर्णौ, कनिष्ठाङ्गुष्ठाभ्यां नाभिं, पाणितलेन हृदयं च, कराग्रेण मूर्धानं दक्षिणोत्तरभुजमूले चोपस्पृशेत्। एवं द्विराचमनं विधाय शिष्टाचारपरिप्राप्तं गङ्गादितीर्थमृत्तिकयोर्ध्वपुण्ड्रं तिलकं ललाटे कुर्यात । **त्रिरायम्यासून्**–त्रिः त्रीन् वारान् असून् प्राणान् आयम्य सन्निरुध्य । प्राणनियमप्रकारश्च “गायत्रीं शिरसा सार्धं जपेद्व्याहृतिपूर्विकाम् । प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः ॥” इति योगीश्वरेणोक्तो द्रष्टव्यः । **पुष्पाण्यम्बुमिश्राण्यूर्ध्वं क्षिप्त्वा**–पुष्पाणि कुसुमानि, तदभावे बिल्वादिपत्राणि, अम्बुना उदकेन मिश्राणि संयुक्तानि अञ्जलिनाऽऽदाय उत्थाय ऊर्ध्वमुपरि सूर्याभिमुखं क्षिप्त्वा उत्सृज्य प्रणवव्याहृतिपूर्विकया गायत्र्या । **शौनकः**–“उभौ पादौ समौ कृत्वा पूरयेदुदकाञ्जलीन् । गोशृङ्गानूर्ध्वमुद्धृत्य जलमध्ये जलं क्षिपेत् ॥” पक्षान्तरे–“ईषन्नम्रः प्रभातेषु मध्याह्ने ऋजुसंस्थितः । द्विजोऽर्घं प्रक्षिपेद्देव्या सायं तूपविशन् भुवि ॥ प्रातर्मध्याह्निकीं सन्ध्यां तिष्ठन्नेव समापयेत् । उपविश्य तु सायाह्ने जले ह्यर्घं विनिक्षिपेत् ॥” **ऊर्ध्वबाहुः सूर्यमुदीक्षन्नुद्वयमुदुत्यं चित्रं तच्चक्षुर्गायत्र्या च यथाशक्ति विभ्राडित्यनुवाकपुरुषसूक्तशिवसङ्कल्पमण्डलब्राह्मणैरित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेत्**—ऊर्ध्वौ सूर्याभिमुखौ बाहू यस्य स ऊर्ध्वबाहुः सन् सूर्यमादित्यमुदीक्षन् पश्यन् उद्वयमित्यादिनोक्ताभिश्चतसृभिर्ऋग्भिस्तथा गायत्र्या यथाशक्ति सहस्रादिसंख्यया आवृत्तया विभ्राडित्यनुवाकेन, पुरुषसूक्तेन सहस्रशीर्षेत्यादिषोडशर्चेन, शिवसङ्कल्पेन यज्जाग्रत इत्यादिना षडृचेन, मण्डलब्राह्मणेन–यदेतन्मण्डलं तपति इत्यादिनोपस्थाय सूर्यं स्तुत्वा तमेव प्रदक्षिणीकृत्य नमस्कृत्य कायवाङ्मनोभिः प्रणम्योपविशेत् आसीत । एवं त्रिरायम्यासून् इत्यारभ्य उपविशेदित्यन्तेन सूत्रसन्दर्भेण कात्यायनाचार्येण सन्ध्योपासनमुक्तं तत् काण्वमाध्यन्दिनानां स्वगृह्योक्तत्वात् शाखानुष्ठानसिद्धिकरम् । यत्पुनः “शाखान्तराधिकरण्यन्यायेन” इदमेव कल्पतरुकारप्रभृतिभिर्निबन्धकारैराह्निकपद्धतिकारैश्च स्मृत्यन्तरोक्तसन्ध्योपासनविधिसमुचितं लिखितं तत्सर्वशाखाध्येतृसाधारणत्वात्सर्वशाखिनामनुष्ठानमुचितम् । **दर्भेषु दर्भपाणिः स्वाध्यायं च यथाशक्त्यादावारभ्य वेदम्**–दर्भेषु प्रशस्तदारुनिर्मितासनोपरि निहितेषु प्रागग्रेषु उदगग्रेषु वा त्रिषु कुशेषु आसीनः प्राङ्मुख उदङ्मुखो वा दर्भपाणिः दर्भाः पवित्रोपग्रहव्यतिरिक्ताः पाण्योर्यस्यासौ दर्भपाणिः स्वाध्यायं ब्रह्मयज्ञं यथाशक्ति शक्तिमनतिक्रम्य कुर्यात् । किं कृत्वा आरभ्य उपक्रम्य कं वेदं मन्त्रब्राह्मणात्मकम् । कुत आरभ्य आदौ आदितः इषे त्वोर्जेत्वेत्यस्मात् । अत्र वेदमित्येकवचनादनेकवेदाध्यायिनोऽप्येकं वेदमारभ्य प्रतिदिनम् उपर्युपर्यध्ययनेन समाप्यान्यं वेदमारभ्य तथैव समाप्य अथर्वपुराणेतिहासादीन्यपि तथैवादित आरभ्यैकैकं समाप्यापरमपरमारभ्य समापयेत् न पुनर्यदृच्छया एकदेशमेकदेशम्, आदावारभ्येति नियमात् । वेदशब्दोऽत्रोपलक्षणार्थः । यथाह **याज्ञवल्क्यः**–“वेदाथर्वपुराणानि सेतिहासानि शक्तितः । जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत्॥” इति । स चायं जपयज्ञः कालान्तरेऽपि स्मर्यते–“यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञस्तु स स्मृतः । स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः । वैश्वदेवावसाने वा नान्यत्रेत्यनिमित्तिकात्” इति छन्दोगपरिशिष्टोक्तेः । इति द्वितीयकण्डिकासूत्रार्थः ॥ २ ॥ * ॥

अथ प्रयोगः । निर्गम्य पादौ जले स्थले च कृत्वा द्विराचम्य धौते वस्त्रे परिधाय मृदाऽद्भिश्च ऊरू करौ प्रक्षाल्य श्रीपर्णादिप्रशस्तदारुनिर्मिते कुशत्रयाच्छन्ने सुप्रक्षालिते आसने प्रागास्य उदगास्यो

वाऽऽसीन उक्तलक्षणपवित्रोपग्रहः सुवर्णरौप्यालंकृतपाणियुगल उक्तेन विधिना द्विराचम्य भगवन्तं परमात्मस्वरूपं नारायणं संस्मृत्य सन्ध्योपासनमारभेत । तद्यथा—ॐकारस्य ब्रह्म ऋषिः, परमात्मा देवता, गायत्री छन्दः सर्वकर्मारम्भे विनियोगः । **भूरादिसप्तव्याहृतीनां** प्रजापतिर्ऋषिः, अग्निवायुसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवताः, गायत्र्युष्णिगनुष्टुप्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्छन्दांसि, तत्सवितुरिति विश्वामित्र ऋषिः, सविता देवता, गायत्री छन्दः, आपो ज्योतिरिति प्रजापतिर्ऋषिः, ब्रह्माग्निवायुसूर्या देवताः, द्विपदागायत्री छन्दः सर्वेषां प्राणायामे विनियोगः । इत्युक्त्वा प्राणवायुं नियम्य ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवि० दयात् ॐ आपो ज्योती रसोऽमृतं ब्रह्मभूर्भुवः स्वरोम् । एवं नवधाऽऽवृत्त्य ॐ उपात्तदुरितक्षयाय मध्याह्नसन्ध्यामहमुपास्ये इति प्रतिज्ञाय । "ॐआयाहि वरदे देवि त्र्यक्षर रुद्रवादिनि । सावित्रि च्छन्दसां माता रुद्रयोने नमोऽस्तु ते ।" इति मन्त्रेण सन्ध्यामावाह्य । "आपः पुनन्त्विति मारीचकश्यप[1] ऋषिः, आपो देवता, अनुष्टुप्छन्दः आचमने विनि० । "आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् । पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम्" यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहꣳस्वाहा" इत्यनेन मन्त्रेण सकृदप आचम्य स्मार्त्तमाचमनं कृत्वा कुशानादाय । **आपो हि ष्ठेति** त्र्यचस्य सिन्धुद्वीप ऋषिः, आपो देवता, गायत्री छन्दः पर्णकषायपक्वोदकासेके वि० इति स्मृत्वा कुशाग्रेण ताभिरद्भिः **आपो हि ष्ठा मयोभुव** इत्यादि त्र्यृचस्य नवभिः पादैः प्रतिपादं शिरोऽभिषिञ्चेत् । ततो **द्रुपदादिवेति** प्रजापत्यश्विसरस्वत्य ऋषयः, आपो देवता, अनुष्टुप्छन्दः सौत्रामण्यवभृथे वासोपासने वि० इत्यभिधाय चुलुकेन जलमादाय तस्मिन्नासाग्रं निधाय **द्रुपदादिव मुमुचानः० मैनस** इति जपित्वा तज्जलं भूमावुत्सृज्य, **ऋतं च सत्यं चेति** त्र्यृचस्य अघमर्षण ऋषिः, भाववृत्तो देवता, अनुष्टुप्छन्दः अश्वमेधावभृथे वि० इत्युक्त्वा चुलुकजले नासाग्रमाधाय " ॐ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत । ततो रात्रिरजा[2]यत ततः समुद्रो अर्णवः । समुद्रादर्णवादधिसंवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो स्वः " इति जपित्वा जलं भूमावुत्सृज्य पुष्पाणि पत्राणि वा अम्बुमिश्राण्यञ्जलिनाऽऽदायोत्थाय सप्रणवव्याहृतिकां गायत्रीं पठित्वा आदित्याभिमुखान्यूर्ध्वं क्षिप्त्वा बाहू सूर्याभिमुखावुत्क्षिप्य **उद्वयमिति** प्रस्कण्व ऋषिः, सूर्यो देवता, अनुष्टुप्छन्दः जलादुत्क्रमणे वि० । **उदुत्यमिति** प्रस्कण्व ऋषिः, सूर्यो देवता, गायत्री छन्दः दक्षिणहोमे वि० । **चित्रं देवानामिति** कुत्स आङ्गिरस ऋषिः, सूर्यो देवता, त्रिष्टुप्छन्दः दक्षिणहोमे वि० । **तच्चक्षुरिति** दध्यङ्ङाथर्वण ऋषिः, सूर्यो देवता, एकाधिका ब्राह्मी त्रिष्टुप्, व्यूहेनात्यष्टिर्वा छन्दः, महावीरशान्तिकरणे वि० इत्यभिधाय **उद्वयमुदुत्यं चित्रं तच्चक्षुरित्येताभिर्ऋग्भिः** सूर्यमुपस्थाय **तेजोऽसीति** यजुः, परमेष्ठी प्रजापतिर्ऋषिः, आज्यं देवता, आज्यावेक्षणे गायत्र्यावाहने वि० इत्युक्त्वा गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदो मा प्रापदिति गायत्रीमुपस्थाय, प्रणवस्य परब्रह्म ऋषिः, परमात्मा देवता, गायत्री छन्दः, व्याहृतीनां प्रजापतिर्ऋषिः, अग्निवायुसूर्या देवता दैवानि, गायत्र्युष्णिग्गायत्रीसंज्ञानि छन्दांसि। गायत्र्या विश्वामित्र ऋषिः, सविता देवता, गायत्री छन्दः, अग्निर्मुखं, ब्रह्मा हृदयं, विष्णुः शरीरं, सांख्यायनगोत्रं सर्वपापक्षयार्थे जपे वि० इत्युक्त्वाऽर्कमीक्षमाणो मन्त्रार्थमनुस्मरन् अविक्षिप्तचित्तः

---

[1] विष्णुर्ऋषिरित्याचारादर्शे । याज्ञिक्यो देवता उपनिषदऋषयः आपः पृथिवी ब्रह्मणस्पतिर्ब्रह्म च देवताः, अष्टपदा अष्टिश्छन्दः उदकपाने वि० इति **संस्काररत्नमालायाम्** । [2] नारायणोपनिषदतिरिक्ताचारग्रन्थेषु, "रात्र्यजायत" इति पाठः ।

स्फटिकपद्माक्षरुद्राक्षपुत्रजीवकुशग्रन्थिहस्तपर्वणां पूर्वपूर्वाभावे उत्तरोत्तरया जपमालया प्रणवव्याहृतिपूर्वां प्रणवान्तां गायत्रीं सहस्रकृत्वः शतकृत्वो वा शक्तितो जपित्वा विभ्राडित्यादीनां चतुर्दशानां विभ्राड्प्रस्कण्वागस्त्यश्रुतकक्षसुकक्षप्रस्कण्वकुत्सजमदग्निनृमेधकुत्सहिरण्यस्तूपाङ्गिरसा ऋषयः, सूर्यो देवता, प्रथमा जगती, आद्यास्तिस्रो गायत्र्यः, आनस्त्रिष्टुप्, यदद्येति बृहद्गायत्री, **तरणिर्विश्वत**त्सूर्यस्य द्वे त्रिष्टुभौ, **बण्महाँ** द्वे बृहती, **सतो** बृहत्यौ **श्रायन्त** बृहती, **अद्यादेवा** गायत्री, **आकृष्णेन** त्रिष्टुप्, **तं प्रत्नथे**ति प्रतीकोक्तानां द्वयोः प्रजापतिर्ऋषिस्तृतीयायाः कुत्सः, प्रथमा जगती, द्वितीयातृतीये त्रिष्टुभौ, सर्वमेधे सूर्यसंस्तवे तृतीये हविग्रहणे वि० । **सहस्रशीर्षे**ति षोडशानां नारायणपुरुष ऋषिः, पुरुषो देवतापञ्चदशानामनुष्टुभ्, षोडश्यास्त्रिष्टुप्छन्दः , पुरुषमेधे पशुत्वेन नियुक्तानाम् पुरुषाणां ब्रह्मणा प्रयुक्ताभिष्टवे वि० । **यज्जाग्रत** इति षण्णां शिवसङ्कल्प ऋषिः, मनो देवता, त्रिष्टुप् छन्दः, अनारभ्याधीतत्वात्कात्यायनवचनाच्च आदित्योपस्थाने वि० । **मण्डलब्राह्मणस्य** ब्राह्मणत्वादच्छन्दस्कस्यादित्योपस्थाने वि० इत्यभिधाय विभ्राडित्यनुवाकपुरुषसूक्तशिवसंकल्पमण्डलब्राह्मणैरुपांशु पठित्वा सूर्यमुपस्थाय प्रदक्षिणीकृत्य " नमस्कृत्योपविशेत् " इति स्मृत्यन्तरोक्तसमुच्चयेन. कात्यायनसूत्रविहितं मध्याह्नसन्ध्योपासनम् । केवलकात्यायनसूत्रविहितं तु प्राणायामाञ्जलिप्रक्षेपादित्योपस्थानं त्रिकण्डिकासूत्रमात्रानुसारिणां शास्त्रार्थानुष्ठानमात्रकरणम् । " बह्वल्पं वा स्वगृह्योक्तं यस्य यावत्प्रकीर्तितम् । तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् " इति **स्मृतेः** । अथ ब्रह्मयज्ञं कुर्यात् । आसनोपरि न्यस्तेषु प्रागग्रेषु दर्भेषु प्राङ्मुख उपविष्टः पाणिभ्यां दर्भानादाय इषेत्वेत्यादिकस्य खं ब्रह्मान्तस्य माध्यन्दिनीयस्य वाजसनेयकस्य यजुर्वेदाम्नायस्य विवस्वानृषिः, वायुर्देवता, गायत्र्यादीनि सर्वाणि च्छन्दांसि, ब्रह्मयज्ञे वि० इत्यभिधाय प्रणवं, व्याहृतीर्गायत्रीमाम्नायस्वरेणाधीत्य इषे त्वोर्जे त्वेत्यादितो वेदमारभ्यानुवाकशोऽध्यायशो यजुषो वा संहितां ब्राह्मणं चाध्यायशो ब्राह्मणशो वा प्रणवावसानं यथाशक्ति प्रत्यहमधीयानो मन्त्रं ब्राह्मणं च समाप्य पुनरेवमेवारभ्य समापयेत् । प्रणवव्याहृतिगायत्रीपूर्वकं तु प्रतिदिनं पठेत् । एवमितिहासपुराणादीन्यपि ब्रह्मयज्ञसिद्धये जपेत् । "तत्राप्याध्यात्मिकां जपेत्" इति योगीश्वरेण पृथगभिधानात् । अत्रानध्यायो नास्ति । "नास्ति नित्येष्वनध्यायः" इति वचनात् । नित्यश्च ब्रह्मयज्ञः । इति **ब्रह्मयज्ञविधिः** ॥ २ ॥ ॥ * ॥

ततस्तर्पयेद्ब्रह्माणं पूर्वं विष्णुꣳ रुद्रं प्रजापतिं देवांश्छन्दाꣳसि वेदानृषीन् पुराणाचार्यान् गन्धर्वानितराचार्यान्संवत्सरं च सावयवं देवीरप्सरसो देवानुगान्नागान्सागरान्पर्वतान्सरितो मनुष्यान् यक्षान् रक्षाꣳसि पिशाचान्सुपर्णान् भूतानि पशून् वनस्पतीनोषधीर्भूतग्रामश्चतुर्विधस्तृप्यतामिति ॐकारपूर्वं ततो निवीती मनुष्यान् । सनकं च सनन्दनं तृतीयं च सनातनम् । कपिलमासुरिं चैव वोढुं पञ्चशिखं तथा । ततोऽपसव्यं तिलमिश्रं कव्यवाडनलꣳ सोमं यममर्यमणमग्निष्वात्तान् सोमपां बर्हिषदो यमांश्चैके । यमाय धर्मराजाय मृत्यवे चान्तकाय च । वैवस्वताय कालाय सर्वभूतक्षयाय च । औदुम्बराय दध्नाय नीलाय परमेष्ठिने । वृकोदराय चित्राय चित्रगुप्ताय वै नम इति "एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलाञ्जलीन् । यावज्जीवकृतं पापं तत्क्षणादेव नश्यति" जीवत्पितृकोऽप्येतानन्याँश्चेतर उदीरतामङ्गिरस आयन्तु न ऊर्जं वहन्ती पितृ-

भ्यो ये चेह मधुव्वाता इति त्र्यृचं जपन् प्रसिञ्चेत्तृप्यध्वमिति त्रिर्नमो व इत्युक्त्वा मातामहानां चैवं गुरुशिष्यर्त्विग्ज्ञातिबान्धवानतर्पिता देहाद्रुधिरं पिबन्ति वासो निष्पीड्याचम्य ब्राह्मवैष्णवरौद्रसावित्रमैत्रवारुणैस्ताल्लिङ्गैरर्चयेददृश्रꣳ हꣳस इत्युपस्थाय प्रदक्षिणीकृत्य दिशश्च देवताश्च नमस्कृत्योपविश्य ब्रह्माग्निपृथिव्योषधिवाग्वाचस्पतिविष्णुमहद्भ्योऽद्भ्योऽपाम्पतये वरुणाय नम इति सर्वत्र संवर्चसेति मुखं विमृष्टे देवा गातु विद इति विसर्जयेदेष स्नानविधिरेष स्नानविधिः ॥ ३ ॥

इति श्रीकात्यायनोक्तं त्रिकण्डिकासूत्रं समाप्तम् ॥

हरि०—एवं कृतब्रह्मयज्ञः किं कुर्यादित्यत आह—**ततस्तर्पयेद्ब्रह्माणं पूर्वमित्यादि**। तर्पयेत् प्रीणयेत् कं ब्रह्माणम्, कथम्, पूर्वम् आदौ, केषां विष्णुमित्यादीनां भूतग्रामान्तानां देवानाम् । अत्र तर्पयेद्ब्रह्माणमिति तर्पणक्रियायाः कर्मभूतान् ब्रह्मादीनुद्देश्यत्वेन द्वितीयया अभिधाय भूतग्रामश्चतुर्विधस्तृप्यतामिति प्रथमया प्रयोगमाचार्यो दर्शयति, ततश्च ॐ ब्रह्मा तृप्यतामित्येवं **तर्पणप्रयोगः** । **ततो निवीती मनुष्यान्**—ततो देवतर्पणानन्तरं निवीती कण्ठसंसक्तब्रह्मसूत्रः सन् मनुष्यान् दिव्यान् मानवान् तर्पयेदिति पूर्वोक्तेनाख्यातेनानुषङ्गः । के ते मनुष्या इत्यपेक्षयामाह—सनकं चेत्यादिना श्लोकेन सप्त । **ततोऽपसव्यं तिलमिश्रम्**—ततो मनुष्यतर्पणानन्तरमपसव्यं प्राचीनावीतं कृत्वा तिलमिश्रं तिलैः संयुक्तं जलं गृहीत्वा तर्पयेदिति सम्बन्धः । कांस्तर्पयेदित्याह—**कव्यवाडनलमित्यादिना बर्हिषद** इत्यन्तेन सूत्रेण पठितान् । तत्र कव्यं पित्र्यं हविर्वहतीति कव्यवाट् अनलोऽग्निः कव्यवाट् चासौ अनलश्चेति कव्यवाडनलस्तम । अत्र केचित् "कव्यवाहमनलम्" इति द्वे देवते मन्यन्ते । तदयुक्तम् । "हव्यवाहनो वै देवानां कव्यवाहनः पितृणाम्" इति श्रुतेः कव्यवाड्गुणविशिष्टोऽनलः पितृणामन्तर्गत इति कव्यवाडनल एकैव देवता । **यमांश्चैके**—एके आचार्याः यमांश्च तर्पयेदित्याहुः । तद्यथा—यमाय धर्मराजायेत्येवमादिनोक्तान् । पितृतर्पणेऽञ्जलिसंख्यामाह—**एकैकस्य तिलैर्मिश्रान् त्रींस्त्रीन्दद्याज्जलाञ्जलीन् । यावज्जीवकृतं पापं तत्क्षणादेव नश्यति** । एकैकस्य प्रत्येकं कव्यवाडनलादेः तिलैः कृष्णैः मिश्रान् संयुक्तान् त्रींस्त्रीन् त्रित्वसंख्योपेतान् जलाञ्जलीन् जलेन पूर्णा अञ्जलयो जलाञ्जलयस्तान् । अस्य तर्पणस्य नित्यत्वेऽप्यानुषङ्गिकं फलमाह—यावज्जीवकृतं जन्मत आरभ्य यावत्तर्पणदिनं कृतम् आचरितं पापम् अशुभं कर्म तत्क्षणादेव तर्पणसमनन्तरमेव नश्यति क्षीयते । **जीवत्पितृकोऽप्येतानन्यांश्चेतरः**—जीवन् विद्यमानः पिता जनको यस्य सोऽपि एतान् पूर्वोक्तान्ब्रह्मादीन् चित्रगुप्तान्तान् तर्पयेदिति गतेन सम्बन्धः । इतरः जीवत्पितृकादन्यो मृतपितृकः अन्यान् एतेभ्योऽपरान् पित्रादीन् चकारादेतान् ब्रह्मादींस्तर्पयेत् । तर्पणवाक्यानि प्रयोगे वक्ष्यन्ते । तत्र पितृपितामहप्रपितामहान् तर्पयित्वा प्रसेकाख्यं कर्म कुर्यादित्याह—**उदीरतामाङ्गिरस आयन्तु न ऊर्ज्जं वहन्ती पितृभ्यो ये चेह मधुव्वाता इति त्र्यृचं जपन् प्रसिञ्चेत्**—उदीरतामित्यादिप्रतीकोक्ताः

---

1 **उदीरताम् अङ्गिरसोन आयन्तु न** इति तृचं शङ्खदृष्टं त्रैष्टुभं पितृदैवतं यजमानवाचने विनियुक्तम्, **ऊर्ज्जं वहन्तीति** प्रजापतिदृष्टं विराट्छन्दस्कमापं सिंचने विनियुक्तम्, **पितृभ्य** इति प्रजापत्यश्विसरस्वतीभिर्दृष्टं तत्र पितृभ्यः यजुस्त्रिष्टुप् पितामहेभ्यः आसुर्यनुष्टुप् प्रपिता सामोष्णिक् अक्षन् देवीपङ्क्तिः **अमीमदन्त अतीतृपन्त** यजुरनुष्टुभौ पितरः यजुर्गायत्री, सुराग्रहशेषहोमे अङ्गारोपसेचने जपे च वि० । **ये चेहेति** प्रजापत्यश्विसरस्वतीभिर्दृष्टं त्रिष्टु० पि दे०श्राद्धभोजने जपे वि० । **मधुव्वातेति** त्र्यृचं वैश्वदेवं गायत्री छं० गोतमदृष्टं दधिमधुघृतैः कूर्माञ्जने विनियुक्तम् ॥

षडृचः, **मधुव्वाता** इति त्र्यृचः, एवं नवर्चौ जपन् उपांशु आम्नायस्वरेण पठन् प्रसिञ्चेत्, अञ्जलिगृहीता अपः पितृतीर्थेन तर्पणजलाधिकरणे प्रक्षिपेत् । **तृप्यध्वमिति त्रिः**—तथा तृप्यध्वमिति प्रसेकमुक्त्वा त्रिः प्रसिञ्चेत् । अत्र केचिदुदीरतामित्यादिकानामृचां पित्रादितर्पणे अञ्जलिदानकरणत्व मन्यन्ते । तदसाम्प्रतम् । सूत्रार्थपर्यालोचनेन करणताया अप्रतीतेः, कथं जपन् प्रसिञ्चेदित्यत्र जपन्निति शतृप्रत्ययेन मन्त्रान् जपता सता सततं जलप्रसेकः कार्य इति हि सूत्रार्थः प्रतीयते । करणत्वे तु मन्त्रान्तैः कर्मान्तः सन्निपात्यः इति परिभाषया मन्त्रे समाप्तेऽञ्जलिर्देयः, तथाच सति जपशब्दस्य शतृप्रत्ययस्य वाऽऽनर्थक्यप्रसङ्गः प्रत्येकशब्दस्य दानार्थताकल्पना च, तस्मात्प्रसेकाख्यमिदं कर्मान्तरम् । तथाच **योगियाज्ञवल्क्यः**—“ पितॄन् ध्यायन्प्रसिञ्चेद्वै जपन्मन्त्रान् यथाक्रमम्” इति । [1]**नमो व इत्युक्त्वा मातामहानां चैवं गुरुशिष्यर्त्विग्ज्ञातिबान्धवान्**—नमो वः पितरो रसायेत्यादीन्यष्टौ यजूंषि उक्त्वा पठित्वा मातामहानां मातुः पितृपितामहप्रपितामहानां च एवं एकैकस्य तिलैर्मिश्रमञ्जलित्रयेण तर्पणं कृत्वा गुर्वादयोऽपि एकैकाञ्जलिना तर्प्याः । तत्र गुरुम् आचार्यमुपनयनपूर्वकवेदाध्यापकम् । **मनुः**—“उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । साङ्गं च सरहस्यं च तमाचार्यं प्रचक्षते ॥” इति । ऋत्विजो याजकान् ज्ञातीन् पितृव्यभ्रात्रादिसपिण्डसगोत्रान् बान्धवान् मातुलेयपैतृष्वसेयमातृष्वसेयादीन् । **अतर्पिता देहाद्रुधिरं पिबन्ति**—एते पूर्वोक्ता ब्रह्मादयः अतर्पिताः सन्तः देहात् अतर्पयितुः शरीरात् रुधिरं पिबन्ति तर्पणाकरणजप्रत्यवायात् देहस्य रुधिरशोषणं भवतीत्यर्थः । एतदनिष्टापत्तिवचनं तर्पणस्यावश्यकरणीयत्वज्ञापनार्थम् । **वासो निष्पीड्याचम्य**—**बृहत्पराशरः**—“निष्पीडयेत्स्नानवस्त्रं तिलदर्भसमन्वितम् । न पूर्वं तर्पणाद्वस्त्रं नैवाम्भसि न पादयोः ॥” इति, स्नानवासो निष्पीड्य आचम्य पूर्ववत् । एवं तर्पणं विधाय तदन्ते स्थले वासो निष्पीड्याचम्य । “निष्पीडयति यः पूर्वं स्नानवस्त्रमतर्पिते । निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम् ॥ द्वादश्यां पञ्चदश्यां च संक्रान्तौ श्राद्धवासरे । वस्त्रं निष्पीडयेन्नैव न च क्षारेण योजयेत् ॥” एतत्तु तर्पणं प्रातःस्नानानन्तरं प्रातः कार्यम् । तदा न कृतं चेन्मध्याह्नस्नानानन्तरं कार्यम् । मध्याह्ने मन्त्रस्नानं न कृतं चेत् तदाऽपराह्णादिषु स्नानं कृत्वा कुर्यात् । “ पूर्वाह्णो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितृणाम्” इति **श्रुतिस्त**र्पणातिरिक्तविषया । प्रातश्चेत्कृतं तर्पणं मध्याह्नादिषु न कर्तव्यमेव । स्नानाङ्गतर्पणं तु वैधस्नानानतरं कार्यम् । देवतापूजामाह—**ब्राह्मवैष्णवरौद्रसावित्रमैत्रवारुणैस्तल्लिङ्गैरर्चयेत्**—ब्राह्मश्च वैष्णवश्च रौद्रश्च सावित्रश्च मैत्रश्च वारुणश्च ब्राह्मवैष्णवरौद्रसावित्रमैत्रवारुणास्ते तथा । कीदृशैस्तल्लिङ्गैः तेषां ब्रह्मादीनां लिङ्गं प्रकाशनसमर्थं पदं येषु ते तल्लिङ्गाः तैस्तल्लिङ्गैः । ननु ब्राह्मेत्यादिना देवतातद्धितेन तल्लिङ्गत्वे प्राप्ते पुनस्तल्लिङ्गैरिति किमर्थम् । उच्यते, श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याभिर्मन्त्राद्यङ्गविनियोगो भवति सर्वत्र, अत्र तु लिङ्गमेव विनियोजकं येषां ते ग्राह्या इत्यर्थकम् । तल्लिङ्गैरिति मन्त्रैरर्चयेत् ब्रह्मविष्णुरुद्रसवितृमित्रवरुणान् पृथक् पूजयेत् आवाहनादिभिरुपचारैः । **अद्दश्रꣳहꣳस इत्युपस्थाय प्रदक्षिणीकृत्य दिशश्च देवताश्च नमस्कृत्योपविश्य ब्रह्माग्निपृथिव्योषधिवाग्वाचस्पतिविष्णुमहद्भ्योऽद्भ्योऽपाम्पतये वरुणाय नम इति सर्वत्र संवर्चसेति मुखं विमृष्टे देवा गातु विद इति विसर्जयेत्**—अद्दश्रमस्यकेतव इति, हꣳसः शुचिषदित्येताभ्यामृग्भ्यामादित्यं भगवन्तं विवस्वन्तमुपस्थाय प्रदक्षिणमावृत्य दिशः प्राच्याद्या देवताश्च सन्निधानाद्दिशामधिष्ठात्रीरिन्द्राद्या नमस्कृत्य मन्त्राणामनभिधानान्नाममन्त्रैर्नमो-

---

[1] **नमो व** इति प्रजापतिर्ऋषिः, लिङ्गोक्ता देवता, आद्यानां पञ्चानां नवाक्षराणां यजुर्बृहती आसुरी जगती वा, षष्ठस्य एकविंशत्यक्षरा ऋगुष्णिक् अञ्जलिकरणे विनियोगः ॥

योगाच्चतुर्थ्यन्तैः प्रणम्य उपविश्य आसित्वा ब्रह्मादिवरुणान्तेभ्यो देवेभ्यो नमस्कृत्य **योगियाज्ञवल्क्य**वचनादुदकदानसहितं **संवर्चसे**ति मन्त्रेणाञ्जलिना जलमादाय मुखमास्यं विमृष्टे शोधयाति, **देवा गातु विद्** इति मन्त्रेण स्नानादिकर्माङ्गभूता देवता विसर्जयेत् स्वस्थानं गमयेत् । **एष स्नानविधिरेष स्नानविधिः**–अत्राचार्यो माध्याह्निकक्रियाङ्गस्नानेतिकर्तव्यतामभिधाय इदानीमेष स्नानविधिरित्यनेन स्नानान्तरेऽपि मलापकर्षणाशुचिस्पर्शनादिनैमित्तिकस्नानव्यतिरिक्ते एष एव विधिरितिकर्तव्यतेत्यतिदिशति, स च नद्यादौ जलाशये वा । यथाऽऽह–**कात्यायनः छन्दोगपरिशिष्टे**–" यथाऽहनि तथा प्रातर्नित्यं स्नायादनातुरः । दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत् " इति । अत्र माध्याह्निकस्नानविधिं प्रातःस्नानेऽतिदिशन्नद्यादौ निगमयति–" गेहे चेत्तदमन्त्रवत् " इति जलाशयादन्यत्र स्नाने मन्त्रनिवृत्तिं प्रतिपादयति । अतो यदि गृहे उद्धृतोदकेन उष्णेन वा स्नाति तदा न कश्चिद्विधिः "अमन्त्रवत्" इति वचनात् । मन्त्रोऽस्यास्तीति मन्त्रवत् मन्त्रसहितं, न मन्त्रवत् अमन्त्रवत् । अथवा अमन्त्रो मन्त्राभाववान् शूद्रो यथा तूष्णीं स्नाति तद्वत्स्नायादित्यर्थः । तद्यथा–शुचौ देशे उपविष्टः पादौ करौ मृज्जलैः प्रक्षाल्य कुशपवित्रोपग्रह आचम्यादित्याभिमुखस्ताम्रादिप्रशस्तपात्रस्थं प्रशस्तं जलं गङ्गादितीर्थजलबुद्ध्या आदाय पादादिस्वाशिरःप्रभृतिबाहिः सर्वाङ्गेच स्नायात् आवश्यकसन्ध्योपासनाग्निहोमादिकर्मानुष्ठानाधिकारार्थम् । यतः स्मरन्ति–"स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि । पवित्राणां तथा जप्ये दाने च विधिचोदिते ॥" इदं वारुणं स्नानं मुख्यम्, अस्यासम्भवे **प्रशस्तभस्मना** सर्वाङ्गोद्धूलनमाग्नेयम् । गवां खुरोत्खातरजसा शरीरेण ग्रहणं वायव्यम् । **अपो हि ष्ठा** दिभि **र्द्रुपदादिव शं नो देवीरिदमापः प्रवहत**त्येतल्लिङ्गैर्मन्त्रैः प्रतिमन्त्रं कुशाग्रेण मूर्धनि जलाभिषेको मान्त्रम् । आर्द्रेण वाससा सर्वशरीरमार्जनं कापिलम् । **आपो हि ष्ठे**ति ब्राह्मम् । मृदालम्भनं पार्थिवम् । अद्भिरांतपवर्षाभिर्दिव्यं स्नानम् । सच्चिदानन्दघनात्मकजगत्कारणविश्वव्यापकवासुदेवस्मरणं मानसम् । दक्षिणावर्त्तशङ्खेन ताम्रपात्रगतोदकस्य शिरसा प्रतिग्रहः, **अपरार्कोक्ते**श्च विष्णुप्रतिमाशालग्रामशिलास्नानोदकेन च शिरोऽभिषिञ्चनमित्येतेषां स्नानानुकल्पानामन्यतमेन नित्यकर्मानुष्ठानाधिकारसम्पत्तये शुचौ देश उपविश्य मृदम्भोभिः पादौ पाणी च प्रक्षाल्य कुशोपग्रहपवित्रपाणिराचम्य सूर्याभिमुखः स्नायात् । एते च स्नानानुकल्पाः सर्ववर्णाश्रमाणां, सर्ववेदशाखाध्यायिनां च मन्त्रस्नानं विहाय साधारणाः । प्रातःस्नानं नित्यम् । चाण्डालशवयूपरजस्वलाः स्पृष्ट्वा स्नानार्हाः स्नान्ति तन्नैमित्तिकं स्नानम् । दैवज्ञविधिचोदितं पुष्पस्नानादिकं काम्यम् । जपयज्ञदेवपितृपूजनार्थं नद्यादितीर्थेषु यत्स्नानं तत् क्रियाऽङ्गम् । अभ्यङ्गपूर्वकमलापकर्षणं देवखातादितीर्थेषु च स्नानं क्रियास्नानम् । **कात्यायनोक्त**स्नानविधिस्तु **काण्वमाध्यन्दिनानां** नियतः, इतरेषां चानुक्तस्नानविधिविशेषाणां बह्वृचानां **मत्स्यपुराणा**दिविहितेन स्नानविधिना विकल्पितो बोद्धव्यः । एवं च सति यथोक्तविधिस्नानमालस्यादिना अकुर्वतो न कर्माधिकारः । न च फलवतः क्रियास्नानादेः फलावाप्तिः, प्रत्युत विहिताकरणात्प्रत्यवायसम्भवो गृहस्थस्यैव, यतेश्च तद्धर्मविधौ द्रष्टव्यः । ब्रह्मचारिणो **याज्ञवल्क्येनोक्ता** यथा–"स्नानमब्दैवतै र्मन्त्रैः" इति । "अत्र एष स्नानविधिः" इति वचनात् "यथाऽहनि तथा प्रातः" इति वचनाच्च प्रातःस्नानेऽप्यस्य विधेः प्राप्तौ **छन्दोगपरिशिष्टे** विशेषः–"अल्पत्वाद्धोमकालस्य महत्वात्स्नानकर्मणः । प्रातर्न तनुयात्स्नानं होमलोपो विगर्हितः" इति । ततश्च साग्निः पादप्रक्षालनादिगोमयाविलेपनान्तं विधाय **मुञ्चन्तु मे**ति आभिषिच्य निमज्ज्याचम्य दर्भैः प्रणवव्याहृतिगायत्रीभिः प्रतिमन्त्रं पावयित्वा **मुञ्चन्तु मे**ति पुनराभिषिच्यान्तर्जलेऽघमर्षणादीनामन्यतममावर्त्त्याचम्य निर्गच्छेत् । निरग्निस्तु कृत्स्नमनुतिष्ठेत् । सङ्कोचनिमित्तस्य होमस्याभावात् । जटिनः शिरोरोगिणश्चाकण्ठमज्जनं स्नानम् । सभर्तृकयोषितां च । ग्रहणादिनिमित्तं

गङ्गादितीर्थसंक्रान्त्यादिपर्वनिमित्तं च फलप्रदं जटयादीनामपि सशिरस्कमेव । स्त्रीशूद्राणां सर्वत्र तूष्णीम् । यथाऽऽह–**योगियाज्ञवल्क्यः**-"ब्राह्मणक्षत्त्रियविशां स्नानं मन्त्रवदिष्यते । तूष्णीमेव तु शूद्रस्य सनमस्कारकं स्मृतम् ॥" **बौधायनश्च**–"अम्भोऽवगाहनं स्नानं विहितं सार्ववर्णिकम् । मन्त्रवत्प्रोक्षणं वाऽपि द्विजादीनां विशिष्यते" इति । नमस्कारश्च नमो नारायणायेति ॥ इति श्रीअग्निहोत्रिहरिहरविरचितं कात्यायनस्नानविधिसूत्रविवरणं समाप्तम् ॥ ३ ॥ ॥ * ॥

अथ **प्रयोगः**। एवं ब्रह्मयज्ञं विधाय तान्दर्भानुत्तरतो निरस्याचम्य यज्ञोपवीती प्राङ्मुखस्त्रीन्दर्भान् प्रागग्रान्दक्षिणपाणिनाऽऽदाय **विश्वेदेवास आगतेति** गृत्समददृष्टया, वैश्वदेव्या, गायत्र्या, वैश्वदेवग्रहणे विनियुक्तया देवानावाह्य **विश्वेदेवाः** शृणुतेममित्येतां सुहोत्रदृष्टां वैश्वदेवीं, त्रिष्टुभं, सर्वमेधे वैश्वदेवग्रहणे विनियुक्तां जपित्वा सव्यकरान्वारब्धसकुशदक्षिणकरेणापो गृहीत्वा ॐ ब्रह्मा तृप्यतामित्यभिधाय जलमध्ये करस्था अपः प्रक्षिप्य एवं विष्णुस्तृप्यताम्, रुद्रस्तृप्यताम्, प्रजापतिस्तृप्यताम्, देवास्तृप्यन्ताम्, छन्दाꣳसि तृ०, वेदास्तृ०, ऋषयस्तृ०, पुराणाचार्यास्तृ०, गन्धर्वास्तृ०, इतराचार्यास्तृ०, संवत्सरः सावयवस्तृ०, देव्यस्तृ०, अप्सरसस्तृ०, देवानुगास्तृ०, नागास्तृ०, सागरास्तृ०, पर्वतास्तृ०, सरितस्तृ०, मनुष्यास्तृ०, यक्षास्तृ०, रक्षाꣳसि तृ०, पिशाचास्तृ०, सुपर्णास्तृ०, भूतानि तृ०, पशवस्तृ०, वनस्पतयस्तृ०, ओषधयस्तृ०, भूतग्रामश्चतुर्विधस्तृप्यतामिति प्रत्येकमेकैकेनाञ्जलिना तर्पयित्वा उत्तराभिमुखो निवीती अञ्जलौ तिरश्चः कुशान् कृत्वा अञ्जलिनाऽपो गृहीत्वा ॐ सनकस्तृप्यतामित्यभिधाय प्रजापतितीर्थेन जलाञ्जलिं जले दत्त्वा पुनरेवं द्वितीयमञ्जलिं दत्त्वा सनन्दनस्तृ०, सनातनस्तृ०, कपिलस्तृ०, आसुरिस्तृ०, वोढुस्तृ०, पञ्चशिखस्तृ० । एवं द्वौ द्वावञ्जली एकैकस्मै दत्त्वा दक्षिणामुखः प्राचीनावीती सव्यं जान्वाच्य तानेव दर्भान्मध्ये भुग्नान् सव्याङ्गुष्ठेन तिलानादाय दक्षिणे पाणौ गृहीत्वा द्विगुणीकृत्य सव्यकरे धृत्वा पितृतीर्थेनाद्भिरञ्जलिं प्रपूर्य ॐ कव्यवाडनलस्तृप्यतामित्यभिधाय त्रीनञ्जलीन् दक्षिणे दद्यात् । एवं सोमस्तृ०, यमस्तृ०, अर्यमा तृ०, अग्निष्वात्ताः पितरस्तृप्यन्ताम्, सोमपाः पितरस्तृ०, बर्हिषदः पितरस्तृ०, ॐ यमाय नमः, धर्मराजाय०, मृत्यवे०, अन्तकाय०, वैवस्वताय०, कालाय०, सर्वभूतक्षयाय०, औदुम्बराय०, दध्नाय०, नीलाय०, परमेष्ठिने०, वृकोदराय०, चित्राय०, चित्रगुप्ताय नम इति प्रतिदैवतं त्रीँस्त्रीनञ्जलीन् दद्यात् । अमुकगोत्रः अस्मत्पिता अमुकशर्मा तृप्यतामिदं जलं तस्मै स्वधा नम इत्येकमञ्जलिं दत्त्वा एवमपरमञ्जलिद्वयं पित्रे दद्यात् । ततोऽमुकगोत्रः अस्मत्पितामहः अमुकशर्मा तृप्यतामिदं जलं तस्मै स्वधा नमः, एवमपरमञ्जलिद्वयं पितामहाय दत्त्वा, अमुकगोत्रः अस्मत्प्रपितामहः अमुकशर्मा तृप्यतामिदं जलं तस्मै स्वधा नमः, एवमपरमञ्जलिद्वयं प्रपितामहाय दत्त्वा,* अमुकगोत्रः अस्मन्मातामहः अमुकशर्मा तृप्यतामिदं जलं तस्मै स्वधा नमः, एवमपरमञ्जलिद्वयं मातामहाय दत्त्वा प्रमातामहाय वृद्धप्रमातामहाय च तथैव त्रीँस्त्रीनञ्जलीन् दत्त्वा, अमुकगोत्रा अस्मन्माता अमुकदेविदा तृप्यतामिदं जलं तस्यै स्वधा नम इत्येकमञ्जलिं मात्रे दत्त्वा पुनरञ्जलिद्वयं दद्यात् । पितामहीप्रपितामहीभ्यामेकैकमञ्जलिं दत्त्वा पुनरञ्जलिद्वयं दद्यात् । पितृव्यतत्पत्नीभ्रातृतत्पत्नीभगिनीमातुलमातुलानीपितृष्वसृपैतृष्वस्रीयमातृष्वसृमातृष्वस्रीयमातुलेयादिपितृमातृसपिण्डेभ्य एकैकमञ्जलिं दत्त्वा समानोदकसगोत्राचार्यश्वशुरर्त्विक्शिष्ययाज्यादिभ्य। सवर्णेभ्य एकैकमञ्जलिं दद्यात् । "एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः । अर्हन्ति पितरस्त्रीँस्त्रीन्

---

* अत्र प्रपितामहाञ्जलिदानानन्तरं मातृवर्गं विहाय मातामहादित्रिकस्याञ्जलिदानप्रदर्शनं भ्रमविजृम्भितम् "पित्रादित्रयपत्नीनां पृथग्देयं ततो जलम् । ततो मातामहानां च क्रम एष हि तर्पणे ॥" इति मरीचिप्रदर्शितक्रमविरुद्धत्वात् "अन्तर्मातामहान् कृत्वा मातॄणां यः प्रयच्छति । तर्पणं पिण्डदानं च नरकं स तु गच्छति ॥" इति संस्कारगणपतौ गोपीनाथीयस्मृतौ नागदेवकृताचारदीपे च प्रत्यवायदर्शनात्, ताताम्बात्रितयमित्यादिस्वतोवक्ष्यमाणतर्पणादिक्रमविधायकसुप्रसिद्धवचनविरोधात्, शिष्टाचारविरोधाच्च । तस्मात् मातृतर्पणप्रसेकाद्यनन्तरमेव मातामहादितर्पणमिति ॥

स्त्रियश्चैकैकमञ्जलिम् ॥" इत्यत्र स्त्रीपदं मात्रादित्रयेतरपरमित्यवगम्यते । यतो **नागदेवाचारप्रदीपे** शालङ्कायनः । "मातृमुख्याश्च यास्तिस्रस्तासां दद्याज्जलाञ्जलीन् । तिस्त्रीश्चैव ततश्चान्यास्तासामेकैकमञ्जलिम् ॥" पुनस्तत्रैव–" माता पितामही चैव तथैव प्रपितामही । एतासां पितृवद्द्याच्छेषास्त्वेकैकमञ्जलिम् ॥ येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः । ते तृप्तिमखिलां यान्तु यश्चास्मत्तोऽभिवाञ्छति ॥ " इति मन्त्रेण भूमावेकमञ्जलिं प्रक्षिप्य " ये चास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः । ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥ " इति मन्त्रेण स्नानवस्त्रं भूमौ निष्पीड्य यज्ञोपवीती भूत्वा तर्पणार्थकुशान् परित्यज्याचम्य जले ब्रह्मादिदेवानावाह्य यथासम्भवमुपचारैर्ब्रह्मविष्णुरुद्रसवितृमित्रवरुणान् तत्तल्लिङ्गैर्मन्त्रैरर्चयेत् । तद्यथा–**ब्रह्मजज्ञानं प्रथमं पुरस्तादि**त्येतयर्चा प्रजापतिदृष्टया, त्रिष्टुभा, ब्रह्मदेवतया, रुक्मोपधाने विनियुक्तया ब्रह्माणमावाहनाद्युपचारैरभ्यर्च्य, **इदं विष्णुरि**ति मेधातिथिदृष्टया, गायत्र्या, विष्णुदेवतया, सोमयागे पत्नीपाणौ हविर्धानाञ्जलार्थाज्यसंस्रवानयने विनियुक्तया विष्णुमभ्यर्च्य, **नमस्ते रुद्र मन्यव** इति परमेष्ठिदृष्टया गायत्र्या, ऐकरौद्र्या, शतरुद्रियहोमकर्माणि जर्तिलहवने विनियुक्तया रुद्रमभ्यर्च्य, **तत्सवितुरि**ति विश्वामित्रदृष्टया, गायत्र्या, सवितृदेवतयाऽग्निहोत्रे गार्हपत्योपस्थाने विनियुक्तया सवितारमभ्यर्च्य, **मित्रस्य चर्षणीधृत** इति विश्वामित्रदृष्टया, गायत्र्या, मित्रदेवतया, पच्यमानोखायाः श्रपणप्रक्षेपणे विनियुक्तया मित्रमभ्यर्च्य, **इमं मे वरुणे**ति शुनःशेपदृष्टया, गायत्र्या, वारुण्या, सौत्रामण्यां विनियुक्तया वरुणमर्चयित्वोत्थाय, **अदृश्रमस्य केतव** इति प्रस्कण्वसूर्यदृष्टया, सौर्या, गायत्र्या, सूर्यातिग्राह्यग्रहणे विनियुक्तया, **हꣳसः शुचिषदि**ति वामदेवदृष्टयाऽतिजगत्या, सौर्या, राजसूये रथारूढस्य यजमानस्यावरोहणे विनियुक्तया च सूर्यमुपस्थाय प्रदक्षिणमावृत्य, प्राच्यै दिशे नमः इति प्राचीं दिशं नमस्कृत्य तद्दिग्देवतामिन्द्राय नम इति प्रणम्य, आग्नेय्यै दिशे नमः, अग्नये नमः, दक्षिणायै दिशे नमः, यमाय नमः, नैर्ऋत्यै दिशे नमः, निर्ऋतये नमः, प्रतीच्यै दिशे नमः, वरुणाय नमः, वायव्यै दिशे नमः, वायवे नमः, उदीच्यै दिशे नमः, सोमाय नमः, ईशान्यै दिशे नमः, ईशानाय नमः, ऊर्ध्वायै दिशे नमः, ब्रह्मणे नमः, अधरायै दिशे नमः, अनन्ताय नमः । इति दिशो देवताश्च नमस्कृत्योपविश्य, ॐ ब्रह्मणे नमः, अग्नये नमः, पृथिव्यै नमः, ओषधीभ्यो नमः, वाचे नमः, वाचस्पतये नमः, विष्णवे नमः, महद्भ्यो नमः, अद्भ्यो नमः, अपांपतये नमः, वरुणाय नमः इत्येकैकस्मै जलाञ्जलिं दत्त्वा, **संवर्चसा पयसा सन्तनूभिरि**ति परमेष्ठिप्रजापतिदृष्टया, त्रिष्टुभा, त्वष्टृदेवतया, दर्शपूर्णमासयागे पूर्णपात्रस्थजलप्रतिग्रहे विनियुक्तया अञ्जलिनाऽपो गृहीत्वा मुखं विमृश्य, **देवा गातु विद** इति मनसस्पतिदृष्टया, वातदेवतया, विराट्छन्दस्कया, समिष्टयजुर्होमे विनियुक्तया स्नानादिकर्माङ्गदेवता विसर्जयेत् ॥ इति **माध्याह्निकस्नानकर्मपद्धतिः** ॥

अथ **प्रातराह्निकम्**–तत्र ब्राह्मे मुहूर्ते प्रबुद्ध्य आत्मस्वास्थ्यं विचिन्त्योत्थाय द्विराचम्य ततः सोपानत्कः सकमण्डलुर्नैर्ऋतीं दिशं गत्वा अयज्ञियैस्तृणैरफालकृष्टां भूमिमन्तर्धाय दिवासन्ध्ययोश्चोदङ्मुखो रात्रौ दक्षिणामुखो दक्षिणकर्णकृतोपवीतो मूत्रपुरीषोत्सर्गं विधाय गृहीतमेहन उत्थाय स्थानान्तरे उपविश्य अर्द्धप्रसृतिमात्रां मृदं सव्येन पाणिनाऽऽदाय पाणौ निधाय जलेन प्रक्षाल्य, दशकृत्वो मृज्जलैर्वामपाणिं प्रक्षाल्य सप्तभिर्दक्षिणं च, एकया मृदा शिश्नं, त्रिर्वामं द्विर्दक्षिणं पाणिं प्रक्षाल्योत्थाय बद्धकक्षः शुचौ देशे प्राङ्मुखो वोदङ्मुखो वोपविश्य मृज्जलैस्त्रिः पादौ करौ च प्रक्षाल्य त्रिरपोऽविकृताः फेनादिरहिता वीक्षिता ब्राह्मतीर्थेनाचम्य खानि चाद्भिरुपस्पृश्य यथोक्तदन्तधावनविधिं विधाय गृहमागत्य स्नानोपकरणान्यादाय नद्यादिजलाशयं गत्वा उक्तविधिना स्नात्वा वासःपरि-

धानाचमनानन्तरं पूर्ववत्प्राणायामत्रयं कृत्वा सूर्यश्च[1] मेति नारायण ऋषिः, सूर्यो देवता, गायत्र्युपरिष्टाद्बृहतीच्छन्दः आचमने विनियोगः, इत्यभिधाय "सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किञ्च[2] दुरितं मयि इदमहं मामृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा" इति मन्त्रेण सकृदाचम्य स्मार्तमाचमनं कृत्वा एवं पूर्ववद्गायत्रीजपान्तं कृत्वा प्रदक्षिणमावृत्त्य भगवन्तं सवितारं नमस्कृत्योपविश्य देवा गातु विद इति विसर्जयेत् । सायंसन्ध्यायां तु प्राणायामान्ते अग्निश्चमेति नारायण ऋषिः, गायत्र्युपरिष्टाद्बृहती च्छन्दः, अग्निर्देवता आचमने विनियोगः, इत्युक्त्वा "अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु यत्किञ्च दुरितं मयि इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा' इति मन्त्रेणाचम्य मार्जनाद्यघमर्षणान्ते सोदकाञ्जलिरुत्थाय प्रत्यङ्मुखोऽञ्जलिं प्रक्षिप्य प्राञ्जलिः पूर्ववदुपविश्य यावन्नक्षत्रोदयं गायत्रीं जपित्वोत्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविश्य देवा गातु विद इति विसर्जयेत् । "ताताम्बात्रितयं सपत्नजननी मातामहादित्रयं सस्त्रि स्त्री तनयादि तातजननीस्वभ्रातरः सस्त्रियः । तातम्बात्मभगिन्यपत्यधवयुक् जायापिता सद्गुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे" ॥ ३ ॥

इति श्रीमिश्राग्निहोत्रिहरिहरकृतौ कात्यायनोक्तस्नानविधिसूत्रव्याख्यानपूर्विका स्नानपद्धतिः समाप्ता

---

[1] सूर्यश्च मेत्यनुवाकमन्त्राणां या० उप० सूर्यमन्युमन्युपतयोऽहश्च देवताः रक्षन्तामित्यन्तो मन्त्रो गायत्री दुरितं मयीत्यन्तः पङ्क्तिः, अवशिष्टमन्त्रो विराट् एकं यजुर्वा उदकपाने वि० अग्निश्च मेत्यनुवाकमन्त्राणां पूर्ववत् इति संस्काररत्नमालायाम् । [2] यत्किञ्चिदित्याचारादर्शकाशीखण्डटीकयोः ।

अथ श्राद्धसूत्रम् ।

अपरपक्षे श्राद्धं कुर्वीतोर्द्ध्वं वा चतुर्थ्या यदहः सम्पद्येत तदहर्ब्राह्मणानामन्त्र्य पूर्वेद्युर्वा स्नातकानेके यतीन् गृहस्थान् साधून्वा श्रोत्रियान् वृद्धाननवद्यान्स्वकर्मस्थानभावेऽपि शिष्यान्स्वाचारान् द्विर्नग्नशुक्लविक्लिधश्यावदन्तविद्धप्रजननव्याधितव्यङ्गिश्वित्रिकुष्ठिकुनखिवर्जमनिन्द्येनामन्त्रितो नापक्रामेदामन्त्रितो वाऽन्यदन्नं न प्रतिगृह्णीयात्स्नाताञ्छुचीनाचान्तान्प्राङ्मुखानुपवेश्य दैवे युग्मानयुग्मान्यथाशक्ति पित्र्य एकैकस्योदङ्मुखान्द्वौ वा दैवे त्रीन् पित्र्य एकैकमुभयत्र वा मातामहानां चैवं तन्त्रं वा वैश्वदेविकम् । श्रद्धान्वितः श्राद्धं कुर्वीत शाकेनापि नापरपक्षमतिक्रामेन्मासि मासि वोऽशनमिति श्रुतेस्तदहः शुचिरक्रोधनोऽत्वरितोऽप्रमत्तः सत्यवादी स्यादध्वमैथुनश्रमस्वाध्यायान्वर्जयेदावाहनादि वाग्यत उपस्पर्शनादामन्त्रिताश्चैवम् ॥ १ ॥ * ॥

कर्कोपाध्यायकृतं श्राद्धसूत्रव्याख्यानम् ।

कात्यायनमुनिप्रोक्तश्राद्धसूत्रविनिर्णयम् । कर्त्तुं कर्कः समाक्रामन्नत्वा सर्वज्ञमच्युतम् । १ ।

श्रौतकर्मानन्तरं स्मार्त्तान्यावसथ्यादीन्यनुविहितानि तत्र श्राद्धमनुक्तं तद्वक्तव्यमित्यत आह—अपरपक्ष श्राद्धं कुर्वीत—श्राद्धमिति कर्मणो नामधेयं द्रव्यगुणादावप्रसिद्धेः। तच्च समुदायस्य सन्निधानाविशेषात् राजसूयवत् । स्मृतश्च श्राद्धमनेन भुक्तमिति । पिण्डदानप्राधान्ये हि भुज्यर्थानुपपत्तिः। कार्यत्वाविशेषाच्च । तस्मात्समुदायनामधेयमिति । एवम्प्राप्त उच्यते । पिण्डदानस्यैव श्राद्धमिति नामधेयं प्रवृत्तेस्तादर्थ्यात् । तत्कुतः स्मृतेः । "अपि नः स कुले भूयाद्यो नो दद्यात्त्रयोदशीम् । पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु च" इति, प्रार्थना पिण्डदानविषयैषा । तत्र हि तेषां देवतात्वमसावेतत्तेऽन्नमिति मन्त्रवर्णाल्लिङ्गाच्च "पिण्डपितृयज्ञवदुपचारः" इति वचनात्तत्प्राप्तेः । न भोजनस्य तदर्थता तस्य साक्षाद्ब्राह्मणाभिसम्बन्धात् । पित्रर्थत्वे च प्रमाणाभावात्, स्मृत्यन्तराच्च । "सहपिण्डक्रियायां तु कृतायामस्य धर्मतः । अनयैवावृता कार्यं पिण्डनिर्वपणं सुतैः" इति पिण्डनिर्वपणस्यैवेतिकर्तव्यतां दर्शयति, न ब्राह्मभोजनादेः । तथा च स्मृत्यन्तरेऽप्युक्तम्—"स एव दद्याद् द्वौ पिण्डौ पित्रे मातामहाय च" इति। सूत्रकारप्रस्थानाच्च। "मासि मासि वोऽशनम्" इति श्रुतेः । अन्वर्थसञ्ज्ञाकरणाच्चैकोद्दिष्टमिति । सर्वप्राधान्ये हि नैक उद्दिश्यते । आभ्युदयिके च तथा दर्शनात् । "पितॄणां रूपमास्थाय देवा अन्नमदन्ति तत्" इति । न च पितॄणामदनं सम्भवति । तस्मादनेन प्रकारेण पितृरूपेण देवानां देवतात्वमुच्यते । तच्च देवतात्वं पिण्डदानकाले सम्भवति, न भोजन इत्युक्तम् । तथा—"अनिष्ट्वा तु पितॄन् श्राद्धे न कुर्यात्कर्म वैदिकम्" इति । दर्शयति च यथाकथञ्चिद्ब्राह्मणभोजनम्—"यद्येकं भोजयेच्छ्राद्धे" इति "एक एव यदा विप्रः" इति च । ब्राह्मणभोजनासम्भवेऽपि गयादौ पिण्डदानमात्रदर्शनात् । तत् द्वैपायनोऽपि दर्शयतिपिण्डदानकाले पितॄणां हस्तोत्थानम् । "भीष्मस्य ददतः पिण्डान् हस्तोत्थानं तु शन्तनोः" इति । यत्पुनरुक्तं "सन्निधानाविशेषात्" इति । तन्नैवम्, विशेषावगमात् । अवगम्यते हि विशेषः प्राक्प्रतिपादितवाक्येभ्यः सकाशात्, तस्मात्पिण्डदानस्य प्राधान्यं तदङ्गमितरत् । यच्चोक्तं श्राद्धमनेन भुक्त-

मिति तदुपचारवृत्त्या श्राद्धार्थेऽन्ने भुजिर्वर्त्तत इति । यदप्युक्तं कार्यत्वाविशेषात्, तत्रापि करो*तिरविरुद्धः । प्रधानं तु कार्यमङ्गानि चेति । यदप्युच्यते पिण्डपितृयज्ञवदुपचारः पित्र्ये इति, तदपि पितृनिमित्तया गुणवृत्त्या ब्राह्मणा व्यपदिश्यन्ते । तस्मादसमुदायशब्दत्वम् । चिन्तायाः प्रयोजनं पिण्डदानाकरणेऽभ्यावृत्तिः । अपरपक्ष इति कृष्णपक्ष इत्युच्यते । समाचारात् समाचरन्ति हि कृष्णपक्षे श्राद्धमिति । लिङ्गाच्च योऽपक्षीयते स पितर इति । पितृसम्बन्धिकर्मार्हत्वादपरपक्ष उपचारवृत्त्या पितृशब्देनाभिधीयते । कुर्वीतेति कर्त्तव्यतावचनम् । तच्चाग्निमाननग्निमाँश्च करोति, प्रसिद्धेः स्मृत्यन्तराभिप्रायाच्च । "अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् । यो ह्यग्निः स द्विजो विप्रैर्मन्त्रदर्शिभिरुच्यते" इति । तन्न, अग्निमानेव करोति सर्वाङ्गोपसंहारसामर्थ्यात् । कथम्, इतरस्य होमासम्भवात्सर्वाङ्गोपसंहारसामर्थ्यम् । कुत इति चेत् । स्मृत्यन्तरात्—"न पैतृयज्ञियो होमो लौकिकेऽग्नौ विधीयते" इति । स च पिण्डपितृयज्ञवद्धुत्वेत्यभिधीयते । अपि च "दारसंग्रहपूर्वकमावसथ्याधानं तत्पूर्विका च कर्मान्तरेषु प्रवृत्तिः" इति । अतोऽपि नानग्निमतोऽधिकारः । यदुक्तमग्न्यभावे तु विप्रस्येति तदकृतावसथ्याधानाभ्युदयिकविषयम् । या च प्रसिद्धिरुक्ता सा वटयज्ञवदपर्यालोचितप्रसिद्धिरिति । "प्रेतेभ्यो ददाति" इति वचनात् । जीवते च पिण्डदानासम्भवात् । प्रेतपितृकस्य श्राद्धेऽधिकारः । जीवत्पितृकस्याप्येके । यदेतदाह—"ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् । विप्रवद्वाऽपि तं श्राद्धे स्वकं पितरमाशयेत्" इति । विप्रवद्दशनपक्षे द्वयोः पिण्डदानम् । पितरि प्रेते, पितामहे जीवति, पित्रे प्रपितामहाय च पिण्डदानम् । पितामहमपि वा विप्रवद्भोजयेत् । एवं प्रपितामहमपि । यथा चाह—"पिता यस्य तु वृत्तः स्याज्जीवेद्वाऽपि पितामहः । पितुः स नाम सङ्कीर्त्य कीर्तयेत्प्रपितामहम् ॥ पितामहो वा तच्छ्राद्धं भुञ्जीतेत्यब्रवीन्मनुः । कामं वा समनुज्ञातः स्वयमेव समाचरेत्" इति । **ऊर्द्ध्वं वा चतुर्थ्याः**—अपरपक्षे प्रतिपत्प्रभृति चतुर्थ्युत्तरकालं वा । **यदहः सम्पद्येत तदहर्ब्राह्मणानामन्त्र्य पूर्वेद्युर्वा**—निगदव्याख्यातम् । अपरे वर्णयन्ति । न्यायात्तदहरामन्त्रणं प्राप्नोति । प्रधानकालत्वादङ्गानाम् । मैथुनप्रतिषेधान्यथानुपपत्त्या पूर्वेद्युरेवेत्यवगम्यते । तस्मात्पूर्वेद्युरेवेत्यवधार्यते । **स्नातकानेक** इत्येवमादि **कुनखीवर्जमित्येवमन्तं** निगदव्याख्यातम् । **अनिन्द्येनामन्त्रितो नापक्रामेत्**—श्राद्धार्थमनिन्द्येनामन्त्रितो वृतः सन् न नेच्छेत्, किंतर्हि इच्छेदेव । **आमन्त्रितो वाऽन्यदन्नं न प्रतिगृह्णीयात्**—आमश्राद्धं केषांचिदाम्नातं तद्विषयोऽयं प्रतिषेध इति । **स्नाताञ्छुचीनाचान्तान् प्राङ्मुखानुपवेश्य दैवे युग्मान्**—स्नानमाचमनं च स्मृतिप्राप्तमेवानुवदति न कर्माङ्गत्वेन । दैवश्राद्धे युग्मान्यथाशक्ति प्राङ्मुखानुपवेशयेत् । **अयुग्मान् यथाशक्ति पित्र्य एकैकस्योदङ्मुखान्**—पित्र्ये कर्मण्ययुग्मान् यथाशक्ति एकैकस्य पित्रादेरुपवेशयेत् उदङ्मुखान् । **द्वौ वा दैवे त्रीन् पित्र्ये**—अयमपरः पक्षः । द्वौ वा दैवे देवेभ्यो द्वौ । त्रयाणामपि पित्रादीनां सम्बन्धिनः साधारणांस्त्रीनुपवेशयेत् । **एकैकमुभयत्र वा**—तृतीयमेतत् पक्षान्तरम् । दैवे पित्र्ये च एकैकं भोजयेदिति । **मातामहानामप्येवम्**—मातामहानामप्ययमेव न्यायः । तत्र केचित् इममुपदेशं मन्यमानाः पृथक्कृत्य मातामहश्राद्धमिच्छन्ति । यदा मातामहेभ्यो

---

* करोतिपितृविरुद्धः, इति क्व० पा० । करोतिपितृविरुद्धः, इत्यपि क्व० पा० ।

दीयते तदैवमिति । तदयुक्तम् । विशेषानवगमात् । "श्राद्धं कर्त्तव्यम्" इति चोभयोरवगम्यमानत्वात् सूत्रकारप्रस्थानाच्च । "त्रींस्त्रीन्पिण्डानवनेज्य दद्यात्" इति वीप्सा मातामहपिण्डापेक्षया । सा च सहप्रयोग एवोपपद्यते । तथा च मन्त्राम्नातम् । पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो, मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्चेति । तत्र यावन्तो दैवे पित्र्ये च, पितृभ्यो मातामहेभ्योऽपि तावन्त एव । एतदाद्ये पक्षे । तन्त्रं वा वैश्वदेविकम्—विश्वेदेवास्तन्त्रेण वा । य एव पितृभ्यो मातामहेभ्योऽपि त एव । इतरपक्षद्वये च सर्वं तन्त्रेणेति । यथा दैविकास्तथा पितृसम्बन्धिनोऽपि तन्त्राभ्युपगमात् । स चायमन्यः पक्षः । तथाऽन्यदपि ब्राह्मणाभावे "एक एव यदा विप्रो द्वितीयो नोपपद्यते । पितॄणां ब्राह्मणो योज्यो दैवे त्वग्निं नियोजयेत् ॥" तथा--"यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् । अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च ॥ देवतायतने स्थाप्यं ततः श्राद्धं प्रकल्पयेत् । प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे" इति । **श्रद्धान्वितः श्राद्धं कुर्वीत**—नात्र श्रद्धा निमित्तत्वेनोच्यते । यः श्राद्धं कुर्वीत स्वकाले तच्छ्रद्धया । **शाकेनापि नापरपक्षमतिक्रामेन्मासि सासि वोशनमिति श्रुतेः**—कृतावसथ्यस्य संवत्सरे त्रिः श्राद्धनियमः । क्षयाहे आहिताग्नेरमावास्यायाम्, "अपरपक्षे तूभयोर्नियमः" इति यत् तत्स्मृत्यन्तरापेक्षया । इहेदानीं भगवान् कात्यायनः—"शाकेनापि नापरपक्षमतिक्रामेत्" इति प्रत्यपरपक्षं कर्तव्यतामाह—"यतो मासि मासि वोशनम्" इति श्रुतेः । **तदहःशुचिरक्रोधनोऽत्वरितोऽप्रमत्तः सत्यवादी स्यादध्वमैथुनश्रमस्वाध्यायान् वर्जयेत्**—तस्मिन्नहनि शुचित्वादयो नियमाः । **आवाहनादिवाग्यत उपस्पर्शनात्**—आवाहनादिवाग्तो भवति आ उपस्पर्शनात् । **आमन्त्रिताश्चैवम्**—आमन्त्रिता ये ब्राह्मणास्तेऽप्येवमेवानुष्ठानं कुर्युः ॥१॥

दीक्षितगदाधरकृतं श्राद्धसूत्रभाष्यम् ।

शिवं च विघ्नहर्तारं गुरून्वै वामनं तथा । अम्बिकां शारदां चापि वन्द विघ्नोपशान्तये ॥ १ ॥
कात्यायनकृते श्राद्धसूत्रे व्याख्यापुरःसराम् । प्रयोगपद्धतिं कुव याज्ञवल्क्यादिसम्मताम् ॥ २ ॥

तत्र "पूर्वां पौर्णमासीमुत्तरां वोपवसेत्" इत्यादिना श्रौतकर्माण्युपादिश्य "अथातो गृह्यस्थालीपाकानां कर्म" इत्यादिना स्मार्तान्यपि व्याख्यायावशिष्टं श्राद्धं कर्म कर्तव्यमित्यत आह—**अपरपक्षे श्राद्धं कुर्वीत**—श्राद्धमिति कर्म्मणो नामधेयम् । तत्र **कर्कमते** "पिण्डदानस्यैव श्राद्धम्" इति नामधेयम् । ततश्च पिण्डदानकरणेऽभ्यावृत्तिः । पिण्डदानब्राह्मणभोजनाग्नौकरणत्रयाणां कर्मणां समुदायस्येत्यन्ये । श्राद्धशब्दः स्फुटीकृतो **ब्रह्माण्डे**—"देश काले च पात्रे च श्रद्धया विधिना च यत् । पितॄनुद्दिश्य विप्रेभ्यो दानं श्राद्धमुदाहृतम्" इति । अपरपक्ष इति कृष्णपक्ष इत्युच्यते समाचारात्, समाचरन्ति हि कृष्णपक्षे श्राद्धमिति । लिङ्गाच्च, योऽपक्षीयते स पितर इति । अत्र यद्यपि समस्तमाससम्बन्ध्यपरपक्षस्य श्राद्धकालत्वं प्रतीयते, तथाऽपि स्मृत्यन्तरे दर्शनात् कन्याकुम्भसम्बन्धिनो विशिष्टत्वम्, तत्रापि कन्यासम्बन्धिनः पुण्यतमत्वम् । तथा च **मनुः**—"अनेन विधिना श्राद्ध त्रिरब्दस्येह निर्वपेत् । हेमन्तग्रीष्मवर्षासु पाञ्चयज्ञियमन्वहम्" ऋत्वपेक्षया हेमन्तग्रीष्मवर्षास्विति यदुक्तं तद्विवेचितं **मत्स्यपुराणे**—"अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् । कन्याकुम्भवृषस्थेऽर्के कृष्णपक्षेषु सर्वदा ॥" कन्यासम्बन्धिनि ऋतुपक्षेऽयं विशेषः । तस्या उभयथा सङ्कीर्तनमस्ति क्वापि प्रौष्ठपदाद्यपरपक्षत्वेन, क्वाप्याश्वयुक्कृष्णपक्षत्वेन । तथा च **विष्णुधर्मोत्तरे मार्कण्डेयः**—"उत्तरास्त्वयनाच्छ्राद्धे श्रेष्ठं स्याद्दक्षिणायनम् । चातुर्मास्यं च तत्रापि प्रसुप्ते केशवेऽधिकम् ॥ प्रौष्ठपद्यपरः पक्षस्तत्रापि च विशेषतः । पञ्चम्यूर्द्ध्वं ततश्चापि दशम्यूर्द्ध्वं ततोऽप्यति ॥ शस्ता त्रयोदशी राजन् मघायुक्ता ततोऽधिका" शङ्खेनाप्युक्तम् । "प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् । प्राप्य श्राद्धं हि कर्तव्यं मधुना पायसेन तु ॥"

ब्रह्मपुराणे–"आश्वयुक्कृष्णपक्षस्य श्राद्धं कार्यं दिने दिने । त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव वा ॥ आश्वयुज्यां च कृष्णायां त्रयोदश्यां मघासु च । प्रावृट्तौ यमः प्रेतान्पितॄंश्चापि यमालयम्" इति । "त्रिभागहीनम्" इति प्रतिपदादिचतुष्टयं, चतुर्दशीं च विहाय पञ्चम्यादिपक्ष उक्तः । "त्रिभागम्" इति पक्षतृतीयभागम् अनेन दशम्यादिरुक्तः । अर्धमिति "अष्टम्यादि यथाशक्ति कुर्यादापरपक्षिकम्" इति ॥ **प्राच्यास्तु**–"पञ्चम्यूर्द्ध्वं च तत्रापि दशम्यूर्द्ध्वं ततोऽप्यति" इति **विष्णुधर्मोत्तर**वाक्यैकवाक्यत्वाय त्रिभागहीनं षष्ठ्यादित्रिभागमेकादश्यादीत्याहुः । यत्तु तैरर्द्धमित्यस्य तृतीयभागार्द्धं त्रयोदश्यादीत्येवं व्याख्यानं कृतम्, तत्पक्षमित्यस्यानन्वयदोषापत्तेरुपेक्ष्यमिति **कमलाकरभट्टाः** । सूत्रे "कुर्वीत" इति विधायकं पदम् । अथेदानीं विचार्यते । किं, श्राद्धे साग्निकस्यैवाधिकार उत निरग्निकस्यापीत्यत्र **कर्काचार्येण** निर्णीतम् । अग्नौकरणरूपस्याङ्गस्याग्न्याधिकरणत्वात्तदुपसंहारे साग्निकस्यैव शक्तिर्नेतरस्य "न पैतृयज्ञियो होमो लौकिकेऽग्नौ विधीयते" इति निषेधात् । अत्र च "दारसंग्रहपूर्वकं कर्मावसथ्याधानं,तत्पूर्विका च कर्मान्तरप्रवृत्तिः"इत्यतोऽपि नानाग्निमतोऽधिकार इति । यत्तूक्तम् "अग्न्यभावेऽपि विप्रस्य पाणावेवोपपादयेत्" इति तदप्यकृतावसथ्याभ्युदयिकविषयम् । अनग्निमतोऽपि श्राद्धेऽधिकार इत्येवंविधा प्रसिद्धिस्तु इह वृक्षे यज्ञस्तिष्ठति इतिवदनिश्चितमूलेति नानग्निमतः श्राद्धाधिकारे प्रमाणमिति । तदिदमनुपपन्नम् । नित्यनैमित्तिकेषु हि "यथा शक्नुयात्तथा कुर्यात्" इति न्यायात्सर्वाङ्गोपसंहाराशक्तस्याप्यधिकारात् । अग्न्यभावे तु पाणौ होमविधानात् । अस्य विधानस्य चोक्तविषयविशेषव्यवस्थायाः प्रमाणशून्यत्वात् । सन्ति चाग्नौकरणरहितानि श्राद्धानि तेष्वधिकारानिवृत्तेश्च । "स्त्रीशूद्रानुपनीतानामपि श्राद्धोपदेशात्साग्निकानग्निकोभयाधिकारेण विहितं श्राद्धं सिद्धम्" इति **हेमाद्रिः** । अपरपक्षे प्रतिपत्प्रभृतिदर्शान्तं प्रत्यहं कर्तव्यामित्युक्त्वाऽधुना पक्षान्तरमाह–**ऊर्द्ध्वं वा चतुर्थ्याः**–वाशब्दो विकल्पार्थः । चतुर्थ्या ऊर्द्ध्वमुत्तरकालं पञ्चमीप्रभृति वा कुर्यात् । तदुक्तं **गौतमेन**—"अथ श्राद्धममावस्यायां पञ्चमीप्रभृति वाऽपरपक्षस्य" इति । **मनुस्मृतौ** विशेषः–"कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् । श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः" इति । तिथिविषयकं पक्षान्तरमाह–**यदहः सम्पद्येत तदहर्ब्राह्मणानामन्त्र्य पूर्वेद्युर्वा**–तत्र चतुर्दशीं विना सर्वासु तिथिषु पञ्चम्यादिषु वा तदहर्यस्मिन्नहनि द्रव्यब्राह्मणयोः सम्पत्तिः स्यात्तदहस्तस्मिन्नहनि यथोदितान्ब्राह्मणानामन्त्र्य श्राद्धं कुर्यात् । अथवा यद्दिने मृताहसञ्ज्ञिका तिथिरपरपक्षे स्यात्तदहे पूर्वेद्युर्वा ब्राह्मणान्निमन्त्र्य श्राद्ध कुर्यादिति सम्बन्धः । तथा च **पुराणसमुच्चये**–"या तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते । सा तिथिः प्रेतपक्षस्य पूजनीया प्रयत्नतः" इति । यदहरिति विभक्त्यर्थेऽव्ययीभावः । "नपुंसकादन्यतरस्याम्" इति टच्प्रत्ययः । ब्राह्मणग्रहणं क्षत्रियादिप्रतिषेधार्थम् । "पूर्वेद्युर्वा" इति व्यवस्थितविकल्पः । असम्भावितमैथुनान् यत्यादींस्तदहरामन्त्रयेत् । "अङ्गानां प्रधानधर्मत्वात्" इति न्यायेन "सम्भावितमैथुनान् पूर्वेद्युरेव" इति व्यवस्था । एतच्च व्यक्तीकृतं **मार्कण्डेयपुराणे**–"निमन्त्रयेत्तु पूर्वेद्युः पूर्वोक्तांस्तु द्विजोत्तमान् । अप्राप्तौ तद्दिने वाऽपि हित्वा योषित्प्रसङ्गिनम्" इति । **स्मृतिः**–"प्रार्थयीत प्रदोषान्ते भुक्त्वा नशयितान्द्विजान् । सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ॥ भवितव्यं भवद्भिश्च श्वोभूते श्राद्धकर्मणि । अयुग्मानपसव्येन पितृपूर्वं निमन्त्रयेत् ॥" इति । पितृपूर्वकं निमन्त्रणं त्वन्यशाखाविषयकम् । **कात्यायन**मतानुवर्तिनां देवानां निमन्त्रणं पूर्वम्, "दैवपूर्वकं श्राद्धम्" इति वक्ष्यमाणत्वात् । "पितृपूर्वं निमन्त्रणम्" इति **श्राद्धकाशिकाकारः** । **मात्स्ये** विशेषः । "आलभ्य दक्षिणं जानु त्वं मयाऽत्र निमन्त्रितः । एवं निमन्त्र्य नियमान्पैतृकाञ्छ्रावयेद्बुधः ॥" इति । राजन्यवैश्ययोश्च पुरोहितादिर्निमन्त्रणं कुर्यात् "ऋत्विग्राजन्यवैश्ययोः" इति वचनात् । प्रतिदिनमपरपक्षश्राद्धकरणे **स्मृत्यन्तरोक्त**तिथ्यादिदोषो नास्ति । तथा च **कार्ष्णाजिनिः**–"नभस्यापरपक्षे तु श्राद्धं कार्यं दिने दिने । नैव नन्दादिवर्ज्यं स्यान्नैव निन्द्या चतुर्दशी ॥" दशम्यादिपक्षत्रये तु चतुर्दशी वर्जनीया "कृष्णपक्षे दशम्यादौ"इत्यादि मनुवचनं प्रागुक्तम् । **स्नातकान्**–आमन्त्र्य श्राद्धं कुर्यादिति शेषः । "त्रयः स्नातका भवन्ति"इत्यादिना स्नातकलक्षणं चोक्तं **कात्यायनेन** । अयं चापत्नीकनिमन्त्रणप्रतिषेधे प्रतिप्रसवः । "विभार्यो वृषलीपातिः" इत्य**त्रिणा** निषिद्धत्वात् । **एके यतीन्**–निमन्त्रयन्ति । तदुक्तम्–"सम्पूजयेद्यातिं श्राद्धे पितॄणां पुष्टिकारकम् । ब्रह्मचारी यतिश्चैव पूजनीयो हि नित्यशः ॥ तत्कृतं सुकृतं यत्स्यात्तस्य षड्भागमाप्नुयात्" **मार्कण्डेयोऽपि**–"भिक्षार्थमागतान्वाऽपि काले संयमिनो यतीन् । भोजयेत्प्रणताद्यैस्तु प्रसादोद्यतमानसः ॥" इति । यतिस्तु त्रिदण्डी । एकदण्डिनां श्राद्धे निरस्तत्वात् । तथाहि–"मुण्डान् जटिलकाषायान् श्राद्धे यत्नेन वर्जयेत् । शिखिभ्यो धातुरक्तेभ्यस्त्रिदण्डिभ्यः प्रदापयेत् ॥"

याति कुटीचरम् बहूदकं च । इतरयोः कलौ निषिद्धत्वात् । तथाहि—"दीर्घकाल ब्रह्मचर्यं वानप्रस्थाश्रमं तथा । हंसः परमहंसश्च कैला नैतच्चतुष्टयम् ॥" इति । **गृहस्थान्साधून्वा**—वाशब्दो विकल्पार्थः । पाक्षिकयतिनिमन्त्रणनिषेधार्थो वाशब्द इति केचित् । तथा च **जाबालिः**—" अश्नान्ति ये तु मांसानि भार्याहीनाश्च ये द्विजाः । ये च मातुलसम्बन्धा न ताञ्छ्राद्धे निवेशयेत् ॥" साधून् क्षीणदोषान् गृहस्थान् निमन्त्रयेत् । तथा च **विष्णुपुराणे**—"साधवः क्षीणदोषास्तु" इति । **पुराणसमुच्चये**—" गृहस्थाः कुलसम्पन्नाः प्रख्याताः कुलगोत्रतः । स्वदारानिरताः शान्त विज्ञेयाः पङ्क्तिपावनाः॥" इति। **श्रोत्रियान्**—निमन्त्रयेदिति शेषः। श्रोत्रियलक्षणमाह **देवलः**—"एकशाखां सकल्पां च षड्भिरङ्गैरधीत्य च । षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित् ॥" कल्पस्य पृथग्ग्रहणमादरार्थम् । तथा हि—"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते॥" **वृद्धान्**—ज्ञानतपोवयोवृद्धान्निमन्त्रयेदित्यर्थः । **अनवद्यान्स्वकर्मस्थान्**—पितृमातृवंशद्वयविशुद्धान् स्वयमपि लोकापवादरहितान् स्वकर्मस्थान् स्वजातिविहितकर्मानुष्ठानरतान्निमन्त्रयेत्। एवं मुख्यकल्पं दर्शयित्वाऽनुकल्पं दर्शयति । **अभावेऽपि शिष्यान्स्वाचारान्**—पूर्वोक्तानां ब्राह्मणानामभावे शिष्यानपि स्वाचारान्निमन्त्रयेत् । शिष्या ब्रह्मचारिणः । स्वाचारानिति अग्निपरिचरणगुरुशुश्रूषाभिरतान् तेषां चैकान्ननिषेधेऽपि वाचनिकं श्राद्धभोजनम् । **व्यासः**—अनिन्द्यामन्त्रितः श्राद्धे विप्रोऽद्याद् गुरुणोदितः । एकान्नमविरोधेन व्रतानां प्रथमाश्रमी॥"इति।**अत्रिः**—ऋत्विक्पुत्रादयो ह्येते सकुल्या ब्राह्मणा द्विजाः । वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तराः " इति । एवं निमन्त्रणीयानुक्त्वाऽथ वर्ज्यानाह—**द्विर्नग्नशुक्लविक्लिधश्यावदन्तविद्धप्रजननव्याधितव्यङ्गिश्वित्रिकुष्ठिकुनखिवर्जम्**—द्विर्नग्नः दुश्चर्मा स च जन्मान्तरे गुरुतल्पगीभूतः, अथवोभयोर्गोत्रयोर्वेदस्याग्नेश्च विच्छेदः स द्विर्नग्नः । तदुक्तम्—" यस्य वेदश्च वेदी च विच्छिद्येत त्रिपूरुषम् । द्विर्नग्नः स तु विज्ञेयः श्राद्धकर्मणि निन्दितः॥"इति । शुक्लोऽतिगौरो मण्डलकुष्ठी वा ।विक्लिधो दन्तुरः। तथोक्तं मनुना—" यस्य नैवाधरोष्ठाभ्यां छाद्यते दशनावलिः । विक्लिधः स तु विज्ञेयो ब्राह्मणाः पङ्क्तिदूषणः ॥" विक्लिधः पूतिगन्धिघोण इति **गोभिलीयश्राद्धकल्पभाष्ये** । श्यावदन्त इति स्वभावात्कृष्णदन्तः, विद्धप्रजननश्छिन्नलिङ्गचर्म्मा दाक्षिणात्ये प्रसिद्धः, व्याधितो व्याधियुक्तः, व्यङ्गो हीनाङ्गोऽधिकाङ्गो विरुद्धाङ्गसंस्थितश्चेति, अतः कुब्जवक्रमुखहस्तपादादीनां च प्रतिषेधः सिध्यति । "हीनाङ्गोऽधिकाङ्गश्च हीनातिरिक्ताङ्गः " इति स्मृतेः ॥ श्वित्री श्वेतकुष्ठी कुष्ठगलिताङ्गः, कुनखी कुत्सितनखः एतान्वर्जयित्वा निमन्त्रयेत् । नन्वेतावतैवान्येषां वर्जनं भविष्यति यदेते उपवेष्टव्या इत्युक्तम्, किमत्र द्विर्नग्नादीनां निषेधः कृतोऽनधिकारार्थत्वात् । उच्यते । सत्यं भवत्येवार्थान्निषेधो, यदा विहिता उक्ताः स्युस्तदा तद्व्यतिरिक्तानामर्थानां निषेधः, किन्तु विहितानां ब्राह्मणानामप्राप्तौ निषिद्धातिरिक्तान्तरालिकब्राह्मणप्राप्त्यर्थं द्विर्नग्नादिवर्जनम् । अन्यथा विहितब्राह्मणालाभे तदतिरिक्तसमस्तवर्जनं, तदा श्राद्धकर्मलोपः स्यात्, तस्मात्साधूक्तं द्विर्नग्नादिवर्जमिति, शास्त्रान्तरगृहीतानप्युपवेशयेत् । **अनिन्द्येनामन्त्रितो नापक्रामेत्**—अनिन्द्यो लोकापवादरहितः, तेन श्राद्धार्थं निमन्त्रितो विप्रो न व्यतिक्रमं कुर्यात्, तथा **चाग्निष्टोमप्रकरणेऽध्वरकाण्डे** श्रुतिः " सहोवाचानिन्द्या वै मा वृषत सोऽनिन्द्यैर्वृतो नाशकमपक्रमितुमिति तस्मादुहानिन्द्यस्य वृतो नापक्रामेत् " इति । **मनुरतिक्रमे** दोषमाह—" केतितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः । कथञ्चिदप्यतिक्रामन् पापः शूकरतां व्रजेत् " न केवलं ब्राह्मणस्य व्यतिक्रमे दोषो, यजमानस्यापि ब्राह्मणव्यतिक्रमे दोषः स्यात् । तथा हि यमः—" आमन्त्र्य ब्राह्मणं यस्तु यथान्यायं न पूजयेत् । अतिकृच्छ्रासु घोरासु तिर्यग्योनिषु जायते " इति । **आमन्त्रितो वाऽन्यदन्नं न प्रतिगृह्णीयात्**—निमन्त्रितो विप्रोऽन्यदन्नं श्राद्धादिरूपमामान्नं सिद्धं वा न प्रतिगृह्णीयात् भोजनान्तरं वा न कुर्यात् । यथाह **देवलः**—" पूर्वं निमन्त्रितोऽन्यस्य यदि कुर्यात्प्रतिग्रहम् । भुक्ताहारोऽपि वा भुङ्क्ते सुकृतं तस्य नश्यति॥" अन्येनामन्त्रितस्यान्यश्राद्धग्रहणे दोषमाह—**मार्कण्डेयपुराणे व्यासः**—"भुक्ते श्राद्धं तु योऽन्यस्य नरोऽन्येन निमन्त्रितः । दैवे वाऽप्यथ वा पित्र्ये स तु निष्कृष्यते खगैः ॥ " **यमोऽपि**—" आमन्त्रितश्च यो विप्रो भोक्तुमन्यत्र गच्छति । नरकाणां शतं गत्वा चाण्डालेष्वभिजायते" इति। अथोपवेशनमाह—**स्नाताञ्छुचीनाचान्तान्प्राङ्मुखानुपवेश्य दैवे युग्मानयुग्मान्यथाशक्ति पित्र्ये**—उपवेशयेदिति वाक्यशेषः । कीदृशानुपवेशयेत् स्नातान् कृताप्लवान्, पुनः कीदृशान् शुचीन् सूतकादिरहितान्, पुनः कीदृशान् आचान्तान् यथाशास्त्रमाचान्तान्, न यथा-

कथञ्चित् एवम्भूतान्, दैवे वैश्वदेवार्थं युग्मानिति बहुवचनाच्चतुःषडादीन् प्रागग्रेषु कुशेषु प्राङ्मुखानुपवेश्य यथाशक्त्ययुग्मान् त्रिपञ्चादीन् पित्रर्थमुपवेशयेत्, द्विगुणमुदगग्रेषु कुशेषु, अयुग्मत्वं च नवभ्योऽर्वाग्वेदितव्यम् । तथा च **गौतमः**–" नवावरान्भोजयेदयुजो यथोत्साहं च " इति । **ब्रह्माण्डपुराणेऽपि**–" सामर्थ्येऽपि नवभ्योऽर्वाग्भोजयीत सति द्विजान् । नोर्द्ध्वं कर्त्तव्यमित्याहुः केचिद्दोषस्य दर्शनात्" इति । अत्र स्नानग्रहणं गौणस्नाननिषेधार्थम्, अथवा स्मृतिप्राप्तमेवानुवदति, अथवा विशिष्टविधिः । तथा च **वायुपुराणे**–" सुरभीणि तु स्नानानि गन्धवन्ति तथैव हि । श्राद्धेष्वेतानि यो दद्यादश्वमेधफलं लभेत् " इति । **देवलोऽपि**–" ततो निवृत्ते मध्याह्ने कृत्तलोमनखान् द्विजान् । अभिगम्य यथापूर्वं प्रयच्छेद्दन्तधावनम् ॥ तैलमुद्वर्त्तनं स्नानं स्नानीयं च पृथग्विधम् । पात्रैरौदुम्बरैर्दद्याद्वैश्वदेवस्य पूर्वकम्"इति । आचमने विशेषो **विष्णुपुराणे**–" उपस्पर्शस्तु कर्तव्यो मण्डलस्योत्तरे दिशि । कर्त्राऽथ वा द्विजैर्वाऽपि विधिवद्वाग्यतैः सदा ॥ मण्डलस्योत्तरे भागे कुर्यादाचमनं द्विजः । सोमपानफलं प्राहुर्गर्गकाश्यपगौतमाः " इति । तथा **चापस्तम्बे**–" कुर्युराचमनं विप्रा उदीच्यां मण्डलाद्बहिः । अन्यदिक्षु यदा कुर्यान्निराशाः पितरो गताः " इति । अविशेषे प्राप्ते विशेषमाह–**एकैकस्योदङ्मुखान्**–एकैकस्य पित्रादित्रयस्य यथाशक्ति प्रतिपुरुषमुदङ्मुखानयुग्मानुपवेशयेत् । पक्षान्तरमाह–**द्वौ वा दैवे त्रीन् पित्र्ये**–द्वौ वा दैवे देवेभ्यो द्वौ वा । पित्र्ये, अत्र " वाय्वृतुपित्रुषसो यत् " इत्यनेन कर्मार्थे यत्प्रत्ययः । " रीङ् ऋतः " इति रीङादेशः । " यस्येति च" इति ईकारलोपः । पितरो देवता अस्येति पित्र्यं तस्मिन्पित्र्ये कर्मणि त्रीन् पितुरेकं पितामहस्यैकं प्रपितामहस्य चैकम् । **याज्ञवल्क्यः**–" द्वौ दैवे प्राक् त्रयः पित्र्य उदगेकैकमेव वा " इति । **मनुर्विशेषमाह**–" द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा । भोजयेत्सुसमृद्धोऽपि न प्रसज्येत विस्तरम् ॥ सत्क्रियां देशकालौ च शौचं ब्राह्मणसम्पदः । पञ्चैतान्विस्तरो हन्ति तस्मान्नेहेत विस्तरम् ॥" **ब्राह्मेऽपि**–" यस्माद्ब्राह्मणबाहुल्याद्दोषो बहुतरो भवेत् । श्राद्धनाशो मौननाशः श्राद्धतन्त्रस्य विस्मृतिः ॥ उच्छिष्टोच्छिष्टसंसर्गो निन्दा दातृषु भोक्तृषु" इति । देशकालधनाभावे पक्षान्तरमाह–**एकैकमुभयत्र वा**–"शेषान्वित्तानुसारेण भोजयेदन्यवेश्मनि" इति **स्मृतिः** । " अयुग्मानपसव्येन पितृपूर्वं निमन्त्रयेत् । पित्रादेः सप्त पञ्च त्रीनेकैकस्यैकमेव वा ॥ दैवे षट् चतुरो द्वौ वाऽप्येकैकमुभयत्र वा" इति । **मातामहानामप्येवम्**–मातामहानामप्येवं सर्वे पक्षा भवेयुरित्यर्थः । तत्र केचिदिममुपदेशं मन्यमाना पृथक्कृत्य मातामहश्राद्धमिच्छन्ति । यदा मातामहेभ्यो ददाति तदैवमिति, तदेतदुपेक्षणीयम् । अपरे तु–"पार्वणं कुरुते यस्तु केवलं पितृहेतुतः । मातामहं न कुरुते पितृहा सोऽपि जायते " इति **स्कन्दपुराणवचनात्** पितॄणामिव मातामहानामपि तस्मिन्नेव प्रयोगे दानमिच्छन्ति, तच्चातीव युक्ततरम्, तथा च " पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवम्" इति । **तन्त्रं वा वैश्वदेविकम्**–विश्वेदेवास्तन्त्रेण वा य एव पितृभ्यो मातामहेभ्योऽपि त एव, स चायमन्यः पक्षः । तथाऽन्यदपि ब्राह्मणाभावे, " एक एव यदा विप्रो द्वितीयो नोपपद्यते । पितॄणां ब्राह्मणो योज्यो दैवे त्वग्निं नियोजयेत् ॥ प्रणीतापात्रमुद्धृत्य ततः श्राद्धं समारभेत्" इति॥ तथा हि–"यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् । अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च ॥ देवतायतने स्थाप्यं ततः श्राद्धं प्रकल्पयेत् । प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे ॥" इति । **श्रद्धान्वितः श्राद्धं कुर्वीत**–नात्र श्रद्धा निमित्तत्वेनोच्यते । यच्छ्राद्धं कुर्वीत स्वकाले तच्छ्रद्धयेत्यर्थः । **शाकेनापि नापरपक्षमतिक्रामेत्**–यद्यन्नं न लभेत तदा शाकेनाप्यपरपक्षे श्राद्धं कुर्यात् । तथा च **ब्रह्मपुराणे**–"पयोमूलफलैः शाकैः कृष्णपक्षे तु सर्वदा । पराधीनः प्रवासी च निर्धनो वाऽपि मानवः । मनसा भावशुद्धेन श्राद्धे दद्यात्तिलोदकम् " इति । अनेनावश्यंकर्त्तव्यताऽभिहिता । तत्र हेतुमाह–**मासि मासि वोशनमिति श्रुतेः** । अथ धर्मानाह–**तदहः शुचिरक्रोधनोऽत्वरितोऽप्रमत्तः सत्यवादी स्यादध्वमैथुनश्रमस्वाध्यायान्वर्जयेत्**–तदहस्तस्मिन्नहनि श्राद्धदिने एते नियमाः, शुचिर्बाह्याभ्यन्तररक्तवसनरक्तस्रावाद्यशुद्धिरहितः । अथवा शुक्लवासाः शुचिः, काषायादेः प्रतिषिद्धत्वात् । तथा च **हारीतः**–"शुचयः शुचिवाससः स्युः" इति । अप्रमत्त इति स्मृत्युक्तकालादिषु सावधानः । स्वाध्यायः श्राद्धमन्त्रजपादिव्यतिरिक्तवेदपाठः । मैथुनं पूर्वदिनेऽपि । सुगममन्यत् । अन्येऽपि दातृभोक्त्रोर्नियमाः स्मृत्युक्ता ग्राह्याः । **यमः**–"पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् । सन्ध्यां प्रतिग्रहं होमं श्राद्धभोक्ताऽष्ट वर्जयेत् ॥ " **मत्स्यपुराणे**–"पुनर्भोजनमध्वानं पानमायासमैथुनम् । श्राद्धकृच्छ्राद्धभुक् चैव सर्वमेतद्वि-

वर्जयेत् ॥ स्वाध्यायं कलहं चैव दिवास्वापं तथैव च ।'' पानं सुरापानम्, तच्च यस्य प्राप्तं तस्यैव निषेधः । ''दन्तधावनताम्बूलं स्निग्धस्नानमभोजनम् । रत्यौषधपरान्नं च श्राद्धकृत्सप्त वर्जयेत् ॥'' इति । दन्तानां धावनेप्रायश्चित्तं चोक्तं **विष्णुरहस्ये**–''श्राद्धोपवासदिवसे खादित्वा दन्तधावनम् । गायत्रीशतसम्पूतमम्बु प्राश्य विशुध्यति॥'' इति। अध्वादिगमने दोषमाह **यमः**–''आमन्त्रितस्तु यः श्राद्धे अध्वानं प्रतिपद्यते । भ्रमन्ति पितरस्तस्य तं मासं पांसुभोजिनः ॥ '' **याज्ञवल्क्यः**–''अध्वनीनो भवेदश्वः पुनर्भोजी तु वायसः । होमकृन्नेत्ररोगी स्यात्पाठादायुः प्रहीयते ॥ दानं निष्फलतामेति प्रतिग्राही दरिद्रताम् । कर्मकृज्जायते दासो मैथुनी शूकरो भवेत्॥'' इति । मैथुनं चाष्टविधम् । **दक्षः**–'' स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् । सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च'' इति । **शातातपः**--'' श्राद्धं कृत्वा परश्राद्धे भुञ्जते ये तु मोहिताः । पतन्ति पितरस्तेषां लुप्तपिण्डोदकक्रियाः ॥ '' अन्ये च नियमास्तत्र तत्र वक्ष्यन्ते, ते च श्राद्धप्राधान्ये गौणत्वे च न्यायबाधिताः क्वापि केऽपि न भवन्ति । यथा तीर्थश्राद्धेऽध्वा उपवासश्च न दोषाय । गर्भाधाननिमित्ते श्राद्धे मैथुनम् । अग्निहोत्रनिमित्ते श्राद्धे होमः । स्वद्वितीयविवाहश्राद्धे प्रतिग्रहः । एवं कन्यादानाभ्युदयिके दानम् । तीर्थयात्राऽऽरम्भसमाप्त्योरप्यध्वानमेव तेषां परतन्त्रत्वात्, एवं च सर्वत्र स्वयमूहनीयम् । **आवाहनादि वाग्यत औपस्पर्शनात्**– आवाहनादि आवाहनादारभ्य आ उपस्पर्शनाद्धोक्तुराचमनपर्यन्तं यजमानो वाग्यतो भवेत्, वाग्यमनलोपे वैष्णवमन्त्रजपो विष्णुस्मरणं वा प्रायश्चित्तम् । तथा च **याज्ञवल्क्यः**--''यदि वाग्यमलोपः स्याज्जपादिषु कथंचन । व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम् ॥ अज्ञानाद्यदि वा मोहात्प्रच्यवेताध्वरेषु यत् । स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥'' तथा च **शतपथश्रुतिः** ॥ ''अथ यद्वाचंयमो व्याहरति तस्मादुहैष विसृष्टो यज्ञः पराङावर्तते तत्र वैष्णवीमृचं वा यजुर्वा जपेत् '' इत्यादि । **आमन्त्रिताश्चैवम्**–आमन्त्रिता ये ब्राह्मणास्तेऽपि एवमेवानुष्ठानं कुर्युरित्यर्थः ।इति श्रीत्रिराग्निचित्सम्राट्स्थपति–श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरविनिर्मिते कातीयश्राद्धसूत्रभाष्ये प्रथमा कण्डिका ॥ १ ॥ * ॥

दैवपूर्वꣳ श्राद्धं पिण्डपितृयज्ञवदुपचारः पित्र्ये द्विगुणास्तु दर्भाः पवित्रपाणिर्दद्यादासीनः सर्वत्र प्रश्नेषु पङ्क्तिमूर्द्धन्यं पृच्छति सर्वान्वाऽऽसनेषु दर्भानास्तीर्य विश्वान्देवानावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञातो विश्वेदेवास आगतेत्यनयाऽऽवाह्यावकीर्य विश्वेदेवाः शृणुतेममिति जपित्वा पितॄनावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञात उशन्तस्त्वेत्यनयाऽऽवाह्यावकीर्यायन्तु न इति जपित्वा यज्ञियवृक्षच्चमसेषु पवित्रान्तर्हितेष्वेकैकस्मिन्नप आसिञ्चति शं नो देवीरित्येकैकस्मिन्नेव तिलानावपति तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः । प्रत्नमद्भिः, पृक्तः स्वधया पितॄँलोकान् प्रीणाहि नः स्वाहेति सौवर्णराजतौदुम्बरखड्गमणिमयानां पात्राणामन्यतमेषु यानि वा विद्यन्ते पत्रपुटेषु वैकैकस्यैकैकेन ददाति सपवित्रेषु हस्तेषु या दिव्या आपः पयसा सम्बभूवुर्या आन्तरिक्षा उत पार्थिवीर्याः । हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शꣳस्योनाः सुहवा भवन्त्वित्यसावेष तेऽर्घं इति प्रथमे पात्रे सꣳस्रवान्तसमवनीय पितृभ्यःस्थानमसीति न्युब्जं पात्रंनिदधात्यत्र गन्धपुष्पधूपदीपवाससांच प्रदानम् ॥ २ ॥

कर्कः–दैवपूर्वꣳ श्राद्धम्–यत्किञ्चित् क्रियते तत्सर्वं दैवपूर्वम् । पिण्डपितृयज्ञवदुपचारः पित्र्ये–पित्र्ये पिण्डपितृयज्ञवत् क्रिया । अपसव्यं दक्षिणामुखेन कर्त्तव्यं दक्षि-

णसंस्थमिति यावत् । **द्विगुणास्तु दर्भाः**-प्रकृतत्वात् पित्र्य एव । **पवित्रपाणिर्दद्यादासीनः सर्वत्र**-यद्ददाति तत्सर्वमासीनः पवित्रपाणिश्च दैवे पित्र्ये च, सर्वत्रग्रहणात् । **प्रश्नेषु पङ्क्तिमूर्द्धन्यं पृच्छति सर्वान्वा**-प्रश्नेषु पङ्क्तेराद्यः प्रष्टव्यः सर्वे वा । आद्ये पक्षे सामर्थ्यात्तस्यैव प्रतिप्रश्नः । **आसनेषु दर्भानास्तीर्य**-तच्चास्तरणं सामर्थ्यात्पूर्वमुपवेशनाद् द्रष्टव्यम् । तत्र केचिदस्मिन्नेवावसरे विप्रानुत्थाप्य दर्भास्तरणं कुर्वन्ति । तदयुक्तम् । प्रागास्तरणादुपवेशनस्य धर्ममात्रप्रसङ्गात् । प्रथमं यदुपवेशनं तस्मादद्दष्टं परिकल्पयेत् । न च तत् । तथा च स्मृत्यन्तरे-"कुशोत्तरेष्वासनेषु उपवेशयेत्" इति। **विश्वान्देवानावाहयिष्य इति पृच्छति**-पङ्क्तिमूर्द्धन्यं सर्वान् वा। **आवाहयेत्यनुज्ञातो विश्वेदेवास आगतेत्यनयाऽऽवाह्यावकीर्य विश्वेदेवाः शृणुतेममिति जपित्वा पितॄनावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञात उशन्तस्त्वेत्यनयाऽऽवाह्यावकीर्यायन्तु न इति जपित्वा यज्ञियवृक्षचमसेषु पवित्रान्तर्हितेष्वेकैकस्मिन्नप आसिञ्चति शन्नो देवीरिति**-आवाहयेत्यनुज्ञातः सन् **विश्वेदेवास आगतेत्यनया** आवाहयेत् । अवकिरणं प्रकिरणम् । तच्च तिलैः कर्त्तव्यम् । दैवे केचिद्यवैः कुर्वन्ति । तदयुक्तम् । अनुपदेशात् । न च तिलैः क्रियमाणमदैवं भवति, तस्मात्प्रकरणानुग्रहात्तिलैरेव कर्तव्यं दैवेऽपीति । विकिरणानन्तरं विश्वेदेवाः शृणुतेममिति जपेत् । तत उदङ्मुखान् पितॄनावाहयिष्य इति पृच्छति पङ्क्तिमूर्द्धन्यं सर्वान्वा । आवाहयेत्यनुज्ञात उशन्तस्त्वेत्यनया आवाहयेत् । अत्र पितॄन् पितामहान् प्रपितामहानावाहयिष्य इति पितॄणां मातामहानामप्येवमित्यातिदेशाच्च मातामहान् प्रमातामहान् वृद्धप्रमातामहानावाहयिष्य इत्युक्तं पितृभूतिना । तदयुक्तम् । पितृशब्दस्तु सपिण्डीकरणान्तसंस्कारजन्यपितृभावापत्तिरूपः । यथा-पितृभ्यो दद्यात् पितॄनावाहयिष्ये **पितॄन्हविषे अत्तवे आयन्तु नः पितर** इति अत्र पितरो मादयध्वमिति अमीमदन्त पितर इति नमो वः पितर इति **एतद्वः पितर** इति तर्पयत मे पितॄनित्यादि । तस्य पित्रादिषु मातामहादिषु मातृभ्रातृपितृव्यादिषु च तुल्यत्वान्नोह्यते । अतः पितॄनावाहयिष्य इत्येवावाहनप्रश्नः । अवकीर्य **आयन्तु न** इति जपेत् । यज्ञियवृक्षचमसाः । पालाशवैकङ्कतकाश्मर्यबैल्वखादिरौदुम्बराणामन्यतमाः। तेषु प्रत्येकं पवित्रान्तर्हितेषु **शन्नो देवीरित्यनेन मन्त्रेणाप आसिञ्चति। एकैकस्मिन्नेव तिलानावपति तिलोऽसी**ति-अनेन मन्त्रेण प्रत्येकं पात्रेषु तिलानावपति । दैवे पात्रे केचिद्यवानावपन्ति । तदयुक्तम्, उक्तहेतुत्वात् । यदि स्मृत्यन्तरे स्पष्टं वचनं भविष्यति, ततो विकल्पेन भवितव्यम् । पुनरेकान्तेन यवानामावपनमिति । **सौवर्णराजतौदुम्बरखड्गमणिमयानां पात्राणामन्यतमेषु यानि वा विद्यन्ते**-उदुम्बरं ताम्रमुच्यते प्रायोवचनात् धातुमत्सन्निधानाच्च । तेनावार्क्ष्यमौदुम्बरम् । तस्य तु यज्ञियत्वादेव प्राप्तत्वात् यज्ञियवृक्षचमसेष्वित्यनेन । तस्मादौदुम्बरं ताम्रमुच्यते । यानि वा विद्यन्ते मृन्मयादीन्युच्यन्ते ॥ **पत्रपुटेषु वेति**-अर्थात्पत्रपुटा मृन्मयादिषु विकल्प्यन्ते । तानि च पात्राणि पितृभ्यो मातामहेभ्यश्च त्रीणि त्रीणि क्रियन्ते । यत आह-**एकैकस्यैकैकेन ददाति**-एकैकस्य पित्रादेः, यत्सम्बन्धि दानं तदेकैकेन पात्रेण निर्वर्तयितव्यम् । केचिद्वैश्वदेविके ब्राह्मणसङ्ख्यया पात्राणि कुर्वन्ति । तदयुक्तम् । यतो न ब्राह्मणसम्बन्धेन पात्राणां श्रवणम्,

किन्तर्हि देवतासम्बन्धेन। तस्मादेकदेवताकत्वादेकमेव दैविकं पात्रमिति। **सपवित्रेषु हस्तेषु या दिव्या आपः असावेष तेऽर्घ** इत्येवमन्तं सूत्रम्। ब्राह्मणहस्तेषु सपवित्रेषु ददाति या दिव्या आप इत्यनेन। पवित्राणि यान्यन्तर्धायोदकमासिक्तं तानि प्रकृतत्वाद्भवन्ति। केचित्कृतप्रयोजनत्वादेव तेभ्योऽन्यान्युत्पादयन्ति। तदयुक्तम्। स्मर्यते हि दर्भाणामन्यत्र विनियुक्तानामन्यत्रापि विनियोगः। तस्मात्प्रकरणात्तान्येव भवन्ति। असावित्यत्र यथादैवतं नामादेशः। एकदेवतासम्बन्धेन यावन्तो ब्राह्मणास्तावतां हस्तेषु तत्पात्रगतोऽर्घः प्रतिपाद्यः। तत्र केचित्सकृन्मन्त्रवचनमिच्छन्ति। एकद्रव्ये कर्मावृत्तौ सकृन्मन्त्रवचनं कृतत्वादित्यनेन न्यायेन यत्रैकद्रव्यविषयः कर्माभ्यासः तत्र सकृन्मन्त्रवचनं कृतत्वादभिधानस्य, मन्त्रेण च देवता, द्रव्यं कर्माभिधेयम्। तदभिहितं सकृदप्युच्यमानेन पुनरभिधानमपेक्षते।स चायं या दिव्या इति द्रव्याभिधायको मन्त्रः, अनेन द्रव्यमभिधीयते, तच्च सकृद् द्रव्यमभिहितमेव भवति, तस्मात्सकृन्मन्त्र इति तदेतदन्याय्यम्। एकदेशप्रतिपत्तेः एकदेशो ह्यस्य द्रव्यस्य प्रतिपाद्यते। प्रतिब्राह्मणं यावत् प्रतिपाद्यते तावन्मन्त्राभिधानेन संस्क्रियते। तस्मात् प्रत्यर्घमयं मन्त्रो ग्रहणवत्। अत्र केचित् दैवपात्रं पूरयित्वा तदनन्तरं च दत्त्वा ततः पितृपात्रजातस्य पूरणादि कुर्वन्ति। तदसत्। न हि काण्डानुसमयस्यात्र प्रमाणमस्ति पदार्थानुसमयोऽयम्। तस्मात्समानं पूरणम्। ततो दानम्। स्मृत्यन्तरसम्भवेऽपि प्रवाहो यदि त्वास्ति ततो विकल्प इति। **प्रथमे पात्रे संस्रवान्समवनीय पितृभ्यः स्थानमसीति न्युब्जं पात्रं निदधाति**—संस्रवाः पात्रसँलग्नाः। **अत्र गन्धपुष्पधूपदीपवाससां च प्रदानम्**—अस्मिन्नवसरे विप्रेभ्यो गन्धादिदानम्। केचित्प्रकृतत्वात् अत्रेति सर्वनाम्नो निर्देशात्पात्रे गन्धादीनीच्छन्ति। तदसत्। अदृष्टप्रसङ्गात्। तस्मादत्रशब्दोऽवसरार्थो द्रष्टव्यः॥ २॥ ॥ * ॥

गदा०—**दैवपूर्वं श्राद्धम्**—आ उपस्पर्शनादित्यनुवर्त्तते निमन्त्रणादि आचमनपर्यन्त श्राद्धे यत्किञ्चित्क्रियते तत्सर्वं दैवपूर्वकं कर्त्तव्यमित्यर्थः। तथा च देवलः—“यद्यत्र क्रियते कर्म पैतृकं ब्राह्मणान्प्रति। तत्सर्वं तत्र कर्तव्यं वैश्वदेवस्य पूर्वकम्” इति। **पिण्डापितृज्ञवदुपचारः पित्र्ये**—पितृकर्मणि पिण्डपितृयज्ञवत्करणं भवतीत्यर्थः। अनेनापसव्यदक्षिणामुखवामजानुपाताद्यातिदिष्टम्। अतश्च नीवीबन्धनादिपिण्डोत्थापनपर्यन्तं पिण्डपितृयज्ञोक्तधर्मो भवतीति। एतदपवादः “अपसव्येन कर्तव्यं सर्वं श्राद्धं यथाविधि। सूक्तस्तोत्रजपं मुक्त्वा विप्राणां च विसर्जनम्॥” अपि च-“सूक्तस्तोत्रजपं मुक्त्वा पिण्डाघ्राणं च दक्षिणाम्। आह्वानस्वागते चैव विना च परिवेषणम्॥ विसर्जनं सौमनस्यमाशिषां प्रार्थनं तथा। विप्रप्रदक्षिणां चैव स्वस्तिवाचनकं विना॥ पित्र्यमन्यत्प्रकर्त्तव्यं प्राचीनावीतिना सदा” इति जमदग्निः। **द्विगुणास्तु दर्भाः**—पित्र्ये इत्यनुवर्तते, तु पुनः पित्र्ये हविरुत्सर्गादौ द्विगुणीकृता दर्भा भवन्ति, अर्थाद्दैवं ऋजव इति। अत्राह बौधायनः—“प्रदक्षिणं तु देवानां पितॄणामप्रदक्षिणम्। देवानामृजवो दर्भाः पितॄणां द्विगुणाः स्मृताः”। कात्यायनस्मृतौ विशेषः-“सपिण्डीकरणं यावदृजुदर्भैः पितृक्रिया। सपिण्डीकरणादूर्द्ध्वं द्विगुणैर्विधिवद्भवेत्॥” इति। दर्भलक्षण चोक्तं यज्ञपार्श्वे—“कीदृशा यज्ञियां दर्भाः कीदृशाः पाकयज्ञियाः। कीदृशाः पितृदेवत्याः कीदृशा वैश्वदेविकाः॥ हरिता यज्ञिया दर्भाः पीतकाः पाकयज्ञियाः। समूलाः पितृदेवत्याः कल्माषा वैश्वदेविकाः॥ अप्रसूताः स्मृता दर्भाः प्रसूतास्तु कुशाः स्मृताः। अमूलाः कुतपा ज्ञेया इत्येषा नैगमी श्रुतिः॥ प्रादेशादधिका दर्भास्त्रिपत्रादियुताश्च ये। कुशास्ते याज्ञिकैः प्रोक्ताः स्नानादिषु पवित्रकाः॥ दर्भाः किमर्थं दीयन्ते श्राद्धकालेषु किं तिलाः। किमर्थं वेदविच्छ्राद्धे किमर्थं यतिरुच्यते॥ रक्षन्ति राक्षसान्दर्भास्तिला रक्षन्ति चासुरान्। वेदविद्रक्षयच्छ्राद्धं यतीनां दत्तमक्षयम्॥” इति। दर्भाभावे काशादि गृहीत्वा कर्म कुर्यात्। तथा च स्मृतौ—“दर्भाभोवतु

काशाः स्युः काशाः कुशसमाः स्मृताः । काशाभावे ग्रहीतव्या अन्ये दर्भा यथोचिताः ॥ दर्भाभावे स्वर्णरूप्यताम्रैः कर्म्मक्रिया सदा । कुशकाशशरा दूर्वा यवगोधूमबल्वजाः ॥ सुवर्णं रजतं ताम्रं दश दर्भाः प्रकीर्तिताः । स्नाने दाने तथा होमे स्वाध्याये तर्पणेऽपि च ॥ " इति । **पवित्रपाणिर्दद्यादासीनः सर्वत्र**–सर्वत्रग्रहणाद्दैवे पित्र्ये च यत्किञ्चिद्ददाति तत्सर्वमासीनः पवित्रपाणिः सन्दद्यात् । पवित्रपाणिः कुशपाणिः पवित्रशब्दोऽत्र कुशवचनः **पवित्रे स्थ** इति मन्त्रलिङ्गात् । अथवा स्मृतिप्राप्तं पवित्रपाणित्वमासीनत्वं चात्र सार्थकत्वेनानुवदति । तेन वामहस्ते कुशादानं पितॄणामावाहनेष्वासीनत्वं निषेधतीत्यर्थः । तथा च पठन्ति--" वामहस्तधृतान्दर्भान् गृहे रङ्गवलीस्तथा । ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः ॥" इति । किञ्चावाहनेनागच्छत्सु पितृषु कर्तुरासीनत्वं न युक्तम् । तथा च **पुराणोक्तं** लिङ्गम्–" अथ प्राञ्जलिरुत्थाय स्थित्वा चावाहयेत्पितॄन्" इति । **प्रश्नेषु पङ्क्तिमूर्द्धन्यं पृच्छति सर्वान्वा**–वाशब्दो विकल्पार्थः, वक्ष्यमाणेषु आवाहनादिप्रश्नेषु पङ्क्तिमूर्द्धन्यं पङ्क्तेराद्यं ब्राह्मणं पृच्छेत् सर्वान्वा पृच्छेत् । तुल्यविकल्पस्याष्टदोषदुष्टत्वात् व्यवस्थितविकल्पोऽयमिति **श्राद्धकाशिकाकारः** । तुल्यविकल्प एवायमिति **कर्काचार्यादयः** । **आसनेषु दर्भानास्तीर्य विश्वान्देवानावाहयिष्य इति पृच्छति**–आसनेऽत्र पीठेषु दर्भानास्तीर्याच्छादनं कृत्वा विश्वान्देवानावाहयिष्ये इति पृच्छेत् पङ्क्तिमूर्द्धन्यं सर्वान्वा । आसनान्याह **स्मृतिः**–"शमीकाश्मर्यशल्लाश्च कदम्बो वारणस्तथा । पञ्चासनानि शस्तानि श्राद्धे वा देवतार्चने ॥" तथा च "श्रीपर्णी वरुणक्षीरी जम्बूकाम्रकदम्बजम् । सप्तमं बाकुलं पीठं पितॄणां दत्तमक्षयम्" इति आसनेषु दर्भानास्तीर्येति वदता हस्ते विष्टरवद्दानं निराकृतम् । **कर्काचार्यास्त्वेवमाहुः** । एतदास्तरणं सामर्थ्यात्पूर्वमुपवेशनाद् द्रष्टव्यम् । पाठक्रमादर्थक्रमस्य बलिष्ठत्वात् । **आवाहयेत्यनुज्ञातो विश्वेदेवास आगतेत्यनयाऽऽवाह्यावकीर्य विश्वेदेवाः शृणुतेममिति जपित्वा पितॄनावाहयिष्य इति पृच्छति**–ततो ब्राह्मणैरावाहयेत्यनुज्ञातो **विश्वेदेवास आगतेत्यनया** ऋचा आवाह्य वैश्वदेवब्राह्मणपुरतो यवान्प्रादक्षिण्येनावकीर्य **विश्वेदेवाः शृणुतेममितीमं** मन्त्रं पठित्वा पितॄनावाहयिष्य इति पृच्छति । अत्र तिलैरवकिरणमिति **कर्काचार्या** आहुः । अन्ये तु यवैरन्ववकीर्येति **याज्ञवल्क्यवचनाद्यवैः** कुर्वन्ति । द्विजानेकत्वेऽपि न प्रतिद्विजमावाहनावृत्तिः, सकृदावाहनेनैवानेकब्राह्मणाधिष्ठाने देवताध्यासनसम्भवात् । **आवाहयेत्यनुज्ञात उशन्तस्त्वेत्यनयाऽऽवाह्यावकीर्यायन्तु न इति जपित्वा यज्ञियवृक्षचमसेषु पवित्रान्तर्हितेष्वेकैकस्मिन्नप आसिञ्चति शंनो देवीरिति**–आवाहयेति ब्राह्मणैराज्ञापितं **उशन्तस्त्वेति** मन्त्रेण पितॄनावाह्य पितृब्राह्मणानामग्रतस्तिलानप्रादक्षिण्येनावकीर्य**आयन्तु नः पितर** इति पठेत् । यज्ञमर्हन्तीति यज्ञियाः पालाशादयः, "यज्ञर्त्विग्भ्यां घखञौ" इति घप्रत्ययः । ते वै पालाशाः स्युरित्युपक्रम्य एते हि वृक्षा यज्ञिया इति **हविर्यज्ञकाण्डे श्रुतिः** । एषामन्यतमेषु चमसेषु अनन्तर्गर्भसाग्रप्रादेशमात्रकुशद्वयसहितेषु **शं नो देवीरभिष्टय** इत्यनेन एकैकस्मिन्नपो निषिञ्चेत् । चमसानां लक्षणं चोक्तं **यज्ञपार्श्वे**–"चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः । त्र्यङ्गुलं तु भवेत्खातं विस्तारश्चतुरङ्गुलः ॥ वैकङ्कतमयाः श्लक्ष्णास्त्वग्बिलाश्चमसाः स्मृताः । अन्यो*न्यावपि कार्याः स्युः" इति । तत्रैवोक्तम् । प्रादेशायामा इति च । पवित्रलक्षणं **छन्दोगपरिशिष्टे**–" अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥" इति । अत्र देवपात्रे द्वे पवित्रे, पितृपात्रे त्रीणि त्रीणि भवन्ति । तदुक्त **चतुर्विंशतिमते**–"द्वे द्वे शलाके देवानां तिस्रस्तिस्रस्तु पार्वणे एकोद्दिष्टे शलाकैका श्राद्धेष्वर्घेषु निक्षिपेत्" इति । अत्र **याज्ञवल्क्यवचनेनावाहनार्घपूरणदानानां** यद्यपि काण्डानुसमयः प्रतयिते, तथापि पदार्थानुसमयो बोद्धव्यः । "तुल्यसमवाये सामान्यपूर्वमानुपूर्व्ययोगात्" इति परिभाषितत्वात् । अस्यार्थः । तुल्यानां प्रधानानां समवाये एकप्रयोगानुष्ठाने यत्साधारणमङ्गजातं तत्सर्वेषां पूर्वं भवति तथा सत्यानुपूर्व्येण पदार्थाः कृता भवन्ति । यथा–श्राद्धे पित्रादिषड्भागा एकत्र प्रयोगे क्रियन्ते तत्र निमन्त्रणादयः सर्वेषां क्रमेण पदार्था अनुष्ठिता भवन्ति । अन्यथा एकैकस्य पित्रादेः सर्वयागस्य परिसमाप्तौ द्वितीयोपक्रमे क्रमभङ्गः स्यात् । प्रथमस्य विसर्जने द्वितीयस्यामन्त्रणमापद्येत, तथा सत्यानुपूर्वीभङ्गः प्रसज्येत । तच्च निषिद्धम् । तस्मादेकैकं पदार्थजातं सर्वेषामपि निर्वाह्य द्वितीयादिनिर्वाहः कार्यः । एवमपि बहुभिः पदार्थैर्व्यवधानं भवति, तच्च न दोषाय । न हि सजातीयैर्व्यवधानमिष्यते । तस्मात्सर्वेषां निमन्त्रणं पाद्यादि । एवमावाहनेऽपि, अवाहनावकिरण-

---

* अन्येभ्योऽपि हि कार्याः स्युरिति क्वचित्पाठः ।

जपसमुदायरूपम् । जपेऽप्यायन्तु न इति मन्त्रालिङ्गात् । अत एव हि एकोद्दिष्टतीर्थश्राद्धनित्यश्राद्धसाङ्कल्पिकश्राद्धेषु आवाहितनिवृत्तौ त्रयमपि निवर्तते । **कात्यायनस्य** पदार्थानुसमय एवाभिमतः, देवावाहनानन्तरं पित्रावाहनोक्तेः । "एकैकस्मिन्नप आसिञ्चति" इति सर्वपात्रेषु जलप्रक्षेपावगमात् । तदनन्तरमेकैकस्मिन्नेव तिलानावपतीति विधानात् । अत एकैकत्रार्घपात्रे जलादिपुष्पान्तं प्राक्षिप्यार्घदानान्तं वा निर्वर्त्य पात्रान्तरपूरणमिति मतं न युक्तम् । किंच पदार्थानां क्रमानुरोधादपि पदार्थानुसमय एवार्हति । अतो निमन्त्रणादावपि पदार्थानुसमय एव । **एकैकस्मिन्नेव तिलानावपति* तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः । प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रीणाहि नः स्वाहेति**--तिलोऽसीत्यनेन एकैकस्मिन्पात्रे तिलानावपति प्रक्षिपति आदौ देवपात्रे प्रक्षिप्य ततः पितृपात्रेषु प्रक्षेपः । ननु एकैकस्मिन्नित्यनुवर्तमाने पुनरेकैकस्मिन्निति ग्रहणं किमर्थम् । उच्यते, तिलोऽसीति मन्त्रे "पितॄन्प्रीणाहि" इति बहुवचनान्तेन पितृशब्देनैकद्रव्यत्वादनूहितः सकृन्मन्त्रः प्राप्नोति, तन्माभूदित्येकैकस्मिन्निति पुनर्ग्रहणम् । **सौवर्णराजतौदुम्बरखड्गमणिमयानां पात्राणामन्यतमेषु यानि वा विद्यन्ते**--उदुम्बरं ताम्रमुच्यते । उदुम्बरवृक्षस्य तु याज्ञियवृक्षचमसेष्वित्यनेनैवोक्तत्वात् । मणिमयानि शङ्खशुक्तिस्फटिकादिपात्राणि । एषां मध्ये एकस्य पात्राणि क्रियन्ते यानि वा विद्यन्ते इति निषिद्धेतराणि मृन्मयादीन्युच्यन्ते । तथा च **छन्दोगपरिशिष्टे**--"आसुरेण तु पात्रेण यस्तु दद्यात्तिलोदकम् । पितरस्तस्य नाश्नन्ति दश वर्षाणि पञ्च च ॥ कुलालचक्रनिष्पन्नमासुरं मृन्मयं स्मृतम् । तदेव हस्तघटितं स्थाल्यादि दैविकं भवेत्" इति । राजतं तु पित्र्य एव । तदुक्तं **वायुपुराणे**--"तथाऽर्घपिण्डभोज्येषु पितॄणां राजतं मतम् । अमङ्गल्यं तु यत्नेन देवकार्येषु वर्जयेत्" इति । **पत्रपुटेषु वा**--वाशब्दो विकल्पार्थः । पूर्वसूत्रोक्तविहितप्रतिषिद्धानिषेधार्थ इति । **श्राद्धकाशिकाकारः** । पूर्वोक्तानामलाभे पालाशादियाज्ञियवृक्षपत्रपुटेषु वाऽर्घं पूरयेत् । तथा चोक्तं **ब्रह्मपुराणे**--"अथ पत्रपुटे दत्त्वा मुनीनां वल्लभो भवेत्" इति । तानि च पात्राणि पितृभ्यो मातामहेभ्यश्च त्रीणि त्रीणि क्रियन्ते । यत आह--**एकैकस्यैकैकेन ददाति सपवित्रेषु हस्तेषु या दिव्या आपः पयसा सम्बभूवुर्या आन्तरिक्षा उत पार्थिवीर्याः । हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शꣳ स्योनाः सुहवा भवन्त्वित्यसावेष तेऽर्घ इति**--अत्र "सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः" इति चतुर्थ्यर्थे षष्ठी विभक्तिः । एकैकस्य पित्रादेः सम्बन्धिब्राह्मणहस्तेषु सपवित्रेषु **या दिव्या** इति मन्त्रेण अमुकशर्म्मन् एष ते अर्घ इति अर्घं दद्यात् । असावित्यत्र यथादैवतं नामग्रहणं कार्यम् । "असावित्यपनोदे" इति परिभाषायामुक्तत्वात् । तस्यायमर्थः । यत्र मन्त्रमध्ये असावित्येवं सर्वनामपदं पठितं भवति । तत्र तत्सर्वनामपदमपनोदे अपनये वर्तते । तस्यापनोदमपनयं निष्कासनं कृत्वा तस्य स्थाने यद्विवक्षितं तस्य नाम्नः प्रक्षेपः कार्यः । सपवित्रेष्वित्यनेन तन्त्रेण सर्वब्राह्मणहस्तेषु सूचितम् । न प्रतिहस्तं मन्त्रावृत्तिः । एकैकस्येत्यनेन प्रतिपुरुषं हस्तार्घदानामिति सूचितम् । अत्राह **कात्यायनः**--"अर्घेऽक्षय्योदके चैव पिण्डदानावनेजने । तन्त्रस्य तु निवृत्तिः स्यात्स्वधावाचन एव च" इति । अत्रायं प्रकारः । पितुर्यावन्तो ब्राह्मणास्तेषां सपवित्रेषु ज्येष्ठोत्तरहस्तेषु पितुरेकस्यैकोऽर्घ दातव्यः । एवं पितामहप्रपितामहयोः । मातामहानामप्येवं ज्ञेयम् । पवित्राणि यान्यन्तर्द्धायोदकमासिक्तं तान्येवैं भवन्ति, प्रकृतत्वात् । अत्रैके पवित्रान्तरमुत्पादयन्ति । एषामेकत्र विनियुक्तानां विनियोगान्तराभावात् । तदयुक्ततरम् । यथा मन्त्राणां क्रियया पुनःपुनर्विनियोगः, एव कुशानामपि । तथाहि--"दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणाश्च विशेषतः । न ते निर्माल्यतां यान्ति योज्यमानाः पुनःपुनः" इति । तस्मात्तान्येव भवन्ति । अत्र केचिदेकद्रव्ये कर्मा-

---

* मन्त्रार्थः । तिलस्त्वमसि, किम्भूतः सोमदैवत्यः सोमो देवता अस्येति सोमदैवत्यः, पुनः किम्भूतः गोसवः गां स्वर्गं सूते इति गोसवः, तिलो हि दत्तः सन् दातुः पापक्षयं कुर्वाणः स्वर्गं जनयाति, च अपि किम्भूतः देवनिर्मितः देवेन विष्णुना निर्मितः उत्पादितः, अपिच किम्भूतः आद्भिः पृक्तः जलेन मिश्रितः यतस्त्वमेवम्भूतः तस्मादस्माकं पितॄँल्लोकान् पितृपितामहप्रभृतीन्, प्रत्नं चिरकालं स्वधया स्वधाकारेण प्रीणाहि प्रीतान् कुरु स्वाहाकारस्तिलप्रक्षेपे । **तिलोऽसीत्यादिना स्वधया** इत्यन्तेन तिलं स्तुत्वा त्वमस्माकं पितॄन् प्रीतान् कुर्वीति याच्ञा वाक्यार्थः । अत्र प्रीणाहीति प्रीधातोर्लोट् "सिब्बा छन्दसि" इति विकल्पेन पित्त्वे सति ङित्त्वाभावात् तन्निबन्धन इकारो भवति । यद्यपि "स्वाहा देवहविर्दाने" इत्यत्र पित्र्यकर्मणि स्वाहाकारोऽयुक्तः, तथापि कात्यायनेन महर्षिणा स्वाहान्तस्यैव पाठादनुपपत्तिर्नाशङ्कनीया ।

CC0. In Public Domain Kritikant Sharma Najafgarh Delhi Collection

वृत्तौ सकृन्मन्त्रवचनं कृतत्वादिति न्यायेन सकृन्मन्त्रवचनमिच्छन्ति **कर्कमते** तु प्रतिप्रक्षेपं मन्त्रो ग्रहणवत् । तथाऽस्माकमपि । अत्र केचिद्दैवं पूरयित्वा तदनन्तरं चार्घं दत्त्वा ततः पित्र्यस्य पात्रजातस्य पूरणादि कुर्वन्ति । तदसत्। न हि काण्डानुसमयस्यात्र प्रमाणमस्ति, पदार्थानुसमयोऽयम्, तस्मात् समानं पूरणम् । ततो दानम् । स्मृत्यन्तरसम्भवेऽपि प्रवाहो यद्यस्ति ततो विकल्पोऽयमिति । अत्रैके " पूरयेत्पात्रयुग्मं तु " इति **मत्स्यपुराणोक्तेः** "एकैकस्य तु विप्रस्य अर्घं पात्रे विनिक्षिपेत् " इति **प्राचेतसो**क्तेश्च वैश्वदेविके ब्राह्मणसङ्ख्यया पात्राणि कुर्वन्ति । **कर्कमते** त्वेकमेव पात्रं दैवे । केचिद् द्विजहस्तधृतं पवित्रं पुनरर्घपात्रे गृह्णन्ति । तदतीव मन्दम् । दत्तस्योपादाने प्रमाणाभावात् । **या दिव्या** इत्यस्यार्थः । " आपः पानीयानि पयसा सम्बभूवुः सङ्गमना बभूवुः । माधुर्यशीतत्वादिना एकीभूताः । कास्ता आपः या दिव्याः दिवि स्वर्गे भूताः उत आपि या आन्तरिक्षाः आकाशे भूताः । उत अपि पार्थिवीर्याः पृथिव्यां भूताः उतशब्द उभाभ्यां सम्बध्यते । किम्भूताः हिरण्यवर्णाः हिरण्यं रजतं तत्समानवर्णाः शुक्लवर्णा इत्यर्थः । पुनः किम्भूताः यज्ञियाः यज्ञार्हाः । ता आपः नः अस्माकं शिवाः क्षेमा भवन्तु न केवलं क्षेमाः, अपि शं कल्याण्यो भवन्तु । स्योनाः सुखदा भवन्तु । सुहवाः सुष्ठुब्राह्मणहस्ते कृता भवन्त्वित्यनेनैव सम्बन्धः। "स्योनाः" इति सुखस्य नाम इति **यास्कः** ।"एकैकमुभयत्र वा" इत्यस्मिन्पक्षेऽपि पित्र्यपात्रत्रयं कार्यम् । **प्रथमे पात्रे संस्रवान्त्समवनीय पितृभ्यः स्थानमसीति न्युब्जं पात्रं निदधाति**–संस्रवशब्देनार्घपात्रलग्ना अबवयवा अभिधीयन्ते । " संस्रवो ह्येव खलु परिशिष्टो भवति" इति **श्रुतिवाक्यात्** । प्रथमे पात्रे पितुः प्रथमे अर्घपात्रे संस्रवान् समवनीय निक्षिप्य "पितृभ्यः स्थानमसि" इत्यनेन मन्त्रेण तत्प्रथमं पात्रं न्युब्जमधोमुखं निदध्यात् । अत्राह **यमः**–" पैतृकं प्रथमं पात्रं तस्मिन्पैतामहं न्यसेत् । प्रपितामहं ततोऽन्यस्य नोद्धरेन्न विचालयेत् ॥" पैतामहं संस्रवमित्यर्थः । **पुराणे** विशेषः–"आसिच्य प्रथमे पात्रे सर्वपात्रस्थसंस्रवान् । ताभिरद्भिर्मुखं सिञ्चेद्यदि पुत्रमभीप्सति ॥" **चतुर्विंशतिमते**–" संस्रवान्प्रथमे पात्रे निर्णीयाद्भिर्मुखं स्पृशेत् ।" अद्भिर्मुखस्पर्शनस्य पुरुषार्थत्वाद्विकृतावप्रवृत्तिः, तच्च न्युब्जीकरणं पित्र्यब्राह्मणस्य वामपार्श्वे । तथा **मत्स्यपुराणे**–"या दिव्येत्यर्घमुत्सृज्य दद्याद्गन्धादिकं ततः । वस्त्रोत्तरं चानुपूर्वं दत्त्वा संस्रवमादितः॥ पितृपात्रे प्रदायाथ न्युब्जमुत्तरतो न्यसेत्" इति । उत्तरशब्दो वामवचनः, स चाचाराद् भोक्तुरेव । ब्राह्मणहस्तगलितार्घोदकानि पितृपात्रे प्रसिच्य दक्षिणाग्रेषु कुशेषु 'पितृभ्यः स्थानमसि' इति सपवित्रं न्युब्जं कृत्वा तस्योपर्यर्घ्यपात्रपवित्राणि क्षिप्त्वा तिलपुष्पादि क्षिप्त्वा तत्पात्रमासमाप्तेर्न चालयेत् । "मातामहेषु चैवम्" इति **स्मृत्यर्थसारे** । **अत्र गन्धपुष्पधूपदीपवाससां च प्रदानम्**–अत्रास्मिन्नवसरे विप्रेभ्यो गन्धादिकं दद्यात्। गन्धादीनां **स्मृत्यन्तरो**क्तविशेषो द्रष्टव्यः । चन्दनकुङ्कुमकर्पूरागुरुपद्मकाष्ठान्यनुलेपनार्थे इति **विष्णुनोक्तम्** । पुष्पे पद्मोत्पलमल्लिकायूथिकाशतपत्रचम्पकानि गन्धरूपसम्पन्नान्यपि श्वेतानि, धूपे घृतमधुसंयुक्तं गुग्गुलं श्रीखण्डागुरुरसादि दद्यात् । प्राण्यङ्गं सर्वं धूपार्थे न दद्यात् । दीपे **शङ्खः**–"घृतेन दीपो दातव्यास्तिलतैलेन वा पुनः । वसामेदोद्भवं दीपं प्रयत्नेन विवर्जयेत्" । **वस्त्रे** शुक्लं शुद्धमहतं सदशं वस्त्रं दद्यात् । चकारोऽनुक्तसमुच्चयार्थः । तेन सत्यां सम्पत्तौ सूत्रोक्तेभ्योऽन्यदपि दातव्यम् । तथा **वायुपुराणे**–"लोके श्रेष्ठतमं सर्वमात्मनश्चापि यत्प्रियम् । सर्वं पितॄणां दातव्यं तदेवाक्षयमिच्छता" इति । "यज्ञोपवीतं यो दद्याच्छ्राद्धकाले तु धर्म्मवित् । पावनं सर्वविप्राणां ब्रह्मदानस्य तत्फलम् ॥" दानं च पितृसम्प्रदानकम् । प्रतिपत्तिस्तु ब्राह्मणेषु । अत्र यद्यपि गन्धपुष्पधूपदीपाच्छादनानां मिलितानां प्रदानं प्रतीयते, तथापि **स्मृत्यन्तरदर्शनाद्** गन्धादीनामेकैकं देवादिमातामहाद्यन्तमुत्सृज्य दद्यात् । तथा च **छन्दोगपरिशिष्टे**–"गन्धोदकं च दातव्यं सन्निकर्षक्रमेण तु । गन्धान्ब्राह्मणसात्कृत्वा पुष्पाण्यृतुभवानि च । धूपं चैवानुपूर्व्येण अग्नौ कुर्यादतः परम्"इति । "वस्त्राभावे मूल्यं वा अलाभे उत्तरीयं यज्ञोपवीतं वा दद्यात्" इति **स्मृत्यर्थसारे** । अस्मिन्नवसरे ब्राह्मणाग्रे भोजनानि निधाय मण्डलानि कुर्यात् । अत्राह **शङ्खः**–"चतुष्कोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु । मण्डलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम्" इति । **ब्रह्मपुराणे**–"मण्डलानि च कार्याणि नैवारैश्चूर्णकैः शुभैः । गौरमृत्तिकया वापि प्रणीतेन च भस्मना ॥ प्रणीत आवसथ्याग्निस्तदीयेन च भस्मना" । तत्र मन्त्रः–"यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति । एवं मण्डलभस्मैतत्सर्वभूतानि रक्षतु" इति ॥*॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति–श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते कातीयश्राद्धसूत्रभाष्ये द्वितीया कण्डिका ॥ २ ॥ ॥ * ॥

उद्धृत्य घृताक्तमन्नं पृच्छत्यग्नौ करिष्य इति कुरुष्वेत्यनुज्ञातः पिण्डपितृयज्ञवद्धुत्वा हुतशेषं दत्त्वा पात्रमालभ्य जपति पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहेति वैष्णव्यर्चा यजुषा वाऽङ्गुष्ठमन्नेऽवगाह्यापहता इति तिलान्प्रकीर्योष्णं स्विष्टमन्नं दद्याच्छक्त्या वाऽश्नत्सु जपेद्व्याहृतिपूर्वां गायत्रीं सप्रणवां सकृत्त्रिर्वा राक्षोघ्नीः पित्र्यमन्त्रान्पुरुषसूक्तमप्रतिरथमन्यानि च पवित्राणि तृप्तान् ज्ञात्वाऽन्नं प्रकीर्य सकृत्सकृदपो दत्त्वा पूर्ववद्गायत्रीं जपित्वा मधुमतीर्मधुमध्वीति च तृप्ताः स्थेति पृच्छति तृप्ताः स्म इत्यनुज्ञातः शेषमन्नमनुज्ञाप्य सर्वमन्नमेकतोद्धृत्योच्छिष्टसमीपे दर्भेषु त्रींस्त्रीन् पिण्डानवनेज्य दद्यादाचान्तेष्वित्येक आचान्तेषूदकं पुष्पाण्यक्षतानक्षय्योदकं च दद्यादघोराः पितरः सन्तु सन्त्वित्युक्ते गोत्रं नो वर्धतां वर्धतामित्युक्ते दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च। श्रद्धा च नो मा व्यगमद्बहुधेयं च नोऽस्त्वित्याशिषः प्रतिगृह्य स्वधावाचनीयान्त्सपवित्रान् कुशानास्तीर्य स्वधां वाचयिष्य इति पृच्छति वाच्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च स्वधोच्यतामित्यस्तु स्वधेत्युच्यमाने स्वधावाचनीयेष्वपो निषिञ्चति ऊर्ज्जमित्युत्तानं पात्रं कृत्वा यथाशक्ति दाक्षिणां दद्याद्ब्राह्मणेभ्यो विश्वेदेवाः प्रीयन्तामिति दैवे वाचयित्वा वाजे वाजेऽवतेति विसृज्यामा वाजस्येत्यनुव्रज्य प्रदक्षिणीकृत्योपविशेत् ॥ ३ ॥ * ॥

कर्कः—उद्धृत्य घृताक्तमन्नं पृच्छत्यग्नौ करिष्य इति—वैश्वदेवादन्नादुद्धृत्य घृतेनाक्तं, ततः पृच्छति अग्नौ करिष्य इत्यनेन मन्त्रेण । श्राद्धार्थं पृथक्पाकमिच्छन्त्यपरे । पिण्डदानेऽनुज्ञावचनात् । स्मृत्यन्तरेऽपि दर्शयति श्राद्धोत्तरकालं, ततो गृहबलिं कुर्यादिति । एतच्च पृथक्पाक एवोपपद्यते, यदि वैश्वदेवान्नेन श्राद्धमपि स्यात् । ततः पूर्वं गृहबलिना भवितव्यम् । तस्मात् पृथक्पाक इति, तदेतदपेशलम् । सर्वार्थस्य विद्यमानत्वात् । पृथक्पाकस्यावचनात् । तथा च स्मृतिः—"पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् । पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥" इति । पितृयज्ञशब्देनोदकतर्पणादि पञ्चमहायज्ञाख्यं कर्मोच्यते । तदेकदेशवचनात् । तत्सम्बन्धित्वादितरेऽपि लक्ष्यन्ते । केचित्तु पितृयज्ञं दार्शिकमभिवदन्ति। तदसत् । न हि पितृयज्ञः सः । किं तर्हि पिण्डपितृयज्ञः सः । तस्मात् पितृयज्ञं निर्वर्त्येति पञ्चमहायज्ञान् कृत्वेत्यर्थः । अतो वैश्वदेवादन्नात् श्राद्धमपि कर्त्तव्यम् । यत्त्वनुज्ञावचनं, सोऽदृष्टार्थोऽन्नसंस्कारः । तृप्तिप्रश्नवत् । यच्च श्राद्धोत्तरकालं गृहबलिर्न स वैश्वदेवः । किंतर्हि अन्य एव वास्तुदेवताभ्यो वैश्वदेवव्यतिरेकेणेति । कुरुष्वेत्यनुज्ञातः पिण्डपितृयज्ञवद्धुत्वा हुतशेषं दत्त्वा पात्रमालभ्य जपति पृथिवी ते पात्रमिति—कुरुष्वेति ब्राह्मणैरनुज्ञातः पिण्डपितृयज्ञवदावसथ्ये जुहोति । पिण्डपितृयज्ञवद्ग्रहणं न कर्त्तव्यम् । पिण्डपितृयज्ञवदुपचार इत्युक्तत्वात्, तस्मात्परिस्तरणादि यथासम्भवमितिकर्त्तव्यतापरिसङ्ख्यानार्थं द्रष्टव्यम्। हुतशेषं दत्त्वा, विशेषा-

नवगमात्सर्वेभ्यो देयम् । पात्रमालभ्य पृथिवी त इत्यमुं मन्त्रं जपेत् । आलभ्य मन्त्रः, न मन्त्रान्ते आलम्भनम् । पात्रस्यैवोद्दिश्यमानत्वात् प्रतिपात्रमालम्भनम् । **वैष्णव्यर्चा यजुषा वाऽङ्गुष्ठमन्नेऽवगाह्यापहता इति तिलान्प्रकीर्योष्णꣳ स्विष्टमन्नं दद्यात्**–नियताक्षरपादावसाना ऋगित्युच्यते । अनियताक्षरपादावसानं यजुः । तयोरन्यतरेण पात्रस्थितेऽन्ने अङ्गुष्ठावगाहनं कर्त्तव्यम् । **अपहता** इत्यनेन मन्त्रेण ब्राह्मणानामग्रतस्तिलान् प्रकिरेत् । रक्षोघ्नत्वात्, उदङ्मुखानाम् । अविशेषादितरेषामपीति चेत् न, स्वत एव रक्षोघ्नत्वात्तेषाम् । उष्णं स्विष्टमन्नं देयम् उष्णग्रहणं न कर्त्तव्यं प्रतिषिद्धत्वादितरस्य । तस्माद्यत्पर्युषितमन्नाद्यं तत्प्रतिषेधायेदमुच्यते । तच्चैतत् ‘‘यवगोधूमजं सर्वं पयसश्चैव विक्रिया । तत्पर्युषितमप्याद्यं स्नेहाक्तं चैव यद्भवेत् ॥’’ अपरे त्वन्यथा वर्णयन्ति ‘‘यावदुष्णं भवेदन्नं तावद्देयम्’’इति । **शक्त्या वा**–स्विष्टाभावे शक्त्या दद्यात्। **अश्नत्सु जपेद्व्याहृतिपूर्वां गायत्रीꣳ सप्रणवाꣳ सकृत्त्रिर्वा राक्षोघ्नीः पित्र्यमन्त्रान् पुरुषसूक्तमप्रतिरथमन्यानि च पवित्राणि**–प्रणवेन महाव्याहृतिभिश्च त्रिर्जपेद्गायत्रीं सकृद्वा, **कृणुष्व पाज इति** रक्षोघ्नीः पञ्च,पित्र्यमन्त्रान् **अग्नये कव्यवाहनायेत्यादीन्**। पुरुषसूक्तं **सहस्रशीर्षा** इति षोडशर्चम्, **अप्रतिरथ आशुः निशान** इति सप्तदश ।अन्यानि च पवित्राणि जपेत् रुद्रप्रभृतीनीति। **तृप्तान् ज्ञात्वाऽन्नं प्रकीर्य सकृत्सकृदपो दत्त्वा पूर्ववद्गायत्रीं जपित्वा मधुमतीर्मधुमध्विति च**–तृप्तान् ज्ञात्वा ब्राह्मणानामग्रतोऽन्नं प्रकिरेत् । सकृत्सकृदपो दद्यात् । वीप्सा ब्राह्मणापेक्षया । गायत्रीं सप्रणवां सव्याहृतिकां सकृत् त्रिर्वा जपित्वा । मधुमतीरिति **मधुव्वाता** इति तिस्र ऋच उच्यन्ते । मधुमधु मध्विति च त्रिः । एतच्च केचित् द्विरुच्चारयन्ति, एतावदुपदेशात् । तदयुक्तम् । यतः प्रावर्गिकस्य मन्त्रस्यायमुपदेश इति । तस्मात् त्रिरुच्चारणम्।**तृप्ताः स्थेति पृच्छति**–ब्राह्मणान् पङ्क्तिमूर्धन्यं वा । केचित् तृप्तिप्रश्नस्य तृप्तिसंवेदनार्थत्वात्सर्वे प्रष्टव्या इति मन्यन्ते । तदन्याय्यम् । अदृष्टार्थत्वात् प्रश्नस्य । कथमदृष्टार्थता । तृप्तिसंवेदनस्य प्रयोजनाभावात् । अतृप्तेभ्यः पुनर्दीयत इति चेन्न, उन्मुक्तपात्रत्वात् । यच्च सकृत्सकृदपोदानं तत्पात्रोन्मोचनायैव । तस्मादानियम इत्यपरे । तस्मिन्पक्षे तृप्ताः स्थेति बहुवचनं पूजार्थं द्रष्टव्यम् । अत्रोच्यते सत्यपि धर्ममात्रत्वे बहुवचनान्तोपदेशात्सर्वे प्रष्टव्याः, अवगमात् । अवगम्यते हि मन्त्रोच्चारणाबलात् बहुत्वम् । नचावगम्यमानोऽर्थः शक्योऽपनेतुम् । तस्मात्सर्वेप्रष्टव्याः । यत्तु‘‘पङ्क्तिमूर्धन्यं पृच्छति’ इति तदबहुवचनान्तेषु कृतार्थम्। अग्नौ करिष्य इत्येवमादौ चिन्तायाः प्रयोजनं सर्वेषां प्रति प्रश्नः । **तृप्ताः स्म इत्यनुज्ञातः शेषमन्नमनुज्ञाप्य सर्वमन्नमेकतोद्धृत्योच्छिष्टसमीपे दर्भेषु त्रींस्त्रीन् पिण्डानवनेज्य दद्यात्**–तृप्ताः स्म इति ब्राह्मणैरनुज्ञातः शेषमन्नमनुज्ञाप्य शेषस्यान्नस्यानुज्ञां दापयित्वा सर्वमन्नमेकस्मिन्पात्रे उद्धरेत् । स चायं सर्वशब्दः शालिसूपापूपापेक्षया, न तु यावत्परिमाणं किञ्चित्सिद्धं तत्सर्वमिति । उच्छिष्टसमीप इति स देशो लक्ष्यते नोच्छिष्टमेव प्रतिषिद्धत्वात्तस्य । दर्भेषु त्रींस्त्रीन् पिण्डानवनेज्य दद्यादिति । दर्भग्रहणमिहोपमूलसकृदाच्छिन्नोपलक्षणार्थम् । ‘‘पिण्डापितृयज्ञवदुपचारः’’ इति सूत्रतत्त्वात् । परिसङ्ख्यानार्थमिति चेन्न, उच्छिष्टसमीपोपदेशात् । त्रींस्त्रीन् पिण्डानिति वीप्सा मातामह-

विषया । **आचान्तेष्वित्येके**–उभयशास्त्रत्वाद्विकल्पः। **आचान्तेषूदकं पुष्पाण्यक्षतानक्षय्योदकं च दद्यादित्येवमादि बहुदेयं च नोऽस्त्वित्येवमन्तं सूत्रम्**–आचान्तेषु ब्राह्मणेषु तेभ्य उदकादिदानम् । तच्च पूर्वं दैवे । ततोऽपसव्यं पित्र्ये। पित्र्येऽपि केचित्सव्येनेच्छन्ति दानसंयोगात् । तन्न, "पिण्डपितृयज्ञवदुपचारः"इति ह्युपदेशात् । अक्षय्योदकदानं तु पित्र्य एव औचित्यात् । दैवस्य स्वत एव रक्षोघ्नत्वात्।"अघोराः पितरः सन्तु"इतीमं मन्त्रमुदाहरेत्। सन्त्विति प्रत्युक्ते गोत्रं नो वर्धतामित्याह वर्धतामित्युक्ते दातारो नोऽभिवर्धन्तामिति ब्रूयात् । **आशिषः प्रतिगृह्य स्वधावाचनीयान्त्सपवित्रान् कुशानास्तीर्य स्वधां वाचयिष्य इति पृच्छति**–स्वधावाचनीया नाम कुशाः, ते च सपवित्राः साग्रा भवन्तीत्यर्थः । **वाच्यतामित्यनुज्ञातः पितृभ्य इति**–इमं मन्त्रमुदीरयेत् । **अस्तु स्वधेत्युच्यमाने स्वधावाचनीयेष्वपो निषिञ्चत्यूर्जमिति**–अस्तु स्वधेति ब्राह्मणैरुच्यमाने स्वधावाचनीयेषु कुशेष्वपो निषिञ्चेत् ऊर्जमिति मन्त्रेण । **उत्तानं पात्रं कृत्वा यथाशक्ति दक्षिणां दद्याद्ब्राह्मणेभ्यः**–निगदव्याख्यातम्। **विश्वेदेवाः प्रीयन्तामिति दैवे वाचयित्वा वाजे वाजे बतेति विसृज्य**–वाजे वाजे बत इत्यनेन मन्त्रेण विप्रान् विसर्जयेत् । **आमा वाजस्येति**–अनेन अनुव्रजेत् । **प्रदक्षिणीकृत्य**–नमस्कृत्य च । **उपविशेत् ॥ ॥ ३ ॥ ॥ * ॥**

गदा०–**उद्धृत्य घृताक्तमन्नं पृच्छत्यग्नौ करिष्य इति**–वैश्वदेवादन्नादुद्धृत्य घृताक्तमन्नं घृतप्लुत पात्रान्तरे कृत्वा ततः पृच्छति, 'अग्नौ करिष्ये' इत्यनेन मन्त्रेण । प्रश्नस्वरूपनिर्देशार्थ इतिकारः । अतश्च पर्यायान्तरेण प्रश्नाभावः । घृताक्तमिति निष्ठा भूतेऽर्थे । ततश्चाधिश्रितस्यैवाभिघारणम् । श्रुतिः–"ताꣳ श्रपयति तस्मिन्नधिश्रित आज्यं प्रत्यानयत्यग्नौ वै देवेभ्यो जुह्वत्युद्धरन्ति मनुष्येभ्योऽथैवं पितॄणाम् " इति पिण्डपितृयज्ञे हेतूपन्यासात् । पित्र्यत्वस्यात्रापि तुल्यत्वात् । घृताक्तग्रहणं सूपशाकादिनिवृत्त्यर्थम् । तथा च विष्णुपुराणे–"जुहुयाद्व्यञ्जनक्षारवर्जम्" इति । **कुरुष्वेत्यनुज्ञातः पिण्डपितृयज्ञवद्धुत्वा हुतशेषं दत्त्वा पात्रमालभ्य जपति पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहेति**—ततः पङ्क्तिमूर्द्धन्येन सर्वैर्वा कुरुष्वेत्यनुज्ञातः पिण्डपितृयज्ञवद्धुत्वा हुतशेषं ब्राह्मणभाजनेषु दत्त्वा पात्रमालभ्य समन्तात्स्पृष्ट्वा **पृथिवी** त इति मन्त्र जपेत् । पात्रमालभ्य जपः, न तु मन्त्रान्ते आलभेत, पात्रस्योद्देश्यमानत्वात्प्रतिपात्रमालम्भनम् । " पिण्डपितृयज्ञवदुपचारः " इत्यनेन पिण्डपितृयज्ञातिदेशश्चोक्तः, पुनः पिण्डपितृयज्ञग्रहणं परिस्तरणादिपदार्थनिवृत्त्यर्थं द्रष्टव्यम् । होममात्रस्यात्रातिदेशः । स चायमग्नौकरणहोमः साग्निनाऽऽवसथ्येऽग्नौ कर्त्तव्यः । तथा च **याज्ञवल्क्यः**–" कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही । दायकालाहृते वाऽपि श्रौतं वैतानिकाग्निषु ॥" इति । स्मार्तमत्र श्राद्धं तदङ्गभूत अग्नौकरणहोम आवसथ्येऽग्नौ भवति । न च प्रकृतिविकृतिभावेनास्य श्रौतत्वम् । कार्यातिदेशात् । स्वरूपातिदेशे तु अवहननफलीकरणपूर्वकचर्वादिप्रवृत्तिरपि स्यात् । कार्यातिदेशे तु पुनरितिकर्त्तव्यतामात्रमेव प्राप्नुयात् । अतः स्मार्तत्वादावसथ्याग्नावेव होमः । "आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः" इति यन्मार्कण्डेयेनोक्तं तत्सर्वाधानपक्षे ज्ञातव्यम् । "आहृत्य दक्षिणाग्निं तु होमार्थं वै प्रयत्नतः । अग्न्यर्थं लौकिकं वापि जुहुयात्कर्मसिद्धये' इति **वायुपुराणीयम**पि औपवसथ्याहरणपक्षे वेदितव्यम् । अग्न्यभावे **मनुराह**–"अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् । यो ह्यग्निः स द्विजो विप्रैर्मन्त्रदर्शिभिरुच्यते॥" इति । **कात्यायनः**–"पित्र्ये यः पङ्क्तिमूर्धन्यस्तस्य पाणावनग्निकः । हुत्वा मन्त्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत् ॥" इति । द्विजाभावे **मत्स्यपुराणे**–" अग्न्यभावे तु विप्रस्य पाणौ वाऽथ जलेऽपि वा । अजकर्णेऽश्वकर्णे वा गोष्ठे वाऽथ शिवान्तिके॥" इति । पाणिहोमपक्षे अनुज्ञावचने न रतः प्रतिष्ठितत्वात् । हुतशेषदाने विप्रतिपत्तिः । "हुतशेषं [illegible] न देयम्" इति **कर्काचा-**

येमतम् । **कल्पतरुहेमाद्रिमिताक्षराकाराणां**मते पित्र्य एव । एतदुभयं समूलम् । **शाठयायनिः**--हुतशेषं पूर्वं दैव दत्त्वा पश्चात्पित्र्ये दद्यात्'' इति । **यमः**--"अग्नौकरणशेषं तु पित्र्ये तु प्रतिपादयेत् । प्रतिपाद्य पितॄणां तु न दद्याद्वैश्वदेविके ॥ '' इति । **धर्मप्रदीपके**-- "अग्न्यभावे तु विप्रस्य हस्ते हुत्वा तु दक्षिणे । शेषयेत्पितृविप्रार्थं पिण्डार्थं शेषयेत्ततः ॥'' इति । पात्रमालभ्य जपतीत्यत्र पात्रस्थान्नालम्भ इति केचित् । तदतीव मन्दम् । यथा "गार्हपत्यमुत्तरेणोदपात्रं निधायालभते'' इत्यत्र **कर्काचार्यैः** पात्रालम्भ उक्तस्तथाऽत्रापि पात्रालम्भ एव । **ब्रह्मपुराणे** विशेषः-- "दक्षिणं तु करं कृत्वा वामोपरि निधापयेत् । दैवं पात्रमथालभ्य पृथिवी ते पात्रमुच्चरन् ॥ दक्षिणोपरि वामं च कृत्वा पित्र्यपात्रस्यालम्भनम्'' इति । पृथिवी ते पात्रमित्यस्यार्थः । हे अग्नौकरणशेष ते तव पात्रम् आधारः पृथिवी विश्वाधारभूता, अपिधानं द्यौः आकाशं त्वाममृतं हुत-शेषं ब्राह्मणस्य मुखे जुहोमि । किंलक्षणे अमृते अभक्ष्यभक्षणादिभिरदूषित इत्यर्थः । ब्राह्मणस्य मुखे अग्निसदृशे त्वाममृतं जुहोमीति वाक्यार्थः । ब्राह्मणस्याग्निसदृशत्वमाह **आपस्तम्बः**--" पितरोऽत्र देवता ब्राह्मणस्त्वाहवनीयार्थः'' इति । **वैष्णव्यर्चा यजुषा वाऽङ्गुष्ठमन्नेऽवगह्यापहता इति तिलान्विकीर्य**--वाशब्दो विकल्पार्थः । नियताक्षरपादावसाना ऋक् । अनियताक्षरपादावसानं यजुरुच्यते । अत्र ऋग् इदं विष्णुः । विष्णो हव्यं रक्षस्वेति यजुः । "इदं विष्णुः'' इति "अन्ने द्विजाङ्गुष्ठं निवेशयेत्'' इति वचनात् तयोरन्यतरेण ब्राह्मणभाजनस्थिते अन्ने द्विजाङ्गुष्ठमधोमुखं निवेश्यापहता इति मन्त्रेण ब्राह्मणानामग्रतो भूमावेव तिलान्प्रकिरेत् । "रक्षोघ्नत्वादुदङ्मुखानाम्'' इति **कर्कः** । अविशेषादितरेषामपीति केचित् । तन्न, स्वत एव रक्षोघ्नत्वात्तेषाम् । परिवेषणमाह--**उष्णठं स्विष्टमन्नं दद्यात्**--यावदुष्णं भवेदन्नं तावद्देयम् । स्विष्टं यद् ब्राह्मणाय प्रेताय कर्त्रे वा रोचते । अन्नं भक्ष्यभोज्यलेह्यचोष्यपेयात्मकं पञ्चविधम् । यद्यप्यत्र **सूत्रकृता** सामान्येनोक्तमन्नं दद्यादिति, तथापि **स्मृत्यन्तराद्धविष्यं**, व्रीहिशालियवगोधूममुद्गमाषमुन्यन्नकालशाकशुण्ठीमरिचाहिङ्गुगुडशर्कराकर्पूरसैन्धवसम्भारपनसनारिकेलकदलीबदरगव्यपयोदधिघृतपायसमधुमांसप्रभृतीनि दद्यात् । "सस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते । आमान्नं विषद्ज्ञेयं पक्वमन्नमुदाहृतम्''इति परिभाषणात्केचिदत्र पक्वमेवान्नमित्याहुः । परिवेषणं तूभाभ्यामपि हस्ताभ्यामादाय कुर्यात् । तदुक्तं **मनुना**--"उभाभ्यामुपसंगृह्य स्वयमन्नस्य वर्द्धितम्'' इति । विशेषमाह--**कार्ष्णाजिनिः**--"अपसव्येन कर्तव्यं पित्र्यं कृत्यमशेषतः । अन्नदानादृते सर्वमेवं मातामहेष्वपि ॥'' इति । " अपसव्येन यस्त्वन्नं ब्राह्मणेभ्यः प्रयच्छति । विष्ठामश्नन्ति पितरस्ते च सर्वे द्विजोत्तमाः'' इति । तदेतद्दानं परिवेषणमेव । **शक्त्या वा**--स्विष्टान्नाभावे यदन्नमेव शक्त्या दातुं शक्यते तद्देयमित्यर्थः । अस्मिन्समये अन्नसंकल्पः कार्यः । तत्रैवं प्रयोगः । इदमन्नं 'यद्दत्तं यच्च दास्यमानं तृप्तिपर्यन्तं तत्सर्वं विश्वेभ्यो देवेभ्यः स्वाहा । ततोऽमुकसगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्योऽमुकामुकशर्मभ्यो वसुरुद्रादित्यस्वरूपेभ्यः इदमन्नं यद्दत्तं यच्च दास्यमानं तृप्तिपर्यन्तं तत्सर्वं तेभ्यः स्वधेति । मातामहानामप्येवं संकल्पं कुर्यात् । यद्यप्यत्र ब्राह्मणहस्तेषूदकदानमाम्नातं नास्ति, तथापि शाखान्तरसूत्रात्कर्तव्यम् । द्विजैश्च पर्युक्षणादिप्राणाहुत्यन्ताः सर्वेऽपि भोजननियमा विधेयाः । केवलं भूमौ बलिहरणमेव न कार्यम् । तत्र बलिहरणे महादोषश्रवणात् । **अश्नत्सु जपेद्व्याहृतिपूर्वां गायत्रीं सप्रणवां सकृत्त्रिर्वा राक्षोघ्नीः पित्र्यमन्त्रान्पुरुषसूक्तमप्रतिरथमन्यानि च पवित्राणि**--एकवारमिति सकृत्, करत्रयमिति त्रिः । अत्र संख्याभ्यावृत्तिगणनेऽर्थे " द्वित्रिचतुर्भ्यः सुच्'' इति सूत्रेण सुचोऽपवादत्वेन त्रीत्यस्याग्रे सुच्प्रत्ययः । " एकस्य सकृच्च '' इति सूत्रेणैकस्य सकृदादेशः । सुच्प्रत्ययश्चोक्तार्थे । अश्नत्सु ब्राह्मणेषु व्याहृतिपूर्वां गायत्रीं सप्रणवां सकृत्त्रिर्वा जपेत् संहितास्वरेण पठेत् । तत्रायं क्रमः । " प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम् । सावित्री चानुपूर्व्येण ततो वर्णान्समुच्चरेत् ॥'' राक्षोघ्नीः--**कृणुष्व पाज** इत्याद्याः पञ्चर्चः । पित्र्यमन्त्रा**नुदीरतामवर** इत्यादिकास्त्रयोदशर्चः । पुरुषसूक्तं-**सहस्रशी**र्षेत्यादिकाः षोडशर्चः । अप्रतिरथम्--**आशुः शिशान** इत्याद्याः सप्तदशर्चः द्वादशर्चो वा । अन्यानि रुद्रप्रभृतीनि । **अग्नये कव्यवाहनाय स्वाहे**त्यादीन्पित्र्यमन्त्रान् जपेत् । अत्र च व्यपदेशस्तानस्वरबाधनार्थः । **मनुः**--" स्वाध्यायं श्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हि'' इति । **मत्स्यपुराणे** विशेषः--" ब्रह्मविष्ण्वर्करुद्राणां स्तोत्राणि विविधानि च । इन्द्रेशसोमसूक्तानि पावमानीश्च शक्तितः ॥ बृहद्रथन्तरं तद्वज्ज्येष्ठसाम सरौरवम् । मण्डलब्राह्मणं तद्वत्प्रीतिकारी च यत्पुनः । विप्राणामात्मनश्चैव तत्सर्वं समुदीरयेत् ॥'' इन्द्रादिसूक्तानि च ऋग्वेदे प्रसिद्धानि । **पुनन्तु मे**त्याद्याः पावमान्यः ।

त्वामिद्धि हवामह इत्यस्यामृचि गीयते यत्तद् बृहत्साम । **आभि त्वा शूर नोनुम** इति रथन्तरम्। **"मूर्द्धानं दिव"** इति ज्येष्ठसाम । **पुनानः सोमेति** रौरवम् । **ऋचं वाचमिति** शान्तिकाध्यायः । **यदेतन्मण्डलमित्यग्निरहस्ये** मण्डलब्राह्मणं प्रसिद्धम् । **इयं पृथिवीति बृहदारण्यके** मधुब्राह्मणम् । **गरुडपुराणे**–" यो विष्णुहृदयं मन्त्रं श्राद्धेषु नियतः पठेत् । पितरस्तर्पितास्तेन पयसा च घृतेन च ॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥" इति विष्णुहृदयमन्त्रः । ओ श्रावयेति चत्वारि अक्षराणि, अस्तु श्रौषडिति चत्वारि, यजेति द्वे, ये यजामहे इति पञ्च, वौषडिति द्वे, एतैर्यो हूयते स यज्ञपुरुषो विष्णुर्मम प्रसीदत्वित्यर्थः । एतदनुसारि **शतपथे** वाक्यम् । "तदेतदद्य ज्ञानस्यायातयामो श्रावयेत्यारभ्य ओश्रावयोति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामहे इति पञ्चाक्षरं द्व्यक्षरो वषट्कारः" इति । उक्तजपासम्भवे **मत्स्यपुराणे**–" अभावे सर्वविद्यानां गायत्रीजपमाचरेत्" इति । **तृप्तान् ज्ञात्वाऽन्नं प्रकीर्य सकृत्सकृदपो दत्त्वा पूर्ववद् गायत्रीं जपित्वा मधुमतीर्मधुमधिवति च**–तृप्तान्ब्राह्मणान् ज्ञात्वा ब्राह्मणानामग्रतोऽन्नं विकिरेत् इति । **मनुः**–" सार्ववर्णिकमन्नाद्यं सन्नीयाप्लाव्य वारिणा । परिक्षिपेद् भुक्तवतामग्रतो विकिरन् भुवि ॥" **बृहस्पतिः**–" सोदकं विकिरेदन्नं मन्त्रं चेमं समुच्चरेत् । अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् " इति । तत्रैवं सर्वमन्नमेकत्र पात्रे कृत्वोदकं निषिच्याचामेत् । " ब्राह्मणानामग्रतोऽन्नं प्रकिरेत् " इति **कर्काचार्याः** । " पङ्क्तिमूर्द्धन्यस्योत्तरदिग्भागे अरत्निमात्रे विकिरं दद्यात्"-इति **हेमाद्रिः** । तीर्थश्राद्धे विकिराभावः । सकृत्सकृदादीति वीप्सा ब्राह्मणापेक्षया, तेन वैश्वदेविकद्विजपूर्वकमेकैकस्य पाणौ तु उत्तरापोशनार्थं सकृत्सकृदुदकं दद्यात् । पूर्ववदिति प्रणवेन व्याहृतिभिश्च सर्वां गायत्रीं सकृत्त्रिर्वा जपेत् । **मधुमतीरिति, मधुव्वाता** इति तिस्र ऋच उच्यन्ते, मधुमध्वितिचेति च मधु मधु मध्वित्येवं त्रिरुच्चारणं कर्तव्यम् । **तृप्ताः स्थेति पृच्छति**–तृप्ताः स्थ इत्येवं ब्राह्मणान्प्रति पृच्छति प्रश्नं करोति । अत्र बहुवचनात्सर्वे प्रष्टव्याः । **तृप्ताः स्म इत्यनुज्ञातः शेषमन्नमनुज्ञाप्य सर्वमन्नमेकत उद्धृत्योच्छिष्टसमीपे दर्भेषु त्रींस्त्रीन्पिण्डानवनेज्य दद्यात्**–ततस्तैर्द्विजैस्तृप्ताः स्म इत्यनुज्ञातः शेषमन्नमनुज्ञाप्य उर्वरितस्यान्नस्यानुज्ञां दापयित्वा सर्वमन्नं सर्वप्रकारं माषान्नवर्जं पिण्डपर्याप्तमेकस्मिन्पात्रे उद्धरेत् । दर्भेषु त्रींस्त्रीन्पिण्डानिति दर्भग्रहणमुपमूलसकृदाच्छिन्नोपलक्षणार्थम् । त्रींस्त्रीनिति वीप्सा मातामहाभिप्रायेण । "पिण्डपितृयज्ञवदुपचारः" इति सूत्रितत्वादत्र पिण्डपितृयज्ञवत्पिण्डदानम् । तेनोल्लिखत्यपहता इत्यपरेण वोल्मुकं परस्तात्करोतीत्यारभ्य वयस्युत्तरे यजमानलोमानि वेत्यन्तं लभ्यते । अत्राह **याज्ञवल्क्यः**-"सर्वमन्नमुपादाय सतिलं दक्षिणामुखः । उच्छिष्टसन्निधौ पिण्डान्दद्याद्वै पितृयज्ञवत्॥" इति । अत्र **पदार्थक्रमः** । "उल्लेखनम्, उदकालम्भः, उल्मुकनिधानम्, अवनेजनम्, सकृदाच्छिन्नास्तरणम्, पिण्डदानम् । अत्र पितर इत्युक्त्वोदङ्ङाचमनम् । आवृत्त्य जपः। पुनरवनेजनम् । नीवीविसर्गः । नमो व इति षण्णमस्काराः । सूत्रदानम् । स्मृत्युक्तं पूजनम् ।" इति क्रमः । **आचान्तेष्वित्येके** ॥ एके आचार्याः आचान्तेषु ब्राह्मणेषु पिण्डदानमिच्छन्ति । **आचान्तेषूदकं पुष्पाण्यक्षतानक्षय्योदकं दद्यात्** ॥ ब्राह्मणेषु सत्सु तेभ्य उदकादिकं च दद्यात् । पुष्पाणि चाप्रतिषिद्धानि पद्मोत्पलमल्लिकायूथिकाशतपत्रचम्पकाद्यानि गन्धरूपसम्पन्नान्यन्यान्यपि दद्यात् । तत्रायं प्रयोग उक्तश्छन्दोगपरिशिष्टे । अथात्र भूमिमासिञ्चेत्प्रोक्षितमिति । शिवा आपः सन्त्विति युग्मानेवोदकेन च। सौमनस्यमस्त्विति पुष्पदानमनन्तरम्। अक्षतं चारिष्टं चास्त्वित्यक्षतान्प्रतिपादयेत् । "अक्षय्योदकदानं तु ह्यर्घदानवदिष्यते । षष्ठ्यैव नियतं कुर्यान्न चतुर्थ्यां कदाचन ॥" युग्मानिति वृद्धपरं प्रकरणात् । पित्राद्युल्लेखाभावाद्धस्ते प्रक्षेपमात्रस्य विधानादिदं जलादित्रिकं दैवे पित्र्ये च कार्यम् । "यज्ञोपवीतिना देयम्" इति **शङ्खधराचार्यः** । तथा **शातातपोऽपि**–"ततः पुष्पाणि सव्येन उदकानि पृथक् पृथक् इति" । 'इदं जलादिदानं दैवे सव्येनेति, पित्र्ये त्वपसव्येन' इति **कर्काचार्याः** । हस्ते प्रतिपादितानामपां चिरधारणे प्रयोजनाभावाच्छुचौ देशे स्थापनमेव । पुष्पाणां त्वत्र ब्राह्मणा यजमानायाशिषं प्रयच्छन्ति । **मत्स्यपुराणे**–"आचान्तेषु पुनर्दद्याज्जलपुष्पाक्षतोदकम् । दत्त्वाशीः प्रतिगृह्णीयाद् द्विजेभ्यः प्राङ्मुखो द्विजः ॥" अक्षय्योदकशब्देन दत्तान्नपानादेरानन्त्यप्रार्थनसम्बन्धि जलमभिधीयते । तच्च "पितृब्राह्मणेभ्य एव" इति **कर्कः**। "सर्वेभ्यो दद्यात्" इति **स्मृत्यर्थसारे** । **अघोराः पितरः सन्तु सन्त्वित्युक्ते गोत्रं नो वर्द्धतां वर्द्धतामित्युक्ते दातारो**

नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च। श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्त्विति–आशीःप्रार्थनं प्रपञ्चयति । तत्र यजमानः अघोराः पितरः सन्त्विति ब्रूयात् । ब्राह्मणाश्च सन्त्विति ब्रूयुः । तैस्तथोक्ते यजमानो गोत्रं नो वर्द्धतामित्याह–ब्राह्मणैश्च वर्द्धतामित्युक्ते यजमानो दातारो नोऽभिवर्द्धन्तामिति ब्रूयात्, द्विजैर्वर्द्धन्तामित्युक्ते कर्ता वेदा वर्द्धन्तामिति ब्रूयात् । तैर्वर्द्धन्तामित्युक्ते यजमानः सन्ततिर्वर्द्धतामिति । वर्द्धतामिति ब्राह्मणाः । श्रद्धा च नो मा व्यगमदिति यजमानः, मा गादिति ब्राह्मणाः । बहु देयं च नोऽस्त्विति कर्ता । अस्त्विति ते ब्रूयुः। अत्र **मनुराह** । "दक्षिणां दिशमाकाङ्क्षन्याचेतेमान्वरान्पितॄन् " इति । **आशिषः प्रतिगृह्य स्वधावाचनीयान्सपवित्रान्कुशानास्तीर्य स्वधां वाचयिष्य इति पृच्छति** । उक्तप्रकारेणाशीर्ग्रहणं कृत्वा स्वधावाचनीयसञ्ज्ञकान्सपवित्रान्कुशानास्तीर्य पिण्डसमीपे भूमौ स्तृत्वा स्वधां वाचयिष्ये इति पङ्क्तिमूर्द्धन्यं सर्वान्वा पृच्छेत् । सपवित्रान्साग्रानित्यर्थः । न्युब्जपात्रोपरि स्थितपवित्राण्यर्घपवित्रैः सह समानीय पिण्डानां पश्चिमतो दक्षिणाग्राणि निधाय स्वधां वाचयिष्ये इति पृच्छेदिति **हेमाद्रिः**। सकुशानि पवित्राणि पिण्डानामुपर्यास्तीर्य स्वधां वाचयिष्ये इति पृच्छेदिति **देवयाज्ञिकाः**। **वाच्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो :मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च स्वधोच्यतामिति**–ततस्तैर्द्विजैर्वाच्यतामित्यनुज्ञातः **पितृभ्य** इत्यादिना **स्वधोच्यतामित्येवं** मन्त्रमुदाहरेत् । **अस्तु स्वधेत्युच्यमाने स्वधावाचनीयेष्वपो निषिञ्चत्यूर्जमिति**–अस्तु स्वधेत्युच्यमाने सति स्वधावाचनीयेषूदकं निषिञ्चत्यूर्जमित्यनेन मन्त्रेण । आसेचनप्रयोगानामङ्गाङ्गीभावः । अवसरनिर्देशकत्वाच्छानचः । अतो वृद्धिश्राद्धेऽपि भवति । मन्त्रश्चायं समवेतार्थः । अतोऽस्य मातृश्राद्धे मातृभ्यः पितामहीभ्य इत्याद्यूहः संख्यासमवेतार्थः । अतश्चैकोद्दिष्टेनोहः । **उत्तानं पात्रं कृत्वा यथाशक्ति दक्षिणां दद्यात्** । शक्तिमनतिक्रम्येति यथाशक्ति । अत्र **शातपथी श्रुतिः**। "स एष यज्ञो हतो न*ददक्षे । तं देवा दक्षिणाभिरदक्षयँस्तद्यदेनं दक्षिणाभिरदक्षयँस्तस्माद्दक्षिणा नामेति" । **स्मृतौ**–"गोभूहिरण्यवासांसि कन्याभवनभूषणम् । दद्याद्यदिष्टं विप्राणामात्मनः पितुरेव च" इति । अदक्षिणं च श्राद्धं न कुर्यात् । तथा च **श्राद्धकल्पे**–"न कुर्याद्दक्षिणाहीनं दहेच्छ्राद्धमदक्षिणम्" इति । तथा च **शतपथब्राह्मणे**–"तस्मान्नादक्षिणꣳ हविः स्यात्" इति । **विश्वेदेवाः प्रीयन्तामिति दैवे वाचयित्वा वाजे वाजे वतेति विसृज्य**–वाचायित्वेति कारितत्वादध्येषणा भवति विश्वेदेवाः प्रीयन्तामिति ब्रूहीति । दैवब्राह्मणाश्च विश्वेदेवाः प्रीयन्तामिति ब्रूयुः । ततो **वाजे वाजे वत** इति मन्त्रेण विप्रान्विसर्जयेत् । विसर्जनं तु पितृपूर्वकम् । तथा च **याज्ञवल्क्यः**–"**वाजे वाजे** इति प्रीतः पितृपूर्वं विसर्जयेत्" इति । निमन्त्रणादिपदार्थजातं 'देवपूर्वं' भवति । विसर्जनं तु 'पितृपूर्वम्' इति **मेधातिथिः** । **देवलोऽपि**–"पूर्वमुत्थापयेत्पितॄन्वाच्यतामिति च ब्रुवन् । उत्थिताननुगच्छेत्तु तेभ्यः शेषं च संहरेत् ॥ पश्चात्तु वैश्वदेविकान्विप्रानुत्थापयेत्तथा । एते हि पूर्वमासीनाः समुत्तिष्ठन्ति पश्चिमाः ॥" इति । **आमा वाजस्येत्यनुव्रज्य प्रदक्षिणीकृत्य नमस्कृत्योपविशेत्** -**आमा वाजस्ये**ति मन्त्रेणानुव्रज्यानु पश्चात् द्विजान्सीमान्तं गत्वा प्रदक्षिणीकृत्य स्वगृहं प्रविशेत् ॥ इति गदाधरभाष्ये तृतीयाकण्डिका ॥ ३ ॥ ॥ * ॥

अथ **प्रयोगपद्धतिः** । तत्र कालाः--"अमावास्याऽष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम्" । विषुवत्सूर्यसंक्रमो व्यतीपातो गजच्छाया ग्रहणयुगादिमन्वादयश्च । तथा–विशिष्टे देशे गयादौ, विशिष्टे काले च मृताहादौ, द्रव्यब्राह्मणसम्पत्सु चात्मरुचिश्चेत्याद्याः कालाः ।" अथ **श्राद्धाधिकारिनिर्णयः**। प्रमीतयोः पित्रोर्मुख्यो गौणाश्च पुत्राः श्राद्धं कुर्युः। तदभावे दायहरः । पौत्रः पुत्रिकापुत्रो वा, तदभावे सहोदराः, तत्सन्ततिर्वा, तदभावे-पुरोहितः, तदभावे भृत्याः सुहृदश्च कुर्युः । सर्वाभावे नरपतिस्तज्जातीयैः कारयेत् । "नरपतिः सर्ववर्णानां बान्धवः" इति स्मरणात् । ब्राह्मविवाहोढा साध्वी चेत्पुत्राभावे पत्न्येवाधिकारिणी यदि क्रयक्रीता न भवति । "क्रयक्रीता च या नारी न सा पत्नी विधीयते । न सा दैवे न सा पित्र्ये दासीं तां केवलां विदुः ॥" सर्वाभावे त्वस्या अप्यमन्त्रके श्राद्धेऽधिकारः । एक एव चेत्पुत्रस्तदाऽसावनुपनीतोऽपि कृतचौलश्चेदमन्त्रकं श्राद्धं कुर्यात् ।"अपुत्रायाः पतिर्दद्यात्सपुत्रायाश्च न क्वचित् । पित्रा श्राद्धं न कर्तव्यं पुत्राणां च कदाचन ॥भ्रात्रा चैव न कर्तव्यं भ्रातॄणां च कनीयसाम् । अपि स्नेहेन कुर्याच्चेत्सपिण्डीकरणं विना ॥ गयायां तु विशेषेण ज्यायानपि समा-

---

* न ददक्षे फलं जनयितुं न शशाक इति सायणाचार्यभाष्ये ।

चरेत् ।” धनहारित्वादिनियमाभावे प्रीत्या यस्य कस्यापि वर्णस्य श्राद्धे कृते महत्फलमाह **शातातपः**—“प्रीत्या श्राद्धं तु कर्तव्यं सर्वेषां वर्णलिङ्गिनाम् । एवं कुर्वन्नरः सम्यङ्महतीं श्रियमाप्नुयात् ॥ ब्राह्मणो ह्यसवर्णस्य यः करोत्यौर्द्ध्वदेहिकम् । तद्वर्णत्वमवाप्नोति इह लोके परत्र च ॥ ” दौहित्रेण तु सपिण्डीकरणादिव्यतिरेकेण यदा यदा पितृश्राद्धं तदा तदा मातामहश्राद्धं कर्तव्यमेव । “पितरो यत्र पूज्यन्ते तत्र मातामहा अपि । अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत् ॥” तत्पिण्डपितृयज्ञव्यतिरिक्तविषयम् । अन्वष्टकासु पूर्वं सुरातर्पणेन तथैव पश्चादन्वष्टक्यां त्रिपार्वणं संपिण्डीकरणम् । यः पुनर्धनहारी दौहित्रस्तेन त्ववश्यं नवश्राद्धाद्यपि कार्यमेव । क्षयाहे तु एकपार्वणमेव साग्निकानामेकोद्दिष्टं वा । “ यो यत आददीत स तस्यैव श्राद्धं कुर्यात् ” इति स्मरणात् । “ मातामह्यं नवश्राद्धमवश्यं धनहारिणा” दौहित्रेण कार्यम् । “दौहित्रेणार्थनिष्कृत्यै कर्त्तव्यं विधिवत्सदा । आदेहपतनात्कुर्यात्तस्य पिण्डोदकक्रियाम् ॥ ” यस्तु केवलं मातामहेन सम्बद्धः पुत्रिकापुत्रः स मातामहस्यैव नियमेन श्राद्धं कुर्यात् । पुत्रिकापुत्रश्राद्धे विशेषमाह **मनुः**—“ मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः । द्वितीयं तु पितुस्तस्यास्तृतीयमपि तत्पितुः ॥ ” द्व्यामुष्यायणे पुत्रिकापुत्रे **उशनसो**क्तो विशेषः—“ मातामह्यं तु मात्रादि पैतृकं पितृपूर्वकम् । मातृतः पितृतो यस्मादधिकारोऽस्ति धर्मतः” इति । क्षेत्रजे तु द्व्यामुष्यायणे **देवलो**क्तम् । द्व्यामुष्यायणका दद्युर्द्वाभ्यां पिण्डोदकं पृथक् ” इति । द्वाभ्यां पितृवर्गाभ्यामित्यर्थः । द्विपितुः पिण्डदानं स्यात्पिण्डे पिण्डे द्विनामता । षण्णामत्र त्रयः पिण्डा एकैकं तु क्षयेऽहनि ॥ पोषकः प्रथमः, ततो जनकः अत्र क्रमविशेषमाह । **मरीचिः**—“ सगोत्रो वाऽन्यगोत्रो वा यो भवेद्विधवासुतः । पिण्डश्राद्धविधानं च क्षेत्रिणे प्राग्विनिर्वपेत् ॥ बीजिने तु ततः पश्चात्क्षेत्री जीवति चेत्क्वचित् । बीजिने दद्युरादौ तु मृते पश्चात्प्रदीयते ॥” इति । जीवत्पितृकस्यापि क्वचित्क्वचिच्छ्राद्धाधिकारः । तत्र **मैत्रायणीय**परिशिष्टे विशेषो दर्शितः । “ उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे । तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः ॥” पुत्रस्य श्राद्धकाला इति शेषः । जीवत्पितृकेण आश्विनप्रतिपदि मातामहश्राद्धं फलातिशयप्राप्तये नियमेन कार्यम् । “जातमात्रोऽपि दौहित्रो विद्यमानेऽपि मातुले । कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते॥” इति ॥ अथ श्राद्धार्हब्राह्मणलक्षणम् । तत्र **महाभारते**—“विद्यावेदव्रतस्नाता ब्राह्मणाः सर्व एव हि । सदाचारपराश्चैव विज्ञेयाः सर्वपावनाः ॥ पाङ्क्तेयांस्तु प्रवक्ष्याभि ज्ञेयास्ते पङ्क्तिपावनाः । तृणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् ॥ ब्रह्मदेयानुसन्तानश्छन्दोगो ज्येष्ठसामगः । मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरुषः ॥ ऋतुकालाभिगामी च धर्मपत्नीषु यः सदा । वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत ॥ अथर्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः । सत्यवादी धर्मशीलः स्वकर्मनिरतश्च यः ॥ ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः । मखेषु च समन्त्रेषु भवन्त्यवभृथप्लुताः ॥ अक्रोधना ह्यचपलाः क्षान्ता दान्ता जितेन्द्रियाः । सर्वभूतहिता ये च श्राद्धेष्वेतान्निमन्त्रयेत्॥” इति । यथोक्तगुणा भावे किञ्चिद्धीनगुणाश्च वैश्वदेविकार्थमुपवेशनीयाः । पित्र्ये तु यथोक्तगुणा एव भोज्याः । गयायां तु निर्गुणा अपि तत्रस्था एव द्विजा भोज्याः । यथोक्तद्विजाभावे मातामहमातुलस्वस्रीयश्वशुरदौहित्रजामातृऋत्विग्याज्यशिष्या अपि गुणवन्तश्चेच्छ्राद्धे भोजनीयाः । अथैकस्यापि ब्राह्मणस्यालाभे अनुकल्पान्तरमुक्तं **प्रभासखण्डे**—“अलाभे ब्राह्मणस्यैव कौशः कार्यो बटुः प्रिये । एवमप्याचरेच्छ्राद्धं षड्दैवत्यं समाहितः ॥ विभक्तिं कारयेद्यस्तु पितृहा स प्रजायते । ” कौशः कुशमयो बटुः लघुमनुष्यप्रकृतिः तं बटुं ब्राह्मणत्वेन परिकल्प्य सर्वं श्राद्धं समाचरेत् । विभक्तिः कर्मणश्छेदो लोप इति यावत्, तन्न कुर्यात् । तथा—“पात्राभावेऽखिलं कृत्वा पितृयज्ञविधिं नरः । निधाय वा दर्भबटूनासनेषु समाहितः ॥ प्रैषानुप्रैषसंयुक्तं विधानं प्रतिपादयेत् । सर्वाभावे क्षिपेदग्नौ गवे दद्यादथाप्सु वा ॥ नैव प्राप्तस्य लोपोऽस्ति पैतृकस्य विशेषतः” इति **देवलः** । प्रैषानुप्रैषसंयुक्तमिति श्राद्धं सम्पन्नमित्यादिप्रैषप्रतिवचने स्वयमेव वदेदित्यर्थः । अथ **नियमाः** । मनोवाक्कर्मभिरहिंसा, निमन्त्रितब्राह्मणापरित्यागस्ताम्बूलक्षुरकर्माभ्यञ्जनदन्तधावनपरित्यागश्चेति कर्तृनियमाः । निमन्त्रणमभ्युपगम्यानपक्रमणमन्यत्राभोजनमेकत्रनिमान्त्रितस्यान्येषामन्नादेरप्यग्रहणम् । आहूतस्य कुतपकालाद्यनतिक्रमणम् । इति द्विजनियमाः । निमन्त्रणादुपरि श्राद्धान्नव्यतिरिक्तभोजनपुनर्भोजनासत्यवादिताऽशौचमत्वरितत्वमतौ स्वदारेष्वपि नियुक्तस्यापि मैथुनाकरणं विशेषतः शूद्रायाः परिहरणम् । श्रमस्वाध्यायक्रोधक्रौर्यकलहद्यूतभारोद्वहनप्रतिग्रहप्रमादमदमोहलोभाहङ्कारकार्पण्यस्तेयवर्जनम् । इत्युभयनियमाः । अथ श्राद्ध-

दिनात्प्राचीनदिनकृत्यम् । तत्र कर्ता स्वगृहे निरामिषं भुक्त्वा ब्राह्मणनिमन्त्रणं प्रदोषान्ते करोति । विष्णुस्मरणं प्राणायामत्रयं कृत्वा यज्ञोपवीती उदङ्मुखः प्राङ्मुखस्य द्विजस्य दाक्षिणं जानूपस्पृश्य ॐ दैवे क्षणः क्रियतामिति वदेत् । ॐ तथेति प्रत्युक्तिः । प्राप्नोतु भवानित्युक्ते प्राप्तवानीति प्रत्युक्तिः । तत **अक्रोधनै**रित्यादि श्रावयेत् । एवं मातामहविश्वेदेवसम्बन्धिनिमन्त्रणम् । ततः प्राचीनावीती दाक्षिणाभिमुख उदङ्मुखाद्विजस्य दक्षिणं जानूपस्पृश्य ॐ अमुकगोत्रस्यामुकशर्म्मणोऽस्मत्पितुः सपत्नीकस्य श्राद्धे क्षणः क्रियतामित्यादि । एवमयं पितुरयं पितामहस्यायं प्रपितामहस्येत्यादिनिर्द्धारणं कृत्वा मातामहद्विजान्निमन्त्रयेत् । यावत्संख्याश्च पितृद्विजास्तावत्संख्या एव मातामहद्विजास्तथैव निमन्त्रणीयाः । तत "अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः । भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥" इति नियमाञ्छ्रावयेत् । तन्त्रेण वा वैश्वदेविकम् । इति श्राद्धदिनात्प्राचीनदिनकृत्यम् । पूर्वदिने निमन्त्रणासम्भवे श्राद्धादिने प्रातर्निमन्त्रणम् । अथ **श्राद्धदिनकृत्यम** । तत्र दन्तधावनवर्जं प्रातःकालिकं कर्म कृत्वा उद्वर्त्तनद्रव्यस्नानीयतिलामलककल्कांस्ताम्रपात्रे सम्भृतान्कृत्तश्मश्रुनखेभ्यो निमन्त्रितद्विजेभ्यो देवपूर्वकं प्रेष्यद्वारा दापयेत् । ततः पाकभूमेर्गोमयोपलेपादिसंस्कारकरणं महानसे च । सचैलस्नातः सपत्नीको यजमानः स्वयम्पाकमारभेत । असम्भवे तु शुचिभिः स्नातैः सवर्णैर्वा कारयेत् । ततः श्राद्धसम्भारोपकल्पनम् । अथाह्नः षष्ठे मुहूर्ते नद्यादौ नित्यस्नानं ततः कर्माङ्गस्नानम् । ततः श्राद्धार्थमुदकमानीय पत्न्या सह शुचिः शुक्लवासाः श्राद्धदेशमागत्योदकं स्थापयेत् । अथापराह्णकृत्यम् । तत्रागतान्द्विजान्दृष्ट्वा भवतां स्वागतमिति प्रत्येकं ब्रूयात् । सुस्वागतमिति द्विजैर्वक्तव्यम् । ततस्तेभ्य उदकदानम् । मण्डलकरणम् । आचमनार्थं जलदानम् । तैश्चाचमनकरणम् । ततो यजमानस्य पादप्रक्षालनपूर्वकं द्विराचमनम् । ब्राह्मणानामुपवेशनम् । अस्मिन्नवसरे दीपानां स्थापनम् । ततः कर्तोपविश्य "गङ्गायै नमः, गदाधराय नमः" इति वदेत् । पुण्डरीकाक्षं स्मृत्वा "देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥" इति त्रिः पठेत् । तत अद्येत्यादिकालज्ञानं कृत्वा, अमुकसगोत्राणामस्मत्पितृपितामहप्रपितामहानां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां तथा मातामहादीनां सङ्कीर्तनं कृत्वा पार्वणद्वयविधिनाऽमुकनिमित्तं श्राद्धं करिष्य इति सङ्कल्पं कुर्यात् । ततो "निहन्मि सर्वं यदमेध्यमत्र निहन्मि सर्वानपि दानवासुरान् । यक्षाश्च रक्षांसि पिशाचगुह्यका हता मया यातुधानाश्च सर्वे" इति पठेत् । नीवीबन्धनम् । ततः "तिला रक्षन्त्वसुरान् दर्भा रक्षन्तु राक्षसान् । पङ्क्तिं वै श्रोत्रियो रक्षेदातिथिः सर्वरक्षकः ॥" इति द्वारि तिलकुशनिक्षेपः । "अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् । तथा बर्हिषदः पान्तु याम्यां ये पितरस्तथा ॥ प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः । ऊर्ध्वतस्त्वर्यमा रक्षेत्कव्यवाडनलोऽप्यधः ॥ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः । सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥" इति यथालिङ्गं दिशि दिशि तिलान्प्रकिरेत् । रक्षोभूतेति सर्वतः प्राकिरणम् । ततः कर्मार्थं जलाभिमन्त्रणं दर्भैरालोडयन् **यद्देवा** इति त्र्यृचेन । अत ऊर्ध्वं जलकार्यमनेन । दुष्टदृष्टिनिपातनादिदूषितः पाकः पूतो भवत्विति पाकप्रोक्षणम् । सव्यम् । पुरूरवार्द्रवसञ्ज्ञकानां विश्वेषां देवानामिदमासनम् । हस्तप्रक्षालनम् । अपसव्यम् । गोत्राणां पितृपितामहप्रपितामहानाममुकामुकशर्म्मणामिदमासनम् । हस्तप्रक्षालनम् । एवं मातामहादीनाम् । सव्यम् । पुरूरवार्द्रवसञ्ज्ञकान्विश्वान्देवानावाहयिष्ये, इति प्रश्नः । आवाहयेति प्रत्युक्तिः । दाक्षिणं जान्वालभ्य **विश्वेदेवास** इत्यावाहनम् । यवविकिरणम् । **विश्वेदेवाः शृणुतेममिति** जपः । **आगछान्त्वि**त्यपि जपेत् । अपसव्यम् । अमुकगोत्रान्पितृनावाहयिष्ये, इति प्रश्नः । आवाहयेति प्रत्युक्तिः । **उशन्तस्त्वे**त्यावाहनम् । तिलविकिरणम् । **आयन्तु न** इति जपः । एवं मातामहादीनामावाहनम् । ततः सव्यं कृत्वा वैश्वदेविकं पात्रं निधाय पवित्रान्तर्हिते **शं नो देवीरिति** जलमासिच्यापसव्यं कृत्वा पितृपात्राणि निधाय पवित्रान्तर्हितेषु **शं नो देवीरिति** जलासेकः । सव्यम् । "यवोऽसि धान्यराजो वा वारुणो मधुसंयुतः । निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतः" इति देवपात्रे यवप्रक्षेपः । **यवोऽसि यवये**ति मन्त्रेण वा यवप्रक्षेपः । तिलपक्षे तु **तिलोऽसी**ति मन्त्रेण । **तिलोऽसी**ति पितृपात्रेषु मन्त्रावृत्त्या तिलप्रक्षेपः । सर्वपात्रे चन्दनपुष्पप्रक्षेपो देवपितृधर्म्मेण । सव्यम् । वैश्वदेविकपवित्रदानम् । पूजनम् । **या दिव्या** इत्यर्घदानम् । एवं सर्वत्र । प्रथमे पात्रे संस्रवान्समवनीय पितृभ्यः स्थानमसीति पात्रन्युब्जीकरणम् । तदुपरि कुशानिधानम् । पुत्रकामश्चेत्संस्रववन्दनम् **आपः शिवा** इति । ततो गन्धादिदानम् ।

तत्रैवम् । सव्यम् । यथादत्तं गन्धाद्यर्चनं पुरूरवार्द्रवसञ्ज्ञकेभ्यो विश्वेभ्यो देवेभ्यः स्वाहा । अपसव्यं कृत्वैवं पितृभ्यो दानम् । आचमनम् प्राणायामः । ब्राह्मणाग्रे भाजनानि निधाय उक्तप्रकारेण मण्डलानि कुर्यात् । अपसव्यम् । अन्नमुद्धृत्य अग्नौकरिष्ये इति प्रश्नः । कुरुष्वेति प्रत्युक्तिः । ॐ अग्नये कव्यवाहनाय स्वाहा । इदमग्नये कव्यवाहनाय न मम । ॐ सोमाय पितृमते स्वाहा । इदं सोमाय पितृमते न ममेति द्वयोस्त्यागौ । " स्वयङ्कर्तृके त्यागाभावः " इति हेमाद्रिपद्धतौ । हुतशेषं पात्रे दत्त्वा पात्रमालभ्य जपति " पृथिवी ते " इति प्रतिपात्रं मन्त्रावृत्तिः । वैष्णव्यर्चा यजुषा वाऽन्नेऽङ्गुष्ठावगाहनम् । तिलविकिरणम् । परिवेषणम् । सङ्कल्पः पूर्वोक्तप्रकारेण । सकृत्सकृदुदकदानं विप्रहस्तेषु । ततोऽश्नत्सु जपो यथोक्तः । तृप्तान् ज्ञात्वोक्तप्रकारेणान्नप्रकिरणम् । आचमनम् । सकृत्सकृदुदकदानं विप्रहस्तेषु । पूर्ववद्गायत्रीजपः । मधुव्वाता० भवन्तु नः, मधु मधु मधु, इति जपेत् । तृप्ताः स्थेति प्रश्नः । तृप्ताः स्म, इति प्रत्युक्ते शेषमन्नमप्यस्तीति ब्रूयात् । इष्टैः सह भुज्यतामिति प्रतिवचनम् । हेमाद्रिणा कर्कमते पिण्डार्थमुपयुज्यतामिति प्रयोगो दर्शितः । सर्वमन्नमेकत उद्धृत्य उल्लेखनमपहता इति । साग्निकस्य वज्रेण । इतरस्य तु कुशमूलेन । जलस्पर्शः । अग्निमत उल्मुकनिधानं प्रतिपार्वणम् । अमुकगोत्र पितरमुकशर्मन्नित्यवनेजनम् । एवं पितामहप्रपितामहयोर्मातामहादीनां च । सकृच्छिन्नास्तरणम् । अमुकगोत्र पितरमुकशर्म्मन्नेतत्तेऽन्नं स्वधेति पिण्डदानम् । इदममुकाय न ममेत्येवमुभयत्र । सर्वत्र मातामहानामप्येवमेव विधेयम् । अत्र पितर इत्युक्त्वा उदङ्ङातमनम् । आवृत्त्यामीमदन्तोति जपः । पूर्ववदवनेजनम् । नीवीविसर्गः । नमो व इति षडञ्जलिकरणम् । एतद्व इति सूत्रदानम् । पञ्चाशद्वर्षादूर्द्ध्वं यजमानहृदयलोम्नां वा दानम् । पिण्डपूजनम् । चन्दनपुष्पधूपदीपनैवेद्यानि गोत्रेभ्यः पितृपितामहप्रपितामहेभ्यः स्वधेति । एभिः पिण्डदानैरस्मत्पितॄणामक्षय्या तृप्तिरस्तु । काले श्राद्धं भवतु इति प्रार्थना । आचमनम् । सुप्रोक्षितोऽयं देशोऽस्त्विति जलेन भूमिं सिञ्चेत् । शिवा आपः सन्त्विति उदकदानं ब्राह्मणेभ्यः । सौमनस्यमस्त्विति पुष्पदानम् । अक्षतं चारिष्टं चास्त्वित्यक्षतदानम् । अमुकगोत्रस्य पितुरमुकशर्म्मणो दत्तं श्राद्धमुदकं चाक्षय्यमस्तु । एवं पितामहप्रपितामहयोः । ततो द्विजानां प्रार्थना । येषामुद्दिष्टं तेषामक्षय्यमस्तु । अस्त्विति प्रत्युक्तिः । अघोराः पितरः सन्त्विति प्रश्नः । सन्त्विति प्रत्युक्तिः । गोत्रं नो वर्द्धतामिति प्रश्नः । वर्द्धतामिति प्रत्युक्तिः । दातारो नोऽभिवर्द्धन्तामिति प्रश्नः । वर्द्धन्तामीति प्रत्युक्तिः । वेदा वर्द्धन्तामिति प्रश्नः । वर्द्धन्तामिति प्रत्युक्तिः । सन्ततिर्वर्द्धतामिति प्रश्नः । वर्द्धतामिति प्रत्युक्तिः । श्रद्धा च नो मा व्यगमत् । मा गादिति प्रत्युक्तिः । बहु देयं च नोऽस्तु, अस्त्विति प्रत्युक्तिः । पात्रोपरि स्थापितकुशानां भूमावास्तरणम् । ततः स्वधापितॄन्वाचयिष्ये इति प्रश्नः । वाच्यतामित्युक्ते । पितृभ्यः स्वधोच्यतां पितामहेभ्यः स्वधोच्यतां प्रपितामहेभ्यः स्वधोच्यतां मातामहेभ्यः स्वधोच्यतां प्रमातामहेभ्यः स्वधोच्यतां वृद्धप्रमातामहेभ्यः स्वधोच्यताम् इति मन्त्रं पठेत् । अस्तु स्वधेति प्रत्युक्ते । आस्तृतकुशेषु ऊर्जमित्युदकासेकः । पात्रोत्तानकरणम् । ततः श्राद्धस्य प्रतिष्ठाऽभिवृद्ध्यर्थं दक्षिणां मुखवासताम्बूलं च विश्वेभ्यो देवेभ्यः स्वाहा इदं वि० नमम । अस्य श्राद्धस्य प्रतिष्ठासिद्ध्यर्थं दक्षिणां मुखवासताम्बूलं चामुकगोत्रेभ्य इत्यादि स्वधा न ममेति त्यागः । विश्वेदेवाः प्रीयन्तामिति वदेत् । प्रीयन्तामिति प्रत्युक्तिः । विश्वेदेवाः शान्तिदाः पुष्टिदा वरदा भवन्तु । भवन्त्विति द्विजाः । अन्नं च नो बहु भवेत् । बहु भूयात् । अतिथींश्च लभेमहि, लभध्वम् । याचितारश्च नः सन्तु, सन्तु । मा च याचिष्म कंचन । मा याचेथाः । एता एवाशिषः सन्तु । इति प्रार्थना । ततः । स्वयमेव तिलककरणम् । पिण्डानां प्रत्यवधानम् । सव्यम् । पिण्डावघ्राणम् । सकृदाच्छिनानामग्नौ प्रक्षेपः पश्चादुल्मुकस्य च । भोजनपात्राणि चालयित्वा सञ्चराभ्युक्षणम् । कालज्ञानं कृत्वा अमुकपितॄणां कृतस्य श्राद्धविधेर्यन्न्यूनातिरिक्तं तत्परिपूर्णमस्तु । अस्तु परिपूर्णमिति ब्राह्मणोक्तिः । वाजे वाजे–इति पितृपूर्वं विसर्जनम् । आमा वाजस्येत्यनुव्रज्य प्रदक्षिणीकृत्य नमस्कृत्य गृहप्रवेशः ॥ ॥ * ॥

अथ साग्निकनिरग्निकादीनां दर्शाष्टकादिश्राद्धे निमित्ततः पिण्डाभाव उच्यते । तदाह कार्ष्णाजिनिः–" मौञ्जीबन्धाद्विवाहाच्च वर्षार्द्धं वर्षमेव वा । पिण्डान्सपिण्डा नो दद्युः सपिण्डीकरणादृते ॥" अत्र सपिण्डीकरणे पिण्डविधानात्तत्पूर्वेषामुत्क्रान्तप्रभृतीनां श्राद्धानामर्थात्पिण्डदानमनुज्ञातमिति । उद्वाहे कृतेऽपि महालयगयाश्राद्धमृताहेषु पिण्डान्दद्युः । तदुक्तम्–"महालये गयाश्राद्धे मातापित्रोर्मृतेऽहनि । कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वपणं सुतः" इति । गया-

शब्देन तीर्थान्युपलक्ष्यन्ते । मृतेऽहनीति मातापित्रोस्तद्व्यतिरिक्तानामपि च मृताहेऽनुमासिकेपु च—संग्रहेऽपि—“ विवाहोपनयादूर्ध्वं वर्षार्द्धं वर्षमेव वा । न कुर्यात्पिण्डनिर्वापं न दद्यात्करणानि च ॥” करणान्यावाहनार्घादीनि । विवाहादिनिमित्तेनोक्तकालपर्यन्तममावास्याष्टकासु साङ्कल्पिकं श्राद्धं कुर्यात् । श्रुतिबलात्पिण्डपितृयज्ञस्तु भवत्येव । अथ सांवत्सरिके विशेषः । तत्र विभक्ताश्चेत्सर्वे नो चेज्ज्येष्ठपुत्र एव । मातृसांवत्सारिके यथोचित ऊहः कार्यः । यत्र च मात्रा स्वामिचित्यारोहणं कृतं तत्रैकमेव पाकं कृत्वा पितृश्राद्धं पृथक् कृत्वैकबर्हिषि षट् पिण्डान्दद्यात् । विप्रपङ्क्तौ सुवासिनीं चाधिकां भोजयेदिति **श्राद्धभास्करे** । एकदिनेऽनेकश्राद्धप्रसक्तौ पूर्वं पितुः, पश्चात्पितृव्यादीनां श्राद्धं कार्यम् । मृताहे ग्रहणं चेदामेन हेम्ना वा आब्दिकं कार्यम् । क्षयाहे आशौचादिप्रतिबन्धे तदन्ते कर्तव्यम् । मातृपितृक्षयाहे श्राद्धकर्तुः स्त्री स्त्रीकर्तृके वा श्राद्धे सा रजस्वला चेत्पञ्चमेऽहनि श्राद्धं कुर्य्यात् । अथ महालये विशेषः । तत्रोद्देश्या उच्यन्ते । पितृव्यभ्रातृपुत्रपितृष्वसृमातुलमातृष्वसृभार्य्यापितृव्यपुत्रभ्रातृपुत्रभगिनीदुहितृभागिनेयाचार्यश्वशुरश्वश्रूपाध्यायगुरुसखिद्रव्यदशिष्यादय इति । संन्यासिविषये **वायुपुराणे** विशेषो दर्शितः—“संन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथाविधि । महालये तु यच्छ्राद्धं द्वादश्यां पार्वणेन तु ॥” अथ भाद्रपदापरपक्षभरणीश्राद्धे विशेषः । तदुक्तं **मात्स्ये**—“भरणी पितृपक्षे तु महती परिकीर्तिता । तस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत् ॥ तत्र सपत्नीकपितृपितामहप्रपितामहान्सपत्नीकमातामहादींश्चोद्दिश्य साङ्कल्पिकं श्राद्धं कुर्यात् । **भविष्यपुराणे**—“अग्नौकरणमर्घं चावाहनं चावनेजनम् । पिण्डश्राद्धे प्रकुर्वीत पिण्डहीने निवर्तते ॥ पिण्डनिर्वापरहितं यत्र श्राद्धं विधीयते । स्वधावाचनलोपोऽस्ति विकिरस्तु न लुप्यते ॥ अक्षय्यदक्षिणास्वस्तिसौमनस्यं यथास्थितम्” इति । चतुर्दश्यां पित्रादित्रयमध्ये एकस्य द्वयोर्वा विषशस्त्राद्युपघातैर्मृतयोः पितृव्यादेर्वा तथाविधस्यैकोद्दिष्टविधिना श्राद्धं कुर्यात् ॥ इदं चैकोद्दिष्टं सदैवम् । तथाच **संग्रहे**—“ प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टविधानतः । दैवयुक्तं तु यच्छ्राद्धं पितॄणामक्षयं भवेत्” इति । अथ तीर्थश्राद्धे विशेषः । तच्च षट्पुरुषोद्देशेन । तत्र दिग्बन्धनावाहनार्घद्विजाङ्गुष्ठनिवेशनतृप्तिप्रश्नविकिरा न कर्तव्याः । ब्राह्मणपरीक्षा च न कार्या । न च दृष्टिदोषादिविचारः । षट्पुरुषपिण्डदानानन्तरं किंचिद्दूरे हविःशेषेण मातृपितामहीप्रपितामहीभ्यः पिण्डदानमात्रम् । तदनन्तरं मात्रादिपिण्डपूर्वतः कुशेषु ज्ञातिवर्गमुद्दिश्यैको बृहत्पिण्डो दातव्यः । पिण्डानां तीर्थसलिले प्रक्षेपः । अथ नित्यश्राद्धे विशेषः । सङ्कल्पः । पुष्पाक्षतादिभिरासनादिदीपान्तोपचारैर्ब्राह्मणपूजनम् । मण्डलं कृत्वा भाजनानि निधाय परिवेषणम् । पात्रालम्भादिब्राह्मणभोजनान्तं कृत्वा किञ्चिद्दद्यात् । नात्र कर्तृभोक्तृनियमाः । भोज्याद्यशक्तावन्नमुद्धृत्य स्वशक्तितः षोढा विभज्य पितॄनुद्दिश्य त्यजेदिति नित्यश्राद्धम् ॥ इति श्रीत्रिराग्निचित्सम्राट्स्थपति—श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरविरचितकातीयश्राद्धसूत्रपद्धतौ **पार्वणश्राद्धविधिः** ॥ ३ ॥ ॥ * ॥

अथैकोद्दिष्टमेकोऽर्घ एकं पवित्रमेकः पिण्डो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः । सुस्वदितमितीतरे ब्रूयुरुपतिष्ठतामित्यक्षय्यस्थानेऽभिरम्यतामिति विसर्गोऽभिरताः स्म इतीतरे ॥४॥

कर्क०—अथैकोद्दिष्टम्—व्याख्यास्यत इति सूत्रशेषः। तच्चैकमेवोद्दिश्य क्रियत इत्यन्वर्थसञ्ज्ञैषा । एकोऽर्घः—एक एवार्घः स्यात् । एकार्घश्रवणात् पात्रमेकामिति गम्यते । अतः प्रथमशब्दानुपपत्तेः पितृभ्यः स्थानमसीत्यस्यानुपपन्नत्वात् संस्रवबहुत्वाभावाच्च न पात्रन्युब्जता । एकं पवित्रमेकः पिण्डः—एकदेवताकत्वात् पवित्रं तु शास्त्रात् । नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः सुस्वदितमितीतरे ब्रूयुरुपतिष्ठतामित्यक्षय्यस्थानेऽभिरम्यतामिति विसर्गोऽभिरताः स्म इतीतरे—इतरशब्देन ब्राह्मणा अभिधीयन्ते । शेषं निगदव्याख्यातम् । तच्चैतददैवं स्यात् । स्मृत्यन्तरात्—“अदैवं भोजयेच्छ्राद्धम्” इति स्मृतेः । तथा च “एकादश्यामयुग्मान् ब्राह्मणान् भोजयेत्”

इत्ययुग्माता प्राप्तैव पुनरयुग्मताग्रहणाद्दैवमिति गम्यते । तत्र यावत्सपिण्डीकरणात्प्राक् श्राद्धं तत्सर्वमेकोद्दिष्टम्, ऊर्ध्वं तु पार्वणश्राद्धमन्यत्राभ्युदयात् । स्मृत्यन्तरात् "प्रदानं यत्र यत्रैषां सपिण्डीकरणात्परम् । तत्र पार्वणवत्सर्वमन्यत्राभ्युदयादृते" इति । तथाऽपरम्- "सहपिण्डक्रियायां तु कृतायामस्य धर्मतः । अनयैवावृता कार्यं पिण्डनिर्वपणं सुतैः" इति । अनयैवेति प्रकृतत्वात् सपिण्डक्रिययोच्यते । तथा च **हारीतः**-" सहपिण्डे कृते प्रेते पृथक्त्वं नोपपद्यते । पृथक्त्वे तु कृते तस्य पुनः कार्या सपिण्डता ॥" तथोशनाश्च-"अर्वाक् संवत्सराद् वृद्धेः पूर्णे संवत्सरेऽपि वा । ये सपिण्डीकृताः प्रेता न तेषां हि पृथक्क्रिया" ॥ ४ ॥ ॥ * ॥

गदा०-सर्वश्राद्धप्रकृतिभूतं पार्वणमुक्त्वाऽधुना विकृतिभूतमेकोद्दिष्टमारभ्यते । **अथैकोद्दिष्टम्**-अथ पार्वणानन्तरमेकोद्दिष्टं व्याख्यास्यते । अथान्वर्थसञ्ज्ञा चैषा । एकमुद्दिश्य यत्क्रियते तदेकोद्दिष्टमिति । **एकोऽर्घ एकं पवित्रमेकः पिण्डः**-अस्मिन्नेकोद्दिष्टे एकोऽर्घः एकं पवित्रमेकः पिण्डश्च स्यात् । अर्घस्यैकत्वश्रवणात्पात्रमप्येकमिति ज्ञायते । अतः प्रथमशब्दस्यानुपपत्तेः पितृभ्यः स्थानमसीत्यस्यानुपपन्नत्वात्संस्रवस्य बहुत्वाभावाच्चात्र पात्रन्युब्जीकरणाभावः । **नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः । सुस्वदितमितीतरे ब्रूयुरुपतिष्ठतामित्यक्षय्यस्थानेऽभिरम्यतामिति विसर्गोऽभिरताः स्म इतीतरे**-स्पष्टमेतत् । अत्राग्नौकरणनिषेधादेव पात्रालम्भनिषेधो हुतशेषदानानन्तरं तस्य विहितत्वात् । अमृतं जुहोमीति मन्त्रलिङ्गाद्धुतशेषस्यैव परामर्शात् । हुतशेषाभावे पात्रालम्भाभाव इति निश्चीयते । इति **हलायुधभाष्ये** ॥ इति गदाधरभाष्ये चतुर्थी कण्डिका ॥ ४ ॥ * ॥

अथ **प्रयोगः** । निमन्त्रणम् । ततो मध्याह्नस्नानम् । ततः कर्म्माङ्गस्नानम् । द्विजेभ्य उदकदानम् । मण्डलकरणम् । द्विजैराचमनकरणम् । पादप्रक्षालनम् । ब्राह्मणस्योपवेशनम् । दीपस्थापनम् । देवताभ्यश्चेति पाठः । सङ्कल्पः । ततो " निहन्मि सर्वम् " इति पाठः । नीवीबन्धनम् । तिला रक्षन्त्वित्यारभ्य दिशि दिशि प्रकिरणान्तम् । जलाभिमन्त्रणम् । पाकप्रोक्षणम् । आसनदानम् । हस्तप्रक्षालनम् । नावाहनम् । नयवकिरणम् । जपः । एकस्यार्घस्य पूरणम् । दानम् । न पात्रन्युब्जीकरणम् । न संस्रवदानम् । ततो गन्धादिदानम् । नाग्नौकरणम् । " पात्रालम्भो न भवति " इति हलायुधमतम् । अन्येषां मते तु भवत्येव । अङ्गुष्ठस्यान्नेऽवगाहनम् । तिलविकिरणम् । परिवेषणम् । सङ्कल्पः । उदकदानम् । जपः । अन्नप्रकिरणम् । आचमनम् । उदकदानम् । जपो यथोक्तः । स्वदितमिति तृप्तिप्रश्नः । सुस्वदितमिति ब्राह्मणा ब्रूयुः । शेषान्नस्यानुज्ञापनादि पिण्डपूजान्तं च पूर्ववत् । एकः पिण्डो देयः । ततः सुप्रोक्षिताद्यक्षतदानान्तम् । अक्षय्योदकदानम् । उपतिष्ठतामित्यक्षय्यस्थाने । प्रार्थनादि उदकासेकान्तम् । दक्षिणादानम् । न विश्वेदेवाः प्रीयन्तामिति प्रैषः । प्रार्थनाऽपि न । तिलकम् । पिण्डप्रत्यवधानम् । सव्यम् । अवघ्राणम् । अग्निमत उल्मुकसकृदाच्छिन्नयोरग्नौ प्रक्षेपः । पात्रचालनम् । सञ्चराभ्युक्षणम् । ततोऽद्य पूर्वोच्चरितेत्यादि । अभिरम्यतामिति विसर्जनम् । अभिरताः स्म इति प्रत्युक्तिः । अनुगमनम् । गृहप्रवेशः ॥ इति नवकण्डिकागदाधरभाष्ये **एकोद्दिष्टपद्धतिः** ॥

अथैकोद्दिष्टप्रसङ्गात्क्रियापद्धतिर्लिख्यते । तत्र सायमाहुत्यां हुतायां यजमानस्य मरणशङ्का चेत्तदैव प्रातराहुतिर्दातव्या । जीवेत्पुनः काले प्रातराहुतिर्नैव होतव्या । पौर्णमासेष्ट्यनन्तरं प्राग्दर्शाद्यदा यजमानस्य मरणशङ्का स्यात्तदैव पिण्डपितृयज्ञवर्जिताममावास्येष्टिं कुर्यात् । तत्पर्यन्तं पक्षहोमः । आह्रियमाणे हविषि चेन्म्रियेत तदा हविषो दक्षिणाग्नौ प्रक्षेपः । ग्रहणप्रभृतिप्राग्घविरासादनान्मरणं चेद्गार्हपत्ये हविषां दहनम् । आसादनोत्तरकालमाहवनीये । एवं वैश्वदेवपर्वणि कृते यजमानस्य मरणशङ्कायामवशिष्टपर्वणां समापनं कार्यम् । सकलेष्ट्यसम्भवे वाऽऽज्यं संस्कृत्य पुरोऽनुवाक्यायाज्याभ्यां स्वस्वहविषा यागः कार्यः । तदसम्भवे च केवलेनाज्येन चतुर्गृहीतेन प्रधानदेवतायागमात्रं कुर्यात् । तस्याप्यसम्भवे प्रतिदैवतं पूर्णाहुतिं जुहुयात् । अग्नये स्वाहा, विष्णवे स्वाहा, इन्द्राय स्वाहेति । असन्नयतस्तु अग्नये, विष्णवे, इन्द्राग्निभ्यामिति । एवं स्मार्त्तपक्षादि सकलं कर्म ज्ञेयम् । चरुहोमासम्भवे देवतानामाज्याहुतिमात्रं वा । यद्यमावास्यापर्यन्तं यजमानो जीवति तदाऽमावास्यायां दक्षिणाग्निमुद्धृत्य

पिण्डपितृयज्ञः कार्यो नाग्न्यन्वाधानम् । न ब्रह्मासनम् । न चामावास्येष्टिः । कृतत्वात् । सर्वं कर्म मरणान्तं भवति । कर्तुरसम्भवात् । हविष्प्रतिपत्तिविधानाच्च । अग्निहोत्रहोमेऽप्याहृते हविषि दक्षिणाग्नौ ग्रहणादिप्रागासादनाद्गार्हपत्ये दहनम् । आसादनाद्याहवनीये, एवमेव पशुयागसोमयागादावारब्धेऽन्तरा मरणशङ्कायां यथासम्भवं समापनं कार्यम् । मृते पुत्रादिः स्नातः कृतापसव्यः सकृत्सकृत्परिसमूहनादिसंस्कारान्कुर्यात् । गार्हपत्यादाहवनीयदक्षिणाग्न्योर्विहरणम् । 'तिस्र एव. स्थालीरेष्टवै' इत्यध्वर्युराह–गार्हपत्याहवनीयदक्षिणाग्निषु तिसृणां गोमयशम्बलवतीनां मृन्मयीनां मुखानामधिश्रयणम् । अत्र सर्वं कर्मापसव्येन दक्षिणामुखेन कर्तव्यम् । सभ्यावसथ्ययोरुखाधिश्रयणं न कुर्यात् । तौ प्रत्यक्षावेव स्थाल्योर्मध्ये निधाय नीयेते सर्वासु स्थालीषु चिह्नकरणम् । अथ मरणस्थाने एकोद्दिष्टविधिना श्राद्धम् । तत्र सङ्कल्पः । मरणस्थाने एकोद्दिष्टश्राद्धमहं करिष्ये । उपहारप्रोक्षणम् । आचमनम् । आमान्नसङ्कल्पः । पिण्डदानम् । आवाहनार्घार्चनपात्रालम्भनावगाहनविकिरावनेजनरेखाप्रत्यवनेजनगन्धाद्यर्चनाक्षय्योदकदानाशीःस्वधावाचनीयनिषेकाभावः । सव्येन दक्षिणादानम् । दक्षिणाकाले माषान्नजलसंयुक्तकुम्भदानम् । इति मरणस्थाने एकोद्दिष्टविधिना श्राद्धम् । ततो मृतस्थाने शवनाम्ना पिण्डदानम् । अमुकगोत्र अमुकशव इति प्रयोगः । सजलमाषान्नकुम्भदानम् । ततः पूर्ववदेकोद्दिष्टविधिना द्वितीयं द्वारदेशे श्राद्धम् । श्राद्धान्ते तत्रैव पान्थनाम्ना पिण्डदानम् । पान्थ एतत्ते इति प्रयोगः । माषान्नजलसंयुक्तकुम्भदानम् । सन्तापजानग्नीनादायानसि शरीरमारोप्य दक्षिणागमनम् । "यमगाथां गायन्तो यमसूक्तं च जपन्त इत्येके" आहुः । "अहरहर्नीयमानो गामश्वं पुरुषं ह्यजम् । वैवस्वतो न तृप्यति सुराप इव दुर्मतिः ।" इति यमगाथा । अपेतो यन्तु पणय इत्ययमध्यायो **यमसूक्तम्** । ततश्चत्वरे प्रेतनाम्ना पिण्डदानम् । माषान्नजलयुक्तघटदानम् । ग्रामश्मशानयोरर्द्धमार्गे नीते तत्र पूर्ववदेकोद्दिष्टविधिना श्राद्धम् । अमुकप्रेतस्य दाहार्थं श्मशानं नीयमानस्य अर्द्धमार्गे विश्रामस्थाने श्राद्धमहं करिष्ये, इति सङ्कल्पः । श्राद्धान्ते भूतनाम्ना पिण्डदानम् । अमुकभूत एष ते पिण्डः । माषान्नजलसंयुक्तकुम्भदानम् । समे बहुलतृणे देशे क्षीरिण्याद्या उद्धृत्य वितानसाधनम् । गार्हपत्याहवनीयदक्षिणाग्निषु सकृत्सकृत्संस्कारकरणम् । तत्र गार्हपत्यादीनां स्थापनम् । सभ्यावसथ्ययोश्चितेरुत्तरतः सप्तसु प्रक्रमेषु स्थापनम् । ततो गार्हपत्याहवनीययोर्मध्ये काष्ठैश्चितिं संचिनुयात् । ततः प्रेतस्य केशश्मश्रुनखलोम्नां छेदनम् । केशादीनां निखननम् । प्राग्ग्रीवमुत्तरलोम कृष्णाजिनं चितायामास्तीर्य तस्मिन् यजमानं प्राक्शिरसमादधाति । ततः प्रेतस्य करे प्रेतनाम्ना पिण्डदानम् । अमुकप्रेत एतत्त इति । माषान्नजलयुक्तकुम्भदानम् । ततः प्रेतस्याज्येनाभ्यञ्जनम् । मुखे दक्षिणोत्तरनासिकाचक्षुःश्रोत्रेषु हिरण्यशकलप्रासनम् । श्रुतौ–चितिचयनात्प्राक् हिरण्यशकलप्रासनमाम्नातम् । सूत्रे तु शाखान्तरादयं क्रमोऽवसितः । चितिचयनात्पूर्वं वा कर्तव्यम् । प्रेतस्य वस्त्रैकदेशं सञ्चयनार्थं गृहीत्वा सुगुप्तं निदधाति । सर्वाणि पात्राणि प्रागग्राण्युत्तानानि वक्ष्यमाणविधिना प्रेतशरीरे निदधाति । जुहूं घृतेन पूरयित्वा दक्षिणे हस्ते सादयति । सव्ये पाणौ रिक्तामुपभृतम् । हृदये ध्रुवां रिक्ताम् । दक्षिणनासिकायां वैकङ्कतं स्रुवम् । कर्णयोः प्राशित्रहरणे । शिरसि रिक्तं प्रणीताप्रणयनं चमसम् । कपालानि वा शिरसि, अप्सु वा प्रक्षेपः कपालानाम् । पार्श्वयोः शूर्पे, दक्षिणपार्श्वे ऐष्टिकम्, उत्तरपार्श्वे प्रतिप्रस्थातृकर्तृकवरुणप्रघासिकमैष्टिकम् । अकृतवरुणप्रघासस्य ऐष्टिकमेव द्विधा कृत्वा पार्श्वयोरेकैकं खण्डमासादयेत् । उदरे पृषदाज्यवतीमिडापात्रीम् । शिश्नसमीपे शम्याम् । अण्डयोः समीपे अरणी । तत्समीपे अधोमुखमुलूखलं मुसलं च । उपवेषाभ्रिशृतावदानपुरोडाशपात्रीपूर्णपात्रषडवत्तकूर्चप्रमुखानि सर्वाणि पात्राणि ऊर्वोर्मध्ये आसादयेत् । स्मार्तपात्राण्यप्यरणीसहितानि वरुणप्रघासिकानि च तत्रैवासादयेत् । मृन्मयाश्ममयानामप्सु प्रक्षेपः । लोहमयानां च ब्राह्मणाय दानमप्सु प्रक्षेपो वा । त्रेताग्निभिश्चितेरादीपनम् । तत्रैवम् । अग्निचितिपर्यन्तं तृणैराच्छादनं कृत्वा ततस्तान्प्रदीपयेत् । आहवनीयगार्हपत्यदक्षिणाग्न्युत्पन्नज्वाल्या चितेरादीपनं यथा भवति तथा विधेयम् । पुत्रो वा भ्राता वान्यो वा ब्राह्मण आहुतिं जुहुयात् । ब्राह्मण एव क्षत्रियवैश्ययोराहुतिं जुहुयात् । न पुत्रो भ्राता वा । गार्हपत्ये आज्यसंस्कारः । अग्निहोत्रहवण्यां सकृद् गृहीत्वा आहवनीये समित्पूर्वकं जुहोति । तत्र मन्त्रः । "अस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनः । असौ स्वर्गाय लोकाय स्वाहा ।" इत्यनेन मन्त्रेण होमः । ॐ इदमग्नये न ममेति त्यागः । असौस्थाने प्रेतस्य प्रथमान्तं नामग्रहणम् । अस्य मन्त्रस्य स्त्रियामप्यूहः । ततोऽग्निहोत्रहवणीं मुखे प्रागग्रामासादयेत् । खादिरं स्रुवं सव्यनासिकायाम् । स्फ्यं दक्षिणहस्ते । आज्यस्थाल्या ऊर्वोरन्तरे प्रक्षेपः । पात्रत्वाविशेषात् । मृन्मयी चेदप्सु प्रासनम् । अथ प्रसङ्गा-

दावसथ्यसम्बन्धिपात्रप्रतिपत्तिरुच्यते । उक्तं च—"आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः । अनाहिताग्निरेकेन लौकिकेनेतरे जनाः ॥ अथ पुत्रादिराप्लुत्य कुर्याद्दारुचयं बहु । भूप्रदेशे शुचौ युक्ते पश्चाच्चित्यादिलक्षणम् ॥ तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे । हिरण्यं न्यस्य शिरसि प्रणीताचमसं तथा ॥ शूर्पं तत्पार्श्वयोरेकं चेद् द्विधा पूर्ववन्न्यसेत् । श्रवणाकर्मसम्बन्धि द्वितीयं पिण्डयज्ञियम् ॥ अण्डयोररणी तद्वत्प्रोक्षणीपात्रमादितः । पात्राणि चान्तरे ऊर्वोर्मृन्मयान्यम्भसि क्षिपेत् ॥ अथाद्यंसजात्वक्तो दद्याद्दक्षिणतः शनैः । पूर्ववज्जुहुयाद्दह्नौ समिद्वर्जं स्रुवेण सः ॥ दक्षिणायां स्रुवं दद्यान्नसि स्फ्यं दक्षिणे करे । समिधो वा ततो वह्निं शेषं स्यादाहिताग्निवत् ॥" उखाधिश्रयणाद्यूर्वोरन्तरे पात्रप्रक्षेपान्तं सर्वमाहिताग्निवत् । केवलोपासनाग्निं चितौ मृतं दक्षिणाशिरसं निदध्यान्न प्राक्शिरसमिति विशेषः ।इत्यावसथ्यसम्बन्धिपात्राणां प्रतिपात्तिः। अथ **सूतिकामरणे विशेषः** ।सूतिकायां मृतायां कुम्भे उदकं कृत्वा तत्र पञ्चगव्यं प्रक्षिप्य **आपो हि ष्ठा इदमाप** इत्यादिपुण्यर्ग्भिरभिमन्त्र्य ब्राह्मणानुज्ञया पञ्चदश प्राजापत्यान्कृत्वा तेन कुम्भोदकेन शतकृत्वस्तां स्नापयित्वा वस्त्रान्तरेण सर्वां वेष्टयित्वा दाहः कार्यः । रजस्वलामरणेऽप्येवम् । उदक्या सूतकी वा यं स्पृशति तस्याप्येष एव विधिः । दाहे जाते किञ्चित्परिशेषणीयम् । "निःशेषस्तु न दग्धव्यः" इति वचनात् । अथ **स्मार्तमुदककर्मोच्यते** । नद्याद्युदकसमीपे गमनम् । समीपे स्थितं योनिसम्बन्धिशालकं वा "**उदकं करिष्यामहे**" इति मन्त्रेणोदकं याचयेयुः सपिण्डादयः । यदि शतवर्षादर्वाक् प्रेतो भवेत् तदा कुरुध्वमिति वचनमित्युक्ते सप्तपुरुषसम्बन्धिनः सपिण्डाः दशपुरुषसम्बन्धिनः समानोदकाश्चैकग्रामनिवासे यावत्स्मृतं जलं प्रविशन्त्येकवस्त्राः । अशिखाः प्राचीनावीतिनः सन्तः ततः सव्यपाणेरनामिकयाऽङ्गुल्या जलम् **अप नः शोशुचदघमित्येतावता** मन्त्रेणापनोद्य दक्षिणाभिमुखास्तूष्णीं निमज्जन्ति । **कर्कादिभाष्यकाराणां** मतेऽपनोदने मन्त्रः । **देवयाज्ञिकादिमते** निमज्जने । ततः प्रेतमुद्दिश्यैकैकमञ्जलिं सकृद्भूमौ प्रक्षिपन्ति । अमुकसगोत्रामुकशर्मन्प्रेत **एतत्ते उदकमित्यनेन** मन्त्रेण । तत उदकादुत्तीर्य शुचौ देशे शाद्वलवत्युपविष्टान्सपिण्डादीनन्ये सुहृद इतिहासपुराणादिकथाभिः संसारस्यानित्यतां दर्शयन्तो वदेयुः । शाद्वलं हरिततृणमस्ति यस्मिन्निति शाद्वलवान् तस्मिन् शाद्वलवति भूमौ उपविष्टानित्यर्थः । रोदनं न कर्तव्यम् । तदुक्तम्—"श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः । अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः" इति । ततः पश्चादनवलोकयन्तः पङ्क्तिव्यवस्थानेन कनिष्ठानग्रतः कृत्वा ग्राममागच्छन्ति । गृहद्वारसमीपे आगत्य सर्वे त्रीणि त्रीणि निम्बपत्राणि दन्तैरवखण्ड्याचम्योदकमग्निं गोमयं गौरसर्षपाँस्तैलमित्येतानि प्रत्येकं स्पृष्ट्वा पादेन पाषाणमाक्रम्य गृहं प्रविशन्ति । ततः प्रभृति ब्रह्मचारिणोऽधःशायिनो न किञ्चन कर्म कुर्वन्ति । न कारयन्ति । क्रीत्वा लब्ध्वा वा दिवा प्राश्नीयुः । अमांसं पिण्डं दत्त्वा ततो भोजनम् । भोजनकाले भोज्यादन्नाद्भक्तमुष्टिं च प्रेतोद्देशेन भूमौ निःक्षिपेत् । अमुकसगोत्रामुकप्रेत भक्तमुष्टिरुपतिष्ठतामिति । यावत्प्रत्यहमेकैकमवयवपूरकं पिण्डं प्रेताय दद्यात् । तत्र विधिः । स्नानं कृत्वाऽहते आर्द्रे वाससी परिधाय पिण्डपितृयज्ञवत्तूष्णीं पिण्डदानम् । तूष्णीं प्राणायामः । आचमनम् । देशकालौ स्मृत्वाऽमुकसगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं क्षुत्तृषानिवृत्त्यर्थं शिरोनिष्पत्त्यर्थं च पिण्डदानं कुम्भभोजनदानमुदकदानं चाहं करिष्ये, इति सङ्कल्पः । अवनेजनम् । अमुकसगोत्रामुकप्रेतावनेनिक्ष्वेति । दर्भास्तरणम् । पिण्डदानम् । अमुकसगोत्रामुकप्रेतैष ते शिरःपूरकपिण्डो मया दत्त इति । पूर्ववत्पुनरवनेजनम् । अनुलेपनपुष्पधूपदीपशीतलतोयकुम्भोर्णातन्तुदानं पिण्डे स्मृत्यन्तरोक्तमपि कुर्यात् । ततः पिण्डसमीपे भूमौ एकाञ्जलितोयदानम् । अमुकसगोत्रामुकप्रेत एष ते तोयाञ्जलिरुपतिष्ठताम् । इदं तोयपात्रं ते उपतिष्ठताम् । अमुकसगोत्रस्यामुकप्रेतस्यानेन प्रेतत्वनिवृत्तिरस्तु । क्षुत्तृषानिवृत्तिरस्तु । शिरोनिष्पत्तिरस्तु । पिण्डमुदके प्रक्षिप्य स्नात्वा नवश्राद्धं कुर्यात् । ततस्तूष्णीं पूर्ववत्कर्म । युग्मा विप्राः । तूष्णीं निमन्त्रणादि । पादप्रक्षालनम् । आचमनम् । उपवेशनम् । तूष्णीं प्राणायामः । द्विराचमनम् । देशकालौ स्मृत्वाऽमुकसगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थमेकोद्दिष्टविधिना प्रथमदिवसनिमित्तं नवश्राद्धमहं करिष्ये । उपहारप्रोक्षणम् । तिलदर्भविकिरणम् । आचमनम् । आमान्नसङ्कल्पः । इदमामान्नं ते उपतिष्ठतु । तिलविकिरणम् । दक्षिणाग्रदर्भास्तरणम् । अमुकसगोत्रामुकप्रेतैष ते पिण्ड इति पिण्डद्वयं दद्यात् । अवनेजनेप्रत्यवनेजने न स्तः। प्रत्येकं गोत्रोच्चारणादि तद्दानम्। पूजनम्। आचन०। आमान्नं०। अक्षय्योदकदानम्। अमुकसगोत्रस्यामुकप्रेतस्य दत्तमुपतिष्ठताम् । दक्षिणादानम् । पिण्डोद्धरणम् । कृतस्य नवश्राद्धविधेर्यन्न्यूनं यदतिरिक्तं तत्सर्वमित्यादि । पिण्डयोरुदके प्रक्षेपः । एव एव पदार्था अत्र [illegible] । गर्ते तैलकल्कोष्णोदकाभ्यां

प्रेतोद्देशेन प्रक्षेपः । अमुकसगोत्रामुकप्रेतात्र जलेन स्नाहीत्यादि । अथ यस्मिन्नहोरात्रे स मृतो भवति तस्य वा तस्मिन्नेकस्मिन्मृन्मये पात्रे उदकं, द्वितीये क्षीरं कृत्वा यष्ट्यादिकमवलम्ब्याकाशे धारयेत् । अमुकसगोत्रामुकप्रेतात्र स्नाहि पिबेदमिति मन्त्रेण । इति **प्रथमदिनकृत्यम्** । अथ द्वितीयदिने प्रेतस्य कर्णाक्षिनासिकानिष्पत्त्यर्थं पिण्डदानम् । कुम्भभोजनदानम् । द्वावञ्जली । द्वे तोयपात्रे । त्रय उदकाञ्जलय एव वा देया न पात्रे । इति **द्वितीयदिनकृत्यम्** । तृतीये गलांसभुजवक्षोनिष्पत्त्यर्थं पिण्डदानम् । त्रयोऽञ्जलयः । त्रीणि तोयपात्राणि ; अथवा पञ्चोदकाञ्जलय एव । प्रथमदिवसवन्नवश्राद्धम् । इति **तृतीयदिनकृत्यम्** । अथ चतुर्थेऽहनि सञ्चयननिमित्तमेकोद्दिष्टश्राद्धम् । तच्च प्रथमदिनवत् । अत्रैक एव पिण्डः । श्मशानवासिदेवतानां बलिहरणम् । पुष्पधूपदीपनैवेद्यानि सम्भृत्य "ॐ क्रव्यादमुखेभ्यो देवेभ्यो नमः" इति मन्त्रेणार्घादिना पूजां कुर्यात् । ततः क्रव्यादमुखेभ्यो देवेभ्यो बलिदानम् । तत्र मन्त्रः–"देवा येऽस्मिन् श्मशाने स्युर्भगवन्तः सनातनाः । तेऽस्मत्सकाशाद् गृह्णन्तु बलिमष्टाङ्गमक्षयम् ॥ प्रेतस्यास्य शुभाँल्लोकान्प्रयच्छन्त्वपि शाश्वतान् । अस्माकमायुरारोग्यं सुखं च श्रियमुत्तमाम्" इति । एवं बलिं दत्त्वा विसर्जयेत् । पलाशवृन्तेनास्थीनि प्रकटानि कृत्व अङ्गुष्ठकनिष्ठिकाभ्यामादाय पलाशपुटे प्रासनम्, तत्र शमीशैवालकर्दमानां च प्रासनम् । ततो घृतेनाभ्यज्य सर्वसुरभिभिश्चन्दनागुरुकर्पूरकेसरकस्तूरिकाभिर्मिश्रणम् । दक्षिणपूर्वायतां कर्षूं खात्वा तत्र कुशास्तरणम् । हरिद्रालापितवस्त्रखण्डमास्तृत्य तस्मिन्वस्त्रे वाङ्गर्निवपामि इत्यनेन मन्त्रेणास्थिप्रक्षेपः। "ॐ आत्वा मनसानार्तेन वाचा ब्रह्मणा त्रय्या विद्यया पृथिव्यामक्षिकायामपाꣳ रसे निवपाम्यसौ" इत्यनेन मन्त्रेण वा । असौस्थाने प्रेतनामोद्देशः । पितृमेधं चिकीर्षितः कुम्भे अस्थिसञ्चयनं कर्तव्यम् । अस्मिन्पक्षे कुशास्तरणं हरिद्रालापितवस्त्रास्तरणं कुम्भे एव कर्तव्यम्, अस्थिसंस्कारत्वात् । क्वचिद्भूप्रदेशे कुम्भनिधानं तूष्णीम् । कुम्भमध्येऽस्थिप्रक्षेपे मन्त्रो भवत्येव । इत्य**स्थिसञ्चयनम्** । चिताभूमिं गोमयेनोपालिप्य तत्र तेनैव पूर्वोक्तबलिमन्त्रेण बलिं दद्यात् । ततश्चतुर्थदिवससम्बन्धि पिण्डदानम् ।नाभिलिङ्गगुदनिष्पत्त्यर्थं कुम्भभोजनदानम् । जलाञ्जलयश्चत्वारः।चत्वारि जलपात्राणि च ।अथवा सप्ताञ्जलय एव ।इति **चतुर्थदिनकृत्यम्**।पञ्चमेऽहानि जानुजङ्घापादनिष्पत्त्यर्थं पिण्डदानम्।कुम्भो जलपूरितः,पञ्च जलाञ्जलयः, पञ्च पात्राणि च, नवाञ्जलय एव वा । ततो नवश्राद्धं प्रथमदिनवत् । इति **पञ्चमदिनकृत्यम्** । षष्ठे सर्वमर्मनिष्पत्त्यर्थं पिण्डदानम् । कुम्भदानम्, षट् जलाञ्जलयः, षट् तोयपात्राणि । अथ एकादशाञ्जलय एव वा । इति **षष्ठदिनकृत्यम्** । सप्तमेऽहानि नाडिकानिष्पत्त्यर्थं पिण्डदानम् । कुम्भभोजनदानम् । सप्ताञ्जलयः, सप्त पात्राणि, त्रयोदशाञ्जलय एव वा । प्रथमदिनवन्नवश्राद्धम् । इति **सप्तमदिनकृत्यम्** । अष्टमेऽहनि लोमदन्तनिष्पत्त्यर्थं पिण्डदानम् । कुम्भभोजनदानम् । अष्टाञ्जलयः, अष्टौ पात्राणि । पञ्चदशाञ्जलय एव वा । **इत्यष्टमदिनकृत्यम्** । नवमेऽहानि वीर्यनिष्पत्त्यर्थं पिण्डदानम् । कुम्भभोजनदानम् । नवाञ्जलयो, नवपात्राणि, सप्तदशाञ्जलय एव वा । ततो नवश्राद्धं प्रथमादिनवत् । इति **नवमदिनकृत्यम्** । दशमेऽहनि शरीरपूरणार्थं पिण्डदानम् । कुम्भभोजनदानम् । दशाञ्जलयो, दशपात्राणि, एकोनविंशतिर्जलाञ्जलयो वा । अथवा दशाहमध्ये प्रत्यहं दशाञ्जलय एव देयाः । न पात्राणि । अत्र पिण्डत्रयदानम् । एकं तत्सखिभ्यो, द्वितीयं प्रेताय, तृतीयं यमाय । तत्र देशकालौ स्मृत्वा प्रेतस्य प्रेतत्वनिवृत्त्यर्थं पिण्डदानमहं करिष्ये । प्रेतसखायः अवनेनिग्ध्वम् । गोत्र प्रेत अवनेनिक्ष्व।यम अवनेनिक्ष्व। दर्भास्तरणम् । अवनेजनक्रमेण पिण्डदानं प्रत्यवनेजनं च । पिण्डानामुदके प्रक्षेपः । ततः सूतकनिवृत्त्यर्थं सर्वे केशश्मश्रुवपनं कारयेयुः नखलोमकृन्तनं च, ततः सर्वेषां सचैलस्नानम् । इति **दशाहसम्बन्धि कर्म समाप्तम्** । दशाहमध्ये दर्शपाते दर्शदिन एव सर्वं दशाहिकं कर्म समापनीयम्, न त्रिरात्रदर्वाक् इति केचित् । पित्रोस्तु यावदाशौचं दशाहे एव इति **मदनपारिजातकारः** । अन्येषां तु मातृपितृव्यतिरिक्तानां प्रथमदिनप्रभृतिदर्शपाते सर्वं समापनीयमेव । एतच्च प्रेतनिर्हरणादिकं यतिव्यतिरिक्तानां प्रथमत्रयाणामाश्रमाणां कुर्यात् । तथा च **स्मृतिः** । "त्रयाणामाश्रमाणां च कुर्याद्दाहादिकाः क्रियाः । यतेः किञ्चिन्न कर्तव्यं न चान्येषां करोति सः" इति । तथा "एकोद्दिष्टं जलं पिण्डमाशौचं प्रेतसत्क्रियाम् । न कुर्यात्पार्वणादन्यद्ब्रह्मीभूताय भिक्षवे ॥ अहन्येकादशे प्राप्ते पार्वणं तु विधीयते" इति । ब्रह्मचारी त्वाचार्योपाध्यायमातृपितृव्यातिरिक्तानां निर्हरणादिकं न कुर्यात् । यथाह–याज्ञवल्क्यः–"आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् । समाप्ते तूदकं दत्त्वा त्रिरात्रमशुचिर्भवेत् ॥" इति । "आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती । सूतकान्नं च

नाश्नीयान्न च तैः सह संवसेत्॥" इति । यदि च मोहात्करोति तदा ब्रह्मचर्यव्रतात्प्रच्यवते । पुनरुपनयनेन शुद्ध्यतीति । सपिण्डीकरणान्तानि श्राद्धानि लौकिकाग्निना कार्याणि । तदुक्तम्—"सपिण्डीकरणान्तानि प्रेतश्राद्धानि यानि वै । तानि स्युर्लौकिके वह्नावित्याह **चाश्वलायनः** ।" **अथैकादशाहविधिः** । तत्र साग्नेर्दाहदिनादारभ्यैकादशाहे, निरग्निकस्य तु मरणदिनादारभ्यैकादशाहे कर्ता विधिवत्स्नात्वा षोडशोपचारैर्विष्णोः पूजनं तर्पणं च कुर्यात् । तत्र समन्त्रकप्राणायामत्रयं विधाय देशकालौ सङ्कीर्त्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं श्रीविष्णोः षोडशभिरुपचारैः पूजनपूर्वकं तर्पणमहं करिष्ये । तत्र सर्वौषधितुलसीदुग्धमिश्रमञ्जलिं कृत्वा दक्षिणाभिमुखो यज्ञोपवीती ऋजुदर्भैर्देवतीर्थेन हस्तेनैव तर्पणं कुर्यान्न शङ्खेन । **सहस्रशीर्षा पुरुषः** इति षोडशभिः प्रत्यृचं तर्पणम् । "अनादिनिधनो देवः शङ्खचक्रगदाधरः । अक्षय्य पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव ॥" पापहा महाविष्णुस्तृप्यतु । गोविन्दस्तृप्यतु । नारायणस्तृ० । **युञ्जते मनः०** । **इदं विष्णुः०** । **इरावती०** । **देवश्रुतौ देवेषु०** । **विष्णोर्नुकं०** । **दिवो वा०** । **प्रतत्०** । **विष्णो रराटम्०** । इत्यष्टौ । **अदित्यै०** । **दिवि विष्णुः०**। **अग्नेस्तनूः०** । **रक्षोहणं०** । **रक्षोहणो वो०** । **अत्यन्याम्०** । **विष्णोः कर्माणि०** । **तद्विष्णोः०** । **वाचस्पतये०** । **उपयामगृहीतोऽस्यादित्येभ्यस्त्वा** । **विष्णोः क्रमोऽसि** । **तद्विप्रासः०** । **त्रीणि पदा०** । अनेन विष्णुतर्पणेन प्रेतत्वनिवृत्तिरस्तु । इति **पुराणोक्तं** विष्णुतर्पणम् । अथ **वृषोत्सर्गः** । तत्र देशकालौ स्मृत्वा प्रेतस्य प्रेतत्वानिवृत्त्यर्थमेकादशाहश्राद्धादिकर्तृयोग्यताप्राप्त्यर्थं च वृषोत्सर्गं करिष्ये, इति सङ्कल्पः । ततो वस्त्रचन्दनपुष्पताम्बूलादिना होतृब्रह्माणौ वृणुयात् । **कर्कमते** तु ब्रह्मवरणमात्रम्, होमस्य स्वकर्तृकत्वात् । अस्माकं तु पुराणे दृष्टत्वात् उभयवरणमत्र । ततः स्वयं पञ्च भूसंस्कारान्कृत्वा आवसथ्याग्नेः स्थापनम् । ततोऽष्टानां कलशानां स्थापनम् । ततः प्रतिष्ठा । इमे कलशाः सुप्रतिष्ठिता भवन्तु । होतृब्रह्मप्रणीतानामासनदानम् । ब्रह्मोपवेशनम् । प्रणीतापात्रमध्ये पिष्टादिना व्यवधानं कृत्वा मूलदेशे पयः, इतरत्र जलं प्रक्षिप्य प्रणयनम्, अग्नेरुत्तरतो निधानम्, परिस्तरणम्, अग्नेरुत्तरतः पश्चाद्वा पात्रासादनम् । तद्यथा—पवित्रच्छेदनानि । पवित्रे द्वे । प्रोक्षणीपात्रम् । आज्यस्थाली । सम्मार्गकुशाः । उपयमनकुशाः । समिधस्तिस्रः । स्रुवः । आज्यम् । तण्डुलाः । पौष्णश्चरुः पिष्टमयः । तस्य च श्रपणानुपदेशात्सिद्ध एवोपादीयते । होतुर्वस्त्रयुग्मं सुवर्णकांस्यादिदक्षिणा च । ब्रह्मणः पूर्णपात्रं वरो वा दक्षिणा । इति पात्रासादनम् । चरुस्थालीमेक्षणयोरुपकल्पनम् । पवित्रकरणम् । प्रोक्षणीसंस्कारः । ततो यथाऽऽसादितानां पात्राणां प्रोक्षणम् । असञ्चरे प्रोक्षणीनां निधानम् । आज्यस्थाल्यामाज्यनिर्वापः । चरुस्थाल्यां प्रणीतोदकं पय आसिच्य सपवित्रायां तण्डुलावापः । ब्रह्मणा आज्याधिश्रयणम् । स्वयमेव चरोराधिश्रयणम् । उभयोः पर्यग्निकरणम् । स्रुवप्रतपनम् । स्रुवं संमृज्य पुनः प्रतपनम् । प्रणीतोदकेनाभ्युक्ष्य देशे निधानम् । आज्योद्वासनम् । उत्पूयावेक्षणम् । प्रोक्षण्युत्पवनम् । उपयमनकुशादानम् । समिधोऽभ्याधानम् । प्रोक्षण्युदकेन पर्युक्षणम् । ततः **इह रतिरिति** षडाहुतीर्जुहुयात् ॥ "ॐ इह रतिः स्वाहा" 'ॐ इह रमध्वꣳ स्वाहा" "ॐ इह धृतिः स्वाहा" "ॐ इह स्वधृतिः स्वाहा" । एतेषामिदं पशुभ्यः इति त्यागः । 'इह रतिः पशुदेवत्यः" इति **सर्वानुक्रमण्यामुक्तत्वात्** । "ॐ उपसृजन्धरुणंमात्रे धरुणो मातरं धयन्स्वाहा" इदमग्नये । "ॐ रायस्पोषमस्मासु दीधरत् स्वाहा" इदमग्नये । तत आघारावाज्यभागौ । ॐ प्रजापतये स्वाहा । ॐ इन्द्राय स्वाहा । ॐ अग्नये स्वाहा । ॐ सोमाय स्वाहा । ततः पायसचरोर्होमः । ॐ अग्नये स्वाहा, ॐ रुद्राय स्वाहा, ॐ शर्वाय स्वाहा, ॐ पशुपतये स्वाहा, ॐ उग्राय स्वाहा, ॐ अशनये स्वाहा, ॐ भवाय स्वाहा, ॐ महादेवाय स्वाहा, ॐ ईशानाय स्वाहा । यथादैवतं त्यागाः । ततः पिष्टचरुहोमः । "ॐ पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः । पूषा वाजान्सनोतु नः स्वाहा" इत्येकामाहुतिं जुहुयात् । इदं पूष्णे० । ततः पायसपिष्टचरुभ्यां स्विष्टकृत् । ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते० । ततो भूराद्या नवाहुतयः । ॐ भूः स्वाहा, ॐ भुवः स्वाहा, ॐ स्वः स्वाहा, ॐ **त्वं नो अग्ने०**, ॐ **स त्वं नो अग्ने०**, ॐ **अयाश्चाग्ने०**, ॐ ये ते शतं, ॐ **उदुत्तमम्०**, ॐ **भवतं नः०** ॐ प्रजापतये स्वाहा । संस्रवप्राशनम् । आ० पवित्राभ्यां मार्जनम् । अग्नौ पवित्रप्रतिपत्तिः । ब्रह्मणे पूर्णपात्रवरयोरन्यतरस्य दक्षिणात्वेन दानम् । प्रणीताविमोकः । ततोऽश्वत्थपत्रतत्कलशे रुद्रमावाह्य गन्धमाल्यादिभिः सम्पूज्य हस्तेन कलशं स्पृशन् रुद्राध्यायं जपेत् । ततः **पुरुषसूक्तम्** ।

कूष्माण्डीसञ्ज्ञकम् । **यद्देवा देवहेडनमिति** तिस्र ऋचः । षडङ्गरुद्रजपो वा । **गरुडपुराणवचनात्** । ततो वृषवत्सतरीणां स्नापनम् । अलङ्करणम् । चक्रत्रिशूलकरणम् । अङ्कनम् । वृषस्य कर्णे जपः । " वृषो हि भगवान्धर्मश्चतुष्पादः प्रकीर्तितः । वृणे हि तमहं भक्त्या स मा रक्षतु सर्वतः ॥" ततो गृहीतपुष्पाञ्जलिर्वृषं त्रिः प्रदक्षिणीकृत्य नमस्कुर्यात् । ततो वृषवत्सतरीणां वस्त्रेण संश्लेषः । " अयं हि वो मया दत्तः सर्वासां पतिरुत्तमः । तुभ्यं चैता मया दत्ताः पत्न्यः सर्वा मनोरमाः ॥ " ततश्चतुः आग्निं प्रदक्षिणीकृत्य वत्सतरीणामग्निप्रदक्षिणाश्चतस्रः कारयित्वा पुच्छे पुरुषसूक्तेन प्रेतनाम्ना च तर्पणं कार्यम् । तत उत्सर्गः । अद्येत्यादिदेशकालौ स्मृत्वा एतं वृषं रुद्रदैवतं यथाशक्त्यलङ्कृतं गन्धाद्यर्चितमेवंविधवत्सतरीसहितममुकगोत्रस्यामुकप्रेतस्य प्रेतत्वमुक्तयेऽहमुत्सृजामि। "एतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण सा नः साप्तजनुषा सुभगा रायस्पोषेण समिषा मदेम" इति सव्येन पाणिना वृषपुच्छं गृहीत्वा दक्षिणेन कुशतिलसहिता अप आदाय अमुकगोत्रायामुकप्रेताय एष एव मया दत्तः संतारयितुं सर्वदा इत्युच्चार्य तिलहिरण्यसहितमुदकं भूमौ निक्षिपेत् । ततो वत्सतरीमध्यस्थितस्य वृषस्य **मयोभूरभिमा वाहिस्वाहेत्यादिना स्वर्णसूर्यः स्वाहे**त्यन्तेनानुवाकशेषेणाभिमन्त्रणम् । ततो दक्षिणस्कन्धेन वृषप्रेरणम् । यथेष्टपथं पर्यटेति । ततः शक्त्यनुसारेण पायसेन ब्राह्मणानां भोजनम् । सहिरण्यस्य रुद्रकुम्भस्य धेनोश्च होत्रे प्रदानम् । इति **वृषोत्सर्गः** । ततस्तन्त्रेण चत्वारि श्राद्धानि । आद्यं नवश्राद्धं प्रथमदिनवत् । तदुक्तं **गरुडपुराणे स्मृतौ** च । "प्रथमेऽह्नि तृतीये वा पञ्चमे सप्तमेऽपि वा । नवमैकादशे चैव नवश्राद्धानि कारयेत् ॥" इति । पूर्वदिवसमारभ्य न कृतं चेदेकादशेऽह्नि कुर्यात् । नवश्राद्धानामन्त्यमासिकानामाद्यं स्वतन्त्रमेकोद्दिष्टमेवेति, तत्र स्वतन्त्रैकोद्दिष्टे क्रियमाणे देशकालकर्त्रैक्यात्तन्त्रेणानुष्ठानसिद्धिः । पृथगनुष्ठानपक्षे त्वादौ स्वतन्त्रेणैकोद्दिष्टं, ततो नवश्राद्धं ततो मासिकमिति **स्मृत्यर्थसारे** । तत्रैकादशाहे **आद्यमासिकश्राद्धे** एकादशब्राह्मणानामामन्त्रणम् । पूर्वेद्युः स्नात्वा विप्रेषु प्रेतनियोजनम् । "गतोऽसि दिव्यलोके त्वं कृतान्तविहितात्पथः । मनसा वायुभूतेन विप्रे त्वाऽहं नियोजये ॥ पूजयिष्यामि भोगेन एवं विप्रे निवेदयेत् । " अस्तमिते विप्रनिवेशनम् । पाद्यं दत्त्वा नमस्कृत्य तैलेन पादौ प्रक्षालयेत् । उदिते विप्रस्य केशश्मश्रुनखच्छेदं कारयित्वा स्नानाभ्यञ्जनं च दद्यात् । ततो भूमिभागग्रहणम् । महास्थण्डिलस्य करणम् । नद्यादौ सचैलं स्नात्वा तीर्थानि मनसा ध्यात्वा आत्मनोऽभ्युक्षणम् । एवं शुद्धिं कृत्वा ब्राह्मणानामावाहनम् । आगतं दृष्ट्वा स्वागतकरणम् । अर्घ्यपाद्यदानम् । आसनोपकल्पनम् । आसने उपवेशनम् । छत्रोपानहदानम् । तिलोपचारकरणम् । "नामगोत्रमुदाहृत्य प्रेताय तदनन्तरम् । शीघ्रमावाहयेद्द्विजे दर्भहस्तोऽथ भूतले ॥" तत्र मन्त्रः । "इहलोकं परित्यज्य गतोऽसि परमां गतिम् । मनसावायुरूपेण विप्रे त्वां योजयाम्यहम् ॥ एवमावाह्य तं गन्धपुष्पधूपैः समर्चयेत् ।" ततो वस्त्राभरणदानम् । पक्वान्नदानम् । अष्टादशपदार्थवर्जितं सकलं श्राद्धम् । वासोहिरण्यदास्युपानच्छत्रोदकुम्भानां गुणवते ब्राह्मणाय दानम् । ततः स्नानम् । तत एकादशभिर्ब्राह्मणै रुद्रश्राद्धम् । ततः स्नानम् । विष्णुपूजनम् । प्रेतोद्देशेन त्रयोदशकुम्भदानम् । त्रयोदशपददानम् । भाजनानि सतिलानि त्रयोदश देयानि । मुद्रिकावस्त्रयुग्मच्छत्रोपानहदानम् । अश्वरथगजमहिषीशय्यादानम् । गोभूतिलहिरण्यादिदानम् । ताम्बूलपूगदानम् । एकादशाहादारभ्याब्दं यावत्सान्नघटदानम् । देवालये पाषाणे वा उपदानदानम् । ऋणधेनुदानम् । ततो वैश्वदेवः ॥ इति **क्रियापद्धतिः** ॥ इति नवकण्डिकागदाधरभाष्ये एकोद्दिष्टप्रकरणम् ॥ ४ ॥ * ॥

ततः सवत्संरे पूर्णे त्रिपक्षेद्वादशाहे वा यदहर्वा वृद्धिरापद्येत चत्वारि पात्राणि सतिलगन्धोदकानि पूरयित्वा त्रीणि पितॄणामेकं प्रेतस्य । प्रेतपात्रं पितृपात्रेष्वासिञ्चति, । ये समाना इति द्वाभ्याम् । एतेनैव पिण्डो व्याख्यातः । अत ऊर्द्ध्वं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यात् ॥ ॥ ५ ॥ ॥ * ॥ ॥ * ॥

कर्कः-ततः संवत्सरे पूर्णे त्रिपक्षे द्वादशाहे वा यदहर्वा वृद्धिरापद्येत चत्वारि पात्राणि सतिलगन्धोदकानि पूरयित्वा त्रीणि पितॄणामेकं प्रेतस्य-

संवत्सरे पूर्णे सपिण्डीकरणं कर्तव्यम् । पूर्णग्रहणादूर्द्ध्वं नास्त्येव न प्राक्कर्तव्यम् । आहिताग्निना तु प्रागमावास्यायाः कर्तव्यम् । पिण्डपितृयज्ञाधिकारात् । अधिकारः प्रेतापितृकत्वात्, "प्रेतेभ्यो ददाति" इति वचनात् । "पितृप्रभृति ददाति" इति वचनात् । सपिण्डीकरणं कार्यं पूर्वमेव । असपिण्डीकृतानां दानाभावाच्च । कथमभाव इति चेत् । सपिण्डीकरणमित्यन्वर्थसञ्ज्ञयैवायमर्थोऽवगम्यते । तस्मात्प्रागपि वत्सरात्सपिण्डीकरणमस्त्येव । तथाचान्यार्थदर्शनम् "अर्वाक् सपिण्डीकरणं यस्य संवत्सराद्भवेत् । तस्याप्यन्नं सोदकुम्भं दद्यात्संवत्सरं द्विजः" इति । अन्नोदककुम्भविधिपरे वाक्ये अर्वाक् संवत्सरात्सपिण्डीकरणं दर्शयति । तथा च गृह्यकारः–"पिण्डकरणे प्रथमः पितॄणां प्रेतः स्यात्पुत्रवांश्चेत्" इति । उक्तन्यायेनानाहिताग्निनाऽपि चाभ्युदयिकं कुर्वता इदं पूर्वमेव कर्तव्यमिति । तच्चैतत् पुत्रवतः स्यात्, "पिण्डकरणे प्रथमः पितॄणां प्रेतः स्यात्पुत्रवांश्चेत्" इति वचनात् । अपुत्रस्य प्रेतस्य पितृगणेन सह समानपिण्डतैव नोपपद्यते । तथाच स्मरन्ति–"वर्षे वर्षे तु कर्तव्या बान्धवैरुदकक्रिया । अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु निर्वपेत् ॥" इत्यपुत्रस्य प्रेतस्य प्रतिसंवत्सरं बान्धवैः कर्तव्यमेकोद्दिष्टं स्मरन्ति । अतोऽपि न सपिण्डीकरणमपुत्रस्य, चत्वारि पात्राणि पूरयित्वेति चतुर्ग्रहणात् त्रिभ्य एव दानं न षड्भ्योऽपि । तत्र च त्रीणि पितॄणामेकं प्रेतस्य भवति । **प्रेतपात्रं पितृपात्रेष्वासिञ्चति ये समाना इति द्वाभ्याम्**–ये समाना इति मन्त्रद्वयेन प्रेतपात्रात् पितृपात्रेषु उदकमासिञ्चतीति ॥ **एतेनैव पिण्डो व्याख्यातः**--पिण्डेऽयमेव न्याय इति । **अत ऊर्द्ध्वं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यात्**–निगदमेतत् ॥ ९ ॥ * ॥

गदा०–सपिण्डीकरणमाह--ततः संवत्सरे पूर्णे त्रिपक्षे द्वादशाहे वा यदहर्वा वृद्धिरापद्येत चत्वारि पात्राणि सतिलगन्धोदकानि पूरयित्वा त्रीणि पितृणामेकं प्रेतस्य–संवत्सरे पूर्णे सपिण्डीकरणं कार्यम् । अथवा त्रिपक्षे द्वादशाहे वा वृद्धिप्राप्तौ वा कुर्यात् । इति चत्वारः पक्षा दर्शितास्तत्रेयं व्यवस्था । द्वादशाहे पितुः सपिण्डीकरणमग्निमता कार्यम् । सपिण्डीकरणं विना पिण्डपितृयज्ञस्यासिद्धिः । "साग्निकस्तु यदा कर्ता प्रेतो वाऽप्यग्निमान्भवेत् । द्वादशाहे तदा कार्यं सपिण्डीकरणं पितुः" इति वचनात् । निराग्निकस्तु त्रिपक्षे वृद्धिप्राप्तौ संवत्सरे वा कुर्यात् । यदा प्राक्संवत्सरात्सपिण्डीकरणं तदा षोडशश्राद्धानि कृत्वा सपिण्डीकरणं कार्यम् उत सपिण्डीकरणं कृत्वा स्वकाले तानीति संशयः । उभयथा वचनदर्शनात् । "श्राद्धानि षोडशादत्त्वा नतु कुर्यात्सपिण्डनम् । श्राद्धानि षोडशापाद्य विदधीत सपिण्डनम्" इति ।, षोडशश्राद्धानि च–"द्वादशाहे त्रिपक्षे च षण्मासे मासि चाब्दिके । श्राद्धानि षोडशैतानि संस्मृतानि मनीषिभिः" इति दर्शितानि । तथा–"यस्यापि वत्सरादर्वाक् सपिण्डीकरणं भवेत् । मासिकं चोदकुम्भं च देयं तस्यापि वत्सरम्" इति । तत्र सपिण्डीकरणं कृत्वा स्वकाले तानि कर्तव्यानीति प्रथमः कल्पः । अप्राप्तकालत्वेन प्रागनधिकारात् । यदपि वचनं "षोडशश्राद्धानि कृत्वैव सपिण्डीकरणं संवत्सरात्प्रागपि कर्तव्यम्" इति सोऽयमापत्कल्पः । यदा त्वापत्कालेन प्राक् स चेत्सपिण्डीकरणात् प्रेतश्राद्धानि करोति तदैकोद्दिष्टविधानेन कुर्यात् । यदा तु मुख्यकल्पेन स्वकाल एव तानि तदाऽऽब्दिकं यो यथा करोति पार्वणमेकोद्दिष्टं वा तथा मासिकानि कुर्यात् । करोति "सपिण्डीकरणादर्वाक् कुर्वञ्छ्राद्धानि षोडश । एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु ॥ सपिण्डीकरणादूर्ध्व यदा कुर्यात्तदा पुनः । प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपि" इति स्मरणात् । "चत्वारि पात्राणि पूरयित्वा" इति चतुर्ग्रहणात्त्रिभ्यः प्रेतस्य पितृपितामहप्रपितामहेभ्य एव दानम् । नच षड्भ्योऽपि । तत्र च त्रीणि पात्राणि पितृणाम्, एकं प्रेतस्य भवति । **प्रेतपात्रम्पितृपात्रेष्वासिञ्चाति ये समाना इति द्वाभ्याम्**–प्रेतसम्बन्धि पात्रं गृहीत्वा पितृपितामहप्रपितामहपात्रेषु "ये समाना" इति द्वाभ्यां मन्त्राभ्यामासिञ्चति प्रत्या-

सेके मन्त्रौ भवतः । आसेकप्रकारो **ब्रह्मपुराणे**–" चतुर्भ्यश्चार्घपात्रेभ्य एकं वामेन पाणिना । गृहीत्वा दक्षिणेनैव पाणिना सतिलोदकम् ॥ संसृजेच्च तथाऽन्येषु ये समाना इति स्मरन् । प्रेतं प्रेतस्य हस्तेषु चतुर्भागजलं क्षिपेत् ॥ ततः पितामहादेस्तु तन्मन्त्रैश्च पृथक् पृथक् ॥" इति । **वाजसनेयिभिस्तु पूर्वं पितृभ्यो देयम्**, पश्चात्प्रेताय दानम् । **एतेनैव पिण्डो व्याख्यातः**–यथा प्रेतार्घपात्रस्थं जलं **ये समाना** इति द्वाभ्यां **मन्त्राभ्यां** पात्रत्रये स्थापितम्, एवमेव प्रेतपिण्डमपि त्रेधा कृत्वा पिण्डत्रये निदध्यादित्यर्थः । तत्प्रकारश्च **ब्रह्मपुराणे**–" दत्त्वा पिण्डमथाष्टाङ्गं ध्यात्वा तं च सुभास्वरम् । सुवर्णरौप्यदर्भैस्तु तस्मिन्पिण्डं ततस्त्रिधा ॥ कृत्वा पितामहादिभ्यः पितृभ्यः प्रेतमर्प्पयेत् ।" तथा–" सुवर्तुलांस्ततस्तांस्तु पिण्डान्कृत्वा प्रपूजयेत् । अर्घैः पुष्पैस्तथा धूपैर्दीपैर्माल्यानुलेपनैः ॥" इति । एतच्च प्रेतश्राद्धसहितं सपिण्डीकरणं संविभक्तधनेषु बहुषु भ्रातृषु सत्स्वपि एकेनैव कृतेनालं न सर्वैः कर्तव्यम् "नवश्राद्धं सपिण्डत्वं श्राद्धान्यपि च षोडश । एकेनैव तु कार्याणि संविभक्तधनेष्वपि ॥" इति स्मरणात् । मातुः पिण्डदानादौ गोत्रे विप्रतिपत्तिः । भर्तृगोत्रेण पितृगोत्रेण वा देयम् । उभयथा वचनदर्शनात् । मातुः सपिण्डीकरणे विरुद्धानि वाक्यानि दृश्यन्ते । तत्रापि पितामह्यादिभिः सह सपिण्डीकरणं स्मृतमिति । तथा भर्त्राऽपि भार्यायाः स्वमात्रादिभिः सह सपिण्डीकरणं कर्तव्यमिति । **पैठीनसिराह**–"अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डताम् । श्वश्र्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत्" इति । पत्या सह सपिण्डीकरणं **यम** आह–" पत्या चैकेन कर्तव्यं सपिंण्डीकरणं स्त्रियः । सा मृताऽपि हि तेनैक्यं गता मन्त्राहुतिव्रतैः ॥" इति । **उशनसा** तु मातामहेन सह सपिण्डीकरणमुक्तम्–" पितुः पितामहे यद्वत्पूर्णे संवत्सरे सुतैः । मातुर्मातामहे तद्वदेषा कार्या सपिण्डता॥" इति । एवंविधेषु वचनेषु सत्सु अपुत्रायां भार्यायां प्रमीतायां भर्ता स्वमात्रैव सापिड्यं कुर्यात् । अत्राचारादनुष्ठानम् । **अत ऊर्ध्वं प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः स्यात्**–अतः सपिण्डीकरणादूर्ध्वं प्रेतायान्नं दद्याद्यस्मिन्नहनि यस्यां तिथौ प्रेतः स्यादित्यर्थः। यद्यप्यत्र प्रेतायेत्येकवचननिर्देशस्तथाऽपि स्मृत्यन्तरात्त्रिभ्यो देयम् । मासश्चात्र चान्द्रो ग्राह्यः । यथा परमेष्ठी–" आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते । विवाहादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः" इति ॥ इति गदाधरभाष्ये पञ्चमी कण्डिका ॥ ५ ॥*॥

अथ **प्रयोगः** । द्वादशाहे विधिवत्स्नात्वा विष्णुं सम्पूज्य ऊनमासिकमेकोद्दिष्टं कुर्यात् । ततः स्नानम्, प्रेतोद्देशेन **सान्नानां** सजलानां द्वादशघटानां दानम् । एका वर्द्धनी पक्वान्नजलपूरिता विष्णवे देया । एको धर्मराजाय घटो देयः । एकश्चित्रगुप्ताय । ततो मासिकानि चतुर्दशश्राद्धान्येकतन्त्रेण । तत्र क्रमः । द्वितीयमासे, त्रिपक्षे, तृतीयमासे, चतुर्थमासे, पञ्चममासे, षष्ठे, ऊनषष्ठे, सप्तमे, अष्टमे, नवमे, दशमे, एकादशे, द्वादशे, ऊनाब्दे चेति प्रेतैकोद्दिष्टवत्कार्याणि । ततः स्नात्वा सपिण्डीकरणं कुर्यात् । तत्र पूर्वं वैश्वदेवश्राद्धम् । देवपादप्रक्षालनम् । ततः पार्वणं प्रेतस्य पितृपितामहप्रपितामहानाम् । तदर्थं त्रयाणां पादप्रक्षालनम् । तत्र सर्वं पार्वणे पार्वणवत् एकोद्दिष्टे एकोद्दिष्टवत्, अत्राद्यमासे पक्षे तिथौ अमुकगोत्रस्यामुकप्रेतस्य वसुरुद्रादित्यलोकप्राप्त्यर्थं प्रेतत्वनिवृत्त्यर्थं च अमुकगोत्रस्यामुकप्रेतस्य अमुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुकशर्मणां वैश्वदेवपूर्वकं सैकोद्दिष्टं पार्वणविधिना सपिण्डीकरणश्राद्धं युष्मदनुज्ञयाऽहं करिष्ये । आसनम् । आवाहनम् । विश्वेषां देवानां पितॄणां प्रेतस्य चार्घपात्राणि पूरयित्वाऽभ्यर्च्य विश्वेभ्यो देवेभ्योऽर्घं दत्त्वा ततः प्रेताय जलम्, प्रेतपात्रे जलचतुर्थभागेनार्घं दत्त्वाऽवशिष्टमर्घपात्रस्थितं जलं पित्रादिपात्रेषु विभज्य तृतीयांशं निनयेत् । तत्र प्रेतपात्रं पितृपात्रेषु संयोजयिष्य इति पृष्ट्वा संयोजयेत्यनुज्ञातोऽर्घं संयोजयेत् । एवं पिण्डयोजनेऽप्यनुज्ञाप्रार्थनम् । तत्रेदं **ये समाना** इति मन्त्रद्वयं पठित्वा अमुकगोत्रस्यामुकप्रेतस्यार्घः अमुकगोत्रस्य प्रेतस्य पितुरमुकशर्मणोऽर्घेण सह संयुज्यताम्, वसुलोकप्राप्तिरस्त्विति वदेत् । एवं पितामहपात्रे प्रपितामहपात्रे च । ततस्तेभ्योऽर्घं दद्यात् पार्वणे नियमेन विकिरः । पिण्डदाने पूर्वं पार्वणसम्बन्धिनः पिण्डान्निरूप्य पश्चात्प्रेतपिण्डं त्रेधा विभज्य तत आद्यं भागमादाय **ये समाना** इति मन्त्रद्वयं पठित्वा अमुकगोत्रस्यामुकप्रेतस्य पिण्डः अमुकगोत्रस्य प्रेतस्य पितुरमुकशर्मणः पिण्डेन सह संयुज्यतामित्युक्त्वा प्रथमं पिण्डं संयोज्य प्रथमं पिण्डं वर्तुलं कुर्यात् । ततो वसुलोकप्राप्तिरस्त्विति वदेत् । एवमितराभ्यां पिण्डाभ्यां संयोजनम् । अनन्तरं रुद्रलोकप्राप्तिरस्तु । आदित्यलोकप्राप्तिरस्तु । इति यथाक्रमं वदेत् । अत ऊर्द्धमत्र पितर इति जपादि । पूजनानन्तरं पिण्डानभिमृश्येदं वदेत् । "एष वोऽनुगतः

प्रेतः पितरस्तं दधामि वः । शिवमस्त्विति शेषाणां जायतां चिरजीविनाम् ॥ समानीव आकूतिः समाना हृदयानि वः । समानमस्तु वो मनो यथा वः सुसहा सती ॥" अत ऊर्ध्वं प्रेतशब्दो नोच्चार्योऽक्षय्यादिषु । श्राद्धं समाप्य मोक्षधेनुसङ्कल्पः ॥ इति नवकण्डिकागदाधरभाष्ये सपिण्डीकरणप्रयोगः ॥ ५ ॥ * ॥

आभ्युदयिके प्रदक्षिणमुपचारः पूर्वाह्ले पित्र्यमन्त्रवर्जं जप ऋजवो दर्भा यवैस्तिलार्थाः सम्पन्नमिति तृप्तिप्रश्नः सुसम्पन्नमितीतरे ब्रूयुर्दधिबदराक्षतमिश्राः पिण्डा नान्दीमुखान् पितॄनावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञातो नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने नान्दीमुखान् पितॄन्वाचयिष्य इति पृच्छति वाच्यतामित्यनुज्ञातो नान्दीमुखाः पितरः पितामहाः प्रपितामहा मातामहाः प्रमातामहा वृद्धप्रमातामहाश्च प्रीयन्तामिति न स्वधां प्रयुञ्जीत युग्मानाशयेदत्र ॥ ॥ ६ ॥ ॥ * ॥

कर्कः०—आभ्युदयिके प्रदक्षिणमुपचार—इति । पुत्रजन्मादावभ्युदये यच्छ्राद्धं तदाभ्युदयिकमुच्यते । तत्र प्रदक्षिणमुपचारः, प्रदक्षिणग्रहणात् यज्ञोपवीतिना प्राक्संस्थमुदक्संस्थं वा प्राङ्मुखेन वा कर्तव्यतादि भवेत् । **पूर्वाह्ले—**नापराह्ले । **पित्र्यमन्त्रवर्जं जपः—**स चायमश्नत्सु यः पितृमन्त्रजपः स प्रतिषिध्यते । न त्वायन्तु न इत्ययम् । पित्र्यमन्त्र इति संज्ञाशब्दत्वात् । अस्य च जपावाहनार्थत्वात् । **ऋजवो दर्भाः—**पित्र्ये द्विगुणाः प्राप्नुवन्ति ते च प्रतिषिध्यन्ते ऋजवः प्रत्येतव्याः ॥ **यवैस्तिलार्थाः—**यस्तिलार्थः स सर्वो यवैः कर्तव्यः।तदत्र द्रव्याभिधायकत्वात् तन्मन्त्रो यवोऽसीति यथार्थमूहितव्यः।**सम्पन्नमिति तृप्तिप्रश्नः—**तृप्ताः स्थेत्यस्य स्थाने सम्पन्नमित्ययं प्रश्नो भवति । **दधिबदराक्षतमिश्राः पिण्डाः—**दधिबदराक्षतमिश्रेणान्नेन पिण्डा देयाः । **नान्दीमुखान् पितॄनावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञातो नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने-**अक्षय्योदकस्थाने नान्दीमुखाः पितरः प्रीयन्तामिति प्रयोगो भवति । **नान्दीमुखान् पितॄन्वाचयिष्य इति पृच्छति वाच्यतामित्यनुज्ञातो नान्दीमुखाः पितरः पितामहाः प्रपितामहा मातामहाः प्रमातामहा वृद्धप्रमातामहाश्च प्रीयन्तामिति—**नान्दीमुखान् पितॄन् वाचयिष्य इति पृच्छति वाच्यतामिति ब्राह्मणैरनुज्ञातो नान्दीमुखाः पितर इतीमं मन्त्रमुदाहरेत् । **न स्वधां प्रयुञ्जीत—**स्वधोदाहरणप्रतिषेधात्, तत्सारूप्यात् नान्दीमुखान् पितॄन् वाचयिष्य इति तत्स्थाने प्रयोगः कर्तव्यः । तत्र केचित्स्वधोदाहरणप्रतिषेधात् अस्तु स्वधेत्युच्यमान इति चोपदेशात्कुशेष्वपां निषेकं नेच्छन्ति । तदयुक्तम् । मन्त्रनिषेकयोरशेषशेषित्वाभावात्। तस्मात्तस्मिन् काले निषेक इति । **युग्मानाशयेदत्र—**आभ्युदयिके युग्मानाशयेदिति ॥ ६ ॥ ॥ * ॥

गदा०—वृद्धिश्राद्धमाह—**आभ्युदयिके प्रदक्षिणमुपचारः**—पुत्रजन्मविवाहादौ अभ्युदये यच्छ्राद्धं तदाभ्युदयिकशब्देनोच्यते । तत्र प्रदक्षिणमुपचारः । प्रदक्षिणग्रहणेन यज्ञोपवीतिना प्राक्संस्थमुदक्संस्थं वा प्राङ्मुखेन वा कार्यमिति लभ्यते । शातातपः—"अनिष्ट्वा पितृयज्ञेन वैदिकं किञ्चिदाचरेत् । तत्रापि मातरः पूर्वं पूजनीयाः प्रयत्नतः ॥ अकृत्वा मातृयागं तु वैदिकं यः समाचरेत् । तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः" इति । मातृगणस्तु भविष्यपुराणे निरूपितः—"गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा

मातरो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता'' इति **विष्णुपुराणे**–''कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः । शुभकर्माणि बालानां चूडाकर्मादिके तथा ॥ सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने । नान्दीमुखान्पितॄनादौ तर्पयेत्प्रयतो गृही'' इति । **जाबालिः**–''यज्ञोद्वाहप्रतिष्ठासु मेखलाबन्धमोक्षयोः । पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं समाचरेत् ॥ मातृश्राद्धं तु पूर्वं स्यात्पितॄणां तदनन्तरम् । ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम् ॥'' इति । वैदिककर्मसु प्रतिप्रयोगं श्राद्धावृत्तिप्रसक्तावाह–**कात्यायनः**–''असकृद्यानि कर्माणि क्रियेरन्कर्मकारिभिः । प्रतिप्रयोगं नैताः स्युर्मातरः श्राद्धमेव च ॥'' इति । सत्यपि वैदिककर्मत्वेऽष्टकादिषु न श्राद्धं कर्तव्यमित्याह–**कात्यायनः**–''नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते । न सोष्यन्ती जातकर्मप्रोषितागतकर्मसु ।'' **पूर्वाह्णे**–एतदाभ्युदयिकं पूर्वाह्णे भवति नापराह्णे । पुत्रजन्मादौ तु तत्काल एव । **पित्र्यमन्त्रवर्जं जपः**–अयं चाश्नत्सु यो जपः स निषिध्यते न त्वायन्तु न इत्ययम् । **उदीरता** इति त्रयोदशर्चं पित्र्यमिति पित्र्यमन्त्रसंज्ञा तस्यैव श्रवणात् । **ऋजवो दर्भाः**–अत्र ऋजवो दर्भा भवन्ति न द्विगुणाः । **यवैस्तिलार्थाः**–अत्र तिलार्थाः सर्वे यवैः कार्याः । तदत्र मन्त्रेऽपि **यवोऽसीत्यूहः** कार्यो मुख्यद्रव्याभिधायकत्वात् । **सम्पन्नमिति तृप्तिप्रश्नः**–तृप्ताः स्थेति पृच्छतीत्यत्र तृप्ताः स्थेत्यस्य स्थाने सम्पन्नमित्ययं प्रश्नो भवति । तथाच **छन्दोगपरिशिष्टे**–''सम्पन्नमिति तृप्ताः स्थ प्रश्नस्थाने विधीयते । सुसम्पन्नमिति प्रोक्ते शेषमन्नं निवेदयेत् ॥'' इति । **सुसम्पन्नमितीतरे ब्रूयुर्दधिबदराक्षतमिश्राः पिण्डाः**–दध्ना बदरीफलैरक्षतैश्च मिश्राः पिण्डा अत्र देयाः । **नान्दीमुखान्पितॄनावाहयिष्य इति पृच्छति**–क पितॄनावाहयिष्य इत्यस्य स्थाने नान्दीमुखान्पितॄनावाहयिष्य इत्ययं प्रश्नो भवति । **आवाहयेत्यनुज्ञातो नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने**–प्रयोगो भवतीति शेषः ॥ **नान्दीमुखान्पितॄन्वाचयिष्य इति पृच्छति**–पितॄन्वाचयिष्य इत्यस्य स्थाने इत्यर्थः । **वाच्यतामित्यनुज्ञातो नान्दीमुखाः पितरः पितामहाः प्रपितामहा मातामहाः प्रमातामहा वृद्धप्रमातामहाश्च प्रीयन्तामिति**–इति द्विजैर्वाच्यतामित्यनुज्ञातो नान्दीमुखाः पितर इत्यादिप्रीयन्तामित्यन्तं पठेत् । **न स्वधां प्रयुञ्जीत**–स्वधोच्चारणं न कुर्यादित्यर्थः । **युग्मानाशयेदत्र**–अत्रास्मिन्नाभ्युदयिके युग्मान्ब्राह्मणान्भोजयेत् ॥ इति गदाधरभाष्ये षष्ठी कण्डिका ॥ ६ ॥

अथ **प्रयोगः** । तत्र पूर्वं देशकालौ स्मृत्वा अमुकनिमित्तं मातृपूजापूर्वकं वसोर्द्धारापूर्वकं च नान्दीश्राद्धमहं करिष्य इति सङ्कल्पः । ततः क्षालितैः शुक्लतण्डुलैः पीठस्योपरि गौर्यादिषोडशमातॄः स्थापयेत् । तद्यथा–ॐ भूर्भुवः स्वः गणपतिं स्थापयामि, एवं गौरीं स्थापयामि, पद्माम्, शचीम्, मेधाम्, सावित्रीम्, विजयाम्, जयाम्, देवसेनाम्, स्वधाम्, स्वहाम्, मातॄः, लोकमातॄः, धृतिम्, पुष्टिम्, तुष्टिम्, आत्मनः कुलदेवतां स्थापयामि । तत आसां **मनोजूतिरिति** प्रतिष्ठापनं च । ततः पूजा, गणपतिसहितषोडशमातृभ्यो नमः गन्धं समर्पयामि । पुष्पं धूप नैवेद्यं ताम्बूलं दक्षिणाः । गणपतिसहितानां षोडशमातॄणां पूजनविधेर्यन्न्यूनं यदतिरिक्तं तत्परिपूर्णमस्तु । इति **मातृपूजनम्** । अथ **वसोर्द्धारापूजनम्** । द्रवीभूतं घृतं गृहीत्वा कुड्यादिषु **वसोः पवित्रमसीति** धाराः पञ्च सप्त वा **उदक्संस्थाः** कुर्यात् । **मनोजूतिरिति** प्रतिष्ठापूर्वकं वसोर्द्धारादेवताभ्यो नम इति पञ्चोपचारैः पूजयेत् । इति **वसोर्द्धाराकरणम्** । अथ **नान्दीश्राद्धम** । तच्च यथाकुलदेशाचारेण सपिण्डकमपिण्डकं वा कार्यम् । तदुक्तं **भविष्यपुराणे**–''पिण्डनिर्वपणं कुर्यान्न वा कुर्याद्विचक्षणः । वृद्धिश्राद्धे कुलाचारो देशकालाद्यवेक्ष्य हि ॥'' अपिण्डकेऽग्नौकरणादीनामपि निषेधः । तथाहि–''अग्नौकरणमर्घं चावाहनं चावनेजनम् । पिण्डश्राद्धे प्रकुर्वीत पिण्डहीने निवर्तते ॥ पिण्डनिर्वापरहितं यत्र श्राद्धं विधीयते । स्वधावाचनलोपोऽस्ति विकिरस्तु न लुप्यते ॥ अक्षय्यदक्षिणा स्वस्ति सौमनस्यं यथास्थितम्'' इति । तच्च सपिण्डकमाभ्युदयिकं लिख्यते । आचमनम् प्राणायामः, विश्वेदेवार्थे, मात्राद्यर्थे, पित्राद्यर्थे, सपत्नीकमातामहाद्यर्थे च द्वौ द्वौ विप्रौ युग्माः शक्तितो भोज्याः । अमूला ऋजवो दर्भाः । यज्ञोपवीती प्राङ्मुखो दद्यात् । तिलार्थे यवाः । नान्दीमुखाः सत्यवसुसंज्ञका विश्वेदेवा एतद्वः पाद्यं, पादावनेजनं, पादप्रक्षालनम्, एषोऽर्घः, इदमत्र चन्दनं पुष्पं च । अमुकगोत्राः मातृपितामहीप्रपितामह्यः नान्दीमुख्यः एतद्वः पाद्यम् , पादावनेजनं, पादप्रक्षालनम्, एष वोऽर्घः, इदमत्र चन्दनं, पुष्पम् । अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखाः युग्मरूपाः एतद्वः पाद्यं, पादावनेजनम्, पादप्रक्षालनम्, एष वोऽर्घः, इदमत्र चन्दनं, पुष्पम् । अमुकगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः नान्दीमुखा युग्मरूपा एतद्वः पाद्यम् , पादावनेजनम्, पादप्रक्षालनम्, एष वोऽर्घः इ० । तत आचमनं दिग्बन्धनम् । ''अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् । तथा बर्हिषदः पान्तु

याम्यां ये पितरस्तथा ॥ प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः । ऊर्ध्वतस्त्वर्यमा रक्षेत्कव्यवाडनलोऽप्यधः ॥ रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः । सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥ तिला रक्षन्त्वसुरान्दर्भा रक्षन्तु राक्षसान् । पङ्क्तिं वै श्रोत्रियो रक्षेदतिथिः सर्वरक्षकः ॥'' ''निहन्मि सर्वं यदमेध्यवत्'' इत्यादि ''सर्वे''इत्यन्तेन मन्त्रेण नीवीबन्धनम् । श्राद्धभूमौ गयामित्यारभ्य गयायै नमः इत्यन्तं पठेत् । ततः कर्मार्थं जलाभिमन्त्रणं **यद्देवा** इति तिसृभिर्ऋग्भिः । ततः पाकप्रोक्षणम् । दुष्टदृष्ट्यादिशूद्रसम्पर्कदोषानिवृत्त्यर्थं पाकादीनां पवित्रताऽस्त्विति । देशकालपाकपात्रद्रव्यश्राद्धसम्पदस्तु । अद्येत्यादि देशकालौ स्मृत्वा अमुकगोत्राणां मातृपितामहीप्रपितामहीनां नान्दीमुखीनां तथाऽमुकगोत्राणां पितृपितामहप्रपितामहानां नान्दीमुखानां युग्मरूपाणां तथाऽमुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां नान्दीमुखानां युग्मरूपाणां पार्वणत्रयविधिना आभ्युदयिकं श्राद्धमहं करिष्ये । सत्यवसुसंज्ञकानां विश्वेषां देवानामिदमासनम् । हस्तप्रक्षालनम् । उपग्रहविष्टः। गोत्राणां मातृपितामहीप्रपितामहीनां नान्दीमुखीनामिदमासनम् । हस्तप्रक्षालनमुपग्रहविष्टः । गोत्राणां पितृपितामहप्रपितामहानां नान्दीमुखानामिदमासनम् । हस्तप्रक्षालनमुपग्रहविष्टः । गोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानां नान्दीमुखानामित्यादि । सत्यवसुसञ्ज्ञकान्विश्वान्देवानावाहयिष्ये । आवाहयेत्यनुज्ञातो **विश्वेदेवासः** इत्यावाहयेत् । ततो यवैरवकीर्य **विश्वेदेवाः शृणुतेमम्** इति जपेत् । **आगच्छन्तु० भवन्तु ते** इति पठेत् । गोत्राः मातृपितामहीप्रपितामहीः नान्दीमुखीः आवाहयिष्ये । आवाहयेत्यनुज्ञात **उशन्तस्त्वेत्यनया** आवाहयेत् । ततो यवैरवकीर्य **आयन्तु न** इति जपेत् । गोत्रान्पितृपितामहप्रपितामहान् नान्दीमुखानावाहयिष्ये । आवाहयेत्यनुज्ञात **उशन्तस्त्वेत्यावाहयेत्** । यवैरवकीर्य **आयन्तु न** इति जपेत् । गोत्रान्मातामहप्रमातामहवृद्धप्रमातामहान्सपत्नीकान्नान्दीमुखानावाहयिष्ये । आवाहयेत्यनुज्ञात आवाहनावकिरणजपा पूर्ववत् । ततोऽर्घपूरणम्, **शं नो** देवीरित्यनेन । ततो यवावपनम् । " यवोऽसि सोमदैवत्यः " इति । इदमत्र चन्दनं पुष्पं च । अर्घं गृहीत्वा **या दिव्या** इति मन्त्रेण सत्यवसुसंज्ञका विश्वेदेवा एष वोऽर्घ इति दद्यात् । **या दिव्या** इति पठित्वा अमुकगोत्रा मातृपितामहीप्रपितामह्य एष वोऽर्घ इति । एवं सर्वत्र । प्रथमे पात्रे संस्रवान्समवनीय पितृभ्यः स्थानमंसीति न्युब्जं पात्रं करोति । ततो गन्धपुष्पधूपदीपवाससां च प्रदानम् । सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यः स्वाहेति दत्त्वा । गोत्राभ्यो मातृपितामहीप्रपितामहीभ्यो नान्दीमुखीभ्यो यथादत्तं गन्धाद्यर्चनम् । गोत्रेभ्यः पितृपितामहप्रपितामहेभ्यो नान्दीमुखेभ्यो यथादत्तं गन्धाद्यर्चनम् । गोत्रेभ्यो मातामहप्र०भ्यो नान्दी०भ्यो यथा द० । आचमनम् । उद्धृत्य घृताक्तमन्नं पृच्छत्यग्नौ करिष्य इति । कुरुष्वेत्यनुज्ञातस्ततो मेक्षणेनाहुती जुहोति । अग्नये कव्यवाहनाय स्वाहा, सोमाय पितृमते स्वाहेति निरग्निकस्तु विप्रपाणौ जले वा कुर्यात् । हुतशेषं दत्त्वा पात्रमालभ्य जपति **पृथिवी ते पात्रं० स्वाहेति** । **इदं विष्णुर्वि० सुरे** इत्यङ्गुष्ठमन्नेऽवगाह्य **अपहता** इति यवान्विकीर्य । एवं सर्वत्र । उष्णं स्विष्टमन्नं दद्याच्छक्त्या वा । ततः पित्र्यमन्त्रवर्जं जपः । अन्नप्रकिरणम् । आचमनम् । सकृत्सकृद्ब्राह्मणेभ्य उदकदानम् । ततः सप्रणवां गायत्रीं **मधुवाता** इति त्र्यृचं च पठेत् । ब्राह्मणाः सम्पन्नमिति तृप्तिप्रश्नः । सुसम्पन्नमिति प्रतिवचनम् । शेषमन्नमप्यस्ति । इष्टैः सह भुज्यताम् । **अपहता** इत्युच्छिष्टसमीपे उल्लेखनम् । उदकोपस्पर्शनम् । साग्निकस्योल्मुकनिधानम् । अवनेजनम् । सकृदाच्छिन्नास्तरणम् । पिण्डदानम् । दधिबदराक्षतमिश्रं यथोक्तम् । **अत्र पितर** इत्युक्त्वोदङ्मुख आस्ते, आतमनात् । आवृत्त्यामीमदन्तेति जपः । ततोऽवनेजनम् । नीवीविसर्गः । **नमो व** इति षडञ्जलिकरणं घोरशोषवर्जम् । **एतद्व** इति सूत्रदानम् । पिण्डानामभ्यर्चनादिनैवेद्यान्तम् । आचमनम् । ततः सुप्रोक्षितादिः ऊर्जमित्युदकनिषेकान्तम् । नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्योदकदानम् । तत उर्ज्जमित्युदकनिषेकान्तं स्वधावाचनवर्जं पात्रोत्तानकरणम् । ततो दक्षिणादानादिगृहप्रवेशनान्तम् ॥ इति नवकण्डिकागदाधरभाष्ये आभ्युदयिकश्राद्धप्रयोगः ॥ ६ ॥ * ॥

अथ तृप्तिर्ग्राम्याभिरोषधीभिर्मांसं तृप्तिस्तदभाव आरण्याभिर्मूलफलैरोषधीभिर्वा सहान्नेनोत्तरास्तर्पयन्ति छागोस्रमेषानालभ्य क्रीत्वा लब्ध्वा वा न स्वयंमृतानाहृत्य पचेन्मासद्वयं तु मत्स्यैर्मासत्रयं तु हारिणेन चतुरऽऔरभ्रेण पञ्च शाकुनेन षट् छागेन सप्त कौर्मेणाष्टौ

वाराहेण नव मेषमांसेन दश माहिषेणैकादश पार्षतेन संवत्सरं तु गव्येन पयसा पायसेन वा वार्ध्रीणसमांसेन द्वादशवर्षाणि ॥ ७ ॥

कर्क०--अथ तृप्तिर्ग्राम्याभिरित्येवमादि अमावास्यायामित्येवमन्तं सूत्रं निगदव्याख्यातमिति । इति कर्कोपाध्यायकृतं श्राद्धविधिभाष्यं समाप्तम् ॥

गदा०–अथ तृप्तिः–उच्यत इति शेषः । **ग्राम्याभिरौषधीभिर्मासं तृप्तिः**–पितॄणामिति शेषः । ताश्च यवव्रीहिमाषतिलाद्याः । मनुः–“ तिलैर्व्रीहियवैर्माषैरद्भिर्मूलैः फलेन वा । दत्तेन मासं प्रीयन्ते विधिवत्पितरो नृणाम् ” इति । **तदभावे आरण्याभिः–मासं तृप्तिरिति** वर्तते । ग्राम्याणामभावे आरण्याभिः श्यामाकनीवाराद्याभिः । **मूलफलैरोषधीभिर्वा**–स्पष्टमेतत् । **सहान्नेनोत्तरास्तर्पयन्ति**–उत्तरा अग्रे वक्ष्यमाणाः पदार्थाः शाखादयः सर्वे अन्नेन मूलफलौषधीभिः सह दत्तास्तर्पयन्तीत्यर्थः । नतु केवलाः ॥ **छागोस्रमेषानालभ्य क्रीत्वा लब्ध्वा वा न स्वयंमृतानाहृत्य पचेत्** ॥ छागो*स्रमेषाणां मध्येऽन्यतममन्येन हतं क्रयेण गृहीत्वा अथ लब्धं वाऽऽनीय पितॄंस्तर्पयेत् नतु स्वयंमृतानामाहरणम् । **मासद्वयं तु मत्स्यैर्मासत्रयं तु हारिणेन चतुर औरभ्रेण पञ्च शाकुनेन षट् छागेन सप्त कौर्मेणाष्टौ वाराहेण नव मेषमांसेन दश माहिषेणैकादश पार्षतेन संवत्सरं तु गव्येन पयसा पायसेन वा वार्ध्रीणसमांसेन द्वादशवर्षाणि**–पाठीनादयो मत्स्याः, हरिणादयो मृगाः, उरभ्र आरण्यो मेषः, शकुनिः पक्षी, सोऽप्यनिषिद्धो ग्राह्यः; मेषश्चित्रमृगः वार्ध्रीणसो निगमोक्तः । “त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् । वार्ध्रीणसं तु तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि ॥” त्रिपिबमित्युदकपानसमये मुखं कर्णद्वयं चोदकमध्ये पततीति त्रिपिबः ॥ इति नवकण्डिकागदाधरभाष्ये सप्तमी कण्डिका ॥ ७ ॥

अथाक्षय्यतृप्तिः खड्गमांसं कालशाकं लोहछागमांसं मधु महाशल्को वर्षासु मघाश्राद्धं हस्तिच्छायायां च, मन्त्राध्यायिनः पूताः शाखाध्यायी षडङ्गविज्ज्येष्ठसामगो गायत्रीसारमात्रोऽपि पञ्चाग्निः स्नातकस्त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णी द्रोणपाठको ब्राह्मोढापुत्रो वागीश्वरो याज्ञिकश्च नियोज्या अभावेऽप्येकं वेदविदं पङ्क्तिमूर्धनि नियुञ्ज्यात्, आसहस्रात्पङ्क्तिं पुनातीति वचनात् ॥ ८ ॥

गदा०–**अथाक्षय्यतृप्तिः**–उच्यत इति शेषः । किमक्षय्यकं द्रव्यमित्यत आह–**खड्गमांसं कालशाकं लोहच्छागमांसम्**–ललाटे शृङ्गवान्पशुः खड्गः । रक्तच्छागो लोहच्छागः । मधु । महाशल्कः मत्स्यविशेषः । **वर्षासु मघाश्राद्धं हस्तिच्छायायां च**–श्राद्धं तृप्तिकरमिति शेषः । **मन्त्राध्यायिनः पूताः शाखाध्यायी षडङ्गविज्ज्येष्ठसामगो गायत्रीसारमात्रोऽपि पञ्चाग्निः स्नातकस्त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णी द्रोणपाठको ब्राह्मोढापुत्रो, वागीश्वरो याज्ञिकश्च नियोज्याः**--एते मन्त्राध्यायिमुख्या याज्ञिकान्तास्ते सर्वे पङ्क्तिपावनाः श्राद्धे नियोज्याः । एतेषां नियोजनेन पितॄणामक्षय्यतृप्तिरित्यर्थः । मन्त्राध्यायिनः संहिताध्यायिनः । पूता आचरणेन पूताः । षडङ्गवित् शिक्षाकल्पादीनामर्थतो ग्रन्थतश्च वेत्ता । ज्येष्ठसाम्नः सन्ततगाता ज्येष्ठसामगः । अथ ज्येष्ठसाम छन्दोगानां व्रतं साम च तद्योगाज्ज्येष्ठसामगः । गार्हपत्याहवनीयदक्षिणाग्निसभ्यावसथ्याग्निमान् पञ्चाग्निः । त्रिणाचिकेतः यजुर्वेदभागस्तद्व्रतं च तदुभयं योऽधीते यश्च करोति सोऽपि तद्योगात्त्रिणाचिकेतः । त्रिमधुः ऋग्वेदैकदेशः तदधीते

---

* छागो वर्करः, उस्रस्तूपरः, स च शृङ्गहीनश्छागादिः, इति **श्राद्धकाशिकायाम्** । **उस्रावेतमिति** मन्त्रव्याख्यानावसरे “हे उस्रौ अनडाहौ” इति **महीधराचार्याः** । अनड्वाहौ युनक्त्युस्रावेतमितीति, छागोस्रमेषाः पञ्चाभिधानाद्यथालिङ्गमिति च **कातीयश्रौतसूत्रम्** । लोहितालिङ्गोस्रो गौरितीति च तद्भाष्ये।

तद्व्रतं चरति यः स त्रिमधुः ॥ त्रिसुपर्णी अध्वर्युवेदभागस्यार्थतो ग्रन्थस्याध्येता । द्रोणपाठको धर्मशास्त्रपाठकः । ब्राह्मोढापुत्रो ब्राह्मविवाहपरिणीतापुत्रः । वागीश्वरो विद्वान् । 'अभावेऽप्येकं वेदविदं पङ्क्तिमूर्द्धनि नियुञ्ज्यांदासहस्रात्पङ्क्तिं पुनातीति वचनात् ॥ इति नवकण्डिकागदाधरभाष्ये अष्टमी काण्डिका ॥ ८ ॥ * ॥

अथ काम्यानि भवन्ति स्त्रियोऽप्रतिरूपाः प्रतिपदि द्वितीयायाᳬं स्त्रीजन्माश्वास्तृतीयायां चतुर्थ्यां क्षुद्रपशवः पुत्राः पञ्चम्यां द्यूतर्द्धिः षष्ठ्यां कृषिः सप्तम्यां वाणिज्यमष्टम्यामेकशफं नवम्यां दशम्यां गावः परिचारका एकादश्यां धनधान्यानि द्वादश्यां कुप्यᳬं हिरण्यं ज्ञातिश्रैष्ठ्यं च त्रयोदश्यां युवानस्तत्र म्रियन्ते शस्त्रहतस्य चतुर्दश्याममावास्यायाᳬं सर्वमित्यमावास्यायाᳬं सर्वमिति ॥ ॥ ९ ॥ * ॥

गदा०–अथ काम्यानि भवन्ति स्त्रियोऽप्रतिरूपाः प्रतिपदि द्वितीयायाᳬं स्त्रीजन्माश्वास्तृतीयायां चतुर्थ्यां क्षुद्रपशवः पुत्राः पञ्चम्यां द्यूतर्द्धिः षष्ठ्यां कृषिः सप्तम्यां वाणिज्यमष्टम्यामेकशफं नवम्यां दशम्यां गावः परिचारका एकादश्यां धनधान्यानि द्वादश्यां कुप्यᳬं हिरण्यं ज्ञातिश्रैष्ठ्यं च त्रयोदश्यां युवानस्तत्र म्रियन्ते शस्त्रहतस्य चतुर्दश्याममावास्यायाᳬं सर्वमित्यमावास्यायाᳬं सर्वमिति–प्रतिपदादयश्च कृष्णपक्षजाः । स्त्रीजन्म कन्योदयः । क्षुद्रपशव अजादयः । कृषिः कृषिफलम् । वाणिज्यं वाणिज्यफलम् । परिचारका दासादयः । कुप्यं सुवर्णरूप्यव्यतिरिक्तं ताम्रादि । यूनां मृतानां त्रयोदश्यां श्राद्धं देयम् । शस्त्रहतस्येति जलाद्दिद्वात्रिंशद्दुर्मरणेन मृतानामुपलक्षणम् । प्रतिपदादितिथिष्वभिहितानि यानि फलानि तेषु स्वीयमनसोऽभीष्टान्सर्वान्कामानमावास्यायां श्राद्धदः प्राप्नोति । अत्र यद्यपि सर्वकामप्राप्तिरविशेषेण कथिता, तथापि न युगपत्सर्वकामनाप्राप्तिः, अपितु अमावास्यायामनुष्ठितेन श्राद्धेनैकेनैककामनाप्राप्तिः । एवममावास्यान्तरानुष्ठितेनान्येन श्राद्धेनान्यः काम इति ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपतिश्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृते कातीयश्राद्धसूत्रभाष्ये नवमी कण्डिका ॥ ९ ॥ * ॥

इति गदाधरकृतं श्राद्धविधिभाष्यं समाप्तम् ।

कातीयश्राद्धसूत्रव्याख्या श्राद्धकाशिका।

यस्य प्रसादपयसा क्रतुपास्तं कात्यायनं मुनिवरं शिरसाभिवन्दे ।
सिक्ताः फलन्ति यजुषामिह याजकानां स्वर्गोद्भवानि विविधानि फलान्यजस्रम् ॥ १ ॥
कर्को व्याख्यदिदं गभीरवचनैः सूत्रं यतोऽस्मादभूद् दुर्बोधं च ततो हलायुध इति व्याख्यत्तथाऽप्यस्फुटम् ।
भूयोऽपि प्रतिषेधकारिवचनैः स्मार्तैर्मया काशिका सूत्रस्योपरि संशयौघतिमिरध्वंसाय संतन्यते ॥ २ ॥
सूत्रार्थव्यञ्जनाद्वाक्यैर्विशेषोक्तिप्रकाशनात् । अस्यान्वर्थमिदं नाम ग्रन्थस्य श्राद्धकाशिका ॥ ३ ॥
नित्यानन्द इतीह याज्ञिकवरो जातस्तदीयः सुतः स्मार्ताग्नौ विहितक्रियोऽतिसुखइत्याख्यो जगत्यद्भुतः ।
तत्पुत्रोऽप्यभवत्स्मृतिज्ञचतुरः शास्त्रेष्वधीती श्रुतौ विष्णुर्मिश्र इमं निबन्धमकरोत्कृष्णः कृती तत्सुतः ॥ ४ ॥

तत्र पूर्वां पौर्णमासीमुपवसेदित्यादिना श्रौतकर्माण्युपदिश्याथातो गृह्यस्थालीपाकानामित्यादिना स्मार्तान्यपि व्याख्यायावशिष्टं श्राद्धकर्म वक्तव्यमिति सूत्रमारभते । **अपरपक्षे श्राद्धं कुर्वीत**—अपरपक्षः कृष्णपक्षः । चान्द्रमासे शुक्लकृष्णपक्षयोः पूर्वापरत्वसंभवात् । श्राद्धमिति पिण्डप्रदानकर्म । कुर्वीतेति विधायकं पदम् । ननु च त्रिपदमिदं सूत्रम् । तत्र पदत्रयेऽप्येकत्वमनुपपन्नम् । तथा हि—प्रौष्ठपद्या अपरपक्षे मासि मासि चैवमिति **शौनकः** । "अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् । हेमन्तग्रीष्मवर्षासु पाञ्चयज्ञियमन्वहम्॥" इति **मनुः** । "अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् । कन्याकुम्भवृषस्थेऽर्के कृष्णपक्षेषु सर्वदा॥" इति **मत्स्यपुराणम्** । एषु वचनेषु सर्वापरपक्षेषु कर्तव्यतोपदेशादपरपक्षेष्विति वक्तुमुचितम् । तथा—"अश्वयुक्कृष्णपक्षेषु श्राद्धं कार्यं दिने दिने" इति वचनात्प्रतिदिनकर्तव्यतया श्राद्धानीति वक्तुमुचितत्वात् । तथा ब्राह्मणादिचातुर्वर्ण्यापेक्षया कुर्वीरन्निति कर्तुमुचितत्वाच्चेति । अतश्चापरपक्षेषु श्राद्धानि कुर्वीरन्निति सूत्रं प्रणेतव्यम् । अत्रोच्यते—अपरपक्षेष्विति बहुत्वमुचितमिति यदाशङ्कि तन्न, तथा सति सर्वसामान्येनास्यापरपक्षस्य वैशिष्ट्यानुपपत्तेः । तथा च **पुराणसमुच्चये**—"षण्णां वै शुक्लपक्षाणां षट् पक्षा ये परे स्मृताः । तेषां पुण्यतमः पक्ष आषाढ्याः पञ्चमस्तु यः ॥" इत्यादि । यच्चातर्कि श्राद्धानीति वक्तुमुचितमिति तदप्यपेशलम् । तथा सत्येकोद्दिष्टपार्वणनित्यश्राद्धादीनि प्राप्नुयुस्तन्मा भूदिति पार्वणरूपत्वेनैकत्वमुक्तम् । तथा चोक्तं—"कन्यां गते सवितरि दिनानि दश पञ्च च । पार्वणेनैव विधिना तत्र श्राद्धं विधीयते ॥" इति । एवं तर्हि पार्वणत्वे चतुर्दश्यादौ पार्वणादिनिषेधस्य कथं गतिरिति चेत् मैवं भाषिष्ठाः । तस्य पक्षश्राद्धव्यतिरिक्तश्राद्धेषु त्रिभागादिपक्षविभागेषु चतुर्दश्यां पार्वणादिनिषेधस्य पर्यवसितत्वात् । तथा च मनुः—"कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् । श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः ॥" पक्षश्राद्धे तु **कृष्णाजिनिः**—" नभस्यापरपक्षे च श्राद्धं कार्यं दिने दिने । नैव नन्दादि वर्ज्यं स्यान्नैव वर्ज्या चतुर्दशी ॥" इति । यच्चातर्कि चातुर्वर्ण्यापेक्षया कुर्वीरन्नित्युचितमिति । तदप्यसुन्दरम् । तथा सत्यधिकृतानधिकृतानामधिकारः प्राप्नुयात्तन्माभूदिति कुर्वीतेत्यधिकारिविशेषणेनैकत्वमुक्तम् । ततश्च सर्वापरपक्षेषु हेमन्तग्रीष्मवर्षापरपक्षास्तेषु कन्याकुम्भवृषस्थेऽर्के त्रयस्तत्रापि भाद्रपदापरपक्षः पुण्यतमः कालस्तत्र पार्वणं श्राद्धमधिकारी कुर्यादिति सिद्धम् । एवं च सति कालान्तरानुपदेशादमावस्यादीनां श्राद्धकालत्वं नाभिमतमिति चेत् मैवम् । अपरपक्षशब्दस्योपलक्षणार्थत्वेन तत्संग्रहोपपत्तेः । नन्वेवमपि कृष्णपक्ष इति वाच्येऽपरपक्ष इति गौरवं किमर्थमिति । आह—पित्र्यकर्मणि प्रतिज्ञादौ चान्द्रमासोच्चारणज्ञापनार्थमित्यदोषः । तथा चोक्तम्—"आब्दिके पितृकृत्ये च मासश्चान्द्रः प्रशस्यते ॥" तथा—"सौरमासो विवाहादौ यज्ञादौ सावनः स्मृतः । पार्वणे चाष्टकाश्राद्धे चान्द्रो मासो महालये ॥" इति । बृहस्पतिरपि—" रवेरभ्युदये मानं चन्द्रस्य पितृकर्मणि ।" तथा—" सदैव पितृकृत्यादौ मासश्चान्द्रमसः स्मृतः ।" अपि च—"विवाहादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः । शेषकर्मसु चान्द्रः स्यादेष मासाविधिः स्मृतः॥" इति । अत्रैतच्चिन्त्यते—किं पक्षश्राद्धं नित्यं काम्यं वेति । तत्रैक आहुः—काम्यमिति । तन्न, "नाश्नन्ति पितरश्चेति कृत्वा मनसि यो नरः। पक्षश्राद्धं न कुरुते तस्य रक्तं पिबन्ति ते ॥" इत्यकरणे प्रत्यवायजनकत्वश्रवणात् । नित्यमित्यन्ये शाकेनापरमक्षमतिक्रामेदिति सूत्रितत्वात् । तदपि न ।" पितृगाथाः सदैवात्र गीयन्ते ब्रह्मवादिभिः । कदा नः सन्ततान्वय्यः स कश्चिद्भविता सुतः ॥ पितृपक्षे सदा श्राद्धं पूर्णपक्षे प्रदास्यति । तं प्रतीक्षामहे सर्वे सुवृष्टिमिव कर्षकाः ॥

काम्यदायी भवेत्काश्चित्कुलेऽस्मच्छ्राद्धदो नरः ।" इत्यादिवचनैः काम्यत्वस्य प्रतीयमानत्वात् । तस्मादुभयरूपमिति युक्तम् । तत्र नित्यकाम्ययोः संकरे काम्यस्य बलवत्त्वान्नित्यं प्रसङ्गात्सिद्ध्यतीति न्यायाच्च काम्यानुष्ठानेनैव नित्यस्यापि सिद्धिः । तथा च संग्रहकारः—"काम्यतन्त्रेण नित्यस्य तन्त्रं श्राद्धस्य सिद्ध्यति" इति । एवं च सति काम्ये सर्वाङ्गोपसंहारनियमाद्भरणीमघायुगादिरविवारादिनिषिद्धकालेऽपि पिण्डदानं महालये भवतीति । तथा च **पद्मपुराणम्**—"वारे पाते च संक्रान्तौ युगादौ च महालये । तर्पणे पिण्डदाने च तीर्थे दोषो न विद्यते ॥" तर्पणे तिलानाम् । **ब्रह्माण्डेऽऽपि**—"ऋक्षयोगादिविद्धेऽपि तद्दिने पिण्डपातनम् ।" **प्रचेता** अपि—"आभ्युदयिके संप्राप्ते मघा वापि त्रयोदशी । क्षयाहे वाऽपि संप्राप्ते पिण्डनिर्वपणं स्मृतम् ॥" **वृद्धमनु**रपि—"महालये चतुर्दश्यां मघायां पुत्रवानपि । पिण्डनिर्वपणं कुर्यात् यस्य शस्त्रहतः पिता ॥ कृष्णपक्षे चतुर्दश्यां मघायुक्तं दिनं यदि । पिण्डनिर्वपणं कुर्यात्तृप्त्यर्थं शस्त्रघातिनः ॥" अपि च—"तीर्थे सांवत्सरे श्राद्धे पितृयज्ञे महालये । पिण्डदानं प्रकुर्वीत युगादिभरणीमघे॥"तथा—"महालये क्षयाहे च दर्शे पुत्रस्य जन्मनि । तीर्थेषु निर्वपेत्पिण्डान् रविवारादिकेष्वपि ॥" इति । एवं तर्हि भरणीमघायुगादिरविवारादिषु पिण्डनिषेधकानि वचनान्यनर्थकानि स्युरिति । "अयने विषुवे चैव मघायमयुगादिषु । श्राद्धं कुर्वीत यत्नेन पिण्डनिर्वपणं विना ॥ मघायुगादौ भरण्यां यत्नेन परिवर्जयेत् । पिण्डदानं न कुर्वीत यदीच्छेत्सुतजीवितम् ॥ याम्यं वा पैतृकं वाऽपि पितृपक्षे विशेषतः । तत्र संकल्पनं कुर्यात्पितॄणां पुष्टिदः सदा ॥ मन्वादिश्च युगादिश्च मघा च भरणी तथा । श्राद्धं तत्र प्रकुर्वीत पिण्डनिर्वपणं विना ॥ तथा मघाभरण्योश्च त्रयोदश्यां विशेषतः । प्रौष्ठपदस्य द्वादश्यां मघर्क्षं निपतेद्यदि ॥ तत्र संकल्पनश्राद्धं पिण्डनिर्वापवर्जितम् । मघायुगादौ भरण्यां संक्रान्तौ रविवासरे ॥ पिण्डदानं न कुर्वीत यदीच्छेज्जीवितान् सुतान् । मघायां पिण्डदानेन ज्येष्ठः पुत्रो विनश्यति ॥ कनीयांस्तु त्रयोदश्यां क्षयादभ्युदयादृते । मघायुगादौ भरण्यां श्राद्धं कुर्यादतन्द्रितः ॥ पिण्डदानं न कुर्वीत तच्च स्यात्क्षयवासरे । वैशाखस्य तृतीयायां नवम्यां कार्तिकस्य च ॥ श्राद्धं संक्रान्तिवत्कुयात् पिण्डनिर्वपणं विना । युगादौ पितृनक्षत्रे तथा मन्वन्तरादिषु ॥ अर्घ्यपिण्डं न कुर्वीत वैष्णवं श्राद्धमाचरेत्॥" इत्यादीनि । सत्यम् । एतानि वचनानि तिथिवारनक्षत्रसंक्रान्तियुगादिन्निमित्तक्रियमाणेषु काम्यश्राद्धेषु पिण्डदानं निषेधन्ति न पुनः पक्षश्राद्धतिथ्याश्रयादिनिमित्तश्राद्धेष्वित्यविरोधः । अन्यथा 'वारे पाते च संक्रान्तौ' इत्यादिभिर्विरोधात् । अथ पार्वणेनैव विधिनेत्युक्तं तत्रैकपार्वणं वा, किंवा द्विपार्वणमुत चतुःपार्वणं वेति । पक्षश्राद्धे तु. पार्वणैकोद्दिष्टयोरप्राप्तत्वात् । सर्वत्रापि पार्वणधर्मत्वात्त्रयाणां विहितत्वाच्चेति । तथा ह्येकपार्वणे **मत्स्यपुराणम्**—" ततः प्रभृति संक्रान्तावुपरागादिकर्मसु । त्रिपिण्डमाचरेच्छ्राद्धमेकोद्दिष्टं मृतेऽहनि॥" **प्रजापति**रपि—" संक्रान्तावुपरागे च वर्षोत्सवमहालये । निर्वपेदिति पिण्डांस्त्रीनिति प्राह प्रजापतिः॥" इति । द्विपार्वणे तु **कात्यायनः**—" कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम् । प्रत्याब्दिकं च शेषेषु पिण्डाः स्युः षडिति स्थितिः ॥" इति । चतुःपार्वणे तु **कात्यायनः**—"कुर्याद्द्वादशदैवत्यं प्रेतपक्षे तु सर्वदा । तथा तीर्थे गयायां च एष धर्मः सनातनः ॥ आदौ पिता ततो माता ततो मातामहस्तथा । मातामह्यस्ततो दद्यात्प्रेतपक्षे तु सर्वदा ॥ " **सुमन्तुः**—"पितृभ्यः प्रथमं दद्यान्मातृभ्यस्तदनन्तरम् । ततो मातामहेभ्यश्च तत्पत्नीभ्यस्तथैव च ॥ गयायां च तथा तीर्थे प्रेतपक्षे विशेषतः । कुर्याद्द्वादशदैवत्यमेकोद्दिष्टमतः परम् ॥" एवं वचनविप्रतिपत्तौ व्यवस्थोच्यते । तत्रैकपार्वणचतुःपार्वणयोर्यथाक्रमं क्षयाहनवमीविषयत्वेन पारिशेष्याद् द्विपार्वणमेव पक्षश्राद्धेष्ववतिष्ठते। तथा च **वृद्धयाज्ञवल्क्यः**—"पिता पितामहश्चैव तथैव प्रपितामहः । समीहन्ते सुताः सर्वे मातृपक्षे विशेषतः॥भुञ्जन्ते विप्रकायेषु पितरोऽन्तर्हिताः सदा । तस्माद्विप्रान् पितॄन् विद्यात्पितृवत्तान् प्रपूजयेत् ॥ द्विपार्वणं प्रकर्तव्यं विना श्राद्धं क्षयाहनि । पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवम् ॥ अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत्।" इति ऋष्यशृङ्गवचनाच्च । **व्यासोऽपि**—"पितॄन्मातामहांश्चैव द्विजः श्राद्धेन तर्पयेत्" इति । **पुलस्त्यः**—"मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः । तेषां तु पितृवच्छ्राद्धं कुर्युर्दुहितृसूनवः ॥" इति । **स्कन्दपुराणे**—"पार्वणं कुरुते यस्तु केवलं पितृहेतुतः । मातामह्यं न कुरुते पितृहा सोऽपि जायते ॥"इति । **सूत्रकारोऽपि त्रींस्त्रीन्पिण्डानिति** । एकचतुःपार्वणे तु क्षयाहनवमीविषये । तथा च **पाराशरः**—"पितुर्गतस्य देवत्वमौरसस्य त्रिपौरुषम् । सर्वत्रानेकगोत्राणामेकस्य च मृतेऽहनि ॥" नवम्यां तु **वृद्धयाज्ञवल्क्यः**—"गयायां पुष्करे चैव तथैवान्वष्टकासु च । पितृमुख्येन कर्तव्यं पार्वणानां चतुष्टयम्॥" इति । एवं तर्हि "[illegible] पिण्डैः श्राद्धमुदाहृतम् । पित्रादि मातृमध्य

तु ततो मातामहान्तिकम् ॥'' इत्यादिवचनविहितं नवदैवत्यं विरुध्येत । मैवम्—अन्वष्टकास्विति बहुत्वयुक्तस्य त्रित्वे पर्यवसितत्वात्साग्निकर्तृकं नवदैवत्यमन्वष्टकात्रयविषयं भवितुमर्हति नापरपक्षनवमीविषयम् । अतो द्वादशदैवत्यमपरपक्षनवमीविषयमिति सिद्धम् । अन्यथा नवदैवत्ये मातॄणां पृथक्त्वेन मातामह्यादीनामपृथक्त्वेनार्धजरतीयापत्तेः । तथा च **पुराणसमुच्चये**—''सर्वासामेव मातॄणां श्राद्धं कन्यागते रवौ । नवम्यां च प्रदातव्यं ब्रह्मलब्धवरा यतः॥ पितृमातृकुले नार्यो याः काश्चित्प्रमृताः स्त्रियः । श्राद्धार्हा मातरो ज्ञेयास्तासां श्राद्धं प्रदापयेत् ॥ वृद्धौ तु मातृपूर्वं वै श्राद्धं कुर्वीत बुद्धिमान् । अन्वष्टकासु सर्वासु पितृपूर्वं समाचरेत् ॥ तमिस्रपक्षे नवमी या पुण्या तु नभस्यके । चत्वारः पार्वणाः कार्याः पितृपूर्वा मनीषिभिः॥ पितॄणां तु त्रयः पिण्डा मातृपूर्वास्तथा त्रयः । मातामहानामप्येवं त्रयो मातामहीषु च॥एवं कुर्वन् ततः श्राद्धं मातॄणां च न दोषभाक्। भवत्येव नरो विप्रा इति ब्रह्मानुशासनम्॥''इति । **कात्यायनोऽपि** ''नवानां नवकं वृद्धौ तथैवान्वष्टके विदुः । कुर्याद्द्वादशदैवत्यं प्रेततीर्थे गयासु च॥''तथा—''उपप्लवे चन्द्रमसो रवेश्च वृद्धौ गयायां गमनागमेषु । अन्वष्टकायां च महोत्सवेषु श्राद्धक्रिया द्वादशदैवता स्यात् ॥'' **वृद्धयाज्ञवल्क्योऽपि**—''गयायां च कुरुक्षेत्रे राहुग्रस्ते दिवाकरे । कुर्याद्द्वादशदैवत्यं पार्वणानां चतुष्टयम्'' इति । ननु च 'दिनानि दशपञ्च च' इत्यत्र तिथिषोडशकं प्रति विरोधः । तथा च **शाटयायनिः**—''नभस्यस्यापरे पक्षे तिथिषोडशकं तु यत् । कन्यागतान्वितं चेत् स्यात्स कालः पितृकर्मसु ॥'' **ब्रह्माण्डेऽपि**—''कन्यां गते सवितरि यान्यहानि तु षोडश । ऋतुभिस्तानि तुल्यानि तेषु दत्तमथाक्षयम् ॥'' कन्यां गत एकदेशेऽपि । तथा च **कार्ष्णाजिनिः**—''आदौ मध्येऽवसाने वा यत्र कन्यां व्रजेद्रविः । स पक्षः सकलः पूज्यः श्राद्धषोडशकं प्रति'' इति । उच्यते—द्वादशकपालेष्वष्टकपालवत् षोडशादिनेषु पञ्चदशदिनानुवाद इत्यविरोधः । श्राद्धषोडशके तु सन्देहः । तत्रैके शुक्लप्रतिपदा सह तिथिषोडशकमाहुः । तथा च देवलः—''अहःषोडशकं यत्तु शुक्लप्रतिपदा सह । चन्द्रक्षयाविशेषेण साऽपि दर्शात्मिका स्मृता ॥'' इति । तदयुक्तं, शुक्लप्रतिपदो दौहित्रकर्तृकमातामहश्राद्धविषयत्वात् । तथा च—''मातॄणां नवमी यद्वद्धतानां च चतुर्दशी । तद्वन्मातामहानां च शुक्लेऽथ प्रतिपन्मता'' इति । अन्ये त्वाहुः—तिथिवृद्धिविषयं श्राद्धषोडशकमिति । तदपि न । तथा सति त्रुटिवृद्धयोः पञ्चदशसप्तदशश्राद्धसंभवात् षोडशकविधिबाधापत्तेः । तथा च पठन्ति—''तिथयः पञ्चदश स्युः प्रेतपक्षे तु षोडश । अनुमत्यादिकं कुर्यात्पितॄणां दत्तमक्षयम् ॥ नातः पञ्चदशे कुर्यान्नातः सप्तदशे तथा । ऊने तु नरके यान्ति ह्यधिके स्याद्धनक्षयः ॥'' इति । तस्मात्त्रुटिवृद्धयोरभावे षोडशश्राद्धविधिरिति चेत् । एतदपि नोपपद्यते । तथा सति श्राद्धषोडशकस्य कादाचित्कत्वेन नित्यत्वानुपपत्तेः अतः प्रौष्ठपदीमारभ्य त्रुटौ प्रतिपदमभिव्याप्य, वृद्धौ बहिष्कृत्य श्राद्धषोडशकं कर्तव्यमिति व्यवस्थापनं युक्तम् । एवं तर्हि प्रतिपदो दौहित्रविषयत्वमित्युक्तिर्विरुध्येत । मैवम् । त्रुटिविषयत्वात्तया षोडशपूरणोपपत्तेः । अथवा—एकाहे तिथिद्वयसंभवे श्राद्धद्वयकरणात्षोडशपूरणम् । ततश्च उभयथाऽपि प्रौष्ठपद्यामारभ्य इति सिद्धम् । तथा च **सूतः**—''पूर्णिमाप्रभृति श्राद्धं तस्मात्कुर्याद्विचक्षणः । दिने दिने यज्ञफलं लभते श्राद्धतो नरः ॥'' **ब्रह्माण्डपुराणेऽपि**—''श्राद्ध च पूर्णिमायां च कृत्वा पूर्णफलं लभेत् । प्रतिपद्यर्थलाभाय द्वितीयार्थाय चापरे ॥'' **पुराणसमुच्चयेऽपि**—''प्रशस्ताः पूर्णिमामुख्यास्तिथयः षोडशैव ताः । यथा तिलानां तैलं च तुल्यं वै श्वेतकृष्णयोः ॥ पौर्णमास्याममायां च समं पुण्यफलं द्वयोः । पूर्णपक्षे नभस्यस्य पूर्णिमैषा पितृप्रिया ॥ अस्यां दत्ते पितॄणां वै तृप्तिः सांवत्सरी भवेत् । सर्वान्कामानवाप्नोति अमायां च यथा यथा ॥ पौर्णमास्यां तथा कुर्वन् श्राद्धं पितृपरायणः । पूर्वापराह्णयोरन्ते यः श्राद्धं कुरुते नरः ॥ नभस्यस्य द्विजश्रेष्ठाः पितरस्तेन पुत्रिणः । पौर्वाह्णिकी पौर्णमासी ह्यमा चैवापराह्णिकी'' इति । **वृद्धयाज्ञवल्क्योऽपि**—''काम्यकं तिथिकर्तव्यं श्राद्धकर्म द्विजातिभिः । पूर्णिमाश्राद्धदानेन संपूर्णफलमश्नुते ॥ कुर्वन्वै प्रतिपच्छ्राद्धं धनमानन्त्यमश्नुते ॥'' इत्यादिषोडशकम् । **वायुपुराणेऽपि**—''पुष्टिं प्रजां स्मृतिं मेधाम्'' इत्याद्युपक्रम्य पौर्णमास्याद्यमावास्यान्तातिथिषोडशकमुक्तमित्यलम् । ननु च श्राद्धं पिण्डप्रदानं कर्मेति कथमुक्तम्, स्मृतिष्वनेकधा श्राद्धशब्दप्रयोगात् । तथाहि 'श्राद्धभुगष्ट वर्जयेत्' 'श्राद्धभुक् प्रातरुत्थाय' 'अपि स्यात्स कुले जन्तुर्भोजयेद्यस्तु योगिनः' इत्यादिना भोजने । श्रद्धा अस्ति यत्र तच्छ्राद्धं 'प्रज्ञाश्रद्धार्चाभ्यो णः', 'श्रद्धया दीयते यस्माच्छ्राद्धं तेन निगद्यते' इति पाणिन्यादिवचनाच्छ्रद्धायोगे । त्रींस्त्रीन्पिण्डानवनेज्य दद्यात् । ''नन्दायां भार्गवदिने त्रयोदश्यां त्रिजन्मनि । तेषु श्राद्धं न कुरुते'' इत्यादिवचनात्पिण्डदाने । अथैतन्मनुः श्राद्धशब्दं कर्म प्रोवाचेत्यादिना कर्मणि । एवं विप्रतिपत्तौ ह्येक आहुः—पिण्डदानस्य प्राधान्यात्तद्दाने शन्तनोर्हस्तोत्थाना

गयादौ पिण्डदानं श्राद्धम् । ब्राह्मणपरीक्षाप्रयत्नादपाङ्क्तेयभोजने दोषश्रवणात्पिण्डराहित्येऽपि श्राद्धसंभवाच्च युगादौ ब्राह्मणभोजनमेव श्राद्धम्। दर्शादौ तूभयसमुच्चयः श्राद्धमिति । तदपरे न क्षमन्ते । अव्याप्त्यतिव्याप्त्यादिलक्षणदोषैः पराहतत्वाच्छ्रद्धया दीयत इत्यादावव्यापकत्वाच्च । तथा चोक्तम्—"पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्। आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः" इति । तस्मात्सर्वत्र कर्मत्वाविशेषादाम्नायभेदेन कर्मव्यवस्थापनं युक्तम् । तथा च **धर्मप्रदीपे**–"यजुषां पिण्डदानं तु बह्वृचां द्विजतर्पणम् । श्राद्धशब्दाभिधेयं स्यादुभयं सामवेदिनाम्" इति **आपस्तम्बोऽपि**–"श्राद्धशब्दं कर्म प्रोवाच, पितरो देवता ब्राह्मणस्त्वाहवनीयार्थः" इति । देवतोद्देशेन यथाहवनीये होमस्तथा पित्रुद्देशेन ब्राह्मणे दत्तं श्राद्धमित्यर्थः । ततश्च कर्मैवोपपन्नमिति सिद्धम्। तथा च **ब्रह्माण्डे**–"देशे काले च पात्रे च श्रद्धया विधिना च यत् । पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतम् ॥" इति । **मरीचिरपि**–"प्रेतापितॄंश्च निर्दिश्य भोज्यं यत्प्रियमात्मनः । श्रद्धया दीयते यच्च तच्छाद्धं परिकीर्तितम्" इति । **वृद्धयाज्ञवल्क्योऽपि**–"पात्रं पत्नी विधिः श्रद्धा देशकालक्षमादयः । एतदेवोच्यते श्राद्धं हविष्तृंसमन्वितम्" इति । अथवा एकत्र पारिभाषिकमितरत्रौपचारिकं श्राद्धम् । तथा च **श्रीधरपद्धतौ**—"होमश्च पिण्डदानं च तथा ब्राह्मणभोजनम्। श्राद्धशब्दाभिधानं स्यादेकस्मिन्नौपचारिकम् ॥ प्रयोगो दृश्यते लोके नियमस्तत्रये सति" इति । प्रधानं प्रयोगे यदकरणेऽभ्यावृत्तिः । "प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः" इति वचनात् । यदुक्तंप्रतिपदो दौहित्रकर्तृकश्राद्धविषयत्वमिति, तत्र किं जीवत्पितृको दौहित्र, आहोस्विन्मृतपितृक इति । उभयविधोऽपीति ब्रूमः । तथा च—"जातमात्रस्तु दौहित्रो विद्यमानेऽपि मातुले । कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते ॥" नन्वेवं तर्हि त्रिपिण्डं षटपिण्डं वेति। उच्यते। पित्रादित्रिके जीवति त्रिपिण्डं मृते षट्पिण्डमिति । तथा च **कात्यायनः**–"मातामहानां दातव्यं प्रतिपद्येव मुख्यकम् । त्रीणि हित्वा प्रयत्नेन श्राद्धं कुर्यात्सपिण्डकम् ।" **गौतमोऽपि**–"मातृपक्षे मृतानां च देयं भक्त्या तु मुख्यकम् । सर्वेषां पार्वणं कुर्याद्यथाशक्त्यानुपिण्डदः ॥ जातमात्रस्तु दौहित्रो विद्यमानेषु पार्वणम् । कुर्यान्मातामहश्राद्धं प्रतिपद्येव सर्वदा" इति । मृतपित्रादित्रिके तु **गोभिलः**—"मातामहानां प्रतिपद्दौहित्रः स्वयमाचरेत् । तत्र पित्रे स्वयं देयं विशेषात्प्रीतिरिष्यते ॥" प्रतिपत् प्रतिपच्छ्राद्धं, पित्र इति मातामहाद्युपलक्षणम् । "प्रत्यक्षं पितरं त्यक्त्वा ह्यन्यथा तु ददाति यः । स याति नरकं घोरं यावद्भूः सागरा नगाः" इति । मृते पित्रादिके पितृपङ्क्तिपरित्यागो न, प्रत्यवायजनकत्वात् पञ्चमीपर्यन्तं श्राद्धकालत्वाच्च । तथा च **यमः**—"हंसे वर्षासु कन्यास्थे शाकेनापि गृहे वसन् । पञ्चम्योरन्तरे दद्यादुभयोरपि पक्षयोः ॥" एकादशीचतुर्दश्यादितिथिश्राद्धानि, क्षयाहश्राद्धानि तूत्तरत्र प्रपञ्चयिष्यन्ते । इह त्वपरपक्षाधिकप्रपञ्चेनालम् । एवं पक्षश्राद्धमुक्त्वा पक्षान्तरमाह—**ऊर्ध्वं वा चतुर्थ्याः**–वाशब्द उत्तरोत्तरप्राशस्त्यं सूचयन्स्मृत्यन्तरोक्तपक्षान् द्योतयति । ततश्च शक्ततमेन शक्ततरेण शक्तेन पूर्णिमां पञ्चमीमिष्टमीमारभ्य शेषादिनेषु यथाक्रमं शक्त्या श्राद्धं कर्तव्यमित्यर्थः । तथा च **ब्रह्मपुराणे**–"अश्वयुक्कृष्णपक्षे तु श्राद्धं कार्यं दिने दिने । त्रिभागहीनं पक्षं वा त्रिभागं त्वर्धमेव वा ॥" **विष्णुधर्मोत्तरेऽपि**–"उत्तरे त्वयने श्राद्धं श्रेष्ठं स्याद्दक्षिणायनम् । चातुर्मास्यं च तत्रापि प्रसुप्ते केशवेऽधिकम् ॥ प्रौष्ठपद्याः परः पक्षस्तत्रापि च विशेषतः । पञ्चम्यूर्ध्वं ततश्चापि दशम्यूर्ध्वं ततोऽप्यति" इति । ननु चोर्ध्वं वा चतुर्थ्या इति पञ्चमी सूत्रोक्ता, पञ्चम्यूर्ध्वमिति च षष्ठी स्मृत्यन्तरेणेति विरोधः। उच्यते । पञ्चमीप्रभृति श्राद्धं सूत्रयता मुनिना पूर्णिमामारभ्य त्रिभागहीनत्वं पक्षत्याऽङ्गीकृतम् । षष्ठीप्रभृति विदधता स्मृत्यन्तरेण प्रतिपदमारभ्येत्याविरोधः । अत एव पूर्णिमामारभ्य श्राद्धमित्युक्तम् । एवं तर्हि त्रिभागपक्षे दशम्यूर्ध्वं ततोऽप्यतीत्यैकादशीमारभ्य श्राद्धं विदधता वाक्येन 'कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम्' इति दशमीप्रभृति श्राद्धविधायकं मनुवचनं विरुध्येत । मैवम् । पितुः शस्त्रहतत्वे दशमीप्रभृति त्रिभागत्वं पक्षस्येतरस्यैकादशीप्रभृतीत्यविरोधोपपत्तेः । अत एव 'प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम्' इति चतुर्दश्यां पार्वणनिषेधस्य त्रिभागादिपक्षेष्वेव पर्यवसानमित्युक्तम् । तिथिविषये पक्षान्तरमाह–**यदहः संपद्येत तदहर्ब्राह्मणानामन्त्र्य पूर्वेद्युर्वा**–यदहारिति विभक्त्यर्थाव्ययीभावे **"नपुंसकादन्यतरस्याम्"** इति टजभावः । क्षत्रियादिप्रतिषेधार्थं ब्राह्मणानित्युक्तम् । पूर्वेद्युरिति निपातः । ततश्च यद्दिने मृताहसंज्ञकतिथिरपरपक्षे स्यात्तदहे पूर्वाह्ने ब्राह्मणानामन्त्र्य श्राद्धं कुर्यादिति शेषः । पूर्वेद्युरसंभवे तदहर्निमन्त्रयेदिति वाशब्दार्थः । तथा च **कूर्मः**–"श्वो भविष्याति मे श्राद्धं पूर्वेद्युरभिपूजयेत् । असंभवे परेद्युर्वा यथोक्तलक्षणैर्युतान् ।" **देवलोऽपि**–"श्वः कर्तास्मीति निश्चित्य दाता विप्रा-

न्निमन्त्रयेत् । असंभवे परेद्युर्वा ब्राह्मणांस्तान्निमन्त्रयेत्" इति । अथव वाशब्दो व्य वस्थायां, योषित्प्रसङ्गिनः पूर्वेद्युरितरांस्तदह इत्यर्थः । तथा च **मार्कण्डेयः**—"निमन्त्रयेत पूर्वेद्युः पूर्वोक्तांस्तु द्विजोत्तमान् । अप्राप्तौ तद्दिने वाऽपि हित्वा योषित्प्रसङ्गिनम् ॥" **कात्यायनोऽपि**—"न विना ब्रह्मचर्येण ब्राह्मणः श्राद्धमर्हति । ब्रह्मचारियतींश्चैव तद्दिने वै निमन्त्रयेत्" इति । दिनद्वये निमन्त्रयेदिति समुच्चयार्थो वा । तथा च **वृद्धयाज्ञवल्क्यः**—"चरणक्षालनादूर्ध्वं पुनर्विप्रनिमन्त्रणम् । आसनार्चनसंयुक्तमर्घं च प्रतिपाद्यते" इति । अत्रैक आद्धर्यदहः संपद्येतेति संपत्त्यर्थवाचकत्वाद्यदहरेव यथोक्तद्विजद्रव्यादिलाभस्तदहरेव श्राद्धं न तु मृततिथाविति । तदुक्तम्—तस्य लब्धेन नित्यत्वात् मृततिथेर्वाचकत्वात्सदाचरितत्वाच्च । न च संपत्तिः पुरुषप्रयत्नसाध्यत्वादन्यतन्त्रा । तस्मान्मृततिथावेव सर्वं संपाद्य श्राद्धं कर्तव्यमिति युक्तम् । अत एव **गोभिलसूत्रे** "यदह उपपद्यते" इत्युपपन्नार्थमुक्तम् । तथा च **पुराणसमुच्चये**--"या तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते । सा तिथिः प्रेतपक्षस्य पूजनीया प्रयत्नतः" इति । "तिथिच्छेदो न कर्तव्यो विनाशौचं यदृच्छया । पिण्डश्राद्धं च दातव्यं विच्छिात्त नव कारयेत्" इति । मृताहविषयस्य ऋष्यश्रृङ्गवचनस्यात्रापि सदाचारेण संगतत्वात्तिथिविषयत्वमप्यविरुद्धम् । एतच्च पुत्रभ्रातृपत्न्यादिव्यतिरिक्तविषयम् । तेषामेकादशीद्वादश्योः श्राद्धवचनात् । तथा च **वायुपुराणम्**—"संन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथातिथि । महालये तु यच्छ्राद्धं द्वादश्यां पार्वणेन तु "इति पिण्डश्राद्धं च दातव्यमिति । निषिद्धदिनेऽपीत्यर्थः । तथा च **कात्यायनः**—" अशक्तः पक्षमध्ये तु करोत्येकदिने यदि । निषिद्धेऽपि दिने कुर्यात्पिण्डदानं यथाविधि" इति । एवं तर्हि पौर्णमास्यां मृतस्य कुत्र तिथाविति । तत्रामावास्यायामित्येके । तन्न, तिथ्याश्रयाभावात् दर्शमृतस्यैव तत्रोचितत्वाच्च । अतो भाद्रपद्यामेव युक्तम् । तथा च **वृद्धयाज्ञवल्क्यः**—"पूर्णिमायाममायां वा सदा कन्यां गते रवौ । एकोद्दिष्टं तु मातुः स्यात्पितुः पार्वणमुच्यते ॥ नान्यकाले प्रशंसन्ति क्षयेऽहनि तु पार्वणम् " इति पूर्णिमादर्शयोः क्षयाहसंज्ञकत्वात्प्रौष्ठपद्यामपरपक्षदर्शे च पार्वणं कर्तव्यमित्यर्थः । तथा च--"प्रौष्ठपद्याममायां च कन्यां प्राप्ते रवौ सदा । सर्वस्वेनापि कर्तव्यं श्राद्धं वा इन्दुलोचने " इति । " एकोद्दिष्टं मातुः स्यात् " इत्यस्य विषयमुपरिष्टाद्वक्ष्यामः इत्युक्तम् । अत्रैके भणन्ति—दैवपूर्वं निमन्त्रयेदित । तदयुक्तम् । पितृपूर्वस्य विहितत्वात् । तथा च **देवलः**—"श्वः कर्तास्मीति निश्चित्य दाता विप्रान्निमन्त्रयेत् । कृतापसव्यः पूर्वेद्युः पितृपूर्वं निमन्त्रयेत् " । **प्रचेता** अपि—"कृतापसव्यः पूर्वेद्युः पितृपूर्वं निमन्त्रयेत् " इति । **स्मृत्यन्तरेऽपि**—"प्रार्थयीत प्रदोषान्ते भुक्तानशयितान्द्विजान् । आयुष्मानपसव्येन पितॄन्पूर्वं निमन्त्रयेत्" इति । यत्तु **बृहस्पतिवचनम्**—"उपवीती ततो भूत्वा देवतार्थान्द्विजोत्तमान् । अपसव्येन पित्र्ये च स्वयं शिष्योऽथ वा सुतः" इति । तत्पूर्वपश्चाद्भावयोरश्रवणादस्मिन्नेव क्रमे योज्यमित्यविरोधः । एतच्च पूर्वेद्युर्निमन्त्रणं गृहलेपाद्युपलक्षणम् । तथा च **वाराहपुराणे**—" वस्त्रशौचादि कर्तव्यं श्वः कर्तास्मीति जानता । स्थानोपलेपने भूमेः कृत्वा विप्रान्निमन्त्रयेत् " इति शेषः । एवं निमन्त्र्यब्राह्मणानाह—**स्नातकान्**—स्नातकास्त्रिविधास्तान्निमन्त्रयेदिति । तथा च **यमः**—"विद्यातपोभयस्नाता ब्राह्मणाः पङ्क्तिपावनाः " इति । अयं चापत्नीकनिमन्त्रणप्रतिषेधे प्रसवः । " विभार्यो वृषलीपतिः" इत्यात्रिणा निषिद्धत्वात् । एके **यतीन्** निमन्त्रयेयुर्न **कात्यायनादय** इति विकल्पः । तथा च **वायवीये**-- "गृहस्थानां सहस्रेण वानप्रस्थशतेन च । ब्रह्मचारिसहस्रेण एको योगी विशिष्यते" **विष्णुरपि**—"अपि नः स कुले जायाद्भोजयेद्यस्तु योगिनः । विप्राञ्छ्राद्धे प्रयत्नेन तेन तृप्यामहे वयम्" इति । इतरे कात्यायनादयो नेत्याहुः । तथा च **गृह्यसंग्रहः**—"आचार्यानुमतं वाक्यमेकीयं गृह्यते क्वचित् । शेषाण्येकीयवाक्यानि आचार्यो न प्रशंसति ॥" अपि च **वसिष्ठः**—"श्रुतिस्मृती अतिक्रम्य मांसमश्नाति मूढधीः । न तं दुर्ब्राह्मणं प्राज्ञः श्राद्धार्थमुपवेशयेत् ॥ यो दद्यादन्नमस्माकं तत्सर्वं मधुना सह । आमिषेण समायुक्तं शस्तानां मृगपक्षिणाम्" । **जातूकर्ण्यः**—"दारवान्यो द्विजः श्राद्धे दद्यान्नो मांसमध्वरे । स दुरात्मा दुराचारो वेदमार्गस्य दूषकः ॥ तर्पणं तिलहीनं यच्छ्राद्धं यच्च निरामिषम् । विना दर्भैश्च या संध्या त्रयं शशविषाणवत् ॥ यत्र मातुलजोद्वाही यत्र वा वृषलीपतिः । श्राद्धं धिनोति नह्येतान् कृतं यच्च निरामिषम्" । **विश्वामित्रः**—"निमन्त्रितस्तु यः श्राद्धे यज्ञे वाऽपि द्विजाधमः । मांसं नाश्नाति निरयं याति वै पशुतां नरः" इत्याद्यङ्गबाधभयाद्यतिपक्षः **कात्यायनेन** व्युदस्तः इत्येके इत्युक्तम्, त्रिदण्डिनामेव विहितत्वात् । तथा च **वायुपुराणम्**—"सन्ति वेदविरोधेन केचिद्विज्ञानमानिनः । अयज्ञयतयो नाम त ध्वंसन्ति यथा रजः । मुण्डान्जटिलकषायान् श्राद्धे यत्नेन वर्जयेत् ॥" **ब्रह्माण्डेऽपि**--"एभिर्निर्धूतदृष्टं च

श्राद्धं गच्छति दानवान् । शिखिभ्यो धातुरक्तेभ्यस्त्रिदण्डिभ्यः प्रदापयेत्'' इति । मुण्डो विशिखः । जटिलो भस्माङ्गः । **श्रुतिरपि**—"अशुचिर्वा एष यन्मुण्डस्तस्मै तदपि धनं यच्छिखा'' इति । अन्ये त्वाहुः—उभावप्यज्ञातकुलशीलत्वान्न निमन्त्रयेदिति । तथा च **कात्यायनः**—"यस्य शीलं न जानीते स्थानं त्रिपुरुषं कुलम् । कन्यादाने तथा श्राद्धे न वृणीयात्कदाचन'' । **मनुः**—"न स्वगोत्रे हविर्दद्यात्समानप्रवरे तथा । नाविज्ञातकुले चैव यथा कन्या तथा हविः'' । **पुराणसमुच्चयेऽपि**—"येषां न ज्ञायते स्थानं नष्टस्थानाश्च ये द्विजाः । न ज्ञातिर्ज्ञायते येषां न संबन्धी न बान्धवः ॥ कुधर्माचरणा ये तु न तान् श्राद्धे निवेशयेत्'' इति । एतदप्यहृद्यम् । विज्ञातकुलशीलादीनां विधानोपपत्तेर्मांसमधुदक्षिणादाने पङ्क्तिभेदादिदोषापत्तेः । तस्मादुभयोरप्यातिथ्यरूपेण भोज्यत्वं, न पङ्क्तौ निवेश इति युक्तम् । तथा च **वाराहपुराणे**—"वैश्वदेवे नियुञ्जीत ब्रह्मचारिशुचिं सदा । भिक्षुकान्देवतीर्थेषु पूजयेदतिथिं यथा'' आतिथ्यानुवृत्तौ **छागलेयोऽपि**–"गन्धमाल्यफलैश्चैव भोजनैः क्षीरसंस्कृतैः । संपूजयेद्यतिं श्राद्धे पितॄणां तुष्टिकारकम् ॥ ब्रह्मचारी यतिश्चैव पूजनीयो हि नित्यशः । तत्कृतं सुकृतं यत्स्यात्तस्य षड्भागमाप्नुयात् '' **मार्कण्डेयोऽपि**—"भिक्षार्थमागतान्वाऽपि काले संयमिनो यतीन् । भोजयेत्प्रणिपाताद्यैः सद्यः संयतमानसः '' । **कल्पतरावपि**–"पूजयेच्छ्राद्धकालेऽपि यतिं सब्रह्मचारिणम् । विप्रानुद्धरते पापात्पितृमातृगणानपि ॥ भुञ्जते यत्र कुत्रापि यतयो ब्रह्मचारिणः । गृह्णन्ति पितरो देवाः स च याति परां गतिम् ॥ तारयन्ति च दातारं पुत्रान्दारान्पितॄंस्तथा । तस्मात्सर्वप्रयत्नेन पूजयेदाश्रमागतम् ॥ अलाभेन हि भिक्षूणां पूजयेद्ब्रह्मचारिणम् । तदलाभेऽप्युदासीनं गृहस्थमपि भोजयेत्'' । **विश्वामित्रोऽपि**—"यतिर्वा ब्रह्मचारी वा भुञ्जानानां द्विजन्मनाम् । श्राद्धे यत्र भवेत्साक्षी महालयसमं हि तत्'' महालयो गया । **यतिधर्मेष्वत्रिः**–" पित्रर्थकल्पितं पूर्वमन्नं देवादिकारणात् । वर्जयेत्तादृशीं भिक्षां परबाधाकरीं तथा'' **यमोऽपि**–'भिक्षुको ब्रह्मचारी वा भोजनार्थमुपस्थितः । उपविष्टेषु तु प्राप्तः कामं तमपि भोजयेत्'' इत्येवमादिवचनपर्यालोचनया यतीनां साक्षित्वभोज्यत्वयोरेव प्राप्तिर्न पङ्क्तौ निवेश इति । तथा च **स्मृतिः**–"भुक्तशेषं न भुञ्जीत पीतशेषं न संपिबेत् । न चैवोपविशेत्पङ्क्तौ यतेर्वा तापसस्य च '' इति । " यतिस्तु सर्वविप्राणां सर्वेषामग्रभुग्भवेत्'' इति **वायुपुराणोक्तेः** । किंच—यदि पङ्क्त्युपवेशः स्यात्तदा द्विजेभ्यो मांसादिदानेन तेषां तदभावेन पङ्क्तिवैषम्यं भवतीति नैतद्युक्तम् ।"न पङ्क्तौ विषमं दद्यात्''इति वचनात् । **वृद्धहारीतोऽपि**—"पङ्क्तिभेदी वृथापाकी नरकं प्रतिपद्यते । कामाल्लोभाद्भयाद्वापि यः पङ्क्तिं दूषयेद्द्विजः ॥ नरकादवतीर्णस्तु जायते ग्रामसूकरः '' इति । अपि च दक्षिणायामपि वैषम्यम् । तथा **विश्वामित्रः**--" हेम वा रजतं वाऽपि यतये ब्रह्मचारिणे । यो ददाति ऋते वस्त्रं स भवेद्ब्रह्मघातकः'' इति उक्तमिति सूक्तम् । अथवा एकग्रहणं व्यवस्थितविकल्पार्थम् । दैवश्राद्धे यतयः, पित्र्ये गृहस्थाः इति । तथा च **वृद्धवसिष्ठः**–"चत्वार आश्रमाः पूज्या दैवश्राद्धेन सर्वदा । चतुराश्रमबाह्येभ्यः श्राद्धे नैव प्रदापयेत्'' । **मार्कण्डेयोऽपि**–"ब्राह्मणानां सहस्रेभ्यो योगी त्वग्रासनो यदि । यजमानं च भोक्तॄंश्च नौरिवाम्भसि तारयेत् । '' **यमोऽपि**—"न ब्राह्मणं परीक्षेत दैवे कर्मणि सर्वदा । पित्र्ये कर्मणि संप्राप्ते परीक्षेत प्रयत्नतः'' । "वैश्वदेवे नियुञ्जीत'' इति **वारहापुराण**वचनाच्चेत्यलमतिप्रपञ्चेन । **गृहस्थान् साधून्वा**–वाशब्दः पाक्षिकयतिनिमन्त्रणनिषेधार्थः । तथा च **जाबालः**–"अश्नन्ति ये न मांसानि भार्याहीनाश्च ये द्विजाः । ये च मातुलसम्बन्धा न तान् श्राद्धे निवेशयेत्'' **ऋष्यशृङ्गोऽपि**–"नाश्नाति यो द्विजो मांसं यस्य नो दारसंग्रहः । तावेतौ मुनिभिः प्रोक्तावनर्हौ मखदूषकौ'' इति । ननु चासाधुगृहस्थनिषेधार्थः कथं न स्यात् ? उच्यते साधुशब्देनैव तन्निषेधसिद्धेः । न चात्र वाशब्दाभावः शङ्कनीयः, शाखान्तरे दृश्यमानत्वात् । तथा च **गोभिलः**—'गृहस्थान्साधून्वेति ।' **वसिष्ठोऽपि**- 'यतीन् गृहस्थान् साधून्वेति ।' अतश्च गृहाः पत्नी तत्सहिताः गृहस्थास्तान्निमन्त्रयेदित्यर्थः । न चैवं विभार्यनिमन्त्रणमभ्यनुज्ञातम् । "विभार्यो वृषलीपतिः'' इत्यत्रिणा प्रतिषिद्धत्वात् । साधूनाहादित्यपुराणे—'साधून्वक्ष्यामि सांप्रतम्' इत्युपक्रम्य 'गङ्गायमुनयोर्मध्ये मध्यदेशः प्रकीर्तितः । तत्रोत्पन्ना द्विजा ये वै साधवस्ते प्रकीर्तिताः ।' इति । अथवा म्लेच्छदेशव्यतिरिक्तदेशस्थाः सद्वृत्ताः, 'म्लेच्छदेशनिवासिनो वर्जयेत्' इति मत्स्यवचनात् । **श्रोत्रियान्**-निमन्त्रयेदिति शेषः । श्रोत्रियमाह **देवलः**—"एकशाखां सकल्पां च षड्भिरङ्गैरधीत्य च । षट्कर्मनिरतो विप्रः

---

१ 'च सकलाम्' इति पाठान्तरम् ।

श्रोत्रियो नाम धर्मावित्॥ जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते॥" इति वा । **वृद्धाननवद्यान्**–विकलेन्द्रियदुराचारादिदोषराहित्यमनवद्यशब्देनोच्यते । ततश्च "अग्र्यः सर्वेषु वेदेषु श्रोणियो ब्रह्मविद्युवा" इति युवत्वेन वृद्धनिषेधे वृद्धानिति प्रीतप्रसवः । अथवा युववृद्धविधिभ्यां तद्व्यतिरिक्तस्याल्पवयस्कस्य भोक्तृनियमाक्षमस्य प्रतिषेधः । अनवद्यपदमुत्तरत्रानुषज्य स्वकर्मस्थद्विजाविशेषणं कृत्वा केवलवृद्धशब्देन ज्ञानवयस्तपोवृद्धांस्त्रिविधानिति **हलायुधः** । **स्वकर्मस्थान्**– स्वजात्युक्तकर्मानुष्ठातॄन्विप्रानियर्थः । अतश्च श्रोत्रियादिविलक्षण्यमनेनोक्तमित्यपुनरुक्तिः । तथा च **पुराणसमुच्चये**—" गृहस्थाः कुलसंपन्नाः प्रख्याताः कुलगोत्रतः । स्वदारनिरताः शान्ता विज्ञेयाः पङ्क्तिपावनाः ॥" इति । एवं मुख्यकल्पं प्रदर्श्यानुकल्पं दर्शयति । **अभावेऽपि शिष्यान्सदाचारान्**—-अपिशब्दः स्मृत्यन्तरोक्तानुकल्पसमुच्चये । ततश्च पूर्वोक्तमुख्यकल्पाभावे सद्वृत्तशिष्यादीनपि निमन्त्रयेदित्यर्थः । तथा च **याज्ञवल्क्यः**---"स्वस्रीयऋत्विग्जामातृयाज्यश्वशुरमातुलाः । त्रिणाचिकेतदौहित्रशिष्यसंबन्धिबान्धवाः ॥" इति । "अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः ॥ मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुम् । दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत्" इति **मनुः** । **आपस्तम्बोऽपि**—"गुणवदलाभे सोदर्योऽप्येतेनान्तेवासिनो व्याख्याता इति ।" अयं चानुकल्पो दैवश्राद्ध एव न पित्र्ये । तथा **चात्रिः**—" पिता पितामहो भ्राता शिष्यो वाऽप्यसपिण्डकः । न परस्परमर्घ्याः स्युर्न श्राद्धे ऋत्विजस्तथा ॥ ऋत्विक्पुत्रादयो ह्येते सकुल्या ब्राह्मणा द्विजाः । वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तराः ॥" इति । अपिरत्र भिन्नक्रम इति **हलायुधः** । स्वाचारानित्यनेनाचार्यधनहारित्वाभाव उक्तः । ते हि कदाचिद्धनहारिणो विहिताः, 'दद्यात्पिण्डं हरेद्धनम्' इत्यादिना । अतस्तथात्वे शिष्यादयो न निमन्त्रणीयाः । पिण्डदोंऽशहर इति पिण्डदातृत्वसंभवात् । वर्ज्यानाह-**"द्विर्नग्नशुक्लविक्लिधश्यावदन्तविद्धप्रजननव्याधितव्यङ्गश्वित्रिकुष्ठिकुनखिवर्जम्**-द्विरिति पित्रोर्वंशे त्रिपुरुषं वेदाग्न्योर्विच्छेदान्नग्नः शून्यो द्विर्नग्नः। तथा च **सुमन्तुः**- "यस्य त्रिपुरुषादासीदुभयोर्गोत्रयोरपि । वेदस्याग्नेश्च विच्छेदो द्विर्नग्नः परिकीर्त्तितः॥" दुश्चर्माधिकशुक्लोऽतिकपिलाङ्गकेशः । तथा च **कात्यायनः**-"द्विर्नग्नः किल दुश्चर्मा शुक्लोऽतिकपिलः स्मृतः। विर्चीचकादित्वग्दोषी विक्लिधः परिकीर्तितः॥" **संग्रहकारोऽपि**--"खल्वाटकश्च दुर्वालः कपिलश्चण्ड एव च" इति । विक्लिध ओष्ठाभ्यामनावृतदन्तः । विद्धप्रजननाश्छिन्नलिङ्गचर्मा, दाक्षिणात्यप्रासिद्धः । तथा च **कल्पलतायां**—"विद्धप्रजननश्चैव कृतशिश्नविकारवान् । ते हि कामोपभोगार्थं दाक्षिणात्याः प्रकुर्वते ।" वन्ध्यबीजो वा । मृतापत्य इत्यन्ये । व्याधितो रोगी । महारोगोपसृष्ट इति कश्चित् । व्यङ्गो—विगतं विविधं वाङ्गमस्त्यस्येति सः । "हीनाङ्गोऽधिकाङ्गश्च हीनातिरिक्ताङ्गः" इति स्मृतेः । श्वित्री श्वेतकुष्ठी । कुष्ठी कुत्सितगलिताङ्गः । व्याधितग्रहणादेव तन्निषेधे सिद्धे तद्ग्रहणं दोषाधिक्यद्योतनार्थम् । अजीर्णाद्यल्परोगिदोषाल्पत्वज्ञापनार्थं वा । स्वभावात्कुत्सितनखः कुनखी । एतान् वर्जयित्वा निमन्त्रयेदित्यर्थः । अत्र स्नातकादिविहितग्रहणादेवेतरनिषेधे सिद्धे द्विर्नग्नादिनिषेधो मुन्यन्तरोक्तान्तरालिकाद्विजोपवेशनार्थः । ते च ग्रन्थगौरवभयान्नेह लिखिताः । अन्यथा द्विर्नग्नादिवर्जनमनर्थकं स्यात् । **अनिन्द्येनामन्त्रितो नापक्रामेत्**–अनिन्द्यो निर्दोषस्तेनामन्त्रितो न व्यातिक्रमेत् । तथा च श्रुतिः—"स होवाचानिन्द्या वै मा वृषत सोऽनिन्द्यैर्वृतो नाशकमतिक्रमितुमिति तस्मादुहानिन्द्यस्य वृतो नापक्रामेत्"इति । **अग्निवेश्योऽपि** । "नैकदाऽपि परान्नं यो भुङ्क्ते मूढमतिर्द्विजः । संवत्सराभ्यन्तरे स न पज्यो वत्सरं भवेत्" इति, निर्दोषस्योति शेषः । **आमन्त्रितो वाऽन्यदन्नं न प्रतिगृह्णीयात्**–निमन्त्रितो विप्रोऽन्यदन्नं सिद्धमामं वा परस्य न गृह्णीयादित्यर्थः । अथवाऽन्यस्यान्नमन्यदन्नम् । अन्यस्य दुगागमश्छान्दसः । वाशब्दो निमन्त्रिते दातृभोक्त्रोः परस्परत्यागनिषेधं द्योतयति । तथा च यमः—"आमन्त्रितश्च यो विप्रो भोक्तुमन्यत्र गच्छाति । नरकाणां शतं गत्वा चाण्डालेष्वभिजायते ॥ केतनं कारयित्वा तु निवारयाति दुर्मतिः । ब्रह्महत्यामवाप्नोति शूद्रयोनौ च जायते ॥" **आदित्यपुराणे**–"आमन्त्रितश्चिरं नैव कुर्याद्विप्रः कदाचन । देवतानां पितॄणां च दातुरन्यस्य चैव हि ॥ चिरकारी भवेद्द्रोही पच्यते नरकाग्निना" इति । **स्नाताञ्छुचीनाचान्तान्**–ईदृशानुपवेश्य श्राद्धं कुर्वीतेति वक्ष्यमाणेन संबन्धः । स्नानशौचाचमनानि स्मृतिप्राप्तान्येवात्र सार्थकत्वेनानुवदति । तेन स्नानशौचाचमनेष्वत्र विशिष्टविधिरित्यर्थः । तथा च **देवलः**—"ततो निवृत्ते मध्याह्ने कृत्तलोमनखान् द्विजान् । अभिगम्य यथापूर्वं प्रयच्छेद्दन्तधावनम् ॥ तैलमुद्वर्तनं स्नानं स्नानीयं च पृथग्विधम् । पात्रैरौदुम्बरैर्दद्याद्वैश्वदेवत्यपूर्वकम् ॥ ततः स्नात्वा निवृत्तेभ्यः प्रत्युत्थाय कृताञ्जलिः । पाद्यमाचमनीयं च

संप्रयच्छेद्यथाक्रमम् " इति । अत्रामन्त्रितानां स्निग्धस्नानदन्तधावनविधानं कर्तुस्तत्प्रतिषेधात् । तथा च-- "दन्तधावनताम्बूलं स्निग्धस्नानमभोजनम् । रत्यौषधपरान्नानि श्राद्धकृत्सप्त वर्जयेत् ॥" इति । अत्रैक आहुर-निषिद्धतिथिविषयं तैलादिप्रेषणमिति । तदभद्रम् , श्राद्धीयेऽहनि विशिष्टविधित्वात् । तथा च **कात्यायनः**—"तैलमुद्वर्तनं देयं ब्राह्मणेभ्यः प्रयत्नतः । तैरभ्यङ्गः प्रकर्तव्यो वर्ज्यकालान्न चिन्तयेत् ॥" अभ्यङ्गप्रकरणे **सुरेश्वरोऽपि**—"पुत्रजन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा । नित्यस्नाने च कर्तव्ये तिथिदोषो न विद्यते ॥" इति । निषेधस्य मलापकर्षविषयत्वाच्च । एवं व्रणादिव्याधिसंभवे रक्तस्रावादौ च कृते अशुद्धत्वाच्छुचीनिति विशेषः । तथा च **पुराणसमुच्चये**—" कृत्वा तु रुधिरस्रानं न विद्वाञ्छ्राद्धमाचरेत् । एकं द्वे त्रीणि वा विद्वान् दिनानि परिवर्जयेत् ॥ वमने वा विरेके वा तद्दिनं परिवर्जयेत् । यथा रजस्वला नारी ह्यशुचिस्त्रिदिनं भवेत् ॥ रक्तस्रावे तथा नृणामशुचित्वं प्रजायते ।" इति । एवमाचमनेऽपि विशेषः । तथा च **विष्णुपुराणे**--"उपस्पर्शस्तु कर्तव्यो मण्डलस्योत्तरे दिशि । कर्त्राथ वा द्विजैर्वापि विधिवद्वाग्यतैः सदा ॥ मण्डलस्योत्तरे भागे कुर्यादाचमनं द्विजः । सोमपानफलं प्राहुर्गर्गकाश्यपगौतमाः ॥" **आपस्तम्बोऽपि**---"कुर्युराचमनं विप्रा उदीच्यां मण्डलाद्बहिः । अन्यदिक्षु यदा कुर्युर्निराशाः पितरो गताः॥" इति । तथा—" विप्रपादोदकस्थाने कुर्यादाचमन द्विजः । रुधिरं तद्भवेत्तोयं निराशाः पितरो गताः॥" इति । "पादोदकोच्छिष्टवारि द्वयोश्चेत्संगतिर्भवेत् । उच्छिष्टाः पितरो यान्ति शुद्ध्यन्ति च गयाशिरे" इति । मण्डलादिकरणं गोमूत्रेणाह **बृहस्पतिः**—"गोमूत्रमण्डले कृत्वा दक्षिणे चोत्तरे शुभे । श्राद्धीयाहनि संप्राप्ते रेणुभिर्न जलेन च ॥ गृहकुड्यादिलेपेषु गोमूत्रे रेणुरुच्यते ॥" इति । **प्राङ्मुखानुपवेश्य दैवे युग्मानयुग्मान्यथाशक्ति पित्र्य एकैकस्योदङ्मुखान्**—यथाशक्त्येकैकस्येति पदे उभयत्र संबध्येते । युग्मा द्विचतुरादयः । अयुग्मास्त्रिपञ्चादयः । ततश्चैकैकस्य पित्रादेर्दैवश्राद्धे यथाशक्ति युग्मान् प्राङ्मुखान् पित्र्येऽप्येकैकस्य पित्रादेरयुग्मान् यथाशक्त्युदङ्मुखान्विप्रान्वामेनासनं स्पृष्ट्वा दक्षिणकरेण द्विजकरं धृत्वा भूर्भुवःस्वः इदमासनमास्यतामित्युक्त्वोपवेश्य श्राद्धं कुर्यादिति शेषः । तथा च **कात्यायनः**—"सव्येनैवासनं धृत्वा दक्षिणे दक्षिणं करम् । ओं भूर्भुवः स्वरित्युक्त्वा आसनेषूपवेशयेत् "तथा—"आस्यतामिति तान् ब्रूयादासनं संस्पृशन्नपि । समस्ताभिर्व्याहृतिभिरासनेषूपवेशयेत् ॥" इति । एवं चात्र प्रतिपुरुषं दैवश्राद्धं भवतीति अवगम्यते । यथाशक्तीतिपदस्यानियतवाचकत्वात् । अयुग्मत्वं च नवभ्योऽर्वाग्वेदितव्यम् । तथा च **गौतमः**—"नवावरान्भोजयेदयुजो यथोत्साहं च"इति । ब्रह्माण्डेऽपि—"सामर्थ्येऽपि नवभ्योऽर्वाग्भोजयीत सति द्विजान् । नोर्ध्वं कर्तव्यमित्याहुः केचिद्दोषस्य दर्शिनः॥" इति । एवं बहुतरप्राप्तौ संख्यामाह—**द्वौ वा दैवे त्रीन्पित्र्ये**—वाशब्दः प्रतिपुरुषं दैवश्राद्धं निषेधति । दैवे द्वौ पित्र्ये त्रीनिति पितृपङ्क्तौ दैवे द्वावेव, पित्र्ये प्रतिपुरुषं त्रिकत्रिकभेदेन नव । एवमुभयत्राप्येकादशैवेत्यर्थः । अतश्च प्रतिपङ्क्त्येव दैवश्राद्धं न प्रतिपुरुषमिति पूर्वसूत्रापवादः । तथा च **वृद्धयाज्ञवल्क्यः**—"दशैकं पञ्च वा विप्रान्पार्वणे विनियोजयेत् । द्वौ दैवे प्रागुदक्पित्राद्येकैकस्यापि ते त्रयः ॥ एवमेकादश प्रोक्ता यथोक्ता एकपार्वणे॥"इति । अथ चैकादश पञ्च वेति पक्षद्वयावधारणार्थो वाशब्दः, विस्तरस्य निषिद्धत्वात्।तथाच स एव-"द्वौ दैवे पितृकृत्ये त्रीन्पञ्च चैवं प्रकल्पयेत्"इति। **मनुरपि**-"सत्क्रियां देशकालौ च द्रव्यं ब्राह्मणसंपदः। पञ्चैतान्विस्तरो हन्ति तस्मान्नेहेत विस्तरम्॥"बृहस्पतिरपि–"एकैकमथवा द्वौ त्रीन्दैवे पित्र्ये च भोजयेत् । सत्क्रियाकालपात्रादिर्न संपद्येत विस्तरम् ॥" ब्राह्मेऽपि-"यस्माद्ब्राह्मणबाहुल्याद्दोषो बहुतरो भवेत् । श्राद्धनाशो मौननाशः श्राद्धतन्त्रस्य विस्मृतिः ॥ उच्छिष्टोच्छिष्टसंसर्गो निन्दा दातृषु भोक्तृषु । वितण्डा वापवादो वा जल्पन्त्वेते पृथग्विधाः ॥" इति । **एकैकमुभयत्र वा**–वाशब्दोऽभावे । ततश्च देशकालधनाद्यभावे दैवे पित्र्ये चैकैकं ब्राह्मणद्वयमेवोपवेशयेदित्यर्थः । तथा च **वृद्धयाज्ञवल्क्यः**—"एकं दैवे तथा पित्र्ये धनविप्राद्यभावतः । योजयेच्छ्राद्धदाने च पितृयज्ञं न लोपयेत्॥" इति । नन्वेवं साति न त्वेकैकं सर्वेषामिति निषेधोऽनुपपन्न इति । मैवम् । संभवविषयत्वान्निषेधस्येत्यदोषः । तथा च—"ब्राह्मणा विप्रसंपत्तावेकैकस्य त्रयस्त्रयः । एको वैकस्य भोक्तव्यस्त्रयाणामेक एव च॥"इति । अत्र दैवे पित्र्ये चेत्यनुवृत्तौ उभयत्रेतिग्रहणं सर्वत्र समविभागार्थम् । समं स्यादश्रुतत्वादिति न्यायात् । **मातामहानां चैवम्**–"मातामहानामप्येवं सर्वे पक्षा भवेयुरित्यर्थः । अतश्च मातामहश्राद्धमपि पितृश्राद्धवन्नित्यमित्युक्तम् । **विज्ञानेश्वरस्तु**–मातामहादिभिर्मातुः सापिण्ड्यं एव मातामहश्राद्धं नित्यमन्यथा नेत्याह । अत एवातिदेशान्न पृथक्कार्यमित्यन्ये । तदे[illegible]म् । तथा च **स्कन्दपुराणे**–"पार्वणं कुरुते यस्तु

केवलं पितृहेतुतः । मातामह्यं न कुरुते पितृहा चोपजायते ॥" चकारो नवद्वादशदैवत्ये मातृमातामह्योरतिदेशार्थः । वैश्वदेवे विशेषमाह—**तन्त्रं वा वैश्वदेविकम्**—विश्वेदेवाः सन्त्यत्रेति वैश्वदेविकं श्राद्धं तन्त्रमुभयपङ्क्त्योरेकं भवेदिति शेषः । 'अत इनिठनौ ५।२।११५' । साधारणं भवेत्तन्त्रमिति वचनात् । अयं च पक्षः सर्वपक्षेषु विकल्पेनावतिष्ठते । ततश्चैकप्रयोगापूर्वसाधकत्वं भिन्नप्रयोगापूर्वसाधकत्वं च वैश्वदेवश्राद्धस्य भवतीत्यर्थः । अत्रावसरे चमसं परिधित्वाऽभिमन्त्रयेत् । तथा च **कात्यायनः**—"कूष्माण्डमन्त्रसूक्तेन कुर्यात्तोयाभिमन्त्रणम् । अन्नानि प्रोक्षयेत्तेन तेनैव श्राद्धमाचरत्॥"इति । कूष्माण्डमन्त्रां **यद्देवा हेवदेडन**मित्यादयस्त्रयः । श्रद्धान्वितः श्राद्धं कुर्वीतेत्यर्थः। श्रद्धा धर्मकार्येषु फलावाप्तिनिश्चयः । तथा च **मनुः**—"प्रत्ययो धर्मकार्येषु सद्भिः श्रद्धेत्युदाहृता" इति । सा च स्मृत्युक्तधर्मोपलक्षणम् । अतस्तद्धर्मे युक्तः श्राद्धं कुर्यात् । "विधिहीनमनुष्ठानं मन्त्रहीनमदक्षिणम् । अश्रद्धया कृतं दत्तं तद्वै रक्षांसि भुञ्जते ॥"तथा—"विभाक्तिभिस्तु यत्किंचिद्दीयते पितृदैवते । तत्सर्वं सफलं ह्याहुर्विपरीतं निरर्थकम्॥"इति । अत्र श्रद्धा अस्ति यत्र तच्छ्राद्धमिति श्राद्धग्रहणेनैव तदान्वितत्वे लब्धे श्रद्धान्वितग्रहणं पितृकार्येषु स्मृत्युक्तधर्माणामत्यादरज्ञापनार्थम् । तथा च **मनुः**—"देवकार्याद्द्विजातीनां पितृकार्यं विशिष्यते ॥" इति । अतश्च पितृकार्येषु स्मृत्युक्तधर्मादरेण प्रयोगकुशलः स्यादिति । एतदुक्तं भवति । संबन्धनामगोत्ररूपाणां यथावत्प्रयोगेण पुत्रादिदत्तं हविः पितॄणां तृप्तिकरं भवतीति । तथा च—"नामगोत्रं स्वकं शर्मप्रापकं हव्यकव्ययोः ।" इति । "ज्ञातिश्रैष्ठ्यमवाप्नोति प्रयोगकुशलो नरः ।" इति च । नामादिप्रयोगो **धर्मप्रदीपे**—"आवाहनार्घ्यसंकल्पे पिण्डदाने तिलोदके । अक्षय्ये चासने पाद्ये नामगोत्रे प्रकाशयेत् ॥" अत्रैताच्चिन्त्यते—किं संबन्धादीनामुच्चारणक्रमोऽस्ति नवेति । तत्रैक आहुः—संबन्धादीनां हविष्प्रापकत्वमेव नोच्चारणक्रम इति । अन्ये त्वाहुरमुकगोत्रास्मत्पितरमुकशर्मन्निति क्रम इति । वसुरुद्रादिध्यानमेव नोच्चार इत्यपरे । तत्र नाद्यः—स्मृत्युक्तक्रमस्य वैयर्थ्यात् । न द्वितीयः—गोत्रप्रयोगस्यादावविहितत्वात् । नापि तृतीयः—वस्वाद्युच्चार इत्यस्यैवोक्तत्वात् । तथा च—"संबन्धं प्रथमं ब्रूयान्नामगोत्रमतः परम् । रूपं ततो विजानीयादेष धर्मः सनातनः ॥" अन्यच्च—"मृतनाम समुच्चार्य तस्य गोत्रमुदीरयेत् ।" **बृहस्पतिरपि**—"आसने चार्घदाने च पिण्डदानेऽवनेजने । संबन्धनामगोत्राणि यथार्हमनुकीर्तयेत् ॥ वसू रुद्रस्तथाऽदित्यः पित्रादित्रितये क्रमात् । मातामहादिमात्रादित्रये च स्मृतिमर्हति॥" इति । तथा च "वसुरुद्रादित्यरूपाञ्छ्राद्धार्थं तर्पयेत्पितॄन् । नामगोत्रे समुच्चार्य तिलैस्तीर्थेषु संयतः॥"इति । तीर्थं पितृतीर्थम् । ततश्चास्मत्पितरमुकशर्मन्नमुकगोत्र वसुरूपेति प्रयोगः । पाद्ये तु विरोध आभासते । विधिनिषेधयोर्दर्शनात् । तथा च पाद्ये नामगोत्रे प्रकाशयेदित्युक्तम् । तथा च—"आसनावाहने पाद्ये अन्नदाने तिलोदके । अक्षय्ये पिण्डदाने च नामगोत्रे प्रकीर्तयेत्" इति । **मनुस्तु** निषेधति—"बहिर्मण्डलभूमेस्तु गोत्रमुच्चारयेद्यदि । अकृतं तद्भवेदर्घं पितॄणां नोपतिष्ठते" इति । अत्र व्यवस्था—स्वागतार्थे गोत्रादिनिषेधः । पादऽर्घे तु विधिरित्यविरोधः । अस्ति च स्वागतार्घ्योविधिः पादार्घ्यात्पूर्वभावी । तथा च **वृद्धयाज्ञवल्क्यः**—दत्त्वार्घं क्षालयेत्पादावाचम्य क्षालयेत्पुनः । पूजयेत्पुनराचम्य विप्रानभ्यन्तरे विशेत् ॥" **पुराणसमुच्चयेऽपि**—"दत्त्वार्घं क्षालयेत्पादौ विष्टरेषु निवेशयेत् । पूर्वं यः क्षालयेत्पादौ पादार्घं च ततो नयेत् ॥ विप्रपादोदकोद्भूतां पितृतृप्तिं निहन्ति सः॥" इति । तस्माद्विप्रानाहूय सव्येन तूष्णीं स्वागतार्घं दत्त्वा पादौ प्रक्षाल्याचम्य मण्डले उपवेश्य यथाविधि पुनः प्रक्षाल्याचम्य पादार्घं गोत्राद्युच्चार्य दद्यादिति । नामगोत्रादिकं च कया विभक्त्या कुत्र प्रकाश्यत इत्युच्यते । तत्र 'संबन्धे च भवेत् षष्ठी चतुर्थी संप्रदानतः' इति सामान्येन षष्ठीचतुर्थ्योः प्राप्तयोर्विशेषमाह **स्मृतिः**—"पृच्छाक्षय्यासने षष्ठी चतुर्थी चैव कल्पने । आवाहने द्वितीया च शेषाः संबुद्धयः स्मृताः" इति । कल्पने संकल्पे । एतच्चान्नसंकल्पादन्यत्र । तथा च **ब्रह्माण्डपुराणे**—"पितृभ्यश्च ततो दद्यादन्नमामन्त्रणेन तु । अमुकामुकगोत्रैतत्तुभ्यमन्नं स्वधा नमः ॥" इति । **शाङ्खायनोऽपि**—"अन्नं चासावेतत्त इत्युद्दिश्य भोजयेदिति ।" पठन्ति च—"आमन्त्रणे प्रतिज्ञायामक्षय्ये दक्षिणाविधौ । संपूर्णपृच्छासनयोः षष्ठीं कुर्यात्सदैव हि ॥" इति । आसने चतुर्थी विकल्पिता । तथा--"पृच्छाक्षय्यासने षष्ठी चतुर्थी वाऽऽसने मता । अर्घावनेजनं पिण्डमन्नं प्रत्यवनेजनम् । संबुद्ध्यैतानि कुर्वीत शब्दशास्त्रविशारदः॥"**व्यासोऽपि**—"चतुर्थी चासने नित्यं संकल्पे च विधीयते । प्रथमा तर्पणे प्रोक्ता संबुद्धिमपरे जगुः" इति । देशभेदेन चतुर्थी व्यवस्थितेति **रत्नावलीकारः** । यत्तु "अक्षय्यासनयोः षष्ठी द्वितीयाऽऽवाहने स्मृता। अन्नदाने चतुर्थी स्याच्छेषाः संबुद्धयः स्मृताः॥" **संग्रहकारवचनम्** । शेषाः संकल्पव्यतिरिक्तार्घदानावनेजनादयः । संकल्पे चतुर्थी इत्यन्नदाने चतुर्थीविधानं तच्छेषान्नदानविषयम् ।

एव विधिः । तथा च **धर्मप्रदीपे**—"गोत्राणामासनेऽक्षय्ये गोत्रानावाहने तथा । अर्घे गोत्रे पितस्तद्वत्पिण्डदानेऽवनेजने ॥ अन्नसंकल्पने गोत्रा महाशर्माण एव च । त्यागे दाने च गोत्रेभ्यो दैवेऽप्येतदुदाहृतम्" इति । त्यागे संकल्पे । दाने दक्षिणायाः । एतदुपरिष्टात्तदवसरे वक्ष्यामः । अपरं स्मृतिभ्य उपलब्धव्यमतः श्रद्धान्वितः इत्युक्तमलं बहुना । **शाकेनापि नापरपक्षमतिक्रामेत्**—अनेनावश्यं श्राद्धमपरपक्षे कुर्यादित्यर्थः । तथा च **पुराणोच्चये**—"नहि पिण्डप्रदानेन श्राद्धं भवति केवलम् । पत्रं पुष्पं फलं तोयं यच्चान्यदपि किंचन ॥ पितॄनुद्दिश्य कर्तव्यं श्रद्धया पितृतत्परैः । तत्सर्वं श्राद्धमित्युक्तं श्रद्धया श्राद्धमुच्यते ॥" इति । एवं च सति पक्षश्राद्धमुपक्रम्य सूतकादौ कर्तव्यमुत नेति—तत्रैके नेत्याहुः, अन्ये प्रतिज्ञातत्वात्कुर्वीतेति वदन्ति । तत्रैवं विचार्यते । यदि नेति तदारम्भानियमो दोषश्चापरिसमाप्तावित्यस्य वैयर्थ्यमुपक्रमभङ्गश्च स्यात् । अथ कुर्यादिति तर्हि द्रव्याद्यशुद्धौ द्विजभुक्त्यादिवैषम्याद्येनैवारम्भस्तेनैव समाप्तिरिति न्यायबाधश्च स्यात् । तस्मात्सूतकादिव्यतिरेकेण मया पक्षश्राद्धं कर्तव्यमिति प्रतिज्ञातेन सूतकाद्यन्ते कर्तव्यम् । अथ गृहसाधारणद्रव्येभ्यः पक्षश्राद्धपर्याप्तद्रव्यमुद्धृत्य कृतानियमेन मया कर्तव्यमेवेति ज्ञातेन सूतकादिमध्ये श्राद्धं कर्तव्यमित्युक्तम् । यथाऽऽरब्धपाके निमन्त्रितेषु च करणं, यथा वा नवरात्रे कृतप्रतिज्ञेन सूतकमध्येऽपि पूजादि कर्तव्यमेवमेवेहापीति । तथा च **पुराणसमुच्चये**—"पक्षश्राद्धे समारब्धे सूतकं निपतेद्यदि । समाहूता हि पितरः सूतकान्ते विसर्जयेत् ॥ अथ वा केचनेच्छन्ति श्राद्धं तु मृतसूतके । जन्मसूतकमासाद्य पश्चाच्छ्राद्धं समाचरेत् ॥ यदि नैवं नरः कुर्यात्सूतकान्ते समापनम् । प्राग्दत्तानि मनुष्येण श्राद्धान्यसुरतृप्तये॥" इति । इदं चाशौचान्ते तन्मध्ये वा समापनं पूर्वोक्तविषयकल्पनेन व्यवस्थेयमित्यविरोधः । आवश्यकत्वे हेतुमाह—**"मासि मासि वोऽशनमिति श्रुतेः"**—प्रजापतिः पितॄनाह स्म वो युष्माकं प्रतिमासमशनं दत्तमतोऽपरपक्षेऽवश्यमेव कर्तव्यतेत्यर्थः । तथा च श्रुतिः—"अथैनं पितरः प्राचीनावीतिनः सव्यं जान्वाच्योपासीदंस्तानब्रवीन्मासि मासि वोऽशनं स्वधा वो मनोजवो वश्चन्द्रमा वो ज्योतिरिति ।" अनेन श्रुत्युक्तहेतुनाऽपरपक्षेऽमावास्यायामवश्यकर्तव्यमुक्तम् । तेनापरपक्षातिक्रमोऽपि नेत्यर्थादुक्तम् । तदतिक्रमे चोभयातिक्रमात्प्रत्यवायस्मृतेः । तथा च—"एतान्येव हि हिंसन्ति पञ्चमं यो व्यतिक्रमेत् । तस्मान्नातिक्रमेद्विद्वान् पञ्चमे पितृमेधिकम् ॥" एतानि पुत्रायुर्धनधान्यादिफलानि । पञ्चममपरपक्षं पैतृमेधिकं श्राद्धं, तथा—"न निर्वपति यः श्राद्धं प्रमीतपितृको द्विजः । इन्दुक्षये मासि मासि प्रायश्चित्तीयते तु सः ॥" इति । विधिनिषेधमाह—**तदहः शुचिरक्रोधनोऽत्वरितोऽप्रमत्तः सत्यवादी स्यादध्वमैथुनश्रमस्वाध्यायान्वर्जयेत्"** तदहरिति पूर्ववदिति भावः । श्राद्धदिने एतौ सूत्रोक्तविधिनिषेधावनुतिष्ठेदित्यर्थः । शुचिर्बाह्याभ्यन्तरवमनानिरेकरक्तस्रावाद्यशुद्धिरहितः । अथवा शुचिः शुक्लवासाः स्यात् । कषायादेः प्रतिषिद्धत्वात् । तथा चाह **मरीचिः**—'शुचयः शुचिवाससः स्युः' इति । **शङ्खो**ऽपि—"शुचिशुक्लवासा दर्भहस्तः स्वागतमिति ब्रूयात् । श्राद्धकृच्छुक्लवासाः स्यादिति च ।" **पुराणोच्चये**ऽपि—"एकवासास्तु यः कुर्यात्पिण्डनिर्वपणं नरः । काषायवस्त्रसंवीतस्तद्वै रक्षांसि भुञ्जते ॥" **धर्मप्रदीपे**—"काषायं खण्डवस्त्रं च रक्तवस्त्रं तथैव च । एवंविधानि वस्त्राणि वर्जयेच्छ्राद्धकर्मणि ॥" अप्रमत्त इति स्मृत्युक्तकालादिषु सावधानः । तथा च—"कालहीनं क्रियाहीनं मन्त्रहीनं च यद्भवेत् । पात्रहीनं च यच्छ्राद्धं भागं तं राक्षसं विदुः ॥" इति । स्वाध्यायः श्राद्धमन्त्रजपादिव्यतिरिक्तपाठः, मैथुनं पूर्वदिनेऽपि । शेषं स्पष्टम् । नेयं विधिनिषेधेयत्ताऽपितु प्रदर्शनम् । अतोऽन्यदपि विधिनिषेधरूपं स्मृत्युक्तं ग्राह्यमित्यर्थः । तथा च दातृभोक्त्रोर्नियमाः । "न चाश्रु पातयेज्जातु न शुष्कां गिरमीरयेत् । न चोद्वीक्षेत भुञ्जानं न च कुर्वीत मत्सरम्॥ न दीनोऽपि न वा क्रुद्धो न चैवान्यमना नरः । एकाग्रमाधाय मनः श्राद्धं कुर्यात्सदा बुधः ॥"इत्यादि । अत्रैतच्चिन्त्यते—विधवापरस्त्र्यादीनां श्राद्धपाके कर्तुश्च तिलके किमधिकारः स्यादुत नेति । तत्रैक आहुः—समाचारत्वादधिकार इति । तदयुक्तम् । स्मृतिविरुद्धाचारस्याप्रमाणत्वात् । तथा च **व्यासः**—"गृहिणी चैव सुस्नाता पाकं कुर्यात्प्रयत्नतः । निष्पन्नेषु च पाकेषु पुनः स्नानं समाचरेत् ॥ रजस्वलां च पाखण्डीं पुंश्चलीं पतितां तथा । त्यजेच्छूद्रां तथा वन्ध्यां विधवामन्यां तथैव च ॥" रजस्वलां त्रिदिनादूर्ध्वमनिवृत्तरजस्काम् । यत्तु **ब्रह्मपुराणे**—"व्यङ्गकर्णीं चतुर्थाहस्नातामपि रजस्वलाम् । वर्जयेच्छ्राद्धपाकार्थममातृपितृवंशजाम् ॥" इत्यन्यस्त्रीविधायकं तत्पत्न्या असम्भवविषयम् । अत एव पठन्ति—"मातृष्वसा वधूः कन्या शूद्राग्नी च परास्त्रियः । पितृपाकं न कुर्वीत निराशाः पितरो गताः ॥" तथा "श्राद्धस्य पाके विधवा परस्त्री न तृप्तिमन्तः पितरो न देवाः" इत्यादि । व्यङ्गकर्णी त्रुटितकर्णी ।

तिलके तु **आपस्तम्बः** । "ललाटे पुण्ड्रकं दृष्ट्वा स्कन्धे माल्यं तथैव च । निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम् ॥" इति । एवं च सकलशिष्टाचाराविरोधमवलोक्य केचिदाहुः—पुण्ड्रकमिति वर्तुलतिलकं निषेधति । तदपरे न क्षमन्ते । "तिर्यक्पुण्ड्रं तथा दृष्ट्वा स्कन्धे माल्यं तथैव च । निराशाः पितरो यान्ति दृष्ट्वा च वृषलीपतिम् ॥" इति वचनात् । अतस्तिर्यक्पुण्ड्रनिषेध इत्यन्ये । तदपि न सामान्येन तिलकमात्रनिषेधात् । तथा च पठन्ति—"वामहस्तेषु ये दर्भा गृहे रङ्गवलिस्तथा । ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः ॥" इति । रङ्गवलिश्चतुष्कम् । **स्मृत्यन्तरम्**—"ललाटे तिलकं दृष्ट्वा स्कन्धे मालाङ्कितं तथा । कांस्यपात्रे हविर्दृष्ट्वा निराशाः पितरो गताः ॥" **सत्यव्रतोऽपि**—"वर्जयेत्तिलकं भाले श्राद्धकाले कदाचन । तिर्यग्वाप्यूर्ध्वपुण्ड्रं वा धारयेच्छ्राद्धकर्मणि ॥" एवं च सति श्राद्धदिने तिलकमात्रस्यैव निषेध इति युक्तम् । प्रयोगेष्वाशीःप्रार्थनानन्तरं तिलकविधानस्य दृष्टत्वात् । तथा च **याज्ञवल्क्यः**—"याचितारश्च नः सन्तु मा च याचिष्म कंचन । ततस्तु तिलकं कुर्यान्मन्त्रेणानेन भक्तितः ॥ नित्यानुष्ठानसंनिष्ठाः सर्वदा यज्ञबुद्धयः । पितृमातृपराः सन्तः सन्त्वस्मत्कुलजा नराः ॥" इति । न चानालोचितपरंपरानुष्ठानं ग्राह्यम् । **चतुर्विंशतिमतेऽपि**—"स्मृतिर्वेदाविरोधेन परित्याज्या यथा भवेत् । तथैव लौकिकं वाक्यं स्मृतिबाधात्परित्यजेत् ।" पठन्ति च—" ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा चन्द्राकारमथापि वा । श्राद्धकर्त्रा न कर्तव्यं यावत्पिण्डान्न निर्वपेत् ॥" इति । यच्च—" भस्मीभवति तत्सर्वमूर्ध्वपुण्ड्रं विना कृतम्" इति । तत्सन्ध्यादिकर्मविषयं तिलकं तच्छ्राद्धदिनादन्यत्र वेदितव्यमित्यविरोधः । **आवाहनादिवाग्यत ओपस्पर्शनात्**—आ उपस्पर्शनादिति छेदः । ततश्चावाहनमारभ्य चुलुकदानपर्यन्तं मन्त्रवर्जं श्राद्धकृद्वाग्यमनमाचरेदित्यर्थः । तल्लोपे तु—वैष्णवमन्त्रजपो विष्णुस्मरणं वा प्रायश्चित्तम् । **आमन्त्रिताश्चैवम्**—आमन्त्रिता विप्रा अप्येवं कर्तवाक्रोधादिस्मृत्युक्तविधिनिषेधानाचरेयुरित्यर्थः । तथा च **शङ्खः**—" हुङ्कारेणापि यो ब्रूयाद्धस्ताद्वाऽपि गुणान्वदेत् । भूतलाच्चोद्धरेत्पात्रं मुञ्चेद्धस्तेन वा पिबेत् ॥ प्रौढपादो बहिष्कच्छो बहिर्जानुकरोऽथवा । अङ्गुष्ठेन विनाऽश्नाति मुखशब्देन वा पुनः ॥ पीतावशिष्टं तोयादि पुनरुद्धृत्य वा पिबेत् । खादितार्धं पुनः खादेन्मोदकानि फलानि च ॥ मुखेन वा धमेदन्नं निष्ठीवेद्भोजनेऽपि वा । इत्थमन्नं द्विजः श्राद्धं दत्त्वा गच्छत्यधोगतिम् ॥ पवित्रपाणयः सर्वे ते च मौनव्रतान्विताः । उच्छिष्टोच्छिष्टसंसर्गं वर्जयन्तः परस्परम् ॥ न स्पृशेद्वामहस्तेन भुञ्जानोऽन्नं कदाचन । न पादौ न शिरो नास्थि न पदा भाजनं स्पृशेत् ॥" इत्यादि । एवमित्यतिदेशेन भोक्तृणामपि कर्तृवन्मन्त्रोच्चारे प्राप्ते तन्निषेधार्थश्चकारः । तथा च—"आसनेषु समारूढो मन्त्रमुच्चरते द्विजः । स चौरः स च पापिष्ठो ब्रह्महा स च उच्यते ॥" तथा—"आसनस्थो यदा विप्रो मन्त्रमुच्चरते यदि । त्रयस्ते नरकं यान्ति दाता भोक्ता पिता तथा" इति । अत्र मन्त्रोच्चारनिषेधादग्नौकरणादि कुरुष्वेत्यादिप्रतिवचनमनुज्ञातम् ॥ इति श्रीश्राद्धकाशिकायां प्रथमा कण्डिका समाप्ता ॥ १ ॥

इदानीं प्रयोगमुपक्रममाणः परिभाषते—**दैवपूर्वं श्राद्धम्**—परिभाषेयमपवादव्यतिरिक्तेष्ववतिष्ठते । श्राद्धमिति पित्र्यं कर्म । दैवपूर्वमिति पदार्थानुसमयोक्तिः । अतश्च स्मृत्यन्तरोक्तः काण्डानुसमयोऽस्यानभिप्रेतः । एवं च सति सोऽनर्थक इति चेत् । न, पदार्थानुसमयानुक्तिविषयत्वेन सार्थकत्वात् । आह च—"सकलो गुणकाण्डश्चेदेकैकस्य प्रयुज्यते । सहत्वाप्रापको नैव प्रयोगवचनो भवेत्" इति । अतश्चात्रापवादवर्जं पादप्रक्षालनादि सर्वं कर्म दैवपूर्वं भवतीत्यर्थः। तथा च "दैवपूर्वं भवेच्छ्राद्धं वर्जयित्वा विसर्जनम् । प्रश्नं च दक्षिणां चैव भुक्ते चाचमनं विना ॥"तथा—"हस्तोच्छिष्टापनयनमावाहनं च विसर्जनम् । दक्षिणां सौमनस्यं च विनान्यद्दैवपूर्वकम् ॥" **धर्मप्रदीपेऽपि**—"विसर्गश्चुलुकाश्चाग्नौकरणं पङ्क्तिवारणम् । करशुद्धिरपोऽशानं पितृपूर्वाणि षड्, सदा" इति । **देवलोऽपि**—"यत्र यत्क्रियते कर्म पैतृकं ब्राह्मणान्प्रति । तत्सर्वं तत्र कर्तव्यं वैश्वदेवस्य पूर्वकम्" इति । **पिण्डपितृयज्ञवदुपचारः पित्र्ये**--पितरो देवताऽस्येति पित्र्यं, "वाय्वृतुपित्रुषसो यत्" इति यत्प्रत्ययः । ततश्च पितृकर्माणि पिण्डपितृयज्ञवत्करणं भवतीत्यर्थः । अनेनापसव्यदक्षिणामुखवामजानुपाताद्यतिदिष्टम् । अतश्च नीवीबन्धनादि पिण्डोत्थापनपर्यन्तं पिण्डपितृयज्ञोक्तधर्मो भवतीति । तत्रैतत्संदिह्यते । किं नीवीबन्धनं वामाङ्गे दक्षिणे वा भवति । तत्रोभयथाऽऽचारदर्शनाद्यथासंप्रदायं व्यवस्थेति **पारिजातः** । तदेतद्विचारणीयम्—किं नीवी दैविकं कर्म पित्र्यं वेति । यदि दैवं तदा पिण्डपितृयज्ञेऽनुष्ठानविरोधः । अथ पित्र्यं तद्यज्ञोपवीतवदपसव्याङ्ग उचितेति । तथा च **मनुः**—"प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा । पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिना" इति । अत्र प्राचीना-

वीतिनेत्यपसव्यत्वे प्राप्ते अपसव्यग्रहणं नीवीबन्धनवामजानुपातादिधर्मप्राप्त्यर्थम् । अपि च–“सर्वं कर्मापसव्येन दक्षिणादानवर्जितम्” इति स्मृतिः । पिण्डपितृयज्ञवदित्यातिदेशोऽपि । यत्तु कात्यायनवचनम्–“नीवी कार्या दशागुप्तिर्वामकुक्षौ कुशैः सदा । पितृकर्मणि चैवोक्ता वेदवेदाङ्गवेदिभिः” इति । तदाभ्युदयिकविषयकम् । तथा च पठन्ति–“दशासंगोपनं नीवी साचाग्रे मानुषी स्मृता । पितॄणां दक्षिणे पार्श्वे विपरीता च दैविके” वृद्धयाज्ञवल्क्योऽपि–“दक्षिणे कटिदेशे तु तिलैः सह कुशत्रयम् । तर्जयन्तीह दैत्यानां यथा नॄणां यमस्तथा” इति । नन्वेवमपि नीवी कार्येत्यत्र वचने सदाशब्दान्नैवं विषय इति चेत् । नैवम्, नीवीबन्धस्य रक्षोघ्नत्वाद्दैवपित्र्यमानुषकर्मसु यथोचितं गोपनस्य विहितत्वेन सदाशब्दस्यैवमर्थत्वात् । तथा च श्रुतिः–“दक्षिणत इव हीयं नीविः” इति लिङ्गम् । “लिङ्गादपि विधिर्ज्ञेयः” इति वचनात् । न च श्रुतिविरुद्धा स्मृतिः प्रमाणम् । “श्रुतिस्मृतिविरोधे तु, श्रुतिरेव बलीयसी” इति वचनात् । तस्माद्दाक्षिणाङ्ग एव नीवीबन्ध इति सिद्धम् । **पिण्डब्राह्मणभाष्यकारोऽपि, अथ नीवीमुद्धृत्य नमस्करोतीति** कण्डिकाव्याख्याने नाभेर्दक्षिणत एव नीवीस्थानमित्यमंस्त । तद्बन्धमन्त्रश्च **पाराशरोक्तः** यथा–“निहन्मि सर्वं यदमेध्यकृद्भवेद्धताश्च सर्वेऽसुरदानवा मया । यक्षांसि रक्षांसि पिशाचगुह्यका हता मया यातुधानाश्च सर्वे” **द्विगुणास्तु दर्भाः**–दर्भसामग्र्युपलक्षणं चैतत् । तथा च **पुराणम्**–“उपमूलसकृल्लूनान्कुशांस्तत्रोपकल्पयेत् । यवांस्तिलान्बृसीः कांस्यमयःशुद्धौ समाहृताः ॥ पार्णराजतताम्राणि पात्राणि स्युः समिन्मधु । पुष्पधूपसुगन्धादि क्षौमसूत्रं च मेक्षणम्” इति । बृसीरासनानि । एतदाहरणमाह–“उदपात्रं च कांस्यं च मेक्षणं च स्रुवादिकम् । आहरेदपसव्येन दार्वं दक्षिणतः शनैः” इति । दर्भाः समूलकुशाः स्मृत्युक्ताः । तथा च यमः–“समूलस्तु भवेद्दर्भः पितॄणां श्राद्धकर्मणि । मूलेन लोकाञ्जयति शक्रस्य तु महात्मनः ॥” हारीतोऽपि–“दक्षिणां दिशं गत्वा समूलान् कुशानाहरेत्” इति । तुशब्दो विशेषार्थः । तेन पिण्डाधस्तरणकुशवर्जं समूलद्विगुणाः कुशाः पित्र्ये, दैवप्रेतश्राद्धयोस्तु ऋजवो भवन्तीत्यर्थः । तथा च श्रुतिः–“अथ सकृदाच्छिन्नान्युपमूलानि भवन्ति ।” स्मृतिरपि–“उपमूलं सकृल्लूनं बहिः पिण्डेषु शस्यते ।” कात्यायनोऽपि–“सपिण्डीकरणं यावदृजुदर्भैः पितृक्रिया । सपिण्डीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेत् ॥ देवानामृजवो दर्भाः पितॄणां द्विगुणाः स्मृताः” इति । **पवित्रपाणिर्दद्यादासीनः सर्वत्र**–पवित्रमुपग्रहोपलक्षणम्, सर्वत्रेति दैवे पित्र्ये च । तेनोभयत्र पवित्रोपग्रहणपाणिरासीनश्च दद्यादित्यर्थः । तथा मनुः–“पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिना” इति । अथ वा पवित्रपाणित्वमासीनत्वं च स्मृतिप्राप्तमेवात्र सार्थकत्वेनानुवदाति । तेन वामहस्ते कुशादानमावाहने चासीनत्वं निषेधतीत्यर्थः । तथा च पठन्ति–“वामहस्ते यदा दर्भा गृहे रङ्गवलीस्तथा । ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः” इति । किं चावाहने चागच्छन्तु पितृषु कर्तुरासीनत्वं न युक्तम् । तथा च पिण्डदानावाहने पुराणोक्तलिङ्गम् । “अथ प्राञ्जलिरुत्थाय स्थित्वा चावाहयेत्पितॄन्” इति । मन्त्रार्थानुग्रहोऽपि **आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः** इति । अपि चासीनो दद्यात् इति दाने आसीनत्वं न पुनरावाहनाद्युपस्थानेऽपीति सूत्रार्थः । **प्रश्नेषु पङ्क्तिमूर्धन्यं पृच्छति सर्वान्वा**–पङ्क्तिमूर्धन्यः पित्र्ये प्रथमो विप्रः । लिङर्थे लट्, वाशब्दो व्यवस्थितविकल्पे, तुल्यविकल्पस्याष्टदोषदुष्टत्वात् । पृच्छाऽऽस्याशीःप्रार्थनादिषु सर्वेत्यत्र पङ्क्तिमूर्धन्य इत्यर्थः । तथा च **पुराणम्**–“द्वौ हस्तौ युग्मतः कृत्वा जानुभ्यामन्तरे स्थितौ । सप्रश्रयश्चोपविष्टः सर्वान्पृच्छेद्द्विजोत्तमान्” इति । “तुल्यविकल्प एवायम्” इति **कर्कादयः** । न चात्र प्रश्नेषु पङ्क्तिमूर्धन्यं सर्वान् वेत्येतावति वाच्ये पृच्छतीति गौरवं स्मृत्यन्तरोक्तक्रमविध्यर्थं, प्रश्नेनैव तल्लब्धेः । तथा च वृद्धयाज्ञवल्क्यः–“पृच्छाद्यासनमर्घपूरणमतश्चावाहनार्घक्रमो न्युब्जं चार्चनभोजनाग्निहवनं शेषो जपः कल्पनम् । दत्त्वाऽन्नं जपतृप्तिपिण्डयजने सुप्रोक्षिताक्षय्यके आशीः पुण्ड्रकवाचनार्घचलनं दानं विसर्गः स्तुतिः” इति । आदिशब्देन देशकालगोत्रादिस्मरणपिण्डयजनविकिरादि पिण्डार्चनपर्यन्तम् । अत्रान्योऽपि स्मृत्युक्तक्रमो ज्ञेयः । तथा च–“श्राद्धारम्भे गयां ध्यात्वा ध्यात्वा देवं जनार्दनम् । स्वपितॄन्मनसा ध्यात्वा ततः श्राद्धं समारभेत् ॥ अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् । तथा बर्हिषदः पान्तु याम्यां ये पितरः स्थिताः ॥ प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः । ऊर्ध्वतस्त्वर्यमा रक्षेत्कव्यवाडनलोऽप्यधः ॥ रक्षोभूतपिशाचेभ्यस्तथैवासुरदूषकाः । सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥ प्राणायामं ततः कुर्याद् गायत्र्याः स्मरणं तथा । श्राद्धं कर्तास्मीति वदेद्विप्रैर्वाच्यं कुरुष्व च ।” देवताभ्यः पितृभ्यश्चेत्यादि । “देवताभ्यः” इत्यस्यादिमध्यावसानेषु जपः । “आदिमध्यावसानेषु त्रिरावृत्तं जपेद्बुधः” इति वचनात् । एवं परिभाष्य कर्मोपक्रमते–**आसनेषु दर्भानास्तीर्य**-

पादासनदीपोपलक्षणं चैतत् । तथा च **कात्यायनः**—"विष्टरार्थं कुशान्दद्याद्विप्राणां पादमूलतः । " **ब्राह्मं च**—"पृथग् पृथग् त्वासनेषु तिलतैलेन दीपकाः । अविच्छिन्नार्चिषो देयास्ते तु रक्ष्या द्विजोत्तमैः ॥ " इति । आसनान्याह **स्मृतिः**—"शमीकाश्मर्यशल्लीश्च कदम्बो वरणस्तथा । पञ्चासनानि शस्तानि श्राद्धे देवार्चने तथा ॥ श्रीपर्णीवरणंक्षीरिजम्बूकाम्रकदम्बजम् । सप्तमं बाकुलं पीठं पितॄणां दत्तमक्षयम् " इति । ततश्च सदीपेष्वासनेषु पादासनं दत्त्वाऽऽसनेषु दर्भान्दद्यादित्यर्थः । द्वितीयमेतदास्तरणम् , अतोऽस्मात्पूर्वमपि दर्भानास्तीर्योपवेशयेदिति । तथा च **देवीपुराणम्**--"कुशोत्तरे तिलास्तीर्णे आसने लोहवर्जिते । दाता च स्वासने पूते विप्रानावेशयेत्सुधीः" इति । नन्वास्तृतेषु पुनरास्तरणं किमर्थम् । तत्रैके पूर्वास्तरणस्य धर्ममात्रत्वादित्याहुः । अपरे पुनरत्र नासिकां संकोचयन्तो विप्रानुत्थाप्य कर्तव्यमित्यास्थिषत । तदहृद्यम् , उपवेशितानामुत्थापनापत्तेः । तस्मात्पूर्वमास्तरणमात्रमिह तु तद्दानमित्यपौनरुक्त्यम् । अतश्चास्तीर्य दद्यादित्यर्थः । संकल्पपरत्वात् । तथा च **साम्बपुराणम्**—"कृत्वाऽद्भिः शौचमाचम्य सूपविष्टान्यथाविधि । दद्याद्दर्भासनं तेभ्यो वैश्वदेवत्यपूर्वकम्" । आसनेष्विति हस्ते कुशान्न दद्यादिति सप्तम्यर्थः । " दर्भांश्चैवासने दद्यान्न तु पाणौ कदाचन" इत्युक्तेः । एते च वैश्वदेवे दक्षिणतः, पित्र्ये वामतो द्रष्टव्याः । "पितॄणामासनं दद्याद्वामपार्श्वे कुशान्सुधीः । दक्षिणे चैव देवानां सर्वदा श्राद्धकर्मणि ॥ " इति वचनात् । अत्रैके आसनदाने स्वधां प्रयुञ्जते स्वधाशब्दस्य प्रवर्तकत्वात् । तदयुक्तम् । तस्यासनादौ निषिद्धत्वात् । तथा च **हेमाद्रिपद्धतौ**--"पितृभ्यो निखिलं दद्यात्स्वधाकारेण धर्मवित् । अक्षय्यमासनं चैव वर्जयित्वार्घमेव च । **धर्मप्रदीपेऽपि** -"आसनावाहनयोरर्घे तथाऽक्षय्येऽवनेजने । क्षणे स्वाहास्वधावाणीं न कुर्यादब्रवीन्मनुः ॥" तेनास्मत्पितुरमुकशर्मणोऽमुकसगोत्रस्य वसुरूपस्येदमासनमस्त्विति प्रयोगः । अत्रैके सकारवर्जं गोत्रमुच्चरन्ते । तदयुक्तम्—तत्सहितस्यैवोक्तत्वात् । तथा च—" सकारेण हि वक्तव्यं गोत्रं सर्वत्र धीमता । सकारः कुतपो ज्ञेयस्तस्माद्यत्नेन संवदेत्" इति । विश्वान्देवानावाहयिष्य इति पृच्छति—स्पष्टमेतत् । एतच्च यवानादायोङ्कृत्य निरङ्गुष्ठं द्विजहस्तं गृहीत्वा कर्तव्यम् । तथा च **यमः**—" यवहस्तं ततो देवान्विज्ञाप्यावाहनं प्रति ।" **शाट्यायनोऽपि**—" आवाहनं च कर्तव्यं द्विजे चोंकारपूर्वकम् ।" **गोभिलोऽपि**—" यवानादायोंकारं कृत्वा " इति । अत्रैकेऽङ्गुष्ठं गृहीत्वाऽऽवाहयन्ति । तदयुक्तम् । "निरङ्गुष्ठं गृहीत्वा तु विश्वान् देवान् समाह्वयेत्" इति **ब्रह्माण्डोक्तेः** । ततश्च सव्योदङ्मुखो दक्षिणं जान्वाच्य ऋजुकुशानादायोमित्युक्त्वा पुरूरवार्द्रवादिविप्रयोगं कुर्यादित्यर्थः । अत्रैतत्संदिह्यते । किमर्घान्पूरयित्वाऽऽवाहयेदुतावाह्य पूरयेदिति । उभयथा वचनदर्शनात् । तथा हि **उमामहेश्वरसंवादे**—" कुशाम्बुनाऽभ्युक्ष्य गृहं दत्त्वाऽऽसनमनुक्रमात् । निवेश्य तत्र विप्रान्वै कुर्यादर्घाभिपूरणम् ॥ शं नो देव्या पयः क्षिप्त्वा यवोऽसीति यवानपि । गन्धपुष्पं च तूष्णीं स्यादथ देवान्समाह्वयेत्" इति पुराणसमुच्चयेऽप्यर्घपूरणं कृत्वाऽऽवाहनमुक्तम् । याज्ञवल्क्यस्त्वावाह्यार्घान्पूरयेदिति—" पाणिप्रक्षालनं दत्त्वा विष्टरार्थान्कुशानपि । आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा ॥ यवैरन्ववकीर्याथ भाजने सपवित्रके । शन्नो देव्या पयः क्षिप्त्वा यवोऽसीति यवांस्तथा" इति । "या दिव्या इति मन्त्रेण हस्तेष्वर्घं विनिक्षिपेत् । अपसव्यं ततः कृत्वा " इत्यादि । सूत्रकारोऽप्यावाह्यार्घं पूरयति । अत्र स्मृताविरोधः स्मृतिपुराणयोः । स्मृतेः प्राबल्यात्सूत्रोक्तत्वाच्चावाह्यार्घपूरणमित्येके । तदपरे न क्षमन्ते । पृच्छाद्यासनमर्घपूरणमतश्चावेवार्घपूरणस्य पूर्वमुक्तत्वात् । तथा च क्रमपरा **वृद्धयाज्ञवल्क्यस्मृतिः**—" विश्वान्देवानावाहयिष्य इति सूत्रयता याज्ञवल्क्यवचनेनैवाहनार्घक्रमः " इति च सति दर्भानास्तीर्य समय इति ज्ञापितम् । अन्यथा वाजसनेयिपरया वृद्धयाज्ञवल्क्यस्मृत्या सूत्रं विरुध्येत । तथा चासनं दत्त्वा **वृद्धयाज्ञवल्क्यः**—"अर्घपात्रं समानीय कुशद्वयसमन्वितम् । शन्नो देव्या पयः क्षिप्त्वा यवोऽसीति यवान् क्षिपेत् ॥ गन्धपुष्पादिसंपूर्णपृच्छां कुर्याद्विचक्षणः । पूर्णमस्त्विति तैरुक्ते विश्वान्देवान् समाह्वयेत् ॥ ततस्तु क्रमयोगेन पित्रर्थं तु नियोजयेत् । कुशाम्बुतिलसंयुक्तं तिलोसीति तिलान् क्षिपेत् ॥ शन्नो देव्या पयः क्षिप्त्वा आवाहयेत्पितॄन् भक्त्या जपेदायं तु नः । स्वनामशर्मगोत्रैस्तु उशंतस्त्वेति वै ततः ॥ शेषं पूर्ववदाचरेत् । स्वनामशर्मगोत्रैस्तु उशंतस्त्वेति वै ततः ॥ आवाह्येत्पितॄन् भक्त्या जपेदायं तु नः शेषं पूर्ववदाचरेत् ।" इति । ततश्चासनं दत्त्वाऽर्घं पूरयित्वा संपूर्णपृच्छां कृत्वाऽऽवाह्यार्घं दद्यादिति वैश्वदेवकाण्डं कृत्वाऽऽसनादि पुनः॥" इति । ततश्चासनं दत्त्वाऽर्घं पूरयित्वा संपूर्णपृच्छां कृत्वाऽऽवाह्यार्घं दत्त्वेति वैश्वदेवकाण्डं कृत्वाऽऽसनादि पितृकाण्डं कुर्यादिति क्रमः । तथा च बैजवापोऽप्यर्घानन्तरं पदार्थानुसमयमाह—"तस्योपरि कुशान्दत्त्वा प्रदद्यादै-

वपूर्वकम् । गन्धपुष्पाणि धूपं च दीपवस्त्रोपवीतकम्॥'' इति । अन्यथा कथं देवपूर्वमिति पदार्थानुसमयमुपक्रम्य विश्वान्देवानावाहयिष्य इत्यादिना तमेव पुराऽवक्ष्यदित्यलमनल्पप्रलापेन । अथ पदार्थानुसमयकाण्डानुसमययोर्विकल्पः । विश्वान्देवानाहादित्यपुराणम्–"विश्वेदेवाः क्रतुर्दक्षः सर्वास्विष्टिषु कीर्तितौ । नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च पैतृके ॥ नवान्नलभने देवौ कालकामौ सदैव हि । अपि कन्यागते सूर्ये श्राद्धे च धुरिलोचनौ ॥ पुरूरवार्द्रवौ चैव विश्वेदेवाश्च पार्वणे ।'' इति पैतृके नवान्नं लभत इति नवान्ननिमित्ते श्राद्धे, कन्यागते सूर्य.इति केवलकाम्यबुद्ध्या क्रियमाणे, उभयबुद्ध्या कृते तु पुरूरवार्द्रवावेव गोदोहनेन पशुकामस्येतिवन्नित्यकर्माश्रयणेन गुणफलविधेरिति **पारिजातः । आवाहयेत्यनुज्ञातो विश्वेदेवास आगतेत्यनयाऽऽवाह्यावकीर्य विश्वेदेवाः शृणुतेममिति जपित्वा**—आवाहयेति द्विजराज्ञप्तो विश्वेदेवास आगतेत्यनयर्चावाह्यावकीर्य विश्वेदेवाः शृणुतेममित्यृचं जपेदित्यर्थः । अत्रावकीर्येति यद्यपि द्रव्यमन्त्रयोरनुपदेशस्तथाऽपि यवैरोषधयः समवदन्तोति मन्त्रेण च प्रदक्षिणमुदङ्मुखेनावकिरणं द्रष्टव्यम् । यथाह **यमः**–"यवहस्तस्ततो देवान्विज्ञाप्यावाहनं प्रति । आवाहयेदनुज्ञातो विश्वेदेवासइत्यृचा॥ विश्वेदेवाः शृणुतेममिति जप्त्वा ततोऽक्षतान् । ओषधय इति मन्त्रेण विकिरेत्तान्प्रदाक्षिणम्'' इति । अत्रावाह्य यवान्विकिरेत्ततो जप इति क्रमः । "उदङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः । प्रदक्षिणं तु देवानां पितॄणामप्रदाक्षिणम् ॥'' इति च । नन्वपहता इति तिलानवकीर्येत्यवाकिरणेऽपहतेति मन्त्रस्य विहितत्वात्कथमोषधय इति ? उच्यते, वैश्वदेवस्य स्वत एव रक्षोघ्नत्वादपहता इत्यस्य मिथ्याप्रयुक्तत्वात् । तथा च **गोभिलसूत्रम्**––"ओषधयः समवदन्त''इति। अथ मन्त्रानुपदेशात्तूष्णीमेवावाकिरणम् तथा च **खादिरगृह्यम्**–'तूष्णीं यवानवकीर्येति'। **पितॄनावाहयिष्य इति पृष्ट्वाऽऽवाहयेति द्विजराज्ञप्त उशन्तस्त्वेत्यनयर्चाऽऽवाह्यापहता इति तिलान् प्रदक्षिणमवकीर्यायन्तु न इति जपित्वा**-पितॄनावाहयिष्य इति पृष्ट्वाऽऽवाहयेति द्विजराज्ञप्त उशन्तस्त्वेत्यनयर्चाऽऽवाह्यापहता इति तिलानप्रदाक्षिणमवकीर्यायन्तु न इत्यृचं तिष्ठन्नवकीर्य जपित्वा पितॄनिति मातामहानामप्युपलक्षणम् । ततश्चापसव्येन दक्षिणामुखो द्विगुणकुशतिलानादाय वामं जानु पातयन्नोमित्युक्त्वाऽस्मत्पितृपितामहप्रपितामहानमुकामुकशर्मणोऽमुकामुकगोत्रान्वसुरुद्रादित्यरूपानावाहयिष्य इति पृष्ट्वावाऽऽहयेति द्विजैराज्ञप्त उशन्तस्त्वेत्यनयर्चाऽऽवाह्यापहता इति तिलानवकीर्यायन्तु न इत्यृचं तिष्ठन् जपेदित्यर्थः । नन्वत्रापि तूष्णीमोषधय इति मन्त्रेण वाऽवकिरणमिति चेत्, न ।रक्षोघ्नत्वादवकिरणेऽपहतेति मन्त्रस्यैव ज्ञापितत्वात् । वैश्वदेवे तु स्वत एव रक्षोघ्नत्वान्नेत्युक्तम् । अत्रोदकस्पर्शः राक्षसत्वात्। अत्रैके विप्रबहुत्वे प्रतिद्विजमेकवचनप्रयोगेन पित्रादीनावाहयन्ति तत्पितॄनावाहयिष्य इति सूत्रोपदेशात्पितॄन्हाविप अत्तव इति मन्त्रलिङ्गाच्चोपेक्षणीयम् । अत्रैतच्चिन्त्यते—किं मातामहश्राद्धे मन्त्रोहो भवति नवेति । तत्रैके आहुः । पितृभ्यः स्वधायिभ्यः, अत्र पितरो मादयध्वम्, आयन्तु नः पितर इत्यादि, एवं प्रदक्षिणावृत्को वृद्धौ नान्दीमुखान् पितॄन्, स्वपितृभ्यः पिता दद्यात्, "नमस्येऽहं पितॄञ्छ्राद्धे'' इत्यादिश्रुतिस्मृतिवाक्येषु पितृशब्दस्यैव प्रयोगान्मातामहश्राद्धे पितृशब्दप्रयोग एव न मन्त्रोह इति । तदेतद्विचारणीयम् । यदि श्रुत्यादिवाक्यस्य पितृशब्दप्रयोगेणैव सिद्धिस्तर्ह्यस्मन्मातरस्मन्मातामहेत्यादिप्रयोगेष्वपि पितृशब्दोच्चारणमेवास्तु । अथ मन्त्रेष्वन्यथावृत्तिनिषेधो नैतेषु प्रयोगेष्विति तर्हि :मन्त्रोहप्रतिपादकानां वचनानां वैयर्थ्यापत्तिर्मन्त्राणां वाऽन्यथाप्रयुक्तत्वमित्युभयथाऽपि मन्त्रोहसिद्धिरिति । तस्माद्यथाविहितमन्त्रोह एवेति सिद्धम् । तथा च **कात्यायनः**–'यथार्थमूहश्चोदिते, न प्रकृतावपूर्वत्वाद्विकृतौ वचनादिति ।' विष्णुरपि–"आवाहने स्वधाकारे मन्त्रा ऊह्या विसर्जने । अन्यकर्मण्यनूह्याः स्युरेष श्राद्धविधिः स्मृतः ॥ मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः । मन्त्रोहेन यथान्यायं शेषाणां मन्त्रवर्जितम्'' इति । अपि चैकोद्दिष्टेऽपि स एव, एवं मन्त्रानूहेनैकोद्दिष्ट इति । शेषाणां मन्त्रवर्जितमिति पितृमातृमातामहव्यतिरिक्तपितृव्यभ्रात्रादीनामूह्यमन्त्रवर्जितमित्यर्थः :। **यज्ञियवृक्षचमसेषु पवित्रान्तर्हितेष्वेकैकस्मिन्नप आसिञ्चति शन्नो देवीरिति**–यज्ञमर्हन्ति यज्ञियाः पलाशादयः 'यज्ञर्त्विग्भ्यां घखञौ' इति घप्रत्ययः । तथा च श्रुतिः–"ते वै पालाशाः स्युरित्युपक्रम्य यदि पालाशान्न विन्देदथो अपि वैकङ्कताः स्युर्यदि वैकङ्कतान्न विन्देदथो अपि काश्मर्यमयाः स्युर्यदि काश्मर्यमयान्न विन्देदथो अपि बैल्वाः स्युरथो खादिरा अथो औदुम्बरा एते हि वृक्षा यज्ञियाः'' इति । ब्रह्मपुराणेऽपि–"पलाशाश्वत्थन्यग्रोधप्लक्षवैकङ्कतोद्भवाः । काश्मर्योदुम्बरौ बिल्वाश्चन्दनः सरलस्तथा ॥ शालश्च देवदारुश्च खादिरश्चेति यज्ञियाः ॥'' चमसाः पात्राणि अम्भसः, प्रमाणमेषां प्रयोजनानेषम्। अर्थात्परिमाणमिति पारिभाषिकम् [illegible] पवित्राण्यनन्तर्गर्भिणं सम-

मिति कात्यायनोक्तानि । **पवित्रान्तर्हितेष्ववाति**–अर्घपात्रे पवित्रं निधायोदकं क्षिपेदिति ज्ञापयति । कुशं विनो-
दकस्याप्रथतत्वात् । तथा च श्रुतिः–"वृत्रो हवा इदं सर्वं वृत्वाशिष्य इत्युपक्रम्य तदेवासामेताभ्यां पवित्राभ्यामप-
हन्तीत्युपसंहारः ।" एकैकस्मिन्निति मन्त्रावृत्तिं दर्शयति । ततश्च पलाशादिषु पात्रेषु यथादैवतसंख्येषु
दैवे प्रागग्रे सव्यादिना प्रागग्रं पवित्रद्वयं पित्र्ये दक्षिणाग्रेषु दक्षिणासंस्थेष्वपसव्यादिना पवित्रत्रयं दक्षिणाग्रं
निधाय **शन्नो देवीरिति** मन्त्रेण प्रतिचमसं मन्त्रावृत्त्या ऋगन्ते अप आसिञ्चेदित्यर्थः । तथा च
विष्णुः–'दक्षिणाग्रेषु दक्षिणासंस्थेष्वपसव्यादिना आसिञ्चेच्छन्नो देवीरिति ।' अत्र केचिद्विवदन्ते–
पवित्रकरणमनुपदेशात्तूष्णीमिति । तदयुक्तम् । मन्त्रेण विहितत्वात् । तथा च **याज्ञवल्क्यः**–"पवित्रे स्थ इति
मन्त्रेण द्वे पवित्रे च कारयेत् । नान्तर्गर्भकुशाच्छिन्ने कौशे प्रादेशसंमिते ॥" अत्रैक आहुः—पवित्रेस्थ इति मन्त्र-
लिङ्गस्य पवित्रे करोति कुशैः समावकीर्णाग्रैः कुशैश्छिनत्ति पवित्राभ्यामुत्पुनातीत्यादिवचनानां च पवित्रत्रये वैयर्थ्या-
त्पवित्रत्रये पवित्रद्वयमेव पित्र्येऽपीति । तदयुक्तम् । अथ पवित्राणि स्युरिति श्रुत्यैव प्रदेशान्तरे पवित्रत्रयस्य ज्ञापि-
तत्वात् । **चतुर्विंशतिमतेऽपि** । "द्वे द्वे शलाके देवानां तिस्रस्तिस्रस्तु पार्वणे । एकोद्दिष्टे शलाकैका श्राद्धेष्वर्घेषु
निक्षिपेत् ॥" यत्तु माध्यन्दिनीयानां द्वे द्वे तु पवित्रे पितृकर्मणीति वचनं तन्मन्त्रेण पवित्रद्वयच्छेदनपरं, न त्वर्घे
पवित्रद्वयनिधानपरम् । अतश्च पवित्रेस्थ इति मन्त्रेण द्वे पवित्रे कुशैश्छित्त्वाऽन्यतृतीयेन सहार्घे निधानमिति सिद्धम् ।
तथा च **हेमाद्रिपद्धतौ स्मृतिः**––"पवित्रेस्थ इति छिन्नमगर्भं यत्कुशद्वयम् । कुशत्रयेण प्रादेशमात्रं तत्स्यात्पवि-
त्रकम् ॥" इति । अत्र विशेषो **यज्ञपार्श्वे**–"ओषधीमन्तरे कृत्वा अङ्गुष्ठाङ्गुलिपार्वणे । छिन्द्यात्प्रादेशमात्रं तु
पवित्रं विष्णुदैवतम् ॥" इति । **एकैकस्मिन्नेव तिलानावपति तिलोऽसीति**–तिलानिति गन्धाद्युपलक्षणम् ।
एकैकस्मिन्निति प्रतिपात्रं तिलोऽसीति मन्त्रेण तिलानावपेदित्यर्थः । अत्र यवानामनुपदेशात्तिलप्रक्षेपो दैवपात्रेऽपीति
कर्कोपाध्यायाः । नन्वेकैकस्मिन्नित्यनुवर्तमाने पुनरेकैकस्मिन्ग्रहणं किमर्थम् । उच्यते । तिलोऽसीति मन्त्रो
पितॄन्प्रीणाहीति बहुवचनान्तेन पितृशब्देनैकद्रव्यत्वादनूहितः सकृन्मन्त्रः प्राप्नोतीति तन्माभूदित्येकैकस्मिन्निति पुन-
रुक्तम् । तथाच–"शन्नो देव्या पयः क्षिप्त्वा तिलोऽसीत्यावपेत्तिलान् । आवृत्तिः प्रतिपात्रं स्यान्मन्त्रस्यात्रोह इष्यते ॥"
अतश्च मन्त्रोहोऽपि स्यादिति । निश्चितमेतदित्येवंशब्दार्थः । न च गन्धादिप्रक्षेपोऽपि मन्त्रेणेति वाच्यम्
'गन्धं पुष्पं च तूष्णीं स्यात्' इति वचनात् । अत्र मन्त्रस्य स्वाहान्तत्वात्पित्र्येऽपि स्वाहाप्रयोगः । एवमभि-
न्नदारुपात्राण्युक्त्वा भिन्नप्रतिप्रसवार्थमपि धातुमयपात्राण्याह––**सौवर्णराजतौदुम्बरखड्गमणिमयानां**
पात्राणामन्यतमेषु–मणिमयानि शङ्खशुक्त्यादीनि । एषां मध्ये येषु केषुचिदित्यर्थः । तथा च **ब्रह्मपुराणे**–"सौव-
र्णरौप्यताम्राणां स्फाटिकं शङ्खशुक्तयः । भिन्नान्यपि नियोज्यानि पात्राणि पितृकर्मणि ॥" **हारीतोऽपि**––"काञ्चनेन
तु पात्रेण राजतौदुम्बरेण वा । दत्तमक्षय्यतां याति खड्गेनार्यकृतेन तु ॥" आर्यास्त्रैवर्णिकाः । प्रमाणं चाह **बृहस्पतिः**––
"अष्टाङ्गुलं भवेत्पात्रं पितॄणां राजतं शुभम् । दशाङ्गुलं तु देवानां सौवर्णं ताम्रमेव च" इति । औदुम्बरं
ताम्रमयं संनिधानसामर्थ्यात् । तदुक्तम्–"प्रसिद्धार्थस्य सान्निध्ये योऽप्रसिद्धार्थ उच्यते । तत्संनिधानसामर्थ्यात्तज्जा-
तीयोऽनुगम्यते ॥" इति वार्क्षीयस्य तु यज्ञियत्वेनैव सिद्धत्वात् । अत्र सुवर्णादिभ्यो विकारार्थेऽण्मयटौ । राजतं
तु पित्र्य एव । तथा च **वायुपुराणम्**–"तथाऽर्घपिण्डभोज्येषु पितॄणां राजतं मतम् । अमङ्गल्यं तु यत्नेन देव-
कार्येषु वर्जयेत् ॥" तथा–"शिवनेत्रोद्भवं यस्मादतस्तत्पितृवल्लभम् । अमङ्गल्यं तु यत्नेन देवकार्येषु वर्जितम्"
इति । **यानि वा विद्यन्ते**–वाशब्दः सौवर्णाद्यभावविकल्पे । सौवर्णादिविहिताभावे विहितप्रतिषिद्धानि कांस्याश्म-
मृन्मयादीनीत्यर्थः । तेषां यानि वा विद्यन्ते इति सानुशयमभ्यनुज्ञानात् । विहितप्रतिषिद्धत्वं च तेषां स्मृतिषु
विस्पष्टमुक्तम् । तथा हि **ब्रह्मपुराणे**––"कांस्यभाण्डानि वर्ज्याणि पितृदैवतकर्माणि ॥" इति । **पैठीनसिः**–"लोह-
सीसकांस्यपाषाणहीनपात्राणि च भग्नपात्राणि वर्जयेत्" इति । तथा कांस्यरजतपर्णताम्रपात्राणि भोजनार्थमर्घार्थं चोप-
कल्प्यानि । **बैजवापोऽपि**-"अश्ममृन्मयानि स्युरपि पर्णपुटास्तथा" इति, यानि वा विद्यन्त इति-प्रतिषिद्धेतराणीति वा । एवं
विहितप्रतिषिद्धानि पूर्वपक्षयित्वा सिद्धान्तमाह-**पलाशपत्रपुटेषु वा**-वाशब्दः पूर्वसूत्रोक्तविहितप्रतिषिद्धनिषेधार्थः । तथा
च **वृद्धयाज्ञवल्क्यः**–"मृदश्मनी तथा कांस्यसारकूटादिसंभवम् । त्रपुसीसकलोहानामर्घपात्रं विवर्जयेत् ॥" इति । **धर्म**-
प्रदीपेऽपि-"मृत्पात्रगतमर्घं च मृत्तिकागन्धलेपनम् । घृतधूपं च यो दद्यान्निराशाः पितरो गताः ॥" **कात्यायनोऽपि**–
आसुरेण तु पात्रेण यस्तु दद्यात्तिलोदकम् । पितरस्तस्य नाश्नन्ति दशवर्षाणि पञ्च च" इति । ततश्च विहितप्रतिषि-

द्वेभ्यः पत्रपुटपात्राण्येव श्रेयस्कराणीत्यर्थः । यत्तु **कर्कोपाध्यायै**र्मृन्मयमर्घे गृहीतं तद्धस्तघटितविषयम् । "कुलालचक्रनिष्पन्नमासुरं मृन्मयं स्मृतम् । तदेव हस्तघटितं स्थाल्यादि दैविकं भवेत्" इति वचनात् । **एकैकस्यैकैकेन ददाति सपवित्रेषु हस्तेषु या दिव्या इति**--एकैकस्येति पित्रादिनिर्देश एकैकेनेति च पात्राणाम् । एकैकस्येत्येतावत्युक्ते एकेनैवार्घेण त्रयाणां दानं प्रसज्यते तन्निवृत्त्यर्थमाहैकैकेनेति । अतश्चैकैकस्यैकैकेनेति न तन्त्र इत्यर्थः । तथा च **कात्यायनः**-"अर्घेऽक्षय्योदके चैव पिण्डदानेऽवनेजने । तन्त्रस्य विनिवृत्तिः स्यात्स्वधावाचनिके जपे ॥" एवं च सति त्रयाणामेकद्विजोपवेशन एकस्य वा त्रयोपवेशनेऽर्घपात्राणि त्रीण्येव न द्विजसंख्ययेत्युक्तम् । तथा च **स्मृतिः**-"अर्घस्याप्यर्घहेतुत्वाद्दातुः स्वपितृसंख्यया । पूरयेदर्घपात्राणि न विप्राणां तु संख्यया ॥" अपि च **वैजवापः**-"स्तीर्त्वा पितॄणां त्रीण्येव कुर्यात्पात्राणि धर्मवित् । एकैकस्मिन्वा बहुषु वा ब्राह्मणेषु यथाविधि॥" इति । स्तीर्त्वा पवित्रादिकमिति शेषः । अत्रैतत्संदिह्यते-वैश्वदैविक एकोऽर्घः किं वा द्वाविति । उभयथा वचनदर्शनात् । तथा हि-'यज्ञियवृक्षचमसे सपवित्रकं' इति **शाट्यायनेनै**कमुक्तम् । **याज्ञवल्क्येनापि**-"यवैरन्ववकीर्याथ भाजने सपवित्रके" इत्येकमेव । **मत्स्यपुराणे** तु-"विश्वान् देवान् यवैः पुष्पैरभ्यर्च्यासनपूर्वकम् । पूरयेत्पात्रयुग्मं तु स्थाप्य दर्भपवित्रके॥" इति द्वयमुक्तम् । **प्रचेतसा**ऽपि-"एकैकस्य तु विप्रस्य अर्घं पात्रे विनिक्षिपेत् । यवोऽसीति यवान् कीर्त्वा गन्धपुष्पैः सुपूजितम्" इति द्वयमेव । अत्रैके **कर्कादय** आहुः—एकदेवताकत्वादेकमेव पात्रं दैवमिति । अन्ये तु मातामहश्राद्धे वैश्वदेवस्य पृथक्पात्रद्वयमिति । तदेतद्विचारणीयं किमत्र विकल्पः किं वा व्यवस्थेति ? । तत्र व्यवस्थेति ब्रूमः । तथा हि-वैश्वदेवश्राद्धे पक्षद्वयमुक्तम् । तन्त्रपक्षो भेदपक्षश्चेति । तत्र यदि भिन्नपक्ष एकमित्युच्यते तदा मत्स्यपुराणवचनमनर्थकं स्यात् । अथ तन्त्रपक्ष एकमिति तदोभयवचनसार्थक्यं स्यात् । ततश्च तन्त्रपक्ष एकं भिन्नपक्षे द्वयमिति व्यवस्थापनेन निबन्धकर्तॄणामविरोध इति सिद्धम् । सपवित्रेष्विति अर्घपवित्राण्येवोच्यन्ते । हस्तपवित्राणां तु 'पवित्रपाणयः सर्वे' इति स्मृत्यैव प्राप्तत्वात् । **असावेष तेऽर्घः**--असाविति संबुद्ध्यन्तनामाद्युपलक्षणम् । एष तेऽर्घ इति प्रयोगं दर्शयता स्वधानिषेधो दर्शितः । एतच्चोक्तमासनदाने । ततश्च यथाविहितसव्यादिना वामहस्ते अर्घं धृत्वा पवित्रे प्रागग्रे देवद्विजकरे दत्त्वा पादप्रभृति मूर्धान्तं प्रदक्षिणं पूजां कृत्वा **यादिव्या** इति मन्त्रेण पुरूरवार्द्रवसनामानो विश्वेदेवा एष वोऽर्घो न मम इत्यर्घं दत्त्वा, एवं पित्र्येऽपि दक्षिणाग्रपवित्राणि द्विजकरे दत्त्वा शिरःप्रभृतिपादान्तमप्रदक्षिणं पूजयित्वा **या दिव्या** इति मन्त्रेणार्घं पितृतीर्थेन संबन्धनामादिभिः पितरं संबोध्य दक्षिणहस्तेनैष ते अर्घोऽस्त्विति अर्घं दद्यादित्यर्थः । तथा च **प्रचेताः**--"दत्त्वा हस्ते पवित्रं तु कृत्वा पूजां च पादतः । पादप्रभृति मूर्धान्तं देवानां पुष्पपूजनम् ॥ या दिव्या इति मन्त्रेण हस्तेष्वर्घं विनिक्षिपेत् । ततो वामेन हस्तेन गृहीत्वा चमसान् क्रमात् ॥ शिरःप्रभृति पादान्तं नमो व इति पैतृके । पितृतीर्थेन तत्तोयं दद्याद्दक्षिणपाणिना॥" इति । अत्रैके एकद्रव्यत्वादर्घदानकर्मावृत्तौ सकृन्मन्त्रमिच्छन्ति । तत्**कर्कोपाध्यायै**र्निराकृतमिति उपेक्षणीयम् । **प्रथमे पात्रे संस्रवान्समवनीय पितृभ्यः स्थानमसीति न्युब्जं पात्रं निदधाति**-प्रथमं पात्रं पितृपात्रं त्रिदैवतम् । तथा च **स्मृतिः**-"प्रथमे पितृपात्रे तु सर्वान्संभृत्य संस्रवान् । पितृभ्यः स्थानमित्युक्त्वा कुर्याद् भूम्यामधोमुखम्॥" दवपात्रमिति केचित् । तन्न, पितृपात्र इति शेषात् । **कात्यायनो**ऽपि-"पितृपात्रं तदुत्तानं कृत्वा विप्रान्विसर्जयेत् ।" इति । "संस्रवः पात्रसंलग्नाः अवशिष्टोदकादयः ।". तथा च **श्रुतिः**-" स॑ँस्रवो ह्येषः खलु परिशिष्टो भवतीति ।" बहुत्वं कुशतिलाद्यपेक्षम् । अत्रैके देवपात्रं पितृभ्यः स्थानमसीति उत्तानं निधाय पितृपात्रं न्युब्जं विधेयमित्याहुः । अन्ये तु पितृपात्रमेवेति । तदेतद्विचारणीयम् । किं प्रतिश्राद्धं पात्रन्युब्जीकरणमुत पितृश्राद्ध एव इति । तत्र यदि प्रतिश्राद्धं तदा द्वादशदैवत्ये पात्रपञ्चकं मन्त्रविरोधश्च स्यात् । अत्र मन्त्रोहेनाविरोध इति तर्हि पितृपात्रविधानमनर्थकं स्यात् । यत्तु-"प्रथमं पैतृकं पात्रं तस्मिन् पैतामहं न्यसेत् । प्रपितामहं ततो न्यस्य नोद्धरेन्न विचालयेत् ॥" इति यमवचने पात्रत्रयस्यैवैकीकरणं तन्मातामहश्राद्धाभावपक्षविषयम् । दृश्यते च शाखाभेदे तच्छ्राद्धम् । तथा च **विष्णुपुराणम्**-"प्राङ्मुखान् भोजयेद्विप्रान् देवानामुभयात्मकान् । पितृमातामहानां च भोजयेच्चेदुदङ्मुखान् ॥ पृथक्तयोः केचिदाहुः श्राद्धस्य करणं नृप । एकत्रैकेन पाकेन वदन्त्यन्ये महर्षयः॥" इति । तदेतच्छाखाभेदेन व्यवस्थितम् । तस्मात्पितृश्राद्ध एव सर्वसंस्रवशब्दस्यासंकुचितवृत्तित्वेन सर्वसंस्रववाचकत्वात्पितृभ्यः स्थानमसीति लिङ्गादस्य पितृविषयत्वाच्च

पितृपात्रमेकमेव न्युब्जमिति सिद्धम् । ततश्च पितृपात्रे देवादिसर्वपात्राणां संस्रवान्निक्षिप्य पितृद्विजवामपार्श्वे पवित्रोपर्यधोमुखं निदध्यादित्यर्थः । तथा च **वृद्धयाज्ञवल्क्यः**—"सपवित्रं पितुः पात्रं दक्षिणाधोमुखं न्यसेत् ।" **कात्यायनोऽपि**--"कुशवत्यां भूमावधोमुखं कुर्यात्तस्योपरि च कुशान्" इति । **शौनकोऽपि**—"नोद्धरेत्प्रथमं पात्रं पितॄणां यच्च पातितम् । आवृतास्तत्र तिष्ठन्ति पितरः शौनकोऽब्रवीत् ॥" इति । "उद्धरेद्यदि तत्पात्रं ब्राह्मणो ज्ञानदुर्बलः । अभोज्यं तद्भवेच्छ्राद्धं क्रुद्धे पितृगणे गते" इति । **मत्स्यपुराणे**—"पितृपात्रं निधायार्थं न्युब्जमुत्तरतो न्यसेत् ॥" अत्रोत्तर इत्युत्तरस्यां दिशि इति **कल्पतरुः** । तन्न, उत्तरशब्दस्य वामवाचकत्वात् । तथा च लिङ्गम्—'उत्तरत आयतना हि स्त्रीति'। अपि च **कात्यायनः**—"कुर्यान्न्युब्जं तिलैर्युक्तं दक्षिणाग्रमतः परम् । पितृपात्रं निदध्यात्तु देवपित्रोश्च मध्यतः ॥" इति । अत्राहोशनाः—"तद्गन्धादिभिः पूजयेत्" इति तन्न्युब्जपात्रम् । **वैजवापोऽपि**—"तस्योपरि कुशान् दत्त्वा" इति । **अत्र गन्धपुष्पधूपदीपवाससां च दानम्**—अत्रेति कोऽर्थः । तत्रार्थान्तरासंभवादवसरार्थ :इति **कर्कादयः**, तत्कथं संगतम् । अवसरस्य पाठादेव लब्धेः । तस्मादत्रेति पात्रेष्वित्यन्ये । तदपि **कर्कादिभिरनादृतम्** । अर्घानन्तरं विप्रपूजनस्य विहितत्वात् । तथा च **वृद्धयाज्ञवल्क्यः**—" दत्त्वार्घं पूजयेच्छक्त्या गन्धधूपानुलेपनैः ।" **मात्स्येऽपि**—" या दिव्येत्यर्घमुत्सृज्य दद्याद्गन्धादिकं ततः ।" इति । तस्मादत्रेति काण्डानुसमयमर्घे संसूच्य गन्धादिदाने पदार्थानुसमयं द्योतयति । ततश्चात्र गन्धादिदानं दैवपूर्वं भवतीत्यर्थः । तथा च **वैजवापः**—" तस्योपरि कुशान्दत्त्वा प्रदद्याद्दैवपूर्वकम् । गन्धं पुष्पं च धूपं च दीपं वस्त्रोपवीतकम् ॥" इति । गन्धश्चन्दनादिः । तथा च—" चन्दनागरुकर्पूरपद्मकं कुङ्कुमं तथा । कस्तूरिकादयो गन्धाः पितॄणां तुष्टिकारकाः ॥" पुष्पाणि मल्लिकादीनि । तथा च **स्मृतिचन्द्रिका**—" मल्लिका मालती श्वेतयूथिका चम्पकं शुभम् । पिण्डीतकं कुङ्कुमं च पद्मानि जलजान्यपि ॥ उत्पलादीनि देयानि वर्णगन्धयुतानि च ।" मल्लिका विचकिलः । पिण्डीतको मरुबकः । **मार्कण्डेयः**—" जात्यश्च सर्वा दातव्या मल्लिका श्वेतयूथिका । जलोद्भवानि सर्वाणि कुसुमानि च चम्पकम् ॥" इति । **ब्रह्माण्डेऽपि**—" शुक्लाः सुमनसः श्रेष्ठास्तथा पद्मोत्पलानि च । गन्धरूपोपपन्नानि यानि चान्यानि कृत्स्नशः ॥" जातीविषये विरोधः । " जात्यश्च सर्वा दातव्याः" इति । तथा च—"श्राद्धे जात्यः प्रशस्ताः स्युर्मल्लिका श्वेतयूथिका । तगरं मातुलुङ्गं च पितॄणां दत्तमक्षयम् ॥" **क्रतुस्तु** निषेधति--"असुराणां कुले जाता जाती पूर्वपरिग्रहे । तस्या दर्शनमात्रेण निराशाः पितरो गताः ॥" **अङ्गिरा** अपि--"न जातीकुसुमानि न कदलीपत्रम्" इति । अत्रैके विकल्प इत्याहुः--विप्रपूजादौ विधिः पिण्डदाने निषेधः, पीतजातीविषयो वा निषेधः इति व्यवस्थेत्यस्मन्मतिः । तथा च **वृद्धयाज्ञवल्क्यः**—" कुन्दं शम्भोस्तु नो दद्यान्नोन्मत्तं गरुडध्वजे । पिण्डे जातिं च नो दद्याद्देवीं चार्केण नो यजयेत् । जातपुष्पं तथाऽर्कं वा किंशुकं करवीरकम् । पितृमूर्धनि यो दद्यात्स एव पितृघातकः॥" इति । वर्ज्यान्याह **मात्स्यः**--"पद्मबिल्वकधत्तूरपारिभद्राटरूषकाः । न देयाः पितृकार्येषु" इति पारिभद्रो मन्दारः । अटरूषो वासकः । **शङ्खोऽपि**--"उग्रगन्धीन्यगन्धीनि चैत्यवृक्षोद्भवानि च । पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि च॥" इति । रक्तवर्णानि जलोद्भवव्यतिरिक्तानि । "जलोद्भवानि देयानि रक्तान्यपि विशेषतः" । इति तेनैवोक्तत्वात् । **विष्णुः**--"वर्जयेदुग्रगन्धीन्यगन्धीनि कण्टकिजातानि रक्तानि पुष्पाणि सितानि सुगन्धीनि कण्टकिजान्यपि दद्यादिति ।" "जवादिकुसुमं झिण्टी रूपकाः सकुरुण्टकाः । पुष्पाणि वर्जनीयानि श्राद्धकर्मणि नित्यशः ॥" जव इन्द्रपुष्पम् । आदिशब्दाच्छलाल्यादिरक्तानि । रूपिकार्कवर्णः । कुरुण्टिका पीताम्लानः । **स्मृतिमञ्जूषायाम्**--" शिरीषबिल्वधत्तूरकाञ्चनाराटरूषकम् । कर्कं च पारिभद्रं च पीतां जातिं च वर्जयेत् ॥" धूपो गुग्गुलादिः । तथा च **विष्णुधर्मोत्तरे**--" धूपो गुग्गुलको देयस्तथा चन्दनसारजः । अगरुश्च सकर्पूरस्तुरुष्कस्त्वक् तथैव च ॥" तुरुष्कः सिह्लकः । त्वग्लवङ्गम् । **मरीचिः**—" चन्दनागुरुणी चोभे तमालोशीरपद्मकम् । घृताक्तं मधुनाक्तं च गुग्गुलं धूपमेव च ॥" तथा—"तुरुष्कं गुग्गुलं चैव घृताक्तं युगपद्दहेत् । घृतं न केवलं दद्याद्दुष्टं वा तृणगुग्गुलुम् ॥" तृणगुग्गुलुः सर्जरसः । **धर्मप्रदीपेऽपि**-"घृतधूपं च यो दद्यान्निराशाः पितरो गताः॥"**कात्यायनः**-"श्राद्धे धूपं प्रयत्नेन दशाङ्गं मधुमिश्रितम् । दद्यादगुरुजं वापि पद्मकं देवदारुजम्" इति । वर्ज्यान्याह **विष्णुः**--"जीवजं च सर्वत्र धूपार्थं इति ।" जीवजं कस्तूर्यादि । दीपो घृतादिद्रव्येण । तथा च **मरीचिः**--" घृताद्वा तिलतैलाद्वा नान्यद्रव्यात्तु दीपकम् ।" नान्यद्रव्येति वसादिद्रव्यनिषेधो न कुसुम्भादितैलानाम् । "घृतेन दीपे

दातव्यस्त्वथवाऽप्योषधीरसैः । वसामेदोद्भवं दीपं प्रयत्नेन विवर्जयेत्" इति वचनात् । वासः कार्पासादि । तथा च--"कौशेयं क्षौमकार्पासं दुकूलमहतं तथा । श्राद्धेष्वेतानि यो दद्यात्कामानाप्नोति पुष्कलान्" इति । चकारो यज्ञोपवीततुलस्यादिपत्रसमुच्चयार्थः । तथा च--"चम्पकं शतपत्रं च भृङ्गराजं च वालकम् । तुलसी मालती पद्मं पितॄणां तुष्टिकारकम् ॥" तुलसी निषिद्धेति **स्मृत्यर्थसारः** । तत्रार्घादौ निषेधः पिण्डार्चायां विधिरित्यविरोधः इति कश्चित् । प्रेतश्राद्धशाकविषयो निषेध इत्यन्यः । 'दीपवस्त्रोपवीतकम्' इत्युक्तम् । वस्त्रालाभे यज्ञोपवीतकमिति **खादिरम्** । **वृद्धयाज्ञवल्क्योऽपि**–"तुलसीं भृङ्गराजं च अपामार्गं शमीं तथा । पितृमूर्धनि यो दद्यात्स याति परमां गतिम्" इति । अन्यत्स्मृत्यन्तरेभ्यो द्रष्टव्यम् । अत्रैतत्संदिह्यते—किं गन्धादिदानं तन्त्रेणोत प्रतिपुरुषमिति । उभयथा वचनदर्शनात् । तथा हि **शाट्यायनः**–"एष ते गन्ध एतत्ते पुष्पमेष ते धूप एतत्ते आच्छादनम् ।" **विष्णुरपि**–"नमो विश्वेभ्यो देवेभ्यः इत्येवमादौ प्राङ्मुखयोर्निवेद्य पित्रे पितामहाय प्रपितामहाय नामगोत्रेभ्य उदङ्मुखेभ्य इति ।" **ब्रह्मपुराणे**—"इदं वः पुष्पमित्युक्त्वा पुष्पाणि च निवेदयेत् । अयं वो धूप इत्युक्त्वा तदग्रे तु दहेत्ततः ॥ अयं वो दीप इत्युक्त्वा हृद्यं दीपं निवेदयेत् । अनङ्गलग्नं यद्वस्त्रं विभवे सति तद्युगम् ॥" **शङ्खोऽपि**—"इदं वो ज्योतिरित्युक्त्वा दीपं तेषां प्रदर्शयेत् । नो ज्योतिरस्ति ते सर्वे वक्तव्यं तदनन्तरम् ॥" इति । अत्र गन्धपुष्पेत्यादिसूत्रम् । अर्घेऽक्षय्योदक इति **कात्यायनेना**र्घादिव्यतिरिक्तगन्धादौ तन्त्रमेवोक्तम् । एवं वचनविप्रतिपत्तौ ह्येक आहुः । सूत्रोक्तत्वादयं वो धूप इति वःशब्दनिर्देशाच्च गन्धादौ तन्त्रप्रतीतेरस्मात्पितृपितामहप्रपितामहाः अमुकशर्माणः एतेषां गन्धादीनां तृतीयस्तृतीयोंऽशस्तेभ्यः स्वधेति इति प्रयोगः। अन्येतु पित्रादीनामग्नीषोमादिवन्मिलितानां देवतात्वात् गन्धादीनां च प्रत्येकं दानस्य विधानान्नेदं युक्तम् । तस्मादस्मात्पितरमुकशर्मन्नस्मत्पितामहामुकशर्मन्नस्मत्प्रपितामहामुकशर्मन्नित्येवं गोत्राद्युच्चार्य एष वो गन्धः स्वधेति वाक्यं सूचितमित्यन्ये। तदेतद्विचारणीयम् यद्यग्नीषोमवन्मिलितदेवतात्वाभावात्पार्थक्येन सर्वत्र दानमित्युच्येत तदार्घादिव्यतिरिक्तपदार्थेषु विहितस्य तन्त्रस्य गोत्राणामासने प्रोक्तमित्यादिवाक्यानां च वैयर्थ्यं स्यात् । अथासनादिदानेषु तन्त्रस्य विहितत्वात् गन्धादिदानेऽपि तन्त्रमित्युच्येत तर्हि शाट्यायनाद्युक्तपदार्थे तस्य गोत्राणामासने प्रोक्तमित्यादिवाक्यानां च वैयर्थ्यमित्युभयथाऽपि संदेह आपद्यते । तस्माद्यत्र न्यायसूत्रविधानं तत्र तन्त्रं यत्र पार्थक्यं तत्र तथैवेत्युभयविध्योः सिद्धिरिति । गन्धादिषूभयाविधानस्य दृश्यमानत्वादुभयविधं वाक्यं कर्तव्यं गन्धादिव्यतिरिक्तेषु तन्त्रमिति युक्तम् । अतश्चास्मत्पितरमुकशर्मन्नस्मत्पितामहामुकशर्मन्नस्मत्प्रपितामहामुकशर्मन्नित्याद्युच्चारणेन पृथगुदिश्य वाक्यान्ते एष वो गन्धः स्वधेत्युभयाविधं वाक्यं युक्तमित्याभाति । गन्धादयश्च पृथक्पृथक् देया इत्याह **कात्यायनः** । "गन्धान्ब्राह्मणसात्कृत्वा पुष्पाण्यृतुभवानि च । धूपं चैवानुपूर्व्येण अग्नौ कुर्यादतः परम् ॥" 'इदं वः पुष्पमित्युक्त्वा' इत्यादि **ब्रह्मपुराण**वचनं दर्शितम् । एवं गन्धादि दत्त्वाऽऽचम्य संपूर्णपृच्छां कृत्वा संस्रवोदकेन पुत्रादिकामो मुखं प्रमार्ष्टि । तथा च **कात्यायनः**--"श्राद्धारम्भावसाने च पादशौचे तथाऽर्चने । विकिरे पिण्डदाने च षट्सु चाचमनं स्मृतम् ॥" **कात्यायनः**–"संस्रवान्समवनीय पुत्रकामो मुखमनक्ति" इति ॥ २ ॥ * ॥

उद्धृत्य घृताक्तमन्नं पृच्छत्यग्नौ करिष्य इति–घृतग्रहणं शाकादिव्यञ्जननिवृत्त्यर्थम् । तथा च हविष्यं व्यञ्जनक्षाररहितं ह्यपसव्यवदिति । घृताक्तमन्नमुद्धृत्येत्यन्वयोऽभिघारणं रन्धनपात्र एव स्यात् । अभिघार्य दक्षिणत उद्वास्येति पिण्डपितृयज्ञसूत्रादिति केचित् । तन्न, तस्यापसव्यादिविधिना साग्नेश्चरुश्रपणविषयत्वात् । अतश्चोद्धृत्य घृताक्तं कृत्वाऽन्नं पङ्क्तिमूर्धन्यमग्नौकरिष्य इति पृच्छेदित्यन्वयः । पृच्छेर्द्विकर्मकत्वात् । एवं च पात्रान्तरेऽभिघारणं सूचितम् । तथा च **कात्यायनः**--"अग्नौकरणस्याग्नेयैं मधुसूक्तं जपेत्ततः। शेषमाज्येनाभिघार्य भाजनानि विशोधयेत्" इति । ननु च–"दत्त्वा पात्राणि विप्रेभ्यो जपेदोदनभाजने । **आप्यायस्व समे तुत** इति पात्रे सुपाचिते ॥ क्षिपेदन्नं तु सघृतं ततोऽग्नौकरणं भवेत्" इति पुराणवचनात्कथं **मधुसूक्त**मिति उच्यते । **आप्यायस्वे**ति मन्त्रस्य रन्धनपात्रजपविषयत्वात् । ततश्च रन्धनपात्रे **आप्यायस्वे**ति जपित्वा पात्रान्तरे उद्धृत्य घृतेनाभिघार्योद्धरणपात्रे **मधुसूक्तं** जपेदित्यर्थः । अत्रैक अपसव्येनाग्नौकरिष्य इति पृच्छेदित्याहुः । तन्न,–"सव्येनैव तु पृष्ट्वा तमपसव्येन होमयेत् । पितृपङ्क्तिषु मूर्धन्यस्तस्य पाणावनग्निमान्" इति **पैठीनसि**वचनात् । अत्रैतत्संदिह्यते । किं श्राद्धार्थं पृथक्पाक उतैक एव । तत्रैके कर्कादय आहुः । देवपितृमनुष्यादीनां सर्वार्थं एक एवेति । अन्ये तु

पृथगिति । तदेतद्विचारणयिम् । तत्र यद्येक एवेत्युच्येत तदा सर्वसामान्येन श्राद्धपाकस्य वैशिष्ट्यानुपपत्तिः परिश्रितादियत्नविधायकवचनानां च वैयर्थ्यं स्यात् । अथ पृथगुच्येत तदा वैशिष्ट्यं प्रच्छन्नादिपरिश्रितादियत्नविधायकवचनसार्थक्यं स्यात् । तस्मात्पृथक् पाक इति युक्तम् । तथा च **वायुपुराणम्**—"पितॄणां निर्वपेद्भूमौ कूर्चे वा दर्भसंस्कृते ।" **व्यासो**ऽपि–"चाण्डालश्वपचौ वर्ज्यौ निर्वापे समुपस्थिते ।" **लौगाक्षिर**पि–"पित्रर्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च । वैश्वदेवं न पित्रर्थं न दर्शं वैश्वदेविकम् ॥" **देवलो**ऽपि–"तथैव यन्त्रितो दाता स्नात्वा प्रातः सहाम्बरः । आरभेत नवैर्भाण्डैरन्वारब्धस्तु बान्धवैः ॥ तिलांश्च विकिरेत्तत्र सर्वतो बन्धयेदजान् । असुरोपहतं सर्वं तिलैः शुध्यत्यजेन च ॥ ततोऽन्नं बहुसंस्कारं नैकव्यञ्जनभक्ष्यवत् । चोष्यपेयसमृद्धं च यथाशक्त्युपकल्पयेत् ॥" इति । **मार्कण्डेयो**ऽपि–"पृथक्पाकेन नेत्यन्ये केचिदिच्छन्ति पूर्ववत् ।" नित्यश्राद्धं पृथक्पाकेन केचिदिच्छन्ति । केचिच्छ्राद्धपाकादेवेत्यर्थः । अपि च मातामहपृथक्श्राद्धपक्षे **पैठीनसिः**—"विधिहीने यतः श्राद्धे नाश्नन्ति पितृदेवताः । पृथक्पाकेनैव तस्माच्छ्राद्धं मातामहं भवेत् ॥" इति । तस्मात्पृथक्पाक एव । **कुरुष्वेत्यनुज्ञातः पिण्डपितृयज्ञवद्धुत्वा**–"द्विजैः कुरुष्वेत्यनुज्ञातः पिण्डपितृयज्ञवद्धोमं कुर्यादित्यर्थः । अत्र पिण्डपितृयज्ञवदुपचारः पित्र्ये" इति परिभाषितेऽपि "पिण्डपितृयज्ञवत्" इति पुनर्वचनं परिसंख्यानार्थम् । तेन साग्नेर्यथा पिण्डपितृयज्ञे परिस्तरणपात्रासादनादिकर्मकलापस्तथा श्राद्धे न भवति किं तु अपसव्यादिना पर्युक्ष्य मेक्षणेनाहुतिद्वयमात्रमाहिताग्नेर्दक्षिणाग्नौ स्मार्ताग्नेरौपासने यथोपदेशं भवतीत्यर्थः । अत्रैके विवदन्ते–"अग्नौकरणहोमश्च कर्तव्यमुपवीतिना । प्राङ्मुखेनैव देवेभ्यो जुहोतीति श्रुतिः श्रुतौ ॥ अपसव्येन वा कार्यो दक्षिणाभिमुखेन च । निरुप्य हविरन्यस्मा अन्यस्मै नहि हूयते ॥" इति **कात्यायन**वचनात्सव्येन जुहुयादग्नावग्नौकरण आहुती इति **वृद्धयाज्ञवल्क्योक्ते**श्चोभयथा वचनदर्शनात् साग्निः सव्येन निरग्निरपसव्येनेति । तदयुक्तम् । स जघनेन गार्हपत्यं प्राचीनावीती भूत्वेति श्रुत्या "पिण्डपितृयज्ञवत्" इति **सूत्रकृता** च साग्निनिरग्न्योरपसव्येनैव विहितत्वात् । अन्ये त्वाहुः—उपवीतित्वविधायकवचनस्य पूर्वपक्षरूपत्वादपसव्येनेति वचनस्य च सिद्धान्तरूपत्वादपसव्येनैव सर्वेषामिति । एतदप्यहृद्यम् । "अथातो गोभिलोक्तानामन्येषां चैव कर्मणाम्" इति **कात्यायनेन** प्रतिज्ञातत्वात्सामगानां सव्येन, यजुषामपसव्येनेति यथासंख्यं व्यवस्थेति सिद्धम् । तथा च **कात्यायनः**—"स्वाहा स्वधा नमः सव्यमपसव्यं तथैव च । आहुतीनां यथा संख्या साऽवगम्या स्वसूत्रतः ॥" **वृद्धयाज्ञवल्क्यः**–"छन्दोगा जुहुयुः सव्येनापसव्येन याजुषा" इति । अत्रैतत्संदिह्यते किं साग्निरग्नौ किं वा हस्तेऽग्नौकरणं कुर्यादिति-उभयविधवाक्यदृष्टेः । तथा **मार्कण्डेयः** । "आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः । औपसदेऽनाहिताग्निरग्न्यभावे द्विजेऽप्सु च ॥" । अत्रतुशब्दद्वयं सर्वाधानार्धाधानपक्षौ सूचयति । तेनाहिताग्निः सर्वाधाने दक्षिणाग्नावेवार्धाधाने त्वौपासन एव जुहुयादित्यर्थः । औपासने गृह्याग्नौ अग्न्यभावो वक्ष्यमाणः । तथा–"हस्तेऽग्नौकरणं कुर्यादग्नौ वा साग्निको द्विजः ।" इति । अत्रैके **माधवस्मृतिचन्द्रिकाकारादयो** अेग्नरसंनिधानाद्यभावे हस्ते लौकिकाग्नौ वाऽग्नौकरणं साग्निकः कुर्यादित्याहुः । तथा चोदाहरन्ति–"आहृत्य दक्षिणाग्निं तु होमार्थं वै प्रयत्नतः । अग्न्यर्थं लौकिकं वाऽपि जुहुयात्कर्मसिद्धये ॥" अग्न्यर्थं सोमपासनाग्निकार्यर्थं लौकिकाग्निमाहृत्य तत्र होमः । अन्ये तु **कल्पतरुकारादयो** लौकिकमावसथ्याग्निमाहुः । तदेतद्विचारणीयम् । यद्यग्नेरसंनिधानाद्यभावे साग्नेर्लौकिकाग्निस्वीकरणं स्यात्तदा–"न पैतृयज्ञियो होमो लौकिकेऽग्नौ विधीयते" इति **मनुवचनमनर्थकम्**, अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेदिति नियमभङ्गश्च स्यात् । यथाऽग्नौकरणमिति यौगिकत्वाद्धस्तजलादिभ्यो लौकिकाग्नौ विशिष्टत्वाच्च साग्नेर्लौकिकाग्नावेवेति । तदा प्रासङ्गिकतीर्थादावपि श्राद्धप्रसक्तौ लौकिकाग्नावग्नौकरणमातिप्रसज्येत । किं च—लौकिकेऽग्नौ सुसंपादत्वादग्न्यभाव एव न संभवतीत्यग्न्यभावे तु विप्रस्येत्यसंगतं स्यात् । तस्मात् लौकिक आवसथ्याग्निरिति युक्तम् । ततश्च "हस्तेऽग्नौकरणं कुर्यादग्नौ वा साग्निको द्विजः" इत्यत्र वाशब्दो व्यवस्थितविकल्पे । तेन विद्यमाने श्रौते स्मार्ते वाऽग्नावग्नौ होमस्तदसंनिधाने हस्ते, न लौकिक इत्यर्थः । अग्न्यभावश्च पञ्चविधः । प्रागभावः, प्रध्वंसाभावः, संनिहिताभावोऽधिकाराभावोऽत्यन्ताभावश्चेति । तत्र विवाहात्पूर्वं प्रागभावः । तदूर्ध्वमाहितस्याग्नेः प्रमादादिना नाशे सति पुनराधानात्पूर्वं प्रध्वंसाभावः । देशभ्रंशादनवकाशेऽरणिसमारोपणादौ कृते संनिधानाभावः । अशुद्धद्रव्यादिस्पृष्टेऽग्नौ प्रायश्चित्तं विनाऽधिकाराभावः । नैष्ठिकब्रह्मचर्ये स्त्र्यभावेनात्यन्ताभाव इति । यत्त्वग्न्यभावः स्मृतस्तावद्यावद्भार्यां न विन्दन्तीत्यभाव उक्तः सोऽयमप्येकोऽभावः पृथग्दर्शनार्थं न त्वयमेवाभाव इति । तत्राग्नेः प्रागभावेऽत्यन्ताभावे चाग्न्यभावादग्नौ होमाभावः । प्रध्वंसाभावाधिकारानियमार्थं, पूर्वोक्तपञ्चविधाभावोपपत्तेः ।

भावयोश्चावश्यकविधौ सांकल्पिकमेव श्राद्धं नाग्नौकरणम् । अरणिसमारोपणादौ संनिध्यभावे त्वावश्यकश्राद्धे साग्नेरपि द्विजहस्त एवाग्नौकरणमिति । तथा च **व्यासः**—"त्यक्ताग्नेः पार्वणं नास्ति नैकोद्दिष्टं सपिण्डनम् । अत्यक्ताग्नेस्तु न पिण्डोक्तिस्तस्मात्संकल्प्य भोजयेत्॥" आलस्येन नास्तिक्यादिना वा योऽग्निं त्यजति तस्यैकोद्दिष्टपार्वणसपिण्डीकरणादिसर्वश्राद्धेष्वनधिकारोऽतः संकल्प्य भोजयेत् । तद्व्यतिरिक्तस्यात्यक्ताग्नेरग्न्यसंनिधानेऽपि साङ्गपिण्डश्राद्धेऽधिकार इत्यर्थः । ततश्च हस्तेऽग्नौकरणमिति संकल्पयेत् । "संकल्पं च यदा कुर्यात् न कुर्यात्पात्रपूरणम् । नावाहनाग्नौकरणं पिण्डांश्चैव न दापयेत् ॥ संकल्प्य तु यदा श्राद्धं न कुर्यात्पात्रपूरणम् । विकिरश्च न दातव्यामिति स्पष्टमिहोदितम् ॥" इति । अतो लौकिकेऽग्नौ इति सिद्धम् । अथवा विधुरादीनामग्नौकरणमिध्माधानाज्यभागपूर्वकं विहितं, तस्य च हस्तेऽनुपयुक्तत्वात्तद्विषयं लौकिकाग्निस्वीकरणम् । यदुक्तं—'हस्तेऽग्नौकरणमिति तत्किं देवद्विजकरे, किं वा पित्र्यकरे' इति । उभयथाऽपि नानावचनदर्शनात् । तथाहि **यमः**—"नाग्नौकरणवत्तत्र होमे दैवकरो भवेत् । पर्यस्तदेवनाद्दर्भानास्तीर्थ यतो ह्यग्निसमो द्विजः" इति । **कात्यायनोऽपि**—"मातामहस्य भेदेऽपि कुर्यात्तन्त्रस्य साग्निकः । भेदे पृथग्वैश्वदेवश्राद्धे तत्र च साग्निकः ॥" मातामहस्यापि मातामहद्विजकरेऽपि अग्नौकरणं कुर्यादिति पित्र्यकरेऽप्यर्थादुक्तम् । तथा—"अनग्निकस्य विप्रस्य हस्तेऽग्नौकरणं भवेत् । देवे पूर्वं हि तत्कुर्यात्पितृभ्यस्तदनन्तरम् ॥" अन्यदपि—"अनग्निकस्तु यो विप्रः श्राद्धं कुर्वीत पार्वणम् । दैवपाणौ हि हुत्वादौ शेषं दद्यात्तु पैतृके॥"**यमोऽपि**—"देवविप्रकरेऽनग्निः कृत्वाऽग्नौकरणं द्विजः ।" इति । एवं वचनविप्रतिपत्तौ ह्येक आहुः—दैवपित्र्यकरयोर्विकल्प इति । साग्निः पितृकरे निरग्निर्देवकर इति । तदुभयमप्यविचारितरमणीयम् । तत्र साग्नेरग्न्यसंनिधानादौ हस्तेऽग्नौकरणं स्यादनुकल्पविधित्वेन पित्र्यद्विजहस्त एव विहितत्वात् । द्वितीये तु श्राद्धविशेषेष्वेव हस्तेऽग्नौकरणस्य व्यवस्थितत्वादसार्वत्रिकत्वात् । किंच—पिण्डपितृयज्ञवदित्यतिदेशेन प्राचीनावीतादिधर्मप्राप्तौ दैवद्विजकरे तद्धर्मानुपपत्तेः । तस्मात्साग्नीनामग्न्यसंनिधानादौ काम्यादिचतुःश्राद्धेषु पित्र्यद्विजहस्ते, इतरत्राग्नाविति सिद्धम् । तथा च **गृह्यकारः**—"आन्वष्टक्यं च पूर्वेद्युर्मासिमास्यथ पार्वणम् । काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टकम् ॥ चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो विधीयते । पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि" इति । आन्वष्टक्यं नवमीश्राद्धम् । पूर्वेद्युः सप्तमीश्राद्धम् । मासि मासि कृष्णपक्षश्राद्धं पार्वणममायाम् । काम्यं कृत्तिकादिनक्षत्रवारादौ । अभ्युदयो वृद्धिश्राद्धम् । अष्टम्यामष्टकाश्राद्धम् । एकोद्दिष्टं लक्षणया सपिण्डीकरणश्राद्धम् । तथा चायमर्थः—आहिताग्नेः सर्वाधानपक्षे दक्षिणाग्नौ, अर्धाधान औपासने स्मार्ताग्नेः सत्यग्नौ तत्रैव । उभयोरप्यग्न्यसंनिधाने चाऽऽवश्यकश्राद्धे संनिहितेऽप्यग्नौ काम्यादिचतुर्षु श्राद्धेषु च पित्र्यद्विजहस्त एव । निरग्नीनां वाजसनेयिप्रभृतीनां पिण्डयज्ञादावपसव्यादिना पित्र्यद्विजहस्त एव । साग्निसामगादीनामग्न्यसंनिधौ सव्यादिना दैवपित्र्यकरयोर्विकल्पः । निरग्नीनां तेषां सव्यादिना दैवद्विजकर एवेति सिद्धम् । यत्तु "पित्र्ये यः पङ्क्तिमूर्धन्यस्तस्य पाणावनग्निमान्" इति **कात्यायनवचनं** तस्य सामगपरतयाऽयमर्थः—पित्र्ये देवपितृमातामहश्राद्धे यः पङ्क्तिमूर्धन्यः प्रथमोपवेशितो दैविकद्विज इत्यर्थः । अन्यशाखिविषये तु **पैठीनसिः**—"पितृपङ्क्तिषु मूर्धन्यस्तस्य पाणावनग्निमान्" इति प्राक्प्रदर्शितमिति सर्वमनवद्यम् । ननु चाग्नौकरणं किं प्रतिश्राद्धं किं वैकपङ्क्ताविति । तथा ह्युक्तम्—"दैवपूर्वं हि तत्कुर्यात्पितृभ्यस्तदनन्तरम् ।" **कात्यायनोऽपि**—"मातामहस्य भेदेऽपि कुर्यात्तन्त्रेण साग्निकः" इति । अस्यार्थः पूर्वमेवोक्तः । अत्र **माधवीये** दैवद्विजकरपक्षे पितृमातामहद्वयार्थं सकृदेवाग्नौकरणं, पित्र्यद्विजकरपक्षे मातामहपङ्क्तावपि पृथक् द्वितीयमग्नौकरणमिति । **पारिजाते** तु मातामहपृथक्श्राद्धपक्षे मातामहपङ्क्तावग्नौकरणमग्निसंन्निधौ साग्निकः कुर्यादिति।एतदुभयमपि सदाचाराभावाच्चिन्त्यम्। अथवाऽऽश्वलायनशाखिविषयं होमद्वयम्।**वाजसनेयिनां** त्वेक होम एव।तथा च—"वैश्वदेवे यदैकस्मिन्भवेयुद्वर्यादयो द्विजाः।तदैकपाणौ होतव्यं स्याद्विधिर्विहितस्तदा।"इति वाक्ये वैश्वदेव इत्यस्य पित्र्योपलक्षणत्वेनैकपाणावेव होमद्वयमिति । तथा **वृहद्याज्ञवल्क्यः**—"मातामहेषु यो दद्यादग्नौकरण आहुती । निराशाः पितरस्तस्य पैशाचं श्राद्धमुच्यते ॥"यद्वा—साग्नेरुभयत्र निरग्नेरेकत्रेति व्यवस्थेत्यविरोधः । **हुतशेषं दत्त्वा पात्रमालभ्य जपति पृथिवी त इति**-पात्रमित्युद्देश्यगतमेकत्वमित्यविवक्षितम् । ज्योतिष्टोमे दशापवित्रेण ग्रहं संमार्ष्टीतिवत् । अतश्च सर्वपात्रालम्भः । कांस्यपात्रपरिमाणमाह **स्मृतिः**—"पञ्चाशत्पलिकं कांस्यं द्व्यधिकं भोजनाय वै । गृहस्थैस्तु सदा कार्यमभावे हेमरौप्ययोः" इति । आलभ्य जपतीति मन्त्रान्तर आलम्भ इत्युक्तम् । अत्रैतत्संदिह्यते—किं हुतशेषमात्रं दत्त्वा

पात्रालम्भ उताहो सर्वान्नं परिविष्येति । उभयथा वचनदर्शनात् । तथा हि **स्कन्देश्वरसंवादे**–"विप्रपात्रेऽथ
पृथ्वी त इति पात्राभिमन्त्रणम् । इदमन्नं च साङ्गुष्ठं ततोऽन्नपरिवेषणम् । **याज्ञवल्क्योऽपि**–"हुतशेषं प्रदद्यात्तु
भाजनेषु समाहितः । यथालाभोपपन्नेषु रौप्येषु तु विशेषतः ॥ दत्त्वाऽन्नं पृथिवीपात्रमिति पात्राभिमन्त्रणम्" इति ।
अत्रैक आहुः—साग्निः पूर्वं परिविष्य हुतशेषं दत्त्वा पात्रमालभेत, निरग्निस्तु हुतशेषं दत्त्वाऽन्नं परिविष्य पात्र-
मालभेत । "अन्नेषु परिविष्टेषु हुतशेषं ददात्यथ" इति वचनादिति । तदयुक्तम् । "साग्निर्हुतशेषं दत्त्वैव परिवेषयेत्"
इति क्रमस्य **शौनकेन** दर्शितत्वात् । तथा च–"हुत्वाऽग्नौ परिशिष्टं तु पितृपात्रेष्वनन्तरम् । निवेद्यैवापसव्येन
परिवेषणमाचरेत्" इति । हुतशेषमपसव्येन निवेद्येत्यन्वयः । यत्तूक्तं—निरग्निर्हुतशेषं दत्त्वाऽन्नं परिविष्य पात्रमा-
लभेतेति । तदसंगतम् । अन्नेषु परिविष्टेष्विति वचनस्य वैयर्थ्यापत्तेः । ततश्च साग्निर्हुतशेषं दत्त्वान्नं परिविष्य
व्यस्तपाणिभ्यां पात्रमालभेत, निरग्निरन्नं परिविष्य हुतशेषं दत्त्वा तथैव पात्रमालभेतेत्यर्थः । यत्तु "विप्रपात्रेऽथ
पृथिवी" इति वचने ततोऽन्नपरिवेषणमित्यन्नपरिवेषणस्य पात्रालम्भानन्तर्यं प्रतीयते तदन्नशब्दो व्यञ्जनपर
इत्यविरोधः । अद्यतेऽनेनेत्यन्नमिति व्युत्पत्तेः । तथा च **पुराणसमुच्चये**–"भाजनालम्भनं कुर्याद्दत्त्वा चान्नं
यथाविधि" इति । व्यस्तपाणित्वमाह **पद्मपुराणम्**–"दक्षिणं तु करं कृत्वा वामोपरि विधानवत् । दैवं पात्रमथा-
लभ्य पृथ्वी ते पात्रमुच्चरेत् ॥ दक्षिणोपरि वामं च पित्र्यपात्रस्य लम्भने" इति । अत्रैके विवदन्ते—
हुतशेषं दैवपात्रेषु न देयमिति । तथा च **यमः**—"अग्नौकरणशेषं तु पित्र्येऽपि प्रतिपादयेत् । प्रतिपाद्य पितॄणां
तु न दद्याद्वैश्वदेविके" इति । **शौनकोऽपि** हुत्वाग्नौ परिशिष्टं त्विति प्रागुक्तम् । **वायुपुराणेऽपि**—"हुत्वा
दैवकरे साग्निः शेषं पित्र्ये निवेदयेत् । नहि स्मृताः शेषभाजो विश्वेदेवाः पुराणगैः" इति । अन्ये त्वाहुरविशेषा-
त्सर्वेभ्यो देयमिति । तथा च **याज्ञवल्क्यः**—"हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः" इत्यादि (र) विशेषः ।
देवलोऽपि—"यत्र यत्क्रियते कर्म पैतृके ब्राह्मणान्प्रति । तत्सर्वं तत्र कर्तव्यं वैश्वदेवत्वपूर्वकम्" । इति ।
सूत्रकारोऽपि–-दैवपूर्वं श्राद्धमिति । अत्रोच्यते—आद्ये यदुक्तं न देयमिति तदयुक्तम्, वचनार्थानवबोधात् ।
तथाहि—"अग्नौकरणशेषं तु पित्र्येऽपि प्रतिपादयेत्"इत्यपिशब्दाद्दैवेऽपि शेषदानोपपत्तेः।किं च पितॄणां प्रतिपाद्य वैश्व-
देवे न दद्यादपि तु पूर्वं दैवे तदनु पित्र्य इत्यर्थोपलब्धेः । यत्तूक्तम्—हुत्वाग्नाविति वचनं तत्साग्निविषयम् ।
यच्चाभिहितं हुत्वा दैवकरे साग्निरिति तत्र दैवकरे हुत्वा शेषं पित्र्ये दद्यान्न तु पित्र्ये हुत्वा शेषं देवेषु दद्यादित्यर्थः ।
अतोऽर्थानवबोधादयुक्तमित्युक्तम् । द्वितीयोऽपि नातीव शोभते । उक्तहेतुत्वात्साग्निनिरग्न्योर्विशेषागवतेः । न चोभ-
योर्वचनव्यक्तौ सत्यामविशेषो युक्तः कुत्रचिद्विषयान्तरस्यादृश्यमानत्वात् । ततश्चायमर्थः–-साग्नेरग्निहोमाद्दैव-
तृप्तेर्हुतशेषदानं पितृपात्रेष्वेव । निरग्निर्दैवकरहोमे पितृपात्रेष्वेव पित्र्यकरहोमे तु निरग्नेर्देवादिसर्वपात्रेषु हुतशेषदान-
मिति । तथा च **शाटथायनः**—"हुतशेषं पूर्वं दैवे दत्त्वा पश्चात्पित्र्ये दद्यात्" इति । **कात्यायनोऽपि**—
"विप्रपाणौ ततो हुत्वा दद्याच्छेषं पृथक् पृथक् । देवानामादितः कृत्वा पितृपात्रेषु च क्रमात्" । **वृद्धमनुः**—
"दैवपूर्वं यतः श्राद्धं तस्माद्द्यात्प्रयत्नतः । अग्नौकरणशेषं च देवानामादितः क्रमात् । वैश्वदेवादितः सर्वं विकिरं
पिण्डवर्जितम् । अग्नौकरणंशेषं यत्प्रदद्याद्वैश्वदेविके । **धर्मप्रदीपेऽपि**–"कुशेषूत्तानपाणिस्तु जुहुयाद्वै घृतप्लुतम् ।
शेषं देवाय दातव्यं पितृभ्यस्तदनन्तरम्" । इति । साग्निर्दैवपूर्वं दद्यान्निरग्निर्नेत्यविरोध इति कश्चित् । एवं दत्त्वा
पिण्डार्थमवशेषयत् । तथा च **हारीतः**–"हुतोच्छिष्टं ब्राह्मणेभ्यः प्रदाय पिण्डार्थमवशेषयेत् ।" **धर्मप्रदीपेऽपि**–
"अग्न्यभावे तु विप्रस्य हस्ते हुत्वा तु दक्षिणे । शेषयेत्पितृविप्रार्थं पिण्डार्थं शेषयेत्तथा"इति । **वैष्णव्यर्चा यजुषा**
वाङ्गुष्ठमन्नेऽवगाह्यापहता इति तिलानवकीर्येति--वाशब्दः समुच्चयनिवृत्तौ । वैष्णवी ऋगिदंविष्णुरित्यादिका,
यजुश्च **विष्णो हव्यं रक्षेति** तयोरेकतरमन्त्रेणानखं द्विजाङ्गुष्ठमन्ने **निवेश्यापहता** इति मन्त्रेण तिलानां समन्तात्प्रद-
क्षिणादि यथोपदेशं विकिरेदित्यर्थः । 'निरङ्गुष्ठं प्रदत्तं हि पितॄणां नोपतिष्ठते' इति वचनात् । नोपतिष्ठत इत्यासुरं
भवतीत्यर्थः । तथा च **यमः**–"निरङ्गुष्ठं तु यच्छ्राद्धं बहिर्जानु च यद्धुतम् । बाहिर्जानु च यद्भुक्तं सर्वमेवासुरं
भवेत्" इति । अत्रैके तिलानन्नपात्रेष्वप्यवकिरन्ति । तन्न, "तिलान्सर्वत्र निक्षिप्य पितृपात्रेषु वर्जयेत् । पितृपात्रे
तिलान्दद्यान्निराशाः पितरो गताः" इति वचनात् । **पाराशरोऽपि**–"सर्वदा च तिला ग्राह्याः श्राद्धकाले विशे-
षतः । पात्रेषु पतितान्दृष्ट्वा निराशाः पितरो गताः" इति । यत्तु--"ततो मधुघृताक्तं तु सोष्णमन्नं तिलान्वितम् ।
गृहीत्वा दैवतीर्थेन प्रणवेनैव तत्पुनः । एतद्वोऽन्नमित्युक्त्वा विश्वेदेवांस्तु भोजयेत्"इत्यत्र तिलान्वितत्वमन्नस्योक्तं

तद्वैश्वदेवाविषयम् । परिवेषणे तिलाक्षेपविषयं वा । तथा च **मत्स्यपुराणे**—"उभाभ्यामपि हस्ताभ्यामाहृत्य परिवेषयेत् । प्रशान्तचित्तः सतिलं दर्भपाणिरशेषतः" इति सतिलमन्नमुभाभ्यां हस्ताभ्यां परिवेषयेन्नैकहस्तेनेत्यर्थः । तथा च—"एकेन पाणिना दत्तं शूद्रादन्नं न भक्षयेत्" । **पुराणेऽपि**—"नापवित्रेण हस्तेन नैकेन न विना कुशान् । नायसे नायसेनैव श्राद्धे तु परिववेषयेत्" इति । एकायसशब्दे सप्तमी । तत्पात्रेऽन्नं न धार्यमित्यर्थः ; "सौवर्णरजताभ्यां च खड्गेनौदुम्बरेण वा । दत्तमक्षय्यतां याति फल्गुपात्रेण चान्यथा" इति वचनात् । फल्गु उदुम्बरः । नापवित्रेणेति- सपवित्रकरः स्वयं परिवेषयेदित्यर्थः । "फलस्यानन्तता प्रोक्ता स्वयं तु परिवेषणे" इति **वायुपुराण**वचनात् । यत्तु—"परिवेषणं प्रशस्तं हि भार्यया पितृतृप्तये । पितृदेवमनुष्याणां स्त्री सहाये यतः स्मृता" इति तदन्यापेक्षया स्वाशक्तौ वा वेदितव्यम् । न विना कुशानिति केवलप्रतिषेधः, "हस्ते दत्तं तु यत्स्नेहव्यञ्जनं लवणादिकम् । दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते तु किल्बिषम् ॥ घृतं वा यदि वा तैलं विप्रो दद्यान्नखच्युतम् । यमस्तदशुचि प्राह तुल्यं गोमांसभक्षणम्" इति वचनात् । **कात्यायनोऽपि**—"चतुःस्रोतःसमायुक्तो हस्तेनोन्मार्जयेद्घृतम् । उभावधो व्रजेयातां दाता भोक्ता न संशयः" उन्मार्जयेच्छोधयेत् । "क तन्नखैश्चतुर्भिश्च यो दद्यात्पाणिना घृतम् । दाता पुण्यं न चाप्नोति भोक्ता पापशतं व्रजेत्" इति । **अपहता** इति मन्त्रः पित्र्य एव न वैश्वदेवे स्वत एव रक्षोघ्नत्वादिति **कर्कः** । तूष्णीं यवानित्यन्ये । अत्र यद्यप्यन्नादिकल्पनं नोक्तं तथाऽपीदमन्नमिमा आप इदमाज्यं इदं हव्यमित्यन्नादिकल्पनं कार्यम् । तथा च **कात्यायनः**—"उभाभ्यामपि हस्ताभ्यां पात्रं कृत्वा तु तद्दृढम् । मोचयेद्दक्षिणं हस्तमन्ने तत्कल्पयेत्सदा" तथा—"स्पर्शनान्ते स्पृशेदन्नं कल्पनान्ते बलिं हरेत्" इति । अत्र कश्चिदाह कव्यादि नोच्चरेदिति । तदयुक्तम्—"विष्णो हव्यं च कव्यं च ब्रूयाद्रक्षेति वै क्रमात्" इति **मनूक्तेः** । **पुराणसमुच्चये**—"हव्यं दैवे समुच्चार्य पितॄणां कव्यमेव च । कव्यस्योच्चारणादेव प्राप्नुयुस्तृप्तिमुत्तमाम् ॥ कव्यादाः पितरः प्रोक्तास्तस्मात्कव्यं प्रकीर्तयेत् ।" इति । अत्रैतच्चिन्त्यते—किं परिवेषणे सव्यापसव्यविधिरस्ति न वेति । अत्रैक आहुरस्तीति । तदयुक्तम् । उभयत्र सव्येन विहितत्वात् । तथा च **कार्ष्णाजिनिः**—"अपसव्येन कर्तव्यं पित्र्यं कृत्यं विशेषतः । अन्नदानादृते सव्यमेवं मातामहेष्वपि" । **भरद्वाजोऽपि**—"सर्वं कर्मापसव्येन पितृकर्माणि कुर्वता । अन्नदानादृते कार्यं तद्वद्द्विप्रविसर्जनम्" इति । तथा—"एकपङ्क्त्युपविष्टानां विप्राणां श्राद्धकर्मणि । भक्ष्यं भोज्यं समं दद्याद्विपरीतं तु निष्फलम्" । तथा न पङ्क्त्यां विषमं दद्यादिति । **उष्णं स्विष्टमन्नं दद्यात्**-उष्णमिति पर्युषितापूपादिव्युदासार्थम् । तेन स्मृत्युक्तमपि पर्युषितमपूपादि श्राद्धेषु न दद्यादित्यर्थः । तद्विधिश्च—"यवगोधूमजं सर्वं पयसश्चैव विक्रिया । तत्पर्युषितमप्याद्यं स्नेहाक्तं चैव यद्भवेत्" इत्यादि । अत्रैके पर्युषितमप्यशुक्तं देयमित्याहुः । तथा च **यमः**—"अपूपाश्च करम्भाश्च धानावटकसक्तवः । शाकं मांसमपूपं च घृतं केशरमेव च ॥ यवागूः पायसं चैव यच्चान्यत्स्नेहसंयुतम् । सर्वं पर्युषितं भोज्यं शुक्तं चेत्परिवर्जयेत् ॥" **देवलोऽपि**—"अभोज्यं प्राहुराहारं शुक्तं पर्युषितं च यत् ।" अत्र व्रीह्यादिषु अपूपभक्षणार्थं पुनरपूपोक्तिः । **शङ्खोऽपि**—"दधि भक्ष्यं च शुक्तेषु सर्वं च दधिसंभवम् । ऋजीषपक्वं भक्ष्यं स्यात्सर्पिर्युक्तमिति स्थितिः" इति । तन्नातीव शोभते । अशुक्तपर्युषितस्य दृष्ट्यादिदोषोपहतत्वेन नित्यभोजनविषयत्वात् । तेषामप्युष्णानामेव श्राद्धोपयुक्तत्वाच्च । तथा **चादित्यपुराणे**—"विविधं पायसं दद्याद्भक्ष्याणि सुबहूनि च । स्निग्धोष्णानि च यो दद्यादग्निष्टोमफलं लभेत्" इति । करम्भो दधियुक्तसक्तवः, इष्टकाः कासारखण्डाः, कृशरास्तिलकल्कमिश्रितौदनः । सुबहूनीति सुशब्देन नैर्मल्यं विविधत्वं च दर्शयति । तथा च **यमः**—"ततो विशदमन्नाद्यं भोजयेत्प्रयतो द्विजान् । अन्नं सूपं घृतं शाकं मांसं दधि पयो मधु ॥ धानांश्च मधुसंयुक्तानिक्षूंश्चैव सगोरसान् । शर्कराफलमूलं च सर्वं दद्यादमत्सरी" इति । **मनुरऽपि**—"भक्ष्यं भोज्यं च विविधं मूलानि च फलानि च । हृद्यानि चैव मांसानि पानानि सुरभीणि च ॥" विविधमित्येकान्ननिषेधः । तथा च—"ततोऽन्नं बहुसंस्कारं नैकव्यञ्जनभक्ष्यवत् । चोष्यपेयसमृद्धं तु यथाशक्त्युपकल्पयेत्" इति वचनात् । अन्नमित्यदनीयम् । अथवाऽन्नमिति पक्वस्य संज्ञा । "सस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते । आमान्नं वितुषं ज्ञेयं पक्वमन्नमुदाहृतम्" इति वचनात् । तेन संभवे सत्यामान्नादिकं न देयमित्यर्थः । दद्यादिति यथोक्तसंकल्पवाक्यं दर्शयति । अत्रैके "अर्घेऽक्षय्योदके चैव" इति कात्यायनेनान्नदाने [illegible] पितृपितामहप्रपितामहा अमुकामुक-

शर्माणि इत्याद्युच्चार्य तृतीयस्तृतीयोंऽशस्तेभ्यः स्वधेति मन्त्रेण दद्यादित्याहुः । अन्ये तु अन्नं वासावेतत्त इत्युद्दिश्य भोजयेदिति **शाङ्खायनोक्तेरमुका**मुकगोत्रैतत्तुभ्यमन्नं स्वधा नम इते **ब्रह्मपुराणो**क्त्वाच्च पृथगुपदिश्य दद्यान्न तन्त्रेणेति । एवं च सति अस्मत्पितरमुकमर्शन्नस्मत्पितामहामुकशर्मन्नस्मत्प्रपितामहामुकशर्मन्नित्यादि पृथक् पृथगुद्दिश्य वाक्यान्ते इदमन्नं घृतादिसहितं वः स्वधा नम इत्युभयाविधं :वाक्यमुचितमित्याभाति, तत्र पृथग्भावयोरुपदेशात् । अथ च–"ब्राह्मणा वित्तसंपत्तावेकैकस्यापि ते त्रयः । एको वैकस्य भोक्तव्यस्त्रयाणामेक एव वा" इति वचनात्पृथग्द्विजपक्षे पृथगुपदेशः । त्रयाणामेकद्विजपक्षे तन्त्रेणेत्यविरोधः । अत्रैके इदमन्नं वः स्वधेति संकल्पे न ममेति स्वस्वत्वपरित्यागं न कुर्वन्ति । तदयुक्तम् । स्वसत्तानिवर्तनस्योक्तत्वात् । तथा **चात्रिः**—"हस्तेन मुक्तमन्नाद्यमिदमन्नमुदीरयेत् । स्वाहेति च ततः कुर्यात्स्वसत्ताविनिवर्तनम् ॥ संबन्धगोत्रनामानि इदमन्नं ततः स्वधा । पितृक्रमादुदीर्यन्ते स्वसत्तां विनिवर्तयेत् ।" **धर्मप्रदीपे**ऽपि--"सिद्धान्नस्य तु संकल्पो भूमावेव प्रदीयते । हस्तेषु दीयमानं यत् पितॄणां नोपतिष्ठते ॥ भूमिर्जनित्री सर्वेषां भूतानां च विशेषतः । तत्रोपतिष्ठतेऽन्नं तु न च हस्ते कदाचन ॥" **मञ्जरिकारो**ऽपि–"दीपमन्नं च पिण्डं च भूमौ दद्याद्विचक्षणः । पूर्वदानानि विप्राणां करे दद्याच्च दक्षिणे ।" तथा–"तिलदर्भसमायुक्तं तोयं भूमौ प्रदापयेत् । पात्रस्य संनिधौ पित्र्ये दैवे यवसमन्वितम् ॥ वैश्वदेवस्य वामे तु पितृपात्रस्य दक्षिणे । संकल्पोदकदानं स्यात् नित्यं श्राद्धे यथाविधि" इति । अकृते संकल्पेऽन्नं द्विजा न स्पृशेयुः । पात्रं च नोद्धरेयुः । तथा **अत्रिः**–"असंकल्पितमन्नाद्यं पाणिभ्यां यदुपस्पशेत् । अभोज्यं तद्भवेदन्नं पितॄणां नोपतिष्ठते ।" **धर्मप्रदीपे**ऽपि--"अकृते अन्नसंकल्पे यः पात्रं चोद्धरेद्द्विजः । वृथा श्राद्धमवाप्नोति दाता च नरकं व्रजेत्" इति । संकल्पानन्तरं प्रागपोऽशनादन्नं न गृह्णीयात् । तथा च तत्रैव—"अन्नं दत्तं न गृह्णीयाद्यावत्तोयं न संपिबेत् । अपीत्वा मर्दितं चान्नं भुञ्जते किल राक्षसाः ।" तथा—"हस्तेनान्नं न गृह्णीयाद्यावत्तोयं न संपिबेत् । अपीत्वा मर्दयेदन्नं निराशाः पितरो गताः । **शक्त्या वा**--वाशब्दोऽभावे न विकल्पे । स्विष्टाभावे शक्त्यनुसारेण दद्यादित्यर्थः । यद्यप्यशक्तस्तथाऽपि मांसगोधूमादेरावश्यकत्वमवगन्तव्यम् । तथा च **स्कन्दसंवादे**—"श्राद्धे मांसं न यो दद्यान्न वाश्नाति कुतर्कतः । नरकार्हावुभौ श्रौतस्मार्तधर्मस्य लोपनात् ।" **वृद्धयाज्ञवल्क्यो**ऽपि—"विना मांसेन यच्छ्राद्धं कृतमप्यकृतं भवेत् । कव्यादाः पितरो यस्मादलाभे पायसादयः ।" **जातूकर्ण्यो**ऽपि—"दरवान् यो द्विजः श्राद्धे दद्यान्नो मांसमध्वरे । स दुरात्मा दुराचारो वेदमार्गस्य दूषकः ।" तत्रैव **संवादे**—"रोमाणि कूर्मपृष्ठे चेन्नृणां चेच्छृङ्गसंभवः । व्योम्नश्च मुष्टिना घातः सास्थि चेद्रक्तपा वपुः ॥ तदोपातिष्ठते स्कन्द दत्तं श्राद्धं निरामिषम् । तस्मात्सर्वप्रयत्नेन श्राद्धं देयं हि सामिषम् ॥ अभोज्य विप्रान्यः श्राद्धे मांसमन्यांस्तु भोजयेत् । स्वयमश्नाति वा मूढः स याति नरकं ध्रुवम् ॥" **आत्रिः**—"अगोधूमं च यच्छ्राद्धं कृतमप्यकृतं भवेत्" इति । अत्रैके विवदन्ते–"फलमूलाशनैर्मेध्यैर्मुन्यन्नानां च भोजनैः । न तत्फलमवाप्नोति यन्मांसपरिवर्जनात्" इति **मनु**वचनात्, "मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः । मधुप्रधानं शूद्रस्य सर्वेषां वाऽविशेषतः" इति **पुलस्त्य**वचनाच्च मुन्यन्नाप्राधान्यावगतेर्मांसं क्षत्रविड्विषयं न ब्राह्मणस्येति । अन्ये त्वाहुः—"क्रयादिलब्धमांसेन श्राद्धं न प्राणिहिंसनपूर्वकम्" इति । तथा च **मनुः**—"नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् । न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ॥ समुत्पत्तिं च मांसस्य वधबन्धाय देहिनाम् । प्रसमीक्ष्य निवर्तेत सर्वमांसस्य वर्जनात् ।" **भारते भीष्मो**ऽपि—"न हि मांसं तृणात्काष्ठादुपलाद्वाऽपि जायते । हत्वा जन्तून्भवेन्मांसं तस्मात्तत्परिवर्जयेत् । एकस्य दक्षिणा तृप्तिरन्यः प्राणैर्वियुज्यते ॥ अहो मांसस्य दौरात्म्यं प्रत्यक्षमिह दृश्यते ।" अन्यच्च—"यूपं छित्त्वा पशुं हत्वा कृत्वा रुधिरकर्दमम् । यद्येवं गम्यते स्वर्गे नरके केन गम्यते" इति । अपर आहुः—कलिविषये मांसनिषेधो विधिस्त्वन्यविषय इति । तथा च—"अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु । देवरेण सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्" इति । देशाचारविषयो निषेध इत्यन्ये । तस्मान्मांसं श्राद्धे न देयमिति । अत्रोच्यते—यदुक्तं मुन्यन्नं ब्राह्मणस्येति प्राधान्यं मुन्यन्नस्य, मांसं क्षत्रविड्विषयम्, न ब्राह्मणस्येति । तन्न, मांसाद्युक्तवस्तुनोऽभाव एव मुन्यन्नादिप्राधान्योपपत्तेः । तथा **चात्रेयः**–"मुन्यन्नामिषमाध्वीकैर्विप्राद्द्विजजघन्यजाः । श्राद्धं विदध्युरसति द्रव्ये तु सति चापरैः ॥" माध्वीकं मधु, द्विजौ क्षत्रविशौ, जघन्यजाः शूद्राः । मांसादिद्रव्येऽसाति मुन्यन्नादिभिः क्रमाद्विप्रादयः श्राद्धं कुर्युः, सति

तु मांसादिद्रव्ये तेनापरैश्च मेध्यैः कुर्युरित्यर्थः । तथा च **वृद्धशातातपः**—"मुन्यन्नामिषमध्वाज्यैरभावे प्रोक्तवस्तुनः । क्रमाद्विप्रादिभिर्वर्णैर्विधेयमिति शुश्रुमः ॥ परमान्नेन मांसेन शाकैर्मधुघृतादिभिः । सर्ववर्णैः प्रकर्तव्यं श्राद्धं वै वित्तशाठ्यतः॥" **वृद्धमनुरपि**—"मुन्यन्नैर्ब्राह्मणाः श्राद्धं सामिषं बाहुसंभवाः । ऊरव्या मधुना कुर्युः शूद्रा मूलफलादिना ॥ असंभवे प्रकर्तव्यमेतैरेव हि केवलम् । सर्ववर्णैस्तु कर्तव्यं सामिषं सति संभवे॥" इति यच्चाभिहितं प्राणिहिंसापूर्वक एव श्राद्धे मांसनिषेध इति । तदप्ययुक्तम् । सामान्यहिंसाया अग्नीषोमीयपशुहिंसयेव विधिविहितहिंसया बाधोपपत्तेः । तथा च **जाबालः**—"हिनस्ति यः पशून् स्वार्थमुद्दिश्यैव स पापभाक् । श्राद्धापदेशतो हिंसन्नपि स्वार्थे न दुष्यति ॥" **स्कन्दसंवादेऽपि**—"अर्थे देवपितॄणां हि यो हिनस्ति पशून् द्विजः । स यज्ञफलमाप्नोति ते च यान्ति परां गतिम् ॥ स्वार्थमन्नं पचेद्यस्तु यो हिनस्ति वृथा पशून् । एकाकी मिष्टमश्नाति यश्च याति स रौरवम्" । **भीष्मोऽपि**—"योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया । कृष्णद्वैपायनः प्राह स्थावरत्वं स गच्छति" । **अत्रिरपि**—"मधुपर्के च सोमे च दैवे पित्र्ये च कर्मणि । अत्रैव पशवो हिंस्या नान्यत्रेति कथंचन" । तथा—"यज्ञार्थं पशवः सृष्टाः पुत्रार्थं वरयोषितः ।" इत्यादिवचनात् । यच्चाभ्यधायि—कलियुगविषयो मांसनिषेध इति तदप्यसंगतम् । कलिविषयविधायकवचनैस्तद्वचनस्य बाधात् । तथा च **जातूकर्ण्यः**—"मांसं युगेषु सर्वेषु यज्ञश्राद्धार्थमादृतम् । श्राद्धोपयमनो यज्ञे कलौ तच्च विशिष्यते॥" **समन्तुरपि**—"कुतर्कोपहता विप्राः कलावश्यं निरामिषम् । तृप्तिं नाश्नन्ति पितरस्तस्य श्राद्धे कदाचन॥" **पैठीनसिः**—"परमान्नं कालशाकं मधु मांसं घृतं पयः । मुन्यन्नानि तिला विप्राः प्रकृत्या हविरष्टधा ॥ शस्तान्यष्टौ तु सर्वेषु युगेषु मुनिसत्तमाः । पितॄणां देवतानां च दुर्लभानि कलाविति ॥" इति । निबन्धान्तरे तद्वचनस्य निर्मूलत्वप्रतिपादनाच्च । तथा—"गोमेधो नरमेधश्च अक्षता गोपशुस्तथा । देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्" इति **पराशर**पाठात् । यत्तूदाहृतं देशविषयो निषेध इति । तदप्यसुन्दरम् । मध्यदेशादौ जिह्वालोलुपतया विहितेतरमांसभक्षणस्य प्राचुर्योपलब्धेः । न च देशविषयः शक्यते वक्तुम् । देशभेदविषयस्य निरस्तत्वात् । तथा च **वृद्धप्रचेताः**-"न युगानां न देशानां न विप्राणां द्विजोत्तमाः। धर्मशास्त्रेषु वै भेदो दृश्यते मांसभक्षणे ॥" देशभेदे श्राद्धे दृश्यमानत्वाच्च । तस्माद्विहितहिंसादौ श्राद्धादिकर्मसु च मांसभक्षणविधिरितरत्र निषेध इति सिद्धम् । तथा च **मनुः**—"प्रोक्षितं भक्षयेन्मांसं ब्राह्मणस्य च काम्यया । यथाविधि नियुक्तश्च प्राणानामेव चात्यये ॥" **याज्ञवल्क्योऽपि**—"प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया" इति । भक्ष्यत्वं छागादिविहितपशुमांसस्य । **देवलः**—"पञ्च पञ्चनखा भक्ष्या धर्मतः परिकीर्तिताः । गोधा कूर्मः शशो विश्वशल्लकश्चेति ते स्मृताः॥" धर्मत इति प्रोक्षितम् । न चायमपूर्वविधिः, रागप्राप्तत्वात् । नापि नियमः पक्षप्राप्त्यभावात् । अतोऽत्र गोधादिपञ्चकव्यतिरिक्तपञ्चनखनिषेधाधिका परिसंख्येति। तथा च **रामायणे**—"शशकः शल्लको गोधा खड्गी कूर्मश्च पञ्चमः । पञ्च पञ्चनखा भक्ष्या न भक्ष्या वानरा नराः" इति । एतच्चाप्युपलक्षणम् । अत्रैतदुच्यते—किं प्रोक्षितादौ नियम उत परिसंख्येति । तत्र परिसंख्येति ब्रूमः । नियमस्य पक्षप्राप्तौ विधायकत्वात् । यत्तु—"स्वरुच्या क्रियमाणे तु यत्रावश्यं क्रिया भवेत् । नियमः सोऽत्र विज्ञेयः श्राद्धे मांसाशनं यथा॥" इत्यत्र नियमत्वमङ्गीकृतं तच्छब्दार्थरूपनिवृत्तिफलत्वादेकरूपत्वमेव तयोरित्यविरोधः । अतोऽत्र श्राद्धशब्दस्योपलक्षणपरत्वेन प्राणात्ययादिचतुष्टये परिसंख्यैव युक्ता ।तथा च **बृहस्पतिः**—"रोगी नियुक्तो विधिवद्धुतं विप्रवृतस्तथा । मांसमद्याच्चतुर्ध्वेषा परिसंख्या प्रकीर्तिता ॥ अतोऽन्यथा तु योऽश्नीयाद्विधिं हित्वा पिशाचवत् । यावन्ति पशुरोमाणि तावत्प्राप्नोति रौरवम्" इति । रोगी प्राणात्ययोपलक्षितः । नियुक्तः श्राद्धे । विधिवद्धुतं प्रोक्षितादि । विप्रवृतो द्विजकामनयाऽभ्यर्थितः । परिसंख्येत्यभक्षणसंकल्पव्यावृत्तिः । तेन यथोक्तकृताभक्षणनियमस्यापि निवृत्तिरित्यर्थः । तथा च-"यथाविधि नियुक्तो यो मांसं नाश्नाति मानवः । स प्रेत्य पशुतां याति संभवानेकविंशतिम्॥" इति वचनात् । संकल्पश्च—"श्राद्धवर्जं मया मांसं न भोक्तव्यं कदाचन । त्यजेच्चेदिति संध्यायापरथा पतनं भवेत्" इति कार्ष्णाजिनिनोक्तः । **तथेश्वरसंवादेऽपि**—"ब्रह्मचारी यतिर्मांसं त्यजेत्स्त्री पतिना विना । श्राद्धवर्जमथान्योऽपि संत्यजेत्तपसः कृते" इति । अतश्च श्राद्धादिषु मांसं भक्ष्यमेवेत्युक्तम् । यत्तु—"प्रोक्षिताभ्युक्षितं मांसं तथा ब्राह्मणकाम्यया । अल्पदोषमिति ज्ञेयं विपरीते तु लिप्यते ॥" इति **महाभारत**वचनं तदविहितसंकल्पाविषयम् । तथा च **बृहस्पतिः**—"मद्यं मासं मैथुनं च भूतानां लालनं स्मृतम् । तदेव विधिना कुर्यात्स्वर्गं प्राप्नोति मानवः ॥" इति । **महाभारते**-"हविर्यत्प्रोक्षितं मन्त्रैः प्रोक्षिताभ्युक्षितं शुचि । वेदोक्तेन प्रकारेण पितॄणां प्रक्रियासु च ॥ पितृदैवतयज्ञेषु प्रोक्षिते

हविरुच्यते । विधिना 'वेददृष्टेन तदुक्तान्येन दुष्यति॥'' इति । यत्पुनर्यमवचनम्—''सर्वेषामेव मांसानां महादोषस्तु भक्षणे । निवर्तने महापुण्यमिति प्राह प्रजापतिः॥'' इति । यच्च **महाभारते** वचनं—''भक्षणे तु महान्दोषो निवृत्त्या पुण्यमुच्यते।'' इति। तदुभयमपि श्राद्धादेरन्यत्र जिह्वालतया भक्षणविषयम् । तथा च **स्कन्दसंवादे**-''यत्र यत्र निषेधो हि श्रूयते मांसभक्षणे । जिह्वालान्प्रति स ज्ञेयो न तूक्तविधिनाऽश्नतः ॥'' इति । तथा—''प्रयान्ति नरकं घोरं मांसमश्नन्ति ये नराः । जिह्वालान्प्रति दोषोऽयं न दोषो विधिनाऽश्नताम्॥''इति । यच्च **बृहस्पतिवचनं**—''रोगार्तोऽभ्यर्थितो वाऽपि यो मांसं नात्त्यलोलुपः। फलं प्राप्नोत्ययत्नेन सोऽश्वमेधफलस्य च॥'' इति। तच्छ्राद्धे ब्रह्मचारिविषयम् । तथा च **मनुः**—''व्रतवद्दैवदैवत्ये पित्र्ये कर्मण्यथर्षिवत् । काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते॥'' इत्येकभिक्षायां व्रतदृष्टिवशादनदनस्य विहितत्वात् । अलोलुप इत्यनेन तद्विषयावगमाच्च । तथा च—''स तप्यति तपोऽजस्रं यजते च ददाति च। मधुमांसनिवृत्तो यः प्रोवाचेदं बृहस्पतिः'' । ''यावज्जीवं तु यो मांसं विषवत्परिवर्जयेत् । **वसिष्ठो** भगवानाह स्वर्गलोकं स गच्छति ॥'' **जैमिनिरपि**—''ब्रह्मचर्यमुपास्यैव योऽकृत्वा दारसंग्रहम् । संन्यसेन्नाधिकारः स्यान्मांसे विधिवदन्यतः'' इति । अन्यतः दारसंग्रहादूर्ध्वं विधिवन्मांसभक्षणाधिकार इत्यर्थः । तथा च **मनुः**—''न मांसभक्षणे दोषो न मद्ये न च मैथुने । प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥'' इति । मांसमद्यमैथुनेषु विहितेषु भक्षणपानाभिगमनैर्भूतप्रवृत्तित्वान्न दोषः । निवृत्तिस्तु महाफलप्रापिकेत्यर्थः । महती चासावफला चेति व्युत्पत्तेः । न चेयं व्युत्पत्तिर्न साधुरिति वाच्यम् । फलाफलशब्दयोः परयोरुभयथाऽपि महाशब्दस्याकारादेशस्य घटमानत्वात् । तथा च **बृहस्पतिः**—''अभूमांसपुरोडाशे भक्षणं मृगपक्षिणाम् । पुराणेष्वेव यज्ञेषु ब्रह्मक्षत्रसवेषु च ॥ सौत्रामण्यां तथा मद्यं श्रुतौ भक्ष्यमुदाहृतम् । ऋतौ च मैथुनं धर्म्यं पुत्रोत्पत्तिनिमित्ततः ॥ स्वर्गं प्राप्नोति नैवं तु प्रत्यवायेन युज्यते।'' इति । ततश्चायमर्थः । प्रोक्षितादिचतुर्षु स्मृत्युक्तसंकल्पेन मांसत्यागिनामपि गृहस्थानां भक्ष्यमेव मांसं, न कोऽपि दोषः । अविहितसंकल्पेन मांसत्यागिनां तु प्रोक्षणादिभक्षणे अल्पदोषः । रोगार्तानामभ्यर्थितानां च ब्रह्मचारिणां श्राद्धादिष्वपि भक्षणे महान् दोष एवेति । अतश्च त्यक्तमांसादेरपि श्राद्धे भक्षणमेवोचितमित्युक्तम् । तथा **चोशनाः**—''नियुक्तश्चैव यः श्राद्धे यत्किंचित्परिवर्जयेत् । पितरस्तस्य तन्मांसं नैराश्यं प्रतिपेदिरे ।'' **देवलोऽपि**—''नियुक्तस्तु यदि श्राद्धे दैवे मांसं समुत्सृजेत् । यावन्ति पशुरोमाणि तावन्निरयमृच्छति ॥'' **स्कन्दसंवादेऽपि**—''निवेशितस्तु यः श्राद्धे यज्ञे वाऽपि द्विजाधमः । मांसं नाश्नाति निरयं याति वै पशुतां ततः'' इत्यलं बहुना । अन्यद्विहितप्रतिषिद्धं स्मृत्यन्तरनिबन्धेभ्य उपलब्धव्यं, ग्रन्थगौरवभयान्नेह लिखितम् । एवमन्नं संकल्प्यापोऽशनं दत्त्वोङ्कारव्याहृतिपूर्वं गायत्र्यादि जपेत्, तथा च **याज्ञवल्क्यः**—''सव्याहृतिकां गायत्रीं **मधुवाता** इति त्र्यृचम् । जप्त्वा यथासुखं वाच्यं भुञ्जीरंस्तेऽपि वाग्यताः ॥'' इति । एके **मधु मध्विति** त्रिजपं वारिघृतधारां च न कुर्वन्ति । तदयुक्तम् । उभयोरपि विहितत्वात् । तथा च **प्रचेताः**—'' अपोऽशानमथो दत्त्वा सावित्रीं त्रिर्जपेद्बुधः । **मधुवाता** इति त्र्यृचं मध्वित्येतत्त्रिकं तथा ।'' **स्कन्दसंवादेऽपि**—'' अपोऽशानमथो दत्त्वा वारिधारां क्षिपेद्बुधः । **नमो देवेभ्य** इति च सव्येनोदङ्मुखो द्विजः । अपसव्यं पितृभ्यस्तु घृतधारां वदेत्स्वधाम् '' इति । एवं जप्त्वाऽच्छिद्रीकरणं कृत्वा **ये देवासः ये चेह** इत्यादि पठित्वा यथासुखममृतं जुषध्वमित्युक्त्वा भोजयेत् । तथा च **यमः**—अन्नहीनं क्रियाहीनं मन्त्रहीनं च यद्भवेत् । सर्वमच्छिद्रमित्युक्त्वा ततो यत्नेन भोजयेत् ।'' **कात्यायनः**—''ये देवासश्च ये चेह मन्त्रद्वयमुदीरयेत् । मन्त्रान्ते तु ततो ब्रूयादमृतं भुज्यतामिति'' । दैवे **ये देवासः**, पित्र्ये **ये चेहे**ति विवेकः । **वृद्धयाज्ञवल्क्योऽपि**—'' यथासुखं जुषध्वं भो इति वाच्यमनिष्ठुरम् '' इति । अत्रैके बलिदानमिच्छन्ति नेत्यन्ये । एवं सति वैश्वदेवे बलिः, पित्र्ये नेत्यविरोधः ।

तथा च—'' स्पर्शनान्ते स्पृशेदन्नं कल्पनान्ते बलिं हरेत् । होमस्तु **मधुवाते**ति होमान्त उदकं पिबेत् '' इति वैश्वदेवविषयम् । **अत्रिः**—'' दत्ते वाऽप्यथवाऽदत्ते भूमौ यो निक्षिपेद्बलिम् । तदेतन्निष्फलं याति निराशैः पितृभिर्गतैः ॥'' इति पित्र्यविषयम् । '' पितॄणामन्न उत्सृष्टे बलिं कुर्वन्ति ये द्विजाः । आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते '' इति **वसिष्ठोक्तेः** । अश्नंस्तु जपेद्व्याहृतिपूर्वां गायत्रीं सप्रणवां सकृत्त्रिर्वा राक्षोघ्नीः पित्र्यमन्त्रान्पुरुषसूक्तमप्रतिरथमन्यानि च पवित्राणि--सप्रणवां व्याहृतिपूर्विकां गायत्रीमित्यन्वयः । पाठोऽर्थेन बाध्यते। वाशब्दस्तु विकल्पार्थः । अशनात्पूर्वं त्रिरश्नंस्तु च सकृदिति व्यवस्थार्थो वा । पूर्वस्याष्टदोषदुष्टत्वात् । तथा च **प्रचेताः**—''अपोऽशानमथो दत्त्वा सावित्रीं त्रिर्जपेद्बुधः । मधुवाता इति च मध्वित्येतत्त्रिकं तथा ॥'' इति।

हलायुधः—"सकृन्त्रिर्वा मधुमतीमिधु माध्वीति च" इति पाठ इति । तत्कर्कादिभिरनादृतत्वात्तज्जपस्याशनात्पूर्वं विहितत्वाच्च चिन्त्यम् । रक्षांसि घ्नन्तीति रक्षोघ्नाः । मूलविभुजादित्वात् कप्रत्ययस्ता एव राक्षोघ्नीः, **कृणुष्व पाज** इत्यादयः पञ्चर्चः । ऋग्विशेषणत्वात्स्त्रीत्वम् । तथा च **श्रुतिः**—"एतान्रक्षोघ्नान्प्रतिसरानपश्यत्कृणुष्वपाजः प्रासितिं न पृथ्वीमिति रक्षोघ्ना वै प्रतिसराः" इति । पित्र्यमन्त्रा **उदीरतामि**त्यादित्रयोदशर्चः । अत्रैके **सुरावन्तं बर्हिषदमि**त्यादिपञ्चदशर्चः पितृमन्त्रा इत्याहुः । तन्न, पितरो देवतात्वेन यत्र स्तूयन्ते ते पित्र्या इति तद्धितेन **उदीरतामि**त्यादीनामेव पित्र्यमन्त्रत्वावगतेः । तथा च **भट्टपादाः**—"तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन चेष्यते । देवतासंगतिस्तत्र दुर्बलं तु परं परम्" इति । "**कृणुष्व पाज** इति च अग्रे ष्ठ्वावर्जमुच्चरेत् । **सुरावन्ता**दिकां सर्वां जपेच्च पितृसंहिताम्" इत्यनेन **सुरावन्तामि**त्यादीनां पितृसंहितासंज्ञकत्वात् । पुरुषसूक्तं **सहस्रशीर्षे**त्यादिषोडशर्चः । अप्रतिरथमाशुः **शिशान** इत्यादि सप्तदशर्चोऽनुवाक इति केचित् । द्वादशर्च इत्यन्ये । तदेतद्विचारणीयम् । यदि सर्वस्यापि शान्तिपाठस्याप्रतिरथसंज्ञा तदा सप्तदशद्वादशसंख्यावच्छेदकप्रमाणं न स्यात् । अथ संख्यावच्छेदकप्रमाणं तर्ह्याचार्यमतभेदात्सप्तदशद्वादशसंख्याया मूलस्य दर्शनाभावादनिश्चयापत्तिः स्यात् । तस्माच्छ्रुतिमूलत्वेन द्वादशर्च एवेति गम्यते । तथा च **श्रुतिः**—"ब्रह्मन्नप्रतिरथं जपेत्युपक्रम्य तस्माद्ब्रह्माप्रतिरथं जपित्वा आभिरूपा द्वादश भवन्ति" इत्युपसंहारः । अन्यानि पिण्डब्राह्मणादीनि । तथा च **वृद्धयाज्ञवल्क्यः**—"पुरुषसूक्तं यजुषां पिण्डब्राह्मणशान्त्यर्थम् । पितुस्तवं च पञ्चैवं गायत्री मधुब्राह्मणम्" इति । चकरो ब्रह्मादिस्तोत्रसमुच्चयार्थः । तथा च **मत्स्यपुराणम्**—"ब्रह्मविष्ण्वर्करुद्राणां स्तोत्राणि विविधानि च । इन्द्रस्य सोमसूक्तानि पावमानीश्च शक्तितः" इति । अत्रैकेऽस्य जपस्य पित्र्यत्वादपसव्येन जपन्ति । तदयुक्तम् । सव्येनैव विहितत्वात् । तथा च **जमदग्निः**—"अपसव्येन कर्तव्यं सर्वं श्राद्धं यथाविधि । सूक्तस्तोत्रजपं मुक्त्वा विप्राणां च विसर्जनम् ।" अपि च—"सूक्तस्तोत्रजपं त्यक्त्वा पिण्डघ्राणं च दक्षिणाम् । आह्वानात्स्वागतान्तं च विना च परिवेषणम् ॥ विसर्जनं सौमनस्यमाशिषां प्रार्थनं तथा । विप्रप्रदक्षिणां चैव स्वस्तिवाचनकं विना । पित्र्यमन्यत्प्रकर्तव्यं प्राचीनावीतिना सदा" इति । अत्र यद्यप्यश्नत्स्विति सामान्येनोक्तं तथाऽपि यथोपदेशं भोक्तव्यम् । तथा च **प्रचेताः**—"पीत्वाऽपोशानमश्नीयात्पात्रे दत्तमगर्हितम् । सर्वेन्द्रियाणां चापल्यं न कुर्यात्पाणिपादयोः" **बौधायनः**—"पादेन पादमाक्रम्य यो भुङ्क्तेऽनापदि द्विजः । नैवासौ भोज्यते श्राद्धे निराशाः पितरो गताः ।" **प्रचेताः**—"भोजनं तु न निःशेषं कुर्यात्प्राज्ञः कथंचन । अन्यत्र दध्नः क्षीराद्वा क्षौद्रात्सक्तुभ्य एव च ॥" शेषत्यागस्य नित्यत्वात् । तथा च **जमदग्निः**—"भुक्त्वा पीत्वा तु यः कश्चिद्रिक्तपात्रं समुत्सृजेत् । स नरः क्षुत्पिपासार्तो भूत्वा जन्मनि जन्मनि ॥" यत्तु "न निन्देयुर्नावशेषयेयुः" इति तेनैवोक्तं तदधिकोच्छिष्टत्यागविषयम् । "तृप्यन्ते ग्रासमात्रं तु यो विप्रो न त्यजेत्तदा । यच्छ्राद्धे पिण्डदानादौ तद्वै रक्षांसि गच्छति" इति वचनात् । **मनुः**—"अत्युष्णं सर्वमन्नं स्यादश्नीरंश्चैव वाग्यताः । न च द्विजातयो ब्रूयुर्दात्रा पृष्टा हविर्गुणान् ॥" दात्रा हविर्गुणान्पृष्टा वाग्यता द्विजा इत्यनेनैव कथनेन प्राप्तौ न ब्रूयुरिति पौनरुक्त्यं हस्तसंज्ञयाऽपि कथननिषेधार्थम् । "हुङ्कारेणापि यो ब्रूयाद्धस्तेनापि गुणान्वदेत्" इति **शङ्खेन** प्रतिषिद्धत्वात् । एतच्च श्राद्धासमाप्तौ वेदितव्यम् । "निर्वृत्ते तु तथा श्राद्धे वक्तव्यं शोभनं हविः" इति वचनात् । भोक्तॄणां निषेधाद्दात्रा हविः प्रशंसनीयमेव रुचिजननार्थम् । तथा च "भक्ष्यभोज्यगुणानुक्त्वा भोजयेद्ब्राह्मणान् शनैः । पृथक् पृथक् च संवेद्य कुर्यादेभ्यः प्ररोचनम्" इति । भुञ्जीरंश्चैवेत्येवकारः परस्परस्पर्शेऽपि भोजनार्थः । तथा च **शङ्खः**—"श्राद्धपङ्क्तिषु भुञ्जानो ब्राह्मणो ब्राह्मणं स्पृशेत् । भुक्त्वा तदन्नमत्याज्यं गायत्र्यष्टशतं जपेत् ।" **कात्यायनोऽपि**—एकपङ्क्तौ तु यो भुङ्क्ते विप्रो विप्रं स्पृशेद्यदि । तदन्नं न त्यजेद् भुक्त्वा गायत्र्यष्टशतं जपेत्" इति । **हारीतः**—"पात्रे पात्रं प्रतिष्ठाप्य येऽज्ञानाद्भुञ्जते द्विजाः । आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतितिष्ठते" । **मार्कण्डेयः**—"कटिभुग्नस्तु यो भुङ्क्तेऽनन्तर्जानुकरस्तथा । हसते वदते चैव निराशाः पितरो गताः" । **शङ्खलिखितौ**—"नात्यन्ताधिकं दद्यान्न प्रतिगृह्णीयात्" इति । दातृधर्ममाह **शङ्खः**—"श्राद्धे नियुक्ते भुञ्जानान्न पृच्छेल्लक्षणादिषु । उच्छिष्टाः पितरो यान्ति पृच्छतो नात्र संशयः ॥ दातुः पतति वै बाहुर्जिह्वा भोक्तुश्च भिद्यते ।" अत्रैतत्संदिह्यते—किं मृष्टव्यञ्जनादिकं भोक्ता याचेत न वेति । उभयथा च दर्शनात् । तथा हि **वृद्धशातातपः**—"अपेक्षितं यो न दद्याच्छ्राद्धार्थमुपकल्पितम् । न याचते स्मृतो मूढः स भवेद्ब्रह्मघातकः" इति । **वायुपुराणं** तु निषेधति—"याचते यदि दातारं ब्राह्मणो ज्ञानदुर्बलः । पितरस्तु न तुष्यन्ति दातुर्भोक्तुर्न संशयः ॥" इति । तथा—"कृच्छ्र-

द्वादशरात्रेण मुच्यते कर्मणस्ततः । तस्माद्विद्वान्नैव दद्यान्न याचेत न दापयेत्'' इति । अन्यच्च–''न पङ्क्त्यां विषमं दद्यान्न याचेत न दापयेत् '' इति । अत्र विरोधे, उपकल्पितं याचेत न त्वनुपकल्पितमिति व्यवस्थेत्यविरोधः । निषेधस्यानुकल्पितविषयत्वात् । यमः––'' यावद्धविष्यं भवति यावदिष्टं प्रदीयते । तावदश्नन्ति पितरो यावन्नहि ददाम्यहम् ॥'' अहं ददामीति यावन्नाह तावदश्नन्तीत्यर्थः। एतच्च नापेक्षितविषयम् । '' अपेक्षितं यो न दद्यात् '' इति वचनात् । ननु मौनित्वनियमात्कथं याचनं कथं वा नियमनमिति हस्तादिसंज्ञाप्रतिषेधात् । उच्यते–हस्तादिसंज्ञानिषेधो हविर्गुणाख्यानविषयो न तु याचनादिविषय इत्यविरोधः । तथा च यमः––'' नान्नपानादिकं श्राद्धे वारयेन्मुखतः क्वचित् । अनिष्टत्वाद्बहुत्वाद्वा वारणं हस्तसंज्ञया ॥'' देवलोऽपि––'' अन्नपानकशीतोददधिभ्योऽप्यवलोकितः । वक्तव्ये कारणे संज्ञां कुर्वन्भुञ्जीत पाणिना '' इति । दात्रा व्यञ्जनकमादायावलोकितः वक्तव्ये हस्तेन संज्ञां कुर्यादित्यर्थः । अन्यदामन्त्रिताश्चैवमित्यत्रोक्तं प्राक् । शेषं स्मृतिभ्योऽनुसन्धेयम् । **तृप्तान् ज्ञात्वाऽन्नं प्रकीर्य**—ब्राह्मणांस्तृप्तान् ज्ञात्वा सर्वान्नमुदकेनाप्लाव्या-**ऽग्निदग्धा** इति मन्त्रेण प्रकिरेदित्यर्थः । तथा च **याज्ञवल्क्यः**---''सार्ववर्णिकमन्नाद्यं सम्पृच्छयाप्लाव्य वारिणा । समुत्सृजेद्भुक्तवतामग्रतो विकिरेद्भुवि ॥'' सार्ववर्णिकं सर्वव्यञ्जनसहितम् । अत्राह कश्चित्––असंस्कृतभागधेयत्वाद्विकिरे दध्योदनमेव केवलमिति । तदयुक्तम्–''यदन्नं पिण्डदानेषु तदन्नं विकिरे न्यसेत्॥'' इति **वृद्धयाज्ञवल्क्योक्तेः** । अतृप्तेष्वन्नं न च विकिरेदिति तृप्तान् ज्ञात्वेत्युक्तम् । तथा **चेश्वरसंवादे**–''ज्ञात्वा तृप्तांस्ततो विप्रान्प्रकुर्याद्विकिरासनम्॥'' इति । तृप्तिज्ञानं चान्नाद्यग्रहे आहारानुमानेन प्रतिपन्नम् । अत्र यद्यप्यवकीर्येत्युक्तं, तथाऽपि प्रादेशपरिमाणं स्मृत्यन्तरादवगन्तव्यम् । तथा च **वृद्धयाज्ञवल्क्यः**–''विकिरं भुवि दातव्यं उच्छिष्टेभ्यः षडङ्गुलम् ।'' पठन्ति च–''उच्छिष्टस्योत्तरे भागे पिण्डं दद्यात्षडङ्गुलम् ।'' इति । यत्तु **पुराणसमुच्चये**–''विश्वदेवपितॄणां च अन्तरे च क्षिपेत्कुशान् । तत्रावकिरणं कुर्याद्गाथामेतामुदीरयेत् ॥'' यच्च ''तत्समं विकिरं दद्याद्दैवपित्र्यान्तरे भुवि॥'' इति । तद्द्विजाग्रस्थानबोधकमित्यविरोधः । ''भुक्तवतामग्रतः'' इति **योगीशोक्तेः** । ननु चास्य विकिरसंज्ञकत्वाद्विकीर्येति वाच्यं, न प्रकीर्येति । उच्यते । विकिरं विना श्राद्धं व्यर्थमिति प्रशब्देन द्योतितमित्यदोषः । तथा च **गोभिलः**–''विकिरेण विना श्राद्धं निष्फलं परिकीर्तितम् । एकोद्दिष्टं विशेषेण प्रेतश्राद्धेषु वर्जयेत्॥'' इति । ''यो मोहात्कुरुते श्राद्धं विकिरेण विना क्वचित् । तत्सर्वं व्यर्थतां याति पितृपिण्डोदकादिकम्॥'' इति । अत्रैतत्संदिह्यते–किमपिण्डकश्राद्धे विकिरः स्यादुत नेति, उभयथाऽपि वचनदर्शनात् । तथा हि–''पिण्डनिर्वापरहितं यत्र श्राद्धं विधीयते । स्वधावाचनलोपोऽस्ति विकिरस्तु न लुप्यते ।'' तथा—''न चाग्नौकरणं कुर्यान्नार्घदानं कथंचन । न पिण्डं कल्पनाश्राद्धे विकिरान्नं न चोत्सृजेत्॥'' इति । अत्रैक आहुरुभयशास्त्रत्वाद्विकल्प इति । अन्ये त्वाहुः—यत्र पिण्डदानं न निषिद्धं तत्र चेद्देशकालाद्यसंभवेन पिण्डवर्जं करोति तदा विकिरः स्यान्न तु युगाद्यादिषु पिण्डदाननिषेधेऽपीति । तदेतद्विचारणीयम्–विकिरः प्रधानमुताङ्गमिति । तत्र यदि प्रधानं तर्हि पिण्डप्राधान्यं विरुध्येत । अथाङ्गं तर्ह्यङ्गानां प्रधानधर्मानुरोधित्वात् पिण्डाभावे तदभाव इति किमत्राश्चर्यम् । यच्च विकल्प इत्युक्तम्, तदसत् । विषयकल्पनस्य सद्भावात् । तदुक्तं–''स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक् पृथक्'' इति । तस्माद्देशकालाद्यसंभवे पिण्डाभावेऽपि विकिरेन्न पिण्डनिषेधेऽपीति चतुरस्रम् । तथा च **मोक्षेश्वरनिबन्धे**––''मघायुगादिभरणीश्राद्धे पिण्डं विवर्जयेत् । अवनेजनपूजांन्तमुल्मुकास्तरणानि च ॥ निःशेषमग्नौकरणं विकिरं च षडङ्गुलान्॥'' इति । ततश्च युगाद्यादिषु पिण्डनिषेधे आवाहनाद्यग्नौकरणविकिरवेद्यादिपूजान्तस्वधावाचनादीनां निषेध इति सिद्धम् । एवं विकीर्याचामेत् । तथा च **मरीचिः**––''श्राद्धेषु विकिरं दत्त्वा योवै नाचामति भ्रमात् । पितरस्तस्य षण्मासान्भवन्त्युच्छिष्टभोजिनः ॥''इति । तथा––''विकिरे पिण्डदाने च तर्पणे भोजने तथा । कृते आचमनं प्रोक्तं दर्भत्यागो विधीयते ॥'' इति । अत्रानाग्नितथा—''येषां दाहो न क्रियते येऽग्निदग्धास्तथा परे'' इति **ब्रह्मपुराणवचनात्** । **सकृत्सकृदपो दत्त्वा पूर्ववद्गायत्रीं जपित्वा मधुमतीर्मधुमध्विति च**–ब्राह्मणेभ्यश्चुलुकार्थं सकृत्सकृदपो दत्त्वा पूर्ववत्सप्रणवव्याहृतिं गायत्रीं सकृत्त्रिर्वा मधुमतीर्मधुमध्विति जपेदित्यर्थः । तथा च **मार्कण्डेयः**––''ततस्त्वाचमनार्थाय दद्याच्चापः सकृत्सकृत्।'' इति । वीप्सा पित्र्यदैवद्विजार्था । चकारोऽपोशानेऽपो दत्त्वा गायत्र्यादिजपं द्योतयति । तथा च **गोभिलसूत्रम्**–'अङ्गुष्ठमन्नं निधाय सकृत्सकृदपो दद्यादिति । [illegible] यासु ता मधुमत्यो मधुवाता

इत्यादिस्त्र्यृचम् । मधुमध्विवति द्विरुच्चारणं मन्त्रप्रदर्शनार्थं,संहितायां मधु मधु मध्विवति प्रवर्ग्ये मन्त्रदर्शनात् । अत्रैके देवपूर्वमपोऽशानमाहुः । तदयुक्तं, पितृपूर्वं विहितत्वात् । तथा च **विष्णुः**—"उदङ्मुखेष्वाचमनमादौ ततः प्राङ्मुखेषु दद्यात्" इति । "विसर्गश्चुलुकश्चाग्नौकरणं पङ्क्तिपावनम् । करशुद्धिरपोऽशानं पितृपूर्वाणि षड् सदा॥" इत्युक्तम् । **तृप्ताः स्थेति पृच्छति**—अनन्तरं तृप्ताः स्थेति ब्राह्मणान्पृच्छेदित्यर्थः । अत्रैक आहुः—पङ्क्तिमूर्धन्यप्रश्ने तृप्ताः स्थेति बहुवचनं पूजार्थमिति । तन्न, तृप्ताः स्म इति प्रतिवचने बहुत्वानुपपत्तेः । न चाग्नौकरणादिष्विवात्रैकस्य प्रश्ने दृष्टार्थत्वसंभवः । तस्मात्पङ्क्तिमूर्धन्यं पृच्छति, सर्वान्वेत्यत्र व्यवस्थितविकल्प इत्युक्तम् । ततश्च सर्वे प्रष्टव्या इति । तथा च **यमः**—"यथा ब्रूयुस्तथा कुर्यादनुज्ञातस्तु तैर्द्विजैः॥" इति । अत्रैतच्चिन्त्यते—भोक्तृविप्राणां वमने किं श्राद्धं समापनीयमुत किं कर्तव्यमिति । अत्रैके समापनीयमित्याहुः । तदयुक्तम् । तस्य स्मृतिविरुद्धत्वात् । तथा च **हेमाद्रिकल्पे**—"अकृते पिण्डदाने तु ब्राह्मणो वमते यदि । पुनः पाकं प्रकुर्वीत श्राद्धं कुर्याद्यथाविधि ॥" **धर्मप्रदीपे**ऽपि—"अकृते पिण्डदाने तु भुञ्जानो ब्राह्मणो वमेत् । पाकं कृत्वा पुनः श्राद्धं कर्तव्यं तु यथाविधि॥" इति । अत्राकृत इत्युपादानात्कृते समापनमिति चेत्, मैवम् । वमनस्य श्राद्धविघ्नरूपोपपातकत्वात् । अतश्चोत्तरेद्युरेव पुनः श्राद्धमित्युचितम् । तथा च **स्मार्तलिङ्गम्**—"वमने वा विरेके वा तद्दिनं परिवर्जयेत्।" इति । न चैतन्निमन्त्रणानन्तरं श्राद्धात्पूर्वं वमनविषयमिति वाच्यम्, "श्राद्धविघ्ने समुत्पन्ने अन्तरा मृतसूतके । वदन्ति शुद्धौ तत्कार्यं दर्शे वापि विचक्षणाः ॥" इति उत्तरेद्युर्विधानोपपत्तेः । दाक्षिणात्याः पुनरत्र प्रायश्चित्तमाहुः । तथा च पठन्ति—"पित्र्यद्विजानां मध्ये तु पितुश्च वमनं यदि । तद्दिने चोपवासश्च पुनः श्राद्धं परेऽहनि॥" इति । "सर्वमन्नं समादाय मन्त्रैः प्राणादिपञ्चकैः । द्वात्रिंशदाहुतीर्हुत्वा शेषं कर्म समाचरेत्" इति । अत्रानूचानाः प्रमाणम् । **तृप्ताः स्म इत्यनुज्ञातः शेषमन्नमनुज्ञाप्य**—ततस्तृप्ताः स्मेति द्विजैरुक्ते शेषमन्नं किं क्रियतामिति भोक्तॄन्पृष्ट्वा इष्टैः सह भुज्यतामिति अनुज्ञापयेदित्यर्थः । एतदपि सर्वापेक्षं न पङ्क्तिमूर्धन्यस्यैव । ननु च श्राद्धार्थोद्धृतपाक एव शेषशब्दः न पाकान्तरे, तत्कथं पाकान्तरभोजनं तद्दानं चेति । उच्यते—गृहसिद्धस्य सर्वस्यापि शेषत्वेन दानभोजनत्वापत्तेः । तथा च **यमः**—"भक्ष्यं भोज्यं तथा पेयं यत्किंचित्पच्यते गृहे । न भोक्तव्यं पितॄणां तदनिवेद्य कथंचन" इति । अतश्च शेषस्यापि पितुरुद्देशेन दानमित्युक्तम् । अत्रैतच्चिन्त्यते—किं निरग्नेरुल्मुकनिधानं स्यादुत नेति । अत्रैक आहुः—उल्मुकस्य दक्षिणाग्निसंभूतत्वात्तदभाव उल्मुकं नेति । अन्ये त्वाहुः—पिण्डपितृयज्ञस्य विहितत्वात्स्मार्ताग्नेर्न, न च निरग्नेरिति । अपर आहुः—"न देवताग्निशब्दक्रियाः परार्थत्वात्"इति पारिभाषिकसूत्रान्निषिद्धत्वादग्न्यन्तरेण न स्यादिति । निरग्नेरपि श्राद्धाधिकारित्वान्निषादस्थपतीष्टिवल्लौकिकाग्नेराविरुद्धत्वात्तदग्निनेत्येके । एवं च सति उल्मुकनिधानमनियतमिति । अत्रोच्यते—यदुक्तं दक्षिणाग्नेरभावे तन्नेति तदयुक्तम्, पिण्डपितृयज्ञवदुपचार इत्यनेन स्मार्ताग्नेः प्राप्तत्वात् । यच्चोक्तं—पितृयज्ञेऽस्य विहितत्वान्निरग्नेर्नेति । तदप्यसारम् । अकरणे प्रत्यवायस्मरणान्नित्यत्वोपलब्धेः । यच्चाभिहितं न देवताग्नीत्यादिनाग्नेः प्रतिनिधिनेति तदप्यनुचितम् । पिण्डपितृयज्ञवदित्यातिदेशेन लौकिकाग्न्युपादानस्य वैयर्थ्यापत्तेः । यच्चाम्नायिनिषादस्थपतीष्टिवदविरुद्धमिति तदपि नित्यत्वानुपलब्धेर्न संतुष्टिकरम् । तस्माद्गुणफलविधेरुल्मुकनिधानं साग्निनिरग्न्योर्नित्यमिति सिद्धम् । तथा च **वृद्धयाज्ञवल्क्यः**—"पितृरूपास्त असुराः पिशाचा राक्षसाश्च ये । तेषां वै रक्षणार्थाय क्षिपेदग्निं तु नैर्ऋते ॥ मण्डलेष्वग्निदाहं ये न कुर्वन्ति द्विजोत्तमाः । निराशाः पितरस्तेषां पैशाचं श्राद्धमुच्यते ॥" **स्कन्दसंवादे**—"ये रूपाणीति मन्त्रेण न्यसेदुल्मुकमन्तिके । शुष्कगोमयसंभूतं यावच्छ्राद्धं समाप्यते ॥ अजीर्णदोषनाशाय पितॄणामग्निवर्धनम् ।" श्रुतिरपि—"स यदनिधायोल्मुकमथैतत्पितृभ्यो दद्यादसुररक्षसानि हैषामेतद्विरम्भीरं तथो हैतत्पितॄणामसुररक्षसानि न विमथ्नते, तस्मात्पुरस्तादुल्मुकं निदधाति" इति । **सर्वमन्नमेकतोद्धृत्योच्छिष्टसमीपे दर्भेषु त्रींस्त्रीन्पिण्डानवनेज्य दद्यात्**—एकतोद्धृत्येति छान्दसः सन्धिः । सर्वशब्दः सूपाद्यपेक्षो न यावद्वाचकः । उच्छिष्टसमीप इति सदेशोपलक्षणं पारिभाषिकम् । तथा **चात्रिः**—"पितॄणामासनस्थानादग्रतास्त्रिष्वरत्निषु । उच्छिष्टसंनिधानेन नोच्छिष्टासनसंनिधौ ॥" **व्यासो**ऽपि—"अरत्निमात्रमुत्सृज्य पिण्डांस्तत्र प्रदापयेत् । यत्रोपस्पृशतां वापि प्राप्नुवन्ति न बिन्दवः॥" इति । अत्र यथासंभवं विकल्पः—विकिरपिण्डविवक्षयाऽऽसनस्थानादुच्छिष्टं, ततो विकिरस्ततः पिण्डा वा त्रिरत्निव्यवस्था वा । "व्याममात्रं समुत्सृज्य पिण्डांस्तत्र प्रदापयेत्" इति जातूकर्ण्यवचनम् । वीप्सा मातामहादिविषया ।

अवनेज्येति स्वार्थिको णिच् । दद्यादिति स्मृत्युक्तवाक्यं दर्शयति गोत्रादिप्रकाशकम् । ततश्च सर्वमदनीयमेकपात्र उद्धृत्य पत्न्या पिण्डान्कारयित्वा यथोक्तदेशे वेद्यादि कृत्वा पृथक्पृथगवनिज्य दर्भेषु यथोपदेशं पिण्डान्दद्यादित्यर्थः । तथाच **स्कान्दे**–"अपसव्यं वामजानु पातपूर्वं षडानन । पत्नी पिण्डांस्तु मृद्नीयाद्विवर्गस्य सहायिनी " इति । अत्र यद्यपि सामान्येन सर्वमित्युक्तं तथापि माषान्नवर्जं द्रष्टव्यम् । तथा च **वृद्धयाज्ञवल्यः**–" माषान् सर्वत्र नैवेद्ये पिण्डेऽग्नौ च विवर्जयेत् । यथा मद्यं तथा माषा निषिद्धाश्चाग्निपिण्डयोः" इति । अत्रैतत्संदिह्यते-"पिण्डपितृयज्ञवदुपचारः पित्र्ये"इत्यनेन प्राप्तेषु दर्भावनेजनपिण्डेषु पुनस्तद्ग्रहणं कुत इति। तथा च पिण्डपितृयज्ञसूत्रम् तद्दक्षिणेनोल्लिखत्यपहता इत्यपरेणोल्मुकं पुरस्तात्करोति ये रूपाणि इत्युदपात्रेणावनेजयत्यपसव्यं२ सव्येन वोद्धरणसामर्थ्यादसाववनेनिक्ष्वेति यजमानस्य पितृप्रभृतित्रीनुपमूलं९ सकृदाच्छिन्नानि रेखायां कृत्वा यथावनिक्तं पिण्डान्ददात्वसावेतत्त इत्यादि । अत्रैक आहुः––पिण्डपितृयज्ञे लेखायामेवावनिज्य दर्भेषु पिण्डदानमिह तु दर्भेष्वेवावनेजनामित्येतदर्थमिति । तथा च–––"अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति पात्रतः । द्वितीयं च तृतीयं च मध्यदेशाग्रदेशयोः" उपलक्षणपरमित्यन्ये । उपलक्षणे उभयग्रहणानुपपात्तिः । परिसंख्याने च अवनेज्य दर्भेषु दद्यादिति ब्रूयादिति **हलायुधः** । **कर्कोपाध्यायास्तु**––उच्छिष्टसामीप्योपदेशान्न परिसंख्येत्याहुः । एवं च सति कथमियं पुनरुक्तिः सूक्तेति । अत्रोच्यते––यदुक्तं कुशोपर्यवनेजनार्थं पुनरुक्तिरिति तदयुक्तं, तथाविधावनेजनस्य छन्दोगविषयत्वात् । तथा च तत्परिशिष्टम्—"प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्ववत् । अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति निस्तिलाः ।।" इति । प्रागग्रत्वं निस्तिलत्वं च वृद्धिश्राद्धविषयम् । न च तथा शङ्कनीयम् । अवनेज्य दर्भेषु दद्यादित्यन्वयप्रतिभानात् । तथा च **पिण्डपितृयज्ञसूत्रम्—असाववनेनिक्ष्वेत्यादि** । अपि च **कात्यायनस्कन्दसंवादवचनम्**–––"नामगोत्रे समुच्चार्य प्रदद्यादवनेजनम् । कुशैरास्तरणं कुर्याद्दक्षिणाग्रैस्ततः परम्।। द्विगुणांस्तु कुशान्कृत्वा सतिलानर्घसंयुतान् । अवनेनिक्ष्व चोक्त्वाऽथ कुशान् भूमौ परिस्तरेत्" इति । यत्त्वभिहितमुपलक्षणपरिसंख्ये इति तदुभयमपि **हलायुधेनैव** दूषितमित्युपेक्षणीयम् । न च तथेष्टम् । वेद्यादिकरणोपपत्तेः । तथा च **देवलः**–" मण्डलं चतुरस्रं वा दक्षिणावर्तकं महत् । एकदर्भेण तन्मध्य उल्लिखेच्चिश्च तं त्यजेत्" **ब्रह्माण्डेऽपि**—"सव्योत्तराभ्यां पाणिभ्यां कुर्यादुल्लेखनं बुधः । वज्रेणाथ कुशैर्वापि उल्लिखेत्तु महीं द्विजः" इति । यच्च **हलायुधेनैव** पिण्डपितृयज्ञवत्पिण्डदानविधिरित्युक्तं तत्पौनरुक्त्यापरिहाराद्विषयान्तरानुपलब्धेश्च मन्दमिवाभाति । "पिण्डपितृयज्ञवदुपचारः" इत्यनेनैव तद्विधेः प्राप्तत्वात् । तस्माद्विषयान्तरबोधनेन पौनरुक्त्यं परिहर्तव्यम् । तद्यथा–पिण्डपितृयज्ञवदित्यतिदेशो यद्यपि साग्निनिरग्न्योरविशेषेण प्राप्तस्तथाऽपि निरग्नेर्विषयान्तरदर्शनाद्यथोचितं साग्निपर एव । तस्यैव सर्वाङ्गोपसंहारस्य न्याय्यत्वात् । निरग्नेस्तु हस्ताग्नौकरणादिविषयान्तरदर्शनात्तदर्थमेवैतत्सूत्रारम्भ इत्यपुनरुक्तिः । अतश्च निरग्नेरुपमूलल्लूनकुशादिप्रतिषेधार्थमिदं सूत्रमिति सिद्धम् । तेन निरग्नेर्महालयादिश्राद्धेषूपमूलल्लूनकुशास्तरणं हस्तद्वयेनावनेजनमेतत्तेऽन्नं स्वधेति प्रयोगश्च न भवतीत्यर्थः । तथा च श्रुतिः–"साग्नेरासनादौ समूलता पिण्डेषु सकृदाच्छिन्नता" इति । किं च "समूलस्तु भवेद्दर्भः" इति प्रागुक्तम् । यत्तु **शातपथश्रुतौ**–"सकृदाच्छिन्नान्युपमूलं दितानि भवन्ति" इत्युक्तं तदपि साग्निपरमेव । **सुमन्तुरपि**–"असाववनेनिक्ष्वेति प्रतिपुरुषं त्रिस्त्रिरेकेन हस्तेन विदधीतावनेजनम्" । "अपसव्येन हस्तेन निर्वपेदुदकं भुवि" इति **मनूक्तेश्च** । तथा–"श्राद्धे पिण्डे विवाहे च दाने चैकेन दीयते । तर्पणे तूभयेनैव जलं देयं तु नान्यथा" इति । **धर्मप्रदीपेऽपि**–"गङ्गायां दशपिण्डे च पिण्डशब्दो विधीयते । अतोऽन्यत्रान्नशब्दः स्याद्गङ्गादिषु सरित्सु च ॥" तथा च **हेमाद्रिप्रद्धृता**–"महालये गयाश्राद्धे प्रेतश्राद्धे दशाहिके । पिण्डशब्दप्रयोगः स्यादन्नमन्यत्र कीर्तयेत्" इति । अत्रैक आहुः–"असावेतत्ते" इति श्रुत्या, **सूत्रकृता** चैतत्त इत्युक्तत्वाद्वाजसनेयिनां पिण्डेषु नपुंसकप्रयोगः । अन्ये तु पिण्डशब्ददर्शनादेष ते पिण्डः स्वधेति सर्वत्र प्रयोग इत्याहुः । पिण्डशब्दचशब्दो महालयादिसमुच्चयार्थः । तदुभयमपि विषयानवलोकननिबन्धनामित्यवगन्तव्यम् । अतश्च विहितेषु पिण्डशब्दस्तदतिरिक्तेष्वन्नशब्द इति सूक्तम् । यदि तु श्रुतिविरुद्धमियैतास्मिन् विषये विचिकित्सा तर्ह्येवं प्रयोगोऽस्तु–एतत्ते पिण्डान्नं स्वधेति । तथा च **श्राद्धकल्पलतायाम्**--एतत्ते पिण्डान्नामित्यलं प्रपञ्चेन। एतच्च पिण्डदानं प्रत्येकमेकश्वासेन कार्यम् । "यावदेवोच्चरेन्मन्त्रांस्तावत्प्राणान्निरोधयेत्" इति वचनात् । अत्रैतच्चिन्त्यते–किं पिण्डपङ्क्तयः प्रागुपक्रमाः पश्चादपवर्गा उत पश्चादुपक्रमाः प्रागपवर्गा इति । अत्रैक आहुः–पर्वभागे पित्रादिवर्गार्थास्तरणं, पश्चाद्भागे तु मात्रादिवर्गार्थमि-

त्यापस्तम्बगृह्यवचनात्त्रीभ्यश्च पिण्डा इह पश्चिमाः स्युरिति भाष्यार्थ**संग्रहकार**वचनाच्च पश्चादपवर्गा इति । तथा "पिण्डान्पश्चिमेन तत्पत्नीनां किंचिदन्तर्धाय" इति **शाङ्खायनगृह्याद**पीति । अन्ये त्वाहुः——पित्र्यकर्मत्वात्पङ्क्तीनां प्राक्संस्थताया अनुपपत्तेः प्रत्यक्संस्थैवेति । अत्रोच्यते——यदुक्तं "प्रागुपक्रमाः" इति तत्र तथा सति पित्र्यकर्मणि प्रदक्षिणोपचारः स्यात् । पितॄणामप्रदक्षिणमित्यादिवचनानां च वैयर्थ्यापत्तेः । द्वितीयेऽपि स एव दोषः । न चैवमिष्टं 'प्रत्यगुपक्रमाः प्रागपवर्गाः पितृब्राह्मणसंस्था भवन्ति, दक्षिणादिगुपक्रमा उदगपवर्गा वैश्वदेवद्विजसंस्था भवन्ति' इति **बौधायनेन** ब्राह्मणोपवेशनस्मृत्या पङ्क्तीनामपि तथैव ज्ञापितत्वात् । अन्यथा वैषम्यव्युत्क्रमोपपत्तेः । सदाचारादपि प्राक्संस्थतैवेति । **यत्त्वापस्तम्बादि**गृह्यद्वयं यच्च—"अग्नेर्दक्षिणदेशे तु स्थानं कुर्वीत सैकतम् । मण्डलं चतुरस्रं वा दक्षिणाक्प्रवणं तथा ॥ तत्र स्थाने ततो दर्भानेकमूलान्वितान्बहून् । दक्षिणाग्रानुदक्संस्थान्द्विधा तान्स्तृणुयात्समम् ॥ पूर्वभागस्थदर्भेषु पितृपिण्डान्विनिक्षिपेत् । पश्चात्स्तृतेषु दर्भेषु मातृपिण्डान्विचक्षणः" इति **वृद्धवसिष्ठ**वचनं तत्तच्छाखिनामेवेत्यविरोधः । पुनश्चिन्त्यते——किं पिण्डानां प्रमाणं नियतमुतानियतमिति । अत्रैक आहुः——"कपित्थबिल्वमात्रांश्च दद्यादामलकैः समान् । कुक्कुटाण्डप्रमाणं वा बदरेण समानथ । नालिकेरसमान्वाऽपि अधिकान्न प्रदापयेत् । प्रमाणमेतत्पिण्डानामङ्गिरा मुनिरब्रवीत् ॥" इत्यनेन विकल्पितत्वादनियतमिति । तदयुक्तम् । अस्य वचनस्य श्राद्धविशेषविषयत्वेन व्यवस्थितत्वात् । तथा च **मरीचिः**-"आर्द्रामलकमात्रांस्तु पिण्डान् कुर्वीत पार्वणे । एकोद्दिष्टे बिल्वमात्रं पिण्डमेकं तु निर्वपेत् । नवश्राद्धे स्थूलतरं तस्मादपि तु निर्वपेत् । तस्मादपि स्थूलतरमाशौचे प्रतिवासरम्" इति । अत्रैक आक्षिपन्ति पिण्डदानं केवलपिण्डैरेव न भुग्नकुशैरिति । तदयुक्तम् । अंशभागिपत्नीनां कुशैरेव श्वशुरान्तर्धानोपपत्तेः । तथा—"श्वशुरस्याग्रतो यस्माच्छिरःप्रच्छादनक्रिया । पुत्रैर्दर्भेण सा कार्या मातुरभ्युदयार्थिभिः" इति । **मत्स्यपुराणेऽपि**—"ततः कृत्वाऽन्तरे दद्यात्तत्पत्नीभ्यः कुशान्बुधः ।" इति । **आचान्तेष्वित्येके**--एकग्रहणं स्वस्वशाखोक्तविधिज्ञापनार्थम् । "मुनिभिर्भिन्नकालं तु पिण्डदाने तु यत्स्मृतम् । तत्स्वशाखागतं यत्र तत्तत्कुर्याद्विचक्षणः ॥" इति वचनात् । **संग्रहकारोऽपि**—"यान्यत्र कालभेदेन कर्माणि मुनयो जगुः । स्वस्वगृह्यानुसारेण विकल्पं तेषु युज्यते ॥" इति । ततश्चाचान्तेषु द्विजेषु पिण्डदानमित्येके मन्यन्ते । न **कात्यायन** इत्यर्थः । विकल्प एवायमिति **कर्कादयः** । अत्रैतत्संदिह्यते—किं लेपभुजां दर्भमूलेषु दद्यादुत दर्भाग्रेष्विति । अत्रैक आहुः—"दर्भमूले लेपभुजः प्रीणयेल्लेपघर्षणैः" इत्यादिवचनाद्दर्भमूलेष्विति । तदयुक्तम् । "लेपभाजश्चतुर्थाद्याः" इति **मात्स्य**वचनेन चतुर्थपुरुषादीनां लेपभागित्वेन दर्भमूले वैषम्योपपत्तेः । **मार्कण्डेयोऽपि**—"लेपसंबन्धिनश्चान्ये पितामहपितामहात्" इति । एवं तर्हि तद्दर्भमूले लेपं भुञ्जत इत्यर्थकमिति चेत् । न, अतश्च करावघर्षणविषयत्वात् । तथा च **विष्णुः**—"दर्भमूलेषु करावघर्षणमिति ।" अतश्च दर्भाग्रेषु लेपभुजां दत्त्वा दर्भमूलेषु करप्रोञ्छनमित्यविरोधः । तथा च **याज्ञवल्क्यः**—"दत्ते पिण्डे ततो हस्तं त्रिर्मृज्याल्लेपभागिनाम् । कुशाग्रे संप्रदातव्यं प्रीयन्तां लेपभागिनः" इति । पठन्ति च—"उत्तरे कुशमूलं तु पितृमूलं तु दक्षिणे । कुशमूलेषु यो दद्यान्निराशाः पितरो गताः ॥ ददाति लेपभागेभ्यः पिण्डानामग्रतः सदा । प्रपितान्ते च यो दद्यात्तृप्तिः पञ्चदशाहिकी" इति । **आचान्तेषूदकं पुष्पाण्यक्षतानक्षय्योदकं च दद्यात्**-चकारः शास्त्रान्तरोक्तमन्त्रैरुदकादिदानार्थः । तथा च **पुराणम्**—"अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् । ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे" । इत्युदकदानम् । "लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे । लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं सदाऽस्तु मे ॥" इत्यादिना पुष्पादिदानम् । "अक्षतं चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिर्मम । यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम" इत्यक्षतदानम् । एतच्च यज्ञोपवीतिना बोध्यम्, आशीरूपत्वात् । तथा—"सुप्रोक्षितादि यत्कर्म तत्कर्तव्यं यवादिना ।" सव्येनेत्यर्थः । तथा—"विसर्जनं सौमनस्यमाशिषां प्रार्थनं विना । पित्र्यमन्यत्प्रकर्तव्यं प्राचीनावीतिना सदा" इत्युक्तम् । अत्राचान्तेष्वित्यनुवृत्तौ पुनस्तद्ग्रहणं वेत्यासंकल्पान्तं पिण्डोपयुक्तं कर्माचमनात्पूर्वमेवेति ज्ञापनार्थम् । अतश्च अनाचान्तेषु तत्सर्वं कृत्वाऽऽचान्तेषु उदकादिकं दत्त्वाऽक्षय्योदकं दद्यादित्यर्थः । तच्चोक्तं **पिण्डयज्ञसूत्रे**—'तथा च पिण्डान्ददातीत्युपक्रम्यात्र **पितर** इत्युक्त्वोदङ्ङास्त आत्तमनाः **ऽमीमदन्त** इति अवनेज्य पूर्ववन्नीवीं विस्रस्य **नमो व** इत्यञ्जलिं करोत्येतद्व इत्युपास्यति सूत्राणि प्रतिपिण्डमूर्णादशां वा वयस्युत्तरे यजमानहृल्लोमानि वोर्जमित्यपो निषिञ्चत्यवधायावजिघ्रति यजमान उल्मुकं सकृदाच्छिन्नान्यग्नावधत्त इति मध्यमं पिण्डं पत्नी प्राश्नाति पुत्रकामेति ।' अस्यार्थः——पिण्डान्दत्त्वाऽऽचम्य यवानादायात्र **पितर**

इत्यादि **वृषायध्वमित्यन्तं** मन्त्रं **जपित्वाऽप्रदक्षिणं** वामेनावृत्योदङ्मुखो यथाशक्ति श्वासमनुरुन्धञ्छुभं ध्यायेत् । तथा च परिशिष्टम्—“ वामेनावर्तनं केचिदुदगन्तं प्रचक्षते ।” **स्कन्दसंवादेऽपि**—“ प्रक्षाल्य हस्तावाचम्य शुभं ध्यायेदुदङ्मुखः ” इति । अत्रैके शुभध्यानं सव्येनेत्याहुः । तन्न, प्रमाणाभावात् । आवृत्य तेनैव प्रदक्षिणमावृत्या**मीमदन्त**त्यादिमन्त्रं जपित्वाऽक्षतान् भुवि पिण्डमूले क्षिपेदित्यर्थः । “प्रदक्षिणमथावृत्य पूजयेदक्षतैर्यवैः ” इति वचनात् । “ पितॄंश्च मनसा ध्यात्वा अक्षतान्निक्षिपेद्भुवि ” इति **वृद्धयाज्ञवल्क्योक्तेश्च** । अवनेज्य पूर्ववदिति गोत्राद्युच्चारविधिनेत्यर्थः । तथा च श्रुतिः—‘अथोदपात्रमादायावनेजयत्यसाववनेनिक्ष्वेत्येव यजमानस्य ।पितर इत्यादि ।’ यत्तु—“ तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत् ” इति वचनं यच्च “हस्तान्न वारिणा कार्यं पुनः प्रत्यवनेजनम् ” इति **स्कन्दसंवाद**वचनं तदन्यशाखिविषयम् । इह तु पूर्ववदवनेज्येत्यतिदेशात्, अतिदेशविधेरानित्यत्वादत्रापि प्रक्षालनजलेनैवेति वा । नीवीं विस्रस्य **नमो व** इति मन्त्रेण षडञ्जलीन्करोतीत्यर्थः । नन्वञ्जलिमित्येकत्वात्कथं षडञ्जलीनिति । षडृतुनमस्काररूपत्वादञ्जलेरित्यदोषः । तथा च श्रुतिः—“षट्कृत्वो नमस्करोति षड्वा ऋतवः पितरः” इत्यादि । **एतद्व** इत्यनेन मन्त्रेण प्रतिपिण्डं सूत्राण्युपास्यति ददातीत्यर्थः । **ननु** च प्रतिपिण्डमिति पृथग्विधेरेतद्व इति कथं तन्त्रविधिः । एकग्रहणेनैव त्रिषु दानेन सकृन्मन्त्रविधानार्थमित्यदोषः । ‘एकद्रव्ये कर्मावृत्तौ’ इति परिभाषितत्वात् । केचित्प्रतिपिण्डमित्युक्तत्वान्मन्त्रावृत्त्यैव सूत्रदानमित्याहुः । ऊर्णादशां वेति सूत्राभाव इत्यर्थः । यत्तु “दशां तु वर्जयेत्प्राज्ञो यद्यप्यहतवस्त्रजाम्” इति तत्सूत्रसंभवे द्रष्टव्यम् । दशाया अभावविषयत्वात् । तथा च **शौनकः**—“सूत्राभावे दशामूर्णां वा”इति । यत्तु“**नमो वः पितरो** मन्त्रं जपन्सूत्रं प्रदापयेत्”इति सूत्रे मन्त्रान्तरमुक्तं तदन्यशाखिविषयम् । वाजसनेयिनां त्वेतद्व इति **कात्यायनो**क्तत्वात् । तथा च **व्याघ्रोऽपि**—“एतद्वः **पितरो** वासोदशां दद्यात्पृथक्पृथक्” इति । दशाद्यभावे **सूतवाक्यम्**—“ततः सूत्रं प्रदातव्यं कार्पासमथवा नवम् । दुकूल पट्टपत्त्र वा तदभावे कुशान्न्यसेत्” इति । **स्कन्दसंवादेऽपि**—“कुशाद्यभावे वयसि तूत्तरे लोम वा स्वकम्” इति । उत्तरे वयसि पञ्चाशदूर्ध्वं हृल्लोमेति विशिष्टविधिः । **ऊर्ज**मित्यपो निषिञ्चतीत्यत्र गोत्राद्युच्चारपूर्वकं तिलोदकदानमित्येके । ऊर्जदाने तिलादिद्रव्यस्य गोत्राद्युच्चारस्य चानुक्तत्वात् केवलजलेनेत्यन्ये । तथा च **बृहस्पतिः**—“अनभ्यर्च्योदपात्रं तु तेषामुपरि निक्षिपेत् ।” पठन्ति च—“सर्वत्रैव पवित्राणि पयो मधु तिलास्तथा । ऊर्जकाले न दातव्याः केवलं चोदकं क्षिपेत्” इति । अत्रभवन्तो भूदेवाः प्रमाणम् । अवधायेत्यत्र यजमानग्रहणं ऋत्विग्व्युदासार्थम् । अवधायेति पात्र इति शेषः । “पात्रे पिण्डान्समुद्धृत्य आघ्राय पितृपिण्डवत्” इति **वृद्धयाज्ञवल्क्योक्तेः** । उल्मुकं सकृदाच्छिन्नान्यग्नावाधत्त इति क्षिपतीत्यर्थः । सकृदाच्छिन्नानीति साग्निपरमिति प्रागुक्तम् । एवं पिण्डोपयुक्तं पूजनान्तं कृत्वा चतुर्थ्यन्तसंकल्पेन धूपादिकं निवेदयेत् । तथा च **स्कन्दसंवादे**—“समभ्यर्च्य धूपदीपनैवेद्यानि निवेदयेत् । प्रकुर्यादथ संकल्पं कृत्वाक्षय्योदकं ततः ” इति । ततः सुप्रोक्षितमस्त्वित्यादिनोदकादिकं दत्त्वाऽक्षय्योदकं तन्त्रेण दद्यात् । तथा च **कात्यायनः**—“ अक्षय्योदकदानं तु अर्घदानं विशिष्यते । षष्ठ्यैव नित्यं तत्कुर्यान्न चतुर्थ्या कदाचन ” इति । अतिदेशस्तन्त्रानिषेधार्थः । “अक्षय्यमस्त्विति प्रोक्तः प्रत्येकं पितृतः क्रमात् ।” इति शङ्खवचनात् । **अघोराः पितरः सन्तु सन्तु इत्युक्ते गोत्रं नो वर्धतां वर्धतामित्युक्ते दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च । श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्त्वित्याशिषः प्रतिगृह्य**—इतिशब्द आद्यर्थे । तेन स्मृत्युक्तमन्यदप्याशीःप्रार्थनमिति श्लोककरणमित्यर्थः । सन्त्वित्युक्त इति प्रतिवचनग्रहणं सर्वत्र प्राप्त्यर्थम् । तथा च **स्कन्दसंवादे**—“ अघोराः पितरः सन्तु सन्त्वित्युक्ते पुनर्द्विजैः । गोत्रं तथा वर्धतां नस्तथेत्युक्तश्च तैः पुनः ॥ दातारो नोऽभिवर्धन्तां वेदाः संततिरेव च । श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्त्विति ॥ अन्नं च नो बहु भवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा च याचिष्म कंचन ॥ इत्येता आशिषः सर्वा गृह्णीयात्प्रतिभाषितम्” इति । अथ चेतिशब्दः प्रकारे । तेन तिलकमूर्धाभिषेकसव्यपूजादिप्रकारेणाशीःप्रार्थनं कर्तव्यमित्यर्थः । तथा च **वृद्धयाज्ञवल्क्यः**—“ ततश्च तिलकं कुर्यान्मन्त्रेणानेन यत्नतः । मन्त्रश्च नित्यानुष्ठानेत्यादि प्रागेव दर्शितः ” । एतच्चाशीःप्रार्थनं पित्र्येष्वेव यज्ञोपवीतिना कार्यमिति प्रागुक्तम् । “दक्षिणां दिशमाकाङ्क्षन्याचेतेमान्वरान्पितॄन् ” इति **मनु**वचनात् । **स्कन्दसंवादेऽपि**—“ अक्षय्यं सर्वमेवास्त्वित्युक्त्वा भूयः समर्चयेत् ” इति मूर्धाभिषेकश्चाक्षय्यदानात्पूर्वमिति केचित् ।

स्वधावाचनीयान्सपवित्रान्कुशानास्तीर्य स्वधां वाचयिष्य इति पृच्छति–स्वधावाचनीया न्युब्जोपरिस्थापिताः कुशाः पवित्राणि तदधःस्थापितानि । तेषां कृतप्रयोजनत्वादन्यानि पवित्राणि कार्याणीत्यन्ये । तत्कर्कादिभिरनादृतमित्युपेक्षणीयम् । ततश्च सपवित्रान्स्वधावाचनीयकुशानादायास्तीर्य स्वधां वाचयिष्य इति पङ्क्तिमूर्धन्यं सर्वान्वा पृच्छेदित्यर्थः । अत्रैतत्संदिह्यते–किमेषामास्तरणं पङ्क्तिमध्ये उत पार्श्वे इति । अत्रैक आहुः पिण्डपुरस्तादिति । पिण्डान्तराल इत्यन्ये । एतदुभयमप्ययुक्तं, प्रमाणाभावात् । अतश्च पिण्डोपरि परिस्तीर्यापोऽभिनिषिञ्चेदित्यर्थः । तथा च **गोभिलसूत्रम्**--"स्वधावाचनीयान्पिण्डोपरि समास्तीर्य"इति । **परिशिष्टेऽपि**--"पवित्रान्तर्हितान्पिडान्सिञ्चेदुत्तानपात्रकृत्" इति । न चैतस्य पारशाखिकत्वान्नैवमिति वाच्यम् । "स्वधावाचानिकं सर्वं पिण्डोपरि समाचरेत्" इति **मात्स्यपुराणोक्तेः** । स्वधावाचनमेष्विति स्वधावाचनीया इति छप्रत्ययान्तेन परप्रयुक्तास्तन्नाशे प्रतिनिधिः कर्तव्य इत्युक्तं मुख्यद्रव्यापचारत्वात् । तथा ह्युत्तरं सूत्रं—स्वधावाचनीयेष्वपो निषिञ्चतीति । **वाच्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च स्वधोच्यतामित्यस्तु स्वधेत्युच्यमाने स्वधावाचनीयेष्वपो निषिञ्चति**–चकारो मात्रादिसमुच्चयार्थः । पृथङ्निर्देशस्तन्त्राभावप्रदर्शनार्थः । स्वधावाचन एव चेत्युक्तेः वाच्यतामिति । **उत्तानं पात्रं कृत्वा यथाशक्ति दक्षिणां दद्याद्ब्राह्मणेभ्यो विश्वेदेवाः प्रीयन्तामिति दैवैर्वाचयित्वा**–पात्रं न्युब्जम्, यथाशक्तीति ग्रहणं समापनदक्षिणाया अपि विध्यर्थं, ब्राह्मणेभ्य इति स्मृत्यन्तरोक्तपित्रुद्देशव्युदासार्थम् । तेन ब्राह्मणोद्देशेनैव दक्षिणादानं सूत्रकृदभिप्रेतम् । तथा च **देवलः**—"आचान्तेभ्यो द्विजेभ्यश्च प्रयच्छेदथ दाक्षिणाम्" इति । पित्रुद्देशपक्षस्तु—"पितृभ्यः प्रथमं भक्त्या तन्मनस्कः समाहितः । सुस्वधेत्याशिषा युक्तो दद्याच्छक्त्या तु दक्षिणाम्" इत्यादि **विष्णुपुराणा**द्युक्तोऽन्यशाखिविषयः । वाचयित्वेति कारितार्थनिर्देशाद्विश्वेदेवाः प्रीयन्तामिति ब्रूतेति द्विजान्प्रत्यध्येषणमुक्तम् । ततश्च विश्वेदेवाः प्रीयन्तामिति ब्रूतेति विप्रानध्येष्य विश्वेदेवाः प्रीयन्तामिति तैरुक्ते पितृपूर्वं सव्येन दक्षिणां दद्यादित्यर्थः । अत्रायं प्रयोगः–अस्मत्पितुरमुकशर्मणोऽमुकसगोत्रस्य वसुरूपस्य श्राद्धप्रतिष्ठार्थममुकगोत्रायामुकशर्मणे ब्राह्मणायेत्यादि तुभ्यमहं संप्रदद इति । तन्त्रत्वे त्वस्मत्पितॄणामिति षष्ठीबहुवचनम् । पित्रुद्देशपक्षे तु अस्मत्पित्रे पितृभ्य इति वा चतुर्थ्योद्दिश्य न ब्राह्मणोद्देश इति विशेषः । "सतिलं नामगोत्राभ्यां दद्याच्छक्त्या तु दक्षिणाम् । स्वस्तिवाचनकं कुर्यात्पिण्डानुद्धृत्य भक्तितः ॥" इति वचनात् । सूत्रे यद्यपि दक्षिणामिति सामान्येनोक्तं तथापि पित्र्ये रजतं दैवे स्वर्णमिति द्रष्टव्यम् । " कनकं निर्जराणां तु पितॄणां रजतं स्मृतम्॥" इति वचनात् । अत्रैक आहुः—" समं स्यादश्रुतत्वात् " इति न्यायाद्दक्षिणादानं सर्वेषां समानमिति । अन्ये त्वाहुः–दैवपूर्वं श्राद्धमित्युक्तत्वात्पूर्वं दैवे दक्षिणादानं, पश्चात्पित्रे इति । अपरे त्वाहुः--पित्रुद्देशपक्षे दक्षिणादानमपसव्येन दैवपूर्वं ब्राह्मणोद्देशे तु सव्येनेति । अपसव्यं तु तत्रापि । " मत्स्यो हिं भगवान्मेने" इत्यादिस्मृतेः । इतरे पुनरन्यथाऽऽहुः—उभयशास्त्रत्वात्संकल्पादिकमपसव्येन, त्यागमात्रं तु सव्येनेति । अत्रोच्यते—यदुक्तं सर्वेषां समानमेव दक्षिणादानमिति । तदहृद्यम् । पात्रानुसारेण दक्षिणावैषम्यस्योक्तत्वात् । तथा च—" एकपङ्क्त्युपविष्टानां विप्राणां श्राद्धकर्मणि । भक्ष्यं भोज्यं समं देयं दक्षिणा त्वनुसारतः॥" इति । अनुसारतः पात्रविशेषानुसारेणेत्यर्थः । यच्चोक्तं--दैवपूर्वं दक्षिणादानमिति । तदप्यसारम् । पित्रुद्देश एव दैवपूर्वमित्यस्य पूर्ववाचित्वात्, न ब्राह्मणोद्देश इति । तथा च **देवलः**–"दक्षिणां पितृविप्रेभ्यो दद्याद्विप्रं ततो द्वयोः।" इति । यदप्यभिहितं—पित्रुद्देशे अपसव्येन ब्राह्मणोद्देशे सव्येनेति तदप्ययुक्तम् । पित्रुद्देशेऽपि पितृपूर्वकं सव्येनैवोक्तत्वात् । तथा च **देवल** एव–"सर्वं कर्मापसव्येन दक्षिणादानवर्जितम्।" इति । न च दक्षिणादानं दैवे पूर्वमुचितम् । तस्य विसर्गरूपत्वात् । तथा च **वृद्धयाज्ञवल्क्यः**–"पूर्वं पितृभ्यो दद्यात्तु देवेभ्यस्तदनन्तरम् । असुराः पितृरूपेण दत्तं हिंसन्ति दानवाः ॥ तेषां वै रक्षणार्थाय पश्चाद्दैवे विसर्जयेत् ।" **याज्ञवल्क्योऽपि**—"पितृपात्रे तदुत्तानं कृत्वा विप्रान्विसर्जयेत्"इति। यत्त्वपसव्यं तु तत्रापीत्युक्तं तदन्यशाखिविषयत्वेन यथागृह्यं व्यवस्थापनीयम् । यच्चाम्नातं संकल्पादिकमपसव्येन त्यागमात्रं सव्येनेति । तन्न शोभनम्, प्रमाणाभावात् । तस्मादुभयपक्षेऽपि **कात्यायन**मतानुसारिणां दक्षिणादानं पितृपूर्वकं सव्येनैवेति सिद्धम् तथा । च **हेमाद्रिपद्धतौ**-"सूक्तस्तोत्रजपं त्यक्त्वा पिण्डाघ्राणं च दक्षिणाम् । आह्वानं स्वागतान्नं च विना च परिवेषणम् । विसर्जनं सौमनस्यमाशिषां प्रार्थनं तथा । विप्रप्रदक्षिणां चैव स्वस्तिवाचनकं विना । पित्र्यमन्यत्प्रकर्तव्यं प्राचीनावीतिना सदा॥"इति । **स्मृतिरन्याऽपि**-"उपवीती पितृप्रीत्यै [illegible]विवर्जितः । दक्षिणां पितृ-

विप्रेभ्यः पूर्वं दद्यादथोत्तरान्॥" इतरेभ्य इत्यर्थः । पठन्ति च–"स्वागतं स्वस्तिवाचनं दक्षिणा च प्रदक्षिणम् । गोत्रवादनमर्घं च षडेते उपवीतिनः ॥" इति । गोत्रवादनं गोत्रं नो वर्धतामित्यादि।विधानमाकलय्याह **संग्रहकारो**ऽपि-"**याज्ञवल्क्यो** विसर्गात्प्राक्पात्रमुत्तानमिच्छति । **यमो** विसर्जनं कृत्वा **गृह्यकर्ता**ऽपि **शौनकः** ॥ प्रीतिः पश्चात्तु देवानामिति **कात्यायनादयः** । सर्वेषामपि पक्षाणां स्वगृह्योक्तं विधीयते ॥ स्वगृह्योक्तस्य चाभावे ग्रहणं स्वेच्छया भवेत्॥" इति । अत्रान्यदपि विसर्गरूपं प्रतिज्ञापात्रचालनम् ऋतुपूजनदेवद्विजवचनादिकं न कुर्यात्, दक्षिणाया उपलक्षणार्थत्वात् । तथा च-"मन्त्रहीनं क्रियाहीनं भक्तिहीनं द्विजोत्तमाः। श्राद्धं संपूर्णतां यातु प्रसादाद्भवतामिति" **गोभिलो**ऽपि–"दैवे वाचयित्वा पिण्डपात्राणि चालयित्वा दक्षिणां दद्यात्" इति । पिण्डांश्च पात्राणि चेति विग्रहः, नित्यत्वात् । "अचालयित्वा तत्पात्रं स्वस्ति कुर्वन्ति ये द्विजः । निराशाः पितरस्तेषां शप्त्वा यान्ति यथागतम् ॥" अत्रैके ऋतुपूजनं सव्येनेत्याहुः । तन्न, "आचम्योदक्परावृत्य नियम्य च शनैरसून् । षडृतून्वैस्मकुर्यात्पितृनिव च मन्त्रवत् ॥" इति वचनात् । विशेषमाह **जातूकर्ण्यः**–"पात्राणि चालयेच्छ्राद्धे स्वयं शिष्योऽथवा सुतः । न स्त्रीभिर्न च बालेन नासजात्या कथंचन॥"इति । **बृहस्पतिरपि**–"भाजनेषु च तिष्ठत्सु स्वस्ति कुर्वन्ति ये द्विजाः । तदन्नमसुरैर्भुक्तं निराशैः पितृभिर्गतम् ॥" भाजनानि भोजनपात्राणि। स्वस्तीति भगवन्ब्रूहि इति वचनमिति **पारस्करः** । अपरं स्मृत्युक्तमुपलब्धव्यम् । अत्र च ब्राह्मणेभ्यो दद्यादिति सूत्रयता चतुर्थ्यां गोत्राद्युच्चारो ब्राह्मणानां सूचितः । ततश्चैवं प्रयोगः । अस्मत्पितुरमुकशर्मणोऽमुकगोत्रस्य वसुरूपस्य श्राद्धप्रतिष्ठार्थममुकगोत्रायामुकशर्मण इत्यादि तुभ्यमहं संप्रदद इति । तन्त्रपक्षे षष्ठीबहुवचनेन । पित्रुद्देशपक्षे तु अस्मदित्यादौ चतुर्थ्यां प्रयोगः, संकल्पत्वात् । विसर्जनमन्त्रमाह––**वाजे वाजेऽवतेति विसृज्यानुव्रज्यामा वाजस्येति प्रदक्षिणीकृत्य प्रविशेत्**–ततो **वाजे वाजेऽवत** इत्यृचा कुशमूलैः पित्र्यविप्रान् पूर्वं, पश्चात्कुशाग्रैर्दैवद्विजान्विसृज्यताननुव्रज्या**मावाजस्ये**त्यनयर्चा बहिर्यज्ञोपवीती तान्प्रदक्षिणीकृत्य नमस्कृत्य प्रविशेद् गृहमिति शेषः । अत्रैके कुशाग्रैरेव सर्वान्विसर्जयन्ति । "**वाजे वाजे**ति मन्त्रेण कुशमूलेन तान्पितॄन् । देवांस्तेनैव मन्त्रेण कुशाग्रेण विसर्जयेत्" इति । **मनुरपि**--"**आमावाजस्य**मन्त्रेण कर्तव्यं हि प्रदक्षिणम् । नमस्कृत्य ततो विप्रानासनेषूपवेशयेत् ॥ ताम्बूलं हि ततो दद्यात्पादप्रक्षालनं ततः । पादाभ्यङ्गं ततः कुर्यात्पादमर्दनमेव च ॥" इति । अत्रैके विसर्जनं प्रदक्षिणां चापसव्येन कुर्वन्ति तदयुक्तम्--"स्वागतं स्वस्तिवचनं दक्षिणा च प्रदक्षिणम् ।" इत्युक्तत्वात् । **वृद्धयाज्ञवल्क्यः**--"**वाजे वाजे** जपेन्मन्त्र**मामावाजस्य** वै पुनः । बहिः प्रदक्षिणं कुर्यादच्छिन्नजलधारया ॥ बन्धुवर्गेण सहितः सभार्यः सकुटुम्बकः । पुनराचम्य तत्रैव स्वादुषं२ जपेच्छुचिः ॥ ब्राह्मणाः संपठेयुस्ते श्राद्धभोक्तृद्विजोत्तमाः । श्राद्धारम्भे पादशौचे विकिरे पिण्डदानके ॥ ऊर्जे विसर्जने चैव षट्सु चाचमनं मतम् ॥" अर्चेति पाठः । "श्राद्धारम्भेऽवसाने च पादशौचे द्विजार्चने । विकिरे पिण्डदाने च षट्सु चाचमनं स्मृतम् ॥" इति **कात्यायन**स्मृतेरेकमूलत्वात् । "विसर्जयेत्ततो विप्रान्प्रणिपत्य पुनः पुनः । आद्वारमुपगच्छेयुः पुनराचमनं ततः । वैश्वदेवं ततः कुर्यात्स्वशाखोक्तविधानतः ।" इति । द्वारगमनासंभवे तु--"बहिः प्रदक्षिणं कुर्यात्पदान्यष्टावनुव्रजेत् । बन्धुवर्गेण सहितः पुत्रभार्यासमन्वितः ॥" इति । अथोर्ध्वकृत्यम्–तत्रोच्छिष्टमार्जनतत्प्रतिपत्तिपिण्डविकिरप्रतिपत्तिवैश्वदेवनित्यश्राद्धशेषभोजननियमादीनि क्रमेणोच्यन्ते । तत्र **पैठीनसिः**--"न स्पृशन्ति तथा दुष्टास्तथैवोच्छिष्टमार्जनम् । तैस्तु स्पर्शे तदुच्छिष्टे पितरो यान्त्यधोगतिम् ॥" **प्रचेताः**–"खानित्वा निक्षिपेद्भूमावन्यथा स्पर्शनं भवेत् । निषिद्धं स्पर्शनं तेषां तस्मात्खननमुत्तमम् ॥" तत्रोच्छिष्टमार्जने विरुद्धानीव वाक्यानि दृश्यन्ते । तथा हि **वसिष्ठः**–"श्राद्धे नोद्वासनीयानि उच्छिष्टान्या दिनक्षयात् । श्च्योतन्ते वै स्वधाकारास्ते पिबन्त्यकृतोदकाः ॥" **ब्रह्मपुराणे**ऽपि- "अस्तं याते ततः सूर्ये विप्रपात्राणि चाम्भसि । अधोमुखानि प्रयतो भूत्वा सर्वाणि निक्षिपेत् ॥" **याज्ञवल्क्यः** -"निक्षिपेत्सत्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत्"। "श्राद्धदेशोपविष्टेषु विप्रेषु च न मार्जयेत्" इति **विज्ञानेश्वरः** । अत्रैके व्यवस्थापयन्ति-दैवपात्राणि तद्दिने मार्जयेन्न पित्र्याणीति । तथा च **देवलः**--"एवं तृप्तेषु पानीयं दद्यादाचमनं तथा । उच्छिष्टं वाऽप्यपनयेत्पितॄणां नोपमार्जयेत् ॥" इति । अन्ये त्वाहुः--अस्तं यात इत्यनेन रात्रौ मार्जनाविधानाद्रात्रावेवेति । तत्र नाद्यः-पितॄणामुच्छिष्टम्, नयेन्नावमार्जयेद्वेत्यनयेक्त्यस्मद्विकल्पोपपत्तेः । "द्वितीयेऽहनि सर्वेषां भाण्डानां क्षालनं स्मृतम् ।" इति **ब्राह्मवचने** सर्वेषामेव मार्जनोपपत्तेश्च । द्वितीयोऽपि न सम्यगिव भाति । "उच्छेषणं तु तत्तिष्ठेद्यावाद्विप्रविस-

र्जनम्'' इति **मनू**क्तावधिवैयर्थ्यात्। तस्माद्यथासंभवं विकल्प इति युक्तम् । यत्तु 'द्वितीयेऽहनि' इति **ब्राह्म**वचनं तदप्यशुचिस्पर्शरहितगृहान्तरसंभवविषयम् । तथा च **प्रचेताः**--"भृत्यवर्गवृतो भुङ्क्ते कव्यशेषं स्वगोत्रजैः । अन्यस्यां श्राद्धशालायां द्विजोच्छिष्टं न मार्जयेत्।।" इति । तस्माद्गुप्तगृहान्तरे संभवति न मार्जनं, तदसंभवे द्विजान्प्रेष्य पिण्डप्रतिपत्त्यनन्तरं मार्जनमिति व्यवस्थेति सिद्धम् । पिण्डप्रतिपत्तिमाह **याज्ञवल्क्यः**--"पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा ।" गोशब्दो गतवीर्यवृषभपरः । तथा च **वायवीये**--"गतवीर्यस्तु यो ह्यश्वोऽनड्वांश्चैव तथाविधः । तयोः पिण्डः प्रदातव्यो यतो वीर्यं न रोहति ।।" एतत्कामनाविशेषे व्यवस्थितम् । तथा च **वायुपुराणम्**--"पिण्डमग्नौ सदा दद्याद्भोगार्थी संततं नरः । पत्न्यै प्रजार्थी दद्यात्तु मध्यमं मन्त्रपूर्वकम् ।। उत्तमां गतिमन्विच्छन्गोभ्यो नित्यं प्रयच्छति । प्रजां प्रज्ञां यशः कीर्त्तिमप्सु नित्यं निधापयेत् ।। प्रार्थयन्दीर्घमायुस्तु वायसेभ्यः प्रयच्छति । आकाशं गमयेदप्सु स्थितो वा दक्षिणामुखः ।। पितॄणां स्थानमाकाशं दक्षिणा दिक् तथैव च ।" यथागृह्यं पिण्डप्रतिपत्तिरित्यन्ये। तत्र **कात्यायनः**--'आधत्त इति मध्यमं पत्नी प्राश्नाति पुत्रकामेति।' आधत्त इति प्राशनमन्त्रः । समर्पणे त्वन्यः । अपां त्वौषधीनां रसं प्राशयामि भूतकृतं गर्भं धत्स्वेति । पत्नीति पुत्रकामस्त्रीमात्रोपलक्षणमित्येके । पुत्रकामा पतिव्रतेत्यस्मन्मतम् । तथा च **मनुः**--"पतिव्रता धर्मपत्नी पितृपूजनतत्परा । मध्यमं तु ततः पिण्डमद्यात्सम्यक्सुतार्थिनी " इति । अत्रैतत्संदिह्यते--किं विकिरमुच्छिष्टे निक्षिपेत्किंवा पिण्डेष्विति । अत्रैक आहुः--तस्यास्पृश्यत्वादुच्छिष्ट एवेति । अन्ये त्वाहुः--" उच्छिष्टपिण्डत्वात्पिण्डे क्षिपेतार्थे समाहिताः । दक्षिणाभिमुखो भूत्वा पित्र्या दिक् सा हि कीर्तिता ।। " इति । वैश्वदेवस्तूत्तरत्र प्रपञ्चयिष्यते । नित्यश्राद्धे तु **मार्कण्डेयः**--"नित्याक्रियां पितॄणां तु केचिदिच्छन्ति सत्तमाः । न पितॄणां तथैवान्ये शेषं पूर्ववदाचरेत् ।।" नित्याक्रिया नित्यश्राद्धम् । तुल्यविकल्प एवायमित्येके । करणे उपकारातिशयोऽकरणे प्रत्यवायो नेत्यन्ये । तदुभयमपि न सम्यक् । पूर्वत्र व्यवस्थोपपत्तेः । तथा च--"नित्यश्राद्धं न कर्तव्यं प्रसङ्गाद्यत्र सिद्ध्यति । श्राद्धान्तरे कृतेऽन्यत्र नित्यत्वान्नैव हापयेत्" इति। एकोद्दिष्टादौ पितामहादितृप्त्यसंभवात्कर्तव्यं पार्वणादौ प्रासङ्गिकतृप्तेर्नेति व्यवस्थेत्यर्थः । आह च--"दर्शादिश्राद्धनिष्पत्तौ न नित्यस्य पृथक् क्रिया । तेनैव तस्य सिद्धिः स्यात्काम्ये नित्याग्निहोत्रवत् " इति । एवमेकपार्वणादावपि । द्वितीये तु नित्यत्वानुपपत्तेः । शेषभोजनेऽपि विवदन्ते--एकादश्यादावाघ्राणस्योक्तत्वाच्छेषभोजनमनित्यमिति केचित् । "शेषमन्नमनुज्ञातं भुञ्जीत तदनन्तरम् । इष्टैः सार्धं तु विधिवद्बुद्धिमान्सुसमाहितः ।। " इति **शातातपो**क्तेरनुज्ञापितमेव पितृसेवितभक्षणं नित्यमन्यथा नेत्यन्ये । तद्द्वयमपि नातीव शोभते । पूर्वत्र नित्यत्वेन आघ्राय विध्युपपत्तेः । तथा च--" उपवासं तदा कुर्यादाघ्राय पितृसेवितम् " इति । द्वितीयेऽप्यनुज्ञानाभावे तीर्थादावभोजनं प्राप्नोतीति नैतदुचितम् । भोजनाभावे प्रत्यवायश्रुतेः । तथा च **देवलः**--"श्राद्धं कृत्वा तु यो विप्रो न भुङ्क्तेऽथ कदाचन।हव्यं देवा न गृह्णन्ति कव्यानि पितरस्तथा । " **जैमिनिरपि**--" श्राद्धं कृत्वा तु यो विप्रो नाश्नाति पितृसेवितम् । स याति नरकं घोरं यावदाभूतसंप्लवम् ।।" **ब्रह्मवैवर्तेऽपि**--" पितृद्विजेभ्यः पितृभ्यो यद्यदत्र निवेदितम् । अश्नन्नेव हि तत्सर्वं पितॄन्प्रीणाति मानवः ।। " इति । भोजनक्रममाह **देवलः**--" निवृत्ते पितृमेधे तु दीपं प्रच्छाद्य पाणिना । आचम्य पाणिं प्रक्षाल्य ज्ञातीन्शेषेण भोजयेत् ।। ततो ज्ञातिषु तृप्तेषु स्वभृत्यान्प्रतिभोजयेत् । पश्चात्स्वयं च पत्नीभिः पितृशेषमुदाहरेत् ।।" दीपं प्रच्छाद्य हस्तेन श्राद्धदीपं शमयेदित्यर्थः । उदाहरेद्भुञ्जीत । तथा **चोशनाः**--'शेषमिष्टेभ्यो दद्यात्स्वयं भुञ्जीत । " **आपस्तम्बः**--" सर्वतः समवदाय ग्रासावरार्धं प्राश्नीयाद्यथोक्तम् ।" ग्रासावरार्धं ग्रासान्न्यूनं समवदायेत्यन्वयः । यथोक्तमिति मांसभक्षणे नियमो नेति केचित् । सर्वतः समवदायेति सर्वावदानस्योक्तत्वान्मांसभक्षणमपीत्यन्ये । एवं सति श्राद्धे विप्रान्मांसं भोजयित्वा भुञ्जीतान्यथा नेति । तथा च **प्रचेताः**--" विप्रानभोज्य यो मांसमश्नात्यन्यांश्च भोजयेत् । वृथा भवति तच्छ्राद्धं भुक्त्वा च नरकं व्रजेत् ' इति । तथा च--" ततश्च वैश्वदेवान्ते सभृत्यैः सह बान्धवैः । भुञ्जीतातिथिसंयुक्तः सर्वं पितृनिषेवितम्" इति, त्यक्तमांसस्याभक्षणमन्यस्य भक्षणमित्यविरोधो वा । तथा च **जातूकर्ण्यः**--मधुमांसनिवृत्तस्तु श्राद्धकर्माणि चाचरन् । पात्रस्थं गन्धमाघ्राय पितॄणामनृणो भवेत् " इति । पात्रस्थं भोजनपात्रस्थम् । पितॄणामनृण इति । तद्घ्राणादपि पितृतृप्तिर्भवतीति दर्शितम् । **ब्रह्मपुराणे**--" भगिन्यो बान्धवाः पूज्याः श्राद्धेषु च सदैव हि । अश्रीपण्डकषण्ढाश्च तथाऽन्ये दीर्घरोगिणः ।।" अश्रीरकिंचनः । पण्डो नपुंसकः । षण्ढः क्लीबवृत्तिः । **शातातपः**--" श्राद्धं कृत्वा परश्राद्धे भुञ्जते ये तु विह्वलाः । पतन्ति पितरस्तेषां लुप्तपिण्डोदकक्रियाः ।। "

अत्रक पश्चात्स्वयं भुञ्जीतेत्यनेन प्रदोषपर्यन्तं सर्वान्संतोष्य रात्रौ श्राद्धकृद्भुञ्जीतेत्याहुः । तदयुक्तम्, रात्रिभोजनस्य प्रतिषिद्धत्वात् । अतश्च दिवैव सर्वैः सह भुञ्जीत । तथा च **जातूकर्ण्यः**----"अहन्येव तु भोक्तव्यं कृते श्राद्धे द्विजन्मभिः । अन्यथा ह्यासुरं श्राद्धं परपाके च सेविते ॥" **नागरखण्डेऽपि**---"बलिं च निक्षिपेत्तस्माद्भोजनं च समाचारेत् । मौनेन दृश्यते सूर्यो यावत्तावन्नराधिप ॥ यश्चैवास्तमिते सूर्ये भुङ्क्ते च श्राद्धकृन्नरः । व्यर्थतां याति तच्छ्राद्धं तस्माद्रात्रौ न भोजयेत्" इति । नियमानाह **बृहस्पतिः**–"तां निशां ब्रह्मचारी स्याच्छ्राद्धकृच्छ्राद्धिकैः सह । अन्यथावर्तमानौ तौ स्यातां निरयगामिनौ" इति । "पुनर्भोजनमध्वानं यानमायासमैथुनम् । श्राद्धकृच्छ्राद्धभुक् चैव सर्वमेतद्विवर्जयेत् ॥ स्वाध्यायं कलहं चैव दिवा स्वप्नं च स्वेच्छया । " श्राद्धिनो विशेषमाह **यमः**–"पुनर्भोजनमध्वानं भारमायासमैथुनम् । सन्ध्यां प्रतिग्रहं होमं श्राद्धभुक् त्वष्ट वर्जयेत् ॥" सन्ध्याहोमप्रतिषेधावकृतप्रायश्चित्तविषयौ । "दशकृत्वः पिबेच्चापो गायत्र्या श्राद्धभुग् द्विजः । ततः सन्ध्यामुपासीत जपेच्च जुहुयादपि" इति **भविष्यत्पुराण**वचनात् । **वृद्धयाज्ञवल्क्यः**—"अध्वनीनो भवेदश्वः पुनर्भोजी तु वायसः । होमकृन्नेत्ररोगी स्यात्पाठादायुः प्रहीयते ॥ दानं निष्फलतामेति प्रतिग्राही दरिद्रताम् । कृमिकृज्जायते दासो मैथुनी सूकरो भवेत्" इति ॥ स्वबुद्धिकल्पितं नेह वचनं लिखितं मया । दृष्टं श्रुतं समूलं वा न वा स्यान्मे न दूषणम् ॥ दृष्टं यत्स्वल्पदीर्घेषु निबन्धेषु तदाहृतम् । श्रुतं स्मृत्यविरुद्धं यत्तत्पठन्तीत्युदाहृतम् । प्रमाणमप्रमाणं वा सर्वज्ञः कर्तुमर्हति । दृष्टे श्रुते न विश्वासो मादृशैः कर्तुमिष्यते ॥ इति श्राद्धकाशिकायां तृतीया कण्डिका ॥ ३ ॥

इत्यावसथिकश्रीमदतिसुखात्मजश्रीविष्णुमित्रात्मजन्मनः कृष्णमिश्रस्य कृतौ श्राद्धकाशिकायामापरपक्षिकं पार्वणश्राद्धम् ॥ ॥ * ॥

उक्तं प्रकृतिश्राद्धमिदानीं विकृतिश्राद्धमुपक्रमते । **अथैकोद्दिष्टम्**–अथशब्दः आनन्तर्ये । प्रकृतिश्राद्धानन्तरं विकृतिश्राद्धमेकोद्दिष्टमुच्यत इति शेषः । अथवा अथशब्दोऽधिकारार्थः । एकोद्दिष्टमिति विकृतिश्राद्धोपलक्षणम् । ततश्च "प्रकृतिवद्विकृतिः" इतिन्यायात्सर्वाङ्गप्राप्तौ विकृतिश्राद्धानि यथोपदेशं प्रधानाङ्गहीनानि भवन्तीत्यधिक्रियन्त-इत्यर्थः । तानि च युगादिमन्वादिसंक्रान्तिमघाभरणीरविवारप्रेतषोडशकनवनित्यतीर्थविवाहोपनयनोर्ध्वक्षयाहामहेमपिण्डकसंकल्पश्राद्धानि । तथा हि **मत्स्यपुराणादिषु**—"अयनद्वितये श्राद्धं विषुवद्वितये तथा । संक्रान्तिषु च सर्वासु पिण्डनिर्वपणादृते" । **पुलस्त्यः**—"युगादिषु च कुर्वीत पिण्डनिर्वपणादृते ।" तथा—"युगादौ पितृनक्षत्रे तथा मन्वन्तरादिषु । अर्घपिण्डं न कुर्वीत वैष्णवं श्राद्धमाचरेत् ॥ वैशाखस्य तृतीयायां नवम्यां कार्तिकस्य च । श्राद्धं संक्रान्तिवत्कुर्यात्पिण्डनिर्वपणं विना ॥ मघायुगादौ भरण्यां संक्रान्तौ रविवासरे । पिण्डदानं न कुर्वीत यदीच्छेत्सुतजीवितम् ॥" **सूतः**—"मघायां पिण्डदानेन ज्येष्ठः पुत्रो विनश्यति । कनीयांस्तु त्रयोदश्यां कुर्यादभ्युदयादृते ॥" प्रेतश्राद्धेषु **सुमन्तुः**—"विकिरं नैव दातव्यं न कुर्यादाशिषं जपम् । षडञ्जलीन्न कुर्वीत एकोद्दिष्टेषु सर्वदा ॥ आशिषो द्विगुणा दर्भा जपाशीःस्वस्तिवाचनम् । पितृशब्दः ससंबन्धः शर्मशब्दस्तथैव च ॥ पात्रारम्भोऽवगाहश्च उल्मुकोल्लेखनादिकम् । तृप्तिप्रश्नश्च विकिरः शेषमन्नं तथैव च ॥ प्रदक्षिणा विसर्गश्च सीमान्तानुव्रजस्तथा । अष्टादश पदार्थांश्च प्रेतश्राद्धे विवर्जयेत् ॥" **सत्यव्रतः**—"अनूदकमधूपं च गन्धमाल्यादिवर्जितम् । नवश्राद्धममन्त्रं तु पिण्डोदकविवर्जितम् ॥" अनूदकमिति दीर्घं छान्दसम् । अवनेजनोदकरहितम् । अनूदकं पिण्डोदकविवर्जितम् । अवनेजनप्रत्यवनेजनरहितमिति कश्चित् । तन्नोचितम् । स्मृत्यन्तरे तयोः सद्भावप्रतीतेः । तथा च—"अनूदकमधूपं च गन्धमाल्याविवर्जितम् । निनयेदश्मनि पूर्वं ततः श्राद्धं प्रकल्पयेत् ॥ पश्चाच्च निनयेत्पूर्वं तस्मिन्नेव यथाविधि ।" इति । **अस्यार्थः**-पूर्वमश्मन्यवनेजनं निनयेत्ततस्तत्रापि पिण्डनिर्वपणाख्यं श्राद्धं कुर्यात्पश्चाच्च तत्रैव पिण्डप्रत्यवनेजनं दद्यात् । पूर्वमिति प्रत्यवनेजनमुच्यते । "पूर्व पूरणे" इति धातोराप्यायनार्थत्वात् । एवं च सत्यनूदकं पिण्डोदकविवर्जितं चेति पदद्वयम्, ऊर्जस्वधावाचनाभ्यां प्राप्तावुदकनिषेधकमित्युचितमित्यर्थः । **रेणुरपि**----"अन्नं न विकिरेद्भूमौ गृह्णीयान्नाशिषोऽत्र तु । पात्रालम्भो न चाक्षय्यमासनादिप्रयोगतः ॥ नामगोत्रेण संबन्धरहितं प्रेतशब्दवत् । नवश्राद्धं गृहे कार्यं भार्या यत्राग्नयोऽपि वै ॥" इति । तथा–"आसीमान्तं स्वस्तिवाच्यं पिण्डानां च नमस्कृतिः । न पुष्पं पिण्डमूर्धस्थं वन्देद्विप्रकरच्युतम् ॥ सर्ववर्णेषु सर्वत्राप्येष साधारणो विधिः ।" इति । **मत्स्यपुराणे**–"नित्यं तावत्प्रवक्ष्येऽहमर्घावाहनवर्जितम् । दैवहीनं भवेत्तत्तु नियमादिविवर्जितम् ॥ तीर्थश्राद्धं प्रकु

र्वीत पाकान्नेन विशेषतः । आमान्नेन हिरण्येन कन्दमूलफलैरपि ॥ एषामभावे कुर्वीत श्रद्धया च जलेन च । ” तथा—“ब्राह्मणान्न परीक्षेत तीर्थे कालं न चिन्तयेत् । प्राप्ततीर्थो यदा विद्वांस्तदा श्राद्धं समाचरेत् ॥ आवाहनं न तीर्थे स्यादर्घदानं न वा भवेत् । आहूताः पितरस्तीर्थे कृतार्थाः सन्ति वै द्विजाः ॥” तथा--“ आवाहनं न दिग्बन्धो न दोषो दृष्टिसंभवः । सकारुण्यं च कर्तव्यं तीर्थश्राद्धं विचक्षणैः ॥ ” **भविष्येऽपि**——“ देवाश्च पितरो यस्माद्गङ्गायां तु सदा स्थिताः । आवाहनं विसृष्टिश्च तत्र तेषां न विद्यते ॥” सकारुण्यमित्यनेन पितृव्यभ्रात्रादीनां पुत्रिणामपि तीर्थे श्राद्धं यथोपदेशं कर्तव्यमित्यर्थः । **कार्ष्णाजिनिः**—“ मौञ्जीबन्धाद्विवाहाच्च वर्षार्धं वर्षमेव वा । पिण्डान्सपिण्डा नो दद्युः सपिण्डीकरणादृते ॥ ” इति । सपिण्डीकरणं षोडशश्राद्धोपलक्षणम् । **संग्रहकारोऽपि**—“ विवाहोपनयादूर्ध्वं वर्षं वर्षार्धमेव वा । न कुर्यात्पिण्डनिर्वापं न दद्यात्कारणादृते ॥ ” अत्रापवादस्तेनैवोक्तः । “ महालये गयाश्राद्धे मातापित्रोर्मृतेऽहनि । कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वपणं सुतः ॥” इति । क्षयाहैकोद्दिष्टं तूक्तं **सूत्रकृता** नावाहनमित्यादि । आमश्राद्धं तु **आचारतिलके** । “आमश्राद्धमनङ्गुष्ठमग्नौकरणवर्जितम् । तृप्तिप्रश्नविहीनं तु कर्तव्यं मानवैर्ध्रुवम् ॥” **धर्मप्रदीपे**——“आवाहनाग्नौकरणं विकिरं पात्रपूरणम् । तृप्तिप्रश्नं न कुर्वीत आमहेम्नोः कदाचन ॥” इति । एतद्विषयमुपरिष्टाद्वक्ष्यामः । आपिण्डके तु–“अग्नौकरणमर्घश्च आवाहनावनेजने । पिण्डश्राद्धेषु कुर्वीत पिण्डहीने निवर्तते ॥ पिण्डनिर्वापरहितं यत्र श्राद्धं विधीयते । स्वधावाचनलोपोऽस्ति विकिरस्तु न लुप्यते ॥ अक्षय्यदक्षिणास्वस्तिसौमनस्यं यथास्थितम् ।” **धर्मप्रदीपेऽपि**—“आवाहनं तथाऽर्घं वै अग्नौकरणमेव च । अक्षय्यापोऽन्नविकिरं पिण्डहीने विवर्जयेत् ॥” इति । इदं चाक्षय्यवर्जनमशक्त्या पिण्डाकरणविषयम् । शक्तौ तु यथास्थितिविहितत्वात् । **स्मृतिसंग्रहे**—“अङ्गानि पितृयज्ञस्य यदा कर्तुं न शक्नुयात् । संकल्पश्राद्धमेवासौ कुर्यादर्घादिवर्जितम् ॥” **आपस्तम्बोऽपि**——“संकल्पश्राद्धे अर्घावाहनाग्नौकरणपिण्डस्वधावाचनानि वर्जयेत्” इति । व्याध्यादिना यथावद्विस्तृतं पार्वणं कर्तुमशक्तः संकल्पश्राद्धमेव कुर्यादित्यर्थः । विकिरव्यवस्था च तदभाव एवोक्ता । हेमश्राद्धे तु **बौधायनः**-“संक्रमेऽन्नाद्विजाभावे प्रवासे पुत्रजन्मनि । हेमश्राद्धं संग्रहे च द्विजः शूद्रः समाचरेत् ॥”**व्याघ्रपादः**-“आर्तवेऽन्नद्विजाभावे, ग्रहणे देशविप्लवे । आमश्राद्धं द्विजः कुर्याच्छूद्रः कुर्यात्सदैव हि ॥”इति । **गालवः**-“तीर्थेऽनग्नावापदि च देशभ्रंशे रजस्यपि । हेमश्राद्धं द्विजः कुर्याच्छूद्रः कुर्यात्सदैव हि ॥” इति । अन्यत्स्मृतिभ्यो ज्ञेयम् । अत्रैतच्चिन्त्यते—किमामश्राद्धेऽग्नौकरणं स्यादुत नेति । अत्रैक आहुः—“सिद्धान्नेन विधिर्यस्मादामश्राद्धेऽप्यसौ विधिः । आवाहनादि सर्वं स्यात्पिण्डदानं च भारत ॥ दद्याद्यद्द्विजातिभ्यः शृतं वा यदि वाऽशृतम् । तेनाग्नौकरणं कुर्यात्पिण्डांस्तेनैव निर्वपेत्” इत्यतिदेशेनाग्नौकरणं भवतीति । तदयुक्तम्—अतिदेशस्य ब्राह्मणाविषयत्वात् । तथा च **कल्पलतायां**—“आमश्राद्धं यदा कुर्याद्विधिज्ञः श्राद्धदस्तदा । हस्तेऽग्नौकरणं कुर्याद्ब्राह्मणस्तु विशेषतः ॥” इति । अतश्चामश्राद्धेऽग्नौकरणनिषेधः शूद्रविषयो भवितुमर्हति । किं च **भविष्यत्पुराणे**—“धर्मसेवां तु धर्मज्ञा यदि शूद्राः प्रकुर्वते । अग्नौकरणमन्त्रोऽस्य नमस्कारो विधीयते” इत्यग्नौकरणनिषेधान्नमस्कारविधानात् । अथवा विहितप्रतिषिद्धत्वात् सपिण्डका पिण्डक विषयौ विधिनिषेधौ । प्रकृतमधुनोच्यते । अत्रैक उद्दिष्टो यत्र तदिति व्युत्पत्तेर्नवं, नवमिश्रं, पुराणं चेति त्रिधैकोद्दिष्टम् । तत्रैकोद्दिष्टमित्यनेन किमुच्यते । तथा चाङ्गिराः—“ प्रथमेऽह्नि तृतीयेऽह्नि पञ्चमे सप्तमे तथा । नवमैकादशे चैव नवश्राद्धानि षट् तथा ॥” इति । **आश्वलायनगृह्यपरिशिष्टम्**—“ नवश्राद्धं दशाहानि नवमिश्रं तु षडृतून् । अतः परं पुराणं वै त्रिविधं श्राद्धमुच्यते ॥” **हारीतोऽपि** प्रायश्चित्तेष्वाह—“ चान्द्रायणं नवश्राद्धे प्राजापत्यं तु मासिके । एकाहस्तु पुराणेषु प्रायश्चित्तं विधीयते ॥” इति । तत्रैक आहुः—क्षयाहे पार्वणस्यैवोक्तत्वात्प्रेतैकोद्दिष्टमेवैतादिति । तदयुक्तम्, स्वदितामिति तृप्तिप्रश्न इत्याद्यङ्गस्य प्रेतश्राद्धेषु निरस्तत्वात् । न चैतन्मासिकादि नवश्राद्धं भवितुमर्हति, पित्रादिशब्दप्रयोगाभावात् । तस्मात्पुराणैकोद्दिष्टमेवैतदिति युक्तम् । अतश्चावाहनादिनिषेधविशेषवर्जं सर्वाङ्गमत्र भवतीति विशेषविधिनिषेधयोः शेषाभ्यनुज्ञाफलकत्वादिति न्यायात् । **एकोऽर्घ एकं पवित्रमेकः पिण्डः**—कर्तव्य इति यथालिङ्गं वाक्यशेषः । पवित्रविशेषणत्वाल्लिङ्गव्यत्ययः । पूजाविधिर्वा प्रकृतितस्त्वनेकप्रसक्तौ विकृतित्वात्प्रतिषेधः । तदुक्तम्—प्रसज्यमानः प्रतिषिध्यत इति । **भट्टोऽपि**—“इष्टा सर्वत्र शास्त्रेषु निवृत्तिः प्राप्तिपूर्विका । तदभावाविशेषोऽत्र नहि दृष्टद्वयोरपि ॥” इति । पवित्रं प्रादेशमात्रं कुशैकदलम् । अत्र केचित्प्रत्यवतिष्ठन्ते—“दर्भाः पवित्रमित्युक्तम्” इति

वचनात् । "त्रिशाखस्तु भवेद्दर्भश्चतुःशाखः कुशः स्मृतः । पञ्चशाखस्तु निधिपः षट्शाखं तु पवित्रकम्॥" इति पारिभाषिकत्वाच्च पवित्रं षट्शाखैककुशमिति । तदयुक्तम्—" पार्वणेषु च सर्वेषु पवित्रं द्विदलं स्मृतम् । एकोद्दिष्टे तु तत्प्रोक्तं पवित्रं द्विदलं नृप॥एकोद्दिष्टे शलाकैका" इति **भागवतचतुर्विंशतिमत**वचनाभ्यामुल्लेखोपपत्तेः। एकशब्दे पौनरुक्त्यं विस्पष्टार्थम् । ननु चैकोद्दिष्टमित्यनेनैव पिण्डैकोपलब्धेः एकग्रहणं किमर्थम् । उच्यते—पिण्डविच्छित्तिनिषेधार्थमष्टाङ्गपिण्डविध्यर्थं चेत्यदोषः । तदुक्तम्—"तिथिच्छेदे न कर्तव्यं विनाश्राद्धं यदृच्छया । पिण्डश्राद्धं च दातव्यं विच्छिन्नं नैव कारयेत् ॥" निषिद्धदिनेऽपीति शेषः । श्राद्धशब्देन ब्राह्मणभोजनम्, पिण्डशब्दस्य पृथगुपादानात् । चकारोऽग्नौकरणार्थः । तेन सति संभवे ब्राह्मणभोजनं पिण्डदानं च क्षयाहे कार्यम् । भोजनाभावे तु पिण्डमात्रमपि कार्यमिति विच्छित्तिशब्दार्थ इति **माधवीये** । "आहिताग्नेः पित्रर्चनं पिण्डैरेव ब्राह्मणानपि वा भोजयेत्" इति **निगमस्मृतौ** वाशब्दस्य संभवासंभवेन व्यवस्थितत्वात् । एवं च सत्याब्दिकमन्नेनैव कर्तव्यं नामान्नेनेत्युक्तं भवति । तथा च **मरीचिः**—"अनग्निकः प्रवासी च यस्य भार्या रजस्वला । आमश्राद्धं प्रकुर्वीत न तत्कुर्यान्मृतेऽहनि" इति । **लौगाक्षिरपि**—"पुष्पवत्स्वपि दारेषु विदेशस्थोऽप्यनग्निकः । अन्नेनैवाब्दिकं कुर्याद्धेम्ना नामेन वा क्वचित् ॥" क्वचिदिति दर्शे रविग्रहे क्षयाहे सतीत्यर्थः । तथा च **गोभिलः**—"दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितम् । अन्नेनासंभवे हेम्ना कुर्यादामेन वा सुतः ॥" इति । अत्राप्यसंभव इति विशेषणात्संभवे अन्नेनैवेत्युक्तम् । "श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितम् । अमावास्यादि नियतं माससंवत्सरादृते ॥" इति **हारीतोक्तेः** । अष्टाङ्गत्वमाह **वृद्धयाज्ञवल्क्यः**-"मधु चान्नं गव्यघृतं पानीयं पायसं तथा । कुतुपस्तिलसंयुक्तं ज्योतिश्चैवाष्टमी तथा ।। कपित्थश्रीफलाकारः पिण्डोऽष्टाङ्गः स उच्यते । तिलैरुत्पाद्यते मूर्धा क्षीरैर्बाहू घृतेन हृत ॥ मधुना चैव नासा च तोयैर्हस्तौ तथा परौ । ज्योतिश्चैवानुजीवः स्यात्पिण्डनिर्वपणं स्मृतम् ॥" यत्तु—"मधु चाज्यं जलं चार्घ्यं पुष्पधूपविलेपनम् । बलिं दत्त्वा तु विधिवत्पिण्डोऽष्टाङ्गो भवेद्यथा॥" इति ब्राह्मवचनं तत्पार्वणविषयम् । पूर्ववचनस्य क्षयाहप्रकरणोक्तत्वात् । **नावाहनाग्नौकरणं नात्र विश्वेदेवाः**—अत्रैकोद्दिष्टे विकृतित्वादावाहनाद्यङ्गं न भवतीत्यर्थः । नन्वयं विशेषनिषेधार्थम् । अत्राह **पद्धतिकृद्यज्ञदत्तः**—एकोद्दिष्टे स्वधावाचनं न भवतीति । तन्न, पिण्डरहितश्राद्धे तन्निषेधात् । तदुक्तं—" स्वधावाचनलोपोऽस्ति" इति प्राक् । अतश्चास्मत्पित्रे अमुकशर्मणे अमुकगोत्राय स्वधोच्यतामिति प्रयोगः । अत्रैक आहुः—प्रथमपात्राभावात्संस्रवबहुत्वाभावाच्च पितृभ्यः स्थानमसीति मन्त्रानुपयुक्तत्वाच्च नात्र तत्पात्रमिति । तदयुक्तम्, एकोद्दिष्टे अस्य विहितत्वात् । यत्तु **कर्कोपाध्यायैर्न** पात्रन्युब्जीकरणमित्युक्तं तदन्यथैवोपपाद्यते । पात्रं न्युब्जं न कर्तव्यं किन्तूत्तानमेव निधेयमिति । अस्ति च पात्राभावन्युब्जत्वाभावयोर्महान् भेदः । अतो अर्थानवबोधात्तदयुक्तमित्युक्तम् । तथा । **स्कन्दसंवादे**—"एकोद्दिष्टे न कुर्वीत स्कन्द पात्रमधोमुखम् । नोत्थापयेच्च तत्पात्रं यावच्छ्राद्धविसर्जनम् ॥ अन्तरोत्थापिते पात्रे श्राद्धं संपद्यते तथा" इति । तस्मात्स्वधावाचनीयानास्तीर्य स्वधावाचनं कर्तव्यमिति सूक्तम् । **स्वदितमिति तृप्तिप्रश्न उपतिष्ठतामित्यक्षय्यस्थाने अभिरम्यतामिति विसर्गोऽभिरताः स्म इतीतरे**—अत्र नेत्युनुवृत्तौ मण्डूकप्लुतिन्यायेन पूर्वसूत्रोक्तो विधिरेवात्रानुषज्यते । तेन तृप्ताः स्थेति प्रश्ने स्वदितमक्षय्यमस्त्वित्यत्रोपतिष्ठतां **वाजे वाजेऽवते**त्यत्राभिरम्यतामिति विसर्गो भवतीति वाक्यशेषः । अतश्चैतत्पुराणैकोद्दिष्टमित्युक्तं, प्रेतैकोद्दिष्टे तदभावात् । अथ क्षयाहे किं पार्वणं कार्यमेकोद्दिष्टं वेति संदिह्यते उभयथा वचनदर्शनात् । तथा हि **जातूकर्ण्यः**—" पितुः पितृगणस्थस्य कुर्यात्पार्वणवत्सुतः । सर्वदा दर्शवच्छ्राद्धं मातापित्रोः क्षयेऽहनि॥" इति । **शातातपः**-"प्रदानं यत्र यत्रैषां सपिण्डीकरणात्परम् । तत्र पार्वणवच्छ्राद्धं ज्ञेयमभ्युदयादृते ॥" तथा--"अर्वाक् संवत्सराद्वृद्धौ पूर्णे संवत्सरेऽपि वा । ये सपिण्डीकृताः प्रेता न तेषां तु पृथक् क्रिया॥" इति । एकोद्दिष्टे तु **यमः**—" सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः । मातापित्रोः पृथक् कार्यमेकोद्दिष्टं मृतेऽहनि ॥" **व्यासोऽपि**--" एकोद्दिष्टं परित्यज्य पार्वणं कुरुते नरः । अकृतं तद्विजानीयाद्भवेच्च पितृघातकः ॥ एकोद्दिष्टं परित्यज्य पार्वणं यः समाचरेत् । सदैव पितृहा स स्यान्मातृभ्रातृविनाशकः ॥ मृताहे पार्वणं कुर्वन्नधोऽधो याति मानवः । संपृक्तेष्वाकुलीभावः प्रेतेषु तु ततो भवेत्" इति । अत्र विरोधे ह्येक आहुः—द्वादशपुत्रेष्वौरसक्षेत्रजपुत्रौ पार्वणं कुर्यातामन्ये दशैकोद्दिष्टमिति । तथा च **जातूकर्ण्यः**—"प्रत्यब्दं पार्वणेनैव विधिना क्षेत्रजौरसौ । कुर्यातामितरे कुर्युरेकोद्दिष्टं सुता दश॥" इति । **जाबालोऽपि**—"औरसः क्षेत्रजः पुत्रो विधिना पार्वणेन तु । प्रत्यब्दमितरे कुर्युरेकोद्दिष्टं सुता दश" इति

विशेषोल्लेखादिति । तदयुक्तम्—प्रत्यब्दमित्यनेन क्षयाहव्यतिरिक्ताक्षय्यतृतीयादिविषयत्वावगतेः । "एकोद्दिष्टं तु कर्तव्यमौरसेन मृतेऽहनि । सपिण्डीकरणादूर्ध्वं मातापित्रोर्न पार्वणम्" इति **पैठीनसिवचनविरोधाच्च** । एवं च सति मृताहे पार्वणैकोद्दिष्टयोरुभयोरपि पक्षयोः प्राप्तत्वात् "अमायां वा क्षयो यस्य प्रेतपक्षेऽथवा भवेत् । सपिण्डीकरणादूर्ध्वं तस्योक्तः पार्वणो विधिः ॥" इति **शङ्खवचनेन** दर्शप्रेतपक्षमृतयोरेव पार्वणस्य नियतत्वात्तत्र मृतयोरेव पार्वणमन्यत्र मृतयोरेकोद्दिष्टमिति **विज्ञानेश्वरप्रभृतयः** । अन्ये तु द्वादशविधपुत्रेष्वौरसक्षेत्रजपुत्रयोर्विशेषस्तत्रापि साग्नित्वं, तत्रापि दर्शापरपक्षमृतिरित्येवं विशेषोपसंहारपरंपरया पुरोडाशाग्नेयवद्विशेषोपसंहारपर्यवसानाद्दर्शापरपक्षमृतावपि साग्न्यौरसक्षेत्रजावेव पार्वणं कुर्यातां, न निराग्निपुत्रा इति वर्णयन्ति । तदेतद्विचारणीयम् । किं नियमप्रतिपादनं न्याय्यमुत विशेषोपसंहार इति । तत्र यदि नियमप्रतिपादनं न्याय्यमित्युच्यते तदा दर्शापरपक्षमृतिं विनाऽपि साग्नेः पार्वणाविधानमनर्थकं स्यात् । तथाऽऽह **सुमन्तुः**—"प्रत्यब्दमितरे कुर्युरेकोद्दिष्टं सुता दश । अनग्निमानौरसश्च कुर्यात्साग्निस्तु पार्वणम् ॥" **पुलस्त्योऽपि**—"अनग्नेरौरसस्योक्तमेकोद्दिष्टं मृतेऽहनि । प्रत्यब्दं पार्वणं साग्नेरन्येषां तु न पार्वणम् ॥" इति । अथ विशेषोपसंहारो न्याय्यस्तर्हि साग्नेरेव पार्वणस्य विहितत्वात् । दर्शापरपक्षमृतावपि तस्यैव पार्वणं निरग्नेर्नातोऽमायां वा क्षयो यस्येति वाक्यं साग्निविषयमेवोपसंहरणीयमिति विशेषोपसंहार एव युक्तः प्रतिभाति । तथा च **श्राद्धकल्पलतायां**—"इन्दुक्षये प्रेतपक्षे विपत्तिश्चेद्द्विजन्मनः । साग्निकः पार्वणं कुर्यादेकोद्दिष्टं निराग्निकः ॥" इति । तस्मादौरसस्यैव कलौ प्रचुरत्वात्स एव साग्निर्दर्शापरपक्षमृतौ पार्वणं कुर्यादन्यथैकोद्दिष्टमेवेति राद्धान्तः । तथा च **मत्स्यपुराणम्**—"प्रदानं यत्र तत्रैषां सपिण्डीकरणात्परम् । पार्वणेन विधानेन देयमग्निमता सदा ॥" **वृद्धयाज्ञवल्क्योऽपि**—"वैतानाग्निर्गृहे येषां मातापित्रोः क्षयेऽहनि । न तेषामधिकारः स्यादेकोद्दिष्टे कदाचन ॥ सपिण्डीकरणादूर्ध्वमग्नियुक्तस्य पार्वणम् । अनग्नेस्तु क्रिया नान्या एकोद्दिष्टमृते क्वचित् ॥ एकोद्दिष्टं विधिस्तेषां मन्त्रे वाजसनेयिनाम् । येषां माध्यन्दिनी शाखा ये द्विजा अग्निवर्जिताः ॥" इति । नन्वेवं तर्हि "बह्वग्नयस्तु ये विप्रा ये चैकाग्नय एव वा । तेषां सपिण्डनादूर्ध्वमेकोद्दिष्टं न पार्वणम्" इति **स्मृत्यन्तर**वचनं विरुध्येत । मैवम् । अस्य वचनस्यान्यथाऽर्थोपपत्तेः । तथा हि ये पितरः साग्नयो मृता भवन्ति तेषां निराग्निः सपिण्डनादूर्ध्वमेकोद्दिष्टं कुर्यात्तथा निरग्नयः पितरो मृताः साग्निः पुत्रस्तदा सपिण्डनादूर्ध्वं मृताहे पार्वणं कुर्यादिति । तथा च **मरीचिः**—"साग्निकौ तु पितापुत्रावमायां स्यात्पिता मृतः । पार्वणो हि विधिस्तस्य प्रतिसंवत्सरं भवेत् ॥" तथा—"साग्निकस्य पितुः पुत्रोऽमावास्यायां मृतस्य च । पार्वणो हि विधिस्तस्य प्रतिसंवत्सरं भवेत् ॥" ततः न कश्चिद्विरोधः । अभिरम्यतामिति कर्त्रोक्तेऽभिरताः स्म इति श्राद्धिनः प्रतिवदेयुरित्यर्थः । अत्रैक आहुः—"एक एव द्विजो भोज्यः पिण्डोऽप्येको विधीयते।" इति वचनादेक एव श्राद्ध्येकोद्दिष्ट इति । तदयुक्तम् । तस्य वचनस्य प्रेतैकोद्दिष्टविषयत्वात् । "अभिरम्यतामिति वदेद् ब्रूयुस्तेऽभिरताः स्म इति" इति **याज्ञवल्क्येन** बहुत्वाभिधानात् । "इतरे" इति सूत्रोपदेशाच्च । अत्रैतच्चिन्त्यते—किं क्षयाहश्राद्धं नित्यं कर्म कृत्वा कर्तव्यमुताकृत्वेति । तत्र नित्यं कृत्वैव श्राद्धमाचरन्तीति सदाचारः । **वृद्धयाज्ञवल्क्येन** तु श्राद्धानन्तरं नित्यं कर्म कुर्यादिति उक्तम् । तथा च—"क्षयेऽहनि समासाद्य स स्नात्वा विधिपूर्वकम् । स्नानं सन्ध्यां प्रकुर्वीत नित्यकर्म न कारयेत् ॥ नित्यं नैमित्तिकं काम्यं त्रिविधं धर्मलक्षणम् । निमित्तं तु व्यतिक्रम्य नित्यं कर्म न कारयेत् ॥ जपं होमं तथा दानं तर्पणं देवताऽर्चनम् । क्षयेऽहनि समासाद्य न कुर्यात्पूर्वमेव हि ॥ क्षयाहं तु समासाद्य न कुर्यात् प्राक्च तर्पणम् । पितृघाती स विज्ञेयो वदत्येवं पितामहः ॥" इति तत्सदाचारविरोधाच्चिन्त्यम् । अथवा सामग्र्यजुःशाखिनां पूर्वं नित्यकर्म, बह्वृचानां पश्चादिति व्यवस्थेत्यविरोधः । "सामगा याजुषाः पूर्वं बह्वृचाश्च तथान्तके" इति तेनैवोक्तत्वात् । अथवा "एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ।" इत्येकोद्दिष्टस्य नैमित्तिकत्वे "नित्यान्नैमित्तिकं बलीयः" इति न्यायादेकोद्दिष्टमेव पूर्वं पश्चान्नित्यं न क्षयाहनैमित्तकपार्वणमपीति व्यवस्था । तथा च **वृद्धयाज्ञवल्क्य एव**—"एकोद्दिष्टे निवृत्ते तु तथा विप्रविसर्जने । नित्यकर्म ततः कुर्यात्तर्पणं देवतार्चनम् ॥ नित्यं नैमित्तिकं चैव द्वावेतौ परमार्थिनौ । नैमित्तिके व्यतीते तु ततो नित्यं समाचरेत्" इति । **विश्वामित्रोऽपि**—"नैमित्तिकं यदा श्राद्धं पैतृकं कुरुते नरः । तदा नित्यं न कुर्वीत तीर्थश्राद्धं विना क्वचित् ॥ नित्ये नैमित्तिके प्राप्ते नित्यं न परिलङ्घयेत् । आदौ नैमित्तिकं कुर्यात्पश्चान्नित्यं समाचरेत् ॥" इति । अपि च पठन्ति—"प्रत्याब्दिकनिवृत्ते तु पश्चान्नित्यं समाचरेत् । अनयोर्भिन्नतन्त्रत्वात्स्थालीपाकाग्निहोत्रवत्" इति श्राद्धकाशिकायां चतुर्थी कण्डिका ॥ ४ ॥ ॥ * ॥

इति श्राद्धकाशिकायां सूत्रवृत्तौ एकोद्दिष्टश्राद्धं समाप्तम् ।

एवं पार्वणैकोद्दिष्टमुपादिश्येदानीं सपिण्डीकरणमुपक्रमते—**ततः संवत्सरे पूर्णे त्रिपक्षे द्वादशाहे वा यदहर्वा वृद्धिरापद्येत**--ततःशब्दो हैतौ, यतः सपिण्डीकरणमुभयात्मकं तत उच्यत इत्यर्थः । अथवा तत इति दशाहात्परतः एकादशेऽहनीत्यर्थः । पार्वणैकोद्दिष्टानन्तरोपन्यासे त्वर्थस्य लब्धत्वात् । एतच्च निरग्नौ प्रेते एकादशाहे दर्शसंभवे साग्निकर्तृविषयम् । "एकादशाहे द्वादशाहे वा" इति । **बौधायनेन** चानग्नौ पितरि पुत्रस्य साग्नित्वाधिकाराभावादेव तद्व्याख्यानमयुक्तमिति वाच्यम्, "भार्यामरणपक्षे वा देशान्तरगतेऽपि वा । अधिकारी भवेत्पुत्रो महापातकिनोऽपि वा " इति **शङ्खेना**धिकारस्य प्रतिपादितत्वात्, तस्योपादानाच्छ्रौते स्मार्ते दर्शानुरोधविषयत्वाच्च । तथा च **कार्ष्णाजिनिः**—"सपिण्डीकरणं कुर्यात् पूर्वे दर्शेऽग्निमान् सुतः । परतो दद्य रात्राचेत्कुहूरब्दोपरीतरः " इति । अग्निमान् साग्निः । दशरात्रात्पर एकादशे द्वादशे वा । एकादशे इत्याशौचान्तोपलक्षणम् । तथा च **कात्यायनः**—" सर्वेषामेव वर्णानामाशौचान्ते सपिण्डनम् " इति । नाग्निमतां द्विजातीनामिति शेषः । अब्दोपरीतरः इत्युल्लेखात् । एकादशेऽहनि कुहूश्चेदित्यन्वयः । इतरो निरग्निः । **वृद्धवसिष्ठः**—"अथ चेत्स्यादमावास्या मृताहाद्दशमेऽहनि । सपिण्डीकरणं तस्यां कुर्यादेव सुतोऽग्निमान् ॥" मृताहादूर्ध्वदिनमारभ्य दशमेऽहनीत्येकादशाहे इत्यर्थः । ननु चैकादशाहे वृषोत्सर्गादिकर्मबाहुल्यात्कथमेतच्छक्यते कर्तुम् । नैष दोषः पुरुषप्रयत्नसाध्यत्वादस्यार्थस्य शक्यत्वात् । अथवा एकादशाहं निर्वर्त्य सपिण्डीकरणं कृत्वा प्रेतं सापिण्ड्यपिण्डपितृयज्ञानन्तरमुक्तकाले मासिकादि कुर्यादिति क्रमः । मासिकानां सपिण्डीकरणादूर्ध्वं भावित्वादपि । तथा च–" श्राद्धानि षोडशाकृत्वा कुर्यादेव सपिण्डनम् । " अपि च वृद्धिविषये **रेणुः**—" कार्यव्यासङ्गतो वित्ताभावाद्वा देशविप्लवात्। राजदैवोपघाताद्वा मासिकान्यकृतानि चेत् ॥ कृत्वा सपिण्डनं वृद्धिकर्म स्यान्मासिकान्यतः । " इति । " एकत्र निर्णीतः शास्त्रार्थोऽन्यत्राप्युपातिष्ठते " इति न्यायात् । संवत्सरे पूर्णे वृद्ध्यभावे स्मार्ताग्नौ प्रेते निरग्निकर्तृविषयम् । वृद्धिविषयस्य वक्ष्यमाणत्वात् । तथा च **भविष्यपुराणम्**—"सपिण्डीकरणं कुर्याद्यजमानस्त्वनग्निमान् । अनाहिताग्नेः प्रेतस्य पूर्णेऽब्दे भरतर्षभ ॥" **पुलस्त्योऽपि**--" निरग्निकः सपिण्डत्वं पितुर्मातुश्च धर्मतः । पूर्णे संवत्सरे कुर्याद्वृद्धिर्वा यदहर्भवेत् ॥ " **रेणुरऽपि**--" निरग्निश्चेद्यदा कर्ता प्रेत औपासनाग्निमान् । सपिण्डीकरणं तस्य पूर्णेऽब्दे नात्र संशयः ॥ " इति त्रिपक्ष इत्ययं शब्दः प्रेतकर्त्रोराहिताग्निविषयत्वेन समाहारमध्यपदलोपाभ्यां द्वेधा विवक्षितः । तथा हि-- त्रयः पक्षाः समाहृतास्त्रिपक्षं, पात्रादित्वात् क्लीबभावः । अथवा त्रिभिर्दिनैरूनः पक्षास्त्रिपक्षो द्वादशाहः । ततश्चाहिताग्नौ प्रेते निराग्निः कर्ता, तृतीयपक्षे प्रेते वा निरग्नौ आहिताग्निः कर्ता द्वादशाहे सपिण्डीकरणं कुर्यादुभयोरनाहिताग्नित्वे साग्नित्वे वा द्वादशाहः । एवं व्यवस्थेत्यर्थः । अयं विषयो वाशब्दस्य व्यवस्थितार्थत्वात्संभवे सति घटते । तथा च **सुमन्तुः**--"प्रेतश्चेदाहिताग्निः स्यात्कर्ताऽनग्निर्यदा भवेत् । सपिण्डीकरणं तस्य कुर्यात्पक्षे तृतीयके ॥ " **गोभिलः**--" साग्निकस्तु यदा कर्ता प्रेतश्चानग्निमान् भवेत् । द्वादशाहे तदा कार्यं सपिण्डीकरणं सुतैः ॥ " साग्निकः आहिताग्निः । ननु च साग्निकशब्देन कथमाहिताग्निः, सामान्येनाग्निमद्वाचकत्वात् । उच्यते--यथाऽऽहिताग्नौ प्रेते निरग्निः कर्ता तथा निरग्नौ प्रेते आहिताग्निः कर्तेति शङ्काया विद्यमानत्वात् । तथा--"यजमानोऽग्निमात्राजन् प्रेतश्चानग्निमान् भवेत् । द्वादशाहे तदा कार्यं सपिण्डीकरणं सुतैः ॥" इति **भविष्यपुराण**वचनेऽग्निमच्छब्दवद्भूम्नि मतुपः शासनादाहिताग्निवाचकत्वसंभवाच्च । न चानग्निराहिताग्निश्च समानधर्मेत्युचितम् । किं च--"सपिण्डीकरणं कुर्याद्यजमानस्त्वनग्निमान् । अनाहिताग्नेः प्रेतस्य पूर्णेऽब्दे भरतर्षभ॥" इति **भविष्य**वचने स्मार्ताग्नेः प्रेतस्य कालान्तरेण विषयान्तरस्योपलब्धत्वात् । उभयोराहिताग्नित्वे वचनं--" साग्निकस्तु यदा कर्ता प्रेतो वाऽप्यग्निमान्भवेत् । द्वादशाहे सदा कार्यं सपिण्डीकरणं पितुः॥" इति । अत्रापि वाशब्दः साहिताग्न्यनाहिताग्निविषयत्वेन व्यवस्थितार्थः । ततश्च निरग्नौ प्रेते स्मार्ताग्निः कर्ताऽऽशौचान्ते, स्मार्ताग्नौ प्रेते निराग्निः कर्ता पूर्णेऽब्दे, आहिताग्नौ प्रेते निरग्निः कर्ता त्रिपक्षे, निरग्नौ प्रेते आहिताग्निः कर्ता द्वादशाह एव षोडशश्राद्धानि कृत्वा सपिण्डीकरणं कुर्यादिति मुख्योऽर्थः । तथा च **बृहन्मनुः**--"द्वादशेऽहनि विप्राणामाशौचान्ते तु भूभृताम् । वैश्यानां च त्रिपक्षादावथवा स्यात्सपिण्डनम् ॥" इति । वाशब्दः स्मृत्यन्तरोक्तव्यवस्थायाम् । अतश्च साग्नीनामितिं शेषः । अथवाऽऽहिताग्न्यनाहिताग्निशब्दावेतौ साग्निनिरग्निपरौ । तेन साग्निके कर्तरि वैकादशाहद्वादशाहकालयोर्दर्शानुरोधेन नियमः । तथा च **संग्रहकारः**–" द्वादशाहादिकालेषु सपिण्डीकरणेष्विमे । साग्न्यनग्नित्वविषयः कर्तुरेव नियामकः॥" इति । अतश्च

पिण्डपितृयज्ञानुरोधात्साग्नेरेव द्वादशाहादिकालकर्तृत्वेन निरग्नेरित्युक्तं भवति । तथा च **गालवः**–" सपिण्डीकरणात्प्रेते पैतृकं पदमास्थिते । आहिताग्नेः सिनीवाल्यां पितृयज्ञः प्रवर्तते॥"इति । "आहिताग्नेः सिनीवाल्याम्"इति च साग्निदर्शयोरुपलक्षणम्।प्रमादात्कालातिक्रमे तु **गोभिलः**-"द्वादशाहादिकालेषु प्रमादादननुष्ठितम्।सपिण्डीकरणं कुर्यात्कालेषूत्तरभाविषु॥"उत्तरभाविषु त्रिपक्षादिषु । यदहर्वेत्युभयोरप्यनाग्नित्वाविषयम् । वृद्धेः पूर्वमित्यर्थः । असपिण्डितस्य वृद्धौ दानानर्हत्वात् वाशब्दः स्मृत्यन्तरोक्तकालसमुच्चये । तथा च **बौधायनः**–अथ सपिण्डीकरणं संवत्सरे पूर्णे, त्रिपक्षे वा, तृतीये वा मासि, षष्ठे वैकादशे वेति । **भविष्येऽपि**--"द्वादशाहे त्रिपक्षे वा षण्मासे वा त्रिमासि च । एकादशे वाऽपि मासि मङ्गले वा उपस्थिते॥" इति । मङ्गल इति वृद्धौ । अत्रोत्तरोत्तरकाले वृद्धिसंभवे पूर्वपूर्वकाले वृद्ध्यनुरोधेन सपिण्डीकरणं कुर्यादित्यर्थः । एवं च सत्युभयोरनग्नित्वे वृद्ध्यनुरोधेनैव संवत्सरादर्वाक्सपिण्डीकरणापकर्षोऽन्यथा नेत्युक्तं भवति । तथा च **शाटयायनः**--"प्रेतश्राद्धानि सर्वाणि सपिण्डीकरणं तथा । अपकृष्यापि कुर्वीत कर्ता नान्दीमुखे द्विजः॥" इति । तथा "अन्तरेणैव यो वृद्धिं प्रेतश्राद्धानि कर्षति॥स श्राद्धी नरके घोरे पच्यते पितृभिः सह॥" इति । अपि च **नागरखण्डे**—"ततः सपिण्डीकरणं वत्सरादूर्ध्वतः स्थितम्। वृद्धिर्वाऽऽगामिनी चेत्स्यात्तदार्वागपि कारयेत् ॥" **उशना** अपि--"पितुः सपिण्डीकरणं वार्षिकं मृतवत्सरे । आधानाद्युपसंप्राप्तावेतत्प्रागपि वत्सरात्" इति । आदिशब्दस्तीर्थलोभाद्यर्थः । "वाराणस्यां कुरुक्षेत्रे गयायां तीर्थलोभतः । सपिण्डता द्वादशाह मार्गे सार्थे तु निर्गते ॥" इति वचनात् । " ततः संवत्सरे पूर्णे " इति सूत्रं केचिदन्यथैव व्याचख्युस्तत्र विषयव्यवस्थाऽभावान्नादरोऽस्माकम् । न च **कात्यायनः** अथातोऽधिकार इत्यारभ्य श्रौतस्मार्तकर्माणि श्रौताग्निस्मार्ताग्निमद्विषयाण्यभिधाय सपिण्डीकरणमेव केवलं साग्निविषयमेवाह स्मेति संभावनीयम् । अतो मदुक्ताऽपि व्यवस्था सूत्रस्येतिं मामनुकम्प्य विपश्चितः सहन्ताम् । न चेयं व्यवस्था सूत्रस्य न घटत इत्याशङ्कनीयम्, ऋषिप्रणीतत्वेन सूत्रस्य गहनार्थत्वात् । तस्मादाहिताग्न्यनाहिताग्निनिरग्निविषयत्वेनोक्तैव व्यवस्थेति सिद्धम् । अत्र कश्चिद्भाष्यकृदाह—वर्षपर्यन्तं सर्वकर्मलोपभयात्, "आनन्त्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् । अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते" इति वचनाच्चापकर्षपक्ष एव शोभन इति । तद्बहुस्मृतिवैयर्थ्यान्नादरणीयम् । "अन्तरेणैव यो वृद्धिम्" इत्यनेन प्रत्यवायोपलब्धेः । आनन्त्यात्कुलधर्माणां शरीरस्यास्थितेश्चेति हेतुद्वयोपन्यासादस्य वचनस्य कुलधर्मपरत्वादशक्तरोगिकर्तृविषयत्वावगमाच्च । किं च सति संभवेऽन्तिमपिण्डस्य वर्षान्त एव समापनविधानात् । तथा च–" पूर्णे संवत्सरे पिण्डः षोडशः परिकीर्तितः । " इति । पिण्डः श्राद्धोपलक्षकः । एवं कालमभिधाय प्रयोगमाह–**चत्वारि पात्राणि सतिलगन्धोदकानि पूरयित्वा त्रीणि पितॄणामेकं प्रेतस्य**–पात्राण्यर्घपात्राणि । त्रिभ्योऽत्र दानं न षड्भ्य इति चत्वारीत्युक्तम् । सतिलेत्यत्र बहुव्रीहिणैव तिल्युक्तत्वे लब्धे सशब्दोपादानं मन्त्रराहित्यद्योतनार्थम् । अथवा " तिलोऽसि प्रेतदेवत्य " इति प्रेतपात्रे मन्त्रविपरिणामार्थम् । तथा चैकादशाहश्राद्धे **रेणुः**–" तिलोऽसि प्रेतदेवत्यः प्रेता लोका हि नोत्तमम् । मन्त्रमुक्त्वा तिलानेव प्रक्षिपेदर्घपात्रतः ॥" इति । त्रीणि पितॄणामेकं प्रेतस्येति क्रमवृद्धिः । तेन वैश्वदेवकृत्यानन्तरं पित्र्यमुक्त्वा ततः प्रेतकृत्यमित्यर्थः । अत्रैके वर्णयन्ति–वैश्वदेवकृत्यानन्तरं प्रेतकृत्यं, ततः पितृकृत्यमिति । एकोद्दिष्टस्य सपिण्डीकरणान्तर्भावात् । तथा च **वैजवापः**–चत्वार्युदकपात्राणि प्रयुनक्ति, तत्रैकं प्रेताय त्रीणि पितृभ्य इति । तदयुक्तम्, सूत्रोक्तक्रमस्य वैयर्थ्यात् । न च **वैजवाप**वचनं वाजसनेयिविषयम्, बह्वृचविषयत्वात् । तथा च तत्सूत्रम् । "चत्वार्युदकपात्राण्येकं मृतस्य त्रीणीतरेषाम्"इति ।अतोऽत्र विषयानवबोधादयुक्तमित्युक्तम् । तथा च **कठश्रुतिः**–" दत्त्वा पिण्डान्पितृभ्यस्तु पश्चात्प्रेताय पार्श्वतः । तत्तु पिण्डं त्रिधा कृत्वा चानुपूर्व्या च संततम् ॥ निदध्यात्त्रिषु पिण्डेषु एष संसर्जने विधिः ।" चतुर्थं पिण्डमुत्सृज्य, त्रिधा कृत्वा पिण्डेषु निदध्यादिति **लौगाक्षिवचने**ऽपि चतुर्थपिण्डस्य पश्चाद्दानप्रतीतेः । न चैकोद्दिष्टस्य दैवपूर्वत्वं युक्तम् । तथा च **शातातपः**–"सपिण्डीकरणश्राद्धं दैवपूर्वं न योजयेत् । पितॄनेवाशयेत्तत्र पुनः प्रेतं च निर्दिशेत् ॥" इति । यत्तु प्रेतपूर्वकं पित्र्यश्राद्धमाचरन्ति तद्भ्रान्तिनिबन्धनमित्युपेक्षणीयम् । तथा च **मार्कण्डेयपुराणम्**—"तिलगन्धोदकैर्युक्तं तत्र पात्रचतुष्टयम् । कुर्यात्पितॄणां त्रितयमेकं प्रेतस्य पुत्रक ॥ " **धर्मप्रदीपेऽपि**—"श्राद्धद्वयमुपक्रम्य कुर्वीत सह पिण्डनम् । तयोस्त्रिपुरुषपूर्वमेकोद्दिष्टं ततः परम्" इति । यत्पुनः "पूर्वं कृत्वा नवं प्रेतमुत्तरांस्तु पितामहान् । चतुर्भिः पितृभिर्युक्तं पार्वणं तु विधीयते" इति **चतुर्विं**[illegible] [illegible] प्रेतश्राद्धानुष्ठानविषयं

क्वचित्तथाचरणात् बह्वृचविषयं वा । तस्मात्पूर्वोक्त एव क्रम इति सिद्धम् । अत्र च पितॄणामित्यत्रैकशेषसमासान्मात्रादीनामपीति गमयितव्यम् । व्युत्क्रममृतावपि पूर्वजत्रिकपूरणेन सपिण्डनं कर्तव्यम् । तेनैवोत्तरश्राद्धार्हत्वात् ॥ तथा च **हारीतः**—"ततः प्रभृति वै प्रेतः पितृसामान्यमाप्नुयात् । विन्दते पितृलोकं च ततः श्राद्धं प्रवर्त्तते ॥" तथा—"पितृलोकं गतश्चान्नं भुङ्क्ते श्राद्धं स्वधासमम् । पितृलोकगतस्यास्य तस्माच्छ्राद्धं प्रयच्छत ॥" इति । **ब्रह्मपुराणेऽपि**—"मृते पितरि यस्याथ विद्यते च पितामहः । तेन देयास्त्रयः पिण्डाः प्रपितामहपूर्वकाः ॥ तेभ्यश्च पैतृकः पिण्डो नियोक्तव्यश्च पूर्ववत् । मातर्यथ मृतायां तु विद्यते च पितामही ॥ प्रपितामहीपूर्वं तु कार्यस्तत्राप्ययं विधिः ॥" इति । यत्तु **मनुनोक्तम्**—"व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिण्डता" इति । तन्मात्रादित्रयव्यतिरिक्तविषयम् । तथा च **स्कन्दपुराणम्**—"व्युत्क्रमेण मृतानां च सपिण्डीकृतिरिष्यते । यदि माता यदि पिता भर्ता नैष तदा विधिः" इति । एष विधिर्व्युत्क्रममृतौ सापिण्ड्यनिषेधविधिरित्यर्थः । **सुमन्तुः**—"त्रयाणामपि पिण्डानामेकेनापि सपिण्डने । पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थितः ॥" इति । अत्रैतच्चिन्त्यते—किमपुत्रस्य सपिण्डीकरणं स्यादुत नेति । तत्रैके **कर्कादय** आहुर्नेति । तथा च **गृह्यम्**—"पिण्डकरणे प्रथमः पितॄणां प्रेतः स्यात्पुत्रवांश्चेदिति ।" **स्मृतिरपि**—"अपुत्रस्य परेतस्य नैव कुर्यात्सपिण्डनम् । आशौचमुदकं पिण्डमेकोद्दिष्टं न पार्वणम् ॥" इति । अन्ये त्वपुत्रस्यापि भवतीत्याहुः । तथा च **रेणुः**—"भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा । सपिण्डीकरणं कुर्यात्पुत्रहीने मृते सति ॥ भ्रात्रादिभिरपुत्रस्य सपिण्डीकरणे कृते । एकोद्दिष्टं नियमतः कार्यं तस्यैव सर्वदा ॥"इत्यादि । एवं द्वैधे सति करणे उपकारोऽकरणे प्रत्यवायो नेति केचित् । आपदनापद्विषयत्वेन व्यवस्थेत्यन्ये । एतदुभयमप्यविचारितरमणीयम् । **कर्कादिपक्षे** सापत्यापुत्रस्य असपिण्डने दौहित्रकर्तृकपार्वणादौ असपिण्डितस्य दानानर्हत्वापत्तेः । विधायकवचनैस्तस्य बाधितत्वाच्च । द्वितीयपक्षे तूक्तव्यवस्थापने सपिण्डनस्यानियतत्वेन पिण्डस्यानर्हत्व प्राप्त्याऽनर्हत्वदोषसद्भावापत्तेः । तस्मादपुत्रशब्देनानपत्यस्य विवक्षितत्वात्करणं सापत्यविषयमकरणं चानपत्यविषयमिति व्यवस्थेत्यविरोधः । **प्रेतपात्रं पित्र्येष्वासिञ्चति ये समाना इति द्वाभ्यां**—पात्रं पात्रोदकम् । तेन कर्ता **ये समाना** इति ऋग्द्वयेन प्रेतार्घोदकं पितृपात्रेष्वासिञ्चति मेलनेन संस्कुर्यादित्यर्थः । अत्र संस्कारप्रयोजकत्वात्पूर्वमासिच्य पश्चात्पितृपूर्वं चतुर्भ्योऽर्घदानमिति क्रमः । अत्रैतत्संदिह्यते—प्रेतशब्देन किं चतुर्थः पुरुषोऽभिप्रेतः उताहो नवमृत इति । उभयथाऽपि वचनदर्शनात् । तथा हि **वृद्धयाज्ञवल्क्यः**—"वृद्धस्यैव तु यत्पात्रं तत्सिञ्चेत्प्रपितामहे । तत्सुते सिञ्चयेत्पात्रं तत्सुते सिञ्चयेत्पुनः ॥" **वृद्धवसिष्ठश्च**-"नवातीतार्घपात्रं च पिण्डश्च परिकीर्त्यते । पितृपात्रेषु पिण्डेषु सपिण्डीकरणं तु तत् ॥" इति । तथा निबन्धकृतोऽपि विश्वरूपप्रभृतयः केचित्प्रकर्षेणेतो मृतः प्रेत इति व्युत्पत्त्या चतुर्थस्यार्घपिण्डयोस्त्रिधाकरणेन सेकमेलनाभ्यामपि पिण्डत्रयस्यैकीकरणम्, नवमृतस्यापि अर्घपिण्डयोस्त्रिधाकरणेन पिण्डत्रयमेलनमित्येवं संशयः । अत्रैक आहुः—उभयशास्त्रत्वाच्च विकल्प एवेति । अत्र ते प्रष्टव्याः । किं विकल्पः साधीयानुत व्यवस्थेति । तत्र यदि विकल्पः साधीयानित्युच्यते तदाष्टदोषदुष्टत्वं संभवति । अथ व्यवस्था साधीयसी तर्हि संभवे दोषाभावात्सैव ग्राह्या । न च व्यवस्थासंभवेऽष्टदोषदुष्टो विकल्पः । मीमांसकमृग्या तस्माद्व्यवस्थैव ग्राह्येति । तथा **चाङ्गिराः**—"प्रमाणानि प्रमाणज्ञैः परिकल्प्यानि यत्नतः । सीदन्ति हि प्रमाणानि प्रमाणैरव्यवस्थितैः ॥" **वासिष्ठोऽपि**—"अव्यवस्था च सर्वत्र तद्विनाशनमात्मनः ।" इति । अतश्च साग्निकः कर्ता चतुर्थपुरुषस्यैवार्घपिण्डौ त्रिधा कृत्वा सपिण्डनं कुर्यान्निरग्निकः कर्ता तु मृतस्यैवार्घपिण्डौ त्रिधा कृत्वेत्याविरोधः । तथा च **काश्यपः**—"प्रपितामहवृद्धस्य अर्घपिण्डक्रिया त्रिधा । इतरेषु नियुञ्जीत सपिण्डीकरणेऽग्निमान् ॥" **वृद्धयाज्ञवल्क्योऽपि**—"वृद्धप्रपितामहपिण्डं तं त्रिधा कारयेद् बुधः । प्रकर्षेण गतः प्रेतो न पिता प्रेत उच्यते ॥"**स्मृत्यन्तरेऽपि**—"प्रेतपात्रोदकं पिण्डमितरेषु नियोजयेत् । त्रिधा कृत्वा क्रमेणैव सापिण्ड्ये तु निराग्निकः ॥" इति । प्रेतपात्रोदकं नवमृतपात्रोदकम् । इतरेषु पितामहादिपात्रेषु । **एतेनैव पिण्डो व्याख्यातः**—एतेनेत्यर्घोदकन्यायेन पिण्डो व्याख्यातोऽर्घोदकवत्पिण्डोऽपि त्रिधा कृत्वा पितृपिण्डेषु योजनीय इत्यर्थः । एवकारो मेलनेनैव पङ्क्तिर्भवतीति नियमयति । एवं च सति व्युत्क्रममृतौ तत्पत्न्याः सहगमनमृतौ च यथार्हं प्रपितामहेन भर्तृसपिण्डने सत्यपि पार्वणान्वष्टक्यादौ पङ्क्तिसिद्ध्यर्थं पुनरपि पितामहीप्रपितामह्यादिभिर्यथायोगं सपिण्डीकरणं कर्तव्यमित्युक्तं भवति । तथा च **रेणुः**—"व्युत्क्रमेण प्रमीता ये तद्विना प्रेतता ध्रुवम् । पुनः सपिण्डनं तेषां कुर्यात्प्रेते पितामहे ॥ अन्वष्टकासु वृद्ध्यादौ पितामह्यादिभिः सह । श्राद्धे सत्युपपन्नं स्यान्न च पित्रा सपिण्डनम् ॥" **उशनाः**—"अखण्डितो यदा पिण्डः पत्या चैकेन योजितः । अन्व-

ष्टक्येषु कर्षूणां तर्पणे च कथं पृथक् ॥ पुनः सपिण्डनं कार्यं पितामह्यादिभिः सह ।" पठन्ति च—"व्युत्क्रमेणापि सापिण्ड्यं कार्यमाचार्यसंमतम् । तथाऽप्यूर्ध्वस्य सापिण्ड्ये कृतेऽस्य पुनराचरेत् ॥" इति । एवमन्यत्राप्यूहनीयम् । अत्रैतन्मीमांस्यते—किं सहगमने पत्न्याः सापिण्ड्यं केवलं भर्त्रैव सह किंवा श्वशुरादिभिरपीति । अत्रैक आहुः—"पत्या चैकेन कर्तव्यं सापिण्डीकरणं स्त्रियाः । सा मृताऽपि हि तेनैक्यं गता मन्त्राहुतिव्रतैः ॥" इत्यत्रैकशब्दस्य मुख्यवाचकत्वादस्य श्राद्धस्य पार्वणत्वात् पत्येत्येकत्वं पितामहाद्युपलक्षणमिति । अन्ये तु पुनरेकशब्देन, "जीवत्पिता पितामह्या मातुः कुर्यात्सपिण्डताम् । प्रमीतपितृकः पित्रा पितामह्याऽपि वा सुतः ॥ तन्माता तत्पितामह्या तच्छ्वश्र्वा वा सपिण्डनम् । आसुरादिविवाहेषु विन्नानां योषितां स्मृतम् ॥" इति वचनविहितस्य विकल्पचतुष्टयस्य निवर्तकत्वमिति व्याचक्षते । ततश्च पित्रादित्रयेणैव मातुः सपिण्डनामिति उभयेषामाभिप्रायः । तदपरे न क्षमन्ते । पत्न्याः पिण्डस्य श्वशुरादिपिण्डेषु मेलनानुचितत्वापत्तेः । अतश्च सत्यपि पार्वणत्वेऽन्वारोहणे भर्त्रा केवलं पत्न्याः सापिण्डनामित्यन्येषामभिप्रायः । एवं च सत्यन्वारोहणे सापिण्ड्यं युक्तमित्याभाति । "मृता याऽनुगता नाथं सा तेन सहपिण्डताम् । अर्हति स्वर्गवासं च यावदाभूतसंप्लवम् ॥" इत्यनेन विशिष्टविधानात् । पार्वणादावपि तासामंशभागित्वे पिण्डदानेष्वपि कुशैरेव शिरसो गोपनादिविधानोपपत्तेः । तथा च "श्वशुरस्याग्रतो यस्माच्छिरःप्रच्छादनक्रिया" इति प्रागुक्तम् । तथाच **हेमाद्रिपद्धतौ**—" पत्या चैकेन कर्तव्यं सपिण्डीकरणं सुतैः । सहयाने तु मातृणां वर्जयेत्तत्पितामही ॥" वचनान्तराण्यपि । तत्र **व्यासः**—" मातुः सपिण्डीकरणं क्रियते स्वामिना सह । मातृकं पैतृकं पिण्डमेकीकृत्य विधानतः ॥" **लौगाक्षिर**पि—" पितामह्यादिभिः स्त्रीभिर्मातरं तु सापिण्डयेत् । पितरि ध्रियमाणे तु तेनैवोपरते सति ॥" **पुराणसमुच्चये**ऽपि—"पितामहादिभिः सार्धं पितुः कुर्यात्सपिण्डताम् । मातुर्भर्त्रा सहैकेन न त्वन्यैः श्वशुरैः सह ॥" इति । पङ्क्तिकरणं तु प्रागेवाभिहितमित्यलं बहुना । अत्रैके विवदन्ते—सहगमने भर्तुः सपिण्डनं विधाय पश्चात्पत्न्या अपि सपिण्डनमिति द्वयोः सपिण्डनं पृथक् पृथगिति । अन्ये पुनर्दम्पत्योः परस्परममन्त्रकं पिण्डद्वयमेलनं कृत्वाऽनन्तरं त्रिभिः सह भर्तुः सपिण्डने पत्न्या अपि कृतं भवेदित्येकमेव सपिण्डीकरणमित्याहुः । तन्न, सहगमनेऽनुगमने च भर्त्रैकेन सह सपिण्डनस्य विहितत्वादेकमेव सपिण्डीकरणं युक्तमित्याभाति, न चासंस्कृतेन पत्या सपिण्डनमयुक्तमिति वाच्यम् । "असंस्कृतौ न संस्कार्यौ पुत्रपौत्रप्रपौत्रकैः । पितरं तत्र संस्कुर्यादिति **कात्यायनो**ऽब्रवीत् । पापिष्ठमपि शुद्धेन शुद्धं पापकृताऽपि वा । पितामहेन पितरं संस्कुर्यादिति निश्चयः ॥" इति **कात्यायनवचनात्** पापिष्ठमगतप्रेतभावं शुद्धेन प्रेतत्वरहितेन तथा शुद्धं गतप्रेतभावं पापकृता प्रेतेन पितरं संस्कुर्यादित्यर्थः । अनेन वचनेनासंस्कृतेनापि मेलनमभ्यनुज्ञातम् । तस्मादेकमेव सपिण्डीकरणमिति सिद्धम् । तथा च **रेणुः**—"पृथक्चित्यां समारूढा म्रियते तु मृताऽपि वा । पत्या चैकेन कर्तव्यं तस्या अपि सापिण्डनम् ॥ पृथक्चित्यां समारूढा या नारी च पतिव्रता । स्वामिना सह पिण्डत्वं तस्या अपि कृतं भवेत् ॥ दम्पत्यर्थं द्विजं चैकं भोजयेत्त्रींस्तथोत्तरे । तयोः सपिण्डीकरणं तूष्णीं दम्पतिपिण्डयोः॥" इति **स्मृतिर**पि । "मृते पितरि मातुस्तु न कुर्यात्सहपिण्डनम् । पितुरेव सपिण्डत्वे तस्या अपि कृतं भवेत् ॥" अन्यच्च—"देशकालद्रव्यदेवकर्त्रैक्ये तान्त्रिको विधिः । भेदे पुनर्निमित्तानां कर्मावृत्तिरपीष्यते॥" **स्मृत्यर्थसारे**ऽपि—अन्वारोहणे त्वेकचित्याधिरोहणे स्त्रियाः पृथक् सपिण्डीकरणं न कार्यमिति । अत्रैके पुनराक्षिपन्ति-सापिण्ड्यश्राद्धे चतुर्भ्यः पिण्डदानं कृत्वाऽनन्तरं सपिण्डने कृते प्रत्यवनेजनादि सर्वं कर्म मृतमारभ्यैव कर्तव्यम् । "पुनः प्रेतं न निर्दिशेत्" इति वचनात् । एवं सति प्रत्यवनेजनादिकर्मसु पितामहपिण्डे पितुर्देवतात्वं, प्रपितामहपिण्डे पितामहस्य, वृद्धप्रपितामहपिण्डे प्रपितामहस्येत्येवं चतुर्थस्य निवृत्तिरिति तेषामभिप्रायः । तदयुक्तम् । उपक्रमोपसंहारविरोधाद्येनैवारम्भस्तेनैव समाप्तिरिति न्यायबाधादेकस्मिन्पिण्डेऽन्यथानिर्देशेन द्विदेवताकत्वसंभवादुपक्रमस्यैव वैयर्थ्यापत्तेः । न च तथेष्टम्, स्मृत्यन्तरे श्राद्धसमाप्तावेव पिण्डमेलनस्य विहितत्वात् । यत्तु "पुनः प्रेतं न निर्दिशेत्" इत्युक्तं तदपि सापिण्ड्यश्राद्धोत्तरश्राद्धेषु प्रेतशब्दनिर्देशाभावप्रतिपादनपरम् । न पुनर्व्युत्क्रमप्रयोगविधायकम् । तस्मात्प्रकृतोपक्रान्तक्रमेणैव श्राद्धं कृत्वाऽन्ते पिण्डसंमेलनं कर्तव्यमिति युक्तम् । तथा च **ब्रह्मपुराणम्** । "सुवर्तुलांस्ततस्तांस्तु कृत्वा पिण्डान्प्रपूजयेत् । अर्घैः पुष्पैस्तथा धूपैर्दीपमाल्यानुलेपनैः॥" इति । अत्रैके आहुः—"पुत्रेणैव तु कर्तव्यं सपिण्डीकरणं स्त्रियाः । पुरुषस्य मृतस्यान्ये भ्रातृपुत्रादयोऽपि ये ॥ अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डताम् ।" इत्याभ्यां वचनाभ्यां पतिपुत्रयोरेवाधिकारात्तदभावे स्त्रीणां सपिण्डनं नास्तीति । अन्ये तु सर्वत्र सर्वस्य भवतीत्याहुः । एवं च

सत्यकरणमनपत्यस्त्रीविषयं, करणं तु सापत्याविषयमित्यस्मन्मतिः । तथा च पठन्ति—"कुर्याच्चेन्मृतभर्तृका यदि मृता पुत्रः स्वभर्त्रैव तत्साापिण्ड्यं सधवा मृता युवतिभिर्भर्तारमन्वेति या । तस्या भर्तृसपिण्डनं सुतवती भर्तारमन्वेति या तस्याः स्त्रीभिरनुक्रमादिति ह **षट्त्रिंशन्मते** निर्णयः ।" अस्यार्थः—मृतभर्तृकायाः सपिण्डनं चेत्पुत्रः करोति तदा भर्त्रैव केवलं सपिण्डयेत् । जीवद्भर्तृकायास्तु पितामह्यादिभिरेव । या तु भर्तारमनुगच्छति तस्या अपुत्राया भर्त्रैव सपिण्डनं, पुत्रिण्यास्त्वनुगमनेऽपि पितामह्यादिभिरेवेति । अनेन च पतिपुत्राभावे सपिण्डनमस्तीति गम्यते । अतश्चोक्तैव व्यवस्थेति । तथा च **धर्मप्रदीपे**—"अपुत्रा योषितः पिण्डं भर्तृपिण्डेन योजयेत् । यदि जीवति भर्ता तु श्वश्र्वादिषु समाविशेत्॥" इति । अपुत्रा सापत्या मृता स्त्री । अनपत्यायाः साापिण्ड्यप्रयोजनानुपयुक्तेः । अत्रैतत्संदिह्यते—किं सपिण्डीकरणे श्राद्धद्वयमेकपाकेनोत पृथक्पाकेनेति । उभयथा वचनदर्शनात् । तथा "हि ओदनं च पृथक्पृथक्" इति । तथा—"सपिण्डीकरणं श्राद्धं पृथक्पाकेन शस्यते॥" इति । **रेणुस्तु** पाकैक्यमाह—"एवं श्राद्धद्वयं कुर्यात्कार्यैक्यादेकपाकतः । एकोद्दिष्टं पार्वणं च शेषं प्रकृतिवद्भवेत्॥" इति । अत्र व्यवस्थीयते--पृथक्पाकविधानमसपिण्डनविषयम् । पाकैक्यविधानं तु पुनःसपिण्डीकरणविषयमिति । अन्यथा विरोधापत्तेः। न च विकल्पः संभावनीयः, अष्टदोषदुष्टत्वात् । पुत्रिकापुत्रविषये **बौधायनः**-"आदिशेत्प्रथमे पिण्डे मातरं पुत्रिकासुतः । द्वितीये पितरं तस्यास्तृतीये च पितामहम् ॥" चशब्दश्चतुर्थे चतुर्थसमुच्चयार्थः । गोत्रविषये तु **मार्कण्डेयः**--"ब्राह्मादिषु विवाहेषु या ऊढा कन्यका भवेत् । भर्तृगोत्रेण कर्तव्या तस्याः पिण्डोदकक्रिया॥ आसुरादिविवाहेषु पितृगोत्रेण धर्मवत्॥" इति । **लौगाक्षिः**--"मातामहस्य गोत्रेण मातुः पिण्डोदकक्रियाम् । कुर्वीत पुत्रिकापुत्र एवमाह प्रजापतिः॥" इति । पत्नीकर्तृकसाापिण्ड्ये विरोध आभासते । **लौगाक्षिः**--"सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममन्त्रकम् । सपिण्डीकरणं श्राद्धमेकोद्दिष्टं च पार्वणम् ॥" **स्कान्दे** तु--"यज्ञेषु मन्त्रवत्पत्नी कर्म कुर्याद्यथाविधि । तदौर्ध्वदेहिके सा हि मन्त्रार्हा धर्मसंस्कृता ॥" इति । अत्र विरोधे ह्यमन्त्रककरणमधर्म्यविवाहोढाविषयम्, समन्त्रकरणं तु मन्त्रोढाविषयमिति व्यवस्था । तथा च **शातातपः**—"धर्म्यैर्विवाहैरूढा या सा पत्नी परिकीर्तिता । सहाधिकारिणी ह्येषा यज्ञादौ कर्मकारिणी ॥" तथा—"मन्त्रार्हा धर्मसंस्कृता" इत्युक्तम् । एतच्चानुज्ञाविषयम् । "नारी या त्वननुज्ञाता पित्रा भर्त्रा सुतेन वा । विफलं तु भवेत्तस्या या करोत्यौर्ध्वदेहिकम्॥" **इत्यापस्तम्बोक्तेः** । तदभावे विशेषमाह **कात्यायनः**—"असंस्कृतेन पत्न्या च ह्यग्निदानं समन्त्रकम् । कर्तव्यमितरत्सर्वं कारयेदन्यमेव हि ॥" तथा--"सर्वबन्धुविहीनस्य पत्नी कुर्यात्सपिण्डनम् । ऋत्विजं कारयेद्वाऽपि पुरोहितमथापि वा ॥" इति । पत्नीकर्तृत्वं साध्वीपरं वा । "अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता । पत्न्येव दद्यात्तत्कृत्स्नं पिण्डमर्धं हरेदपि ॥" इति वचनादिति । असंस्कृतः अनुपनीतः । स च कृतचूडस्त्रिवर्षः । तथा च **सुमन्तुः**—"श्राद्धं कुर्यादवश्यं तु प्रमीतपितृको द्विजः । व्रतस्थो वाऽव्रतस्थो वा एक एव भवेद्यदि॥" इति । यत्तु **मनुनोक्तं**—"नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते । न ह्यस्मिन्युज्यते कर्म किंचिदा मौञ्जिबन्धनात्॥" इति । तदत्रिवर्षकृतचूडविषयम् । तथा च **सुमन्तुः**—"अनुपेतस्तु कुर्वीत मन्त्रवत्पैतृमेधिकम् । यद्यसौ कृतचूडः स्याद्यदि स्याच्च त्रिवत्सरः ॥ नाभिव्याहारयेद्ब्रह्म यावन्मौञ्जीनिबन्धनम् । मन्त्राननुपनीतोऽपि पठेदेवैक एव यः ॥" इति । तस्मात्त्रिवर्षकृतचूडः पित्रोरौर्ध्वदेहिकं मन्त्रवदेव कुर्वीतेत्यलं प्रसङ्गेन । **अत ऊर्ध्वं संवत्सरे संवत्सरे प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः स्यात्**—अत इति सपिण्डनादूर्ध्वम् । वीप्सा नित्यत्वार्था । प्रेतायेत्येकत्वं विहितपार्वणव्यतिरिक्तविषयम् । अहःशब्दस्तिथिवचनः । अन्नग्रहणं सति संभवे आमव्युदासार्थम् । तेन क्षयाहे पाकेनैव श्राद्धमिति ज्ञापितम् । अत्र च सपिण्डनादूर्ध्वं प्रेतशब्दोपादानं द्वादशाहादौ सपिण्डनेऽपि पुनर्मासिकावृत्तिज्ञापनार्थम् । तथा च **गोभिलः**—"यस्य संवत्सरादर्वाग्विहिता तु सपिण्डता । विधिवत्तानि कुर्वीत पुनः श्राद्धानि षोडश॥" इति । विधिवदिति यथाऽधिकारं पार्वणैकोद्दिष्टविधिनेत्यर्थः । तथा च **पैठीनसिः**—"सपिण्डीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः । प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्सदा पुनः ॥" सपिण्डीकरणादूर्ध्वमित्युक्तेस्ततः प्रागेकोद्दिष्टविधिनेत्यर्थः । तथाच **पैठीनसिः**—"सपिण्डीकरणादर्वाक्कुर्याच्छ्राद्धानि षोडश । एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु॥" इति तेनैवोक्तत्वात् । **जातूकर्ण्योऽपि**--"पितुः पितृगणस्थस्य कुर्यात्पार्वणवत्सुतः । प्रत्यब्दं प्रतिमासं च विधिरेष सनातनः॥" इति । पुनर्मासिककरणमाह **कात्यायनः**—"सपिण्डीकरणादूर्ध्वं न दद्यात्प्रतिमासिकम् । एकोद्दिष्टविधानेन कुर्यादित्याह

गौतमः ॥” सपिण्डनादूर्ध्वमेकोद्दिष्टविधानेन प्रतिमासिकं न दद्यात्किं तु पार्वणविधानेनेति **कात्यायनमतम्** । **गौतममते** त्वेकोद्दिष्टविधानेनेति । अयं व्यवस्थितो विकल्पः । साग्निः पार्वणविधानेन निरग्निरेकोद्दिष्टविधिनेत्यर्थः । तथा च **जाबालः**—“असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत् । सपिण्डीकरणादूर्ध्वं त्रिभिः सामान्यामिष्यते ॥” **पुलस्त्यो**ऽपि—“एकोद्दिष्टं भवेत्तावद्यावत्पित्रोः सपिण्डनम् । सपिण्डीकरणादूर्ध्वमेकोद्दिष्टं निवर्तते ॥” इति । साग्निविषयमेतत् । **गौतममतो**क्तमेकोद्दिष्टं तु निराग्निविषयमित्यविरोधः । **शौनको**ऽपि—तदूर्ध्वमेकोद्दिष्टाविधानेन दद्यादिति । पार्वणत्वे विशेषमाह **गौतमः**—“अदैवं पार्वणं श्राद्धं सोदकुम्भमधर्मकम् । दद्यात्प्रत्याब्दिकात्पूर्वं संकल्पविधिनान्वहम् ॥” अधर्मकं दातृभोक्तृधर्मशून्यम् । प्रत्याब्दिकश्राद्धात्पूर्वं सपिण्डीकरणादूर्ध्वमित्यर्थः । अत्रैतत्संदिह्यते—सापिण्ड्यादूर्ध्वमासेषु किं प्रेतशब्दनिर्देश उत पितृशब्दस्येति । तत्रैक आहुः—“सापिण्डकिरणादर्वाक्प्रेतशब्देन तं वदेत् । तदूर्ध्वं पितृशब्देन शर्मशब्देन निर्दिशेत्” इत्यनेन पितृशब्द इति । अन्ये त्वाहुः—पितृशब्दोच्चारस्य मासिकादन्यश्राद्धविषयत्वात्प्रेतशब्द एवेति । तथा च—“यस्य संवत्सरादर्वाक्सपिण्डीकरणं भवेत् । प्रेतत्वं च पितृत्वं च भवेत्तस्य द्विरूपता” इति । मासिकेषु प्रेतत्वमष्टकादौ पितृत्वमित्यर्थः । अतो यदत्र युक्तं तद्ग्राह्यम्पार्वणत्वेऽग्नौकरणमाह—“पाणौ हुतं तु नाश्नीयात्प्रेतोद्देशेषु सर्वदा । तद्धोमं च न वा कुर्यादश्नीयात्तु सपिण्डने ॥” अस्यार्थः—साग्निना प्रेतोद्देशेषु मासिकेषु प्रेताय स्वाहेत्युद्देशेन पाणौ हुतं नाश्नीयात्किं त्वग्नौ क्षिपेत्सपिण्डने तु प्रेतश्राद्धत्वेऽपि हुतमश्नीयात् । तद्धोमं च नवेति निराग्निविषयम् । वाशब्दस्य व्यवस्थार्थत्वात् । निरग्नेरेकोद्दिष्टत्वादग्नौकरणाभाव इति । तथा च **कात्यायनः**—“हस्ते हुतं यदाश्नीयाद्ब्राह्मणो ज्ञानदुर्बलः । नष्टं भवति तच्छ्राद्धमिति **शातातपो**ऽब्रवीत् ॥” **स्मृतिर**पि—“ पितृविप्रकरे होमः साग्नेरपि भवेदिह । अग्नौकरणशेषं हि पित्र्यब्राह्मणभोजने ॥ लौकिकेऽग्नौ क्षिपेदन्नं श्राद्धेष्वत्र करे हुतम् । पार्वणादौ तदश्नीयात्” इति । पठन्ति च—“ साग्निकेन तु विप्रेण यदन्नं हूयते करे । तदन्नं निक्षिपेदग्नौ भुक्त्वा चान्द्रायणं चरेत् ॥” इति । अथवा सूत्रे प्रेतशब्दग्रहणं त्रिवर्षपर्यन्तमाब्दिकश्राद्धस्याशुद्धत्वज्ञापनार्थम् । तथा च **वृद्धयाज्ञवल्क्यः**—“सपिण्डीकरणादूर्ध्वं यावदब्दत्रयं भवेत् । बहिः श्राद्धं प्रकर्तव्यं भूरिभोजनवर्जितम् ॥” एतच्च द्वादशाहसपिण्डनाविषयम् । तथा च **स्मृतिः**—“ सपिण्डीकरणादूर्ध्वं यावदब्दत्रयं भवेत् । तावदेव न भोक्तव्यं वर्जयित्वा क्षयेऽहनि ॥” पठन्ति च—“ एकादशाहमारभ्य यावदब्दत्रयं भवेत् । तावच्छ्राद्धं न गृह्णीयादिति **शातातपो**ऽब्रवीत् ॥” इति । अत्रैक आहुः—त्रिवर्षपर्यन्तं श्राद्धं गृहे न कार्यमिति । तन्न । “न कुर्यात्तद्गृहेष्विति ।” प्रेतमशुद्धश्राद्धम् । अत्रैके प्रत्यवतिष्ठन्ते—“आब्दिके पादकृच्छ्रः स्यादेकाहः पुनराब्दिके । अत ऊर्ध्वं न दोषः स्यात्”प्रमाणाभावात् “बहिः श्राद्धं प्रकुर्वीत ” इति वचनाच्च । पठन्ति च—“ त्रैवार्षिकं च प्रेतं स्याच्छङ्खस्य वचनं यथा ॥” इति वचनाद्द्वैवार्षिकमेव शुद्धमिति । तन्न, उक्तवचनविरोधात् । किं चैतद्वचनं प्रायश्चित्ताभावं बोधयाति न शुद्धत्वं विदधाति, वचनान्तरविरोधात् । तथा च **भारद्वाजः**—“ प्राणायामत्रयं वृद्धावहोरात्रं सपिण्डने ।”इति । अतश्च सदाचारानुरोधादाब्दिके पादकृच्छ्रं स्यादित्येतद्वचनमेवं व्याख्येयम्—आब्दिके ऊनाब्दिकानन्तरकर्तव्यमासिके । सपिण्डीकरणे पुनरहोरात्रस्योक्तत्वात् पुनराब्दिकं सपिण्डीकरणम् । अतश्च वर्षान्ते मृताहे एव सपिण्डीकरणं कृत्वाऽऽब्दिकमिति क्रमः । तथाच **जाबालिः**—“पूर्णे संवत्सरे वृत्ते मृताहे पुनराब्दिकम् । सपिण्डीकरणं कृत्वा कुर्यात्पुत्रस्तु नेतरः ॥” तथा च—“पूर्णे संवत्सरे कुर्यात्सपिण्डीकरणं सुतः । एकोद्दिष्टं तु तत्रैव मृतेऽहनि समापयेत् ॥” **गालवः**—“ततः संवत्सरे पूर्णे द्वे श्राद्धे मृतवत्सरे ।” इति । तथा च पूर्णे संवत्सरे चान्द्रायणं, नवे मिश्रके प्राजापत्यं, पुराणेष्वेकाह इत्यर्थः । एषां लक्षणं त्वेकोद्दिष्टप्रकरणेऽभिहितम् । तथा च **हारीतः**—“चान्द्रायणं नवश्राद्धे प्राजापत्यं तु मिश्रके । एकाहस्तु पुराणेषु प्रायश्चित्तं विधीयते ॥” इति । पुराणेष्विति बहुत्वं त्रित्वपरम् । तत ऊर्ध्वं न दोष इत्यर्थः । चतुर्थस्य शुद्धत्वात् । तथा च मासिकान्युपक्रम्याह **रेणुः**—“दशमैकादशे मासि द्वादशे न्यूनवत्सरे । ततो परेद्युरब्दान्ते सपिण्डीकरणं भवेत् ॥ ततोऽपरेऽब्दे द्वितीयवत्सरादौ तथाऽऽब्दिकम् । तृतीयवत्सरादौ स्यात्प्रत्याब्दिकामिति क्रमः” इति । अपि च पठन्ति—“सपिण्डीकरणादूर्ध्वं यावदब्दत्रयं भवेत् । तावद्विप्रो न भोक्तव्यो यदि व्याससमोऽपि च ॥” तथा—“सपिण्डीकरणादूर्ध्वं काम्यश्राद्धेषु भोजयेत् । संवत्सराश्च चत्वारो वर्जनीयाः क्षयेऽहनि ॥ प्रथमेऽब्दे तु मांसानि द्वितीयेऽस्थीनि चैव हि । तृतीये रुधिरं प्रोक्तं चतुर्थेऽन्नं विशुध्यति” इति । द्वादशाहसापिण्ड्यविषयमेतत् । **कात्यायनः**—“अशुद्धेषु च श्राद्धेषु विप्रो भोक्ता न [illegible] । [illegible] कुशमयं कृत्वा पात्रे कव्यं

निवेदयेत् ॥ प्रेतोक्तपिण्डदानं च कर्तव्यमिति नान्यथा" इति । अत्र च प्रेतायान्नं दद्यादिति सूत्रयता अथोदककर्मेत्युपक्रम्यैकादश्यामयुग्मान् ब्राह्मणान् भोजयेदित्यादिना गृह्योक्तं प्रेतश्राद्धमत्रोपयुक्तमिति नात्र पुनरुक्तमिति ज्ञापितम् । तेन मासिकादिषोडशकं कृत्वा सापिण्डयेदित्युक्तं भवति । अन्यथा प्रेतश्राद्धान्यनुक्त्वा सपिण्डीकरणं कथमसूत्रयिष्यत् । मासिकान्याह **याज्ञवल्क्यः**—"मृतेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ॥" अस्यार्थः—अब्दपर्यन्तं मासि मृताहे मासिकानि कार्याणि, आब्दिकश्राद्धमपि प्रतिवर्षमेवमेव, आद्यं तु श्राद्धमेकादशेऽहनि कार्यमिति तत्रैतत्संदिह्यते मासिकस्य मृताहे विहितत्वात् । प्रथममासिकं किं मृताहे स्यादुतैकादशाहे इति । अत्रैक आहुः—आद्यमासिकमेकादशाहे द्वितीयादिकं तु प्रतिमासं मृताह इति । तथा च **रेणुः**—"प्रतिमासं मृताहे स्युर्द्वादशैतानि वत्सरम् । उत्कृष्यते हि तत्राद्यं कुर्यादेकादशेऽह्नि तत्" इति । अन्ये त्वाहुः—एकादशाहे श्राद्धद्वयं कार्यमेकं प्रथममासिकत्वेनापरमेकादशाहिकत्वेनेति । तत्र नाद्यः, प्रथममासिकस्य द्वादशाहादिकालेषु विहितत्वात् । तथा च **गोभिलः**—"मरणाद्द्वादशेऽह्नि स्यान्मास्यूने वोनमासिकम्" इत्यादि । न द्वितीयः, नवैकादशाहश्राद्धाभ्यामेव श्राद्धद्वयोपलब्धेः । तयोरेवैकादशेऽह्नि नियमितत्वाच्च । तथा **चात्रिः**—"प्रेतार्थं सूतकान्ते तु ब्राह्मणान्भोजयेद्दश । आद्यश्राद्धनिमित्तेन चैकमेकादशेऽहनि" इति । एकादशेऽह्नि दशैकं चेत्यन्वयः । तथा—"प्रथमेऽह्नि तृतीये च पञ्चमे सप्तमेऽपि वा । नवमैकादशे चैव तन्नवश्राद्धमुच्यते ॥" तस्मान्नवश्राद्धमाद्यं चैकादशाहे, प्रथममासिकं तु द्वादशाहादाविति युक्तम् । तथा च **कार्ष्णाजिनिः**—"ऊनान्यूनेषु मासेषु विषमाहे समेऽपि वा । त्रैपक्षिकं त्रिपक्षे स्यान्मृताहेष्वितराणि तु ॥" ऊनानीत्यूनमासिकोनषाण्मासिकोनाब्दिकानि । अपि च पठन्ति—"आद्यं त्रैपक्षिकं चैव ऊनषाण्मासिकं विना । अन्यानि मासिकानि स्युः स्वस्वकाले यथाविधि" इति । आद्यमूनमासिकं प्रथममासिकमित्यर्थः । एषां कालमाह **गालवः**—"ऊनषण्मासिकं षष्ठे मास्यन्यूनेन मासिकम् । त्रैपक्षिकं त्रिपक्षे स्यादूनाब्दं द्वादशे तथा" इति । एषां मृताहेष्वनियम इत्यर्थः । तथा च **क्रतुः**—"सार्धे एकादशे मासे तथा सार्धे तु पञ्चमे । ऊनाब्दिकोनषण्मासे भवेतां श्राद्धकर्मणि" इति । पक्षान्तरमाह **गौतमः**—"एकद्वित्रिदिनैर्न्यूने त्रिभागेनोन एव वा । श्राद्धान्यूनाब्दिकादीनि कुर्यादित्याह गौतमः" एकद्वित्रिदिनैर्न्यून इति एकोनत्रिंशदष्टाविंशतिसप्तविंशतिदिनेषु क्रमेणोनाब्दिकोनषाण्मासिकाद्यमासिकानि कर्तव्यानीत्यर्थः । त्रिभागेनोन इत्येकविंशदिने वा तानि कार्याणीति यथाशक्ति विकल्पः, अनुकल्पो वा । द्वादशाहे यदाद्यमासिकविधानं तद्द्विजकर्तृविषयम् । क्षत्रियादीनां त्वाशौचान्ते शरीरपूरकपिण्डसमाप्तावेव मासिकश्राद्धस्य वक्ष्यमाणत्वात् । ऊनानां वर्ज्यकालमाह **गार्ग्यः**—"नन्दायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे । ऊनश्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् ॥" **मरीचिः**—"द्विपुष्करे च नन्दासु सिनीवाल्यां भृगोर्दिने । चतुर्दश्यां च नोनानि कृत्तिकासु त्रिपुष्करे" इति । अत्र केचिद्विवदन्ते—आद्यमेकादशेऽहनीत्येकादशाहश्राद्धं क्षत्रियादीनामाशौचमध्ये भवतीति । "आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि । कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥ एकादशेऽह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतम् । चतुर्णामपि वर्णानां सूतकं तु पृथक् पृथक्" इति वचनाभ्यामेकादशाहे विहितत्वादिति । अन्ये त्वाहुः—एकादशेऽहनीत्यस्याशौचान्तादिनोपलक्षकत्वाच्चातुर्वर्ण्यस्याप्याशौचान्त एवेति । अन्यथा विप्रस्याशौचान्ते क्षत्रियादीनामाशौचमध्य इत्यर्धजरतीयन्यायापत्तेरिति । आद्यं श्राद्धमशुद्धोऽपीत्यस्य मासिकापेक्षया नवश्राद्धस्यैवाद्यत्वान्नवश्राद्धविषयत्वं, "नवश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि" इति **कार्ष्णाजिनि**पाठादिति **निबन्धकृतां** विरोधः । तदेतद्विचारणीयम् । किमाशौचमध्ये करणं विचारसहं किं वाऽऽशौचान्त इति । उभयपक्षस्यापि वाचनिकत्वात् । तथा ह्याशौचमध्ये आह **कात्यायनः**—"एकादशेऽह्नि यच्छ्राद्धं प्रत्येकं तत्समाचरेत् । आशौचेषु च श्राद्धेषु विप्रो भोक्ता न जायते ॥" विप्रं कुशमयं कृत्वेति प्रागुक्तम् । **गालवोऽपि**—"एकादशेऽह्नि यच्छ्राद्धं तदेकोद्दिष्टमाचरेत् । यदि कर्ता न कुर्वीत पुनः संस्कारमर्हति ॥" अन्यच्च—"एकादशेऽह्नि यच्छ्राद्धं तत्कुर्याद् वृषपूर्वकम् । सर्वेषामेव वर्णानां सूतकान्ते पृथक् पृथक्" इति । सापिण्ड्ये **विष्णुरपि**—"मन्त्रवर्जं हि शूद्रस्य द्वादशेऽहनि कीर्तितम् ।" इति । आशौचान्ते **त्वङ्गिराः**—"एकादशेऽह्नि विप्राणां क्षत्रियाणां त्रयोदशे । वैश्यानां षोडशे श्राद्धमेकत्रिंशे च शूद्रके ॥" श्राद्धमेकादशाहिकं मासिकादित्रयं नवमाद्यं च । **मात्स्येऽपि**—"क्षत्रादि सूतकान्ते तु भोजयेदयुजो द्विजान् । द्वितीयेऽह्नि पुनस्तद्वदेकोद्दिष्टं समाचरेत्" तथा—"अशौचानन्तरं पुत्रो वृषोत्सर्गादिपूर्वकम् । आरभेत शुचिर्भूत्वा श्राद्धमेकादशाहिकम् ॥" **अत्रिरपि**—"प्रेतार्थं सूतकान्ते तु ब्राह्मणान्भोजयेद्दश । आद्यश्राद्धनिमित्तेन एकं चैका-

दशेऽहनि'' इति। दशैकं चेत्यन्वयः । एवं वचनविप्रतिपत्तौ व्यवस्थीयते–एकादशाहे श्राद्धत्रयं प्राप्नोति । एकमन्त्यनवश्राद्धं द्वितीयमाद्यश्राद्धं तृतीयमपकर्षे मासिकम् । तत्रापकर्षे ब्राह्मण एकादशाहेऽन्त्यनवश्राद्धमाद्यं चेति द्वयं कृत्वा प्रथममासिकादिश्राद्धचतुर्दशकं च कृत्वा द्वादशाहे सपिण्डीकरणं कुर्यात् । अनपकर्षे त्वेकादशाहे नवमाद्यं चेति द्वयं कृत्वा द्वादशाहादौ विहितस्वस्वकाले मासिकादिषोडशकं कुर्यादिति । क्षत्रियादिभिस्त्वन्त्यनवश्राद्धमाद्यं श्राद्धं चेत्येकादशाहे नियमितत्वादाशौचमध्ये द्वयं कृत्वाऽऽशौचान्ते प्रथममासिकादिषोडशकमपकर्षे कर्तव्यम् । आशौचमध्ये पूरकपिण्डासमाप्तौ मासिकानामविहितत्वादाशौचान्तेऽन्तिमपिण्डदानस्य विहितत्वाच्च । तथा च **मरीचिः**–"आशौचान्तेष्वतः सम्यक् पिण्डदानं समाप्यते । ततः श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिः ॥''. **हरिनाथोऽपि**–"देयस्तु दशमः पिण्डो राज्ञां वै द्वादशेऽहनि । वैश्यानां पञ्चदशके देयस्तु दशमस्तथा ॥ पिण्डः शूद्रेण दातव्यो दिनान्यष्टौ नवाथवा । संपूर्णे च ततो मासे पिण्डशेषं समापयेत्'' इति । अनपकर्षे तु यथाकालं मासिकमिति । अतश्च येषु निबन्धेष्वेकादशाहे क्षत्रादीनां श्राद्धं विहितं तन्नवश्राद्धाद्यश्राद्धविषयम् । येष्वाशौचान्ते प्रतिपादितं तन्मासिकादिश्राद्धषोडशकविषयमित्येवं कल्पनेन **निबन्धकृताम**विरोधाद्देशाचारविषयत्वेन चेति सर्वमनवद्यम् ॥ इति श्राद्धकाशिकायां पञ्चमी कण्डिका ॥ ५ ॥

इति श्राद्धकाशिकायां सूत्रवृत्तौ सपिण्डीकरणम् ॥

इत्थं पार्वणैकोद्दिष्टसपिण्डनश्राद्धेष्वप्रदक्षिणादिधर्मानुपदिश्येदानीं स्वीकृतत्वेन तद्विपरीतप्रदक्षिणादिधर्मान्प्रतिपिपादयिषुराभ्युदयिकश्राद्धमारभते–**आभ्युदयिके प्रदक्षिणमुपचारः**–अभ्युदय इष्टापूर्ताद्युत्सवकालस्तत्र क्रियते इत्याभ्युदायिकम्—शैषिकष्ठञ् । प्रदक्षिणमिति विशिष्टविधिः । उपचारः करणम्। अत्र श्राद्धे सर्वमनुष्ठानं प्रदक्षिणं भवतीत्यर्थः । अभ्युदयो वृद्धिः इत्यनर्थान्तरम् । " अग्न्याधानाभिषेकादाविष्टापूर्ते स्त्रिया ऋतौ । वृद्धिश्राद्धं प्रकुर्वीत आश्रमग्रहणे तथा ॥'' इति **वृद्धगार्ग्य**वचनात् । आदिशब्दः पुत्रजन्मविवाहाद्यर्थः । तथा च स एव–" पुत्रोत्पत्तिप्रतिष्ठासु तन्मौञ्जीत्यागबन्धने । चूडायां च विवाहेषु वृद्धिश्राद्धं विधीयते ॥'' इति । ननु च नान्दीमुखं कर्माङ्गं चेति संज्ञाभेदात्कथमाभ्युदयिकं वृद्धिश्राद्धमिति । उच्यते--वृद्धिश्राद्धमेव नान्दीमुखमिति संज्ञाभेदः प्रयोगविशेषणार्थः । तथा च **वृद्धवसिष्ठः**--"पुत्रजन्मविवाहादौ वृद्धिश्राद्धमुदाहृतम् । तत्र नान्दीमुखमिति विशेषः समुदाहृतः'' इति । यत्तु कर्माङ्गमिति संज्ञान्तरं तदपि वृद्धिधर्मातिदेशेन तद्रूपमेव संज्ञाभेदेऽपीत्यविरोधः । तथा च **पारस्करः**--" निषेककाले सोमे च सीमन्तोन्नयने तथा । ज्ञेयं पुंसवने श्राद्धं कर्माङ्गं वृद्धिवत्कृतम् ॥'' **लौगाक्षिरपि**--" नामान्नचौलगोदानसोमोपनयपुंसवे । स्नानदानविवाहेषु नान्दीश्राद्धं विधीयते'' इति । अत्राभ्युदयिक इति वदता मातृस्थापनाद्यङ्गेषु प्रागुदक्संस्थतैवोक्ता दैविकत्वादिति गम्यते । अतएव प्राङ्मुखस्य कर्तुरुदक्संस्थतायामप्रादक्षिण्यमपि स्यादित्याहुः । तत्रापि प्रादक्षिण्यमेवेत्युदङ्मुखस्यैव कर्तृत्वमित्यन्ये । अत्रानूचानाः प्रमाणम् । अत्रैतच्चिन्त्यते--किं वृद्धिश्राद्धं दिनत्रये कार्यमुतैकदिन एवेति । तत्रैक आहुः--एकस्मिन्कर्माह एवेति । "मातृभ्यः प्रथमं दद्यात्पितृभ्यस्तदनन्तरम् । ततो मातामहेभ्यश्च वृद्धौ श्राद्धत्रयं स्मृतम् ॥'' इति वचनादिति । तदयुक्तम्, अस्यापि त्रिदिनविधायकत्वप्रतिभानात् । तथा च **स्मृतिः**–" मातृश्राद्धं तु पूर्वेद्युः कर्माहन्येव पैतृकम् । मातामह्यं चोत्तरेद्युर्वृद्धौ श्राद्धत्रयं भवेत् ॥'' **वसिष्ठोऽपि**–"पूर्वेद्युर्मातृकं श्राद्धं कर्माहे पैतृकं तथा । उत्तरेद्युः प्रकुर्वीत मातामहगणस्य तु ॥'' इति । नन्वेकादिनकरणं दिनत्रयाशक्तौ कर्माहे वेदितव्यमिति चेत्–तदपि न, तत्रापि पूर्वेद्युरेव विहितत्वात् । तथा च–पृथग्दिनेष्वशक्तश्चेदेकस्मिन्पूर्ववासरे । श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तान्त्रिकम्'' इति । तान्त्रिकमित्येकदिने विशिष्टविधिः । **वृद्धमनुरपि**–"अलभे भिन्नकालानां नान्दीश्राद्धत्रयं बुधैः । पूर्वेद्युरेव कर्तव्यं पूर्वाह्णे मातृपूर्वकम्॥''इति । यत्त्वेकदिन एवात्राचरन्ति तद्वचनादर्शननिबन्धनमित्यवधेयम् । जातकर्मादिविषयं वेत्याविरोधः । पठन्ति च—"पुंसवने च सीमन्ते अन्नचौलोपनायने । गोदाने स्नान उद्वाहे नान्दीश्राद्धं पुरोहितम् ॥'' इति । अतश्चाविहितेषु पूर्वेद्युरेवेति । तत्र "अकृत्वा मातृयागं तु यः श्राद्धं परिवेषयेत् । तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः ॥'' इत्यादिवचनान्मातृपूजनस्य श्राद्धे पूर्वभागित्वात्तत्पूजने विरुद्धानीव वाक्यानि दृश्यन्ते । तत्र **कात्यायनपरिशिष्टम्**—"गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह । गणेशेनाधिका ह्येत

वृद्धौ पूज्याश्चतुर्दश” इति । **चतुर्विंशतिमते** तु——“ब्रह्माण्याद्यास्तथा सप्त दुर्गाक्षेत्रगणाधिपाः । वृद्धौ वृद्धौ सदा पूज्याः पश्चान्नान्दीमुखान्पितॄन् ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही च तथैन्द्री च चामुण्डा देवमातरः॥ तिस्रः पूज्याः पितुः पक्षे तिस्रो मातामहे तथा । इत्येता मातरः प्रोक्ताः पितृमातृष्वसाष्टमी॥”इति । अत्र यथाशाखं यथाजातिकुलं वा व्यवस्थेत्यविरोधः । तथा **चतुर्विंशतिमते**-“श्राद्ध अभ्युदये प्राप्ते देवतास्थापनं स्मृतम् । जातिधर्मकुलश्रेणिलोकानां वृद्धिकारकम्॥”इति । तत्र माध्यन्दिनशाखायामनुक्तत्वात्किं छन्दोगोक्तं कार्यमुतान्यस्मृत्युक्तामिति संदेहः । तत्रैक आहुः-परोक्तत्वात् यत्किंचिदिच्छयेति । तथा च **संग्रहकारः**—“सर्वेषामपि पक्षाणां स्वगृह्योक्तं विधीयते । स्वगृह्योक्तस्य चाभावे ग्रहणं स्वेच्छया भवेत्॥” इति ।तदयुक्तम् ।सूत्रपरिशिष्टयोरेककर्तृकत्वात्तस्यान्यशाखिविषयत्वात्**पारस्कर**मतस्याश्रयणीयत्वाच्च । तथा च **स्मृतिसंग्रहः**-“न गृह्यादिस्मृतिर्येषां श्राद्धादावुपलभ्यते। कर्तुमर्हन्ति ते सर्वे पारस्करमुनीरितम्” इति । परेषां करोतीति हि व्युत्पत्तेः । अतश्च गौर्यादय एवात्र शाखायामिति । तत्प्रकारमाह स एव—“प्रतिमासु च शुद्धासु लिखित्वा वा पटादिषु । अपि चाक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः॥” इति । शुद्धासु रजतादिधातुमयीषु । अक्षतपुञ्जा यवमुष्टयः । यथासम्भवं यथाकुलं च विकल्पः व्यवस्थितविकल्पो वा । “जातकर्मणि बालानां नामाह्वयनकर्मणि । निरीक्षणे प्राशने च यवस्थं मातृपूजनम्” इति वचनात् । अत एव पृथग्विधैरित्युक्तम् । गन्धताम्बूलवस्त्रादिश्चशब्दार्थः । तथा “कुड्यलग्नां वसोर्धारां सप्तधारां घृतेन तु । कारयेत्पञ्चधारां वा नातिनीचां न चोच्छ्रिताम् ॥” कारयेदिति स्वार्थे णिच् । स्वकर्तृत्वानियमार्थो वा । नातिनीचां न चोच्छ्रितामिति मातृसंमितामेव न तासामध ऊर्ध्वं वाधिकामित्यर्थः । कालमाह—**पूर्वाह्णे**—श्राद्धं कुर्यादिति शेषः । एतच्च सकलं दैवधर्मोपलक्षणम् । तेनोपवीतिप्रागुदङ्मुखदक्षिणजानुपातदेवतीर्थप्रागुदक्संस्थाननमस्कारादिदैवधर्मः सर्वोऽत्र प्राप्नोतीत्यर्थः । तथा च **प्रचेताः**—“अपसव्यं न कुर्वीत न कुर्यादप्रदक्षिणम् । प्राङ्मुखो देवतीर्थेन क्षिप्रं देवविसर्जनम् ॥ दक्षिणं पातयेज्जानु देवान्परिचरेत्सदा । निपातो नहि सव्यस्य जानुनो विद्यते क्वचित् ॥ यथैवोपचरेद्देवांस्तथा वृद्धौ पितॄनपि । दध्यक्षतैः सबदरैः प्राङ्मुखोदङ्मुखोऽपि वा ॥” तथा——“पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पैतृकम् । एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥” इति । दैविकं द्वादश्यादिषु वैष्णवम् । तथा च **विश्वामित्रः**—“देवानुद्दिश्य क्रियते यत्तद्दैविकमुच्यते । तन्नित्यश्राद्धवत्कुर्याद्द्वादश्यादिषु यत्नतः ॥” इति । ननु च “प्रातर्वृद्धिनिमित्तकम्” इत्यनेन प्रातरेवास्य विहितत्वात्कथं पूर्वाह्ण इति । उच्यते——प्रातःशब्देन पूर्वाह्णस्यैवोक्तत्वात् इति वक्ष्यमाणत्वात् । एवं च सति पूर्वाह्णः किं द्वेधा विभक्तेऽह्नि आद्यः किं त्रेधा विभागाद्वा । उच्यते—देवमानुषपित्र्यकालापेक्षया विभागौचित्यात्त्रिधा विभाग एव ग्राह्य इत्यदोषः । तथा च **श्रुतिः**—“पूर्वाह्णो वै देवानां मध्यंदिनं मनुष्याणामपराह्णः पितॄणाम् ” इति । नन्वेवमपि श्रुतिरेव पुनरह्नः पूर्वाह्णो देवाः अपराह्णः पितर इति द्विधैवाह, तत्कथं त्रिधा विभाग एवेति । मैवम् । सामान्येनास्याः श्रुतेराभ्युदयिकादन्यपित्र्यविषयत्वात् । यत्तु पितॄनप्यत्र देववदित्यतिदेशेन प्रागावर्तनादह्नः कालं विद्यादिति **गोभिलसूत्रेण** च द्विधा विभागेन मध्याह्नोऽभिहितः स पाकयज्ञादिदैवकर्मात्विषयः । अन्यथाऽपराह्णे पाकयज्ञसंभवात् । तस्मात्त्रिधा विभाग एव ग्राह्य इत्यदोषः । तथा च श्रुतिः—“ पूर्वाह्णे वै देवानाम्”इति सिद्धम् । तथा च **गार्ग्यः**—“ललाटसंमिते भानौ प्रथमः प्रहरः स्मृतः। स एवाद्ध्यर्धसंयुक्तः प्रातरित्यभिधीयते॥”अध्यर्धमधिकार्धं सार्धप्रहर इत्यर्थः।अग्न्याधानाभ्युदयिके तु **गालवः**—“पार्वणं चापराह्णे तु वृद्धिश्राद्धं तथाग्निकम्” इति । अग्न्याधाननिमित्तमपराह्ण इत्यर्थः । **पित्र्यमन्त्रवर्जं जपः**—मधुमतीःपितृसंहितयोरुपलक्षणं चैतत् । तथा च **मनुकात्यायनौ**—“**मधुव्वाते** जपस्थाने कुर्यात्तत्र प्रयत्नतः । **उपास्मै गायते**त्यादि ऋचः पञ्च जपेत्तथा ॥ **मधु मध्वि**ति यस्तत्र त्रिर्जपोऽशितुमिच्छताम् । गायत्र्यनन्तरं सोऽत्र मधुमन्त्रविवर्जितः ॥ न चाश्नत्सु जपेदत्र कदाचित्पितृसंहिताम् । अन्य एव जपः कार्यः सोमसामादिकः शुभः ॥” इति । पित्र्यमन्त्रा **अश्नत्सु जपे**दित्यत्रोक्तास्तान्वर्जयित्वा जपः कर्तव्य इत्यर्थः । अत्र जपत्वाविशेषादुशन्तस्त्वायन्तु न इत्यादीनामपि प्रतिषेध इति केचित् । आवाहनार्थत्वादनयोर्न प्रतिषेध इत्यन्ये । एवं च सतिब्राह्मणानामग्निस्थानीयत्वात्तच्छरीरवर्तिपित्रावाहनस्य मन्त्रेणैवोचितत्वाच्च विधिरेव युक्तः । अन्यथा मन्त्रवत्क्रियाणाममन्त्रकत्वेनाफलत्वापत्तेः । अत्रैताच्चिन्त्यते—किं वस्त्रादिप्रयोगः कर्तव्य उत नेति । अत्र शेषं पार्वणवदित्यतिदेशेन प्राप्नोतीति । तदयुक्तम्—पितॄणामप्यत्र देवरूपत्वात् । तथा च **स्मृतिः**—“पितॄणां रूपमास्थाय देवा अन्नमदन्ति ते । तस्मात्सव्येन दातव्यं वृद्धिपूर्वेषु दातृभिः ॥” नान्दीमुखेति प्रयोगस्य तत्प्र-

तिनिधिरूपत्वाच्च । तथा ह्युक्तम्—तत्र नान्दीमुखामिति शेषः समुदाहृतः । अपि च **चतुर्विंशतिमते**—नान्दीमुखमिति शेषः संपादितो नान्य इत्यर्थः । **ऋजवो दर्भाः**–दर्भशब्दोऽत्र दूर्वादिद्रव्योपलक्षको न समूलत्वज्ञापकः । तेनात्र दूर्वासाहचर्यादमूला ऋजुदर्भा भवन्तीत्यर्थः । तथा च **पुराणसमुच्चये**–"दधिदूर्वाक्षतमधुबदराक्षतामिश्रितैः । अनुलेपनगन्धादि रक्तसूत्रं च शस्यते ॥" **वृद्धवसिष्ठोऽपि**–"अपसव्यं जानुपातमन्नं मांसं च वारिजम् । रक्तं विवर्जयेद्दर्भान्समूलांश्च तिलानपि॥" इति । **गृह्यपरिशिष्टेऽपि** युग्मा ब्राह्मणा अमूला दर्भा इति । तत्रैतत्संदिह्यते किं वृद्धिश्राद्धमदैवतं स्यादुत सदैवतमिति । उभयथापि स्मृतिदर्शनात् । तथा हि–"त्रिष्वप्येतेषु युग्मांस्तु भोजयेद्ब्राह्मणाञ्छुचिः । प्रदक्षिणं तु सव्येन प्रदद्याद्दैवपूर्वकम्" इति । **मार्कण्डेयोऽपि**–"वैश्वदेवविहीनं तत्केचिदिच्छन्ति सूरयः ।" इति । तदाभ्युदयिकम् । अत्रैक आहुः—यथाशाखं व्यवस्थेति । एवं च सति तत्रापि किं श्राद्धत्रयेऽप्यविशेषेण दैवतविकल्पः किं वा श्राद्धविशेष इति संदेहः । अत्राविशेषेणैव श्राद्धत्रयेऽपीत्येके । तदहृद्यम्, श्राद्धविशेषे अदैवस्य विकल्पितत्वात् । तथा च **शातातपः**–"नित्यश्राद्धमदैवं स्यादेकोद्दिष्टं तथैव च । मातृश्राद्धं तु युग्मे स्याददैवं प्राङ्मुखैः पृथक् ॥" केवलमित्यर्थः । **आचारतिलकेऽपि**–"पितरोऽन्वष्टकाश्राद्धं माता भुङ्क्ते सदैवतम् । वृद्धावदैवतं माता पितरश्च सदैवतम्॥" इति । तस्मान्मातृश्राद्ध एव दैवतविकल्प इति सिद्धम् । तथा च–"आन्वष्टक्ये पितृभ्यश्च तत्स्त्रीभ्यश्च सदैवतम् । ताभ्यस्त्वदैवतं वृद्धौ तेभ्यश्चैव सदैवतम्" इति । यत्तु "त्रिष्वप्येतेषु" इति वचनं तद्द्वादशदैवत्यापेक्षयाऽन्यनवदैवत्येऽप्युपपद्यते इत्यविरोधः । **यवैस्तिलार्थाः**-अर्थः प्रयोजनम् । प्रतिनिध्युपलक्षणं चैतत् । तेन यवैस्तिलप्रतिनिधिर्यथा तथा स्वधादिपदेषु स्वाहादिपदानि प्रतिनिधातव्यानीत्यर्थः । तथा **चेश्वरः**–"कुर्यात्स्वाहा स्वधास्थाने वाचने प्रीयतामिति । वृद्धिश्राद्धेषु सर्वत्र नमो मे वृद्धिरिष्यते॥" इति । न च "यवैस्तिलार्थाः" इति वदता यवप्रक्षेपमन्त्रोऽपि पितृपात्रेषु स्यादित्युक्तम् । तिलार्थस्यैव यवैरुपदिष्टत्वान्न मन्त्रस्येति । **तिलोऽसीति** प्रत्यक्षविरुद्धत्वाच्च । अतश्च **तिलोऽसीति** मन्त्रे एव यवोऽसीत्यादिपदक्षेपः पितृपात्रेष्वपीति । तथा **चाश्वलायनः**–"यवोऽसि सोमदेवत्यो गोसवो देवनिर्मितः । प्रत्नमद्भिः पृक्तः नान्दीमुखाँल्लोकान्प्रीणाहि नः स्वाहा" इति । **पुराणसमुच्चयेऽपि**—अस्मच्छब्दं न कुर्वीत श्राद्धे नान्दीमुखे क्वचित्॥" इति । अत्रैके वृद्धिश्राद्धे पित्रर्घपात्रं न्युब्जमित्याहुस्तद्विशेषवचनानवलोकननिबन्धनमित्युपेक्षणीयम् । तथा **चेश्वरः**—"अपसव्यं पित्र्यमन्त्रा वामजानुनिपातनम् । न्युब्जपात्रं न कर्तव्यं वृद्धिश्राद्धेषु सर्वदा ॥" **वसिष्ठोऽपि**–"दत्त्वा पिण्डान्न कुर्वीत पिण्डपात्रमधोमुखम्" इति । तथा–"गुडधूपं प्रयत्नेन पुष्पाण्येवोत्तमानि च" इति । **संपन्नमिति तृप्तिप्रश्नः सुसम्पन्नमितीतरे ब्रूयुः**--तृप्ताः स्थेत्यत्र संपन्नमिति वदेदित्यर्थः । साकाङ्क्षात्वात्सुसंपन्नमिति प्रतिवचनम् । एतच्च पाकश्राद्ध एव नामे । तत्रैतदसम्भवात् । तथा च "आमश्राद्धगनङ्गुष्ठमग्नौकरणवर्जितम् । तृप्तिप्रश्नविहीनं तु कर्तव्यं मानवैर्ध्रुवम् ॥" इति । विहितं च विकल्पेनामश्राद्धम् । तथा च **याज्ञवल्क्यः**–"आमश्राद्धं प्रकर्तव्यं वृद्धौ नान्दिमुखे सदा । पाकेन वा बहिःशाले सोदनं बदरं दधि" इति । अत्र यथाकुलं यथासंम्भवं वा विकल्पः । अत्रैतच्चिन्त्यते--किमामश्राद्धे पिण्डदानमामेन कार्यमुत पाकेनेति । तत्रैक आहुः–"आमश्राद्धं यदा कुर्याद्विधिज्ञः श्राद्धदस्तदा । तेनाग्नौकरणं कुर्यात्पिण्डांस्तेनैव निर्वपेत् ॥ यत्प्रदद्याद्द्विजातिभ्यः श्रृतं वा यदि वाऽश्रृतम् । तेनाग्नौकरणं कुर्यात्पिण्डांस्तेनैव निर्वपेत्" इति **मत्स्यपुराणव्यास**वचनाभ्यामामेन विहितत्वादामेनैवेति । तदयुक्तम् "आमश्राद्धं यदा कुर्यात्पिण्डदानं कथं भवेत् । गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा॥" इति पाकेन विहितत्वात् । एवं तर्हि विकल्पोऽस्त्विति । न, व्यवस्थासंभवेऽष्टदोषदुष्टत्वात् । तस्माद्द्विजकर्तृके पाकेन, शूद्रकर्तृके आमेनेति व्यवस्थेत्यन्ये । तन्नातीव शोभते । साग्निनिरग्न्योर्विपर्ययाव्यवस्थोपपत्तेः । तस्मात्साग्नेः पाकेनाग्नौकरणं पिण्डं निरग्नेरामान्नेनेति व्यवस्था । अथवा यथाकुलमिति । यच्च"आमेन पिण्डान्यो दद्यात् विप्रान्पक्वेन भोजयेत्।पक्वेन कुरुते पिण्डान्विप्रेष्वामं प्रयच्छति॥तावुभौ मनुना प्रोक्तौ नरकार्हौ न संशयः।तस्माद्विपर्ययं विद्वान्न कुर्याच्छ्राद्धकर्माणि"इति। तच्छ्राद्धान्तरविषयम्।**दधिबदराक्षतमिश्राः** पिण्डाः अक्षता यवाः मिश्रणं मिश्रः दध्यादिभिर्मिश्रितोदनेन पिण्डा देया इत्यर्थः । बहुव्रीह्युपलब्धेः । अत्रैक आहुः-दध्यादित्रयमेव मेलयित्वा देया इति । तदयुक्तम्, शाल्यन्नस्य विहितत्वात् । तथा **चाङ्गिराः**–"शाल्यन्नं मधुसंयुक्तं बदराणि यवास्तथा । मिश्राणि कृत्वा चत्वारि पिण्डाञ्छ्रीफलसंमितान् ॥"दद्यादिति । **कात्यायनोऽपि**-"सर्वस्मादन्नमुद्धृत्य व्यञ्जनैरुपसिच्य च । संयोज्य यवककन्धुदधिभिः प्राङ्मुखस्ततः ॥" इति । पिण्डग्रहणमपिण्डकव्यु-

दासार्थम् । एतच्च साग्निविषयम् । तथा च **निगमः**—“ आहिताग्नेः पित्रर्चनं पिण्डैरेव ” इति । **स्मृतिरपि**—“ योऽग्नौ तु विद्यमाने हि वृद्धौ पिण्डान्न निवर्पेत् । पतन्ति पितरस्तस्य नरके स तु पच्यते ॥ ” इति । यत्तु—“पिण्डानिर्वपणं कुर्यान्न वा कुर्यान्नराधिप”इति **भविष्य**वचनम् । यच्च—“वृद्धिश्राद्धे विकल्पेन पिण्डदानं बुधैः स्मृतम्”इति वचनम् तन्निराग्निविषयम् । तथा च——“यावन्नात्राग्निसंबन्ध उत्सन्नाग्निस्तथैव च । तावद्वृद्धिषु सर्वासु संकल्पश्राद्धमाचरेत् ॥ ” संकल्पश्राद्धमपिण्डकम् । अत्र विशेषः–“ पिण्डहीनेऽपि कर्तव्यं विकिरं पात्रपूरणम् । अग्नौकरणमर्घं चेत्येतच्छ्राद्धचतुष्टयम् ॥ वर्जने पिण्डहीनेऽपि सर्वमर्घादिकं भवेत् । कुशान्स्थाप्य स्वधां कुर्यात्क्षिपेदग्नौ जलेऽपि वा॥” इति । यत्तु—“ संकल्पं तु यदा कुर्यान्न कुर्यात्पात्रपूरणम् ” इत्यादि, तत् श्राद्धान्तरविषयमपिण्डकं यथादेशकुलाचारविषयं वा । “ वृद्धिश्राद्धे कुलाचारदेशकालाद्यपेक्ष्य हि ” इति भविष्यद्वाक्यशेषात् । अत्रैतच्चिन्त्यते—किमत्रावनेजनमुदकेन देयमुतान्यद्रव्येणेति । तत्रैक आहुः–“ तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत्” इत्यनेन पिण्डपात्रक्षालनजलेनैवेति । अन्ये त्वाहुः——“क्षालनोदकस्य छन्दोगविषयत्वादुदकेनैवेति ।” तदुभयमपि विशेषवचनानुपलब्धिनिबन्धनमित्यवधेयम् । क्षालनोदकस्य प्रत्यवनेजनविषयत्वात्क्षीरेण विशिष्टविधानाच्चेति । तथा——“ प्राङ्मुखस्त्वथ दर्भेषु दद्यात्क्षीरावनेजनम् । दधिबदरयवमधुयुक्तं श्रीफलसंनिभम् ॥ तथाऽक्षय्योदकस्थाने दद्यात्क्षीरयवोदकम्॥” इति **ब्रह्मपुराण**वचनात् । अतश्च क्षीरेणैवेति । पुनश्चिन्त्यते—पिण्डदानमपि किं देवतीर्थेनाहोस्वित्प्राजापत्येनेति । तत्रैक आहुः——“दध्यक्षतैः सबदरैः प्राङ्मुखो वाऽप्युदङ्मुखः । देवतीर्थेन वा पिण्डान्दद्यात्कायेन वा नृप॥” इत्यनेनोभयतीर्थस्य विहितत्वाद्विकल्प एवेति । अन्ये त्वाहुः——छन्दोगा देवतीर्थेन, वाजसनेयिप्रभृतयः प्राजापत्येनेति । तथा च **मार्कण्डेयः**–“नान्दिमुखानां कुर्वीत प्राज्ञः पिण्डोदकक्रियाम् । प्राजापत्येन तीर्थेन यच्च किंचित्प्रदीयते ॥” इति अत्रानूचानाः प्रमाणम् । पिण्डोदकव्यतिरिक्तं देवतीर्थेन, पिण्डोदकं प्राजापत्येनेति व्यवस्था वा । अत्र विशेषमाह **स्मृतिः**——“बहुमातृकपुत्रो यः श्राद्धेष्वन्वष्टकादिषु । सर्वासां नाम संकीर्त्य पिण्डमेकं स निर्वपेत् ॥” **पुराणसमुच्चये**——“एकस्य बहवो भार्या एकः पुत्रस्तथा यदि । एकेनापि सपुत्रास्ताः सर्वासां पिण्डदस्तु सः ॥ बह्वीनामेकपत्नीनामेका चेत्पुंत्रिणी भवेत् । तेन पुत्रेण पुत्रिण्यः सर्वास्ता मनुरब्रवीत् ॥” इति । अत्रैतत्संदिह्यते——किमर्घदाने पिण्डवदेकस्मिन्सर्वासामुद्देशः किं वा पृथगिति । तत्रैक आहुः——अर्घपिण्डाङ्गत्वेनेदानीं प्रधानकर्मत्वानुरोधेन पिण्डवद्विधानमेवेति । तदयुक्तम्, अर्घदानस्य पृथक्त्वेनोपदेशात् । तथा च **गालवः**——“अनेका मातरो यस्य श्राद्धे चापरपाक्षिके । अर्घदानं पृथक्कुर्यात्पिण्डमेकं च निर्वपेत्” इति । अपरपाक्षिक इति श्राद्धान्तरोपलक्षणम् । अत्रैके **दाक्षिणात्याः**—वृद्धिश्राद्धेषु प्रपितामहमारभ्यार्वाचीनं पिण्डदानादि प्रयोगमाचरन्ति । “नान्दीमुखे विवाहे च प्रपितामहपूर्वकम् । वाक्यं समुच्चरेद्विद्वानन्यत्र पितृपूर्वकम्॥” इति वचनादिति । तदनुचितम् । नान्दीमुखाः पितरः पितामहाः प्रपितामहाः प्रीयन्तामित्यादि प्रयोगस्य **कात्यायनेन** पितृप्रभृत्युत्तरोत्तरक्रमेण अभिहितत्वात् । आह च **परिशिष्टे**—“उत्तरोत्तरदानेन पिण्डानामुत्तरोत्तरः । भवेदधश्चाधराणामाधारः श्राद्धकर्मणि ॥ तस्माच्छ्राद्धेषु सर्वेषु वृद्धिमात्स्वितरेषु च । मूलमध्याग्रदेशेषु ईषत्सक्तांश्च निर्वपेत्” इति । उत्तरोत्तरः पुत्रापौत्रादिभिः समृद्धः । अधराणामग्रमध्यमूलक्रमेणाधोदानेनाधरः । पुत्रादिभिर्हीनो भवेदित्यर्थः । तस्मादत्र शाखायां तन्नोचितमिति । यत्तु “नान्दीमुखे विवाहे च”इति वचनं तदन्यशाखिविषयं देशकुलधर्मादिविषयं वेत्यर्थः । अत्रैतच्चिन्त्यते—वेदिकायां रेखात्रयं पिण्डदानं च किमुदक्संस्थं कर्तव्यमुत दक्षिणासंस्थमिति । अत्रैक आहुः–अप्रदक्षिणत्वेऽपि अस्य श्राद्धस्य दैविकत्वादुदक्संस्थमेवेति । तदयुक्तम् । आभ्युदयिके प्रदक्षिणमुपचार इति विरोधात् । नचोदक्संस्थतायां प्रमाणमुपलब्धम् । दक्षिणासंस्थत्वे च प्रदक्षिणं प्रमाणमस्ति । तस्माद्दक्षिणसंस्थमेव रेखापिण्डदानादि । तथा च **कात्यायन** एव——“द्वितीयं च तृतीयं च मध्यदेशाग्रदेशयोः । मातामहादिप्रभृतीनेतेषामेव वामतः ॥ ” इति । एतेषां पित्रादित्रयाणां वाम इत्यर्थः । तत्र पित्रादीनां मध्ये देयत्वेन संबोध्यत्वेन च स्वसंमुखत्वाद्दक्षिणासंस्थत्वेन तेषां वामता । यत्त्वाशादित्येन पिण्डानामवयवाभावाद्वामतायां कर्तृगतोऽवयव इष्यत इत्युक्तम् तदसंगतम्, “ एतेषामेव वामतः ” इत्येतच्छब्देन पित्रादीनां परामृष्टत्वात् । कर्त्रवयवत्वे त्वेतेषामिति बहुत्वविरोधाच्च । तस्माद्दक्षिणासंस्थत्वेनैव तद्वामतासंभवः । अत्रार्थे **वृद्धयाज्ञवल्क्यः**—“ जीवद्भर्तरि वामाङ्गे मृते भर्तरि दक्षिणे ” इति । अपि च **स्मृत्यन्तरम्**—“ श्राद्धे सदैव वामाङ्गे पत्नीनामुदकं हरेत् । वृद्धिश्राद्धेषु नारीणां दक्षिणाङ्गे सदा भवेत्॥”इति ।

“ श्राद्धे सदैव वामाङ्गे ” इत्येतदापस्तम्बादिविषयम् । तेषां पित्रादिपिण्डपाश्चिमत एव पत्नीपिण्डविधानात् । तथा **चापस्तम्बगृह्यम्**—द्विधाभूतं यथा भवति तथा सदक्षिणाग्रान् दर्भान् लिखितदेशे संस्तीर्य तत्र पूर्वभागे पित्रादिवर्गार्थं स्तरणं, पश्चाद्भागे तु मात्रादिवर्गार्थमिति । “ स्त्रीभ्यश्च पिण्डा इह पाश्चिमाः स्युः” इति तद्गृह्यभाष्यार्थसंग्रहकारः । “वृद्धिश्राद्धेषु नारीणां दक्षिणाग्रे सदा भवेत्” इति तु सर्वविषयम् । तस्माद्रेखापिण्डदानादिकं प्राङ्मुखकर्तुर्दक्षिणासंस्थमेव वृद्धिश्राद्धेषु सर्वत्र कर्तव्यमिति सर्वमनवद्यम् । ब्राह्मणनिवेशोऽप्येवं प्रागारभ्य पश्चात्संस्थ एवेति । **नान्दीमुखान्पितॄनावाहयिष्य इति पृच्छति आवाहयेत्यनुज्ञातः**—लिङर्थे लट् । अत्रैतद्वक्तव्यम्—किं पित्रादिकस्य नान्दीमुखत्वमाहोस्विद्वृद्धप्रपितामहादित्रिकस्येति।स्मृतिषूभयथा दर्शनात्।तथा च **ब्रह्मपुराणम्**—“पिता पितामहश्चैव तथैव प्रपितामहः । त्रयो ह्यश्रुमुखा एते पितरः परिकीर्तिताः।। तेभ्यः पूर्वतरा ये च प्रजावन्तः सुखेषिणः । ते तु नान्दीमुखा नान्दी समृद्धिरिति कथ्यते ।। प्रसन्नमुखसंसर्गान्मङ्गलीयास्ततस्तु ते ।” इति । अतश्च वृद्धप्रपितामहादिकस्यैव नान्दीमुखत्वेनाभ्युदयिकत्वं प्राप्नोतीति । अथवा—“पिता पितामहश्चैव तथैव प्रपितामहः । पिण्डसंबन्धिनो ह्येते पितरः परिकीर्तिताः।।” इत्यादिवचनैरश्रुमुखानामेव पिण्डसंबन्धित्वात्पित्रादिकस्यापि नान्दीमुखत्वमिति । तथा च सूत्रम्—“नान्दीमुखाः पितरः पितामहाः प्रपितामहाः” इति । **मार्कण्डेयोऽपि**—“ये स्युः पितामहादूर्ध्वं ते स्युर्नान्दीमुखा अपि” इति प्रपितामहस्यापि नान्दीमुखत्वं न वृद्धादित्रिकस्यैवेति । एवं च सत्युभयेषामपि नान्दीमुखत्वमविरुद्धम् । यच्चाश्रुमुखादिसंज्ञाकीर्तनं तत्कारणपरम् । प्रसन्नमुखसंसर्गादित्यादिना नान्दीमुखा वंशवृद्धिमीहन्ते । अश्रुमुखास्तु पित्रुद्धरणसमर्थाः सन्ततमिति **ब्राह्मे** निरूपितत्वात् । तस्माज्जीवत्पितृमातृमातामहादिकस्य कर्तुरधिकारार्थं वृद्धप्रपितामहादिकस्य नान्दीमुखत्वोत्कीर्तनं मृतपितृमातृमातामहादिकस्य कर्तुरधिकारार्थमश्रुमुखानां नान्दीमुखत्वमिति व्यवस्थेत्यविरोधः । तथा च **चतुर्विंशतिमतम्**—“नान्दीमुखे विवाहे च प्रपितामहपूर्वकम् । वाक्यं समुच्चरेद्विद्वानन्यत्र पितृपूर्वकम् ।।” जीवत्पितृकः प्रतितामहपूर्वकमन्यः मृतपितृकः पितृपूर्वकमित्यर्थः । **दाक्षिणात्यास्तु**--प्रतितामहपितामहपितरिति क्रमविध्यर्थमेतदित्याहुः । **कात्यायनोऽपि**—“जीवन्तं माति दद्याद्वा प्रेतायान्नोदके द्विजः । पितुः पितृभ्यो वा दद्यात्स पितेत्यपरा श्रुतिः ।।” **ब्राह्मेऽपि**—“उक्तमादाय पिण्डं तु कृत्वा बिल्वप्रमाणकम् । दद्यात्पितामहादिभ्यो दर्भमूले यथाक्रमम् ” इति । पठन्ति च--“जनन्यां विद्यमानायां यजेद्यस्तु पितामहीम् । मातृघ्नः स च विज्ञेयो वृद्धिश्राद्धादृते क्वचित्।।”इति । अतश्च जीवत्पित्रादिपङ्क्तित्रिकस्य वृद्धिश्राद्धेऽधिकार इति सिद्धम्। अत्रैक आहुः-पितृमातृमातामहानां मध्ये यो जीवति तद्वर्गं परित्यज्य पार्वणद्वयमेकं वा यथासंभवं कर्तव्यम् । त्रिषु जीवत्सु मातृपूजनमेव न श्राद्धमिति । तथा च--“पितृवर्गे मातृवर्गे तथा मातामहस्य च । जीवेद्यदि च वर्गादिस्तं वर्गं तु परित्यजेत्।।” इति । तथा--“सापितुः पितृकृत्येषु अधिकारो न विद्यते । न जीवन्तमतिक्रम्य किंचिद्दद्यादिति श्रुतिः।।”तथा-“पित्र्यं जीवत्पितुर्नोक्तमग्नौ होमोऽपि पाक्षिकः । न जीवन्तमतिक्रम्य किंचिद्दद्यादिति श्रुतिः ।।” इति । जीवत्पितृकस्य होमान्तमनारम्भो वेत्यादिवचनेभ्य इति । यत्तु—“उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे । तीर्थे ब्राह्मणमायाते षडेते जीवतः पितुः” इति **मैत्रायणीयपरिशिष्टं**, तन्मैत्रायणीयशाखिनां साग्नीनामेव । “न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमृते द्विजः । येभ्य एव पिता दद्यात्तेभ्यः कुर्यात्तु साग्निकः ।।” इति सुमन्तुवचनेन निरग्नेर्जीवत्पितृकस्य श्राद्धानधिकारादिति । अत्रोच्यते यदुक्तं—“पितृवर्गे मातृवर्गे तथा मातामहस्य च” इत्यादि । तन्न, जीवद्वर्गपरित्यागस्य तीर्थब्राह्मणसंपत्त्यादौ निरग्निजीवत्पितृकविषयत्वेन चरितार्थत्वात् । तथा चाधिकारमाह—“महानदीषु सर्वासु तीर्थेषु च गयां विना । जीवत्पिताऽपि कुर्वीत श्राद्धं पार्वणधर्मवत्” इति । यच्चोक्तं—“त्रिषु जीवत्सु मातृपूजनेनैव श्राद्धसिद्धिः इति तदप्यसंगतम् । अङ्गिनः श्राद्धस्य लोपेऽङ्गस्य मातृपूजनस्य प्रवृत्तावाश्चर्योपपत्तेः, न च श्राद्धमन्तरेण मातृपूजायाः कर्मणोऽङ्गत्वम् । यच्चाभ्यधायि—“सापितुः पितृकृत्येषु” इत्यादिनिषेधस्तस्य वृद्धिश्राद्धादन्यश्राद्धविषयत्वात् । तथा च क्रतुः—“अष्टकासु च संक्रान्तौ मन्वादिषु युगादिषु । चन्द्रसूर्यग्रहे पाते स्वेच्छया पूज्ययोगतः ।। जीवत्पिता नैव कुर्याच्छ्राद्धं काम्यं तथाऽखिलम् ।” अखिलमिति, “व्यतीपातो जन्मऋक्षं चन्द्रसूर्यग्रहौ तथा । तिथिनक्षत्रवारांश्च उद्दिश्याभ्युदयं तथा ।। एतांस्तु श्राद्धकालान्वै काम्यानाह प्रजापतिः” इत्यादिकम् । अभ्युदय आराममहादानाद्युत्सवः । यत्त्वाम्नातं—“न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमृते द्विजः ।” इत्यनेन निरग्निजीवत्पितृकस्य श्राद्धानिषेध इति तदपि न, उद्वाहे पुत्रजनने इत्यत्र साग्निशब्दाभावान्निरग्निविषयत्वोपपत्तेः । उक्तं च “अनाग्निकोऽपि कुर्वीत

जन्मादौ वृद्धिकर्मणि" इति । यच्च न जीवत्पितृक इत्यनेन, साग्निजीवत्पितृकस्य श्राद्धविधानम् । तस्याष्टकादिनियतश्राद्धविषयं न सामान्येन सर्वश्राद्धविधायकम्। गयाऽपरपक्षादिश्राद्धनिषेधानुपपत्तेः।यदप्युक्तं-"जीवत्पितृकस्य होमान्तमनारम्भो वा" इति तत्साग्नेः पिण्डपितृयज्ञादिनिषेधविषयं नाम्युदयिकस्येति । "तेभ्यः पूर्वतरा ये वै" इत्यादिनाऽऽभ्युदयिकस्य प्रतिप्रसवोपपत्तेः। तस्माज्जीवत्पित्रादित्रिकस्याभ्युदयिकं श्राद्धं कर्तुमुचितामिति सिद्धम् । **नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने**—अत्र नान्दीमुखान्पितॄनावाहयिष्य इत्यनेनैव नान्दीमुखत्वप्राप्तौ पुनस्तद्ग्रहणं सर्वत्र प्रयोगार्थम् । तदुक्तम्--"तत्र नान्दीमुखमिति विशेषः समुदाहृतः" इति । प्रकृतिश्राद्धेषु "अक्षय्योदकदानं तु अर्घदानवदिष्यते । षष्ठ्यैव नित्यं तत्कुर्यान्न चतुर्थ्या कदाचन" इति **कात्यायनेन** षष्ठीतन्त्रयोर्विहितत्वादत्र तन्निषेधो वाचनिकः । तेन प्रथमाविभक्त्या तन्त्रेण चाक्षय्योदकदानमत्र क्षीरयवोदकैर्भवतीत्यर्थः । तथा च--" तथाऽक्षय्योदकस्थाने दद्यात्क्षीरयवोदकम् " इति । पितृग्रहणं स्वपितृप्राप्त्यर्थम् । तेन जीवत्पित्रादिकोऽपि स्वमातृमातामहादिभ्य एव दद्यान्न पितृसंबन्धिभ्य इत्यर्थः । अत्रैक आहुः—" अनग्निकोऽपि कुर्वीत जन्मादौ वृद्धिकर्माणि । येभ्य एव पिता दद्यात्तानेवोद्दिश्य पार्वणम्" इत्यादिवचनेषु यत्तच्छब्दनिर्देशात्पितृभ्य एव दद्यान्न स्वपितृभ्य इति । तदयुक्तम्, "स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु" इति । **कात्यायनेन**—" प्रादुर्भावे पुत्रपुत्र्योर्ग्रहणे चन्द्रसूर्ययोः । स्नात्वाऽनन्तरमात्मीयान्पितॄन् श्राद्धेन तर्पयेत्" इति **कार्ष्णाजिनिना** च स्वपितृभ्य एव श्राद्धविधानात् । न च मातृमातामहादिकं परित्यज्य पितृसंबन्धिभ्यो दातुमुचितम् । अतश्च स्वपितृभ्य एवेति सूक्तम् । **नान्दीमुखान्पितॄन्वाचयिष्य इति पृच्छति वाच्यतामित्यनुज्ञातो नान्दीमुखाः पितरः पितामहाः प्रपितामहाः नान्दीमुखाः मातामहाः प्रमातामहाः वृद्धप्रमातामहाश्च प्रीयन्तामिति**—अत्र च प्रथमोद्दिष्टनान्दीमुखशब्देन वृद्धप्रमातामहादित्रिकस्यैव नान्दीमुखत्वं मा भूदित्यश्रुमुखानामपि तत्प्राप्त्यर्थं पुनर्नान्दीमुखग्रहणम् । एवं मातामहेष्वपि । अत एव मन्त्रे पितरः पितामहा इति बहुत्वमुक्तम् । चकारो मातृवर्गप्राप्त्यर्थः । तथा च **ब्रह्मपुराणम्**—" मातामहेभ्यश्च तथा नान्दीवक्त्रेभ्य एव च । अथ नान्दीमुखीभ्यश्च मातृभ्यः श्राद्धमुत्तमम् ॥" इति । ननु चाभ्युदयिके मातृश्राद्धस्य पूर्वभावित्वात्पितृग्रहणं किमर्थमुच्यते । अग्निहोत्रं जुहोति यवागूं पचतीतिवत्पाठोऽर्थेन बाध्यत इत्यदोषः । तथा च **शाट्यायनः**—नान्दीमुखीभ्य इत्यादि । " मातृश्राद्धं तु पूर्वं स्यात्पितॄणां तदनन्तरम् । ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम्॥" इत्यादि च । अतश्च नान्दीमुख्यो मातरः प्रीयन्तामित्यादिक्रमेण यथालिङ्गं प्रयोगः । अत्रैतत्संदिह्यते—किमत्र नवदैवत्यं श्राद्धमुत द्वादशदैवत्यमिति । उभयथा च वचनदर्शनात् । तथा हि—"मातृभ्यः प्रथमं दद्यात्पितृभ्यस्तदनन्तरम् । ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम्" इत्यादि । **चतुर्विंशतिमते** तु—"मातृपूर्वान् पितॄन् पूज्य ततो मातामहीस्तथा । मातामहं ततः केचिदेवं युग्मांस्तु भोजयेत् ॥" **पुराणसमुच्चयेऽपि**—"शस्तं नान्दीमुखश्राद्धं पिण्डैर्द्वादशभिः सदा । तथाऽपि"दधिदूर्वाक्षतयवैर्बदरेण विमिश्रितैः ॥ पिण्डा नान्दीमुखे देया मातृपूर्वाश्च द्वादश" इति । एवं विप्रतिपत्तौ यथाशाखं यथाकुलदेशं वा व्यवस्थेत्यविरोधः । तुल्यविकल्पो वा । अथवा—धनधान्यपुत्रपश्वादिवृद्ध्यर्थं क्रियमाणं वृद्धिश्राद्धम् । अग्न्याधानाद्यभ्युदयनिमित्तमाभ्युदयिकमिति भेदः । तत्र वृद्धिश्राद्धं द्वादशदैवत्यमाभ्युदयिकं नवदैवत्यमिति व्यवस्थेति । "अन्वष्टकायां यच्छ्राद्धं यच्छ्राद्धं वृद्धिहेतुकम् । पित्रादीनां पृथग्दानं स्त्रीणां पिण्डः पृथक्पृथक्" इत्यत्र वृद्धिहेतुकमित्यभिधानात् । तथा—"शरीरोपचये श्राद्धमर्थोपचय एव च । पुष्ट्यर्थमिति विज्ञेयमौपचारिकमुच्यते ॥" तथा—"नक्षत्रग्रहपीडासु दुष्टस्वप्नावलोकने । इच्छाश्राद्धानि कुर्वीत नवसस्यागमे तथा॥"इति वचनादिति । **न स्वधां प्रयुञ्जीत**-निषेधान्तरोपलक्षणं चैतत् । तेन शर्मादिकमप्यत्र न प्रयुञ्जीतेत्यर्थः । तथा च **पुराणसमुच्चये**—"न स्वधा शर्म वर्मेति पितृनाम न चोच्चरेत् । न कर्म पितृतीर्थेन न कुशा द्विगुणीकृताः ॥ न तिलैर्नापसव्येन पित्र्यमन्त्रविवर्जितम् । अस्मच्छब्दं न कुर्वीत श्राद्धे नान्दीमुखे क्वचित्" इति । अतश्च नान्दीमुखपितरमुकगोत्रेत्यादिप्रयोगः । अन्ये तु पार्वणवन्नामशर्मादिकमपि प्रयुञ्जते तन्निषेधदर्शनात्कथमिति वाच्यम् । पार्वणवदित्यतिदेशाद्वा तद्विधिः । प्रकृते स्वधावाचने स्वधां न प्रयुञ्जीतेति निषेध इति । तदयुक्तम्, सामान्येनाभ्युदयिके तन्निषेधात् । **युग्मानाशयेदत्र**—अत्राभ्युदयिके युग्मान् द्विचतुरादीन् विप्रानाशयेद्भोजयेदित्यर्थः। अस्य दैविकत्वाद्दैवे युग्मान् यथाशक्तीति परिभाषयैव युग्मत्वप्राप्तौ विशिष्टविषयं युग्मग्रहणम् । पित्र्येऽपि युग्मानेव प्रातर्निमन्त्रयेदित्यर्थः । तथा च **कात्यायनः**—"प्रातरामन्त्रितान्विप्रान्युग्मानुभयतस्तथा" इति ।

अन्यच्च—" अष्टोत्तरकरान्युग्मान्कराग्राग्रपवित्रकान् । कृत्वाऽर्घं संप्रदातव्यं नैकैकस्यात्र दीयते॥" इति । युग्मानिति पुंस्त्वमविवक्षितम् तेन पुमभावे स्त्रियोऽपीत्यर्थः । तथा च–" मातृश्राद्धे तु विप्राणामलाभे पूजयेदपि । पतिपुत्रान्विता भव्या योषितोऽष्टौ कुलोद्भवाः ॥" इति वृद्धवसिष्ठवचनात् । शङ्खोऽपि–" पित्रादित्रयपत्न्यस्तु भोज्या मातृप्रतिद्विजैः । स्त्रीणामेव तु तद्यस्मान्मातृश्राद्धमतः स्मृतम् ॥" इति । आशयेदित्यपि विशिष्टविध्यर्थम् । तृप्तिप्रश्नेनैव भोजनोपलब्धेः, अतश्च गुडशर्करादिना मधुरान्नं भोजयेदिति विशिष्टविधिरित्यर्थः । तथा च भविष्यत्पुराणम्–" ब्राह्मणेभ्यस्ततो दद्याद्भोजनं मधुरं खग । । गुडमिश्रं सितायुक्तं सघृतं चौदनं परम् ॥ सरलान्मोदकांश्चैव नवाम्लकटुकांस्तथा ।" कृष्णात्रेयोऽपि–" अत्र श्राद्धेषु दातव्यं न मांसं पितृपूजने ।" इति । अपि च–" अपसव्यं जानुपातमम्लं मांसं च वारिजम् । रक्तं विवर्जयेद्दर्भान्समूलांश्च तिलानपि॥" इति । तथा--"द्राक्षामलकमूलानि यवान्वाऽथ निवेदयेत् । तानेव दक्षिणार्थं तु दद्याद्विप्रेषु सर्वदा॥" इति ब्रह्मपुराणम् । अतश्च–द्राक्षामलकमूलयवनिष्क्रायिणीं दक्षिणां युवाभ्यां संप्रदद इत्यादिप्रयोगः, नैकैकस्यात्र दीयत इत्युक्तेः ॥ तथाऽऽभ्युदयिकश्राद्धसंदेहो निरस्यते । तत्र कात्यायनः–" स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु । पिण्डानोद्वहनात्तेषां तस्याभावे तु तत्क्रमात् ॥" इति अस्यार्थः--पिण्डशब्दः श्राद्धं लक्षयति । आ उद्वहनादित्याङभिविधौ । ततश्च पुत्रस्य निषेकादिप्रथमविवाहपर्यन्तेषु संस्कारकर्मसु पिता स्वमातृस्वपितृस्वमातामहेभ्यः श्राद्धं दद्यान्न पुत्रमातृमातामहादिभ्यः । तस्य पितुरभावे तेषां पितुर्मात्रादीनामेव नवानां तत्क्रमाद्येन क्रमेण पित्रा दत्तं तेनैव क्रमेणाधिकारी ज्येष्ठभ्रात्रादिरपि दद्यादिति । नन्वेवं सति संस्कार्यस्य पुत्रादेर्मृतपित्रोः श्राद्धादौ मुख्याधिकारित्वात्तदतिक्रमो न युक्त इति । न च जीवत्पित्रोर्योऽनुष्ठानक्रमः स मृतपित्रोरप्युचित इति वाच्यम् । प्रेतेभ्यो दद्यादित्यादिवचनैः प्रत्तानामवश्यदेयत्वात्तस्मात्तेषां 'तस्याभावे तु तत्क्रमात्'इत्यस्य तत्क्रमात्तदुपक्रमान्मृतपित्रादिमारभ्यैव श्राद्धं भ्रात्रादिरप्यधिकारी कुर्यादित्येवार्थः। 'तस्याभावे सुतः क्रमात्' इति पाठेऽपि तदर्थस्य प्रतीयमानत्वाच्चेति । अत्रोच्यते–" असंस्कृतास्तु संस्कार्याः भ्रातृभिः पूर्वसंस्कृतैः " इत्यादिना भ्रात्रादयः पित्रभावे प्रतिनिधित्वेन विधियन्ते । प्रतिनिधेश्च स तद्धर्मा कर्मयोगादिति कात्यायनपरिभाषया पितृधर्मप्राप्तेर्भ्रात्रादिः पितृसमानधर्मेति । किं च-तस्याभाव इत्यभावः, पञ्चविधः । प्रध्वंसाभावः, प्रागभावः, संनिध्यभावोऽधिकाराभावोऽत्यन्ताभावश्चेति । तत्र संस्कार्ये सति प्रागभावात्यन्ताभावयोरसंभव एव प्रध्वंसाभावसांनिध्यभावाधिकाराभावानां संभवोऽस्तीति तत्र सर्वत्रापि वचनबलात्पितुः पितृभ्यो दानं विधीयते न संस्कार्यपितृभ्यः । तथा च स्मृतिः–" पितरो जनकस्यैव यावद्व्रतमनाहितम् । समाहितव्रतः पश्चात्स्वान्यजेत पितामहान्॥" इति । पितामहानिति पित्राद्युपलक्षणम् । तथा–" ब्राह्मण्याविहते ताते पतिते संगवर्जिते । व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ॥"इत्यादि । यत्तु प्रेतेभ्यो दद्यादिति वचनं तदधिकारसंभवविषयम् । अधिकारश्च सहायत्वेन विवाहानन्तरं स्वपितृभ्यो दातुं भवतीति । तथा च ऋष्यशृङ्गः—" नाश्नाति यो द्विजो मांसं यस्य नो दारसंग्रहः । तावेतौ मुनिभिः प्रोक्तावनर्हौ मखदूषकौ ॥" इति । नाश्नाति मांसं श्राद्ध इति शेषः । ननु च"समाहितव्रतः पश्चात्स्वान्यजेत पितामहान्"इत्यनेनोपनयनादूर्ध्वमेव स्वपितृभ्यो दातुमधिकारस्तत्कथं विवाहानन्तरमिति । उच्यते—उपनयनादूर्ध्वं स्वपितृभ्यो दातुं कर्त्रन्तराभाव एकपुत्रविषयः । कर्त्रन्तरसद्भावे तु प्रतिनिधिभूतः स एव तदाद्यविवाहपर्यन्तं संस्कार्यस्य पितृपितृभ्य एव दद्यादिति । तथा च सुमन्तुः—" श्राद्धं कुर्यादवश्यं तु प्रमीतपितृको द्विजः । व्रतस्थो वाऽव्रतस्थो वा एक एव भवेद्यदि॥" इति । तस्माद्युक्तमुक्तं पित्रभावे प्रतिनिधेः पितृधर्मप्राप्त्या संस्कार्यस्य पितृमातृपितामहेभ्यः श्राद्धं दद्यादिति।तथा च स्मृतिः-"नान्दीश्राद्धं पिता दद्यादाद्ये पाणिग्रहे बुधः । अत ऊर्ध्वं प्रकर्तव्यं स्वयमेव तु नान्दिकम्॥" अपरमपि—"पित्रोस्तु जीवतोः पुत्रः कुरुते दारसंग्रहम् । पितुर्नान्दीमुखं प्रोक्तं न पुत्रस्य कथंचन॥" इति । ननु पित्रोर्जीवतोरेव तत्पित्रोर्नान्दीमुखत्वं प्रोक्तं मृतयोस्त्वन्यः करोतीति तत्कथं संस्कार्यस्य पितॄणामतिक्रमो युक्तः । सत्यम्, ओद्वहनादित्यवधिना पितृपितृभ्य एव विधानात्स तद्धर्मेति परिभाषया प्रतिषेधस्तदतिक्रमस्य वाचनिकत्वात् । अपि च वचनान्तरम्—" कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः । नामकर्मणि बालानां चूडाकर्मादिके तथा ॥ सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने । नान्दीमुखं पितृगणं पूजयेत्प्रयतो गृही " इति गृहिण एवोपदेशात् । चूडाकर्मादिक इत्याद्यविवाहपर्यन्तं वेदितव्यम् । तदूर्ध्वं तु द्वितीयविवाहादावपि सर्वत्र जीवत्पितृकः पितृपितृभ्यो मृतपितृकः स्वपितृभ्य इति विवेकः । तथा चायमर्थः—पिता स्वपुत्रस्य निषेकादिविवाहपर्यन्तसंस्कारकर्मसु स्वमातृपितृमातामहेभ्यः श्राद्धं

कुर्यात् । पितुरभावेऽसंनिहिते वाऽधिकाराभावे वा तत्प्रतिनिधिर्ज्येष्ठभ्रात्रादिर्विवाहपर्यन्तकर्मसु संस्कार्यस्य पितृभ्य एव कुर्यात्। कर्त्रन्तराभावे उपनीत एकपुत्रः स्वयमेव स्वविवाहे स्वमातृस्वपितृस्वमातामहेभ्यो दद्यात् । विवाहानन्तरं जीवत्पितृकः पितृपितृभ्यो दद्यान्मृतपितृकः स्वपितृभ्य एवेति सर्वमनवद्यम् । इति श्राकाशिकायां षष्ठी कण्डिका॥६॥

इति श्राद्धकाशिकायां सूत्रवृत्तौ आभ्युदयिकं श्राद्धम् ।

इत्थं पार्वणादिसर्वश्राद्धमभिधायाधुना तृप्ताः स्थेत्यादिना तृप्तेरदृष्टार्थत्वात्तामन्तरेण चातृप्ताः पितरो यान्तीत्यादिदोषदर्शनादनेकविधद्रव्यैस्तां प्रतिपिपादयिषुः सूत्रमारभते-**अथ तृप्तिः**—वक्ष्यत इति शेषः । अथशब्दोऽधिकारार्थः । आनन्तर्यार्थस्य सूत्रादेव लब्धेः । तेन ग्राम्यारण्यौषधिमूलफलमृगपक्षिमीनादिनानाविधद्रव्यैस्तृप्तिराधिक्रियते वक्तुमित्यर्थः । तथा **चादित्यपुराणम्**—“ विविधान्नानि मांसानि पितॄणां तृप्तिकारणात् । दातव्यान्यनिषिद्धानि श्राद्धं चैवाक्षयं भवेत्॥” इति। **ग्राम्याभिरोषधीभिर्मासं तृप्तिः**—पितॄणामिति शेषः । “ कालाध्वनोरत्यन्तसंयोगे ” इति द्वितीया । अत्र तृप्तिरित्यनुवृत्तौ पुनस्तद्ग्रहणमपां प्राप्त्यर्थं तेनौषधिजलाभ्यामेव तृप्तिर्न केवलौषधिभिरित्यर्थः । तथा च **श्रुतिः**-“आपो ह वा ओषधीनाᳬ रसस्तस्मादोषधयः केवल्यः खादिता न धिन्वन्त्योषधय उपहापाᳬ रसस्तस्मादापः पीता केवल्यो न पिबन्ति यदैवोभय्यः संसृष्टा भवन्त्यथैव विधिन्वन्तीत्यन्वयव्यतिरेकार्थवादः ” इति । ओषध्यो धान्यानि । तथा च श्रुतिः—“दश ग्राम्याणि धान्यानि भवन्ति व्रीहियवास्तिलमाषा अणुप्रियङ्गवो गोधूमाश्च मसूराश्च खल्वाश्च खलुकुलाश्च इति” अयमर्थः । व्रीहयस्तण्डुलधान्यानि तानि च श्वेतरक्तवर्णानि श्राद्धे देयानि । “कृष्णधान्यानि सर्वाणि वर्जयेच्छ्राद्धकर्माणि” इति निषेधात् । **प्रचेतास्त्वाह**—“कृष्णमाषास्तिलाश्चैव श्रेष्ठाः स्युर्यवशालयः । महायवा व्रीहियवास्तथैव च मधूलिकाः ॥ कृष्णाः श्वेताश्च लोहाश्च ग्राह्याः स्युः श्राद्धकर्मणि ” **एतद्व्याख्यानं माधवीये**—यवाः शितदीपशुकाः, महायवाः व्रीहियवाश्च यवविशेषाः । मधूलिका धान्यभेदः । कृष्णाः स्थलजाः कृष्णव्रीहयः । लोहा रक्तशालयः । अन्यस्त्वाह—मधूलिका यावनालविशेषाः । तद्विशेषणम्-कृष्णाः श्वेता लोहिताः महायवा वेणुयवा इति । अत्र कृष्णधान्यानि सर्वाणीत्यनेन विरोधा**न्माधवीय**व्याख्यानमनुचितम् । यवा द्विविधाः-महायवा व्रीहियवाश्च । तिलाः कृष्णाः । माषाः कृष्णा निस्तुषामाषाः । तथा च-कृष्णमाषास्तिलाश्चेति । ‘अमेध्याः सतुषा माषा निस्तुषापि मसूरिका” इति च । अणुः क्षुद्रसस्यम् । प्रियङ्गुः कङ्गुस्तद्बहुवचनं पृथक्ग्रहणं च भेदापेक्षंम् । तथा च **निघण्टुः**-“पीततन्दुलिका कङ्गुः प्रियङ्गुः कुक्कुरी मता॥सितकङ्गुस्तु सुतती रक्तकङ्गुस्तु साधिका॥चणकः काककङ्गुः स्याच्छ्यामाकस्तृणबीजकः।”इति।मसूराः सतुषा निस्तुषाश्च न श्राद्धे देयाः।“निस्तुषाऽपि मसूरिका” इत्युक्तेः । खल्वाः खलुकुलाश्चाप्रसिद्धाः । कोद्रवचणकौ वाच्यौ । ग्राम्यत्वात् । दशेति ग्रामसंख्या न किन्तु हविष्यसंख्या । तथा च **विष्णुः**—“तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलैः शाकैः श्यामाकैः प्रियङ्गुनीवारैर्गोधूमैर्मासं प्रीयन्ते” इति । मसूरादिग्रहणाच्च । तथा-“मासं तृप्तिः पितॄणां तु हविष्यान्नेन जायते ।” इति । क्षुद्रधान्यानि-श्यामाकप्रियङ्गुतिलगोधूमगौररक्तसर्षपवर्जं सर्वाण्यश्राद्धार्हाणि । नीरसत्वात् । तथा च,“वर्ज्यो मर्कटकः श्राद्धे राजमाषास्तथाणवः । विपूयिका मसूराश्च श्राद्धकर्मणि गर्हिताः ॥” **भारद्वाजोऽपि**—“नीरसान्यपि सर्वाणि भक्ष्यभोज्यानि यानि च । तानि स्युर्नैव देयानि सर्वत्र श्राद्धकर्मणि”इति। अणवः क्षुद्रान्नानि। **वृद्धयाज्ञवल्क्योऽपि**-“मकुष्ठ राजमाषाश्च मसूराश्च चणास्तथा । कोद्रवा मूलका राजसर्षपाः श्राद्धघातकाः ॥” इति । राजसर्षपो राजिका । तथा च **निघण्टुः**—“आसुरी राजिका राजी कृष्णैका राजसर्षपाः । राजिका यव इत्यन्या राजिका कृष्णसर्षपाः॥” इति । **चतुर्विंशतिमतेऽपि**—“कोद्रवान्राजमाषांश्च कुलत्थांस्तुरकांस्तथा । निष्पावांस्तु विशेषेण पञ्चैतान्वर्जयेत्सदा ॥ यावनालानपि तथा वर्जयन्ति विपश्चितः ।”इति । राजमाषाः पीतगौरवर्णमाषाः । ‘लोबिआ’ ‘गोरवांस’ इति मध्यदेशप्रसिद्धाः । निष्पावा मकुष्ठकाः । निष्पावा चेल्लाः शिम्बिसदृशा दक्षिणापथप्रसिद्धाः इति कश्चित् । चरका वनमुद्गाः । यावनालो जोन्धलीति प्रसिद्धः । तथा च **निघण्टुः**—“यावनालो देवधान्यं जुंदालिं जुन्नलो नलः ।” इति । अत्र निष्पावनिषेधः कृष्णविषयः “कृष्णधान्यानि सर्वाणि” इति निषेधात् । “यवव्रीही सगोधूमौ तिलमुद्गाः ससर्षपाः । प्रियङ्गवः कोविदारा निष्पावाश्चात्र शोभनाः” इति **मार्कण्डेयेन** कृष्णेतरस्य विहितत्वात् । शोभनः कृष्णेतरः । **स्मृत्यन्तरे**—“मुद्गाढकी माषवर्जं द्विदलानि दद्यात्” इति । द्विदलानि दलितुं योग्यानि । मुद्गः कृष्णः । हारितमुद्गकृष्णमाषश्यामाकेति **ब्रह्मपुराणे**ऽपि हरितस्य विहितत्वात् । माषो राजमाषः । तद्ग्रहणं कुलत्थाद्युपलक्षणम् । तथा च **मरीचिः**—“कुलत्थश्चणकाः श्राद्धे न देयाश्चैव कोद्रवाः । [illegible] सर्वाणि विरसानि तथैव च ॥”

CC0. In Public Domain. Krishkant Sharma Najafgarh Delhi Collection

इति । आढकी तुंवरीति 'अंरहरी' इति प्रसिद्धा । एतान्वर्जयित्वा द्विदलानि दद्यादित्यर्थः । नेत्यनुवृत्तौ विष्णुपुराणे—"मसूरक्षारवार्ताककुलत्थशणशिग्रवः" इति । शणशिग्र्वादिशाकानि शाकप्रकरणे प्रपञ्चयिष्यन्ते । क्षारो यवक्षारादिः । शेषं स्मृतिभ्यो विज्ञेयम् । एतानि धान्यानि निस्तुषानि गव्यदुग्धादिसहितानि च मासं तृप्तिकराणि। तथा च वृद्धयाज्ञवल्क्यः मत्स्यपुराणे—"तुषहीनानि धान्यानि यान्ति सर्वाणि मेध्यताम् । वर्जयित्वा मसूरान्नं मकुष्ठान्राजमाषकान् ॥" मसूरादिधान्यत्रयं निस्तुषमप्यमेध्यमित्यर्थः । तथा—"अन्नं तु सदधिक्षीरगोघृतं शर्करान्वितम् । मासं प्रीणाति वै सर्वान्पितृनित्याह केशवः ॥" कलायाः सर्वेऽपि श्राद्धे देयाः । "कलायाः सर्व एव वा" इति वक्ष्यमाणत्वात् । **तदभाव आरण्याभिः**—ग्राम्याभाव आरण्याभिरोषधीभिर्मासं तृप्तिः पितृणामित्यर्थः । आरण्या अरण्ये भवाः श्यामाकप्रभृतयः । "अरण्याण्णो वक्तव्यः" इति णप्रत्ययः । तथा च **मार्कण्डेयः**—"राजश्यामाकश्यामाकौ तद्वच्चैव प्रसातिका । नीवाराः पौष्कलाश्चैव धान्यानि पितृतृप्तये॥"इति । पौष्कला नीवारविशेषाः । **विष्णुपुराणे**—"व्रीहयश्च यवाश्चैव गोधूमाः कङ्गुसर्षपाः । माषा मुद्गाः सप्तमाश्च अष्टमाश्च कुलत्थकाः ॥ श्यामाकाश्चैव नीवारा जर्तिलाः सगवेधुकाः । कोविदारसमायुक्तास्तथा वेणुयवाश्च ये ॥ ग्राम्यारण्याः स्मृता ह्येता ओषध्यश्च चतुर्दश ।" इति । आद्याः सप्त ग्राम्याः । अष्टमाद्या आरण्याः । **शाकमूलफलैरोषधीभिर्वा**—अत्रानुपूर्व्या ओषधीशब्दः प्रथमं व्याख्येयः । तथा चोक्तम्—"अतिरिक्तं पदं त्याज्यं हीनं वाक्ये निवेशयेत् । विप्रकृष्टं तु संदध्यादानुपूर्व्या च कल्पयेत् ॥" इति वाशब्दोऽभावे । ओषध्यभावे फलमूलादिना मासं तृप्तिरित्यर्थः।तथा च **वृद्धयाज्ञवल्क्यः**—"अन्नाभावे तु कर्तव्यं शाकमूलफलादिना ।" इति । अथ पुनरोषधिग्रहणम् आरण्यौषध्यभावे विहितप्रतिषिद्धौषधिप्राप्त्यर्थम् । तथा च **मार्कण्डेयः**—"गोधूमैरिक्षुभिर्मुद्गैश्चीनकैश्चणकैरपि । श्राद्धेषु दत्तैः प्रीयन्ते मासमेकं पितामहाः ॥" इति । मुद्गा वन्याः । चीनकस्तृणधान्येषु कङ्गुभेदः । **उशना** अपि—"नीवारमाषमुद्गाश्च गोधूमाः शालयस्तथा । यवाश्च चणकाश्चैव सर्वकङ्गुः प्रशस्यते ॥" इति । ततश्च ग्राम्या आरण्या विहितप्रतिषिद्धाः । फलानि मूलानि पूर्वपूर्वाभावे उत्तरोत्तराणि क्रमेण ग्राह्याणीत्यर्थः । अथवा समुच्चयार्थमोषधिग्रहणम् । तेनौषधिसहितान्येव फलादीनि तृप्तिकराणीत्यर्थः । तथा ह्युत्तरं सूत्रं सहान्नेनेति । **मनुरपि**—"भक्ष्यं भोज्यं च विविधं मूलानि च फलानि च । हृद्यानि चैव मांसानि सर्वं दद्यादमत्सरी ॥" इति । मूलफलैरद्भिर्वेति वा पाठः । तथा च सूत्रान्तरम्—"मूलफलैरद्भिर्वा" इति । सर्वाभावेऽद्भिस्तृप्तिरित्यर्थः । तथा च—"पराधीनः प्रवासी च निर्धनो वापि मानवः । मनसा भावशुद्धेन श्राद्धं दद्यात्तिलोदकम् ॥" अनुकल्पोपलक्षणं चैतत् । तेनोपवासादिकमपि ज्ञेयम् । आपो निषिद्धातिरिक्ताः । तथा च **भरद्वाजः**—"नक्तोद्धृतं तु यत्तोयं पल्वलाम्बु तथैव च ।" वर्जयेदिति शेषः । **मार्कण्डेयोऽपि**—"दुर्गन्धि फेनिलं चाम्बु तथाल्पप्रदरोदकम् । यन्न सर्वार्थमुत्सृष्टं यच्चाभोज्यं निपानजम् ॥ तद्वर्ज्यं सलिलं तात सदैव पितृकर्माणि ।" इति । मूलग्रहणं दशविधशाकोपलक्षणम् । तथा च—"मूलपत्रकरीराग्रफलकाण्डाधिरूढकम् । त्वक्पुष्पं कवकं चेति शाकं दशविधं स्मृतम् ॥" इति । मूलं मूलकादि । पत्रं पालक्यनाडीचादि । करीरं वंशाङ्कुरादि । अग्रमाम्रप्लक्षवेत्रादीनाम् । फलं कूष्माण्डादि । काण्डं सार्षपवास्तूकादि । अधिरूढकं तालास्थिमज्जादि । त्वङ्मातुलुङ्गादि । पुष्पं तिन्तिडीककाञ्चनारादि । कवकं शिलीन्ध्रादि । **मार्कण्डेयः**—"विदारीभिर्भुरुण्डैश्च बिसैः शृङ्गाटकैस्तथा । केचुकैश्च तथा कन्दैः कर्कन्धूबदरैरपि ॥ पालेवतैरारुकैश्चाप्यक्षोटैः पनसैस्तथा । काकोलैः क्षीरकाकोलैस्तथा पिण्डालकैः शुभैः ॥ लाजाभिश्च शिलाभिश्च त्रपुसोर्वारुचिर्भटैः । सर्षपै राजशाकाभ्यामिङ्गुदै राजतन्तुभिः ॥ पियालामलकैर्मुख्यैः फल्गुभिश्चातिलम्बकैः । वेत्राङ्कुरैस्तालकन्दैश्चुक्रिकाक्षीरिकावचैः ॥ मोचैः समोचैर्लकुचैस्तथा वै वीजपुत्रकैः । मुञ्जातकैः पद्मफलैर्भक्ष्यभोज्यैस्तु संस्कृतैः ॥ रागखाण्डवचोष्यैश्च त्रिजातकसमन्वितैः । दत्तैस्तु मासं प्रीयन्ते विधिवत्पितरो नृणाम् ॥" इति । अस्यार्थः—विदारी कृष्णवर्णभूकूष्माण्डफलमिति । **माधवीये**—विदारीति प्रसिद्धा, विदारी तस्याः कन्दमिति शेष इत्यन्यः । भुरुण्डो जलप्रभवः कन्दविशेष इति **मञ्जरीकारः** । केचुकः कचूराख्यशाकः । जलप्रभवः कन्दविशेष इत्यन्यः । बिसं मृणालम् । शृङ्गाटकं जलजं त्रिकण्टकफलम् । 'सिंघारा' इति प्रसिद्धम् । कन्दः सूरणकन्दः । कर्कन्धूः स्वादु बदरीफलम् । बदरमन्यद्बदरफलम् । पालेवतं जम्बीराकारं फलं काश्मीरप्रसिद्धम् । आरुकम् आरुकन्दः । आक्षोटः पार्वतीयपीलुफलम् । पनसैः कण्टकिफलैः 'कटहर' इति प्रसिद्धैः । काकोलैर्मधुराफलैः । क्षीरकाकोलिस्तन्द्रदैः । पिण्डालकैश्च [illegible] । तथा च [illegible]—"[illegible] सुगन्धि च मध्वालु स्यात्तु रोमशम् ।

शङ्खालुं शङ्खासंकाशं कष्टालु स्वल्पकाष्टकम्॥''इति । लाजा भृष्टधानाः । तथा च **शङ्खः**–''लाजान्मधुयुतान्दद्यात्सक्तूञ्छर्करया सह ।'' इति । शिला शैलेयम् । त्रपुसं त्रपुसीफलम् । उर्वारु स्वादुकर्कटी । चिर्भटः कटुककर्कटी । सर्षपो गौरसर्षपशाकम् । राजशाकं शाकविशेषः । कृष्णसर्षपशाकविशेषमिति **माधवीये** । तन्न, तस्य प्रतिषेधात् । इङ्गुदस्तापसतरुः । राजतन्तुः प्रियालो राजादनम् । निघण्टूक्तेः । प्रियाला द्राक्षा वा । फल्गु काकोदुम्बरिकाफलम् । अतिलम्बकैः तालकन्दैस्तालमूलीकन्दैः । चुक्रिकाम्लिकाफलं, तिन्तिडीफलमित्यर्थः । ''नागरण्डा तिन्तिडी'' इति **स्मृत्यन्तरवचनात्** । क्षीरिका फलाध्यक्षम् । मोचा कदलीफलम् । लकुचैर्लिकुचफलैः । बीजपुत्रकैर्मुञ्जातकैः पञ्चफलैर्बदर इति प्रसिद्धैः । भक्ष्यं लड्डुकमोदकादि । भोज्यं भोजनमोदनादिसूपयुक्तम् । रागषाडवाः रसालादिपानविशेषाः । तथाच **निघण्टुः**—''मार्जिता शिखरिण्युक्ता रसाला सुरभिस्तथा । औषधी षाडवाख्या च चतुर्जातकसंयुता ॥'' इति । चतुर्जातकं वक्ष्यमाणम् । सुसंस्कृतैरिति मेलविशेषैः । तथा च सूपकारशास्त्रम्–''अर्धाढकं सुचिरपर्युषितस्य दध्नः खण्डस्य षोडशपलानि शशिप्रभस्य । सर्पिः पलं मधु पलं मरिचं द्विकर्षं शुण्ठ्याः पलार्धमथवाऽर्धपलं चतुर्णाम् ॥ श्लक्ष्णं पटे ललनया मृदुपाणिघृष्टा कर्पूरधूलिसुरभीकृतभाण्डसंस्था । एषा वृकोदरकृता सरसा रसाला या खादिता भगवता मधुसूदनेन ॥'' इति । चोष्यैराम्रादिकैः फलैः । त्रिजातकं त्वगेलागन्धपत्रमेलनम् । तथा च **निघण्टुः**–''त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् । नागकेसरसंयुक्तं चातुर्जातकमुच्यते ॥'' इत्यादि । **वायुपुराणे**–''बिल्वामलकमृद्वीकापनसाम्रातदाडिमम् । चव्यं पालेवताक्षोटखर्जूराम्रफलानि च ॥ कसेरुः कोविदारश्च तालकन्दं तथा बिसम् । तमालं शतकन्दं च गन्धालू शीतकन्दकम् ॥ कालेयं कालशाकं च सुनिषण्णं सुवर्चला । मांसं शाकं दधि क्षीरं वेचु वेत्राङ्कुरस्तथा ॥ कधूलः किङ्किणी द्राक्षा लकुचं मोचमेव च । कर्कन्धु ग्रीवकं वारं तिन्दुकं मधुसाह्वयम् ॥ वैकङ्कतं नालिकेरं शृङ्गाटकपरूषकम् । पिप्पली मरिचं चैव पटोलं बृहतीफलम् ॥ सुगन्धि मत्स्यमांसं च कलायाः सर्व एव हि । एवमादीनि चान्यानि स्वादूनि मधुराणि च ॥ नागरं चात्र वै देयं दीर्घमूलकमेव च ।'' इति । अस्यार्थः । मृद्वीका गोस्तनी द्राक्षा । पनसो व्याख्यातः । आम्रातकः कपीतनः । चव्यं चविका । पालेवतमुक्तम् । अक्षोटोऽप्युक्तः । कसेरुर्भद्रमुस्ता । तालकं तालीति प्रसिद्धम् । शतकन्दं शतावरी । गन्धालूः कर्चूरशाकम् । शीतकन्दं शालूकम् । कालेयकं दारुहरिद्रा, करालाक्षं शाकमिति **गोविन्दराजः** । सुनिषण्णं वितुन्नशाकम् । सुरनुनीति ख्यातं जलभवं शाकमिति कश्चित् । सुनिषण्णं चाङ्गेरीसदृशशाकं वा। ''चाङ्गेरीसदृशैः पत्रैः सुनिषण्णकमुच्यते । शाकं जलाशये देशे चतुष्पत्री निगद्यते ।''इति **सुश्रुतोक्तेः** । सुवर्चला ब्रह्मसुवर्चला । सूर्यावर्त इति **गोविन्दराजः** । कट्फलः श्रीकर्णिका । किङ्किणी द्राक्षा क्षुद्रद्राक्षाः । लकुचो लिकुचः। मोचा कदलीफलम् । कर्कन्धूरुक्ता । ग्रीवकं चकपुष्पम् । वारं पियालविशेषः तिन्दुकोऽसितसारः । शृङ्गाटकमुक्तम् । परूषकं फेलरुस इति प्रसिद्धं फलम् । बृहती विदिग्धिकाफलम् । ''बड़ी कटाई''इति प्रसिद्धम् । दीर्घमूलं तुण्डिकेरीफलम् । मूलकमित्यन्यः । पटोलो दीर्घपटोलो राजीफलमित्यर्थः ।''चचेडा''इति लोके । यत्तु–''गन्धारिका पटोली स्याद्द्विपटोलानि श्राद्धकर्मणि वर्जयेत् ।' इति पटोलनिषेधः स क्षुद्रपटोलविषयः । तथा च **निघण्टुः**—पटोली तीयान्या स्वादुपत्रफला च सा । '' इति । शेषं प्रसिद्धम् । **कुमारेश्वरसंवादेऽपि**–''पालेवतकमृद्वीकाखर्जूराम्रकसेरुका । बिल्वामलकमाक्षोटपनसाम्रातकानि च ॥ वेचुवेत्राङ्कुराः शाकं लकुचो मोचमेव च । शीतकन्दं बिसं नालिकेरं कट्फलकं तथा ॥ इत्यादिमेध्यमन्यच्च प्रदेयं श्राद्धकर्मणि ।'' वेचुः शणभेदः । इतरस्य निषेधात् । वेचुमढाकं शाकमित्यन्यः । वर्ज्यशाकान्याह **विष्णुः**–''भूस्तृणशिग्रुसर्षपसुरसार्जककूष्माण्डालाबुवार्ताकपालाक्यतण्डुलीयककुसुम्भादि वर्जयेदिति ।'' भूस्तृणो रोहिषः । गन्धचणाख्यं शाकमित्यर्थः। शिग्रुः 'साहिजन' इति प्रसिद्धः । सर्षपो राजसर्षपः । इतरस्य विहितत्वात् । सुरसा श्वेतनिर्गुण्डी । अर्कजः श्वेतार्कजः 'कुहेर' इति प्रसिद्धः । पालक्यः पलकीति प्रसिद्धा । तण्डुलीयकं 'चौराई' इति प्रसिद्धः । वार्ताकं श्वेतवृन्ताकम् । **उशनाः**–'' नालिकाशणछत्राककुसुमानम्बुविद्धवान् । कुम्भीकम्बुकवृन्ताककोविदारांश्च वर्जयेत्॥ वर्जयेद्गृञ्जनं श्राद्धे काञ्जिकं पिण्डमूलकम् । करञ्जं येऽपि चान्ये वै रसगन्धोत्कटास्तथा ॥'' नालिका प्रसिद्धाः। दीर्घनालाग्रैलापल्लवोति **माधवीये** । कोविदारश्चमरकम् । गृञ्जनो हरिद्रावर्णः पलाण्डुविशेषः । काञ्जिकं प्रसिद्धम् । करञ्जं चिरिबिल्वफलम् । छत्राकं शिलीन्ध्रः । कुम्भी श्रीपर्णिका । केबुकं वृत्तालाबु । वृन्ताकं श्वेतम् । **पुराणेऽपि**–''वांशं करीरं सुरसं सर्जकं भूस्तृणानि च। अवेदोक्ताश्च निर्यासा लवणान्यौषराणि च ॥'' **भरद्वाजोऽपि**–''स्वल्पाम्बुकूष्माण्डफलं वज्रकन्दं

च पिप्पली । शिबिकानि करीराणि कोविदारगवेधुकाः ॥ कुलत्थशणजम्बरिकरम्भाणि तथैव च । अब्जादन्यद्रक्तपुष्पं शिग्रुक्षारं तथैव च ॥ एतानि नैव देयानि सर्वस्मिन् श्राद्धकर्मणि ।" इति । **पैठीनसिः**–"वृन्ताकनालिकापोतकुसुम्भाश्मन्तकाश्चेति शाकानामभक्ष्या इति ।" **स्मृत्यन्तरम्**—" पिण्डालुकं च शुण्डीरं करमर्दं च नालिकम् । कूष्माण्डं बहुबीजानि श्राद्धे दत्त्वा व्रजत्यधः ॥" **भविष्येऽपि**–"लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च । वृन्ताकनालिकालाबु जानीयाज्जातिदूषिताः" इति । एषामर्थः—वांशं करीरं वंशाङ्कुरः । सुरसं पर्णास इत्यन्यः । सर्जकं शालफलम् । पीतसार इत्यन्यः । अवेदोक्ता निषिद्धाः हिङ्ग्वादीनां विषयमेवाग्रे वक्ष्यामः । औषराणि कृतलवणानि "वर्ज्यास्तत्रमसूराश्च कोद्रवा लवणं कृतम् ।" इति वचनात् । सैन्धवसामुद्रादीनां विहितत्वात् । तथा च–"लवणे सैन्धवसामुद्रे" इति । अपि च–"सैन्धवं लवणं यच्च यच्च मानससंभवम् । पवित्रे परमे ह्येते प्रत्यक्षे अपि नित्यशः ॥" मानससंभवं सांभरीति प्रसिद्धमिति **हलायुधः** । करीरं गूढपत्रं 'करील' इति प्रसिद्धम् । कोविदार उक्तः । वज्रकन्दं वनोद्भवः सूरणः । गवेधुका । शणं शणपत्राणि । जम्बीरो दन्तशठफलम् । करम्भाणि । क्षारं यवक्षारम् । सौवर्चलं सौवर्चकादिलवणानि । पोतं पोतिकाशाकम् । अश्मन्तको महोलीवृक्ष इति प्रसिद्धस्तच्छाकम् । वृन्ताकं श्वेतम् । तथा च **देवः**–"कण्डूरं श्वेतवृन्ताकं कुंभाण्डं च विवर्जयेत् ।" इति । **उपमन्युरपि**–"नाश्नीयाच्छ्वेतवृन्ताकं मातुलानीं तथाण्डकम् ।" अण्डकं छत्राकम् । मातुलानी भङ्गेति । कण्डूरं कपिकच्छूः । तत्फलं खर्जूरफलमित्यर्थः । कुम्भाण्डं वृत्तालाबुसदृशफलम् । पिण्डालु 'पेण्डारु' इति प्रसिद्धम् । शुण्डीरः । करमर्दकः करवन्दफलानि । बहुबीजानि बीजपूरकादीनि । पलाण्डुः श्वेतकन्दः पलाण्डुविशेषः । "लशुनं दीर्घपत्रं च पिच्छगन्धो महौषधम् । करण्यश्च पलाण्डुश्च लतार्कश्च परालिका ॥ गृञ्जनं यवनेष्टश्च पलाण्डोर्दशजातयः" इति **सुश्रुतोक्तेः** । कवलं शिलीन्ध्रः । **कुमारेश्वरसंवादेऽपि**–"वर्ज्यास्तत्र मसूरास्तु कोद्रवा लवणं कृतम् ।"तन्दुलीयकमुद्दालम्।"भूस्तृणं सुरसां शिग्रुं पालक्या सुमकं तथा । पिण्डं मूलं च वंशाग्रं लोहितं व्रश्चनानि च ॥ पलाण्डुं विड्वराहं च छत्राकं ग्रामकुक्कुटम् । लशुनं गृञ्जनं जम्बूफलानि कवकानि च ॥ तन्दुलीयकमुद्दालराजमाषासुरीरपि । कृष्णाजाज्यतसीतैलं पयश्चाजाविकादिकम्" इति ॥ सुमकं खादिरीसंज्ञकं जलभवं शाकम् । मुद्दालः कोविदारः । आसुरी राजिका । कृष्णाजाजी कृष्णजीरकः, करोंजीति प्रसिद्धश्च । अतसी क्षुमा । शेषं प्रसिद्धम् । **हारीतः**–" न वटं प्लक्षौदुम्बरदधित्थं नालमातुलुङ्गफलानि भक्षयेत्" इति । प्लक्षः पर्कटी । दधित्थः कपित्थः । मातुलुङ्गो बीजपूरकः । अत्रैतच्चिन्त्यते । किं पिप्पलीमरिचहिङ्गूनां निषेध उत विधिः । उभयथा वचनदर्शनात् । तथाहि **विष्णुः**–पिप्पलीसुमकभूस्तृणेत्यादिः । **शङ्खोऽपि**–" पिप्पली मरिचं चैव तथा वै पिण्डमूलकम् । कृतं च लवणं सर्वं साग्रं शिग्रुं च वर्जयेत् ॥" **व्यासः**–"अश्राद्धेयानि धान्यानि कोद्रवाः पुल्कास्तथा । हिङ्गुद्रव्येषु शाकेषु कालनाश्च शुभास्तथा । द्रव्येषु हिङ्गुशाकेषु कालनश्च शुभानि च" निषिद्धेत्यर्थः । पुल्काह्रस्वश्छन्दसः । कालानः कृष्णार्जकः 'कुहेर' इति प्रसिद्धः । शुभाशुभाख्यः शाकविशेषः इत्यादिनिषेधः । विधिस्तु–" पिप्पली मरिचं चैव पटोलं बृहतीफलम् ।" इति **वायुपुराणे**। **कुमारेश्वरसंवादेऽपि**–" पिप्पली मरिचं हिङ्गु पटोलं बृहतीफलम् ।" इत्यादि । **आदिपुराणेऽपि**- " मधूकं रामठं चैव कर्पूरं मरिचं गुडम् ।" इत्यादि । रामठं हिङ्गुः । एवं वचनविप्रतिपत्तौ केचिदाहुः–पिप्पलीमरिचहिङ्गूनां संस्कारकत्वेन विधिः केवलानां प्रतिषेधः । अपरे तु संस्कारान्तराभावे विधिरन्यथा नेत्याहुः । षोडशीग्रहणाग्रहणवद्विकल्प इत्येके । एवं च संस्कारकत्वेन विधिर्युक्तः प्रतिभाति । वेसवारत्वेन स्वादूनि मधुराणि चेति स्वादुत्वविध्युपपत्तेः । तथा च–" शुण्ठीमरिचपिप्पल्यो धान्यकाजाजिहिङ्गुकम् । पिप्पलीमूलसंयुक्तं वेसवार इति स्मृतम् ॥" इति । **शङ्खः**–"कृष्णाजाजी विडं चैव सीतपाकी तथैव च । वर्जयेल्लवणं सर्वं तथा जम्बूफलानि च ॥" कृष्णाजाजी कृष्णजीरकः।विडं विडाख्यम् । लवणं सर्वसैन्धवसमुद्रसांभरिव्यतिरिक्तम् । **ब्रह्माण्डपुराणे**-"आसनागूढमन्नाद्यं पादोपहतमेव च । अमेध्यादागतैः स्पृष्टं शुक्तं पर्युषितं च यत् ॥ द्विःस्विन्नं परिदग्धं च तथैवाग्रावलेहितम् । शर्कराकीटपाषाणैः केशैर्यच्चाप्युपद्रुतम् ॥ पिण्याकं मथितं चैव तथातिलवणं च यत्।सिद्धाः कृताश्च ये भक्ष्याः प्रत्यक्षलवणाकृताः॥वाग्भावदुष्टाश्च तथा दुष्टैश्चोपहतास्तथा । वाससा चावधूतानि वर्ज्यानि श्राद्धकर्मणि॥"इति।आसनारूढमासनोपरि कृतम् । पादोपहतं पदा स्पृष्टम् । अमेध्यादागतैश्चर्मकाराद्यपवित्रस्थानादागतैरशुद्धैः स्पृष्टम् । द्विः स्विन्नं द्विः पक्वम् । परिदग्धमातिदग्धम् । अग्रावलेहिकं श्राद्धात्पूर्वमास्वादितम् । पिण्याकं तिलकल्कः । मथितं करेण विलोडितं निर्जलं दधि । "करेण मथितं दधि"

इति निषेधात् । मथितं तक्रमित्यर्थः । सिद्धा भक्ष्या आमलकादयः प्रत्यक्षलवणेन मिश्रिताः । तथा—"दधि शाकं तथाऽभक्ष्यं शुक्तं चौषधिवर्जितम् । वर्जयेत्तु तथाऽन्यच्च सर्वानभिषवानपि॥"अभक्ष्यं दधि शाकं च वर्जयेदित्यन्वयः। अन्यन्निषिद्धमित्यर्थः । अभिषवाः संधानानि । शुक्तमनम्लवस्तु कालान्तरेण द्रव्यान्तरेण वा ह्यम्लं न स्वभावतोऽत्यम्लम् । तथा च **बृहस्पतिः**—"अत्यम्लं शुक्तमाख्यातं निन्दितं ब्रह्मवादिभिः ।" इति । अत्रापवादः **शङ्खेनोक्तः** । "दधि भक्ष्यं च शुक्तेषु सर्वं च दधिसंभवम् । ऋचीसपक्वं भक्ष्यं स्यात्सर्पिर्युक्तमिति स्थितिः॥" इति । अनग्निक ऊष्मा ऋचीसं तेन पक्वमाम्रादि घृतयुक्तं भक्ष्यमित्यर्थः । **वायुपुराणेऽपि**—"भक्ष्याण्येव करम्भाश्च इष्टका घृतपूरिका । कृशरो मधुसर्पिश्च पयः पायसमेव च ॥ दधि गव्यमसंसृष्टान्भक्ष्यान्नानाविधानपि । शर्कराक्षीरसंयुक्ताः पृथुका नित्यमक्षयाः ॥ सक्तून् लाजांस्तथाऽपूपान्कुल्माषान्व्यञ्जनैः सह । सर्पिःस्निग्धानि सर्वाणि दध्ना संस्कृत्य भोजयेत् ॥ श्राद्धेष्वेतानि यो दद्यात्पितरः प्रीणयन्ति तम् ।" इति । करम्भो दध्यक्ताः सक्तवः । इष्टकाः कासारखण्डानि पृथुकश्चिपिटः । असंसृष्टभक्ष्याः स्वकीयभक्ष्याः । लाजा भृष्टव्रीहितण्डुलाः । अपूपा मण्डकाः । कुल्माषो यावकः । एतानि पर्युषितान्यपि घृतस्निग्धानि दध्नाऽम्बुना च संस्कृतानि भक्षयेदिति पर्युषितापवाद इत्यर्थः।"यत्किंचिन्मधुना मिश्रं गोक्षीरघृतपायसैः।दत्तमक्षय्यमित्याहुः पितरः पूर्वदेवताः॥"इति **मत्स्यपुराण**वचनादित्यलं बहुना। शेषं स्मृतिभ्योऽनुसंधेयम्। अन्नाभावे फलमूलैस्तृप्तिरित्युक्तम्। तत्रोपायविधिमाह-**सहान्नेनेतरास्तर्पयन्ति**-फलमूलैरन्नेन सहेतराः पितॄंस्तर्पयेयुर्न केवला इत्यर्थः । लटो लिङर्थत्वात् । अत्रान्नेनेति तृतीययैव सहार्थे लब्धे सहेति ग्रहणं विस्पष्टार्थं नान्नस्याप्राधान्यार्थम् । अथ "सहयुक्तेऽप्रधाने" इति **पाणिनिस्मरणविरोधादन्नस्य** कथमप्राधान्यं नेति । उच्यते । अविवक्षितत्वेनास्य दोषस्य परिहृतत्वात् । तथा चाविवक्षैव हि शब्दस्य प्रधानं कारणं न वस्तुसत्तेति । **न चान्नमन्तरेण तृप्तौ** मूलफलादेः सामर्थ्यातिशयः, प्रधानगुणभावसंभवोपपत्तेः । तस्माद्विस्पष्टार्थमेव सहेत्युक्तम् । सहान्तेनोत्तरास्तर्पयन्ति इति **क्वचित्पाठस्त**त्रोत्तरा मूलफलादयस्तेनैव सह तर्पयन्ति तृप्तान्कुर्वन्ति न केवला इत्यर्थः । एवं "न हिंस्यात्सर्वभूतानि" इत्यहिंसाधर्मेण तृप्तिमभिधायेदानीं हिंसाधर्मेणाह-**छागोस्रमेषानालभ्य**--छागो वर्कः। उस्रस्तूपरः । स च शृङ्गहीनश्छागादिः । तथा च श्रुतिः—"तूपरो वा आविषाणः" इति । मेषो मेढ्रः । एतान्पित्रुद्देशेन हत्वा पचेदित्यर्थः । तथा चात्रिः—"मधुपर्के च सोमे च दैवे पित्र्ये च कर्मणि । अत्रैव पशवो हिंस्या नान्यत्रेति कथंचन ॥" **स्कन्दसंवादेऽपि**—"अर्थे देवपितॄणां हि यो हिनस्ति पशून्द्विजः । स यज्ञफलमाप्नोति ते च यान्ति परां गतिम् ॥" **जाबालोऽपि**—"हिनस्ति यत्पशून्स्वार्थमुद्दिश्यैव स पापभाक् । श्राद्धापदेशतो हिंसन्नपि स्वार्थे न दुष्यति ॥" इति । अत्रैक आहुः—उस्रो बलीवर्दः । तथा च—"महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्" इति । तदयुक्तम्, महोक्षशब्देन तूपरस्योक्तत्वात् । तथा च **जाबालः**—"विषाणोद्भवकाले तु यो विषाणविवर्जितः । तं महोक्षं वदन्त्याद्यास्तूपरं चापि पावनम् ॥" इति महोक्षः पक्षी वा 'महोख' इति प्रसिद्धः । तथा च **जातूकर्ण्यः**—"किंचिल्लोहितवर्णो यो दीर्घपुच्छो गुरुस्वरः । ह्रस्वत्रोटिस्तु यः पक्षी स महोक्षोऽतिपावनः ॥" इति । किंच वृषस्याभक्ष्यत्वमुक्तम् । तथा चेश्वरः—"साक्षाद्धर्मो वृषः प्रोक्तो मन्मूर्तिर्मम वाहनः । तं पदापि हि यो हन्ति तेनाहं स्कन्द ताडितः ॥" **वृद्धदेवलोऽपि**—"वेसरोऽस्रगजश्चाश्ववृषभान्करिमाचलम् । रासभं प्राश्य च भवेद्विट्क्रमिर्वा भवे भवे" इति । करिमाचलः शृगालः । उस्रः शतबलिर्निमिः इत्यन्ये "उक्तः शतबलादुस्रस्तूपरोक्षगभस्तिषु"इत्यभिधानात् । तदपि न, पश्वालम्भप्रकरणात् । "न हन्यान्मत्स्यसूकरौ" इति निषेधाच्च । अतश्चोस्रशब्देनात्र कलौ छागमेषावेव । पशुपञ्चकमध्ये तयोरेव भक्ष्यत्वाद्वेदोक्तत्वाच्च । तथा च श्रुतिः—"पुरुषोऽश्वो गौरविजो भवते तावता वै सर्वे पशवः" इति । **गोभिलसूत्रं** च—"छागोस्रमेषा आलभ्याः" इति । ननु च छागमेषग्रहणेनैव तल्लब्धेः किमर्थमुस्रग्रहणम् । उच्यते—विशेषविध्यर्थत्वादित्यदोषः । तथा च **स्कन्दसंवादे**—"वार्ध्रीनसं महाशल्को लोहाजस्तूपरं घृतम् । दद्यादेतद्भवेद्दत्तमानन्त्याय तिला मधु ॥" अन्यच्च—"अनन्ता खड्गमांसेन लोहच्छागेन तूपरात् ।" इति । अत्र कश्चिद्भाष्यकृदाह—छागोस्रमेषानिति पुंस्त्वमविवक्षितम् । उपादीयमानत्वात्पशुना यजेतेतिवत् । "सर्वासां पशुजातीनां मारणे भक्षणे तथा । विधाने न तु दोषः स्यादन्यथा नरकं व्रजेत् ॥" इति । अन्ये त्वाहुः--पशुना यजेतेत्यत्रापि पुंस्त्वस्यैव विवक्षितत्वात् पुंव्यक्तिरेव वध्या न स्त्रीव्यक्तिरिति । अत्रानूचानाः प्रमाणम् । **क्रीत्वा लब्ध्वा वाऽस्वयंमृतानाहृत्य पचेत्**—वाशब्दः पशुवधाभावे । अस्वयंमृतग्रहणं निषिद्धवर्जनोपलक्षणम् । तेन पश्वभावे विहितमृगपक्ष्यादिमांसानि क्रयलभ्यान्याहृत्य पचेत निषिद्ध-

मित्यर्थः । "विना मांसेन यच्छ्राद्धं कृतमप्यकृतं भवेत् ।" इति श्राद्धवैकल्यापत्तेः । **पद्मपुराणे**--"विना मांसेन यच्छ्राद्धं तन्न तृप्तिकरं भवेत् । क्रव्यादाः पितरो यस्मात्तस्मात्तेनैव तान्यजेत् ॥" इति । अत्रैकेऽकारविश्लेषमबुद्ध्वा स्वयं मृतानपि वेत्याहुः । तदयुक्तम्, तेषां निषिद्धत्वात् । तथा च **स्मृतिः**-"उच्छिष्टस्य घृतादानं मृतमांसस्य भक्षणम् । अङ्गुल्या दन्तकाष्ठं च तुल्यं गोमांसभक्षणैः ॥" इति ।"शणशाकं मृतं मांसं करेण मथितं दधि । अङ्गुल्या दन्तघर्षं च तुल्यं गोमांसभक्षणैः॥" इति । **महाभारतेऽपि**–"विषच्छन्नहतं चैव व्याधितिर्यग्घतं तथा । न प्रशंसन्ति वै श्राद्धे यच्च शस्त्रविवर्जितम् ॥" विषच्छन्नारण्ये पतितफलादौ विषप्रक्षेपस्तेन हतं तिर्यग्घतं सिंहव्याघ्रव्यतिरिक्तवृकादिहतम् , तयोरभ्यनुज्ञानात् । तथा च–'सिंहव्याघ्रहतं च यत्' इति । प्रशस्तमिति शेषः । अथवा श्राद्धे तस्यापि निषेधो विधिर्नित्यभोजनविषयः, एकमूलत्वात् । शस्त्रविवर्जितं स्वयंमृतम् । "अनुपाकृतमांसानि सौनं वल्लूरमेव च । स्मृतिलोकनिषिद्धांश्च मृगमीनाण्डजानपि ॥" सौनं हिंसास्थानभवम् । अनुपाकृतं संस्कारहीनम् । वल्लूरं शुष्कं वर्जयेदिति । "पृष्ठमांसं वृथामांसं वर्ज्यं मांसं च पुत्रक । न भक्षयन्ति सततं प्रत्यक्षलवणानि च॥" इति **मार्कण्डेयः** । पृष्ठमांसम् भैर इति प्रसिद्धम् । तथाच **वामनपुराणे**-"पृष्ठमांसाशिनो मूढा तथैव क्रौञ्चजीविनः । क्षिप्यन्ते वृषभक्ष्ये ते नरके रजनीचर॥" इति । शेषमन्यतो ज्ञेयम् । ननु च फलमूलैरोषधीभिर्वेत्यहिंसाधर्मेण तृप्तिमुक्त्वाऽनन्तरं छागोस्रमेषानालभ्येति हिंसां विधायेदानीं क्रयलाभौ सूत्रयता वाशब्देन हिंसा निषिद्धेति । तथा च–"कन्दमूलफलाभावे मांसान्याहुर्मनीषिणः । पुण्यानि मुनिगीतानि लब्धानि च वधं विना ॥" इति **चतुर्विंशतिमते** । **महाभारतेऽपि**—"क्रीत्वा स्वयं वाप्युत्पाद्य परोपहृतमेव वा । देवान्पितॄनर्चयित्वा खादन्मांसं न दुष्यति ॥ एष उक्तो विधिर्ब्राह्मयः सर्वकामफलप्रदः ।" इति । तस्माद्वाशब्देन हिंसां निषिध्य क्रयलाभावेव **सूत्रकारा**भिमताविति । अत्रोच्यते—यदुक्तं हिंसानन्तरं क्रयलाभौ सूत्रयता हिंसा निषिद्धेति तन्न, पशुवधासंभवे क्रयलाभयोरुक्तत्वात् । तथा च **स्कन्दसंवादे**–"मांसाभावे कृते श्राद्धे ध्यायन्ति पितृदेवताः । करिष्यति सुतो लब्ध्वा श्राद्धं पश्चात्त सामिषम् ॥ ददाति लब्ध्वा मांसं न तं शपन्ति रुषा मुहुः ।" इति । मांसाभावे पश्वसंभवे । यत्त्वभिहितं कन्दमूलफलाभाव इत्यनेन हिंसा निषिद्धेति । तदप्ययुक्तम् । कन्दमूलफलाद्यभावे वधं विनेत्यहिंसाधर्मेण प्रतिपादकत्वान्न हिंसा निषिद्धेति । यच्चाभ्यधायि—क्रीत्वा स्वयं वाप्युत्पाद्येत्यादिना ब्राह्मयविधिरिति । तदपि मन्दमिव । तस्याप्यमांसभुग्दाक्षिणात्यपरत्वेन तद्देशविषयत्वात् । दृश्यते च देशविषयो ह्याचारः । तथा च **बृहस्पतिः**—"उदुह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः । मध्यदेशे चर्मकाराः शिल्पिनः खगवासिनः ॥ मत्स्यादाश्च नराः सर्वे गम्या नॄणां रजस्वलाः । पर्वते मद्यपा नार्यो नैते दण्डस्य चार्हकाः ॥" इत्यादि । पठन्ति च-"पृथिव्यास्त्रिषु भागेषु मांसभक्षणमाचरेत् । पृथिव्या दक्षिणे भागे तन्निषेधं समाचरेत् ॥" इति । यत्तु **बृहत्प्रचेतोवचनं**--"न देशानां न विप्राणां न युगानां द्विजोत्तमाः । धर्मशास्त्रेषु वै भेदो दृश्यते मांसभक्षणे ॥" इति । तद्दक्षिणव्यतिरिक्तदेशविषयामित्यविरोधः । किं च यद्येवं नाभविष्यत्तर्ह्यग्नीषोमीयं पशुमालभते छागोस्रमेषानालभ्येत्यादिविहितहिंसाप्रतिपादकानि वाक्यान्यनर्थकान्यभविष्यन्निति । तस्मात्पशुवधासंभवे क्रीत्वा लब्ध्वा वेति सूक्तमिति सिद्धम् । इदानीं "मृगोरभ्रकिरिच्छागपार्षतेन पतत्रिणाम् । मांसं विशाणशशयो रुरोश्च क्रमतः सुरान् ॥ धिनोति च पितॄंश्चैव मासान्पायसमेव च ।" इत्यादिवचनविहितां तृप्तिमुपक्रमते--**मासद्वयं तु मत्स्यैः**–मत्स्याः पाठीनादयो विहिता न निषिद्धास्तैर्द्विमासं तृप्तिरित्यर्थः । तथा च **मनुः**–" द्वौ मासौ मत्स्यमांसेन" इति । तुशब्दो विशेषणार्थः । तेन मत्स्यविशेषे कालविशेष इत्यर्थः । तथा **चापस्तम्बः**--"शतवलेर्मत्स्यस्य मांसेनाक्षय्या तृप्तिः" इति । यत्तु "मत्स्यैश्चतुरो मासान्" इति **पैठीनसि**वचनं तत्सशल्कविषयम् । तथा च **यमः**–"सशल्काश्चतुरो मासान्" इति । प्रीणयन्तीति शेषः । ननु च–" मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ।" इति प्रायश्चित्तस्योक्तत्वात्कथमेवमिति । उच्यते–तस्य नित्यभोजनविषयत्वाद्देवपित्र्यनिवेदनविषयत्वाच्च । तथा **चागस्त्यः**–" ऋते यो हव्यकव्याभ्यां मत्स्यमांसं समश्नुते । लभते पातकमसौ सर्वमांसाशिनां नृणाम् ॥" **काण्वोऽपि**–" कालशाकं च मत्स्यांश्च परमान्नं तिलोदनम् । अनिवेद्य न भुञ्जीत पितॄणां दैवतैः सह ॥" इति । एवं तर्हि– " एकतः सर्वमांसानि मत्स्यमांसानि चैकतः । एकतः सर्वपापानि ब्रह्महत्या तथैकतः ॥" तथा–"मत्स्यादः सर्वमांसादः" इत्यादिवचनवृन्दं निरर्थकमिति । मैवं वोचः । कार्तिकादिकालविशेषविषयत्वेन समर्थकत्वाद्दक्षिणादिदेशनिषेधकत्वाच्च । तथा च **नारदीये**–"न मात्स्यं भक्षयेन्मांसं न कौर्मं नान्यदेव हि ।" इति कार्तिकादि-

वैष्णवकाल इति शेषः ।"मत्स्यादाश्च नराः सर्वे" इति मध्यदेशे **बृहस्पतिनोक्तम्** । किंच एकत इत्यस्यार्थान्तरम् । सर्वमांसानि भक्ष्यमांसान्येकत्र, तथा भक्ष्यमत्स्यमांसानि चैकत्र । तथा पापानि सर्वे यज्ञाः एकत्र, हत्या ब्रह्मज्ञानं चैकत्रेति । "पापं यज्ञादिकं कर्म" इति **शब्दरत्नावली** । "हत्या स्याद्गमने ज्ञाने" इति **चन्द्रगोमी** । एकत्र शशादिसर्वमांसान्येकत्र मत्स्याः, एकत्र सर्वे यज्ञाः, एकत्र ब्रह्मज्ञानमेकतस्तुलायां समानमित्यर्थः । तथा च **प्रचेताः**—"या हि तृप्तिः पितॄणां स्यादजवार्ध्रीणसादिभिः । सा भवेन्मत्स्यमांसेन दत्तेन श्राद्धकर्मणि ॥" इति । तस्माच्छ्राद्धे मत्स्यैः पितॄंस्तर्पयित्वा स्वयमपि भुञ्जीतेति निरवद्यम् । तथा च **ब्रह्मपुराणम्**—"हव्यकव्यार्थतो विप्रान्भोजयित्वा विधानतः । वैसारिणांस्तु भुञ्जानो न लिप्येतैनसा द्विजः ॥" इति । मत्स्यानाह **याज्ञवल्क्यः**—"राजीवान्सिंहतुण्डांश्च सशल्कांश्चैव सर्वशः ।" **शङ्खोऽपि**—"राजीवान्सिंहतुण्डांश्च सशल्कांश्च विशेषतः । पाठीनरोहितौ भक्ष्यौ मत्स्येष्वति हि पावनौ ॥" इति । राजीवाः पद्मवर्णाः । सिंहतुण्डाः सिंहमुखाः । सशल्काः शुक्त्याकारावयवयुक्ताः । **जातूकर्ण्योऽपि**—"शशश्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः । क्षुद्रमत्स्येषु केङ्कोऽतिमेध्यो रोहितवन्मतः ॥" इति । निषिद्धमत्स्यानाह स एव—"गोमत्स्यो गुच्छमत्स्यश्च चर्मकाराह्वयस्तथा । नैते द्विजातिभिर्भक्ष्यास्तथा चिलिचिमाभिधः ॥ शृङ्गान्न केचिदिच्छन्ति प्रशस्ता हव्यकव्ययोः ।" अयं विकल्पो नित्यभोजने व्यवस्थितः—प्राघुणकादौ । तथा—"मत्स्यश्चिलिचिमो नाम न भक्ष्यो हि द्विजन्मभिः ।" चिलिचिमः पीतगौरो नरबाहुसदृशः समुद्रज इत्यायुर्वेदः । नान्द्यावर्तालिमत्स्य—इलिसइचांग—त्रिकण्टकग्राहिप्रभृतयः क्षुद्रमत्स्याश्च स्मृत्यन्तरेऽवगन्तव्याः । **मासत्रयं तु हारिणेन**—हरिणस्ताम्रमृगस्तन्मांसेन त्रिमासं तृप्तिरित्यर्थः । "एणः कृष्णसारः प्रोक्तस्ताम्रो हरिण उच्यते" इति **सुश्रुतोक्तत्वात्** । कृष्णसारेणाधिकतृप्तेः । तथा **चोशनाः**—"चतुर्मासान्कृष्णसारेण" इति । यत्त्वष्टावैणेयेनेति **पैठीनसिनोक्तम्**, "अष्टावैणेयमांसेन" इति च **मनुना** तत्तूपरकृष्णसारविषये भवितुमर्हति । तूपरस्य विशिष्टोक्तेः । अन्यथो**शनसा** विरोधात् । तथा चोक्तम्—"स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक्पृथक् ।" इति । तुशब्दो विशेषार्थः । तेन मृगविशेषे कालविशेष इत्यर्थः । तथा च **मार्कण्डेयः**—"करोति तृप्तिं नव वै रुरोर्मांसं न संशयः ।" रुरुः शम्बरः । शरदि गलितशृङ्ग इत्यायुर्वेदः । **मनुरपि**—रौरवेण नवैव तु । यत्तु—"रुरुः प्रीणाति पञ्च वै" इति **यमोक्तम्**, यच्च "पञ्चरौरवेण इति" **गोभिलसूत्रं** तद्बहुशाखं शृङ्गरुरुविषयम् । यत्पुनर्**देवलेनोक्तं**—"त्रीन्मासान्रुरुभिर्मृगैः" इति तद्धरिणसदृशरुरुविषयम् । न च यथागृह्यविषयो विकल्पः शक्यते वक्तुम्, गृह्याणामनेकत्वात्तद्विषयानुपलब्धेः, तस्माज्जीवविषयो विकल्पो भवितुमर्हति । **मार्कण्डेयः**—"पुष्णाति चतुरो मासान् शशस्य पिशितं पितॄन् ।" इति । यत्तु **देवलेनोक्तम्**—"शशैः षाण्मासिकी तृप्तिः" इति, "शशः प्रीणाति षण्मासान्" इति च **यमेन** तद्बृहच्छशविषयमिति अविरोधः । अन्यथा विरोधे धर्मस्य बाधापत्तेः । तथा च **व्यासः**—"धर्मं यो बाधते धर्मो न स धर्मः कदाचन । अविरोधात्तु यो धर्मः स धर्मः सद्भिरुच्यते ॥ तस्माद्विरोधे धर्मस्य निश्चित्य गुरुलाघवम् । तयोर्भूयस्तरं विद्वान्कुर्याद्धर्मविनिर्णयम् ॥ तत्त्वे विप्रतिपन्नानां वाक्यानामितरेतरम् । विरोधपरिहारोऽत्र निर्णयस्तत्त्वदर्शिनः ॥" इति । न च श्वापदजातेरनेकत्वादेवं न घटत इति वाच्यम् । तथा **चामरः**—"कदलीकन्दलीचीनश्चमूरुपृथकावपि । समूरुश्चेति हरिणा अमी अजिनयोनयः ॥ कृष्णसाररुरुन्यङ्कुरङ्कुशम्बररौहिषाः ॥ गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः ॥ गन्धर्वः शरभो रामः सृमरो गवयः शशः । इत्यादयो मृगेन्द्राद्याः" इति । एवमन्यत्रापि । **चतुर औरभ्रेण**—पितॄणां तृप्तिरित्यर्थः । तथा च **मनुः**—"उरभ्रेणाथ चतुरः" इति । उरभ्र आरण्यो मेषः । नव मेषमांसेनेति ग्राम्यस्य वक्ष्यमाणत्वात् । अन्ये त्वाहुर्मेष एवेति । तदयुक्तम्, श्रुतिविहितत्वात्पौनरुक्त्यदोषाच्च । तथा च श्रुतिः—"वरुणायारण्यो मेषः" इति । यत्तु मेषेण पञ्चमांसानिति **पैठीनसिनोक्तं** तदारण्यतूपरविषयम् । अत्रैतत्संदिह्यते—किं गवयमांसं भक्ष्यमभक्ष्यं वेति । तत्रैक आहुः—विहितत्वाद्भक्ष्यमिति । तथा च **यमः**—"गावयं रुद्रसंमितान्" एकादशमासांस्तृप्यतीति शेषः । **मार्कण्डेयोऽपि**—"गवयस्य तु मांसेन तृप्तिः स्याद्दशमासिकी ।" इति । तदयुक्तम्, श्रुतिविरुद्धत्वात् । तथा च श्रुतिः—"स यं पुरुषमालभन्त स किं पुरुषोऽभवद्यावश्वं गां च तौ गौरश्चा गवयश्चाभवतां यमविमालभन्त स उष्ट्रोऽभवद्यमजमालभन्त स शरभोऽभवत्तस्मादेतेषां पशूनां नाशितव्यमपक्रान्तमेधा हैते पशवः" इति ।"श्रुतिस्मृतिविरोधे तु श्रुतिरेव बलीयसी" इति श्रुतेर्बलवत्वाच्च । न च श्रुतिविरुद्ध[illegible] । तथा च **चतुर्विंशतिमतम्**—"स्मृतिर्वेदविरोधेन परित्याज्या यथा

भवेत् । तथैव लौकिकं वाक्यं स्मृतिबाधात्परित्यजेत् ॥" इति । श्राद्धविषयत्वेन गवयस्याविधिरित्यन्ये । अत्रानूचानाः प्रमाणम् । **पञ्च शाकुनेन**–शकुनिर्भक्ष्यपक्षी । तन्मांसेनेत्यर्थः । तथा **मनुः**–"शाकुनेनाथ पञ्च वै ।" इति । यत्तु "शाकुनैश्चतुरो मासान्" इति **देवलेनोक्तम्**, यच्च "चतुरः शाकुनेन" इति च **गोभिलेन**, तद्विहितप्रातिषिद्धहारीतादिपक्षिविषयम् । यच्च "शकुनेन सप्त" इति **पैठीनसिनोक्तं** तदपि पवित्रकपिञ्जलादिपक्षिविषयम् । सोमपानोद्भवत्वेन पावित्र्यात् । तथा च **श्रुतिः**–"स यत्सोमपानमासत्ततः कपिञ्जलः समभवत्" इति । **जरत्कारुरपि**–"गौरः कपिञ्जलो मेध्यः कृकषाला च बर्हिणे ।" इति । बर्ही नीलकण्ठः । सुमेधाः किंचिल्लोहितवर्णोऽतिदीर्घपुच्छो गुरुतरः । "ह्रस्वत्रोटिस्तु यः पक्षी स महोक्षोऽतिपावनः ॥" इति । त्रोटिश्चञ्चुः । भक्ष्यानाह-**शङ्खः**–"तित्तिरिं च मयूरं च लावकं च कपिञ्जलम् । वार्ध्रीनसं वर्तकं च भक्ष्यानाह यमः सदा ॥" सदेति श्राद्धादेरन्यत्रापि । **जाबालः**–"भक्ष्यः कपिञ्जलो नीलस्त्वाटी वन्यपदायुधः ।" भक्ष्य इति । नीलः कृष्णातित्तिरिः । कपिञ्जलो गौरः । वन्यपदायुधो वन्यकुक्कुटः । वने जले भवो जलकुक्कुट इत्यन्ये । तन्न, "कलविङ्कं प्लवं हंसम्" इति **मनुना** प्लवशब्देन तस्य निषिद्धत्वात् । "चक्रवाकं प्लवं कोकम्" इति शङ्खनिषेधाच्च । भारद्वाज्या मांसेनेति **कात्यायनोक्ते**र्भरद्वाजो भक्ष्यः । यत्तु–"न खादेत्तु भरद्वाजम्" इति **सुमन्तुनोक्तं** तद्भरद्वाजोऽन्यहङ्कुविषयम् । 'कौडि' इति 'कौजिडिथा' इति च प्रसिद्धः । तथाच **निघण्टुः**–"वटीवटक इत्युक्तो भरद्वाजोऽन्यहङ्कटः । वटङ्कोऽन्यो द्वितीयस्तु खञ्जरीचित्रपुच्छकः ॥" इति । **सुमन्तुः**--"भक्ष्यस्तु नीलकण्ठः स्याद्धारीतोलोवतित्तिरी।" हारीतो विहितप्रतिषिद्धः । कुर्कुटहारीतभक्षणे"द्वादशरात्रमनाहारः" इति **शंखप्रतिषेधात्** । अन्यत्स्मृतिभ्यो ज्ञेयम् । वर्ज्यानाह **मनुः**–"क्रव्यादः शकुनीन्सर्वांस्तथा ग्रामनिवासिनः । अनिर्दिष्टांश्चैकशफं टिट्टिभं चैव वर्जयेत् ॥ कलविङ्कं प्लवं हंसं चक्राह्वं ग्रामकुर्कुटम् । सारसं रज्जुदालं च दात्यूहं शुकसारिके ॥ प्रतुदाञ्जालपादांश्च कोयष्टिनखविष्किरान् । निमज्जतश्च मत्स्यादान्सौनं वल्लूरमेव च ॥ बकं चैव बलाकां च काकोलं खञ्जरीटकम् । मत्स्यादान्विड्वराहांश्च मत्स्यानेव च सर्वशः ॥" इति । क्रव्यादा गृध्रादयः । ग्रामनिवासिनः पारावतादयः आनिर्दिष्टलक्ष्यत्वेनान्विताः । एकशफा अश्वादयः । टिट्टिभो निष्ठुरशब्दभाषी 'टिटिहिंरी" इति प्रसिद्धः । कलविङ्को गृहचटकः । प्लवो जलकुर्कुटः । चक्राह्वश्चक्रवाकः । रज्जुदालो वृक्षकुर्कुटः । दात्यूहः कालकण्ठः । प्रतुदः श्येनः । जालपादा जालाकारपादाः । कोयष्टिः शिखरी । नखविष्किराश्चकोरादयः । निमज्जन्तो मत्स्यादा निमज्ज्यमत्स्यादाः । काकोलो गिरिकाकः । मत्स्यादा अनिमजन्तोऽपि ।अन्ये प्रसिद्धाः **देवलः**–"उलूककुररश्येनगृध्रकुर्कुटवायसाः । चकोरः कोकिलो रज्जुदालकश्चकमञ्जकौ ॥ पारावतकपोतौ च न भक्ष्याः पक्षिणः स्मृताः ।" **जरत्कारुः**–"कारापिका कपोतं च स्तोकतं रक्ततुण्डकम् । सकृत्प्रजं सारिकां च कलविङ्कं च वर्जयेत् ॥" कारापिका शकुनशास्त्रोक्ता । स्तोकतश्चातकः । रक्ततुण्डः शुकः । सकृत्प्रजः काकः । **लोमशः**–"ग्रामकुर्कुटकातायिमांसादानपि वर्जयेत् ।" अतायी चिल्लः । **वेदनिधिः**–"काकारिपिङ्गलाक्रौञ्चबकोटो टेह्वसारसौ । चाषभासौ भृङ्गराजं चान्द्रं जग्ध्वा व्रतं चरेत् ॥" काकारिः उलूकः । पिङ्गला 'भूसर' इति प्रसिद्धः । वकोटो बकः । चाषो नीलपक्षी स्वर्णपक्षीति प्रसिद्धः । जग्ध्वा प्राश्य चान्द्रं चान्द्रायणमित्यर्थः । **शंखः**–"हंसं मद्गुं बकं काकं काकोलं खञ्जरीटकम् । मत्स्यादांश्च तथा मत्स्यान्बलाकां शुकसारिके॥ चक्रवाकं प्लवं कोकं मण्डूकं भुजगं कपिम् । मासमेकं व्रतं कुर्यादेतांश्चैव न भोजयेत् ॥" मद्गुर्जलवायसः । व्रतं चान्द्रायणम् । मत्स्यव्यवस्था प्रागुक्ता । निषिद्धमत्स्याश्च । अत्रेत्यर्थः । **धौम्यः**–"पारावतं रथाङ्गं च मरालं च कुलिङ्गकम् । जग्ध्वा हि कुर्कुटं ग्राम्यं व्रतेनापि न शुध्यति ॥"रथाङ्गश्चक्रवाकः । मरालो हंसः । कुलिङ्गकः । व्रतेन चान्द्रायणेनेत्यर्थः । अन्यस्मृतिभ्यो ज्ञेयम् । **षट् छागेन**–पितॄणां तृप्तिरिति शेषः । तथा च **मनुः**--"षण्मासांश्छागमांसेन" इति । छागो महोक्षवार्ध्रीनसादन्यः । तद्विधेर्विशिष्टत्वात् । यत्तु–"छागलं सप्त वै मासान्" इति **मार्कण्डेयेनोक्तं** तदारण्याजविषयम् । तमाह **श्रुतिः**–"सोमाय कुलुङ्ग आरण्योऽजः" इति । यच्च "न च तृप्यन्त्यजेन तु" इति । **देवलेनोक्तं** तद्वार्ध्रीनसव्यतिरिक्ताजविषयम् । यत्पुनर्द्वादश मासांश्छागेति **पैठीनसिनोक्तं** तत्तूपराजविषयम्, तस्यातिपावनत्वात् । तथा च 'समहोक्षेतिपावनः'इति प्रागुक्तमित्यविरोधः । **सप्त कौर्मेण**--कूर्मः कच्छपस्तन्मांसेनेत्यर्थः । तथा च **देवलः**-"कूर्मैः स्यात्सप्तमासिकी" इति । **यमोऽपि**--"कूर्मः प्रीणाति सप्त तु" इति । यत्तु—शशकूर्मयोर्मांसेनमां सैरकादशभिरिति **मनुनोक्तम्**, तदूर्ध्वमनियमार्थविषयमेवेत्यविरोधः । यत्तु-"न खादेत्कूर्मसूकरौ" इति निषेधस्तद्विषय

मग्रे वक्ष्यामः । **अष्टौ वराहेण**–वराह आरण्यसूकरस्तन्मांसेनेत्यर्थः । तथा च **देवलः**--"अष्टौ मासान्वराहेण" इति । यत्तु–"दशमासांस्तु तृप्यन्ति वाराहमहिषामिषैः" इति **मनुनोक्तं** तन्मांसलवराहविषयम् । तस्य घृतसंभूतत्वेऽनौचित्यात् । तथा च **श्रुतिः**--"अग्नौ ह वै देवा घृतकुम्भं प्रवेशयांचक्रुस्ततो वराहः संबभूव तस्माद्वाराहो मेदुरो घृताद्धि संभूतः" इति । यत्तु--"षण्मासाञ्छूकरामिषम्" इति **मार्कण्डेयेनोक्तं** तदमांसलविषयं भवितुमर्हति । अन्यथा विरोधात् । अत्रैक आहुः--"न खादेत्कूर्मसूकरौ" इति निषेधाद्वराहकूर्ममांसं न भक्ष्यमिति । तन्न, तस्य कार्तिकादिवैष्णवकालविषयत्वाच्छ्वेतवराहविषयत्वाद्वा । तथा च **नारदीये**--"कार्तिके सूकरं मांसं यस्तु भुङ्क्तेऽतिदुर्मतिः । तन्मुक्तो जायते पापो विष्ठाशी ग्रामसूकरः ॥ न मात्स्यं भक्षयेन्मांसं न कौर्मं नान्यदेव–हि ।" इति । तन्मुक्तो रौरवान्मुक्तः । नेत्यनुवृत्तौ **हारीतः**--पारावतपाण्डुसूकरसारिकेति । **उपमन्युरपि**--"ग्राम्यश्वेतवराहौ तु न भक्ष्यौ द्विजपुङ्गवैः ।" इति । **नव मेषमांसेन**--मेषो ग्राम्यभेदस्तन्मांसेनेत्यर्थः । तथा च **यमः**–"मेषैः प्रीणाति वै नव" इति । यत्तु–तृप्यन्त्येकादशाविकैरिति **देवलेनोक्तम्**, यच्च, तथैकादशमासं वा औरभ्रं पितृतृप्तमिति तत्तूपरविषयम् । अत्र विकारप्रत्यये प्रकृते तत्परिहारेण पुनर्मांसग्रहणं मांसविकारप्राप्त्यर्थम् । तेन तद्विकारा अपि कालान्तरसाधिता देया इत्यर्थः । तथा च **स्कन्दसंवादे**–"अस्नेहा अपि गोधूमयवगोरसविक्रियाः । तथा मांसविकारांश्च दधिक्षीरगुडस्य च ॥" इति । भक्षयेदिति शेषः **दश माहिषेण**–तृप्तिरित्यर्थः । तथा च **देवलः**—दश माहिषमांसेनेति । यत्त्वेकादशमासान्माहिषेणेति **पैठीनसिनोक्तं** तदारण्यविषयं तूपरविषयं वा । महिषभक्षणं च देशविशेषे व्यवस्थितम् । तथा च **यमः**–"कासरो हि गिरौ मेध्य इति प्राह प्रजापतिः ।" इति । कासरो महिषः । ननु च–"अभक्ष्याः पशुजातीनां गोश्वेभोष्ट्राः सकुञ्जराः । सिंहाव्याघ्रर्क्षशरभाः सर्पाजगरकास्तथा ॥ शशमूषकमार्जारा नकुलग्राम्यसूकराः । श्वशृगालवृषद्वीपिगोलाङ्गूलकमर्कटाः ॥" इति । तथा—"वार्दमौर्दं च नारं च हारं कारं च रासभम् । कौगं लौमसिकं मांसं जग्ध्वा भवति विट्कृमिः ॥ वेसरोष्ट्रगजश्वाश्ववृषभान्करिमाचलम् । रासभं प्राश्य च भवेद्विट्कृमिर्वाभवे भवे ॥" इति **देवलव्याघ्रपादवृद्धदेवलादिवचनै**रभक्ष्यमध्ये महिषानुक्तेः सार्वत्रिकं महिषभक्षणं किं न स्यादिति चेत् । मैवं भाणीः । गिरिमन्तरेण तद्भक्षणे महादोषापत्तेः । तथा च **भारद्वाजः**–"शङ्खमूषकसर्पांस्तु सौरभं च गिरिं विना । जग्ध्वा द्विजा न शुध्यन्ति प्रायश्चित्तशतैरिति" । तस्माद्देशविशेष एव तद्भक्षणं व्यवस्थितमिति सूक्तम् । वार्दं वार्षभम् । औदों जलपशुस्तस्य । जलमानुष इत्येके । नारं मानुषम् । हारं हरिशब्दवाच्यानां सिंहाश्वकप्याहिभेकादीनाम् । कारं कारिणाम् । कौगो वन्यः श्वा तस्य । लोमसिका लोखरीति प्रसिद्धा तस्या लौमसिकम् । विट्कृमिर्विष्ठाकृमिः । द्वीपी व्याघ्रविशेषः । गोलाङ्गूलो वानरविशेषः, मर्कटग्रहणं श्वादिपञ्चनखोपलक्षणम् । **एकादश पार्षतेन**–पृषतश्चित्रमृगस्तन्मांसेनेत्यर्थः । तथा च **गोभिलः**–एकादश पार्षतेनेति । अत्रैतद्वक्तव्यम्–पृषच्छब्देन किं चित्रगुणो वाच्यः किंवा चित्रमृगजातिरिति । तत्र यदि चित्रगुणो वाच्यः स्यात्तर्हि रुरुवच्छागादीनामपि पृषत्त्वगुणे एकादशमासतृप्तिहेतुत्वं स्यात् । ततश्च विहिताः सर्वेऽपि पृषतः सन्त एकादशमांसतृप्तिहेतव इत्यर्थः स्यात् । अथ च पृषच्छब्देन चित्रमृगजातिर्वाच्या न स्यात् तर्हि तज्जातेर्दैववशात्कथंचिदपृषत्त्वे एकादशमासतृप्तिहेतुत्वं न स्यात् । प्रत्युत विहितजातेः परित्यागश्चेत्यर्थः स्यात् । तस्मात्पृषच्छब्दस्य कथं गतिरित्याक्षेपः । उच्यते–"व्याख्यानतो विशेषप्रतिपत्तिः" इति न्यायेन व्याख्यातचित्रमृगसंज्ञयैवेतरव्यावर्तकत्वाच्चित्रमृगस्यैव तावन्मासतृप्तिहेतुत्वं नान्यस्येति । एवं च सति मृगशब्दस्यान्वेषणार्थस्य छागादिवाचकत्वाभावात्पृषत्त्वे सत्यपि तस्यान्वयोऽयुक्तः । तस्माच्चित्रमृगेणैव तावन्मासतृप्तिरिति सिद्धम् । ततश्च पञ्च तृप्यन्ति पार्षतैः, पार्षतेनेह सप्त वै, नव मासान्पार्षतेन, एकादश पार्षतेनेति **देवलमनुपैठीनसिकात्यायन**वचनानां विषयानुपलब्धेर्विकल्पा एव शक्यन्ते वक्तुम्, न विषयाः । अथवा सर्वमृगजातिषु पृषत्त्वं विशेषस्तेनैकादशेति सर्वेभ्यस्तृप्तिराधिक्यमित्यर्थः । ततश्चैवं विषयः–"पञ्च तृप्यन्ति पार्षतैः" इति **देवलवचनं** हरिणसदृशचित्ररुरुविषयम् । "पार्षतेनेह सप्त च" इति **मनुनोक्तं** बहुशाखशृङ्गचित्ररुरुविषयम् । "नव मासान्पार्षतेन" इति **पैठीनसिनोक्तं** शम्बरचित्ररुरुविषयम् । एकादश पार्षतेनोति चित्रतूपरविषयमित्यविरोधः । अयमाशयः—त्रीन्मासान्रुरुभिर्मृगैरिति त्रिमासतृप्तिविषयस्य रुरोः पृषतेन पञ्च तृप्यन्ति पार्षतैरिति तृप्तिविशेषः । रुरुः प्रीणाति पंचकैरिति पञ्चमासतृप्तिविषयस्य रुरोः पृषतत्वेन एकादश पार्षतेनेह सप्त वै इति तृप्तिविशेषः । रौरवेणं नव त्विति नवमासतृप्तिविषयत्वेन एकादशपार्षतेनोति तृप्तिविशेषः ।

सर्वपृषतानां तूपरत्वे सति अनन्ता तृप्तिरिति । "अनन्ता खड्गमांसेन लोहच्छागाच्च तूपरात्" इति वचनादेवं विषयविभागः । हरिणमेषवराहमहिषशशानां पृषतत्वासंभवात् एवं कल्पनागौरवमप्यविरुद्धम् । प्रमाणकल्पने दोषाभावात् । तथा **चाङ्गिराः**—"प्रमाणानि प्रमाणज्ञैः परिकल्प्यानि यत्नतः । सीदन्ति हि प्रमाणानि प्रमाणैरव्यवस्थितैः ॥" **भट्टोऽपि**—"प्रमाणवन्ति कल्प्यानि सामान्यानि बहून्यपि । अदृष्टशतभागोऽपि न कल्पो निष्प्रमाणतः" इति । **संवत्सरं तु गव्येन पयसा**—गव्यग्रहणमितरव्युदासार्थम् । तुशब्दो विशेषे । इतरपयोनिषेधेऽप्यारण्यमहिषीक्षीरं प्रशस्तमिति विशेष इत्यर्थः । तथा च **ब्रह्मपुराणम्**—"आरण्यमहिषीक्षीरं शर्कराशुण्ठिसंयुतम् । मधुयुक्तं तनुहितं दद्यादमृतमेव तत् ॥" इति । निषिद्धमाह **याज्ञवल्क्यः**—"संधिन्यनिर्दशाऽवत्सागोपयः परिवर्जयेत् । औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकम् ॥" संधिनी वृषाक्रान्ता कामुकी । अनिर्दशाऽनतिक्रान्तदशाहा । अवत्सा वत्सरहिताऽन्यवत्सा च । स्त्रैणं स्त्रीभवम् । द्विस्तन्युपलक्षणमेतत् । यच्च सर्वासां द्विस्तनीनां क्षीरमभोज्यमजावर्जमिति **शङ्खेना**जाक्षीरस्य भक्ष्यत्वमुक्तं तच्छ्राद्धेतरविषयम् । कृष्णाजाज्यतसीतैलं पयश्चाजाविकादिकम् । माहिषं चामरक्षीरं जलमल्पजलाशयात् ॥" इति **स्कन्दसंवादा**त्त्वात् । वर्ज्यमिति शेषः । माहिषं ग्राम्यम् । "आरण्यानां च सर्वेषां मृगाणां महिषीं विना ।" इति मनूक्तेः । **गौतमोऽपि**-"यमसूस्यन्दिनीनां च" इति । पयो वर्ज्यमिति शेषः । यमसूर्युग्मप्रसूः । स्यन्दिनी स्रवत्पयःस्तनी । क्षीरमपेयं विवत्साया अन्यवत्सायाश्चेति **बौधायनः** । **पायसेन वा**—पयसि शृतं पायसम् । पयोविकारश्च । तेन वा संवत्सरं तृप्तिरित्यर्थः । तथा च **विष्णुः**—"संवत्सरं तु पयसा तद्विकारेण वा" इति । अपि च **मार्कण्डेयः**—"संवत्सरं तथा गव्यं पयः पायसमेव च" इति । **आदित्यपुराणे**—विविधं पायसं दद्यादिति । "तथा मांसविकारांश्च दधिक्षीरगुडस्य च" इति वचनात् । पयोविकाराः कूर्चिकाक्षीरवटकादयः । **वार्ध्रीनसमांसेन द्वादशवर्षाणि**—तृप्तिरिति शेषः । वार्ध्रीनसस्त्रिविधः । तथा च **विष्णुधर्मोत्तरम्**—"त्रिपिबं त्विन्द्रियक्षीणं यूथस्याग्रहणं तथा । रक्तवर्णं तु राजेन्द्र छागं वार्ध्रीनसं विदुः ॥" इति । मुखकर्णौ जलपाने पतन्तौ जलं त्रिपिब इत्यर्थः । "त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् । वार्ध्रीनसं तु तं प्राहुर्याज्ञिकाः पितृकर्मणि ॥" इत्यन्यत्र । **निगमेऽपि**—"कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहङ्गमः । स वै वार्ध्रीनसः प्रोक्त इत्येषा नैगमी श्रुतिः ॥" इति । अत्रानूचानाः प्रमाणम् । रक्तवर्णो वार्ध्रीनसोऽक्षयतृप्तिविषयो वेत्यविरोधः । "वार्ध्रीनसो महाशल्को लोहाजस्तूपरो घृतम् । आनन्त्याय भवेद्दत्तः" इति वचनात् । "लोहामिषं कालशाकं मांसं वार्ध्रीनसस्य च" इति **याज्ञवल्क्यवचना**च्च । वार्ध्रीनसशब्दे णत्वोच्चारणमनालोचितम् । "उष्ट्रो घृणीवान्वार्ध्रीनसस्ते मत्वा अरण्याय सृमरः" इति श्रुतौ तवर्गीयपाठात् । श्राद्धशिष्टस्यावश्यभक्षणत्वमवगन्तव्यम् । तथा च **विश्वामित्रः**—"धर्मशास्त्रं तु विज्ञाय भक्ष्यं चाभक्ष्यमेव च । प्रदाय पितृदेवेभ्यो भुञ्जीतातिथिपूर्वकम् ॥" इति । अत्र रागप्राप्ते भोजने भुञ्जीतेति नियमार्थम् । तथा **चोपमन्युः**—"मृगाजाविकभक्ष्याणां मांसं शाकादिमेध्यवत्" इति पवित्राभिधानादिति॥ इति श्राद्धकाशिकायां सप्तमी कण्डिका॥७॥

इति श्राद्धकाशिकायां सूत्रवृत्तौ तृप्तिप्रकरणं सामान्यम् ॥

इत्थं ग्राम्यारण्यौषधिमूलफलैरनेकमत्स्यमांसैश्च तृप्तिमभिधायाधुनाक्षय्यतृप्तिं विवक्षुः सूत्रमारभते—**अथाक्षय्यतृप्तिः**—अथ शब्दः प्रश्ने कार्त्स्न्ये वा । अक्षय्यतृप्तिः कथं किंवाक्षय्यतृप्तिकरं द्रव्यमिति प्रश्नमित्यर्थः । कार्त्स्न्येनाक्षय्यतृप्तिरुच्यत इति वाऽर्थः । अक्षय्योऽनन्तता । तथा च **मनुः**—"कालशाकं महाशल्कः खड्गो लोहामिषं मधु । आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्वशः ॥" इति । प्रश्नोत्तरमाह—**खड्गमांसं कालशाकं लोहच्छागमांसम्**—खड्गस्तूपरः खड्गमृगस्तन्मांसं निषिद्धशृङ्गादिव्यतिरिक्तम् । तथा च **विष्णुः**—"कालशाकं महाशल्कं मांसं वार्ध्रीनसस्य च । विषाणवर्जा ये खड्गा नासूयतांस्तु भक्ष्य ह॥" इति । यत्तु "खड्गमांसेन त्रयोदशमासान्" इति **पैठीनसिनो**क्तं तत्सशृङ्गविषयम् । लोहः सर्वलोहितच्छागः । तथा च **पैठीनसिः**—"सर्वलोहच्छागेनानन्त्यम्" इति । लोहितशब्दोऽत्रावयववृत्तिः । एवमादिद्रव्यमक्षय्यतृप्तिकरामिति पूर्वप्रश्नस्योत्तरमित्यर्थः । खड्गलोहितयोर्मध्ये कालशाकोक्तिस्तत्तुल्यफलार्था । **मधु महाशल्कः**—मधु माक्षिकम् । महाशल्को मत्स्यभेदः । 'महसेन' इति मध्यदेशप्रसिद्धः । महाशल्का महाकालिनो मत्स्या इति **यमस्मृतिः** । 'बृहन्निवल' इति यस्य रूढिरिति हलायुधः । ढकायीति प्रसिद्ध इति **कल्पतरुः** । कलम्बाख्य इति कश्चित् । शल्लको वेत्यन्ये । एवमनेकविप्रति-

पत्नी **पुलस्त्योक्तो** वाऽऽदर्तव्यः–“एकशल्कोऽर्धचन्द्रश्च ललाटे खड्गसंयुतः । शुक्लवर्णस्तु मत्स्यो हि महाशल्कः
स उच्यते” इति । अत्रैक आहुः—कलौ श्राद्धे मधु निषिद्धमिति । तथा च “श्राद्धे मांसं तथा मधु” इति
लिखितं प्राक् तन्न विचारसहम् । निबन्धकृद्भिर्मूलाप्रतिपादनादित्युक्तम् । कलौ विधायकवचनोपलब्धेश्च । तथा च
पैठीनसिः–“परमान्नं कालशाकं मधु मांसं घृतं पयः । मुन्यन्नानि तिला विप्राः प्रकृत्या हविरष्टधा ॥ शस्तान्यष्टौ तु
सर्वेषु युगेषु मुनिसत्तमाः । पितॄणां देवतानां च दुर्लभानि कलौ युगे ॥” इति । परमान्नं पायसम् । **देवलोऽपि**–“दर्भा-
स्तिला गजच्छाया दौहित्रं मधुसर्पिषी । कुतपो नीलशण्डश्च पवित्राणीह पैतृके ॥” इह कलौ । तथा-“तुलसी मधु दर्भाश्च
तिलाः सर्पिर्मृगामिषम् । एतन्मेध्यतमं नित्यं सदाचाराश्च ये द्विजाः ॥” इति । **सुमेधा** अपि-“विमांसं विमधु श्राद्धं
विघृतं प्रीतिभोजनम् । विना समरतं कामो व्योमालिङ्गनवत्त्रयम् ॥” इति । **वर्षासु महाश्राद्धम्**–वर्षर्तौ मघानक्षत्रे
श्राद्धमक्षय्यतृप्तिकृदित्यर्थः । एतच्चापिण्डकं ज्येष्ठपुत्रिणाऽपि कर्तव्यम् । तथा च **देवीपुराणम्**–“तत्रापि महती
पूजा कर्तव्या पितृदैवते । ऋक्षे पिण्डप्रदानं तु ज्येष्ठपुत्री विवर्जयेत् ॥” इति । तथा–“मघायां पिण्डदानेन ज्येष्ठः
पुत्रो विनश्यति ।” इति । अत्रैक आहुः—ज्येष्ठ आद्यगर्भोद्भव इति । तदयुक्तम्, तद्व्यतिरिक्तस्यापि ज्येष्ठत्वात् ।
तथा च **शातातपः**–“अनाद्यपुत्रो ज्येष्ठोऽपि भ्राता पुत्रो निगद्यते ।” इति । अतश्च ज्येष्ठपुत्ररहितेन मघायां
सपिण्डमेव कर्तव्यमिति गम्यते, महाफलत्वात् । एतच्च मघान्वितदिनान्तरे, न त्रयोदश्याम् । “मघायां पिण्डदानेन
ज्येष्ठः पुत्रो विनश्यति । कनीयांस्तु त्रयोदश्यां क्षयाहाभ्युदयादृते ॥” इत्युभययोगे पुत्रिमात्रस्य पिण्डनिषेधात् ।
अत्र चाविभक्तभ्रातॄणां पौत्रस्य च पुत्राभावे महाफलत्वात् पृथक् पृथगधिकारः । तथा च **पैठीनसिः** अत्र पितृ-
गाथा–“छागेन सर्वलोहेन वर्षासु च मघासु च । पुत्रो वा यदि वा पौत्रो यो नो दद्यात्त्रयोदशीम् ॥” इति । तथा–
“विभक्ता वाऽविभक्ता वा कुर्युः श्राद्धमदैवतम् । मघासु च ततोऽन्यत्र नाधिकारः पृथग्विना ॥” अदैवतं
क्षयाहैकोद्दिष्टं पृथक्पदमुभयत्र विभक्ता अविभक्ता वाऽदैवतं मघासु च श्राद्धं पृथक्कुर्युः । ततोऽन्यत्र पृथग्विना
नाधिकार इत्यन्वयः । अथवा तत इति सार्वविभक्तिकस्तस् । ततो विनादैवतं मघाश्राद्धं च विनाऽन्यत्र पृथग्नाधिकार
इत्यन्वयः । उभयान्वयेऽपि क्षयाहमघाश्राद्धयोरेव विभक्ताविभक्तयोः पृथक् पृथगधिकारोऽन्यत्र न किंत्वविभक्तेनै-
केनैवैकं श्राद्धं कर्तव्यं न पृथगित्यर्थः । तथा च **प्रचेताः**–“अर्वाक्संवत्सरात्सर्वे कुर्युः श्राद्धं समेत्य वै । संवत्सरे
व्यतीते तु कुर्युः श्राद्धं पृथक् पृथक् ॥” पठन्ति च–एकादश्यां मघायां तु ज्येष्ठस्य विधिवत्क्रियाः । कुर्युर्नैकैकशः
श्राद्धमाब्दिकं तु पृथक् पृथक् ॥” इति । किं च–“नवश्राद्धं सापिण्डत्वं श्राद्धान्यपि च षोडश । एकेनैव तु कार्याणि
संविभक्तधनेष्वपि ॥” अपिशब्दाद्विभक्तेष्विति परिगणनात् । यत्तु–“विभक्तास्तु पृथक्कुर्युः प्रतिसंवत्सरादिकम् ।
एकेनैवाविभक्तेषु कृते सर्वैस्तु तत्कृतम् ॥” यच्च–“भ्रातॄणामविभक्तानामेको धर्मः प्रवर्तते । विभागे सति धर्मोऽपि
भवेत्तेषां पृथक् पृथक् ॥” इति वचनादविभक्ता मध्यदेशादावेकमेव कुर्वन्ति तदशक्तविषयमित्यविरोधः । वर्षास्विति
चान्द्रमासाभिप्रायम् । ननु च वर्षास्वित्यभिधानान्मासद्वयात्मकस्यर्तोः क मासे मघाश्राद्धमिति संदेहः । मैवम् ।
अपरपक्षे श्राद्धमित्युपक्रमादित्यदोषः । अतश्चापरपक्षमवायामिति । तथा च **वृद्धयाज्ञवल्क्यः**–“याम्यं वा पैतृकं
वाऽपि पितृपक्षे विशेषतः । तत्र संकल्पनं कुर्यात्पितॄणां पुष्टिदः सदा ॥” इति । **हस्तिच्छायायां च**–श्राद्धमक्ष-
य्यतृप्तिकृदिति शेषः । सा चात्र गजस्यैव या पूर्वं वर्तते सा मुख्या । तथा च **विश्वामित्रः**–“परमान्नं
च यो दद्यात्पितॄणां मधुना सह” इति । “छायायां तु गजेन्द्रस्य पूर्वस्यां दक्षिणामुखः ।” इति । पारिभा-
षिकी तु सा गजस्य छायेव गजच्छायेति व्युत्पत्त्या गौणी । तथा च नानावचनानि ब्राह्मादिषु—“सैंहि-
केयो यदा भानुं ग्रसते पर्वसंधिषु । हस्तिच्छाया तु सा प्रोक्ता तत्र श्राद्धं प्रकल्पयेत् ॥” **प्रचेताः**–“हंसे हस्त-
स्थिते या तु मघायुक्ता त्रयोदशी । तिथिर्वै श्रावणीया तु सा छाया कुञ्जरस्य तु ॥” तथा—“हंसे हस्त-
स्थिते या स्यादमावास्या कराान्विता । सा ज्ञेया कुञ्जरच्छाया इति बोधायनी स्मृतिः ॥” **वायवीये**—“वन-
स्पतिगते सोमे छाया या प्राङ्मुखी भवेत् । गजच्छाया तु सा प्रोक्ता” इति चकारस्तु वार्ध्रीनसादिद्रव्यसमुच्चयार्थः ।
तथा **चापस्तम्बः**-“खड्गोपस्तरणेन खड्गमांसेन वाऽनन्तकालांशतः शल्कैर्मत्स्यस्य मांसेन वार्ध्रीनसस्य च” इति खड्गो-
पास्तरणं खड्गासनं वार्ध्रीनस आरक्तः । तथा च **मार्कण्डेयः**-“वार्ध्रीनसामिषं लोहं कालशाकं तथा मधु । अनन्तां
च प्रयच्छन्ति तृप्तिं गौरसुतस्तथा ॥ अष्टवर्षा विवाहिता गौरी तत्सुतो गौरः” **महाभारते**–“वर्धमानतिलं श्राद्ध-
मक्षयं मनुरब्रवीत् । सर्वकामैः स यजते यस्तिलैर्यजते पितॄन् । न चाकामेन दातव्यं तिलश्राद्धं कथंचन ॥” इति ।

वर्धमानतिलं तिलबहुलम् । **स्कंदसंवादेऽपि**—" कालशाकं महाशल्को लोहाजस्तूपरो घृतम् । आनन्त्यायैव भवति तथा पैठीनरोहितौ ॥" इति । घृतं घृतबहुलम् । " घृतेन भोजयेद्विप्रान्घृतं भूमौ समुत्सृजेत्" इति **वायवीयवचनात्** । भूमौ समुत्सृजेदिति तथा पात्रं पूरणीयम्, यथा घृतं भुवि पततीति, घृतबहुलमित्यर्थः । एवमक्षय्यतृप्तिकृद्द्रव्यमुक्त्वा तत्तृप्तिहेतून्पङ्क्तिपावनानाह—**मन्त्राध्यायिनः पूताः**—पङ्क्तिपावना इति शेषः। मन्त्रशब्दः संहितावचनः । बहुवचनमेकद्वित्रियथापेक्षमृग्वेदाद्यनेकसंहितापेक्षं वा । मन्त्राध्यायित्वमात्रेणैव केवलं पङ्क्तिपावन्यं न इति पूता इति विशेषणम् । तच्चौचित्यादुत्तरत्रापि सार्वत्रिकम् । मनोवाक्कायकर्मभिः शास्त्रोक्तव्रतातिशयेन निषिद्धवर्जनेन च बाह्याभ्यन्तरशुद्धियुक्ताः पूता इत्युच्यन्ते । अथवा पूतः पञ्चविधः । तथा च **विष्णुः**—" तीर्थपूतो यज्ञपूतस्तपःपूतः सत्यपूतो मन्त्रपूतः" इति । **शाखाध्यायी**—पूतः पङ्क्तिपावन इति शेषः । शाखाशब्दो मन्त्रब्राह्मणात्मकवेदापेक्षः, अङ्गानां वक्ष्यमाणत्वात् । तथा च **शङ्खः**—"यजुषां पारगो यश्च ऋचां साम्नां च पारगः । अथर्वशिरसोऽध्येता ब्राह्मणः पङ्क्तिपावनः ॥" इति । **षडङ्गवित्**—षडङ्गो वेद उक्तस्तमर्थतः पाठतश्च यो वेत्ति स पूतस्तादृश इति शेषः । अनूचान इत्यर्थः । तथा च **स्कन्दसंवादे**—अनूचानाः श्रोत्रियाश्च ब्राह्मणाः पङ्क्तिपावनाः ।" इति । "शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः । छन्दो विचितिरित्येतैः षडङ्गो वेद उच्यते ॥" अत्र मन्त्राध्यायिप्रभृत्येतावत्पर्यन्तं गुणाधिक्योपक्रमादुत्तरोत्तरं प्राशस्त्यं सूचितम् । अत्र कश्चिदाह—षडङ्गानि तेषामेकं वापि यो वेत्ति स एवेति । तन्नोचितम्, बहुव्रीह्युपलब्धेः । अनूचानोक्तिपरित्यागप्रसक्तेश्च । एवं वेदाध्ययनेन पङ्क्तिपावनत्वमुक्त्वा तदसंभवेऽप्याह **ज्येष्ठसामगः**—ज्येष्ठसामगशब्दो द्वेधा विवक्षितः । तथा हि—ज्येष्ठसामसंज्ञकं सामत्रयं यो गायति स तथा । अथवा ज्येष्ठसामसंज्ञकं व्रतं तद्यो गच्छत्याचरितुं जानाति स ज्येष्ठसामगः । ज्ञानार्थस्य गमेर्डप्रत्ययः । ततश्च ज्येष्ठसामत्रयं गायता येन तद्व्रतं चीर्णं स ज्येष्ठसामगश्च तन्मार्गेणैव पावन इत्यर्थः । **गायत्रीसारमात्रोऽपि**—गायन्तं त्रायत इति गायत्रा सैव गायत्री तां वेद सारत्वेनोपादाय तज्जपादिमात्रपरो गायत्रीसारमात्रः । तथा च **विष्णुः**—गायत्रीजपनिरत इति । अथवा गयाः प्राणास्तांस्त्रायते गयत्रा सैव गायत्री, सारमात्रं सर्वमन्त्रमूलं यस्य, न मन्त्रान्तरं स गायत्रीसारमात्रः । तथा च **श्रुतिः**—सा हैषा गयांस्तत्र प्राणा वै गयास्तत्प्राणांस्तत्रैतद्यद्गयांस्तत्रैतस्माद्गायत्री नामेति । **मनुरपि**—"गायत्रीसारमात्रोऽपि वरं विप्रः सुयन्त्रितः । नायन्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी" इति । गायत्रीव्रतचारीति कश्चित् । अपिशब्दादन्येऽपि शास्त्रोक्ताः । तथा च **यमः**—"ये सोमपा विरजसो धर्मज्ञाः शान्तबुद्धयः । व्रतिनो नियमस्थाश्च ऋतुकालाभिगामिनः ॥ अथर्वशिरसोऽध्येता सर्वे ते पङ्क्तिपावनाः ।" इत्यादि । **पञ्चाग्निः**—पूतस्तादृश इति शेषः । सभ्यावसथ्यौ त्रेता च यस्य स्युः स एवाग्निहोत्री । अथवा "पञ्चाग्नयो मनुष्येण परिचर्याः प्रयत्नतः । माता पिता चाग्निरात्मा गुरुश्च भरतर्षभ" इति **महाभारतोक्तः** पञ्चाग्निः । पञ्चाग्निव्रतचारीति कश्चित् । उपनिषत्पठ्यमानपञ्चाग्निविद्यावेत्तेत्यन्यः । पञ्चाग्निरेकाग्नेरुपलक्षणम् । तथा च **मनुः**—"त्रिणाचिकेत एकाग्निः" इति । **स्नातकः**—व्याख्यातचरः । इह पुनस्तद्ग्रहणं चान्द्रायणादिव्रतचारिप्राप्त्यर्थम् । तथा च **यमः**—"चान्द्रायणव्रतचरः सत्यवादी पुराणवित् । निष्णातः सर्वविद्यासु शान्तो विगतकल्मषः ॥ गुरुवेदाग्निपूजासु प्रसक्तो ज्ञानतत्परः । विमुक्तः सर्वदा धीरो ब्रह्मभूतो द्विजोत्तमः ॥ अनमित्रो न वाऽमित्रो मैत्र आत्मविदेव च । स्नातको जप्यनिरतः सदा पुष्पबलिप्रियः ॥ ऋजुर्मृदुः क्षमी दान्तः शान्तः सत्यव्रतः शुचिः । वेदज्ञः सर्वशास्त्रज्ञ उपवासपरायणः ॥ गृहस्थो ब्रह्मचारी च चतुर्वेदविदेव च । वेदविद्याव्रतस्नाता ब्राह्मणाः पङ्क्तिपावनाः ॥" इति । **त्रिणाचिकेतः**—पङ्क्तिपावन इति शेषः । अत्राहुः—"उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ" इत्यादावनुवाके कठश्रुतौ पठ्यमाने त्रिणाचिकेतनाम्नो मुनिपुत्रस्य प्रश्नत्रयविषयोऽत्रोच्यत इति व्युत्पत्त्या त्रिणाचिकेतस्तत्पाठतदर्थाभ्यां ब्राह्मणोऽपि त्रिणाचिकेत इति । त्रिश्चितो नाचिकेतोऽग्निर्येन स इत्यन्यः । तन्नोचितम्, त्रिणाचिकेतशब्दस्य यौगिकस्य पारिभाषिकस्य वाऽत्र विवक्षितत्वात् । तथा हि " कित ज्ञाने " धातुः व्रतातिशयेन तपोविशेषेण च तृणवत्सर्वमाचिकेति जानातीति त्रिणाचिकेतः । तथा च **ब्रह्मपुराणम्**—"आचिकेतीति यो विश्वं तृणवत्सर्वानिस्पृहः । तृणाचिकेतः स गृही रागद्वेषविमत्सरः ॥ " इति । पठन्ति च—" फलमूलदधिक्षीरगोमयाम्बुघृताशनः । त्रिणाचिकेत उक्तोऽसौ योऽन्नं त्यजति नित्यशः ॥" इति । अथवा "अध्वर्युर्वेदभागज्ञस्तद्व्रती नियतो द्विजः । त्रिणाचिकेतः स ज्ञेयस्तद्योगात्पुरुषोऽपि च ॥" इति **ब्रह्मपुराणोक्तो** वा । **त्रिमधुः**–तादृश इति शेषः। त्रिमधुः। ऋग्वेदैकदेश-

स्तद्व्रतं च तदाचरणेन तदध्यायीत्येके । त्रिमधुरथर्ववेदस्य, तच्चारीत्यन्ये।अपरेऽन्यथा पेठुः–"त्रीणि त्रीणि विशुद्धानि विद्या योनिश्च कर्म च । पुरुषत्रयविख्यातास्त्रिमधुः परिकीर्तितः॥" इति । **त्रिसुपर्णी**-पङ्क्तिपावन इति शेषः । त्रिसुपर्णमृग्यजुत्रयोरेकदेशस्तद्व्रतं च तदाचरणेन तद्व्रताध्यायी त्रिसुपर्णीत्येके । **तैत्तिरीय**शाखापाठितस्य **ब्रह्म मेतु माम्**इत्यादि ये **ब्राह्मणास्त्रिसुपर्णं पठन्त्यासहस्रापङ्क्तिं पुनन्ति ते सोमं प्राप्नु**वन्तीत्यनुवाकत्रयस्यार्थतो ग्रन्थतश्चाध्येता त्रिसुपर्ण इत्यन्ये । अपरेऽन्यथा पेठुः । "पितरः सप्तपूर्वे च यज्वानो भूरिदक्षिणाः । यस्येदृशो मातृवंशस्त्रिसुपर्णीति स स्मृतः" इति । **द्रोणपाठकः**–पूतस्तादृश इति शेषः । द्रोणशब्दोऽवयववृत्तिः । धर्मद्रोण इत्यर्थः । तथा च **गोभिलसूत्रम्**–" धर्मद्रोणपाठकः" इति । धर्मद्रोणो धर्मशास्त्रम् । तथा च **स्कन्दसंवादे**-" पुराणस्मृतिवेत्तारः कृतव्याकरणश्रमाः । अनूचानाः श्रोत्रियाश्च ब्राह्मणाः पङ्क्तिपावनाः ॥" **यमोऽपि**–" मन्त्रब्राह्मणविच्चैव यश्च स्याद्धर्मपाठकः ।" इति । **ब्राह्मोढापुत्रश्चेति**–पङ्क्तिपावनाः–ब्राह्मविवाहेनोढा ब्राह्मोढा तत्पुत्रः पूतः पङ्क्तिपावन इत्यर्थः । चकारो ब्राह्मोढापत्यादिसमुच्चयार्थः । तथा च **शङ्खः**–" ब्रह्मदेयानुसंतानो ब्रह्मदेयाप्रदायकः । ब्रह्मदेयापतिश्चैव ब्राह्मणाः पङ्क्तिपावनाः ॥" इति । ब्रह्मदेया ब्राह्मविवाहेन दत्ता । तदनुसंतानस्तत्संततिः । इतिशब्द आद्यर्थे, न समाप्तौ । इत्याद्यर्थेऽपीत्यर्थः । तथा च **मनुः**–"वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः । शतायुश्चेति विज्ञेया ब्राह्मणाः पङ्क्तिपावनाः ॥" इत्यादि । ब्रह्मचार्यधीयानः । जटिलं वाऽधीयानमित्यनधीयानस्य तेनैव प्रतिषिद्धत्वात् । **यमोऽपि**-"गृहस्थो ब्रह्मचारी च चतुर्वेदविदेव च।" चतुर्वेदविदेव चेति ब्रह्मचारिविशेषणत्वात् । सहस्रदो गवां सुवर्णस्य वा । **स्कन्दसंवादेऽपि**–" अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च । ज्ञानयज्ञतपःसत्यतीर्थपूताः कुलान्विताः ॥ श्रोत्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः ।" इति । **वागीश्वरो याज्ञिकश्च पावनाः**–उच्यते सर्वमनयेति वाक् व्याकरणम् । ईश्वरशब्दः समर्थव्याख्यातृपरः । यज्ञं वेत्तीति याज्ञिकाः । क्रतूक्थादित्वाट्ठक् । पुनः पावनग्रहणं पङ्क्तिपावनेष्वपि पावनत्वज्ञापनार्थम् । तथा चोक्तम्–"यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम् । उभौ तौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ ॥" इति । चकारोऽन्यसमुच्चयार्थः । तथा च **बृहस्पतिः**–" यद्येकं भोजयेच्छ्राद्धे छन्दोगं तत्र भोजयेत् । ऋचो यजूंषि सामानि त्रितयं तत्र विद्यते ॥ अटेत पृथिवीं सर्वां सशैलवनकाननाम् । यदि लभ्येत पित्रर्थे साम्नामक्षरचिन्तकः ॥ ऋचाऽनुतृप्यति पिता यजुषा तु पितामहः । पितुः पितामहः साम्ना छन्दोगोऽभ्यधिको ह्यतः ॥" इति । अक्षरचिन्तकः सामविभागज्ञः । तथा च **गोभिलः**—"आमन्त्रिते जपेद्दोहान्नियुक्तस्त्वृषभाञ्जपेत् । अतीषङ्गांश्च तत्रैव जप्त्वाऽश्नीयात्समन्ततः ॥ भुक्त्वाऽऽचम्य पदस्तोभाञ्जपेत्तत्र समाहितः । गोसूक्तं चाश्वसूक्तं च इन्द्रसूक्तं च सामनी ॥ गीत्वाऽऽसीनः शुचौ देशे वामदेव्यं ततो जपेत् ॥ एवं सामभिराच्छन्नो तरत्समस्य यत्साम तच्च जप्त्वैकधीर्बुधः । भुञ्जानस्तु द्विजोत्तमः । श्राद्धभोजनदोषैश्च महद्भिर्नोपलिप्यते ॥ अन्यथैव हि भुञ्जानो हव्यकव्येष्वमन्त्रवित् । आत्मानमन्नं दातॄंश्च गमयत्यासुरीं गतिम् ॥" इति । आज्यदोहं विदोह इत्याद्या आज्यदोहाः **सुरूपकृत्नुमूतये,** ऋषभाः **स्त्रियः पुराजिती पिबा सोममिन्द्र, मन्दन्तु त्वा, स्वादोरित्था विषूवत** इत्यृगुत्पन्नानि सामानि **अर्मानवत्ते अद्रुह** इति अश्वान्तर्गदितासूत्पन्नानि सामानि **चान्धस** इति । **असर्जि कारथ्ये यथाजाविति** **धर्त्तादिवः पचते रथ्योत्तरस** इत्यादि ऋगुत्पन्नानि सामानि पदस्तोभाः । गोसूक्तानि सर्वसामअतीषङ्गाश्चत्वारः । एतोन्विन्द्रं स्तवामेत्यस्य गप्रसिद्धानि । अश्वसूक्तं प्रसिद्धम् । यदिन्द्राहं यदा त्वमस्यां गीतिभेदेनेन्द्रशुद्धे सामनी । कयानश्चित्र आभुवेत्यादि वामदेव्यम् । एवं सामभिराच्छन्नो रक्षितः श्राद्धदोषैर्न लिप्यते मन्त्रविदित्यर्थः । सामद्वयं तरत्समं दीधावतीत्येकम् । **नियोज्याभावेऽप्येकं वेदविदं पङ्क्तिमूर्धनि नियुञ्ज्यात्**–नियोज्याः पूर्वोक्ताः स्मृत्युक्ताश्च । तेषामभावेऽप्राप्तौ एकं वेदविदं वेदार्थज्ञमेव मुखपङ्क्त्यादौ नियुञ्ज्यादुपवेशयेत् । तेनैवेतरपङ्क्त्युपविष्टाः अमुख्याः पूता भवन्तीत्यर्थः । अथवा वेदविद्वेदपारगः । तल्लक्षणं च—"उत्पत्तिप्रलयौ चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स भवेद्वेदपारगः ॥" इति । अपिशब्दोऽभावेऽनुकल्पविशेषसमुच्चयार्थः । तथा **चापस्तम्बः**–ब्राह्मणान्भोजयेद्ब्रह्मविदो योनिगोत्रमन्त्रान्तेवास्यसंबन्धानिति । योनिसंबन्धा मातुलश्वशुरादयः । गोत्रसंबन्धाः सपिण्डसगोत्रादयः । मन्त्रसंबन्धा वेदमन्त्रादि अनुशिष्टाः । अन्तेवासिसंबन्धाः शिष्यानुशिष्यादयः । एवंविधसंबन्धरहितानभावे भोजयेदित्यर्थः । ननु चाभावेऽपि शिष्यानित्यत्रापिशब्देनानुकल्पः संगृहीतस्तत्कथं पुनरिहापिशब्देनानुकल्पविशेषाभिधानमिति । उच्यते—अनुकल्पेऽपि, विशिष्टविध्यर्थमित्यदोषः ।

तेन "मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुम् । दौहित्रं विट्पतिं बन्धुमृत्विग्याजौ च भोजयेत् ॥" इत्यत्र मन्वादिवचनेऽविशेषेण बन्धुमातुलशिष्याणामनुकल्प उक्तस्तत्र विशेषविधिः पुनरपिशब्देन गृहीत इत्यर्थः । तथा च **पाराशरः**--" पञ्चभिः पुरुषैर्युक्ता अश्राद्धेयाश्च गोत्रिणः । षड्भ्यस्तु परतः पुंभ्यः श्राद्धे भोज्याः स्वगोत्रिणः ॥" पञ्चभिर्युक्ताः पञ्चपुरुषपर्यन्तमश्राद्धेया इत्यन्वयः । मातुले तु **स्कन्दसंवादः**--" स्वसा हि मातुलसुता यस्तामुद्वहते द्विजः । गुरुतल्पग एवासौ स च स्यात्पङ्क्तिदूषकः ॥" इति । स चेति मातुलः । शिष्यस्त्वधनहारीति विशिष्टविधिरिति । श्वशुरस्वस्रीयादीनां गुणित्वे विधिर्निर्गुणत्वे योनिसंबन्धत्वेन निषेध इत्यविरोधः । नियोज्याभावे वेदविदेकेनैव सिद्धिरित्यत्र हेतुमाह--**आसहस्रात्पङ्क्तिं पुनातीति वचनात्**--यतः " सहस्रविप्रयुतां पङ्क्तिमेको वेदवित्पुनाति" इति । वचनम्, तस्मादेकमपि तादृशं पङ्क्तिमूर्धन्युपवेशयेदित्यर्थः । वचनं चात्र भवति—तेषामेकः पङ्क्तिमूर्धनि नियुक्तोऽवेदवित्सहस्रैरप्यपहतां पङ्क्तिं पुनातीति । " नित्यं योगपरो विद्वान् समलोष्टाश्मकाञ्चनः । ध्यानशीलो यतिः शान्तो ब्राह्मणः पङ्क्तिपावनः ॥" इति । वर्ज्यानाह **मनुः**—"ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः । तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् ॥ जटिलं चानधीयानं दुर्वालं कितवं तथा । याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत् ॥ चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा । विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः ॥ प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः । प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा ॥ यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः । ब्रह्मद्विट्परिवित्तिश्च गणाभ्यन्तर एव च ॥ कुशीलवोऽवकीर्णी च वृषलीपतिरेव च । पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ॥ भृतकाध्यापकश्चैव भृतकाध्यापितस्तथा । शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ ॥ अकारणपरित्यागी मातापित्रोर्गुरोस्तथा । ब्राह्मैर्यौनैश्च संबन्धैः संयोगं पतितैर्गतः ॥ अगारदाही गरदः कुण्डाशी सोमविक्रयी । समुद्रयायी बन्दी च तैलिकः कूटकारकः ॥ पित्रा विवदमानश्च केकरो मद्यपस्तथा । पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी ॥ धनुःशराणां कर्ता च यश्चाग्रेदिधिषूपतिः । मित्रध्रुग्द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च ॥ भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा । उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिन्दक एव च ॥ हस्तिगोश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति । पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ॥ स्रोतसां भेदकश्चैव तेषां चावरणे रतः । गृहसंवेशको दूतो वृक्षारोपक एव च ॥ श्वक्रीडी श्येनजीवी च कन्यादूषक एव च । हिंस्रो वृषलपुत्रश्च गणानां चैव याजकः ॥ आचारहीनः क्लीबश्च नित्यं याचनकस्तथा । कृषिजीवी शिल्पजीवी सद्भिर्निन्दित एव च ॥ औरभ्रको माहिषिकः परपूर्वापतिस्तथा । प्रेतनिर्यातकश्चैव वर्जनीयाः प्रयत्नतः ॥ एतान्विगर्हिताचारानश्राद्धेयान्नराधमान् । द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् ॥" इति । एषामर्थः—स्तेनो ब्रह्मस्वान्यद्रव्यहारी । तस्य पतितत्वेनोपादानात् । नास्तिका नास्ति कर्मफलमित्यभिमानिनस्तेभ्यो वृत्तिर्येषां ते । जटिलो ब्रह्मचारी । अनधीयानस्तद्विशेषणम् । अधीयानस्य श्राद्धेयत्वात् । दुर्वालः खल्वाटः कपिलकेशो वा । दुश्चर्मेति केचित् । कितवो द्यूतासक्तः । पूगयाजकाः गणयाजकाः । चिकित्सकाः भिषजः । देवलकाः धनार्थं देवार्चकाः । "देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम् । असौ देवलको नाम हव्यकव्येषु गर्हितः ॥" इति वचनात् । मांसविक्रयिण आपद्यपि, विपणेन च जीवन्त इत्यनेनैवानापदि निषेधसिद्धेः । प्रेष्यो धनार्थमादेशकारी । प्रतिरोद्धा विरोधी । त्यक्ताग्निर्विहितत्यागं विनैवोभयाग्नित्यागी । वार्धुषिर्द्रव्यवृद्ध्युपजीवी । यथा "समर्घं धान्यमुद्दिश्य महार्घं यः प्रयच्छति । स वै वार्धुषिको नाम" इति । यक्ष्मी क्षयी । पशुपालो नाम आपदि वृत्त्यर्थः । परिवेत्ता अकृतविवाहाधाने ज्येष्ठे भ्रातरि कृतदाराग्निसंग्रहः । निराकृतिरधीतनष्टवेदः । "अधीत्य विस्मृते वेदे भवेद्विप्रो निराकृतिः" इति देवलोक्तेः । "यस्त्वाधायाग्निमालस्याद्देवादीन्नैभिरिष्टवान् । निराकर्ताऽमरादीनां स विज्ञेयो निराकृतिः ॥" इति वा । ब्रह्मद्विट् ब्राह्मणद्वेषी । नानाजातीया अनियमवृत्तयो गणास्तन्मध्यवर्ती गणाभ्यन्तरः । ग्रामीण इति कश्चित् । कुशीलवो नटवृत्तिः । अवकीर्णी स्खलितब्रह्मचर्यः । वृषल्यनेकविधा तत्पतिः । तथा च—"वन्ध्या तु वृषली ज्ञेया वृषली च मृतप्रजा । चण्डाली च तृतीया च कुमारी याऽरजस्वला ॥" इति स्कन्दसंवादोक्तेः । यस्य गृहे भार्यायाः उपपतिर्जारः । वाग्दुष्टो निष्ठुरः । पुनर्भूरनेकविधा तत्पुत्रः पौनर्भवः । भृतको भृत्या परिक्रीतोऽध्यापकः । तेनैवाध्यापितश्च शिष्यः गुरुश्चेति शूद्रस्येत्यनुषङ्गः । अकारणमपातित्यं तेन पित्रोर्गुरोश्च त्यागी । ब्राह्मैरध्ययनाध्यापनैर्यौनैर्वैवाहिकैः संबन्धैः, पतितैः सावित्रीपतितैर्व्रात्यैश्च यः संयोगं गतः स विवक्षितः । गरदो विषदो विप्रादन्येषां तस्य दाने महापातकित्वेन संग्रहात् । कुण्डं षष्टिपलानि तावत्परिमितान्नभोजी ।

जारजान्नभक्षीत्यन्यः । समुद्रयायी नौकया । वन्दी स्तावकः । तैलिकस्तिलयन्त्रप्रवर्तको विप्रः । कूटकारको मानतुलाकूटकारी । पित्रा धनार्थं विवदमानः । केकरोऽध्यर्धदृष्टिर्वक्रदृष्टिरिति यावत् । मद्यपो द्राक्षादिमद्यपः । पापरोगी कुष्ठादिनिन्द्यरोगी । अभिशस्तो वाच्ययुक्तः । दाम्भिकः पाखण्डः कूटधर्मचारी । रसविक्रयी गुडलवणादिविक्रेता । अग्रेदिधिषूपतिर्ज्येष्ठायामनूढायां कनिष्ठोढा तत्पतिर्द्यूतवृत्तिर्जीवकः । पुत्राचार्योऽक्षरपाठकः । पुत्रानुशिष्ट इति केचित् । भ्रामरी भ्रमरवदर्थार्जकः । अपस्मारीति कश्चित् । गृहसंवेशको वार्धकिधर्मे वर्तमानः । मूल्यगृहकारीत्यन्यः । हस्तिगोश्वोष्ट्रदमको दमनेन जीवनः । नक्षत्रैर्ज्योतिषवृत्त्या जीवकः । युद्धाचार्यो युद्धोपदेष्टा तदुपायी । स्रोतसां भेदकः स्रोतोनिरोद्धा । तेषामाचरणे रतः । सेतुकृत् । दूतो दूत्यवृत्तिः । वृक्षारोपको वृत्त्यर्थम् । श्वक्रीडी श्वभिः क्रीडी । कन्यादूषकोऽमूल्यादिना योनिविदारकः । वृषलपुत्रो वृषल एव पुत्रोऽस्य नान्यः । क्लीबो धर्मोद्यमशून्यः । षण्ढस्योक्तत्वात् । सद्भिर्निन्दितोऽकारणेऽपि । अथवा कृषिजीविविशेषणम् । "चीर्णव्रता गुणैर्युक्ता भवेयुर्येऽपि कर्षकाः । सावित्रीज्ञाः क्रियावन्तस्ते राजन्के नराधमाः ॥" इति धार्मिककर्षकाभ्यनुज्ञानात् । औरभ्रिको मेषपोषकः । माहिषो महिषीपालः, व्यभिचारिणीपुत्रश्च । " महिषीत्युच्यते भार्या सा चैव व्यभिचारिणी । तस्यां यो जायते गर्भः स वै माहिषकः स्मृतः ॥" इति वचनात् । परपूर्वा प्रागन्यस्मै दत्ता तस्याः पतिः परिणेता । द्वितीयविवाहेन संस्कृतेभ्यः पौनरुक्त्यं पुनर्भ्वाः । प्रेतनिर्यातको मूल्येन प्रेतहारकः । अपाङ्क्तेयानित्येषां पङ्क्तावपि न भोक्तव्यमित्यर्थः । उभयत्रेति दैवे पित्र्ये । **यमोऽपि**—"काणाः कुब्जाश्च षण्ढाश्च कृतघ्ना गुरुतल्पगाः । ब्रह्मघ्नाश्च सुरापाश्च स्तेनगोघ्नाश्चिकित्सकाः ॥ राष्ट्रकामास्तथोन्मत्ताः पशुविक्रयिणश्च ये । मानकूटास्तुलाकूटाः शिल्पिनो ग्रामयाजकाः ॥ राजभृत्यान्धवधिरा मूकखल्वाटपुङ्गवाः । वणिजो मधुहर्तारो गरदा गृहदाहकाः ॥ समयानां च भेत्तारः प्रदाने ये निवारकाः । प्रव्रज्योपनिवृत्ताश्च वृथाप्रव्रजिताश्च ये ॥ यश्च प्रव्रजिताजातः प्रव्रज्यावसितश्च यः । समुद्रयायी वान्ताशी केशविक्रयिणश्च ये ॥ अवकीर्णी च वीरघ्नो गुरुघ्नः पितृदूषकः ।" इति । अस्यार्थः—गुरुतल्पगः " गुराजसुहृद्बन्धूत्तमाधमजनास्त्रियः । सुतास्वसृसखीर्गच्छन् गुरुतल्पग उच्यते ॥" इत्येवंलक्षणः । राष्ट्रकामो नृपधर्माभिलाषुकः । मानकूटा धान्यादिमानपात्रवञ्चकाः । मधुहर्तारो माक्षिकचोराः । प्रव्रज्योपनिवृत्ताः संन्यासिनः । वृथाप्रव्रजितः पुत्राननुत्पाद्यैव संन्यासी । प्रव्रज्यावसितो नवविधप्रत्यवसितोपलक्षकः । वान्ताशी भुक्तं वमित्वा लालसया पुनर्भोजी । केशविक्रयी चामरादिविक्रेता । वीरघ्नस्त्यक्ताग्निः पुत्रहा वा । अपाङ्क्तेयतः शासनाप्रदानान्मृतपुत्रस्य स्मृतिष्वदोषात् । **स्कन्दसंवादे**—"वर्जयेत्कुण्डगोलौ तु नास्तिकं रङ्गजीविनम् । जपहोमविरक्तं च शाकुनं राजसेवकम् ॥ चिकित्सकं गानकं च कितवं हेतुवादिनम् । वृथाऽऽमिषपरित्यागी वृथापाकरुचिर्द्विजो ॥ ब्राह्मणा ये विकर्मस्था बैडालव्रतिकाः शठाः । रोगहीनातिरिक्ताङ्गः क्रूरो धूर्तपुरोहितौ ॥ अनध्यायेष्वधीयानाः सूचकश्च नियामकः । स्त्रीजितश्च कदर्यश्च सुदूष्यश्चाहितुण्डकः ॥ ग्रामयाजी शूद्रयाजी वेदसोमोपजीविकः ।" इत्यादि । अस्यार्थः—कुण्डगोलौ प्रसिद्धौ । रङ्गजीवी वस्त्रादिरञ्जकः । शाकुनः पक्ष्युपजीवी । हेतुवादी तर्कबलेन सर्वत्र संशयकृत् । वृथेति श्राद्धादौ मांसत्यागी । एवं पाकरुचिः । विकर्मस्थो निषिद्धकर्मा । बैडालव्रतिकः पारिभाषिकः । तथा च "यस्य धर्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः ॥ प्रच्छन्नानि च पापानि बैडालं नाम तद्व्रतम् ॥" तदस्यास्तीति बैडालव्रतिको लोकदम्भक इत्यर्थः । तथा च "धर्मध्वजी सदालुब्धश्छाद्मिको लोकदाम्भिकः । बैडालव्रतिको ज्ञेयो हिंस्रः सर्वातिसंधकः ॥" इति । शठो वञ्चकः । अनध्यायेष्वपूर्वपाठी । सूचको राजकर्णेजपः । नियामको विवादद्रष्टा । कदर्यः पारिभाषिकः । यथा—"आत्मानं धर्मकृत्यं च पुत्रान्दारांश्च पीडयेत् । लोभाद्यः पितरो भृत्यान्स कदर्य इति स्मृतः ॥" इति । सुदूष्यः कुत्सिताचारः । आहितुण्डकः सर्पदन्तोत्पाटी । **वृद्धयाज्ञवल्क्योऽपि**—"सदासेवी च खल्वाटः कुप्रतिग्रहकारकः । अज्ञातकुलगोत्रो यो द्विर्नग्नः शिल्पिकर्मकृत् ॥ अव्रतानामुपाध्यायः काण्डपृष्ठैश्च ये द्विजाः । अयतिर्मोक्षवादी च चतुर्थाश्रमवर्जितः ॥ कुणपायुधजीवी च पुत्रप्रतिनिधिश्च यः । धर्माचारविहीना ये श्राद्धेष्वेतान्विवर्जयेत् ॥" अस्यार्थः—अव्रतानामुपाध्यायः इत्यक्षरादिशिक्षकः । काण्डपृष्ठो मातुलस्य सुतोद्वाही च विप्रोऽन्त्यश्राद्धजीविकः । "काण्डपृष्ठस्तु विज्ञेयः श्राद्धे यश्चात्ति नामिषम्" इत्युक्तः । तथा—"द्विजशायनिका ये च पुत्रप्रातिनिधिकास्तथा । सर्वे ते ह्यत्रिणा प्रोक्ताः [illegible] ॥" हारीतोऽपि—"शूद्रापुत्रश्च दत्तश्च ये तथा क्रीतकाः

सुताः । सर्वे ते **मनुना** प्रोक्ताः काण्डपृष्ठा द्विजाधमाः ॥" इति । अयतिर्गृहस्थः । मोक्षवादी मुक्तिवादे रतः । तथा च **ब्रह्माण्डे**–"श्राद्धार्हगुणयोगेऽपि नैते जातु कथंचन । निमन्त्रणीयाः श्राद्धेषु सम्यक्फलमभीप्सता" इति । अत्र श्राद्धार्हाः गुणा वेदाध्ययनादयः । शेषं स्मृतिभ्यो विज्ञेयामित्यलं प्रपञ्चेन ॥ इति श्राद्धकाशिकाया-मष्टमी कण्डिका ॥ ८ ॥

इति कृष्णमिश्रकृतौ श्राद्धकाशिकायां सूत्रवृत्तौ अक्षय्यतृप्तिप्रकरणम् ।

इत्थं श्राद्धोपयोगि सर्वमभिधायेदानीं गृहस्थस्य काम्यकर्मौचित्याच्छ्राद्धेषु काम्यकालानुपचिक्रंसुः सूत्र-मारभते–**अथ काम्यानि भवन्ति**–श्राद्धानीति शेषः । तत्राथशब्दः कार्त्स्न्यार्थः । न केवलं तिथय एव काम्यकालाः, किं त्वन्येऽपि स्मृत्युक्ता ज्ञेया इत्यर्थः । तथा च–"संक्रान्तिर्विषुवच्चैव विशेषेणायनद्वयम् । व्यतीपातो जन्मऋक्षं चन्द्रसूर्यग्रहौ तथा ॥ तिथिनक्षत्रवाराश्च उद्दिश्याभ्युदयं तथा । एतांस्तु श्राद्धकालान्वै काम्यानाह प्रजापतिः"इति । संक्रान्तिविषुवायनादित्यनयोः पुंण्यातिशयेन विशेषोपादानात् । व्यतीपातास्त्रिविधः–महाल्पनित्यभेदेन । तथा च–" सिंहस्थो गुरुभौमे च मेषस्थश्च रवौ सिता । द्वादशी हस्तसंयुक्ता व्यतीपातो महांस्तु सः ।।" अल्पस्तु " श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके । यद्यमा रविवारेण व्यतीपातः स उच्यते ।।" इत्युक्तेः । नित्यो नित्ययोगः । अभ्युदयः शरीरोपचयादिः । अन्येऽपि स्मृत्यन्तराद्योगा ज्ञातव्याः । एतेषु श्राद्ध-विधानं स्मृत्यन्तरेभ्य उपलब्धव्यम्, ग्रन्थगौरवभयान्नेह लिखितम् । ननु चाथशब्देन स्मृत्युक्तकालस्य संगृहीतत्वा-दत्र भाद्रपदीमारभ्य किमिति श्राद्धं सूत्रकृता बुद्धिस्थ एवेत्यविरोधः । तस्मात्पौर्णमास्यामेवोपक्रमः । श्राद्धषो-डश्यकस्येति प्रागुक्तम् । तथा च **वायुपुराणम्**–" पुष्टिं प्रजां स्मृतिं मेधां पुत्रानैश्वर्यमेव च । कुर्वाणः पौर्ण-मास्यां तु संपूर्णफलमश्नुते ॥ प्रतिपद्धनलाभायेत्युपक्रम्य "अमायां च प्रयत्नेन श्राद्धं कुर्याच्छुचिः सदा । सर्वान्कामानवाप्नोति स्वर्गस्थानं समश्नुते ।।" इति श्राद्धषोडशकं प्रतीतम् । प्रपञ्चितं चास्माभिरादिसूत्र इत्यलं पौनरुक्त्येनेति । फलानि तिथिष्वाह–**स्त्रियोऽप्रतिरूपाः प्रतिपदि**–श्राद्धकृल्लभत इति शेषः । अप्रतिरूपाः अद्वितीयरूपाः स्त्रियो भार्याः । एतच्च कामनान्तरोपलक्षणम् । तथा च **मनुः**–" कुर्वन्प्रतिपादि श्राद्धं सुरूपान् लभते सुतान्" इति । **वायुपुराणेऽपि**–" प्रतिपद्धनलाभाय लब्धं चास्य न नश्यति" इति कन्यामिति याज्ञव-ल्क्य इत्यादि । अत्रैतच्चिन्त्यते–मृतपितृको जीवन्मातामहः किं षट्पिण्डकं श्राद्धं कुर्यादुत त्रिपिण्डकमिति । अत्रैक आहुः–द्विपार्वणस्य विहितत्वाज्जीवन्मातामहमतिक्रम्यापि कुर्वीतेति । तथा च **मनुः**–" ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् । विप्रवद्वाऽपि तं श्राद्धे स्वकं पितरमाशयेत् ।। पिता यस्य तु वृत्तः स्याज्जीवेद्वाऽपि पितामहः । पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहम् ॥ पितामहो वा तच्छ्राद्धं भुञ्जीतेत्यब्रवीन्मनुः । " इति तदविचा-रितरमणीयम् । अस्य सार्धश्लोकद्वयस्य साग्नेरन्वाहार्यादिनियतश्राद्धविषयत्वात् । तथा च **निगमः**––यो वा जीवात्पितृणां तं पिण्डस्थान इत्येके । जीवतो जीवतां वा देयमिति **हिरण्यकेतुः** । कस्माद्यज्ञविधित्वाद्दर्शांगत्वा-दिति । नन्वेवं " जीवात्पितृकस्य होमान्तमनारम्भो वा " इति **कात्यायनेना**न्वाहार्यादिनिषेधात्कथमेवमिति । सत्यम्, **कात्यायनो**क्तेर्वाजसनेयिमात्रनिषेधविषयत्वादितरसाग्नीनां **मनुवचनैः** जीवदतिक्रमस्य विहितत्वात् । किं चार्थान्तरं सूत्रस्य । वाजसनेयिमात्रस्य पिता स्वांशे जीवति तदा होमान्तमनारम्भो वा विकल्पितः । यदि संन्यासी पतितो वा जीवति तदा वाजसनेयिनोऽपि जीवदतिक्रमः सूत्रकृतोऽभिप्रेत इति । तथा च **कात्यायनः**––" ब्राह्म-णादिहते ताते पतिते सङ्गवर्जिते । व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ " इति । किं च––" न जीवत्पि-तृकः कुर्याच्छ्राद्धमग्निमृते द्विजः । येभ्य एव पिता दद्यात्तेभ्यो दद्याच्च साग्निकः ॥" इत्यनेन साग्निजीवत्पितृकस्यै-वातिक्रमो विहितो न निरग्नेरिति । अपि च––" दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षकम् । न जीवत्पितृकः कुर्या-त्तिलैः कृष्णैश्च तर्पणम् " इत्यादौ पितृग्रहणं जीवन्मातामहाद्युपलक्षणत् । तेनापि जीवन्मातामहस्य निषेधः । अन्य-च्च––" उद्वाहे पुत्रजनने " इत्यत्रापि षड्ग्रहेणनापरपाक्षिकं न विहितम् । यत्तु, " जीवत्पितरि वै पुत्रः श्राद्धकालं विवर्जयेत् । येषां वाऽपि पिता दद्यात्तेषामेके प्रचक्षते ॥"इति **हारीतोक्तम्** । यच्च "पितुः पितृभ्यो वा दद्यात्सपितेत्य-परा श्रुतिः ।" इति **कात्यायना**दिभिरुक्तं तत्सपिण्डीकरणविषयमाभ्युदयिकम् । तथा च"वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति । येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥" इति । यमुनः–"पितरो यत्र पूज्यन्ते तत्र मातामहा

ध्रुवम् । अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत्'' इति । यच्च--" पिण्डाः स्युः षडिति स्थितिः'' इत्यादि-
वचनं वृद्धमातामहश्राद्धविधायकं तन्मातृवर्गद्वयविषयमित्यविरोधः । तस्माज्जीवन्मातामहकर्तुः पितृवर्गोद्देशेनैव
त्रिपिण्डकं श्राद्धमित्युचितम् । तथा च **स्मृतिः**–" पितृवर्गे मातृवर्गे तथा मातामहस्य च । जीवेत्स यदि वर्गादौ
तद्वर्गं तु परित्यजेत् ॥'' चशब्दो मातामहीसंग्रहार्थः । **प्रजापतिरपि**--"संक्रान्तावुपरागे च वर्षोत्सवमहालये ।
निर्वपेदत्र पिण्डांस्त्रीनिति प्राह प्रजापतिः'' इति । अत एव प्रातिकवर्गश्राद्धस्य त्रयोदश्यां निषेधः । "श्राद्धं नैकस्य
वर्गस्य त्रयोदश्यामुपक्रमेत् '' इति । एवमन्यपङ्क्तावपि । अत्र च "जीवेत्स यदि वर्गादौ'' इत्यनेन न
वर्गादावेव जीवतो नातिक्रमो न जीवत्पितामहादेरपीत्यर्थादुक्तम् । तेन मृतपितृको जीवत्पितामहादिकमतिक्र-
म्यापि दद्यादित्यर्थः । तस्मान्निरग्निजीवत्पितृकस्य सपिण्डनाभ्युदयिकश्राद्धयोरेव सर्वश्राद्धेषु जीवदतिक्रमेण श्राद्धं
नेतरत्रेति चतुरस्रम् । **द्वितीयायाः स्त्रीजन्म**–श्राद्धकर्तुः स्यादिति शेषः । स्त्रीजन्मेति कन्याजन्मेत्यर्थः ।
तथा च **मनुः**–" कन्यकां तु द्वितीयायाम्'' इति । उपलक्षणं चैतत् । तथा च **वायुपुराणम्**--" द्वितीयायां तु
यः कुर्याद्द्विपदाधिपतिर्भवेत् ॥'' **मार्कण्डेयोऽपि**--" द्वितीया हि प्रजाप्रदा'' इति । "कन्यावेदिनः'' इति
याज्ञवल्क्य इत्यादि । कन्यावेदी जामाता । अत्रैतच्चिन्त्यते--किमत्र पितामहादितिथौ पौत्रेण श्राद्धं कार्य-
मुत नेति । अत्रैके अधिकाराभावान्नेत्याहुः । तदयुक्तम् , विहितत्वात् । तथा च स्वल्पमात्स्यम्--"नान्दी-
मुखानां प्रत्यब्दं कन्याराशिगते रवौ । पौर्णमास्यां च कर्तव्यं वाराहवचनं यथा'' इति । नान्दीमुखाः पिताम-
हादयः । चकारादन्यतिथावपि । तथा च **वृद्धयाज्ञवल्क्यः**--" कुहूपूर्णेन्दुपञ्चम्यां यः श्राद्धं कुरुते
नरः । कामिकं तु वरं पुत्रं लभते नात्र संशयः ॥'' तथा--"काङ्क्षन्ति पुत्रपौत्रेभ्यः पायसं मधुसंयुतम् ।
तस्मात्रींस्तत्र विधिना तर्पयेत्पायसेन तु ॥'' इति । पूर्णेन्दुप्रौष्ठपदी । अयं तु विशेषः--पितृपूर्वकमिति ।
अश्वास्तृतीयायाम्–श्राद्धकर्तुरिति शेषः । उपलक्षणं चैतत् । तथा च **मनुः**--"तृतीयायां सम्बन्धिनः'' इति ।
वायुपुराणेऽपि--" वरार्थिनां तृतीया च शत्रुघ्नी पापनाशिनी'' इति। अत्रैतदुच्यते-भरण्यादावत्र किमपिण्डकं स्यादुत
नेति । तत्र निषेधादपिण्डकमित्येके । तन्न, तिथिनिमित्तकत्वात् । तथा च ऋक्षयोगादिषूक्तोऽपि तद्दिने पिण्ड-
पातनम् ।'' तथा--"तिथिनक्षत्रयोगेषु प्राधान्यं तु तिथेः स्मृतम् । तिथिमूलानि सर्वाणि यथा द्रव्ये गुणादिकम् ''
इति । यत्तु भरण्यादौ तन्निषेधः स नक्षत्रादिनिमित्तकविषयः । प्रपञ्चितं चैतदादिसूत्रे । **चतुर्थ्यां क्षुद्रपशवः**–
कर्तुः स्युरिति शेषः । क्षुद्रा अजादयः । उपलक्षणं चैतत् । तथा च वायुः–" श्राद्धं चतुर्थ्यां कुर्वाणः शत्रो-
श्छिद्राणि पश्यति '' इत्यादि । अत्रैतच्चिन्त्यते--किमत्र मातृतिथौ मातृश्राद्धं पृथक् स्यादुत नेति । तत्रैक
आहुः--" अन्वष्टका च वृद्धौ च गयायां च क्षयेऽहनि । मातृश्राद्धं पृथक्कुर्यादन्यत्र पतिना सह'' इत्यादिवच-
नेभ्यो न पृथगिति । तन्नोचितम्, पृथक्श्राद्धस्य वाचनिकत्वात्प्रेतपक्षतिथेर्विहितत्वाच्च । तथा **हेमाद्रिपद्धतौ**–
" अन्वष्टकासु वृद्धौ च प्रतिसंवत्सरं तथा । महालये गयायां च सपिण्डीकरणात्पुरा ॥ मातुः श्राद्धं पृथक्कु-
र्यादन्यत्र पतिना सह '' इति । **स्मृतिरपि**–" महालये गयाश्राद्धे वृद्धावन्वष्टकासु च । नवदैवतमत्र-
स्याच्छेषं षाट्पौरुषं विदुः ॥ **चतुर्विंशतिमतेऽपि**–" सर्वेभ्यश्च पितृभ्यश्च तत्पत्नीभ्यस्तथैव च । पिण्डांस्तेभ्यः
पृथग्दद्यात्सदा भाद्रपदे द्विजः ॥'' इति । **स्मृतिसमुच्चयेऽपि**–" पृथक्श्राद्धं तु मातॄणां प्रकर्तव्यं विचक्षणैः ।
नवम्यां पितृपक्षे तु वृद्धौ तीर्थे महालये ॥'' **स्मृत्यर्थसारेऽपि**–तत्र मातुः श्राद्धं पृथक् शस्तमिति । **रेणुरपि**-
" मातुर्गयाष्टकौ वृद्धौ मृताहे च महालये । तैश्च श्राद्धं पृथग्देयं तन्त्रं वानुगता यदि'' इति । अयं विशेषः--
मृते पितरि मूर्धकं जीवितु मृतवर्गस्यैवेति । पृथक्श्राद्धं जीवत्पितृकस्य नेत्येके । नवमीविषयमेवेत्यन्ये ।
पुत्राः पञ्चम्याम्–कर्तुः स्युरिति शेषः । पुत्रशब्दः पुन्नामनरकत्राणहेतुः । पूर्णातिथित्वात् । तथा च **मनुः**–
" पञ्चम्यां शोभनान्सुतान्'' इति । उपलक्षणं चैतत् । तथा च **वायुः**--" पञ्चम्यां चैव कुर्वाणः प्राप्नोति महतीं
श्रियम् ।'' **मार्कण्डेयोऽपि**--"श्रियं प्राप्नोति पञ्चम्याम्'' इति । अत्रैके मातुः क्षयाहे पार्वणं स्यादित्याहुः । तथा च
वृद्धयाज्ञवल्क्यः—"पितृपक्षे त्वमायां वा पितृमातृक्षयो यदि । पितुस्तु पार्वणं कुर्यादेकोद्दिष्टं तु मातृकम् ॥''
तथा—"पितुस्तु पार्वणं कुर्यात्प्रेतपक्षे मृतस्य तु । पितृव्यभ्रातृमातॄणामेकोद्दिष्टं सदैव हि ॥ प्रेतपक्षे तिथिर्यस्य
पितुरेकस्य पार्वणम् । मातृश्राद्धं पितृव्याणामेकोद्दिष्टं सदैव हि'' इत्यादिवचनेभ्यः । तदयुक्तम् । एकोद्दिष्टस्य सापत्न-

मातृविषयत्वेनाविरोधात् । तथा च **पुराणसमुच्चये**—“अमायां वा क्षयो यस्य प्रेतपक्षे तथा भवेत् । निरग्निरपि कुर्वीत मातापित्रोस्तु पार्वणम् ॥ अनग्निः पार्वणं यो न मातापित्रोः क्षयेऽहनि । करोति बुद्धिमोहेन स भवेत्पितृघातकः ॥” **जमदग्निरपि**—“आपाद्य सहपिण्डत्वमौरसो विधिवत्सुतः । कुर्वीत दर्शवच्छ्राद्धं मातापित्रोः क्षयेऽहनि ॥” **गौतमोऽपि**—“आषाढ्याः पञ्चमे पक्षे प्रेताख्ये तु क्षयो यदि । पार्वणं तत्र कुर्वीत वर्जयित्वा चतुर्दशीम् ॥” **हेमाद्रावपि**—“सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणम् । पितृव्यभ्रातृमातॄणामेकोद्दिष्टं सदैव हि ॥” इत्यलं बहुना । **षष्ठ्यां द्यूतर्द्धिः**—कर्तुः स्यादिति शेषः । ऋद्धिर्द्यूतविजयः । उपलक्षणं चैतत् । तथा च **वायुः**—“षष्ठ्यां श्राद्धं तु कुर्वाणो द्विजांस्तान्पूजयन्ति हि ।” **मार्कण्डेयोऽपि**—“षष्ठ्यां पूज्यो भवेन्नरः” इति । अत्र विशेषः **पुराणसमुच्चयेऽपि**—“एकमातृद्विपितृकौ भ्रातरावन्यगोत्रजौ । मातुः श्राद्धं तु कुर्यातां षष्ठ्यां पुत्रावुभावपि ॥” **स्मृतिसमुच्चयेऽपि**—देयं श्राद्धं तु षष्ठ्यां तैर्ये द्विरंशायनाः सुताः । क्षेत्रिणश्च पितुश्चादौ दद्युः पश्चात्तु बीजिनः ॥” अनेकमातृकस्य विशेषो **गालवेनोक्तः**—“अनेका मातरो यस्य श्राद्धे चापरपक्षिके । अर्घदानं पृथक्कुर्यात्पिण्डमेकं स निर्वपेत् ॥” इति । **कृषिः सप्तम्याम्**—कर्तुः स्यादिति शेषः । उपलक्षणं चैतत् । तथा च **वायुः**—“कुरुते यस्तु सप्तम्यां श्राद्धानि सततं नरः । महामन्त्रमवाप्नोति गणानां चाधिपो भवेत् ॥” **मार्कण्डेयोऽपि**—गणाधिपत्यं सप्तम्यामिति । अत्रैतच्चिन्त्यते—रजस्वलायां पत्न्यामत्र श्राद्धं कार्यं न वा तत्रैक आहुः—नेति । तथा च—“श्राद्धीयाहानि संप्राप्ते यस्य भार्या रजस्वला । श्राद्धं तत्र न कर्तव्यं कर्तव्यं पञ्चमेऽहनि ॥” इति । तन्न, अस्य मृताहेऽपुत्रपत्न्याः स्वयंकर्तृत्वनिषेधात् । तथाच **गौतमः**—“अपुत्रा तु यदा भार्या संप्राप्ते भर्तुराब्दिके । रजस्वला भवेत्सा तु कुर्यात्तत्पञ्चमेऽहनि ॥” इति । **वाणिज्यमष्टम्याम्**—कर्तुः स्यादिति शेषः । वाणिज्यशब्देन यथा वणिजोऽनेकलाभस्तथाऽष्टमीश्राद्धेनानेकफलमित्यर्थः । तथा च **वायुः**—“संपूर्णां वृद्धिमाप्नोति योऽष्टम्यां कुरुते नरः ।” **मार्कण्डेयोऽपि**—“अष्टम्यां वृद्धिमुत्तमाम्” इति । उपलक्षणं चैतत्—तेन गयाफलमपीत्यर्थः । तथा च **ब्रह्माण्डे**—“आषाढ्याः पञ्चमे पक्षे गयामध्याष्टमी स्मृता । त्रयोदशी गजच्छाया गयातुल्यं तु पैतृकम् ॥” इति । अत्रैतदुच्यते—किमपरपाक्षिकं श्राद्धं सूतकान्ते स्यादुत नेति । तत्रैक आहुः—“मासिकेऽब्दे तु संप्राप्ते अन्तरा मृतसूतके । वदन्ति शुद्धौ तत्कार्यं दर्शे वाऽपि विचक्षणाः ॥” इत्यादिवचनान्मासिकाब्दिकयोरेवाशौचान्ते विहितत्वादापरपाक्षिकं नेति । तदयुक्तम्, अस्यापि विहितत्वात् । तथा च **पुराणसमुच्चये**—“पक्षश्राद्धे समारब्धे सूतकं निपतेद्यदि । समाहूता हि पितरः सूतकान्ते विसर्जयेत् ॥ यदि नैवं नरः कुर्यात्सूतकान्ते क्षमापनम् । प्राग्दत्तानि मनुष्येण श्राद्धान्यासुरतृप्तये ॥” इति । पक्षश्राद्धमित्यापरपक्षिकोपलक्षणम् । **ऋष्यशृङ्गोऽपि**—“शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते । सा तिथिस्तस्य कर्तव्या न त्वन्या वै कदाचन ॥” इति । **एकशफं नवम्याम्**—कर्तुः स्यादिति शेषः । एकशफा अश्ववेसरादयस्तेषां वृन्दमेकशफसमूहः । उपलक्षणं चैतत् । तथा च **वायुः**—“श्राद्धं नवम्यां कर्तव्यमैश्वर्यं स्त्रीषु काङ्क्षता” इति “स्त्रियो नवम्यां प्राप्नोति” इति **मार्कण्डेयः** । अत्रैतत्संदिह्यते—जीवत्पितृकः किं मातृश्राद्धं नवम्यां कुर्यादुत नेति । तत्रैक आहुः—“अमाश्राद्धं गयाश्राद्धं श्राद्धं चापरपाक्षिकम् । न जीवत्पितृकः कुर्यात् पितृहा ह्युपजायते ॥” इत्यादिवचनान्निराग्नेर्नेति । अन्ये त्वाहुः—आन्वष्टक्यस्य विहितत्वात् कुर्वीतेति । तदेतद्विचारणीयम् । ‘न जीवत्पितृकः’ इत्यत्र जीवत्पितृकशब्देन किं मुख्यया जीवत्पितृमात्रविवक्षयाऽपरपाक्षिकश्राद्धस्यैव निषेध आहोस्विज्जीवत्पितृकशब्देन जीवन्मातामहाद्युपलक्षकेन जीवद्वर्गश्राद्धनिषेधः । तत्र यदि जीवत्पितारि मुख्याधिकारिणो दानाभावाच्छ्राद्धमात्रस्यैव निषेध इत्युच्यते तदा “जीवेत्स यदि वर्गादौ तद्वर्गं तु परित्यजेत्” इत्यस्य मृतवर्गश्राद्धविधायकस्य वैयर्थ्यं स्यादन्यत्र क्षयाहेऽपि पितृमातृश्राद्धस्याकरणप्रसङ्गश्च स्यात् । अथ क्षयाहत्वेन तत्कर्तव्यं तर्हि मृतवर्गविधायकवचनस्य वैयर्थ्यं तदवस्थमेव । यदि जीवत्पितृकशब्देन जीवद्वर्गश्राद्धनिषेध इत्युच्यते, तर्हि मृतमातृके सदाचारप्राप्ताकरणस्य परित्यागः स्यादिति तस्मात्कथमत्र समाधिः । उच्यते—यद्यपि—“धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः । द्वितीयं धर्मशास्त्रं तु तृतीयं लोकसंग्रहः ॥” इति । **पराशरेण** लोकसंग्रहस्य प्रामाण्यमुक्तम् । तथाऽपि स्मृतिसदाचारयोर्विरोधे श्रुतिविरोधं विना स्मृतिबाधस्यान्याय्यत्वात् स्मृतिविरुद्धाचारस्य बाधो न्याय्य इत्युक्तम् । तथा च **चतुर्विंशतिमतम्**—“स्मृतिर्वेदाविरोधेन परित्याज्या यथा भवेत् । तथैव लौकिकं वाक्यं स्मृतिबाधात्परित्यजेत् ॥” **वसिष्ठोऽपि**—“श्रुतिस्मृतिविहितो धर्मस्तदविरोधे शिष्टाचारः प्रमाणम् ।” इति ।

तस्मात्सर्वोऽपि जीवत्पितृको मृतमातृवर्गो नवमश्राद्धं कुर्यादित्यर्थः । तथा वचनमपि—''आन्वष्टक्यं गयाप्राप्तौ सत्यां यच्च मृतेऽहनि । मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति ॥'' गयाप्राप्तिः प्रासङ्गिकी न तूद्देशतः । न चैवं मन्वाद्यादौ सर्वत्र जीवत्पितृकः कुर्यादिति वाच्यम्, अन्वष्टकादिकालत्रयस्यैव विशेषविधेरितरत्र निषेधसिद्धेः । यत्त्वन्वष्टकासु नवभिः पिण्डैः श्राद्धमुदाहृतमिति नवदैवत्यमुक्तम्, तत्साग्नेरन्वष्टकात्रयविषयम् । जीवन्मातामहीविषयं वा । नवम्यां त्रिपिण्डकादिनिवारकं वा । अतश्चात्र त्रिदैवत्यादिकं यथाऽधिकारं कर्तव्यमिति सिद्धम् । अन्यथा जीवत्पितृकोऽत्र क्षयाहादिकं कुर्यान्मृतमातृको नवम्यां नेत्यनुचितापत्तेः । एवमेकादशाहादावपि नियतश्राद्धेष्ववगन्तव्यमिति सर्वं समञ्जसम् । द्वादशदैवत्यं चात्र प्रपञ्चितमस्माभिरादिसूत्र इति नात्र पुनरुक्तम् । निमित्तबहुत्वे त्वत्र प्रतिनिमित्तं श्राद्धानि कुर्यात् । तथा च **कात्यायनः**–''द्वे बहूनि निमित्तानि जायेरन्नेकवासरे । नैमित्तिकानि कार्याणि निमित्तोत्पत्त्यनुक्रमात् ॥'' यत्तु–''नैकः श्राद्धद्वयं कुर्यात्समानेऽहनि कुत्रचित्'' इति **प्रचेतसोक्तो** निषेधः स एकनिमित्तेनैव पुनः करणविषयः । तथा च **जाबालः**–''श्राद्धं कृत्वा तु तत्रैव पुनः श्राद्धं न तद्दिने। नैमित्तिकं तु कर्तव्यं निमित्तानां क्रमेण तु॥'' इति । **दशम्यां गावः**–गाव इति द्विशफाद्युपलक्षणम् । तथा च **मनुः**–''दशम्यां द्विखुरं बहु ।'' **वायुरपि**–''कुर्वन्दशम्यां तु नरो ब्राह्मीं श्रियमवाप्नुयात्'' इति । अत्र गवां सर्वसंपत्तिमूलत्वात्ताद्विधानेन दशम्यां प्राशस्त्यं सूचितम् । तथा च **पुराणसमुच्चये**–''प्रशस्ताः पूर्णिमामुख्यास्तिथयः षोडशैव ताः । तासां श्रेष्ठतमा प्रोक्ता दशमी श्राद्धदायिनाम्'' इति । ''दशम्यां पूर्णकामताम्'' इति **मार्कण्डेयः** । गवां संपत्तिमूलत्वाच्छ्रुतिराह–''गौर्वा इदꣳ सर्वं बिभर्त्ति'' इति । दुग्धाज्यादिना देवादितृप्तेरित्यर्थः । तदुक्तम्—''अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपातिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥'' इति । अत्रैतदुच्यते, पार्वणैकोद्दिष्टयोरेकदिनसंभवे किं पार्वणं पूर्वं कर्तव्यमुतैकोद्दिष्टमिति । तत्रैक आहुः–''यद्येकत्र भवेत्तावदेकोद्दिष्टं तु पार्वणम् । पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं समाचरेत्'' इति **जाबालोक्तत्वात्**पूर्वं पार्वणमिति । तन्न, पाठादर्थस्य बलवत्त्वात् । अतश्चैकोद्दिष्टं निर्वर्त्य पार्वणं समाचरेदिति तत्रान्वयः । तथाच **वृद्धयाज्ञवल्क्यः**–''ऐकाहिके समुत्पन्ने पार्वणे च क्षयाहिके । प्राक् क्षयाहं प्रकुर्वीत पश्चात्पाकेन पार्वणम् ॥'' अन्यच्च–''दर्शे क्षयाह आपन्ने कथं कुर्वन्ति याज्ञिकाः । पूर्वं क्षयाहं निर्वर्त्य पश्चाद्दर्शं समाचरेत् ॥'' अथवा पार्वणस्य पूर्वमुक्तिः पित्रोः पार्वणविषया । एकोद्दिष्टस्य पश्चादुक्तिः सापिण्डैकोद्दिष्टविषयेति युक्तमेव । न चैकपाकेन श्राद्धद्वयमाशङ्कनीयम् । ''एकपाकेन यः कुर्यादेकोद्दिष्टं च पार्वणम् । स भवेद्ग्राम्यवाराहो विष्ठाशी सप्तजन्मसु ॥'' इति तेनैवोक्तत्वात् । **परिचारका एकादश्याम्**–भयन्तीति शेषः । परिचारका दासाद्यनुजीविनः । उपलक्षणं चैतत् । तथा च **मनुः**–''एकादश्यां तथा रूप्यं ब्रह्मवर्चस्विनः सुतान्''इति । **वायुरपि**–वेदांश्चैवाप्नुयात्सर्वान्विप्राणां संपदं तथा । एकादश्यां परं स्थानमैश्वर्यं सन्ततिं तथा ॥'' इति । अत्रैतच्चिन्त्यते–अपुत्रादीनामेकोद्दिष्टेऽत्र किं तिथिनियमोऽस्ति न वा इति । तत्रैक आहुः–'' संबन्धिबान्धवादीनामेकोद्दिष्टं सदैव हि । अपुत्रा ये मृताः केचित्पुरुषा वा स्त्रियोऽपि वा ॥ तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणम् सपिण्डीकरणादूर्ध्वं यत्र यत्र प्रमीयते ॥ भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च । मित्राय गुरवे श्राद्धमेकोद्दिष्टं महालये ॥'' इति **कात्यायनापस्तम्बादिवचनं** महालये यत्र तत्रापीति । तदयुक्तम्, तिथिनियमस्योक्तत्वात् । तथा च **पुराणसमुच्चये**--अपुत्राणां च बन्धूनामृत्विगाचार्ययोर्गुरोः । एकोद्दिष्टं सदा कार्यं पितृपक्षे विशेषतः ॥ न पार्वणेऽधिकारोऽस्ति येषां कन्यागते रवौ । एकादश्यां तु कृष्णायां तेषां श्राद्धं समाचरेत् ॥'' अन्यच्च–'' एकादश्यां न कुर्वीत एकोद्दिष्टानि कृत्स्नशः । यद्वा द्विदैवतो विष्णुः पितृवर्गस्य नित्यशः ॥'' **वृद्धशातातपोऽपि**-''पितृष्वसृमातृष्वसृपितृव्यभ्रातृमातुलैः । अनपत्यासु भार्यासु एकोद्दिष्टं समाचरेत् ॥ मातुलो भागिनेयश्च स्वस्रीयो भ्रातृजस्तथा । श्वशुरश्च गुरुश्चैव सखा मातामहस्तथा ॥ एतेषां चैव भार्याणां स्वसुर्मातुः पितुस्तथा । श्राद्धमात्रं तु कर्तव्यामिति वेदविदां स्थितिः ॥'' इति । भागिनेयः पितृव्यपुत्रीपुत्र इत्यपौनरुक्त्यम् । मातामहः सपत्नमातृपिता । साग्नेरप्यत्रैकोद्दिष्टमेव । तथा च **पुराणसमुच्चये**-'' अग्निमन्तो द्विजा ये तु तेषां कन्यागते रवौ । पितृव्यभ्रातृबन्धूनामेकोद्दिष्टं प्रशस्यते ॥'' इति । **'धनं धान्यं पुत्रपशून् हिरण्यं द्वादश्याम्**–' कर्तुः स्यादिति शेषः । धनं रजतादि । तथा च **मनुः**-'' द्वादश्यां जातरूपं तु

रजतं कुप्यमेव च'' इति । उपलक्षणं चैतत्--तथा च **वायुः**–"द्वादश्यां जनलाभं च राज्यमाहुर्वसूनि च'' इति । अत्रैतदुच्यते--दैववशात्पित्रोः क्षयाहैक्ये कथं क्रम इति । तत्र **कार्ष्णाजिनिः**--" पित्रोः श्राद्धे समं प्राप्ते नवे पर्युषितेऽपि वा । पितृपूर्वं सुतः कुर्यादन्यत्रासन्नियोगतः ।। अन्यत्र सपिण्डश्राद्धेषु आसत्तिः संबन्धासत्तिः संबन्धनैकट्यक्रमेणेत्यर्थः।तथा च **ऋष्यश्रृङ्गः**—"भवेद्यदि सपिण्डानां तन्त्रेण श्रपणं तथा । संबन्धासत्तिमालोच्य तत्क्रमाच्छ्राद्धमाचरेत्''इति । ननु च पित्रोः क्षयाहैक्ये किमेकपाकेनोत पृथक्पाकेन श्राद्धद्वयमिति । तत्रैके एककाले गतासूनां बहूनामथवा द्वयोरित्यादिना एकपाकेनेत्याहुः । तदयुक्तम्,तस्य एकदैवेति कालविषयत्वात् । अन्यदैकदिने तु पृथग्विधः । तथा च **पठन्ति**–"मातापितृमृताहैक्यं कालेनापि भवेद्यदि । पृथक्पाकं पितृश्राद्धं मातुश्च तदनन्तरम् ।।'' इति । सपिण्डानां तु **नृसिंहपुराणे**—"एकेनैव तु पाकेन सापिण्डानां महालये । तन्त्रेण श्रपणं कुर्याच्छ्राद्धं कुर्यात् पृथक् पृथक् ।।'' **विष्णुधर्मोत्तरे** च—"प्रेतपक्षे गयायां च गतासूनां समेऽहनि । तन्त्रेण श्रपणं कुर्याच्छ्राद्धं दद्यात्पृथक् पृथक्।।'' इति । **कुप्यं ज्ञातिश्रैष्ठ्यं च त्रयोदश्याम्**–कर्तुः स्यादिति । कुप्यं हेमरजताभ्यामन्यधातुजम् । उपलक्षणं चैतत्।तथा च **मार्कण्डेयः**—"प्रजां मेधां पशुं पुष्टिं स्वातन्त्र्यं वृद्धिमुत्तमाम् । दीर्घमायुरथैश्वर्यं कुर्वाणस्तु त्रयोदशीम्'' इति । ननु च—"त्रयोदश्यां कृष्णपक्षे यः श्राद्धं कुरुते नरः । पञ्चत्वं तस्य जानीयाज्ज्येष्ठपुत्रस्य निश्चितम् ।।'' इति अङ्गिरसा श्राद्धस्यैव प्रतिषिद्धत्वात्कथं फलश्रुतिरीति । उच्यते—तस्यैकवर्गश्राद्धविषयत्वात् इत्यदोषः । तथा च **कार्ष्णाजिनिः**—"श्राद्धं नैकस्य वर्गस्य त्रयोदश्यामुपक्रमेत् । अतृप्ता अस्य येऽत्र स्युः प्रजां हिंसन्ति तत्र ते ।।'' इति । अत्रैतच्चिन्त्यते-किमनुगमनमृतानां स्वमृताहे श्राद्धं स्यादुत भर्तृमृताहे इति । तत्रैक आहुः—"मासक्षयतिथिस्पृष्टे यस्मिन् यो म्रियतेऽहनि । प्रत्यब्दं तत्तथाभूतं क्षयाहं तस्य तद्विदुः।।'' इत्यादिवचनात्स्वमृताह एवेति । तदयुक्तं, भर्तृक्षयाहे विहितत्वात् । तथा च **पुराणसमुच्चये**—"अग्रतः पृष्ठतो वाऽपि तद्भक्त्या म्रियते तु या । तस्याः श्राद्धं प्रदातव्यं भर्तुरेव क्षयेऽहनि ।।''**रेणुरपि**–"एकाचित्यां समारूढा द्वितीयेऽह्नि पतिव्रता । तस्याः पिण्डोदकं पुत्रः प्रकुर्यात्पितृवासरे ।।'' पठन्ति च–"प्रत्यक्षे वा परोक्षे वा तद्भक्त्या म्रियते तु या । तस्याः श्राद्धं प्रकुर्वीत भर्तुरेव क्षयेऽहनि ।।'' अत्रैतत्संदिह्यते–भर्तृक्षयाहे किं तस्याः पृथक्पिण्ड उतैकपिण्डे द्वयोरुद्देशः । तत्र **लौगाक्षिः**--" मृताहनि समासेन पिण्डनिर्वपणं पृथक् । नवश्राद्धं तु दम्पत्योरन्वारोहण एव तु ।।'' अस्यार्थः--दम्पत्योरन्वारोहणे मृताहे समासेन पिण्डनिर्वपणम् । नवश्राद्धं पृथगित्यन्वयः । नवश्राद्धं श्राद्धषोडशोपलक्षणम् । समासः पाकाद्यैक्यम् । तुशब्दो विशेषे । ततश्च दम्पत्योरेकचित्यन्वारोहणे षोडशश्राद्धेष्वेव पृथक्पृथक्पाकैः पिण्डौ, अन्यत्र पाकैक्येनैकपिण्डे द्वयोरुद्देशः । मृततिथौ भिन्ने त्वाब्दिकप्रेतश्राद्धयोः पृथक्पिण्ड एवेति । निश्चितमेतदित्येवशब्दार्थः । तथा च--" एकचित्यां समारूढौ दम्पती निधनं गतौ । पृथक् श्राद्धं तयोः कुर्यादोदनं च पृथक् पृथक्'' इति । तथा--" एकचित्यधिरोहे च तिथिरेकैव जायते । एकपाकेनैकपिण्डे द्वयोर्गृण्हीत नामनी ।।'' इति देशकालद्रव्यदेवकर्त्रैक्ये तान्त्रिको विधिरिति च । अत्रैके भर्तुः क्षयाहे सर्वासामेव पृथक्पिण्ड इत्याहुः । तन्न, तस्य पतिव्रताविषयत्वात् । तथा च **भृगुः**--"या समारोहणं कुर्याद्भर्तुश्चित्यां पतिव्रता । तां मृताहनि संप्राप्ते पृथक्पिण्डे नियोजयेत् ।। प्रत्यब्दं च नवश्राद्धं युगपत्तु समापयेत् ।'' अपि च **पुराणसमुच्चये**--" या काचिन्म्रियते नारी पत्या सह पतिव्रता । तस्याः श्राद्धं पृथक्कुर्यादेकोद्दिष्टं विधानतः ।।'' विधानत इति युगपत्समापयेदिति च । भर्तुः क्षयाहे पूर्वं भर्तृद्विजोपवेशनं पश्चात् स्त्रिया इत्येवं क्रमेणैकदैव सर्वं श्राद्धमित्यर्थः । पतिव्रतात्वात् । तथा–" अथ केचिन्न चेच्छन्ति पृथक् श्राद्धं तु योषिताम् । वदन्ति पतिना सार्धं मूढास्ते मे मतेन तु ।। सपिण्डीकरणादूर्ध्वं पृथक्त्वं न विधीयते । ते बालिशा न तेषां वै ग्राह्यं वाक्यमजानताम् ।। पृथक् श्राद्धं च मातॄणां कर्तव्यं वा प्रदक्षिणम्।।'' इति । पठन्ति च--"परदेशे मृतो भर्ता श्रुत्वा नारी पतिव्रता । तिथिरेका विशुद्धौ स्यात्पिण्डं दद्यात्पृथक्पृथक्।।'' इति । अत्र विशेषः-अनेकस्त्रीभिरनेकभृत्यैर्वा स्वामिना सह स्नेहान्मरणे पाकैक्येन स्वामिगोत्रेण वा पृथक्पिण्डदानं कर्तव्यम्।तथा च **पुराणसमुच्चये**--"मृतानामथ भृत्यानां भार्याणां पतिना सह । तन्त्रेण श्रपणं कृत्वा श्राद्धं स्वामिक्षयेऽहनि ।। श्राद्धं पृथक्पृथक्कुर्यात्स्वामिगोत्रेण कृत्स्नशः । स्वामिचित्यवरोहेण भृत्यो भ्रश्येत् स्वगोत्रतः ।।'' इति । **भृगुरपि**—"एककालगतासूनां बहूनामथवा द्वयोः । तन्त्रेण श्रपणं कृत्वा श्राद्धं कुर्यात्पृथक्पृथक् ।। पूर्वंकस्य मृतस्यादौ द्वितीयस्य ततः पुनः । तृतीयस्य ततः कुर्यात्संनिपातेष्वयं क्रमः ।।'' पूर्वंकस्य मृतस्येति ज्येष्ठानुक्रमेण लघूनामुत्तमाधमक्रमेणेत्यर्थः । यत्त्वेकचित्यां समा-

रूढी चेति वचने पृथक्पिण्डदानमुक्तं तदेकपतिव्रतास्त्रीविषयमित्यविरोधः **स्मृत्यर्थसारे**—सहदहने तु पिण्डश्राद्धादौ पाकैक्यं कालैक्यं कर्त्रैक्यमिति । **युवानस्तत्र म्रियन्ते शस्त्रहताश्चतुर्दश्याम्**—युवानो ये म्रियन्ते ते शस्त्रहताश्च तत्रापरपक्षे चतुर्दश्यामेकोद्दिष्टं प्राप्नुवन्तीत्यर्थः । तथा च **स्मृतिचन्द्रिकायां**--"चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणे कृते । एकोद्दिष्टविधानेन तत्कुर्याच्छस्त्रघातिनः ॥" इत्यादि । **मार्कण्डेयोऽपि**—"युवानः पितरो यस्य मृताः शस्त्रेण वा हताः । तेन कार्यं चतुर्दश्यां तेषामृद्धिमभीप्सता" इति । ननु चात्र शस्त्रहतस्यैव नान्यस्येति **मिताक्षरा**दिनिबन्धकृद्भिर्नियमितत्वात्कथं युवान इत्युक्तम् । तत्र च **वृद्धयाज्ञवल्क्यः**—"श्राद्धदाने चतुर्दश्यां विना शस्त्रहतं मृतम् । ज्येष्ठपुत्रो विनश्येत पितॄणां चाप्यधोगतिः॥" इति । अतो युवान इति त्रयोदश्यां योजनीयमिति चेत् । मैवम्, युवशब्दस्य विशेषादिना दंशसर्पहताद्युपलक्षकत्वात् । तथा च-**वृद्धयाज्ञवल्क्यः**-"मृत्काष्ठोपललोहेषु विद्युद्व्यालविषादिभिः । नखिदंष्ट्रिविपन्ना ये तेषां शस्ता चतुर्दशी ॥ "जलादिषु विपन्ना ये वह्नौ वा करकान्विताः।पक्षिसर्पविपन्ना ये तेषां शस्ता चर्तुदशी ॥ कण्ठपाशावपन्ना ये योगिनी चापमृत्युना । लतावृष्टिविपन्ना ये विप्रशापहताश्च ये ॥ शीतवातविपन्ना ये शस्त्रघातहतास्तथा । पापमृत्युहता ये वै तेषां शस्ता चतुर्दशी॥" इति । अथवा युवानस्तत्र म्रियन्त इति पाठस्तत्र । यतस्त्रयोदश्यां श्राद्धं प्रशस्तं तस्मात्तद्गृहे युवानो न म्रियन्त इत्यर्थः । त्रयोदश्यामेव । तथा च **महाभारते**—"जातीनां तूत्तरे श्रेष्ठः कुर्याच्छ्राद्धं त्रयोदशी । नवम्यां तु युवानोऽस्य प्रमादायतनिग्रहः॥" इति । शस्त्रहत इत्येकत्वं तत्र एकपार्वणं सूचयति । तेन पित्रादित्रये शस्त्रहते पार्वणामित्यर्थः । अत्रैक आहुः-—त्रयाणामपि शस्त्रहतत्वे पृथक् पृथगेकोद्दिष्टमेवेति । तदयुक्तम् । पार्वणस्यैवातिदेशात् । तथा च **स्मृतिदर्पणे**—"एकस्मिन् वा द्वयोर्वापि विद्युच्छस्त्रेण वा मृतौ । एकोद्दिष्टं सुतः कुर्यात्त्रयाणां दर्शवद्भवेत् ॥" तथा—"पित्रादयस्त्रयो यस्य शस्त्रघाता अनुक्रमात् । स सुतः पार्वणं कुर्यात्पित्रादेर्न पृथक् पृथक्" इति । एकोद्दिष्टमिति शेषः । **स्मृतिचन्द्रिकायामपि**—"एकस्मिन् द्वयोर्वैकोद्दिष्टविधिः" इति । त्रयाणां पार्वणमित्यर्थः । अत्रैक आहुः—रणे संमुखप्रहारैर्हतशूराणामपि शस्त्रहतत्वाच्चतुर्दश्यामेवेति । तदयुक्तम् । तेषां परमगतित्वात् । तथा च **पुराणसमुच्चये**—"वितत्य रणयज्ञं ये गोब्राह्मणहितैषिणः । स्वामिपादाग्रसंलग्ना यान्ति शस्त्रैश्च खण्डशः ॥ न ते शस्त्रहतैस्तुल्या पुराणज्ञैरुदाहृताः । न च तिर्यक्त्वमायान्ति प्रयान्ति सुरमन्दिरम् ॥ श्रूयते च्चात्र गाथेयं भार्गवाङ्गिरसोर्मते । द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ॥ परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ।" इति । यत्तु—"प्रीयन्ते पितरश्चास्य ये शस्त्रेण रणे हताः ॥" इति **मनुना** चतुर्दश्यामुक्तं, तत्पराङ्मुखहतादिविषयमित्यविरोधः । न च संमुखपराङ्मुखादिशस्त्रहतयोः साम्यमुचितम् । तस्मात्संमुखरणहतानां चतुर्दश्यां श्राद्धं नेति । अत्रान्येऽप्यपवादाः **पुराणसमुच्चये**—"मृताश्चान्याश्च बहुशो ब्रह्मक्षत्रविशां स्त्रियः । मृताश्च पतिभिः सार्धं सतीलोकं सनातनम् । नैताः शस्त्रहतैस्तुल्याः याश्चान्याः पतिना सह । म्रियन्ते पतिभक्त्या तु द्युलोकं प्राप्नुवन्ति ताः ॥ न च संन्यासिनां श्राद्धं कर्तव्यं च चतुर्दशीम् । तपः संन्यासयोगेन ते यान्ति परमां गतिम् ॥ ये म्रियन्त्यातुरत्वेन भृग्वग्न्यनशनाम्बुभिः । नैव शस्त्रहतस्तेऽपि अवस्थान्तरगार्हिताः ॥ नैव शस्त्रहतैस्तुल्या आतुरत्वान्मृता यतः । एतेषां नापमृत्युं तं पुराणज्ञा वदन्ति हि ॥" अत्यातुरत्वात्संन्यासिनोऽत्र श्रुतिविरोधनम् । "यथाऽत्र श्रूयते गीतं पुराणज्ञैः पुरातनैः । न देववचनात्तात न लोकवचनादपि ॥ मतिरुत्क्रमणीया ते प्रयागमरणं प्रति" इति । एतद्व्यातिरिक्तेभ्यश्चतुर्दश्यां श्राद्धाकरणे तत्रैवोक्तम्-"जन्मान्धपङ्गुविकला वाग्जडा लुप्तचूचुकाः । न कुर्वन्ति च ये श्राद्धं कृष्णपक्षे चतुर्दशीम् ॥ ज्ञात्वा शस्त्रहतान्बन्धूंस्ते म्रियन्ते चिरायुषः । प्रयान्ति परमं घोरं ते षामेव हिशस्यते" न चैते चतुर्दश्यामेव प्राप्नुवन्तीति वाच्यम्, पितामहाद्यतृप्तिप्राप्तेः । तथाच तत्रैव "अदत्त्वा षण्मासं प्राग्वै यो ददाति चतुर्दशीम् । पितृहा चोच्यते सद्भिरिह लोके परत्र च ॥ तस्माच्छ्राद्धं पितॄणां तु प्राक्पश्चाच्च चतुर्दशीम् । दद्याच्छस्त्रहतेभ्यश्च इति प्राह पुरा श्रुतिः" इति । चतुर्दश्याः पूर्वमष्टम्यादौ पश्चादमायामित्यर्थः । **कात्यायनोऽपि**"शस्त्रादिभिर्हतस्यापि कुर्यात्प्रातिदिनं सुतः । पार्वणं कृष्णपक्षे तु वर्जयित्वा चतुर्दशीम् ॥" बृहदुशनाः—"यदि कालान्तरे वाऽपि यदा शस्त्राद्विपद्यते । सोऽपि शस्त्रहतो ज्ञेयस्तस्य शस्ता चतुर्दशी ॥" तथा "कृष्णपक्षे चतुर्दश्यां मघायुक्तं दिनं यदि । पिण्डनिर्वपणं कुर्यात् यस्य शस्त्रहतः पिता ।" **न्मनुः**—"महालये चतुर्दश्यां मघायां पुत्रवानपि । पिण्डनिर्वपणं कुर्यात् तृप्त्यर्थं शस्त्रघातिनः ॥" इति । अत्र विशेषो **वृद्धयाज्ञवल्क्येनोक्तः**—"शस्त्रमृत्युः पिता यस्य शस्त्रघाती पितामहः । पार्वणं तस्य विज्ञेयं त्रयस्ते शस्त्रघातकाः ॥ यथा

विहङ्गः पक्षाभ्यामङ्गमाश्रित्य तिष्ठति । तथा पिता च वृद्धश्च पितामहसमाश्रितौ'' इति तत्सदाचाराभावाच्चिन्त्यम् । यदि त्वस्यामेव चतुर्दश्यां पित्रोः क्षयाहस्तदापि प्रेतपक्षमृतत्वात्पार्वणमेवेति चेत् तन्न, ''आषाढ्याः पञ्चमे पक्षे प्रेताख्ये तु क्षयो यदि । पार्वणं तत्र कुर्वीत वर्जयित्वा चतुर्दशीम्'' इति **गौतमोक्तः** । साग्निविषयं पार्वणं चेत्यविरोधः । **अमावास्यायाᳬ सर्वमित्यमावास्यायाᳬसर्वमिति**–सर्वं सर्वे कामाः । अमावास्यायां श्राद्धकरणेन सर्वकामाँल्लभत इत्यर्थः । तथा च **पुराणसमुच्चये**–''श्राद्धं कुर्वन्नमायां वै यत्नेन पुरुषः शुचिः । सर्वान्कामानवाप्नोति तिथ्यां तिथ्यां मुदा युतः ॥''इति । अस्य निरुक्तिस्तत्रैव ।''कलानामाप्यायनार्थं रविर्विंशतिचन्द्रमाः । सुषुम्नाख्या कला यासौ सूर्यस्य नवमी स्मृता ।। विंशतिद्वौ लवौ तस्यां चन्द्रमाः सूर्यमण्डले । अमाचन्द्रस्य संयोगादमावास्यां विदुर्बुधाः ॥'' इति । अपरपक्षे श्राद्धमाह **यमः**–''हंसे वर्षासु कन्यास्थे शाकेनापि गृहे वसन् । पञ्चम्योरन्तरे दद्यादुभयोरपि पक्षयोः ॥'' **सुमन्तुः**–''कन्याराशौ महाराज यावत्तिष्ठेद्दिभावसुः । तावत्कालं भवेदेवं वृश्चिकं यावदागतम् ॥ येयं दीपान्विता राजन् ख्याता पञ्चदशी भुवि । तस्यां देयं न चेद्दत्तं पितृणां वै महालयः'' इति । अत्र शुक्लपञ्चमी, तुलासंक्रान्तिदीपामावास्यावृश्चिकसंक्रान्तिश्चेति पूर्वपूर्वासंभवे उत्तरोत्तरे श्राद्धकाला इत्यर्थः । द्विरुक्तिर्मङ्गलार्था । इतिशब्दः सामाप्तौ । अत्रैतच्चिन्त्यते–विधवैव कर्ता चेत्तदा किमपरक्षे श्राद्धं त्रिपिण्डकं कुर्यादुत षट्पिण्डकमिति । तत्रैक आहुः–स्वपित्रादिभ्यो दातुमनधिकारात्त्रिपिण्डकमेवेति । तदयुक्तम् । क्षयाहश्राद्धं विना षट्पिण्डकस्य विहितत्वात् । तथा च-–''स्वभर्तृप्रभृतित्रिभ्यः पितृभ्यश्च तथैव च । विधिं वा कारयेच्छ्राद्धं यथाकालमतन्द्रिते । षट्पिण्डकमित्यर्थः । कारयेदिति स्वार्थे णिच् । अधिकाराविषयो वा । अपर आहुः–मृताहश्राद्धं सपत्नीकर्तृकं सर्वत्र पार्वणमेवेति । तथा च **लौगाक्षिः**–''सर्वाभावे स्वयं पत्न्यः स्वभर्तृणाममन्त्रकम् । सपिण्डीकरणं कुर्युस्ततः पार्वणमेव च॥'--**सुमन्तुरपि**–''अपुत्रे प्रस्थिते कर्ता नास्ति चेच्छ्राद्धकर्मणि । तत्र पत्न्यपि कुर्वीत सापिण्ड्यं पार्वणं तथा''इति । तदप्ययुक्तम् । अनयोर्वचनयोः क्षयाहव्यतिरिक्तविषयत्वाद्दर्शापरपक्षमृतिविषयत्वाद्वा । तथा च–''भर्तुः श्राद्धं च या नारी मौढ्यात्पार्वणमाचरेत् । न तेनाप्यायते भर्ता कृत्वा च नरकं व्रजेत्'' इति पार्वणनिषेधस्य क्षयाहविषयत्वावगमात् । दर्शापरपक्षमृतौ तु पार्वणस्य तुल्यन्यायेनोचितत्वादित्यलमतिविस्तरेणेति भद्रम् ॥ इति श्राद्धकाशिकायां नवमी कण्डिका ॥ ९ ॥

स्मृतेरनेकविषयादनन्तत्वाच्च सर्वथा । तत्त्वं ज्ञातुमशक्यं तदलं वाऽनल्पजल्पितैः ॥ १ ॥
स्वबुद्धिकल्पितं नेह वचनं लिखितं मया । दृष्टं श्रुतममूलं वा समूलं मे न दूषणम् ॥ २ ॥
दृष्टं यत्स्वल्पदीर्घेषु निबन्धेषु तदाहृतम् । श्रुतं स्मृत्यविरुद्धं यत्तत्पठन्तीत्युदाहृतम् ॥ ३ ॥
प्रमाणमप्रमाणं वा सर्वज्ञः कर्तुमर्हति । दृष्टे श्रुते च विश्वासो मादृशैः कर्तुमिष्यते ॥ ४ ॥
कर्ता चेन्न चिरंतनः किमियता दोषो निबन्धे भवेत् सूक्तिश्चेदधुनातनैरपि कृते ग्रन्थे कथं नादरः ।
इत्थं ये कृपयन्त्यनल्पमतयस्तान् प्रत्यदो प्रज्ञधीः सन्तः सन्तामिमं निबन्धमखिलं किं चाद्रियन्तां हृदि ॥
वाणव्योमेषुविध्वंके वर्षे कार्तिकमासके । कृष्णमिश्रोऽकरोद्ग्रन्थं शुक्लपक्ष इमं शुभम् ॥

इत्यावसथिकश्रीमदतिसुखात्मजश्रीविष्णुमिश्रतनूजात्मनः कृष्णमिश्रस्य कृतौ
श्राद्धकाशिकायां सूत्रवृत्तौ काम्यश्राद्धप्रकरणम् ।

समाप्ता चेयं काशिका सूत्रवृत्तिरिति ।

अथ

भोजनसूत्रम् ।

वन्दे श्रीदक्षिणामूर्त्तिं सच्चिदानन्दविग्रहम् ।
सर्वार्थानां प्रदातारं शिवादेहार्धधारिणम् ॥ १ ॥

अथातः श्रुतिस्मृतीरनुसृत्य भोजनविधिं व्याख्यास्यामः ॥ आचान्तो धृतोत्तरीयवस्त्रो धृतश्रीखण्डगन्धपुण्ड्रो भोजनशालामागत्य गोमयेनोपलिप्य शुचौ देशे विहितपीठाधिष्ठितो नित्यप्राङ्मुखो न दक्षिणामुखो न प्रत्यङ्मुखो न विदिङ्मुखः। श्रीकामश्चेत्प्रत्यङ्मुखः सत्यकामश्चेदुदङ्मुखो यशस्कामश्चेद्दक्षिणामुखो जीवन्मातृकवर्जं हस्तपादास्येषु पञ्चस्वार्द्रो नीवारचूर्णैर्गोमृदा भस्मनोदकेन वा मण्डलं कुर्यात् । चतुष्कोणं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य मण्डलाकृति वैश्यस्याभ्युक्षणꣳ शूद्रस्य, यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति । एवं मण्डलभस्मैतत्सर्वभूतानि रक्षत्विति तत्र भूमौ निहितपात्रेऽन्ने परिविष्टे पितुन्तुस्तोषमित्यन्नꣳ स्तुत्वा मानस्तोके नमो वः किरिकेभ्यो नमः शम्भवायेत्यभिमन्त्र्य प्रोक्षयेत्, सत्यन्त्वर्त्तेन परिषिञ्चामीति प्रातर्ऋतन्त्वा सत्येन परिषिञ्चामीति सायम् । तेजोऽसि शुक्रमस्यमृतमसीति यजुषाऽन्नमभिमृश्याग्निरस्मीत्यात्मानमग्निं ध्यात्वा भूपतये भुवनपतये भूतानाम्पतय इति चित्राय चित्रगुप्ताय सर्वेभ्यो भूतेभ्यो नम इति दिवा प्रणवादिकैः स्वाहानमोऽन्तैर्मन्त्रैः प्रतिमन्त्रं बलीन् हरेत्, अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ॥ त्वं ब्रह्म त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारस्त्वं विष्णोः परमं पदम् । अमृतोपस्तरणमसि स्वाहेति विष्णुमन्त्रमभिध्यायन्नाचम्यान्नममृतं ध्यायन् मौनी हस्तचापल्यादिरहितो मुखे पञ्च प्राणाहुतीर्जुहोति ॥ १ ॥

प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा समानाय स्वाहोदानाय स्वाहेति क्रमं याज्ञवल्क्यो मन्यते उदानाय स्वाहेति शौनकबौधायनौ । याज्ञवल्क्योदितक्रमो वाजसनेयिनाम् । दन्तैर्नोपस्पृशेत् । जिह्वया ग्रसेदङ्गुष्ठप्रदेशिनीमध्यमाभिः प्रथमामङ्गुष्ठमध्यमानामिकाभिर्द्वितीयामङ्गुष्ठानामिकाकनिष्ठिकाभिस्तृतीयां कनिष्ठिकातर्जन्यङ्गुष्ठैश्चतुर्थीꣳ सर्वाभिरङ्गुलीभिः साङ्गुष्ठाभिः पञ्चमीम् । अङ्गुष्ठानामिकाग्राह्यान्नेनैता आहुतय इति हारीतव्याख्यातारः । सर्वाभिरेता इति बौधायनः । मौनं त्यक्त्वा प्राग्द्रवरूपमश्नीयान्मध्ये कठिनमन्ते पुनर्द्रवाशी स्यान्मधुरं पूर्वं लवणाम्लौ मध्ये कटुतिक्तादिकान् पश्चाद्यथासुखं भुञ्जीत भुञ्जानो वामहस्तेनान्नं न स्पृशेन्न पादौ न शिरो न बस्तिं न पराभोजनꣳ स्पृशेदेवं यथारुचि भुक्त्वा भुक्तशेषमन्नमादाय "मद्भुक्तोच्छिष्टशेषं ये भुञ्जते पितरोऽधमाः । तेषामन्नं मया दत्तमक्षय्यमुपतिष्ठतु, इति पितृतीर्थेन दत्त्वाऽमृतापिधानमसि

स्वाहेति हस्तगृहीतानामपामर्धं पीत्वाऽर्धं भूमौ निक्षिपेत् । रौरवे पूयनिलये पद्मार्बुदनिवासिनाम् । अर्थिनाॐ सर्वभूतानामक्षय्यमुपतिष्ठत्विति, तस्माद्देशादपसृत्य गण्डूषशलाकादिभिस्तर्जनीवर्जमास्यं शोधयेत् ॥ २ ॥ न भार्यादर्शनेऽश्नीयान्न भार्यया सह न संध्ययोर्न मध्याह्ने नार्धरात्रे नायज्ञोपवीती नाऽऽर्द्रशिरा नार्द्रवासा नैकवासा न शयानो न ताम्रभाजने न भिन्ने न राजतसौवर्णशङ्खस्फाटिककाँस्यभाजनवर्जं न लौहे न मृन्मये न संधिसंस्थिते न भुवि न पाणौ न सर्वभोजी स्यात्किंचिद्भोज्यं परित्यजेदन्यत्र घृतपायसदधिसक्तुपललमधुभ्यः, साध्वाचान्तो दक्षिणपादाङ्गुष्ठे पाणिं निःस्रावयेदङ्गुष्ठमात्रः पुरुषो अङ्गुष्ठं च समाश्रितः । ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुगिति श्वात्राः पीता इति नाभिमालभेत, अमृताः इत्यतः प्रागगस्त्यं वैनतेयं च शनिं च वडवानलम् ॥ आहारपरिणामार्थं स्मरेद्भीमं च पञ्चममित्युदरमालभ्य 'शर्यातिं च सुकन्यां च च्यवनं शक्रमश्विनौ । भोजनान्ते स्मरेन्नित्यं तस्य चक्षुर्न हीयत' इति स्मृत्वा मुखशुद्धिं कुर्यान्नमो भगवते वाजसनेयाय याज्ञवल्क्याय नमो भगवते वाजसनेयाय याज्ञवल्क्याय ॥ ३ ॥

अथ श्रीदयोगीश्वरद्वादशनामानि ।

वन्देऽहं मङ्गलात्मानं भास्वन्तं वेदविग्रहम् ।
याज्ञवल्क्यं मुनिश्रेष्ठं जिष्णुं हरिहरप्रभम् ॥ १ ॥
जितेन्द्रियं जितक्रोधं सदा ध्यानपरायणम् ।
आनन्दनिलयं वन्दे योगानन्दं मुनीश्वरम् ॥ २ ॥
एवं द्वादश नामानि त्रिसंध्यं यः पठेन्नरः ।
योगीश्वरप्रसादेन विद्यावान्धनवान् भवेत् ॥ ३ ॥

समाप्तोऽयं ग्रन्थः ।

पुस्तक मिलनेका ठिकाना-
खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस, बम्बई.
गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" प्रेस, कल्याण-बम्बई.